THE

NÂMALINGÂNUS'ÂSANA

(AMARAKOSHA.)

OF


AMARASIMHA.

With the Commentary (Vyâkhyâsudhâ or Ramâs'ramî)

OF

BHÂNUJI DÎKSHIT

(SON OF THE GRAMMARIAN BHATTOJI DÎKSHIT).



EDITED WITH NOTES

BY

PANDIT S'IVADATTA,

OF JAYPUR.

Fifth Edition.

REVISED BY

WÂSUDEV LAXMAN S'ÂSTRÎ PANS'ÎKAR.



PUBLISHED BY

PÂNDURANG JÂWAJÎ,

PROPRIETOR OF THE "NIRNAYA-SÂGAR" PRESS,

BOMBAY.

1929.

[All rights reserved by the publisher.]

PUBLISHER:—Pandurang Jawaji, } at the "Nirnaya Sagar" Press,
PRINTER:—Ramchandra Yesu Shedge, } 26-28, Kolbhat Lane, Bombay.

॥ श्रीः ॥

नामलिङ्गानुशासनं

नाम

अमरकोषः ।

पण्डितवरश्रीमदमरसिंहविरचितः ।



महामहोपाध्यायश्रीभट्टोजिदीक्षितात्मजविद्वद्वरश्रीभानुजिदीक्षितकृतया
व्याख्यासुधाख्यया व्याख्यया सहितः ।

जयपुरराजधानीवास्तव्येन पाठशालाध्यापकेन दाधिमथवंश-
भूषणसुमतिश्रीबदरीनाथात्मजश्रीशिवदत्तकोविदेन
टिप्पण्यादिपरिष्कारपुरस्कारेणोपस्कृतः ।

पञ्चमं संस्करणम् ।

पणशीकरोपाह्वलक्ष्मणशर्मतनुजनुषा वासुदेवशर्मणा संशोधितम् ।

स च

मुम्बय्यां

पाण्डुरङ्ग जावजीश्रेष्ठिभिः

स्वीये निर्णयसागराख्यमुद्रणालये आयसाक्षरैर्मुद्रयित्वा प्रकाशितः ।

~~शके १८५०~~ सन १९२९.

भूमिका ।

श्रीगणेशाय नमः ।

धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयनिष्पत्तिर्हि सर्वाभीप्सिता । सा च श्रुतिस्मृतिपुराणेतिहासादितत्तच्छास्त्रार्थज्ञानाधीना । तत्तदर्थज्ञानं च तत्तदवान्तरवाक्यार्थज्ञानाधीनम् । तत्तद्वाक्यार्थज्ञानं च तत्तत्पदार्थज्ञानाधीनम् । तत्तत्पदार्थज्ञानं च तत्तत्पदशक्तिग्रहाधीनम् । तत्तत्पदशक्तिग्रहे च

'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सांनिध्यतः सिद्धपदस्य वृद्धाः ॥'

इति शिष्टोक्तिदर्शिते शक्तिग्रहोपायेषु कोषस्यैव मुख्यकारणत्वम् । व्याकरणस्य यौगिकशब्दशक्तिग्राहकत्वेऽपि रूढयोगरूढयोः शक्तिग्राहकत्वाभावात् । उपमानादीनां स्वतःशक्तिग्राहकत्वाभावात् ॥ कोषेषु च केवलनामानुशासनभूतानां केवललिङ्गानुशासनभूतानां च लाघवेनोपकारकत्वाभावेन नामलिङ्गोभयानुशासनत्वेनामरसिंहविरचितस्यास्यैव कोषस्य सर्वोपकारकत्वम् । 'अयममरसिंहः किंजातीयः कदा कुत्रत्यं महीमण्डलं मण्डयांचकार' इति न निश्चितम् । परंतु देवसामान्यनामान्युक्त्वा देवविशेषनामप्रारम्भे बुद्धनाम्नां लेखनेन बौद्धत्वमस्यावसीयते ॥

केचित्तु—

'धन्वन्तरिः क्षपणकोऽमरसिंहशङ्कू वेतालभट्टघटखर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य ॥'

इति वैक्रमनवरत्नख्यापकश्लोकतो विक्रमसमकालिकत्वममरसिंहस्य वदन्ति ॥

परे तु—

'इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ च शाब्दिकाः ॥'

इति पद्यानुरोधेन पाणिनि-समन्तभद्रयोरन्तरालभवत्वं ब्रुवते ॥ अत्रेदं बोध्यम्—इदं न क्रमबोधकम्, पाणिनिमहाभाष्यप्रवृत्तिसमकालनिष्पत्तिकचान्द्रव्याकरणकर्तृचन्द्राचार्यस्य पाणिनितः प्राग्लेखनात् ॥

अस्य वैयाकरणत्वं तु—

'अमरसिंहो हि पापीयान्सर्वं भाष्यमचूचुरत् ।'

इति पद्यात्सकलभाष्यतत्त्वज्ञत्वस्य प्रतीतेः प्रतीतमेव ॥ इत्थं भङ्ग्यन्तरेणोक्तिस्तु बौद्धत्वेन सकलवैदिकविरुद्धत्वात् ॥ अस्य सर्वोपकारकत्वादेव बहुभिरस्य व्याख्याः कृताः । तासु मदृष्टास्तु—

१—**अमरकोशोद्घाटनम्** भट्टक्षीरस्वाम्युल्लेखितम् ॥
तत्र च श्रीभोज-राजशेखर-भट्टि-माघ-प्रभृतीनां नामानि सन्ति ॥

२—**पदचन्द्रिका** रायमुकुटेन १३५३ शकाब्दे निर्मिता ॥
तत्रत्यग्रन्थादीनां नामानि डॉक्टर श्रीयुतभाण्डारकरैः प्रकाशितानि ॥

३—बुधमनोहरा स्वयंप्रकाशशिष्यवेदान्तिमहादेवविरचिता ॥
तत्र मुकुटनाम वर्तते ॥

४—पीयूषव्याख्या रामकृष्णदीक्षितकृता ॥
अत्रापि मुकुटनाम वर्तते ॥

५—अमरचन्द्रिका परमानन्दमैथिलकृता मुकुटसारभूता ॥

६—पदविवृतिः लिङ्गसूरिविरचिता ॥

७—व्याख्यासुधा भानुजिदीक्षितकृता ॥
अत्रत्यग्रन्थादिनामानि पत्रान्तरे मुद्रितानि ॥

८—अमरविवेकः महेश्वरकृतः ॥

आभ्यो व्याख्याभ्यो भिन्ना व्याख्या राधाकान्तबहादुरप्रकाशितास्तदीयशब्दकल्पद्रुमप्रस्तावनातो ज्ञेयाः ॥

अधुनैतद्देशे प्रचुरप्रचाराया व्याख्यासुधाया मुद्रणं वाराणस्यां जातम् । तथापि प्रायो दुर्लभतामवेक्ष्य पुनर्मुद्रणं मुम्बईस्थनिर्णयसागराध्यक्षश्रीयुतजावजीदादाजीभिर्वाञ्छितम् । तैः प्रेरितेन मया उक्तव्याख्यानां द्वित्रपुस्तकसंपादनपूर्वकं व्याख्यासुधोपस्कारो यथाबुद्धि समस्कारि ॥ यैर्महात्मभिरत्रावसरे पुस्तकं दत्तं तेषां नामान्यपि धन्यवादपूर्वकं प्रकाश्यन्ते—

अमरकोषोद्घाटनस्य पुस्तकम्	जयपुरराजगुरुपुरोहितश्रीबलदेवचन्द्रशर्मणाम् ॥
,,	वचूणग्रामवास्तव्यदाधीचकाशीनाथशर्मणाम् ॥
पदचन्द्रिकापुस्तकम्	तैलिङ्गान्वयरामकृष्णशर्मणाम् ॥
,,	पण्डितवरसरयूप्रसादशर्मणाम् ॥
,,	दाधीचरामप्रतापशर्मणाम् ॥
बुधमनोहरा	दाधीचव्यासबालावकसशर्मणाम् ॥
पीयूषम्	जयपुरराजगुरुभट्टश्रीलक्ष्मीदत्तसुतश्रीदत्तशर्मणाम् ॥
व्याख्यासुधा	,,
,,	काव्यमालानिष्पादकपण्डितवरदुर्गाप्रसादशर्मणाम् ॥
,,	पण्डितवरनारायणशास्त्रिणाम् ॥
,,	ज्योतिर्विद्वरबालचन्द्रशर्मणाम् ॥
अनेकार्थकैरवाकरकौमुदी (हैमनानार्थव्याख्या) त्रिकाण्डशेषः हारावली	जयपुरराजगुरुपर्वणीकरोपाह्वश्रीयुतनारायणभट्टानाम् ॥
अभिधानचिन्तामणिः (सटीकहैमनाममाला)	प्रागुक्तश्रीदत्तशर्मणाम् ॥

तत्र टीकाभागे प्रमापकनामानि तु—

अमरः १४ पृष्ठे ३४ पङ्क्तौ. अमरटीका १२।२०. अमरशेषः ९६।१७. अलंकारकृताम् २७।३७. उत्पलः ८०।७. कात्यः १८।१३. कामन्दकिः ११४।१६. कालिदासः ८६।१२. कौटल्यः १७।३४. कौशिकः ३८।१५. क्षीरस्वामी ७५।१२. गौडः १०।२९. चाणक्यः

८३।३१. चान्द्रः ३६।३६. त्रिषष्टिशलाकापुरुषचरिते (स्वकृते) ४।२९. दुर्गः १५।१४. द्रमिलाः ३५।१२. धनपालः १९।१४. धनुर्वेदः ६६।३८. धन्वन्तरिः ५६।१६. नारदः ७६।२६. निघण्टुः (स्वकृतः) १०१।३४. नैरुक्ताः ४२।२. पालकाप्यः १०३।२९. पुराणम् १७।३८. प्रमाणमीमांसा (स्वकृता) १५।२२. प्राच्याः ११५।१४. बौद्धाः २५।१४ भट्टतोतः ७।२८. भट्टिः १२२।३२. भरतः ३०।१५. भागुरिः १७।२८. भोजः ३६।२५. मङ्खः ६८।३०. मनुः १६।१६ मनु. (कोषः) ३९।११. महाभारते २०।१५. माघः २३।५. माला १७।२२. मुनिः ५५।१८. याज्ञवल्क्यः १०१।२२. वाचस्पतिः ८।२५. वामनपुराणे १२।३५. विश्वदन्तः १३।१७. विष्णुपुराणे १७।२८. वेदे १०।१६. वैजयन्ती २७।१५. वैद्याः ५५।१०. व्याडिः १०।७. शाब्दिकाः ८१।३८. शाश्वतः १६।२३. श्रीहर्षः २८।३८. श्रुतेः १५।१२. स्मृतिः १०।१८. हलायुधः ३३।३८.

इत्थमुपलभ्यन्ते ॥

विश्वकोषः
हैमकोषः } जयपुरराजवैद्यश्रीयुतश्रीकृष्णरामकविवर्याणाम् ॥

इत्थं कोशव्याख्यापुस्तकान्येकीकृत्य यथाबुद्धिविभवं विचार्य व्याख्यासुधायाः शोधनं टिप्पणीदानं चाकार्षम्। तदत्र शोधने क्वचिन्मम प्रमादो जातः स क्षन्तव्य एव। तथा चोक्तम्—

'गच्छतस्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥'

इति विज्ञापयति

जयपुरसंस्कृतपाठशालाध्यापकः

शिवदत्तशर्मा।

चतुर्थावृत्तिप्रस्तावना ।

नामलिङ्गानुशासनीयानेकव्याख्यास्वग्रेसरत्वेन वरीवर्ति रामाश्रम्यपरपर्यायेयं व्याख्यासुधाख्या व्याख्या । अस्याः पूर्वसंस्करणं विद्वल्ललामायमानैर्जयपुरसंस्कृतपाठशालामुख्याध्यापकैर्दाधिमथकुलावतंसैः पण्डितवरशिवदत्तशर्मभिरसाधारणायासादनेकविद्वद्भ्योऽनेकविधटीकापुस्तकसंपादनयोजनेनेतरविद्वत्कर्तृकपुनःसंस्करणनिरपेक्षं शोधनमकारीति निर्विचिकित्सं पूर्ववृत्तिमुद्रितपुस्तकादवगम्यत एव । एतावतास्यान्येन पुनःसंस्करणकरणं पिष्टपेषणायितं स्यादिति न कल्पनीयं संख्यावद्भिः । प्रतिमुद्रणावृत्ति पूर्वावशेषदोषापाकरणकं संस्करणमावश्यकमेव । तदपि प्राथमिकशोधकद्वारैवापेक्षितमिति निर्विवादम् । तथापि पुनरङ्कनकालेऽनवसरतया शोधकस्य च दविष्ठत्वेन कालातिक्रमभिया चास्या द्वितीयावृत्तेः शोधनाय **श्रीमद्भिः तुकाराम जावजीश्रेष्ठिभिर्नियुक्तोऽस्मि** । उररीकृत्य च सादरं तन्निदेशं केवलं पूर्वतनसंस्कारकालीनमानुषशेमुषीनैसर्गिकदृगादिदोषकारणकानामुपरि निर्दिष्टपण्डितवरैः शोधनपत्रकेषूद्धाटितानामनुद्धाटितानां च मदृष्टिसरणिमापतितानां स्खलितानां यावद्बुद्धिबलं मार्जनमकारि । विशेषतश्चामरस्थस्य कस्यचिद्वस्तुनो यथासंभवं नाम्नां नाम्नोर्नाम्नश्च व्याख्यावसरेऽमुकस्य वस्तुन इमानीमे इदं वा नामेति व्यवस्था व्याख्यासुधायां कुत्रचनासीद्बहुत्र च नासीत्सापि व्युत्पित्सूनामनायासतोऽवगमाय तत्र तत्रेमानीयन्त्यमुकस्य वस्तुनो नामानीति स्थूलाक्षरविन्यासेन कृता ॥

अभ्यर्थये च नामंनाममत्रापि स्खलितं क्षमध्वमिति करुणावरुणालयेभ्यो विद्वद्भ्योऽहं सविनयं

पणशीकरोपाह्वलक्ष्मणशर्मसूनुः

वासुदेवशर्मा ।

---

४६ पृष्ठव्याख्यासुधाटिप्पणीशेषपूर्तिः—

"सा दृष्टेन्दुः सिनीवाली" इति मूलं 'सा अमावास्या दृष्टेन्दुः चतुर्दशीयोगात् दृष्टचन्द्रा चेत् सिनीवालीपदवाच्या भवति' इत्येवं फलितार्थकत्वेन व्याख्यातुर्व्याख्यासुधाकारस्याशयस्तु—

'तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूः स्मृता ।'

इति प्रचेतोवाक्यानुसारेण अमावास्याक्षयदिने सूर्योदयतः प्राक् चन्द्रोदयकाले अमावास्याया असत्वाच्चतुर्दश्या एव सत्त्वेन तद्दिन एवागत्या अमावास्याकार्यस्यापि करणीयत्वेनामात्वव्यवहारश्चतुर्दशीदिन एवेत्येवं बोधनीयः ॥ परं त्विदं न सार्वदिकम् । व्यर्कचन्द्रस्य (चन्द्रसूर्योभयान्तरस्य) द्वादशभ्योंऽशेभ्योऽनधिकत्वे चन्द्रादर्शनस्य अनल्पत्वे चन्द्रदर्शनस्य नियमनं 'दस्रेन्दवः १२' इति वाक्येन यद्यपि तिथ्याद्यानयनेऽनुपयुक्ततया शरसंस्काररहितस्यैव कृतमिति प्रतीयते तथापि शृङ्गोन्नतिचन्द्रदर्शनशौक्ल्यमानानयनप्रकरणे शरसंस्कारस्यापि दानात् चन्द्रदर्शने शरसंस्कारदानस्यात्यावश्यकत्वमिति व्यक्तीकृतम् ॥ तथा चोपपञ्चाशंकस्य चन्द्रशरस्योत्तरदिक्कत्वे अमावास्याप्रथमतुर्यांशेपि शुक्लप्रतिपच्चरमतुर्यांशेऽपि चन्द्रदर्शनं भवत्येव । एवं चन्द्रशरस्य दक्षिणदिक्कत्वे कृष्णचतुर्दशीचरमतुर्यांशे शुक्लद्वितीयाप्रथमतुर्यांशेऽपि चन्द्रदर्शनं नैव भवति । दक्षिणोत्तरशरतारतम्यमेवात्र प्रधानं बीजमिति व्यञ्जयितुमेव **'अमाक्षये सिनीवाली'** इत्यनुक्त्वा 'सा दृष्टेन्दुः सिनीवाली' इत्येवोक्तं सर्वविदा कोषकारेणेति निवेदयति टिप्पणीकर्ता दाधिमथः ॥

॥ श्रीः ॥

श्रीमदमरसिंहविरचितः

अमरकोषः ।

व्याख्यासुधाख्यया व्याख्यया समेतः ।



प्रथमं काण्डम् ।

बल्लवीवल्लभं नत्वा गुरुं(गिरं) भट्टोजिदीक्षितम् ।
आ(अ)मरे विदधे व्याख्यां मुनित्रयमतानुगाम् ॥

प्रारिप्सितप्रत्यूहापनुत्तये कृतं मङ्गलं शिष्यशिक्षार्थमादौ निबबन्ध—

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।
सेव्यतामक्षयो धीराः स श्रिये चामृताय च ॥ १ ॥

यस्येति ॥ हे अनघाः, भवद्भिः स धीराः सेव्यताम् । न अघं पापं येषां तेऽनघा निष्पापाः । सुकृतिन इति यावत् । सुकृतिन एव तं सेवितुं प्रभवन्तीति त एव संबोध्यन्ते । 'धर्मेण पापमपनुदति' इति श्रुतेः । श्रियं राति ददाति । 'रा दाने' (अ० प० अ०) अस्मात् 'क्विप् च' (३।२।७६) इति क्विप् । धीरा ज्ञानप्रदो गुरुः । अनेन 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्' इति श्रुत्यर्थ उपदिष्टः । 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति गुरुसेवायाः फलमाह—श्रिये चामृताय चेति । चतुर्थयमुभयोः प्राधान्यद्योतनाय । भुक्तिमुक्तिप्राप्तिर्गुरुसेवातो भवति । 'क्रियार्थोपपदस्य–' (२।३।१४) इति चतुर्थी । तादर्थ्ये (वा० २।३।१३) वा । तदुक्तं भागवते—'योगार्द्धमापुरुभयीं यदुहैहयाद्याः' इति । ननु गुरोः श्रियोऽभावात्ततः कथं सा प्रार्थ्य(प्य)त इत्याशङ्क्याह—यस्येति । अस्य गुरोरी लक्ष्मीरस्ति, गुणाश्च सन्ति । तदुक्तं भागवते—'ऋते भवत्पादपरायणान्न मां विन्दन्त्यहं त्वद्दया यतोऽजित' इति । 'सत्यं शौचं दया क्षान्तिस्त्यागः संतोष आर्जवम् । शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् ॥ ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः । स्वातन्त्र्यं कौशलं कान्तिर्धैर्यं मार्दवमेव च ॥' इत्यादयो गुणाः । कीदृशस्यास्य—ज्ञानदयासिन्धोः । ज्ञायतेऽनेनेति ज्ञानं शास्त्रम्, दया निष्कारणपरदुःखप्रहाणेच्छा, तयोः सिन्धोरिव । शास्त्रसंपन्नस्य, दयापूर्णस्य च । अनेन 'श्रोत्रियं ब्रह्मनिष्ठम्' इति विशेषणयोर्मध्ये श्रोत्रियत्वमुक्तम् । स ज्ञानवानपि किमर्थं दास्यतीत्यतो दयावत्त्वमुक्तम् । 'दयालोरसमर्थस्य दुःखायैव दयालुता' इत्यतो ज्ञानवत्त्वमुक्तम् । कीदृशस्य—अगाधस्य । न गाधस्तलस्पर्शो यस्य गम्भीरस्य । विषयानाकृष्टस्येति यावत् । यद्वा अगं शैलं वृक्षं वा आप्नोति । 'अन्येभ्योऽपि दृश्यते' (वा० ३।२।१०१) इति आप्नोतेः (आपॄ व्याप्तौ । स्वा० प० अ०) डः । टिलोपः (६।४।१४३) । सवर्णदीर्घः (६।१।१०१) तमगं दधाति मनसेत्यगाधः । तस्य । परमेश्वरभक्तस्येति यावत् । कीदृशो धीराः—अक्षयः । अः वासुदेवः, तस्मिन् क्षयो ज्ञानं निवासो वास्य सोऽक्षयः । अनेन ब्रह्मनिष्ठतारूपं द्वितीयं विशेषणमुक्तम् । यद्वा न क्षयो हिंसा यस्य । 'क्षीष् हिंसायाम्' (क्र्या० प० अ०) 'एरच्' (३।३।५६) । पूर्वत्र तु 'क्षि निवासगत्योः' (तु० प० अ०) । परपीडापहारकः । 'यस्मान्नोद्विजते लोकः' इति गीता । **अथवा** स धीराः मया सेव्यताम् । स कः । यस्य गुणा अनघाः । न अघं येभ्यस्तेऽनघाः । पापनिवर्तका इति यावत् । 'यशः कलिमलापहम्' इति भागवतात् । शेषं समानम् । 'आशिषि लिङ्लोटौ' (३।३।१७३) इति कर्मणि लोट् । इत्थं हि गुरुसेवापरान् प्रति कर्तव्यत्वेनोपदिश्यते स्वयं वा प्रार्थ्यते । गुरुसेवामाहात्म्यं च ब्रह्मवैवर्तादौ प्रसिद्धम् । भागवतेऽपि—'यथाऽहं ज्ञानदो गुरुः' इति, 'तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा' इति च । एवं 'लक्ष्मीवान्, कल्याण(निर्मल)गुणः, शास्त्रसंपन्नो, दयापूर्णो, विषयानाकृष्टो, विष्णुभक्तो, विष्णुसाक्षात्कारवान्, ज्ञानदो, गुरुः संपत्प्राप्त्यर्थं मोक्षप्राप्त्यर्थं च निष्पापैरधिकारिभिः, मया वा सेव्यताम्' इति परेभ्यो हितमुपदिशन्, स्वहितमाशंसमानो वा ग्रन्थकृदाशीर्वादलक्षणम् (इति) लक्ष्मीस्मरणलक्षणं च मङ्गलमाचचार । यत्तु मुकुटः—'स्वेष्टदेवतासंकीर्तनाद्विशिष्टमुपक्रमितुमिष्टः' इत्यवोचत् । तन्न । देवतावाचकपदस्यात्रादर्शनात्, आशीर्लोटो दर्शनाच्च । स्वामी तु—'जिनमनुस्मृत्य' इति स्मरणलक्षणं मङ्गलमाह । तन्न । जिनवाचकपदस्यात्रादर्शनात्,

सामान्यशब्दानां जिनलक्षणविशेषपरत्वेन व्याख्यानस्य वैदिकानामनुचितत्वात्, अमरकर्तुर्जैनत्वे प्रमाणाभावाच्च । प्राञ्चस्तु—'हे धीराः, स भगवान् सेव्यतामाराध्यताम् । धैर्यशालिन एव सेवितुं शक्नुवन्तीति तानेव संबोधयति । प्रकृतत्वाद्युष्मामिर्हितेच्छुभिः । स कः—यस्य गुणा मैत्रीमर्यादादयोऽणिमादयो वा अनघा निष्पापाः । रागाद्यसंवलिता इति यावत् । यद्वा, ह्रद्याः । तथा च धरणिः—'अनघोऽपापह्रदयोः' इति । किंभूतस्य—ज्ञानदयासिन्धोः । ज्ञानं समस्तविद्या(षया)वबोधः । दृष्टं स्वार्थमनपेक्ष्य परदुःखप्रहाणेच्छा दया । तयोरम्बुतुल्ययोः सिन्धोरिव सिन्धोर्विपुलाधारस्य, अगाधस्य अनवच्छिन्नमहिम्नः । अन्यैरनधिगतज्ञानपारत्वादपरिच्छेद्य(द्यं गाम्भीर्यं य)गाम्भीर्यस्य वा । स किंभूतः—परहितापादनेषु नास्ति क्षयो विरामो यस्य, मरणादिराहित्याद्वा । फलार्थीनेव प्रेक्षावतां प्रवृत्तिरत आह—श्रिये चेत्यादि । श्रीरत्र त्रिवर्गसंपत्तिः, तां प्राप्तुम्, अमृताय मोक्षाय च । यद्वा—स सिन्धुः सेव्यताम् । स कः—'यस्य अगाधस्यातलस्पर्शस्य, अक्षयस्य सदा परिपूर्णस्य, अस्य विष्णोः क्षयस्य निवासस्य वा गुणाः अनघा रत्नादिमत्त्वान्निर्मल्यादयः, श्रिये लक्ष्म्यै, अमृताय च पीयूषाय च' इत्याहुः । अत्र समुद्रपक्षस्तु न सम्यगिव । ज्ञानेत्यस्यानन्वयात् । 'अक्षयः' इत्यस्य प्रथमान्तस्य षष्ठ्यन्तत्वेन व्याख्यानस्यानुचितत्वात् । 'अभीष्टदेवतानमस्काराद्युपनीतमदृष्टं हि—' इत्यादिग्रन्थविरोधाच्च । आशीर्नमस्क्रियावस्तुनिर्देशेष्वनन्तर्भावात् । 'ज्ञानदययोः स्यन्दते प्रवर्तते देवतारूपत्वात्' इति वा, 'ज्ञानदये स्यन्देते प्रवर्तेते देवतारूपेऽस्मिन्' इति वा समाधेयम् । षष्ठ्यर्थोऽप्याधिकार्थत्वेन समाधातुं शक्यः । 'स्यन्दतेः संप्रसारणं धश्च' (उ० १।१२) इत्युः । यत्तु मुकुटः—'ताभ्यां सिन्धुरिवेति प्रकृत्यादित्वात् (२।३।१८ वा०) तृतीया । 'तृतीयाः' (२।१।३०) इति 'योगविभागात्समासः' इति स्वंधरादयः' इति । तदपि न सम्यक् । अर्थासंगतेः । प्रातिपदिकार्थे हि सा, तस्य न भेदेनाभेदेन वात्रान्वयः संभवति । अभेदे हि तृतीया व्यर्था । प्रथमाया एवौचित्यात् ॥

अभिधेयप्रयोजने दर्शयति—

समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः ।
संपूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ॥ २ ॥

समेति ॥ मया, अन्येषां व्याड्यादीनां तन्त्राणि नाम, लिङ्गानुशासनानि, सिद्धान्तान्वा । समाहृत्यैकीकृत्य, संगृह्य वा । नामान्याख्याः, लिङ्गानि च स्त्रीपुंनपुंसकानि, अनुशिष्यन्ते विविच्य बोध्यन्तेऽस्मिन्ननेन वेति नामलिङ्गानुशासनम्, 'करणाधिकरणयोश्च' (३।३।११७) इति ल्युट् । संपूर्णं न्यूनत्वदोषरहितम् । उच्यते । कीदृशम्—वर्गैः प्रकरणैर्युक्तम् । कीदृशैः—संक्षिप्तैः स्वल्पशब्दैः । पुनः कीदृशैः—प्रतिसंस्कृतैः प्रत्येकं क्रमकथनेन कृतोत्कर्षैः[१] । यद्वा । असारांशरहितैः शब्दरचनाविशेषवद्भिः । त्रिकाण्डोत्पलिन्यादीनि नाममात्रप्रतिपादकानि । वररुच्यादिकृतानि तु लिङ्गमात्रप्रतिपादकानि । अत्र तूभयार्थसंग्रहादिदमेव सर्वैः पाठ्यमिति भावः ॥

लिङ्गज्ञानोपायं परिभाषते—

प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित् ।
स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित् ॥ ३ ॥
भेदाख्यानाय न द्वन्द्वो नैकशेषो न संकरः ।
कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमादृते ॥ ४ ॥
त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति ।
निषिद्धलिङ्गं शेषार्थं त्वन्ताद्यादि न पूर्वभाक् ॥ ५ ॥

प्रायश इति ॥ 'बहुलपार्थाच्छस्-' (५।४।४२) इति शस्, प्रायशो बाहुल्येन, रूपभेदेन व्याश्विसर्गबिन्दुरूपेण । स्त्रीपुंनपुंसकं बोध्यम् । यथा—'पद्मालया पद्मा,' 'पिनाकोऽजगवं धनुः' । क्वचिद्विशेषणपदस्थेन सर्वनामपदस्थेनापि रूपभेदेन स्त्रीपुंनपुंसकं ज्ञेयम् । यथा—'तत्परो हनुः' । अत्र तत्पर इति विशेषणाद्धनोः पुंस्त्वम् । '(कुतूः कृत्तेः स्नेहपात्रम्) सैवाल्पा कुतुपः पुमान्' । (अत्र) 'सा' इत्युक्त्या कुलाः स्त्रीत्वम् । निश्चितलिङ्गानानन्तर्यं साहचर्यम् । रूपभेदाभावेऽपि क्वचित्तेनापि लिङ्गं ज्ञेयम् । यथा—'अश्वयुगश्विनी' 'भानुः करः' 'वियद्विष्णुपदम्' । अत्राश्वयुग्भानुवियन्ति स्पष्टत्वात्स्त्रीपुंनपुंसकानि ज्ञेयानि । [illegible] स्त्रीपुंनपुंसकस्य विशेषोपादानात्तज्ज्ञेयम् । यथा—'भेरी स्त्री दुन्दुभिः पुमान्' 'रोचिः शोचिरुभे क्लीबे' ॥३॥

१—'प्रत्येकं परिपाटीस्थापनादिना कृतोत्कर्षैः' पाठान्तरम् । २—अत्रामरकोषे भिन्नलिङ्गानां प्रातिपदेनानुक्तानां भेदमाख्यातुं द्वन्द्वो न कृतः । परवल्लिङ्गं हि स्यात् । नावयवलिङ्गम् । यथा 'कुलिशं भिदुरं पविः', नतु 'कुलिशभिदुरपवयः' इति । तथा एकशेषो न कृतः । शिष्यमाणलिङ्गस्यैव हि प्रतीतिः स्यात् । यथा 'नभः खं श्रावणो नभाः', नतु 'खश्रावणौ तु नभसी' इति । तथा संकरो व्यामिश्रतापि न कृता । साहचर्यात्तल्लिङ्गत्वं हि स्यात् । यथा 'स्तवः स्तोत्रं स्तुतिर्नुतिः', नतु 'स्तुतिः स्तोत्रं स्तवो नुतिः' इति । एतच्च क्रमादृते यत्र संग्रहश्लोकादौ क्रममात्रं विवक्षितम्, तत्रानुक्तानां भिन्नलिङ्गानां द्वन्द्वादयः कृता एव । यथा 'वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः । नृब्रह्मक्षत्रविट्शूद्रैः साङ्गोपाङ्गैरिहोदिताः' इत्यत्र द्वन्द्वसंकरौ । भ्रात्रादावेकशेषश्च कृतः । उपाध्यायश्च 'क्रमादृते' इत्यन्तर्गडुं मन्वानः 'क्रमेणादृते परिपाट्योपादेये ग्रन्थे' इति व्याददरत् । गौडोऽपीत्थमबुद्ध्वा यथात्रायं संकरः क्रमादृते अनुक्रमं विना भिन्नलिङ्गानां न कृतः । अभिधानानुक्रमेणैवाभिधातुं तु कृत एव । यथा 'कपर्दोऽस्य जटाजूटः पिनाकोऽजगवं धनुः । प्रमथाः स्युः पारिषदाः' इति । मालाकारो हि स्त्रीलिङ्गादीन्प्रकरणैर्निरदिक्षत् । श्रीभोजस्त्वन्यथा व्याख्यत् । 'यथैते द्वन्द्वैकशेषसंकराः, क्रमादृते पर्यायनिर्देशं विना भिन्नलिङ्गा यद्युक्ता न स्युः' तदा न कृताः ।

कोशे, अनुक्तानां स्वपर्यायेष्वपठितानाम्, भिन्नं लिङ्गं येषां तेषाम्, लिङ्गभेदमाख्यातुम्, द्वन्द्वं एकशेषश्च न कृतः । यथा—'देवतादैवतामराः' इति न कृतम् । परवल्लिङ्गता स्यात् । यथा वा—'खं नभः श्रावणो नभाः' इत्यत्र 'खश्रावणौ तु नभसी' इति न कृतम् । शिष्यमाणलिङ्गतैव स्यात् । समानलिङ्गानां तु तौ कृतावेव । यथा—'स्वर्गनाकत्रिदिवत्रिदशालयाः', 'पादा रश्म्यङ्घ्रितुर्यांशाः' । स्थानान्तरनिर्दिष्टानां तु भिन्नलिङ्गानामपि तौ कृतावेव । यथा—'अप्सरोयक्षरक्षोगन्धर्वकिंनराः', 'मातापितरौ पितरौ' । एते स्वस्वपर्यायेषूक्ता एव । तथा तेषां क्रमादृते क्रमं विना संकरो न कृतः । स्त्रीपुंनपुंसकानि क्रमेण पठितानि, तेषु क्रमेण पठ्यमानेषु नान्तरीयकस्तु संकरो न दोष इति भावः । संकरो नाम भिन्नलिङ्गानां मिश्रतारूपः । यथा—'स्तवः' इति पुंलिङ्गमुक्त्वा, 'स्तोत्रं' नपुंसकमुक्त्वा, 'नुतिः स्तुतिः' इति स्त्रीलिङ्गावुक्तौ । ननु 'स्तुतिः स्तोत्रं स्तवो नुतिः' इति कृतम् । एवं 'जनुर्जननजन्मानि' इति नपुंसकलिङ्गान्निरूप्य, 'जनिरुत्पत्तिः' इति स्त्रीलिङ्गावुक्त्वा, उद्भवशब्दः पुंलिङ्ग उक्तः । यत्तु स्वामिनोक्तम्—'एतच्च क्रमादृते । यत्र संग्रहश्लोकादौ क्रममात्रं विवक्षितम्, तत्र अनुक्तानां भिन्नलिङ्गानां द्वन्द्वादयः कृता एव । यथा 'वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधि—' इत्यादौ द्वन्द्वसंकरौ, 'भ्रात्रादावेकशेषश्च कृतः' इति । तन्न । इत्थं हि 'पृथ्वीपुर—' इत्यादिनिर्वाहेऽपि भ्रात्रादावनिर्वाह एव । तत्र क्रममात्रस्याप्रतिपिपादयिषितत्वात् । अत एव 'अप्सरोयक्षरक्षोगन्धर्वकिंनराः' इत्यादावप्यनिर्वाहः । यदपि 'उपाध्यायश्च 'क्रमादृते' इत्यन्तर्गडुं मन्वानः 'क्रमेणादृते परिपाट्योपादेये ग्रन्थे' इति व्याख्यत्' इति स्वामी । तदपि न । अन्तर्गडुमानस्य निर्बीजत्वात् । अस्मदुक्तरीत्या

पर्यायनिर्देशं विना तूक्तानां कृता एव । यथा 'विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः' तथा 'पुत्रौ पुत्रश्च दुहिता च' । तथा नानार्थे 'संज्ञा स्वाचेतना नाम हस्तावैश्वार्थसूचना' इति ॥ ४ ॥ इति क्षीरस्वाम्युत्प्रेक्षितममरकोशोद्घाटनम् ॥

द्वन्द्वैकशेषयो रूपभेदकृतलिङ्गनिर्णेयाभावाल्लिङ्गज्ञानोपायं संकरपरिहारं चाह—**भेदेति** । अत्रामरकोषे भिन्नलिङ्गानां लिङ्गाख्यातुं द्वन्द्वं एकशेषश्च न कृतः । द्वन्द्वो यथा 'दैवतादैवता ' इति न कृतम् । एकशेषो यथा 'खं नभः श्रावणो नभाः' 'खश्रावणौ तु नभसी' इति न कृतम् । एकलिङ्गानां तु कृतावेव । यथा '—स्वर्गनाकत्रिदिवत्रिदशालयाः', 'अजा विष्णुहरच्छागाः' इति । ननु भिन्नलिङ्गानामपि तौ कृतौ । यथा '—अप्सरोयक्षरक्षोगन्धर्वकिंनराः' इति, 'मातापितरौ पितरौ' इत्यत आह—अनुक्तानामिति । स्थानान्तरेऽनिर्दिष्टानां न कृतौ, निर्दिष्टानां तु कृतावेव । इह तु स्थानान्तरनिर्देशो यथा 'स्त्रियां बहुष्वप्सरसः', नैर्ऋतो यातुरक्षसी', 'जनयित्री प्रसूर्माता', 'तातस्तु जनकः पिता' इति । ननु रत्नकोषादिवत्स्त्रीपुंनपुंसककाण्डविधानेनैव कथनमुचितम् । तथासति रूपभेदसाहचर्यादिप्रतिपत्तिगौरवमपि न स्यात् । तत्किमिति लिङ्गसंकरः क्रियते, इत्यत आह—क्रमादृते इति । क्रमं विना संकरो न कृतः । क्रमानुरोधात्तु कृत इति तात्पर्यम् । संकरस्तु भिन्नलिङ्गानां मिश्रस्वरूपः । क्रमः प्रक्रमः । प्रस्ताव इति यावत् । यथा स्वर्गप्रक्रमे द्योदिवौ भिन्नलिङ्गे अप्यवश्यवाच्यत्वात्कथिते । विष्णुप्रस्तावे च लक्ष्मीनाम, इति । यद्वा क्रमं विना भिन्नलिङ्गानां संकरो व्यामिश्रभावो न कृतः । क्रमेण तु कृत एव । यथा 'सुरलोकः' इत्यन्तेन पुंलिङ्गशब्दान्निरूप्य 'द्योदिवौ' इति स्त्रीलिङ्गशब्दावुक्त्वा क्लीबे 'त्रिविष्टपम्' इत्युक्तम् । एवं 'जनुर्जननजन्मानि' इति क्लीबलिङ्गान्निरूप्य 'जनिरुत्पत्तिः' इति स्त्रीलिङ्गावुक्त्वा उद्भवशब्दः पुंलिङ्ग उक्तः । इह तु क्षीरस्वामिकृतव्याख्याविशेषो ग्रन्थगौरवभयान्न लिखितः ॥ ४ ॥ इति रायमुकुटकृतपदचन्द्रिका ॥

भेदेति । अत्र ग्रन्थे भिन्नलिङ्गानां भेदाख्यानाय लिङ्गभेदमाख्यातुं द्वन्द्वो न कृतः । यथा 'देवतादैवतामराः' इति द्वन्द्वो न कृतः । एवं कृते '—दैवतानि पुंसि वा देवता स्त्रियाम्' इति लिङ्गज्ञानं न स्यात् । तथा 'खश्रावणौ तु नभसी' इत्येकशेषो न कृतः' 'खं नभः श्रावणो नभाः' इति पुंनपुंसकलिङ्गज्ञानाय । समानलिङ्गानां तु तौ कृतावेव । यथा 'स्वर्गनाकत्रिदिवत्रिदशालयाः' 'अजा विष्णुहरच्छागाः' । किंभूतानां भिन्नलिङ्गानाम् । अनुक्तानाम् । रूपभेदसाहचर्यविशेषविधिभिरज्ञापितलिङ्गानाम् । ज्ञापितलिङ्गानां तु द्वन्द्वैकशेषौ कृतावेव । यथा 'स्त्रियां बहुष्वप्सरसः', 'यक्षैकपिङ्गैलविल—' इति 'यातुरक्षसी' इति ज्ञापितलिङ्गानाम् 'अप्सरोयक्षरक्षोगन्धर्वकिंनराः' इति द्वन्द्वः कृतः । यथा 'जनयित्री प्रसूर्माता', 'तातस्तु जनकः पिता' इति ज्ञापितलिङ्गानां 'मातापितरौ पितरौ' इत्येकशेषः कृतः । तथा भिन्नलिङ्गानां क्रमादृते क्रमेण विना संकरोऽपि न कृतः । क्रमः प्रस्तावः । संकरो मिश्रत्वम् । अत्र तु वज्रप्रस्तावे 'कुलिशं भिदुरं पविः' इति पुंनपुंसकयोः संकरो न कृतः । स्वर्गप्रस्तावे 'सुरलोको द्योदिवौ द्वे स्त्रियाम्' इति स्त्रीपुंसयोः । स्तुतिप्रस्तावे 'स्तवः स्तोत्रं नुतिः स्तुतिः' इति स्त्रीपुंनपुंसकानाम् ॥ ४ ॥ इति दीक्षितरामकृष्णविरचितपीयूषाख्यव्याख्या ॥

अत्रेयं विचारणा—

एकशेषाभावोदाहरणं 'खं नभः श्रावणो नभाः' इत्यत्र 'खश्रावणौ तु नभसी' इति व्याख्यासु व्यक्तम् । तत्र संगच्छते । 'नभोऽन्तरीक्षं गगनम्', 'नभाः श्रावणिकश्च सः' इति स्वपर्याये लिङ्गभेदस्य ज्ञापितत्वेन 'मातापितरौ पितरौ' इत्यतो वैलक्षण्याभावादेकशेषेऽपि दोषाभावात् तस्माद् 'ओकः सद्माश्रयश्चौकाः' इत्युदाहर्तव्यम् । यच्चोक्तं-'समानलिङ्गानां तु कृतावेव' इति । तदपि न समञ्जसम् । 'पयः क्षीरं पयोऽम्बु च' इत्यत्र समानलिङ्गत्वेऽप्येकशेषाकरणात् । तस्मादियं परिभाषा न सार्वत्रिकी । किंतु 'समानलिङ्गानामेव, स्वपर्यायेषूक्तानामेव वा कृतः' इति परिसंख्यारूपेण व्याख्योचिता । तथा च 'समे यजेत' इत्यत्र यागकरणाकरणयोरिवात्राप्येकशेषादिकरणाकरणयोश्चैव नियामिका-इति मम प्रतिभाति (समाधानान्तरं चेत्सुधीभिर्लेख्यम् ॥ इति शिवदत्तः ॥

तस्य सामञ्जस्यात् ॥ ४ ॥ त्रयाणां लिङ्गानां समाहारस्त्रिलिङ्गी, तत्र 'त्रिषु' इति पदं ज्ञेयम्। इति परिभाष्यते। यथा—'त्रिषु स्फुलिङ्गोऽग्निकणः'। न्यायसिद्धं चैतत्। त्रिलिङ्ग्यतिरिक्तस्यार्थ[र्थान्तर]स्यासंभवात्। अयोगाच्च। स्त्रीपुंसौ मिथुनम्, तत्र 'द्वयोः' इति पदं ज्ञेयम्। यथा—'द्वयोर्ज्वालकीलौ'। 'द्वयोः' इति द्विशब्दप्रयोगोपलक्षणम्। तेन 'द्विहीनं प्रसवे सर्वम्', 'द्वयहीने कुकुन्दरे' इत्याद्युपपद्यते। तथा निषिद्धं लिङ्गं यस्य तन्निषिद्धलिङ्गं पदं, शेषार्थं शेषलिङ्गकं ज्ञेयम्। इदमपि न्यायसिद्धम्। विशेषनिषेधे शेषाभ्यनुज्ञानात्। यथा—'वज्रमस्त्री' इति। तुरन्ते यस्य तत्त्वन्तम्, अथ आदिर्यस्य तदथादि, त्वन्तं च अथादि च नामपदं लिङ्गपदं सर्वनामपदं अव्ययपदं च पूर्वान्वयि न भवति। किं तूत्तरान्वयि। 'नगरी त्वमरावती' 'जवोऽथ शीघ्रं त्वरितम्' इति च नामपदम्। 'पुंसि त्वन्तार्धिः' 'शस्तं चाथ त्रिषु द्रव्ये' इति लिङ्गपदम्। 'तस्य तु प्रिया' इति सर्वनामपदम्। 'वा तु पुंसि' इत्यव्ययपदम्। अथशब्दोऽथोशब्दस्याप्युपलक्षणम्। यथा—'अनुक्रोशोऽप्यथो हसः'। न्यायसिद्धमिदम्। तुना पूर्वस्माद्विशेषद्योतनात्। अथशब्देन चार्थान्तरारम्भात्। भ्रमविषयं चैतत्। 'उदपानं तु पुंसि वा' इत्यादौ तु न दोषः। उत्तरस्यानामत्वात्। लिङ्गवाचिनाऽन्वयेऽपि दोषाभावात्। वस्तुतस्तु अत्र पादपूरणाय चकारादेव पठितुं युक्तम् ॥ ५ ॥

स्वरव्ययं स्वर्ग-नाक-त्रिदिव-त्रिदशालयाः।
सुरलोको द्यो-दिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम् ॥६॥

स्वरिति ॥ यद्यपि 'चतुष्टयी शब्दानां प्रवृत्तिः' इति पक्षे संज्ञाशब्देषु व्युत्पत्तिर्नावश्यकी, तथापि शाकटायनाद्यभिमततन्त्रीयपक्षे व्युत्पत्तिः प्रदर्श्यते ॥*॥ स्वर्यते स्तूयते इति स्वः। 'स्वृ शब्दोपतापयोः' (भ्वा० प० अ०)। 'अन्येभ्योऽपि दृश्यन्ते' (३।२।७५) इति विच्। बाहुलकात्कर्मणि गुणः (७।३।८४) रपरत्वम् (७।१।५१) इत्याहुः। तन्न। निर्बीजबाहुलकाश्रयणस्यायुक्तत्वात्। 'स्वरति शब्दायते' इति व्युत्पत्तिरप्ययुक्ता। उक्तार्थस्य तत्रासंभवात्। स्वरत्यप्राप्या उपतापयति। 'नैनं कृताकृते तपतः' इति श्रुतेः। स्वरादि (७।१।३७) पाठादव्ययत्वम्। 'अव्ययोऽस्त्री शब्दभेदे नाविष्णौ निर्व्यये त्रिषु'। स्वःशब्दस्य मङ्गलार्थमादौ प्रयोगः ('स्वः प्रेत्य व्योम्नि नाके च') ॥(१)॥*॥ सुष्ठु अर्ज्यते स्वर्गः। 'अर्ज अर्जने' (भ्वा० प० से०) कर्मणि (३।३।१९) घञ्। ऋज्यतेऽस्मिन्निति वा। 'ऋज गतिस्थानार्जनोपार्जनेषु' (भ्वा० आ० से०) 'हलश्च' (३।३।१२१) इति घञ्। न्यङ्क्वादित्वात् (७।३।५३) कुत्वम्। यत्तु मुकुटः—'चजोः'—(७।३।५२) इति कुत्वमाह। तन्न। 'निष्ठायामनिटः कुत्वम्' (७।३।५९) इति वार्तिकात् ॥(२) ॥*॥ 'कं सुखं तद्विरुद्धम् अकं दुःखम्, नास्त्यकमत्र' इति नाकः। 'नञ्राण्नपात्—' (६।३।७५) इति नलोपो न। को ब्रह्मा, तदभावो नात्रेति वा। 'नाकस्तु त्रिदिवेऽम्बरे' ॥(३)॥*॥ तिसृष्वप्यवस्थासु त्रयो ब्रह्मविष्णुरुद्रा वा दीव्यन्त्यत्रेति त्रिदिवः।—'घनर्थे कविधानम्' (वा० ३।३।८) इति कः— इत्याहुः। तन्न। 'स्थाम्नापाय्यधिहनियुध्यर्थम्' (उक्तवार्तिकशेषे) इति परिगणनात्। उदाहरणत्वेन व्याख्यानस्य निर्मूलत्वात्। यदपि—मूलविभुजादित्वात् (वा० ३।२।५) कप्रत्ययः—इति। तदपि न। अधिकरणव्युत्पत्तिप्रदर्शनस्यासंगतत्वात्। तत्र 'कर्तरि कृत्' (३।४।६७) इति वाक्यशेषात्। तस्मात्—'हलश्च' (३।३।१२१) इति घञ्। संज्ञापूर्वकत्वात् न गुणः—इति व्याख्येयम्। यद्वा—ब्राह्मवैष्णवरौद्रभेदेन सात्त्विकराजसतामसभेदेन वा त्रिविधो दीव्यति व्यवहरति प्रकाशते वा ('दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु'। (दि० प० से०) 'इगुपधत्वात्' (३।१।१३५) कः। **'त्रिदिवं** तु खे। स्वर्गे च **त्रिदिवा** नद्याम्' इति मेदिनीदर्शनात् क्लीबेऽपि ॥ (४) ॥*॥ त्रिदशानामालयः ॥ (५) ॥ स्वर्गसुरादयः शब्दाः स्वरूपपराः। लक्षणया त्वर्थपराः। अतः समानार्थत्वाभावादेकशेषो न ॥*॥ सुराणां लोकः ॥ (६) ॥ सुरसद्मादीनामप्युपलक्षकमेतत्। एवं यौगिकेषु सर्वत्रोन्नेयम् ॥*॥ द्योतन्तेऽस्यां द्यौः गोवत्। बाहुलकात्[1] (३।३।१) द्युतेः ('द्युत दीप्तौ') (भ्वा० आ० से०) डोः। द्यौति 'द्यु अभिगमने' (आ० प० अ०)। विच् (३।२।७५) वा। (**'द्यौस्तु** स्वर्गविहायसोः') ॥ (७) ॥*॥ दीव्यन्त्यस्यामिति बाहुलकात् (३।३।१) दिवेः (दिवु क्रीडादिषु। दि० प० से०) दिविः। द्यौः, दिवौ, दिवः, द्युभ्याम्। (**'द्यौः स्व'** भसोः') ॥ (८) ॥ यत्तु—'दिवेर्द्यौः' इति द्योप्रत्ययः—इत्याह मुकुटः। तन्न। उक्तसूत्रस्यादर्शनात्। स्वामी तु—द्योशब्दोऽप्योकारान्तोऽस्ति। भाष्ये (६।१।९३) 'गोतो णित्' (७।१।९०) इत्यत्र 'ओतो णित्' इति पाठान्तरान्नानात्' इत्याह। तदपि न। स्मृत उर्येन स स्मृतौरित्यत्र वृद्धिविधानेन पाठस्योपक्षीणत्वात्। यदपि—दिवेः क्विप् (३।२।७६) इत्युक्तम्। तदपि न। दिवौ दिव इत्यादौ 'च्छ्वोः शूड्—' (६।४।१९) इत्यूठः प्रसङ्गात्। सुभूतिस्तु—'द्यु अभिगमने' द्यूयते अभिगम्यते बाहुलकात्कर्मणि डोप्रत्ययः—इत्याह। **'द्यौः** स्त्री स्वर्गे च गगने **दिवं** क्लीबं तयोः स्मृतम्'। यत्तु—स्वामिना 'दिवशब्दो वृत्तिविषयः' इत्युक्तम्। तदेतेन परास्तम्। उक्तमेदिन्यां वृत्तिविषयत्वानभिधानात्। 'मन्दरः सैरिभः शक्रभव(सद) नं खं दिवं नभः' इति त्रिकाण्डशेषाच्च ॥*॥ विशन्त्यस्मिन् सुकृतिन इति विशेः ('विश प्रवेशने' तु० प० अ०) कप्रत्ययः, तस्य च तुट्। 'व्रश्च—' (८।२।३६) इति षत्वम्। 'यत्र ब्रध्नस्य विष्टपम्' इति वैदिकः प्रयोगः। तृतीयं विष्टपं त्रिविष्टपम् ॥ (९) ॥ पूरणप्रत्ययस्तु वृत्तौ गतार्थत्वान्न

१—अयं पाठस्तु हैम उपलभ्यते।

प्रयुज्यते । (रूपभेदेनैव क्लीबत्वे लब्धे रूपभेदलब्धलिङ्गविशेषस्यानित्यत्वज्ञापनार्थं क्लीब इत्युक्तम् । तस्य फलं 'कर्म क्रिया तत्सातत्ये गम्ये स्युरपरसराः' इत्यत्र नपुंसकत्व उक्तेऽपि पुंलिङ्गत्वं सिद्धम् । अतः 'कर्म व्याप्ये क्रियायां च पुंनपुंसकयोर्मतम्' इति रुद्रकोशेन सह न विरोधः शङ्कनीयः) । केचित्तु—'पिष्टप' इति सूत्रं पठित्वा विशतेरादेः पो निपात्यते–इत्याहुः । अयं पुंस्यपि । तथा चामरमाला—'पिष्टपो विष्टपोऽप्यस्त्री भुवनं च नपुंसकम्' इति । 'नभो विष्टपं वृषो गौर्ना पृश्निश्चापि सुरालयः' इति रत्नमाला । एवं शक्रभवनफलोदयावरोहोर्ध्वलोकादयोऽप्यूह्याः । नव **'स्वर्गस्य'** ॥

अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः ।
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥ ७ ॥
आदितेया दिविषदो लेखा अदितिनन्दनाः ।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ॥८॥
बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः ।
वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम् ॥९॥

अमरा इति ॥ न म्रियन्ते 'मृङ् प्राणत्यागे' (तु० आ० अ०) । पचाद्यच् (३।१।१३४) । **'अमर**स्त्रिदशेऽप्यस्थिसंहारे कुलिशद्रुमे । स्त्री गुडूच्यमरावल्योः स्थूणादूर्वाजरायुषु' ॥(१)॥*॥ जराया निष्क्रान्ताः । **'निर्जरः** स्यात्पुमान्देवे जरात्यक्ते च वाच्यवत् । **निर्जरा** तु गुडूच्यां च तालपर्ण्यामपि स्त्रियाम्' ॥ (२) ॥*॥ दीव्यन्तीति देवाः । पचादिषु (३।१।१३४) पाठादच् । **'देवः** सुरे घने राज्ञि **देव**माख्यातभिन्द्रिये । **देवी** कृताभिषेकायां तेजनीस्पृक्क्रयोरपि' ॥(३) ॥*॥ तृतीया यौवनाख्या दशा सदा येषाम् । त्रिशब्दस्य तृतीयार्थता त्रिभागवत् । त्रिर्दशै[3] वा । 'संख्ययाऽव्यया–' (२।२।२५) इति बहुव्रीहिः । 'बहुव्रीहौ संख्येये–' (५।४।७३) इति डच् । जन्मसत्ताविनाशाख्यास्तिस्रो दशा येषामिति वा । 'त्रीन् तापान् दशन्ति 'दंश दशने' (भ्वा० प० अ०) पचाद्यचि पृषोदरादित्वात् (६।३।१०९) 'न लोपः' इति राजदेवः । तन्न । उक्तविग्रहे कर्मण्यणः (३।२।१) प्रसङ्गेनाचोऽप्राप्तेः । मूलविभुजादित्वादिलेके (३।२।५ वा०) वा समाधेयम् ॥(४) ॥*॥ विशिष्टो बुधो येषाम् । त्रिकालज्ञजीव–शिष्यत्वात् । विशेषेण बुध्यन्ते वा । 'बुध अवगमने' (भ्वा० प० से०, दि० आ०-अ०) । 'इगुपध–' (३।१।१३५) इति कः । **'विबुधो** ज्ञे सुरे' ॥ (५) ॥*॥ सुरन्तीति सुराः । 'षुर प्रसवैश्वर्ययोः' (तु०-प० से०) । 'इगुपध–' (३।१।१३५) इति कः । यद्वा समुद्रोत्था सुरास्त्येषाम् । अर्शआद्यच् (५।२।१२७) । यद्वा शोभनं राजते । 'राजृ दीप्तौ' (भ्वा० उ० से०) 'अन्येभ्योऽपि–' (३।२।१०१ वा०) इति डः । **'सुरा** चषकमद्ययोः । पुंलिङ्गस्त्रिदिवेशे स्यात्' ॥ (६) ॥*॥ सुष्ठु पर्व अमावास्यादिचरितम्, अङ्गुल्यादिग्रन्थिः, उत्सवो वा येषां सुपर्वाणः । **'सुपर्वा** नाशरे वंशे पर्वधूमसुरेषु च ॥' (७) ॥*॥ शोभनं मनो येषां ते सुमनसः । **'सुमनाः** पुष्पमाल्योः स्त्रियां, ना धीरदेवयोः ॥' (८) ॥*॥ त्रिदिवस्येशाः ॥ (९) ॥*॥ दिवमोको येषां ते दिवौकसः । दिवशब्दोऽदन्तः । 'मन्दरः सैरिभः शक्रभव(सदनं) खं दिवं नभः' इति त्रिकाण्डशेषात् । द्यौरोको येषामिति विग्रहे 'दिवोकसः' अपि । **'स्याद्दिवौका दिवोकाश्च** देवे चापीह पक्षिणि' इति रन्तिदेवः । **'दिवोकाश्च दिवौकाश्च** पुंसि देवे च चातके' । शेऽन्दपरविप्रतिषेधात्परस्य यणादेशः । स्थानिवत्त्वेन पूर्वस्य न यण् । 'सकृद्गतौ' (१।४।२ प०) इति न्यायात् ॥ (१०) ॥*॥ 'नञो दाञो डितिः' इति शाकटायनः । यद्वा यति । 'दो अवखण्डने' (दि० प० अ०) । 'क्तिच् क्तौ च–' (३।३।१७४) इति क्तिच् । 'यतिस्यति–' (७।४।४०) इति इत्त्वम् । दितिभिन्ना अदितिः । अदित्या अपत्यानि । 'कृदिकारादक्तिनः' (४।१।४५ ग०) इति ङीषन्तात् 'स्त्रीभ्यो ढक्' (४।१।१२०) ॥ (११) ॥*॥ दिवि सीदन्ति वर्तन्ते 'षदॢ विशरणगत्यवसादनेषु' (भ्वा० प० अ०, तु०-प० अ०) । 'सत्सूद्विष–' (३।२।६१) इति क्विप् । 'हृद्द्युभ्यां च' (६।३।९ वा०) इति ङेरलुक् । 'सुषामादिषु च' (८।३।९८) इति षत्वम् ॥*॥ 'तत्पुरुषे कृति बहुलम्' (६।३।१४) इति ङेर्लुकि 'द्युसदः' अपि । 'मनःसु येन द्युसदां न्यधीयत' इति माघः ॥ (१२) ॥*॥ चित्रादौ लिख्यन्ते । 'लिख अक्षरविन्यासे' (तु० प० से०) । 'अकर्तरि–' (३।३।१९) इति कर्मणि घञ् । ग्रीवाहस्तपादेषु तिस्रो लेखाः सन्त्येषामिति वा । 'अर्श आद्यच्' (५।२।१२७) । **'लेखो** लेख्ये सुरे **लेखा** लिपिराजिकयोर्मता' ॥ (१३) ॥*॥ अदितेर्नन्दनाः ॥(१४)॥*॥ अदितेरपत्यानि । 'दित्यदित्या–' (४।१।८५) इति ण्यः । लिङ्गविशिष्ट (४।१।१) परिभाषाया अनित्यत्वान्ङ्यन्ताण्ण्यो न । **'आदित्यो** भास्करे देवे' ॥ (१५) ॥*॥ ऋशब्दवाच्यः स्वर्गः, अदितिर्वा । स्वरादि (१।१।३७) पाठादव्ययत्वम् । तत्र ततो वा भवन्ति । 'मितद्वादित्वात्' (वा० ३।२।१८०) डुः ॥*॥ क्विपि (३।२।७६) 'ऋभुवः' अपि-इत्यन्ये ॥ (१६) ॥*॥ अविद्यमानः स्वप्नो येषाम् ॥ (१७) ॥*॥ म्रियन्तेऽस्मिन्निति मर्तो भूलोकः । 'हसिमृग्रिण्वामिदमिलूधूधुर्विभ्यस्तन्' (उ० ३।८६) । तत्र भवा अप्युपचारान्मर्ताः । ततश्च 'नवसूरमर्तयविष्ठेभ्यो यत्' (वा० ५।४।३६) इति स्वार्थे यत् । तद्भिन्नाः ॥ (१८)॥*॥ अमृतमन्धोऽन्नं येषां ते ॥ (१९)॥*॥

१—अयं पाठो बहुत्र नोपलब्धः । २—अस्थिसंहारे गङ्गादिप्रक्षेप्याणामस्थ्नामेकत्र मीलने–इत्यनेकार्थकैरवाकरकौमुदी । ३—दश दशद्वर्गाः । 'श्रियं विन्दति सौमित्रे पञ्चविंशति वर्षवत्' इति रामायणवाक्येन सदा देवानां पञ्चविंशवर्षात्मकत्वेन तृतीये दशेत्येव वर्तमानत्वमिति भावः ।

१—इदं च 'दिव उत्' (६।१।१३१) इति वकारस्योत्वे कृते बोध्यम् ।

बर्हिरग्निर्मुखं येषां ते ॥ (२०) ॥*॥ क्रतून् क्रतुषु वा भुञ्जते । 'भुज पालनाभ्यवहारयोः' (रु० आ० अ०) क्विप् (३।२।७६) ॥ (२१) ॥*॥ गीरेव निग्रहानुग्रहसमर्था बाणोऽस्त्रं येषाम् ॥*॥ दन्तोष्ठ्यपाठे गिरं वन्वते स्तुतिप्रियत्वात् । 'वनु याचने' (त० आ० से०) 'कर्मण्यण्' (३।२।१) । 'पूर्वपदात्–' (८।४।३) इति णत्वम् ॥ (२२) ॥*॥ दानवानामरयः ॥ (२३) ॥*॥ प्रशस्तं वृन्दं येषाम् । 'शृङ्गवृन्दाभ्यामारकन्' (५।२।१२० वा०) । (**'वृन्दारकः** सुरे पुंसि मनोज्ञश्रेष्ठयोस्त्रिषु') ॥ (२४) ॥*॥ देवशब्दात्स्वार्थे तल् (५।४।२७) । ततः स्वार्थे प्रज्ञाद्यण् (५।४।३८) । विशेषविधेः पुंस्त्वम् । रूपभेदात्क्लीबत्वम् ॥ (२५) ॥*॥ देवताः ॥ (२६) ॥ स्त्रियाम् । रूपभेदादेव स्त्रीत्वे सिद्धे बहुवचनान्तपुंलिङ्गशङ्कावारणार्थं 'स्त्रियाम्' इति–मुकुटः । तन्न । रूपभेदेनैव वारणाद्विसर्गं विना पुंलिङ्गकोटेरनुत्थानात् । अन्यथा 'पद्मा गदा' इत्यादौ तस्या अनिवारणात् । अतो 'देवपर्यायाः पुंसि' इति वक्ष्यति । तद्बाधनार्थमिदम् । षड्विंशतिः **'देवानाम्'** ॥

आदित्य-विश्व-वसवस्तुषिताभास्वरानिलाः ।
महाराजिक-साध्याश्च रुद्राश्च गणदेवताः ॥ १० ॥

आदित्यादयः प्रत्येकं गणदेवताः समुदायचारिण्यो देवताः । एकत्वं तु समुदायवृत्तानामवयववृत्तेरप्यभ्युपगमात् । 'आदित्या द्वादश प्रोक्ता विश्वेदेवा दश स्मृताः । वसवश्चाष्टसंख्याताः षट्त्रिंशत्तुषिता मताः । आभास्वराश्चतुःषष्टिर्वाताः पञ्चाशदूनकाः । महाराजिकनामानो द्वे शते विंशतिस्तथा । साध्या द्वादश विख्याता रुद्राश्चैकादश स्मृताः ॥' ॥१॥*॥ विशन्ति कर्मस्विति विश्वे । 'विश प्रवेशने' (तु० प० अ०) । 'अशू प्रुषि-लटि-कणि-कटि-विशिभ्यः क्नू' (उ० १।१५१) । सर्वनामसंज्ञोऽयम् । आधुनिकसंज्ञास्वेव सर्वनामत्वपर्युदासात् । मुकुटस्तु—सर्वेषां विश्वे(षां) देवानां नाम इति कृत्वा सर्वनामसंज्ञः—इत्याह । तन्न । एकशब्दस्य बहुषु संकेतितस्य संज्ञात्वौचित्यात् । यथा प्राचीनबर्हिषः पुत्रेषु संकेतितस्य प्रचेतःशब्दस्य । 'यथा पूर्वजवृत्तिः पूर्वशब्दः' इति तदीयदृष्टान्तोऽपि चिन्त्यः । पूर्वजवृत्तेः पूर्वशब्दस्य व्यवस्थायां सत्त्वात्संज्ञात्वोक्तिसंभवाभावात् (**'विश्वा** त्वतिविषायां स्त्री जगति स्यान्नपुंसकम् । न ना शुण्ठ्यां पुंसि देवप्रभेदेष्वखिले त्रिषु') ॥ (२) ॥*॥ वसन्तीति वसवः । 'वस निवासे' 'शृ-स्वृ-स्निहि-त्रप्यसि-वसि-हनि-क्लिदि-बन्धि-मनिभ्यश्च' (उ० १।१०) इति उः । 'विश्वस्य वसुराटोः' (६।३।१२८) इति दीर्घो न । असंज्ञात्वात् । (**'वसुस्त्वग्नौ** देवभेदे नृपे रुचौ । योक्ते शुष्के **वसु** स्वादौ रत्ने वृद्ध्यौषधे धने') ॥ (३) ॥*॥ तुष्यन्ति । 'तुष तुष्टौ' । 'रुचिकुटिरुषिभ्यः कितच्' (उ० ४।१८६) इति बाहुलकात् कितच् । यद्वा–तोषणं तुट् । संपदादिः (वा० ३।३।१०८) । ततः 'तारकादित्वादितच्' (५।२।३६) ॥ (४) ॥*॥ आ समन्ताद्भासनशीलाः । 'भास् दीप्तौ' (भ्वा० आ० से०) । 'स्थेशभासपिसकसो वरच्' (३।२।१७५) ॥ (५) ॥*॥ अनन्त्यनेन । 'अन प्राणने' (आ० प० से०) 'सलिकल्यनिमहिभण्डिमण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्' (उ० १।५४) **'अनिलो** वसुवातयोः' ॥ (६) ॥*॥ महती राजिः पङ्क्तिर्येषाम् । 'शेषाद्विभाषा' (५।४।१५४) इति कप् ॥*॥ **'माहाराजिक'** इति पाठे महाराजो देवता येषाम् । 'महाराजप्रोष्ठपदाट्ठञ्' (४।२।३५) इति ठञ् । यद्यपि—सूक्तहविर्भागिन एव देवतात्वम्, तथापि 'आग्नेयो वै ब्राह्मणः' इतिवदुपचारो बोध्यः ॥ (७) ॥*॥ साध्यं सिद्धिः । 'साध संसिद्धौ' (स्वा० प० अ०) । 'ऋहलोर्ण्यत्' (३।१।१२४) इति भावे ण्यत् । साऽस्त्येषाम् । अर्शआद्यच् (५।२।१२७) । **'साध्यो** योगान्तरे सुरे । गणदेवविशेषे च साधनीये च वाच्यवत्' ॥ (८) ॥*॥ रोदयन्त्यसुरान् । 'रुदिर् अश्रुविमोचने' (अ० प० से०) ॥ 'रोदेर्णिलुक् च' (उ० २।२२) इति रक् णेश्च लुक् ॥ (९) ॥ नव **'गणदेवानाम्'** ॥

विद्याधरोऽप्सरो-यक्ष-रक्षो-गन्धर्व-किंनराः ।
पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः ॥११॥

विद्येति ॥ 'विद्याधरोऽप्सरो–' इति पाठः । भिन्नलिङ्गत्वादप्रेऽनभिधानादसमासः । विद्याया गुटिकाञ्जनादिविषयिण्या धरो धारकः । यत्तु—'विद्यां धरति' इति मुकुट आह । तन्न । पचाद्यचः (३।१।१३४) अपवादत्वाद् (३।२।१) प्रसङ्गात् ॥ (१) ॥*॥ अब्धः सरन्ति । 'सरतेरसुन्' (उ० ४।२३७) ॥ (२) ॥*॥ यक्ष्यते पूज्यते 'यक्ष पूजायाम्' (चु० आ० से०) । 'अकर्तरि च कारके संज्ञायाम्' (३।३।१९) इति कर्मणि घञ् । **'यक्षो** गुह्यकमात्रे च गुह्यकाधीश्वरेऽपि च' । इः कामः, तस्येवाक्षिणी अस्येति वा, इरक्षिषु यस्येति वा । 'बहुव्रीहौ सक्थ्यक्ष्णोः–' (५।४।४३) इति षच् ॥ (३) ॥*॥ रक्ष्यन्त्येभ्यो रक्षांसि । 'रक्ष पालने' (भ्वा० प० से०) । 'सर्वधातुभ्योऽसुन्' (उ० ४।१८९) ॥ (४) ॥*॥ गन्धं सौरभमर्वति गन्धर्वः । 'अर्व गतौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) शकन्ध्वादिः (वा० ६।१।९४) ॥ (५) ॥*॥ अश्वमुखत्वात्कुत्सिता नराः । 'किं क्षेपे' (२।१।६४) इति समासः ॥ (६) ॥*॥ पिशितमश्नाति । 'अश भोजने' (क्या० प० से) । 'कर्मण्यण्' (३।२।१) 'पृषोदरादिः' (६।३।१०९) । मध्यतालव्यः ॥ (७) ॥*॥ गूहति निधिं रक्षति । 'गुहू संवरणे' (भ्वा० उ० से०) । 'ण्वुल्' (३।१।१३३) । पृषोदरादित्वाद्धगागमः । तथा च व्याडिः—'निधिं रक्षन्ति ये यक्षास्ते स्युर्गुह्यकसंज्ञकाः' इति । यद्वा गुह्यं कुत्सितं कायति । 'कै शब्दे' (भ्वा० प० अ०) 'आतोऽनुपसर्गे कः' (३।२।३) गुह्यं गोपनीयं

१—सूत्रं 'रुचिवत्तिकुत्तिकुटिभ्यः कितच्' इत्येवमुणादिषूपलभ्यते ।

कं सुखं यस्येति वा । अनयोः पक्षयोः 'शंसिदुहिगुहिभ्यो वा' (वा० ३।१।१०९) इति काशिकाकारवचनाद्धेतोः क्यप् । तत्र दुहिगुह्योर्ग्रहणं निर्मूलमिति भट्टोजीदीक्षिताः । तन्मते ण्यति संज्ञापूर्वकत्वान्न गुणः ॥ (८) ॥*॥ असेधीदिति सिद्धः । 'षिधु हिंसासंराद्ध्योः' (दि० प० से०) । 'गत्यर्थाकर्मक–' (३।४।७२) इति कर्तरि क्तः । सिद्धिरस्यास्तीति वा । अर्श-आद्यच् (५।२।१२७) । ('**सिद्धो** व्यासादिके देवयोनौ निष्पन्नमुक्तयोः । नित्ये प्रसिद्धे') ॥ (९) ॥*॥ भूतिरस्यास्ति । अर्श-आद्यच् (५।२।१२७) । भूतः । ('**भूतं** क्ष्मादौ पिशाचादौ जन्तौ क्लीबं त्रिषूचिते । प्राप्ते वित्ते समे सत्ये देवयोन्यन्तरेषु ना' । भवति इष्टं प्राप्नोति । 'भू प्राप्तौ' (चु० आ० से०) । 'गत्यर्थाकर्मक–' (३।४।७२) इति क्तः–इति मुकुटः । तन्न । प्राप्त्यर्थस्यागत्यर्थाकर्मकत्वात् वर्तमानविग्रहायोगाच्च ॥ (१०) ॥*॥ अमी विद्याधरादयो दश देवा योनिरेषां ते देवयोनयः । देवांशका इत्यर्थः । यत्तु—'देवानामिव योनिरुत्पत्तिकारणमविभाव्यमेषाम्' इति मुकुटो व्याख्यत् । तन्न । व्यधिकरण-बहुव्रीहिप्रसङ्गात् । श्लोकोपक्रमस्थग्रन्थविरोधाच्च । दश **'देवयोनयः'** ॥

असुरा दैत्य-दैतेय-दनुजेन्द्रारि-दानवाः ।
शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः ॥ १२ ॥

असुरा इति ॥ अस्यन्ति क्षिपन्ति देवान् असुराः । 'असु क्षेपणे' (दि० प० से०) । 'असेरुरन्' (उ० १।४२) इत्युरन् । सुरविरुद्धत्वाद्वा । 'नञ्' (२।२।६) इति तत्पुरुषः । प्रज्ञाद्यणि (५।४।३८) **'आसुराश्च'** । असुषु रमन्ते वा । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । ('**असुरः** सूर्यदैत्ययोः । **असुरा** रजनीवाँस्योः') ॥ (१) ॥*॥ दितेरपत्यानि । 'दित्यदित्या–' (४।१।८५) इति ण्यः । ('**दैत्यो**ऽसुरे मुरायां तु **दैत्या** चण्डौषधावपि') ॥ (२) ॥*॥ ङीषन्तात् । 'स्त्रीभ्यो ढक्' (४।१।१२०) ॥ (३) ॥*॥ दनोर्दनौ वा जाताः । 'सप्तम्यां जनेर्डः', 'पञ्चम्यामजातौ' (३।२।९७, ९८) ॥ (४) ॥*॥ इन्द्रस्यारयः ॥ (५) ॥*॥ दनोरपत्यानि ॥ (६) ॥*॥ शुक्रस्य शिष्याः ॥ (७) ॥*॥ दितेः सुताः ॥ (८) ॥*॥ पूर्वे च ते देवाश्च । 'पूर्वापरप्रथम–' (२।१।५८) इत्यादिना समासः । यद्वा पूर्वं देवाः । अन्यायाद्धि देवत्वाद्भ्रष्टाः । 'सुप्सुपा' (२।१।४) इति समासः । पूर्वे देवा येभ्यो वा । 'अनेकमन्यपदार्थे' (२।२।२४) इति बहुव्रीहिः ॥ (९) ॥*॥ सुरान् द्विषन्ति । 'द्विष अप्रीतौ' (अ० उ० अ०) 'सत्सूद्विष–' (३।२।६१) इति क्विप् ॥(१०) ॥*॥ यद्यपि पातालवासित्वेन पातालवर्गे वक्तुं युक्ताः, तथापि देवविरोधित्वेन बुद्ध्युपारोहादिहैवोक्ताः । दश नामानि **'असुराणाम्'** ॥

१—वासी तक्षोपकरणम् ।

सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ।
समन्तभद्रो भगवान्मारजिल्लोकजिज्जिनः ॥ १३ ॥
षडभिज्ञो दशबलोऽद्वयवादी विनायकः ।
मुनीन्द्रः श्रीघनः शास्ता मुनिः

सर्वज्ञ इत्यादि ॥ सर्वं जानाति । 'ज्ञा अवबोधने' (क्या० प० अ०) । 'आतोऽनुपसर्गे कः' (३।२।३) यद्वा सर्वे ज्ञा यस्य । स्वात्मनः सर्वस्यापरोक्षत्वात् । 'यैः साक्षादपरोक्षात्' इति श्रुतेः । यद्वा सर्वे ज्ञा यस्मात् । 'यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मानो व्युच्चरन्ति' इति श्रुतेः । यद्वा सर्वे ज्ञा येन । 'तस्य भासा सर्वमिदं विभाति' इति श्रुतेः । ('**सर्वज्ञस्तु** जिनेन्द्रे स्यात्सुगते शंकरेऽपि च') ॥ (१) ॥*॥ शोभनं गतं ज्ञानमस्य ॥ (२) ॥*॥ प्रशस्ता बुद्धिरस्य । अर्शआद्यच् (५।२।१२७) । यद्वा बुध्यते । 'मति-बुद्धि–' (३।२।१८८) इति क्तः ॥*॥ 'इगुपध–' (३।१।१३५) इति के **'बुधः'** अपि । 'सर्वज्ञः सुगतो बुधः' इति व्याडिः ॥ (३) ॥*॥ धर्मेण राजते । पचाद्यच् (३।१।१३४) । धर्मस्य राजेति वा । 'राजाहःसखिभ्यष्टच्' (४।४।९१) । ('**धर्मराजो** यमे बुद्धे युधिष्ठिरनृपे पुमान्') ॥ (४) ॥*॥ तथा सत्यं गतं ज्ञानं यस्य ॥ (५) ॥*॥ समन्तं भद्रमस्य सः । समन्ताद्भद्रमस्येति तु व्यधिकरणत्वादनुचितम् ॥ (६) ॥*॥ भगं माहात्म्यमस्यास्ति । मतुप् (५।२।९४) ॥ (७) ॥*॥ मारं कामं जयति । 'सत्सूद्विष–' (३।२।६१) इति क्विप् ॥ (८) ॥*॥ लोकं जयति ॥ (९) ॥*॥ जयति जिनः । 'इण्षिञ्जिदीङुष्यविभ्यो नक्' (उ० ३।२) 'जिनाति' इति स्वामिमुकुटौ । तन्न । 'अङ्गस्य' 'हलः' (६।४।१,२) इति दीर्घप्रसङ्गात् । ('**जिनो**ऽर्हति च बुद्धे च पुंसि स्याज्जित्वरे त्रिषु') ॥ (१०) ॥*॥ दिव्यं चक्षुः श्रोत्रम्, परचित्तज्ञानम्, पूर्वनिवासानुस्मृतिः, आत्मज्ञानम्, वियद्गमनम्, कायव्यूहसिद्धिश्चेति षट् अभितो ज्ञायमानानि यस्य सः । षट्सु दानशीलक्षान्तिवीर्यध्यानप्रज्ञासु अभिज्ञा आद्यं ज्ञानमस्येति वा ॥ (११) ॥*॥ दश बलान्यस्य । यदाहुः—'दानं शीलं क्षमा वीर्यं ध्यानप्रज्ञाबलानि च । उपायः प्रणिधिर्ज्ञानं दश बुद्धबलानि वै' इति ॥ (१२) ॥*॥ अद्वयमद्वैतं वदत्यवश्यम् । आवश्यके (३।३।१७०) णिनिः ॥ (१३) ॥*॥ विनयत्यनुशास्ति । 'णीञ् प्रापणे' (भ्वा० उ० अ०) । ण्वुल् (३।१।१३३) ('**विनायकस्तु** हेरम्बे तार्क्ष्ये विघ्ने जिने गुरौ' ॥ (१४) ॥*॥ मुनिषु इन्द्रः ॥ (१५) ॥*॥ श्रिया घनः पूर्णः । क्षुभ्नादित्वात् (८।४।३९) न णत्वम् ॥ (१६)

१—बृहदारण्यकोपनिषत्सु 'यत्' इति श्रूयते व्याख्यायते च शंकरभगवत्पादैः—'यत् ब्रह्म साक्षादपरोक्षादव्यवहितं केनचित्, ब्रह्मरपरोक्षादगौणम्' इति ।

॥*॥ शास्तीति शास्ता। 'तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ' (उ० २।९४) इति तृन् तृज्वा । पितृवच्छास्तृशब्दः । नप्त्रादिग्रहणस्य (६।४।११) नियमार्थत्वात् । चान्द्रे शासेः क्तिचि शिष्टिरित्यत्र 'शास्ता' इति प्रत्युदाहरणेऽनौणादिकतृच एव रूढमतिना दर्शितत्वाद्धुड्वाच्चिनोऽपि दीर्घः—इति सुभूतिः । तन्न । तृचस्तस्येट्प्रसङ्गात् । अनौणादिकतृच एवेत्यत्र प्रमाणाभावाच्च । (**'शास्ता** समन्तभद्रे ना शासके पुनरन्यवत्') ॥ (१७) ॥*॥ मन्यते मुनिः । 'मनेरुच्च' (उ० ४।१२३) इतीन् । (**'मुनि**र्वाचंयमेऽर्हति । प्रियालागस्तिपालाशे') ॥ (१८) ॥*॥ अष्टादश **'बुद्धस्य'** ॥

शाक्यमुनिस्तु यः ॥ १४ ॥
स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः ।
गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः ॥ १५ ॥

शाक्येत्यादि ॥ (यः) । शकोऽभिजनोऽस्य । 'शण्डिकादिभ्यो ञ्यः' (४।३।९२) । यद्वा 'शाकवृक्षप्रतिच्छन्नं वासं यस्माच्च चक्रिरे । तस्मादिक्ष्वाकुवंश्यास्ते शाक्या इति भुवि स्मृताः' इत्यागमात् शाके भवाः शाक्याः । दिगादित्वाद्यत् (४।३।५४) प्रत्ययः । तद्वंशावतीर्णो मुनिः । शाक्यश्चासौ मुनिश्चेति ॥ (१) ॥*॥ (सः) । शाक्यः सिंह इव । 'उपमितं व्याघ्रा—' (२।१।५६) इति समासः ॥*॥ भीमवत् 'शाक्यः' अपि ॥ (२) ॥*॥ सर्वार्थेषु सिद्धो निष्पन्नः । 'सिद्धशुष्क—' (२।१।४१) इति समासः । सर्वोऽर्थः सिद्धोऽस्येति वा ॥*॥ **'सिद्धार्थः'** अपि । **'सिद्धार्थौ** बुद्धसर्षपौ' इति शाश्वतः ॥ (३) ॥*॥ शुद्ध ओदनोऽस्येति । शकन्ध्वादिः (वा० ६।१।९४) । शुद्धोदनस्यापत्यम् । 'अत इञ्' (४।१।९५) ॥ (४) ॥*॥ गोतमस्यायं शिष्यः । 'तस्येदम्' (४।३।१२०) इत्यण् । 'तद्गोत्रावतारात्' इति स्वामी । (**'गौतमो** गणभृद्भेदे शाक्यसिंहर्षिभेदयोः । **गौतम्युमायां** रोचन्याम्') ॥ (५) ॥*॥ अर्कस्य बन्धुः । सूर्यवंशजत्वात् ॥ (६) ॥*॥ माया चासौ देवी च । तस्याः सुतः ॥ (७) ॥*॥ यद्यपि वेदविरुद्धार्थानुष्ठातृत्वाज्जिनशाक्यौ नरकवर्गे वक्तुमुचितौ । तथापि देवविरोधित्वेन बुध्युपारोहादत्रैवोक्तौ । सप्त **'शाक्यस्य'** ॥

ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः ।
हिरण्यगर्भो लोकेशः स्वयंभूश्चतुराननः ॥ १६ ॥
धाताब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः ।
स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड्विधिः ॥ १७ ॥

ब्रह्मेत्यादि ॥ बृंहति वर्धयति प्रजा इति ब्रह्मा । 'बृहि वृद्धौ' (भ्वा० प० से०) । अन्तर्भावितण्यर्थः । 'बृंहेर्नोऽच्च' (उ० ४।१४६) इति मनिन् । धातोर्नस्यादादेशः । बृंहति वर्धत इति वा । यत्तु—व्योमादित्व (उ० ४।१५१) कल्पनमस्य मुकुटेन कृतम्, तत्तूक्तसूत्रास्मरणमूलकम् । (**'ब्रह्म** तत्त्वतपोवेदे न द्वयोः पुंसि वेधसि । ऋत्विग्योगभिदोर्विप्रे चाध्यात्मज्ञानयोस्तथा') ॥ (१) ॥*॥ आत्मनो विष्णोः सकाशात्, आत्मना स्वयमेव वा भवति । 'भुवः संज्ञान्तरयोः' (३।२।१७९) इति क्विप् । (**'आत्मभूर्ना** विधौ कामे') ॥ (२) ॥*॥ सुरेषु ज्येष्ठः ॥ (३) ॥*॥ परमे व्योमनि, चिदाकाशे, ब्रह्मपदे, वा तिष्ठति । 'परमे स्थः कित्' (उ० ४।१०) इतीनिः । 'तत्पुरुषे कृति—' (६।३।१४) इत्यलुक् 'स्थास्थिन्स्थूणाम्' (वा० ८।३।९७) इति षत्वम् ॥ (४) ॥*॥ लोकपितॄणां मरीच्यादीनामर्यमादीनां वा पिता पितामहः । 'पितृव्यमातुल—' (४।२।३६) इति साधुः । (**'पितामहः** पद्मयोनौ जनके जनकस्य च') ॥ (५) ॥*॥ हिरण्यं हिरण्मयमण्डं तस्य गर्भ इव । 'तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्' इति मनूक्तेः । तद्वा गर्भेऽस्य ॥ (६) ॥*॥ लोकानामीशः ॥ (७) ॥*॥ स्वयमेव भवति । 'भुवः—' (३।२।१७९) इति क्विप् ॥ (८) ॥*॥ चत्वार्याननान्यस्य ॥ (९) ॥*॥ दधाति । 'डुधाञ् धारणपोषणयोः' (जु० उ० अ०) । तृच् (३।१।१३३) । (**'धाता** वेधसि पालके') ॥ (१०) ॥*॥ अब्जं योनिरस्य ॥ (११) ॥*॥ द्रुह्यति दुष्टेभ्यः । 'द्रुह जिघांसायाम्' (दि० प० से०) ।—'द्रुहक्षिभ्यामिनन्' (उ० २।५०) इतीनन्—इति मुकुटः । तन्न । 'द्रुदक्षिभ्याम्' इति तत्र पाठात् । 'द्रविणं दक्षिणा' इत्युदाहरणात् । अतः 'बहुलमन्यत्रापि' (उ० २।४९) इतीनच् । बाहुलकाद्धुणाभावः ॥*॥ **'द्रुघणाः'** अपि । 'ब्रह्मात्मभूः स्याद्द्रुहिणो **द्रुघणश्च** पितामहः' इति भागुरेः । 'करणेऽयोविद्रुषु' (३।३।८२) इति हन्तेः करणेऽप् घनादेशश्च । पूर्वपदात्—' (८।४।३) इति णत्वम् । द्रुः संसारवृक्षो हन्यतेऽनेनेत्यर्थः । (**'द्रुघणो** मुद्गरेऽपि स्याद्द्रुहिणे **च** परश्वधे') ॥ (१२) ॥*॥ विरचयतीति विरिञ्चिः । 'रच प्रतियत्ने' (चु० उ० से०) । स्वार्थण्यन्तात् 'अच इः' (उ० ४।१३९) । पृषोदरादित्वात् (६।३।१०९) अकारस्येत्वं नुमागमश्च । (क्वचिदिलाभावे **'विरञ्चिः'** अपि । 'चिरं विरञ्चिनं चिरं विरञ्चिः' इत्यादौ प्रयोगदर्शनात्) ॥*॥ पचाद्यचि (३।१।१३४) **'विरिञ्चः'** अपि । (**'विरिञ्चो** द्रुहिणः शिञ्जो विरिञ्चिर्द्रुघणो मतः') इति शब्दार्णवात् । यत्तु—'रिच वियोजनसंयमनयोः' चुरादिः । 'अच इः' (उ० ४।१३९) । पृषोदरादित्वात् (६।३।१०९) नुम्, कुञ्जरवदुपधाह्रस्वत्वं च—इति मुकुटः । तन्न । 'रिच

१—क्वचित्पुस्तके इत उत्तरम् 'सर्वज्ञो वीतरागोऽर्हन्केवली तीर्थकृज्जिनः' । जिनदेवतानामानि षट् । इत्यधिकम् ॥

१—अयं पाठः सर्वत्र नोपलभ्यते ॥ २—उक्तप्रयोगे परसवर्णस्य (८।४।५३) नित्यत्वेन विलोमस्यासाधुत्वान्न सर्वसंमतत्वम् ॥

वियोजनसंपर्चनयोः' इति चुरादौ पाठदर्शनाद्भ्रस्वविधानस्यानुपयोगात् । कुञ्जरवदिति दृष्टान्तोऽप्ययुक्तः । तत्र ह्रस्वविधानाभावात् ॥ (१३) ॥*॥ कमलमासनं यस्य ॥(१४)॥*॥ सृजति । तृच् (३।१।१३३) । 'सृजिदृशोः–' (६।१।५८) इत्यम् ॥ (१५) ॥*॥ प्रजानां पतिः । '**प्रजापतिर्नो** दक्षादौ महीपाले विधातरि' । ('**प्रजापतिर्ब्रह्मराङ्गोर्जामातरि** दिवाकरे । वह्नौ त्वष्टरि दक्षादौ') ॥ (१६) ॥*॥ विदधाति । 'विधाञो वेध च' (उ०४।२२५) इति वेधादेशोऽसिप्रत्ययश्च । मुकुटस्तु—असुन्–इत्याह । तन्न । (६।१।१९७) आद्युदात्तत्वापत्तेः । 'विधुनेऽसिः' (उ०४।२२३) इत्युपक्रमाच्च । ('**वेधाः** पुंसि हृषीकेशे बुधे च परमेष्ठिनि') ॥ (१७) ॥*॥ विशेषेण दधाति । विरन्यौपसर्गनिवृत्त्यर्थः । ('**विधाता** द्रुहिणे कार्ये') ॥ (१८) ॥*॥ विश्वं सृजति । 'क्विप्' (३।२।७६) 'क्विन्प्रत्ययस्य–' (८।२।६२) इति कुत्वं तु न । 'रज्जुसृड्भ्याम्' इति (७।२।११४) भाष्यप्रयोगात् । यद्वा सृजियज्योः पदान्ते षत्वविधेः कुत्वापवादत्वात् । यत्तु मुकुटेनोक्तम्—'क्विन्प्रत्यय' इति तद्गुणसंविज्ञानपक्षे क्विन्तस्य कुत्वम्, न क्विवन्तस्य–'इति । तन्न । प्रत्ययग्रहणवैयर्थ्यात्, दृक् स्तूगित्यादयसिद्धिप्रसङ्गाच्च, तत्पक्षस्यात्राग्रहणात् । यद्यपि—'अतद्गुणसंविज्ञानपक्षे तु क्विन् उपलक्षणत्वात्तदभावे क्विबन्तस्यापि कुत्वम्' इत्युक्तम् । तदप्यस्मदुक्तप्रकारद्वयेन प्रत्युक्तम् ॥ (१९) ॥*॥ विधत्ते इति विधिः । 'उपसर्गे घोः किः' (३।३।९२) बाहुलकात् (३।३।११३) कर्तरि । यद्वा 'विध विधाने' (तु० प० से०) । इन् 'इगुपधात्कित्' (उ० ४।१२०) इति कित्त्वान्न गुणः । ('**विधिर्ब्रह्मविधानयोः** । **विधिर्वाक्ये** च दैवे च प्रकारे कालकल्पयोः') ॥ (२०) ॥*॥ विंशतिः '**ब्रह्मणः**' ॥

विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः ।
दामोदरो हृषीकेशः केशवो माधवः स्वभूः ॥ १८ ॥
दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः ।
पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः १९
उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः ।
पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः ॥ २० ॥
देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः ।
वनमाली बलिध्वंसी कंसारातिरधोक्षजः ॥ २१ ॥
विश्वंभरः कैटभजिद्विधुः श्रीवत्सलाञ्छनः ।

विष्णुरित्यादि ॥ वेवेष्टि । 'विष्लृ व्याप्तौ' (जु० उ० अ०) । 'विषेः किच्च' (उ० ३।३९) इति नुः ॥ (१) ॥*॥ नराणां समूहो नारम् । 'तस्य समूहः' (४।२।३७) इत्यण् । तदयनं यस्य । 'पूर्वपदात्–' (८।४।३) इति णत्वम् ॥*॥ नरा अयनं यस्येति विग्रहे '**नारायणः**' अपि । 'पृषोदरादित्वात्' (६।३।१०९) इति मुकुटस्तु चिन्त्यः । 'अथ नारायणो विष्णुरूर्ध्वकर्मा **नरायणः**' इति शब्दार्णवः । '**वासुर्नरायण–पुनर्वसु–विश्वरूपाः**' इति त्रिकाण्डशेषश्च । नरस्यापत्यम् 'नडादिभ्यः फक्' (४।१।९९) इति वा । संज्ञापूर्वकत्वाद्वृद्ध्यभावो वा । नराज्जाताः नारा आपः तत्त्वानि वा अयनं (यस्य) नारम् अयते जानाति वा, आययति प्रवर्तयति वा 'अय गतौ' (भ्वा० आ० से०) णिजन्तोऽपि । 'कृत्यल्युटः–' (३।३।११३) इति ल्युट् । ('**नारायणस्तु** केशवे **नारायणी** शतावर्युमा श्रीः') ॥ (२) ॥*॥ कृष्णो वर्णोऽस्यास्तीति 'कृषेर्वर्णे' (उ०३।४) इति नगन्तात् 'गुणवचनेभ्यो मतुपो लुक्' (वा० ५।२।९४) इति लुक् । कर्षत्यरीनिति वा बाहुलकाद्वर्ण विनापि कृषेः 'कृष विलेखने' (भ्वा० प० अ०) नक् । ('**कृष्णः** सत्यवतीपुत्रे वायसे केशवेऽर्जुने । **कृष्णा** स्याद्द्रौपदी नीली पिप्पलीद्राक्षयोरपि । मेचके वाच्यलिङ्गः स्यात्क्लीबे मरिचलोहयोः')[3] ॥ (३) ॥*॥ विकुण्ठाया अपत्यम् । शिवादित्वात् (४।१।११२) अण् । विगता कुण्ठा नाशोऽस्य, विकुण्ठं ज्ञानं स्थानं वास्ति स्वरूपत्वेनाश्रयत्वेन वास्य । ज्योत्स्नादित्वात् (वा० ५।२।१०३) अण् । यद्वा विकुण्ठानां जीवानामयं नियन्ता ज्ञानदो वा । 'तस्येदम्' (४।३।१२०) इति, 'शेषे' (४।२।९२) इति वाण् । विगता कुण्ठा यस्मात् । प्रज्ञाद्यण् (५।४।३८) वा । ('वैकुण्ठो वासवे विष्णौ') ॥४॥*॥ विष्टरे श्रूयते । असुन् (उ० ४।१८९) । विष्टरो वृक्षः । '**पलाशी विष्टरः स्थिरः**' इति त्रिकाण्डशेषः । तरुश्चात्राश्वत्थोऽभिमतः । 'अश्वत्थः सर्ववृक्षाणाम्' इत्युक्तेः । विष्टरो दर्भमुष्टिरिव श्रवसी कर्णावस्येति वा ॥ (५) ॥*॥ दाम उदरे यस्य । सप्तम्यन्तस्य वैयधिकरण्येऽपि समासः । 'सप्तमीविशेषणे बहुव्रीहौ' (२।२।३५) इति लिङ्गात् । गमकत्वादिति मुकुटोक्तो हेतुस्त्वप्रयोजकः ॥ (६) ॥*॥ हृषीकाणामिन्द्रियाणामीशः ॥ (७) ॥*॥ प्रशस्ताः केशाः सन्त्यस्य । कश्च ईशश्च केशौ पुत्रपौत्रौ स्तोऽस्य । 'केशाद्वः–' (५।२।१०९) इति वः । केशौ वाति वा । 'वा गतौ' (अ० प० अ०) । 'आतः–' (३।२।३) इति कः । 'शंभोः पितामहो ब्रह्मपिता शक्रायधीश्वरः' इति पाद्मोक्तेः । (यत्तु)—हन्त्यर्थाद्वधेः केशिनं हँतवान् । 'अन्येभ्योऽपि दृश्यते' (वा० ३।२।१०१) इति डः । पृषोदरादित्वात् (६।३।१०९) केशिशब्दस्येकारस्याकारे नलोपे च

१—'आपो वै नरसूनवः' इति मनूक्तेः, इति मुकुटः ॥ २—'नराज्जातानि तत्त्वानि' इति मत्रवर्णादिति मुकुटः ॥ ३—मुकुटस्तु 'कृषिरुत्कृष्टवचनो नश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' इति त्वौपनिषदाः । उत्कृष्टा निर्वृतिरस्मादिति व्युत्पत्तिरित्याह ॥ ४—'यस्मात्त्वयैष दुष्टात्मा हतः केशी जनार्दन । तस्मात्केशवनामा त्वं लोके ख्यातो भविष्यसि' इति हरिवंशोक्तेः, इति मुकुटः ॥

केशवः–इति मुकुटः । तन्न । वधधातोरभावात् । वध इत्यादौ वधादेशविधानात् । (**'केशवोऽजे** च पुंनागे पुंसि केशवति त्रिषु') ॥ (८) ॥*॥ माया लक्ष्म्या धवः । यद्वा मधोरपत्यम् । तद्वंश्यत्वात् (मधोर्हन्तेति वा ।) 'शेषे' (४।२।९२) इत्यण् । मा नास्ति धवोऽस्य वा । (**'माधवोऽजे** मधौ राधे माधवे ना स्त्रियां मिसौ । मधु शर्करावासन्तीकुट्टनीमदिरासु च') ॥ (९) ॥*॥ स्वतो भवति । 'भुवः–' (३।२।१७९) इति क्विप् । (**'स्वभूर्ना** ब्रह्मणि हरौ') ॥ (१०) ॥*॥ दैत्यानामरिः (**'दैत्यारिः** पुंसि सामान्यदेवे च गरुडध्वजे') ॥ (११) ॥*॥ पुण्डरीकमिवाक्षिणी यस्य । 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्' (५।४।७३) । पुण्डरीकेष्वक्षि यस्य वा । एतच्च 'हरिस्ते साहसं कमलबलिमादाय' इत्यत्र व्यक्तम् । यद्वा पुण्डरीकं लोकात्मकम् अक्षति । 'अक्षू व्याप्तौ' (भ्वा० प० वे०) । 'कर्मण्यण्' (३।२।१) तत् क्षायति वा । 'क्षै क्षये' (भ्वा० प० अ०) 'आतोऽनुप–' (३।२।३) इति कः । 'अन्येषामपि–' (६।३।१३७) इति दीर्घः । आङ्प्रश्लेषो वा । तत्र 'सुपि' (३।२।४) इति (योगविभागात्) 'मूलविभुजादि' (वा० ३।२।५) इति कः ॥ (१२) ॥*॥ गां भुवं धेनुं स्वर्गं वेदं वा अविदत् (विन्दति) । 'विदॢ लाभे' (तु० उ० प्र०) । 'गवादिषु विन्देः संज्ञायाम्' (वा० ३।१।१३८) इति शः । वराहरूपेणोद्धरणात् । कामधेनोरैश्वर्यप्राप्तेः । इन्द्रेण स्वर्गस्य निवेदनात् । मत्स्यादिरूपेण वेदाहरणाद्वा । (**'गोविन्दो** वासुदेवे स्याद्बृहस्पतौ') ॥ (१३) ॥*॥ गरुडो ध्वजश्चिह्नमस्य ॥ (१४) ॥*॥ पीतमम्बरं यस्य । (**'पीताम्बर**स्तु शैलूषे पुंसि कैटभसूदने') ॥ (१५) ॥*॥ नास्ति च्युतं स्खलनं स्वपदाद्यस्य । नाच्योष्ट इति वा । 'च्युङ् गतौ' (भ्वा० आ० अ०) । 'गत्यर्था–' (३।४।७२) इति क्तः । (**'अच्युत**स्तु हरौ पुंसि त्रिषु स्थिरे') ॥ (१६) ॥*॥ शृङ्गस्य विकारः शार्ङ्गं धनुः । 'अनुदात्तादेश्च–' (४।३।१४०) इत्यञ् । तदस्यास्ति । 'अत इनिठनौ' (५।२।११५) इति इनिः ॥ (१७) ॥*॥ विष्वक्शब्दो नानार्थो निपातः । विषु नाना अञ्चति । 'ऋत्विग्–' (३।२।५९) इति क्विन् । 'उगितश्च' (४।१।६) इति ङीप् । विषूची सेना यस्य । गैंकारपरत्वात् 'एति संज्ञायामगात्' (८।३।९९) इति न षत्वम् । विष्वक्सेनः । 'विष्वग् विश्वक् स्मृतो विज्ञैर्विषुवं विशुवं तथा' इति द्विरूपकोशात् तालव्यमध्योऽपि । 'तालव्या मूर्धन्याश्चैते शब्दाः शटी च परिवेषः । **विश्वक्सेनो** श्रेषः प्रतिष्कशः कोशविशदौ च' इत्यूष्मविवेकाच्च । **'विश्वक्सेना** फलिन्यां स्यात् **विश्वक्सेनो** जनार्दने' । मुकुटस्तु—'पूर्वपदात्संज्ञायामगः' (८।४।३) इति न णत्वम् । विष्वक्शब्दस्य गकारान्तत्वात् । गकारान्तत्वं च णत्वे कर्तव्ये परस्य 'खरि च' (८।४।५५, भा० ६१) इति चर्त्वस्यासिद्धत्वात्–इत्याह । तन्न । 'अट्कुप्वाङ्–' (८।४।२) इत्यधिकारात्सकारव्यवाये प्राप्तेरेवाभावात् ॥ (१८) ॥*॥ जननं जनः । भावे घञ् (३।३।१८) । 'जनिवध्योश्च' (७।३।३५) इति न वृद्धिः । जनो जन्म । तमर्दयति जनार्दनः । 'अर्द गतौ याचने च' । 'कृत्यल्युटः–' (३।३।११३) इति कर्मणि ल्युट् ॥] ॥ (१९) ॥*॥ इन्द्रमुपगतोऽनुजत्वात् । उपेन्द्रः । 'कुगति–' (२।२।१८) इति समासः । यत्तु—उपगत इन्द्रोऽस्य–इति । तन्न । 'कुगति–' (२।२।१८) इत्युपन्यासविरोधात् ॥ (२०) ॥*॥ इन्द्रस्यावरं जातः । 'अन्येष्वपि–' (३।२।१०१) इति डः । [इन्द्रः अवरजोऽस्य वा ॥] (२१) ॥*॥ चक्रं पाणौ यस्य । 'प्रहरणार्थेभ्यः–' (वा० २।२।३६) इति सप्तम्याः परत्वम् ॥ (२२) ॥*॥ चत्वारो भुजा यस्य । यद्वा 'भुजँ भुनक्ति' इति भुजः । चतुर्णां धर्मार्थकाममोक्षाणां भुजः ॥ (२३) ॥*॥ पद्मं नाभौ यस्य । (गङ्वादित्वात् (वा० २।२।३५) सप्तम्याः परनिपातः) । 'अच् प्रत्यन्वव–' (५।४।७५) इत्यत्र 'अच्' इति योगविभागादच् ॥ (२४) ॥*॥ मधोरसुरस्य रिपुः ॥ (२५) ॥*॥ वसुदेवस्यापत्यम् । 'ऋष्यन्धक–' (४।१।११४) इत्यण् । यद्वा वसतीति वासुः । 'बाहुलकादुण्' । वासुश्चासौ देवश्च । 'सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः । ततोऽसौ वासुदेवेति विद्वद्भिः परिगीयते' इति विष्णुपुराणात् । वसुदेवे शुद्धान्तःकरणे प्रकाशते इति वा । 'शेषे' (४।२।९२) इत्यण् ॥*॥ **वासुरपि** । 'वासुर्नारायणपुनर्वसुविश्वरूपाः' इति त्रिकाण्डशेषात् ॥ (२६) ॥*॥ त्रिषु लोकेषु गुणेषु वा, त्रयो वा विक्रमाः पादविन्यासा यस्य ॥ (२७) ॥*॥ देवक्या नन्दनः । देवकशब्दस्य तदपत्ये लक्षणया वृत्तौ 'पुंयोगात्–' (४।१।४८) इति ङीष् । 'नहि तत्र दांपत्यलक्षण एव पुंयोगः, किं तु जन्यत्वाद्यपि' इति हरदत्तादयः । अत एव 'प्राक् केकयीतो भरतस्ततोऽभूत्' इति भट्टिः । एवं रेवतीरमणोऽपि ॥*॥ अणि तु **दैवकी** । **'दैवकी देवकी** च' इति द्विरूपकोषः ॥*॥ देवकानाचष्टे इति णिजन्तात् 'अच इः' (उ० ४।१३९) । 'ततो ङीष्' (वा० ४।१।४५) इति,

१—इदं च—'वध हिंसायाम् । वधकः' इति कृदन्तसिद्धान्तकौमुदीविसरणमूलकम् । नहि तत्र वधादेशप्राप्तिरस्ति । किंच वधादेशस्यादन्तत्वेन वृद्धेरप्राप्तौ 'जनिवध्योश्च' (७।३।३५) इति सूत्रं व्यर्थमेव स्यात् । तस्मान्मुकुटोक्तिः सम्यगेव । 'हतवान्' इत्युक्तिस्तु हरिवंशस्योक्तिसानुकूला ॥ २—यदोर्ज्येष्ठः पुत्रो मधुः तद्वंश्याः सर्वेऽपि माधवाः । अत एव 'प्रहितः प्रधनाय माधवान्' इति माघः, इति मुकुटः ॥ ३—चर्त्वस्यासिद्धत्वादिति मुकुटः ॥

१—मुकुटस्तु योगविभागस्य हि पूर्वाचार्येष्टसाधकत्वम् । ननु नाभ्यन्तस्य सर्वत्रैवाच् समासान्त इति नियमः । तेन 'प्रजा इवाङ्गादरविन्दनाभेः' इति माघः—इत्यप्याह ॥

देवकस्यापत्यं वा । 'अत इञ्' (४।१।९५) संज्ञापूर्वकत्वाद्वृद्ध्यभावः । 'इतो मनुष्यजातेः' (४।१।६५) इति ङीष्—इति च मुकुटः ॥ (२८) ॥*॥ शूरस्यापत्यम्, तद्वंशजत्वात् । वृष्णित्वेऽपि बाह्वादित्वात् (४।१।९६) इञ् ॥*॥ 'सूरो यादवे दन्त्यवान्' इति माधवी । **'सौरिः'** अपि ॥ (२९) ॥*॥ श्रियः पतिः (**'श्रीपति**र्विष्णुभूपयोः') ॥ (३०) ॥*॥ पुरुषेषूत्तमः, पुरुषाणां पुरुषेभ्यो वोत्तमः ॥ (३१) ॥*॥ 'आपादपद्मं या माला वनमालेति सा मता' इति कलिङ्गः । सास्यास्ति । व्रीह्यादित्वात् (५।२।११६) इनिः । वनं मलितुं शीलमस्य इति वा । 'मल धारणे' (भ्वा० आ० से०) । 'सुपि–' (३।२।७८) इति णिनिः । (**'वनमाली** तु गोविन्दे वाराह्यां **वनमालिनी'**) (३२) ॥*॥ बलिमसुरं ध्वंसितुं शीलमस्य । ताच्छील्ये (३।२।७८) णिनिः । बलिना पूजादिना विद्यां ध्वंसितुं शीलमस्येति वा ॥ (३३) ॥*॥ कंसस्यारातिः ॥ (३४) ॥*॥ अधः कृतम् अक्षजमैन्द्रियकं ज्ञानं येन, अधोक्षाणां जितेन्द्रियाणां जायते प्रत्यक्षो भवति वा, अधः अक्षजं ज्ञानं यस्येति वा[1] ॥ (३५) ॥*॥ विश्वं बिभर्ति । 'संज्ञायां भृतृवृजि–' (३।२। ४६) इति खच् । 'अरुर्द्विषद्–' (६।३।६७) इति मुम् । **'विश्वंभरो**च्युते शके पुंसि, **विश्वंभरा** भुवि' ॥ (३६) ॥*॥ कैटभमजैषीत् । 'सत्सूद्विष–' (३।२।६१) इति क्विप् ॥ (३७) ॥*॥ विध्यत्यसुरान् । 'पृभिदिव्यधिगृधिधृषिभ्यः' (उणा० १।२३) इति कुः । **('विधुश्चन्द्रेऽच्युते')** ॥ (३८) ॥*॥ वदति महत्त्वम् । 'वृ-तॄ-वदि-वन्धि-वसि-हनि-कमि-कषिभ्यः सः' (उ० ३।६२) वत्सः । श्रीयुक्तो वत्सः श्रीवत्सो महत्त्वलक्षणं श्वेतैरोमावर्तविशेषो लाञ्छनं यस्य ॥*॥ 'शौरिश्रीवत्सदैत्यारिविष्वक्सेनजनार्दनाः' इति शब्दार्णवात् । **'श्रीवत्सः'** अपि ॥ (३९) ॥*॥ ऊनचत्वारिंशत् **'विष्णोः'** ॥

वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः ॥ २२ ॥

वसुदेव इत्यादि ॥ वसुषु दीव्यति । 'दिवु क्रिडादौ' (दि० प० से०) । पचाद्यच् (३।१।१३४) । यत्तु—'वसुमिर्दीव्यति' इति विगृह्य पचाद्यच् (३।१।१३४)—इत्याह मुकुटः । तन्न । 'कर्मण्यण्' (३।२।१) इत्यपवादस्य सत्त्वात् । 'दिवः कर्म च' (१।४।४३) इति कर्मकरणसंज्ञयोः समावेशस्य सत्त्वात् । वसूनि दीव्यतीति विग्रहस्य वैयर्थ्याच्च ॥ (१) ॥*॥ आनकैर्दुन्दुभिभिश्चोपलक्षितः । वसुदेवजन्मनि देवैरानकदुन्दुभिवादनात् । हरौ जाते, कृष्णे जाते, इति स्वामिमुकुटोक्तिस्तु भागवताद्यश्रवणमूलिका । 'आनकदुन्दुभौ वसुदेवपिता' इत्यपि निर्मूलम् ॥ (२) ॥*॥ विष्णुनामसु, कृष्णनामोपगमात्कृष्णस्यैव विष्णुत्वमभिप्रैति ग्रन्थकृत् । अवतारान्तराणां तु तदंशत्वात्तन्नामानि नोक्तानि । 'अन्ये त्वंशकलाः पुंसः कृष्णस्तु भगवान्स्वयम्' इति वदतो व्यासस्याप्ययमाशयो लभ्यते । अत एव कृष्णजनकस्यात्र नामोक्तम्, न तु जमदग्निदशरथादेः । द्वे **'कृष्णपितुः'** ॥

बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः ।
रेवतीरमणो रामः कामपालो हलायुधः ॥ २३ ॥
नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली ।
संकर्षणः सीरपाणिः कालिन्दीभेदनो बलः ॥ २४ ॥

बलभद्र इत्यादि ॥ बलं भद्रं श्रेष्ठमस्य, बलेन भद्र इति वा । **'बलभद्रा** त्रायमाणाकुमार्योः, पुंसि सीरिणि,' (**'बलभद्रस्त्वनन्ते** बलशालिनि') ॥ (१) ॥*॥ प्रलम्बं हतवान् । मूलविभुजादित्वात् (वा० ३।२।५) कः ॥ (२) ॥*॥ बलेन दीव्यति । (**'बलदेवो** बले वाते त्रायमाणौषधौ स्त्रियाम्') ॥ (३) ॥*॥ अच्युतस्याग्रजः ॥ (४) ॥*॥ रेवत्या रमणः । नन्द्यादित्वात् (३।१।१३४) ल्युः ॥ (५) ॥*॥ रमते । 'ज्वलितिकसन्तेभ्यः–' (३।१।१४०) इति णः । रमन्तेऽस्मिन्योगिनः, इति वा । 'हलश्च' (३।३।१२१) इति घञ् । यत्तु—रमयति मोदयति प्रजा रूपमस्य–इति मुकुटेनोक्तम् । तन्न । णिजन्तस्य ज्वलादित्वाभावात् । प्रत्ययान्तानां धात्वन्तरत्वात् । (**'रामा** योषा हिङ्गुनद्योः क्लीबं वास्तुककुष्ठयोः । ना राघवे च वरुणे रैणुकेये हलायुधे । हये च पशुभेदे च त्रिषु चारौ सितेऽसिते') ॥ (६) ॥*॥ कामान् पालयति । 'पाल रक्षणे' (चु० प० से०) । 'कर्मण्यण्' (३।२।१) यत्तु—'पॄ पालनपूरणयोः' (जु० प० से०) । इत्युक्तं मुकुटेन । तच्चिन्त्यम् ॥ (७) ॥*॥ हलमायुधं यस्य ॥ (८) ॥*॥ नीलमम्बरं यस्य । (**'नीलाम्बरो** रौहिणेये कौणपे च शनैश्चरे') ॥ (९) ॥*॥ रोहिण्या अपत्यम् । शुभ्रादित्वात् (४।१।१२३) ढक् । (**'रोहिणेयो**ऽन्यवद्वत्से ना बुधे च हलायुधे') ॥ (१०) ॥*॥ तालोऽङ्को ध्वजो यस्य । (**'तालाङ्कः** करपत्रे स्याच्छाकभेदेऽच्युताग्रजे । महालक्षणसंपन्नपुरुषे पुस्तके हरे') ॥ (११) ॥*॥ 'मुस खण्डने' (दि० प० से०) । वृषादित्वात् (उ० १।१०६) कलच् । मुसलमस्त्यस्य ॥*॥ मूर्धन्यमध्योऽपीत्येके । तत्र 'मुष स्तेये' (क्र्या० प० से०) ॥ (१२) ॥*॥ हलमस्त्यस्य । (**'हली** कृषकसीरिणोः') ॥ (१३) ॥*॥ संकर्षति, सम्यक् कृष्यते वा । आद्ये नन्द्यादित्वात् (३।१।१३४) ल्युः । द्वितीये कर्मणि (३।३।११३) ल्युट् ॥ (१४) ॥*॥ सीरः पाणौ यस्य । 'अजगरसर्पे शीरस्तालव्यादिः कविभिराख्यातः । लाङ्गलवचनो नित्यं दन्त्यादिर्दृश्यते शास्त्रे' इत्यूष्मविवेकः ॥ (१५) ॥ कालिन्द्या भेदनः ।

१—'शर्वः शिवे केशव एव शौरिः' इति शकारभेदात्तालव्यादिः, इत्यपि मुकुटः ॥ २—मुकुटस्तु—अधो न क्षीयते जात्विति । पृषोदरादित्वात् (६।३।१०९) अधोक्षजः । तथा चोद्योगपर्वणि—'अधो न क्षीयते जातु यस्मात्तस्मादधोक्षजः' इति । इत्यप्याह ॥ ३—क्रुद्धस्य दुर्वाससः पदाघातरूपो रेखाविशेषः श्रीवत्स इति पञ्जिका—इति मुकुटः ॥

ल्युः (३।१।१३४) ॥ (१६) ॥*॥ बलमस्यास्ति । अर्शआद्यच् (५।२।१२७) । (**'बलं** गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः । पुमान्हलायुधे दैत्यप्रभेदे वायसेऽपि च') ॥ (१७) ॥*॥ सप्तदश **'बलभद्रस्य'** ॥

मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः ।
कंदर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः ॥ २५ ॥
संबरारिर्मनसिजः कुसुमेषुरनन्यजः ।
पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ॥ २६ ॥
ब्रह्मसूर्विश्वकेतुः स्यात् ।

मदन इत्यादि ॥ मदयति । **'मदी** हर्षग्लेपनयोः' (भ्वा० प० से०) घटादिः । ल्युः (३।१।१३४) (**'मदनः** सिक्थके स्मरे । राढे वसन्ते धत्तूरे') ॥ (१) ॥*॥ मननं मत्=चेतना । संपदादि क्विप् (वा० ३।३।१०८) । 'गमादीनां क्वौ' (वा० ६।४।४०) इति नलोपः । 'ह्रस्वस्य' (६।१।७१) इति तुक् । मथतीति मथः । 'मथे विलोडने' (भ्वा० प० से०) । अच् (३।२।१३४) । मतो मथः=मन्मथः । **'मन्मथः** कामचिन्तायां कपित्थे कुसुमायुधे' । यत्तु—'अनुदात्तोपदेश–' (६।४।३७) इत्यनुनासिकलोपः, इति स्वामिमुकुटावूचतुः । तन्न । क्विपो झलादित्वाभावात् ॥ (२) ॥*॥ म्रियन्तेऽनेन । करणे घञ् (३।३।१९) । मारयति वा । अच् (३।१।१३४) (**'मारोऽनङ्गे** मृतौ विघ्ने **मारी** चण्ड्यां जनक्षये') ॥ (३) ॥*॥ प्रकृष्टं द्युम्नं बलमस्य ॥ (४) ॥*॥ मीनशब्दो जलचरोपलक्षणार्थः । मीनो मकरः केतनं ध्वजो यस्य ॥ (५) ॥*॥ 'कम्' इत्यव्यये कुत्सायाम् । कुत्सितो दर्पोऽस्य कंदर्पः । यद्वा कं सुखम् तत्र तेन वा दृप्यति । 'दृप हर्षमोहनयोः' (दि० प० अ०) । पचाद्यच् (३।१।१३४) ॥ (६) ॥*॥ दर्पयति ॥ ण्वुल् (५।१।१३३) ॥ (७) ॥*॥ नास्त्यङ्गमस्य । न अङ्गं ज्ञानमस्मादिति वा । **'अनङ्गो** मदनेऽनङ्गमाकाशमनसोरपि' ॥ (८) ॥*॥ काम्यतेऽनेन । 'पुंसि संज्ञायाम्–' (३।३।११८) इति घः । (**'कामः** स्मरेच्छयोः पुमान् । रेतस्यपि निकामे च काम्येऽपि स्यान्नपुंसकम्') ॥ (९) ॥*॥ पञ्च शरा अस्य । 'उन्मादनस्तापनश्च शोषणः स्तम्भनस्तथा । संमोहनश्च कामस्य पञ्च बाणाः प्रकीर्तिताः' ॥ (१०) ॥*॥ स्मरयत्युत्कण्ठयति 'स्मृ आध्याने' (भ्वा० प० अ०) पचाद्यच् (३।१।१३४) । स्मर्यतेऽनेनेति वा । 'पुंसि संज्ञायाम्–' (३।३।११८) इति घः ॥ (११) ॥*॥ संबरस्यारिः । **'क्लीबं** तु **संबरं** नीवौ बौद्धव्रतविशेषयोः । विशेषे पुंसि दैत्यस्य मत्स्यस्य हरिणस्य च' इति दन्त्यादौ रभसः ॥*॥ **'शंबरं** सलिले पुंसि मृगदैत्यविशेषयोः' इति तालव्यादौ मेदिनीकारात् तालव्यादिरपि ॥ (१२) ॥*॥ शृङ्गाररूपेण मनसि जायते स्म । 'सप्तम्यां जनेर्डः' (३।२।९७) । 'तत्पुरुषे कृति' (६।३।१४) इत्यलुक् ॥*॥ लुकि तु **'मनोजः'** ॥ (१३) ॥*॥ कुसुमानीषवो यस्य ॥ (१४) ॥*॥ नास्त्यन्यद्यस्मादनन्यो विष्णुः । ततो जातः । मनसोऽन्यस्माच्च जायते इति वा ॥ (१५) ॥*॥ पुष्पं धनुरस्य । 'वा संज्ञायाम्' (५।४।१३३) इत्यनङ् ॥*॥ तदभावे सान्तः (**पुष्पधनुः**) अपि ॥ (१६) ॥*॥ रतेः पतिः ॥ (१७) ॥*॥ मकरो ध्वजोऽस्य ॥ (१८) ॥*॥ आत्मना भवति । 'भुवः' (३।२।१७९) इति क्विप् ॥ (१९) ॥*॥ ब्रह्म तपः, ब्रह्माणं वा सुवति चालयति । 'षू प्रेरणे' (तु० प० से०) । 'अन्येभ्योऽपि–' (३।२।७६) इति क्विप् ॥ (२०) ॥*॥ विश्वस्मिन् केतुरस्य । 'पताकायां द्युतौ **केतुर्ग्रहोत्पातादिलक्ष्मसु**' इति रभसः ॥*॥ 'खड्गायुधोऽनिरुद्धः स्यात्तथा चैवर्श्यकेतनः' इति साम्बपुराणात् **'ऋश्यकेतुः'** अपि । ऋश्यो मृगविशेषः । **'एणः कुरङ्गमो रिश्यः स्यादृश्यश्चारुलोचनः'** इति पुरुषोत्तमात् ॥ (२१) ॥*॥ 'आत्मभूर्ब्रह्मसूः कामः' इत्यमरमालादर्शनादिदं द्वयं कामस्य । 'अनिरुद्धो विश्वकेतुर्ब्रह्मसूरप्युषापतिः' इति, 'ब्रह्मसूस्त्वनिरुद्धः स्यात्' इति च बृहदमरशब्दार्णवाभ्याम्, 'ब्रह्मसूर्विश्वकेतुश्च **विश्वक्सेनात्मजात्मजः**' इति भागुरेश्च ब्रह्मस्वादिचतुष्टयमनिरुद्धस्येत्यन्ये ॥*॥ एकविंशतिः **'कामस्य'** ॥

अनिरुद्ध उषापतिः ।

अनिरुद्ध इत्यादि ॥ न निरुद्धः ॥ (१) ॥*॥ उषायाः पतिः ॥*॥ **'ऊषा** बाणस्य पुत्री स्यादनिरुद्धगृहिण्युषा' इत्यजयात् (**ऊषापतिः**) दीर्घादिरपि ॥ (२) ॥*॥ द्वे **'अनिरुद्धस्य'** ॥

लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ॥२७॥

लक्ष्मीरित्यादि ॥ लक्ष्यति पश्यति नीतिज्ञम् । 'लक्ष दर्शनाङ्कनयोः' (चु० प० से०) । 'लक्षेर्मुट् च' (उणा० ३।१६०) इति ईप्रत्ययः, तस्य च मुट् । **'लक्ष्मीः** संपत्तिशोभयोः । ऋद्ध्योषधौ च पद्मायां वृद्धिनामौषधेऽपि च' ॥ (१) ॥*॥ पद्ममालयोऽस्याः ॥ (२) ॥*॥ पद्ममस्त्यस्याः । अर्शआद्यच् (५।२।१२७) । **'पद्मोऽस्त्री** पद्मके व्यूहे निधिसंख्यान्तरेऽम्बुजे । ना नागे स्त्री फञ्जिकाश्रीचारटीपन्नगीषु च' ॥ (३) ॥*॥ कमलैवम् । **'कमलं** सलिले ताम्रे जलजे क्लो(ल्यो)म्नि भूषणे । मृगभेदे तु **कमलः, कमला** श्रीवरस्त्रियोः' ॥ (४) ॥*॥ श्रयति हरिम् । 'क्विब्वचि–' (वा० ३।२।१७८) इति क्विब्दीर्घौ । यत्तु मुकुटेन 'संप्रसारणनिषेधश्च' इत्युक्तम् तच्चिन्त्यम् । श्रयतेस्तदविधानात् । यत्तु—श्रीयते सर्वैः–इति विगृहीतम् । तन्न । क्विपः कृत्त्वेन कर्तरि विधानेन कर्मण्यसंभवात् । बाहुलकस्य स्वगतिकगतित्वात् ।

१—संवरणं संवरः, इति मुकुटः ॥ २—दैत्यानां शं कल्याणं वृणोति । 'शमि धातोः' (३।२।१४) इत्यादिनाऽच् इत्यपि मुकुटः ॥

१—त्रिकाण्डशेषात् ॥

'लक्ष्मीसरस्वतीधात्रिवर्गसंपद्विभूतिशोभासु । उपकरणवेशरचनाविधानेषु च **श्री**रिति प्रथिता' इति व्याडिः ॥ (५) ॥*॥ श्रीलक्ष्मीशब्दौ 'कृदिकारात्–' (ग० ४।१।४५) इति ङीषन्ताविति मैत्रेयः । तन्न । कारग्रहणस्य तपरत्वार्थस्य वैयर्थ्यप्रसङ्गात् । अन्यथा 'कृदिवर्णात्–' 'कृदेः' इति वा वदेत् । 'कारग्रहणाच्च' इति मनोरमायां उणादौ दीक्षिताः ॥*॥ हरेः प्रिया ॥ (६) ॥*॥ षड् **'लक्ष्म्याः'** ॥

शङ्खो लक्ष्मीपतेः पाञ्चजन्यः

शङ्ख इति ॥ पञ्चजने दैत्यभेदे भवः । 'पञ्चजनात्' (वा० ४।३।५८) इति यञ् । यत्तु मुकुटः 'बहिर्देवपञ्चजनेभ्यः' इत्युपसंख्यानाञ्ञ्यः—इति । तन्न । एतादृशवार्तिकाभावात् । पञ्चजने पाताले भव इति स्वामी । (**'पाञ्चजन्यः** पोटगले विष्णुशङ्खे हुताशने') ॥ (१) ॥*॥ एकम् **'विष्णुशङ्खस्य'** ॥

चक्रं सुदर्शनः ।

चक्रमिति ॥ शोभनं दर्शनमस्य । सुखेन दृश्यत इति वा । 'भाषायां शासियुधिदृशिमुषिभ्यो युच्' (वा० ३।३।११०) । **'सुदर्शनो** हरेश्चक्रे मेरुजम्बुद्रुमे पुमान् । न द्वीपेऽपि शक्रनगरे आ(प्रा)ज्ञौषधिभिदोः स्त्रियाम्' । **'सुदर्शनोऽस्त्रियां चक्रे'** इति नामनिधानात् क्लीबेऽपि ॥ (१) ॥*॥ एकम् **'विष्णुचक्रस्य'** ॥

कौमोदकी गदा

कौमोदकीति ॥ पालकत्वात् कोः पृथिव्या मोदकः कुमोदको विष्णुः । 'विष्णुः **कुमोदकः** शौरिः' इति दुर्गः । तस्येयम् ॥*॥ कूपोदकाज्जातत्वात् **कौपोदकी** इति तु स्वामी ॥ (१) ॥*॥ गदति । पचाद्यच् (३।१।१३४) । **'गदो** भ्रातरि विष्णोश्च आमये नायुधे **गदा'** । एकम् **'विष्णुगदायाः'** ॥

खड्गो नन्दकः

खड्ग इति ॥ नन्दयति देवान् ण्वुल् । (३।१।१३३) । **'नन्दको** हरिखड्गे च हर्षके कुलपालके' ॥ (१) ॥*॥ एकम् **'विष्णोः खड्गस्य'** ॥

कौस्तुभो मणिः ॥ २८ ॥

कौस्तुभ इति ॥ कुं भुवं स्तुभ्नानि व्याप्नोति कुस्तुभोऽब्धिः । तत्र भवः । कुं स्तोभते कुस्तुभो विष्णुः । 'ष्टुभ स्तम्भे' (भ्वा० आ० से०) । मूलविभुजादित्वात् (वा०३।२।५) कः । तस्यायमिति वा ॥ (१) ॥*॥ 'लक्ष्मीपतेः' इति एतत्पर्यन्तं संबध्यते । एकम् **'विष्णोर्मणेः'** ॥

गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः ।
नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः ॥ २९ ॥

गरुत्मानिति ॥ गरुतः पक्षाः सन्त्यस्य । मतुप् (५।२।९४) यवादित्वात् (८।२।९) 'झयः' (८।२।१०) इति वत्वं न ॥ (१) ॥*॥ गरुद्भिर्डयते । 'डीङ् विहायसा गतौ' (भ्वा० आ० से०) । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः । पृषोदरादित्वात् (६।३।१०९) तलोपः ॥ (२) ॥*॥ तार्क्ष्यस्य कश्यपस्यापत्यम् । ऋष्यण् (४।१।११४) । बहुत्वे तार्क्ष्याः । तृक्षस्यापत्यम् गर्गादित्वात् (४।१।१०५) यञ्वा । बहुत्वे तृक्षाः इत्यन्ये । (**'तार्क्ष्यस्तु** स्यन्दने वाहे गरुडे गरुडाग्रजे । अश्वकर्णाह्वयतरौ स्यात्तार्क्ष्यं तु रसाञ्जने । अहौ च') ॥ (३) ॥ * ॥ विनतायाः अपत्यम् । 'स्त्रीभ्यो ढक्' (४।१।१२०) । (**'वैनतेयस्तु** गरुडे स्यात्प्रभाकरसारथौ') ॥ (४) ॥*॥ खगानामीश्वरः ॥ (५) ॥ * ॥ नागानामन्तकः ॥ (६) ॥ * ॥ विष्णोः रथ इव । यद्वा **'रथः** पौरुषदेहयोः' इति त्रिकाण्डशेषः । विष्णो रथः पौरुषं देहो वा । 'वैनतेयश्च पक्षिणाम्' इति गीता ॥ (७) ॥ * ॥ कनकमयत्वात्कनकवर्णत्वाद्वा शोभने पर्णे पक्षावस्य । (**'सुपर्णः** खर्णचूडे च गरुडे कृतमालके । **सुपर्णा** कमलिन्यां च वैनतेयस्य मातरि') ॥ (८) ॥*॥ पन्नगानश्नाति । 'अश भोजने' (आ० प० से०) । ल्युः (३।१।१३४) । पन्नगा अशनं यस्येति वा ॥ (९) ॥*॥ नव **'गरुडस्य'** ॥

शंभुरीशः पशुपतिः शिवः शूली महेश्वरः ।
ईश्वरः सर्व ईशानः शंकरश्चन्द्रशेखरः ॥ ३० ॥
भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः ।
मृत्युंजयः कृत्तिवासाः पिनाकी प्रमथाधिपः ॥३१॥
उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत् ।
वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ॥ ३२ ॥
कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः ।
हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः ॥ ३३ ॥
गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ।
व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः ॥३४॥

शंभुरित्यादि ॥ शं सुखं भवति । क्षन्तर्भावितण्यर्थात्

१—'तां दृष्ट्वा श्रीमिवायतीम्' इति प्रयोगः–इति मुकुटः ॥ २—कारग्रहणस्य तपरार्थत्वे 'तथेकारोकारौ । ऋकारस्त्रिशतः' इति सिद्धान्तकौमुद्यामेव लिखितत्वान्न मानम् । अत एव 'नहि कारग्रहणे केवलग्रहणम्' इति मुनित्रयेण परिभाषितमिति रक्षितग्रन्थानुवादो मनोरमोणादावेव कृतः ॥ ३—'अन्तः पूर्वपदाद्–' (४।३।६०) इति सूत्रे 'बाह्यो दैव्यः पाञ्चजन्योऽथ गम्भीराख्य इष्यते' इति वदता भाष्यकृता ध्वनितस्य 'गम्भीराख्यः' (४।३।५८) इति सूत्रे 'बहिर्देवपञ्चजनेभ्यः' इति वार्तिकस्य काशिकायां दृश्यमानत्वेन बाह्यदैव्ययोः 'बहिषष्टिलोपो यञ्च' 'देवाद्यञञौ' इति वार्तिकान्तरेण सिद्धौ पाञ्चजन्यस्य साधनाय केवलं 'पञ्चजनाद्' इत्यस्यैवावश्यकत्वमित्यभिमन्तृदीक्षितेन कौमुद्यामलेखनेनैव वार्तिकाभावादित्युक्तिश्चिन्त्यैवेति शम् ॥ ४—'अमरावत्यां ङयन्तः । लिङ्गानुशासनकाराभिप्रायेण तु पुंसि । गौडमतेन तु क्लीबे' इत्यनेकार्थकैरवाकरकौमुदी ॥

मितद्वादित्वात् (वा० ३।२।१८०) डुः । यत्तु 'शं भवत्यस्माद्' इति स्वामिमुकुटौ । तन्न । कर्तरि कृतो विधानादपादाने डुप्रत्ययाभावात् । ('**शंभुर्ब्रह्मार्हतोः शिवे**') ॥ (१) ॥*॥ ईष्टे । 'ईश ऐश्वर्ये' (अ० आ० से०) । इगुपधत्वात् कः । (३।१।१३५) । ('**ईशः** स्वामिनि रुद्रे च स्या**दीशा** हलदण्डके') ॥ (२) ॥*॥ पशूनां जीवानां पतिः । 'तिर्यग्जातौ **पशुः** प्रोक्तः सर्वप्राणिषु पुंस्ययम्' । प्रमथानामिति वा । '**पशुर्**मृगादौ छगले प्रमथे च पुमानयम्' इति तालव्यान्ते रभसात् । ('**पशुपतिः** पिनाकिनि हुताशने') ॥ (३) ॥*॥ शिवमस्यास्ति । अर्शआद्यच् (५।२।१२७) ॥ शिवयतीति वा । 'तत्करोति–' (वा० ३।१।२) इति ण्यन्तात्पचाद्यच् (३।१।१३४) । ('**शिवो** मोक्षे महादेवे कीलकग्रहयोगयोः । बालके गुग्गुलौ वेदे पुंडरीकद्रुमेऽपि च । सुखे क्षेमे जले क्लीबम्') ॥ (४) ॥*॥ शूलमस्यास्ति । इनिः (५।२।११५) ॥ (५) ॥*॥ महांश्चासावीश्वरश्च । 'सन्महत्–' (२।१।६१) इति समासः । ('**महेश्वरो** महादेवे कथितोऽधीश्वरेऽपि च') ॥ (६) ॥*॥ ईशितुं शीलमस्य । 'स्थेशभास–' (३।२।१७५) इति वरच् । ('**ईश्वरो** मन्मथे शंभौ नाट्ये स्वामिनि वाच्यवत् । **ईश्वरी चेश्वरो**मायाम्') ॥ (७) ॥*॥ शृणाति 'शृ हिंसायाम्' (क्र्या० प० से०) । 'कृशृदृभ्यो वः' (उणा० १।१५५) ॥*॥ 'षर्ब गतौ' (भ्वा० प० से०) । इत्यतः 'षर्व हिंसायाम्' (भ्वा० प० से०) । इत्यतो वा बबयोरभेदात् पचाद्यचि (३।१।१३४) । '**सर्वः**' अपि । '**सर्वस्तु शर्वो भगवान् शंभुः कालंजरः शिवः**' इति नामनिधानात् । ('**कालंजरो** योगिचक्के मेलके भैरवे गिरौ') ॥ (८) ॥ * ॥ ईष्टे तच्छीलः । 'तच्छील्य–' (३।२।१२९) इति चानश् । ('**ईशानं** ज्योतिषि क्लीबं पुंलिङ्गः स्यात्त्रिलोचने') ॥ (९) ॥*॥ शं करोति । 'शमि धातोः संज्ञायाम्' (३।२।१४) इत्यच् । यत्तु 'कृञो हेतु–' (३।२।२०) इति टः– इति स्वामी । तन्न । अस्यैव टापवादत्वात् ॥ (१०) ॥ * ॥ चन्द्रः शेखरो यस्य ॥ (११) ॥*॥ भूतानामीशः ॥ (१२) ॥*॥ खण्डयतीति खण्डः परशुरस्य ॥ * ॥ '**खण्डपर्शुः**' अपि । '**खण्डपर्शुः** पर्शुरामे शंकरे चूर्णलेपिनि । (खण्डामलकभैषज्ये सिंहिकातनयेऽपि च)' इति विश्वात् ॥ (१३) ॥*॥ गिरेरीशः । ('**गिरीशो**ऽद्रिपतौ वाचस्पतिशंकरयोः पुमान्') ॥ (१४) ॥*॥ गिरिराश्रयत्वेनास्यास्ति । लोमादित्वात् (५।२।१००) शः । स्वामी तु 'गिरिं श्यति उपभोगेन तनूकरोति,' गिरौ शेते वा । गिरौ डश्छन्दसि (वा० ३।२।१५) । लोके तु 'आशुशुक्षणिवत्' इत्याह ॥ (१५) ॥*॥ मृडति । 'मृड सुखने' (तु० प० से०) इगुपधत्वात्कः (३।१।१३५) मृड्णाति वा । 'मृड च' चात्क्षोदे (क्र्या० प० से०) ॥ (१६) ॥*॥ मृत्युं जति ॥ 'संज्ञायां भृतृवृजि' (३।२।४६) इति खच् । सुम् (६।३।६७) ॥ (१७) ॥*॥ कृत्तिश्चर्म वासोऽस्य ॥ (१८) ॥*॥ पिनाकोऽस्यास्ति । इनिः (५।२।११५) ॥ (१९) ॥*॥ प्रमथानामधिपः ॥ (२०) ॥*॥ उच्यति क्रुधा संबध्यते-उग्रः । 'उच समवाये' (दि० प० से०) 'ऋज्र'–(२।२८ उ०) इत्यादिना रन् गश्चान्तादेशः । ('**उग्रः** क्षत्रियतः शूद्र्यां सूनावुत्कटरुद्रयोः । **उग्रा** वचाछिक्किकयोः') ॥ (२१) ॥*॥ कपर्दोऽस्यास्ति । इनिः (५।२।११५) ॥ (२२) ॥ * ॥ श्रीः शोभा कण्ठेऽस्य । ('**श्रीकण्ठः** कुरुजाङ्गले । शंकरे च') ॥ (२३) ॥*॥ शितिः कालः कण्ठोऽस्य ॥ (२४) ॥*॥ कपालं बिभर्ति ॥ (२५) ॥*॥ वामयति दुष्टानां मदमिति वामः । 'टुवम् उद्गिरणे' (भ्वा० प० से०) । णिच् (३।१।२६) पचाद्यच् (३।१।१३४) । वामश्चासौ देवश्च । लोकविपरीतत्वाद्वा वामः । ('**वामं** धने, हरे पुंसि कामदेवे पयोधरे') यत्तु घञि (३।३।१८, १९) 'नोदात्तोपदेश–' (७।३।३४) इत्यादिना वृद्धिनिषेधे प्राप्ते 'अनाचमेः' (७।३।३४) इति 'कम्यमिवमि'–इत्यादिना निषेधः, इति मुकुटेनोक्तम् । तन्न । कर्तरि घञोऽसंभवात् । भवादौ संभवेऽपि देवेन सामानाधिकरण्यासंभवात् । लोकाचारविपरीतत्वाद्वामो देवः क्रीडा यस्येति वा समाधेयम् । वामेषु श्रेष्ठेषु देवो द्योतो यस्येति वा ॥ (२६) ॥ * ॥ मैहांश्चासौ देवश्च । महान् देवो नृत्यादिरूपा क्रीडा यस्येति वा ॥ (२७) ॥*॥ विविधानि रविचन्द्राग्निरूपाण्यक्षीण्यस्य । 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्' (५।४।११३) । विरूपेष्वपि अक्षि कृपादृष्टिर्यस्येति वा । विविधरूपाणि विविधरूपेषु वा अक्षाणीन्द्रियाण्यस्येति वा ॥ (२८) ॥*॥ त्रीणि लोचनानि यस्य । त्रिषु कालेषु लोकेषु गुणेषु वेदेषु लोचनं ज्ञानं यस्येति वा । त्रयो वेदा वर्णा अकारोकारमकारा वा लोचनानि यस्मिन् वा ॥ (२९) ॥*॥ कृशानौ रेतो यस्य कृशानुः सूतरूपो रेतोऽस्येति वा ॥ (३०) ॥*॥ सर्वं जानाति । 'आतोऽनुपसर्गे' (३।२।३) इति कः ॥ (३१) ॥*॥ धूर्भारभूता जटिर्यस्य । 'जट, झट, संघाते' (भ्वा० प० से०) । 'सर्वधातुभ्यः' (४।११८ उणा०) इतीन् । '**जटिर्जटा**' इति द्विरूपकोशः । 'धूर्गङ्गा जटास्वस्य' इति स्वामी । तन्न । जटिष्वस्यति वक्तुमुचितत्वात् ॥ (३२) ॥ * ॥ नीलश्चासौ लोहितश्च कण्ठे जटासु च ॥ (३३) ॥ * ॥ हरति । पचाद्यच् (३।१।१३४) । ('**हरो** नाशकरुद्रयोः । वैश्वानरेऽपि

१—तथा च स्कान्दे । 'शं करोमि सदा ध्यानात्परमं यन्निरामयम् । भूतानामसकृद्यस्मात्तेनाहं शंकरः स्मृतः' इत्यपि मुकुटः ॥

१—'धृतं कण्ठे विषं घोरं ततः श्रीकण्ठतामगात्' इति नीलकण्ठस्तवः इत्यपि मुकुटः ॥ २—'पूज्यते यत्सुरैः सर्वैर्महांश्चैव प्रमाणतः । धातुर्महेति पूजायां महादेवस्ततः स्मृतः' इति शिवपुराणे इति मुकुटः ॥ ३—पृषोदरादित्वात् (६।३।१०९) आकारस्येकार इति स्वामी भ्रान्तः । उक्तरूपेण जटिसाधनात् इति मुकुटः ॥ ४—स्कान्दे 'नीलं येन ममाङ्गं तु रसाक्तं, लोहितं त्विषा । नीललोहित इत्येव ततोऽहं परिकीर्तितः' इति वा–इत्यपि मुकुटः ॥

च') ॥*॥ **हीरः** अपि । '**हीरः** कपर्दी **शमिरः**' इति संसारावर्तात् । ('**हीरो** वज्रे हरे सर्पे **हीरा** पिप्पीलिकास्त्रियोः') ॥ (३४) ॥*॥ स्मरं हरति । 'हरतेरनुद्यमनेऽच्' (३।२।९) ॥ (३५) ॥*॥ भर्जते । 'भृजी भर्जने' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) न्यङ्क्वादित्वात् (७।३।५३) कुत्वम् । भृज्यन्ते कामादयोऽनेनेति वा । 'हलश्च' (३।३।१२१) इति घञ् ॥*॥ '**भर्ग्यः**' इति पाठे ण्यत् (३।१।१२४) ॥ (३६) ॥*॥ त्रीण्यम्बकान्यस्य । त्रिष्वम्बकमस्येति वा । '**अम्बकं** नयनं दृष्टिः' इति हलायुधः । त्रयाणां लोकानामम्बकः पिता इति वा । त्रीन्वेदानम्बते शब्दायते वा । 'अबि शब्दे' (भ्वा० आ० से०) । 'कर्मण्यण्' (३।२।१) । 'संज्ञायाम्' (५।३।८७) इति कः (न्) । त्रिषु लोकेषु कालेषु वा अम्बः शब्दो वेदलक्षणो यस्येति वा । त्रयः अकारोकारमकारा अम्बाः शब्दा वाचका यस्येति वा । तिस्रोऽम्बाः द्यौर्भूम्यापो यस्येति तु भारतम् ॥ (३७) ॥*॥ त्रयाणां धातूनां पुराणि, तेषामन्तकः । त्र्यवयवं पुरं त्रिपुरम्, तस्यान्तक इति वा । त्रयाणां पुराणां समाहारः । 'पात्रादिः' (वा० २।४।३०) इति प्राप्तः । तन्न । तथा सति 'पञ्चपात्री' इतिवत् 'त्रिपुरी' इति प्रयोगभावप्रसङ्गात् ॥ (३८) ॥*॥ धरतीति धरः । पचाद्यच् (३।१।१३४) । गङ्गाया धरः ॥ (३९) ॥*॥ अन्धकस्य दैत्यस्य रिपुः ॥ (४०) ॥*॥ क्रतुं ध्वंसयति । 'सुपि–' (३।२।७८) इति णिनिः ॥ (४१) ॥*॥ वृषो ध्वजश्चिह्नमस्य ॥ (४२) ॥*॥ व्योम्नि केशा यस्य ॥ (४३) ॥*॥ भवति भवते वा सर्वम् । 'भू प्राप्तौ' (चु० आ० से०) । पचाद्यच् (३।१।१३४) । यत्तु भवत्यस्माद्विश्वम् । बाहुलकाद् (३।३।११३) अप् । विश्वमस्त्यस्मिन् इति वा । अस्त्यादेशाद्भुवः (२।४।५२) अप् (३।३।५७) । 'श्रिणीभुवः–' (३।३।२४) इत्यत्र श्रिणीसाहचर्याद्भुवो भौवादिकादेव घञ्–इति मुकुटः । तन्न । बाहुलकस्यागतिकगतित्वात् । अत्र चोक्तरीत्या गतिसंभवात् । अधिकरणे ल्युटो बाधकसत्त्वादपोऽसंभवात् । 'अजब्म्यां स्त्रीखलनाः' (३।३।१२६) इति वार्तिकोक्तेः साहचर्याभ्युपगमोऽप्यनुचितः । 'गातिस्था–' (२।४।७७) इत्यत्रापि पासाहचर्यादस्त्यादेशस्याग्रहणप्रसङ्गात् । ('**भवः** क्षेमेशसंसारे सत्तायां प्राप्तिजन्मनोः') ॥ (४४) ॥*॥ बिभेत्यस्मात् । 'भीमादयोऽपादाने' (३।४।७४) । 'भियः धुक् वा' (उ० १।१४८) इति मक् । '**भीमोऽ**म्लवेतसे घोरे शंभौ मध्यमपाण्डवे ॥ (४५) ॥*॥ तिष्ठति । 'स्थाणुः' (उ० ३।३७) ('**स्थाणुः** कीले हरे पुमान् । अस्त्री ध्रुवे') ॥ (४६) ॥*॥ रोदयति । 'रोदेर्णिलुक् च' (उ० ३।२२) इति रक् ॥ (४७) ॥*॥ उमायाः पतिः ॥ (४८) ॥*॥ अष्टचत्वारिंशत् '**शंभोः**' ॥

१—पृषोदरादित्वात् (६।३।१०९) ईकार इति मुकुटः ॥

कपर्दोऽस्य जटाजूटः

कपर्द इति ॥ 'पर्व पूरणे' (भ्वा० प० से०) । संपदादित्वात् (वा० ३।३।१०८) भावे क्विप् । 'राल्लोपः' (६।४।२१) केन सुखेन जलेन वा परं पूर्तिं ददाति । 'सुपि' (३।२।४) इति योगविभागात् कः । कस्य जलस्य परा पूरणेन दायतीति वा । 'दैप् शोधने' (भ्वा० प० अ०) । ('**कपर्दः** पार्वतीभर्तुर्जटाजूटे वराटके') । अर्शआद्यजन्तः शिवेऽपि ॥ (१) ॥*॥ जटानां जूटो बन्धः । एकम् '**जटाबन्धस्य**' ॥

पिनाकोऽजगवं धनुः ।

पिनाक इति ॥ पाति । 'पिनाकादयश्च' (उ० ४।१५) इति पातेराक इत्वं नुम् च । ('**पिनाकः** शिवकोदण्डे पांशुवृष्टित्रिशूलयोः') ॥ (१) ॥*॥ अजेन ब्रह्मणा गम्यते । इति 'अन्येष्वपि दृश्यते' (वा० ३।२।४८) इति डः । अजं छागं गच्छति यज्ञत्वेन प्रविशतीति वा । अजगो विष्णुरस्ति शरत्वेनास्मिन्निति । 'गाण्ड्यजगात्संज्ञायाम्' (५।२।११०) इति वः ॥*॥ प्रज्ञादित्वात् (५।४।३८) अणि '**आजगवम्**' अपि । '**आजगवमजस्य** वा पिनाकं वा' इति बोपालितः । 'स्थाणोर्धनुराजगवम्' इत्यमरमाला च ॥*॥ अजो विष्णुः, को ब्रह्मा, ताववतीति '**अजकावम्**' अपि 'धनुस्त्वजगवं युग्यमजकावमजीजकम्' इति शब्दार्णवात् ॥*॥ अजकौ विष्णुब्रह्माणौ वातीति '**अजकवम्**' अपि । 'सुपि' (३।२।४) इति (योगविभागात्) 'अतोऽनुपसर्गे–' (३।२।३) इति वा कः ॥ (२) ॥*॥ द्वे '**शिवधनुषः**' ॥

प्रमथाः स्युः पारिषदाः

प्रमथा इति ॥ दुष्टान्प्रमथ्नन्ति । 'मथे विलोडने' (भ्वा०प०से०) । पचाद्यच् (३।१।१३४) । प्रमथ्यन्ते मन्त्रादिना । 'खनो घ च' (३।३।१२५) इति घो वा ॥ (१) ॥*॥ परिषदि साधवः । 'परिषदो ण्यः' (४।४।१०१) इत्यत्र 'परिषदः' इति योगविभागात् 'णः' । 'अण्' इति तु मुकुटस्य प्रमादः । 'भक्ताण्णः' (४।४।१००) इत्यनुवृत्तेः ॥*॥ ण्ये तु **पारिषद्याः** । 'पर्षदो ण्यः' (४।४।१०१) इति पाठे **पार्षद्–पार्षद्या**वपि । 'भूताः शिवस्य **पार्षद्या पार्षदाः**' इति संसारावर्तात् ॥ (२) ॥*॥ द्वे '**शिवानुचराणाम्**' ॥

ब्राह्मीत्याद्यास्तु मातरः ॥३५॥

ब्राह्मीति ॥ 'मान पूजायाम्' (भ्वा०प०से०, चु०उ०से०) । मान्यन्ते पूज्यन्ते लोकमातृत्वात् इति मातरः । 'नप्तृनेष्टृ–' (उ० २।९५) इति तृचेण निपातितः । मान्ति शिवपरिवारत्वेन समाविशन्तीति वा ॥ (१) ॥*॥ ब्रह्मण इयं ब्राह्मी । 'तस्येदम्' (४।३।१२०) इत्यणि 'ब्राह्मो जातौ' (६।४।१७१) इति टिलोपः । ('**ब्राह्मी** तु भारती । शाकभेदः पङ्कगण्डी

१—'स पार्षदैरम्बरमापुपूरे' इति जाम्बवत्यां पाणिनिः–इति मुकुटः ॥

हृश्रिका सोमवल्लरी । ब्रह्मशक्तिः') ॥*॥ **'ब्राह्मी माहेश्वरी चैन्द्री वाराही वैष्णवी** तथा । **कौमारी**त्यपि **चामुण्डा चर्चिके**त्यष्ट मातरः' । 'ब्राह्म्याद्या मातरः स्मृताः' इति भागुरिः । **'ब्रह्माण्यास्तु'** इति पाठे ब्रह्माणमणति कीर्तयति । 'अण शब्दे' (भ्वा०प०से०) । 'कर्मण्यण्' (३।२।१) 'टिड्ढा–' (४।१।१५) इति ङीप्। 'ब्रह्माण्याद्याः स्मृताः सप्त देवता मातरो बुधैः' इति हलायुधः । स हि 'कौबेरीत्यपि कौमारी सप्तैव मातरः स्मृताः' इति पठति ॥ **'ब्रह्मादिशक्तिदेवतानाम्'** एकैकम् ॥

विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा ।

विभूतिरित्यादि ॥ भवनं भूतिः । 'स्त्रियां क्तिन्' (३।३।९४) **'भूति**र्भस्मनि संपत्तौ हस्तिश्रृङ्गारयोः स्त्रियाम्' । मांसपाकविशेषोत्पातयोरपि ॥) ॥ (२) ॥*॥ विभूतिरिति कथनमन्यप्राप्तिनिवृत्त्यर्थम् ॥ (१) ॥*॥ ईश्वरस्य भावः । 'गुणवचन–' (५।१।१२४) इति ष्यञ् ॥ (३) ॥*॥ **'अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा** तथा । **ईशिता वशिता** चैव तथा **कामावशायिता'** । तत्र, अणोर्भावः 'इमनिच्' (५।१।११२) ॥*॥ लघोर्भावः ॥*॥ प्राप्तिरङ्गुल्यग्रेण चन्द्रादेः ॥*॥ प्रकामस्य भावः इच्छानभिघातः ॥*॥ महतो भावः । येन ब्रह्माण्डेऽपि न माति ॥*॥ ईशोऽस्यास्ति । 'अतः–' (५।२।११५) इतीनिः । ईशिनो भावः । तल् (५।१।११९) । प्रभुत्वम् । येन स्थावरा अप्याज्ञाकारिणः ॥*॥ वशोऽस्यास्ति । इनिः (५।२।११५) वशिनो भावो वशिता । यया भूमावप्युन्मज्जननिमज्जने ॥*॥ कामानवशेते । शीङः (अ० आ० से०) णिनिः (३।२।७८) । कामावशायिनो भावः सत्यसंकल्पता । स्यतेः (द्वि०प०अ०) णिनिना (३।२।७८) दन्त्यमध्यं (**कामावसायिता**) कश्चिन्मन्यते ॥*॥ नामत्रयम् (**अणुताद्यष्टविधप्रभावस्य**) ॥

उमा कात्यायनी गौरी काली हैमवतीश्वरी ॥ ३६ ॥
शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला ।
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका ॥३७॥

उमेत्यादि ॥ ओर्मेहेशस्य मा लक्ष्मीः । 'उ मा' इति मात्रा तपसे निषिद्धत्वाद्वा । आकारान्तादपि टाप् । (४।१।४) । 'टायाम्' (२।४।३२) इति भाष्यप्रयोगात् । अजादित्वात् (४।१।४) वा । (**'उमा** गौर्यां हरिद्रायां कीर्तिकान्यतसीषु च') ॥ (१) ॥*॥ कतस्यापत्यम् । गर्गादित्वात् (४।१।१०५) यञ् । 'सर्वत्र लोहितादिकतन्तेभ्यः' (४।१।१८) इति ष्फः । षित्त्वान्ङीष् (४।१।४१) (**'कात्यायनो** वररुचौ **कात्यायनी** तु पार्वती । कषायवस्त्रबिधवार्धवृद्धमहिलापि च') ॥ (२) ॥*॥ गौरो वर्णोऽस्त्यस्याः । गौरादित्वात् (४।१।४१) ङीष् । (**'गौरी** त्वसंजातरजःकन्याशंकरभार्ययोः । रोचनीरजनीपिङ्गाप्रियङ्गुवसुधासु च । आपगाया विशेषेऽपि यादसांपतियोषिति') ॥ (३) ॥*॥ एवं काली । 'जानपद–' (४।१।४२) इत्यादिना ङीष् । (**'काली** गौर्यां क्षीरकीटे कालिकामातृभेदयोः । नव्यमेघौघपरिवादयोः') ॥*॥ वर्णस्याविवक्षायां **काला** । 'उमा कात्यायनी दुर्गा काली हैमवतीश्वरी । **काला कालंजरी गौरा'** इति वाचस्पतिः ॥ (४) ॥*॥ हिमवतोऽपत्यम् । 'तस्यापत्यम्' (४।१।९२) इत्यण् । **'हैमवत्य**भयाखर्णक्षीर्योः श्वेतवचोमयोः' ॥ (५) ॥*॥ ईष्टे । 'ईश ऐश्वर्ये' (अ० आ० से०) । 'स्थेशभास–' (३।२।१७५) इति वरच् । टाप् (४।१।४) ॥*॥ वनिपि (३।२।६५) 'वनो र च' (४।१।७) इति ङीब्रौ । अत **'ईश्वरी'** अपि । यद्वा अश्नुते । 'अशूङ् व्याप्तौ' (स्वा० आ० से०) 'अश्नोतेराशुकर्मणि वरट् ईश्च चोपधायाः' (उ० ५।५७) । टित्त्वात् (४।१।१५) ङीप् । **ईश्वरः** शंकरेऽधीशे तत्पत्न्यामीश्वरीश्वरा' इति बोपालितः ॥ (६) ॥*॥ शिवयति । शिवमस्त्यस्याः । शिवो वास्ति भर्तृत्वेन यस्या इति वा । **'शिवं** भद्रं **शिवः** शंभुः **शिवा** गौरी **शिवा**भया' इति शाश्वतः ॥*॥ पुंयोगे तु **शिवी** ॥ (७) ॥*॥ भवस्य स्त्री । 'इन्द्रवरुण–' (४।१।४९) इति ङीषानुकौ ॥ (८) ॥*॥ **एवं रुद्राण्यादयः** ॥ (९) ॥ (११) ॥ (१५) ॥*॥ सर्वेभ्यः सर्वेषां वा मङ्गला । सर्वाणि मङ्गलान्यस्याः, इति वा ॥*॥ **'मङ्गला'** इत्यपि । **'मङ्गला**ऽसितदूर्वायासुमायां पुंसि भूमिजे । नपुंसकं तु कल्याणे पुंसि सर्वार्थदक्षिणे' ॥ (१२) ॥*॥ न पर्णान्यस्याः । तपस्यन्त्या पर्णानामपि त्यागात् ॥ (१३) ॥*॥ पर्वतस्येयम् । पार्वती । 'तस्येदम्' (४।३।१२०) इत्यण् । अपत्यार्थे त्वपवादत्वादिञ् (४।१।९५) स्यात् । 'इतो मनुष्य–' (४।१।६५) इति न ङीष् । मनुष्यजातिवाचित्वाभावात् । 'क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते' इति वा समाधेयम् ॥ (१४) ॥*॥ दुःखेन गम्यते ज्ञायतेऽस्याम् 'सुदुरोरधिकरणे' (वा० ३।२।४८) इति डः । दुःखेन दुष्टैर्वा गीयते स्तूयते । **'गै** शब्दे' (भ्वा० प० अ०) । 'आतश्चोपसर्गे' (३।३।१०६) इत्यङ् । **'दुर्गे** कोटे दुर्गमे स्याद्दुर्गा तु नीलिकोभयोः' इति हेमचन्द्रः ॥ (१५) ॥*॥ चण्डते । 'चडि कोपे' (भ्वा० आ० से०) । ण्वुल् (३।१।१३३) ॥*॥ पचाद्यच् (वा० ३।१।१३४) 'बह्वादिभ्यश्च' (४।१।४५) इति ङीषि **'चण्डी'** इत्यपि । **'चण्डी** कात्यायनी देव्यां हिंस्रकोपनयोषितोः' ॥ (१६) ॥*॥ अम्बैवाम्बिका । जगन्मातृत्वात् **'अम्बिका** पार्वतीमात्रोर्धृतराष्ट्रस्य मातरि' ॥ (१७) ॥*॥ सप्तदश **'उमायाः'** ॥

विनायको विघ्नराजद्वैमातुरगणाधिपाः ।
अप्येकदन्तहेरम्बलम्बोदरगजानना: ॥ ३८ ॥

विनायकेत्यादि ॥ विनयति । ण्वुल् (३।१।१३३) । विशिष्टो नायक इति वा । विगतो नायको नियन्तास्य इति वा । **'विनायकस्तु** हेरम्बे तार्क्ष्ये विघ्ने जिने गुरौ' ॥ (१) ॥*॥ विघ्नानां राजा । 'राजाहःसखिभ्यष्टच्' (५।४।९१) ॥

(२) ॥*॥ द्वयोर्मात्रोरपत्यम् । 'मातुरुत्संख्यासंभद्रपूर्वायाः' (४।१।११५) इत्यणि उत्वं रपरत्वं च । दुर्गाचामुण्डाभ्यां पालितत्वात् । गजमुखतया हस्तिन्या अपत्यत्वात् । गङ्गाया अपत्यत्वाद्वा । **'द्वैमातुरो** जरासंधवारणाननयोः पुमान्' ॥ (३) ॥*॥ गणानां प्रमथानामधिपः ॥ (४) ॥*॥ एको दन्तोऽस्य । स्कन्देनोत्पाटितदन्तत्वात् ॥ (५) ॥*॥ हे रम्बते । **'हूः** शंकरे हरौ हंसे रणरोमाश्ववाजिषु' इति नानार्थरत्नमाला । 'अबि रबि शब्दे' पचाद्यच् (३।१।१३४) । 'तत्पुरुषे कृति–' (६।३।१४) इत्यलुक् । हे उपरि रम्बते इति स्वामी । (**'हेरम्बः** शौर्यगर्विते । महिषे विघ्नराजे च') ॥ (६) ॥*॥ लम्बमुदरमस्य । (**'लम्बोदरः** स्यादुदग्रमाने प्रमथानां च नायके') ॥ (७) ॥*॥ गज आननमस्य । 'समुदायशब्दा अवयवेऽपि वर्तन्ते' इति गजमुखपरो गजशब्दः ॥ (८) ॥*॥ (१नन्वत्र द्वन्द्वो न प्राप्नोति । 'विरूपाणामपि समानार्थानाम्' (वा० १।२।६४) इत्येकशेषविधानात् । मैवम् । स्वरूपपदार्थकानामेषां द्वन्द्वविधानात् । स्वरूपस्य च प्रतिशब्दं भिन्नत्वेन समानार्थताया एवाभावात् । अर्थपरता तु लक्षणया ज्ञेया । तारतम्यशब्दवत् । सर्वत्रैवं बोध्यम्) ॥ अष्टौ **'गणेशस्य'** ॥

कार्तिकेयो महासेनः शरजन्मा षडाननः ।
पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः ॥ ३९ ॥
बाहुलेयस्तारकजिद्विशाखः शिखिवाहनः ।
षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ॥ ४० ॥

कार्तिकेय इत्यादि ॥ कृत्तिकानामपत्यम् । 'स्त्रीभ्यो ढक्' (४।१।१२०) ॥ (१) ॥*॥ महती सेना यस्य । **('महासेनो** महासैन्ये स्कन्देऽपि') ॥ (२) ॥*॥ शरेषु जन्मास्य ॥ (३) ॥*॥ षड् आननान्यस्य ॥ (४) ॥*॥ पार्वत्या नन्दनः ॥ (५) ॥*॥ स्कन्दति । पचाद्यच् (३।१।१३४) ॥ (६) ॥*॥ सेनां नयति । 'सत्सूद्विष–' (३।२।६१) इति क्विप् । **'सेनानी** स्यात्पुमान्कार्तिकेये सेनापतौ पुमान्' ॥ (७) ॥*॥ अग्नेर्भवति । 'भुवः–' (३।२।१७९) इति क्विप् ॥ (८) ॥*॥ गूहति रक्षति सेनाम् । 'गुहू संवरणे' (भ्वा०उ०से०) । 'इगुपध–' (३।१।१३५) इति कः । 'गुहः षाण्मातुरे गुहा । सिंहपुच्छ्यां च गर्ते च पर्वतादेश्च कंदरे' ॥ (९) ॥*॥ बहुलानां कृत्तिकानामपत्यम् । 'स्त्रीभ्यो ढक्' (४।१।१२०) ॥ (१०) ॥*॥ तारकं जयति ॥ (११) ॥*॥ विशाखति । 'शाखृ शाखृ व्याप्तौ' (भ्वा०प०से०) । पचाद्यच् (३।१।१३४) । विशाखायां जात इति वा । 'संधिवेलादि–' (४।३।१६) इत्यणः 'श्रविष्ठाफाल्गुनी–' (४।३।३४) इत्यादिना लुकि 'लुक्तद्धितलुकि' (१।२।४९) । **('विशाखो** याचके स्कन्दे वि-

१—अयं पाठो न सर्वत्रोपलभ्यते । क्वचिदुपलब्धोऽपि पुनरुक्तप्रायः ।

शाखा भे कठिल्लके') ॥ (१२) ॥*॥ शिखी मयूरो वाहनमस्य ॥ (१३) ॥*॥ षण्णां मातृणामपत्यम् । 'मातुरुत्संख्यासं' (४।१।११५) । (१४) ॥*॥ शक्तिर्धरः ॥ (१५) ॥*॥ कुमारयति क्रीडति । 'कुमार क्रीडायाम्' (चु०उ०से०) । पचाद्यच् (३।१।१३४) कुत्सितो मारोऽस्येति वा । 'कुः पापे पदर्थयोः' । कौ मारयति दुष्टान् । पचाद्यच् (३।१।१३४) । यत्तु–ब्रह्मचारित्वात्कुमारः–इति स्वामिनोक्तम् । तन्न । 'शतक्रतो रूपवती देवसेनेति या सुता । सा महेन्द्रेण रत्यर्थं भार्यात्वेनोपपादिता ॥ उदीर्णसेनापतये महासेनाय सुव्रत' इति वायुपुराणात् । **'कुमारः** स्याच्छुके स्कन्दे युवराजेऽश्ववारके । बालके वरुणद्रौ ना न द्वयोर्जात्यकाश्वने') ॥ (१६) ॥*॥ क्रौञ्चेः (भ्वा०प०से०) क्विन् (३।१।५९) । प्रज्ञाद्यण् (५।४।३८) । क्रौञ्चस्य पर्वतस्य दारणः । 'दृ विदारणे' (भ्वा०प०से०) ण्यन्तात् (३।१।२६) ल्युः (३।१।१३४) ॥*॥ 'कैलासे धनदावासे **कौञ्चः क्रौञ्चोऽभिधीयते**' इति बृहद्धारावली । अतः **'कौञ्चदारणः'** अपि ॥ (१७) ॥ * ॥ सप्तदश **'कार्तिकेयस्य'** ॥

इन्द्रो मरुत्वान्मघवा विडौजाः पाकशासनः ।
वृद्धश्रवाः सुनासीरः पुरुहूतः पुरंदरः ॥ ४१ ॥
जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः ।
सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा ॥ ४२ ॥
वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः ।
जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः ॥ ४३ ॥
संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः ।
आखण्डलः सहस्राक्ष ऋभुक्षाः

इन्द्र इत्यादि ॥ इन्दति । 'इदि परमैश्वर्ये' (भ्वा० प० से०) । 'ऋदोरप्' (उ० ३।२८) इत्यादिना रन् । 'रग्' इति मुकुटः । तत्र । अन्तोदात्तलापत्तेः । 'इन्द्रः शक्रादिलभेदयोगभेदान्तरात्मसु' । **'इन्द्रः** फणिजकेऽस्त्री स्यात्' ॥ (१) ॥*॥ मरुतः सन्त्यस्य । मतुप् (५।२।९४) । 'झयः' (८।२।१०) इति वलम् । 'तसौ मत्वर्थे' (१।४।१९) इति भत्वाज्झशत्वाभावः ॥ (२) ॥*॥ मघते पूज्यते । 'मह पूजायाम्' (भ्वा०प०से०, चु०उ०से०) । 'श्रुक्षन्–' (उ० १।१५९) इत्यादिना **'मघवन्'** इति निपातितम् ॥*॥ 'मघवा बहुलम्' (६।४।१२८) इति त्रादेशपक्षे तु **'मघवान्'** इत्यपि बोध्यम् । यत्तु 'त्रादेशे दीर्घाभावात् मघवन्' इति स्वामिनोक्तम् । तन्न । 'सर्वनामस्थाने चासंबुद्धौ' (६।४।८) । इति दीर्घसंभवात् । नच संयोगान्तलोपस्य (८।२।२३) असिद्धत्वम् । 'मघवा बहुलम्' (६।४।१२८) इति बहुलग्रहणेन तद्बाधनात् । अत एव मनुपा (५।२।९३) त्रन्तादेशप्रत्याख्यानपरं वार्तिकं तद्भाष्यं च (६।४।१२८) संगच्छते । 'हविर्जक्षिति निःशङ्को मखेषु मघवानसौ' इति भट्टिः । एतेन

मघवा मघवन् मघवान् इति त्रैरूप्यं वदन्मुकुटोऽपि प्रत्युक्तः । भाष्यवार्तिकैकमत्यानुरोधेन सूत्रकारमतेऽपि 'मघवान्' इत्यस्यैवाभ्युपगमात् । मतभेदे हि प्रत्याख्यानासंभवात् । भवतु वा मतभेदः, तथापि 'होतृ लृकारः' इत्यत्र सूत्ररीत्या यणादेशः प्राप्तो वार्तिकरीत्या दीर्घेण बाध्यते यथा, एवं सूत्ररीत्या 'मघवन्' इति प्रयोगः प्राप्तो भाष्यवार्तिककृतप्रत्याख्यानरीत्या 'मघवान्' इति प्रयोगेण बाध्यते ॥ (३) ॥*॥ विडति । 'विड भेदने' (तु०प०से०) । 'इगुपध–' (३।१।१३५) इति कः । विडं भेदकमोजोऽस्य । सान्तः ॥*॥ विट्सु प्रजासु मनुष्येषु वा ओजोऽस्येति **'विडोजाः'** इति केचित् ॥ (४) ॥*॥ पाकस्य दैत्यभेदस्य शासनः । शासयति । 'शासु अनुशिष्टौ' (अ० प० से०) । णिजन्तात् (३।१।२६) नन्द्यादित्वात् (३।१।१३४) ल्युः ॥ (५) ॥*॥ वृद्धेभ्यः शृणोति । 'श्रु श्रवणे' (भ्वा० प० अ०) । असुन् (उ० ४।१६६) वृद्धे श्रवसी यस्येति वा । वृद्धेषु पण्डितेषु श्रवो यशो यस्येति वा ॥ (६) ॥*॥ 'णासृ शब्दे' (भ्वा० आ० से०) बाहुलकादीरन् (उ० ४।३०) सुष्ठु नासीरं सेनामुखम्, नासीरा अग्रेसरा वा यस्य द्विदन्त्यः ॥*॥ शु इत्यव्ययस्य पूजार्थकत्वात् **(शुनासीरः)** तालव्यादिरपि ॥*॥ 'शुनाशीरशीतशिवशङ्खाः' इति तालव्यादावूष्मविवेकः । शुनो वायुः, शीरः सूर्यः, तावस्य स्तः इति अर्शआद्यच् (५।२।१२७) 'अन्येषामपि–' (६।३।१३७) इति दीर्घः इति व्युत्पत्त्या **(शुनाशीरः)** द्वितालव्योऽपि ॥ (७) ॥*॥ पुरु प्रचुरं हूतमाह्वानं यज्ञेष्वस्य । पुरूणि हूतानि नामान्यस्येति वा ॥ (८) ॥*॥ पुरोऽरीणां दारयति । 'पूःसर्वयोर्दारिसहोः' (३।२।४१) इति खच् । 'वाचंयमपुरंदरौ च' (६।३।६९) इति निपातितः ॥ (९) ॥*॥ जयति । 'जि जये, अभिभवे वा' (भ्वा० प० अ०) । 'ग्लाजिस्थश्च–' (३।२।१३९) इति ग्नुः । **'जिष्णु'**र्नो वासवेऽर्जुने । जित्वरे वाच्यवत्प्रोक्तो विष्णावर्के वसुष्वपि' ॥ (१०) ॥*॥ लेखेषु ऋषभः । 'सप्तमी' (२।१।४०) इति योगविभागात्समासः । लेख ऋषभ इवेति वा । 'उपमितं व्याघ्रा–' (२।१।५६) इति समासः ॥ (११) ॥*॥ शक्नोति । 'शकॢ शक्तौ' (स्वा० प० अ०) । 'स्फायितञ्चि–' (उ० २।१३) इत्यादिना रक् । **'शक्रः** पुमान्देवराजे कुटजार्जुनभूरुहोः' ॥ (१२) ॥*॥ शतं मन्यवो यागा अस्य । शते दैत्येषु मन्युः क्रोधोऽस्येति वा । शतं मन्यवो दैन्यान्यस्येति वा दैत्यैः पराजितत्वात् ॥ (१३) ॥*॥ दिवः पतिः । 'तत्पुरुषे कृति–' (६।३।१४) इत्यत्र बहुलग्रहणादकृत्यप्यलुग् इति मुकुटः । तत्र । 'पातेर्डतिः' (४।५७) इत्युणादिसूत्रसत्त्वात् । वस्तुतस्तु 'षष्ठ्याः पतिपुत्र–' (८।३।५३) इति सलविधानसामर्थ्याल्लोकवेदसाधारण्येन 'वृद्धकुमारीवर' न्यायेनालुक् ज्ञापितः । कस्कादित्वात् (८।४।४८) सः । यत्तु–'षष्ठ्याः पतिपुत्र–' (८।३।५३) इति सत्वम्–इति मुकुटेनोक्तम् । तन्न । तत्र छन्दोऽधिकारात् ॥ (१४) ॥*॥ सुष्ठु त्रायते । 'त्रैङ् पालने' (भ्वा० आ० से०) । 'आतो मनिन्–' (३।२।७४) ॥*॥ सु उद् इत्युपसर्गद्वयप्रयोगे तु **'सूत्रामा'** दीर्घादिरपि । एतेन 'अन्येषामपि' (६।३।१३७) इति दीर्घत्वे 'सूत्रामा' इति वदन्मुकुटः प्रत्युक्तः ॥ (१५) ॥*॥ गोत्रान् गिरीन् भिनत्ति । 'सत्सूद्विष–' (३।२।६१) इति भिदेः क्विप्॥ (१६) ॥*॥ वज्रोऽस्यास्ति । 'अत इनि–' (५।२।११५) **('वज्री** तु बुद्धे देवाधिपे पुमान्') ॥ (१७) ॥*॥ वसवो देवाः, वसूनि रत्नान्यस्य वा सन्ति । ज्योत्स्नादित्वात् (वा० ५।२।१०३) अण् । वसोरपत्यमिति वा । दैत्यानां वासं वाति वा । 'वा गतिगन्धनयोः' (अ० प० अ०) । कः (३।२।३) ॥ (१८) ॥*॥ वृत्रं हतवान् । 'ब्रह्मभ्रूणवृत्रेषु–' (३।२।८७) इति क्विप् ॥ (१९) ॥*॥ वर्षति । 'वृषु सेचने' (भ्वा० प० से०) । 'कनिन् युवृषि–' (उ० १।१५६) इति कनिन् । **'वृषा** तु वासवे । वृषभे तुरगे पुंसि' ॥ (२०) ॥*॥ वास्तोर्गृहक्षेत्रस्य पतिरधिष्ठाता । 'वास्तोष्पतिगृहमेधाच्छ च' (४।२।३२) इति निपातनादलुक् षत्वं चेत्येके । इणः परत्वात् 'कस्कादिषु च' (८।३।४८) इति षत्वम् । यत्तु मुकुटः 'षष्ठ्याः पतिपुत्र–' (८।३।५३) इति सत्वे इणः परत्वान्मूर्धन्यः इति तन्न । तत्र छन्दोऽधिकारात् । 'अपदान्तस्य' (८।३।५५) इत्यधिकारात् ॥ (२१) ॥*॥ सुराणां पतिः ॥ (२२) ॥*॥ बलस्यासुरस्यारातिः ॥ (२३) ॥*॥ शच्याः पतिः ॥ (२४) ॥*॥ जम्भमसुरं भेत्तुं शीलमस्य । 'सुप्यजातौ–' (३।२।७८) इति णिनिः ॥ (२५) ॥*॥ हरिर्हर्यो यस्य । 'त्वक्केशवालरोमाणि सुवर्णाभानि यस्य तु । हरिः स वर्णतोऽश्वस्तु पीतकौशेयसप्रभः' इति शालिहोत्रम् ॥ (२६) ॥*॥ स्वः स्वर्गे राजते । स्वेषु देवेषु, स्वेन धनेन वा, आ राजते वा । 'सत्सू–' (३।२।६१) इति क्विप् । 'रो रि' (८।३।१४) इति लोपे 'ढ्रलोपे–' (६।३।१११) इति दीर्घः । जान्तः ॥ (२७) ॥*॥ न मुञ्चति । 'मुच्लृ मोक्षणे' (तु० उ० अ०) । 'इगुपधात्कित्–' (४।१२०) इतीन् । 'नभ्राण्नपात्–' (६।३।७५) इति नञ् प्रकृत्या । नमुचेर्दैत्यस्य सूदनः । 'षूद क्षरणे' (भ्वा० आ० से०; चु० उ० से०) । नन्द्यादित्वात् (३।१।१३४) ल्युः ॥ (२८) ॥*॥ संक्रन्दयति । 'क्रदि आह्वाने रोदने च'

१—वृत्रभ्रातुरिति मुकुटः ।

१—अयं न्यायश्च 'न मु ने' (८।१।३) इति सूत्रे भाष्यकृता एवमुपन्यस्तः—'वृद्धकुमारी इन्द्रेणोक्ता वरं वृणीष्व' इति। सा वरमवृणीत 'पुत्रा मे बहुक्षीरघृतमोदनं कांस्यपाद्यां भुञ्जीरन्' इति । न च तावदस्याः पतिर्भवति, कुतः पुत्राः । कुतो गावः । कुतो धान्यम् । तत्रानया एकेन वाक्येन 'पतिः, पुत्राः, गावः, धान्यम्' इति सर्वं संगृहीतं भवति' इति ॥

(भ्वा० प० से०)। ल्युः (३।१।१३४) ॥ (२९) ॥*॥ दुःखेन दुष्टं दुष्टेषु वा च्यवनमस्य। दुःसहश्च्यवनो मुनिरस्येति वा ॥ (३०) ॥*॥ त्वतोर्ति=त्वुरः। 'त्वुर त्वरणे' (जु० प० से०)। 'इगुपध–' (३।१।१३५) इति कः। त्वुरं वेगवन्तं साहयत्यभिभवति। 'अधेः प्रसहने' (१।३।३३) इति सूत्रे 'प्रसहनमभिभवः' इति वृत्तेः। ण्यन्तात् (३।१।२६) सहेः (भ्वा० आ० से०) क्विप् (३।२।७६)। 'सहेः साडः सः' (८।३।५६) इति षत्वम्। 'अन्येषामपि–' (६।३।१३७) इति पूर्वपदस्य दीर्घः। आङ्प्रश्लेषो वा। 'नहिवृतिवृषि–' (६।३।११६) इति वा दीर्घः। एकदेशविकृतस्यानन्यत्वात्। 'दीर्घ-ञ्विधौ' (१।१।५८) इति, 'क्ङिति–' (वा० १।१५८) इति वा (णिलोपस्य) स्थानिवत्त्वनिषेधात्क्विप्परत्वानपायात्। यत्तु—त्वुरं सहते इति विगृह्य 'छन्दसि सहः' (३।२।६३) इति ण्विः—इति स्वामी। तन्न। छान्दसस्य लोके प्रयोगाभावात्। यदपि—'नहिवृतिवृषि–' (६।३।११६) इति 'पूर्वपदस्य दीर्घः–' इत्युक्तम्। तदपि न। क्विबन्तेषु नह्यादिष्वस्य प्रवृत्तेर्ण्यन्तेऽस्योपन्यासस्यान्याय्यत्वात्। एतेन—'त्वुरं वेगवन्तं सहते इति वा, त्वुरस्त्वरितः सन् परबलानि सहते इति वा' इति विगृह्य 'छन्दसि सहः' (३।२।६३) इति ण्विः—इत्युपन्यस्यन् मुकुटोऽपि प्रत्युक्तः ॥ (३१) ॥*॥ मेघा वाहनमस्य। मेघान् वाहयतीति वा। ल्युः (३।१।१३४) ॥ (३२) ॥*॥ आखण्डयति। 'खडि भेदने' (चु० प० से०)। 'वृषादिभ्यः कलच्' (उ० १।१०६) ॥ (३३) ॥*॥ सहस्रमक्षीण्यस्य। 'बहुव्रीहौ सक्थ्यक्ष्णोः' (५।४।७३) इति षच् ॥ (३४) ॥*॥ ऋभवः क्षियन्त्यत्र। 'क्षि निवासगत्योः' (तु० प० अ०)। डः (वा० ३।२।१०१) **'ऋभुक्षः** स्वर्गवज्रयोः' इति विश्वः। सोऽस्यास्तीति ऋभुक्षाः। इनिः (५।२।११५)। पथिवत्। यद्वा ऋच्छति इयर्तीति वा। अर्तेर्भुक्षिनक् प्रत्ययः ॥ (३५) ॥*॥ पञ्चत्रिंशत् **'इन्द्रस्य'** ॥

तस्य तु प्रिया ॥ ४४ ॥

पुलोमजा शचीन्द्राणी

(तस्येन्द्रस्य प्रिया तु ॥) **पुलोमजेत्यादि**। पुलोम्नो मुनेर्जाता। 'पञ्चम्याम्जातौ' (३।२।९८) इति डः ॥*॥ अत एव **'पौलोमि'** अपि। 'तस्यापत्यम्' (४।१।९२) इत्यण्। गोत्रत्वेन जातित्वान्ङीष् (४।१।६३) ॥ (१) ॥*॥ शचते। 'शच व्यक्तायां वाचि' (भ्वा० आ० से०)। इन् (उ० ४।११८)। 'कृदिकारात्–' (ग० सू० ४।१।४५) इति ङीष्। (**'शचीन्द्राण्यां शतावर्यां तथा स्त्रीकरणान्तरे'**)। 'अथ शची स्यादिन्द्राणी **शतावरी। चारुधारा महेन्द्राणी शक्राणी जयवादिनी'** इति रभसः। शक्नमणति आनयति जीवयतीति वा शक्राणी ॥*॥ सर्वेन्द्रियेषु सचते। 'षच समवाये' (भ्वा० आ० से०)। इन् (उ० ४।११८)। **सची** दन्त्यादिरपि ॥ (२) ॥*॥ इन्द्रस्य स्त्री। 'इन्द्रवरुण–' (४।१।४९) इति ङीषानुकौ। (**'इन्द्राणी** शच्यां निर्गुण्ड्यां स्त्रीकरणेऽपि') ॥ (३) ॥*॥ यत्तु—अनुकि कर्तव्ये दीर्घाकारमानुकं शास्ति, तज्ज्ञापयति 'यतो विहितस्ततोऽन्यत्रापि भवति'। तेन किर्याणी गिर्याणी इत्यादि सिद्धं भवति–इति धातुपारायणम्। अतएव 'शक्राणी' इति मुकुटश्च। तन्न। अनुकि कृते 'अतो गुणे' (६।१।९७) इति पररूपप्रसङ्गात्। नन्वकारोच्चारणसामर्थ्यादीर्घो भविष्यति। अन्यथा हि नुकमेव कुर्यात्–इति चेत्। न। 'अक्लोपोऽनः' (६।४।१३४) इत्यस्य बाधेन चरितार्थत्वात् 'पत्युर्नः' (४।१।३३) इति वदादेशे कर्तव्ये आगमलिङ्ककारोच्चारणसामर्थ्यादेव अक्लोपो न भविष्यति–इति चेत्। न। शवेशब्दे ककारस्य चारितार्थ्यात्। न हि तत्र लोपोऽस्ति। 'न संयोगात्–' (६।४।१३७) इति निषेधात्। तस्मात् ककाराकारयोः सामर्थ्यविरहे पररूपबाधनार्थं दीर्घोच्चारणमावश्यकम्। प्रयोगनिर्वाहस्तूक्त एव ॥ त्रीणि **'इन्द्रपत्न्याः'** ॥

नगरी त्वमरावती।

(**नगरी त्विति** ॥) अमराः सन्त्यस्याम्। मतुप् (५।२।९४)। 'मतौ बह्वचोऽनजिरादीनाम्' (६।३।११९) इति दीर्घः ॥ (१) ॥*॥ एकम् **'इन्द्रपुरस्य'** ॥

हय उच्चैःश्रवाः

(**हय इति** ॥) उच्चैः श्रवसी यस्य। उच्चैः शृणोतीति वा। असुन् (उ० ४।१८९) उच्चैर्महच् श्रवो यशो यस्येति वा ॥ (१) ॥*॥ एकम् **'इन्द्राश्वस्य'** ॥

सूतो मातलिः

(**सूत इति** ॥) मतं लाति। 'आतोऽनुप–' (३।२।३) इति कः। मतलस्यापत्यम्। 'अत इञ्' (४।१।९५) ॥ (१) ॥*॥ एकम् **'इन्द्रसारथेः'** ॥

नन्दनं वनम् ॥ ४५ ॥

(**नन्दनमिति** ॥) नन्दयति। 'टुनदि समृद्धौ' (भ्वा० प० से०)। ल्युः (३।१।१३४)। 'अथ **नन्दनम्**। इद्रोद्याने, **नन्दनस्तु** तनये हर्षकारिणि' इति हैमः ॥ (१) ॥*॥ एकम् **'इन्द्रवनस्य'** ॥

स्यात्प्रासादो वैजयन्तः

स्यादिति ॥ वैजयन्त्यः पताकाः सन्त्यस्य। अर्शआद्यच् (५।२।१२७)। **'वैजयन्तो** महेन्द्रस्य ध्वजप्रासादयोः पुमान्। **वैजयन्ती** पताकायां जयन्तीपादपे स्त्रियाम्' ॥ (१) ॥*॥ एकम् **'इन्द्रगृहस्य'** ॥

जयन्तः पाकशासनिः।

(**जयन्त इति** ॥) जयति। 'तृभूवहि–' (उ० ३।१२८) इत्यादिना झच्। 'झोऽन्तः' (७।१।३)। (**'जय-**

न्तावैन्द्रिगिरिशौ **जयन्त्युमापताकयोः**। जीवन्त्यां सिंहपुच्छयां च इन्द्रपुत्र्यां च') ॥ (१) ॥*॥ पाकशासनस्यापत्यम्। 'अत इञ्' (४।१।९५) ॥ (२) ॥*॥ द्वे **'इन्द्रपुत्रस्य'** ॥

ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः ॥ ४६ ॥

(ऐरावत इति ॥) इरा उदकानि सन्त्यस्मिन्। मतुप् (५।२।९४) ईरावत्यब्धौ भवः। 'तत्र भवः' (४।३।५३) इत्यण्। (**'ऐरावतोऽभ्रमातङ्गे** नारङ्गे लकुचद्रुमे। नागभेदे च पुंसि स्याद्विद्युत्तद्भेदयोः स्त्रियाम्। नपुंसकं महेन्द्रस्य ऋजुदीर्घशरासने') ॥ (१) ॥*॥ अभ्रं मेघः, तदात्मको मातङ्गः। शाकपार्थिवादिः (२।१।६९)। अभ्र आकाशे मेघे वा विद्यमानो मातङ्ग इति वा ॥ (२) ॥*॥ इरया उदकेन वणति 'वण शब्दे' (भ्वा० प० से०) पचाद्यच् (३।१।१३४)। इरावणः। ततः प्रज्ञाद्यण् (५।४।३८)। इरा सुरा वनमुदकं यस्मिन्। 'पूर्वपदात्–' (८।४।३) इति णत्वम्। इरावणे भवः। 'तत्र भवः' (४।३।५३) इत्यण्। स्वामी तु—इरावणे भवः। 'तत्र भवः' (४।३।५३) इत्यण्। 'विभाषौषधि–' (८।४।६) इति वा णत्वम्–इति। तन्न। 'ऐरावन' इत्यस्यापि प्राप्तेः ॥ (३) ॥*॥ अभ्रे खे माति, न भ्राम्यति वा, मन्थरगामिनीत्वात्। बाहुकलादुः। अभ्रमोर्वल्लभः ॥ (४) ॥*॥ चत्वारि **'इन्द्रहस्तिनः'** ॥

ह्रादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः।
शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः ॥ ४७ ॥

ह्रादिनीत्यादि ॥ ह्रादतेऽवश्यम्। 'ह्राद अव्यक्ते शब्दे' (भ्वा० आ० से०)। आवश्यके णिनिः (३।२।७८)। ह्रादोऽस्त्यस्या इति वा। इनिः (५।२।११५) **'ह्रादिनी** वज्रविद्युतोः' ॥ (१) ॥*॥ वजति। 'वज गतौ' (भ्वा० प० से०)। 'ऋज्रेन्द्र–' (उ० २।२८) इति रन् ॥*॥ अस्त्री इति पूर्वोत्तराभ्यामन्वेति। संनिधानाविशेषात्। 'अस्त्रियौ वज्रकुलिशौ' इति संसारावर्ताच्च। 'वज्रोऽस्त्री' इति वक्ष्यमाणं तस्यैवानुवादः। (**'वज्रं** स्याद्वालके धान्यां क्लीबं योगान्तरे पुमान्। **वज्रा** स्नुह्यां गुडूच्यां च **वज्री** स्नुह्यन्तरे स्मृता। दम्भोलौ हीरकेऽप्यस्त्री') ॥ (२) ॥*॥ **'कुलिर्हस्तो** भुजादलः' इति त्रिकाण्डशेषः। कुलौ शेते। 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः। कुलिनः पर्वतान् श्यति वा। 'शो तनूकरणे' (दि० प० अ०)। 'आतोऽनुपसर्गे–' (३।२।३) इति कः। कुत्सितमीषद्वा लिशति। 'लिश अल्पीभावे' (तु० प० से०)। 'इगुपध–' (३।१।१३५) इति कः। **'कुलिशो** न स्त्रियां प्रोक्तो दम्भोलौ, ना क्षणान्तरे' ॥ (३) ॥*॥ भिनत्ति। 'विदिभिदिच्छिदेः कुरच्' (३।२।१६२)। यत्तु—'कर्मकर्तरि चायमिष्यते, इत्यत्र चकारः कर्तरीत्यनुकर्षणार्थः' तेनाकर्मकर्तर्यपि भवति, इति वामनः–इति मुकुटेनोक्तम्। तन्न। भाष्येऽस्यार्थस्यादर्शनात्। निष्कलत्वाच्च। **'भिदिरम्'** इति पाठे तु 'इषिमदि–' (उ० १।५१) इत्यादिना किरच् ॥ (४) ॥*॥ पुनाति। 'अच इः' (उ० ४।१३९) ॥ (५) ॥*॥ शतं कोटयो धारा अस्य ॥ (६) ॥*॥ स्वरति। 'स्वृ शब्दोपतापयोः' (भ्वा० प० अ०)। 'शृस्वृस्निहि' (उ० १।१०) इति उः। (**'स्वरुः** पुमान् यूपखण्डे भिदुरेऽप्यध्वरे शरे') ॥*॥ शोभनान्यरूंषि धारा अस्येति (**स्वरुस्**) सान्तोऽपि ॥ (७) ॥*॥ शाम्यत्यरीन्। अन्तर्भावितण्यर्थाच्छमेर्वन्। (उ० ४।९४)। शं शुभमस्यास्त्यमेर्दत्वात् इति वा। 'कंशंभ्याम्–' (५।२।१३८) इति वः। पक्षद्वयेऽपि दन्त्योष्म्यः ॥*॥ 'शम्ब संबन्धने' चुरादिः (प० से०)। 'शम्बयति संबध्नाति शत्रून्' इति विग्रहे तु **(शम्बः)** पवर्गतृतीयान्तः। **'शम्बः** स्यान्मुसलाग्रस्थलोहमण्डलके पवौ। शुभान्विते त्रिषु' ॥*॥ सम्बयतेः (चु० प० से०) विग्रहे तु **(सम्बः)** दन्त्यादिरपि। 'तालव्या अपि दन्त्याश्च **सम्ब**सूकरपांसवः' इत्यूष्मविवेकः ॥ (८) ॥*॥ **'दम्भु** रोधने' (स्वा० प० से०)। असुन् (उ० ४।१८९) दम्भसि रोधने अलिः समर्थः। 'अलं भूषणपर्याप्तिवारणेषु' (भ्वा० प० से०)। इन् (४।१९८)। दभ्नोति खेदयति। 'दम्भु दम्भने' (स्वा० प० से०)। औणादिक ओलिरिति वा ॥ (९) ॥*॥ अश्नाति, अश्यतेऽनेनेति वा 'अर्तिसृधृधम्यम्यस्यतिहृभ्यो निः' (२।१०२) ॥*॥ इह **'वज्राशनिः'** इति समुदितमपि बोध्यम्। **'वज्राशनिं** विदुर्वज्रम्' इति त्रिकाण्डशेषात्। 'अथ **वज्राशनिर्द्वयोः**' इति नामनिधानाच्च ॥ (१०) ॥*॥ दश **'वज्रस्य'** ॥

व्योमयानं विमानोऽस्त्री

व्योमयानमित्यादि ॥ व्योम्नि यान्त्यनेन। करणे ल्युट् (३।३।११७)। व्योम याति। 'कृत्यल्युटः–' (३।३।११४) इति कर्तरि ल्युट् इति वा ॥ (१) ॥*॥ विशिष्टं मानयन्त्यनेन। 'पुंसि संज्ञायाम्' (३।३।११८) इति करणे घः। 'घञ्' इति मुकुटः। तन्न। परत्वाल्लयुट्प्रसङ्गात्। घस्तु करणाधिकरणयोर्विहितः। विशेषेण मान्त्यस्मिन्निति वा। अधिकरणे ल्युट् (६।३।११७)। विगतं मानमुपमास्येति वा। **'विमानो** व्योमयाने च सप्तभूमिगृहेऽपि च। घोटके यानमात्रे च पुंनपुंसकयोर्मतः ॥' (२) ॥*॥ द्वे **'देवरथस्य'** ॥

नारदाद्याः सुरर्षयः।

(नारदाद्या इति ॥) नरस्य धर्म्यम्। 'नराच्चेति वक्तव्यम्' (वा० ४।४।१४९) इत्यण् (अ)। नारं ददाति। 'आतोऽनुप–' (३।२।३) इति कः। यद्वा 'नारं पानीयमित्युक्तं तत्

१—इरावती कश्यपजानपत्या पुलहप्रिया, तया संभृतत्वाद्वा—तथा चागमः—'इरावत्या भृतः पुत्रस्यार्थे ऐरावतस्ततः' इति। इत्यपि मुकुटः ॥ २—मितद्वादित्वम् (वा० ३।२।१८०) तु युक्तम् ॥

पितृभ्यः सदा भवान् । ददाति तेन ते नाम नारदेति भविष्यति' इत्यागमः । नारं नरसमूहं द्यति कलहेनेति वा । नुरिदं नारमज्ञानम् । तच्छ्यति ज्ञानोपदेशेनेति वा । 'दो अवखण्डने' (दि० प० अ०) । कः (३।२।३) ॥ (१) ॥*॥ आद्येन **तुम्बुरुभरतपर्वतदेवलादयः** । सुराश्च ते ब्रह्मादिपुत्रत्वादृषयश्च । षष्ठीसमासो वा ॥ एकम् **'देवर्षेः'** ॥

स्यात्सुधर्मा देवसभा

(स्यादिति ॥) शोभनो धर्मोऽस्याम् । 'धर्मादनिच् केवलात्' (५।४।१२४) । 'ङाबुभाभ्याम्' (४।१।१३) इति पक्षे ङाप् । 'अनो बहुव्रीहेः' (४।१।१२) इति ङीप् (४।१।१५) न ॥ (१) ॥*॥ सह भान्त्यस्याम् । 'सभा राजामनुष्यपूर्वा' (२।४।२३) इति निपातनादङ् । देवानां सभा आस्थानगृहम् ॥ (२) ॥ * ॥ द्वे **'देवसभायाः'** ॥

पीयूषममृतं सुधा ॥ ४८ ॥

(पीयूषमिति ॥) पीय्यते । 'पीय' इति सौत्रो धातुः । 'पीयेरूषन्' (उ० ४।७६) । बहुलवचनात्पक्षे गुणः । **'स्यात्पेयुषं च पीयूषं** नवक्षीरेऽमृतेऽपि च' इति हारावली । **'पीयूषं** सप्तदिवसावधिक्षीरे तथाऽमृते' ॥ (१) ॥*॥ न म्रियन्तेऽनेन । 'तनिमृङ्भ्यां किच्च' (उ० ३।८८) इति तन् । **'अमृतं** यज्ञशेषे स्यात्पीयूषे सलिले घृते । अयाचिते च मोक्षे च ना धन्वन्तरिदेवयोः' ॥ (२) ॥*॥ सुखेन धीयते । 'धेट् पाने' (भ्वा० प० अ०) । 'आतश्चोपसर्गे' (३।३।१०६) इति कर्मण्यङ् । यत्तु—अङ्विधौ (३।३।१०४,५,६,) कारकाधिकारः (३।३।१९,९३) निवृत्तः–इति मुकुटः । तदाकरविरुद्धम् । द्वितीयभावग्रहणस्य (३।३।९५) कारकाधिकारनिवृत्त्यर्थत्वात्'–इति हेतुरपि स्वरूपासिद्धः । 'अभिविधौ भावे–' (३।३।३४) इत्यस्याग्रेऽनुवर्तनात् । यदपि—सुष्ठु दधाति पुष्णाति शरीरमिति पचाद्यजन्तात् (३।१।१३४) टाप् (४।१।४) इति–तदपि न । नित्यत्वादन्तरङ्गत्वाच्चैकादेशेऽदन्तत्वाभावेन टाबयोगात् । एकादेशस्य पूर्वान्तत्वेन ग्रहणात्सस्यालोपप्रसङ्गाच्च । 'आतश्चोपसर्गे' (३।१।१३६) कप्रत्ययो वक्तुमुचितः । (**'सुधा** गञ्जेष्टिकाक्षुद्योर्मूर्वालेपामृतेषु च') ॥ (३) ॥*॥ त्रीणि **'अमृतस्य'** ॥

मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका ।

मन्दाकिनीत्यादि ॥ मन्दमकितुं शीलमस्याः । 'अक कुटिलायां गतौ' (भ्वा० प० से०) । 'सुपि–' (३।२।७८) इति णिनिः ॥ (१) ॥*॥ वियति वियतो वा गङ्गा ॥ (२) ॥*॥ स्वः स्वर्गस्य नदी । पूर्वपदात्संज्ञायाम्–(८।४।३) इति णत्वम् ॥ (३) ॥*॥ सुराणां दीर्घिकेव ॥ (४) ॥*॥ चत्वारि **'देवगङ्गायाः'** ॥

मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः ॥ ४९ ॥

मेरुरित्यादि ॥ मिनोत्युच्चत्वाज्ज्योतींषि । 'डुमिञ् प्रक्षेपणे' (स्वा० उ० अ०) । 'मिपीभ्यां रुः' (उ० ४।१०१) । 'मापो रुरिच्च' इति मुकुटः । तन्न । उज्ज्वलदत्तादावस्य सूत्रस्यानुपलब्धेः ॥ (१) ॥*॥ सुमेरुरित्युपसर्गान्तरनिवृत्त्यर्थमुक्तम् ॥ (२) ॥*॥ हेम्नोऽद्रिः ॥ (३) ॥*॥ रत्नानि सानावस्य ॥ (४) ॥*॥ सुराणामालयः ॥ (५) ॥*॥ पञ्च **'मेरोः'** ॥

पञ्चैते देवतरवो मन्दारः पारिजातकः ।
संतानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥ ५० ॥

पञ्चेति ॥ (एते पञ्च देववृक्षाः) मन्दयते मोदयति । 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु' (भ्वा० प० से०) । 'अङ्गिमदिमन्दिभ्य आरन्' (उ० ३।१३४) । मन्दा आरा धारा अस्य, सरलत्वादिति वा । (**'मन्दारः** स्यात्सुरद्रुमे । पारिभद्रेऽर्कपर्णे च **मन्दारो** हस्तिधूर्तयोः') ॥ (१) ॥*॥ पारिणोऽब्धेर्जातः । ततः स्वार्थे कन् (५।३।८७) । यत्तुत पारिजातो जन्यत्वेनास्यास्ति । अर्शआद्यच् (५।२।१२७) । पारिजातः समुद्रः । 'तत्र भवः' (४।३।५३) इत्यणि पारिजातः–इति मुकुटः । तन्न । वृद्धाच्छस्य (४।२।११४) अपवादस्य सत्त्वादणोऽप्रसङ्गात् । वैयर्थ्यात् जन्यस्यैव नामनिर्वचनासिद्धेश्च । (**'पारिजातस्तु** मन्दारे पारिभद्रे सुरद्रुमे') ॥ (१) ॥*॥ सम्यक् तनोति पुष्णाति । 'ज्वलिति–' (३।१।१४०) इति सूत्रे तनोतेरुपसंख्यानात् णः । सम्यक्तन्यन्ते पुष्पाण्यस्मिन्नित्यधिकरणे 'हलश्च' (३।३।१२१) इति घञ् वा । (**'संतानः** संततौ गोत्रे स्यादपत्ये सुरद्रुमे' ॥ (१) ॥*॥ कल्पः संकल्पितोऽर्थः, तस्य वृक्षः । जन्यजनकभावसंबन्धे षष्ठी ॥ (१) ॥*॥ चन्दयति । 'चदि आह्लादने' (भ्वा० प० से०) ण्यन्तः (३।१।२६) ल्युः (३।१।१३४) । हरेश्चन्दनः । **'हरिचन्दनमस्त्री** स्यात्त्रिदशानां महीरुहे । नपुंसकं तु गोशीर्षे ज्योत्स्नाकुङ्कुमयोरपि' ॥ (१) ॥*॥ पञ्चानां **'देववृक्षाणाम्'** एकैकम् ॥

सनत्कुमारो वैधात्रः

सनत्कुमार इत्यादि ॥ सनत् नित्यं कुमारः ॥*॥ **'सनात्कुमारः'** अपि । यद्वा **'हंसगो गृहिणः सनत्'** इति ब्रह्मपर्याये रभसः । तस्य कुमारोऽपत्यम् । दन्त्यादिः ॥ (१) ॥*॥ विधातुरपत्यम् । अण् (४।१।९२) ॥ (२) ॥*॥ वैद्यसंहिताप्रणेतृत्वात्स्ववैद्यपर्यायसंनिधौ कथनम् । द्वे **'ब्रह्मपुत्रस्य'** ॥

स्ववैद्यावश्विनीसुतौ ।
नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ॥ ५१ ॥

स्ववैद्यावित्यादि ॥ स्वः स्वर्गस्य वैद्यौ ॥ (१) ॥*॥ अश्विन्याः सुतौ ॥ (२) ॥*॥ न सत्यं ययोस्तावसत्यौ, न असत्यौ । 'नभ्राण्नपाद्–' (६।३।७४) इति नञः प्रकृतिभावः ॥ (३) ॥*॥ प्रशस्ता अश्वाः सन्ति ययोः । इनिः

(५।२।११५) । यद्वा अश्विन्यां जातौ । 'संधिवेला–' (४।३।१६) इत्यणः 'नक्षत्रेभ्यो बहुलम्' (४।३।३७) इति लुकि 'लुक् तद्धितलुकि' (१।२।४९) इति ङीपो लुक् । अश्वोऽस्ति जनकत्वेन ययोर्वा । इन् (५।२।११५) ॥ (४) ॥*॥ दस्यतः क्षिपतो रोगान् । 'दसु उपक्षये' (दि० प० से०) । 'स्फायि-तञ्चि–' (उ० २।१३) इति रक् । ('**दस्रः** खरेऽश्विनीसुते') ॥ (५) ॥*॥ अश्विन्या अपत्ये । 'स्त्रीभ्यो ढक्' (४।१।१२०) ॥ (६) ॥*॥ 'तावुभाविति द्वित्वादिष्टत्वादेकवचनाभावः–' इति स्वामी । अयं च प्रायोवादः । 'देव्यां तस्यामजायेतां नासत्यौ दस्र एव च' इति मार्कण्डेयात् । 'नासत्यौ' इति 'दस्रौ' चैकवाचकस्योभयोः प्रयोगो गौणः ॥ षट् '**अश्विनोः**' ॥

स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः ।

स्त्रियामिति ॥ अञ्चः सरन्ति । 'सॄरतेरसुन्' (उ० ४।२३७) ॥ (१) ॥*॥ 'बहुषु' इति प्रायोवादः । 'अनचि च' (८।४।४७) इति सूत्रे 'अप्सराः' इति भाष्यप्रयोगात् । 'स्त्रियां बहुष्वप्सरसः स्यादेकत्वेऽप्सरा अपि' इति शब्दार्णवाच्च—अस्य शुभंयाशब्दवद्रूपम्–इति मुकुटोक्तं चिन्त्यम् । अप्सरःशब्दस्य सान्तत्वात् ॥*॥ स्वः स्वर्गस्य वेश्याः ॥ (२) ॥*॥ उरून्महतोऽश्नुते व्याप्नोति वशीकरोतीति यावत् । 'कर्मण्यण्' (३।२।१) संज्ञापूर्वकस्य विधेरनित्यत्वान्न वृद्धिः । मूलविभुजादित्वात् (वा० ३।२।५) को वा । उरु अश्नातीति वा (३) ॥*॥ मुखशब्देनाद्यर्थेन रम्भा-मेनका-घृताची-तिलोत्त-मादीनां ग्रहणम् ॥ एकम् '**उर्वश्यादेः**' ॥

हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम् ॥ ५२ ॥

(**हाहेति** ॥) अव्युत्पत्तिपक्षे 'आतो धातोः' (६।४।१४०) इत्यस्याप्राप्तेः शसि हाहान्, 'ओः सुपि' (६।४।८३) इत्यस्याप्राप्तेर्हूहून्, इत्यादि । यत्तु—'आतो धातोः' (६।४।१४०) इति योगविभागादाकारलोपः–इति मुकुटेनोक्तम् । तच्चिन्त्यम् । निर्णीतरूपस्य योगविभागेन निर्वाहस्यौचित्यात् । अप्रयुक्तस्य तेन साधनस्यानुचितत्वात् । हा इति शोकव्यञ्-कशब्दं जहाति । 'ओहाक् त्यागे' (जु० प० अ०) । क्विप् (३।२।७२) शसि हाहः । हू इति ह्वयति । ह्वेञः (भ्वा० उ० अ०) क्विप् (३।२।१७८) । 'वचिस्वपि–' (६।१।१५) इति संप्रसारणम् । 'हलः' (६।४।२) इति दीर्घः । बाहुलका-द्वाप्रत्यये तु (हाहाः) व्युत्पन्नोऽधातुश्च । एवं हूप्रत्यये हूहू-रपि बोध्यः । हाहाः सान्तोऽपि । '**गन्धर्वो** वीतिहाहसोः' इति संसारावर्तात् । '**गन्धर्वो** हाहसि प्रोक्तः' इति रत्नकोषाच्च । भोजस्तु हहाहुहुशब्दयोरव्ययत्वमाह । '**हहाः**' इत्यादिहसः । '**हुहुः**' इत्युभयहसश्च । '**हंसो हहाहुहू** च द्वौ **वृषणश्वश्च तुम्बुरुः**' इति शब्दार्णवात् । 'गीतमाधुर्यसंपन्नौ विख्यातौ च **हहाहुहू**' इति व्यासोक्तेश्च ॥*॥ गन्धं सौरभमर्वति : 'अर्व गतौ' (भ्वा० प० से० पवर्गीयान्तः) 'कर्मण्यण्' (३।२।१) । शकन्ध्वादिः (वा० ६।१।९४) । ('**गन्धर्वैस्तु** नभश्चरे । पुंस्कोकिले गायने च मृगभेदे तुरं-गमे । अन्तराभवदेहे च') ॥*॥ प्रज्ञाद्यणि (५।४।३८) (**गान्धर्वः**) दीर्घादिरप्ययम् । 'अपि **गन्धर्वगान्धर्वदि-व्यगायनगातवः**' इति शब्दार्णवात् ॥ (१) ॥*॥ आद्येन तुम्बुरु-विश्वावसु-चित्ररथादीनां संग्रहः ॥ '**देवगायकानाम्**' एकम् ॥

अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनंजयः ।
कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात् ॥ ५३ ॥
बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः ।
आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः ॥५४॥
लोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः ।
हिरण्यरेता हुतभुग् दहनो हव्यवाहनः ॥ ५५ ॥
सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः ।
शुचिरप्पित्तम्

अग्निरित्यादि ॥ अङ्गति । 'अगि गतौ' (भ्वा० प० से०) । 'अङ्गेर्नलोपश्च' (उ० ४।५०) इति निर्नलोपश्च । ('**अग्निर्वैश्वानरेऽपि** स्याच्चित्रकाख्यौषधौ पुमान्') ॥ (१) ॥*॥ विश्वे नरा अस्य । 'नरे संज्ञायाम्' (६।३।१२९) इति विश्वशब्दस्य दीर्घः । विश्वानरस्यापत्यम् । ऋष्यण् (४।१।११४) । यत्तु—बिदादित्वात् (४।१।१०४) अञ् । बहुत्वे च 'यञञोश्च' (२।४।६४) इति लुक् । विश्वा-नराः–इति मुकुटः । तन्न । 'विश्वे वैश्वानरा उत' इत्यत्र लुकोऽदर्शनात् । 'वैश्वानराय मीढुषे' इत्यादावन्तोदात्तदर्श-नाच्च । ऋषिभ्यो गोत्रापत्येऽञो विहितत्वेनानन्तरापत्ये प्रस-क्त्यभावाच्च । एतेन बिदादित्वात् (४।१।१०४) अञ्—इति वदन् स्वाम्यपि प्रत्युक्तः ॥ (२) ॥*॥ वहति हव्यम् । 'वहि-श्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' (उ० ४।६१) इति निः । नित्च । ('**वह्निर्वैश्वानरेऽपि** स्याच्चित्रकाख्यौषधे पुमान्') ॥ (३) ॥*॥ 'वी गतिप्रजनकान्त्यसनखादनेषु' (अ० प० अ०) । कर्मणि क्तिन् (३।३।९४) वीतिर्भक्ष्यं पुरोडाशादिर्हूयतेऽस्मिन् । 'हु दानादनयोः' (जु० प० से०) । 'हुयामा–' (उ० ४।१६८) इति त्रन् । वीतिरश्वो होत्रं हवनमस्येति वा । ('**वीतिहोत्रोऽनलेऽर्के** च') ॥ (४) ॥*॥ धनं जयति ।

१—उज्ज्वलदत्तादौ तु 'अप्सराः' इत्येव सूत्रं दृश्यते ॥ २—द्वे उर्वश्यादेरिति मुकुटः ॥

१—'यञञोश्च' (२।४।६४) इत्यनेन गोत्रविहितयञञोर्लुग्वि-धायकेन लुको दर्शितत्वेनात्रानन्तरापत्येऽञ्चिकीर्षितत्वेन, गोत्रा-पत्ये एव चिकीर्षितत्वेन, लौकिके लुगभावस्य 'छन्दोवत्सवयः कु-र्वन्ति न ह्येषा इष्टिरस्ति' (१।४।३) इति भाष्येणासाधुताध्वननात् वैदिके 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति परिभाषया, अन्तोदा-त्तत्वस्य 'सुप्तिङुपग्रह–' (३।१।८५) इति–भाष्योक्त्या, स्वरव्यत्य-येन सिद्धौ बिदादिगणे तत्पाठवैयर्थ्यापत्तेश्चिन्त्यमेतत् ॥

'संज्ञायां भृतृ–' (३।२।४६) इति खच् । (**'धनंजयः** सर्पभेदे ककुभे देहमारुते । पार्थेऽग्नौ') ॥ (५) ॥*॥ कृपीटस्य जलस्य योनिः । **'कृपीटमुदरे** जले' इति रत्नकोषात् । 'अग्नेरापः' इति श्रुतेः । कृपीटं योनिरस्येति वा । अग्न्योऽग्निर्ब्रह्मतः क्षत्रम्' इति मनुः ॥ (६) ॥*॥ ज्वलति । 'जुचङ्क्रम्य–' (३।२।१५०) इति युच् ॥ (७) ॥*॥ विद्यते लभ्यते । 'विदॢ लाभे' (तु० उ० अ०) । असुन् (उ० ४।१८९) । जातं वेदो धनं यस्मात् । जाते जाते विद्यते इति वा । 'विद सत्तायाम्' (दि० आ० अ०) । जातं वेत्ति वेदयते वा । 'विद् चेतनादौ' (अ० प० से०, रु० आ० अ०, ण्यन्तः, चु० आ० से०) । असुन् (उ० ४।१८९) ॥ (८) ॥*॥ तनूं शरीरं न पातयति । 'नभ्राण्नपात्–' (६।३।७५) इति निपातितः । तनूनपातौ । 'तनूनपातमुषसस्य निंसाते' इति मन्त्रः ॥*॥ तनूं स्वं स्वरूपं न पाति न रक्षति आशुविनाशित्वाद् इति 'तनूनपात्' शत्रन्तः । 'उगिदचाम्–' (७।१।७०) इति नुमि तनूनपात्, तनूनपान्तौ, तनूनपान्तः इति वा ॥*॥ तन्वा ऊनं कृशं पाति । तनूनपं घृतादि, तदत्ति । 'अदोऽनन्ने' (३।२।६८) इति विट् । तनूनपादौ, तनूनपादः इति वा ॥ (९) ॥*॥ बृंहति । 'बृहि वृद्धौ' (भ्वा० प० से०) । 'बृंहेर्नलोपश्च' (उ० २।१०९) इति इस् । पुंलिङ्गोऽयम् । **'बर्हिरुक्तो बृहद्भानुः'** इत्यमरमालापुस्काण्डे पाठात् ॥ (१०) ॥*॥ **'शुक्रो वैश्वानरो वह्निर्बर्हिःशुष्मा तनूनपात्'** इति शब्दार्णवात् **'बर्हिः शुष्मा'** इति व्यस्तं समस्तं नाम इति कश्चित् । तत्र समस्तपक्षे बर्हिः कुशः शुष्म बलमस्येति विग्रहः । **बर्हिः** सान्तः (**'बर्हिः** पुंसि हुताशने । न स्त्री कुशे') । बर्हिरिदन्तः । 'शुष्मा' इति नान्तः **पृथग्–इत्यन्यः** ॥*॥ शुष्यत्यनेनेति **शुष्मा** । 'शुष शोषणे' (दि० प० अ०) । 'अन्येभ्योऽपि–' (३।२।७५) इति मनिन् । संज्ञापूर्वकत्वान्न गुणः ॥*॥ शुष्यति जलम् । शुषेरन्तर्भावितण्यर्थात् 'अविसिविसिशुषिभ्यः कित्' (उ० १।१४५) इति मनिप्रत्यये **'शुष्मः'** अदन्तोऽपि ॥ (११) ॥*॥ कृष्णो धूमो वर्त्मास्य । नान्तः । (**'कृष्णवर्त्मा** विधुंतुदे । दुराचारे हुताशे च') ॥ (१२) ॥*॥ शोचींषि ज्वालाः केशा इवास्य । 'नित्यं समासेऽनुत्तरपदस्थस्य' (८।२।४५) इति षत्वम् ॥ (१३) ॥*॥ **'उषः** प्रभाते संध्यायाम्' इति विश्वः । उषः संध्यायां बुध्यते प्रकाशते । इगुपधत्वात् (३।१।१३५) कः । 'अहरादीनां पत्यादिषु वा रेफः–' (वा० ८।२।७०) । स च व्यवस्थितविभाषयेह नित्यम् ॥ (१४) ॥*॥ आश्रयमाधारमश्नाति । 'कर्मण्यण्' (३।२।१) । (**'आश्रयाशः** पुमान्वह्नौ त्रिषु चाश्रयनाशके') ॥*॥ **'आशयाशः'** इति पाठान्तरम् । आशेरतेऽत्रेत्याशयः । 'एरच्' (३।३।५६) । तमश्नाति ॥ (१५) ॥*॥ बृहन्तो भानवोऽस्येति ॥ (१६) ॥*॥ 'कृश तनूकरणे' (दि० प० से०) । कृश्यति । 'ऋतन्यञ्जि–' (उ० ४।२) इत्यानुक् ॥ (१७) ॥*॥ पुनाति । 'पूञ् पवने' (क्र्या० उ० से०) । ण्वुल् (३।१।१३३) । (**'पावकोऽग्नौ** सदाचारे वह्निमन्थे च चित्रके । भल्लातके विडङ्गे च शोधयितृनरेऽपि च') ॥ (१८) ॥*॥ अनिल्यनेन । पुषादित्वात् (उ० १।१०६) कलच् । **'अनलो** वसुभेदेऽग्नौ' । (**'अनलोऽनिले** । वसुदेवे वसौ वह्नौ') ॥ (१९) ॥*॥ लोहिता अश्वा यस्य । 'वरुणस्त्वसितानश्वान्कुबेरः कुमुदोपमान् । हुताशनः किंशुकाभान्वायुर्बभ्रूंस्तथावृणोत्' इति शालिहोत्रात् । रोहितो मृगोऽश्वो वाहनमस्येति वा । (**'रोहिताश्वश्चित्रभानौ** हरिश्चन्द्रनृपात्मजे') ॥ (२०) ॥*॥ वायोः सखा । 'राजाहःसखिभ्यष्टच्' (५।४।९१) ॥*॥ वायुः सखास्येति **(वायुसखा)** वा । अस्मिन्पक्षे टजभावात् 'अनङ् सौ' (७।१।९३) इत्यनङ् ॥ (२१) ॥*॥ शिखाः सन्त्यस्य । मतुप् (५।२।९४) ॥*॥ व्रीह्यादित्वात् (५।२।११६) इनिप्रत्यये **'शिखी'** अपि । **'शिखी** वह्नौ बलीवर्दे शरे केतुग्रहे द्रुमे । मयूरे कुक्कुटे पुंसि शिखावत्यन्यलिङ्गकः' ॥ (२२) ॥*॥ (आशोष्टुमिच्छति) आङ्पूर्वाच्छुष्यतेः (दि० प० अ०) सन्नन्तात् 'अङि शुषेः सनश्छन्दसि' (उ० २।१०६) इत्यनिः । छान्दसानामपि क्वचिद्भाषायां प्रयोगः । 'अध्वर्युक्रतुः–' (२।४।४) इति ज्ञापकात् । आशु शीघ्रं आशुं व्रीहिं वा शु क्षणोति । 'क्षणु हिंसायाम्' (त० उ० से०) । इन् (उ० ४।११८) । शु इति पूजार्थमव्ययम् ॥ (२३) ॥*॥ हिरण्यं रेतोऽस्य । सान्तः । **'हिरण्यरेताः** पुंसि स्याद्विवाकरहविर्भुजोः'॥ (२४) ॥*॥ हुतं भुङ्क्ते । क्विप् (३।२।१७८) । जान्तः ॥ (२५) ॥*॥ दहति । ल्युः (३।१।१३४) (**'दहनश्चित्रके** भल्लातकेऽग्नौ दुष्टचेष्टिते') ॥ (२६) ॥*॥ हव्यं वाहयति । ण्यन्ताद्वहेः (भ्वा० उ० अ०) ल्युः (३।१।१३४) यत्तु स्वामी—'हव्यं वाहयति' इति विगृह्य 'हव्यपुरीषपुरीष्येषु ञ्युट्' (३।२।६५)—इत्याह । तन्न । उदाहृतपाठस्यानुपलम्भात् । 'कव्यपुरीषपुरीष्येषु–' इति पाठस्योपलम्भात् । 'वहश्च' (३।२।६४) इत्यनुवृत्तेर्ण्यन्तादसंभवाच्च । मुकुटोऽपि—'वाहयति' इति विगृह्य 'हव्येऽनन्तः पादम्' (३।२।६६) इति वहेर्ण्युट्–इत्याह । तदपि न । ञ्युटश्छान्दसत्वात् । 'वहश्च' (३।२।६४) इत्यनुवृत्तेर्ण्यन्तादसंभवाच्च ॥ (२७) ॥*॥ सप्तार्चिषो यस्य । काली-करालि-मनोजवा-सुलोहिता-सुधूम्रवर्णा-स्फुलिङ्गिनी-विश्वरुचिसाख्याः सप्त वह्नेर्जिह्वाः । (**'सप्तार्चिः** पावके पुंसि क्रूरचक्षुषि च त्रिषु') ॥ (२८) ॥*॥ 'दमु उपशमे' (दि० प० से०) । अन्तर्भावितण्यर्थाद् 'दमेरुनसिः' (उ०४।२।३५) । दाम्यति । दमुनाः, दमुनसौ ॥*॥ दीर्घमध्योऽपि । **'दमूना दमुनाः प्राचीनबर्हिः शुचिबर्हिषौ'** इति नामनिधानात् ॥ (२९) ॥*॥ शोचयति । 'ऋज्रेन्द्र–' (उ० २।२८) इति निपा-

१—इन्धनाभावे इति मुकुटः ॥

१—सप्तार्चयो यस्येति । इदन्तोऽपि ॥

तितः । शुक्रं रेतोऽस्यास्तीति वा । अर्शआद्यच् (५।२।१२७) । शुक्लवर्णत्वादिति वा । रलयोरेकत्वम् । (**'शुक्रः** स्याद्भार्गवे ज्येष्ठमासे वैश्वानरे पुमान् । रेतोऽक्षिरुग्भिदोः क्लीबम्') ॥ (३०) ॥*॥ चित्रा भानवोऽस्य । क्षुभ्रादिः (८।४।३९) । (**'चित्रभानुः** पुमान्वैश्वानरे चाहस्करेऽपि च') ॥ (३१) ॥*॥ विभा प्रभा वसु धनं यस्य । (**'विभावसुस्तु** भास्करे । हुताशने हारभेदे चन्द्रे') ॥ (३२) ॥*॥ शुचिं पवित्रं करोति शुचयति । 'तत्करोति–' (वा० ३।१।२६) इति ण्यन्ताद् 'अच इः' (उ० ४।१३९) । यद्वा शोचति । अन्तर्भावितण्यर्थाच्छुचेः (भ्वा० प० से) 'इगुपधात्–' (उ० ४।१२०) इतीन् । (**'शुचिर्ग्रीष्माग्निशृङ्गारेष्वषाढे** शुद्धमन्त्रिणि । ज्येष्ठे च पुंसि धवले शुद्धेऽनुपहते त्रिषु') ॥ (३३) ॥*॥ अपां पित्तमिव । दाहकत्वात् ॥ (३४) ॥*॥ चतुस्त्रिंशत् **'अग्नेः'** ॥

और्वस्तु बाडवो बडवानलः ॥ ५६ ॥

(और्व इति ॥) उर्वस्य मुनेरपत्यम् । यत्तु बिदाद्यच् (४।१।१०४) बहुत्वे 'यञञोश्च' (२।४।६४) इति लुकि उर्वाः–इति मुकुटः । तन्न । अनन्तरापत्येऽञोऽसंभवात् । तस्मादण्यण् (४।१।११४) ॥ (१) ॥*॥ बडवायां भवः । 'तत्र भवः' (४।३।५३) इत्यण् । (**'बाडवं** करणे स्त्रीणां घोटकौघे नपुंसकम् । पाताले न स्त्रियां पुंसि ब्राह्मणे वडवानले') ॥ (२) ॥*॥ बडवाया अनलः । आधाराधेयभाव एव संबन्धत्वेन षष्ठ्यर्थः ॥ (३) ॥*॥ त्रीणि **'बाडवाग्नेः'** ॥

वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम् ।

(वह्नेरिति ॥) 'वह्नेः' इति प्रायोवादः । **'हेतिः** स्यादायुधज्वालासूर्यतेजःसु योषिति' इति दर्शनात् । ज्वलति । [1]कसन्तेभ्यो णः' (३।१।१४०) ॥*॥ स्त्रियां टाप् । (१) ॥*॥ 'कील बन्धे' (भ्वा प० से०) । 'इगुपध–' (३।१।१३५) इति कः ॥*॥ स्त्रियां ।४) (**'कीलोऽग्नितेजसि** । कूर्परस्तम्भयोः शङ्कौ । रतहतावपि') ॥ (२) ॥*॥ अर्च्यते । 'अर्च पूजायाम्' ।० प० से०, चु० उ० अ०) । 'अर्चिशुचिहुसृपिच्छाच्छर्दिभ्य इसिः' (उ० २।१०८) अर्चिः सान्तः ॥*॥ इनि (उ० ४।११८) त्विदन्तोऽपि । 'अग्नेर्भ्राजन्ते अर्चयः' इति श्रुतेः ॥*॥ 'स्त्रियाम्' इति अर्चिरादिभिः संबध्यते । तत्रार्चिषः 'ज्वालाभासोर्नपुंस्यर्चिः' इति क्लीबत्वमपि वक्ष्यते । (**'अर्चिर्मयूखशिखयोः'**) ॥ (३) ॥*॥ हिनोति, हन्ति वा । 'हि गतौ' (स्वा० प० अ०) । 'ऊतियूति–' (३।३।९७) इत्यादिना क्तिन्नन्तो निपातितः । (**'हेतिर्ज्वालास्त्रसूर्याशुषु'**) ॥ (४) ॥*॥ शेते । 'शीङः किद्भ्रस्वश्च' (उ० ५।२४) इति खः । **'शिखा** ज्वालाबर्हिचूडालाङ्गलक्वयप्रमात्रके' ॥ (५) ॥*॥ पञ्च **'ज्वालायाः'** ॥

त्रिषु स्फुलिङ्गोऽग्निकणः

(त्रिष्विति ॥) 'स्फु' इत्यनुकरणशब्दः । स्फुना स्फूत्कारेण लिङ्गति । 'लिगि गतौ' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) ॥*॥ स्फुलिङ्गा जातावपि । अजादित्वाट्टाप् ॥ (१) ॥*॥ अग्नेः कणः ॥ (२) ॥*॥ द्वे **'अग्निकणस्य'** ॥

संतापः संज्वरः समौ ॥ ५७ ॥

(संताप इत्यादि ॥) संतापयति । 'तप संतापे' (भ्वा० प० अ०) ॥ (१) ॥*॥ 'ज्वर रोगे' (भ्वा० प० से०) ण्यन्तौ । संज्वरयति । पचाद्यच् (३।१।१३४) ॥ (२) ॥*॥ यत्तु—संतापनं संतापः । घञ् (३।३।१८) । संज्वरयति संज्वरः । अच् (३।१।१३४)—इति मुकुटेनोक्तम् । तन्न । वैषम्ये प्रमाणाभावात् । भावकर्त्रभिधायिनोः समानार्थकत्वाभावात् । समौ समानार्थकौ समलिङ्गौ ॥ द्वे **'संतापस्य'** ॥

धर्मराजः पितृपतिः समवर्ती परेतराट् ।
कृतान्तो यमुनाभ्राता शमनो यमराड्यमः ॥ ५८ ॥
कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः ।

धर्मराज इत्यादि ॥ धर्मस्य राजा । 'राजाहः–' (५।४।९१) इति टच् ॥ (१) ॥*॥ पितॄणां पतिः ॥ (२) ॥*॥ समं वर्तितुं शीलमस्य । 'सुप्यजातौ–' (३।२।७८) इति णिनिः ॥ (३) ॥*॥ परेतेषु मृतेषु राजते । 'सत्सूद्विष–' (३।२।६१) इति क्विप् । जान्तः ॥ (४) ॥*॥ कृतोऽन्तो विनाशो येन । (**'कृतान्तो** यमसिद्धान्तदैवाकुशलकर्मसु') (५) ॥*॥ यमुनाया भ्राता ॥ (६) ॥*॥ शमयति । ल्युः (३।१।१२४) । (**'शमनं** शान्तिवधयोः । **शमनः** श्राद्धदैवते') ॥ (७) ॥*॥ यमेन संयमेन राजते । क्विप् (३।२।६१) जान्तः ॥ (८) ॥*॥ यमयति । अच् (३।१।१३४) । **'यमो** दण्डधरे ध्वाङ्क्षे संयमे यमजेऽपि च' इति विश्वः ॥ (९) ॥*॥—कलयत्यायुः । 'कल संख्याने' (चु० उ० से०)पचाद्यजन्तात् (३।१।१३४) प्रज्ञाद्यण् (५।४।३८)–इति मुकुटः । तन्न । कलेर्मित्त्वाभावात् । प्रज्ञाद्यणि रूपद्वयप्रसङ्गाच्च । एतेन स्वाम्यपि परास्तः । तस्मात् 'काल-

---

१—बाहुलकालात्क्वचिदलुगपि 'सोङ्गिपांसैरपां पित्तमिन्धानः शर्वरीं नयेत्' इति प्रयोगात् इत्यपि मुकुटः ॥ २—'उर्वेण किलायोनिजपुत्रार्थिना ऊरुर्मथितः, तत्र ज्वालामयः पुरुषो जातः, तस्य च समुद्र आधार आसीत्' इति श्रुतिः—इति मुकुटः ॥ ३—बिदादिगणे उर्वशब्दपाठवैयर्थ्यापत्त्या वैश्वानरशब्दव्याख्यानोक्तदिशा चिन्त्यमिति शम् ॥ ४—वयं तु ब्रूमः पञ्चैव वाचकान्यर्चिषः । वह्नेरिति तु 'तेजोमात्रवाचिकाप्यर्चिर्विशेषणाग्निद्युतौ वर्तते धातुरिव गैरिके' इत्येतत्सूचनार्थम्—इति मुकुटः ॥

१—भित्त्वाभावेऽपि अदन्तत्वादेव वृद्धेरप्राप्त्या 'कलयति' इति मुकुटोक्तमेव समञ्जसम् ॥

यति' इति विग्रह उचितः । कालवर्णत्वाद्वा । ('**कालो** मृत्यौ महाकाले समये यमकृष्णयोः') ॥ (१०) ॥*॥ दण्डस्य धरः । दण्डं धरतीति विग्रहे 'कर्मण्यण्' (३।२।१) इत्यणि '**दण्डधारः**' अपि । ('**दण्डधारो** यमे राज्ञि') ॥ (११) ॥*॥ श्राद्धस्य देवः अंशभाक्त्वात् । पितृपतित्वाद्वा ॥ (१२) ॥*॥ विवस्वतोऽपत्यम् 'तस्यापत्यम्' (४।१।९२) इत्यण् ॥ (१३) ॥*॥ अन्तं करोति=अन्तयति । 'तत्करोति–' (वा० ३।१।२६) इति ण्यन्ताद् ण्वुल् (३।१।१३३) ॥ (१४) ॥*॥ '**यमस्य**' चतुर्दश ॥

राक्षसः कौणपः क्रव्यात्क्रव्यादोऽस्रप आशरः ॥५९॥
रात्रिंचरो रात्रिचरः कर्बुरो निकषात्मजः ।
यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी ॥ ६० ॥

(**राक्षस इत्यादि** ॥) रक्षत्यस्मात् । 'रक्ष पालने' (भ्वा० प० से०) असुन् (उ० ४।१८९) प्रज्ञाद्यणि (५।४।३८) राक्षसः 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपि' (प० ५।३।६८) इति पुंस्त्वम् । ('**राक्षसो** यातुधाने स्याच्चण्डायां **राक्षसी** स्मृता') ॥ (१) ॥*॥ कुणपं शवं भक्षयितुं शीलमस्य । 'शीलम्' (४।४।६१) इत्यण् । कोणं पाति । 'आतः'– (३।२।३) इति कः । कोणपस्य निर्ऋतेरयम्–कौणपः । 'तस्येदम्' (४।३।१२०) इत्यण् ॥ (२) ॥*॥ क्रव्यममांसमत्ति । 'क्रव्ये च' (३।२।६९) इति विट् । 'अदोऽनन्ने' (३।२।६८) इत्येव सिद्धेऽण् (३।२।१) बाधनार्थमिदम् । तेनाममांसभक्षके 'क्रव्यादः' इति न भवत्येव । ('**क्रव्यान्मांसाशिरक्षसोः**') ॥ (३) ॥*॥ कृत्तं छिन्नं तदेव पुनर्विशेषतः कृतं पक्वं च भुङ्क्ते इति क्रव्यादः । 'कृत्तविकृतपक्वशब्दस्य पृषोदरादित्वात् (६।३।१०९) क्रव्यादेशः' (३।२।६९) इति काशिका । शब्दार्णवेऽपि कृद्ध्यायेः—'सदान्नादकणादौ च स्यात्क्रव्यादाममांसभुक् । क्रव्यादः कृत्तविकृतपक्वमांसभुगुच्यते' इत्युक्तेः । तस्माद्योगार्थस्य व्यवस्थितत्वेऽपि गौण्या उभयोः सामान्येन प्रयोगः ॥ (४) ॥*॥ असृक् रक्तं पिबति । 'आतोऽनुप–' (३।२।३) इति कः । नतु टक् (३।२।८) 'पिबतेः सुराशीध्वोः' (वा० ३।२।८) इति वचनात् । दन्त्यसवान् । ('**असृपा** तु जलौकायां डाकिन्यां राक्षसे तु ना') ॥*॥ न श्रपयति क्रव्यात्त्वात् **अश्रपः** । पचाद्यच् (३।१।१३४) तालव्यशवान् ॥ (५) ॥*॥ आशृणाति । 'शॄ हिंसायाम्' (क्र्या० प० से०) पच्याद्यच् (३।१।१३४) ॥*॥ '**आशिरः**' इति पाठे 'अशेर्णिच्च' (उ० १।५२) इति किरच् । '**आशिरो धनुषः शङ्कुः** क्रव्यादोऽस्रप आशरः' इति संसारावर्तः । ('**आशिरोऽर्के** राक्षसेऽग्नौ') ॥ (६) ॥*॥ रात्रौ चरति । 'चरेष्टः' (३।२।१६) । 'रात्रेः कृति विभाषा–' (६।३।७२) इति पक्षे मुम् ॥ (७) ॥*॥ (८) ॥*॥ कुर्बुरो वर्णेन । यद्वा—कर्वति । 'कर्व हिंसायाम्' (भ्वा० प० से०) 'मद्गुरादयश्च' (उ० १।४१) इति कुरच् । ('**कर्बुरं** सलिले हेम्नि **कर्बुरः** पापरक्षसोः । **कर्बुरा** कृष्णवृन्तायां शबले पुनरन्यवत्') ॥*॥ '**कर्वरः**' इति पाठान्तरम् । 'नैर्ऋतः **कर्वरः** क्रव्यात् कर्बुरो यातुरक्षसी' इति शब्दार्णवः । 'कॄ हिंसायाम्' (क्र्या० उ० से०) । कृणाति । 'कॄगॄशॄवृचतिभ्यः ष्वरच्' (उ० २।१२१) ॥ (९) ॥*॥ निकषाया आत्मजः । मूर्धन्यः षः ॥ (१०) ॥*॥ यातूनि रक्षांसि दधाति पुष्णाति स्वजातिपोषकत्वात् । धात्वो 'बहुलमन्यत्रापि' (उ० २।७८) इति युच् । 'कृत्यल्युटः–' (३।३।११३) इति ल्युट् वा । यातूनि यातनाः धीयन्तेऽस्मिन्निति वा । ल्युट् (३।३।११७) । अन्तस्थादिः ॥*॥ जातु कदाचित् धानं संनिधानमस्येति (**जातुधानः**) चवर्गादिरपि ॥ (११) ॥*॥ विरुद्धलक्षणया पुण्यश्चासौ जनश्च । ('अथ **पुण्यजनो** यक्षे राक्षसे सज्जनेऽपि च') ॥ (१२) ॥*॥ निर्ऋतेरपत्यम् ॥ (१३) ॥*॥ याति । 'कमिमनिजनिगाभायाहिभ्यश्च' (उ० १।७३) इति तुः । अर्धर्चादिः (ग० २।४।३१) ॥ (१४) ॥*॥ रक्षन्त्यस्मात् । असुन् (उ० ४।१८९) 'भीमादयोऽपादाने' (३।४।७४) ॥ (१५) ॥*॥ पञ्चदश '**राक्षसस्य**' ॥

प्रचेता वरुणः पाशी यादसांपतिरप्पतिः ।

(**प्रचेता इत्यादि** ॥) प्रचेतयति । प्रकृष्टं चेतोऽस्येति वा । 'चिती संज्ञाने' (भ्वा० प० से०) । असुन् (उ० ४।१८९) । '**प्रचेताः** पाशिनि मुनौ ना प्रकृष्टहृदि त्रिषु' ॥ (१) ॥*॥ व्रियते वृणोति वा । 'वृञ् वरणे' (स्वा० उ० से०) । 'कृवृदारिभ्य उनन्' (उ० ३।५३) । '**वरुण**स्तरुभेदेऽप्सु प्रतीचीपतिसूर्ययोः' ॥*॥ युचि (उ० २।७४) '**वरणः**' अपि । 'वरं वृणन्ति तं देवा वरदश्च वरार्थिनाम् । धातुर्वै वरणे प्रोक्तस्तस्मात्स **वरणः** स्मृतः' इति साम्बपुराणम् ॥ (२) ॥*॥ पाशोऽस्यास्ति । इनिः (५।२।११५) । '**पाशी** पाशधरेऽप्पतौ' इति विश्वः ॥ (३) ॥*॥ यादसां पतिः । 'तत्पुरुषे कृति–' (६।३।१४) इत्यलुक् । ('**यादसांपतिरम्भोधौ** पश्चिमाशापतावपि') ॥*॥ लुकि तु '**यादःपतिः**' अपि ॥ (४) ॥*॥ अपां पतिः ॥*॥ लुकि[2] '**अप्पतिः**' अपि ॥ (५) ॥*॥ पञ्च '**वरुणस्य**' ॥

श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ॥ ६१ ॥
पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः ।
समीरमारुतमरुज्जगत्प्राणसमीरणाः ॥ ६२ ॥
नभस्वद्वातपवनपवमानप्रभञ्जनाः ।

(**श्वसन इत्यादि** ॥) श्वसित्यनेन । 'श्वस प्राणने' (अ०

१—'पाशिनिपुणे पुंसि कृष्णे च वाच्यवत्' इति पुस्तकान्तरे ॥ २—अलुकि 'अपांपतिः' इत्यपि—मुकुटोक्तमेव युक्तम् । लुकि तु यादःपतिरपीत्यत्रापिना यादसांपतिरित्यस्य मूलकृत्संमतत्वेन अपांपतिरित्यस्य मूले छन्दोनुरोधादपाठात् ॥

प० से०) ल्युट् (३।३।११७) । (**'श्वसनं** श्वसिते पुंसि मारुते मदनद्रुमे') ॥ (१) ॥*॥ **स्पृशति** । 'स्पृश स्पर्शने' (तु० प० अ०) । 'बहुलमन्यत्रापि' (उ० २।७८) इति युच् । **'स्पर्शनो** मारुते स्पर्शदानयोः **स्पर्शनं** मतम्' इति विश्वः ॥ (२) ॥*॥ वाति । 'वा गतिगन्धनयोः' (अ० प० अ०) । 'कृवापाजि–' (उ० १।१) इत्युण् । 'आतो युक्' (७।३।३३) इति 'युक्' ॥ (३) ॥*॥ 'मातरि' इति सप्तम्यन्तप्रतिरूपकम् । मातरि अन्तरिक्षे श्वयति संचरति । 'टुओश्वि गतिवृद्ध्योः' (भ्वा० प० से०) । यद्वा मातरि जनन्यां श्वयति वर्धते सप्तसप्तकरूपत्वात् । 'श्वन्नुक्षन्–' (उ० १।१५९) इति निपातनात्सप्तम्या अलुक् ॥ (४) ॥*॥ सदा गतिरस्य (**'सदागतिर्नाकिवातनिर्वाणेषु सदीश्वरे**') ॥ (५) ॥*॥ पृषद् मृगभेदोऽश्वो वाहनमस्य । पृषतामम्बुकणानामश्व इवेति वा । यत्तु—पृषन्त्यम्बुकणा अश्वोऽस्य–इति मुकुटः । तन्न । वाह्यवाहकभावस्य विपरीतत्वात् ॥ (६) ॥*॥ वहति । पचाद्यच् (३।१।१३४)॥ गन्धस्य वहः । यत्तु—गन्धस्य वहः–इति विगृह्य 'अकारादनुपपदात्सोपपदो भवति विप्रतिषेधेन' (वा० ३।२।१) इत्यस्य प्रायिकत्वात् पचाद्यच् (३।१।१३४)–इति मुकुटः । तन्न । प्रायिकत्वकल्पनाया निर्मूलत्वात् । उपपदाविवक्षायामचः (३।१।१३४) सिद्धत्वाच्च ॥ (७) ॥*॥ गन्धं वहति । 'कर्मण्यण्' (३।२।१) (**'गन्धवाहो** मृगेऽनिले । **गन्धवाहा** तु नासायाम्') ॥ (८) ॥*॥ अनित्यनेन । 'सलिकल्यनि–' (उ० १।५४) इति इलच् । (**'अनिलो** वसुवातयोः') ॥ (९) ॥*॥ आशु गच्छति । 'अन्यत्रापि–' (वा० ३।२।४८) इति डः । (**'आशुगोऽर्के** शरे वायौ') ॥ (१०) ॥*॥ सम्यग् इतैं गच्छति, ईरयति प्रेरयति वा । 'ईर गतौ' (अ० आ० से०) । अच् (३।१।१३४) ॥ (११) ॥*॥ युचि (३।२।१४८) तु समीरणः । (**'समीरणः** स्यात्पवने पथिके च फणिज्जके') ॥ (१५) ॥*॥ त्रियन्तेऽनेन वृद्धेन विना वा । मरुत् । 'मृग्रोरुतिः' (उ० १।९४) । (**'मरुद्देवे** समीरे ना ग्रन्थिपर्णे नपुंसकम्') ॥ (१३) ॥*॥ ततः प्रज्ञाद्यण् (५।४।३८) ॥*॥ **मरुतश**ब्दोऽपि बोध्यः । **'मरुतः** स्पर्शनः **प्राणः** समीरो मारुतो मरुत्' इति विक्रमादित्यकोशात् । **'मारुतः** श्वसनः **प्राणः** समीरो **मारुतो मरुत्'** इति संसारावर्ताच्च । ॥ (१२) ॥ अतएव जगत्प्राणौ पृथगपि । **'जगत्** स्याद्विष्टपे क्लीबं वायौ ना जङ्गमे त्रिषु' इति रुद्रकोषः । **'जगदाख्या** स्मृता वाते विष्टपे जङ्गमेऽपि च । **जगती** भुवने ख्याता छन्दोभेदे जलेऽपि च' इति विश्वः । तत्र 'द्युतिगमिजुहोतीनां द्वे च' (वा० ३।२।१७८) इति क्विपि द्वित्वे 'गमः क्वौ' (६।४।४०) इति मलोपे तुकि जगत्, जगतौ ॥*॥ यदा तु 'वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च' (उ० २।८४) इति व्युत्पाद्यते, तदा 'उगिदचाम्–' (७।१।७०) इति नुम् । जगत्, जगन्तौ ॥*॥ यत्तु—मुकुटः 'यदा वर्तमाने पृषद्बृहन्महज्जगच्छतृवद् इत्येतन्नास्ति'–इत्यवोचत् । तन्न । उणादिसूत्रस्यासत्त्वे मानाभावात् । उगित्कार्यार्थत्वाच्च ॥*॥ एकत्वे तु जगतां प्राणः ॥ (१४) ॥*॥ नभोऽस्याश्रयत्वेनास्ति । मतुप (५।२।९४) 'तसौ मत्वर्थे' (१।४।१९) इति भत्वाद्वुत्वाभावः ॥ (१६) ॥*॥ वाति । 'हसिमृग्रिण्–' (उ० ३।८६) इति तन् ॥*॥ 'क्तिच्क्तौ च संज्ञायाम्' (३।३।१७४) इति क्तिचि **'वातिः'** अपि । 'वायुर्मरुत्वान्श्वसनः पवनो मरुतोऽनिलः । नभस्वान् **क्षिपणुर्वातिः शुषिणो नैर्ऋटो वहः**' इति साहसाङ्कः ॥ (१७) ॥*॥ पुनाति । 'बहुलमन्यत्रापि' (उ० २।७८) इति युच् (**'पवनं** कुम्भकारस्य पाकस्थाने नपुंसकम् । निष्पावमरुतोः पुंसि') ॥ (१८) ॥*॥ पवते । 'पूङ्यजोः शानन्' (३।२।१२८) । 'आने मुक्' (७।२।८२) ॥ (१९) ॥*॥ प्रकृष्टं भनक्ति । 'भञ्जो आमर्दने' (स्वा० प० अ०) युच् (उ० २।७८) ॥ (२०) ॥*॥ विंशतिः **'वातस्य'** ॥

प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ॥ ६३ ॥

शरीरस्था इमे

(**प्राण इति** ॥) प्रसरणेन, अपसरणेन, समन्तात्, ऊर्ध्वेन व्याप्त्या च अनित्यनेन । 'हलश्च' (३।३।१२१) इति घञ्–इति मुकुटः । अन्ये तु—प्राणयति, अपानयति, समन्तादानयति । आनयतेः । (ण्यन्तात् 'अन प्राणने' (अ० प० से०) इत्यस्मात्) डः (वा० ३।२।१०१) अच् (३।१।१३४) वा–इत्याहुः । इमे प्राणादयः शरीरस्था वायवः । तत्र 'हृदि प्राणो, गुदेऽपानः, समानो नाभिसंस्थितः । उदानः कण्ठदेशे स्याद्, व्यानः सर्वशरीरगः । अन्नप्रवेशनं मूत्राद्युत्सर्गोऽन्नविपाचनम् । भाषणादिनिमेषादि तद्व्यापाराः क्रमादमी । प्राणः' इत्यत्र 'अनितेः' (८।४।१९) इति णत्वम् । **'प्राणो** हृन्मारुते बोले काव्यजीवेऽनिले बले । पुंलिङ्गः, पूरिते वाच्यलिङ्गः, पुंभूम्नि चासुषु' ।(**'अपानं** तु गुदे क्लीबं, पुंसि स्यात्तस्य मारुते') । **'उदानोऽप्युदरावर्ते** वायुभेदे भुजंगमे' । (**'समानं** सत्समैकेषु त्रिषु, ना नाभिमारुते') ॥ प्रत्येकं **'देहस्थपञ्चवायूनाम्'** ॥

रंहस्तरसी तु रयः स्यदः ।

जवः

(**रंह इत्यादि** ॥) रमतेऽनेन । 'रमेर्हुक्च' (उ०४।२१४) इत्यसुन् हुगागमश्च । रंहत्यनेन वा । 'रहि गतौ' (भ्वा० प० से०) । असुन् (उ० ४।१८९) ॥ (१) ॥*॥ तरन्त्यनेन । 'तॄ प्लवनतरणयोः' (भ्वा० प० से०) असुन् (उ० ४।१८९)

१—भाष्ये तु कर्मोपपद इति पाठो दृश्यते ॥

१ वायुर्हि नभःस्वामी । तथा च वायुपुराणम्—'शब्दाकाशबलानां च वायुरीशस्तथा कृतः' इति मुकुटः ॥ २—'नशब्दः स्वागते बन्धौ वृक्षे सूर्ये च कीर्तितः' इति कोशतः नान् वृक्षान् घटयति चेष्टयते नघटः ।

॥ (२) ॥*॥रिणात्यनेन । 'री गतिरेषणयोः' (क्रया० प० अ०) । 'एरच्' (३।३।५६) । रयः–इति स्वामिमुकुटौ । तन्न । करणे ल्युटो बाधकस्य सत्त्वात् । तस्मात् 'पुंसि–' (३।३।११८) इति घः । रयतेऽनेन वा । 'रय गतौ' (भ्वा० आ० से०) 'पुंसि–' (३।३।११८) इति घः । 'हलश्च' (३।३।१२१) इति घञि तु संज्ञापूर्वकत्वाद्वृद्ध्यभावः ॥ (३) ॥*॥ स्यन्दतेऽनेन । 'स्यदो जवे' (६।४।२८) इति घञन्तो निपातितः ॥ (४) ॥*॥ 'जु' इति सौत्रो (३।२।१५०) धातुः । जवनम् । 'ऋदोरप्' (३।३।५७) । चवर्गादिः । (**'जवो** वेगवति त्रिषु । पुंलिङ्गस्तु भवेद्वेगे चौण्ड्रपुष्पे **जवा** स्मृता') ॥ (५) ॥*॥ इति मुकुटः । वस्तुतस्तु रंहआदिष्वपि भावव्युत्पत्तिरेव न्याय्या ॥ पञ्च **'वेगस्य'** ॥

अथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ॥ ६४ ॥
सत्वरं चपलं तूर्णमविलम्बितमाशु च ।

(**अथेति** ॥) रंहआदयः सवेगगतिवचनाः । शीघ्रादयस्तु धर्मवचना एव । अतएव 'शीघ्रं पचति' इति प्रयोगः, न तु 'जवं पचति' इति–इति वदन्ति । वस्तुतस्तु रंहःप्रभृतयो वेगाख्यगुणपराः, शीघ्रादयस्तु कालाल्पत्वपराः–इति । शिङ्क्ते व्याप्नोति । 'शिघि आघ्राणे' (भ्वा०प०से०) । 'शीघ्रादयश्च' (?) इति रगन्तो निपातितः । (**'शीघ्रं** नलदे चक्राङ्गे क्लीबं द्रुतगतौ त्रिषु') ॥ (१) ॥*॥ त्वरते स्म । 'जित्वरा संभ्रमे' (भ्वा०प०से०) । 'गत्यर्थाकर्मक–' (३।४।७२) इति कर्तरि क्तः । 'रुग्यमत्वरसंघुषास्वनाम्' (७।२।२८) इति वेट् । (**'त्वरितं** वेगतद्वतोः') ॥ (२) ॥*॥ इडभावे **तूर्णम्** । 'ज्वरत्वर–' (६।४।२०) इत्यूठ् । 'रदाभ्याम्–' (८।२।४२) इति नत्वम् । 'षाभ्याम्–' (८।४।१) इति णत्वम् ॥ (९) ॥*॥ 'लघि गतौ' (भ्वा० आ० से०) लङ्घते । 'लङ्घिबंह्योर्नलोपश्च' (उ० १।२९) इति कुः, नलोपश्च ।—'लघि शोषणे' (भ्वा० प० से०)–इति तु मुकुटस्य प्रमादः । (**'लघुरगुरौ** च मनोज्ञे निःसारे वाच्यवत्क्लीबम् । शीघ्रे च कृष्णागुरुणि स्पृक्कानामौषधौ तु स्त्री') ॥*॥ ('वालमूललघ्वलमङ्गुलीनां वा लो रमापद्यते') (वा० ८।२।१८) इति रत्वपक्षे **'रघु'** इत्यपि । 'वरुणस्य रघुस्यदः' इति प्रयोगात् ॥ (३) ॥*॥ क्षिपति । 'क्षिप प्रेरणे' (तु० उ० अ०) । 'स्फायितञ्चि–' (उ० २।१३) इति रक् ॥ (४) ॥*॥ ऋच्छति, इयर्ति वा । 'ऋ गतौ' (भ्वा०, जु० प० अ०) । पचाद्यच् (३।१।१३४) । **'अरमङ्गे** रथाङ्गस्य शीघ्रशीघ्रगयोरपि' इति शाश्वतः । 'अलम्' इत्यव्ययस्य 'वालमूल–' (वा० ८।२।१८) इत्यादिना रेफपक्षे तु 'अरम्' इत्यव्ययमपि ।—अप् (३।३।५७) बाहुलकात् क्लीबत्वम्–इति मुकुटस्य प्रमादः । बाहुलकस्यागतिकगतित्वात् । अत्र तूक्तगतेः सत्त्वात् । एतेन स्वाम्युक्तिरपि परास्ता ॥ (५) ॥*॥ द्रवति स्म । 'द्रु गतौ' (भ्वा० प० अ०) । 'गत्यर्था–' (३।४।७२) इति कर्तरि क्तः । ('अथ **द्रुतं** त्रिषु । शीघ्रे विलीने विद्राणे') । यत्तु—भावे क्तः–इति मुकुटेनोक्तम् । तन्न । त्वरितमित्यादावपि तथात्वप्रसङ्गात् । वैषम्ये बीजाभावात् । एतेन 'लङ्घयते' इति कर्मव्युत्पत्तिरपि परास्ता ॥ (६) ॥*॥ सह त्वरया वर्तते ॥ (७) ॥*॥ चोपति । 'चुप मन्दायां गतौ' (भ्वा० प० से०) । 'चुपेरचोपधायाः' (उ० १।१११) इति कलः प्रत्ययः । (**'चपलः** पारदे मीने चोरके प्रस्तरान्तरे । **चपला** कमला विद्युत्पुंश्चलीपिप्पलीषु च ॥ नपुंसकं तु शीघ्रे स्याद्वाच्यवत्तरले चले') ॥ (८) ॥*॥ विलम्बते स्म । 'लबि अवस्रंसने' (भ्वा० आ० से०) । अकर्मकत्वात् (३।४।७२) कर्तरि क्तः । नञ्समासः ।—भावे क्त–इति मुकुटस्तु पूर्ववत् ॥ (१०) ॥*॥ अश्नुते । 'अशू व्याप्तौ' (स्वा०आ०से०) । 'कृवापाजि–' (उ० १।१) इत्युण् । **'आशुस्तु** व्रीहिशीघ्रयोः' ॥ (११) ॥*॥ एकादश **'शीघ्रस्य'** ॥

सततानारताश्रान्तसंतताविरतानिशम् ॥ ६५ ॥
नित्यानवरताजस्रमपि

(**सततेत्यादि** ॥) संतन्यते स्म । 'तनु विस्तारे' (त० उ० से०) । क्तः (३।४।७२) । 'अनुदात्तोपदेश–' (६।४।३७) इति नलोपः । 'समो वा हिततत्तयोः' (वा० ६।१।१४४) इति वा समो मलोपः ॥ (१) ॥*॥ पक्षे संततम् ॥ (४) ॥*॥ आङ्पूर्वो रमिर्विरामे । अविद्यमानमारतं यस्मिन् ॥ (२) ॥*॥ 'श्रमु तपसि खेदे च' (दि० प० से०) । भावे क्तः (३।३।११४) 'अनुनासिकस्य–' (६।४।१५) इति दीर्घः । अविद्यमानं श्रान्तमत्र ॥ (३) ॥*॥ नास्ति विरतमस्य ॥ (५) ॥*॥ निशाव्यापारराहित्यमुपचारात् । नास्ति निशास्मिन् ॥ (६) ॥*॥ नियमेन भवम् । 'त्यब् नेर्ध्रुवे' (वा० ४।२।१०४) (**'नित्यं** स्यात्संततेऽपि च । शाश्वते त्रिषु') ॥ (७) ॥*॥ नास्त्यवरतं यत्र ॥ (८) ॥*॥ न जस्यति । 'जसु मोक्षणे' (दि०प०से०) । 'नमिकम्पि–' (३।२।१५७) इति रः ॥*॥ सततम्, अजस्रम्, शब्दावव्ययावपि नित्यपर्यायौ स्तः । **'शश्वदभीक्ष्णं नित्यं सदा** सततमजस्रमिति सातत्ये' इत्यव्ययप्रकरणे आपिशलेः ॥ (९) ॥*॥ नव **'निरन्तरस्य'** ॥

अथातिशयो भरः ।

अतित्वेल-भृशात्यर्थातिमात्रोद्गाढ-निर्भरम् ॥ ६६ ॥
तीव्रैकान्त-नितान्तानि गाढ-बाढ-दृढानि च ।

(**अथेति** ॥) सततं क्रियान्तरैरव्यवधानम्, अतिशयस्तु पौनःपुन्यम्, इति भेदः । अतिशेते । पचाद्यच् (३।१।१३४) यद्वा अतिशयनम् । 'एरच्' (३।३।५६) भावे ।—अतिशेतेऽभिभवत्यनेन । अतिपूर्वाच्छीङः 'एरच्' (३।३।५६) इति मुकुटः । तन्न । ल्युट्प्रसङ्गात् । 'भरः पूर्णता' इति स्वव्याख्यानविरोधाच्च ॥ (१) ॥*॥—'भृ भर्त्सने' (क्रया०

१—भावे क्तः (३।३।११४) इति मुकुटः ॥ २—निरन्तरक्रियाकरणस्येति मुकुटः ॥

प० से०) । करणे 'ऋदोरप्' (३।३।५७)–इति स्वामिमुकुटौ । तन्न । ल्युटा बाधप्रसङ्गात् । भरति । 'भृ भरणे' (भ्वा० उ० अ०) । पचाद्यच् (३।१।१३४) । यद्वा–'भरणम् । 'पुंसि–' (३।३।११८) इति घः, अप् (३।३।४५) वा ॥ (२) ॥*॥ उपसर्गान्तरनिवृत्त्यर्थं 'निर्भरः' इत्युक्तम् ॥*॥ अतिक्रान्तं वेलां मर्यादाम् । 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' (वा० २।२।१८) इति समासः ॥ (३) ॥*॥ भृंशते । 'भृशु भ्रंशु अधःपतने' (?) अन्तर्भावितण्यर्थात् 'इगुपध–' (३।१।१३५) इति कः । भृशम् ॥ (४) ॥*॥ अर्थो निवृत्तिर्विषयो वा, तमतिक्रान्तम् अत्यर्थम् ॥ (५) ॥*॥ मात्रा स्तोकम्, तामतिक्रान्तम् । 'गोस्त्रियोः–' (१।२।४८) इति ह्रस्वः ॥ (६) ॥*॥ उद्गाहते स्म । 'गाहू विलोडने' (भ्वा० आ० से०) । क्तः (३।४।७२) ॥ (७) ॥*॥ निःशेषेण भरोऽत्र ॥ (८) ॥*॥ तीवति । 'तीव स्थौल्ये' (भ्वा०प०से० । दन्त्योष्ठ्यान्तः) । बाहुलकाद् रक् (उ०) ॥ (९) ॥*॥ एकोऽन्तो निश्चयोऽत्रेति ॥ (१०) ॥*॥ नितामयति स्म । 'तमु काङ्क्षायाम्' (दि० प० से०) । अकर्मकत्वात् कर्तरि क्तः (३।४।७२) । 'अनुनासिकस्य–' (६।४।१५) इति दीर्घः ॥ (११) ॥*॥ गाढमुद्गाढवत् ॥ (१२) ॥*॥ 'बाह प्रयत्ने' (भ्वा० आ० से०) । 'क्षुब्धस्वान्त–' (७।२।१८) इति निपातितम् । (**'बाढं** भृशप्रतिज्ञयोः') ॥ (१३) ॥*॥ 'दह दृहि वृद्धौ' (भ्वा० प० से०) । 'दृढः स्थूलबलयोः' (७।२।२७) इति निपातितम् । (**'दृढः** स्थूले भृशे शक्ते') ॥ (१४) ॥*॥ चतुर्दश **'अतिशयस्य'** ॥

क्लीबे शीघ्राद्यसत्त्वे स्यात्त्रिष्वेषां सत्त्वगामि यत् ६७

(**क्लीब इति** ॥) शीघ्रादिदृढपर्यन्तं क्रियाविशेषणत्वाद्द्रव्ये वर्तमानं क्लीबे स्यात् । यथा शीघ्रं जुहोति, सततं भुङ्क्ते । एषां मध्ये यत् सत्त्वगामि द्रव्यगामि तत् त्रिषु वाच्यलिङ्गम् इत्यर्थः । शीघ्रा जरा, शीघ्रो मृत्युः, **शीघ्रं** वयः, इत्यादि । अतिशयभरयोरसत्त्ववचनत्वेऽपि पुंस्त्वमेव । पुंलिङ्गेन निर्देशात् । 'गाढैकान्तिनितान्तानि पुमानतिशयो भरः' इति रभसाच्च । 'अतिशयं पचति' इति प्रयोगस्तु क्रियाविशेषणत्वात्कर्मत्वेन **द्वितीयया** । क्लीबता तु न, नियतलिङ्गत्वात् । शीघ्रादीनामनियतलिङ्गानां हि क्रियाविशेषणत्वे क्लीबता, न तु नियतलिङ्गानाम् । क्वचिद् **'मेद्यगामि'** इति पाठः तस्य विशेष्यगामीत्यर्थः ॥

कुबेरस्त्र्यम्बकसखो यक्षराड्गुह्यकेश्वरः ।
मनुष्यधर्मा धनदो राजराजो धनाधिपः ॥ ६८ ॥
किंनरेशो वैश्रवणः पौलस्त्यो नरवाहनः ।
यक्षैकपिङ्गैडविडश्रीदपुण्यजनेश्वराः ॥ ६९ ॥

(कुबेर इत्यादि ॥) कुत्सितं बेरं शरीरमस्य । कुष्ठित्वात् । कुत्सायां क्विपि शब्दोऽयं शरीरं बेरमुच्यते । 'कुबेरः कुशरीरत्वान्नाम्ना तेनैव सोऽङ्कितः' इति वायुपुराणम् । यद्वा—कुम्बति धनम् । 'कुबि आच्छादने' (भ्वा० प० से०) । 'कुम्बेर्नलोपश्च' (उ० १।५९) इत्येरक् ॥ (१) ॥*॥ त्र्यम्बकस्य सखा । 'राजा–' (५।४।९१) इति टच् ॥ (२) ॥*॥ यक्षेषु राजते । 'सत्सू–' (३।२।६१) इति क्विप् ॥ (३) ॥*॥ गुह्यं कायति । 'आतोऽनुप–' (३।२।३) इति कः । गुह्यकानामीश्वरः ॥ (४) ॥*॥ मनुष्यस्येव धर्म आचारः श्मश्रुलत्वादिर्वास्य । 'धर्मादनिच् केवलात्' (५।४।१२४) ॥ (५) ॥*॥ धनं दयते । 'दैङ् पालने' (भ्वा० आ० अ०) 'आतः' (३।२।४) इति कः ॥ (६) ॥*॥ राज्ञां यक्षाणां राजा । 'राजा–' (५।४।९१) इति टच् । 'यक्षे चन्द्रे च **राजा** स्यात्' इति त्रिकाण्डशेषः ॥ (७) ॥*॥ धनानामधिपः ॥ (८) ॥*॥ किंनराणामीशः ॥ (९) ॥*॥ विश्रवसोऽपत्यम् । शिवादिषु (४।१।११२) विश्रवसो विश्रवणरवणावादेशौ निपातितौ अण् च ॥ (१०) ॥*॥ पुलस्तेर्गोत्रापत्यम् । 'गर्गादिभ्यो यञ्' (४।१।१०५) बहुत्वे पुलस्त्यः ।—अपत्यं गोत्रं वा–इति मुकुटः । तन्न । अनन्तरापत्ये यञोऽसंभवात् ॥ (११) ॥*॥ नरो वाहनमस्य । क्षुभ्नादित्वात् (८।४।३९) न णत्वम् ॥ (१२) ॥*॥ ईं लक्ष्मीमक्ष्णोति व्याप्नोति । 'अक्षू व्याप्तौ' (भ्वा० प० से०) 'कर्मण्यण्' (३।२।१) । यक्ष्यते । 'यक्ष पूजायाम्' (चु० आ० से०) । 'अकर्तरि–' (३।३।१९) इति घञ् 'पुंसि–' (३।३।११८) इति घो वा । यजति शिवम् । इज्यते लोकेन वा । बाहुलकात्सो वा ॥ (१३) ॥*॥ सासूयं गौरीनिरीक्षणे वामे चक्षुषि रुद्रानुनयात्पिङ्गतामगात् । अत एकं पिङ्गमस्य ॥ (१४) ॥*॥ इडविडोऽपत्यम् । 'तस्यापत्यम्' (४।१।९२) इत्यण् ॥*॥ डलयोरेकत्वस्मरणाद् **'एलविलः'** अपि । इलविलाया अपत्यमिति वा विग्रहः । तत्र 'अवृद्धाभ्यो नदीमानुषी–' (४।१।११३) इत्यञ् । इडविलास्ति मातृत्वेनास्य । ज्योत्स्नादित्वात् (वा० ५।२।१०३) अण् इति वा ॥ (१५) ॥*॥ श्रियं दयते, ददाति, वा ॥ (१६) ॥*॥ पुण्यजननामीश्वरः ॥ (१७) ॥*॥ सप्तदश **'कुबेरस्य'** ॥

अस्योद्यानं चैत्ररथम्

(अस्येति ॥) उद्यान्ति अस्मिन् । 'या प्रापणे' (अ० प०

१—भृद्दयतीति युक्तम्, अस्य दिवादिष्वेवोपलभ्यमानत्वात् ॥ २—जवादीनां शीघ्रादीनां चापरं भेदमाह । क्लीब इत्यादि । कलिङ्गस्त्वाह—तत्र सत्त्वगामिनः शीघ्रपर्यायाः आशुशब्दरहिताः सततपर्यायाः अनिशाजस्रशब्दरहिताः, अतिशयपर्यायाः अतिशयभररहिताः, इति ॥ तत्राशुशब्दवर्जनमसम्यक् । तथा च—कालिदासः—'मेरुमेत्य मरुदाशुवाहनः' इति । अत आशुशब्दोऽपि त्रिष्वित्यन्ये । एवम् अनिशशब्दस्यापि त्रिलिङ्गतां कोऽपि मन्यते इति सर्वधरः–इत्यपि मुकुटः ॥

१—'इलविला पुलस्तिभार्या'–इति मुकुटः ॥

से०)। ल्युट् (३।३।११७) ॥*॥ चित्ररथेन निर्वृत्तम् 'तेन निर्वृत्तम्–' (४।२।६८) ॥ इत्यण् ॥ (१) ॥*॥ एकम् **'कुबेराक्रीडस्य'** ॥

पुत्रस्तु नलकूवरः ।

(पुत्रस्त्विति ॥) नलः कूवरो युगंधरो यस्य । त्रिकाण्डशेषे तु–'पुत्रौ तु नलकूवरौ' इत्युक्तम् । तत्तु 'नासत्यौ' इतिवदौपचारिकं बोध्यम् । नलकूवर-मणिग्रीवयोस्तत्पुत्रयोः पुराणप्रसिद्धत्वात् । 'नलकूवरमणिग्रीवाविति ख्यातौ श्रियान्वितौ' इति भागवतम् ॥ (१) ॥*॥ एकम् **'कुबेरपुत्रस्य'** ॥

कैलासः स्थानम्

(कैलास इति ॥) के जले लासो लसनमस्य । केलासः स्फटिकः । 'हलदन्तात्–' (६।३।९) इत्यलुक् । तस्यायं कैलासः । यद्वा केलीनां समूहः कैलम् । 'तस्य समूहः' (४।२।३७) इत्यण् । तेन आस्यतेऽत्र । 'आस उपवेशने' (अ० आ० से०)। 'हलश्च' (३।३।१२१) इति घञ् ॥ (१) ॥*॥ एकम् **'कुबेरस्थानस्य'** ॥

अलका पूः

(अलकेति ॥) अलति भूषयति । 'अल भूषणादिषु' (भ्वा० प० से०)। 'कुन् शिल्पिसंज्ञयोरपूर्वस्यापि' (उ० २।३२) इति कुन् । क्षिपकादित्वात् (वा० ७।३।४५) नेत्वम् । **'अलका** कुबेरपुर्यामस्त्रियां चूर्णकुन्तले' ॥ (१) ॥*॥ एकम् **'कुबेरपुर्याः'** ॥

विमानं तु पुष्पकम् ॥७०॥

(विमानमिति ॥) पुष्प्यति । 'पुष्प विकसने' (दि० प० से०)। कुन् (उ० २।३२)। पुष्पमिव वा । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् । 'विमानं तु पुष्पकोऽस्त्री नगरी खलका प्रभा' इति शब्दार्णवात् पुंस्त्वमपि । (**'पुष्पकं** रीतिपुष्पे च विमाने धनदस्य च । नेत्ररोगे तथा रत्नकङ्कणे च रसाञ्जने । लोहकांस्ये मृदङ्गारशकट्यां च नपुंसकम्') ॥ (१) ॥*॥ एकम् **'कुबेरविमानस्य'** ॥

स्यात्किंनरः किंपुरुषस्तुरंगवदनो मयुः ।

(स्यादिति ॥) किंचित् कुत्सितो वा नरः 'किं क्षेपे' (२।१।६४) इति समासः ॥ (१) ॥*॥ एवं किंपुरुषः । कुत्सा च कस्यचिन्नरमुखाश्वकायत्वात्, कस्यचिदश्वमुखनरशरीरत्वात् । 'अथ **किंपुरुषो** लोकभेदकिंनरयोः पुमान्' ॥ (२) ॥*॥ तुरंगस्येव वदनमस्य ॥ (३) ॥*॥ मिनोति । 'डुमिञ् प्रक्षेपणे' (स्वा० उ० अ०) । 'भृमृशीङ्–' (उ० १।७) इत्युः । 'मीनाति–' (६।१।५०) इत्यात्वं तु बाहुलकात्र । (**'मयुर्मृगाश्वमुखयोः'**) ॥ (४) ॥*॥ चत्वारि **'किंनरस्य'** ॥

निधिर्नो शेवधिः

(निधिरिति ॥) नितरां धीयते । धाञः (जु० उ० अ०) किः (३।३।९२) । नितरां दधाति पोषयत्यनेन । निधीयते वा । 'धि धारणे' (तु० प० अ०) । संपदादिः (वा० ३।३।१०८) । आगमशासनस्यानित्यत्वान्न तुक् ॥ (१) ॥*॥ शे कल्याणे मोहे वावधिः । 'तत्पुरुषे–' (६।३।१४) इत्यलुक् । यद्वा शेतेऽनेन शेवं सुखम् । 'इण्शीभ्यां वन्' (उ० १।१५२) । शेवं धीयतेऽस्मिन् । धाञः (जु० उ० अ०) 'कर्मण्यधिकरणे च' (३।३।९३) इति किः ॥ (२) ॥*॥ द्वे **'सामान्यनिधेः'** ॥

भेदाः पद्मशङ्खादयो निधेः ॥ ७१ ॥

(भेदा इति ॥) पद्मा लक्ष्मीरस्मिन्नस्ति । अर्शआद्यच् (५।२।१२७) ॥ (१) ॥*॥ शाम्यत्यम्बु दुःखं वा ध्मातेनानेन । 'शमेः खः' (उ० १।१०२) (**'शङ्खः** कम्बौ निधेर्भेदे स्यान्नख्यामलिकास्थनि । वलने दिनभागे च नागभेदे') ॥ (१) ॥*॥ **'पद्मोऽस्त्रियां महापद्मः शङ्खो मकर-कच्छपौ । मुकुन्द-कुन्द-नीलाश्च खर्वश्च निधयो नव'** इति शब्दार्णवः ॥ **'निधिविशेषस्य'** प्रत्येकम् ॥

इति स्वर्गवर्गविवरणम् ॥

द्यौर्दिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम् ।
नभोऽन्तरीक्षं गगनमनन्तं सुरवर्त्म खम् ॥ १ ॥
वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी ।

(द्यौदिवाविति ॥) न बिभर्ति किंचित् । मूलविभुजादित्वात् (वा० ३।२।५) कः । यद्वा—'आपो भ्रश्यन्त्यस्मात् । अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । यद्वा—अभ्रति स्थैर्यं गच्छति । अच् (३।१।१३४) । 'अभ्र वभ्र मभ्र चर गत्यर्थाः' (भ्वा० प० से०) । यद्वा—न भ्राजते । 'भ्राजृ दीप्तौ' (भ्वा० प० से०) 'अन्येभ्योऽपि–' (३।२।१०१) इति डः । **'अभ्रं** मेघे च गगने धातुभेदे च काञ्चने' ॥ (३) ॥*॥ व्ययति । 'व्येञ् संवरणे' । 'नामन्सीमन्–' (उ० ४।१५१) इत्यादिना मन्नन्तं निपातितम् । यद्वा व्यवति । विपूर्वादवतेर्मनिन् (३।२।७५) । 'ज्वरत्वर–' (६।४।२०) इत्यूठौ । सवर्णदीर्घः (६।१।१०१) । 'सार्वधातुका–' (७।३।८४) इति गुणः । (**'व्योम** वारिणि चाकाशे भास्करस्यार्चनाश्रये') ॥ (४) ॥*॥ पुष्यति । 'पुष पुष्टौ' (दि० प० अ०) । 'पुषः कित्' (उ० ४।४) इति करच् कित्त्वं च । पुष्कं वारि राति–इति स्वामी । **'पुष्करं** गगनपद्मवारिषु' । (**'पुष्करं** द्वीपतीर्थाहिखगरागौषधान्तरे । तूर्यास्येऽसिफले काण्डे शुण्डाग्रे') ॥ (५) ॥*॥ 'अवि शब्दे' (भ्वा० आ० से०)। भावे घञ् (३।३।१८) अम्बः शब्दः तं राति । अम्बरम् । (**'अम्बरं** न द्वयोर्व्योम्नि सुगन्ध्यन्तरवस्त्रयोः') ॥ (६) ॥*॥ नह्यते

१—अत्र पक्षे अभ्रशब्दे बसंयुक्तो भकार इति मुकुटः ॥

मेघैः। 'णह बन्धने' (दि० उ० अ०)। 'नहेर्दिवि भश्च' (उ० ४।२११) इत्यसुन् भश्चान्तादेशः। न बभस्तीति वा क्विप् (३।२।१७८)। नभते। 'णभ हिंसायाम्' (भ्वा० आ० से०)। असुन् (उ० ४।१८९)। सान्तम्। **'नभः** क्लीबं व्योम्नि पुमान् घने। घ्राणश्रावणवर्षासु बिसतन्तौ पतद्ग्रहे'। **'नभो** व्योम्नि **नभा** मेघे श्रावणे च पतद्ग्रहे। घ्राणे मृणालसूत्रे च वर्षासु च **नभाः** स्मृतः' इति विश्वः ॥*॥ 'अत्यविनमितमि–' (उ० ३।११७) इत्यसच्प्रत्यये तु नभसमदन्तमपि। नभसः पुंसि–इत्युणादिवृत्तौ। (**'नभस्तु** नदीपतौ। मगने प्रावृषि') ॥ (७) ॥*॥ द्यावापृथिव्योरन्तरीक्ष्यते। 'ईक्ष दर्शने' (भ्वा० आ० से०)। कर्मणि घञ् (३।३।१९)। वेदे तु छान्दसं ह्रस्वत्वम्। अन्तर् ऋक्षा (णि नक्षत्रा) ण्यस्य। पृषोदरादित्वात् (६।३।१०९) इत्वम्। अस्मिन् पक्षे **'अन्तरिक्षम्'** इति ह्रस्वमध्यः। अधिकरणव्युत्पत्तिस्तु नोचिता। ल्युटा घञो बाधप्रसङ्गात् ॥ (८) ॥*॥ गच्छन्त्यनेनास्मिन्वा। 'गमेर्गश्च' (उ० २।७७) इति युच् गश्चान्तादेशः ॥ (९) ॥*॥ नास्त्यन्तो यस्य। (**'अनन्तः** केशवे शेषे पुमाननवधौ त्रिषु। **अनन्ता** च विशल्यायां शमिवादूर्ध्वयोरपि ॥ कणा दुरालभापथ्यापार्वत्यामलकीषु च। विश्वंभरागुडूच्योः स्यादनन्तं सुरवर्त्मनि') ॥ (१०) ॥*॥ सुराणां वर्त्म ॥ (११) ॥*॥ खन्यते। 'खनु अवदारणे' (भ्वा० उ० से०)। डः (वा० ३।२।१०१) **'खं** खः संविदि व्योमनीन्द्रिये। शून्ये बिन्दौ मुखे खस्तु सूर्ये' इति हैमः। खर्वत्यस्मिन् वा। 'खर्ब गतौ' (भ्वा० प० से०)। डः (वा० ३।२।१०१) ॥ (१२) ॥*॥ वि विश्वत इति व्याप्नोति। इणः (अ० प० अ०) शतृ (३।२।१२४)। वियच्छति न विरमति वा। विपूर्वाद्यमेः (भ्वा० प० अ०) 'अन्येभ्योऽपि–' (३।२।७५) इति क्विप्। 'क्वौ च गमादीनाम्' (वा० ६।४।४०) इति मलोपे तुक् (६।१।७१) ॥ (१३) ॥*॥ विष्णोः पदम् आस्पदम् स्वरूपं वा। विष्णोः पदं क्रमोऽत्र–इति स्वामी। तन्न। व्यधिकरणबहुव्रीहिप्रसङ्गात्। (**'त्रिष्णुपदं** नभोऽब्जयोः। **विष्णुपदस्तु** क्षीरोदे **विष्णुपदी** सुरापगा। संक्रान्तिर्द्वारिका चापि') ॥ (१४) ॥*॥ आ समन्तात् काशन्ते सूर्योदयोऽत्र। 'काशृ दीप्तौ' (भ्वा० आ० से०)। 'हलश्च' (३।३।१२१) इति घञ् ॥ (१५) ॥*॥ विशेषेण हाययति गमयति विमानादीन्। 'हय गतौ' (भ्वा० द० से०)। ण्यन्तादसुन् (उ० ४।१८९)। विजहाति भुवं वा 'वहिहाधाञ्भ्यश्छन्दसि' (उ० ४।२२१) इत्यसुन्। णिदित्यस्यानुवृत्तेर्युक् (७।३।३३)।—विपूर्वाज्जहातेर्बाहुलकादसुन्–इति मुकुटः। तन्न। असुनो धातुमात्रात् (उ० ४।१८९) विहितत्वेन बाहुलकस्यानुपयोगात्। यकारस्याश्रवणप्रसङ्गाच्च ॥ (१६) ॥*॥ 'वा तु पुंसि–' इति तुशब्दादुत्तरान्वयि। तेन आकाशः, विहायाश्च। 'विदुर्विहायसं व्योम पक्षिणश्च विहायसः' इति शाश्वतः। **'विहायाः** शकुनौ पुंसि गगने पुंनपुंसकम्' ॥ षोडश **'आकाशस्य'** ॥

इति व्योमवर्गविवरणम् ॥

दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः।

(**दिश इति** ॥) दिशत्यवकाशम्। 'दिश अतिसर्जने' (तु० उ० अ०) क्विन् 'ऋत्विग्दृधृक्–' (३।२।५९) इत्यादिना निपातनात्। यत्तु—मुकुटः कर्मण्येव क्विन्, कर्तरि तु क्विबेव–इत्याह। तन्निर्मूलम्, आकरविरुद्धं च ॥*॥ भागुरिमतेन टापि **दिशा**। 'दिक् तु स्त्रियां **दिशा दान्ती** ककुब् **देवबधूः पत्निः**' इति शब्दार्णवः ॥ (१) ॥*॥ ककते। 'कक लौल्ये' (भ्वा० प० से०) बाहुलकादुभ् प्रत्ययः। यद्वा—कं वातं स्कुभ्नाति विस्तारयति। 'स्कुभु' इति सौत्राद्धातोः क्विप् (३।२।१७८)। पृषोदरादित्वात् (६।३।१०९) सलोपः। **'ककुप्** स्त्रियां प्रवेणीदिक्शोभासु चम्पकरञ्जि'।—केनादित्येन जलेन वा कुत्सितानि भानि नक्षत्राण्यत्रेति टाबन्तोऽपि इति कश्चित्। तन्न। व्यधिकरणबहुव्रीहिप्रसङ्गात् ॥ (२) ॥*॥ काशते। 'काशृ दीप्तौ' (भ्वा० आ० से०)। 'हनिकुचि–' (उ० २।२) इति वथन्। (**'काष्ठा** दारुहरिद्रायां कालमानप्रकर्षयोः। स्थानमात्रे दिशि च स्त्री दारुणि स्यान्नपुंसकम्') ॥ (३) ॥*॥ आ समन्ताद् अश्नुते व्याप्नोति। 'अशू व्याप्तौ' (स्वा० आ० से०)। अच् (३।१।१३४)। (**'आशा** तृष्णादिशोः स्त्रियाम्') ॥ (४) ॥*॥ हरन्ति नयन्त्यनया। 'हृसृरुहियुषिभ्य इतिः' (उ० १।९७)। 'हरिद्दिशि स्त्रियां पुंसि हयवर्णविशेषयोः। अस्त्रियां स्यात्तृणे' ॥ (५) ॥*॥ ता इत्यनेन स्त्रीत्वं व्यनक्ति। दिशां बहुत्वाद्बहुवचनम् ॥ पञ्च **'दिशः'** ॥

प्राच्यपाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः ॥ १ ॥
उत्तरा दिगुदीची स्यात्

(**प्राच्येति** ॥) प्राथम्ये प्रशब्दोऽत्र। प्राञ्चति प्राप्नोति सूर्यम्। 'अञ्चु गतिपूजनयोः' (भ्वा० प० से०)। 'ऋत्विग्–' (३।२।५९) इत्यादिना क्विन् प्रत्ययः। प्राञ्चति रविरस्याम्। बाहुलकादधिकरणे क्विन्–इति मुकुटः। तन्न। बाहुलकस्यागतिकगतित्वात्। एवमग्रेऽपि बोध्यम् ॥ (१) ॥*॥ अहो मध्येऽञ्चत्यस्याम्। अपाची। 'अप' इत्यव्ययं मध्यार्थेऽपदिशमितिवत्। अपाञ्चति सूर्यम्–इत्युचितम्। कर्तरि कृद्विधानात्। अवाची–इत्यपपाठ एव। अवपूर्वस्याञ्चतेरधोमुखीभावे वृत्तेः। स्वामी त्ववशब्दस्य मध्यार्थतामाह ॥ (१) ॥*॥ प्रति पश्चाद् दिनान्तेऽञ्चति सूर्यम्। सूर्योऽस्याम्–इति तु दुष्टम् ॥ (१) ॥*॥ पूर्वदक्षिणेत्यत्र 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' (वा० ५।३।२८)। उद् ऊर्ध्वं तरन्त्यत्र। 'तॄ प्लवनसंतरणयोः' (भ्वा० प० से०) 'ऋदोरप्' (३।३।५७)। (**'उत्तरा** दिग्विशेषे च स्त्रीषायामर्जुनस्य च') ॥*॥ उद्

उत्तरमञ्चत्यर्कम् । उत्क्रान्तं दृष्टिपथमञ्चति सूर्यं वा । अस्यामिति तु न युक्तम् । 'उद ईत्' (६।४।१३९) इत्यञ्चतेरत ईकारः ॥ (१) ॥*॥ प्रत्येकं द्वे द्वे **'चतसृणाम्'** ॥

दिश्यं तु त्रिषु दिग्भवे ।

(**दिश्यमिति** ॥) दिशि भवं दिश्यम् । 'दिगादिभ्यो यत्' (४।३।५४) ॥ (१) ॥*॥ एकं **'दिग्भवस्य'** ॥

इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् ॥ २ ॥
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ।

(**इन्द्र इति** ॥) एवं च प्राच्यादीनामैन्द्रीत्यादिनामानि । इन्द्रादीनां प्राचीपतिरित्यादीनि नामानीति भावः ॥

ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ॥ ३ ॥
पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ।

(**ऐरावत इत्यादि** ॥) पुण्डरीकवर्णयोगात् । अर्शआद्यच् (५।२।१२७) । (**'पुण्डरीकं** सिताम्बुजे । सितच्छत्रे भेषजे च **पुण्डरीकोऽग्निदिग्गजे** ॥ सहकारे गणधरे राजिलाहौ गजज्वरे । कौषकारान्तरे व्याघ्रे') (१) ॥*॥ खर्वत्वाद्वामनः । (**'वामनोऽप्यतिखर्वे** च त्रिषु पुंसि तु दिग्गजे । हरावङ्कोटवृक्षे') ॥ (१) ॥*॥ कुमुदं रक्तोत्पलं तत्तुल्यवर्णत्वात् । **'कुमुदं** कैरवे रक्तपद्मे क्ली कुम्भिकोषधौ । गम्भार्यां पुंसि दिङ्नागे नाम्नि शाखामृगान्तरे' । कौ मोदते वा । 'इगुपध–' इति कः । 'मुद हर्षे' (भ्वा० आ० से०) ।—'मूलविभुज–' (वा० ३।२।५) इति कः–इति मुकुटः । तच्च । अनुपयोगात् ॥ (१) ॥*॥ अञ्जनवर्णत्वात् आञ्जनः । (**'अञ्जनं** कज्जले चास्त्री सौवीरे च रसाञ्जने । पुंसि ज्येष्ठादिग्गजयोरञ्जना वानरीभिदि । **अञ्जनी** लेप्यनार्यां च') ॥ (१) ॥*॥ पुष्पमिव दन्ता यस्य । (**'पुष्पदन्तस्तु** दिङ्नागभेदे विद्याधरान्तरे') ॥ (१) ॥*॥ सर्वस्यां भूमौ विदितः । 'तत्र विदितः' (५।१।४३) इत्यण् । अनुशतिकादिः (७।३।२०) । (**'सार्वभौमस्तु** दिग्गजे चक्रवर्तिनि') ॥ (१) ॥*॥ शोभनाः प्रतीका अवयवा यस्य । **'सुप्रतीको** दिग्गीशेभे शोभनावयवे त्रिषु' ॥ (१) ॥*॥ दिक्षु विख्याता गजाः । दिग्गीशा गजा इति वा । 'शाकपार्थिवादिः' (२।१।६९) ॥ **'इन्द्रादिगजानाम्'** एकैकम् ॥

करिण्योऽभ्रमु-कपिला-पिङ्गलानुपमाः क्रमात् ॥४॥
ताम्रकर्णी शुभ्रदन्ती चाञ्जना चाञ्जनावती ।

(**करिण्य इति** ॥) अभ्र अकाश एव माति । 'मा माने' (अ० प० अ०) । मित्रय्वादित्वात् (उ० १।३७) कुः न भ्राम्यति । 'भृतृचरि–' (उ० १।७) इत्युः । मन्थरगामिनीत्यर्थ इति वा ॥ (१) ॥*॥ कपिलपिङ्गलवर्णत्वात्कपिलापिङ्गले । (**'कपिला** रेणुकायां च शिंशपा गोविशेषयोः । पुण्डरीककरिण्यां स्त्री वर्णभेदे त्रिलिङ्गकम् ॥ नानले वासुदेवे च मुनिभेदे च कुक्कुरे') । (**'पिङ्गलो** नागभिन्नुद्दण्डांशुपारिपार्श्वके । निधिभेदे कपावग्नौ पुंसि स्यात्कपिलेऽन्यवत् ॥ स्त्रियां वेश्याविशेषे च करिण्यां कुमुदस्य च । नाडीभेदे कर्णिकायाम्') ॥ (१) ॥*॥ श्रेष्ठत्वाच्चास्त्युपमास्याः । (**'अनुपमस्तु** भवेदयम् । उपमारहितेऽनुपमेभ्याम्') ॥ (१) ॥*॥ ताम्रौ कर्णौ यस्याः । 'पाककर्ण–' (४।१।६४) इत्यादिना ङीष् । 'नासिको–' (४।१।५५) इति वा ॥ (१) ॥*॥ शुभ्रौ दन्तावस्याः । 'नासिकोदरौष्ठ–' (४।१।५५) इति ङीष् । (**'शुभ्रदन्ती** सुदन्त्यां स्यात्पुष्पदन्तेभयोषिति') । **शुभ्रदन्ती** इति वा पाठः । शुभौ दन्तावस्याः ॥ (१) ॥*॥ अञ्जति । 'अनि गतौ' (भ्वा० प० से०) । युच (उ० २।७८) । कल्याणान्यङ्गान्यस्याः इति वा । **'अङ्गात्कल्याणे'** (ग० ५।२।१००) इति नः ॥ (१) ॥*॥ अञ्जनवर्णत्वादञ्जनमस्त्यस्याः । 'मतौ बह्वचः–' (६।३।११९) इति दीर्घः ॥ (१) ॥*॥ क्रमेण **'ऐरावतादीनां हस्तिनीनां'** एकैकम् ॥

क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम् ॥५॥

(**क्लीबेति** ॥) क्लीबाव्ययमिति कर्मधारयोऽव्ययीभावत्वसूचनार्थः । 'अव्ययीभावश्च–' (१।१।४१,२।४।१८) इति सूत्राभ्यां क्लीबत्वाव्ययत्वयोर्विधानात् । तेन 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' (२।४।८३) इत्यादिप्रवृत्तिः । 'अप' इति मध्यवाची । शरदादित्वात् (५।४।१०७) टच् । आबन्तेन समासे तु टज्नापेक्षितः ।—दिशोरिदमपदिशम्, विभक्त्यर्थेऽव्ययीभावः–इति स्वामी । तच्च । संबन्धमात्रस्य विभक्त्यर्थत्वेऽपि मध्यस्य तदर्थत्वाभावात् ॥ (१) ॥*॥ दिग्भ्यो विनिर्गता । **विदिक्** शान्ता ॥*॥ सैव **प्रदिक्** । 'यान्यासामन्तरालानि **प्रदिशो** विदिशश्च ताः' इत्यमरमाला ॥ (२) ॥*॥ द्वे **'अश्यादिकोणस्य'** ॥

अभ्यन्तरं त्वन्तरालम्

(**अभ्यन्तरमिति** ॥) अभिगतमन्तरम् ॥ (१) ॥*॥ अन्तरे लाति । 'आतोऽनुप–' (३।२।३) इति कः । 'अन्येषामपि–' (६।३।१३७) इति दीर्घः । आङ्प्रश्लेषो वा । मूलविभुजादित्वात् (वा० ३।२।५) कः ॥२॥*॥ द्वे **'मध्यमात्रस्य'** ॥

चक्रवालं तु मण्डलम् ।

(**चक्रेति** ॥) चक्राकारेण वलते । 'वल संवरणे' (भ्वा० आ० से०) । अच् (३।१।१३४) । 'अन्येषामपि–' (६।३।१३७) दीर्घः । यद्वा—भावे घञि वालः । चक्रमिव वालो यस्य । यद्वा—चक्राकारेण वाडते । 'वाडृ आह्वाने' (भ्वा० आ० से०) अच् (३।१।१३४) चक्रवाडम् । डलयोरैक्यस्मरणाच्चक्रवालम् । (**'चक्रवालोऽद्रिभेदे स्याच्चक्रवालं**

१—ऋषभदेवे ॥ २—इक्षुविशेषे ॥ ३—'अञ्जनः' इत्युत्तरं अञ्जनवद्वर्णोऽस्य । यद्वा—अनक्ति 'अञ्जू व्यक्तयादौ' । ल्युः 'युट् वा' इत्यधिकः पाठः पुस्तकान्तरे ॥

तु मण्डले' ॥ (१) ॥*॥ मण्डयति । 'मडि भूषायाम्' (चु० प० से०) । वृषादित्वात् (उ० १।१०६) कलच् । मण्डं भूषां लाति–इति वा । (**'मण्डलं** देशबिम्बयोः । भुजंगभेदे परिधौ शुनि द्वादशराजके । संघाते कुष्ठभेदे च') ॥ (२) ॥*॥ द्वे **'मण्डलाकारेण परिणतसमूहस्य'** ॥

अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः ॥ ६ ॥
धाराधरो जलधरस्तडित्वान्वारिदोऽम्बुभृत् ।
घन-जीमूत मुदिर-जलमुग्धूमयोनयः ॥ ७ ॥

(**अभ्रमित्यादि** ॥) अपो बिभर्ति । मूलविभुजादित्वात् (३।२।५) कः[1] । अभ्रति । 'अभ्र गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) । न भ्रश्यन्त्यापो यस्मात्[2] । 'भ्रंशु अधःपतने' । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः-इति वा । **'अभ्रं** मेघे च गगने धातुभेदे च काञ्चने' ॥ (१) ॥*॥ मेहति । 'मिह सेचने' (भ्वा० प० से०) । अच् (३।१।१३४) । न्यङ्क्वादित्वात् (७।३।५३) कुत्वम् । **'मेघो** मुस्ताजलदयोः पुमान्' ॥ (२) ॥*॥ वारि वहति । 'कर्मण्यण्' (३।२।१) ॥ (३) ॥*॥ स्तनयति । **'स्तनगदी** देवशब्दे' (चु० उ० से०) चुरादावदन्तः । 'स्तनिहृषि–' (उ० ३।२९) इतीत्नुच् । 'अयामन्ता–' (६।४।५५) इति णेरय् ॥ (४) ॥*॥ वारिवाहकः । पृषोदरादिः (६।३।१०९) । बलाकाभिर्हीयते गम्यते । 'ओहाङ् गतौ' (जु० आ० अ०) । कर्मणि क्तुन् (उ० २।३७) । पृषोदरादिः (६।३।१०९) । बलेन हीयते आह्वायते वा । क्तुन् (उ० २।३७) । (**'बलाहको** गिरौ मेघे दैत्यनागप्रभेदयोः') ॥ (५) ॥*॥ धाराणां जलस्य च धरः । **'धाराधरोऽस्त्रिमेघयोः'** ॥ (६) ॥*॥ (जलधरस्तोयधरादीनामप्युपलक्षणम् । **'तोयधरो** मुस्तासुनिषण्णौषधीघने') ॥ (७) ॥*॥ तडितः सन्त्यस्मिन् । मतुप् (५।२।९४) । 'झयः' (८।२।१०) इति वत्वम् ॥ (८) ॥*॥ वारि ददाति । 'आतोऽनुप–' (३।२।३) इति कः । (जलदतोयदादीनामप्युपलक्षणम् । **'जलदो** मुस्तके मेघे' । **'तोयदो** मुस्तके मेघे पुमानाज्ये नपुंसकम्') ॥ (९) ॥*॥ अम्बु बिभर्ति । क्विप् (३।२।७६) ॥ (१०) ॥*॥ हन्यते वायुना । 'मूर्तौ घनः' (३।३।७७) इत्यप् कुत्वं च । (**'घनं** स्यात्कांस्यतालादिवाद्यमध्यमनृत्ययोः । ना मुस्ताब्दौघदार्ढ्येषु विस्तारे लोहमुद्गरे । त्रिषु सान्द्रे दृढे') ॥ (११) ॥*॥ जीवनं जलं मूर्तं बद्धमनेन । 'मूङ् बन्धने' (भ्वा० आ० से०) कर्मणि क्तः (३।२।१०२, ३।४।७०) । पृषोदरादिः (६।३।१०९) । ज्यानं जीः । 'ज्या वयोहानौ' (क्र्या० प० अ०) । संपदादित्वात् (वा० ३।३।१०८) । क्विप् । जिया वयोहान्या मूर्तो बद्ध इति वा । (**'जीमूतो** वासनेऽम्बुदे । घोषकेऽद्रौ भृतिकरे') ॥ (१२) ॥*॥ मोदन्तेऽनेन । 'मुद हर्षे' । (भ्वा० आ० से०) । 'इषिमदिमुदि–' (उ० १।५१) इति किरच् । **'मुदिरः** कामुके मेघे' ॥ (१३) ॥*॥ जलं मुञ्चति । 'मुच्लृ मोक्षणे' (तु०उ०अ०) । क्विप् (३।२।७६) ॥ (१४) ॥*॥ धूमो योनिरस्य ॥ (१५) ॥*॥ यद्यपि शब्दार्णवे । 'मेघास्तु त्रिविधास्तत्र वह्निजा धूमयोनयः । निःश्वासजास्तु जीमूतास्ते ज्ञेया जीवरूपिणः । यज्ञजास्तु घना घोराः पुष्करावर्तकादयः' इति विशेषपरत्वमुक्तम् । तथाप्यन्यत्रापि वृत्तिर्न विरुद्धा ॥ पञ्चदश **'मेघस्य'** ॥

कादम्बिनी मेघमाला

(**कादम्बिनीति** ॥) कादम्बाः कलहंसा बलाकावन्मेघमनुधावन्ति । ते सन्त्यस्याः । इनिः (५।२।११५) यत्तु ज्योत्स्नादित्वात् (वा० ५।२।१०३) अणि ङीप् (४।१।१५) इति मुकुटः । तन्न । एवं हि 'कादम्बी' इति प्रयोगप्रसक्तेः । कदम्बस्य विकासः=कादम्बोऽस्त्यस्याः कार्यत्वेनेति वा ॥ (१) ॥*॥ मेघानां माला ॥ (२) ॥*॥ द्वे **'मेघपङ्क्तेः'** ॥

त्रिषु मेघभवेऽभ्रियम् ।

(**त्रिष्विति** ॥) अभ्रे भवम् । 'समुद्राभ्राद्धः' (४।४।११८) छान्दसत्वं प्रायिकम् । स्त्रियामभ्रिया ॥ (१) ॥*॥ एकम् **'मेघभवस्य'** ॥

स्तनितं गर्जितं मेघनिर्घोषो रसितादि च ॥ ८ ॥

(**स्तनितमिति** ॥) 'स्तनगदी देवशब्दे' (चु०उ०से०) । 'गर्ज शब्दे' (भ्वा०, चु० प० से०) । 'रस शब्दे' (भ्वा० प० से०) । 'एभ्यो भावे क्तः' (३।३।११४) ॥*॥ मेघस्य निर्घोषः ॥ (२) ॥*॥ आदिना ध्वनित-ह्राद-रासादयः ॥ चत्वारि **'मेघध्वनेः'** ॥

शंपा शतह्रदाह्रादिन्यैरावत्यः क्षणप्रभा ।
तडित्सौदामनी विद्युच्चञ्चला चपला अपि ॥ ९ ॥

(**शंपेति** ॥) भयंकरत्वाच्छं सुखं पिबति । 'आतोऽनुप–' (३।२।३) इति कः । टाप (४।१।४) ॥ (१) ॥*॥ शतं ह्रादा अव्यक्ताः शब्दा यस्याः । पृषोदरादित्वात् (६।३।१०९) ह्रस्वः । शतं ह्रदा अर्चींषि, अगाधजलाशया वा । सन्त्यस्या इति वा अच् । (५।२।१२७) । (**'शतह्रदा** स्त्रियां वज्रे सौदामिन्यां च कीर्तिता') ॥ (२) ॥*॥ ह्रादते । आवश्यके णिनिः (३।२।७८) । ह्रादोऽस्ति यस्या वा । इनिः (५।२।११५) ।

१—के अब्भ्रं बकारवदिति वैयाकरणाः—इति मुकुटः । २—इति पाराणिकाः । तदुक्तम् 'न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः' इतीति स्वामिमुकुटौ । अत एव बकाररहितत्वेन 'समयावनौघनमदभ्रमराणि' इति षष्ठे माघे यमकितम्—इति मुकुटः ॥

१—**'शम्बा'** इति प्राच्याः शम्बयति नायनं तेजः—इति व्याख्यन्—इति स्वामी ॥ २—बहुव्रीहिणैव रूपसिद्धौ मत्वर्थीयप्रत्ययकरणस्य निष्प्रयोजनता ॥

'ह्रादिनी वज्रतडितोः' ॥ (३) ॥*॥ इरा आपः सन्त्यस्य=इरावान् मेघः । तस्येयम् । 'तस्येदम्' (४।३।१२०) इत्यण् । ऐरावतेनैकदिक् । 'तेनैदिक्' (४।३।११२) इत्यण् इति वा ॥ (४) ॥*॥ क्षणं प्रभास्याः ॥ (५) ॥*॥ ताडयति । 'तड आघाते' (चु० प० से०) । 'ताडेर्णिलुक्च' (उ० १।९८) इतीतिः । डलयोरेकत्वात् **'तलित्'** अपि । 'दूरेचित्संतलिदिवातिरोचसे' इति मन्त्रः ॥ (६) ॥*॥ **'श्वेतद्विपः सुदामा'** इति त्रिकाण्डशेषे ऐरावतपर्यायौ । 'तेनैकदिक्' (४।३।११२) इत्यण् । 'अन्' (६।४।१६७) इति प्रकृतिभावाट्टिलोपाल्लोपौ न भवतः । 'सुदान्नाद्विणा–' इति वा । **'सुदामा** तु पुमान्वारिधरपर्वतभेदयोः' । सुदान्नि मेघे भवा वा । 'सौदामिनी' इत्यपपाठः । **'सौदामन्यप्सरोभेदे तडित्तद्भेदयोः स्त्रियाम्'** ॥ (७) ॥*॥ विशेषेण द्योतते । 'द्युत दीप्तौ' (भ्वा० आ० से०) । 'भ्राजभास–' (३।२।१७७) इति क्विप् । (**'विद्युत्तडिति संध्यायां स्त्रियां त्रिषु तु निष्प्रभे'**) ॥ (८) ॥*॥ 'चञ्चु गतौ' (भ्वा० प० से०) । घञ् (३।३।१८) । चञ्चं लाति । कः (३।२।३) । **'चञ्चला** तु तडिल्लक्ष्म्योश्चञ्चलश्चपलेऽनिले' ॥ (९) ॥*॥ चोपति । 'चुप मन्दायां गतौ' (भ्वा० प० से०) । 'चुपेरचोपधायाः' (उ० १।१११) इति कलच् । **'चपला** कमलाविद्युत्पुंश्चलीपिप्पलीषु च । नपुंसकं तु शीघ्रे स्याद्वाच्यवत्तरले चले' ॥ (१०) ॥*॥ दश **'विद्युतः'** ॥

स्फूर्जथुर्वज्रनिर्घोषे

(**स्फूर्जथुरिति** ॥) स्फूर्जनं स्फूर्जथुः । 'दुओस्फूर्जा वज्रनिर्घोषे' (भ्वा० प० से०) । 'ट्वितोऽथुच्' (३।३।८९) ॥ (१) ॥*॥ वज्रनिर्घोषोऽशनिशब्दः । **'वज्रनिष्पेषे'** इति पाठे 'पिषृ संचूर्णने' (रु० प० अ०) घञ् (३।३।१८) । 'इदुदुपधस्य–' (८।३।४१) इति षः । निष्पेषशब्दस्तदुत्थशब्दपरः । संघट्टमात्रपरः–इत्यन्ये॥(२)॥*॥ द्वे **'वज्रध्वनेः'**॥

मेघज्योतिरिरंमदः ।

(**मेघेति** ॥) अन्योन्यस्य संघट्टेन मेघान्निःसृत्य वृक्षादौ ज्योतिः पतति स इरंमदः । इरया जलेन माद्यति दीप्यते । अविन्धनत्वात् । 'उन्दिमदिपटिक्लिदिस्वदिभ्यरन्' (३।२।१७) इति साधुः । मेघेत्युपलक्षणम् । तेन वाडवोऽपि । अत एव 'मेघाम्न्यादिरिरंमदः' इति शब्दार्णवः ॥ द्वे **'वज्राग्नेः'** ॥

१—तथाच हरिप्रबोधे 'खेऽभ्रं जगाम काञ्चनसरसमसौदाम नीलता धामास्तम् । कुवलयमिव हि सरजसं सरसमसौदामनी लताधामास्तम् । इति यमकितम्'—इति मुकुटः ॥ २—केचित्तु (स्फूर्जः) इति दीर्घं नेच्छन्ति । तेषां 'सिपि धातो रुर्वा' (८।२।७४) इत्यतो 'हलि च' (८।२।७७) वाग्रहणानुवृत्तौ व्यवस्थितविभाषाविज्ञानान्न भवतीति मैत्रेयः–इति मुकुटः ।

इन्द्रायुधं शक्रधनुः

(**इन्द्रेति** ॥) इन्द्रस्यायुधम् ॥ (१) ॥*॥ शक्रस्य धनुः ॥ (२) ॥*॥ द्वे **'इन्द्रधनुषः'** ॥

तदेव ऋजु रोहितम् ॥ १० ॥

(**तदिति** ॥) तदिन्द्रधनुरुत्पातादिना ऋजु अवक्रं सद्रोहितं स्यात् । 'रुहे रश्च लो वा' (उ० ३।९४) इतीतन् । **'रोहितं** रुधिरे[1]धीरऋजुशक्रशरासने । **रोहितो** मीनमृगयोर्भेदे रोहितकद्रुमे' इति विश्वः । यद्वा–रोहणं रोहः संजातोऽस्येति । तारकादित्वात् (५।२।३६) इतच् ॥ (१) ॥*॥ एकम् **'ऋजोरिन्द्रधनुषः'** ॥

वृष्टिर्वर्षम्

(**वृष्टिरिति** ॥) वर्षणम् । 'वृषु सेचने' (भ्वा०प०से०) । 'स्त्रियां क्तिन्' (३।३।९४) ॥ (१) ॥*॥ 'अज्विधौ भयादीनामुपसंख्यानम्' (वा० ३।३।५६) इत्यचि वर्षम् । ल्युटि (३।३।११५) वर्षणमपि । नचाचा ('नपुंसके क्तादिनिवृत्त्यर्थम्' इति (३।३।५६) भाष्योक्त्या क्तस्येव) ल्युटो बाधः । 'वृषभो वर्षणात्' (पस्पशायाम्) इति भाष्यप्रयोगात् । 'अथ वृष्टिर्वर्षमस्त्री केचिदिच्छन्ति **वर्षणम्**' इति शब्दार्णवः । **'वर्षस्तु** समाद्वीपांशवृष्टिषु । वर्षवैरेऽपि **वर्षास्तु** प्रावृषि' इति हैमः ॥२॥*॥ द्वे **'वृष्टेः'** ॥

तद्विघातेऽवग्राहावग्रहौ समौ ।

(**तद्विघात इति** ॥) तस्या वृष्टेर्विघाते द्वौ । 'अवे ग्रहो वर्षप्रतिबन्धे' (३।३।५१) इति अवपूर्वाद्वहेर्वा घञ् ॥ (१) ॥*॥ 'ग्रहवृदृनिश्चिगमश्च' (३।३।५८) इत्यपि अवग्रहः । (**'अवग्रहस्तु ज्ञानभेदे गजालिके । प्रतिबन्धे वृष्टिरोधे'**) । ॥ (२) ॥*॥ द्वे **'वृष्टिविघातस्य'** ॥

धारासंपात आसारः

(**धारेति** ॥) धाराणां संपातः संभूय पतनम् । पतेर्भावे घञ् (३।३।१८) ॥ (१) ॥*॥ 'सृ गतौ' (भ्वा० प० अ०) । आसरणम् । घञ् (३।३।१८) । **'आसारः** स्यात्प्रसरणे वेगवर्षे सुहृद्वले' विश्वः ॥ (२) ॥*॥ द्वे **'महावृष्टेः'** ॥

शीकरोऽम्बुकणाः स्मृताः ॥११॥

(**शीकर इति** ॥) सृता वायुना इतस्ततः प्रेरिता अम्बुकणाः शीकराः तालव्यादिः । 'शम्बशीकरपांशवः' इति तालव्यप्रकरणे ऊष्मविवेकात् । 'शीकृ सेचने' (भ्वा० आ० से०) । 'ऋच्छेररन्' (उ० ३।१३१) इति बाहुलकादरन् । (**'शीकरं** सरले वातसृताम्बुकणयोः पुमान्') ॥*॥ (**सीकरः**) 'दन्त्यादिरयम्' इति धनपालादयः ॥ (१) ॥*॥ एकम् **'वातप्रक्षिप्तजलकणस्य'** ॥

१—कुङ्कुमे ॥ २—'वर्षवरः षण्ढः' इत्यनेकार्थकैरवाकरकौमुदी ॥

वर्षोपलस्तु करका

(**वर्षोपल इति** ॥) कृणोति 'कृञ् हिंसायाम्' (स्वा० उ० अ०) । 'कृञादिभ्यः संज्ञायां वुन्' (उ० ५।३५) । क्षिपकादित्वात् (वा० ७।३।४५) इत्वाभावः । पुंस्यपि । 'वर्षोपलस्तु **करका** करकोपि च दृश्यते' । ('**करकस्तु** पुमान्पक्षिविशेषे दाडिमेऽपि च । द्वयोर्मेघोपले न स्त्री करङ्के च कमण्डलौ') ॥ १ ॥*॥ एकं '**वर्षोपलस्य**' ॥

मेघच्छन्नेऽह्नि दुर्दिनम् ।

(**मेघेति**॥) मेघच्छन्ने मेघान्धकारिते । अह्नीति रात्रेरप्युपलक्षणम् । रात्रावपि दुर्दिनम् । '**दुर्दिनं** जलदध्वान्तम्' इति रत्नकोषः । दुर्निन्दितं दिनम् । '**बादलं** दुर्दिने मेघे' इति ॥ १ ॥*॥ एकं '**मेघान्धकारितस्य**' ॥

अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम् ॥ १२ ॥

अपिधान-तिरोधान-पिधानाच्छादनानि च ।

(**अन्तर्धेति** ॥) अन्तर्धानम् । व्यवधानम् । डुधाञः (जु० उ० अ०) अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वात् (वा० १।४।६५) 'आतश्चोपसर्गे' (३।३।१०६) इत्यङ् ॥ (१) ॥ (२) ॥*॥ 'उपसर्गे घोः–' (३।३।९२) इति किप्रत्ययेऽन्तर्धिः ॥ ३ ॥*॥ 'वृञ् आच्छादने' (चु० उ० से०) चुरादिण्यन्ताद्भावे ल्युट् (३।३।११५) ॥ (४) ॥*॥ 'वष्टि भागुरिः–' इति वाल्लोपः ॥ (५) ॥ (६) ॥*॥ 'तिरोऽन्तर्धौ' (१।४।७१) इति गतित्वे 'कुगति–' (२।२।१८) इति समासः ॥ (७) ॥*॥ 'छद अपवारणे' (चु० उ० से०) । ण्यन्ताल्ल्युट् (३।३।११५) ॥*॥ अण्यन्ताल्ल्युटि तु **छदनम्** । यत्तु—छदनमिति 'छादेर्घे' (६।४।८९) योगविभागाद् ह्रस्वत्वम्-इति मुकुटेनोक्तम् । तच्चिन्त्यम् । उक्तरीत्या प्रयोगद्वयनिर्वाहे योगविभागस्य निष्प्रयोजनत्वात् ॥ (८) ॥*॥ अष्टौ '**अन्तर्धानस्य**' ॥

हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ॥ १३ ॥
विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः ।
अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः १४
द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ।

(**हिमांशुरित्यादि** ॥) हिमा अंशवो यस्य ॥ (१) ॥*॥ चन्द्रं कर्पूरं सादृश्येन माति तुलयति । 'चन्द्रे मो डिच्च' (उ० ४।२२८) इत्यसुन् । चन्द्रमाह्लादं मिमीते निर्मिमीते इति वा । बाहुलकात्केवलादप्यसिः 'मिमीते आनन्दम्' इति माः=चन्द्रः । 'मास्शब्दः केवलोऽपीह संमतो बहुदश्वनाम्'–इत्युत्पलिनी । ('**माश्चन्द्रमासयोः पुमान्**') कालं मिमीते । माश्चासौ चन्द्रश्च=चन्द्रमाः–इति वा । राजदन्तादिः (२।२।३१) ॥ (२) ॥*॥ चन्दति । 'चदि आह्लादने' (भ्वा० प० से०) 'स्फायितञ्चि–' (उ० २।१३) इति रक् । '**चन्द्रोऽम्बुकाम्ययोः** । स्वर्णे सुधांशौ कर्पूरे कैम्पिल्ये मेचकेऽपि च' इति हैमः ॥*॥ अचि (३।३।१३४) रेफशून्योऽपि । 'हिमांशुश्चन्द्रमाश्चन्द्रः **शशी चन्द्रो हिमद्युतिः**' इति शब्दार्णवात् ॥ (३) ॥*॥ उनत्ति । 'उन्दी क्लेदने' (रु० प० से०) 'उन्नेरिच्चादेः' (उ० १।१२) इत्युः । यत्तु स्त्रीमिमुकुटौ–उन्दते, उन्दति–इत्याहतुः । तच्चिन्त्यम् । उन्दे रौधादिकत्वात् ॥ (४) ॥*॥ कुमुदानां बान्धवः ॥ (५) ॥*॥ विशेषेण धयन्त्येनं सुराः । धेट् पाने । बाहुलकात्कुः (उ० १।२२) । '**विधुः** शशाङ्के कर्पूरे हृषीकेशे च राक्षसे' इति विश्वः ॥ (६) ॥*॥ सुधायुक्ता अंशवो यस्य ॥ (७) ॥*॥ शुभ्रा अंशवो यस्य ॥ (८) ॥*॥ ओषधीनामीशः ॥ (९) ॥*॥ निशायाः पतिः ॥ (१०) ॥*॥ अब्ज्यो जातः । 'पञ्चम्यामजातौ' (३।२।९८) इति डः । '**अब्जोऽस्त्री** शङ्खे ना निचुले धन्वन्तरौ च हिमकिरणे । क्लीबं पद्मे' इति विश्वः ॥ (११) ॥*॥ जीवयति । अन्तर्भावितण्यर्थः । 'जीवेः' इत्यनुवृत्तौ 'आतृकन् वृद्धिश्च' (उ० १।७९) इति साधुः । '**जैवातृकः** पुमान् सोमे कृषकायुष्मतोस्त्रिषु' ॥ (१२) ॥*॥ अमृतं सूते–सोमः । 'अर्तिस्तुसू–' (उ० १।१४०) इत्यादिना मन् । '**सोम**स्त्वोषधीतद्रसेन्दुषु । दिव्यौषध्यां घनसारे समीरे पितृदैवते ॥ वसुप्रभेदे सलिले वानरे किंनरेश्वरे' इति हैमः ॥*॥ **सोमा** नकारान्तोऽपि । 'नामन्सीमन्सोमन्–' इत्यादिना दशाद्यां निपातनात् । यत्तु मुकुटेनोक्तम्–सूयते जायते 'नवो नवो भवति जायमानः' इति श्रुतेः, सूयते यज्ञाङ्गस्थानं वा करोति, सूतेऽमृतं वा सोम इति 'षुञ् अभिषवे' । 'षू प्रेरणे' वा–इति । तन्न । सूयतेः सकर्मकत्वेन जायते इति प्रतिपदासंभवात् । श्रुत्युपन्यासोऽप्यसंबद्धः । जायमान इति जनेरकर्मकस्य ग्रहणात् । एतेनैव स्वाम्युक्तिरपि प्रत्युक्ता । सूयत इत्यस्य यज्ञाङ्गस्थानं वा करोति–इत्यर्थकथनमप्यसंगतम् । प्राणिगर्भविमोचनार्थकस्य तदसंभवात् । सुनोतेः सुवतेश्चोपन्यासः पूर्वान्वयी स्वतन्त्रो वा । नाद्यः । षूङा विगृह्य तदुपन्यासस्यासंगतत्वात् । द्वितीयेऽपि 'अर्तिस्तु–' इति ह्रस्वस्य ग्रहणे सुवतेरुपन्यासोऽसंगतः । दीर्घग्रहणे सुनोतेरुपन्यासोऽसंगतः ॥ (१३) ॥*॥ ग्लायति । 'ग्लै हर्षक्षये' (भ्वा० प० अ०) । 'ग्लानुदिभ्यां डौः' (उ० २।६४) ॥ (१४) ॥*॥ मृगोऽङ्कोऽस्य ॥ (१५) ॥*॥ कला निधीयन्तेऽत्र । डुधाञः 'कर्मण्यधिकरणे च' (३।३।९३) इति किः ॥ (१६) ॥*॥ द्विजानां राजा । 'राजा–' (५।४।९१) इति टच् । '**द्विजराजः** शशधरे सुपर्णेऽनन्तभोगिनि' इति विश्वः ॥ (१७) ॥*॥ शशस्य धरः ॥ (१८) ॥*॥ नक्षत्राणामीशः ॥ (१९) ॥*॥

१—ओषधीविशेषे ॥ २—मयूरपिच्छस्थरेखात्रये ॥ ३—स्वामिग्रन्थे तु तुनन्तीति पाठ एव दृश्यते ॥ ४—मेदिन्यामेवैतादृशः पाठो दृश्यते । विश्वकोषे तु नोपलभ्यते ॥

क्षपां करोति । 'कृञो हेतु–' (३।२।२०) इति टः ॥ (२०) ॥*॥ विंशतिः **'चन्द्रस्य'** ॥

कला तु षोडशो भागो

(कलेति॥) चन्द्रस्य षोडशो भागः । कलयति । 'कल संख्याने' (चु० उ० से०) पचाद्यच् (३।१।१३४) । कल्यते वा । 'पुंसि–' (३।३।११८) इति घः । ('**कलं** त्वजीर्णरेतसोः । अव्यक्तमधुरध्वाने) **कला** स्यौदंशशिल्पयोः । (कलने मूलरैवृद्धौ षोडशांशे विधोरपि') इति हैमः ॥१॥*॥ एकम् **'चन्द्रषोडशांशस्य'** ॥

बिम्बोऽस्त्री मण्डलं त्रिषु ॥१५॥

(बिम्ब इति ॥) वेति शोभते । 'वी गतौ' (अ० प० से०) । 'उत्वादयश्च' (उ० ४।९५) इति बन्नुमागमहस्वत्वानि । **'बिम्बं** तु प्रतिबिम्बे स्यान्मण्डले बिम्बिकाफले' इति (पवर्गमध्ये) हैमः ॥ (१) ॥*॥ मण्डयति, मण्ड्यते, वा । 'मडि भूषायाम्' (चु० प० से०) । वृषादित्वात् (उ० १।१०६) कलच् । गौरादित्वात् (४।१।४१) ङीष् । मण्डली । **'स्यान्मण्डलं** द्वादशराजके च देशे च बिम्बे च कदम्बके च । कुष्ठप्रभेदेऽप्युपसूर्यकेऽपि भुजंगभेदे शुनि मण्डलः स्यात्' इति विश्वः ॥ (२) ॥*॥ द्वे **'रविचन्द्रमण्डलस्य'** ॥

भित्तं शकलखण्डे वा पुंस्यर्धः

(भित्तमिति ॥) भिद्यते स्म । 'भित्तं शकलम्' (८।२।५९) इति निपातितम् ॥ (१) ॥*॥ शक्नोति, शक्यते वा । 'शक्लृ शक्तौ' (स्वा० प० अ०) । 'शकिशम्योर्नित्' (उ० १।११२) इति कलच् । **'शकलं** त्वचि खण्डे च रागवस्तुनि वल्कले' इति विश्वः ॥ (२) ॥*॥ 'खडि भेदने' (चु० प० से०) । खण्ड्यते । कर्मणि घञ् (३।३।१९) ।—भावे घञ् (३।३।१८) इति मुकुटोक्तिरसंगता । खण्डनक्रियाया एव ग्रहणप्रसङ्गात् । खण्ड्यमानस्याग्रहणप्रसङ्गात् । 'खनु अवदारणे' (भ्वा० उ० से०) । 'अमन्ताड्डः' (उ० १।११४) इति वा । **'खण्डोऽर्धे** ऐक्षवे । मणिदोषे च' इति हैमः । ('**खण्डोऽस्त्री** शकले नेक्षुविकारमणिदोषयोः । खण्डः पानान्तरे भेदे') । वा पुंसि–इति पूर्वोत्तराभ्यां संबध्यते ॥ (३) ॥*॥ 'ऋधु वृद्धौ' (स्वा० प० से०) । ऋध्नोत्यनेन । 'हलश्च' (३।३।१२१) इति घञ् । विशेष्यनिघ्नः ॥ (४) ॥*॥ चत्वारि **'खण्डमात्रस्य'** ॥

अर्धं समेऽशके ।

(अर्धमिति ॥) समप्रविभागेऽर्धशब्दः क्लीबमेव ॥ (१) ॥*॥ तुल्यस्य खण्डद्वयस्य मध्ये **'एकखण्डस्य'** एकम् ॥

चन्द्रिका कौमुदी ज्योत्स्ना

(चन्द्रिकेति ॥) चन्द्रोऽस्त्यस्याः । ठन् (५।२।११५) । —चन्द्रं कायति वा–इति मुकुटः । तन्न । इत्वाभावप्रसङ्गात् । चन्द्रयति । 'तत्करोति–' (वा० ३।१।२६) इति ण्यन्तात् ण्वुल् (३।१।१३३) इति वा । 'चन्द्रिका चन्द्रिमा **चार्वी'** इति शब्दार्णवः ॥ (१) ॥*॥ कुमुदानामियम् । 'तस्येदम्' (४।३।१२०) इत्यण् । ('**कौमुदः** स्यात्कार्तिकके चन्द्रिकायां तु **कौमुदी**') ॥ (२) ॥*॥ ज्योतिरस्त्यस्याम् । 'ज्योत्स्नातमिस्रा–' (५।२।११४) इति निपात्यते । **'ज्योत्स्ना** चन्द्रातपेऽपि स्याज्ज्योत्स्नायुक्तनिशि स्मृता' ॥ (३) ॥*॥ त्रीणि **'ज्योत्स्नायाः'** ॥

प्रसादस्तु प्रसन्नता ॥१६॥

(प्रसाद इति ॥) 'षद्लृ विशरणादौ' (भ्वा० तु० प० अ०) । भावे घञ् (३।३।१८) । **'प्रसादोऽनुग्रहस्वास्थ्यप्रसत्तिषु । काव्यगुणे' इति हैमः ॥ (१) ॥*॥ प्रसीदति स्म । 'गत्यर्थ–' (३।४।७२) इति क्तः । प्रसन्नस्य भावः । तल् (५।१।११९) ॥ (२) ॥*॥ द्वयं **'नैर्मल्यस्य'** ॥**

कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम् ।

(कलङ्केति ॥) कं ब्रह्माणं लङ्कयति हीनतां गमयति, ज्ञापयति, वा । 'लकि गतौ' (चुरादिः) । 'कर्मण्यण्' (३।२।१)। ('कलङ्कोऽङ्केऽपवादे च कालायसमलेऽपि च') ॥ (१) ॥*॥ अङ्क्यतेऽनेन । 'अकि लक्षणे' (भ्वा० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । ('**अङ्को** भूषारूपकलक्ष्मसु चित्रार्जौ नाटकाद्यंशे स्थाने क्रोडेऽन्तिकागसोः') ॥ (२) ॥*॥ 'लञ्छ, लाञ्छि, लक्षणे' (भ्वा० प० से) । लाञ्छयतेऽनेन । ल्युट् (३।३।११५) । **'लाञ्छनं** लक्ष्मसंज्ञयोः' इति हैमः ॥*॥ लञ्छयतेऽनेन इति विग्रहे ल्युटि **'लञ्छनम्'** अपि ज्ञेयम् ॥ (३) ॥*॥ चाहयति, चह्यतेऽनेन वा । 'चह परिकल्कने' (भ्वा० प० से०) । बाहुलकाच्चक् । उपधाया इत्वं च । **'चिह्नं** लक्ष्मपताकयोः' इति मेदिनी ॥ (४) ॥*॥ लक्षयति । 'लक्ष दर्शनाङ्कनयोः' (चु० प० से०) मनिन् (३।३।७५) । ('**लक्ष्म** प्रधानचिह्नयोः') ॥ (५) ॥*॥ ल्युटि लक्षणम् । 'लक्षेरट् च' (उ० ३।७) इति नः । ('**लक्षणं** नाम्नि चिह्ने च सारस्यां **लक्षणा** क्वचित्') ॥*॥ 'मुङ्वा' (उ० ३।७) इति लक्ष्मणमपि । 'ज्योतिष्मत्यां च सारस्यां स्त्री, क्लीबे नामचिह्नयोः । स्याद्यक्षे **लक्षणः** पुंसि सौमित्रौ, श्रीमति त्रिषु' इति रभसात् । लक्ष्मीवति तु पामादित्वात् (५।२।१००) नः । 'लक्ष्म्या अच्च' इति गणसूत्रेणात्वं बोध्यम् ॥ (६) ॥*॥ षट् **'चिह्नस्य'** ॥

सुषमा परमा शोभा

(सुषमेति ॥) शोभनं समं सर्वमनया । 'सुविनिर्दुर्भ्यः सुपिसूतिसमाः' (८।३।८८) इति षत्वम् । एतेन सुषमादित्वात् (८।३।९८) षत्वम्—इति स्वाम्युक्तिः परास्ता । उक्तरीत्या निर्वाहे सुषमादित्वकल्पनस्य निर्बीजत्वात् । ('**सुषमं**

१—हैमेऽपि 'स्यात्कालशिल्पयोः' इत्येव दृश्यते ॥

रुचिरे समे । **सुषमा** तु स्यात्परमशोभायां कालभिद्यपि') ॥ (१) ॥*॥ **'उत्कृष्टशोभायाः'** एकम् ॥

शोभा कान्तिर्द्युतिश्छविः ॥१७॥

(**शोभेति** ॥) शोभयति 'शुभ शुम्भ शोभायाम्' (तु० प० से०) । पचाद्यच् (३।१।१३६) । यत्तु मुकुटेनोक्तम्—शोभतेऽनया । 'शुभ शुम्भ शोभार्थौ' इति निर्देशात् 'गुरोश्च हलः' (३।३।१०३) इत्यकारः-इति । तन्न । अर्थनिर्देशस्यानार्षत्वात् । यदपि—'गुरोश्च हलः' इति चकाराद्प्रत्ययः इति तु वयम्-इति । तदपि न । आकरे तथानुक्तेः । उक्तरीत्या निर्वाहाच्च । (**'शोभा** कान्तीच्छयोर्मता') ॥*॥ शुम्भयतीति **शुम्भा**पि बोध्या ॥ (१) ॥*॥ काम्यते । क्तिन् (३।३।९४) । 'अनुनासिकस्य—' (६।४।१५) इति दीर्घः-इति मुकुटेनोक्तम् । तन्न । 'काम्यते' इति विगृहीतत्वात्तत्रान्तरङ्गत्वाण्णिङ्निमित्तवृद्धेः संभवात् । 'आयादयः—' (३।१।३१) इति णिङभावे वा बोध्यम् । (**'कान्तिः** शोभेच्छयोः स्त्रियाम्') ॥ (२) ॥*॥ 'द्युत दीप्तौ' (भ्वा० आ० से०) । द्योततेऽनया ।—'इगुपधात्किः' इति—मुकुटः । तन्न । 'इगुपधात्कित्' (उ० ४।१२०) इत्यनेन इन्विधानात्तस्य कित्त्वातिदेशात् । (**'द्युतिस्तु** शोभादीधित्योः') ॥*॥ क्तीषि (ग० ४।१।४५) **द्युती** च द्यूयते वा । 'द्यु अभिगमने' क्तिन् ॥*॥ क्तिनि (३।३।९४) **द्युत्तिः** ॥ (३) ॥*॥ छवति । छिनत्त्यसारमिति वा । 'छो छेदने' (दि० प० अ०) । 'छिदिर् द्वैधीकरणे' (रु० उ० अ०) । 'कृविघृष्विच्छवि—' (उ० ४।५६) इति किच्चन्तो निपातितः । (**'छविस्तु** रुचिशोभयोः') ॥ (४) ॥*॥ एषु भावे वा प्रत्ययाः । शोभेत्यत्र 'खनो घ च' (३।३।१२५) इति घः । द्युतिरित्यत्र 'इक् कृष्यादिभ्यः' (वा० ३।३।१०८) इति दिक् ॥ चत्वारि **'शोभायाः'** ॥

अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् ।
प्रालेयं महिका च

(**अवश्याय इति** ॥) अवश्यायते शैत्यमापाद्यते । 'श्यैङ् गतौ' (भ्वा० आ० अ०) । 'श्याद्यध—' (३।१।१४१) इति णः । (**'अवश्यायो** हिमे दर्पे') ॥ (१) ॥*॥ निहियते । 'हृञ् हरणे' (भ्वा० उ० अ०) । घञ् (३।३।१९) । 'उपसर्गस्य घञि—' (६।३।१२२) इति दीर्घः । यत्तु—'अध्यायन्याय—' (३।३।१२२) इत्यत्र चकाराद्धञ्—इति मुकुटेनोक्तम् । तन्न । 'अकर्तरि च—' (३।३।१९) इति घञः सिद्धत्वात् ॥ (२) ॥*॥ तोषयति । तुषेः (दि० प० अ०) अन्तर्भावितण्यर्थात् 'कमेः कित्' इत्यनुवृत्तौ 'तुषारादयश्च' (उ० ३।१३९) इत्यारन् किच्च । (**'तुषारो** हिमदेशयोः । शीकरे हिमभेदे च') ॥ (३) ॥*॥ तोहति । 'तुहिर् तुहिर् अर्दने' (भ्वा० प० से०) । 'वेपितुह्योर्हस्वश्च' (उ० २।५२) इतीनन् ॥ (४) ॥*॥ हन्ति 'हन्तेर्हि च' (उ० १।१४७) इति मक् । हिनोति वर्धते । 'हि गतौ वृद्धौ च' (स्वा० प० अ०) । मन् (उ० १।१४१। बाहुलकेन) इति वा । संज्ञापूर्वकत्वान्न गुणः । **'हिमं** तुषारमलयोर्द्वयोः स्यान्नपुंसकम् । शीतले वाच्यलिङ्गं स्यात्' ॥ (५) ॥*॥ प्रलीयन्ते पदार्था अत्रेति हिमाद्रिः प्रलयः । तत आगतम् । अण् (४।३।७४) 'केकय—' (७।३।२) इत्यादिना यादेरियः ॥ (६) ॥*॥ मह्यते । 'मह पूजायाम्' (भ्वा० प० से०) । 'कुन् शिलिपसंज्ञयोः—' (उ० २।३२) ॥*॥ **'मिहिका'** इति पाठे 'मिह सेचने' (भ्वा० प० अ०) । कुन् (उ० २।३२) ॥ (७) ॥*॥ **धूमिका धूममहिषी** च बोध्या ॥ सप्त **'हिमस्य'** ॥

अथ हिमानी हिमसंहतिः ॥ १८ ॥

(**अथेति** ॥) हिमानां संहतिः ॥ (२) ॥*॥ महद्धिमम् । 'हिमारण्ययोर्महत्त्वे' (वा० ४।१।४९) इति ङीषानुकौ ॥ (१) ॥*॥ द्वे **'हिमसमूहस्य'** ॥

शीतं गुणे

(**शीतमिति** ॥) गुणे स्पर्शविशेषे शीतम् । **'शीतं** हिमगुणे क्लीबं शीतलालसयोस्त्रिषु । वानीरे बहुवारे ना' । 'श्यैङ् गतौ' (भ्वा० प० अ०) । भावे क्तः (३।३।११४) । 'द्रवमूर्तिस्पर्शयोः श्यः' (६।१।४५) इति संप्रसारणम् । 'श्योऽस्पर्शे' (८।२।४७) इति पर्युदासान्न निष्ठानत्वम् ॥ (१) ॥*॥ एकं **'शीतगुणस्य'** ॥

तद्वदर्थाः सुषीमः शिशिरो जडः ।
तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः ॥१९॥

(**तद्वदिति** ॥) सुषीमादयः सप्त तु तद्वाञ्शीतगुणवानर्थो येषां ते तद्वदर्थाः । ते च अन्यलिङ्गका विशेष्यलिङ्गाः । सुष्ठु सीमा मर्यादा यस्य । 'सुषामादिषु च' (८।३।९८) इति षत्वम् । स्वामी तु—'सुष्ठु श्याय्यते' इति विगृह्य (**सुशीमः** तालव्यमध्यमाह । तत्र बाहुलकान्मक् संप्रसारणं च । मुकुटस्तु—'तदयुक्तम् । 'सुषीमश्च सुषेणश्च सुषन्धिः सर्षपोऽपि च' इति 'दन्त्यमूर्धन्य ऊष्मविवेकाद्'—इत्याह । (**'सुषीमः** शीतले चारौ त्रिषु, ना पन्नगान्तरे') ॥ (१) ॥*॥ 'शश प्लुतगतौ' (भ्वा० प० से०) । 'अजिरशिशिर—' (उ० १।५३) इति किरच्, उपधाया इत्वं च निपात्यते । 'शश्वच्छशाङ्कशिशिराण्यपि शूकशिम्बिस्तालव्यशद्वयुतानि कथितानि कियन्तः' इति शब्देदः । (**'शिशिरो** ना हिमे न स्त्री ऋतुभेदे जडे त्रिषु') ॥ (२) ॥*॥ जलति घनीभवति । 'जल घातने' (भ्वा० प० से०) । अच् (३।१।१३४) । डलयोरेकत्वस्मरणात् 'जडः' । (**'जडो** मूर्खे हिमाघाते **जडा** स्याच्छूकशिम्बिका') ॥ (३) ॥*॥ शीतं गुणोऽस्यास्ति । सिध्मादित्वात् (५।२।९७) लच् । शीतं लाति । कः (३।२।३) वा (**'शी-**

१—'इति तेन' इत्यपि पाठः ॥ २—दिगन्तः पाठः कुत्र नास्त्यपि ॥

तलं पुष्पकाशीसे शैलजे मलयोद्भवे । पुमानासनपर्ण्यां स्याच्छिशिरे वाच्यलिङ्गकम्') ॥ (५) ॥*॥ अर्शआद्यच् (५।२।१२७) शीतः ॥ (६) ॥*॥ सप्त **'शीतलद्रव्यस्य'** ॥

ध्रुव औत्तानपादिः स्याद्

(**ध्रुव इति** ॥) ध्रुवति स्थिरो भवति । 'ध्रु गतिस्थैर्ययोः' (तु० प० अ०) । अच् (३।१।१३४) । कुटादित्वात् (१।२।१) ङित्वम् । यत्तु मुकुटेन—(उकारान्तधातुमुपन्यस्य) इगुपधत्वात् (३।१।१३५) कः–इत्युक्तम् । तद्भ्रमसात् । वकारान्तधातौ वा तद्बोध्यम् । **'ध्रुवः** शङ्के हरे विष्णौ वटे चोत्तानपादजे । वसुयोगभिदोः पुंसि **ध्रुवं** खेऽजस्रतर्कयोः । स्त्री मूर्वाज्योः शालपर्ण्यां गीतिस्रुग्भेदयोस्त्रिषु । स्थिरे नित्ये निश्चिते च ध्रुवं क्लीबं प्रकीर्तितम्' ॥ (१) ॥*॥ उत्तानपादस्यापत्यम् । 'अत इञ्' (४।१।९५) । मुकुटस्तु—ऋषित्वात् 'ऋष्यन्धक–' (४।१।११४) इत्यणि प्राप्ते बाह्वादित्वात् (४।१।९६) इञ्–इत्याह । तन्न । उत्तानपादस्य ऋषित्वे मानाभावात् ॥ (२) ॥*॥ द्वे **'ध्रुवस्य'** ॥

अगस्त्यः कुम्भसंभवः ।
मैत्रावरुणिः

(**अगस्त्य इति** ॥) अगं विन्ध्यं स्त्यायति स्तभ्नोति । 'आतोऽनुपसर्गे कः' (३।२।३) । 'अगस्त्यः स्यात्कुम्भयोनौ वङ्गसेनतरावपि' ॥*॥–अगमस्यतीत्यप्यगस्तिः । 'वसेस्तिः' (उ० ४।१८०) बाहुलकादस्यतेरपि–इति मुकुटः । वस्तुतस्तु 'क्तिच्क्तौ च–' (३।३।१७४) इति क्तिजुचितः । बाहुलकाश्रयस्यागतिकगतित्वात् । शकन्ध्वादिः (वा० ६।१।९४) । 'अथागस्त्यः **कुम्भयोनिरगस्तिः कलशीसुतः**' इति शब्दार्णवः ॥ (१) ॥*॥ कुम्भः संभव उत्पत्तिस्थानमस्य ॥ (२) ॥*॥ मित्रावरुणौ देवर्षी । 'देवताद्वन्द्वे च' (६।३।२५) इत्यनङ् ।—ऋषिसमुदायस्यानृषिबालादपत्ये 'अत इञ्' (४।१।९५)–इति मुकुटः । तन्न । एतयोः ऋषित्वे मानाभावात् ॥*॥ वारुणिरपि । 'मित्रावरुणयोः सूनुरौर्वशेयश्च **वारुणिः**' इति व्याडिः । अणपि दृश्यते । 'और्वशेयागस्त्य-**मैत्रावरुणास्त्वाग्निमारुताः**' इति नामनिधानात् ॥ (३) ॥*॥ त्रीणि **'अगस्त्यस्य'** ॥

अस्यैव लोपामुद्रा सधर्मिणी ॥ २० ॥

(**अस्यैवेति** ॥) अस्यैव पत्नी लोपामुद्रा । न मुदं राति । 'आतोऽनुप–' (३।२।३) इति कः । लोपे धर्मलोपे अमुद्रा=हर्षं न लभते इत्यर्थः । स्वाम्युक्तेऽस्य पृषोदरादित्वे (६।३।१०९) फलं चिन्त्यम् । यत्तु—लोपयति योषितां रूपाभिमानम् । पचाद्यच् (३।१।१३४) । टाप् (४।१।४) । लोपा । मुद्रयति स्रष्टुः सृष्टिमिति मुद्रा । ततः कर्मधारयः (२।१।५७)–इति मुकुटेनोक्तम् । तच्चिन्त्यम् । लोपाशब्दस्यैव भाषितपुंस्कत्वात्पुंवद्भावप्रसङ्गात् । आदृप्रश्लेषेण वा तत्समाधेयम् ॥ (१) ॥*॥ समानो धर्मोऽस्यस्याः । इनिः (५।२।११५) । 'समानस्य–' (६।३।८४) इति सः ॥ एकम् **'अगस्त्यपत्न्याः'** ॥

नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम् ।

(**नक्षत्रमिति** ॥) न क्षदते हिनस्ति । 'क्षद' इति सौत्रो धातुर्हिंसार्थ आत्मनेपदी । ष्ट्रन् (उ० ४।१५९) । 'नञ्राण्नपाद्–' (६।३।७५) इति नञः प्रकृतिभावः । यत्तु क्षदतीति विग्रहप्रदर्शनं मुकुटेन कृतम् । तच्चिन्त्यम् । यद्वा 'णक्ष गतौ' (भ्वा० प० से०) । नक्षति । 'अभिनक्षिकलिभ्योऽत्रन्' (उ० ३।१०५) । न क्षणोति वा । 'क्षणु हिंसायाम्' (त०उ०से०) । ष्ट्रन् (उ० ४।१५९) । बाहुलकाण्णलोपः । न क्षत्रं वा । देवत्वात्क्षत्रभिन्नत्वात् ॥ (१) ॥*॥ ऋषति । 'ऋषी गतौ' (तु० प० से०) । 'सु ब्रश्चिकृत्यृषिभ्यः कित्' (उ० ३।६६) इति सः । 'षढोः–' (८।२।४१) इति कः । 'ऋक्षस्तु स्यान्नक्षत्राच्छभल्लयोः । महीधरविशेषे च शोणके लक्ष्यवेधने' इति हैमः ॥ (२) ॥*॥ भाति । 'अन्येष्वपि–' (३।१।१०१) इति डः । **'भं** नक्षत्रे गभस्तौ स्त्री पुंसि स्याद्भृगुनन्दने । (भवने च तथा भः स्यात्) भ्रमरो भः प्रकीर्तितः' इत्येकाक्षरः ॥ (३) ॥*॥ तरन्त्यनया । भिदादित्वात् (३।३।१०४) अङ् । गुणः (७।४।१६) । निपातनाद्दीर्घः ॥*॥ तारयतेः पचाद्यचि (३।१।१३४) । तारोऽपि 'नक्षत्रे नेत्रमध्ये च **तारा** स्यात्तार इत्यपि' इति व्याडिः । (**'तारो** वानरभिन्मुक्ताविशुद्ध्योः शुद्धमौक्तिके । ना, नक्षत्रेऽक्षिमध्ये च न ना, रूप्ये नपुंसकम् । स्त्री बुद्धदेवतामेदे वालिगीर्पतिभार्ययोः । त्रिलिङ्गोऽत्युच्चशब्दे च') ॥ (४) ॥*॥ ण्वुलि (३।१।१३३) तारका । 'तारका ज्योतिषि' (वा० ७।३।४५) इतीत्वाभावः । अपिशब्दात्तारकापि वा स्त्रियाम् । स्त्रीत्वाभावे क्लीबत्वमुड्, साहचर्यात् । 'नक्षत्रे चाक्षिमध्ये च **तारकं तारकापि** च' इति शाश्वतः । (**'तारको** दैत्यभित्कर्णधारयोर्न द्वयोर्दृशि । कनीनिकायामृक्षे च न पुमांस्त्रातरि त्रिषु') ॥ (५) ॥*॥ अवतीति—ऊः । क्विप् (३।२।१७८) । 'ज्वरत्वर–' (६।४।२०) इत्यूठौ । 'ह्रस्वो नपुंसके–' (१।२।४७) इति ह्रस्वः । समासोत्तरम् 'इको ह्रस्वोऽङ्यः–'इति वा ह्रस्वः । डयतेर्डुः डीङो मितद्वादित्वात् (वा० ३।२।१८०) डुः । 'उ च तद्वु च' इति विग्रहः । स्त्रियां तु 'ऊश्चासौ डुश्च' इति ज्ञेयः । उडुः, उडू, उडवः, इत्यादि धेनुवत् । यद्वा 'उ संबुद्धौ रुषोक्तौ च शिववाची त्वनव्ययम् । उ प्रश्ने च' इति हैमः । उ क्रोधं डयते, उना शंभुना डीयते वा । 'मितद्वादिभ्यः' (३।२।१८०) इति डुः ॥ (६) ॥*॥ षड् **'नक्षत्रसामान्यस्य'** ॥

१—एतत्पक्षद्वये तकारैक्यम् । पूर्वत्र तु तद्वयम् ॥ २—'अन्येभ्योऽपि–' (वा० ३।२।१०१) इत्युक्तितम् ॥

दाक्षायण्योऽश्विनीत्यादि तारा:

(**दाक्षायण्य इति** ॥) दक्षस्यापत्यानि । 'वा नामधेयस्य' (वा० १।१।७३) इति वृद्धसंज्ञायाम् 'उदीचां वृद्धादगोत्रात्' (४।१।१५७) इति फिञ् । गौरादित्वात् (४।१।४१) ङीष् । यत्तु—'आसुरेरुपसंख्यानम्' (वा० ४।१।१९) इत्यत्र केचिद् 'आसुरिदाक्ष्योः' इति–इति मुकुट आह । तन्न । भाष्ये दाक्षेरदर्शनात् । यदपि—गोत्रत्वमुपचर्य 'गोत्रे कुञ्जादिभ्यश्फञ्' (४।१।९८) इति च्फञि 'जातेरस्त्रीविषयादयोपधात्' (४।१।६३) इति ङीष् इत्याह । तदपि न । कुञ्जादिगणेऽस्य पाठाभावात् । उक्तरीत्योपचारं विना निर्वाहाच्च । यत्तु—'अत इन्' (४।१।९५) । अनन्तरापत्येऽपि द्वैपायनवत् 'यञिञोश्च' (४।१।१०१) इति फक्–इति स्वाम्याह । तदपि न । अनन्तरापत्ये फकोऽदर्शनात् । द्वीपमयनमस्य द्वीपायनः । द्वीपायनस्यापत्यं द्वैपायनः । ऋष्यण् (४।१।११४) इति द्वैपायनशब्दव्युत्पत्तेर्दृष्टान्तासंभवाच्च । यदपि—'इतो मनुष्यजातेः' (४।१।६५) इत्यत्र 'इतः' उपसंख्यानान्ङीष् । 'कौरव्यमाण्डूकाभ्यां च' (४।१।१९) इति चकारादासुरायणीवत् फः–इति । तदपि न । त्वदुक्तोपसंख्यानाप्रसिद्धेः । चकारस्यानुक्तसमुच्चयार्थत्वे मानाभावाच्च । यदपि—दक्षमयते । त्युः (३।१।१३४) । प्रज्ञाद्यण् (५।४।३८)–इत्याह मुकुटः । तदपि न । प्रज्ञप्राज्ञवद्रूपद्वयप्रसङ्गात् । अश्विन्याद्याः सप्तविंशतितारका दाक्षायण्य उच्यन्ते । ('**दाक्षायणी** त्वपर्णायामश्विन्याद्युडुषु स्त्रियाम्') ॥ (१) ॥*॥ एकम् '**अश्विन्यादिभानाम्**' ॥

अश्वयुगश्विनी ॥ २१ ॥

अश्वयुगिति ॥ अश्वं युनक्ति रूपेणानुकरोति । 'सत्सूद्विष–' (३।२।६१) इति क्विप् । यत्तु—'ऋत्विग्–' (३।२।५९) इत्यादिना क्विन्–इति मुकुटः । तन्न । युजेः केवलाक्विन्विधानात् ॥ (१) ॥*॥ अश्वः अश्वरूपमस्त्यस्याः । इनिः (५।२।११५) ॥ (२) ॥*॥ द्वे '**अश्विन्याः**' ॥

राधा विशाखा

(**राधेति** ॥) राध्नोति कार्यमनया । 'राध संसिद्धौ' (स्वा० प० अ०) । 'गुरोश्च हलः' (३।३।१०३) इत्यकारः । राधयति । अच् (३।१।१३४) इति वा । '**राधा** विद्युद्विशाखयोः । विष्णुकान्तामलक्योश्च गोपीवैध्यविशेषयोः' इति हैमः ॥ (१) ॥*॥ विशाखति । 'शाखृ व्याप्तौ' (भ्वा० प० से०) । अच् (३।१।१३४) । '**विशाखो** याचके स्कन्दे **विशाखा** भे कठिल्लके' इति हैमः ॥ (२) ॥*॥ द्वे '**विशाखायाः**' ॥

पुष्ये तु सिध्यतिष्यौ

(**पुष्ये त्विति** ॥) पुष्णाति कार्याणि । '**पुष्यः** कलियुगे स्मृतः । मासनक्षत्रयोर्भेदे' ॥ (१) ॥*॥ सिध्यन्त्यस्मिन् । 'पुष्यसिध्यौ नक्षत्रे' (३।१।११६) इति क्यपि निपातितः ॥ (२) ॥*॥ (तुष तुष्टौ) तुष्यन्त्यस्मिन् । 'सूर्यतिष्य–' (६।४।१४९) इति निपातनात्क्यप् उपधेत्वं च । '**तिष्यो** नक्षत्रभेदे स्यात्कलौ धात्र्यां च योषिति' ॥ (३) ॥*॥ त्रीणि '**पुष्यस्य**' ॥

श्रविष्ठया ।

समा धनिष्ठा

(**श्रविष्ठयेति** ॥) श्रवणं श्रवः । 'ऋदोरप्' (३।३।५७) । प्रसिद्धिः । श्रवोऽस्त्यस्याः । मतुप् (५।२।९४) । अतिशयेन श्रववती । इष्टन् (५।३।५५) । 'विन्मतोर्लुक्' (५।३।६५) इति मतुपो लुक् ॥ (१) ॥*॥ एवमतिशयेन धनवती ॥ (२) ॥*॥ सा श्रविष्ठया समेत्यन्वयः ॥ द्वे '**धनिष्ठायाः**' ॥

स्युः प्रोष्ठपदा भद्रपदाः स्त्रियः ॥२२॥

(**स्युरिति** ॥) प्रोष्ठो गौः, तस्येव पादा यासाम् । 'सुप्रातसुश्व–' (५।४।१२०) इत्यादिना बहुव्रीहावच् पद्भावश्च निपातितः । प्रोष्ठपदयोर्द्वित्वेऽपि 'फल्गुनीप्रोष्ठपदानाम्–' (१।२।६०) इति नक्षत्रात्पाक्षिकं बहुत्वम् ॥ (१) ॥*॥ भद्रं पदं यासां ताः । अत्रारोपाद्बहुत्वम् । यत्तु—'सुप्रात–' (५।४।१२०) इति प्रोष्ठपदा भद्रपदाश्च निपातिताः–इति मुकुटः । तन्न । भद्रपदाशब्दस्य तत्राग्रहणात् । एतेन—अर्थग्रहणाद्भद्रपदा–इति स्वाम्युक्तिरपि परास्ता ॥ (२) ॥*॥ द्वे '**पूर्वभद्रपदोत्तरभद्रपदानाम्**' ॥

मृगशीर्षं मृगशिरस्तस्मिन्नेवाग्रहायणी ।

मृगेति ॥ आकृत्या मृगस्य शीर्षमिव शीर्षं शिरो यस्य ॥ (१)

१—लिङ्गज्ञानं तेषामन्यतोऽवधार्यम् । तथा च तत्रान्तरे—'हस्तस्वातिश्रवणा अक्षीबे, मृगशिरो न पुंसि स्यात् । पुंसि पुनर्वसुपुष्यौ, मूलं त्वस्त्री, स्त्रियः शेषाः' इति वचनज्ञानं कर्मप्रदीपानुसारेण । तथाहि—'आश्लेषायेऽथ सर्पाधे विशाखाद्ये तथैव च । आषाढाद्ये धनिष्ठाद्ये अश्विन्याद्ये तथैव च ॥ द्वन्द्वान्येतानि बहुवदृक्षाणां जुहुयात्सदा । द्वन्द्वद्वयं द्विवच्छेषमवशिष्टान्यथैकवत् ॥' इति । एवं चाद्याश्वतस्रः स्त्रियां बहुत्वे, मृगशिराः स्त्रीक्लीबयोरेकत्वे, आर्द्रा स्त्र्येकत्वे, पुनर्वसुपुष्यौ पुंस्येकत्वे, आश्लेषाद्ये स्त्रीबहुत्वे, फल्गुन्यौ स्त्रीद्वित्वे, हस्तो मिथुनैकत्वे, चित्रा स्त्र्येकत्वे, स्वातिर्मिथुनैकत्वे, विशाखाद्ये स्त्रीबहुत्वे, ज्येष्ठा स्त्र्येकत्वे, मूलमस्त्रियामेकत्वे, आषाढाद्वये स्त्रीबहुत्वे, श्रवणो मिथुनैकत्वे, धनिष्ठाद्ये स्त्रीबहुत्वे, भाद्रपदाद्वयं स्त्रीद्वित्वे, रेवती स्त्र्येकत्वे इति निष्कर्षः । मुकुटस्तु अश्विनीभरणीरोहिणीमृगशिरआर्द्रापुष्याश्लेषाहस्तचित्रास्वात्यनुराधाज्येष्ठामूलाषाढाश्रवणधनिष्ठाशतभिषग्रेवतीनामेकवचनान्तत्वम्, पुनर्वसुफल्गुनीविशाखाभाद्रपदानां द्विवचनान्तत्वम्, कृत्तिकामघयोर्बहुवचनान्तत्वमाह । तत्रोक्तार्षवाक्यविरोधः स्पष्ट एव । अस्य कात्यायनवाक्यस्य होममात्रविषयत्वम् जुहुयात्पदोपादानात् कल्पनीयम् ॥

१—हस्तादिरेवायम् । 'ग्रहपतिरिव भद्रपदानुगतः' इति श्लेषात्—इति मुकुटः ॥

॥*॥ मृगः शिरोऽस्य । रूपभेदाक्लीबम् । 'सौम्या मृगशिरः स्युर्मृगशिराः' इति बोपालितः स्त्रीत्वमप्याह ॥*॥ मृगोऽपि । 'मृगशीर्षे हस्तिजातौ **मृगः** पशुकुरङ्गयोः' इति व्याडिः ॥ (२) ॥*॥ अग्रे हायनमस्याः । मार्गशीर्षमारभ्य वर्षप्रवृत्तेः । प्रज्ञाद्यण् (५।४।३८) । 'पूर्वपदात्–' (८।४।३) इति णत्वम् । आग्रहायणी पौर्णमासी । तद्योगान्नक्षत्रमपि तथा । यत्तु– 'आग्रहायण्यश्वत्थाट्टक्' (४।२।२२) इति निर्देशात्स्वार्थेऽण् । गौरादित्वात् (४।१।४१) ङीष् । अणन्तत्वादेव ङीपि सिद्धे गौरादिषु पाठोऽस्य पुंवद्भावनिषेधार्थः । तेनाग्रहायणीभार्य इति सिध्यति–इति मुकुटः । तन्न । अपसिद्धान्तात् । नहि गौरादित्वं पुंवद्भावप्रतिषेधार्थम्, किं तु ङीष्विधानार्थम् । नच पाठसामर्थ्यम् । तस्य स्वरभेदार्थत्वात् । नचोदात्तनिवृत्तिस्वरेण तदभावः । पाठसामर्थ्यादुदात्तनिवृत्तिस्वरस्यैव बाधसंभवात् । अस्य गौरादिकत्वमप्रामाणिकमिति सुवचत्वाच्च ॥ (३) ॥*॥ त्रीणि **'मृगशिरसः'** ॥

इन्वकास्तच्छिरोदेशे तारका निवसन्ति याः ॥२३॥

(**इन्वका इति** ॥) इन्वन्ति प्रीणयन्ति । 'इवि व्याप्तौ प्रीणने च' (भ्वा० प० से०) इदित्वात् (७।१।५८) नुम् । संज्ञायां कुन् (उ० २।३२) । क्षिपकादित्वात् (वा० ७।३।४५) इत्वाभावः ॥*॥ **'इत्वलाः'** इति पाठे तु 'इल खप्ने क्षेपणे च' (तु० प० से०) । 'सानसिवर्णसि–' (उ० ४।१०७) इति वलच् गुणाभावश्च निपात्यते । (**'इत्वलास्तारकाभेदेऽपीत्वलौ** मत्स्यदैत्ययोः') ॥ (१) ॥*॥ मृगशीर्षशिरोदेशस्थानां पञ्चानां **'स्वल्पतारकाणां'** एकम् ॥

बृहस्पतिः सुराचार्यो गीर्पतिर्धिषणो गुरुः ।
जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः ॥२४॥

(**बृहस्पतिरित्यादि** ॥) बृहतां पतिः । 'तद्बृहतोः–' (वा० ६।१।१५७) इति सुट्तलोपौ ॥*॥ अलुकि **'बृहतां पतिः'** इत्यपि ॥ (१) ॥*॥ सुराणामाचार्यः ॥ (२) ॥*॥ गिरां पतिः । 'अहरादीनां–' (वा० ८।२।७०) इति वा रेफः ॥*॥ पक्षे (विसर्गोपध्मानीयौ) । कस्कादित्वात् (८।३।४८) षः–इति केचित्तु ॥ (३) ॥*॥ प्रशस्ता धिषणास्य । अर्शआद्यच् (५।२।१२७) । यद्वा धृष्णोति । 'जिधृषा प्रागल्भ्ये' (स्वा० प० से०) । 'धृषेर्धिष च–' (उ० २।८२) इति क्युः । (**'धिषणस्त्रिदशाचार्ये** धिषणा तु धियां मता') ॥ (४) ॥*॥ गृणाति उपदिशति । 'गृ शब्दे' (क्र्या० प० से०) । 'कृग्रोरुच्च' (उ० १।२४) इति कुः उश्चान्तादेशः (रपरः) । **'गुरुर्महत्यङ्गिरसे** पित्रादौ धर्मदेशके । अलघौ दुर्जरे चापि' इति हैमः ॥ (५) ॥*॥ जीवयति । अच् (३।१।१३४) । मृतसंजीवनमन्त्रज्ञत्वात् । **'जीवः** स्यात्त्रिदशाचार्ये द्रुमभेदे शरीरिणि' इति हैमः ॥ (६) ॥*॥ 'अगि गतौ' (भ्वा० प० से०) । 'अङ्गिराः' (उ० ४।२३६) इत्यसुन्नन्तो निपातितः । अङ्गिरसोऽपत्यम् । 'ऋष्यन्धक–' (४।१।११४) इत्यण् । बहुत्वे 'अत्रिभृगु–' (२।४।६५) इति लुक् । आङ्गिरसः, आङ्गिरसौ, अङ्गिरसः ॥ (७) ॥*॥ वाचस्पतिरित्यत्र 'षष्ठ्याः पतिपुत्र–' (८।३।५३) इति सत्वविधानात्षष्ठ्या अलुक् ॥*॥ लुक्पक्षे **'वाक्पतिः'** अपि ॥ (८) ॥*॥ 'ऋषयः सप्त धीमद्भिः स्मृताश्चित्रशिखण्डिनः' इति हारावली । तदन्तर्गतादङ्गिरसो जातत्वाच्चित्रशिखण्डिनो जातः । 'पञ्चम्याम्–' (३।२।९८) इति डः ॥ (९) ॥*॥ नव **'बृहस्पतेः'** ॥

शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः ।

(**शुक्र इति** ॥) माहेश्वरशुक्रद्वारा निर्गतत्वाच्छुक्रः । शोचति । 'शुच शोके' (भ्वा० प० से०) 'ऋज्रेन्द्र–' (उ० २।२८) इति रक् इति वा ॥ (१) ॥*॥ दैत्यानां गुरुः ॥ (२) ॥*॥ 'कुङ् शब्दे' (भ्वा० आ० अ०) । कोतुमवश्यमाख्यातुमर्हत्वात् काव्यः । 'ओरावश्यके' (३।१।१२५) इति ण्यत् । कावेरपत्यम् । 'कुर्वादिभ्यो ण्यः' (४।१।१५१) इति वा । (**'काव्यं** ग्रन्थे पुमान् शुक्रे काव्या स्यात्पूतनाधियोः') ॥ (३) ॥*॥ 'वश कान्तौ' (अ० प० से०) । वष्टि । 'वशेः कनसिः' (उ० ४।२३९) । ग्रह्यादित्वात्संप्रसारणम् (६।१।१६) । 'ऋदुशनस्–' (७।१।९४) इत्यनङ् ॥ (४) ॥*॥ भृगोरपत्यम् । ऋष्यण् (४।१।११४) । बहुत्वे तु लुक् (२।४।६५) । भृगवः । (**'भार्गवः** परशुरामे सुधन्वनि मतङ्गजे । दैत्याचार्ये **भार्गवी** तु कृष्णदूर्वीमयोः स्त्रियाम्') ॥ (५) ॥*॥ कवते । 'कुङ् शब्दे' (भ्वा० आ० अ०) । 'अच इः' (उ० ४।१३९) । कौतीति वा । (**'कविर्वाल्मीकिशुक्रयोः** । सूरौ काव्यकरे पुंसि खलीने स्यात्तु योषिति') ॥ (६) ॥*॥ षट् **'शुक्रस्य'** ॥

अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः ॥ २५ ॥

(**अङ्गारक इति** ॥) अङ्गानि इयर्ति पीनत्वात् 'ऋ गतौ' (जु० प० अ०) । 'कर्मण्यण्' (३।२।१) । अङ्गति वा । 'अगि गतौ' (भ्वा० प० से०) 'अङ्गिमदि–' (उ० ३।१३४) इत्यारन् । संज्ञायां कन् (५।३।९७) । अङ्गार इव । कन् (५।३।९६) रक्तवर्णत्वादिति वा । **'अङ्गारकः** कुजेऽपि स्यादुल्मुकांशे कुरुण्टके । भवेदङ्गारिका चेक्षुकाण्डे किंशुककोरके' ॥ (१) ॥*॥ कोः पृथिव्या जातः । 'पञ्चम्याम्–' (३।२।९८) इति डः । (**'कुजा** भवान्यां वृक्षे तु **कुजो** नरकभौमयोः') ॥ (२) ॥*॥ भूमेरपत्यम् । शिवादित्वात्

१—'इन्वका नक्षत्रम्' इति श्रुतेः—इति स्वामी ॥ २—केचिदित्यनेन स्वामिचान्द्रोक्तेऽरुचिः सूचिता । गीष्पतिरित्यसाधुरिति मुकुटः । अतएव भाष्ये गीर्पतिः, गीष्पतिः, गीःपतिः, इति रूपत्रयमेवोदाहृतम् । एतेन कस्कादिषु पाठकल्पनमपि निरस्तम् ॥

१—तथा च रामायणे 'अनात्तान्नष्टसंज्ञांश्च आहतासून्बृहस्पतिः । दिव्याभिर्मन्त्रयुक्ताभिरोषधीभिरजीवयत्' इति मुकुटः ॥

(४।१।१२०) अण् । 'भौमो मङ्गलदैत्ययोः' इति हैमः ॥ (३) ॥ रौहिणान्यङ्गाभ्यस्य ॥ (४) ॥*॥ मङ्गोः सुतः ॥ (५) ॥ ॥ पञ्च 'मङ्गलस्य' ॥

रौहिणेयो बुधः सौम्यः

(**रौहिणेय इति** ॥) रोहिण्या अपत्यम् । 'स्त्रीभ्यो ढक्' (४।१।१२०) । 'रौहिणेयो भवेद्बुद्धे रेवतीरमणे बुधे' इति मेदिनिः ॥ (१) ॥ बुध्यते । 'बुध अवगमने' (दि० आ० अ० ॥ क्यः ३।१।१३५) ('**बुधः सौम्ये कवौ**') ॥ (२) ॥*॥ सोम इव । सोमः । 'शाखादिभ्यो यः' (५।३।१०३) । सतः प्रजायते (५।४।३४) । ('**सौम्यः** सोमात्मजेऽनुग्रे मनोज्ञे सोमदैवते । **सौम्याः** पुनर्मृगशिरः शिरःस्थाः पञ्च तारकाः') ॥ (३) ॥*॥ त्रीणि '**बुधस्य**' ॥

समौ सौरिशनैश्चरौ ।

(**समाविति** ॥) सूरस्यार्कस्यापत्यम् । 'अत इञ्' (४।१।९५) ॥*॥ 'तस्येदम्' (४।३।१२०) इत्यणि '**सौरः**' अपि ॥ (१) ॥*॥ शनैश्चरति पङ्क्त्वात् । अच् (३।१।१३४) ॥*॥ '**शनिसौरिशनैश्चराः**' इति रभसाच्छनिरपि ॥*॥ 'शनैश्चरे '**मन्दः**' इति वाचस्पतिः ॥ (२) ॥*॥ द्वे '**शनेः**' ॥

तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुंतुदः ॥ २६ ॥

(**तम इति** ॥) ताम्यति । 'तमु ग्लानौ' (दि० प० से०) । असुन् (उ० ४।१८९) । 'तमु काङ्क्षायाम्' (दि० प० से०) इति मुकुटस्य प्रमादः । ताम्यतीति विगृहीतत्वात् । '**तमांसि** गुणति गिरसैंहिकेयाः' इति त्रिकाण्डशेषः ॥*॥ पचाद्यचि (३।१।१३४) अदन्तः पुंल्लिङ्गोऽपि । 'स्वर्भानुस्तु तमो राहुः' इति पुंस्काण्डे रत्नकोषामरमालयोर्दर्शनात् ॥ (१) ॥*॥ रहति गृहीत्वा त्यजति चन्द्रार्कौ । 'रह त्यागे' (भ्वा० प० से०) भ्वादिः । बाहुलकादुण् । –'रहश्च' इत्युण्–इति मुकुटस्य प्रमादः । एतादृशसूत्रादर्शनात् ॥ (२) ॥*॥ स्वराङ्गे विपरीतलक्षणया भाति । 'दाभाभ्यां नुः' (उ० ३।३२) । क्षुभ्नादिः (८।४।३९) ॥ (३) ॥*॥ सिंहिकाया अपत्यम् । 'स्त्रीभ्यो ढक्' (४।१।१२०) ॥ (४) ॥*॥ विधुं तुदति । 'विध्वरुषोस्तुदः' (३।२।३५) इति खश् । 'अरुर्–' (६।३।६७) इति मुम् ॥ (५) ॥*॥ पञ्च '**राहोः**' ॥

केतुः ॥ ('**केतुर्ना** रूपताकाविग्रहोत्पातेषु लक्ष्मणि') ॥ (१) ॥*॥ शिखी । ('**शिखी** वह्नौ बलीवर्दे शरे केतुग्रहे द्वमे । मयूरे कुक्कुटे चाग्नेये, शिखावत्यन्यलिङ्गकः') इति स्वामी ॥ (२) ॥*॥ द्वे '**केतोः**' ॥

सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः ।

सप्तेति ॥ सप्त च ते ऋषयश्च । 'दिवसंख्ये–' (२।१।५०) इति द्विगुः । '**चित्रः शिखण्डश्चूडाविशेषोऽस्त्येषाम्**' इति व्युत्पत्त्या प्रत्येकं सप्तापि चित्रशिखण्डिनः । '**मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः । वसिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः**' ॥ (१) ॥*॥ एकम् '**सप्तर्षीणाम्**' ॥

राशीनामुदयो लग्नं

(**राशीनामिति** ॥) अश्नुवते व्याप्नुवन्ति । '**अशू व्याप्तौ**' (स्वा० आ० से०) । 'अशिपणायोः रुडायलुकौ च' (उ० ४।११३) इति रुडागम इण्प्रत्ययश्च ॥ (१) ॥*॥ लगति फले । '**लगे सङ्गे**' (भ्वा० प० से०) '**क्षुब्धस्वान्त–**' (७।२।१८) इति क्तस्येडभावः, तस्य नश्च निपात्यते । यत्तु—लगति साध्ये निजे, इति विग्रहं प्रदर्श्य 'ओलजी ओलस्जी व्रीडे' (तु० आ० से०)—इति धातोरुपन्यसनं मुकुटेन कृतम् । तन्न । उक्तधातोर्लगतिरूपाभावात् । प्रकृतेऽर्थासंगतेश्च । अतः 'श्वीदितो निष्ठायाम्' (७।२।१४) 'ओदितश्च' (८।२।४५) इति सूत्रयोरुपन्यासो व्यर्थः । '**लग्नं** राश्युदये क्लीबं सक्तलज्जितयोस्त्रिषु' ॥ एकम् '**राश्युदयस्य**' ॥

ते तु मेषवृषादयः ॥ २७ ॥

(**ते त्विति** ॥) ते राशयः । मेषवृषौ आदी येषां ते[2] ॥ प्रत्येकं एकम् ॥

सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः ।
भास्करोहस्करव्रध्नप्रभाकरविभाकराः ॥ २८ ॥
भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः ।
विकर्तनार्कमार्तण्डमिहिरारुणपूषणः ॥ २९ ॥
द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः ।
विभावसुर्ग्रहपतिस्त्विषांपतिरहर्पतिः ॥ ३० ॥
भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ।

(**सूरेति** ॥) सुवति प्रेरयति कर्मणि लोकम् । 'षू प्रेरणे' (तु० प० से०) । 'सुसूधाञ्गृधिभ्यः क्रन्' (उ० २।२४) । दैन्त्यादिः ॥*॥ शवति । 'शु गतौ' (सौत्रः) 'शुसिचिमीनां दीर्घश्च' (उ० २।२५) इति क्रनि शूरश्च । '**शूरश्चारुभटे सूर्ये**' इति विश्वः । 'सुभटे **शूरः** सूर्ये च दन्त्योऽपि' इत्यूष्मविवेकः । शूरयते वा । 'शूर विक्रान्तौ' (तु० आ० से०) । अच् (३।१।१३४) यत्तु–सूते प्रेरयत्यन्धकारम्, इति विग्रहं प्रदर्श्य 'षू प्रेरणे' (तु० प० से०) इति धातोरुपन्यसनं मुकुटेन कृतम् । तन्न । उक्तधातोस्तादृशरूपाभावात् ॥ (१) ॥*॥ सरति । 'सृ गतौ' (भ्वा० प० अ०) सुवति प्रेरयति कर्मणि लोकान्, इति वा । 'षू प्रेरणे' (तु० प० से०) । '**राजसूयसूर्य–**' (३।१।११४) इति निपातितः । '**सूर्योऽर्कपर्णे**

१—'पुंक्लीबलिङ्गम्' इति हैमेन व्याख्यातम् । दृश्यन्ते च प्रयोगा अपि ॥ २—ते राशयः 'मेषो वृषोऽथ मिथुनं कर्कटः सिंहकन्यके । तुलाथ वृश्चिको धन्वी मकरः कुम्भमीनकौ' इति स्वाम्युक्ता ज्ञेयाः । ३—'वारुणी वारुणीभूतसौरभा सौरभास्पदम्' इति दण्डियमकात् 'कुमुदाकरा इवासोढशूरभासः' इति वासवदत्ताश्लेषाच्चालव्यादिरपि—इति मुकुटः ॥

तपने स्त्री तद्धार्यौषधीमितोः' ॥ (२) ॥*॥ इयर्ति । 'श्वनुक्षन्पूषन्–' (उ० १।१५९) इति निपातितः । ('**अर्यमा** पितृदैवते । तरणौ सूर्यभक्तायाम्') ॥ (३) ॥*॥ अदितेरपत्यम् । 'दित्यदित्या–' (४।१।८५) इति ण्यः । ('**आदित्य**स्त्रिदशार्कयोः') ॥ (४) ॥*॥ द्वादश आत्मानो मूर्तयो यस्य ॥ (५) ॥*॥ दिवा दिनं करोति । 'दिवाविभा–' (३।२।३१) इति टः ॥ (६) ॥*॥ एवं भास्करादिषु । (कस्कादित्वात् ८।३।४८) भास्कराहस्करौ–इति स्वामी) । (**भास्करो** वह्निसूर्ययोः') ॥ (७) ॥*॥ (८) ॥*॥ तिमिरं बध्नाति । 'बन्धेर्ब्रधिबुधी च' (उ० ३।५) इति नक् ॥ (९) ॥*॥ (१०) ॥*॥ (११) ॥*॥ भासः सन्त्यस्य । मतुप् (५।२।९४) । ('**भास्वान्दीप्ते** रवौ') ॥ (१२) ॥*॥ विविधं वस्ते आच्छादयति । 'वस आच्छादने' (अ० आ० अ०) । क्विप् (३।२।७६) । विवो रश्मिः । विवोऽस्यास्ति । मतुप् (५।२।९४) । 'तसौ मत्वर्थे' (१।४।१९) इति भत्वाद्धत्वाभावः । ('**विवस्वान्विबुधे** सूर्ये तन्नगर्यां **विवस्वती**') ॥ (१३) ॥*॥ सप्ताश्वा यस्य ॥ (१४) ॥*॥ हरितोऽश्वा यस्य ॥ (१५) ॥*॥ उष्णा रश्मयोऽस्य ॥ (१६) ॥*॥ विशेषेण कर्तनं यस्य । विश्वकर्मणा यन्त्रोल्लीढत्वात् । विकर्तयति भक्तरोगान् इति वा । 'कृती छेदने' (रु० प० से०) । णिजन्ताल्लुट् (३।३।११३) ॥ (१७) ॥*॥ अर्च्यते । 'अर्च पूजायाम्' (भ्वा० प० से०) । कर्मणि घञ् (३।३।१८) 'चजोः–' (७।३।५२) इति कुत्वम् । यद्वा 'कृदाधारार्चिकलिभ्यः कः' (उ० ३।४०) । 'चोः कुः' (८।२।३०) । ('ऋरो झरि' (८।४।६५) कलोपः) । यद्वा 'अर्क स्तवने' (चु० प० से०) । चुरादिः । अर्क्यते । 'एरच्' (३।३।५६) 'एरजण्यन्तानाम्' इति मते घञ् । (**अर्को** द्रुभेदे स्फटिके ताम्रे सूर्ये विडौजसि') (१८) ॥*॥ मृतेऽण्डे भवः । शकन्ध्वादिः (वा० ६।१।९४) । 'परा मार्ताण्डमास्यत्' । 'पुनर्मार्ताण्डमाभरत्' इत्यादिमन्त्राद्दीर्घोऽपि 'अथ मार्तण्डमार्ताण्डौ' इति नामनिधानाच्छब्दार्णवाच्च । '**मार्तण्डः** क्रोडसूर्ययोः' ॥ (१९) ॥*॥ मेहति । 'मिह सेचने' (भ्वा० प० अ०) । 'इषिमदि–' (उ० १।५११) इति किरच् । '**मिहिरः** सूर्यबुद्धयोः' ॥*॥ महेः किरचि महिरोऽपि । '**महिरमिहिरगीथाः कालकृत्पद्मपाणिः**' इति त्रिकाण्डशेषात् ॥ (२०) ॥*॥ ऋच्छति । 'अर्तेश्च' (उ० ३।६०) इत्युनन् । ('**अरुणोऽव्यक्तरागेऽर्के** संध्यारागेऽर्कसारथौ । निःशब्दे कपिले कुष्ठभेदे ना गुणिनि त्रिषु ॥ **अरुणा**तिविषाश्यामामञ्जिष्ठात्रिवृतासु च') ॥ (२१) ॥*॥ पुणाति । पूषति वा । 'पुष पुष्टौ' (क्या० प० से०) । 'पूष वृद्धौ' (भ्वा० प० से०) वा 'श्वनुक्षन्–' (उ० १।१५९) इति निपातितः ॥ (२२) ॥*॥ दिवो मणिरिव ॥ (२३) ॥*॥ तरन्त्यनेन संसारम् । तरणिः । 'अर्तिसृधृ–' (उ० २।१०२) इत्यादिना तरतेरनिः । '**तरणि**र्द्रुमणौ पुंसि कुमारीनौकयोः स्त्रियाम्' ॥ (२४) ॥*॥ मेद्यति । 'मिदिदा स्नेहने' (दि० प० से०) । 'अमिचिमिदिशसिभ्यः क्त्रः' (उ० ४।१६४) इति क्त्रः । ('मित्रं सुहृदि न द्वयोः । सूर्ये पुंसि') ॥ (२५) ॥*॥ चित्रा भानवोऽस्य । '**चित्रभानुः** पुमान्वैश्वानरे चाहस्करेऽपि च' ॥ (२६) ॥*॥ विरोचते । 'रुच दीप्तौ' (भ्वा० आ० से०) । 'अनुदात्तेतश्च–' (३।२।१४९) इति युच् । '**विरोचनः** प्रह्लादस्य तनयेऽर्केऽग्निचन्द्रयोः' ॥ (२७) ॥*॥ विभैव वसु यस्य । '**विभावसुः** पुमान्सूर्ये हारभेदे च पावके' ॥ (२८) ॥*॥ ग्रहाणां पतिः ॥ (२९) ॥*॥ त्विषां पतिः । अलुक् ॥ (३०) ॥*॥ अहः पतिः । अहर्पतिः ॥ (३१) ॥*॥ भाति । 'दाभाभ्यां नुः' (उ० ३।३२) । ('**भानु**रंशौ रवौ दिने') ॥ (३२) ॥*॥ हन्ति । 'वृतृवदिहनि–' (उ० ३।६२) इति सः । '**हंसः** स्यान्मानसौकसि । निर्लोभनृपविष्ण्वर्कपरमात्मनि मैत्सरे ॥ योगिभेदे मन्त्रभेदे शारीरमरुदन्तरे । तुरगप्रभेदे च' ॥ (३३) ॥*॥ सहस्रमंशवो यस्य ॥ (३४) ॥*॥ तपति । ल्युः (३।१।१३४) '**तपनो**ऽरुष्करेऽपि स्याद्भास्करे निरयान्तरे' । प्रज्ञाद्यणि (५।४।३८) तापनोऽपि । तापयति वा । ल्युः (३।१।१३४) । 'तपनस्तापनो रविः' इति संसारावर्तात् ॥ (३५) ॥*॥ सुवति । 'षू प्रेरणे' (तु० प० से०) । तृच् (३।१।१३३) । यत्तु—सूयते, सूते–इति स्वामिमुकुटाभ्यामुक्तम् । तच्च । 'स्वरतिसूतिसूयति–' (७।२।४४) इतीड्विकल्पात्पक्षे 'सोता' इति रूपप्रसङ्गात् । उक्तधात्वोरर्थासंगतेश्च ॥ (३६) ॥*॥ रूयते, स्तूयते, रवते, वा । रविः 'रु शब्दे' (अ० प० से०) । 'रुङ् गतौ' (भ्वा० आ० अ०) वा । 'अच इः' (उ० ४।१३९) ॥ (३७) ॥*॥ **चण्डांशुः**, अपि । 'चण्डांशोः पारिपार्श्विकाः' इति वक्ष्यमाणत्वात् ॥*॥ सप्तत्रिंशत् '**सूर्यस्य**' ॥

माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्विकाः ॥३१॥

('**माठर** इति ॥') मनुते मठरः । स एव माठरः । 'जनेरठच्च' (उ० ५।३८) इत्यनुवर्तमाने 'वचिमनिभ्यां चिच्च' (उ० ५।३९) इत्यरप्रत्ययः ठश्चान्तादेशः । ततः प्रज्ञाद्यण् (५।४।३८) । मठति । 'मठ मदनिवासयोः' (भ्वा० प० से०) बाहुलकादरच् । मठरस्यापत्यमिति वा । ऋष्यण् (४।१।११४) । मठन्त्यनेन मठः । 'पुंसि–' (३।३।११८) इति घः । मठं राति । 'रा दाने' (अ० प० से०) । कः (३।२।३) ('**माठरो** व्यासविप्रयोः । सूर्यानुगे') ॥ (१) ॥*॥ पिङ्गलो वर्णोऽस्यास्ति । आर्श आद्यच्

१—'स्त्री तु नार्यौषधौ' इति पाठः ॥ २—मते इत्यनेन 'एरजण्यन्तानामिति वचनमनार्षम्' इति कैयटबोधितारुचिः सूचिता ॥

१—मत्सरो द्वेषः। तत्र यथा 'मुनौ विहंसे सरसीव शुष्के' इत्यनेकार्थकैरवाकरकौमुदी ॥

(५।२।१२७) । पिङ्गं वर्णं लातीति वा । कः (३।२।३) ॥ (१) ॥*॥ दण्डोऽस्यास्ति । अच् (५।२।१२७) दण्डयतीति वा । (**'दण्डः** सैन्ये दमे यमे । मानव्यूहप्रभेदेष्वश्वेऽर्कानुचरे मथि ॥ प्रकाण्डे लगुडे कोणे चतुर्थोपायवर्गयोः' ॥ (१) ॥*॥ पार्श्वे इति परिपार्श्वम् । विभक्त्यर्थेऽव्ययीभावः (२।१।६) । परिपार्श्वं वर्तते, इत्यर्थे 'परिमुखं च' (४।४।२९) इति चकारादक् । सूर्यपार्श्वस्थानां **'माठरादित्रयाणां'** एकैकम् ॥

सूर्यसूतोऽरुणोऽनूरुः काश्यपिर्गरुडाग्रजः ।

(**सूर्येति** ॥) सूर्यस्य सूतः ॥ (१) ॥*॥ अरुणो वर्णोऽस्यास्ति । अच् (५।२।१२७) । 'गुण–' (वा० ५।२।९४) इति मतुपो लुग्वा ॥ (२) ॥*॥ अविद्यमानावूरू यस्य ॥ (३) ॥*॥ कश्यपस्यापत्यम् । बाह्वादित्वात् (४।१।९६) इञ् ॥ (४) ॥*॥ गरुडस्याग्रजः ॥ (५) ॥*॥ पञ्च **'सूर्यसारथेः'** ॥

परिवेषस्तु परिधिरुपसूर्यकमण्डले ॥ ३२ ॥

(**परिवेष इति** ॥) परितो विष्यतेऽनेन । 'विष्लृ व्याप्तौ' (जु० उ० अ०) । घञ् (३।३।१८) । **'परिवेषः** स्यात्परिधौ परिवेषणे' इति मूर्धन्यान्ते रुद्रः ॥*॥ 'विश प्रवेशने' (तु० प० अ०) अस्माद्धञि तु तालव्यान्तः । **'वेष्टने परिवेशः** स्याद्भानोः सविधमण्डले' इति तालव्यान्ते रभसः ॥ (१) ॥*॥ परितो धीयतेऽनेन । 'उप–' (३।३।९२) इति किः । (**'परिधिर्यज्ञियतरोः** शाखायामुपसूर्यके') ॥ (२) ॥*॥ उपगतं सूर्यमुपसूर्यम् । प्रादिसमासः (२।२।१८) । ततः स्वार्थे कन् (५।३।९७) ॥ (३) ॥*॥ 'मडि भूषायाम्' (भ्वा० प० से०) मन्दति । वृषादित्वात् (उ० १।१०६) कलच् ॥ (४) ॥*॥ 'मण्डलं परिवेशश्च परिधिश्चोपसूर्यकम्' इति भागुरिः ॥ चत्वारि **'चन्द्रसूर्ययोरुत्पातादिजातमण्डलस्य'** ॥

किरणोऽस्रमयूखांशुगभस्तिघृणिधृष्णयः ।
भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियां॥३३॥

(**किरण इति** ॥) कीर्यते । 'कॄ विक्षेपे' (तु० प० से०) । 'कॄपॄवृजि–' (उ० २।८१) इति क्युः ॥ (१) ॥*॥ वसन्ति रसा अस्मिन् । 'वस निवासे' (भ्वा० प० अ०) । 'स्फायितञि–' (उ० २।१३) इति रक् । यजादित्वात् । (६।१।१५) संप्रसारणम् । 'न रपर–' (८।३।११०) इति न षत्वम् । (**'उस्रो** वृषे च किरणेऽप्युस्राऽर्जुन्युपचित्रयोः') ॥ (२) ॥*॥ मिमीते । 'माङ ऊखो मय च' (उ० ५।२५) इत्यूखप्रत्ययो मयादेशश्च । एतेन मापयन् प्रमापयन् गगनमोखति गच्छति । 'मा माने' (अ० प० अ०) । 'उखउखि–' (भ्वा० प० से०) इति दण्डकोक्तो गत्यर्थः । अच् (३।१।१३४) । पृषोदरादिः (६।३।१०९) इति मुकुटः परास्तः । धातुसमुदायात्प्रत्ययानामविधानात् । पृषोदरादित्वाश्रयणस्य निर्मूलत्वाच्च । (**'मयूखः** किरणेऽपि च । ज्वालायामपि शोभायाम्') ॥ (३) ॥*॥ अंशयति । 'अंश विभाजने' चुरादिः । मृगय्वादित्वात् (उ० १।३७) कुः । **'अंशुर्लेशे** रवौ रश्मौ' इति विश्वः । **'अंशुः** सूत्रादिसूक्ष्मांशे किरणे चण्डदीधितौ' ॥ (४) ॥*॥ गम्यते । 'अन्येभ्योऽपि' (वा० ३।२।४८) इति डः । गो ज्ञेयवर्गः । तं बभस्ति दीपयति ॥ गभस्तिः । 'भस भर्त्सनदीप्त्योः' (जु० प० से०) । जुहोत्यादिः 'क्तिच्क्तौ च–' (३।३।१७४) इति क्तिच् । एवं च–गगने भसति दीप्यते । 'भस भर्त्सनदीप्त्योः' । 'वसेस्तिः' (उ० ४।१८०) इति बाहुलकात्तिप्रत्ययः । पृषोदरादित्वात् (६।३।१०९) गनभागलोपः– इति मुकुटकृतं क्लिष्टकल्पनमनुपादेयम् । भसतीति विगृह्योक्तधातोरुपन्यसनं प्रामादिकम् । (**'गभस्तिः** किरणे सूर्ये ना स्त्रीहायां तु योषिति') ॥ (५) ॥*॥ जिघर्ति । 'घृ क्षरणदीप्त्योः' (जु० प० अ०) जुहोत्यादिः । छान्दसस्यापि भाषायां प्रयोगः–इति प्राञ्चः । वस्तु-तस्तु घरति । 'घृ सेचने' (भ्वा० प० अ०) भ्वादिः । 'घृणिपृश्नि–' (उ० ४।५२) इति निप्रत्ययो गुणाभावश्च निपातितः । (**'घृणिः** पुनः । अंशुज्वालातरङ्गेषु') ॥ (६) ॥*॥ धृष्णोति । 'जिधृषा प्रागल्भ्ये' (स्वा० प० से०) । 'वृषिधृषिभ्यां कित्' इति निः किच्च–इति मुकुटः । तन्न । तादृशसूत्राभावात् । अतो बाहुलकान्निः, गुणाभावश्च ॥ * ॥ **'वृष्णिः'** इति पाठान्तरम् । 'वृषु सेचने' (भ्वा० प० से०) । 'सृवृषिभ्यां कित्' (उ० ४।४९) इति निः पिच्च ॥*॥ **'पृश्निः'** इत्येके पेठुः । 'स्पृश संस्पर्शने' (तु० प० अ०) । अस्य सलोपो गुणाभावाश्च 'घृणिपृश्नि–' (उ० ४।५२) इति निपातितः । पर्शति । 'पृशु सेचने' (भ्वा० प० से०) वा ॥ (७) ॥*॥ भाति । भानुः ॥ (८) ॥*॥ कीर्यते । 'कॄ विक्षेपे' (तु० प० से०) 'ऋदोरप्' (३।३।५७) । **('करो** वर्षोपले रश्मौ पाणौ प्रत्यायशुण्डयोः') ॥ (९) ॥*॥ म्रियते तमोऽस्मिन् । 'मृकृणिभ्यामीचिः' (उ० ४।७०) स्त्रीपुंसाधिकारे—'त्रुटिमसिमरीचयः' इति लिङ्गानुशासनम् । 'द्वयोर्मरीचिः किरणो भानुरुस्रः करः **पदम्**' इति शब्दार्णवः । **'मरीचिर्मुनिभेदे** ना गभस्तावनपुंसकम्' ॥ (१०) ॥*॥ दीधीते दीप्यते । 'दीधीङ् दीप्तिदेवनयोः' (अ० आ० से०) क्तिच् (३।३।१७४) । 'तितुत्र–' (७।२।९) इतीण्निषेधस्तु न । 'अभ्रहादीनाम्'

१—इन्द्रादयो ह्यष्टादश नामान्तरेणार्कपरिचारकाः । यत्सौरम् । 'तत्र शक्रो वामपार्श्वे दण्डाख्यो दण्डनायकः । वह्निस्तु दक्षिणे पार्श्वे पिङ्गलो वामनश्च सः ॥ यमोऽपि दक्षिणे पार्श्वे भवेन्माठरसंज्ञया । एवमन्वे ग्रहहरराहु(केतु)स्वरादयः । तेषु प्राधान्यात्त्रय एवोक्ताः ।' इति स्वामिमुकुटौ ॥

१—तालव्यान्तः 'अथोडुबन्धुश्च भयंकरे करे महौषधीनष्टकरांशुभे शुभे' इति जानकीहरणे यमकादिति मुकुटः ॥

इति वार्तिकात् । 'यीवर्णयोः–' (७।४।५३) इतीकारलोपः । अयं स्त्रियामेव । 'दीधितिः स्त्रियाम्' इति लिङ्गानुशासनात् । काकाक्षिगोलकन्यायेन 'दीधितिः' इत्यत्र स्त्रियामिति संबध्यते । उत्तरत्रापि ॥ (११) ॥*॥ एकादश **'किरणानाम्'** ॥

स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः ।
रोचिः शोचिरुभे क्लीबे

(स्युरिति ॥) प्रभाति । 'आतश्चोपसर्गे' (३।१।१३६) इति कः ॥ (१) ॥*॥ रोचते । 'रुच दीप्तौ' (भ्वा० आ० से०) । क्विप् (३।२।१७८) । ('रुक् शोभाकिरणेच्छासु') ॥ (२) ॥*॥ 'इगुपधात्कित्' (उ० ४।१२०) इतीन् । **'रुचिर्दीप्तौ** च शोभायामभिष्वङ्गाभिलाषयोः' ॥ (३) ॥*॥ त्वेषति । 'त्विष दीप्तौ (भ्वा० उ० से०) क्विप् (३।२।१७८) । **('त्विट्** शोभायां जिगीषायां व्यवसाये रुचौ गिरि') ॥ (४) ॥*॥ 'भा दीप्तौ' (अ० प० से०) । दृशिग्रहणात् (वा० ३।२।१०१)ङः । टाप् (४।१।४) । **'भा** भुव्यलंकृतौ दीप्तौ स्त्रियां भाः किरणे द्युतौ' इति नानार्थरत्नमाला । यद्वा क्विप् (३।२।१७८) । आबन्तत्वाभावान्न सुलोपादिः । भाः विश्वपावत् ॥ (५) ॥*॥ 'भास दीप्तौ' (भ्वा० आ० से०) । क्विप् (३।२।१७७) भाः, भासौ । **('भाः** प्रभावे मयूखे च') ॥ (६) ॥*॥ छयति छिनत्ति वा तमः । 'कृविधृष्विच्छवि–' (उ० ४।५६) इति क्विच्नतो निपातितः ॥ (७) ॥*॥ 'द्युत दीप्तौ' (भ्वा० आ० से०) द्योततेऽनया । 'इगुपधात्कित्' (उ० ४।१२०) इतीन् ॥ (८) ॥*॥ दीप्यतेऽनया । 'दीपी दीप्तौ' (दि० आ० से०) । 'क्तिन्नादिभ्यः (वा० ३।३।९४) ॥ (९) ॥*॥ 'रुच दीप्तौ' (भ्वा० आ० से०)' रोचतेऽनेन । 'अर्चिशुचि–' (उ० २।१०८) इति इसिः ॥ (१०) ॥*॥ 'ईशुचिर् पूतीभावे' । (दि० उ० से०) । शुच्यति पूतीभवत्यनेन । इसिः ॥ (११) ॥*॥ एकादश **'प्रभायाः'** ॥

प्रकाशो द्योत आतपः ॥ ३४ ॥

(प्रकाश इति ॥) प्रकाशद्योताविति भावे (३।३।१८) करणे (३।३।१९) वा घञन्तौ । **('प्रकाशः** स्फुटहासयोः । उद्द्योतेऽतिप्रसिद्धे च') ॥ (१) ॥*॥ (२) ॥*॥ आतपस्तु पाचाद्यजन्तः ॥ (३) ॥*॥ त्रीणि **'आतपस्य'** ॥

कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति ।

कोष्णमिति ॥ ईषदुष्णं कोष्णम् । 'ईषदर्थे' (६।३।१०५) इति कादेशः ॥ (१) ॥*॥ 'कवं चोष्णे' (६।३।१०७) इति कोः कवादेशः ॥ (२) ॥*॥ कदादेशश्च ॥ (४) ॥*॥ मन्दं च तदुष्णं च ॥ (३) ॥*॥ एते गुणे क्लीबाः । गुणिनि विशेष्यनिघ्नाः ॥ चत्वारि **'ईषदुष्णस्य'** ॥

तिग्मं तीक्ष्णं खरं तद्वत्

(तिग्ममिति ॥) तेजयति । 'तिज निशाने' (चु० प० से ०) । 'युजिरुचितिजां कुश्च' (उ० १।१४६) इति मक् कवर्गश्चान्तादेशः ॥ (१) ॥*॥ 'तिजेर्दीर्घश्च' (उ० ३।१८) इति स्नक्प्रत्यये तीक्ष्णम् । **'तीक्ष्णं** सामुद्रलवणे विषलोहाजिमुष्ककै । क्लीबं यवाग्रके पुंसि तिग्मार्थेत्यागिनोस्त्रिषु' ॥ (२) ॥*॥ खमिन्द्रियं राल्यभिभवति । 'रा दाने' (अ० प० अ०) । कः (३।२।३) । **'खरं** स्यात्तीक्ष्णधर्मयोः । गर्दभेऽस्त्री देवताडे' ॥ (३) ॥*॥ तद्वत्–गुणे क्लीबम्, तद्वति त्रिषु, इत्यर्थः । त्रीणि **'अत्युष्णस्य'** । तीक्ष्णोऽसिः इत्यादावुपचारात्प्रयोगः ॥

मृगतृष्णा मरीचिका ॥ ३५ ॥

(मृगेति) ॥ मृगाणां तृष्णास्त्यस्याम् । अर्शआद्यच् (५।२।१२७) ॥ (१) ॥*॥ मरीचिरिव । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् ॥ (२) ॥*॥ द्वे **'मृगतृष्णायाः'** ॥

इति दिग्वर्गविवरणम् ॥

कालो दिष्टोऽप्यनेहापि समयोऽपि

काल इति ॥ कल्यते । 'कल संख्याने शब्दे च' (भ्वा० आ० से०) । कर्मणि घञ् (३।३।१९) कालयति सर्वम्, इति वा । ण्यन्तात्पचाद्यच् (३।१।१३४) **'कालो** मृत्यौ महाकाले समये यमकृष्णयोः' ॥ (१) ॥*॥ दिशति । 'दिश अतिसर्जने' (तु० उ० अ०) । 'क्तिच्क्तौ च संज्ञायाम्' (३।३।१७४) इति क्तः । **'दिष्टं** दैवे पुमान्काले' ॥ (२) ॥*॥ नाहन्ति नागच्छति, नाहन्यते, इति वा । 'नञ्याहन एह च' (उ० ४।२२४) इत्यसुन्, एहादेशश्च । सौ 'ऋदुशनस्–' (७।१।९४) इत्यनङ् । 'तस्माच्छुडचि' (६।३।७४) इति नुट् । सान्तः ॥ (३) ॥*॥ सम्यग् एति । 'इण् गतौ' (अ० प० अ०) पचाद्यच् (३।१।१३४) । **('समयः** शपथे भाषासंपदोः कालसंविदोः । सिद्धान्ताचारसंकेतनियमावसरेषु च ॥ क्रियाकारे निदेशे च')॥ (४) ॥*॥ चत्वारि **'सामान्यकालस्य'** ॥

अथ पक्षतिः ।

प्रतिपद् द्वे इमे स्त्रीत्वे

(अथेति ॥) पक्षस्य मूलम् । 'पक्षात्तिः' (५।२।२५) 'सर्वतोऽक्तिन्नर्थात्–' (वा० ४।१।४५) इति ङीषि तु **पक्षती** । **'पक्षतिस्तु** भवेत्पक्षमूले च प्रतिपत्तिथौ' ॥ (१) ॥*॥ प्रतिपद्यते उपक्रम्यतेऽनया मासादिः । संपदादित्वात् (वा० ३।३।१०८) क्विप् दान्ता । **'प्रतिपत्स्त्री** तिथौ मतौ' ॥ (२) ॥*॥ द्वे **'प्रतिपत्तिथेः'** ॥

तदाद्यास्तिथयो द्वयोः ॥ १ ॥

(तदाद्या इति ॥) सा प्रतिपद् आद्या यासां ताः ।

१—पचाद्यजन्त इत्युत्तरं 'खनो ड च' इति घो वा इत्यपि पाठः ॥

'अत सातत्यगमने' (भ्वा० प० से०) 'ऋतन्यञ्जि–' (उ० ४।२) इत्यतेरिथिन्। पृषोदरादित्वात् (६।३।१०९) अह्नोपः ॥ (१) ॥*॥ द्वयोरित्यत्र श्रुतत्वात्तिथिशब्द एव संबध्यते ॥ एकं **'सामान्यतिथेः'** ॥

घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ।

घस्र इति ॥ घसत्यन्धकारम्। 'घस्लृ अदने' (भ्वा० प० अ०) 'स्फायितञ्चि–'(उ० २।१३) इति रक्। **'घस्रस्तु** दिवसे हिंस्रे' ॥ (१) ॥*॥ दीयते क्षीणं भवति। 'दीङ् क्षये' (दि० आ० अ०) दिवादिः। 'इणसिञ्जिदीङ्–' (उ० ३।२) इति नक्। बाहुलकाद्ध्रस्वः। द्यति तमो, निर्व्यापारस्थितिं चेति वा। द्यतेः किनन् (उ० २।४९) ॥ (२) ॥*॥ न जाहाति। 'नञि जहातेः' (उ० १।१५८) इति कनिन्। 'रोऽसुपि' (८।२।६९) इति रः। यत्तु—'अहन्' (८।२।६८) इति रुत्वम्-इति मुकुटेनोक्तम्। तन्न। रत्वस्य रुत्वापवादत्वात् ॥ (३) ॥*॥ दीव्यन्त्यत्र। 'दिवादिभ्यः कित्' (उ० ३।१२१) इत्यसच् ॥ (४) ॥*॥ वासयति। वसतेर्ण्यन्तात् 'अर्तिकमिभ्रमि–' (उ० ३।१३२) इत्यरप्रत्ययः। **'वासरस्तु** पुमान्भागप्रभेददिनयोरपि' ॥ (५) ॥*॥ पञ्च **'दिनस्य'** ॥

प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्युषसी अपि ॥ २ ॥
प्रभातं च

प्रत्यूष इति ॥ प्रत्यूषति रुजति कामुकान्। 'ऊष रुजायाम्' (भ्वा० प० से०) 'इगुपध–' (३।१।१३५) इति कः। **'प्रत्यूषोऽहर्मुखे** वसौ' ॥ (१) ॥*॥ अह्नो मुखम्॥ (२) ॥*॥ कलयति चेष्टाम्। 'अश्यादयश्च' (उ० ४।११२) इति कलेर्यक्। ततः प्रज्ञाद्यणि (५।४।३८) **काल्यम्**, अपि। **'कल्यं** प्रभाते क्लीबं **स्यात्कल्यो** वाक्श्रुतिवर्जिते। सज्जनीरोगदक्षेषु कल्याणवचनेऽपि च ॥ उपायवचनेऽपि स्यात्रिषु मद्ये तु योषिति' ॥ (३) ॥*॥ ओषत्यन्धकारम्। 'उष दाहे' (भ्वा० प० से०) । 'उषः किच्च' (उ० ४।२३४) इत्यसिः। अन्योपसर्गनिवृत्तये प्रति। **'उषः** प्रत्युषसि क्लीबं पितृप्रस्थां च योषिति' ॥ (४) ॥*॥ (५) ॥*॥ भातुं प्रवृत्तम्। प्रभातम्। आदिकर्मणि (३।४।७१) क्तः ॥ (६) ॥*॥ षट् **'प्रभातस्य'** ॥

दिनान्ते तु सायः

(दिनेति ॥) दिनस्यान्तः। स्यति समापयति दिनम्। 'षोऽन्तकर्मणि' (दि० प० अ०)। 'शाच्छधा–' (३।१।१४१) इति णः। **'सायः** काण्डे दिनान्ते च' ॥*॥ मान्तमव्ययं लव्ययवर्गे वक्ष्यति ॥ (१) ॥*॥ एकम् **'दिनान्तस्य'** ॥

संध्या पितृप्रसूः।

(संध्येति ॥) सम्यग् ध्यायन्त्यस्याम्। 'ध्यै चिन्तायाम्' (भ्वा० प० अ०)। 'आतश्चोपसर्गे (३।३।१०६) इत्यङ्। **'संध्या** पितृप्रसूनद्यन्तरयोर्युगसंधिषु' ॥*॥ निर्यैकारोऽपि। संधीयतेऽनुसंधीतेऽस्याम्। डुधाञः (जु० उ० अ०) अङ् (३।३।१०६)। 'संध्या पितृप्रसूः **संधा**' इति शब्दार्णवः ॥ (१) ॥*॥ पितॄन् प्रसूते। क्विप् (३।२।७६)। द्वे **'संध्यायाः'** ॥

प्राह्णापराह्णमध्याह्नास्रिसंध्यम्

प्राह्णेति ॥ अहःशब्दस्तदवयवे। प्रथमं च तदहश्च प्राह्णः। 'राजाहः–' (५।४।९१) इति टच्। 'अह्नोऽह्नः–' (५।४।८८) इत्यह्नादेशः। 'अह्नोऽदन्तात्' (८।४।७) इति णत्वम् ॥ (१) ॥*॥ अह्नोपरम्–अपराह्णः। 'पूर्वापर–' (२।२।१) इत्येकदेशिसमासः ॥ (१) ॥*॥ अह्नो मध्यम् 'संख्याविसाय–' (६।३।११०) इति ज्ञापकात्समासः। 'रात्राह्नाहाः पुंसि' (२।४।२९) मध्यं च तदहश्चेति वा ॥*॥ तिसृणां संध्यानां समाहारः। 'आबन्तो वा' (वा० २।४।३०) इति पाक्षिकी क्लीबता, पक्षे त्रिसंध्यी ॥ (१) ॥*॥ एकं **'दिनाद्यन्तमध्यानाम्'** ॥

अथ शर्वरी ॥ ३ ॥

निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा।
विभावरीतमस्विन्यौ रजनी यामिनी तमी ॥ ४ ॥

(अथेति ॥) शृणाति चेष्टाः। 'शॄ हिंसायाम्' (क्या० प० से०)। 'कृशृगृवृञ्चतिभ्यः ष्वरच्' (उ० २।१२१) 'षिद्वौरा–' (४।१।४१) इति ङीष्। **'शार्वरी** यामिनीस्त्रियोः' ॥*॥ प्रज्ञाद्यणि शार्वर्यपि। 'शर्वरी **शार्वरी शर्या**' इति शब्दार्णवः ॥ (१) ॥*॥ नितरां श्यति तनूकरोति व्यापारान्। 'शो तनूकरणे' (दि० प० से०)। 'आतश्चोपसर्गे' (३।१।१३६) इति कः। **'निशा** दारुहरिद्रायां स्यात्रियामाहरिद्रयोः' इति विश्वः ॥*॥ 'निशीथिनी निशा **निट्** च **श्यामा तुङ्गी तमा** तमी' इति नामनिधानात् 'निट्' पृषोदरादित्वात् (६।३।१०९) शान्तापि ॥ (२) ॥*॥ निशीथोऽस्त्यस्याम्। इनिः (५।२।११५) ॥ (३) ॥*॥ राति सुखम्। 'रा दाने' (अ० प० से०) 'राशदिभ्यां त्रिप्' (उ० ४।६७) ॥*॥ 'कृदिकारात्–' (ग० ४।१।४५) इति ङीषि रात्रीत्यपि। **'रात्री** रात्रिस्तमस्विनी' इति शब्दार्णवः ॥ (४) ॥*॥ त्रयो यामा यस्याः। आद्यन्तयोरर्धयामयोश्चेष्टाकालत्वेन दिनप्रायत्वात्। यद्वा त्रीन्धर्मादीन् यापयति निरवकाशीकरोति कामप्रधान-

१—दन्त्यमध्यः 'रविर्मैनाग्दर्शितवासरः सरः' इति जानकीहरणम्। 'बद्धो वासरसङ्गः' इति भट्टिभाषासमावेशः—इति मुकुटः ॥ २—दीर्घमध्यः 'प्रत्यूषस्फुटितकमलामोदमैत्रीकषायः' इति माघः—इति मुकुटः ॥ ३—'कल्यं प्रधाने' इति पाठः ॥

१—'संधोज्ज्वलितः' इति वासवदत्ता—इति मुकुटः ॥ २—'गुणसंधी पुंसि' इति पाठोऽपि दृश्यते ॥

त्वात् । अन्तर्भावितण्यर्थाद्यातेः 'अर्तिस्तुसु–' (उ० १।१४०) इति मन् ॥ (५) ॥*॥ क्षणम् उत्सवं निर्व्यापारस्थितिं वा ददाति । कः (३।२।३) । **'क्षणदो** गणके, रात्रौ **क्षणदा, क्षणदं** जले' ॥ (६) ॥*॥ क्षपयति चेष्टाम् । 'क्षै क्षये' (स्वा० प० से०) अस्माण्ण्यन्तान्मितः पचाद्यच् ॥ (७) ॥*॥ विभाति नक्षत्रादिभिः । क्वनिप् (३।२।७४) । 'वनो र च' (४।१।७) इति ङीत्रौ । **'विभावरी** निशारात्र्योः कुट्टन्यां चक्रयोषिति । विवादे वस्त्रकुट्यां च' ॥ (८) ॥*॥ तमोऽस्त्यस्याम् । 'अस्मायां–' (५।२।१२१) इति विनिः ॥ (९) ॥*॥ रजन्यनुरक्ता भवन्ति रागिणोऽस्याम् । 'क्षिपेः किच्च' (उ० २।१०७) इति चकारादनिः । कित्त्वान्नलोपः (६।४।२४) । ङीप् (ग० ४।१।४५) । **'रजनी** नीलिनीरात्रिहरिद्राजतुकासु च' । ङीषभावे **रजनिरपि** ॥ (१०) ॥*॥ भीतिहेतुत्वान्निन्दिता यामा यस्याः । निन्दायामिनिः (५।२।११५) ॥ (११) ॥*॥ ताम्यन्त्यस्याम् । 'तमु ग्लानौ' (दि० प० से०) । इन् (उ० ४।११८) । 'कृदिकारात्–' (ग० ४।१।४५) इति ङीष् ॥*॥ पक्षे तमिः ॥*॥ पचाद्यचि **'तमा'** आपि ॥ (१२) ॥*॥ द्वादश **'रात्रेः'** ॥

तमिस्रा तामसी रात्रिर्

(तमिस्रेति ॥) तमो बहुलमस्त्यस्याम् । 'ज्योत्स्नातमिस्रा–' (५।२।११४) इति निपातिता । **'तमिस्रं** तिमिरे कोपे पुंसि स्त्री तु तमस्तती । कृष्णपक्षनिशायां च' ॥ (१) ॥*॥ ज्योत्स्नादिभ्य उपसंख्यानात् (वा० ५।२।१०३) मत्वर्थेऽण् । **'तामसी** निशि दुर्गायां **तामसो** भुजगे खैले' ॥ (२) ॥*॥ द्वे **'अत्यन्धकाररात्रेः'** ॥

ज्यौत्स्नी चन्द्रिकयान्विता ।

(ज्यौत्स्नीति ॥) ज्योत्स्नास्त्यस्याम् । प्राग्वदण् (वा० ५।२।१०३) **('ज्योत्स्नी** पटोलिकायां स्याज्ज्योत्स्नायुक्तनिशि स्त्रियाम्') ॥ (१) ॥*॥ एकम् **'ज्योत्स्नावद्रात्रेः'** ॥

आगामिवर्तमानाहर्युक्तायां निशि पक्षिणी ॥ ५ ॥

(आगामीति ॥) आगामिवर्तमाने च ते अहनी च । इति कर्मधारये टच् (५।३।९१) । सरेफपाठे तु समासान्तविधेरनित्यताश्रयणीया । आगामिवर्तमाने अहनी युक्ते यस्यामिति बहुव्रीहिर्वा । पूर्वापरदिने पक्षाविव स्तो यस्याम् । 'अत इनि–' (५।२।११५) ॥*॥ निशीत्युपलक्षणम् । तेन पूर्वोत्तररात्रियुक्तदिनमपि पक्षिणीति हरदत्तादयः । **'पक्षिणी** पूर्णिमायां स्याद्विहग्यां शाकिनीभिदि । आगामिवर्तमानाहर्युक्तरात्रावपि स्त्रियाम्' ॥ (१) ॥*॥ एकं **'दिनद्वयमध्यगतरात्रेः'**॥

गणरात्रं निशा बह्व्यः

(गणेति ॥) गणानां बह्वीनां रात्रीणां समाहारः । गणशब्दस्य संख्यात्वात् (१।१।२३) 'तद्धितार्थ–' (२।१।५१) इति द्विगुः । 'अहःसर्वैकदेश–' (५।४।८७) इत्यच् । 'रात्राह्नाहाः पुंसि' (२।४।२९) इति पुंस्त्वं तु न । 'संख्यापूर्वा रात्रिः' इति लिङ्गानुशासनसूत्रेण क्लीबत्वविधानात् । 'भवति नपुंसकयोगः संख्यापूर्वस्य रात्रशब्दस्य' इति वररुचिवचनाच्च । 'रात्रं प्राक् संख्ययान्वितम्' इति वक्ष्यमाणत्वाच्च । एतेन स्वामिमुकुटयोर्नपुंसकत्वसमर्थनसंभ्रमः परास्तः ॥ (१) ॥*॥ एकम् **'रात्रिसमूहस्य'** ॥

प्रदोषो रजनीमुखम् ।

(प्रदोष इति ॥) दुष्यति । 'दुष वैकृत्ये' (दि० प० अ०) । पचाद्यच् (३।१।१३४) । टाप् (४।१।४) । **('दोषा** रात्रौ भुजेऽपि च') । प्रारम्भो दोषायाः । प्रादिसमासः (२।२।१८)। प्रारब्धा दोषा यस्मिन्निति वा । 'गोस्त्रियोः–' (१।२।४८) इति ह्रस्वः ॥*॥ 'दोषा' ईत्यव्ययमप्यस्ति । **'नक्तं दोषा** च रजनौ' इति वक्ष्यते । **('प्रदोषः** कालदोषयोः') ॥ (१) ॥*॥ रजन्या मुखमिव ॥ (२) ॥*॥ द्वे **'रात्रिप्रारम्भस्य'** ॥

अर्धरात्रनिशीथौ द्वौ

(अर्धेति ॥) अर्धं रात्रेः । 'अहःसर्वैकदेश–' (५।४।८७) इत्यच् ॥ (१) ॥*॥ निशेरतेऽस्मिन् । 'शीङ् स्वप्ने' (अ० आ० से०) । 'निशीथगोपीथावगथाः' (उ० २।९) इति थक् । **'निशीथस्तु** पुमानर्धरात्रे स्याद्रात्रिमात्रके' ॥ (२) ॥*॥ द्वाविति । समाविलाकृष्यते ॥ द्वे **'रात्रिमध्यस्य'** ॥

द्वौ यामप्रहरौ समौ ॥ ६ ॥

(द्वाविति ॥) याति । 'अर्तिस्तुसु–' (उ० १।१४०) इति मन् । यत्तु—'यातेर्मग्' इति मग्—इति मुकुटेनोक्तम् । तन्न । उक्तसूत्रस्योत्प्रेक्षितत्वेन निर्मूलत्वात् । **'यामस्तु** पुंसि प्रहरे संयमेऽपि प्रकीर्तितः' ॥ (१) ॥*॥ प्रहियते ढक्कादिरस्मिन् । 'पुंसि संज्ञायाम्–' (३।३।११८) इति घः ॥ (२) ॥*॥ द्वे **'प्रहरस्य'** ॥

स पर्वसंधिः प्रतिपत्पञ्चदश्योर्यदन्तरम् ।

(स इति ॥) प्रतिपत्पञ्चदश्योर्यदन्तरम् स संधिः । स एव पर्व अपि । 'प्रतिपत्पञ्चदश्योस्तु संधिः **पर्व** प्रदिक् ककुप्' इति दुर्गः । 'संधिमभितो यजेत्' इत्यादौ प्रसिद्धः स एव । **'पर्व** क्लीबं महे ग्रन्थौ प्रस्तावे लक्षणान्तरे । दर्शप्रतिपदोः संधौ विषुवत्प्रभृतिष्वपि' ॥ (१) ॥*॥ 'पर्वसंधिः' इत्येकं नाम, इति प्राज्ञः ॥ एकम् **'पर्वसंधेः'** ॥

१—'स तमीं तमोभिरभिगम्य ताम्' इति माघदर्शनात्–इति मुकुटः ॥ २—'हा राम हा देवर तात मातः' इति विदग्धमुखमण्डनम्—इति मुकुटः ॥ ३—खगे इति पाठान्तरम् ॥ ४—'स्याद्वितूण्यां' इति पाठः ॥

१—तथा च भट्टिः 'ततः कथाभिः समतीत्य दोषामारुह्य सैन्यैः सह पुष्पकं ते' इति–इति मुकुटः ॥ २—अव्ययस्य स्त्रीलिङ्गाभावेन ङस्त्राप्राप्त्या न रूपसिद्धिः ॥

पक्षान्तौ पञ्चदश्यौ द्वे

(**पक्षेति** ॥) द्वे पञ्चदश्यौ पूर्णिमामावास्ये पक्षस्यान्तौ ॥ (१) ॥*॥ एकम् **'पक्षान्तस्य'** ॥

पौर्णमासी तु पूर्णिमा ॥ ७ ॥

(**पौर्णेति** ॥) पूर्णो मासोऽस्याम् । बहुव्रीहौ कृते स्वार्थेऽण् । प्रज्ञादेः (५।४।३८) आकृतिगणत्वात् । 'सास्मिन्पौर्णमासी' (४।२।२१) इति निर्देशाद्वा । यद्वा माश्चन्द्रः । पूर्णो माः पूर्णमाः । तस्येयम् । यद्वा 'महाराजप्रोष्ठपदाट्टञ्' (४।२।३५) इति सूत्रे 'तदस्मिन्वर्तते' इत्यर्थे 'पूर्णमासादणः' उपसंख्यानादण् । (**'पौर्णमासः** पुमान्यज्ञभेदे स्त्री पूर्णमातिथौ') ॥ (१) ॥*॥ 'पूरी आप्यायने' (दि० आ० से०) । भावे क्तः (३।३।११४) पूर्णं चन्द्रस्य पूरणम् । तेन निर्वृत्ता पूर्णिमा । भावप्रत्ययान्तात् 'तेन निर्वृत्तम्' इत्यर्थे इमप् (वा० ४।४।२०) टाप् (४।१।४) ॥ (२) ॥*॥ द्वे **'पूर्णिमायाः'** ॥

कलाहीने सानुमतिः

कलेति ॥ सा पूर्णिमा उदयकाले प्रतिपद्योगात्कलाहीने चन्द्रे । अनुमन्यते–अनुमतिः । क्तिच् (३।३।१७४) । 'अथानुमतिरूनेन्दुपूर्णिमानुज्ञयोरपि' ॥ (१) ॥*॥ एकं **'सानुमत्याः'** ॥

पूर्णे राका निशाकरे ।

(**पूर्ण इति** ॥) चन्द्रे पूर्णे तु । राति शुभम् । 'रा दाने' (अ० प० अ०) । 'कृदाधारा–' (उ० ३।४०) इति कः । बाहुलकाद्धस्वः । **'राका** नवान्तरे कच्छ्वां नवजातरजःस्त्रियाम् । संपूर्णेन्दुतिथौ' ॥ (१) ॥*॥ एकम् **'राकायाः'** ॥

अमावास्या त्वमावस्या दर्शः सूर्येन्दुसंगमः ॥ ८ ॥

(**अमेति** ॥) अमा सह वसतोऽस्यां चन्द्रार्कौ । 'अमावस्यदन्यतरस्याम्' (३।१।१२२) इति ण्यत्, पक्षे बृद्ध्यभावश्च निपात्यते ॥*॥ नामैकदेशे नामग्रहणात् **'अमा'** अपि ॥*॥ वसतेरिन्प्रत्यये (उ० ४।११८) ततो ङीषि (ग० ४।१।४५) अमावसी ॥*॥ 'इणजादिभ्यः' (वा० ३।३।१०८) इतीणि अमावासी ॥*॥ 'मसी परिणामे' (दि० प० से०) । अमा चन्द्रसूर्यौ साहचर्येण मस्यतः परिच्छिन्तोऽस्यां मासम् । अमामासी । इण् (वा० ३।३।१०८) ॥*॥ अमामसी । इन् (उ० ४।११८) ॥*॥ 'दर्शोमाऽमावसी च स्यात्' इति रभसः । 'अप्यमावस्यमावासी चामामस्यप्यमामसी' इति शब्दार्णवः ॥ (१) ॥*॥ (२) ॥*॥ दृश्यते शास्त्रेण । 'पुंसि संज्ञायाम्' (३।३।११८) इति घः । 'पक्षान्तेऽब्धौ दर्शने च **दर्शः** सूर्येन्दुसंगमे' ॥ (३) ॥*॥ सूर्येन्दू संगच्छतोऽस्मिन् । घः (३।३।११८) ॥ (४) ॥*॥ चत्वारि **'दर्शस्य'**

सा दृष्टेन्दुः सिनीवाली

(**सेति** ॥) चतुर्दशीयोगाद्दृष्टचन्द्रा सती सा अमा सिनीवाली । एन विष्णुना सह वर्तते सा लक्ष्मीः । तद्योगात् । सिनी चन्द्रकला । व्रीह्यादित्वात् (५।२।११६) इनिः । सिनीं वलति धारयति । 'कर्मण्यण्' (३।२।१) यत्तु—'स्त्रियाः पुंवत्–' (६।३।३४) इति न पुंवत्त्वम् । 'संज्ञापूरण्योश्च' (६।३।३८) इति निषेधात्–इति मुकुटः । तन्न । सिनीवालीत्यत्र सामानाधिकरण्याभावात्, असंज्ञात्वात्, अभाषितपुंस्कत्वाच्च । यद्यपि—सिनी चन्द्रकला सा बालाल्पात्र–इति तेन विगृहीतम् । तदपि न । बालेत्यस्य विशेषणत्वेन पूर्वनिपातप्रसङ्गात् । स्वामी तु—सिनी सिता बालास्त्यस्याम्–इत्याह । तन्न । पुंवद्भावप्रसङ्गात् । (**'सिनीवाली** तु दृष्टेन्दुकलामादुर्गयोः स्त्रियाम्') ॥ (१) ॥*॥ एकम् **'सिनीवाल्याः'** ॥

सा नष्टेन्दुकला कुहूः ।

(**सेति** ॥) उदये अमायोगान्नष्टचन्द्रकला सा अमा कुहूः । कुहयति । 'कुह विस्मापने' (चु० उ० से०) चुरादिः । 'नृतिशृध्योः कूः' (उ० १।९१) इति कूप्रत्ययो बाहुलकादिहापि ॥*॥ मृगय्वादित्वाङ्ङीष्ओऽपीत्यन्ये । 'धेनूरुरज्जुकुहुसरयुतनुकरेणवः स्त्रियाम्' इति विन्ध्यवासी ॥*॥ **'कुहूः** स्त्री कोकिलालापनष्टेन्दुकलदर्शयोः' ॥ (१) ॥*॥ एकम् **'कुह्वाः'** ॥

उपरागो ग्रहः

(**उपराग इति** ॥) उपरज्यतेऽनेन । 'रञ्ज रागे' (भ्वा० उ० अ०) । 'हलश्च' (३।३।१२१) इति घञ् । 'घञि च भावकरणयोः' (६।४।२७) इति नलोपः । भावे वा घञ् । (३।३।१८) । **'उपरागस्तु** पुंसि स्याद्राहुग्रासेऽर्कचन्द्रयोः । दुर्नये ग्रहकल्लोले व्यसनेऽपि निगद्यते' ॥ (१) ॥*॥ ग्रहणं ग्रहः 'ग्रहवृदृ०' (३।३।५८) इत्यप् । **'ग्रहो** निग्रैहनिर्बन्धग्रहणेषु रणोद्यमे । सूर्यादौ **पूतनादौ** च सैंहिकेयोपरागयोः' ॥ (२) ॥*॥ द्वे **'ग्रहणस्य'** ॥

राहुग्रस्ते त्विन्दौ च पूर्णि च ॥ ९ ॥

सोपप्लवोपरक्तौ द्वौ

(**राहुइति** ॥) **'उपप्लवः** सैंहिकेये विप्लवोत्पातयोरपि' । सहोपप्लवेन । 'वोपसर्जनस्य' (६।३।८२) इति सभावः ॥ (१) ॥*॥ उपरज्यते स्म । कर्मणि क्तः (३।२।१०२।४।७०) । **'उपरक्तो** व्यसनार्ते राहुग्रस्तेन्दुसूर्ययोः ॥' (२) ॥*॥ इमौ द्वौ **'राहुणा ग्रस्ते सूर्ये'** च ॥

अश्युत्पात उपाहितः ।

(**अश्युत्पात इति** ॥) अग्नेरुत्पतनम् उत्पातो वैकृतम् ॥ (१) ॥*॥ उप आसन्नम् आहितं फलं यस्य । **'उपाहितोऽनलोत्पाते पुमानारोपिते त्रिषु'** ॥ (२) ॥*॥ द्वे **'आकाशादिष्वग्निविकारस्य'** ॥

१—हैमभेदिन्योरपि–'अनुग्रह' इति पाठो दृश्यते । व्याख्यातं चानेकार्थकैरवाकरकौमुद्याम् 'अनुग्रहे प्रसादे ग्रहशब्दः सत्यभामायां भामाशब्दवत्' इति ॥

एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ ॥ १० ॥

(**एकयेति** ॥) 'पुष्प विकसने' (दि० प० से०) । भावे घञ् (३।३।१८) । पुष्पो विकासः प्रकाशश्च । तद्वन्तौ । मतुप् (५।२।९४) । एकयोक्त्या साधारणवचनेन । प्रत्येकं 'पुष्पवान्' इति न प्रयोक्तव्यमिति भावः । अकारान्तोऽपि पुष्पवन्तशब्दः । 'अव रक्षणे' (भ्वा० प० से०) । 'जृविशिभ्यां झच्' (उ० ३।१२६) इति बाहुलकादवतेरपि झच् । 'झोऽन्तः' (७।१।३) । पुष्पस्यावन्तौ इति विग्रहे शकन्ध्वादिः (वा० ६।१।९४) । 'रविशशिनौ पुष्पवन्ताख्यौ' इति नाममाला । 'पुष्पवन्ताभ्याम्, पुष्पवन्तयोः' इत्यादि । ('**पुष्पदन्तौ** पुष्पवन्तावेकोक्त्या शशिभास्करौ' । '**पुष्पदन्तौ** च चन्द्रार्कावेकोक्त्या' इति हैमतः 'पुष्पदन्तौ' अपि बोध्यौ) ॥ (१) ॥*॥ एकम् '**समुच्चितसूर्यचन्द्रयोः**' ॥

अष्टादश निमेषास्तु काष्ठा

(**अष्टादशेति** ॥) 'क्षणद्वयं **लवः** प्रोक्तो **निमेषस्तु** लवद्वयम्' इत्यादिशास्त्रसिद्धा निमेषाः । तेऽष्टादश काष्ठा । काशते । 'हनिकुषि–' (उ० २।२) इति क्थन् । '**काष्ठा** दारुहरिद्रायां कालमानप्रकर्षयोः । स्याद्दिशि स्थानमात्रे च **काष्ठ**माख्यातमिन्द्रिये' इति विश्वः ॥ (१) ॥*॥ एकम् '**काष्ठायाः**' ॥

त्रिंशत्तु ताः कला ।

(**त्रिंशदिति** ॥) ताः काष्ठाः त्रिंशत् कला ॥ कलयति । 'कल संख्याने' (चु० उ० से०) । पचाद्यच् (३।१।१३४) । ('**कला** स्यात्कालशिल्पयोः') ॥ (१) ॥*॥ एकम् '**कलायाः**' ॥

तास्तु त्रिंशत्क्षणः

(**ता इति** ॥) ताः कलाः । क्षणोति । 'क्षणु हिंसायाम्' (त० उ० से०) । अच् (३।१।१३४) । '**क्षणाः** पर्वोत्सवेऽपि स्यात्तथा मानेऽप्यनेहसः' ॥ (१) ॥*॥ एकम् '**क्षणस्य**' ॥

ते तु मुहूर्तो द्वादशास्त्रियाम् ॥ ११ ॥

(**ते त्विति** ॥) ते तु क्षणाः (द्वादश) 'हुर्छा कौटिल्ये' (भ्वा० प० से०) । बाहुलकात् 'अजिघृसि–' (उ० ३।८९) इति क्तो मुडागमश्च । 'राल्लोपः' (६।४।२१) इति छलोपः । 'हलि च' (८।२।७७) इति दीर्घः । 'लिङ् चोर्ध्वमौहूर्तिके' (३।३।१६४) इति निर्देशाद्वा मुहूर्तः ॥ (१) ॥*॥ एकम् '**मुहूर्तस्य**' ॥

ते तु त्रिंशदहोरात्रः

(**ते त्विति** ॥) ते तु मुहूर्ताः । अहश्च रात्रिश्च तयोः समाहारः । 'अहःसर्वैकदेश–' (५।४।८७) इत्यच् । 'रात्राह्नाहाः पुंसि' (२।४।२९) । यत्तु—'अह्ना सहिता रात्रिः' इति विग्रहं प्रदर्श्य 'अहोरात्रः–' इत्युपन्यस्तं मुकुटेन । तन्न । तथा सत्यजभावप्रसङ्गात् । अहःपूर्वाद्रात्रिशब्दाद्द्वन्द्व एवाज्विधानात् । 'गणरात्रवदज्' इति दृष्टान्तोऽप्यसंमतः । चकारात्संख्याव्ययादेरप्यज्विधानात् । अत्र तदादिलोपाभावात् । यदपि—समाहारे क्लीबमप्यहोरात्रम्–इत्युक्तम् । तदपि न । समाहारेऽपि 'रात्राह्नाहाः पुंसि' (२।४।२९) इत्यनेन परत्वात्पुंस्त्वविधानात् । यदपि—वामनलिङ्गानुशासने 'द्विगुरपि पात्राद्यदन्तः' इति नपुंसकत्वेन 'अहोरात्रं द्विरात्रम्' इत्युदाहृतम्–इति संमतिप्रदर्शनं कृतम् । तदपि न । 'रात्रं प्राक्संख्ययान्वितम्' इति द्विरात्रस्य नपुंसकत्वेऽपि अहोरात्रस्य तदयोगात् ॥ (१) ॥*॥ एकम् '**अहोरात्रस्य**' ॥

पक्षस्ते दश पञ्च च ।

(**पक्ष इति** ॥) तेऽहोरात्राः । पक्ष्यते । 'पक्ष परिग्रहे' (भ्वा०, चु० प० से०) । कर्मणि घञ् (३।३।१९) '**पक्षो** मासार्धके गेहे पार्श्वसाध्यविशेषयोः । केशादेः परतो वृन्दे **बले** सखिसहाययोः ॥ चुल्लीरन्ध्रे पतत्रे च राजकुञ्जरपार्श्वयोः' ॥ (१) ॥*॥ एकम् '**पक्षस्य**' ॥

पक्षौ पूर्वापरौ शुक्लकृष्णौ

(**पक्षाविति** ॥) शुक्लपक्षः पूर्वसंज्ञः ॥ (१) ॥*॥ कृष्णपक्षोऽपरसंज्ञः ॥ (१) ॥*॥ क्रमेणैकैकम् '**शुक्लकृष्णपक्षयोः**' ॥

मासस्तु तावुभौ ॥ १२ ॥

(**मास इति** ॥) तौ पक्षौ । मस्यते परिमीयतेऽयम्, अनेन वा । 'मसी परिमाणे' (दि० प० से०) । कर्मणि घञ् (३।३।१९) । 'हलश्च' (३।३।१२१) इति वा ॥ (१) ॥*॥ एकम् '**मासस्य**' ॥

द्वौ द्वौ मार्गादिमासौ स्याद्दतुः

(**द्वाविति** ॥) इयर्ति, ऋच्छति वा । 'अर्तेश्च–' (उ० १।७२) इति तुः । चात् कित्त्वम् । ('**ऋतुः** स्त्रीकुसुमे मासि वसन्तादीषुधारयोः') ॥*॥ मार्गादीनां युगैर्हेमन्तादीनृतून् वक्ष्यति । तदेकदेशमयनपरिच्छेदार्थमनुवदति द्वौ द्वाविति ॥ (१) ॥*॥ एकम् '**ऋतोः**' ॥

१—'देवताद्वन्द्वे च' (६।३।२६) इति नानङ् । तत्र 'आनङृतो द्वन्द्वे' (६।३।२५) इत्यतो द्वन्द्वग्रहणेऽनुवर्तमाने पुनर्द्वन्द्वग्रहणेन वेदलोकसहचरितद्वन्द्वस्य ग्रहणात् । अस्य तु द्वन्द्वस्यातथात्वात् । अत एव 'रविचन्द्रावपि नोपलक्षितौ' इति घटखर्परः—इति मुकुटः ॥ २—'प्राक्प्रत्यक्धरणीधरशिखरस्थितपुष्पवन्ताभ्याम्' इत्याश्चर्यमञ्जर्यामदन्तत्वदर्शनात् —इति मुकुटः ॥ ३—अनेकार्थकैरवाकरकौमुद्यां व्याख्यातं च । पुष्पे इव पुष्पे, दन्ताविव दन्तौ, पुष्पे च ते दन्तौ च पुष्पदन्तौ । यथा च । 'विश्वस्यास्य विलोचने निरयतो यत्पुष्पदन्तौ तमः' इति ॥

१—अत एव भाष्ये 'अहर्ग्रहणं द्वन्द्वार्थं द्रष्टव्यम्' इत्युक्तम् ॥
२—तेऽहोरात्रा इत्युत्तरं दश पञ्च' इत्यपि दृश्यते ॥

तैरयनं त्रिभिः ।

(**तैरिति** ॥) तैर्ऋतुभिः । अयतेऽर्कोऽनेन । ल्युट् (३।३।११७) । यत्तु—'अयतेऽर्थोऽनेन' इति विगृह्य 'इण् गतौ' (अ० प० अ०) इति धातोरुपन्यसनं-मुकुटेन कृतम् । तदसंगतम् । इति स्पष्टमेव । **'अयनं** पथि भानोरप्युदग्दक्षिणतो गतौ' ॥ (१) ॥*॥ एकम् **'अयनस्य'** ॥

अयने द्वे गतिरुदग्दक्षिणार्कस्य

(**अयने इति** ॥) अयने तु द्वे । अर्कस्योत्तरा गतिः, दक्षिणा च उत्तरदक्षिणाख्ये द्वे अयने तु वत्सरः—इति वक्तव्ये 'अर्कस्य' इति ग्रहणं चान्द्रस्वव्यावृत्त्यर्थम् । पक्षादिकं तु चान्द्रमुक्तम् । अयनं तु न चान्द्रं किं तु सौरमेव ॥
(१) ॥*॥ **'अयनद्वयस्य'** एकैकम् ॥

वत्सरः ॥ १३ ॥

(**वत्सर इति** ॥) वसन्त्यस्मिन् । 'वसेश्च' (उ० ३।७१) इति सरप्रत्ययः । 'सः स्यार्धधातुके' (७।४।४९) इति सस्य तः ॥

समरात्रिन्दिवे काले विषुवद्विषुवं च तत् ।

(**समेति** ॥) रात्रिश्च दिवा च रात्रिन्दिवम् । 'अचतुर—' (५।४।७७) इत्यादिना साधु । तत् समं यस्मिन् तादृशे काले तुलामेषावच्छिन्ने । विषु साम्येऽव्ययम् । ततो मतुप् (५।२।९४) । 'संज्ञायाम्' (८।२।११) इति वत्वम् ॥ (१) ॥*॥ 'वप्रकरणेऽन्यैरपि' (५।२।१०९) इत्युक्तेर्वैः । तेन विषुवम् । **'विषुवान्** समरात्रिवासरः' इति पुंस्काण्डे बोपालितः ॥*॥ **विषुणोऽपि** । विषु नानारूपं गमनं विष्वक् । तदस्यास्तीति विग्रहे 'विष्वगित्युत्तरपदलोपश्चाकृतसंधेः' (५।२।१००) इति पामाद्यन्तर्गणसूत्रेण नप्रत्ययः । णत्वम् (८।४।२) ॥ (२) ॥*॥ द्वे **'समरात्रिन्दिवकालस्य'** ॥

मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः ॥ १४ ॥

(**मार्गेति** ॥) मृगशिरसा युक्ता पौर्णमासी । 'नक्षत्रेण युक्तः कालः' (४।२।३) इत्यण् । 'अचि शीर्षः' (६।१।६२) । मार्गशीर्षी पौर्णमास्यस्मिन्मासे । 'सास्मिन्पौर्णमासी' (४।२।२१) इत्यण् । एतेन 'पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा । नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे' इति क्वचित्पठ्यमानं व्याख्यातम् ॥ (१) ॥*॥ सहते 'षह मर्षणे' (भ्वा० उ० आ०) असुन् (उ० ४।१८९) सान्तः । (**'सहो** बले ज्योतिषि च **सहा** हेमन्तमार्गयोः') ॥*॥ पचाद्यजन्तोऽपि । 'मार्गे **सहः** सहाः' इति शब्दार्णवः ॥ (२) ॥*॥ एकदेशप्रयोगात् मृगोऽपि । 'मृगशिरा **मृगः**' इति रुद्रकोषः । तद्युक्ता पौर्णमासी मार्गी । सास्मिन्नस्ति । (**'मार्गो** मृगमदे मासे सौम्यर्क्षेऽन्वेषणे पथि') ॥ ३ ॥*॥ आग्रहायण्या युक्ता पौर्णमास्यस्मिन् । 'आग्रहायण्यश्वत्थाट्टक्' (४।२।२२) ॥*॥ ज्योत्स्नादित्वात् (वा० ५।२।१०३) अणि **'आग्रहायणः'** अपीति पुरुषोत्तमः ॥ (४) ॥*॥ चत्वारि **'मार्गशीर्षस्य'** ॥

पौषे तैषसहस्यौ द्वौ

(**पौष इति** ॥) पुष्येण तिष्येण च युक्ता पौर्णमास्यस्मिन् । 'नक्षत्रेण—' (४।२।३) इत्यण् । 'तिष्यपुष्ययोर्नक्षत्राणि यलोपः' (वा० ६।४।१४९) ङीप् (४।१।१५) ततः 'सास्मिन्' (४।२।२१) इत्यण् । (**'पौषो** मासप्रभेदे स्यात्**पौष्यं** तु महद्युद्धयोः') ॥ (१) ॥*॥ (२) ॥*॥ सहसि बले साधुः । 'तत्र साधुः' (४।४।९८) इति यत् ॥ (३) ॥*॥ त्रीणि **'पौषस्य'** ॥

तपा माघे

(**तपा इति** ॥) तपन्त्यस्मिन् । असुन् । (उ० ४।१८९) सान्तः । **'तपो** लोकान्तरेऽपि च । चान्द्रायणादौ धर्मे च पुमान् शिशिरमाघयोः' ॥ (१) ॥*॥ मघया युक्ता पौर्णमास्यस्मिन् ॥ (२) ॥*॥ द्वे **'माघमासस्य'** ॥

अथ फाल्गुने ।

स्यात्तपस्यः फाल्गुनिकः

(**अथेति** ॥) फलति निष्पादयति । 'फल निष्पत्तौ' (भ्वा० प० से०) 'फलेर्गुक्च' (उ० ३।५६) इत्युनन् गुणागमश्च । **'फल्गुन**स्त्वर्जुने मासे नक्षत्रे **फल्गुनी** स्मृता' इति गोवर्धनानन्दः ॥*॥ प्रज्ञाद्यण् (५।४।३८) । वृद्धिः (७।२।११७) **'फाल्गुन**स्त्वर्जुने मासे **फाल्गुनी** चास्य पूर्णिमा' इति धरणिः ॥*॥ फल्गुनीभिर्युक्ता पौर्णमासी फाल्गुनी । सास्मिन्नस्ति फाल्गुनः फाल्गुनिकश्च । **'फाल्गुन**स्तु गुडाकेशे नदीजार्जुनभूरुहे । तपस्यसंज्ञमासे तत्पूर्णिमायां तु फाल्गुनी' । 'विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः' (४।२।२३) इति ठक् । पक्षेऽण् ॥ (१) ॥*॥ (३) ॥*॥ तपसि साधुः । 'तत्र साधुः' (४।४।९८) इति यत् । (**'तपस्यः** फाल्गुने मासे **तपस्या** नियमस्थितौ') ॥ (२) ॥*॥ त्रीणि **'फाल्गुनमासस्य'** ॥

स्याच्चैत्रे चैत्रिको मधुः ॥ १५ ॥

(**स्यादिति** ॥) चित्रया युक्ता पौर्णमास्यस्मिन् । अण्ठकौ (४।२।२३) । (**'चैत्रं** मृते देवकुले ना भूभृन्मासभेदयोः') (१) ॥*॥ (२) ॥*॥ मन्यते एतं मधुः । 'मन ज्ञाने' (दि० आ० अ०) । 'फलिपाटि—' (उ० ११।८) इत्युधश्चान्तादेशः । **'मधु** पुष्परसे क्षौद्रे मद्ये ना तु मधुद्रुमे । वसन्तदैत्यभिचैत्रे स्याज्जीवन्त्यां तु योषिति' ॥ (३) ॥*॥ त्रीणि **'चैत्रस्य'** ॥

वैशाखे माधवो राधः

(**वैशाख इति** ॥) विशाखया युक्ता पौर्णमास्यस्मि-

१—भाष्ये तु 'अन्येभ्योऽपि' इति दृश्यते ॥

न्नस्ति । (**'वैशाखः** स्यानके मासे मन्थानेऽपि') ॥ (१) ॥*॥ मधु मकरन्दः । सोऽस्मिन्नस्ति । 'मधोर्ञ च' (४।४।१२९) इति ञः (२) ॥*॥ राधा विशाखा । तद्वती पौर्णमासी राधी । सास्मिन्नस्ति ॥ (३) ॥*॥ त्रीणि **'वैशाखस्य'** ॥

ज्यैष्ठे शुक्रः

(**ज्यैष्ठ इति** ॥) पूर्ववदण्द्वयेन ज्यैष्ठः ॥*॥ संज्ञापूर्वकस्य विधेरनित्यत्वाद्वृद्ध्यभावे ज्येष्ठोऽपि । **'ज्येष्ठो** मासि च वृद्धे च **ज्येष्ठा** च गृहगोधिका' इति त्रिकाण्डशेषः । (**'ज्येष्ठः** स्यादग्रजे श्रेष्ठे मासभेदातिवृद्धयोः । **ज्येष्ठा** मे गृहगोधिकायाम्') ॥ (१) ॥*॥ विरहिणः शोचन्त्यस्मिन् । 'शुच शोके' (भ्वा० प० से०) 'ऋज्रेन्द्र–' (उ० २।२८) इति रक्, चकारस्य ककारश्च । **'शुक्रः** स्याद्भार्गवे ज्येष्ठमासे वैश्वानरे पुमान् । रेतोऽक्षिरुग्भिदोः क्लीबम्' ॥ (२) ॥*॥ द्वे **'ज्येष्ठमासस्य'** ॥

शुचिस्त्वयम् ।

आषाढे

(**शुचिरिति** ॥) अयमिति शुचेः पुंस्त्वाभिव्यक्त्यर्थम् । शोचन्ति विरहिणोऽस्मिन् । 'इगुपधात्कित्' (उ० ४।१२०) इतीन् किच्च ॥ (१) ॥*॥ अषाढया युक्ता पौर्णमास्यस्मिन् । **'आषाढो** व्रतिनां दण्डे मासे मलयपर्वते । स्त्री पूर्णिमायाम्' । आषाढाभिराख्यातः, इति विग्रहे तु 'अषाढकः' अपि । आख्यानण्यन्तात् (वा० ३।१।२६) 'कुन् शिल्पिसंज्ञयोः' (उ० २।३२) । 'स्यादाषाढे **त्वषाढकः**' इति शब्दार्णवः ॥ (२) ॥*॥ द्वे **'आषाढस्य'** ॥

श्रावणे तु स्यान्नभाः श्रावणिकश्च सः ॥१६॥

(**श्रावण इति** ॥) 'स्त्रीपुंसयोर्ऋक्षभेदे **श्रवणं** श्रुतिकर्णयोः' इति रभसः । श्रवणेन युक्ता पौर्णमासी श्रवणा । 'लुबविशेषे' (४।२।४) इति प्राप्तो लुब् यद्यपि 'पौर्णमास्यां नेष्यते' इत्युत्सर्गः । 'विभाषा फाल्गुनी–' (४।२।२३) इति लिङ्गात् । तथापि श्रवणशब्दादिष्यत एव । तत्रैव (४।२।२३) सूत्रे 'श्रवणा' इति निर्देशात् । 'अबाधकान्यपि निपातनानि' इति 'श्रावणी' इत्यपि । ततः 'सास्मिन्' (४।२।२१) इत्यणि श्रावणः । **'श्रावणो** मासि पाखण्डे दध्याल्यां **श्रावणा** मता' इति हैमः[1] ॥ (१) ॥*॥ विरहिणो नभ्यति, नभ्राति, नभते, वा नभाः । 'णभ हिंसायाम्' (भ्वा० प० से०, दि० प० से०, त्रया० आ० से०) । असुन् (उ० ४।१८९) । स्वामी तु—न भासते मेघच्छन्नत्वात्—इत्याह । तन्न । नभासौ, नभासः, नभाभ्याम्, नभाभिः, नभासु, इत्यादिरूपप्रसङ्गात् । 'नभः खं श्रावणो नभाः' इत्यनुपपत्तेश्च । ह्रस्वदीर्घोपधयोः शब्दभेदात् । 'भासते इत्यर्थकथनमात्रम्' इत्यभिप्रेत्य 'भस दीप्तौ' (जु० प० से०) इति जुहोत्यादेः 'न बभस्ति' इति व्युत्पत्त्याश्रयणे तु 'अत्वसन्तस्य–' (६।४।१४) इति दीर्घो न स्यात् । 'धनुर्धरे त्रिषु **नभाः** क्लीबं व्योम्नि पुमान्घने । घ्राणश्रावणवर्षासु बिसतन्तौ पतद्ग्रहे' ॥ (२) ॥*॥ 'विभाषा फाल्गुनी–' (४।२।२३) इति ठकि श्रावणिकः ॥ (३) ॥*॥ त्रीणि **'श्रावणमासस्य'** ॥

स्युर्नभस्यप्रौष्ठपदभाद्रभाद्रपदाः समाः ।

(**स्युरिति** ॥) नभा अभ्रम् । तत्र साधुर्नभस्यः ॥ (१) ॥*॥ प्रोष्ठपदाभिर्युक्ता प्रौष्ठपदी । भद्रा भद्रपदा । ताभिर्युक्ता भाद्री भाद्रपदी च पौर्णमासी । ततः 'सास्मिन्' (४।२।२१) इत्यण् ॥ (२) ॥*॥ (३) ॥*॥ (४) ॥*॥ चत्वारि **'भाद्रपदमासस्य'** ॥

स्यादाश्विन ईषोऽप्याश्वयुजोऽपि

(**स्यादिति** ॥) अश्विन्या युक्ता पौर्णमास्यस्मिन्नस्ति ॥ (१) ॥*॥ 'इष गतौ' (दि० प० से०) एषणमिट् यात्रा । क्विप् (३।२।१७८) सास्मिन्मासे जिगीषूणामस्ति । अर्शआद्यच् (५।२।१२७) ॥ (२) ॥*॥ अश्वयुजा युक्ता पौर्णमास्यस्मिन् । अण्द्वयम् (४।२।३,२१) ॥*॥ संज्ञापूर्वकत्वाद्वृद्ध्यभावे अश्वयुजोऽपि । 'आश्विनोऽश्वयुजश्चेषः' इत्यमरमाला ॥ (३) ॥*॥ त्रीणि **'आश्विनमासस्य'** ॥

स्यात्तु कार्तिके ॥ १७ ॥

बाहुलोर्जौ कार्तिकिकः

(**स्यादिति** ॥) कृत्तिकाभिर्युक्ता पौर्णमास्यस्मिन् ॥ (१) ॥*॥ बहुलाः कृत्तिकाः । अण्द्वयम् (४।२।३, २१) ॥ (२) ॥*॥ ऊर्जयति उत्साहयति जिगीषून् । 'ऊर्ज बलप्राणनयोः' (चु० प० से०) ण्यन्तात् । (३।१।२६) पचाद्यच् (३।१।१३४) । **'ऊर्जः** कार्तिके बले' इति हैमः ॥ (३) ॥*॥ 'विभाषा फाल्गुनी–' (४।२।२३) इति ठकि कार्तिकिकः ॥ (४) ॥*॥ चत्वारि **'कार्तिकमासस्य'** ॥

हेमन्तः

(**हेमन्त इति** ॥) हन्ति । 'हन्तेर्मुट् हि च' (उ० ३।१२९) इति झच् हिरादेशो मुडागमः । गुणः (७।३।८४) ॥*॥ **'हेमा'** अपि । 'सर्वत्राण् च–' (४।३।२२) इति सूत्रे यद्भाष्यम् 'हेमन्तस्य तलोपवचनानर्थक्यं हेन्नः प्रकृत्यन्तरस्य सत्त्वात्' इति । हिनोति वर्धयति बलम् । 'हि गतौ वृद्धौ च' (स्वा० प० अ०) । अन्तर्भावितण्यर्थात् 'अन्येभ्योऽपि' (३।२।७५) इति मनिन् ॥ (१) ॥*॥ **'मार्गपौषाभ्यां निष्पन्नस्य ऋतोः'** एकम् ॥

१—मेदिन्यामेवायं पाठः ॥ अमर० ७

१—मूर्धन्यान्तः 'ध्वनिमिषे निमिषे क्षणमग्रतः' इति माघयमकात्–इति मुकुटः ॥

शिशिरोऽस्त्रियाम् ।

(शिशिर इति ॥) 'शश प्लुतगतौ' (भ्वा० प० से०) 'अजिरशिशिर–' (उ० १।५३) इति किरजन्तो निपातितः । शशन्ति धावन्ति यस्मिन्पथिकाः । **'शिशिरः** स्यादृतोर्भेदे तुषारे शीतलेऽन्यवत्' इति विश्वः ॥ (१) ॥*॥ एकम् **'माघफाल्गुनाभ्यामृतोः'** ॥

वसन्ते पुष्पसमयः सुरभिः

(वसन्त इति ॥) वसन्त्यत्र मदनोत्सवाः । 'तॄभूवहिवसि–' (उ० ३।१२८) इति झच् ॥ (१) ॥*॥ पुष्पाणां समयः ॥ (१) ॥*॥ सुष्ठु रभन्ते रभसयुक्ता भवन्त्यत्र । 'रभ राभस्ये' (भ्वा० आ० अ०) । इन् (उ० ४।११८) **'सुरभि**र्हैन्नि चम्पके । जातीफले मातृभेदे रम्ये चैत्रवसन्तयोः ॥ सुगन्धौ गवि शल्लक्याम्' इति हैमः ॥ (३) ॥*॥ त्रीणि **'चैत्रवैशाखाभ्यामृतोः'** ॥

ग्रीष्म ऊष्मकः ॥ १८ ॥

निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः ।

(ग्रीष्म इति ॥) ग्रसते रसान् । 'ग्रसु अदने' (भ्वा० आ० अ०) । आतो मक्, धातोर्ग्रीभावः, पुगागमश्च 'ग्रीष्मः' (१।१४९) इत्युणादिसूत्रेण निपातितः । **'ग्रीष्म** ऊष्मर्तुभेदयोः' ॥ (१) ॥*॥ ऊषति रुजति । 'ऊष रुजायाम्' (भ्वा० प० से०) । **'अन्येभ्यः–'** (३।२।७५) इति मनिन् । ('ऊष्माणस्तु निदाघोष्णग्रीष्माः शषसहा अपि') । यावादित्वात् (५।४।२९) कन् ॥*॥ मकि (बाहुलकात्) अदन्तोऽपि । **'ऊष्मो** घर्मेऽश्रुणि तथा ज्येष्ठे, **ऊष्मा** स्त्रियां त्विषि' इति बोपालितः ॥ (२) ॥*॥ नितरां दह्यतेऽत्र । 'दह भस्मीकरणे' (भ्वा० प० अ०) । 'हलश्च' (३।३।१२१) इति घञ् । न्यङ्क्वादित्वात् (७।३।५३) कुत्वम् । **'निदाघो** ग्रीष्मकाले स्यादुष्णस्वेदाम्बुनोरपि' ॥ (३) ॥*॥ उष्णमुपगममत्र ॥ (४) ॥*॥ ओषति । 'उष दाहे' (भ्वा० प० से०) । 'इणसिजिदीङुष्यविभ्यो नक्' (उ० ३।२) । **'ऊष्णो** ग्रीष्मे पुमान्, दक्षाशीतयोरन्यलिङ्गकः' ॥ (५) ॥*॥ 'ऊष रुजायाम्' (भ्वा० प० से०) । मनिन् (३।२।७५) आगच्छति । पचाद्यच् (३।१।१३४) ऊष्मा तप आगमोऽत्र ॥*॥ 'ऊष्मा' अपि । **'ऊष्मा**तपनिदाघयोः' इति नान्ते बोपालितः ॥ (६) ॥*॥ तपति । पचाद्यच् (३।१।१३४) ॥ (७) ॥*॥ सप्त **'ज्येष्ठाषाढाभ्यामृतोः'** ॥

स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः

(स्त्रियामिति ॥) वर्षणं वृट् । 'वृषु सेचने' (भ्वा० प० से०) । संपदादित्वात् (वा० ३।३।१०८) क्विप् । प्रकृष्टा वृडत्र । 'नहिवृति–' (६।३।११६) इति दीर्घः ॥ (१) ॥*॥ वर्षं वर्षणमत्रास्ति । अर्शआद्यच् (५।२।१२७) । टाप् (४।१।४) । भूम्नि, बहुत्वे । तेन नित्यबहुवचनान्तः ॥ (२) ॥*॥ वर्षर्तौद्वे **'श्रावणभाद्राभ्यामृतोः'** ॥

अथ शरत्स्त्रियाम् ॥ १९ ॥

(अथेति ॥) शीर्यन्तेऽस्यां पाकेनौषधयः । 'शॄ हिंसायाम्' (क्र्या० प० से०) 'शॄदॄभसोऽदिः' (उ० १।१३०) । **('शरत्** स्त्री वत्सरेऽप्यृतौ) ॥*॥ भागुरिमते टापि शरदा च । 'शरद्भवेच्छरदया प्रावृट् **प्रावृषया** सह' इति विश्वः ॥ (१) ॥*॥ एकम् **'आश्विनकार्तिकाभ्यामृतोः'** ॥

षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात् ।

(षडिति ॥) अमी हेमन्तादयः । 'ऋ गतौ' 'अर्तेश्च' (उ० १।७२) इति तुः, चाक्तित् । यत्तु मुकुटेनोक्तम्—केलादय इति तुन्–इति । तन्न । गुणप्रसङ्गात्, अपाणिनीयत्वाच्च । (१) ॥*॥ **'हेमन्तादीनां षण्णाम्'** एकम् ॥

संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः २०

(संवत्सर इति ॥) संवसन्त्यृतवोऽत्र । 'वसेश्च' (३।७१) 'संपूर्वोच्चित्' (उ० ३।७२) इति सरप्रत्ययः । 'सः स्यार्धधातुके' (७।४।४९) इति तः ॥ (१) ॥*॥ एवं वत्सरोऽपि ॥ (२) ॥*॥ आप्यते 'आप्लृ व्याप्तौ' (स्वा० प० अ०) । 'अब्दादयश्च' (उ० ४।९८) इति दन् हस्वत्वं च । **'अब्दः** संवत्सरे वारिवाहमुस्तकयोः पुमान्' ॥ (३) ॥*॥ भावाज्ञहाति, जिहीते वा । 'हृश्च व्रीहिकालयोः' । (३।१।४८) इति ण्युट् । 'हायनः स्त्री' इति पाठे शरदा संबन्धः । **'हायनो** न स्त्रियां वर्षे पुंस्यर्चिव्रीहिभेदयोः' ॥ (४) ॥*॥ शृणाति । 'शॄ हिंसायाम्' (क्र्या० प० से०) 'शॄदॄभसोऽदिः' (उ० १।१३०) इत्यादिः ॥*॥ प्रज्ञाद्यणि (५।४।३८) शारदोऽपि । 'समायोषिति, **शारदः**' इति रत्नकोषः ॥ (५) ॥*॥ 'षम ष्टम वैक्लव्ये' (भ्वा० प० से०) । समन्ति विक्लवं कुर्वन्ति सर्वम् । पचाद्यच्चि (३।१।१३४) टाप् (४।१।४) । 'बहुवचननिर्देशात्प्रायेणायं बहुवचनान्तः' इति ध्वनयति । क्वचिद्वचनान्तरमपि । 'समां समां विजायते–' (५।२।१२) इति सूत्रात् । 'समायां समायाम्' इति तत्र भाष्याच्च । संमान्ति सह वर्तन्ते ऋतवोऽस्यामिति वा । 'मा माने' (अ० प० अ०) । 'आतश्चोपसर्गे' (३।३।१०६) इत्यङ् । 'समां समाम्' (५।२।१२) इति निर्देशान्मलोपः । **'समाः** संवत्सरे

१—'मनु द्वे अयने वत्सरः' इत्युक्तम् । तत्रैव वत्सरपर्याया वक्तुमुचिताः । सत्यम् । पूर्वमयनद्वयपुरस्कारेणोक्तम् । तेन मासादिः सौरो वत्सरः, अत्र तु हेमन्तादिपुरस्कारेण मार्गादिश्चान्द्रः संवत्सरः, इति न पौनरुक्त्यम् । लोकैस्तु 'द्वादशमासाः संवत्सरः' इति मासपुरस्कारेणैव प्रयुज्यते—' इति पीयूषव्याख्या ॥

स्त्रियाम् । सर्वैसाधुसमानेषु **समं** स्यादभिधेयवत्' ॥ (६) ॥*॥ षट् **'संवत्सरस्य'** ॥

मासेन स्यादहोरात्रः पैत्रः

(मासेनेति ॥) नृणां मासेन । पितॄणामयं पैत्रोऽहोरात्रः तत्र कृष्णपक्षो दिनम् । शुक्लपक्षो रात्रिः ॥

वर्षेण दैवतः ।

(वर्षेणेति ॥) नृणां वर्षेण । देवतानामयं दैवतोऽहोरात्रः । तत्रोत्तरायणं दिनम् । दक्षिणायनं रात्रिः ॥

दैवे युगसहस्रे द्वे ब्राह्मः

(दैव इति ॥) देवानां युगसहस्रद्वयेन ब्रह्मणोऽयम् 'ब्राह्मोऽजातौ' (६।४।१७१) ब्राह्मोऽहोरात्रः । दैवैः षष्ट्यधिकैस्त्रिभिरहोरात्रशतैर्दिव्यं वर्षम् । तैर्द्वादशभिः सहस्रैर्मानुषं चतुर्युगम् । तच्च देवानामेकं युगम् । तत्सहस्रं ब्रह्मणो दिनं भूतानां स्थितिकालः । तावत्येव रात्रिः प्रलयकालः ॥

कल्पौ तु तौ नृणाम् ॥२१॥

(कल्पाविति ॥) ये दैवे युगसहस्रे तौ । कल्पयतः स्थितिं प्रलयं च । 'क्लृपू सामर्थ्ये' (भ्वा० आ० से०) । ण्यन्तात् (३।१।१२) पचाद्यच् (३।१।१३४) । **'कल्पः** शास्त्रे विधौ न्याये संवर्ते ब्रह्मणो दिने' ॥ (१) ॥*॥ एकम् **'ब्रह्मणो दिनस्य'** ॥

१—'सर्वधातु' इति पाठः । २—इदं च मनूक्तमपि निशीथतो दिनान्तरप्रवृत्तिमते । वस्तुतस्तु कृष्णाष्टम्यर्धे सूर्योदयः, अमान्ते मध्याह्नः, शुक्लाष्टम्यर्धे सूर्यास्तः, पूर्णिमान्ते निशीथः पितॄणां भवति ॥ ३—इदमपि तथैव । देवानां सूर्योदयो मेषविषुवे, मध्याह्नो मिथुनान्ते, सूर्यास्तस्तुलाविषुवे, निशीथो धनुरन्ते भवति ॥ ४—'कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् । प्रोच्यते तत्सहस्रं तु ब्रह्मणो दिनमुच्यते ॥' इति विष्णुपुराणतो युगानां नामानि ज्ञेयानि । तन्मानं च मनुनेत्थमभिहितम्—'चत्वार्याहुः सहस्राणि वर्षाणां तु कृतं युगम् । तस्य तावच्छती संख्या संध्यांशश्च तथाविधः ॥ इतरेषु ससंध्येषु ससंध्यांशेषु च त्रिषु । एकापायेन वर्तन्ते सहस्राणि शतानि च ॥ एतद्द्वादशसाहस्रं देवानां युगमुच्यते । दैविकानां युगानां तु सहस्रं परिसंख्यया । ब्राह्ममेकमहर्ज्ञेयं तावतीं रात्रिमेव च ॥' इति । अस्य निष्कृष्टोऽर्थस्तु 'कृतयुगमानं दैववर्षैः ४८००, वर्षदिन ३६० गुणितं जातं मानुषवर्षमानम् १७२८०००। त्रेता दिव्यैर्वर्षैः ३६०० मानुषैः १२९६००० । द्वापरं दिव्यैः २४००, मानुषैः ८६४०००। कलिर्दिव्यैः १२०० मानुषैः ४३२००० । चतुर्युगं दिव्यैः १२००० मानुषैः ४३२०००० । ब्रह्मदिनं दिव्यैः १२००००० मानुषैः ४३२०००००० इत्थमवसेयः ॥

मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः ।

(मन्वन्तरमिति ॥) 'मनोरन्तरमवकाशः' इति विग्रहः ॥*॥ एकाधिका सप्ततिः । सा च किंचिदधिकेति बोध्यम् । एकम् **'मन्वन्तरस्य'** ॥

संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ॥ २२ ॥

(संवर्त इति ॥) संवर्तते जगदत्र । 'हलश्च' (३।३।१२१) इति घञ् । **'संवर्तः** प्रलयेऽल्पेऽपि क्षुद्रौ' इति हैमः ॥ (१) ॥*॥ प्रलीयतेऽत्र 'लीङ् श्लेषणे' (दि० आ० अ०) 'एरच्' (३।३।५६) 'प्रलयो मृतौ । संहारे नष्टचेष्टत्वे' इति हैमः ॥ (२) ॥*॥ 'कृपू सामर्थ्ये' (भ्वा० आ० से०) कल्प्यन्ते विरुद्धलक्षणया क्षीयन्तेऽत्र । 'पुंसि–' (३।३।११८) इति घः । **'कल्पो** विकल्पे कल्पद्रौ संवर्ते ब्रह्मवासरे । शास्त्रे न्याये विधौ' इति हेमचन्द्रः ॥ (३) ॥*॥ क्षीयन्ते प्राणिनोऽत्र । 'क्षि क्षये' (भ्वा० प० से०) । 'एरच्' (३।३।५६) 'पुंसि' (३।३।११८) इति घो वा । 'क्षयो गेहे च कल्पान्तेऽपचये रुजि' इति हैमः ॥ (४) ॥*॥ कल्पस्यान्तोऽवधिः । **'कल्पः** शास्त्रे विधौ न्याये संवर्ते ब्रह्मणो दिने' इति शाश्वतः ॥ (५) ॥*॥ पञ्च **'प्रलयस्य'** ॥

अस्त्री पङ्कं पुमान्पाप्मा पापं किल्बिषकल्मषम् ।
कलुषं वृजिनैनोघमंहोदुरितदुष्कृतम् ॥ २३ ॥

(अस्त्रीति ॥) पच्यते दुःखमनेन । 'पचि व्यक्तीकरणे, विस्तारे वा' (भ्वा० आ० से०) । करणे घञ् (३।३।१९) कुत्वम् (७।३।५२) । यद्वा–पञ्चनं पङ्को व्यक्तीकरणम्, विस्तारो वा । तं करोति । 'तत्करोति–' (वा० ३।१।२६) इति णिच् । ततः पचाद्यच् (३।१।१३४) । 'पङ्कोऽघे कर्दमे' इति हैमः ॥ (१) ॥*॥ आप्नोति व्याप्नोति लोकान् । 'आपॄ व्याप्तौ' (स्वा० प० अ०) 'नामन्सीमन्–' (उ० ४।१६५) इति सूत्रेण निपातितः ॥ (२) ॥*॥ पान्त्यस्मादात्मानम् । 'पा रक्षणे' (अ० प० अ०) । 'पानीविषिभ्यः पः' (उ० ३।२३) । भीमादित्वात् (३।४।७४) अपादाने । यद्वा पिबति

१—मनवो ब्रह्मसुताश्चतुर्दशैव । तथा च विष्णुपुराणे–'मनुः स्वायंभुवो नाम मनुः स्वारोचिषस्तथा । औत्तमिस्तामसिश्चैव रैवतश्चाक्षुषस्तथा ॥ एते तु मनवोऽतीताः सप्तमस्तु रवेः सुतः । वैवस्वतोऽयं यस्यैतत् सप्तमो वर्तते युगम् ॥ सावर्णिर्दक्षसावर्णो ब्रह्मसावर्ण इत्यपि । धर्मसावर्णरुद्रस्तु सावर्णो रौच्यभौत्यवत् ॥' इति मन्वन्तरमानानयनं । नामनिधाने सर्वज्ञश्रीनारायणचरणाः–'दैविकानां युगानां तु सहस्रं ब्रह्मणो दिनम् । मन्वन्तरं तथैवैकं तस्य भागाश्चतुर्दश ॥' इत्यनेन स्फुटमेवोक्तवन्तः । तथा चैकस्य मन्वन्तरस्य ३०८५७१४२८ वर्षाणि, ६ मासाः, २५ दिनानि, ४२ घटिकाः, साग्राण्येकपञ्चाशत् पलानि भवन्तीति–मुकुटाशयः ॥ २ 'क्षुद्रे' इति पाठः ॥

भक्षयति कर्तारम् । 'पा पाने' (भ्वा० प० अ०) ॥ (३) ॥*॥ केलयति क्रीडयति विषयेषु । 'किल श्वैत्यक्रीडनयोः' (तु० प० से०) । 'किलेर्बुक्च' (उ० १।५०) इति टिषच् बुगागमश्च । ('**किल्बिषं** पापरोगयोः । अपराधेऽपि') ॥ (४) ॥*॥ शुभं कर्म स्यति समाप्तं करोति । 'षोऽन्तकर्मणि' (दि० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । **पृषो**दरादित्वात् (६।४।१०९) लत्वषत्वे । '**कल्मषं** किल्बिषे क्लीबं पुंसि स्यान्नरकान्तारे' ॥ (५) ॥*॥ कलयति वशीकरोति । 'कल गतौ, संख्याने' (चु० उ० से०) । 'पृनहिकलिभ्य उषच्' (उ० ४।७५) । '**कलुषं** लाविले पापे' ॥ (६) ॥*॥ वृज्यते । 'वृजी वर्जने' (अ० आ० से०) । 'वृजेः किच्च' (उ० २।४७) इतीनच् । '**वृजिनं** कल्मषे क्लीबं केशे ना कुटिले त्रिषु' ॥ (७) ॥ यन्त्यधोऽनेन । एति गच्छति प्रायश्चित्तेनेति वा । 'इण् गतौ' (अ० प० से०) । 'इण आगसि' (उ० ४।१९८) इत्यसुन्, नुडागमश्च । ('**एनः** पापापराधयोः') ॥ (८) ॥*॥ अङ्क्ते गच्छति दानादिना । 'अधि गतौ' (भ्वा० आ० अ०) । पचाद्यच् (३।१।१३४) आगमशास्त्रस्यानित्यत्वाच्च नुम् । '**अघं** दुःखे व्यसनेनसोः' इति हैमः ॥ (९) ॥*॥ अमति गच्छति । 'अम गत्यादिषु' (भ्वा० प० से०) । 'अमेर्हुक्च' (उ० ४।२१३) इत्यसुन्, हुगागमश्च । यद्वा अंहति । 'अहि गतौ' (भ्वा० प० से०) । असुन् (उ० ४।१८९) '**अङ्गः**' इति केचित्पठन्ति । तत्र 'अधि गतौ' (भ्वा० आ० से०) धातुर्बोध्यः ॥ (१०) ॥*॥ इणो भावे क्तः (३।३।११४) । दुष्टमितं गमनमनेन ॥ (११) ॥*॥ दुष्टं कृतं करणमनेन । 'इदुदुपधस्य–' (८।३।४१) इति षः ॥ (१२) ॥*॥ द्वादश '**पापस्य**' ॥

स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ।

(**स्यादिति** ॥) धरति विश्वम् । 'धृञ् धारणे' (भ्वा० उ० से०) । 'अर्तिस्तुसु–' (उ० १।१४०) इत्यादिना मन् । '**धर्मो**ऽस्त्री पुण्य आचारे स्वभावोपमयोः क्रतौ । अहिंसोपनिषन्न्याये ना धनुर्यमसोमपे' ॥ (१) ॥*॥ पुनाति । 'पूञो यण् णुक् ह्रस्वश्च' (उ० ५।१५) इति यत् णुक् ह्रस्वश्च । यद्वा पुणति । 'पुण कर्मणि शुभे' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । पुणमर्हति । तत्र साधुर्वा । यत् (५।१।६६) ('**पुण्यं** तु सुन्दरे । सुकृते पावने धर्मे') ॥ (२) ॥*॥ अतिशयेन प्रशस्यम् । 'द्विवचन–' (५।३।५७) इतीयसुन् । 'प्रशस्यस्य श्रः' (५।३।६०) । **श्रेयो** मुक्तौ शुभे धर्मेऽतिप्रशस्ते च वाच्यवत्' ॥ (३) ॥*॥ सुष्ठु कृतम् । प्रादिसमासः (२।२।१८) ('**सुकृतं** तु शुभे पुण्ये क्लीबं सुविहिते त्रिषु') ॥ (४) ॥*॥ वर्षति फलम् । 'वृषु सेचने' (भ्वा० प० से०) । इगुपधलक्षणः (३।१।१३५) कः । '**वृषो** गव्याखुधर्मयोः । पुंराशिभेदयोः शुक्ल्यां वासके शुक्रलेऽपि च ॥ श्रेष्ठे स्यादुत्तरपदश्च' इति हैमः ॥ (५) ॥*॥ पञ्च '**धर्मस्य**' ॥

मुत्प्रीतिः प्रमदो हर्षप्रमोदामोदसंमदाः ॥ २४ ॥
स्यादानन्दथुरानन्दशर्मशातसुखानि च ।

(**मुदिति** ॥) मोदनम् । मुद् । 'मुद् हर्षे' (भ्वा० आ० से०) । संपदादि (वा० ३।३।१०८) ॥ (१) ॥*॥ 'प्रीञ् तर्पणे' (क्रया० उ० से०) । भावे क्तिन् (३।३।९४) । ('**प्रीति**र्योगान्तरे प्रेम्णि स्मरपत्नीमुदोः स्त्रियाम्') ॥ (२) ॥*॥ 'मदी हर्षे' (दि० प० से०) । 'प्रमदसंमदौ हर्षे' (३।३।६८) इत्यप् । '**प्रमदः** संमदे मत्ते स्त्रियामुन्मदयोषिति' ॥ (३) ॥*॥ (७) ॥*॥ 'हृष तुष्टौ' (दि० प० से०) । घञ् । (३।३।१८) ॥ (४) ॥*॥ प्रमोदामोदौ घञन्तौ । '**आमोदो** गन्धहर्षयोः' ॥ (५) ॥*॥ (६) ॥*॥ 'टुनदि समृद्धौ' (भ्वा० प० से०) । 'ट्वितोऽथुच्' (३।३।८९) ॥ (८) ॥*॥ आनन्दो घञन्तः ॥ (९) ॥*॥ शृणात्यशुभम् । 'शॄ हिंसायाम्' (क्रया० प० से०) । 'सर्वधातुभ्यो मनिन्' (उ० ४।१४५) । भावे वा ॥ (१०) ॥*॥ श्यति दुःखम् । 'शो तनूकरणे' (दि० प० अ०) । बाहुलकात्तन् (उ० ३।८५) भावे वा । यत्तु—श्यतेः सौत्रात्-इत्युक्तं मुकुटेन तन्न । तस्य गणपठितत्वात् । सौत्रस्य तस्यादर्शनात् ॥*॥ 'अनुपसर्गाल्लिम्प–' (३।१।१३८) इति सूत्रपठितात् 'सातेः' पचाद्यचि (३।१।१३४) '**सातम्**' दैन्त्यादि । यत्तु—सिनोत्यशुभम् । सातम् । 'षै क्षये' (भ्वा० प० अ०)–इत्युक्तं मुकुटेन । तन्न । सिनोतीति विगृह्योक्तधातूपन्यासस्य विरुद्धत्वात् । यदपि–स्यति दुःखम् । सातम् । 'षोऽन्तकर्मणि' (दि० प० अ०)–इति स्वामिनोक्तम् । तदपि न । स्यतेः के 'यति-स्यति' (७।४।५०) इतीत्वप्रसङ्गात् । तनस्त्वविधानात् । बाहुलकस्य त्वगतिकगतित्वात् । अत्र तूक्तगतेः सत्त्वात् ॥ (११) ॥*॥ शोभनानि खान्यनेन । 'सुख, दुःख, तत्क्रियायाम्' (चु० उ० से०) । भावेऽच् (३।३।५६) वा । ('**सुखं** शर्मणि नाके च **सुखा** पुर्या प्रचेतसः') ॥ (१२) ॥*॥ द्वादश '**आनन्दस्य**' ॥

श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ॥ २५ ॥
भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् ।
शस्तं च

(**श्वःश्रेयसमिति** ॥) श्व आगामि श्रेयोऽत्र । श्वःश्रेयसम् । 'श्वसो वसीयः श्रेयसः' (५।४।८०) इत्यच् समासान्तः 'श्वःश्रेयसं तु कल्याणे परमात्मनि शर्मणि' ॥*॥ **श्वोवसीयस**मपि बोध्यम् ॥ (१) ॥*॥ शेतेऽनेन । शिवम् । 'शीङ् स्वप्ने' (अ० आ० से०) । 'खर्वनिघृष्व–' (उ० १।१५३) इति वन्, ह्रस्वश्च निपातितः । '**शिवं** तु मोक्षे क्षेमे सुखे जले । **शिवो** योगान्तरे वेदे गुग्गुलौ

१—तथा च देवीशतके अनुलोमप्रतिलोमयमकम् 'सातं वर्मानन-स्थारहसिहरिहरस्थाननमार्वतंसा' इति—मुकुटः ॥

बालके हरे । पुण्डरीकद्रुमे कीले' ॥ (२) ॥*॥ भन्दते 'भदि कल्याणे' (भ्वा० आ० से०)। 'ऋज्रेन्द्र–' (उ० २।२८) इति रनि निपात्यते । **'भद्रः** शिवे खञ्जरीटे वृषभे च कदम्बके । करिजातिविशेषे ना क्लीबं मङ्गलमुस्तयोः ॥ काञ्चने च स्त्रियां राज्ञाकृष्णाव्योमनदीषु च । तिथिभेदे प्रसारिण्यां कट्फलानन्तयोरपि ॥ त्रिषु श्रेष्ठे च साधौ च न पुंसि करणान्तरे' ॥*॥ पचाद्यचि (३।१।१३४) भन्दम् । **'भन्दं** भद्रं शिवं तथा' इति त्रिकाण्डशेषः । (**'भन्दं** कल्याणे सौख्ये च') ॥ (३) ॥*॥ कल्यं नीरुजत्वमाणयति । 'कर्मण्यण्' (३।२।१)। कल्ये प्रातःकाले अण्यते । 'अण शब्दे' (भ्वा० प० से०)। 'अकर्तरि–' (३।३।१९) इति घञ्वा । **'कल्याणं** हेन्नि मङ्गले' ॥ (४) ॥*॥ 'मगि सर्पणे' (भ्वा० प० से०)। मङ्गति, मङ्क्यते वा 'मङ्गेरलच्' (उ० ५।७०)। **'मङ्गलं** पुनः । कल्याणे, **मङ्गलो** भौमे **मङ्गला** श्वेतदूर्विका' ॥ (५) ॥*॥ शोभते । 'शुभ शोभायाम्' (भ्वा० आ० से०)। 'इगुपध–' (३।१।१३४) इति कः ॥*॥ शु पूजितं भाति । 'आतः–' (३।२।३) इति को वा । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डो वा । **'शुभो** योगे **शुभं** भद्रे' ॥ (६) ॥*॥ भवनशीलम् । 'भू प्राप्तौ' (चु० आ० से०)। 'लषपतपद–' (३।२।१५४) इत्युकञ् ॥ (७) ॥*॥ **'भवो** भद्रात्मिसत्तयोः' इत्यजयः । भवो भद्रात्मिरत्रास्ति । 'अत इनिठनौ' (५।२।११५) ॥ (८) ॥*॥ भवति । 'भव्यगेय–' (३।४।६८) इति साधुः । (**'भव्यं** शुभे च सत्ये च योग्ये भाविनि तु त्रिषु । कर्मरङ्गतरौ पुंसि स्त्रियां करिकणोमयोः ॥ क्लीबमस्थनि') ॥ (९) ॥*॥ कुत्सितं शलते संवृणोति । 'शल चलने संवरणे च' (भ्वा० आ० से०)। पचाद्यच्[1] (३।१।१३४) **'कुशलं** क्षेमपुण्ययोः । पर्याप्तो **कुशलोऽभिज्ञे**[2]' ॥ (१०) ॥*॥ क्षयत्यशुभम् । 'क्षि क्षये' (भ्वा० प० अ०)। मन् (उ० १।१४०)। अस्त्रियामिति क्षेममात्रान्वयि । यत्तु—क्षिणोत्यशुभमिति विगृह्य 'क्षि क्षये' इति धातोरुपन्यसनं मुकुटेन कृतम् । तदसंगतम् । **'क्षेमस्तु** मङ्गले । लब्धसंरक्षणे मोक्षे **क्षेमो**माधनहर्ययोः' ॥ (११) ॥*॥ 'शंसु स्तुतौ' (भ्वा० प० से०) शस्यते स्म । क्तः (३।२।१०२)।—शस्यते । भावे क्तः (३।३।११४)—इति मुकुटः । **'शस्तं** क्षेमे प्रशस्ते च' ॥ (१२) ॥*॥ द्वादश **'कल्याणमात्रस्य'** ॥

अथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च ॥२६॥

(अथेति ॥) पापपुण्यशब्दौ सुखादि च शस्तान्तं शब्दजातं द्रव्ये वर्तमानं त्रिषु बोध्यम् । तत्र स्त्रियां कल्याणी । अन्ये टाबन्ताः ॥

मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ । प्रशस्तवाचकान्यमूनि

मतल्लिकेति ॥ मतल्लिकादयो नियतलिङ्गाः[1], अव्युत्पन्नाश्चेति प्राञ्चः । व्युत्पत्तिरपि संभवति । मतं मतिमलति । 'अल भूषणादौ' (भ्वा० प० से०) ण्वुल् (३।१।१३३), क्वुन् (उ० २।३२) वा । पृषोदरादित्वात् (६।३।१०९) अस्य लः ॥ (१) ॥*॥ मं शंभुं चर्चति । 'चर्च अध्ययने' (चु० उ० से०)। ण्वुल् (३।१।१३३) क्वुन् (उ० २।२८) वा । **'मः** पुनः शम्भौ' इति हैमः ॥ (२) ॥*॥ प्रकृष्टं काण्डमवसरो, रसो वास्य । प्रगतः काण्डो धर्मोऽस्मादिति वा । **'प्रकाण्डो** विटपे शस्ते मूलस्कन्धान्तरे तरोः' इति विश्वः । (३) ॥*॥ उद्धशब्दस्तु 'संधोद्धौ गणप्रशंसयोः' (३।३।८६) इति निपातितः । उत्पूर्वाद्धन्तेरप्, टिलोपः, धत्वं च निपात्यते । 'उद्धो हस्तपुटे वह्नौ श्लाघायां देहजागिले' इति हैमः ॥ (४) ॥*॥ प्रशस्तः पुरुषः=पुरुषमतल्लिका । ब्राह्मणमचर्चिका । गोप्रकाण्डम् । मनुष्योद्धः ॥*॥ लजतीति लजः । 'लज कान्तौ' (भ्वा० प० से०)। पचाद्यच् (३।१।१३४)। तद्वल्लजः तल्लजः । कुमारीतल्लजः ॥ (५) ॥*॥ प्रकाण्डः पुंस्यपि । **'अस्त्री प्रकाण्डो** विटपे तरुस्कन्धप्रशस्तयोः' । मतल्लिकादीनां रूढिशब्दत्वात् 'प्रशंसावचनैश्च' (२।१।६६) इति समासः । कृष्णसर्पवाप्यश्वादिवदेते नित्यसमासाः । उद्धस्त्वसमस्तोऽपीति स्वाम्यादयः ॥ पञ्च **'प्रशस्तस्य'** ॥

अयः शुभावहो विधिः ॥ २७ ॥

(अय इति ॥) इत्यनेन सुखम् । 'इण् गतौ–' (अ० प० से०) 'पुंसि संज्ञायाम्' (३।३।११८) इति घः ॥ (१) ॥*॥ एकम् **'शुभावहविधेः'** ॥

दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ।

(दैवमिति) ॥ देवादागतम् । 'तत आगतः' (४।३।७४) इत्यण् ॥ (१) ॥*॥ दिश्यते उपदिश्यते स्म । 'दिश अतिसर्जने' (तु० उ० अ०)। क्तः (३।२।१०२) ॥*॥ **'भाग्यैकदेशयोर्भागः'** इति रुद्रः । भाग एव । **'भागरूपनामभ्यो धेयः'** (वा० ५।४।३५)। (**'भागधेयं** मतं भाग्ये भागप्रत्ययोः पुमान्') ॥ (३) ॥*॥ भज्यते । 'भज सेवायाम्' (भ्वा० उ० अ०)। 'ऋहलोर्ण्यत्' (३।१।१२४)। 'चजोः–' (७।३।५२) इति कुत्वम् ।—'भागाद्यच्च' (५।१।४९) इति स्वामी । **'भाग्यं** कर्म शुभाशुभम्' ॥ (४) ॥*॥ नियम्यतेऽनया । क्तिन् (३।३।९४)। नियच्छति । 'क्तिच्क्तौ च–' (३।३।१७४) इति क्तिच् वा । अत एव 'स्त्री' इति विधानं सार्थकम् । **'नियति**र्नियमे दैवे' इति विश्वः ॥ (५) ॥*॥

१—पचाद्यच् इत्युत्तरं 'यद्वा–कुश्यति । कुश संश्लेषणे' 'वृथा दित्वात् किलच्' इत्यपि पाठः ॥ २—कुशलं तालव्यमध्यम् । 'कुशलवर्धितः' इति विदग्धमुखमण्डनम् । 'कुशलवयो रूपोच्छ्रायः' इति वासवदत्ताश्लेषः । 'कुष निष्कर्षे' इत्यतो मूर्धन्यमध्योऽपि, इत्यलंकारोऽमूलः—इति मुकुटः । पीयूषकृता तु कुषलं मूर्धन्यमध्यमपि—इत्युक्तम् ॥

१ इत्युत्तरं 'नतु विशेष्यनिघ्नाः' इति पुस्तकान्तरे पाठः ॥

विधीयतेऽनेन । डुधाञः 'उपसर्गे घोः किः' (३।३।९२)। '**विधिर्ब्रह्मविधानयोः**। विधिवाक्ये च दैवे च प्रकारे काल-कल्पयोः' ॥ (६) ॥*॥ षट् '**प्राक्तनशुभाशुभकर्मणः**' ॥

हेतुर्ना कारणं बीजम्

(**हेतुरिति** ॥) हिनोति व्याप्नोति कार्यम्। 'हि गतौ' (स्वा० प० अ०) । 'कमिमनि–' (उ० १।७३) इति तुन् ॥ (१) ॥*॥ कार्यतेऽनेन । ण्यन्ताल्ल्युट् (३।३।११७) ॥—करोतीति 'ल्युट् च' (३।३।११५) इति चकाराल्ल्युट्–इति मुकुटस्त्वसंगतः । '**कारणं** घातने हेतौ करणे, **कारणा** पुनः । यातना कौर्मणं मन्त्रादियोगे कर्मकारके' इति हैमः ॥ (२) ॥*॥ विशेषेण जायतेऽनेन । 'उपसर्गे च संज्ञायाम्' (३।२।९९) इति डः । 'अन्येषामपि–' (६।३।१३७) इति दीर्घः । यद्वा वीयते । 'व्येञ् संवरणे' (भ्वा० उ० अ०)। संपदादि क्विप् (वा० ३।३।१०८) वियं संवृतं जायते जनयति । अन्तर्भावितण्यर्थः । 'अन्येष्वपि–' (३।१।१०१) इति डः । विशेषेण एः कामात्, इना वा जायते । विशिष्टा ई लक्ष्मीर्जायतेऽस्मादिति वा । वजति कार्यं गच्छति । 'वज गतौ' । (भ्वा० प० से०)। अच् (३।१।१३४)। पृषोदरादित्वात् (६।३।१०९) ईलम्। बवयोरभेदाद्बीजम् । 'बीजं तु रेतसि । स्यादाधाने च तत्त्वे च हेतावङ्कुरकारणे' इति हैमः ॥ (३) ॥*॥ त्रीणि '**कारणस्य**' ॥

निदानं त्वादिकारणम् ॥ २८ ॥

(**निदानमिति** ॥) नितरां दीयतेऽसाधारणतया जन्यतेऽनेन । 'डुदाञ्' (जु० उ० अ०)। 'करणा–' (३।३।११७) इति ल्युट् । '**निदानं** कारणे शुद्धौ तपसः फलयाचने । वत्सदाम्न्यवसाने च' ॥ (१) ॥*॥ आदिर्मुख्यं कारणम् ॥ (२) ॥*॥ द्वे '**मुख्यकारणस्य**' ॥

क्षेत्रज्ञ आत्मा पुरुषः

(**क्षेत्रज्ञ इति** ॥) क्षीयते इति क्षेत्रं शरीरम्। तज्जानाति । 'ज्ञा अवबोधने' (क्र्या० प० अ०)। 'आतोऽनुप–' (३।२।३) इति कः । यत्तु—क्षेत्रे जानाति–इति मुकुटः । तन्न । 'एतद्यो वेत्ति–' इति प्रागुपन्यस्तगीताविरोधात् । '**क्षेत्रज्ञावात्मनिपुणौ**' इति हैमः ॥ (१) ॥*॥ अतति । 'अत सातत्यगमने' (भ्वा० प० से०) । 'सातिभ्यां मनिन्मनिणौ' (उ० ४।१५३) इति मनिण् । ('**आत्मा** चित्ते धृतौ यत्ने धिषणायां कलेवरे । परमात्मनि जीवेऽर्के हुताशनसमीरयोः ॥ स्वभावे') ॥ (२) ॥*॥ पुरति । 'पुर अग्रगमने' (तु० प० से०)। 'पुरः कुषन्' (उ० ४।७४)। 'अन्येषामपि–' (६।३।१३७) इति दीर्घत्वे '**पुरुषः**' अपि । पूरयति । 'पूरी आप्यायने' (दि० आ० से०) । बाहुलकात्कुषन् । '**पुरुष**स्त्वात्मनि नरे पुंनागे च' इति हैमः ॥ (३) ॥*॥ त्रीणि '**आत्मनः**' ॥

प्रधानं प्रकृतिः स्त्रियाम् ।

(**प्रधानमिति** ॥) प्रधत्तेऽत्र सर्वम्। ल्युट् (३।३।११७), प्रधत्ते सर्वमात्मनीति वा । 'बहुलमन्यत्रापि' (उ० २।७८) इति युच्। प्रकृष्टं धानमनेन वा । '**प्रधानं** प्रकृतौ बुद्धावुत्तमे परमात्मनि । महामात्रे' इति हैमः ॥ (१) ॥*॥ प्रकृष्टा कृतिः कार्यं यस्याः, प्रकरोतीति वा । क्तिच् (३।३।१७४)। '**प्रकृति**र्गुणसाम्ये स्यादमात्यादिस्वभावयोः । योनौ लिङ्गे पौरवर्गे ॥' (२) ॥*॥ द्वे '**मायायाः**' ॥

विशेषः कालिकोऽवस्था

(**विशेष इति** ॥) कालकृतो धर्मो यौवनादिर्विशेषोऽवस्था। कालेन निर्वृत्तः । 'निर्वृत्तेऽक्षद्यूतादिभ्यः' (४।४।१९) इति ठक्। अवपूर्वात्तिष्ठतेरङ् (३।३।१०६)। 'व्यवस्थायाम्' (१।१।३४) इति ज्ञापकात् ॥ (१) ॥*॥ एकम् '**कालावस्थायाः**' ॥

गुणाः सत्त्वं रजस्तमः ॥२९॥

(**गुणा इति** ॥) सतो भावः सत्त्वम्। सीदन्त्यस्मिन् गुणादय इति वा । सदेस्त्वन् (उ० ४।१०५) '**सत्त्वं** द्रव्ये गुणे चित्ते व्यवसायस्वभावयोः । पिशाचादावात्मभावे बले प्राणेषु जन्तुषु' ॥ (१) ॥*॥ रज्यति । 'भूरञ्जिभ्यां कित्' (उ० ४।२१७) इत्यसुन् । ('**रजो** रेणुपरागयोः । स्त्रीपुष्पे गुणभेदे च') ॥ (१) ॥*॥ तम्यत्यनेन । 'तमु ग्लानौ' (दि० प० से०)। असुन् ॥*॥ कप्रत्यये 'रजतमौ' अदन्तपुंलिङ्गावपि । 'पुष्पे वेशे गुणे चैव **रजोऽयं** रजसा सह' इत्युत्पलिनी । '**रजोऽयं** रजसा सार्धं स्त्रीपुष्पगुणधूलिषु' इत्यजयः ॥ (१) ॥*॥ '**त्रयाणां गुणानामपि**' एकैकम् ॥

जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः ।

(**जनुरिति** ॥) जननम्। 'जनी प्रादुर्भावे' (दि० आ० से०) 'जनेरुसिः' (उ० २।११५) ॥ (१) ॥*॥ ल्युटि (३।३।११५) जननम्। यत्तु—'जन जनने' (जु० प० से०)—इति मुकुटेनोक्तम्। तन्न । तस्य छान्दसत्वात्। ('**जननी** तु दयामात्रोर्**जननं** वंशजन्मनोः') ॥ (२) ॥*॥ मनिनि (उ० ४।१४५) जन्म ॥*॥ 'इषियुधीन्धि–' (उ० १।१४५) इति मकि **जन्म**शब्दोऽदन्तः पुंलिङ्गः । 'क्लीबोऽपि' इत्युज्ज्वलदत्तः ॥ (३) ॥*॥ 'जनिघसिभ्यामिण्' (उ० ४।१३०)। 'जनिवध्योश्च' (७।३।३५) इति वृद्धिनिषेधः । उत्पत्तिसाहचर्याज्जनेः स्त्रीत्वम् ॥ (४) ॥*॥ उत्पदनम्। 'पद् गतौ' (दि०

१—इदं तु न प्रकृतोपयोगि ॥

१—'सत्यं वदन्ति ते कस्मादसत्यं नीरजस्तमाः' इति प्रयोगात्–इति मुकुटबुधमनोहरे ॥ २—'किमर्थं जनिना जन्तोः' इत्यादि प्रयोगदर्शनात्पुंस्त्वमपि—इति मुकुटपीयूषौ ॥

आ० अ०) । क्तिन् (३।३।९४) ॥ (५) ॥*॥ उद्भवनम् । 'ऋदोरप्' (३।३।५७) ॥ (६) ॥*॥ षट् **'जननस्य'** ॥

प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः ॥३०॥

(**प्राणीति** ॥) प्राणाः सन्त्यस्य । 'अत इनि–' (५।२।११५) इतीनिः ॥ (१) ॥*॥ चेतयते, चेतति वा । नन्द्यादिः (३।१।१३४) । (**'चेतनः** स्यात्सहृदयप्राणिनोश्चेतना तु धीः') ॥ (२) ॥*॥ जन्मास्यास्ति । 'अत इनि–' (५।२।११५) । नान्तात्तु व्रीह्यादित्वात् (५।२।११६) ॥ (३) ॥*॥ जायते । 'कमिगमिजनि–' (उ० १।७३) इति तुन् ॥ (४) ॥*॥ 'यजिमनि–' (उ० ३।२०) इति युच् । (**'जन्युः** स्याज्जन्तुमात्रे च पावके परमेष्ठिनि') ॥ (५) ॥*॥ जन्यु शरीरमस्यास्ति । इनिः (५।२।११५) ॥ (६) ॥*॥ षट् **'प्राणिनः'** ॥

जातिर्जातं च सामान्यम्

(**जातिरिति** ॥) जायते । 'जनी प्रादुर्भावे' (दि० आ० से०) । 'क्तिच्क्तौ च–' (३।३।१७४) इति क्तिच् । 'जनसन–' (६।४।४२) इत्यादिनात्वम् । 'तितुत्र–' (७।२।९) इति नेट् । **'जातिः** सामान्यगोत्रयोः । मालत्यामालक्यां च चुल्लयां कम्पिल्लजन्मनोः ॥ जातीफले छन्दसि च' इति हैमः ॥ (१) ॥*॥ के (३।३।१७४) जातम् । **'जातं** व्यक्तौघजन्मसु । क्लीबं, त्रिलिङ्गमुत्पन्ने' ॥ (२) ॥*॥ समानानां भावः । 'गुणवचन–' (५।१।१२४) इति ष्यञ् ॥ (३) ॥*॥ त्रीणि **'घटत्वादिजातेः'** ॥

व्यक्तिस्तु पृथगात्मता ।

(**व्यक्तिरिति** ॥) व्यज्यतेऽनया । 'अञ्जू व्यक्त्यादौ' (रु० प० से०) 'स्त्रियां क्तिन्' (३।३।९४) । व्यनक्ति वा । क्तिच् (३।३।१७४) ॥ (१) ॥*॥ पृथगात्मा यस्य तस्य भावः । तल् (५।१।११०) ॥ (२) ॥*॥ द्वे **'घटादिव्यक्तेः'** ॥

चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ॥ ३१ ॥

(**चित्तमिति** ॥) 'चिती संज्ञाने' (भ्वा० प० से०) । भावे क्तः (३।३।११४) । 'श्वीदितः–' (७।२।१४) इतीण्निषेधः ॥ (१) ॥*॥ असुनि (उ० ४।१८९) चेतः ॥ (२) ॥*॥ ह्रियते विषयैः 'वृहोः घुरदुकौ च' (उ० ४।१००) इति कयन् दुगागमश्च । हरति आहरति विषयानिति वा । (**'हृदयं** वक्षसि स्वान्ते वुक्कायाम्') ॥ (३) ॥*॥ 'स्वन शब्दे' (भ्वा० प० से०) । स्वन्यते स्म । 'क्षुब्धस्वान्त–' (७।२।१८) इति मनसि निपातितम् । (**'स्वान्तं** चेतसि गह्वरे') ॥ (४) ॥*॥ हृदयस्य 'पदन्नस्–' (६।१।६३) इति हृदादेशः । प्रभृतिग्रहणस्य प्रकारार्थत्वात्क्वचित्स्यादावपि । हरतेः क्विप् (३।२।१७८) । तुक् (६।१।७१) । व्यत्ययेन तस्य द इत्यन्ये । (**'हृत्** क्लीबं वुक्कचित्तयोः') ॥ (५) ॥*॥ मन्यतेऽनेन । असुन् (उ० ४।१८९) । प्रज्ञाद्यणि (५।४।३८) मानसम् । (**'मानसं** स्वान्तसरसोः') ॥ (६) ॥*॥ तदभावे मनः । (**'मन**श्चित्ते मनीषायाम्') । अर्धर्चादिः (२।४।३१) अयम्–इत्येके । तदा 'मनाः' इत्यपि ॥ (७) सप्त **'मनसः'** ॥

॥ इति कालवर्गविवरणम् ॥

बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।
प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः ॥ १ ॥

(**बुद्धिरिति** ॥) बुध्यतेऽनया । बोधनं वा । क्तिन् (३।३।९४) ॥ (१) ॥*॥ 'ईष गतिहिंसादर्शनेषु' (भ्वा० आ० से०) । 'गुरोश्च हलः' (३।३।१०३) इत्यप्रत्ययः । मनस ईषा । शकन्ध्वादित्वात् (वा० ६।१।९४) टेः पररूपम् ॥ (२) ॥*॥ धृष्णुवन्त्यनया । 'जिधृषा प्रागल्भ्ये' (स्वा० प० से०) 'धृषेर्धिष् च संज्ञायाम्' (उ० २।८२) इति युच् ॥ (३) ॥*॥ ध्यायत्यनया । ध्यानं वा । 'ध्यायतेः संप्रसारणं च' (वा० ३।२।१७८) इति क्विप् । 'हलः' (६।४।२) इति दीर्घः । (**'धी**र्ज्ञाने ज्ञानभेदेऽपि') ॥ (४) ॥*॥ प्रज्ञायतेऽनया । प्रज्ञानं वा । 'ज्ञावबोधने' (क्र्या० प० अ०) । 'आतश्चोपसर्गे' (३।३।१०६) इत्यङ् । (**'प्रज्ञ**स्तु पण्डिते वाच्यलिङ्गो, बुद्धौ तु योषिति') ॥*॥ श्रद्धापि । 'प्रज्ञा **श्रद्धा धरा** ज्ञप्तिः **पण्डा संवेदनं विदा**' इति शब्दार्णवात् ॥ (५) ॥*॥ शेते । शेः विच् (३।२।७५) । मोहः । तं मुष्णाति । शेमुषी । 'मुष स्तेये' (क्र्या० प० से०) मूलविभुजादित्वात् (वा० ३।२।५) कः । गौरादित्वात् (४।१।४१) ङीष् ॥ (६) ॥*॥ मन्यतेऽनया । मननं वा । 'मन ज्ञाने' (दि० आ० अ०) । क्तिन् (३।३।९४) । (**'मति**र्बुद्धीच्छयोः') ॥ (७) ॥*॥ प्रकृष्टमीक्षणम् । अनया 'गुरोश्च–' (३।३।१०३) इत्यः । टाप् (४।१।४) । **'प्रेक्षा**धीरीक्षणं नृत्तम्' इति हैमः ॥ (८) ॥*॥ उपलम्भनम् । उपलभ्यतेऽनया वा । 'डुलभष् प्राप्तौ' (भ्वा० आ० अ०) । षित्त्वात् (३।३।१०४) अङि प्राप्ते आबादित्वात् (वा० ३।३।९४) बाहुलकाद्वा क्तिन् । (**'उपलब्धि**र्मतौ प्राप्तौ') ॥ (९) ॥* ॥ 'चिती संज्ञाने' (भ्वा० प० से०) संपदादित्वात् (३।३।१०८) क्विप् । चित् तान्ता ॥ (१०) ॥*॥ संवेदनम् । 'विद ज्ञाने' (अ० प० से०) । (**'संवित्** संभाषणे ज्ञाने संग्रामे नाम्नि तोषणे । क्रियाकारे प्रतिज्ञायां संकेताचारयोरपि') (११) ॥*॥ प्रतिपदनम् । 'पद गतौ' (दि० आ० से) । संपदादित्वात् (वा० ३।३।१०८) । क्विप् । करणे वा ॥ (१२) ॥*॥ **'ज्ञप मिच्च'** (चु० प० से०) चुरादिः । ण्यन्तत्वाद्युचि (३।३।१०७) प्राप्ते आबादित्वात् (वा० ३।३।९४) बाहुलकाद्वा क्तिन् । यदा तु चुरादीनां णिजभावे सामान्यापेक्षं ज्ञापकम् । तदा क्तिन् न्याय्य

१—हैमे तु 'जात्योघ' इति पठितम् । जातिः सामान्यम् । तत्र यथा 'रत्नं सुजातं कनकावदातम्' इत्यनेकार्थकैरवाकरकौमुदी ॥

एव । 'तितुत्र–' (७।२।९) इति नेट् ॥ (१३) ॥*॥ 'चित संचेतने' (चु० आ० से०) चुरादिः । 'ण्यासश्रन्थः–' (३।३।१०७) इति युच् । **'चेतना** संविदि स्त्रियाम् । वाच्यवत्प्राणयुक्ते' ॥ (१४) ॥*॥ चतुर्दश **'बुद्धेः'** ॥

धीर्धारणावती मेधा

(**धीरिति** ॥) धारणाशक्तियुक्ता धीः । 'मेधृ संगमे' (भ्वा० उ० से०) मेधते संगच्छते सर्वमस्याम् । 'गुरोश्च–' (३।३।१०३) इत्यकारः । (**'मेधा** बुद्धौ, क्रतौ पुमान्') ॥ (१) ॥*॥ एकम् **'धारणावद्बुद्धेः'** ॥

संकल्पः कर्म मानसम् ।

(**संकल्प इति** ॥) इदमिदं कुर्यामिति मनसः कर्म व्यापारः । संकल्पनम् । 'कृपू सामर्थ्ये' (भ्वा० आ० से०) । भावे घञ् (३।२।१८) ॥ (१) ॥*॥ एकम् **'मनोव्यापारस्य'** ॥

चित्ताभोगो मनस्कारः

(**चित्तेति** ॥) चित्तस्य मनस आभोगस्तदेकप्रवणता पूर्णता वा **'आभोगो** वारुणच्छत्रे पूर्णतायत्नयोरपि' । 'भुज पालनाभ्यवहारयोः' (रु० प० अ०) । भावे घञ् (३।३।१८) ॥ (१) ॥*॥ मनसः कारो व्यापारविशेषः । 'डुकृञ्' (त० उ० अ०) । भावे घञ् (३।३।१८) । 'अतः कृकमि–' (८।३।४६) इति सत्वम् ॥ (२) ॥*॥ द्वे **'मनसः सुखादौ तत्परत्वस्य'** ॥

चर्चा संख्या विचारणा ॥२॥

(**चर्चेति** ॥) 'चर्च अध्ययने' (चु० उ० से०) चुरादिण्यन्ताद्भावे 'चिन्तिपूजि–' (३।३।१०५) इत्यङ् । (**'चर्चा** स्याच्चर्यमुण्डायां चिन्तास्थासकयोरपि') ॥ (१) ॥*॥ संख्यानम् । 'चक्षिङः ख्याञ्' । (२।४।५४) । 'आतश्च–' (३।३।१०६) इत्यङ् । **'संख्यै**कादौ विचारे च' ॥ (२) ॥*॥ 'चर असंशये' (चु० उ० से०) चुरादिः । 'ण्यास–' (३।३।१०७) इति युच् ॥ (३) ॥*॥ त्रीणि **'विचारणस्य'** ॥

अध्याहारस्तर्क ऊहः

(**अध्याहार इति** ॥) अध्याहरणम् । अध्याङ्पूर्वो हृञ् । (भ्वा० उ० अ०) भावे घञ् (३।३।१८) ॥ (१) ॥*॥ अपूर्वोत्प्रेक्षणं तर्कणम् । 'तर्क भाषार्थः' चुरादौ 'पटपुट–' इति दण्डके पठितः । भावे घञ् (३।३।१८) कृन्तति, कृन्तते वा अच् (३।१।१३४) घञौ (३।३।१९) । पृषोदरादित्वात् (६।३।१०९) वर्णविपर्ययः । **'तर्को** वितर्के काङ्क्षायामूहकर्मविशेषयोः' इति हैमः ॥ (२) ॥*॥ ऊहनम् 'ऊह वितर्के' (भ्वा० आ० से०) । भावे घञ् (३।३।१८) ॥ (३) त्रीणि **'तर्कस्य'** ॥

१—वाच्यप्रमाणस्तर्गे ॥

विचिकित्सा तु संशयः ।

संदेहद्वापरौ च

(**विचिकित्सेति** ॥) 'कित संशये' (भ्वा० प० से०) । 'गुप्तिज्किद्भ्यः सन्' (३।१।५) । 'अ प्रत्ययात्' (३।३।१०२) । विचिकित्सा ॥ (१) ॥*॥ 'शीङ्' (अ० आ० से०) । 'एरच्' (३।३।५६) । संशयः ॥ (२) ॥*॥ 'दिह उपचये' (अ० उ० अ०) । संदेहनम् । घञ् (३।३।१८) ॥ (३) ॥*॥ द्वौ परौ प्रकारौ यस्य । 'सर्वनामसंख्ययोः–' (वा० २।२।३५) इति द्विशब्दस्य पूर्वनिपातः । पृषोदरादित्वात् (६।३।१०९) आत्वम् । (**'द्वापरं** संशये युगे') ॥ ॥*॥ चत्वारि **'एकधर्मिणि विरुद्धानेककोट्यवगाहिज्ञानस्य'** ॥

अथ समौ निर्णयनिश्चयौ ॥ ३ ॥

(**अथेति** ॥) 'णीञ् प्रापणे' (भ्वा० उ० अ०) । निर्णयनम् । 'एरच्' (३।३।५६) । 'उपसर्गादसमासेऽपि–' (८।४।१४) इति णत्वम् ॥ (१) ॥*॥ 'चिञ् चयने' (स्वा० उ० अ०) निश्चयनम् । 'ग्रहवृदृ–' (३।३।५८) इत्यप् ॥ (२) ॥*॥ द्वे **'निश्चयस्य'** ॥

मिथ्यादृष्टिर्नास्तिकता

(**मिथ्येति** ॥) 'मिथ्या' इत्यपह्नवे । तद्विषयिणी दृष्टिः ॥ (१) ॥*॥ नास्ति परलोक इति मतिरस्य । 'अस्तिनास्तिदिष्टंमतिः' (४।४।६०) इति ठक् । तस्य भावो नास्तिकता ॥ (२) ॥*॥ द्वे **'परलोको नास्तीत्यादिबुद्धेः'** ॥

व्यापादो द्रोहचिन्तनम् ।

(**व्यापाद इति** ॥) 'पद गतौ' (दि० आ० अ०) व्याङ्पूर्वः । व्यापादनम् । ण्यन्तात् (३।१।२६) घञ् (३।३।१८) ॥ (१) ॥*॥ द्रोहस्य चिन्तनम् । 'ल्युट् च' (३।३।११५) ॥ बाहुलकाल्ल्युट्–इति मुकुटः । तन्न । स्त्रीत्वविशिष्टे भावे अङः (३।३।१०५) विहितत्वेन नपुंसकत्वविशिष्टे भावे ल्युटो निरपवादत्वात् ॥ (२) ॥*॥ द्वे **'द्रोहचिन्तनस्य'** ॥

समौ सिद्धान्तराद्धान्तौ

(**समाविति** ॥) सिद्धोऽन्तो निश्चयो यस्मिन् ॥ (१) ॥*॥ राद्धः सिद्धोऽन्तो निश्चयोऽस्मिन् ॥ (२) ॥*॥ द्वे **'सिद्धान्तस्य'** ॥

भ्रान्तिर्मिथ्यामतिर्भ्रमः ॥ ४ ॥

(**भ्रान्तिरिति** ॥) 'भ्रमु चलने' (भ्वा० प० से०) । भावे क्तिन् (३।३।९४) 'अनुनासिकस्य–' (६।४।१५) इति दीर्घः । **'भ्रान्तिरनवस्थितौ** । मिथ्यामतौ च भ्रमणे' ॥ (१) ॥*॥ 'मिथ्या' इत्यव्ययम् । तेन कर्मधारयः ॥ (२) ॥*॥ भावे घञि (३।३।१८) भ्रमः । 'नोदात्तोपदेश–' (७।३।३४) इति न वृद्धिः । **'भ्रमोऽम्बुनिर्गमे** भ्रान्तौ कुन्दभ्रमणयोरपि' ॥ (३) ॥*॥ त्रीणि **'अतस्मिंस्तज्ज्ञानस्य'** ॥

संविदाग्गूः प्रतिज्ञानं नियमाश्रव-संश्रवाः ।
अङ्गीकाराभ्युपगम-प्रतिश्रव-समाधयः ॥ ५ ॥

(**संविदिति** ॥) संवेदनम् । 'विद ज्ञाने' (अ० प० से०)। संपदादित्वात् (वा० ३।३।१०८) क्विप् ॥ (१) ॥*॥ आगमनम् । आगूः । 'गमेः' इत्यनुवर्तमाने 'भ्रमेश्च डूः' (उ० २।६८)। डित्त्वाट्टिलोपः (६।४।१४३) । वधूशब्दवत् । यदा तु क्विपि (वा० ३।३।१०८) 'गमः क्वौ' (६।४।४०) इत्यन्तलोपे 'ऊङ् च गमादीनाम्' (वा० ६।४।४०) इत्यूकारादेशः । तदा 'ओः सुपि' (६।४।८३) इति यणि अमि शसि च 'आग्वम्, आग्वः' इति विशेषः । 'गुरी उद्यमने' (तु० आ० से०)। अस्मात् क्विपि (वा० ३।३।१०८) तु आगूः, आगुरौ, आगुरः, इति धूर्वत् ॥ (२) ॥*॥ जानातेर्ल्युट् (३।३।११५) ॥ (३) ॥*॥ 'यमः समुपनिविषु च' (३।३।६३) इत्यप् । 'नियमो यञ्ञणायां च प्रतिज्ञानिश्चयव्रते' ॥ (४) ॥*॥ आङ्पूर्वाच्छृणोतेः 'ऋहृदोः–' (३।३।५७) इत्यप् । '**आश्रवोऽङ्गीकृतौ क्लेशे नान्यवद्वचनस्थिते**' ॥ (५) ॥*॥ एवं संश्रव (६) प्रतिश्रवौ (९) ॥*॥ 'अङ्गी' इति च्व्यन्तमव्ययम् । तत्पूर्वात्कृञो भावे घञ् (३।३।१८) ॥ (७) ॥*॥ 'अभ्युप' इत्युपसर्गद्वयपूर्वाद्गमेः 'ग्रहवृद–' (३।३।५८) इत्यप् । '**अभ्युपगमस्तु पुंसि स्वीकारे निकटगमने च**' ॥ (८) ॥*॥ समाङ्पूर्वाद्धाञो भावे किः (३।३।९२)। '**समाधिर्ना समर्थने । ध्याने वैरस्यनियमे काव्यस्य च गुणान्तरे**' ॥ (१०) ॥*॥ दश '**अङ्गीकारस्य**' ॥

मोक्षे धीर्ज्ञानम्

(**मोक्षे इति** ॥) मोक्षफलिका धीर्ज्ञानम् ॥ (१) ॥*॥ एकम् '**मोक्षोपयोगिबुद्धेः**' ॥

अन्यत्र विज्ञानं शिल्पशास्त्रयोः ।

(**अन्यत्रेति** ॥) अन्यफलिका शिल्पे शास्त्रे च या धीः सा विज्ञानम् । '**विज्ञानं कार्मणे ज्ञाने**' इति हैमः । मुकुटस्तु—'मोक्ष इति निमित्तसप्तमी । मोक्षनिमित्तं शिल्पशास्त्रयोर्धीर्ज्ञानमुच्यते । अन्यनिमित्तं या तयोर्धीः सा विज्ञानम्' इति व्याख्यत् । 'तन्न । शिल्पज्ञानस्य मोक्षेऽनुपयोगात्' ॥ (१) ॥*॥ एकम् '**शिल्पादिविषयकबुद्धेः**' ॥

मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् ॥ ६ ॥
मोक्षोऽपवर्गः

(**मुक्तिरिति** ॥) मोचनम् । 'मुच्लृ मोक्षणे' (तु० उ० अ०)। क्तिन् (३।३।९४)। '**मुक्तिर्मोचनमोक्षयोः**' इति हैमः ॥ (१) ॥*॥ बन्धविरहात्केवलस्य भावः । 'गुणवचन–' (५।१।१२४) इति ष्यञ् ॥ (२) ॥*॥ निर्वान्त्यत्र । भावे वा । 'क्तोऽधिकरणे च' (३।४।७६) इति 'नपुंसके भावे (३।३।११४) इति वा क्तः । 'निर्वाणोऽवाते–' (८।२।५०) इति निष्ठानत्वम् । यद्वा अधिकरणे भावे वा ल्युट् । बन्धान्निर्गमनमित्यर्थः । '**निर्वाणं मोक्षनिर्वृत्योर्विधाने करिमज्जने**' इति हैमः ॥ (३) ॥*॥ अतिशयेन प्रशस्यं श्रेयः । '**श्रेयो मुक्तौ शुभे धर्मेऽतिप्रशस्ते तु वाच्यवत्**' ॥ (४) ॥*॥ नितरां श्रेयः निःश्रेयसम् । 'अचतुर–' (५।४।७७) इति निपातितम् । '**निःश्रेयसं तु कल्याणमोक्षयोः शंकरे पुमान्**' ॥ (५) ॥*॥ अविद्यमानं मृतं मरणमत्र । '**अमृतं यज्ञशेषे स्यात्पीयूषे सलिले घृते । अयाचिते च मोक्षे च ना धन्वन्तरिदेवयोः**' ॥ (६) ॥*॥ 'मोक्ष अवसाने' (चु० उ० से०) अवसानं क्षेपः । चुरादिः । 'एरच्' (३।३।५६) । घञ् (३।३।१८) वा । '**मोक्षो निःश्रेयसे वृक्षविशेषे मोचने मृतौ**' इति हैमः ॥ (७) ॥*॥ अपवर्जनम् । 'वृजी वर्जने' (अ० आ० से०) । घञ् '**अपवर्गस्त्यागमोक्षयोः । क्रियावसाने साकल्ये**' इति हैमः ॥ (८) ॥*॥ अष्टौ '**मोक्षस्य**' ॥

अथाज्ञानमविद्याहंमतिः स्त्रियाम् ।

(**अथेति** ॥) ज्ञानविरुद्धम् । ज्ञाननिवर्त्यत्वात् ॥ (१) ॥*॥ 'विद ज्ञाने' (अ० प० से०) । वेदनम् 'संज्ञायां समज–' (३।३।९९) इति क्यप् । अविद्या विद्याविरुद्धा ॥ (२) ॥*॥ अहमिति विभक्तिप्रतिरूपकमव्ययमहंकारार्थम् । अहंप्रधाना मतिः ॥ (३) ॥*॥ त्रीणि '**अज्ञानस्य**' ॥

रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी ॥ ७ ॥
गोचरा इन्द्रियार्थाश्च

(**रूपमिति** ॥) रोपयति विमोहयति । '**रुपु विमोहने**' (दि० प० से०) । अच् (३।३।१३४)। 'अन्येषामपि–' (६।३।१३७) इति दीर्घः । यद्वा 'रूप रूपकरणे' (चु० उ० से०) इति चौरादिकस्यायमप्यर्थः । यद्वा रूयते स्तूयते । 'रु शब्दे' (अ० प० अ०)। 'खष्पशिल्प–' (उ० ३।२८) इति पप्रत्ययो दीर्घश्च निपातितः । '**रूपं तु श्लोकशब्दयोः । पशावाकाशे सौन्दर्ये, नाणके नाटकादिके ॥ ग्रन्थावृत्तौ स्वभावे च**' इति हैमः ॥ (१) ॥*॥ शप्यते आक्रुश्यते । 'शप आक्रोशे' (भ्वा०, दि० उ० अ०) 'शाशपिभ्यां ददनौ' (उ० ४।९७) इति दन् । '**शब्दोऽक्षरे यशोगीत्योर्वाक्ये खे श्रवणे ध्वनौ**' इति हैमः ॥ (१) ॥*॥ गन्धयति । 'गन्ध अर्दने' (चु० आ० से०)। अच् (३।१।१३४)। '**गन्धः संबन्धलेशयोः । गन्धकामोदगर्वेषु**' इति हैमः ॥ (१) ॥*॥ रस्यते । 'रस आस्वादने' (चु० प० से०) चुरादिः । 'एरच्' (३।३।५६)। घञ् (३।३।१८) वा । '**रसो गन्धरसे जले । शृङ्गारादौ विषे वीर्ये तिक्तादौ द्रवरागयोः ॥ देहधातुप्रभेदे च पारदस्वादयोः पुमान्**' इति हैमः ॥ (१) ॥*॥ 'स्पृश संस्पर्शने' (तु० प० से०)।

१ अयं पाठः कुत्रचिन्नोपलभ्यते ॥
अमर० ८

१—भेदिन्यामेवोपलभ्यते ॥

'अकर्तरि च' (३।३।१९) इति घञ्। '**स्पर्शो** वर्गाक्षरे दाने स्पर्शने स्पर्शके रुजि' इति हैमः ॥ (१) ॥*॥ विसिन्वन्ति निबध्नन्तीन्द्रियाणि । 'षिञ् बन्धने' (स्वा० उ० अ०) । पचाद्यच् (३।३।१३४) । 'परिनिवि–' (८।३।१७०) इति षत्वम् । '**विषयो** यस्य यो ज्ञातस्तत्र गोचरदेशयोः । शब्दादौ जनपदे च' इति हैमः ॥ (१) ॥*॥ गाव इन्द्रियाणि चरन्त्येषु । 'करणाधिकरणयोः' इत्यधिकारे 'गोचरसंचर–' (३।३।११९) इति निपातितः ॥ (२) ॥*॥ इन्द्रियैरर्थ्यन्ते । 'अर्थं याच्ञायाम्' (चु० आ० से०) । कर्मणि घञ् (३।३।११९) ॥ (३) ॥*॥ पञ्चानामपि प्रत्येकं त्रीणि '**विषयाणाम्**' ॥

हृषीकं विषयीन्द्रियम् ।

(**हृषीकमिति** ॥) हृष्यन्त्यनेन । 'हृषु अलीके' (भ्वा० प० से०) । 'अलिहृषिभ्यां कित्' (उ० ४।१७) इति करणे ईकन् ॥ (१) ॥*॥ विषयोऽस्यास्ति । इनिः (५।२।११५) । ('**विषयी** विषयासक्ते वाच्यवत्, क्लीबमिन्द्रिये । पुंसि स्याद्भूपतौ कामदेवे वैषयिकेऽपि च') ॥ (२) ॥*॥ इन्द्रस्यात्मनो लिङ्गम् । 'इन्द्रियमिन्द्रलिङ्गम्–' (५।२।९३) इत्यादिना घच् निपातितः । '**इन्द्रियं** तु चक्षुरादिषु रेतसि' इति हैमः ॥ (३) ॥*॥ त्रीणि '**इन्द्रियाणाम्**' ॥

कर्मेन्द्रियं तु पाय्वादि

(**कर्मेति** ॥) कर्मसाधकमिन्द्रियं कर्मेन्द्रियमुच्यते ॥ (१) ॥*॥ पायति शोषयति तैलमिति पायुः । 'पै शोषणे' (भ्वा० प० अ०) 'कृवापाजि–' (उ० १।१) इत्युण् । 'आतो युक्–' (७।३।३३) 'पायूपस्थे पाणिपादौ वाक्चेतीन्द्रियसंग्रहः । उत्सर्गानन्दनादानगत्यालापाश्च तत्क्रियाः' इति कामन्दकीये ॥ एकम् '**गुह्यादीन्द्रियस्य**' ॥

मनोनेत्रादि धीन्द्रियम् ॥ ८ ॥

(**मन इति** ॥) धीसाधनमिन्द्रियं धीन्द्रियम् ॥ (१) ॥*॥ 'मनः कर्णौ तथा नेत्रं रसना च त्वचा सह । नासिका चेति षट् तानि धीन्द्रियाणि प्रचक्षते' ॥ एकम् '**ज्ञानेन्द्रियस्य**' ॥

तुवरस्तु कषायोऽस्त्री

(**तुवर इति** ॥) 'तुः' सौत्रो धातुः । तवीति हिनस्ति रोगान् । 'छित्वरछत्वर–' (उ० ३।१) इत्यादिना ष्वरच् । ('**तुवरस्तु** कषाये स्यात्काक्ष्याढक्योस्त्वतुवर्यपि') ॥*॥ दीर्घादिरपि । 'नरेऽश्मश्रुणि शृङ्गाभ्यां रहिते गवि **तूवरः** । काले प्राप्ते कषाये च **रसे** पुंन्यञ्जने च्युते' इत्युत्पलिनी ।

१—वर्गाक्षराणि कादयो मावसानाः पञ्चविंशतिः । 'ते वर्गाः पञ्च पञ्च' इति कातन्त्रसूत्रात् ॥

'नापि कषायस्तुवरः' इति बोपालितः । 'पुंसि कषायस्तुवरम्' इति क्लीबकाण्डे रत्नकोषः ॥ (१) ॥*॥ कषति कण्ठम् । 'कष हिंसायाम्' (भ्वा० प० से०) । बाहुलकादायः । '**कषायः** सुरभौ रसे । रागवस्तुनि निर्यासे क्रोधादिषु विलेपने' इति हैमः ॥ (२) ॥*॥ अस्त्रीत्युभयान्वयि । उक्तकोषाभ्याम् । '**कुवरस्तु** कषायोऽस्त्री' इत्येके पठन्ति ॥ द्वे '**कषायरसस्य**' ॥

मधुरो

(**मधुर इति** ॥) मधु माधुर्यमस्यास्ति । 'ऊषसुषि–' (५।२।१०७) इति रः । ('**मधुरं** विषे) । **मधुरस्तु** प्रिये स्वादौ रसे च रसवत्यपि । **मधुरा** मथुरापुर्यां यष्टीभेदामधूलिषु । मधुकुक्कुटिकायां च मिश्रेयाशतपुष्पयोः' हैमः ॥ (१) ॥*॥ एकम् '**मधुरस्य**' ॥

लवणः

(**लवण इति** ॥) लुनाति जाड्यम् । 'लूञ् छेदने' (क्र्या० उ० से०) । नन्द्यादिल्युः (३।१।१३४) । लवणाल्लुक् (४।४।२४) इति लिङ्गाण्णत्वम् । '**लवणो** राक्षसे रसे । अस्थिभेदे **लवणा** त्विट्' इति हैमः ॥ (१) ॥*॥ एकम् '**लवणस्य**' ॥

कटुः ।

(**कटुरिति** ॥) कटत्याच्छृणोति तीक्ष्णतया मुखम् । 'कटे वर्षावरणयोः' (भ्वा० प० से०) । 'कटिवटिभ्यां च' (उ० १।८) इत्युः । 'कट्वकार्ये मत्सरे च दूषणे च **कटू** रसे । तिक्ते प्रियङ्गुसुरभौ **कटुका** राजिकासखि' इति हैमः ॥ (१) ॥*॥ एकम् '**कटोः**' ॥

तिक्तः

(**तिक्त इति** ॥) तेजयति स्म । 'तिज निशाने' (चु० प० से०) । सामान्यापेक्षज्ञापकाच्चुरादीनां णिजभावे 'गत्यर्थाकर्मक–' (३।४।७२) इति क्तः । पक्षान्तरे तु संज्ञापूर्वकत्वाद्गुणाभावः । '**तिक्तस्तु** सुरभौ रसे । **तिक्ता** तु कटुरोहिण्यां **तिक्तं** पर्पटकौषधे' इति हैमः ॥ (१) ॥*॥ एकम् '**तिक्तस्य**' ॥

अम्लश्च

(**अम्ल इति** ॥) अम्ब्यते शब्द्यते भोक्तृभिः । 'अबि शब्दे' (भ्वा० प० से०) । 'मूशक्यविभ्यः क्लः' (उ० ४।१०८) । अम्लः ॥*॥ 'अम रोगे' (चु० उ० से०) । अमति रुजत्यरुचिम् । बाहुलकात्क्ले अम्लोऽपि । '**अम्लो** रसेऽम्लवेतसे । (**अम्ली** चाङ्गेर्याम्)' इति हैमः ॥ (१) ॥*॥ एकम् '**अम्लस्य**' ॥

१—अत्र दीर्घे त्वार्याभङ्गः स्यात्–इति मुकुटः ॥ २—अस्थि मेदो भालकर्णान्तरास्थि । तत्र यथा प्रयोगः । 'क्ष्णाति लवणाघातः' इत्यनेकार्थकैरवाकरकौमुदी ॥

रसाः पुंसि

(रसा इति ॥) 'रस आस्वादने' (चु० उ० से०) अदन्तः । रस्यन्ते आस्वाद्यन्ते । 'एरच्' (३।३।५६) घञ् (३।३।१९) वा । तुवरादयः षट् रसशब्दवाच्याः । तत्र तुवरकषाययोरस्त्रीत्वस्योक्तत्वादितरेषां लिङ्गनिर्णयमाह–'पुंसि' इति । 'गुणमात्रे वर्तमाना मधुरादयः पञ्च पुंसि' इत्यर्थः ॥

तद्वत्स्वसु षडमी त्रिषु ॥ ९ ॥

(तद्वत्स्विति ॥) अमी षट् । षण्णामपि वाचकास्तुवरादयः सन्नापि गुणिनि त्रिलिङ्गा इत्यर्थः । कटुशब्दात्स्त्रियाम् 'वोतो गुण–' (४।१।४४) इति वा ङीष् ॥

विमर्दोत्थे परिमलो गन्धे जनमनोहरे ।

(विमर्दोत्थ इति ॥) सुरतादिविमर्दोत्थे माल्यादिगन्धे, घर्षणसमुद्भवे चन्दनादिगन्धे, च जनानां मनोहरे, परिमलः । 'मल धारणे' (भ्वा० आ० से) । मल्यते । कर्मणि घञ् (३।३।१९) । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । 'खनो घ च' (३।३।१२५) इति घो वा । घित्करणात् 'अन्येभ्योऽपि' इत्यभ्युपगमात् । यद्वा मलते धारयति जनमनांसि पचाद्यच् (३।३।१३४) । **'स्यात्परिमलो** विमर्दातिमनोहरगन्धयोश्चापि । सुरतोपमर्दविकसच्छरीररसङ्गादिसारभे पुंसि' ॥ (१) ॥*॥ एकम् **'परिमलस्य'** ॥

आमोदः सोऽतिनिर्हारी

(आमोद इति ॥) स परिमलोऽतिनिर्हारी अत्यन्तमनोहरश्चेत् । आसमन्तान्मोदयति, इत्यामोदः । 'मुद हर्षे' (भ्वा० आ० से०) ण्यन्तः । अच् (३।१।१३४) । **'आमोदो** गन्धहर्षयोः' ॥ (१) ॥*॥ एकम् **'सुगन्धस्य'** ॥

वाच्यलिङ्गत्वमागुणात् ॥ १० ॥

(वाच्येति ॥) आ गुणात् 'गुणे शुक्लादयः पुंसि' इत्यतः प्राक् । अतः परं 'वाच्यलिङ्गता' इत्यधिक्रियते ॥

समाकर्षी तु निर्हारी

(समाकर्षीति ॥) समाकर्षत्यवश्यं मनः 'आवश्यका–' (३।३।१७१) इति णिनिः । यद्वा समाकर्षणशीलः । 'सुप्यजातौ–' (३।२।७८) इति णिनिः ॥ (१) ॥*॥ एवं निर्हारी ॥ (२) ॥*॥ द्वे **'दूरगामिगन्धस्य'** ॥

सुरभिर्घ्राणतर्पणः ।

इष्टगन्धः सुगन्धिः स्यात्

(सुरभिरिति ॥) सुष्ठु रभन्तेऽत्र सुरभिः । इन् (उ० ४।११८) ॥ (१) ॥*॥ घ्राणं तर्पयति । नन्द्यादिल्युः (३।१।१३४) ॥ (२) ॥*॥ इष्टो गन्धोऽस्य । **'इष्टगन्धः** सुगन्धौ स्यात्त्रिषु क्लीबं तु वालुके' ॥ (३) ॥*॥ सुष्ठु गन्धोऽस्य । 'गन्धस्येत्–' (५।४।१३५) इति समासान्त इकारः । **'सुगन्धिः** स्यादिष्टगन्धे त्रिषु क्षीरे नपुंसकम्' ॥ (४) ॥*॥ चत्वारि **'इष्टगन्धस्य'** ॥

आमोदी मुखवासनः ॥ ११ ॥

(आमोदीति ॥) आमोदयति । 'सुप्यजातौ–' (३।२।७८) इति णिनिः ॥ (१) ॥*॥ मुखं वासयति । नन्द्यादिल्युः (३।१।१३४) ॥ (२) ॥*॥ द्वे **'मुखवासनगुटिकादेः'** ॥

पूतिगन्धिस्तु दुर्गन्धः

(पूतीति ॥) 'पूयी विशरणे दुर्गन्धे च' (भ्वा० आ० से०) । पूय्यते । पूतिः । क्तिन् (३।३।९४) । पूतिर्दुष्टो गन्धोऽस्य 'गन्धस्येत्–' (५।४।१३५) इतीकारः[1] ॥ (१) ॥*॥ दुर्गन्धे त्विकारो नेति विशेषः ॥ (२) ॥*॥ द्वे **'दुर्गन्धस्य'** ॥

विस्रं स्यादामगन्धि यत् ।

(विस्रमिति ॥) विस्यति । 'विस प्रेरणे' (दि० प० से०) 'स्फायि–' (उ० २।१३) इति बाहुलकाद्रक् । 'विस उत्सर्गे' इति तु भट्टः । 'विस्रंसते' इति वा 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । बैवयोरभेदः[2] ॥ (१) ॥*॥ आमोऽपक्को मलः । तस्येव गन्धोऽस्य । 'उपमानाच्च' (५।४।१३६) इति समासान्त इत्[3] ॥ (२) ॥*॥ द्वे **'अपक्वमांसादिगन्धस्य'** ॥

शब्दार्णवे तु 'कस्तूरिकायामामोदः कर्पूरे मुखवासनः । बकुले स्यात्परिमलश्चम्पके सुरभिस्तथा ॥' इति ॥

शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः ॥ १२ ॥
अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः ।

(शुक्लेति ॥) शोकति मनोऽस्मिन् । 'शुक गतौ' (भ्वा प० से०) । 'ऋज्रेन्द्र–' (उ० २।२८) इति निपातितः । **'शुक्लो** योगान्तरे सिते । नपुंसकं तु रजते' ॥ (१) ॥*॥ शोभते । 'शुभ दीप्तौ, शोभायां वा' (भ्वा० आ० से०) । 'स्फायि–' (उ० २।१३) इति रक् । **'शुभ्रं** दीप्तेऽभ्रके सिते' इति हैमः ॥ (२) ॥*॥ 'शुच दीप्तौ' (*) । इक् (वा० ३।३।१०८) ॥ (३) ॥*॥ 'चिश्विता वर्णे' (भ्वा० आ० से०) भ्वादिः । श्वेतम् । घञ् (३।३।१८) **'श्वेतो** द्वीपादिभेदयोः । **श्वेता** वराटिकाकाष्ठपाटलाशङ्खिनीषु च । क्लीबं रूप्ये(ऽन्यवच्छुक्ले)' ॥ (४) ॥*॥ विशीयते । 'शदॢ शातने' (भ्वा०, तु० प०

१—'गन्धस्येत्–' (५।४।१३५) इति सूत्रे दुरोऽपाठात् । केचित्तु मत्वर्थीयेत्यन्तं पठित्वा कर्मधारयादिनि व्याचक्षते । तच्च । 'कर्मधारयमत्वर्थीयाभ्यां बहुव्रीहिरेवेष्टो लाघवात्' इति काल्यायनोक्तेः । अपरे तु लाघवमनादृत्य मत्वर्थीयमिच्छन्ति । 'विसकिलयच्छेदपाथेयवन्तः' इतिवत् । प्रयोगश्च 'यदुर्गन्धि मदाविलं मलशतैर्यत्पूतिनाडीमयम्' इति शृङ्गारप्रकाशे । इति बुधमनोहरायाम् ॥ २—विस्रं दन्त्योष्ठ्यादि । 'विस्रजम्बालशेषम्' इति दमयन्तीश्लेषात् ॥ ३—तालव्यशः 'श्वेतो धावति' इति महाभाष्यश्लेषात् ॥

अ०) । अच् (३।१।१३४) । **'विशदः** पाण्डरे व्यक्ते' इति हैमः ॥ (५) ॥*॥ श्यायते । 'श्यैङ् गतौ' (भ्वा० आ० अ०) । 'हृश्याभ्यामितन्' (उणा० ३।९३) ॥ (६) ॥*॥ पण्डते मनोऽस्मिन् । 'पडि गतौ' (भ्वा० आ० से०) बाहुलकादरो दीर्घश्च ॥ (७) ॥*॥ अवदायते स्म । 'दैप् शोधने' (भ्वा० प० अ०) । कर्मणि क्तः (३।३।११०।२) । **'अवदातं** तु विमले मनोज्ञे सितपीतयोः' इति हैमः ॥ (८) ॥*॥ सिनोति मनः । 'षिञ् बन्धने' (स्वा० उ० अ०) । 'अञ्जिघृसिभ्यः क्तः' (उ० ३।८९) । **'सितं**स्त्ववसिते बद्धे वर्णे **सिता** तु शर्करा' इति हैमः ॥ (९) ॥*॥ गुरते उद्यमे मनोऽस्मिन् । 'गुरी उद्यमने' (तु० आ० से०) । 'ऋज्रेन्द्र–' (उ० २।२८) इति निपातितः । **'गौरः** श्वेतेऽरुणे पीते विशुद्धे चन्द्रमस्यपि । विशदे **गौरं** तु श्वेतसर्षपे पद्मकेसरे' इति हैमः । यत्तु—'गोरते' इति स्वामी, 'गोरति' इति मुकुटश्च तन्न । 'गुरी उद्यमने' इति धातुमुपन्यस्योक्तरूपोपन्यासस्यासंभवात् ॥ (१०) ॥*॥ अवैलक्ष्यते । घञ् (३।३।१९) । 'वष्टि भागुरिः–' इत्यल्लोपः । यद्वा वलति । 'वल चलने' (भ्वा० प० से०) । क्विप् (३।२।१७८) । वल् । अक्षन्न्यस्मात् । 'अक्षू व्याप्तौ संघाते च' (भ्वा० प० से०) घञ् (३।३।१९) वल् चासौ अक्षश्च । यद्वा वलं क्षायति । 'क्षै क्षये' (भ्वा० प० अ०) । 'आतोऽनुप–' (३।१।३) इति कः ॥ (११) ॥*॥ धावति मनोऽत्र । 'धावु गतिशुद्ध्योः' (भ्वा० उ० से०) । वृषादित्वात् (उ० १।१०६) कलच् । बाहुलकाद्ध्रस्वः । यद्वा धवनं धवः । 'धूञ् कम्पने' (क्र्या० उ० से०) । 'ऋदोरप्–' (३।३।५७) धवं लाति । 'ला दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । 'अथ **धवलो** महोक्षे सुन्दरे सिते । **धवली** गौः' इति हैमः ॥ (१२) ॥*॥ अर्ज्यते । 'अर्ज अर्जने' (भ्वा० प० से०) । 'अर्जेर्णिलुक् च' (उ० ३।५१) इत्युनन् । **'अर्जुनः** ककुभे पार्थे कार्तवीर्यमयूरयोः । मातुरेकसुतेऽपि स्याद्धवले पुनरन्यवत् ॥ नपुंसकं तृणे नेत्ररोगे स्यादर्जुनी गवि' ॥ (१३) ॥*॥ त्रयोदश **'शुक्लवर्णस्य'** ॥

शब्दार्णवे तु **'श्वेतस्तु** समपीतोऽसौ रक्तेतरजपारुचिः । **वलक्षस्तु** सितश्यावः कदलीकुसुमोपमः । **अर्जुनस्तु** सितः कृष्णवेशवान्कुमुदच्छविः' इत्युक्तम् ॥

शुद्धशब्दोऽप्यत्र । तथा च धरणिः । **'शुद्धः** शुक्ले च पूते च केवले च प्रयुज्यते' इति ॥

हरिणः पाण्डुरः पाण्डुः

(हरिण इति ॥) हरति मनः । 'श्यास्त्याहृञ्विभ्य इनच्' (उ० २।४६) । **'हरिणौ** पाण्डुसारङ्गौ **हरिणी** चारुयोषिति । सुवर्णप्रतिमायां च हरितावृत्तभेदयोः' इति हैमः ॥ (१) ॥*॥ पाण्डुत्वमस्यास्ति । 'नेगपांसुपाण्डुभ्यो रः' । **'पाण्डुरो** वर्णतद्वतोः । **पाण्डुरं** तु मरुबके' इति हैमः ॥ (२) ॥*॥ पण्ड्यते ज्ञायते । 'पडि गतौ' (भ्वा० आ० से०) मृगय्वादित्वात् (उ० १।३७) कुः । पृषोदरादित्वात् (६।३।१०९) दीर्घः । **'पाण्डुस्तु** पीतभागार्धः केतकीधूलिसंनिभः' इति शब्दार्णवः । **'पाण्डुः** कुन्तीपतौ सिते' इति हैमः ॥ (३) ॥*॥ त्रीणि **'पीतसंवलितशुक्लस्य'** ॥

ईषत्पाण्डुस्तु धूसरः ॥१३॥

(ईषदिति ॥) धूनोति चेतः । 'धू विधूनने' (स्वा० आ० से०) । 'कृधूमदिभ्यः क्सरः' (उ० ३।७३) । बाहुलकादपत्वम् । यद्वा धूसनम् । 'धूस कान्तौ' (चु० प० से०) चुरादिः । 'एरच्' (३।३।५६) । धूसं राति । 'रा दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । **'धूसरी** किंनरीभेदे, ना खरे, त्रिषु पाण्डुरे' । **'धूसर**स्तु सितः पीतलेशवान्बकुलच्छविः' इति शब्दार्णवः ॥ (१) ॥*॥ एकं **'धूसरवर्णस्य'** ॥

कृष्णे नीलासितश्यामकालश्यालमेचकाः ।

(कृष्ण इति ॥) कर्षति मनः । 'कृषेर्वर्णे' (उ० ३।४) इति नक् । **'कृष्णः** काके पिके वर्णे विष्णौ व्यासेऽर्जुने कलौ । **कृष्णा** तु नील्यां द्रौपद्यां पिप्पलीद्राक्षयोरपि ॥ कृष्णं तु मरिचे लोहे' इति हैमः ॥ (१) ॥*॥ नीलति । 'णील वर्णे' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) कः । **'नीलो** वर्णे मणौ शैले निधिवानरभेदयोः । **नील्यौ**षध्यां लाञ्छने च' इति हैमः ॥ (२) ॥*॥ सितविरुद्धोऽसितः (३) ॥*॥ श्यायते मनोऽस्मात् । 'श्यैङ् गतौ' (भ्वा० आ० अ०) । 'इषियुधीन्धि–' (उ० १।१४५) इति मक् । **'श्यामो**ऽम्बुदे शितौ । हरिते प्रयागवटे कोकिले वृद्धदारुके । **श्यामं** सैन्धवे मरिचे श्यामा सोमलतानिशोः' इति हैमः ॥ (४) ॥*॥ कल्यते । कालः । 'कल संख्याने' (भ्वा० आ० से०) घञ् (३।३।१९) । **'कालः** पुनः कृष्णवर्णे महाकालकृतान्तयोः ॥ मरणानेहसोः **काली** कालिकाक्षीरकीटयोः । मातृभेदोमयोर्नव्यमेघौघपरिवादयोः ॥ **काला** कृष्णत्रिवन्नीलयोर्जुक्लयाम्' इति हैमः ॥ (५) ॥*॥ श्यामः श्यामत्वमस्यास्तीति । सिध्मादित्वात् (५।२।९७) लच् । **'श्यामलः** पिप्पले श्यामे' इति हैमः ॥ (६) ॥*॥ मचति मिश्रीभवति

१—तालव्यशः 'विशदाविशदामत्तसारसं शारसं जलं' इति दण्डियमकात् ॥ २—दन्त्यादिः 'विकसितं सितम्' इति कीचकवधयमकात् ॥ ३—कषसंयोगवान् 'अथ स वलक्षोभानां पतिरिव' इति वृन्दावनश्लेषात् इति मुकुटः ॥

१—व्याकरणान्तरोक्तमपीदमेकदेशानुमत्या 'नगाच्च' (वा० ५।२।१०७) इति वार्तिकेनानुमतमेव प्रथमादिसंज्ञाविधानादिवत् ॥ २—'कालः पादे' इति पाठः.

वर्णान्तरेण । 'मच मुचि कल्कने' (भ्वा० आ० से०) । 'कृवादिभ्यः संज्ञायां वुन्' (५।३५) । 'पचिमच्योरिचोपधायाः' (उ० ५।३७) इतीत्वे लघूपधगुणः (७।३।८६) । 'मेचकः श्यामले कृष्णे तिमिरे बर्हिचन्द्रके' इति हैमः ॥ (७) ॥*॥ सप्त **'कृष्णस्य'** । शब्दार्णवे तु **'मेचकः** कृष्ण-नीलः स्यादतसीपुष्पसंनिभः' इत्युक्तम् ॥

पीतो गौरो हरिद्राभः

(पीत इति ॥) पीयते पिबति वर्णान्तरम् । औणादिकः क्तः (बाहुलकात् ३।८९) । **'पीतं** पाने हरिद्रायां स्त्रियां, गौरेऽभिधेयवत्' । यत्तु—पीयते वर्णान् । पातेर्बाहुलकात् 'अञ्जिघृषिभ्यः क्तः' (उ० ३।८९) 'घुमास्थागा–' (६।४।६६) इत्यादिना ईत्वम्–इति मुकुटेनोक्तम् । तदसंबद्धमिति स्फुटमेव ॥ (१) ॥*॥ (२) ॥*॥ हरिद्रेवाभा दीप्तिरस्य ॥ (३) ॥*॥ त्रीणि **'पीतवर्णस्य'** ॥

पालाशो हरितो हरित् ॥ १४ ॥

(पालाश इति ॥) पलाशस्य **पत्रस्यायम्** । 'तस्येदम्' (४।३।१२०) इत्यण् ॥*॥ 'पत्रं **पलाशं** ना रक्षःशठीहरितकिंशुके' इति रुद्राङ्ग्रखादिरपि । तत्र संज्ञापूर्वकत्वाद्वृद्ध्यभावः । यद्वा पलमश्नाति । 'अश भोजने' (क्या० प० से०) । 'कर्मण्यण्' (३।२।१) । ततः प्रज्ञाद्यण् (५।४।३८) । **'पालाशः** किंशुके शब्द्यां । हरिद्वर्णे राक्षसश्च **पलाशं** छदने स्मृतम्' इति हैमः ॥–'शेषे' (४।२।९२) इत्यस्य विधित्वाङ्गीकारादण्–इत्याहुः । तन्न । 'तस्येदम्' इति सिद्धे शेषत्वाभावात् ॥ (१) ॥*॥ हरति । 'हृश्याभ्यामितन्' (उ० ३।९३) । **'हरिता** स्त्री च दूर्वायां हरिद्वर्णयुतेऽन्यवत्' ॥ (२) ॥*॥ 'हृसृरुहियुषिभ्य इतिः' (उ० १।९७) । हरित् । **('हरिद्दिशि** स्त्रियां पुंसि हयवर्णविशेषयोः । अस्त्रियां स्यात्तृणे च') ॥ (३) ॥*॥ त्रीणि **'हरितवर्णस्य'** ॥

रोहितो लोहितो रक्तः

(रोहित इति ॥) रोहति । 'रुह बीजजन्मनि प्रादुर्भावे च' (भ्वा० प० अ०) । 'रुहे रश्च लो वा' (उ० ३।९४) इतीतन् ॥ (१) ॥*॥ **'लोहितो** मङ्गले नदे । वर्णभेदे **लोहितं** तु कुङ्कुमे रक्तचन्दने ॥ गोशीर्षे रुधिरे युद्धे' इति हैमः ॥ (२) ॥*॥ रजति स्म । 'रञ्ज रागे' (भ्वा० उ० अ०) । क्तः (३।२।१०२) । यद्वा रच्यते स्म । 'रच प्रतियत्ने' (चु० उ० से०) । 'अनित्यण्यन्ताश्वुरादयः' इति णिजभावे क्तः (३।२।१०२) । 'अतो लोपः' (६।४।४८) । 'चोः कुः' (८।२।३०) । 'रक्तं नील्यादिरञ्जिते । कुङ्कुमेऽसृज्यनुरक्ते प्राचीनामलकेऽरुणे' इति हैमः ॥ (३) ॥*॥ त्रीणि **'रक्तवर्णस्य'** ॥

शोणः कोकनच्छविः ।

(शोण इति ॥) शोणयति । 'शोणृ वर्णे' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । **'शोणः** कृशानौ स्योनाके लोहितास्रे नदे पुमान् । त्रिषु कोकनदच्छाये' ॥ (१) ॥*॥ कोकनदं रक्तोत्पलमिव छविर्यस्य ॥ (२) ॥*॥ द्वे **'शोणवर्णस्य'** ॥

अव्यक्तरागस्त्वरुणः

(अव्यक्तेति ॥) अव्यक्तो रागो यस्य । किंचिल्लोहितः ॥ (१) ॥*॥ ऋच्छति । 'ऋ गतौ' (भ्वा० प० अ०) 'अर्तेरुनन्' (उ० ३।६०) । **'अरुणः** कृष्णलोहितः' इत्यमरमाला । **'अरुणोऽव्यक्तरागेऽर्के** संध्यारागेऽर्कसारथौ । निःशब्दे कपिले कुष्ठभेदे ना, गुणिनि त्रिषु ॥ **अरुणाऽतिविषाश्यामामञ्जिष्ठात्रिवृतासु च'** ॥ (२) ॥*॥ द्वे **'अरुणवर्णस्य'** ॥

श्वेतरक्तस्तु पाटलः ॥ १५ ॥

(श्वेतेति ॥) श्वेतरक्तः ॥ (१) ॥*॥ पाटयति । 'पट गतौ' (भ्वा० प० से०) ण्यन्ताद्वृषादित्वात् (उ० १।१०६) कलच् । पाटलाकुसुमाभः पाटलः । **'पाटलं** तु कुङ्कुमश्वेतरक्तयोः । **पाटलः** स्यादाशुत्रीहौ **पाटला** पाटलिद्रुमे' इति हैमः ॥ (२) ॥*॥ द्वे **'श्वेतरक्तवर्णस्य'** ॥

श्यावः स्यात्कपिशः

(श्याव इति ॥) श्यायते । 'श्यैङ् गतौ' (भ्वा० आ० अ०) बाहुलकात् 'कृसृभृदृभ्यो वः' (उ० १।१५५) ॥ (१) ॥*॥ कपिर्वर्णविशेषः । सोऽस्यास्ति । लोमादित्वात् (५।२।१००) शः । कपिर्मर्कटः । तद्वर्णत्वादिति वा । **'कपिशः** त्रिषु श्यामे, स्त्री माधव्यां, सिंहके पुमान्' ॥ (२) ॥*॥ **'कृष्णपीतस्य'** द्वे ॥

धूम्रधूमलौ कृष्णलोहिते ।

(धूम्रेति ॥) धूमं राति । कः (३।२।३) । पृषोदरादिः (६।३।१०९) ॥ (१) ॥*॥ धूमं लाति । 'रा, ला, आदाने' (अ० प० अ०) । कः (३।२।३) ॥ (२) ॥*॥ कृष्णमिश्रो लोहितः ॥ (३) ॥*॥ त्रीणि **'कृष्णलोहितस्य'** ॥

कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ ॥ १६ ॥

(कडार इति ॥) गडति । 'गड सेचने' (भ्वा० प० से०) **'गडेः कड च'** (उ० ३।१३२) इत्यारन् । यद्वा कडनम् ।

१—विश्वकोषस्योऽयं पाठः ॥ २—हैमे तु नोपलभ्यते ॥ ३—मेदिन्यामुपलभ्यते ॥ ४—हैमे तु 'पलाशः किंशुकेऽस्त्रपे । हरिते पलाशं पत्रे' इत्येव पाठः ॥

१—तालव्यान्तः 'राजन्कपिशताकीर्णे' इति द्विसंधानश्लेषात् 'कपिशितं पिशितं मदनाग्निना' इति माघात् ॥ २—तालव्यमध्यः । तथा च माघे 'परिपाकपिशङ्गलतारजसारोधश्चकास्ति कपिशं गलता' इति—इति मुकुटः ॥

कडः । 'खनो घ च' (३।३।१२५) इति घः । कंडमृच्छति । 'ऋ गतौ' (भ्वा० प० अ०) 'कर्मण्यण्' (३।२।३) । (**'कडारः** पिङ्गले दासे') ॥ (१) ॥*॥ 'कबृ वर्णे' (भ्वा० आ० से०) । 'कबेः पश्च' (उ० १।५५) इति इलच्प्रत्ययः । पकारश्चान्तादेशः । कपिं वर्णं लातीति वा । 'पुण्डरीककरिण्यां तु शिंशिपागोविशेषयोः । स्त्री रेणुकायां **कपिला** वर्णे ना कुक्कुरे मुनौ ॥ अनले वासुदेवे च **कपिलः** परिकीर्तितः' ॥ (२) ॥*॥ पिञ्जयति । 'पिजि वर्णे' (अ० आ० से०) । अच् (३।१।१३४) । न्यङ्क्वादिः (७।३।५३) । **'पिङ्गा** गोरोचनाहिङ्गुनाडिकाचण्डिकासु च । **पिङ्गी** शम्यां पिशङ्गे ना बालके तु नपुंसकम्' ॥ (३) ॥*॥ पेशति । 'पिश अवयवे' (तु० उ० से०) 'विडादिभ्यः कित्' (उ० १।१२१) इत्यङ्गच् ॥ (४) ॥*॥ कन्दति । 'कदि अह्वाने रोदने च' (भ्वा० प० से०) । मृगय्वादित्वात् (उ० १।३७) साधुः । **'कद्रुस्त्रिषु** स्वर्णपिङ्गे नागानां मातरि स्त्रियाम्' ॥ (५) ॥*॥ पिञ्जति । 'पिजि वर्णे' (अ०।०।०) । वृषादित्वात् (उ० १।१०६) कलच् । 'न्यङ्क्वादीनां च' (७।३।५३) इति कुत्वम् । पिङ्गं लातीति वा । **'पिङ्गलः** कपिले बभ्रौ रुद्रेऽर्कपारिपार्श्विके । कपौ मुनौ निधेर्भेदे **पिङ्गला** कुमुदस्त्रियाम्' ॥ (६) ॥*॥ षट् **'कपिलवर्णस्य'** ॥

शब्दार्णवे तु 'सितपीतहरिद्रक्तः **कडार**स्तृणवह्निवत् । अयं तूद्रिक्तपीताङ्गः **कपिलो** गोविभूषणः ॥ हरितांशेऽधिकेऽसौ तु **पिशङ्गः** पद्मधूलिवत् । पिशङ्गस्त्वसितावेशात् **पिङ्गो** दीपशिखादिषु ॥ **पिङ्गलस्तु** परच्छायः पिङ्गे शुक्लाङ्गखण्डवत्' इति ॥

चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे ।

(चित्रमिति ॥) चीयते । 'चिञ् चयने' (भ्वा० उ० अ०) 'अमिचिमिदि–' (उ० ४।१६४) इति क्रः । चित्तं त्रायते वा । 'त्रैङ् पालने' (भ्वा० आ० अ०) । कः (३।२।३) । 'चित्रकिर्मीर–' इति समासमकृत्वा पृथग्रूपभेददर्शनं 'गुणे शुक्लादयः पुंसि' इत्यस्य बाधनार्थम् । **'चित्रा**खपर्णीगोडुम्बासुभद्रादन्तिकासु च । मायायां सर्पनक्षत्रनदीभेदेषु च स्त्रियाम् । तिलकालेख्ययोः क्लीबं कर्बुराद्भुतयोरपि । तद्युक्तयोस्त्वन्यलिङ्गम्' । नामलिङ्गानुशासने तु नानार्थपुंस्काण्डेऽयं पठितः । तदनुरोधेनेहापि 'चित्रकिर्मीर–' इति समस्तं केचित्पठन्ति ॥ (१) ॥*॥ कीर्यते । 'कॄ विक्षेपे' (तु० प० से०) । 'गम्मीरादयश्च' इति किरतेरीरन्, मुडागमः । **'किर्मीरो** ना नागरङ्गे (कर्बुरे राक्षसान्तरे)' ॥ (२) ॥*॥ कलयति क्विप् (३।२।१७८) । कल् । माषयत्यभिभवति वर्णान् । माषः । 'मष हिंसायाम्' (भ्वा० प० से०) । 'हन्त्यर्थाश्च' इति चुरादौ पाठात् णिच् । कल् चासौ माषश्च । **'कल्माषः** कर्बुरे कृष्णे' इति मूर्धन्यान्ते रभसः । **'कल्माषो** राक्षसे कृष्णे शबलेऽपि' इति हैमः ॥ (३) ॥*॥ शपत्याक्रोशति वर्णान् 'शप आक्रोशे' (भ्वा० उ० अ०) । 'शपेर्बश्च' (उ० १।१०५) इति कलः, बत्वं च ॥ (४) ॥*॥ एति वर्णान् । एतेर्वर्णे तन् (उ० ३।८६) । **'एतः** कर्बुर आगते' ॥ (५) ॥*॥ 'कर्ब हिंसायाम्' (भ्वा० प० से०) । 'मद्गुरादयश्च' (उ० १।४१) इति निपातनात्कुरच् । बवयोरभेदात्कर्बुरः । **'कर्बुरं** सलिले हेम्नि **कर्बुरः** पापरक्षसोः । **कर्बुरा** कृष्णवृन्तायां शबले पुनरन्यवत्' ॥ (६) ॥*॥ षड् **'नानावर्णस्य'** ॥

गुणे शुक्लादयः पुंसि

(गुण इति ॥) यद्यपि 'शुक्लं रूपम्' इत्यादौ विशेष्यनिघ्नतैवेष्यते । तथापि विशेष्यानुपादाने प्राप्तस्य 'सामान्ये नपुंसकम्' इत्यस्यापवादोऽयम् । पटस्य शुक्ल इत्यादि बोध्यम् ॥

अपवादान्तरमाह—

गुणिलिङ्गास्तु तद्वति ॥ १७ ॥

(गुणीति ॥) विशेष्यस्यानुपादाने यदेव यल्लिङ्गं प्रतिपिपादयिषितम्, तल्लिङ्गा इत्यर्थः । यथा शुक्लम्, शुक्लः, शुक्ला, इत्यादि ॥

इति धीवर्गविवरणम् ॥

ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।

(ब्राह्मीत्यादि ॥) ब्रह्मणः इयम् । 'ब्राह्मोऽजातौ' (६।४।१७१) इति टिलोपे 'टिड्ढा–' (४।१।१५) इति ङीप् । **'ब्राह्मी** तु भारती । शाकभेदः पङ्कगण्डी हञ्जिका सोमवल्ल्यपि । ब्रह्मशक्तिः' इति हैमः ॥ (१) ॥*॥ बिभर्ति । 'भृमृदृशि–' (उ० ३।१०) इत्यतच् । ततः प्रज्ञाद्यणि (५।४।३८) ङीप् (४।१।१५) । भरतस्येयमिति वा । **'अथ भारती** । वचने च सरस्वत्यां पक्षिवृत्तिप्रभेदयोः' ॥ (२) ॥*॥ भाष्यते । 'भाष व्यक्तायां वाचि' (भ्वा० आ० से०) । 'गुरोश्च हलः' (३।३।१०३) इत्यप्रत्ययः ॥ (३) ॥*॥ गृणन्त्येताम् । 'गॄ शब्दे' (क्या० प० से०) । संपदादित्वात् (वा० ३।३।१०८) क्विप् । (**'गीः** स्त्री भाषासरस्वत्योः') ॥*॥ भागुरिमते गिरापि । **'ब्रह्माणी वचनं वाचा जल्पितं गदितं गिरा'** इति शब्दार्णवः (४) ॥*॥ उच्यते । वाक् 'वच् परिभाषणे' (अ० प० अ०) । 'क्विब्वचि–' (वा० ३।३।१७८) इत्यादिना क्विप्, दीर्घोऽसंप्रसारणं च । (**'वाग्वाचे** भारत्यां वचने स्त्रियौ') ॥ (५) ॥*॥ वण्यते 'वण शब्दे' (भ्वा० प० से०) । इञ् (वा०

१—'एकं चेत्तत्कथं चित्रं चित्रं चेदेकता कुतः' इति धर्मकीर्तिप्रयोगश्चोपलभ्यते इति मुकुटबुधमनोहरे ॥

१—'ब्राह्मी गौर्भारती' इति क्वचित्पाठः इति बुधमनोहरा ॥

(३।३।१०८) ('वाणिरम्बुदे । व्यूतौ मूल्ये सरस्वत्याम्' इति हैमः । **'वाणिः** स्याद्वूतिभारत्योर्**वाणि** मूल्ये बालाहके' इति विश्वः) 'कृदिकारात्–' (ग० ४।१।४५)इति ङीष् । घञि (३।३।११९) गौरादित्वात् (४।१।४१) वा ॥ (६) ॥*॥ सरोऽस्त्यस्याः । मतुप् (५।२।९४) **'सरस्वती** सरिद्भिदि । वाच्यापगायां स्त्रीरत्ने गोवाग्देवतयोरपि' इति हैमः ॥ (७) ॥*॥ सप्त **'अधिष्ठातृदेवतायाः'** ॥

व्याहार उक्तिर्लपितं भाषितं वचनं वचः ॥ १ ॥

(व्याहार इति ॥) व्याहरणम् । व्याङ्पूर्वाद्धृञो भावे घञ् (३।३।१८) ॥ (१) ॥*॥ 'वच परिभाषणे' (अ० प० अ०) । क्तिन् (३।३।९४) । संप्रसारणम् (६।१।१५) ॥ (२) ॥*॥ 'लप व्यक्तायां वाचि' (भ्वा० प० से०) । भावे क्तः (३।३।११४) ॥ (३) ॥*॥ 'भाष व्यक्तायां वाचि' (भ्वा० आ० से०) । भाषणं भाषितम् । भावे क्तः (३।३।११४) ॥ (४) ॥*॥ वचेर्भावे ल्युट् (३।३।११५) ॥ (५) ॥*॥ असुनि (उ० ४।१९९) वचः ॥ (६) ॥*॥ षट् **'भाषणस्य'** ॥

केचित्तु 'ब्राह्मयाद्यास्त्रयोदश (वचनस्य) पर्यायाः' इत्याहुः ॥

अपभ्रंशोऽपशब्दः स्यात्

(अपभ्रंश इति ॥) संस्कृतादपभ्रश्यति । 'भ्रंशु अधःपतने' (दि० प० से०) । पचाद्यच् (३।१।१३४) । **('अपभ्रंशस्तु** पतने भाषाभेदापशब्दयोः') ॥ (१) ॥*॥ अपभ्रष्टः शब्दोऽपशब्दः ॥ (२) ॥*॥ द्वे **'व्याकरणानिष्पन्नस्य गावीत्यादेः'** ॥

शास्त्रे शब्दस्तु वाचकः ।

(शास्त्र इति ॥) शास्त्रे व्याकरणादौ यो वाचकः साधुः स शब्दः स एव निरुपपदेन शब्दशब्देन व्यवह्रियते ॥ एकम् **'वाचकस्य'** ॥

तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता ॥२॥

(तिङ्डिति ॥) तिङन्तानां चयः 'पचति पश्य' 'पचति भवति' पाको भवतीत्यर्थः । सुबन्तानां चयः । 'प्रकृतिसिद्धमिदं हि महात्मनाम्' इत्यादि । 'भवति' इत्यध्याहारस्य भाष्यैकारमतें आवश्यकत्वाभावात्स वाक्यम् । **क्रियेत्यादि ।** वाशब्दः समुच्चये । 'कारकान्वितक्रियाबोधकम् 'घटमानय' इत्यादि तिङ्सुप्चयात्मकमपि वाक्यम्' इत्यर्थः ।

१—'मेण्ठे खर्द्विरदाधिरोहिणि, वशं याते **सुबन्धौ** विधेः शान्ते **हन्त च भारवौ** विघटिते **बाणे** विषादस्पृशः । वाग्देव्या विरमन्तु मन्तुविधुरा द्राग्दृष्टयश्चेष्टते शिष्टः कश्चन स प्रसादयति तां यद्वाणिसद्वाणिनी ।' २।५३ श्रीकण्ठचरिताद्भस्वान्तो वाणिशब्दः ॥ २—'बलीवर्दपङ्क्तिरिव समाधुर्या वाणी मनोहरति' इति दमयन्तीश्लेषाद्दीर्घान्तोऽपि वाणीशब्दः ॥

१—'इदं च 'अनभिहिते' (२।३।१) इति सूत्रव्याख्यावसरे 'नीलमिदं, न तु रक्तम्' इत्यादौ विशेषणान्तरनिवृत्तितात्पर्यकेऽस्तिक्रियाया अनावश्यकत्वात्' इति मनोरमायां भाष्यभ्रान्त्या ॥ भाष्ये तु प्रत्युत 'तिङ्समानाधिकरणे प्रथमा' इत्युक्त्वा 'वृक्षः' इत्यादौ तिङोऽप्रयोगे प्रथमासिद्ध्यर्थम् 'अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति' इति वृक्षः प्लक्षः 'अस्ति' इति गम्यते' इत्येवोक्तम् ॥ अध्याहारं विना तत्र प्रथमैव न स्यात् ॥ 'शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरः तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानम्' इति विभूतिपादीये योगसूत्रे भाष्यकृच्छ्रीवेदव्यासोऽपि 'सर्वपदेषु चास्ति वाक्यशक्तिः । 'वृक्षः' इत्युक्ते 'अस्ति' इति गम्यते । 'न सत्तां पदार्थो व्यभिचरति' इत्युक्तवान् ॥ तस्मात् क्रियाध्याहार आवश्यक एव ॥ 'त्रयः कालाः' इत्यत्रापि 'सन्ति' इत्येवाध्याहार्यम् इति 'अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम्' इति कैवल्यपादीययोगसूत्रभाष्ये व्यक्तम् ॥ अत एव बुधमनोहराख्यव्याख्यायामपि 'तिङ्सुबन्तचयः' 'चैत्रः पचति' इत्यादिः ॥ 'पाको भवति' इत्याद्यर्थके 'पचति भवति' इत्यादावव्याप्तेराह—**क्रिया वेति ।** 'कारकविशिष्टक्रियाबोधकं शब्दजातं वाक्यम्' इत्यर्थः । विस्तरोऽन्यत्र । 'क्रियारहिते तदध्याहार आवश्यकः' इत्युक्तम् ॥ २—'अत्र वाशब्दश्चेदर्थे । बोध्य' इति शेषः । 'कारकान्वितक्रियाबोधकसुप्तिङन्तचयः' इत्यर्थः । सुप् च तिङ् च सुप्तिङ् । सुब्विशिष्टं तिङ् सुप्तिङ् । तयोरेकशेषेऽन्तशब्देन समासः । तेन सुबन्तचय–तिङन्तचय–सुप्तिङन्तचयानां त्रयाणामपि लाभः । तत्र सुबन्तचयः–'चैत्रेण शयितव्यम्' इति । तिङन्तचयः–'पचति भवति' इत्यादिः । अन्त्यः–'चैत्रः पचति' इत्यादिः । 'क्रिया वा' इत्यनेन निरर्थकपदसमुदायव्यावृत्तिः । सुप्तिङन्तचयपदेन केवलस्य 'पचति' इत्यादेर्व्यावृत्तिः । तस्यापि 'कर्त्रादिविशिष्टक्रियाबोधकत्वात्' इति मञ्जूषोक्तदिशा एकमेव वाक्यलक्षणमिदम् ॥ अत एव समर्थ (२।२।१) सूत्रभाष्ये वार्तिककृतापि 'आख्यातं सविशेषणं वाक्यम्' इति वाक्यलक्षणमुक्तम् ॥ असत्त्वभावप्रत्ययान्तानामप्याख्यातत्वमेव ॥ अत एव हेमचन्द्रेणापि नाममालायाम् 'सविशेषणमाख्यातं वाक्यम्' इत्येकमेव वाक्यलक्षणमुक्त्वा 'प्रयुज्यमानमप्रयुज्यमानं व्याख्यातं प्रयुज्यमानैरप्रयुज्यमानैर्वा कर्त्रादिभिर्विशेषणैः सहितं वाक्यमुच्यते । तथा 'धर्मो वो रक्षतु' । अप्रयुज्यमानमाख्यातं यथा 'शीलं ते स्वम्' । अत्र 'अस्ति' इति गम्यते । अप्रयुज्यमानविशेषणं यथा—'प्रविश' । अत्र 'गृहम्' इति गम्यते । अनयोरर्थात्प्रकरणाद्वा आख्यातादेरवगमादप्रयोगः । 'आख्यातम्' इत्यत्र चैकत्वस्य विवक्षितत्वात् 'ओदनं पच तव भविष्यति' इत्यादौ वाक्यभेदः' इति स्वयमेवाभिधानचिन्तामणौ व्याख्यातम् इति दिक् ॥

केचित्तु—भाष्यकारमतेन प्रथमः पक्षः 'एकतिङ् वाक्यम्' (वा० २।१।१।) इति वार्तिकाभिप्रायेणापरा-इत्याहुः । यत्तु—पूर्वं शब्दात्मकस्य वाक्यस्य लक्षणम् । 'क्रिया–' इत्यादि त्वर्थात्मकस्य–इत्याहुः । तत्तु 'वचोऽशब्दसंज्ञायाम्' (७।३।६७) 'इति कुत्वनिषेधकसूत्रस्याननुगुणम्' । 'उच्यते' इति वाक्यम् । वचेः (अ० प० अ०) ण्यत् (३।१।१२४)। 'चजोः–' (७।३।५२) इति कुत्वं शब्दसंज्ञायाम् । अन्यत्र तु वाच्यम् । ('**वाक्यं** तु कुत्सिते हीने वचनार्हे च वाच्यवत्') ॥ (१) ॥*॥ एकम् '**वाक्यस्य**' ॥

श्रुतिः स्त्री वेद आम्नायस्त्रयी

(**श्रुतिरिति** ॥) श्रूयते । 'श्रु श्रवणे' (भ्वा० प० अ०)। कर्मणि क्तिन् (३।३।९४) । 'श्रूयते धर्मोऽनया' इति वा । 'श्रूयजीषिस्तुभ्यः करणे' (वा० ३।३।९४) इति क्तिन् । '**श्रुतिः** श्रोत्रे च तत्कर्मण्याम्नायवार्तयोः स्त्रियाम्' ॥ (१) ॥*॥ विदन्त्यनेन धर्मम् 'विद ज्ञाने' (अ० प० से०)। 'हलश्च' (३।३।२२१) इति घञ् । '**वेदः** श्रुतौ च वित्तौ च' ॥ (२) ॥*॥ आम्नायते अभ्यस्यते । 'म्ना अभ्यासे' (भ्वा० प० अ०) । कर्मणि घञ् (३।३।१९) 'आमनत्युपदिश्यति धर्माधर्मौ' इति वा । 'इयाद्यधा–' (३।१।१४१) इति णः । '**आम्नायः** कुल आगमे । उपदेशे च' इति हैमः ॥ (३) ॥*॥ (यत्तु)—त्रीणि वेदस्य । **त्रयी**ति । त्रय्या धर्मस्त्रयीधर्मः । तया त्रय्या विधिर्विधीयमानो यज्ञादिस्तद्विधिः । 'विधानमृग्यजुःसाम्नां त्रयीधर्म विदुर्बुधाः'। एकम् ।—इति मुकुटः । तन्न । 'तानि धर्माणि' 'धर्मेण पापमपनुदति,' 'वेदोऽखिलो धर्ममूलं धर्ममूलमिदं स्मृतम्', 'अथातो धर्मजिज्ञासा', 'चोदनालक्षणोऽर्थो धर्मः', श्रेयान्स्वधर्मः', 'धर्मक्षेत्रे कुरुक्षेत्रे', 'धर्मः प्रोज्झितकैतवः', 'धर्मस्य ह्यापवर्ग्यस्य', 'धनं च धर्मैकफलम्', 'धर्मादर्थश्च', 'धर्मो रक्षति रक्षितः', 'धर्माधर्मौ तद्विपाकाः', 'धर्मं जिज्ञासमानेन' इत्यादिषु बहुषु ग्रन्थेषु धर्मशब्दस्यैव प्रयोगदर्शनात् । देवदत्तो दत्तः, इतिवदेते प्रयोगाः सन्तिवति चेत् । न । वैषम्यात् । देवदत्तशब्दस्यानेकस्थले प्रयोगो दृष्टः । क्वचिद्दत्तशब्दस्यापि प्रयोगे दृष्टे पूर्वपदलोपादिकं कल्प्यते । प्रकृते तु धर्मशब्दस्यैव प्रयोगो दृष्टः । 'एवं त्रयीधर्मम्' इत्यादौ च क्वचित्त्रयीधर्मशब्दस्यापि प्रयोगे लब्धे षष्ठीसमासः कल्प्यते । प्रतिपाद्यप्रतिपादकभावः संबन्धः षष्ठ्यर्थः । तान्त्रिकसौगतादिधर्मव्यावृत्त्यर्थमिदं धर्मस्य विशेषणं संगच्छते । 'धर्मस्य च चतुर्दश' इति नियमात् । अतस्त्रय्यन्तानि चत्वारि वेदस्य नामानि । न च 'वेदास्त्रयस्त्रयी' इत्यनेन पौनरुक्त्यं शङ्क्यम् । सामान्यविशेषरूपेणोभयसंभवात् । 'ब्राह्मणक्षत्रियवैश्या द्विजाः, विप्रोऽपि द्विजः' इति यथा । नच 'धर्ममस्त्रियाम्' इत्यनेन पौनरुक्त्यम् । तत्र धर्मपर्यायाणामभिधानात् । इह तु धर्मस्वरूपस्य धर्मप्रमाणस्य चाभिधानात् । यदपि—समासे गुणीभूतस्यापि त्रयीशब्दस्य बहुविवक्षावशात्तच्छब्देन परामर्शः—इत्युक्तम् । तदपि न । तन्मते त्रयीधर्मशब्दस्य विधेयत्वात्तदेकदेशस्य त्रयीशब्दस्यानुवाद्यत्वासंभवात् । वेदस्यैव तच्छब्देन परामर्शसंभवाच्च । यदपि—यथा शब्दानुशासनम्–इति दृष्टान्तप्रदर्शनम् । तदप्येतेन प्रत्युक्तम् । वेदस्यैव परामर्शसंभवात् ॥ त्रीणि '**वेदस्य**' ॥

धर्मस्तु तद्विधिः ।

(**धर्म इति** ॥) तेन वेदेन विधीयते यज्ञादिः । एतेन वेदविहितत्वं धर्मत्वम्, वेदश्च धर्मे प्रमाणम्–इत्युक्तम् । धरति लोकान् । ध्रियते वा जनैरिति धर्मः 'अर्तिस्तुसु–' (उ० १।१४०) इत्यादिना धृञो मन् ॥ (१) ॥*॥ (एकं '**वेदविहितकर्मणः**') ॥

स्त्रियामृक् सामयजुषी

(**स्त्रियामिति** ॥) ऋच्यन्ते स्तूयन्ते देवा अनया । 'ऋच स्तुतौ' (तु० प० से०)। क्विप् (वा० ३।३।१०८) ॥ (१) ॥*॥ स्यति पापम् । 'षोऽन्तकर्मणि' (दि० प० अ०) मनिन् (उ० ४।१५३, ३।२।७४) । '**साम** क्लीबमुपायस्य भेदे वेदान्तरेऽपि च' ॥ (१) ॥*॥ इज्यतेऽनेन । 'अर्तिपृवपि–' (उ० २।११७) इत्युस् ॥ (१) ॥*॥ '**वेदानां**' प्रत्येकमेकैकम् ॥

इति वेदास्त्रयस्त्रयी ॥ ३ ॥

(**इतीति** ॥) इति एते त्रयो वेदास्त्रयी । त्रयोऽवयवा यस्याः सा संहतिः । त्रिशब्दात् 'संख्याया अवयवे तयप्' (५।२।४२) । 'द्वित्रिभ्यां तयस्य–' (५।२।४३) इत्ययच् । 'टिड्ढा–' (५।१।१५) इति ङीप् । '**त्रयी** त्रिवेद्यां त्रितये पुरंध्र्यां सुमतावपि' इति हैमः ॥ (१) ॥*॥ '**वेदत्रयसंघातस्य**' एकम् ॥

शिक्षेत्यादि श्रुतेरङ्गम्

(**शिक्षेति** ॥) श्रुतेर्वेदस्य शिक्षेत्याद्यङ्गम् । 'शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः । छन्दोविचितिरित्येतैः षडङ्गो

१—कश्मीरलिखितपुस्तके तु एतदुत्तरम्–धर्मो रक्षतीत्यादौ तु सत्यर्थाभेतिवत्पूर्वपदलोपो द्रष्टव्यः । नव्यास्तु त्रयी, इत्यन्तं चतुष्टयं वेदसामान्यस्य नाम । त्रयीशब्दो वेदसामान्ये त्रिवेद्यां च वर्तते । (यथा) द्विजशब्दो ब्राह्मणे त्रिवर्ण्यां च । त्रयीधर्मः, इत्यादौ त्रय्या धर्मस्त्रयीधर्मः इति विग्रहो बोध्यः । त्रयीविशेषणं त्वागमादिव्यावृत्त्यर्थम् । आगमादिप्रोक्तस्य धर्मत्वाभावात्–इत्याहुः । एकम् । 'ऋच स्तुतौ' ऋच्यन्ते स्तूयन्ते देवा अनया—इति पाठ उपलब्धः ॥

१—स्मृत्युक्तोऽपि वैदिक एव, वेदमूलकत्वात्स्मृतीनाम् इति क्षीरस्वामी ॥ २—आथर्वणस्तु त्रय्यनुवाद एवेति स्वामी ॥

वेद उच्यते' । शिक्ष्यते स्थानादिकमनया । 'शिक्ष विद्योपादाने' (भ्वा० आ० से०) 'गुरोश्च–' (३।३।१०३) इत्यप्रत्ययः ॥*॥ अङ्क्ष्यते ज्ञायतेऽनेन । 'अगि गतौ' (भ्वा० प० से०)। घः (३।३।११८) घञ् (३।३।१२१) वा ॥ (१) ॥*॥ एकं **'वेदाङ्गस्य'** ॥

ओंकारप्रणवौ समौ ।

ओंकारेति ॥ अवति । 'अवतेष्टिलोपश्च' (उ० १।१४२) इति मन्प्रत्ययस्यैव टिलोपः 'ज्वरत्वर–' (६।४।२०) इत्यूठौ । गुणः (७।३।८४) । 'वषट्कारः' (१।२।३५) इति लिङ्गात्समुदायादपि कारप्रत्ययः (वा० ३।३।१०८) ॥ (१) ॥*॥ प्रणूयते स्तूयते । 'णु स्तुतौ' (अ० प० अ०) । 'ऋदोरप्' (३।३।५७) । 'उपसर्गात्–' (८।४।१४) इति णत्वम् ॥ (२) ॥*॥ द्वे **'ॐकारस्य'** ॥

इतिहासः पुरावृत्तम्

इतीति ॥ 'इतिह' इति पारम्पर्योपदेशेऽव्ययम् । तदास्तेऽस्मिन् । 'आस उपवेशने' (अ० अ० से०) । 'हलश्च' (३।३।१२१) इति घञ् ॥ (१) ॥*॥ पुरावृत्तमाचष्टे पुरावृत्तम् । आख्यानाख्यन्तात् (वा० ३।१।२६) पचाद्यच् (३।१।१३४) ॥ (२) ॥*॥ **'पूर्वाचरितप्रतिपादकग्रन्थस्य'** द्वे ॥

उदात्ताद्यास्त्रयः स्वराः ॥ ४ ॥

उदात्तेति ॥ 'उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः । चतुर्थः प्रचितो नोक्तो यतोऽसौ छान्दसः स्मृतः' । स्वरन्ति शब्दायन्ते । 'स्वृ शब्दोपतापयोः' (भ्वा० प० अ०) । पचाद्यच् (३।१।१३४) । यद्वा—स्वर्यन्ते अर्था एभिः । 'पुंसि–' (३।३।११८) इति घः । यद्वा—स्वेन राजन्ते । 'राजृ दीप्तौ' (भ्वा० उ० से०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । स्वरा अचः । तद्धर्मत्वादुदात्तादयोऽपि । **'स्वरो** नासासमीरे स्यान्मध्यमादित्रिकस्वरे । उदात्तादावकारादौ षड्जादौ च ध्वनौ पुमान्' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ उत् उच्चैरादीयते उच्चार्यते स्म क्तः (३।२।१०२) । 'अच उपसर्गात्तः' (७।४।४७) । **'उदात्तो** दातृमहतोर्हृद्ये च स्वरभिद्यपि' इति हैमः ॥*॥ एकम् **'स्वराणाम्'** ॥

आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः ।

आन्वीक्षिकीति ॥ अनु श्रवणोत्तरमीक्षणं परीक्षणम्–अन्वीक्षा । सा प्रयोजनमस्याः 'प्रयोजनम्' (५।१।१०९) इति ठक् ॥ (१) ॥*॥ दम्यतेऽनेन । 'दमु उपशमे' (दि० प० से०) । 'अमन्ताङ्डः' (उ० १।११४) दण्डो नीयते बोध्यतेऽनया दण्डनीतिः । क्तिन् (३।३।९४) यद्वा दुण्डं लयति दण्ड्यान्प्रति प्रापयति । क्तिच् (३।३।१७४) आन्वीक्षिकीसाहचर्यात्स्त्रीत्वम् ॥ (१) ॥*॥ एतौ द्वौ क्रमात्तर्कविद्यायां न्यायरूपायाम्, अर्थशास्त्रे च वर्तेते । अर्यते गम्यते । 'ऋ गतौ' (भ्वा० प० अ०) । 'उषिकुषि–'(उ० २।३) इति थन् । अर्थस्य भूम्यादेः शास्त्रम् । एकैकम् **'दण्डनीतेः'** ॥

आख्यायिकोपलब्धार्था

आख्येति ॥ आचष्टे । 'चक्षिङः ख्याञ्' (२।४।५४) ण्वुल् (३।१।१३३) ॥ (१) ॥*॥ उपलब्धो ज्ञातोऽर्थो यस्याः सा । एकं **'ज्ञातसत्यार्थभूतायाः कथायाः'** ॥

पुराणं पञ्चलक्षणम् ॥ ५ ॥

पुराणमिति ॥ पुरा भवम् । 'सायंचिरम्–' (४।३।२३) इति ट्युट्युलौ । 'पूर्वकालैक–' (२।१।४९) इति सूत्रे निपातनात्तुडभावः । यद्वा पुरापि नवं पुराणम् । 'पुराणप्रोक्तेषु' (४।३।१०५) इति सूत्रे निपातितम् । यद्वा पुरा अतीतानागतावर्थावणति । 'अण शब्दे' (भ्वा० प० से०) । पचाद्यच् । **'पुराणं** पञ्चलक्षणे । पैणे पुंसि, त्रिषु प्रत्ने' ॥ (१) ॥*॥ पञ्च लक्षणान्यस्य । 'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । भूम्यादेश्चैव संस्थानं पुराणं पञ्चलक्षणम्' । क्वचिदिह 'वंशानुचरितं चैव' इति तृतीयपादे पाठान्तरम् ॥ (२) ॥*॥ द्वे **'व्यासादिप्रणीतमत्स्यपुराणादेः'** ॥

प्रबन्धकल्पा कथा

प्रबन्धेति ॥ प्रबन्धस्य कल्पना रचना स्तोकत्वात् ॥ (१) ॥*॥ 'कथ वाक्यप्रबन्धे' (चु० उ० से०) । 'चिन्तिपूजिकथि–' (३।३।११५) इत्यङ् । कथा कादम्बर्यादिः ॥ (२) ॥*॥ द्वे **'कथायाः'** ॥

प्रवल्हिका प्रहेलिका ।

प्रवेति ॥ प्रवल्हते आच्छादयति । वल्ह वल्ह परिभाषणहिंसाच्छादनेषु' (भ्वा० आ० से०) । दन्त्योष्ठ्यादिर्हान्तः 'कृञ् शिल्पिसंज्ञयोः–' (उ० २।३२) । वुल् (३।१।१३३) वा ॥ (१) ॥*॥ प्रहेलयति अभिप्रायं सूचयति । 'हिल भावकरणे' (तु० प० से०) । ण्वुल् (३।१।११३) । 'व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात् । यत्र बाह्यार्थसंबन्धः कथ्यते सा **प्रहेलिका'** ॥*॥ यद्वा प्रवल्हतेरिनि (उ० ४।११८) प्रवल्हिः ततः **'कृदिकारात्'** (ग० ४।१।४५) इति ङीष् । उभाभ्यां स्वार्थे कन् । 'प्रहेलिका **प्रवल्ही** च **प्रश्नदूती विपादिका'** इत्युत्पलिनी ॥ (२) ॥*॥ द्वे **'दुर्विज्ञानार्थस्य प्रश्नस्य'** ॥

स्मृतिस्तु धर्मसंहिता

स्मृतिरिति ॥ वेदार्थस्मरणपूर्वकं रचितत्वात्स्मृतिः । **'स्मृतिर्धर्मशास्त्रस्मरणयोः स्त्रियाम्'** ॥ (१) ॥*॥ धर्मबोधार्थं रचिता संहिता । संपूर्वाद्धातेः कर्मणि क्ते **'दधातेर्हिः'** (७।४।४२) ॥ (२) ॥*॥ द्वे **'मन्वादिस्मृतेः'** ॥

१—हैमकोशे तु षोडशपणस्य पुराणसंज्ञाभिहिता । 'यदाह–षोडशपणः पुराणः पणो भवेत्काकिणी चतुष्केण—' इत्यनेकार्थैकरत्नाकरकौमुदी ॥

समाहृतिस्तु संग्रहः ॥ ६ ॥

समेति ॥ समाहरणम् । क्तिन् (३।३।९४) ॥ (१) ॥*॥ संग्रहणम् । 'ग्रहवृद–' (३।३।५८) इत्यप् । 'विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः । निबन्धो यः समासेन संग्रहं तं विदुर्बुधाः । **संग्रहो** बृहदुद्ग्रहे मुष्टिसंक्षेपयोरपि' इति मेदिनी[1] ॥ (२) ॥*॥ द्वे **'संग्रहस्य'** ॥

समस्या तु समासार्था

समेति ॥ समसनम् । 'असु क्षेपणे' (दि० प० से०) । ण्यत् (३।१।१२४) । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । यद्वा समं कृत्स्नम् । तद्विषयिणीच्छा समस्या । तत्प्रयोज्यत्वाच्छब्दोऽपि सा । समशब्दात्क्यचि (३।१।८) 'सर्वप्रातिपदिकेभ्यः' (वा० ७।१।५१) इति सुगागमे 'अ प्रत्ययात्' (३।३।१०२) इत्यः टाप् (४।१।४) ॥ (१) ॥*॥ समसनं समासः । घञ् । (३।३।१८) । समासोऽर्थो यस्याः पूरणसाकाङ्क्षा । कविशक्तिपरीक्षार्थमपूर्णतयैव पठ्यमाना । यथा 'शतचन्द्रं नभस्तलम्' इति । तत्र 'दामोदरकराघातविह्वलीकृतचेतसा । दृष्टं चाणूरमल्लेन' इत्यादिना सा पूर्यते ॥ (२) ॥*॥ 'असमासार्था' इति पाठे तु 'अपरिपूरणार्था' इत्यर्थः ॥ द्वे **'समस्यायाः'** ॥

किंवदन्ती जनश्रुतिः ।

किंवदन्तीति ॥ कोऽपि वादः । किंपूर्वाद्वदेः 'भूतृवहिवसि' (उ० ३।१२८) इति झच् । 'झोऽन्तः' (७।१।३) 'गौरादिलात्' (४।१।४१) ङीष् । यद्वा 'किंवदन्ति' इत्याख्यायमाना । अनुकरणशब्दादाख्यातण्यन्तात् (वा० ३।१।२६) 'अच इः' (उ० ४।१३९) । 'कृदिकारात्–' (ग० ४।१।४५) इति ङीष् ॥ (१) ॥*॥ जनेभ्यः श्रूयते । क्तिन् (३।३।९४) ॥ (२) ॥*॥ द्वे **'लोकप्रवादस्य'** ॥

वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात्

वार्तेति ॥ वृत्तिर्लोकवृत्तम् । तदस्त्यस्याम् । 'वृत्तेश्च' (वा० ५।२।१०१) इति वार्तिकेन णः । यत्तु—'प्रज्ञाश्रद्धा–' (५।२।१०१) इत्यादिना णः–इति मुकुटेनोक्तम् । तन्न । 'तत्र वृत्तिशब्दस्य पाठोऽप्रामाणिकः' इत्युक्तवार्तिकेनैव ज्ञापितत्वात् । **'वार्ता** तु वर्तने वार्तिङ्गणे कृष्याद्युदन्तयोः । निःसारारोग्ययोः क्लीबम्' ॥ (१) ॥*॥ प्रवर्तते व्याप्नोति वृत्तेः (भ्वा० आ० से०) क्तिच् (३।३।१७४) । **'प्रवृत्तिर्वृत्तवृत्तान्तप्रवाहेषु प्रवर्तने'** इति हैमः ॥ (२) ॥*॥ वृत्तोऽनुवर्तनीयो गवेषणीयोऽन्तः समाप्तिर्यस्य । **'वृत्तान्तस्तु** प्रकरणे कात्स्न्र्ये वार्ताप्रकारयोः' इति हैमः ॥ (३) ॥*॥ उद्गतोऽन्तो यस्य । **'उदन्तः** साधुवार्तयोः' ॥ (४) ॥*॥ चत्वारि **'वार्तायाः'** ॥

१—हैमे तु संग्रहो बृहदुद्धारे ग्रहसंक्षेपयोरपि' इत्युपलभ्यते । संचयेऽपीति मल्लः—इत्यनेकार्थकैरवाकरकौमुदी ॥ २—हैमे तु 'प्रवृत्तिर्वृत्तौ वार्तायां प्रवाहे' इत्युपलभ्यते ।

अथाह्वयः ॥ ७ ॥

आख्याह्वे अभिधानं च नामधेयं च नाम च ।

अथेति ॥ आह्वयन्त्याह्वाः । 'आतश्चोपसर्गे' (३।१।१३६) इति के प्राप्ते 'प्रसारणिभ्यो ड्वो वक्तव्यः' (वा० ३।२।३) इति ङः । तैर्यायते प्राप्यते । 'या प्रापणे' (अ० प० अ०) । घञर्थे कः (वा० ३।३।५८) । 'अन्येभ्योऽपि' (वा० ३।२।४८) इति ङो वा । यद्वा आह्वानमाह्वः । संपदादिः (वा० ३।३।१०८) तस्या अयः ॥ (१) ॥*॥ आख्यानम् । 'आतश्चोपसर्गे' (३।३।१०६) इत्यङ् ॥ (२) ॥*॥ एवमाह्वा ॥ (३) ॥*॥ अभिधीयते । कर्मणि ल्युट् (३।३।११३) ॥ (४) ॥*॥ म्नायते । 'म्ना अभ्यासे' (भ्वा० प० से०) । यद्वा नम्यतेऽभिधीयतेऽर्थोऽनेन । 'णम प्रह्वत्वे शब्दे च' (भ्वा० प० अ०) । 'नामन्सीमन्–' (उ० ४।१५१) इति निपातितः । 'भागरूपनामभ्यो धेयः' (वा० ५।४।३५) इति स्वार्थे वा धेयः ॥ (५) ॥*॥ (६) ॥*॥ षट् **'नाम्नः'** ॥

हूतिराकारणाह्वानम्

हूतिरिति ॥ ह्वानम् । ह्वेञः (भ्वा० उ० अ०) । क्तिन् (३।३।९४) ॥ (१) ॥*॥ आकारणम् । कृञो ण्यन्तात् (३।१।२६) युच् (३।३।१०७) ॥ (२) ॥*॥ (ह्वेञः) ल्युटि (३।३।११५) आह्वानम् ॥ (३) ॥*॥ त्रीणि **'आह्वानस्य'** ॥

संहूतिर्बहुभिः कृता ॥ ८ ॥

संहूतिरिति ॥ बहुकर्तृका हूतिश्चेत् संहूतिः ॥ (१) ॥*॥ एकम् **'बहुकर्तृकाह्वानस्य'** ॥

विवादो व्यवहारः स्यात्

विवाद इति ॥ विरुद्धो वादः ॥ (१) ॥*॥ 'वि नानार्थेऽव संदेहे हरणं हार उच्यते । नानासंदेहहरणाद्व्यवहार इति स्मृतः' इति कात्यायनः । **'व्यवहारः** स्थितौ पणे । द्वयमेदे[2]' इति हैमः ॥ (२) ॥*॥ द्वे **'ऋणादिन्यायस्य'** ॥

उपन्यासस्तु वाङ्मुखम् ।

उपेति ॥ उपन्यसनम् । 'असु क्षेपणे' (दि० प० से०) । घञ् (३।३।१८) ॥ (१) ॥*॥ वाचो मुखमिव मुखमुपक्रमः ॥ (२) ॥*॥ द्वे **'वचनोपक्रमस्य'** ॥

उपोद्घात उदाहारः

उपोद्घात इति ॥ उप समीपे उद्घननं ज्ञापनम् । भावे घञ् (३।३।१८) ॥ (१) ॥*॥ उदाहरणम् । घञ् (३।३।१८)॥ (२) ॥*॥ द्वे **'वक्ष्यमाणोपयोग्यर्थवर्णनस्य'** । प्रकृतोपपादकस्य दृष्टान्तादेरित्यन्ये ॥

शपनं शपथः पुमान् ॥ ९ ॥

शपनमिति ॥ 'शप आक्रोशे' (दि० उ० अ०) । ल्युट्

१—भाष्ये तु 'अन्येष्वपि' इति दृश्यते ॥ २—'द्वयमेदे व्यवहारेऽपि' इति पाठान्तरम् ॥

(३।३।११५) ॥ (१) ॥*॥ 'शीङ्शप–' (उ० ३।११३) इत्यर्थः । **'शपथः** कार आक्रोशे शपने च सुतादिभिः' इति हैमः ॥ (२) ॥*॥ द्वे **'सुतस्पर्शादिना शपथकरणस्य'** ॥

प्रश्नोऽनुयोगः पृच्छा च

प्रश्न इति ॥ प्रच्छनम् । 'यजयाच–' (३।३।९०) इति नङ् । 'प्रश्ने चा–' (३।२।११७) इति लिङ्गान्न संप्रसारणम् ॥ (१) ॥*॥ अनुयोजनम् । युजेर्घञ् (३।३।१८) ॥ (२) ॥*॥ प्रच्छनम् । 'गुरोश्च हलः' (३।३।१०३) इत्यङ् । संप्रसारणम् (६।१।१६) ॥ (३) ॥*॥ त्रीणि **'प्रश्नस्य'** ॥

प्रतिवाक्योत्तरे समे ।

प्रतीति ॥ प्रतिवचनम् । ण्यत् (३।१।१२४) ॥ (१) ॥*॥ उत्तरणम् । 'ऋदोरप्' (३।३।५७) । (**'उत्तरं** प्रवर्णीध्वयोः । उदीच्यप्रतिवचसोरुत्तरस्तु विराटजे') ॥ (२) ॥*॥ द्वे **'उत्तरस्य'** ॥

मिथ्याभियोगोऽभ्याख्यानम्

मिथ्येति ॥ मिथ्या चासावभियोगश्च ॥ (१) ॥*॥ चक्षिङः (अ० अ० से०) अभ्याङ्पूर्वाद्भावे ल्युट् (३।३।११५)॥ (२) ॥*॥ द्वे 'शतं मे धारयसि' इत्यादि **'मिथ्याविवादस्य'** ॥

अथ मिथ्याभिशंसनम् ॥ १० ॥

अभिशापः

अथेति ॥ अभिशंसेः (भ्वा० प० से०) भावे ल्युट् (३।३।११५) ॥ (१) ॥*॥ अभिशपनम् । घञ् (३।३।१८) ॥ (२) ॥*॥ द्वे **'मिथ्यारोपस्य सुरापानादिविषयस्य'** ॥

प्रणादस्तु शब्दः स्यादनुरागजः ।

प्रणाद इति ॥ प्रणदनम् । घञ् (३।३।१८) । 'प्रणादस्तु पुमांस्तारशब्दे च श्रवणामये । अनुरागकृते शब्दे **प्रणादः** सीत्कृतं नृणाम्' इति शब्दार्णवः ॥ (१) ॥*॥ एकं प्रीतिविशेषजनितस्य **'मुखकण्ठादिशब्दस्य'** ॥

यशः कीर्तिः समज्ञा च

यश इत्यादि ॥ अश्नुते व्याप्नोति । 'अशू व्याप्तौ' (स्वा० आ० से०) 'अशेर्देवने युट् च' (उ० ४।१९१) इत्यसुन् ॥ (१) ॥*॥ कीर्त्यते । 'कृत संशब्दने' (चु० प० से०) । 'ऋतियूति–' (३।३।९७) इति निपातितः । **'कीर्तिः** प्रसादयशसोर्विस्तारे कर्दमेऽपि च' ॥ (२) ॥*॥ समैः सर्वैर्ज्ञायते । 'ज्ञा अवबोधने' (क्या० प० से०) घञर्थे कः (वा० ३।३।५८) (अन्यत्रापीति) डो वा ॥*॥ **'समज्ञा'** इति समाङ्पूर्वाज्ज्ञः (क्या० प० से०) । 'आतश्चोपसर्गे' (३।३।१०६) इत्यङ् ॥*॥ **'समज्या'** इति पाठे (समाङ्पूर्वात्) 'अज गतौ' (भ्वा० प० से०) । 'संज्ञायां समज–' (३।३।९९) इति क्यप् । 'क्यपि प्रतिषेधः' (वा० २।४।१५६) इति न वीलम्॥ (३) ॥*॥ त्रीणि **'कीर्तेः'** ॥

स्तवः स्तोत्रं स्तुतिर्नुतिः ॥ ११ ॥

स्तव इत्यादि ॥ स्तूयतेऽनेन । 'ऋदोरप्' (३।३।५७) ॥ (१) ॥*॥ 'दात्री–' (३।२।१८२) इति ष्ट्रनि स्तोत्रम् ॥ (२) ॥*॥ क्तिनि (३।३।९४) स्तुतिः ॥ (३) ॥*॥ 'णु स्तुतौ' (अ० प० अ०) । नुतिः ॥ (४) ॥*॥ चत्वारि **'स्तुतेः'** ॥

आम्रेडितं द्विरुक्तम्

आम्रेडितमिति ॥ आम्रेड्यते आधिक्येनोच्यते स्म । 'म्रेडृ उन्मादे' (भ्वा० प० से०) । क्तः (३।२।१०२) । यथा 'सर्पः सर्पः' इति ॥ (१) ॥*॥ एकम् **'द्विरुक्तेः'** ॥

उच्चैर्घुष्टं तु घोषणा ।

उच्चैर्घुष्टमित्यादि ॥ उच्चैर्घुष्यते स्म । 'घुषिर् शब्दे' (चु० उ० से०) । क्तः (३।२।१०२) । 'घुषिरविशब्दने' (७।२।२३) इतीण्निषेधः । विशब्दनं स्वाभिप्रायप्रकाशनम् । तच्च प्रकृते नाभिप्रेतम् ॥ (१) ॥*॥ 'ण्यास–' (३।३।१०७) इति युच् ॥ (२) ॥*॥ **'उच्चैःशब्दनस्य'** द्वे ॥

काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ।

काकुरिति ॥ आदिना कामक्रोधादेर्ग्रहः । कक्यते । 'कक लौल्योपतापयोः' ॥ (*) ॥ बाहुलकादुण् ॥ (१) ॥*॥ एकम् **'शोकादिना विकृतशब्दस्य'** ॥

अवर्णाक्षेपनिर्वादपरीवादापवादवत् ।
उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ॥१३॥

अवर्णेत्यादि ॥ यथा अवर्णादयो निन्दायाम्, तथोपक्रोशादयोऽपीत्यर्थः । वर्ण्यते । 'वर्ण वर्णने' (चु० प० से०) । घञ् (३।३।१८) वर्णः प्रशंसा । तद्विरुद्धोऽवर्णः । **'वर्णो** द्विजादिशुक्लादियशोगुणकथासु च । स्तुतौ ना न स्त्रियां भेदरूपाक्षरविलेपने' ॥ (१) ॥*॥ **'क्षिप प्रेरणे'** (तु० उ० से०) । घञ् (३।३।१८) । **'आक्षेपो** भर्त्सनाकृष्टिकाव्यालंकृतिषु स्मृतः' ॥ (२) ॥*॥ निरादिपूर्वाद्वदेः (भ्वा० प० से०) घञ् (३।३।१८) । **'निर्वादः** स्याल्लोकवादपरिनिष्ठितवादयोः' ॥ (३) ॥*॥ 'उपसर्गस्य घञि' (६।३।१२२) इति (वा) दीर्घः । **'परिवादोऽपवादे** स्याद्वीणावादनवस्तुनि' ॥ (४) ॥*॥ **'अपवादस्तु** निन्दायामाज्ञाविभ्रम्भयोरपि' ॥ (५) ॥*॥ 'कुश आह्वाने' (भ्वा० प० से०) । घञ् (३।३।१८) ॥ (६) ॥*॥ 'गुप गोपनकुत्सनयोः' (भ्वा० आ० से०) । गुपेर्निन्दायां सन् (३।१।५) । 'अप्रत्ययात्' (३।३।१०२) ॥ (७) ॥*॥ 'कुत्स अवक्षेपणे'

१—लोकवादोऽपवादः । तत्र यथा 'खलनिर्वादकथायां वदिता यत्खलजनोऽपि स्यात्' ॥ परिनिष्ठितवादस्त्यक्तवादः । तत्र यथा 'निर्वादा वादिनः कृताः' ॥ २—मेदिनीहैमयोस्तु **'अववादः'** इति दृश्यते । व्याख्यातमुदाहृतं च तदेवानेकार्थकैरवाकरकौमुद्याम् ॥

(चु० आ० से०)। 'गुरोश्च' (३।३।१०३) इत्यः ॥ (८) ॥*॥ 'णिदि कुत्सायाम्' (भ्वा० प० से०)। 'गुरोश्च' (३।३।१०३) इत्यः । **'निन्दा** स्यादपवादेऽपि कुत्सायामपि योषिति' ॥ (९) ॥*॥ 'गर्ह गल्ह कुत्सायाम्' (भ्वा० आ० से०)। ल्युट् (३।३।११५) ॥ (१०) ॥*॥ दश **'निन्दायाः'** ॥

पारुष्यमतिवादः स्यात्

पारुष्यमित्यादि ॥ परुषो निष्ठुरभाषी। तस्य भावः पारुष्यम्। ब्राह्मणादिलात् (५।१।१२४) ष्यञ्। **'पारुष्यं** परुषत्वे च दुर्वाक्ये पुंसि गीर्पतौ' ॥ (१) ॥*॥ अतिक्रम्योक्तिरतिवादः ॥ (२) ॥*॥ द्वे **'अप्रियवचसः'** ॥

भर्त्सनं त्वपकारगीः ।

भर्त्सनमित्यादि ॥ अपकारार्था गीः ॥ (१) ॥*॥ 'भर्त्स तर्ज संतर्जने' (चु० आ० से०)। ल्युट् (३।३।११५) (२) ॥*॥ द्वे 'चौरोऽसि घातयिष्यामि त्वाम्' इत्यादि **'अपकारार्थवाक्यस्य'** ॥

यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणम् ॥ १४ ॥

य इति ॥ उपालम्भो द्वेधा। गुणाविष्करणपूर्वको निन्दापूर्वकश्च। आद्यो यथा 'महाकुलीनस्य तव किमुचितमिदम्'। द्वितीयस्तु 'बन्धकीसुतस्य तवोचितमेवेदम्' इति। तत्र यो द्वितीयः स परिभाषणम्। 'भाष व्यक्तायां वाचि' (भ्वा० आ० से०)। ल्युट् (३।३।११५) ॥*॥ अप्रत्यये (३।३।१०२) **'परिभाषा'** अपि। 'परिभाषाश्च ततो भविष्यन्ति' इति 'हेतुमति च' (३।१।२६) इति सूत्रे भाष्यात्। **'परिभाषणं** सनिन्दोपालम्भे नियमेऽपि च' (१) ॥*॥ एकम् **'सनिन्दभाषणस्य'** ॥

तत्र त्वाक्षारणा यः स्यादाक्रोशो मैथुनं प्रति ।

तत्रेति ॥ 'क्षर संचलने' (भ्वा० प० से०) प्रयोजकण्यन्ताद्युच् (३।३।१०७)। ल्युटि (३।३।११५) **'आक्षारणम्'** अपि। 'क्षरणाक्षारणाक्रोशाः साभिशापाभिमैथुनाः' (इति दुर्गः)। क्लीबमपि। 'नीचैर्माक्षारणं यः स आक्रोशो मैथुनं प्रति' इति शब्दार्णवः ॥ (१) ॥*॥ परस्त्रीनिमित्तं पुंसः, परपुरुषनिमित्तं स्त्रियाश्च **'आक्रोशनस्य'** एकम् ॥

स्यादाभाषणमालापः

स्यादिति ॥ आभाषेः (भ्वा० आ० से०) ल्युट् (३।३।११४) ॥ (१) ॥*॥ 'लप व्यक्तायां वाचि' (भ्वा० प० से०)। घञ् (३।३।१८) ॥ (२) ॥*॥ **'संभाषणस्य'** द्वे ॥

प्रलापोऽनर्थकं वचः ॥ १५ ॥

प्रलाप इति ॥ प्रलपनम्। घञ् (३।३।१८) ॥ (१) ॥*॥ **'प्रयोजनशून्यस्योन्मत्तादिवचनस्य'** एकम् ॥

१—'नीचम्' इति पुंविहीनस्य संज्ञा इति मुकुटः ॥

अनुलापो मुहुर्भाषा

अनुलाप इत्यादि ॥ मुहुः पुनःपुनर्भाषणम्। घञ् (३।३।१८) ॥ (१) ॥*॥ अनुलपनम्। घञ् (३।३।१८) ॥ (२) ॥*॥ द्वे **'वारंवारं भाषणस्य'** ॥

विलापः परिदेवनम् ।

विलाप इत्यादि ॥ विलपनम्। घञ् (३।३।१८) ॥ (१) ॥*॥ परिदेवनम्। 'दिवु परिदेवने' (चु० आ० से०) चुरादिः। ल्युट् (३।३।११५) ॥*॥ युचि (३।३।१०७) **'परिदेवना'** अपि ॥ (२) ॥*॥ द्वे **'अनुशोचनोक्तेः'** ॥

विप्रलापो विरोधोक्तिः

विप्रविलाप इत्यादि ॥ विरुद्धः प्रलापः। **'विप्रलापो** विरुद्धोक्तावनर्थकवचस्यपि' इति हैमः ॥ (१) ॥*॥ विरोधस्य उक्तिः ॥ (२) ॥*॥ द्वे **'अन्योन्यविरुद्धवचनस्य'** ॥

संलापो भाषणं मिथः ॥ १६ ॥

संलाप इति ॥ संलपनम्। घञ् (३।३।१८) ॥ (१) ॥*॥ मिथोऽन्योन्यं प्रति भाषणम्। आलापस्त्वेकेनापि क्रियते ॥ एकम् **'मिथोभाषणस्य'** ॥

सुप्रलापः सुवचनम्

सुप्रेत्यादि ॥ सुष्ठु प्रकृष्टं लपनम्। घञ् (३।३।१८) ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'शोभनवचनस्य'** ॥

अपलापस्तु निह्नवः ।

अपलाप इति ॥ अपलपनम्। घञ् (३।३।१८) **'अपलापः** प्रेम्ण्यपह्नवे' ॥ (१) ॥*॥ निह्नवनम्। 'ह्नुङ् अपनयने' (अ० आ० अ०)। 'ऋदोरप्' (३।३।५७)। (**'निह्नवः** स्यादविश्वासेऽपलापे निकृतावपि') ॥ (२) ॥*॥ द्वे धार्यमाणे 'न धारयामि' इत्यादि **'निह्नवोक्तेः'** ॥

संदेशवाग्वाचिकं स्याद्

संदेशेति ॥ संदिश्यते घञ् (३।३।१८)। संदेशोऽर्थः। तस्य वाक् ॥ (१) ॥*॥ संदिष्टोऽर्थो ययोच्यते सा वाचिकम्। 'वाचो व्याहृतार्थायाम्' (५।४।३५) इति ठक् ॥ (२) ॥*॥ द्वे **'संदेशवचनस्य'** ॥

वाग्भेदास्तु त्रिषूत्तरे ॥१७॥

वाग्भेदा इति ॥ उत्तरे वक्ष्यमाणा वाग्भेदा रुशत्यादयः सम्यगन्ताः ॥

रुशती वागकल्याणी

रुशतीति ॥ 'रुश हिंसायाम्' (तु० प० अ०) तालव्यान्तस्तौदादिकः। शत्रन्तान्ङीप्। 'आच्छीनद्योः' (७।१।८०) इति नुमो विकल्पः। रुशती हिंस्रा। रुशच् शब्दः। रुशद्वचनम्। मुकुटस्तु (**उषती** इति पाठे) 'उष दाहे' (भ्वा० प० से०) इत्यस्य शत्रन्तस्य 'उषती' इति रूपमाह।

तन्न । तस्माच्छपि (३।१।६८) 'पुगन्त–' (७।३।८६) इति गुणस्य 'शप्श्यनोर्नित्यम्' (७।१।८१) इति नुमश्च प्रसङ्गात् ॥ (१) ॥*॥ एकम् **'अकल्याणवाचः'** ॥

स्यात्कल्या तु शुभात्मिका ।

स्यादिति ॥ कलासु साधुः । 'तत्र साधुः' (४।४।९८) इति यत् ॥*॥ **'काल्या'** अपि–इति स्वामी । तत्र काले साधुः ॥ (१) ॥*॥ एकम् **'शुभवचनस्य'** ॥

अत्यर्थमधुरं सान्त्वम्

अत्यर्थेति ॥ सान्त्वयति । 'षान्त्व सामप्रयोगे' (चु० प० से०) चुरादिः । पचाद्यच् (३।१।१३४) । (**'सान्त्वं** सामनि दाक्षिण्ये') ॥ (१) ॥*॥ एकम् **'सान्त्ववचनस्य'** ॥

संगतं हृदयंगमम् ॥ १८ ॥

संगतमिति ॥ संगच्छते स्म । 'गत्यर्था–' (३।४।७२) इति कर्तरि क्तः ॥ (१) ॥*॥ हृदयं गच्छति । 'गमश्च' (३।२।४७) इति खच् ॥ (२) ॥*॥ द्वे **'युक्त्या मिलितस्य वचनस्य'** ॥

निष्ठुरं परुषम्

निष्ठुरमिति ॥ निष्ठति । 'मद्गुरादयश्च' (उ० १।४१) इति कुरच् । 'उपसर्गात्सुनोति–' (८।३।६५) इति षत्वम् ॥ (१) ॥*॥ पिपर्ति पूरयति अलंबुद्धिं करोति । 'पॄ पालनपूरणयोः' (जु० प० से०) 'पॄनहि–' (उ० ४।७५) इत्युषच् । **'पैरुषं** कर्बुरे रूक्षे स्यान्निष्ठुरवचस्यपि' इति हैमः ॥ (२) ॥*॥ द्वे **'कर्कशवचनस्य'** ॥

ग्राम्यमश्लीलम्

ग्राम्यमिति ॥ ग्रामे भवम् । 'ग्रामाद्यखञौ' (४।२।९४) इति यत् । **'ग्राम्यं** स्त्रीकरणे क्लीबेऽश्लीलप्राकृतयोस्त्रिषु' ॥ (१) ॥*॥ श्रियं लाति । 'आतोऽनुप–' (३।२।३) इति कः । तद्धिनम् । कपिलकादित्वात् (वा० ८।२।१८) लत्वम् ॥ (२) ॥*॥ द्वे **'भण्डादिवचनस्य'** ॥

सूनृतं प्रिये ।

सत्ये

सूनृतमिति ॥ प्रीणाति । 'प्रीञ् तर्पणे' (क्रया० प० अ०) । 'इगुपध–' (३।१।१३५) इति कः ॥*॥ सत्सु साधु । यत् (४।४।९८) ॥*॥ प्रियं यत्सत्यम् तस्मिन् । सुष्ठु नृत्यन्त्यनेन । घञर्थे कः (वा० ३।३।५८) यद्वा 'हलश्च' (३।३।१२१) इति घञ् । संज्ञापूर्वकत्वाद्गुणाभावः । 'अन्येषामपि' (६।३।१३७) इति दीर्घः । यत्तु—'मूलविभुजादिलात् (वा० ३।२।५) कः'–इति मुकुटेनोक्तम् । तन्न । तस्य कर्तरि विधानात् । **'सूनृतं** मङ्गलेऽपि स्यात्प्रियसत्ये वचस्यपि' ॥ (१) ॥*॥ एकम् **'सत्यस्य'** ॥

अथ संकुलक्लिष्टे परस्परपराहते ॥ १९ ॥

अथेति ॥ संकुलति । 'कुल संस्त्याने' (भ्वा० प० से०) कः (३।१।१३५) **'संकुलं** त्रिषु विसंष्ठवाचि व्याप्ते' ॥ (१) ॥*॥ क्लिश्यते स्म । 'क्लिशू विबाधने' (क्रया० प० से०) क्तः ।–(३।२।१०२) 'यस्य विभाषा' (७।२।१५) इतीडभावः–इति मुकुटः । वस्तुतस्तु 'क्लिशः क्त्वानिष्ठयोः' (७।२।५०) इति वेट् ॥ (२) ॥*॥ पराऽघानि । हन्तेः कर्मणि क्तः (३।२।१०२) । परस्परेण पराहतम् ॥ (३) ॥*॥ 'माता मे वन्ध्या' इतिवत्॥ **'विरुद्धार्थस्य वचनस्य'** त्रीणि ॥

लुप्तवर्णपदं ग्रस्तम्

लुप्तेति ॥ लुप्तो वर्णः पदं वा यत्र पदे वाक्ये वा ॥ (१) ॥*॥ ग्रस्यते स्म । 'ग्रसु अदने' (भ्वा० आ० से०) । क्तः (३।२।१०२) । **'ग्रस्तं** ग्रासीकृतेऽपि स्याल्लुप्तवर्णपदोदिते' ॥ (२) ॥*॥ **'अशक्त्यादिनासंपूर्णोच्चारितस्य'** द्वे ॥

निरस्तं त्वरितोदितम् ।

निरस्तमिति ॥ त्वरितमुदितम् ॥ (१) ॥*॥ निरस्यते स्म । 'असु क्षेपणे' (दि० प० से०) । क्तः (३।२।१०२) । **'निरस्तः** प्रेषितशरे संत्यक्ते त्वरितोदिते । निष्ठ्यूते प्रतिहते च' इति हैमः ॥ (२) ॥*॥ द्वे **'शीघ्रोच्चारितस्य वचसः'** ॥

अम्बूकृतं सनिष्ठेवम्

अम्बूकृतमिति ॥ निष्ठेवनम् । 'ष्ठिवु निरसने' (भ्वा० प० से०) । घञ् (३।३।१८) । लघूपधगुणः (७।३।८६) । **'सनिष्ठीवम्'** इति पाठे तु पृषोदरादित्वात् (६।३।१०९) ईकारः । सह निष्ठेवेन श्लेष्मकणादिनिर्गमेनेति सनिष्ठेवम् ॥ (*) ॥ अम्बुशब्द उपचारात्तद्वति । अनम्बु अम्बु अकारि । च्विः (५।४।५०) 'च्वौ च' (६।३।१३८) इति दीर्घः । क्तः (३।२।१०२) ॥ (१) ॥*॥ एकं **'श्लेष्मनिर्गमसहितवचनस्य'** ॥

अबद्धं स्यादनर्थकम् ॥२०॥

अबद्धमिति ॥ न बध्यते स्म । 'बन्ध बन्धने' (क्रया० प० अ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ **न अर्थो यस्य ।**

१—गुणस्य 'संज्ञापूर्वकत्वेन नुम आगमशासनत्वेन, अनित्यत्वेन तेनैव वारितत्वेनाकिंचित्करमेतत् । पीयूषव्याख्यायामपि उपति' इति पाठं प्रदर्श्य, 'रुशती' इत्येके–इत्युक्तम् ॥ २—'दिष्टया रमसे सामनि परमे वचसां त्वं सुजनो हि वदति मित्रं परमेव च सान्त्वम्' इति शिवभद्रे यमकाद्दन्त्यादिः ॥ ३—'अपरुषो दायादा वाग्विभवश्च' इति दमयन्तीश्लेषात्, 'अपि सपत्नजनेन च तेन वागपरुषा परुषाक्षरमीरिता' इति यमकाच्च मूर्धन्यवान् ॥ ४—कर्बुरवर्णे यथा 'विरक्तसंध्यापरुषं पुरस्तादथा रजः पार्थिवमुज्जिहीते' इत्यनेकार्थकैरवाकरकौमुदी । इह तु 'कठिने' इति लिखितमासीत् ॥

१—'असूनृतं दधदपि सूनृतभाषी' इति वासवदत्ताविरुद्धालंकारदर्शनश्लेषात् दीर्घान्त्यदन्त्यादि–इति मुकुटः ॥

'अर्थान्नञः' इत्युरःप्रभृतिषु (५।४।१५१) पाठान्नित्यं कप् समासान्तः । अनर्थकं जरद्गवादिवाक्यम् । **'अवध्यं स्याद्'** इति पाठ इति कौमुदी । **'अवध्यमवधार्हे स्यादनर्थकवचस्यपि'** इति (हैममेदिन्योः) दर्शनात् ॥ (२) ॥*॥ द्वे **'समुदायार्थशून्यस्य वचनस्य'** ॥

अनक्षरमवाच्यं स्याद्

अनक्षरमिति ॥ न प्रशस्तान्यक्षराणि यस्मिन् । अक्षराणामप्राशस्त्यं चार्थद्वारकम् ॥ (१) ॥*॥ न वचनार्हम् । ण्यत् (३।१।१२४) । 'वचोऽशब्दसंज्ञायाम्' (७।३।६७) इति न कुत्वम् ॥ (२) ॥*॥ द्वे **'निन्दावचनस्य'** ॥

आहतं तु मृषार्थकम् ।

आहतमिति ॥ आहन्यते स्म । क्तः (३।२।१०२) । **'आहतं** गुणिते चापि ताडिते च मृषार्थके । स्यात्पुरातनवस्त्रेऽपि नववस्त्रे वितानके' ॥ (१) ॥ मृषाऽर्थो यस्य ॥*॥ 'एष वन्ध्यासुतो याति' इत्यादिवचनस्य **'मृषावचनस्य'** एकम् ॥

'सोल्लुण्ठनं तु सोत्प्रासम्

सोल्लुण्ठनमिति ॥ 'लुठि आलस्ये प्रतीघाते च' (भ्वा० प० से०) । ल्युट् (३।३।११५) । उल्लुण्ठनेन सहितम् ॥ (१) ॥*॥ उत्प्रासनम् । 'असु क्षेपणे' (दि० प० से०) । घञ् (३।३।१८) उत्प्रास उपहासः । तत्सहितम् ॥ (२) ॥*॥ द्वे **'सोपहासस्य'** ॥

मणितं रतिकूजितम् ।' इति क्वचित्पठ्यते ॥

मणितमिति ॥ 'मण कूजने' (भ्वा० प० से०) । भावे क्तः (३।३।११४) ॥ (१) ॥*॥ रतौ कूजितम् ॥ (२) ॥*॥ द्वे **'रतिकूजितस्य'** ॥

अथ म्लिष्टमविस्पष्टम्

अथेति ॥ म्लेच्छयते स्म । 'म्लेच्छ अव्यक्ते शब्दे' (भ्वा० प० से०) । 'क्षुब्धस्वान्त–' (७।२।१८) इति निपातितम् । **'म्लिष्टं** त्रिष्वव्यक्तवाचि म्लानेे' ॥ (१) ॥*॥ न विस्पश्यते स्म । 'स्पश बाधनस्पर्शनयोः' (*) कर्मणि क्तः (३।२।१०२) । 'अविस्पष्ट–' (७।२।१८) इति निर्देशादिडभावः ॥ (२) ॥*॥ द्वे **'अप्रकटवचनस्य'** ॥

वितथं त्वनृतं वचः ॥ २१ ॥

वितथमिति ॥ विगतं तथा सत्यं यस्माद्वितथम् । 'अच्' (५।४।७५) इति योगविभागात्समासान्तोऽच् । यद्वा वितन्यते । बाहुलकात्क्थन् । 'अनुदात्तो–' (६।४।३७) इति नलोपः ॥ (१) ॥*॥ न ऋतम् । 'अनृतं कृषावसत्येऽपि' ॥ (२) ॥*॥ द्वे **'असत्यवचसः'** ॥

सत्यं तथ्यमृतं सम्यग्

सत्यमित्यादि ॥ सति साधु सत्यम् । **'सत्यं** कृते च शपथे तथ्ये च त्रिषु तद्वति' ॥ (१) ॥*॥ तथा सत्ये साधु तथ्यम् ॥ (२) ॥*॥ अर्यते स्म । 'ऋ गतौ' (भ्वा०प०अ०) । क्तः (३।२।१०२) । ('**ऋतं** शिलोञ्छे पानीये पूजिते दीप्तसत्ययोः') ॥ (३) ॥*॥ समञ्जति संगच्छते । 'अञ्चु गतौ' (भ्वा० प० से०) क्विन् (३।२।५९) सम्यक् । सम्यङ् पुंसि स्त्रियां समीची ॥ (४) ॥*॥ चत्वारि **'सत्यवचसः'** ॥

अमूनि त्रिषु तद्वति ।

अमूनीति ॥ अमूनि (सत्यादीनि) उपचारात्तद्वति वर्तमानानि त्रिषु । 'त्रिषूत्तरे' (प्रागुक्तेन) इत्यनेन वाग्विशेषपराणां त्रिलिङ्गत्वमुक्तम् । अनेन तु वक्तृपराणाम्–इति विशेषः ॥

शब्दे निनादनिनदध्वनिध्वानरवस्वनाः ॥ २२ ॥
स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः ।
आरवारावसंरावविरावाः

शब्द इति ॥ शब्दनम् । 'शब्द शब्दकरणे' (चु० उ० से०) । 'एरच्' (३।३।५६) । घञ् (३।३।१८) वा ॥ (१) ॥*॥ 'णद् अव्यक्ते शब्दे' (भ्वा० प० से०) । 'नौ गदनद–' (३।३।६४) इत्यप् ॥ (२) ॥*॥ पक्षे घञ् (३।३।१८) ॥ (३) ॥*॥ 'ध्वन शब्दे' (भ्वा० प० से०) । 'खनिकषि' (उ० ४।१४०) इति इः ॥ (४) ॥*॥ घञि ध्वानः (३।३।१८) ॥ (५) ॥*॥ रवणम् । 'रु शब्दे' (अ० प० से०) । 'ऋदोरप्' (३।३।५७) ॥ (६) ॥*॥ 'स्वनहसोर्वा' (३।३।६२) इत्यप्घञौ ॥ (७) ॥*॥ (८) ॥*॥ 'घुष घुष्टौ' (भ्वा० उ० से०) । 'ह्राद अव्यक्ते शब्दे' (भ्वा० आ० से०) । घञ् (३।३।१८) ॥ (९) ॥*॥ (१०) ॥*॥ 'विभाषा ह्रि स्रुवोः' (३।३।५०) इति घञ् ॥ (११) ॥*॥ पक्षे अप् (३।३।५७) ॥ (१४) ॥*॥ 'उपसर्गे रुवः' (३।३।२२) इति घञ् ॥ (१६) ॥*॥ (१७) ॥*॥ सप्तदश **'शब्दस्य'** ॥

अथ मर्मरः ॥ २३ ॥

स्वनिते वस्त्रपर्णानाम्

अथेति ॥ वस्त्राणां पर्णानां च स्वनिते मर्मरः । शब्दानुकरणमिति स्वामी । 'मृङ् प्राणत्यागे' (तु० आ० अ०) । 'कृदरादयश्च' (उ० ५।४१) इत्यरन् मुगागमो गुणश्च—इत्यन्ये । मर्म राति वा । कः (३।२।३) । **'मर्मरो** वस्त्र-

१—'जरद्गवः कम्बलपादुकाभ्यां द्वारि स्थितो गायति मङ्गलानि । तं ब्राह्मणी पृच्छति पुत्रकामा राजन् रुमायां लशुनस्य कोर्थः' इति मुकुटः ॥ २—म्लाने विच्छाये यथा 'म्लिष्टं क्लिन्नममित्रवासभवने वक्ति त्वदीयं यशः' अनेकार्थकैरवाकरकौमुदी ॥

१ '—वाग्भेदास्तु त्रिषूत्तरे' इत्यस्यावधिर्दर्शितः–इति मुकुटः ॥

भेदे च शुष्कपर्णध्वनौ तथा । पुंसि स्त्रियां पुनः प्रोक्ता मर्मरी पीतदारुणि' ॥ (१) ॥*॥ एकं **'वस्त्रपर्णध्वनेः'** ॥

भूषणानां च शिञ्जितम् ।

निक्काणो निक्कणः क्काणः क्कणः क्कणनमित्यपि ॥ २४॥

भूषणानामिति ॥ भूषणानां ध्वनौ । 'शिजि अव्यक्ते शब्दे' (अ० आ० से०) तालव्यादिः । भावे क्तः (३।३।११४) ॥*॥ 'गुरोश्च–' (३।३।१०३) इत्यप्रत्यये **'शिञ्जा'** अपि–इति स्वामी ॥ (१) ॥*॥ 'नौ' (३।३।६४) इति 'अनुपसर्गे' (३।३।६१) इति चानुवर्तमाने 'क्वणो वीणायां च' (३।३।६५) इत्यप् ॥ (३) ॥*॥ (५) ॥*॥ पक्षे घञ् (३।३।१८) ॥ (२) ॥*॥ (४) ल्युट् (३।३।११५) ॥ (६) ॥*॥ (यत्तु) पञ्च वीणाया अन्यस्य च किंनरादेः क्वणने–इति मुकुटः । तन्न । अपिशब्देन पूर्वान्वयस्य बोधनात् । अतः षँडपि **'भूषणध्वनेः'** ॥

वीणायाः क्वणिते प्रादेः प्रक्काणप्रक्कणादयः ।

वीणाया इति ॥ प्रादेरिति । उपसर्गात् । 'वीणायां च' (३।३।६५) इत्यंशेन सोपसर्गादपि विधानात् । आदिशब्दादुपक्कणादयः ॥*॥ **'वीणाक्वणनस्य'** इमे ॥

कोलाहलः कलकलः

कोलाहल इति ॥ 'कुल संस्त्याने' (भ्वा० प० से०) । कोलनम् । कोल एकीभावः । तमाहलति । 'हल विलेखने' (भ्वा० प० से०) । अच् (३।३।१३४) कः (३।२।३) वा ॥ (१) ॥*॥ 'कल शब्दे' (भ्वा० आ० से०) । घञ् (३।३।१८) । संज्ञापूर्वकलाद्वृद्ध्यभावः । कलादपि कलः । (यत्तु) कोलान्सूकरानाहते त्रासयति–इति स्वाम्याह । तन्न । 'आङो यमहनः' (१।३।२८) इत्यकर्मकात्स्वाङ्गकर्मकाच्च हन्तेरात्मनेपदविधानात् । यदपि—आभीक्ष्ण्ये द्विर्भावः (८।१।४) इति । तदपि न तस्य तिङव्ययकृन्मात्रविषयत्वात् । **'कलकल** उक्तः कोलाहले तथा सर्जनिर्यासे' ॥ (२) ॥*॥ द्वे **'बहुभिः कृतस्य महाध्वनेः'** ॥

तिरश्चां वाशितं रुतम् ॥ २५ ॥

तिरश्चामिति ॥ तिरोऽञ्चन्ति ते तिर्यञ्चः । तेषां यद्रुतम् तद्वाशितम् । 'वाशृ शब्दे' (दि० आ० से०) तालव्यान्तः । भावे क्तः (३।३।११४) । **'वाशिता**[1] करिणीनार्यो**र्वाशितं** भाविते रुते' । (**'वासिता** करिणीनार्यो**र्वासितं** सुरभीकृते । ज्ञानमात्रे खगारावे वासितं वस्त्रवेष्टिते') इति विश्वकोषादिदर्शनेन तु दन्त्यवानपि ॥ (१) ॥*॥ एकम् **'पक्षिशब्दस्य'** ॥

स्त्री प्रतिश्रुत्प्रतिध्वाने

स्त्रीति ॥ 'श्रु श्रवणे' (भ्वा० प० से०) । संपदादिलात् (वा० ३।३।१०८) क्विप् । प्रति प्रथमशब्दं लक्ष्यीकृत्य श्रूयते प्रतिश्रुत् ॥ (१)॥*॥(२)॥*॥ द्वे **'प्रतिध्वनेः'** ॥

गीतं गानमिमे समे ।

गीतमिति ॥ गीयते । भावे क्तः (३।३।११४)–ल्युटौ (३।३।११५) । **'गीतं** शब्दितगानयोः' इति हैमः ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'गानस्य'** ॥

इति शब्दादिवर्गविवरणम् ॥ ६ ॥

निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥ १ ॥

निषादेति ॥ निषीदति मनोऽस्मिन् । 'षदॢ विशरणगत्यवसादनेषु' (भ्वा०, तु० प० अ०) । 'हलश्च' (३।३।१२१) इति घञ् । 'सदिरप्रतेः' (८।३।६६) इति षत्वम् । **'निषादः** स्वरभेदेऽपि चण्डाले धीवरान्तरे' ॥ (१) ॥*॥ ऋषति बलीवर्दस्वरसादृश्यं गच्छति । 'ऋषी गतौ' (तु० प० से०) । 'ऋषिवृषिभ्यां कित्' (उणा० ३।१२३) इत्यभच् । **'ऋषभ**स्त्वौषधान्तरे । स्वरभिद्वृषयोः कर्णरन्ध्रकुम्भीरपुच्छयोः ॥ उत्तरस्थः स्मृतः श्रेष्ठे स्त्री नराकारयोषिति । शूकशिम्ब्यां सिरालायां विधवायां क्वचिन्मता' ('आदिजिनेऽपि' ॥ (१) ॥*॥ गन्धारदेशे भवः । अण् (४।३।५३) । **'गान्धारो** रागसिन्दूरस्वरेषु नीवृदन्तरे' इति हैमः ॥ (१) ॥*॥ षड्भ्यो जातः । 'पञ्चम्याम्–' (३।२।९८) इति डः । 'नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संस्पृशन् । षड्भ्यः संजायते यस्मात्तस्मात्षड्ज इति स्मृतः' ॥ (१) ॥*॥ मध्ये भवः । 'मध्यान्मः' (४।३।८) । 'तद्वदेवोत्थितो वायुरुरःकण्ठसमाहतः । नाभिं प्राप्तो महानादो मध्यस्थस्तेन मध्यमः' । **'मध्यमो** मध्यजे स्वरे । देहमध्ये मध्यदेशे (**मध्यमा** कर्णिकाङ्गुलिः । राकारजस्त्रिला चापि)' इति हैमः । **'मध्यमो** मध्यजेऽन्यवत् । पुमान्स्वरे मध्यदेशेऽप्यवलम्ने तु न स्त्रियाम् ॥ स्त्रियां दृष्टरजोनार्यां कर्णिकाङ्गुलिभेदयोः । व्यक्षरच्छन्दसि तथा' ॥ (१) ॥*॥ धीमतामयं धैवतः पृषोदरादिः (६।३।१०९) **'संज्ञायाम्'** (८।२।११) इति वा वत्वम् ॥ (१) ॥*॥ 'वायुः समुद्गतो नाभेरुरोहृत्कण्ठमूर्धसु । विचरन्पञ्चमस्थानप्राप्त्या पञ्चम उच्यते' । तज्जन्यत्वात्स्वरः पञ्चमः । पञ्चानां पूरणः **'तस्य पूरणे–'**

१—पीयूषविवेकयोरपि 'शिञ्जितम्' इत्येकं भूषणध्वनेः । निक्काणादयः पञ्च वीणाकिंनरादिस्वनितस्य । इत्येव दृश्यते । अग्निपुराणान्तर्गतनामलिङ्गानुशासने 'भूषणानां च शिञ्जितम्' । वीणाया निक्कणः काणः' इति पाठस्यैव दर्शनेनापि निक्काणादीनां भूषणध्वनिवाचकत्वाप्राप्तेः ॥ २—अयं च श्लोकक्रमो मेदिनीस्थः । परंतु तत्रापि दन्त्यमध्य एवोपलभ्यते ॥

१—राका पूर्णिमा । तत्र यथा 'अमृतममृतराशिर्मध्यमामध्यरात्रे' इति ॥ २—अयं पाठः कुत्रचिदुपलभ्यते ॥

(५।२।४८) इति डट् । 'नान्तात्–' (५।२।४९) इति मट् । **'पञ्चमो** रागभेदे स्यात्स्वरभेदे च पञ्चमी । पाण्डवानां च पञ्च्यां स्त्री पञ्चानां पूरणे त्रिषु' । **'पञ्चमो** रुचिरे दक्षे' ॥ (१) ॥*॥ अमी सप्त स्वरास्तन्त्रीतः कण्ठाच्चोच्चरन्ति । 'दारवी गात्रवीणा च द्वे वीणे स्वरधारिके' इति वचनात् वंशमुरजादयस्तु अनुकरणमात्रोपयोगिन इति भावः । नारदः– 'षड्जं रौति मयूरस्तु गावो नर्दन्ति चर्षभम् । अजाविकौ च गान्धारं क्रौञ्चो नदति मध्यमम् ॥ पुष्पसाधारणे काले कोकिलो रौति पञ्चमम् । अश्वस्तु धैवतं रौति निषादं रौति कुञ्जरः' इति **'स्वराणां पृथक्पृथक्'** एकैकम् ॥

काकली तु कले सूक्ष्मे

काकलीति ॥ ईषत्कलः काकली । 'ईषदर्थे च' (६।३।१०५) इति कोः कादेशः । गौरादित्वात् (४।१।४१) ङीष् । अन्ये तु—कलेः (भ्वा० आ० से०) इन् (उ० ४।११८) । कलिः शब्द ईषदत्रेति **काकलिः** । ततः 'कृदिकारात्–' (ग० ४।१।४५) इति ङीष् । अत एव 'साधूदितं काकलिभिः कुलीनैः' इत्यभिनन्दप्रयोगः संगच्छते—इत्याहुः ॥ (१) ॥*॥ एकम् **'सूक्ष्मध्वनेः'** ॥

ध्वनौ तु मधुरास्फुटे ।

कलः

ध्वनाविति ॥ मधुरः श्रुतिसुखः । स चासावस्फुटोऽव्यक्ताक्षरश्च । तादृशे ध्वनौ कलः । 'कड मदे' (भ्वा० प० से०) । कडति माद्यत्यनेन । 'हलश्च' (३।३।१२१) इति घञ् । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । डलयोरैक्यस्मरणम् । यद्वा कलनम् । 'कल संख्याने' (भ्वा० आ० से०) । 'खनो घ च' (३।३।१२५) इति घः । यद्वा कलते । पचाद्यच् (३।१।१३४) । **'कला** स्यान्मूलरैवृद्धौ शिल्पादावंशमात्रके । षोडशांशे च चन्द्रस्य कलनाकालमानयोः ॥ **कलं** शुके त्रिध्वजीर्णे नाव्यक्तमधुरध्वनौ ॥ (१) ॥*॥ एकम् **'अव्यक्तमधुरध्वनेः'** ॥

मन्द्रस्तु गम्भीरे

मन्द्र इति ॥ गम्भीरे मेघादिध्वनौ । मन्द्यते । 'मदि स्तुत्यादौ' (भ्वा० अ० से०) 'स्फायि–' (उ० २।१३) इति रक् ॥ (१) ॥*॥ एकम् **'गम्भीरशब्दस्य'** ॥

तारोऽत्युच्चैः

तार इति ॥ तारयति अतिक्रामत्यन्याञ्छब्दान् । 'बहुलमेतन्निदर्शनम्' इति चुरादिगणसूत्रात्स्वार्थे णिच् । पचाद्यच् (३।१।१३४) ॥ (१) ॥*॥ एकम् **'उच्चशब्दस्य'** ॥

त्रयस्त्रिषु ॥ २ ॥

त्रय इति ॥ त्रयः कलमन्द्रतारा: (त्रिषु विशेष्यनिघ्नाः) ॥

१—मन्द्रोऽपि इति स्वामी ॥

समन्वितलयस्त्वेककालः

समन्वितेति ॥ सम्यगन्वितो लयो नृत्यगीतवाद्यानां साम्यं यत्र स एकः समस्तालो मानमस्येत्येककालः ॥ (१) ॥*॥ एकम् **'गीतवाद्यलयसाम्यस्य'** ॥

वीणा तु वल्लकी ।

विपञ्ची

वीणेति ॥ वेति जायते स्वरोऽस्याम् । 'वी गत्यादिषु' (अ० प० अ०) 'रास्नासास्ना–' (उ० ३।१५) इत्यादिना नप्रत्ययो णत्वं गुणाभावश्च निपातितः । **'वीणा** विद्युति वल्लक्याम्' ॥ (१) ॥*॥ वल्लते । 'वल वल्ल संवरणे' (भ्वा० आ० से०) कुन् (उ० २।३२) । गौरादित्वात् (४।१।४२) ङीष् ॥ (२) ॥*॥ विपञ्चयति विस्तारयति शब्दम् । 'पचि विस्तारे' (चु० प० से०) । ण्यन्तादच् (३।१।१३४) । गौरादिः (४।१।४१) । 'विपञ्ची केलिवीणयोः' ॥ (३) ॥*॥ त्रीणि **'वीणायाः'** ॥

सा तु तन्त्रीभिः सप्तभिः परिवादिनी ॥ ३ ॥

सेति ॥ सैव सप्तभिस्तन्त्रीभिरुपलक्षिता परिवदति स्वरान् । 'सुपि' (३।२।७८) इति णिनिः ॥ (१) ॥*॥ एकम् **'सतार इति ख्यातस्य'** ॥

ततं वीणादिकं वाद्यम्

ततमिति ॥ वीणादि यद्वाद्यं वादनीयम् तत्ततम् । आदिना सैरन्ध्रीरावणहस्तकिंनरादि तन्यते 'तनिमृङ्भ्यां किच्च' (उ० ३।८८) इति तन् । 'अथ **ततं** व्याप्ते विस्तृते च त्रिलिङ्गकस् । क्लीबं वीणादिवाद्ये स्यात्पुंलिङ्गस्तु सदागतौ' ॥ (१) ॥*॥ एकम् **'वीणादिवाद्यस्य'** ॥

आनद्धं मुरजादिकम् ।

आनद्धमिति ॥ आनह्यते स्म मुखे चर्मणा बध्यते स्म । 'णह बन्धने' (दि० उ० अ०) । क्तः (३।२।१०२) । 'नहो धः' (८।२।३४) । आदिपदात्पटहादि । **'आनद्धं** मुरजादौ च क्लीबं स्यात्संदिते त्रिषु' ॥ (१) ॥*॥ एकम् **'मुरजादिवाद्यस्य'** ॥

वंशादिकं तु शुषिरम्

वंशेति ॥ वंशो वेणुः । आदिपदात्काहलादि । शुषिश्छिद्रमस्यास्ति । 'ऊषशुषि–' (५।२।१०७) इति रः । **'शुषिरं** वंशादिवाद्ये विवरेऽपि नपुंसकम् । **शुषिरो** न स्त्रियां गर्ते, वह्नौ, रन्ध्रान्विते त्रिषु' । 'सूर्म्यं सुषिरामिव' (पस्पशाह्निकभाष्यस्थश्रुतौ) इति प्रयोगात् (**सुषिरम्**) दन्त्यादपि ।

१—क्वचिन्मेदिनीपुस्तके तु 'मूषिके ना स्त्रियां नाल्पौषधौ स्रग्धान्विते त्रिषु' इति पाठ उपलभ्यते ॥

प्राच्यास्तु 'तालव्याद्येव' इत्याहुः ॥ (१) ॥*॥ एकम् **'वंशवाद्यस्य'** ॥

कांस्यतालादिकं घनम् ॥ ४ ॥

कांस्येति ॥ कांस्यमयस्तालः कांस्यतालः । आदिना घण्टादि घनं निबिडत्वात् । हन्यते । 'हन हिंसागत्योः' (अ० प० अ०) । 'मूर्तौ घनः' (३।३।७७) इत्यप् घनादेशश्च । 'घनः सान्द्रे दृढे दार्ढ्ये विस्तारे मुद्गरेऽम्बुदे । सङ्घे मुस्ते घनं मध्यनृत्तवाद्यप्रभेदयोः' इति हैमः ॥ (१) ॥*॥ एकम् **'कांस्यतालादेः'** ॥

चतुर्विधमिदं वाद्यवादित्रातोद्यनामकम् ।

चतुरिति ॥ इदं तादि चतुर्विधं वाद्यादित्रिकनामकम् । वाद्यते ध्वन्यते । वदेः (भ्वा० प० से०) ण्यन्तात् (३।१।२६) 'अचो यत्' (३।१।९७) ॥ (१) ॥*॥ 'भूवादिदृगभ्यो णित्रन्' (उ० ४।१७१) ॥ (२) ॥*॥ आसमन्तात्तुद्यते ताड्यते । 'तुद् व्यथने' (तु० उ० अ०) । ण्यत् (३।१।१२४) ॥ (३) ॥*॥ त्रीणि **'ततादिचतुष्टयस्य'** ॥

मृदङ्गा मुरजाः

मृदङ्गा इति ॥ मृद्यन्ते । 'मृद क्षोदे' (क्या० प० से०) । 'विडादिभ्यः कित्' (उ० १।१२१) इत्यङ्गच् । मृत् अङ्गमस्येति वा । **'मृदङ्गो** घोषवाद्ययोः' इति हैमः ॥ (१) ॥*॥ मुराद्वेष्टनाज्जातः । 'मुर संवेष्टने' (तु० प० से०) तुदादिः । 'पञ्चम्याम्–' (३।२।९८) इति डः । मुरं वेष्टनं जातमस्येति वा ॥ (२) ॥*॥ द्वे **'मृदङ्गस्य'** ॥

भेदास्त्वङ्क्यालिङ्क्योर्ध्वकास्त्रयः ॥ ५ ॥

भेदा इति ॥ तेषां भेदास्तु त्रयः । अङ्के उत्सङ्गे भवः । शरीरावयवाद्यत् (४।३।५३) ॥ (१) ॥*॥ आलिङ्क्यते । 'लिगि गतौ' (भ्वा० प० से०) । ण्यत् (३।१।१२४) ॥ (१) ॥*॥ ऊर्ध्वः कायति शब्दायते । 'कै शब्दे' (भ्वा० प० से०) । 'सुपि' (३।२।४ योगविभागेन) इति कः । तदुक्तम्—'हरीतक्याकृतिस्त्वङ्क्यो यवमध्यस्तथोर्ध्वकः । आलिङ्क्यश्चैव गोपुच्छो मध्यदक्षिणवामगाः' इति ॥*॥ ऊर्ध्वशब्दं निर्वकारमपि केचित्पठन्ति ॥ (१) ॥*॥ प्रत्येकमेकैकम् ॥

स्याद्यशःपटहो ढक्का

स्यादिति ॥ यशोऽर्थः पटहः । शाकपार्थिवादिः (२।१।६९) ॥ (१) ॥*॥ 'ढक्' इति कायति । 'कै शब्दे' (भ्वा० प० से०) । 'आतोऽनुप–' (३।२।३) इति 'सुपि' (३।२।४ योगविभागात्) इति वा कः ॥ (२) ॥*॥ द्वे **'यशःपटहस्य'** ॥

भेर्यामानकदुन्दुभी ।

भेर्यामिति ॥ बिभेत्यस्या रवात् । 'जिभी भये' (जु० प० से०) । 'ऋज्रेन्द्र–' (उ० २।२८) इति रन् । गौरादित्वात् (४।१।४१) ङीष् ॥*॥ 'वङ्क्वादयश्च' (उ० ४।६६) इति रिप्रत्यये [1]'रिः' अपि ॥ (१) ॥*॥ आनित्यनेन वादितेन । कुन् (उ० २।३२) । आनयति प्राणयति सोत्साहान्करोति योधान् । ण्वुल् (३।१।१३३) वा । **'आनकः** पटहे भेर्यां मृदङ्गे ध्वनदम्बुदे' ॥ (२) ॥*॥ 'दुन्दु' इति शब्देन भाति । बाहुलकात्किः । यद्वा द्यामुभति शब्देन । 'उभ पूरणे' (तु० प० से०) । पृषोदरादिः (६।३।१०९) । यत्त्वौणादिक इः—इति कौमुदी । तन्न । आतो लोपस्याप्रसङ्गात् । (**'दुन्दुभिस्तु** भेर्यां दितिसुते विषे । अक्षबिन्दुत्रिकद्वन्द्वे') ॥ (३) ॥*॥ स्वामी तु **'भेरी स्त्री दुन्दुभिः पुमान्'** इति पठति ॥ [2]द्वे **'भेर्याः'** ॥

आनकः पटहोऽस्त्री स्यात्

आनक इति ॥ (१) ॥*॥ पटेन हन्यते । डः (वा० ३।२।१०१) 'पट' इति शब्दं जहाति । 'अतोऽनुप–' (३।२।३) इति कः इति वा । **'पटहो** ना समारम्भे आनके पुंनपुंसकम्' । अस्त्रीति पूर्वान्वयि । 'उपवासं गृहं देहं लोहं पटहमित्यपि' इति पुंनपुंसकाधिकारे चन्द्रगोम्युक्तेः ॥ द्वे **'पटहस्य'** ॥

कोणो वीणादिवादनम् ॥ ६ ॥

कोण इति ॥ वीणादि वाद्यते येन धनुराद्याकृतिना स कोणः । कुण्यते । 'कुण शब्दोपकरणयोः' (तु० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । 'द्वयोस्तु **कोणो** वीणादेर्वादनं **सारिका** च सा' इति शब्दार्णवः । **'कोणो** वाद्यप्रभेदे स्याद्वीणादीनां च वादने । एकदेशे गृहादीनामस्त्री च लगुडेऽपि च' इति मेदिनी । **'कोणो** वीणादिवादने । लगुडेऽस्त्री लोहिताङ्गे' इति हैमः ॥ (१) ॥*॥ एकम् **'वीणादिवादनस्य'** ॥

वीणादण्डः प्रवालः स्यात्

वीणेति ॥ वीणाया दण्डः ॥ (१) ॥*॥ प्रकर्षेण वल्यते संव्रियते । 'वल संवरणे' (भ्वा० प० से०) । घञ् (३।३।१९) **'प्रवालो** विद्रुमे वीणादण्डेऽभिनवपल्लवे' इति हैमः ॥ (२) ॥*॥ द्वे **'वीणादण्डस्य'** ॥

ककुभस्तु प्रसेवकः ।

ककुभ इति ॥ कं वातं स्कुभ्नाति । स्कुभेः सौत्रान्मूल-

१—'शुषिरं शिष्यं शीर्षं तालव्यादयः' इति सभेदकोषदर्शनस्य मुकुटेन कारितत्वात् । परं त्वत्रे पातालभोगिवर्गान्तर्गतशुषिपदव्याख्यायाम् दन्त्यादिरप्ययं शब्दः । 'विवराभिधायिनि शुषिरादौ शास्त्रेषु दन्त्यतालव्यौ' इत्यूष्मविवेकात् इति तेनैवोक्तेन विरोधादनुपादेयमिदम् । न चोक्तसभेदकोषवैयर्थ्यमिति वाच्यम् । वस्य वह्निवाचकशुषिरशब्दे नियामकत्वादिलरुचिराद्युरित्यनेन सूचिता ॥ २—'कुर्वतीरुपलैस्तुङ्गैर्भुवनं नीचमूर्ध्वजैः । तस्या वनालीरन्वेति चित्रा नागचमूर्ध्वजैः' इति कीचकवधयमकाद्यकारवानूर्ध्वशब्दः ॥

१—'रवः प्रगल्भाहतभेरिसंभवः प्रकाशयामास समन्ततस्ततः' इति कुमारदासः—इति मुकुटः । २—त्रीणीत्युल्लिखितम् ॥

विभुजादित्वात् (३।२।५) कः पृषोदरादित्वात्सलोपः (६।३।१०९)। यद्वा कश्च कुश्च ककू । ते भाति । 'भा दीप्तौ' (अ० प० अ०) अन्तर्भावितण्यर्थः । 'आतोऽनुप–' (३।२।३) इति कः । **'ककुभो** रागभेदेऽपि वीणाङ्केऽर्जुनपादपे' ॥ (१) ॥*॥ प्रसेव्यते । 'षेवृ सेवने' (भ्वा० आ० से०) । क्रुन् (उ० २।३२)। अचि (३।१।१३४) प्रसेवः अपि । **'प्रसेवस्तु** वीणाङ्गस्यूतयोर्दृतौ' ॥ (२) ॥*॥ द्वे **'वीणादण्डाधःस्थितशब्दगाम्भीर्यार्थचर्मावनद्धदारुमयभाण्डस्य'** । वीणाप्रान्तस्थवक्रकाष्ठविशेषस्येत्यन्ये ॥

कोलम्बकस्तु कायोऽस्याः

कोलम्बक इति ॥ अस्या वीणायाः कायः अलाबुदण्डककुभसमुदायस्तन्त्रीरहितः । 'कुल संस्त्याने' (भ्वा० प० से०) बाहुलकादम्बच् । ततः कन् (५।३।९७) । यद्वा कुलेर्विंच् (३।२।७५) । अम्बते । अम्ब्यते वा । 'अबि शब्दे' (भ्वा० आ० से०) । ण्वुल् (३।२।१३३) । क्रुन् (उ० ३।३२) वा कोल् चासावम्बकश्च ॥ (१) ॥*॥ एकम् **'तन्त्रीहीनवीणायाः'** ॥

उपनाहो निबन्धनम् ॥ ७ ॥

उपनाह इति ॥ उपनह्यतेऽनेनास्मिन् वा । 'णह बन्धने' (दि० उ० अ०) 'हलश्च' (३।३।१२१) इति घञ् । **'उपनाहो** व्रणालेपपिण्डे वीणानिबन्धने' ॥ (१) ॥*॥ निबध्यतेऽनेनास्मिन्वा । 'बन्ध बन्धने' (क्र्या० प० अ०) । 'करणाधिकरणयोश्च' (३।३।११७) इति ल्युट् ॥ (२) ॥*॥ द्वे **'यत्र तन्त्र्यो निबध्यन्ते तस्योर्ध्वभागस्य'** ॥

वाद्यप्रभेदा डमरुमड्डुडिण्डिमझर्झराः ।
मर्दलः पणवोऽन्ये च

वाद्येति ॥ 'डम्' इति शब्दमियर्ति । मृगय्वादिलात् (उ० १।३७) अर्तेः कुः । गणपाठादेव गुणः ॥ (१) ॥*॥ स एव महान् मड्डुः । 'टुमस्जो शुद्धौ' (तु० प० अ०) । 'भृमृशी–' (उ० १।७) इत्यादिना उः । पृषोदरादित्वात् (६।३।१०९) जस्य डः ॥ (१) ॥*॥ 'डिण्डि' इति शब्दं मिनोति प्रकाशयति । डः (वा० ३।२।१०१) ॥ (१) ॥*॥ झर्झशब्दं राति । 'आतः–' (३।२।३) इति कः । यद्वा 'झर्झ शब्दे' (भ्वा०, तु० प० से०) । अरन् (*) । **'झर्झरः** स्यात्कलियुगे वाद्यभाण्डे नदान्तरे । **झल्लरी झर्झरी** च द्वे केशचक्रे तु वाद्यके' ॥ (१) ॥*॥ मर्दमुपमर्दं लाति । 'आतः' (३।२।३) इति कः ॥ (१) ॥*॥ पणं व्यवहारं वाति गच्छति । कः (३।२।३) ॥ (१) ॥*॥ अन्ये गोमुखहुडुक्कादयः । (**'गोमुखं** कुटिलागारे वाद्यभाण्डे च लेपने' । **'हुडुक्कं** मदमत्ते स्याद्दात्यूहे वाद्यभिद्यपि') । **'वाद्यविशेषाणां पृथक् पृथक्'** एकैकम् ॥

नर्तकीलासिके समे ॥ ८ ॥

नर्तकीति ॥ नृत्यति । 'नृती गात्रविक्षेपे' (दि० प० से०) 'शिल्पिनि ष्वुन्' (३।१।१४५) । षित्त्वात् (४।१।४१) ङीष् । **'नर्तकः** केवले पोटगलचारणयोर्नटे । **नर्तकी** लासिकायां च करेण्वामपि योषिति' ॥ (१) ॥*॥ लसति । 'लस श्लेषणक्रीडनयोः' (भ्वा० प० से०) ण्वुल् (३।१।१३३) । अनयोः क्रियोपाधिकतया वाच्यलिङ्गत्वात्पुंस्त्वनिर्देशस्यौत्सर्गिकत्वात् **'नर्तको** लासकः समौ' इति वक्तव्ये स्त्रीनिर्देशो ङीष्टापोर्विवेकार्थः । **'लासकौ** केकिनर्तकौ' इति हैमः ॥ (२) ॥*॥ द्वे **'नर्तक्याः'** ॥

विलम्बितं द्रुतं मध्यं तत्त्रयमोघो घनं क्रमात् ।

विलम्बितमिति ॥ विलम्बन्ते करचरणादयोऽत्र । 'लबि अवस्रंसने' (भ्वा० आ० से०) ॥ (१) ॥*॥ द्रवन्ति शीघ्रं गच्छन्त्यत्र । 'द्रु गतौ' (भ्वा० प० अ०) । उभयत्रापि 'क्तोऽधिकरणे च' (३।४।१७६) इति क्तः । यत्तु—'भावे क्तः' (३।३।११४)— इति मुकुटः । तन्न । अन्यपदार्थस्य नृत्यस्यालाभप्रसङ्गात् । **'द्रुतं** त्रिषु । शीघ्रे विलीने विद्राणे' ॥ (२) ॥*॥ तयोर्मध्ये भवत्वान्मध्यम् । 'अ सांप्रतिके' (४।३।९) इत्यः । 'मध्यं वैलम्बे न स्त्री स्याज्ज्यायेऽन्तरेऽधमे त्रिषु' ॥ (३) ॥*॥ एषु यथाक्रमं तत्त्वादित्रयम् । तननम् । ततः । संपदादित्वात् (वा० ३।३।१०८) क्विप् । तदस्यास्ति । 'वप्रकरणेऽन्यैत्रापि' (वा० ५।२।१०९) इति वः । 'तसौ मत्वर्थे (१।४।१९) इति भत्वान्न जश्त्वम् । **'तत्त्वं** परात्मनि । वाद्यभेदे स्वरूपे च' इति हैमः ॥ (१) ॥*॥ ओचनम् । 'उच समवाये' (दि० प० से०) । घञ् (३।३।१८) । पृषोदरादित्वात् (६।३।१०९) घः । **'ओघो** वेगे जलस्य च । वृन्दे परम्परायां च द्रुतनृत्योपदेशयोः' ॥ (२) ॥*॥ हननम् । 'हन हिंसागत्योः' (अ० प० अ०) । 'मूर्तौ घनः' (३।३।७७) इत्यप् घनादेशश्च । **'संघे मुस्ते घनं** मध्यनृत्तवाद्यप्रभेदयोः' इति हैमः ॥ (३) ॥*॥ **विलम्बितद्रुतमध्यानां नृत्यगीतवाद्यानां** तत्त्वादिकमेणैकैकम् ॥

तालः कालक्रियामानम्

ताल इति ॥ तलनम् । 'तल प्रतिष्ठाकरणयोः' (चु० प० से०) । घञ् (३।३।१८) **'तालः** करतलेऽङ्गुष्ठमध्यमाभ्यां च संमिते । गीताकालक्रियामाने करास्फाले द्रुमान्तरे ॥ वाद्यभाण्डे च कांस्यस्य त्सरौ **ताली** जटौषधौ । क्लीबं तु हरिताले स्यात्' इति विश्वमेदिन्यौ ॥ (१) ॥*॥

१—हैमे तु 'केलके' इत्युक्तम् । क्रीडके' इति व्याख्यातमनेकार्थकैरवाकरकौमुद्याम् ॥ २—वलये कायमध्यभागे यथा **'ननाम मध्योऽतिगुरुत्वभाजा नितान्तमाक्रान्त इवाङ्गनानाम्'** इत्यनेकार्थकैरवाकरकौमुद्याम् । अत्र तु 'विलम्बे' इति लिखितमासीत् ॥ ३—भाष्ये तु 'अन्येभ्योऽपि' इति दृश्यते ॥

कालस्य क्रियया आवापनिष्कमादिकया मानं परिच्छेदनम् ॥*॥ एकम् **'तालस्य'** ॥

लयः साम्यम्

लय इति ॥ गीतवाद्यपादादिन्यासानां क्रियाकालयोः साम्यं लयः । लयनम् । 'लीङ् श्लेषणे' (दि० आ० अ०) । **'एरच्'** (३।३।५६) । यत्तु—'लय गतौ' 'एरच्—' इति मुकुटेनोक्तम् । तन्न । लयधातोरिकारान्तत्वाभावात् । 'लयस्तूर्यत्रयीसाम्ये संश्लेषणविलीसयोः' इति हैमः ॥ (१) ॥*॥ एकम् **'गानतन्त्रीलयस्य'** ॥

अथास्त्रियाम् ॥ ९ ॥

ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तने ।

अथेति ॥ अस्त्रियां ताण्डवम्, इत्यन्वयः । तण्डुना प्रोक्तं ताण्डवम् । 'तेन प्रोक्तम्' (४।३।१०१) इत्यण् । **'ताण्डवं तृणभिन्नाट्यभेदयोः'** इति हैममेदिन्यौ ॥ (१) ॥*॥ 'नट अवस्कन्दने' (भ्वा० प० से०) । ल्युट् (३।३।११५) ॥ (२) ॥*॥ नटस्य कर्म । ष्यञ् (५।१।१२४) । नटेर्ण्यत् (३।१।१२४) वा । **'नाट्यं** तौर्यत्रिके लास्ये' ॥ (३) ॥*॥ 'लस श्लेषणक्रीडनयोः' (भ्वा० प० से०) । ण्यत् (३।१।१२४) । **'लास्यं** तौर्यत्रिके मतम् । नृत्ये च' इति विश्वः ॥ (४) ॥*॥ नृती (दि० प० से०) । 'ऋदुपधाच्च' (३।१।११०) इति क्यप् ॥ (५) ॥ भावे क्ते (३।३।११४) **'नृत्तम्'** अपि ॥*॥ ल्युटि (३।३।११५) नर्तनम् ॥ (६) ॥*॥ 'नृत्यं स्यात्सततेऽपि च' । 'शाश्वते त्रिषु' । षट् **'नृत्यस्य'** ॥

तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम् ॥ १० ॥

तौर्येति ॥ नृत्यगीतवाद्यं तौर्यत्रिकम् । 'तुरि त्वरायाम्' (जु० प० से०) । 'ऋहलोर्ण्यत्' (३।१।१२४) गुणं बाधित्वा बाहुलकात् 'हलि च' (८।२।७७) इति दीर्घः । तूर्यं मुरजादिः । तत्र भवं तौर्यं शब्दः । त्रयोंऽशा यस्य त्रिकम् । 'संख्याया अतिशदन्तायाः कन्' (५।१।२२) । 'संख्यायाः संज्ञासङ्घ—' (५।१।५८) इति वा । 'तौर्योपलक्षितं त्रिकम्' इति विग्रहः ॥ (१) ॥*॥ इदमेव नृत्यादित्रयं नाट्यमपि । नटस्येदम् । 'छन्दोगौक्थिक—' (४।३।१२९) इति ञ्यः ॥ **(२)** ॥*॥ द्वे **'नाट्यस्य'** ॥

१—विलासे यथा 'किसलयैः सलयैरिव पाणिभिः' इत्यनेकार्थकैरवाकरकौमुदी । अत्र तु 'विनाशयोः' इति पाठ उपलभ्यते । २—मेदिन्यां 'निलयम्' इत्येवोपलभ्यते । इत्थं तु नैवोपलभ्यते । नृत्यस्यैतदर्थकत्वासंभवादिदं प्रकृतोपयोगी न इति ॥ ३—इदं च मुकुटानुरोधेन । दिवादिगणस्थदीर्घोपधाङ्गीकारे तु नागतिकगतिकत्वमा ॥

भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः ।
स्त्रीवेषधारी पुरुषः

भ्रकुंस इति ॥ यः पुरुषः स्त्रीवेषधारी नृत्यति तस्मिन् भ्रकुंसादित्रयम् । 'पटपुट—' इति दण्डकोक्त 'कुसि' धातोश्वुरादिण्यन्तात् 'एरच्' (३।३।५६) । भ्रुवोर्भ्रुवा वा कुंसो भाषणमस्य । भ्रुवा कुंसयति वा । अच् (३।१।१३४) 'इको ह्रस्वोऽङ्यो गालवस्य' (६।३।६१) इति सूत्रे 'इयङुवङ्भाविनां न' (वा०) इति निषेधोत्तरं पठितस्य 'अभ्रुकुंसादीनाम्' इति वार्तिकस्य ह्रस्वनिषेधपर्युदासपरतया, अकारादेशपरतया च व्याख्यानद्वयाद्रूपत्रयम् । पृषोदरादित्वात् (६।३।१०९) ऋवर्णवानपि । 'भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्च **भृकुंसवत्**' इति शब्दार्णवः ॥ (२) ॥*॥ त्रीणि **'स्त्रीवेषधारिणो नृत्यस्य'** ॥

नाट्योक्तौ

नाट्योक्ताविति ॥ 'नाट्योक्तौ' इत्यधिकारः प्रागङ्गहारात् ॥

गणिकाजुका ॥ ११ ॥

गणिकेति ॥ गणिका अजुका ज्ञेया । **'गणिका** यूथिवैश्येभीतकीरीषु ना तु दैवज्ञे' ॥*॥ 'अर्ज अर्जने' (भ्वा० प० से०) । 'समिकसेः—' (*) इति बाहुलकादुकन् रस्य जः ॥ (१) ॥*॥ एकम् **'अजुकायाः'** ॥

भगिनीपतिरावुत्तः

भगिनीति ॥ आपनमाप् । संपदादिक्विप् (३।३।१८४) आपमुत्तनोति । 'अन्येभ्योऽपि' (वा० ३।२।१०१) । इति डः । आवुत्तः ॥ (१) ॥*॥ भगिन्याः पतिः । एकम् **'भगिनीपतेः'** ॥

भावो विद्वान्

भाव इति ॥ भावयति परिभावयति । पचाद्यच् ॥ (३।१।१३४) । **'भावः** सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु । क्रियालीलापदार्थेषु बुधजन्तुविभूतिषु । रत्यादौ च' ॥ (१) ॥*॥ एकम् **'विदुषः'** ॥

अथावुकः ।

जनकः

अथेति ॥ अवति । 'अव रक्षणे' (भ्वा० प० से०) । बाहुलकादुकण् । णित्त्वादुपधावृद्धिः (७।२।११६) ॥ (१) ॥*॥ **'जनकः** पितृभूपयोः' । एकम् **'जनकस्य'** ॥

युवराजस्तु कुमारो भर्तृदारकः ॥ १२ ॥

युवराज इति ॥ युवा चासौ राजा च । 'राजा—' (५।४।९१) इति टच् ॥*॥ कुमारयति । 'कुमार क्रीडायाम्' (चु० उ० से०) । अच् (३।१।१३४) । **'कुमारोऽश्वानुचारके** । युवराजे शिशौ स्कन्दे शुके वरुणपादपे ॥ **कुमारं** जात्यकनके **कुमारी** त्वपराजिता । नदीभिद्भामतरुणी कन्यका

नवमाल्युमा ॥ जम्बूद्वीपविभागश्च' इति हैमः ॥ (१) ॥*॥ द्रियते । 'दृङ् आदरे' तुदादिः । ण्वुल् (३।१।१३३) । भर्तृ राज्ञो दारकः ॥ (२) ॥*॥ द्वे **'युवराजस्य'** ॥

राजा भट्टारको देवः

राजेति ॥ भटति । 'भट परिभाषणे' (भ्वा० प० से०) । क्विप् (३।२।१७८) भट् चासौ तारकश्च । पृषोदरादित्वात् (६।३।१०९) ह्रस्वनिषेधो न । यद्वा टलति । 'टल विक्लवे' (भ्वा० प० से०) । ण्वुल् (३।१।१३३) । रलयोरेकत्वस्मरणम् । भट् चासौ टारकश्च । भट्टं स्वामित्वमृच्छति वा । 'ऋ गतौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) ततः स्वार्थे कन् (५।३।७७) । **'भट्टारको** नृपे नाट्यवाचा, देवे तपोधने' इति मेदिनी ॥ (१) ॥*॥ दीव्यति । अच् (३।३।१३४) । **'देवं** हृषीके **देवस्तु** नृपतौ तोयदे सुरे' इति हैमः ॥ (२) ॥*॥ द्वे **'राज्ञः'** ॥

तत्सुता भर्तृदारिका ।

तत्सुतेति ॥ भर्तृ राज्ञो दारिका ॥ (१) ॥*॥ एकम् **'राज्ञः सुतायाः'** ॥

देवी कृताभिषेकायाम्

देवीति ॥ अच् (३।१।१३४) टित्त्वात् ङीप् (४।१।१५) । 'देवी कृताभिषेकायां तेजनीस्पृक्कयोरपि' इति हेमचन्द्रः ॥ (१) ॥*॥ **'बद्धपट्टाया राज्ञ्याः'** एकम् ॥

इतरासु तु भट्टिनी ॥ १३ ॥

इतरास्विति ॥ भटेः (भ्वा० प० से०) तनि (बाहुलकात्) भट्टः । सोऽस्त्यस्याः पतित्वेन । भट्टिनी । इनिः (५।२।११५) । **'भट्टिनी** द्विजभार्यायां, नाट्योक्त्या राजयोषिति' ॥ (१) ॥*॥ एकम् **'इतरराज्ञ्याः'** । अत्र विशेषः शब्दार्णवे—'गणिकानुचरैरज्ञुकेति नाम्ना नृपेण सा । युवराजस्तु सर्वेण कुमारो भर्तृदारकः ॥ भट्टारको वा देवो वा वाच्यो भृत्यजनेन सः । ब्राह्मणेन तु नाम्नैव राजन्नित्यृषिभिः स च ॥ वयस्य राजन्निति वा विदूषक इमं वदेत् । अभिषिक्ता तु राज्ञासौ देवीत्यन्या तु भोगिनी ॥ भट्टिनीत्यपरैरन्या नीचैर्गौस्वामिनीति सा' इति ॥

अब्रह्मण्यमवध्योक्तौ

अब्रह्मण्यमिति ॥ वधं नार्हति, इत्युक्तौ । ब्रह्मणि साधु । 'तत्र साधुः' (४।४।९८) इति यत् । **'ब्रह्मण्यं** स्याद्ब्रह्मसाधुब्रह्मदारुशनैश्चरे' । ततो नञ्समासः (२।२।६) ॥ (१) ॥*॥ 'अवध याच्ञायाम्' । इत्येके । एकम् **'वध्यस्य ब्राह्मणादेर्दोषोक्तेः'** ॥

राजश्यालस्तु राष्ट्रियः ।

राजेति ॥ राष्ट्रेऽधिकृतः । 'राष्ट्रावारपाराद्घखौ' (४।२।९३) इति घः ॥ (१) ॥*॥ एकम् **'राज्ञः श्यालस्य'** ॥

अम्बा माता

अम्बेति ॥ अम्ब्यते शब्द्यते । 'अबि शब्दे' (भ्वा० आ० से०) 'गुरोश्च हलः' (३।३।१०३) इत्यः ॥ (१) ॥*॥ **'नाट्योक्तौ'** इत्यधिकारस्य प्रायिकत्वादम्बादीनां केषांचिदन्यत्रापि प्रयोगः ॥ एकम् **'मातुः'** ॥

अथ बाला स्याद्वासूः

अथेति ॥ बाला कुमारी वासूः वास्यते स्वगृहे । वसेः (भ्वा० प० अ०) ण्यन्ताद्बाहुलकादूः ॥ (१) ॥*॥ एकम् **'कुमार्याः'** ॥

आर्यस्तु मारिष ॥ १४ ॥

आर्य इति ॥ अर्तुं योग्यः । 'ऋ गतौ' (भ्वा० प० अ०) । 'ऋहलोर्ण्यत्' (३।१।१२४) । 'कर्तव्यमाचरन्काममकर्तव्यमनाचरन् । तिष्ठति प्रकृताचारे स तु **आर्य** इति स्मृतः' इति वसिष्ठः । (आर्यौ सज्जनसौविदौ') ॥*॥ मर्षणात्सहनात् मारिषः । पृषोदरादिः (६।३।१०९) । हिंसानिवारकत्वाद्वा । 'रिष हिंसायाम्' (भ्वा० प० से०) । 'इगुपध—' (३।१।१३५) इति कः । प्रतिषेधार्थकमाशब्देन समासः । **'मारिषः** शाकभिद्यार्ये नाट्योक्तौ पुंसि भाषितः' इति मूर्धन्यान्ते रभसः । **मार्षश्च** । 'आर्ये मारिष**मार्षकौ**' इति शब्दार्णवात् । **'मारिषः** शाकभिद्यार्ये नाट्योक्त्या पुंसि, योषिति । दक्षाम्बायाम्' ॥ (१) ॥*॥ एकं **'मान्यस्य'** ॥

अत्तिका भगिनी ज्येष्ठा

अत्तिकेति ॥ अत्ता माता । सैव । 'संज्ञायां कन्' (५।३।९७) । 'अत्तिका **चान्तिका** तथा' इति द्विरूपकोशादन्तिकापि । **'अन्तिकं** निकटे वाच्यलिङ्गं स्त्री सौतलौषधौ । चुल्लयां ज्येष्ठभगिन्यां च नाट्योक्त्यां कीर्त्यतेऽन्तिका' ॥ (१) ॥*॥ एकम् **'ज्येष्ठभगिन्याः'** ॥

निष्ठा निर्वहणे समे ।

निष्ठेति ॥ नियतं स्थानम् । निष्ठा । 'आतश्चोपसर्गे' (३।३।१०६) इत्यङ् । 'उपसर्गात्सुनोति—' (८।३।६५) इति षः । **'निष्ठो**त्कर्षव्यवस्थयोः । क्लेशे निष्पत्तौ नाशेऽन्ते निर्वाहे याचने व्रते' ॥ (१) ॥*॥ निर्वाहो निर्वहणम् । मुख—प्रतिमुख—गर्भ—विमर्श—निर्वहणाख्याः पञ्च नाटके संधयः ।

१—'तातेनाम्ब विहीनोऽसि' 'बालभावेऽहमम्बया' इत्यादावनाट्योक्तावप्यम्बाशब्दप्रयोगः । 'तत्र मातः किमसदृशं करणं वचस्ते' इति वेणीसंहारादौ नाट्योक्तावपि मात्रादीनां प्रयोगः । तस्मादम्बादीनां नाट्ये प्रायशः प्रयोगाद्विधिरयम् । अज्जुकादीनां त्वन्यत्राप्रयोगान्नियमः । एतदेवाह शब्दार्णवकारः—'अथैषां रूपकाराणामुक्तीर्वक्ष्याम्यशेषतः । कामुत्विन्नियमस्तत्र विधिरेव च कामुत्वित्' इति—इति मुकुटः ॥ २—सौविदे यथा 'अन्तःपुरं समर्यादमार्यैरेव हि कार्यते' इत्यनेकार्थकैरवाकरकौमुदी ॥ ३—'दक्षस्य मुनेरम्बा जननी' इत्यनेकार्थकैरवाकरकौमुदी ॥ ४—'शोभनौषधेः' इति पाठः ॥

तत्र पञ्चमस्य संधेर्द्वे । प्रस्तुतकथासमापनस्येत्यन्ये । 'निर्वहणं तु निष्ठा स्त्री संहारश्च समापने' इति शब्दार्णवः । समे इति । समानार्थे, न तु समानलिङ्गे । शब्दार्णवे लिङ्गभेददर्शनात् । निष्ठा निर्वहणे वर्तते, इति योजना ॥ (२) ॥*॥ द्वे **'निर्वहणस्य'** ॥

हण्डे हञ्जे हलाह्वानं नीचां चेटीं सखीं प्रति ॥ १५ ॥

हण्ड इति ॥ नीचां प्रत्याह्वानं हण्डे । चेटीं प्रति हञ्जे । सखीं प्रति हला । त्रीण्यव्ययानि । हिण्डते । 'हिडि गत्यनादरयोः' (भ्वा० आ० से०) । बाहुलकादेप्रत्ययः, इतोऽकारश्च ॥ (१) ॥*॥ हञ्जे इत्यत्र ङस्य जोऽपि ॥ (२) ॥*॥ हलति । 'हल विलेखने' (भ्वा० प० सें०) । बाहुलकादाप्रत्ययः ॥ (३) ॥*॥ हलाशब्दष्टाबन्तोऽपि सखीपर्यायः । तत्र पचाद्यच् (३।१।१३४) । 'बाला वासूः सखी हला' इति स्त्रीकाण्डे बोपालितात् ॥ **'प्रत्येकमेकैकम्'** ॥

अङ्गहारोऽङ्गविक्षेपः

अङ्गेति ॥ अङ्गस्य स्थानात् स्थानान्तरे नयनमङ्गहारः । अङ्गस्य हरणम् । 'हृञ् हरणे' (भ्वा० उ० अ०) । घञ् (३।३।१८) अङ्गुल्यादिविन्यासः ॥ (१) ॥*॥ अङ्गानां विक्षेपः । 'क्षिप प्रेरणे' (तु० उ० अ०) । घञ् (३।३।१८) । 'अङ्गहारस्त्वङ्गहारिर्द्वित्रादिमाम्बिकाम्बिका' इति शब्दार्णवः ॥ (२) ॥*॥ द्वे **'नृत्यविशेषस्य'** ॥

व्यञ्जकाभिनयौ समौ ।

व्यञ्जकेति ॥ व्यनक्ति । 'अञ्जू व्यक्त्यादौ' (रु०प०से०) । ण्वुल् (३।१।१३३) ॥ (१) ॥*॥ अभिनयत्यर्थम् । पचाद्यच् (३।१।१३४) । वाचिकाङ्गिकाहार्यसात्विकभेदाच्चतुर्विधः ॥ (२) ॥*॥ द्वे **'मनोगतभावाभिव्यञ्जकस्य'** ॥

निर्वृत्ते त्वङ्गसत्त्वाभ्यां द्वे त्रिष्वाङ्गिकसात्त्विके ॥१६॥

निर्वृत्ते इति ॥ अङ्गेन निर्वृत्तं भ्रूविक्षेपादि सत्त्वेन मनोवृत्त्या निर्वृत्तं स्तम्भादि । 'निर्वृत्तेऽक्षद्यूतादिभ्यः' (४।४।१९) इति प्राग्वहतीयष्ठक् ॥ (१) ॥*॥ (२) ॥*॥ 'स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः । वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका गुणाः' क्रमेणैकैकम् ॥

शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः ।
बीभत्सरौद्रौ च रसाः

शृङ्गारेति ॥ शृङ्गारादयोऽष्टौ रसाः । चशब्दाच्छान्तोऽपि नवमः । वात्सल्यं दशमः । रस्यन्ते । 'रस आस्वादने' चुरादयन्तः । कर्मणि घञ् (३।३।१९) । **'रसो** गन्धरसे जले । शृङ्गारादौ विषे वीर्ये तिक्तादौ द्रवरागयोः ॥ देहधातुप्रभेदे च पारदस्वादयोः पुमान् । स्त्रियां तु रसना पाटा शल्लकी कङ्कुभूमिषु' इति विश्वमेदिन्यौ ॥*॥ एकैकम् **'शृङ्गारादिरसानाम्'** ॥

शृङ्गारः शुचिरुज्ज्वलः ॥ १७ ॥

शृङ्गार इति ॥ शृङ्गं प्राधान्यमियर्ति । 'कर्मण्यण्' (३।२।१) । **'शृङ्गारो** गजमण्डने । सुरते रसभेदे च **शृङ्गारं** नागसंभवे । (चूर्णे लवङ्गपुष्पे च)' इति हैमः ॥ (१) ॥*॥ उत्तमयुवप्रकृतिकत्वेन जुगुप्सारहितत्वाच्छुचिः । शोचन्त्यनेन वा । 'इगुपधात्कित्' (उ० ४।१२०) इतीन् । **'शुचिः** शुद्धे सितेऽनले । ग्रीष्मषाढानुपहतेषूपधाशुद्धमन्त्रिणि । शृङ्गारे च' इति हेमचन्द्रः ॥ (२) ॥*॥ उच्चैर्ज्वलति ज्वकाशते । अच् । (३।१।१३४) । न तु 'ज्वलति–' (३।१।१४०) इति णः । तत्र 'अनुपसर्गात्' इत्यनुवृत्तेः । 'उज्ज्वलस्तु विकासिनी । शृङ्गारे विशदे दीप्तेऽपि' इति हैमः ॥ (३) ॥*॥ त्रीणि **'शृङ्गारस्य'** ॥

उत्साहवर्धनो वीरः

उत्साहेति ॥ उत्साहेन वर्धते । 'वृधु वृद्धौ' (भ्वा० आ० से०) । युच् (३।२।१४९) । उत्साहं वर्धयतीति वा । ल्युः (३।१।१३३) ॥ (१) ॥*॥ वीरमति । 'शूर वीर विक्रान्तौ' चुरादिः । पचाद्यच् (३।१।१३४) । यद्वा विशेषेण ईर्ते ईरयति वा । 'ईर गतौ' (अ० आ० से०) कः (३।१।१३५) । अजति वा रक् (उ० २।१३) । **'वीरो** जिने भटे श्रेष्ठे **वीरं** शृङ्ख्यां नतेऽपि च । **वीरा** गम्भारिकारम्भातामलक्येलवालुषु ॥ मदिराक्षीरकाकोली काष्ठोदुम्बरिकासु च । पतिपुत्रवतीक्षीरविदारीदुग्धिकास्वपि' इति हेमचन्द्रः ॥ (२) ॥*॥ द्वे **'वीररसस्य'** ॥

१—शान्तस्यालौकिकत्वेन, वत्सलस्य पुत्रादिस्नेहरूपत्वाद्रत्यात्मकत्वेन, न निर्दिष्टौ–इति स्वामिमुकुटौ । रसा इति । तत्र 'विभावैरनुभावैश्च युक्तो वा व्यभिचारिभिः । आस्वाद्यत्वात्प्रधानत्वात्स्थाय्येव तु रसो भवेत्' इत्युक्तैः रत्यादिः स्थायीभाव एव सामाजिकैश्चर्व्यमाणो रसपदव्यपदेश्यो भवति । तत्र रतिस्थायिभावकः कान्ताद्यालम्बनकः स्वकृचन्दनाद्युद्दीपितः कटाक्षाद्यनुभावितो व्रीडादिसंचारितः शृङ्गारः । १ । उत्साहस्थायिभावको द्विषद्विजनादीनालम्बनकोऽपकारगुणापदुद्दीपितः प्रतीकारकरणदानाद्यनुभावितो धर्मावेशचिन्तादिसंचारितो वीरः । २ । शोकस्थायिभावको मृताद्यालम्बनकस्तदुणाद्युद्दीपितो रोदनाद्यनुभावितो दैन्यादिसंचारितः करुणः । ३ । विस्मयस्थायिको विस्मयजनककर्मकर्त्रालम्बनको विस्मयकर्माद्युद्दीपितश्चकितताद्यनुभावितो हर्षादिसंचारितोऽद्भुतः । ४ । हासस्थायिभावको विकृतकृदालम्बनको वैकृताद्युद्दीपितो गल्लफुल्लनाद्यनुभावितः श्रमादिसंचारितो हास्यः । ५ । भयस्थायिभावको विकटाद्यालम्बनकस्तद्विकटकर्माद्युद्दीपितः पलायनाद्यनुभावितो जडतादिसंचारितो भयानकः । ६ । जुगुप्सास्थायिभावको विण्मूत्राद्यालम्बनको दुर्गन्धाद्युद्दीपितो निष्ठीवनाद्यनुभावितो ग्लान्यादिसंचारितो बीभत्सः । ७ । क्रोधस्थायिभावको द्विषदालम्बनकस्तदपकाराद्युद्दीपितो विकत्थनाद्यनुभावितो गर्वादिसंचारितो रौद्रः । ८ । इति तत्तल्लक्षणं बोध्यम् ॥

कारुण्यं करुणा घृणा ।
कृपा दयानुकम्पा स्यादनुक्रोशोऽपि

कारुण्यमिति ॥ करुणः करुणावान् । तस्य भावः । ब्राह्मणादित्वात् (५।१।१२४) ष्यञ् ॥ (१) ॥*॥ करणम् । 'कृवृदारिभ्य उनन्' (उ० ३।५३) । '**करुणो** रसवृक्षयोः । **करुणा** तु कृपायां स्यात्' इति हैमः ॥ (२) ॥*॥ घ्रियन्तेऽनया । 'घृ सेचने' (भ्वा० प० अ०) । बाहुलकान्नक् । '**घृणा** तु स्याज्जुगुप्सायां करुणायाम्' इति हैमः ॥ (३) ॥*॥ कृपणम् । 'कृप कृपायाम्' (भ्वा० आ० से०) । 'कृपेः संप्रसारणं च' (ग० ३।३।१०४) इति भिदादिपाठाद्ङ् । '**कृपो** द्रोणश्यालके स्याद्द्रोणपत्न्यां **कृपी** स्मृता । **कृपा** दयायाम्' ॥ (४) ॥*॥ दयते रक्षत्यनया । 'दय दानगतिहिंसारक्षणेषु' । भिदाद्यङ् (३।३।१०४) ॥ (५) ॥*॥ अनुकम्पनम् । 'कपि किंचिच्चलने' (भ्वा० आ० से०) । 'गुरोश्च' (३।३।१०३) इत्यः ॥ (६) ॥*॥ अनुक्रोशन्त्यनेन । 'क्रुश आह्वाने रोदने च' (भ्वा० प० अ०) । 'हलश्च' (३।३।१२१) इति घञ् ॥ (७) ॥*॥ सप्त '**करुणरसस्य**' ॥

अथो हसः ॥ १८ ॥

हासो हास्यं च

अथेति ॥ हसनम् । 'हसे हसने' (भ्वा० प० से०) 'स्नेनहसोर्वा' (३।३।६२) इत्यप् । हसः ॥ (१) ॥*॥ घञि (३।३।१८) हासः ॥ (२) ॥*॥ ण्यति (३।१।१२४) हास्यम् ॥*॥ धात्वर्थनिर्देशे ण्वुलि (वा० ३।३।१०८) हसिकाऽपि । 'तत्र हासो हसो हास्यं घर्घरं हासिका स्त्रियाम्' इति शब्दार्णवः ॥ (३) ॥*॥ त्रीणि '**हास्यरसस्य**' ॥

बीभत्सं विकृतं त्रिष्विदं द्वयम् ।

बीभत्समिति ॥ बधेर्निन्दायां सन् (३।१।६) भावे घञ् (३।३।१८) यद्वा 'अ प्रत्ययात्' (३।३।१०२) । बीभत्सास्त्यत्र । अर्श आद्यच् (५।२।१२७) । '**बीभत्सो** नार्जुने, क्रूरघृणात्मविकृते त्रिषु' ॥ (१) ॥*॥ विकरणम्–विकृतम् । जुगुप्साप्रभवत्वात् । 'विष्ठाकामज उद्वेगी क्षोभणो रुधिरादिजः । बीभत्सो द्विविधः' । बीभत्सादिद्वयं तद्वति त्रिलिङ्गम् । प्रज्ञाद्यणि (५।४।३८) वैकृतोऽपि । 'विकृतो वैकृतोऽथाग्रहायण्यामग्रहायणम्' इति शब्दार्णवात् । '**विकृतं** त्रिषु बीभत्से रोगितेऽसंस्कृतेऽपि च' इति विश्वः ॥ (२) ॥*॥ द्वे '**बीभत्सस्य**' ॥

विस्मयोऽद्भुतमाश्चर्यं चित्रमपि

विस्मय इति ॥ विस्मयनम् । 'स्मिङ् ईषद्धसने' (भ्वा० आ० अ०) । 'एरच्' (३।३।५६) '**विस्मयोऽद्भुतदर्पयोः**' इति हैमः ॥ (१) ॥*॥ अत् आश्चर्यार्थेऽव्ययम् । तस्य भवनम् । 'अदिभुवो डुतच्' (उ० ५।१) ॥ (२) ॥*॥ आ इति चर्यते अभिनीयते । 'आश्चर्यमनित्ये' (६।१।१४७) इति साधु ॥ (३) ॥*॥ चित्रयति । 'चित्र चित्रकरणे' (चु० उ० से०) ण्यन्तात् पचाद्यच् (३।१।१३४) । ('**चित्रं** खे तिलकेऽद्भुते । आलेख्ये कर्बुरे) **चित्रा**लाखुपर्णीसुभद्रयोः । गोडुम्बाप्सरसोर्दन्त्यां नक्षत्रोरगभेदयोः' इति हेमचन्द्रः ॥ (४) ॥*॥ चत्वारि '**अद्भुतस्य**' ॥

अथ भैरवम् ॥ १९ ॥

दारुणं भीषणं भीष्मं घोरं भीमं भयानकम् ।
भयंकरं प्रतिभयम्

अथेति ॥ भीरोरिदम् 'तस्येदम्' (४।३।१२०) इत्यण् । '**भैरवः** पुंसि शंकरे, भीषणे त्रिषु । (रागभेदे च)' ॥ (१) ॥*॥ दारयति चित्तम् । 'दृ भये' (भ्वा० प० से०) । 'कृविदारिभ्य उनन्' (उ० ३।५३) । '**दारुणो** रसभेदे ना त्रिषु तु स्याद्भयावहे' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ भीषयते । ल्युः (३।१।१३४) युच् (३।३।१०७) वा । '**भीषणं** रसे शल्लक्यां, ना गाढे दारुणे त्रिषु' ॥ (३) ॥*॥ बिभेत्यस्मात् । 'भियः षुग्वा' (उ० १।१४८) इति मक् षुगागमश्च । '**भीष्मो** रुद्रे च गाङ्गेये राक्षसे च भयंकरे' इति हैमः ॥ (४)॥*॥ 'भीमादयोऽपादाने' (३।४।७४) । मकि षुगभावे । '**भीमो** वृकोदरे घोरे शंकरेऽप्यम्लवेतसे' इति हैमः ॥ (५) ॥*॥ घोरयति । 'घुर भीमार्थशब्दयोः' (तु० प० से०) । ण्यन्तात् (३।१।२६) अच् (३।१।१३४) । हन्ति वा । 'हन्तेर्घुरच्' (उ० ५।६४) इत्यच् प्रत्ययो घुरादेशश्च । '**घोरो** हरे दारुणे च' इति हैमः ॥ (६) ॥*॥ बिभेत्यस्मात् । 'विभी भये' (जु० प० अ०) । 'आनकः शीङ्भियः–' (उ० ३।८२) । '**भयानकः** स्मृतो व्याघ्रे रसे राहौ भयंकरे' ॥ (७) ॥*॥ भयं करोति । 'मेघर्तिभयेषु कृञः' (३।२।४३) इति खच् ॥ (८) ॥*॥ प्रतिगतं भयेन । प्रादिसमासः (वा० २।२।१८) । प्रति गतं भयमस्मिन् । 'प्रादिभ्यो धातुजस्य–' (वा०२।२।२४) इति वा । '**प्रतिभयं** भये भीष्मे' इति हैमः ॥ (९) ॥*॥ नव '**भयानकरसस्य**' । भेदेन कीर्तनं त्वेषां धर्ममात्रपरत्वात् । भैरवादयस्तु धर्मे धर्मिणि च वर्तन्ते इति भेदः ॥

रौद्रं तूग्रम्

रौद्रमिति ॥ रुद्रस्येदम् । अण् (४।३।१२०) यत्तु–रौद्रो देवतास्य–इति मुकुटेनोक्तम् । तत्र । मन्त्रहविःस्वामिन्या एव देवतात्वात् । '**रौद्रो** भीष्मे रसे तीव्रे **रौद्री** गौर्यां' इति हैमः ॥ (१) ॥*॥ 'उच समवाये' (दि० प० से०) । 'ऋज्रेन्द्र'–(उ० २।२८) इति रन् । '**उग्रः** शूद्रासुते क्षत्राद्भदे

१—इतः पूर्वं 'दूर्वायाम्' इति लिखितमासीत् । परंतु तत्र भागे वीरशब्दार्थैकथनम्—इति न प्रकृतोपयोगि ॥ २—'शृङ्गारो विष्णुदेवः स्याद्धास्यः प्रमथदैवतः । करुणो यमदैवस्तु स्याद्रौद्रो रुद्रदैवतः' इति भरतवाक्यात् ॥

पुंसि, त्रिषूत्कटे । स्त्री वचाक्षुद्रयोः' ॥ (२) ॥*॥ द्वे **'उग्ररसस्य'** । महतः क्रोधस्य इति मुकुटः । तत्र रसप्रकरणात् । क्रोधस्य वक्ष्यमाणत्वाच्च ॥

अमी त्रिषु ॥ २० ॥

चतुर्दश

अमीति ॥ अमी अद्भुतायाश्चतुर्दश तद्वति त्रिषु । स्त्रियां रौद्री भैरवी ॥

दरत्रासौ भीतिर्भीः साध्वसं भयम् ।

दरेति ॥ दीर्यतेऽस्मात् । 'दृ भये' (भ्वा० प० से०) । अप् (३।३।५७) **'दरः स्याद्व्यगर्तयोः । दरी तु कन्दरे'** इति हैमः ॥ (१) ॥*॥ 'त्रसी उद्वेगे' (दि० प० से०) । घञ् (३।३।१८) । **'त्रासो भये मणेर्दोषे'** इति हैमः ॥ (२) ॥*॥ 'ब्लिभी भये' (जु० प० से०) । क्तिन् (३।३।९४) । **'भीतिर्भये स्त्रियाम्** । भीतं भये भीतियुते त्रिषु' ॥ (३) ॥*॥ संपदादित्वात् क्विप (वा० ३।३।१०८) भीः ॥ (४) ॥*॥ (यत्तु)–साधूनस्याति । अच् (३।१।१३४)–इति मुकुटः । तन्न । अणः (३।२।१) प्रसङ्गात् । तस्मात् **'साधूनामसनम्'** ॥ (५) ॥*॥ 'अज्विधौ भयादीनामुपसंख्यानम्' (वा० ३।३।५६) **'भयं भीतौ भयंकरे** । कुब्जकपुष्पे' इति हैमः ॥*॥ बाहुलकादडि भिया । **'स्यादर्तनमृतीया च गर्हा, चाथ भयं भिया । (त्रासोत्रासौ दरो भीतमातङ्को भीश्च साध्वसम्)'** इति शब्दार्णवात् । **'आशङ्का** साध्वसं दरः । भिया च' इति हैमाच्च ॥ (६) ॥*॥ षट् **'भयस्य'** ॥

विकारो मानसो भावः

विकार इति ॥ मनोविकारो रत्यादिर्भावः । भावयति करोति रसान् इति । **'भावोऽभिप्रायवस्तुनोः'** इति हैमः ॥ (१) ॥*॥ एकं **'मनोविकारस्य'** ॥

अनुभावो भावबोधकः ॥ २१ ॥

अन्विति ॥ भावस्य सूचको गुणक्रियादिः । 'अनुभावयति' इत्यनुभावः । **अनुभावः** प्रभावे स्यान्निश्चये भावसूचने' इति मेदिनी ॥ (१) ॥*॥ **एकं 'रत्यादिसूचकरोमाञ्चादेः'** ॥

गर्वोऽभिमानोऽहंकारः

गर्व इति ॥ 'गर्व माने' (चु० आ० से०) । घञ् (३।३।१८) ॥ (१) ॥*॥ अभि सर्वतो मानः । **'अभिमानोऽर्थादिदर्पे ज्ञाने प्रणयहिंसयोः'** ॥ (२) ॥*॥ 'अहम्' इति करणमहंकारः ॥ (३) ॥*॥ त्रीणि **'अहंकारस्य'** ॥

मानश्चित्तसमुन्नतिः ॥ २० ॥

मान इति ॥ (मत्सरो नास्ति, इति) मननम् । 'मनु अवबोधने' (त० आ० से०) । घञ् (३।३।१८) । **'मानं प्रमाणे प्रस्थादौ मानश्चित्तोन्नतौ ग्रहे'** इति हैमः ॥ (१) ॥*॥ **चित्तस्य समुन्नतिः ॥** (२) ॥*॥ द्वे **(अतियोग्यमपि प्रतिचित्तोत्कर्षप्रत्ययस्य)** । गर्वादयः पञ्चापि पर्याया इति तु युक्तम् ॥

अनादरः परिभवः परीभावस्तिरस्क्रिया ॥ २२ ॥
रीढावमाननावज्ञावहेलनमसूक्षणम् ।

अनादर इति ॥ न आदरः ॥ (१) ॥*॥ 'परौ भुवः' (।३।३।५५) इति घञो वैकल्पिकत्वात् **'ऋदोरप्'** (३।३।५७) ॥*॥ (परापूर्वकादपि **भुवोऽपि** पराभवः । **'पराभवस्तिरस्कारे नाशे'** इति हैमः । 'व्रजन्ति ते मूढधियः पराभवम्' इति प्रयोगश्च) ॥ (२) ॥*॥ 'उपसर्गस्य घञि' (६।३।१२२) इति दीर्घः ॥ (३) ॥*॥ तिरस्करणम् । 'कृञः श च' (३।३।१००) इति शः । 'तिरसोऽन्यतरस्याम्' (८।३।४२) इति सत्वम् ॥ (४) ॥*॥ रेहणम् । 'रिह वधे' (तु० प० से०) औणादिकः क्तः । स्त्रीत्वं लोकात् ॥ (५) ॥*॥ अवमाननम् । मनेर्ण्यन्ताद्युच् (३।३।१०७) ॥ (६) ॥*॥ अवज्ञानम् 'आतश्चोपसर्गे' (३।३।१०६) इत्यङ् ॥ (७) ॥*॥ अवहेलनम् । 'हेडृ अनादरे' (भ्वा० आ० से०) । घञ् (३।३।१८) । डलयोरैक्यत्वम् । 'घञन्ताः पुंसि' इत्यस्य बाधनात् क्लीबत्वम् ॥ (८) ॥*॥ 'सूर्क्ष आदरे' (भ्वा० प० से०) सौरेफः । **'नर्तुं सूर्क्षेत'** । 'तत्तन्नसूर्क्ष्यम्' इति (तैत्तिरीयब्राह्मणे) दर्शनात् । तस्माद्युट् (३।३।११५) । नञ्समासः । 'अत्र मुकुटस्य वृथाक्लेश उपेक्षणीयः ॥' (९) ॥*॥ नव **'परिभवस्य'** ॥

मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा

मन्दाक्षमिति ॥ मन्दमक्षं वागाद्यत्र ॥ (१) ॥*॥ 'ह्री लज्जायाम्' (जु० प० आ०) । संपदादि क्विप् ॥ (२) ॥*॥ 'त्रपूष् लज्जायाम्' (भ्वा० आ० से०) । षित्त्वात् (३।३।१०४) अङ् । **'त्रपा लज्जाकुलटयोः'** इति हैमः ॥ (३) ॥*॥ 'व्रीड लज्जायाम्' (दि० प० से०) । **'गुरोश्च** (३।३।१०३) इत्यप्रत्यये व्रीडा ॥*॥ घञि (३।३।१८) **'व्रीडः'** अपि । 'गण्डूषगर्जभुजजागरहारकीलज्वालाजटारभसवर्तकगर्धभृङ्गाः । व्रीडादयश्च वरटश्च वराटकश्च उत्कण्ठवाणकरकाश्च समामयाश्च' इति स्त्रीपुंलिङ्गकथने रभसः । ('व्रीडोऽक्षीबे त्रपा लज्जा' इति च तेनोक्तम्) ॥ (४) ॥*॥ लज्जनम् । 'ओलस्जी व्रीडे' (तु० प० से०) । अप्रत्ययः (३।३।१०३) । 'झलां जश् झशि' (८।४।५३) ॥ (५) ॥*॥ षड्ड **'लज्जायाः'** ॥

सापत्रपान्यतः ॥ २३ ॥

सेति ॥ सा लज्जा अन्यतश्चेत् सापत्रपा अयं ह्रीमात्रेऽपि । 'ह्रीर्लज्जापत्रपा व्रीडा' इति रत्नकोषात् ॥ (१) ॥*॥ एकम् **'पित्रादेः पुरतो जातलज्जायाः'** ॥

१—**असूक्षण**मिति पाठे असूनामुक्षणं तापो यतः इति बोध्यम् । न विद्यते शोभनः क्षणो यस्मात् **'असुक्षणम्'** ह्रस्वमध्यमपीति क्वचित् । 'सूर्क्ष अनादरे' ह्रस्वोकारकः । तस्मात्संपूर्वाद्युटि संसूर्क्षणम् । **'संसूर्क्षण**मनादरे' इति कोषान्तरेऽपीति धातुप्रदीपः । एवं चाकारादित्वमिह प्रामादिकमित्याहुः इत्यपि मुकुटबुधमनोहरे ॥

क्षान्तिस्तितिक्षा

क्षान्तिरिति ॥ क्षमणम् । 'क्षमू सहने' दिवादिः । अस्मात्क्तिन् (३।३।९४) । 'अनुनासिकस्य कि-' (६।४।१५) इति दीर्घः ॥*॥ भ्वादेस्तु षित्त्वात् अङ् (३।३।१०४) । तदुक्तम् 'अषितः क्षाम्यतेः क्षान्तिः षितस्तु क्षमतेः क्षमा' इति । (**'क्षमः** शक्ते हिते युक्ते क्षमावति । **क्षमा** क्षान्तौ क्षितौ' इति हैमः) ॥ (१) ॥*॥ तिज्रेः (भ्वा० आ० से०) क्षमायां सन् (३।१।१५) तदन्तादप्रत्यये (३।३।१०२) टाप् (४।१।४) ॥ (२) ॥*॥ द्वे **'क्षमायाः'** ॥

अभिध्या तु परस्य विषये स्पृहा ।

अभिध्येति ॥ अभिध्यानम् । 'ध्यै आध्याने' (भ्वा० आ० से०) । 'आतश्च' (३।३।१०६) इत्यङ् ॥ (१) ॥*॥ परस्य विषये चौर्यादिना स्पृहा । **'परस्वविषयस्पृहा'** इति पाठे परस्वे विषयेण चौर्यादिना लिप्सा-इति मुकुटः । वस्तुतस्तु-परस्वविषयविषयिणीच्छेत्यर्थः ॥ (१) ॥*॥ एकम् **'परद्रव्येच्छायाः'** ॥

अक्षान्तिरीर्ष्या

अक्षान्तिरिति ॥ न क्षमणम् । क्षाम्यतेः क्तिनि नञ्समासः ॥ (१) ॥*॥ ईर्ष्यणम् । 'ईर्ष्य ईर्ष्यायाम्' (भ्वा० प० से०) । 'गुरोश्च' (३।३।१०३) इत्यः ॥ (२) ॥*॥ द्वे **'परोत्कर्षासहिष्णुत्वस्य'** ॥

असूया तु दोषारोपो गुणेष्वपि ॥ २४ ॥

असूयेति ॥ असूयनम् । 'असूञ् असूयायाम्' । कण्ड्वादिलाद्यकि (३।१।२७) 'अ प्रत्ययात्' (३।३।१०२) इत्यः । 'असूया **त्वभ्यसूया** च' इति शब्दार्णवः ॥ (१) ॥*॥ **'अर्थदानादिषु गुणेषु दम्भकत्वादिरूपदोषारोपणस्य'** एकम् ॥

वैरं विरोधो विद्वेषः

वैरमिति ॥ वीरस्य कर्म । '-वैरमैथुनिकयोः' (४।३।१२५) इति निर्देशात् । युवादित्वात् (५।१।१३०) वाण् ॥*॥ (१) ॥*॥ विरोधनम् । विद्वेषणम् । 'रुधिर् आवरणे' (रु० उ० अ०) । 'द्विष अप्रीतौ' (अ० उ० से०) । घञ् (३।३।१८) ॥ (२) ॥*॥ (३) ॥*॥ त्रीणि **'वैरस्य'** ॥

मन्युशोकौ तु शुक् स्त्रियाम् ।

मन्विति ॥ 'मन ज्ञाने' (दि० आ० अ०) । 'मनिजनिदसिभ्यो युः' (उ० ३।२०) **'मन्युर्दैन्ये** क्रतौ कुधि' इति हैमः ॥ (१) ॥*॥ 'शुच शोके' (भ्वा० प० से०) । घञ् (३।३।१८) ॥ (२) ॥*॥ संपदादित्वात् क्विप् (वा० ३।३।१०८) ॥ (३) ॥*॥ त्रीणि **'शोकस्य'** ॥

१—दैन्ये यथा—'तीव्राभिषङ्गप्रभवेण मन्युना' । क्रोधे यथा-'मन्युना तेन मन्येऽहं वने वसति केसरी' इत्यनेकार्थकैरवाकरकौमुदी ॥

पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि ॥ २५ ॥

पश्चादिति ॥ पश्चात्तपनम् । अनुतपनम् । 'तप संतापे' (भ्वा० प० अ०) घञ् (३।३।१८) ॥ (१) ॥*॥ (२) ॥*॥ वितिप्रसरणम् । 'सृ गतौ' (भ्वा० प० अ०) घञ् (३।३।१८) । 'उपसर्गस्य घञि' (६।३।१२२) इति वा दीर्घः । **'विप्रतीसार** उद्दिष्टः कौकृत्येऽनुशये रुषि' इति मेदिनी ॥*॥ (पक्षे ह्रस्वतृतीयोऽपि । **'विप्रतिसार**[1]स्त्वनुशये रुषि । कौकृत्ये' इति हैमः) ॥ (३) ॥*॥ त्रीणि **'किंचित्कृत्वा पश्चात्तापस्य'** ॥

कोपक्रोधामर्षरोषप्रतिघा रुट्क्रुधौ स्त्रियौ ।

कोपेति । 'कुप क्रोधे' (दि० प० सें०) । 'क्रुध कोपे' (दि० प० अ०) घञ् (३।३।१८) भावे ॥ (१) ॥*॥ (२) ॥*॥ 'मृष तितिक्षायाम्' (दि० उ० से०) । घञ् (३।३।१८) । नञ्समासः (२।२।६) ॥ (३) ॥*॥ 'रुष हिंसायाम्' (भ्वा० प० से०) । घञ् (३।३।१८) ॥ (४) ॥*॥ प्रतिहननम् । 'अन्यत्रापि' (वा० ३।२।४८) इति डे न्यङ्क्वादित्वात् (७।३।५३) कुत्वम् । **'प्रतिघौ** रुट्प्रतीघातौ' इति हैमः ॥*॥ रुट्क्रुधौ संपदादी (वा० ३।३।१०८) ॥*॥ टापि (भागुरिमतेन) 'क्रोधो **भामः** क्रुधा **रुषा**' इति शब्दार्णवः ॥ (६) ॥*॥ (७) ॥*॥ (**'भामः** क्रोधे रवौ दीप्तौ') ॥ सप्त **'कोपस्य'** ॥

शुचौ तु चरिते शीलम्

शुचाविति ॥ 'शुचौ' इति भाषितपुंस्कत्वात्पुंवद्भावः (७।१।७४) ॥*॥ 'शील समाधाने' (भ्वा० प० से०) । ण्यन्तात् (३।१।२६) ॥ घञ् (३।३।१८) । यद्वा 'शीङो धुक्लुक्वलञ्वालनः' (उ० ८।३८) इति लक् । अर्धर्चादिः (२।४।३१) । **'शीलं** स्वभावे सद्वृत्ते' इति विश्वः । चरित्रमात्रेऽपि शीलम् । **'निष्ठा** च शीलं **चारित्रं चरित्रं चरितं** तथा' इति रत्नकोषात् ॥ (१) ॥*॥ एकम् **'सुस्वभावस्य'** ॥

उन्मादश्चित्तविभ्रमः ॥ २६ ॥

उन्माद इति ॥ उन्मदनम् 'मदी हर्षे' (दि० प० से०) । घञ् (३।३।१८) ॥ (१) ॥*॥ चित्तस्य विभ्रमोऽनवस्थानम् ॥ (२) ॥*॥ द्वे **'चित्तविभ्रमस्य'** ॥

प्रेमा ना प्रियता हार्दं प्रेम स्नेहः

प्रेमेति ॥ प्रीणाति प्रियः । 'प्रीञ् तर्पणे' (क्र्या० उ० से०) 'इगुपध-' (३।१।१३५) इति कः । तस्य भावः । 'पृ-

१—'प्रापि चेतसि सविप्रतिसारे' इति माघः ॥ २—अमर्षो ह्रस्वादिः । 'किमप्यमर्षोऽनुनये भृशायते' इति भारविः । 'वधूरमर्षात्' इति माघः । 'अन्येषामपि' (६।३।१३७) इति दीर्घत्वे 'दीर्घादिरपि'—इति हट्टचन्द्रः । 'निरुद्योगं निरामर्षं निर्वीर्यमरिनन्दनम्' इति विशाखः इति मुकुटबुधमनोहरे ॥

श्वादिभ्य इमनिच्' (५।१।१२२) । 'प्रियस्थिर–' (६।४।१५६) इति प्रादेशः । 'प्रेमास्त्री स्नेहनर्मणोः' ॥ (१) ॥*॥ तल् (५।१।११९) प्रियता ॥ (२) ॥*॥ हृदयस्य कर्म । युवादिलात् (५।१।१३०) अण् । 'हृदयस्य हृल्लेख–' (६।३।५०) इति हृदादेशः ॥ (३) ॥*॥ प्रयणम् । 'प्रीञ् तर्पणे' (क्या० उ० से०) । मनिन् (३।२।७५) । प्रेमन् नान्तं क्लीबम् ॥ (४) ॥*॥ स्नेहनम् । 'ष्णिह प्रीतौ' (दि० प० से०) । घञ् (३।३।१८) । **'स्नेहः** प्रेम्णि घृतादिके' ॥ (५) ॥*॥ पञ्च **'स्नेहस्य'** ॥

अथ दोहदम् ।

इच्छा काङ्क्षा स्पृहेहा तृड्वाञ्छा लिप्सा मनोरथः २७ कामोऽभिलाषस्तर्षश्च

अथेति ॥ दोहमाकर्षं ददाति । 'आतोऽनुप–' (३।२।३) इति कः । अयमिच्छामात्रवाच्यपि विशेषेण गर्भिणीच्छायां प्रयुज्यते । **'दोहदो** गर्भलक्षणे । अभिलाषे तथा गर्भे' इति हैमैः ॥ (१) ॥*॥ एषणम् । इच्छा । 'इच्छा' (३।३।१०१) इति सूत्रेण इषेः शप्रत्यये निपातितः ॥ (२) ॥*॥ 'काङ्क्षि वाञ्छि इच्छायाम्' (भ्वा० प० से०) । 'गुरोश्च' (३।३।१०३) इत्यः ॥ (३) ॥*॥ (७) ॥*॥ 'स्पृह ईप्सायाम्' (चु० उ० से०) । भिदादेराकृतिगणत्वादङ् (३।३।१०६) ॥ (४) ॥*॥ 'ईह चेष्टायाम्' (भ्वा० आ० से०) । 'गुरोश्च' (३।३।१०३) इत्यः । (**'ईहोद्यमवाञ्छयोः'**)॥ (५) ॥*॥ तर्षणम् । 'तृषिष् पिपासायाम्' (दि० प० से०) । संपदादि क्विप् (वा० ३।३।१०८) । ('तृद्र लिप्सायामुदन्यायां स्मरपुत्र्यामपि स्त्रियाम्') ॥*॥ (टाबन्तापि भागुरिमते) । (**'तृष्णा** लिप्सातृषोः स्त्रियाम्') इति मेदिनी ॥ (६) ॥*॥ घञि (३।३।१८) । **'तर्षो** लिप्सोदन्ययोः' ॥ (१२) ॥*॥ लभेः सन्नन्तादः (३।३।१०२) ॥ (८) ॥*॥ मन एव रथोऽत्र । मनो रथ इव वा ॥ (९) ॥*॥ कामनम् । 'कमु कान्तौ' (भ्वा० आ० से०) घञ् (३।३।१८) । **'कामः** स्मरेच्छयोः पुमान् । रेतस्यपि निकामे च काम्येऽपि स्यान्नपुंसकम्' ॥ (१०) ॥*॥ अभिलषणम् । 'लष कान्तौ' (भ्वा० उ० से०) । घञ् (३।३।१८) ॥ (११) ॥*॥ द्वादश **'इच्छायाः'** ॥

सोऽत्यर्थं लालसा द्वयोः ।

स इति ॥ स तर्षी महांश्चेत् 'लल ईप्सायाम्' (*) । औणादिकोऽसण् । यद्वा 'लस कान्तौ' (*) । भृशं लसनम्, इत्यर्थे यङन्तादः (३।३।१०२) टाप् (४।१।१०२) घञि तु लालसः । स्त्रीनिर्देश आबन्ततासूचनार्थः । **'लालसौत्सुक्यतृष्णातिरेकयाच्ञासु** च द्वयोः' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ एकम् **'अतिप्रीतेः'** ॥

उपाधिर्ना धर्मचिन्ता

उपाधिरिति ॥ समीप आधेः । उपपन्न आधिर्वा । **'उपाधिस्तु** धर्मध्याने विशेषणे । कुटुम्बव्यापृते छद्मनि' इति हैमः ॥ (१) ॥*॥ धर्मस्य चिन्ता ॥ (२) ॥*॥ द्वे **'धर्मविचारस्य'** ॥

पुंस्याधिर्मानसी व्यथा ॥ २८ ॥

पुंसीति ॥ आधीयते दुःखमनेन । 'डुधाञ्' (जु० उ० अ०) 'उपसर्गे घोः किः' (३।३।९२) (**आधिर्मनोर्तौ** व्यसनेऽधिष्ठाने बन्धकाशयोः') ॥ (१) ॥*॥ एकं **'मनःपीडायाः'** ॥

स्याच्चिन्ता स्मृतिराध्यानम्

स्यादिति ॥ चिन्तनम् । 'चिति स्मृत्याम्' (चु० प० से०) । 'चिन्तिपूजि–' (३।३।१०५) इत्यङ् । यत्तु—अप्रत्यये कार्ये 'चिन्तिपूजि–' इत्यङ्विधानं गुणाभावार्थम् । तत्सामर्थ्याण्णिलोपाभावोऽपि, इति **'चिन्तया'** इत्यपि–इति मुकुटेनोक्तम् । तन्न । 'भिदा' इत्यादौ ङिलस्य चरितार्थत्वेन 'व्यधा' इत्यत्रातोलोपार्थत्वेनोत्तरार्थत्वेन सामर्थ्यविरहात् ॥ (१) ॥*॥ स्मरणम् । 'स्मृ आध्याने' (भ्वा० प० अ०) । क्तिन् (३।३।९४) **'स्मृतिः** स्मरणधीच्छासु शास्त्रे' इति हैमः ॥ (३) ॥*॥ उपधीयते 'ध्यै चिन्तायाम्' (भ्वा० प० अ०) । ल्युट् (३।३।११५) ॥ (३) ॥*॥ त्रीणि **'स्मरणस्य'** ॥

उत्कण्ठोत्कलिके समे ।

उत्कण्ठेति ॥ 'कठि शोके' (भ्वा० आ० से०) । उत्कण्ठनम् । 'गुरोश्च–' (३।३।१०३) इत्यः ॥ (१) ॥*॥ उत्कलेः

१—नर्मणि यथा—'विधत्ते मत्तेयं निधुवनविधौ प्रेमकलहम्' इत्यनेकार्थकैरवाकरकौमुदी । मेदिन्यां तु 'हर्षयोः' इत्युपलभ्यते । अत्र तु 'मर्मणोः' इति लिखितमासीत् ॥ २—'प्रेम पश्यति भयान्यपदेऽपि' इति भारविः इति मुकुटबुधमनोहरे ॥ ३—हैमे तु नोपलभ्यते ॥ ४—'तृषापि न कृशा मम' इति प्रयोग इति मुकुटबुधमनोहरे ॥

१—धर्मध्याने यथा 'विनोपाधिं शास्त्रं तृणतुषवुसप्रख्यमधुना' ॥ विशेषणे यथा 'नह्युपाधेरुपाधिर्भवति' । कुटुम्बव्यापृते यथा 'उपाधिं बाधन्ते विविधविधिभिर्बान्धवजनाः' । छद्मनि यथा 'चिद्रूपानन्दमयो निःशेषोपाधिवर्जितः शुद्धः' इत्यनेकार्थकैरवाकरकौमुदी ॥ २—बन्धको यदधमर्णेनोत्तमर्णस्य भूम्यादायत्तं क्रियते । तत्र यथा–'न भोक्तव्यो बलादाधिः' । आशायां यथा–'धनाधिना धावति जीवलोकः' इत्यनेकार्थकैरवाकरकौमुदी ॥ ३—स्वसिद्धुत्तरत्र च चारितार्थ्येऽपि मध्ये 'चिन्तिपूजि–' इत्यत्र ङितोऽनुवृत्तिचारितार्थ्याभावात् 'इह किंचित्तपो' इतिवदत्रापि णिलोपाभावसाधकत्वकल्पने बाधकाभावमभिप्रेत्यैव पीयूषबुधमनोहरयोरपि 'चिन्तिया च' इत्युक्तम् । अतएव 'स्याच्चिन्ता चिन्तिया' इति त्रिकाण्डशेष उक्तम् ॥

'कृञादिभ्यो वुन्' (उ० ५।३५)। कुन् (उ० २।३२) वा। ('उत्कलिका तु हेलायां तरङ्गोत्कण्ठयोरपि') ॥ (२) ॥*॥ स्त्रीत्वेनापि साम्यम्। द्वे **'कामादिजस्मृतेः'**। 'चिन्ता तु स्मृतिराध्यानं स्मरणं, सस्पृहे पुनः। उत्कण्ठोत्कलिके तस्मिन्, अभिध्या तूभयोरपि' इति शब्दार्णवः ॥

उत्साहोऽध्यवसायः स्यात्

उत्साह इति ॥ उत्सहनम्। 'षह मर्षणे' (भ्वा० आ० से०) घञ् (३।३।१८)। **'उत्साहस्तूद्यमे सूत्रे'** ॥ (१) ॥*॥ अध्यवसानम्। 'षोऽन्तकर्मणि' (दि० प० अ०)। घञ् (३।३।१८) 'आतो युक्' (७।३।३३) ॥ (२) ॥*॥ द्वे **'उत्साहस्य'** ॥

स वीर्यमतिशक्तिभाक् ॥ २९ ॥

स इति ॥ स उत्साहः अतिशक्तिभाक्। वीरे साधु। 'तत्र साधुः' (४।४।९८) इति यत्। ('**वीर्यं** तेजःप्रभावयोः। शुक्रे शक्तौ च') 'अतिशयशक्तिर्वीर्या' इति त्रिलमरमालायां स्त्रीत्वम् ॥ (१) ॥*॥ एकम् **'अतिशयिताध्यवसायस्य'** ॥

कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे।
कुस्तुतिर्निकृतिः शाठ्यम्

कपट इति ॥ के मूर्ध्नि पट इवाच्छादकः। यद्वा पटतीति पटः। 'पट गतौ' (भ्वा० प० से०)। पचाद्यच् (३।१।१३५)। कस्य ब्रह्मणोऽपि पटो व्यापकः ॥ (१) ॥*॥ व्यजन्ति क्षिपन्त्यनेन। 'अज गतिक्षेपणयोः' (भ्वा० प० से०)। 'हलश्च' (३।३।१२१) इति घञ्। निष्ठायां सेट्त्वान्न कुत्वम्। **'व्याजः** शाठ्येऽपदेशे च' इति विश्वः ॥ (२) ॥*॥ दभ्यतेऽनेन। 'दम्भु दम्भने' (स्वा० प० से०)। घञ् (३।३।१८)। **'दम्भः** कल्के कैतवे च' इति हेमचन्द्रः ॥ (३) ॥*॥ उपधीयत आरोप्यतेऽनेन। 'उपसर्गे घोः किः' (३।३।९२)। **'उपधिर्व्याजचक्रयोः'** ॥ (४) ॥*॥ छाद्यतेऽनेन। 'छद अपवारणे' (चु० उ० से०) मनिन् (३।२।७५)। 'इसन्नन्क्विषु च' (६।४।९७) इति ह्रस्वः। ('**छद्म** शाठ्येऽपदेशे घातिकर्मणि') ॥ (५) ॥*॥ कितवस्य कर्म। युवादित्वात् (५।१।१३०) अण्। **'कैतवं** द्यूतदम्भयोः' इति हैमः ॥ (६) ॥*॥ कुत्सिता स्तुतिः। 'स्तु गतौ' (भ्वा० प० से०)। क्तिच् (३।३।१७४)। 'कुगति–' (२।२।१८) इति समासः ॥ (७) ॥*॥ निकृष्टा कृतिः क्रिया परप्रतारणरूपा, यद्वा पराभीष्टस्य निकर्तनम्। 'कृती छेदने' (तु० प० से०) 'इक् कृष्यादिभ्यः' (वा० ३।३।१०८) इतीक्। **'निकृतिर्भर्त्सने क्षेपे शठे शाठ्येऽपि च स्त्रियाम्'** इति विश्वमेदिन्यौ ॥ (८) ॥*॥ शठति। 'शठ कैतवे' (भ्वा० प० से०)। पचाद्यच् (३।१।१३४)। शठस्य कर्म। ब्राह्मणादित्वात् (५।१।१२४) ष्यञ्। यद्वा शठनम्। 'ऋहलोर्ण्यत्' (३।१।१२४) ॥ (९) ॥*॥ नव **'कपटस्य'** ॥

प्रमादोऽनवधानता ॥ ३० ॥

प्रमाद इति ॥ 'मदी हर्षे' (दि० प० से०)। भावे घञ् (३।३।१८)। '+प्रमादः संमदे मत्ते स्त्रियामुन्मदयोषिति+' ॥ (१) ॥*॥ न अवधानमस्य। तस्य भावः ॥ (२) ॥*॥ द्वे **'अविमृष्टकृत्यस्य'** ॥

कौतूहलं कौतुकं च कुतुकं च कुतूहलम्।

कौतूहलमिति ॥ कुतूः चर्मनिर्मितलेहपात्रं हलति। 'हल विलेखने' (भ्वा० प० से०)। मूलविभुजादित्वात् (वा० ३।२।५) कः। यद्वा हलति। पचाद्यच् (३।३।१३४)। कृत्वा हलम्। प्रज्ञाद्यण् (५।४।३८) कौतूहलम् ॥ (१) ॥*॥ (अणभावे) **'कुतूहलं** कौतुके स्यात्प्रशस्तेऽपि च दृश्यते' ॥ (४) ॥*॥ कुतूं कायति। 'कै शब्दे' (भ्वा० प० अ०)। 'आतोऽनुप–' (३।२।३) इति कः। उपपदसमासः (२।२।१९)। 'इको ह्रस्वोऽङ्यः–' (६।३।६१) इति ह्रस्वः। प्रज्ञाद्यण् (५।४।३८) वा। यद्वा कुत्वां भवम्। अध्यात्मादित्वात् (वा० ४।३।६०) ठञ्। 'इसुसुक्–' (७।३।५१) इति कः। 'केऽणः' (७।४।१३) इति ह्रस्वः। संज्ञापूर्वकत्वात्पक्षे वृद्ध्यभावः। यत्तु–'तुज हिंसायाम्' (भ्वा० प० से०)। कुं तुजति। 'मूलविभुज–' (वा० ३।२।५) इति कः। न्यङ्क्वादित्वात् (७।३।५३) कुत्वम्–इति मुकुटेनोक्तम्। तन्न। कुत्वे आन्तरतम्याज्जस्य गत्वप्रसङ्गात्। ('**कौतुकं** नर्मणीच्छायामुत्सवे कुतुके मुदि। पारम्पर्यागतख्यातमङ्गलोद्वाहसूत्रयोः। गीतादौ भोगकाले च') ॥ (२) ॥*॥ (३) ॥*॥ चत्वारि **'कौतुकस्य'** ॥

स्त्रीणां विलासविब्बोकविभ्रमा ललितं तथा ॥ ३१ ॥
हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः।

स्त्रीणामिति ॥ शृङ्गारादल्यादेः भावान्मनोविकाराच्च जाताः (स्त्रीणाम्) क्रियाश्चेष्टा अलंकाराख्या विलासादिका हावशब्दवाच्याः। हवनम्। 'हु दानादनयोः' (जु० प० अ०)। 'क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते' इत्यब्विषये घञ् (३।३।१८)। यत्तु—मुकुट आह–शृङ्गारभावो रतिः। तज्जा–इति। तन्न। 'शृङ्गारभावः' इति समुदायस्य रतिवाचकत्वाभावात्। यदपि—हू हवने–

१—एतदग्रे 'कैतवः कितवे शत्रौ' इत्यपि लिखितमासीत्। परंतु हैममेदिन्योः कैरवशब्दस्यैव दर्शनात् अनेकार्थकैरवाकरकौमुद्यामपि 'त्वयि भास्वत्युदिते सर्वतेजोभिभाविनि। उन्मीलति धरानाथ किं, कैरवकुलं क्वचित्' इत्येवोदाहृतम्। इति न प्रकृतोपयुक्तम् ॥

१—प्रमदशब्दव्याख्यायामस्य कोशस्योपन्यस्तत्वेन, प्रमदाशब्दव्याख्यायामुपन्यसिष्यमाणत्वेन च तत्र मेदिन्यां च प्रमदशब्दस्यैवोपादानेन नेदं प्रकृतोपयोगि ॥

इत्युक्तम् । तदपि न । एतादृशस्य धातोरभावात् । यदपि–उक्तार्थे भरतस्य संमतिरुपन्यस्ता । 'अलंकारश्च नाट्यज्ञैर्ज्ञेया भावरसाश्रयाः । यौवनेऽभ्यधिकाः स्त्रीणां विकारा वक्रगात्रजाः' इति । तत्रापि 'भावरसाश्रयाः' इत्यनेनास्मदुक्त एवार्थो लभ्यते, न भवदुक्तः । यत्तु—ह्वयन्त्यनेनेति हावः–इति स्वामिनोक्तम् । तन्न । ह्वेञो घञि संप्रसारणाविधानात् ॥ (१) ॥*॥ विलसनम् । 'लस श्लेषणे' (भ्वा० प० से०) घञ् (३।३।१८) । **'विलासो**ऽङ्गे विशेषो यः प्रियायाश्चावासनादिषु' । **'विलासो** हावभेदे स्याल्लीलायामपि पुंस्ययम्' ॥ (१) ॥*॥ विवानम् । 'वा गतौ' (अ० प० अ०) विवुर्गतिविशेषः । (यत्तु) 'अपष्ठादयः' इति कुः–इति मुकुटः । तन्न । तादृशसूत्रादर्शनात् । 'मृगय्वादयश्च' (उ० १।३७) इति तूचितम् । उच्यते समवैत्यत्र । 'उच समवाये' (दि० प० से०) । 'हलश्च' (३।३।१२१) इति घञर्थे । यद्वा 'कः' (वा० ३।३।५८) । 'ओक उचः के' (७।३।६४) इति निपातितः । विवोरोकः स्थानम् । **विव्वोको**ऽभिमतप्राप्तावपिगर्वादनादरः ॥ (१) ॥*॥ विभ्रमणम् 'भ्रमु अनवस्थाने' (दि० प० से०) घञ् (३।३।१८) । 'नोदात्तोपदेश–' (७।३।३४) इति न वृद्धिः । 'चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो मतः' । 'अथ **विभ्रमः** । शोभायां संशये हावे' इति हैमः । **'विभ्रमो** भ्रान्तिहावयोः' ॥ (१) ॥*॥ 'लल ईप्सायाम्' ॥ (*) ॥ 'लड विलासे' (भ्वा० प० से०) वा । डलयोरभेदः भावे क्तः (३।३।११४) 'अनाचार्योपदिष्टं स्याल्ललितं रतिचेष्टितम्' । ('**ललित**मीप्सिते । लडिते हावभेदे स्यात्') ॥ (१) ॥*॥ 'हिल भावकरणे' (तु० प० से०) । 'हेडृ अनादरे' (भ्वा० आ० से०) भावे घञ् (३।३।१८) । 'स्याद्भावसूचको हावो हेलौऽस्यैवानुभावनम्' । 'प्रौढेच्छा सुरते हेला' इति वा । (**'हेला** स्त्रियामवज्ञायां विलासे वारयोषिताम्') ॥ (१) ॥*॥ लयनम् । लीः । 'लीङ् श्लेषणे' (दि० आ० अ०) । संपदादित्वात् (वा० ३।३।१०८) क्विप् । लियं लाति । 'ला आदाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । 'प्रियस्यानुकृतिर्लीला श्लिष्टा वाग्वेषचेष्टितैः' । **'लीला** केलिर्विलासश्च शृङ्गारभावजा क्रिया' ॥ (१) ॥*॥ इति शब्दार्णवात्प्रकारार्थादन्येऽपि ज्ञेयाः । 'लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम् । मोट्टायितं कुट्टमितं विव्वोको ललितं तथा ॥ विहृतं चेति मन्तव्या दश स्त्रीणां स्वभावजाः' इति नाटकरत्नकोशः । विच्छेदनम् । 'च्छिदिर् द्वैधीकरणे' (रु० उ० अ०) । क्तिन् (३।३।९४) । 'मण्डनानादरन्यासो विच्छित्तिः रूपदर्पतः' (**'विच्छित्तिः** स्यादङ्गरागे हावविच्छेदयोरपि') ॥ (१) ॥*॥ किलकिञ्चितमत्र । हर्षादुदितगीतादिव्यामिश्रं **किलकिञ्चितम्** । स्वामी तु—किलकिञ्चितम्–इति पाठं मन्यते । यदाह 'किलीति कण्ठकूजितम्' वा । यथा 'किलिकिलारावः' इति ॥ (१) ॥*॥ मोटनम् । 'मुट प्रमर्दने' (तु० प० से०) । घञ् (३।३।१८) । बाहुलकाद्धलस्तुट् । भृशादि (३।१।१२) क्यङन्ताद्भावे क्तः (३।३।११४) । **'मोट्टायितं** प्रियं स्मृत्वा साङ्गभङ्गविजृम्भणम्' । यत्तु—मोट्टनम् । मोट्टः—इति मुकुटः । तन्न । मोट्टधातोरदर्शनात् । यदपि–लोहितादि (३।१।१३) क्यषन्ताद्भावे क्तः–इति ॥ तदपि न । 'लोहितादिडाज्भ्यः क्यष्वचनम्' 'भृशादिङ्वितराणि' इति वार्तिकविरोधात् ॥ (१) ॥*॥ कुट्टनम् । 'कुट्ट छेदनादौ' (चु० प० से०) घञ् (३।३।१८) कुट्टेन निर्वृत्तम् । भावप्रत्ययान्तादिमप् (वा० ४।४।२०) । ततो ण्यन्तात् (वा० ३।१।२६) भावे क्तः (३।३।११४) ॥ तारकादित्वात् (५।२।३६) इतच् वा । 'दुःखोपचारः सौख्येऽपि हर्षात्कुट्टमितं मतम्' ॥ (१) ॥*॥ विहरणम् । भावे क्तः

१—तत्र प्रियसमीपगमने यः स्थानासनगमनविलोकितेषु विकारोऽकस्माच्च क्रोधस्मितचमत्कारमुखविकूवनं स विलासः ॥ २—एतदग्रे **'वीतंसो** बन्धनोपाये मृगाणामपि पक्षिणाम् । तेषामेव च विश्वासहेतौ प्रावरणेऽपि च' इत्यपि लिखितमस्ति । तत्तु वीतंसशब्दार्थबोधकतया प्रकृतानुपयुक्तम् ॥ ३—अभिमतप्राप्तावपि गर्वादनादरः, सापराधस्य स्रक्चन्दनादिना संयमनं ताडनं च विव्वोकः ॥ ४—मदरागहर्षजनितो विपर्यासो विभ्रमः । यथा अनिमित्तमासनादुत्थायान्यत्र गमनम्, प्रियारब्धकथामाक्षिप्य सख्या सहालापनम्, मुधैव रुषितक्रोधौ, पुष्पादीनां याच्ञा सहसैव तत्परित्यागः, वस्त्राभरणमाल्यानामकारणतः खण्डनम्, मननं च इति । योषितां यौवनजो विकारो विभ्रमः इत्येके ॥ ५—एतदग्रे 'विभ्रमो रत्नवृक्षेऽपि प्रवालेऽपि पुमानयम्' इति लिखितमस्ति । परंतु मेदिन्यादिषु 'विद्रुमः' इत्यस्यैवोपलम्भेन न प्रकृतोपयोगि ॥ ६—सुकुमारविधानेन भ्रूनेत्रादिक्रियासच्चिवकरचरणाङ्गन्यासो ललितम् । यथा—चरणनिपातक्षणज्झणज्झणपुरमसृणसंचरणे रेखाविशेषस्थितत्रिवलिभङ्गसंस्थानसमुल्लसितभुजम्, उरःस्थलप्रसारणाद्विगुणपृथुकृतं स्तनस्तबकम्, स्कन्धासक्तैककुण्डलम्, उल्लसितभ्रूसाचीकृतविलोलितम् इति ॥ प्रियं प्रति भावाविष्कृतं ललितमित्यन्ये ॥

१—सुरते प्रौढेच्छा हेला ॥ २—अलब्धप्रियसमागमया स्वचित्तविनोदार्थं प्रियस्य या वेषगतिदृष्टिहसितभणितैरनुकृतिः क्रियते सा लीला ॥ ३—आभरणविलेपनादीनां कुतश्चित्प्रियापराधादीर्ष्यायानादरेण त्यक्तानां सखीनां प्रयत्नाद्धारणं विच्छित्तिः ॥ प्रियेण दत्तं प्रीतिनिबन्धनं स्वल्पमपि भूषणं विच्छित्तिरित्यन्ये ॥ ४—इष्टजनदर्शनवशात् शुष्करुदितहसितत्रसितक्रोधश्रमाभिलाषानां संकरीकरणं किलिकिञ्चितम् ॥ ५—प्रियकथासु साङ्गभङ्गजृम्भणं कर्णकण्डूयनं मोट्टायितम् ॥६—सुरतेषु गाढपरिपीडने केशस्तनादिग्रहणे च हर्षात्सुखेऽपि दुःखविक्रिया, दुःखेऽपि सुखविक्रिया कुट्टमितम् ॥

(३।३।११४) । 'वक्तव्यभाषणं व्याजाद्धितं दर्शितेङ्गितम्' ॥ (१) ॥*॥ इति ॥

द्रवकेलिपरीहासाः क्रीडा खेला च नर्म च ॥ ३२ ॥

द्रवेति ॥ द्रवणम् । 'द्रु गतौ' (भ्वा० प० अ०) । 'ऋदोरप्' (३।३।५७) । '**द्रवो** विद्रवनर्मणोः । प्राद्रवे रसगल्योश्च' इति हैमः ॥ (१) ॥*॥ केलनम् । 'किल क्रीडायाम्' (तु० प० से०) । 'केल्ल चलने' (भ्वा० प० से०) वा । इन् (उ० ४।११८) । (**केली** इति स्त्रियामपि । 'केलीषु तद्वानगुणान्निपीय' इति नैषधात् । इति मुकुटः) ॥ (२) ॥*॥ परिहसनम् 'हसे हसने' (भ्वा० प० से०) । घञ् (३।३।१८) । 'उपसर्गस्य घञि' (६।३।१२२) इति दीर्घः ॥ (३) ॥*॥ क्रीडनम् । 'क्रीड विहारे' (भ्वा० प० से०) । 'गुरोश्च–' (३।३।१०३) इत्यः । '**क्रीडा** केलिप्रकारे स्यात्खेलावैज्ञानयोरपि' (इति विश्वमेदिन्यौ) ॥ (४) ॥*॥ खेलनम् । 'खेल्ल चलने' (भ्वा० प० से०) । 'गुरोश्च–' (३।३।१०३) इत्यः । मुकुटस्तु 'खेला' इत्यस्य स्थाने 'लीला' इति पठति ॥ (५) ॥*॥ नरणम् । 'नृ नये' (भ्वा० प० से०) । मनिन् (३।२।७५) ॥ (६) ॥*॥ षट् '**क्रीडायाः**' ॥

व्याजोऽपदेशो लक्ष्यं च

व्याज इति ॥ (१) ॥*॥ अपदेशनम् । 'दिश अतिसर्जने' (तु० उ० अ०) । घञ् (३।३।१८) । ('**अपदेशः** पुमाँल्लक्ष्ये निमित्तव्याजयोरपि') ॥ (२) ॥*॥ लक्षणम् । 'लक्ष आलोचने' (चु० आ० से०) । ण्यत् (३।३।१२४) । '**लक्ष्यं** स्यादपदेशेऽपि शरव्येऽपि नपुंसकम्' इति मेदिनी ॥*॥ घञन्तोऽपि । 'संख्यायां च न ना **लक्षं** क्लीबं व्याजशरव्ययोः' इति मूर्धन्यान्ते रभसात् ॥ (३) ॥*॥ त्रीणि '**स्वरूपाच्छादनस्य**' ॥

क्रीडा खेला च कूर्दनम् ।

क्रीडेति ॥ (१) ॥*॥ खेलनम् । 'गुरोश्च' (३।३।१०३) इत्यः ॥ (२) ॥*॥ 'कुर्द क्रीडायाम्' (भ्वा० प० से०) । ल्युट् (३।३।११५) । 'वोरुपधायाः–' (८।२।७६) इति दीर्घः ।

१—'अवसरागतं वचनं व्याजादिना हृतं विहृतम्'–इति मुकुटः ॥ २—विद्रवे पलायने यथा 'द्रवन् द्रविडराजोऽपि शिश्रिये त्वरया द्रुतम्' । प्राद्रवे प्रस्रवणे यथा—'जात्येन चन्द्रमणिनैव महीधरस्य संचार्यते द्रवमयो मनसो विकारः' इत्यनेकार्थकैरवाकरकौमुदी ॥ ३—'आसवे' इति पाठः पुस्तकान्तरे ॥ ४—अवज्ञाने अनादरे यथा—'तस्य द्वयमपि क्रीडा क्रीडा दलितदन्तिनः' इत्यनेकार्थकैरवाकरकौमुदी ॥ ५—परिहासस्य–इति बुधमनोहरा ॥ ६—व्याजोऽत्र स्वरूपाच्छादनम् । यथा 'ध्यानव्याजमुपेत्य चिन्तयसि कम्' इति । पूर्वोक्तो व्याजः परद्रोहफलः । तथा च पञ्जिकायाम्—'कपटार्थो व्याजः परद्रोहफलः, अपदेशार्थस्त्वन्यदुद्दिश्यान्यार्थमनुष्ठानम् । यथा जलक्रीडामपदिश्यान्यार्थं याति' इति—इति मुकुटः ॥

यत्तु—'स्फूर्ज' इति लिङ्गात् कुर्दादीनां न दीर्घः (इति धर्मदासः) । 'वोः' इति विधेरनित्यत्वम्—इति कश्चित् (पूर्णचन्द्रः) आह । तन्न । 'स्फुर्ज' इति स्वरूपनिर्देशार्थं दीर्घानुच्चारणात् । दीर्घविधेः सत्त्वाच्च । यदि 'विधिप्राप्तं कृत्वैव निर्देष्टव्यम्' इति नियमः स्वीक्रियते तदा 'एशिरेचोरेत्वाभावस्याज्ञापकत्वं स्यात्' एत्वस्य लक्षणप्राप्तत्वात् । अतएव 'दीर्घाभावस्तु चिन्त्यः' इति स्वामिग्रन्थोऽपि संगच्छते ॥ (३) ॥*॥ त्रीणि '**कन्दुकादिक्रीडनस्य**' ॥

घर्मो निदाघः स्वेदः स्यात्

घर्म इति ॥ जिघर्त्यङ्गमनेन । 'घृ क्षरणदीप्त्योः' (जु० प० अ०) । 'घर्म–' (उ० १।१४९) इति निपातितः । यत्तु–'घरति' इति विग्रहप्रदर्शनं मुकुटेन कृतम् । तत्तु 'घृ क्षरणे' इति धातूपन्यसनेन विरुध्यते । घरत्यङ्गमनेन वा । 'घृ सेके' (भ्वा० प० अ०) । ('**घर्मः** स्यादातपे ग्रीष्मेऽप्युष्णस्वेदाम्बुनोरपि') ॥ (१) ॥*॥ निदह्यतेऽनेन । 'हलश्च' (३।३।१२१) इति घञ् । न्यङ्क्वादिः (७।३।५३) ॥ (२) ॥*॥ स्विद्यतेऽनेनाङ्गम् । घञ् (३।३।१२१) । '**स्वेदो** घर्मे स्वेदने च' इति हैमः ॥ (३) ॥*॥ त्रीणि '**प्रस्वेदहेतोस्तापस्य**' ।—अङ्गजलस्य–इति मुकुटः । तन्न । स्वकृतकरणविग्रहविरोधात् । नहि जलेन प्रस्विद्यते । वस्तुतस्तु–भावकर्मव्युत्पत्त्या सोऽप्यर्थः ॥

प्रलयो नष्टचेष्टता ॥ ३३ ॥

प्रलय इति ॥ प्रलयनम् । लीङ् (दि० आ० अ०) । 'एरच्' (३।३।५६) । '**प्रलयो** मृत्युकल्पान्तमूर्च्छापायेषु पुंस्ययम्' ॥ (१) ॥*॥ नष्टा चेष्टा यस्य । तस्य भावः । तल् (५।१।११९) ॥ (२) ॥*॥ द्वे '**सात्विकभावस्य**' मूर्च्छापरपर्यायस्य । हर्षशोकादिभिः सकलचेष्टानाशस्येत्यर्थः ॥

अवहित्थाकारगुप्तिः

अवेति ॥ अवहिः स्थितिरवहित्था । 'सुपि स्थः' (३।२।४) इत्यत्र 'स्थः' इति योगविभागात्कः । पृषोदरादिः (६।३।१०९) ॥ (१) ॥*॥ आकारस्य शोकादिजनितमुखम्लान्यादेर्गोपनम् । क्तिन् (३।३।९४) ॥ (२) ॥*॥ द्वे '**आकारगोपनस्य**' ॥

समौ संवेगसंभ्रमौ ।

समाविति ॥ संवेजनं संचलनम् । 'ओविजी भयचलनयोः' (तु० आ० से०) । घञ् (३।३।१८) ॥ (१) ॥*॥ संभ्रमणम् । घञ् (३।३।१८) । '**संभ्रमः** साध्वसेऽपि स्यात्संवेगादरयोरपि' ॥ (२) ॥*॥ द्वे '**हर्षादिना कर्मसु त्वरणस्य**' ॥

१—'अवहित्थमथोग्रता' इति भरतोक्तेः क्लीबमपि—इति मुकुटपीयूषबुधमनोहराः ॥

स्यादाच्छुरितकं हासः सोत्प्रासः

स्यादिति ॥ उत्प्रासनम् । 'असु क्षेपणे' (दि० प० से०) । 'अस गतिदीप्त्यादानेषु' (भ्वा० उ० से०) । वा घञ् (३।३।१८) । उत्प्रासेनाधिक्येन क्षेपणेन वा सहितः सोत्प्रासः । आच्छुरणं परच्छेदनं । 'छुर छेदने' (तु० प० से०) । भावे क्तः (३।३।११४) । स्वार्थे कन् (५।३।७७) भावे **'स्यादाच्छुरितकं** हासनखराघातभेदयोः' ॥ (१) ॥*॥ एकं **'परस्यामर्षजनकहासस्य'** ॥

स मनाक् स्मितम् ॥ ३४ ॥

स इति ॥ स हासो मनागल्पः । 'स्मिङ् ईषद्धसने' (वा० आ० अ०) । भावे क्तः (३।३।११४) 'ईषद्विकसितैर्दन्तैः कटाक्षैः सौष्ठवान्वितैः । अलक्षितद्विजद्वारमुत्तमानां स्मितं भवेत्' ॥ (१) ॥*॥ एकम् **'ईषद्धासस्य'** ॥

मध्यमः स्याद्विहसितम्

मध्यम इति ॥ स हासो मध्यमो महत्त्वाल्पत्वहीनः । 'हसे हसने' (भ्वा० प० से०) । भावे क्तः (३।३।११४) 'आकुञ्चितकपोलाक्षं सस्वनं निःस्वनं तथा । प्रस्तावोत्थं सानुरागमाहुर्विहसितं बुधाः' ॥ (१) ॥*॥ एकम् **'मध्यमहासस्य'** ॥

रोमाञ्चो रोमहर्षणम् ।

रोमाञ्च इति ॥ रोम्णामञ्चनं पूजनम् । घञ् (३।३।११८) 'चजोः–' (७।४।५२) इति सूत्रे 'निष्ठायामनिटः' इति पूरितत्वादस्मात्तु 'अञ्चेः पूजायाम्' (७।२।५३) इति क्त्वानिष्ठयोरिड्विधानाच्च कुत्वम् । यत्तु—'न क्तादेः' (७।३।५९) इति योगविभागाच्च कुत्वम्—इति भाषावृत्त्युपन्यसनं मुकुटस्य । तच्च । तस्य वार्तिककृता ('निष्ठायामनिटः' इति वार्तिकेन) प्रत्याख्यानात् । यथोत्तरं मुनीनां प्रामाण्यात् ॥ (१) ॥*॥ रोम्णां हर्षणम् ॥ (२) ॥*॥ पुलक-कण्टक रोमविक्रिया–रोमोद्गमाश्चान्त्रैव । (**'पुलको** गजान्नपिण्डे रोमाञ्चे प्रस्तरान्तरे । असुराज्यां मणिदोषे चषके तालके कृमौ') । (**'कण्टकः** क्षुद्रवैरिणि । वेणौ द्रुमाङ्के रोमाञ्चे' । 'पुलकः पुनः । रोमाञ्चकण्टकौ रोमविक्रिया रोमहर्षणम् । **रोमोद्गम उद्धर्षणमुल्लासनकमित्यपि'** । इति हैमात्) । द्वे **'रोमाञ्चस्य'** ॥

क्रन्दितं रुदितं क्रुष्टम्

क्रन्दितमिति ॥ 'क्रदि रोदने' (भ्वा० प० से०) । क्तः (३।३।११४) **'अथ क्रन्दितमाह्वाने** रुदिते च नपुंसकम्' ॥ (१) ॥*॥ 'रुदिर् अश्रुविमोचने' (अ० प० से०) । भावे क्तः (३।३।११४) ॥ (२) ॥*॥ 'क्रुश रोदने' (भ्वा० प० से०) । क्तः (३।३।११४) । (**'क्रुष्टं** रोदनरावयोः' ॥ (३) ॥*॥ त्रीणि **'रोदनस्य'** ॥

जृम्भस्तु त्रिषु जृम्भणम् ॥ ३५ ॥

जृम्भ इति ॥ 'जृभि गात्रविनामे' (भ्वा० आ० से०) । घञ् (३।३।१८) 'गुरोश्च–' (३।३।१०३) इत्यः । **'जृम्भा** विकासजृम्भणयोस्त्रिषु' । घञन्तस्यैव क्लीबत्वमपि । 'लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः' इति वक्ष्यमाणत्वात् । यत्तु—जृम्भं तु, अज्झिधौ भयाधिपाठात्–इति मुकुटेनोक्तम् । तन्न । 'अज्झिधौ' इत्युक्तत्वेन क्लीबत्वस्याविधानात् ॥ (१) ॥*॥ ल्युटि (३।३।११५) जृम्भणम् ॥ (२) ॥*॥ द्वे **'मुखादिविकासस्य'** ॥

विप्रलम्भो विसंवादः

विप्रेति ॥ विशेषेण प्रलम्भनम् । 'डुलभष् प्राप्तौ' (भ्वा० आ० अ०) । विरुद्धं सम्यक् वदनम् । घञ् (३।३।१८) ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'अङ्गीकृतासंपादनस्य'** ॥

रिङ्गणं स्खलनं समे ।

रिङ्गणमिति ॥ 'रिगि गतौ' (भ्वा० प० से०) । 'स्खल संचलने' (भ्वा० प० से०) । भावे ल्युट् (३।३।११५) ॥ (१) ॥*॥ (२) ॥*॥ 'रिखि गतौ' (भ्वा० प० से०) इत्येके (तन्मते रिङ्खणम्) । द्वे **'धर्मादेश्चलनस्य'**—इति स्वामी, बालानां हस्तपादगमनस्य–इत्यन्ये, पिच्छिलादौ पतनस्य इत्यपरे ॥

स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ॥ ३६ ॥

स्यादिति ॥ निद्राणम् । 'द्रा कुत्सायां गतौ' (आ० प० अ०) । 'आतश्चोप–' (३।३।१०५) इत्यङ् । निन्दनम्, निन्द्यतेऽनया, इति वा । 'निन्देर्नलोपश्च' (उ० २।१७) इति रग्, इति वा ॥ (१) ॥*॥ 'शीङ् स्वप्ने' (अ० आ० से०) । भावे ल्युट् (३।३।११५) । **'शयनं** सुरते निद्राशय्ययोश्च नपुंसकम्' ॥ (२) ॥*॥ 'ष्वप् शये' (अ० प० अ०) । घञ् (३।३।१८) । **'स्वापः** शयननिद्रयोः । स्पर्शाज्ञतायामज्ञाने' ॥ (३) ॥*॥ 'स्वपो नन्' (३।३।९१) । **'स्वप्नः** स्वापे प्रसुप्तस्य विज्ञाने दर्शने पुमान्' ॥ (४) ॥*॥ संवेशनम् । 'विश प्रवेशने' (तु० प० अ०) । घञ् (३।३।१८) । **'संवेशः** स्वापस्त्रीरतबन्धयोः' ॥ (५) ॥*॥ 'सुप्तिः' अप्यत्र । (**'सुप्तिः** स्पर्शाज्ञतानिद्राविश्रम्भे शयने स्त्रियाम्' इति मेदिनीतः) ॥*॥ पञ्च **'निद्रायाः'** ॥

तन्द्री प्रमीला

तन्द्रीति ॥ तत्पूर्वाद्गातेः 'स्फुहिगृहि–' (३।२।१५८) इत्यादिना 'तन्द्रा' इति निपात्यते । तन्द्रायाः करणम् । 'तत्करोति–' (वा० ३।१।२६) इति ण्यन्ताद् 'अच इः' (उ० ४।१३९) । **तन्द्रिः** । 'कृदिकारात्–' (ग० ४।१।४५) इति ङीष् वा । **'तन्द्री** निद्राप्रमीलयोः' । णिजभावे **'तन्द्रा'** इत्यपि । मुकुटस्तु—इन्द्रियाणां तननं द्रात्यस्याम् । तन्द्रधातोः सौत्रान्मूर्च्छार्थात् 'तन्द्रेरिवीतौ' इति ह्वेकार-

प्रत्यये तन्द्रिः । ङीषि तन्द्री । दीर्घैकारप्रत्यये लक्ष्मीशब्दवच्च–इत्याह । तन्न । द्रातिना विगृह्य सौत्रधातोरुपन्यासस्य विरुद्धत्वात् । 'तॅन्द्रो नान्तत्वनिपातनाभ्युपगमविरोधात्' । 'तन्द्रेरिदीतौ' इति सूत्रस्यादर्शनाच्च । ईप्रत्ययविधायकाभावाच्च । (यदपि) 'तॅन्द्रिस्तन्द्री तन्द्रीस्तन्द्रा' इति रूपचतुष्टयम् । इत्युक्तम् । तदपि न । दीर्घविसर्गान्ते प्रमाणाभावात् ॥ (१) ॥*॥ प्रमीलनम् । 'मील निमेषणे' (भ्वा० प० से०) 'गुरोश्च' (३।३।१०३) इत्यः ॥ (२) ॥*॥ द्वे **'अत्यन्तश्रमादिना सर्वेन्द्रियासामर्थ्यस्य'** ॥

भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियाम् ।

भ्रकुटिरिति ॥ 'कुट कौटिल्ये' (तु० प० से०) । 'इगुपधात्कित्' (उ० ४।१२०) इतीन् । 'भ्रुवोः कुटिः, भ्रकुंसवत्रैरूप्यम् । 'पृषोदरादित्वाड्डकारे **भृकुटी**' इत्यपि ॥ (३) ॥*॥ त्रीणि **'क्रोधादिना ललाटसंकोचनस्य'** ॥

अदृष्टिः स्यादसौम्येऽक्षिणि

अदृष्टिरिति ॥ विरुद्धा दृष्टिः ॥ (१) ॥*॥ असौम्येऽसुन्दरे ॥ एकं **'क्रूराया दृष्टेः'** ॥

संसिद्धिप्रकृती त्विमे ॥ ३७ ॥

स्वरूपं च स्वभावश्च निसर्गश्च

संसिद्धीति ॥ संसेधनम् । 'षिध संराद्धौ' (दि० प० अ०) । क्तिन् (३।३।९४) । (**'संसिद्धिः** प्रकृतौ सिद्धौ मदोग्रायामपि स्त्रियाम्') ॥ (१) ॥*॥ प्रकरणम् । 'डुकृञ्' (त० उ० अ०) । क्तिन् (३।३।९४) ॥ (२) ॥*॥ इमे इति द्वयोः स्त्रीत्वबोधनार्थमुक्तम् । स्वं रूपम् ॥ (३) ॥*॥ स्वो भावः ॥ (४) ॥*॥ विसर्जनम् । 'सृज विसर्गे' (तु० प० अ०) । घञ् (३।३।१८) । **'निसर्गः** सृष्टौ स्वभावे च' इति हैमः ॥ (५) ॥*॥ पञ्च **'स्वभावस्य'** ॥

अथ वेपथुः ।

कम्पः

अथेति ॥ वेपनम् । 'टुवेपृ कम्पने' (भ्वा० आ० से०) । 'ट्वितोऽथुच्' (३।३।८९) ॥ (१) ॥*॥ 'कपि किंचिच्चिलने' (भ्वा० आ० से०) । घञ् (३।३।१८) ॥ (२) ॥*॥ द्वे **'कम्पस्य'** ॥

अथ क्षण उद्धर्षो मह उद्धव उत्सवः ॥ ३८ ॥

अथेति ॥ क्षणोति दुःखम् । 'क्षणु हिंसायाम्' (त० उ० से०) । पचाद्यच् (३।१।१३४) । (**'क्षणः** कालविशेषे स्यात्पर्वण्यवसरे महे । व्यापारविकलत्वे च परतन्त्रत्वमध्ययोः' इति हैमः ॥ (१) ॥*॥ उद्धर्षयति । 'हृषु अलीके' (भ्वा० प० से०) णिजन्तः । अच् (३।१।१३४) । उद्गतो हर्षोऽत्रेति वा ॥ (२) ॥*॥ महनम् 'मह पूजायाम्' (भ्वा० प० से०) घञ् (३।३।१८) । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । घः (३।३।११८) वा । यद्वा महति । अच् (३।१।१३४) । **'मही** नद्यन्तरे भूमौ **मह** उद्ध(त्स)वतेजसोः' । (यत्तु) मह्यते–नेन । 'पुंसि–' (३।३।११८) इति घः–इति मुकुटः । तन्न । 'हलश्च'–(३।३।१२९) इति घञ्प्रसङ्गात् ॥ (३) ॥*॥ उद्धुनोति । दुःखम् । 'धूञ् कम्पने' (स्वा० उ० अ०) । अच् (३।१।१३४) । **'उद्धवो** यादवभिदि महे च क्रतुपावके' ॥ (४) ॥*॥ उत्सुवति । 'षू प्रेरणे' (तु० प० से०) । अच् (३।१।१३४) । **'उत्सवो** मह उत्सेके इच्छाप्रसरकोपयोः' ॥ (५) ॥*॥ पञ्च **'उत्सवस्य'** ॥

इति स्वर्गवर्गः ॥

इतीति ॥ स्वर्गप्रधानो वर्गः । एतत्पर्यन्तं स्वर्गसंगतार्थनिरूपणात् ॥

इति नाट्यवर्गविवरणम् ॥

अधोभुवनपातालबलिसद्मरसातलम् ।
नागलोकः

अध इति ॥ अधश्च तद्भुवनं च ॥*॥ 'अधः अपि' । **'अधोऽव्ययं स्यात्पाताले'** इति त्रिकाण्डशेषात् ॥ (१) ॥*॥ पतन्त्यत्र पापात् । 'पतिचण्डिभ्यामालच्' (उ० १।११७) । **'पातालं** वडवानले । रसातले च' इति हैमः ॥ (२) ॥*॥ बलेः सद्म ॥ (३) ॥*॥ रसायास्तलमधः ॥ (४) ॥*॥ नागानां लोकः ॥ (५) ॥*॥ **अधोलोक-फणिभुवनादयः** अप्यत्र ॥*॥ पञ्च **'पातालस्य'** ॥

अथ कुहरं शुषिरं विवरं बिलम् ॥ १ ॥

छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिः ।

अथेति ॥ कुं हरति । 'हरतेरनुद्यमनेऽच्' (३।२।९) । यद्वा 'कुह विस्मापने' (चु० आ० से०) । इगुपधत्वात् (३।१।१३५) कः । कुहं राति । 'रा दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । **'कुहरं** गह्वरे च्छिद्रे क्लीबं नागान्तरे पुमान्' ॥ (१) ॥*॥ शोषणम् । 'शुष शोषणे' (दि० प० अ०) । 'इगुपधात्कित्' (उ० ४।१२०) । शुषिरस्यास्ति । 'ऊषशुषि–' (५।२।१०७) इति रः । **'शुषिरं** वंशादिवाद्ये विवरेऽपि नपुंसकम् । शुषिरो न स्त्रियां गर्ते वह्नौ रन्ध्रान्विते त्रिषु' ॥ (२) ॥*॥ विवृणोति । 'वृञ् वरणे' (स्वा० उ० से०) । पचाद्यच् (३।१।१३४) । यद्वा विवि-

---

१—तदो नान्तत्वनिपातनाभ्युपगमपाठो मुकुटपुस्तकत्रये तु नोपलभ्यते ॥ २—एतत्स्थाने–'तन्द्रिस्तन्द्रीस्तन्द्रा' इति द्विरूपकोशाच्च–इति लिखितमासीत् । परंतु मुकुटपुस्तकत्रयदृष्टं मया लिखितम् ॥

१—मूषिकै ना स्त्रियां नाल्पौषधौ, मूषिकै नास्त्रियां वर्गे, इत्येवं पाठो मूलमेदिन्यां दृश्यते ॥

यते । 'गृहबृदृनिश्चिगमश्च' (३।३।५८) इत्यप् । विगतो वरोऽस्माद्वा । वीनां पक्षिणां वरं वा । **'विवरं** दूषणे गर्ते' ॥ (३) ॥*॥ विलति भिनत्ति । 'विल भेदने' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । विल्यते वा । 'कृत्यल्युटो बहुलम्' (३।३।११३) सूत्रे 'कृल्युटः' इति (वार्तिकेन) इति 'इगुपध–' (३।३।१३५) इति कः । घञर्थे कः (वा० ३।३।५८) वा । 'खनो घ च' (३।३।१२५) इति घे सैज्ञापूर्वकत्वाद्गुणाभावो वा । **'बिलं** छिद्रे गुहायां च पुमानुचैःश्रवोहये' ॥ (४) ॥*॥ छिद्यते । 'छिद्र भेदने' (चु० उ० से०) । घञ् (३।३।१८) यद्वा छिद्यते 'छिदिर् द्वैधीकरणे' (रु० उ० अ०) । 'स्फायि–' (उ० २।१३) इति रक् । **'छिद्रं विवररन्ध्रवत्** । गर्ते दोषे' इति हैमः ॥ (५) ॥*॥ 'व्यथ भयचलनयोः' (भ्वा० आ० से०) । भावे ल्युट् (३।३।११५) । निश्चयेन व्यथनं भयं चलनं वा यत्र । यत्तु—अधिकरणे ल्युट् (३।३।११६)-इति मुकुट आह । तन्न । व्यथनमिति भावप्रत्यये बहुव्रीहिणा गतार्थत्वात् ॥ (६) ॥*॥ रोचतेऽत्र । 'रुच दीप्तौ' (भ्वा० आ० से०) 'हलश्च' (३।३।१२१) इति घञ् । निष्ठायां सेट्त्वान्नयङ्क्वादित्वात् (७।३।५३) कुत्वम् । यत्तु मुकुटः—रोचते प्रकाशते । घः (३।३।११८)—इत्याह । तन्न । कर्तरि घस्याविधानात् । **'रोकं** क्रयणभेदे ना वि (वरे)थाविले चले । **रोकोऽशौ'** इति हेमचन्द्रः ॥ (७) ॥*॥ रमणम् । संपदादि (३।३।१०८) । संज्ञापूर्वकत्वान्न दीर्घः । रमं क्रीडां धरति । मूलविभुजादिः (वा० ३।२।५) । रन्धयति । 'रध हिंसासंराद्ध्योः' (दि० प० से०) । बाहुलकाद्रक् वा । **'रन्ध्रं** तु दूषणे च्छिद्रे' इति विश्वमेदिन्यौ ॥ (८) ॥*॥ श्वभ्रयति । 'श्वभ्र गतौ' (चु० प० से०) व्यन्तात्पचाद्यच् । शु शोभनमभ्रं व्योमात्र वा । तालव्यादि ॥ (९) ॥*॥ उप्यतेऽत्र । **'डुवप्'** (भ्वा० उ० अ०) । भिदादिः (३।३।१०४) । **('वपा** विवरमेदसोः') ॥ (१०) ॥*॥ शुष्यत्यत्र । 'शुष शोषणे' (दि० प० अ०) । 'इगुपधात्कित्' (उ० ४।११०) । **'शुषिः** शोषे बिलेऽस्त्री स्यात्' इति मेदिनी ॥*॥ सुष्ठु स्यति । 'षोऽन्तकर्मणि' (दि० प० अ०) । बाहुलकात् किः । **(सुषिः)** । 'विवराभिधायिनि शुषिरादौ शास्त्रेषु दन्त्यतालव्यौ' इत्यूष्मविवेकः ॥ (११) ॥*॥ एकादश **'बिलस्य'** ॥

गर्तावटौ भुवि श्वभ्रे

गर्तेति ॥ गिरति 'गॄ निगरणे' (तु० प० से०) । 'हसिमृग–' (उ० ३।८६) इति तन् । स्त्रियां टाप् (४।१।५) 'शरट–कृसर–गर्त–यज्ञाः' इति स्त्रीपुंसप्रकरणे रभसात् । 'गर्तोऽवटे कुकुन्दरे । त्रिगर्ताशे' इति हैमः ॥ (१) ॥*॥ अवन्त्यस्मात् । 'अव रक्षणादौ' (भ्वा० प० से०) । 'शकादिभ्योऽटन्' (उ० ४।८१) । इदन्तोऽपि । **'दर्भेऽपि** पवित्रमवटिरवटेऽपि' इति हलायुधः । **'अवटः** कूपबिलयोर्गर्ते कुहकजीविनि' इति हैमः ॥ (२) ॥*॥ द्वे **'रन्ध्रमात्रस्य'** ॥

सरन्ध्रे शुषिरं त्रिषु ॥ २ ॥

सरन्ध्र इति ॥ शुषिरस्यास्ति 'ऊषशुषि–' (५।२।१०७) इति रः ॥ (१) ॥*॥ एकम् **'भूरन्ध्रस्य'** ॥

अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः ।

अन्धेति ॥ 'अन्ध दृष्ट्युपघाते' (चु० उ० से०) चुरादिः । अन्धनम् घञ् (३।३।१८) । अन्धं करोति । 'कर्मण्यण्' (३।२।१) ॥ (१) ॥*॥ ध्वन्यते । 'ध्वन शब्दे' (भ्वा० प० वे०) । 'क्षुब्धस्वान्त–' (७।२।१८) इति निपातितम् ॥ (२) ॥*॥ तमोऽस्त्यत्र । भावप्रधानो निर्देशः । 'ज्योत्स्नातमिस्रा–' (५।२।११४) इति साधु ॥*॥ तमिस्रास्त्याश्रयत्वेनास्येति वा (अर्शआद्यच्) (५।२।१२७) । **'तमिस्रं** तिमिरे कोपे, **तमिस्रा** तु तमस्ततौ । कृष्णपक्षनिशायां च' इति विश्वमेदिन्यौ ॥ (३) ॥*॥ तिम्यति । 'तिम आर्द्रीभावे' (दि० प० से०) । किरच् (बाहुलकात्) । **'तिमिरं** ध्वान्ते नेत्रामयान्तरे' ॥ (४) ॥*॥ ताम्यत्यनेन । 'तमु ग्लानौ' (दि० प० से०) । असुन् (४।१८९) । (**'तमो** ध्वान्ते गुणे शोके क्लीबं, वा ना विधुंतुदे') इति मेदिनी ॥*॥ (उ० ३।११७ असच्चि) तमसमपि । **'तमस्** तु निशाचर्मे' इति त्रिकाण्डशेषात् । (स्त्रियां तु तमसा नदीविशेषे) ॥ (५) ॥*॥ पञ्च **'अन्धकारस्य'** ॥

ध्वान्ते गाढेऽन्धतमसम्

ध्वान्त इति ॥ अन्धयति । अन्धं च तत्तमश्च । 'अवसमन्धेभ्यस्तमसः' (५।४।७९) इत्यच् ॥ (१) ॥*॥ एकं **'घनान्धकारस्य'** ॥

क्षीणेऽवतमसम्

क्षीण इति ॥ क्षीणे तु ध्वान्ते । अव हीनं तमः अच् (५।४।७९) ॥ (१) ॥*॥ एकम् **'क्षीणतमसः'** ॥

तमः ॥ ३ ॥

विष्वक् संतमसम्

तम इति ॥ विष्वक् सर्वतः तमः समन्तात्तमः । अच् (५।४।७९) ॥ (१) ॥*॥ एकम् **'व्यापकतमसः'** ॥

नागाः काद्रवेयाः

नागा इति ॥ नगे भवाः । 'तत्र भवः' (४।३।५३) इत्यण् । यद्वा—न गच्छन्ति । अगाः । न अगाः । **'सुप्सुपा**

१—'विवराभिधायिनि–' इत्यूष्मविवेकतो वन्त्यादित्वे तु 'सुष्ठु अभ्रम्' इति विग्रहः इति पञ्जिकाशयः—इति मुकुटपीयूषबुधमनोहराशयः ॥

१—कुहकमिन्द्रजालम् ॥

(२।१।४) इति समासः । अनञ्त्वान्न नलोपः । ('नागो-मतङ्गजे सर्पे पुंनागे नागकेसरे । क्रूराचारे नागदन्ते मुस्तके वारिदेऽपि च ॥ देहानिलविशेषे च श्रेष्ठे स्यादुत्तरस्थितः । **नागं** रङ्गे सीसपत्रे स्त्रीबन्धे कारणान्तरे' इति हैमः ॥ (१) ॥*॥ कद्वा अपत्यानि । 'स्त्रीभ्यो ढक्' (४।१।१२०) 'ढे लोपोऽकद्वाः' (६।४।१४७) इति टिलोपाभावे 'ओर्गुणः' (६।४।१४६) । यत्तु-स्वामी-शुभ्रादित्वात् (४।१।१२३) ढक् । न तु 'स्त्रीभ्यो ढक्' । कद्रुकमण्डल्वोश्छन्दस्यूङ्निषेधः-इत्याह । तन्न । 'संज्ञायाम्' (४।१।७२) इति लोकेऽप्यूङ्विधानात् ॥ (२) ॥*॥ सर्पेभ्योऽन्ये देवयोनयोऽमी द्वे **'फणालाङ्गलवतो नराकारसर्पस्य'** ॥

तदीश्वरः ।

शेषोऽनन्तः

तदीति ॥ तेषामीश्वरः । शिष्यते । 'शिष्लृ विशेषणे' (रुं० प० अ०) घञ् (३।३।१८) । **'शेषोऽनन्ते वधे सीरिण्युपयुक्तेतरेऽपि च । शेषा निर्माल्यदाने स्यात्'** इति हैमः ॥ (१) ॥*॥ न अन्तोऽस्य । **'अनन्तः** केशवे शेषे पुमान्, निरवधौ त्रिषु' ॥ (२) ॥*॥ द्वे **'नागानां स्वामिनः'** ॥

वासुकिस्तु सर्पराजः

वासुकिरिति ॥ वसु रत्नं के मूर्ध्नि यस्य । वसु कायति वा । 'कै शब्दे' (भ्वा० प० अ०) । कः (३।२।३) । वसुकः । तस्यापत्यम् । 'अत इञ्' (४।१।९५) ॥ (१) ॥*॥ सर्पाणां राजा । 'राजा-' (५।४।९१) इति टच् ॥ (२) ॥*॥ द्वे[१] **'नागराजस्य'** ॥

अथ गोनसे ॥ ४ ॥

तिलित्सः स्यात्

अथेति ॥ गोरिव नासिका यस्य । 'अञ्नासिकायाः' (५।४।११८) इत्यच्, नसादेशः ॥*॥ गोनासोऽप्यत्र । **'गोनास**गोनसौ' इति त्रिकाण्डशेषात् ॥ (१) ॥*॥ तेलति 'तिल गतौ' (प० से०) भ्वादिः । तिलति । 'तिल स्नेहने' (प० से०) तुदादिः । 'तिल इदुक् च' इति स इदुगागमश्च—इति मुकुटः । तन्न । उज्ज्वलदत्तादिषूक्तसूत्राभावात् तेलनम् । तिल् । संपदादिक्विप् (वा० ३।३।१०८) तिलमेति । 'इण् गतौ' (अ० प० अ०) क्विप् (३।२।१७८) । तुक् (६।१।७१) । तिलित् । तिलितं स्यति । 'षोऽन्तकर्मणि' (दि० प० अ०) । कः (३।२।३) यद्वा तेलनम् । तिलिः । कृष्यादित्वात् (वा० ३।३।१०८) इक् । तिलिं गतिं त्सरति । 'त्सर छद्मगतौ' (भ्वा० प० से०) । 'अन्येभ्योऽपि' (वा० ३।२।१०२) । इति डः ॥ (२) ॥*॥ 'गोनसी **मण्डली वोडः**' इति तु विक्रमादित्यः ॥ द्वे **'सर्पविशेषस्य'** ॥

अजगरे शयुर्वाहस इत्युभौ ।

अजेति ॥ गिरति । 'गॄ निगरणे' (तु० प० से०) । पचाद्यच् (३।१।१३४) । अजस्य गरः । अजो निल्यो गरो विषं यस्येति वा । यत्तु—अजं छागमपि गिरति । पचाद्यच्—इति मुकुटः । तन्न । कर्मण्यणः प्रसङ्गात् । **'अजगरः** स्मृतः सर्पभेदेऽपि कवचे बुधैः' ॥ (१) ॥*॥ शेते । 'शीङ् स्वप्ने' (अ० आ० से०) 'भृमृशी-' (उ० १।७) इत्युः ॥ (२) ॥*॥ वहति । 'वहियुभ्यां णित्' (उ० ३।११९) इत्यसच् । णित्वाद्वृद्धिः । वाहं गतिं स्यति-इति वा । 'आतोऽनुप-' (३।२।३) इति कः । **'वाहसोऽजगरे** वारिनिर्याणसुनिषण्णयोः' इति हैमः ॥ (३) ॥*॥ त्रीणि **'अजगरस्य'** ॥

अलगर्दो जलव्यालः

अलेति ॥ लगति 'लगे सङ्गे' (भ्वा० प० से०) । क्विप् (३।२।१७८) । अर्दयति । अच् (३।१।१३४) । लक् चासावर्दश्च । लग्नः सन् पीडक इत्यर्थः । निर्विषत्वात्तद्विन्नोऽलगर्दः । यद्वा—अलति । 'अल गत्यादौ' (भ्वा० प० से०) । गर्दति । 'गर्द शब्दे' (भ्वा० प० से०) । अच् (३।१।१३४) । अलश्चासौ गर्दश्च ॥*॥ **'अलगर्दः'** इति तु मुकुटः । अलं गृध्यति । 'गृधु अभिकाङ्क्षायाम्' (दि० प० से०) । पृषोदरादिः (६।३।१०९) पचाद्यच् (३।१।१३४) ॥ (१) ॥*॥ जलस्थो व्यालः ॥ (२) ॥*॥ द्वे **'जलव्यालस्य'** ॥

समौ राजिलडुण्डुभौ ॥ ५ ॥

समाविति ॥ राजी रेखास्यास्ति । सिध्मादित्वाल्लच् (५।२।९७) । यद्वा—राजिं लाति । 'ला दाने' (अ० प० अ०) । 'आतोऽनुप-' (३।२।३) इति कः ॥ (१) ॥*॥ 'डुण्डु' इत्यनुकरणशब्दः । तं भणति, तेन भाति, इति वा ॥ 'अन्येभ्योऽपि-' (वा० ३।२।१०२) इति डः । लण्ड्यते । 'ओ लडि उत्क्षेपणे' (चु० प० से०) । घञ् (३।३।१८) । डलयोरेकत्वम् । उभति । 'उभ पूरणे' (तु० प० से०) । 'इगुपध-' (३।१।१३५) इति कः । डुण्डुश्चासावुभश्च । पृषोदरादिः (६।३।१०९) । यत्तु—'डुडि तुडि निमज्जने' । घञ् (३।३।१८) । डुण्डेन भाति । 'आतोऽनुप-' (३।२।३) इति कः । 'कर्तृकरणे कृता-' (२।१।३२) इति समासः । पृषोदरादिः (६।३।१०९) । तवर्गतृतीयादिरपि । अत एव 'दो डो दो लश्च' इति नरसिंहः-इति मुकुटः । 'दण्ड भाषणे' । 'दण्डुभः' इत्येके-इति स्वामी । तन्न । 'उक्तधातूनामदर्शनात् । 'आतोऽनुप-' (३।२।३) इति कस्य कर्मण्युपपदे

१—इह यद्यपि शेषवासुक्योर्भेदः । तथापि गतानुगतिकतया कवयोऽभेदेन प्रयुञ्जते यथा 'स्वमिव भुजंगविशेषं व्युपधाय स्वपिति यो भुजंगविशेषम्' इति वृन्दावने । 'वलयायितशेषशायिनः सखितामादित पीतवाससः' इति नैषधे । इति मुकुटः ॥ २—'गोनासाय नियोजिता गदरजाः' इति राजशेखरः—इति मुकुटः ॥

विधानात् । परत्वादुपपदसमासस्य (२।२।१९) न्याय्यत्वाच्च ॥ (२) ॥*॥ द्वे **'निर्विषस्य द्विमुखस्य सर्पस्य'** ॥

मालुधानो मातुलाहिः

माल्विति ॥ मालुरोषधी । तत्र धानमस्य । **'मालुधान**श्चित्रसर्पे महापद्मे च दृश्यते' इत्युत्पलिनी । **'मालुधानो** मातुलाहौ **मालुधानी** लतान्तरे' इति विश्वः ॥ (१) ॥*॥ मां तुलयति । कः । मूलविभुजादिः (वा० ३।२।५) । मातुलश्चासावहिश्च ॥ (२) ॥*॥ द्वे **'चित्रसर्पस्य'** ॥

निर्मुक्तो मुक्तकञ्चुकः ।

निर्मुक्त इति ॥ अमोचि । मुक्तः–कञ्चुकः । नास्ति मुक्तोऽस्य । **'नि**र्निश्चयनिषेधयोः' । **निर्मुक्त**स्त्यक्तसङ्गे स्यान्मुक्तकञ्चुकभोगिनि' ॥ (१) ॥*॥ मुक्तः कञ्चुको येन ॥ (२) ॥*॥ द्वे **'मुक्तत्वचः सर्पस्य'** ॥

सर्पः पृदाकुर्भुजगो भुजंगोऽहिर्भुजंगमः ॥ ६ ॥
आशीविषो विषधरश्चक्री व्यालः सरीसृपः ।
कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी ॥ ७ ॥
दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः ।
उरगः पन्नगो भोगी जिह्मगः पवनाशनः ॥ ८ ॥

सर्प इति ॥ सर्पति । 'सृप्लृ गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) 'इगुपध–' (३।१।१३५) इति को वा । 'नोक्तमनित्यम्' इति गुणः । यद्वा सर्पणम् । भावे घञ् । सर्पः । सोऽस्यास्ति । अर्शआद्यच् । (५।२।१२७) स्त्रियां जातित्वान्ङीष् (४।१।६३) ॥ (१) ॥*॥ पर्दते । 'पर्द कुत्सिते शब्दे' (भ्वा० आ० से०) । 'पर्देर्नित्संप्रसारणमल्लोपश्च' (उ० ३।८०) इति काकुः प्रत्ययः । पिपर्ति स्वम् । 'पिपर्तेर्दाकुर्हस्वश्च' (*) इति वा । **'पृदाकु**र्वृश्चिके व्याघ्रे सर्पचित्रकयोः पुमान्' ॥ (२) ॥*॥ 'भुजो कौटिल्ये' (तु० प० अ०) इगुपधत्वात् (३।१।१३५) कः । भुजः सन् गच्छति । 'अन्येऽप्यत्रापि' (वा० ३।२।४८) इति डः ॥ (३) ॥*॥ 'भुजेन कौटिल्येन गच्छति' वा । 'गमेः सुपि' 'खच्च डिद्वा' (वा० ३।२।३८) इति खचि डित्त्वे टिलोपे भुजंगः । **भुजंगः** सर्पखिङ्गयोः' इति हैमः ॥ (४) ॥*॥ आहन्ति । 'आङि श्रिहनिभ्यां ह्रस्वश्च' (उ० ४।१३८) इतीन् डित् । **'अहि**र्वृत्रासुरे सर्पे पुंसि' ॥ (५) ॥*॥ खच्यडित्त्वे भुजंगमः ॥ (६) ॥*॥ 'आशीस्त्वालुगता दंष्ट्रा तया विद्धो न जीवति' । तत्र विषमस्य । पृषोदरादित्वात् (६।३।१०९) दीर्घसलोपौ । केचित्त्वीकारान्तमाशीशब्दमाहुः । 'आशीमिव कलामिन्दोः' इति राजशेखरः ॥ (७) ॥*॥ विषस्य धरः ॥ (८) ॥*॥ चक्रमस्यास्ति । 'अत इनिः' (५।२।११५) । **'चक्री** कोके कुलालेऽहौ वैकुण्ठे चक्रवर्तिनि' इति हैमः ॥ (९) ॥*॥ व्याडति । 'अड उद्यमे' (भ्वा० प० से०) व्याङ्पूर्वः । अच् (३।१।१३४) । (**'व्याडो** हिंस्रपशौ सर्पे') ॥*॥ डलयोरेकत्वस्मरणात् व्यालोऽपि । **'व्यालो** दुष्टगजे सर्पे खले श्वापदसिंहयोः' इति विश्वमेदिन्यौ ॥ (१०) ॥*॥ कुटिलं सर्पति । 'नित्यं कौटिल्ये गतौ' (३।१।२३) इति यङ् । पचाद्यच् (३।१।१३४) । 'यङोऽचि च' (२।४।७४) । 'संसार–सारस–सरीसृप-सस्य-सास्राः' इति द्विदन्त्ये ऊष्मविवेकः ॥ (११) ॥*॥ कुण्डलं कुण्डलाकारतास्यास्ति । इनिः (५।२।११५) । यत्तु मुकुटः—वयं तु कुण्डलमनुकरोतीति 'कुण्डलशब्दात् प्रातिपदिकाद्धात्वर्थणिजन्तात् घञर्थे के (वा० ३।३।५८) कुण्डलं कुण्डलनं कुण्डलानुकरणम् । तद्योगाद् 'इनिः' (५।२।११५) 'कुण्डली' इति ब्रूमहे–इत्याह । तन्न । परिगणनात् काभावात् । प्राचामेव फलितार्थस्य लाभात् । **'कुण्डली** वरुणे सर्पे मयूरे कुण्डलान्विते' ॥ (१२) ॥*॥ गूढाः पादा अस्य । पृषोदरादिः (६।३।१०९) 'पादानामपि विज्ञेये द्वे शते द्वे च विंशती' इत्यागमः । यद्वा गूढं पादयति । 'पद गतौ' (दि० आ० अ०) । ण्यन्तात् (३।१।२६) क्विप् (३।२।१७८) ॥ (१३) ॥*॥ चक्षुः श्रवः कर्णोऽस्य । सान्तः ॥*॥ अत एव 'गोकर्णः' अपि । (**'गोकर्णः** प्रमथान्तरे । अङ्गुष्ठानामिकोन्माने मृगेऽश्वतरसर्पयोः') ॥ (१४) ॥*॥ काकस्येवोदरमस्य । यद्वा––ईषदकति । 'अक कुटिलायां गतौ' (भ्वा० प० से०) । 'ईषदर्थे च' (६।३।१०५) कोः कादेशः काकम्–ईषत्कुटिलगतिमद्-उदरमस्य ॥ (१५) ॥*॥ फणास्यास्ति । व्रीह्यादिः (५।२।११६) फणोऽस्यास्ति वा । अत इनिः (५।२।१०५) ॥ (१६) ॥*॥ दर्व्याकारः फण एव करो यस्य प्रहारसाधनत्वात् । दर्वीं फणं करोति, इति वा । 'कृञो हेतु–' (३।२।२०) इति टः ॥ (१७) ॥*॥ दीर्घं पृष्ठमस्य ॥ (१८) ॥*॥ गर्हितं दशति । 'लुपसद–' (३।१।२४) इति यङ् । 'जपजभ–' (७।४।८४) इति नुक्कि अनुस्वारः (८।२।१२४) । 'यजजप–' (३।२।१६६) इत्यूकः । **'दन्दशूकस्तु** पुंलिङ्गो राक्षसे च सरीसृपे' ॥ (१९) ॥*॥ बिले शेते । 'अधिकरणे शेतेः' (३।२।१५) इत्यच् । 'शयवास–' (६।३।१८) इत्यलुक् । **'बिलेशयो** मूषिकेऽहौ' इति हैमः ॥ (२०) ॥*॥ उरसा गच्छति । 'उरसो लोपश्च' (वा० ३।२।४८) इति डः ॥ (२१) ॥*॥ पन्नं पतितं यथा तथा गच्छति । 'सर्वत्रपन्नयोः' (वा० ३।२।४८) इति डः । **'पन्नग**श्चौषधीभेदे तथैव पवनाशने' ॥ (२२) ॥*॥ भोगः फणो वक्रगतिर्वास्यास्ति । इनिः (५।२।११५) । **'भोगी** भुजंगभेऽपि स्याद्राममात्रे नृपे पुमान् । विहाय महिषीमन्यराजयोषिति **भोगिनी'** ॥ (२३) ॥*॥ जिह्मं कुटिलं गच्छति । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति

१—लक्ष्यं च । 'किं महोरगविसर्पिविक्रमो राजिलेषु गरुडः प्रवर्तते' इति स्वामी ॥ २—भाष्ये तु **'अन्येष्वपि'** इति दृश्यते ॥

१—अत्र तु कुण्डलं कर्णभूषायां पाशेऽपि बलयेऽपि च । काञ्चनद्रुगुडूच्योः स्त्री केवलः कुहनेऽपि च' इत्युपलभ्यते ॥ तत्तु न सर्पपर्यायबोधकम् ॥

ङः । 'जिह्मगोऽहौ च मन्दगे' इति विश्वः ॥ (२४) ॥*॥ पवनोऽशनं यस्य ॥ (२५) ॥*॥ पञ्चविंशतिः **'सर्पमात्रस्य'** ॥

त्रिष्वाहेयं विषास्थ्यादि

त्रिष्विति ॥ अहौ भवम् । 'इतिकुक्षि–' (४।३।५६) इति ढञ् स्त्रियां 'टिड्ढा–' (४।१।१५) इति ङीप् ॥ (१) ॥*॥ आदिना कञ्चुकादि ॥ एकम् **'सर्पविषास्थ्यादेः'** ॥

स्फटायां तु फणा द्वयोः ।

स्फटायामिति ॥ स्फटति । 'स्फट विकसने' (चु० प० से०) चौरादिकः । णिजभावे पचाद्यच् (३।१।१३४) ॥*॥ 'फटा' इति क्वचित्पाठः । पृषोदरादिः (६।३।१०९) (**'फटा** तु कितके फणे') ॥ (१) ॥*॥ फणति । 'फण गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (२) ॥*॥ **'द्वयोः'** इत्यनेन 'स्फटा' अपि संबध्यते—इति स्वामी ॥ द्वे **'फणायाः'** ॥

समौ कञ्चुकनिर्मोकौ

समाविति ॥ कञ्चते । 'कचि दीप्तिबन्धनयोः' (भ्वा० आ० से०) । बाहुलकादुकन् । **'कञ्चुको** वारवाणे स्यान्निर्मोके कवचेऽपि च । वर्धापकगृहीताङ्गस्थितवस्त्रे च चोलके । **कञ्चुक्यौषधिभेदे** च' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ निश्चयेन मुच्यते ॥ कर्मणि घञ् (३।३।१९) । **'निर्मोको** मोचने व्योम्नि संनाहे सर्पकञ्चुके' ॥ (२) ॥*॥ द्वे **'सर्पत्वचः'** ॥

क्ष्वेडस्तु गरलं विषम् ॥९॥

क्ष्वेड इति ॥ क्ष्वेडते मोहयति । अच् (३।१।१३४) । क्ष्विद्यन्त्यनेन वा । 'ञिक्ष्विदा स्नेहनमोचनयोः' । 'मोहनयोः' इत्येके (भ्वा० प० से०, दि० प०) । 'हलश्च' (३।३।१२१) इति घञ् । पृषोदरादिः (६।३।१०९) । **'क्ष्वेडो** ध्वनौ कर्णामये विषे । **क्ष्वेडा** वंशशलाकायां सिंहनादे च योषिति । लोहितार्कपर्णफले घोषपुष्पे नपुंसकम् । दुरासदे च कुटिले वाच्यलिङ्गः प्रकीर्तितः' ॥ (१) ॥*॥ गिरति जीवम् 'गॄ निगरणे' (तु० प० से०) । अच् (३।१।१३४) । गरं लाति । 'ला दाने' (अ० प० अ०) । कः (३।२।३) । भावपरत्वं, गरशब्दस्य । गिरतेर्बाहुलकादलच् वा । **'गरलं** पन्नगविषे तृणपूलकमानयोः' इति हैमः ॥ (२) ॥*॥ वेवेष्टि कायम् । 'विष्लृ व्याप्तौ' (जु० उ० अ०) 'विष विप्रयोगे' (क्र्या० प० से०) वा । 'इगुपध–' (३।१।१३५) इति कः । 'गरले **विषमम्मसि** च, स्त्रियामतिविषायाम्' इत्यूष्मविवेकान्मूर्धन्यान्तम् । 'पुंसि क्लीबे च' इति विशेषणापि संबध्यते–इति केचित् ॥ (३) ॥*॥ त्रीणि **'विषमात्रस्य'** ॥

पुंसि क्लीबे च काकोलकालकूटहलाहलाः ।
सौराष्ट्रिकः शौक्तिकेयो ब्रह्मपुत्रः प्रदीपनः ॥ १० ॥
दारदो वत्सनाभश्च विषभेदा अमी नव ।

पुंसीति ॥ ईषत् कोलति । 'कुल संस्त्याने' (भ्वा० प० से०) अच् (३।१।१३४) । 'ईषदर्थे च' (६।३।१०५) इति कोः कादेशः । **'काकोलो** नरकान्तरे, नाकुलाले द्रोणकाके, विषभेदे च न स्त्रियाम्' ॥ (१) ॥*॥ कालमपि कूटयति । 'कूट परिदाहे' (उ० से०) चुरादिः । 'कर्मण्यण्' (३।२।१) । कालस्य कर्मणो मृत्योर्वा कूटो राशिरिव–इति वा ॥ (१) ॥*॥ हलति जठरम् 'हल विलेखने' (भ्वा० प० से०) । न हलति आहलति वा अच् (३।१।१३४) । अहलम्—आहलम्, वा । ततः कर्मधारयः । हाला इव, हलतीति वा । हलमिव हलति । अच् (३।१।१३४) प्रज्ञाद्यण् (५।३।३८) । **'हालाहलं हालहलं** वदन्त्यपि **हलाहलम्**' इति द्विरूपकोषः । 'गोनासगोनसौ, हालाहलं हालहलं विषम्' इति त्रिकाण्डशेषः । **'हलाहलस्तु** हयलालोरगे विषे । ज्येष्ठ्यां च' इति हैमः ॥ (१) ॥ एते त्रयः क्लीबपुंसोः ॥*॥ सौराष्ट्रे देशभेदे भवः । अध्यात्मादित्वात् (वा० ४।३।६०) ठञ् । **'सारोष्ट्रिकः'** इति पाठः–इति मुकुटः । सुराष्ट्रे भव इति तु स्वामी ॥ (१) ॥*॥ शुक्तिके देशे भवः । 'इतिकुक्षि–' (४।३।५६) इति योगविभागाद्ठञ् ॥ (१) ॥*॥ ब्रह्मणः पुत्रः । (**ब्रह्मपुत्रः** क्ष्वेडभेदे नदभेदे च पुंस्ययम्) ॥ (१) ॥*॥ प्रदीपयति णिच् (३।१।२६) नन्द्यादिल्युः (३।१।१३४) ॥ (१) ॥*॥ ददि देशे भवः । **'दारदो** विषभेदे स्यात्पारदे हिङ्गुले पुमान्' ॥ (१) ॥*॥ वत्सान् नभ्नाति । 'णभ हिंसायाम्' (क्र्या० प० से०) । 'कर्मण्यण्' (३।२।१) वत्सस्य नाभिरिव नाभिरस्येति वा । अच् प्रत्यन्वपूर्वात्– (५।४।७) इति योगविभागादच् ॥ (१) ॥*॥ **'स्थावरविषभेदानां'** प्रत्येकम् ॥

विषवैद्यो जाङ्गुलिकः

विषेति ॥ विद्यामधीते वेत्ति वा । 'तदधीते तद्वेद' (४।२।५९) इत्यण् । विषस्य वैद्यः ॥ (१) ॥*॥ जाङ्गुलीं विषविद्यामधीते वेद वा । वसन्तादित्वात् (४।२।६३) ठक् । 'परीक्षितं समक्षीयाज्जाङ्गुलीभिर्भिषग्वृतः ॥' जाङ्गुल्या दीव्यतीति वा । 'तेन दीव्यति' (४।४।२) इति ठक् ॥ (२) ॥*॥ द्वे **'गारुडिकस्य'** ॥

व्यालग्राह्याहितुण्डिकः ॥ ११ ॥

व्यालेति ॥ व्यालं गृह्णाति । 'नन्दिग्रहि–' (३।१।१३४) इति णिनिः ॥ (१) ॥*॥ अहेस्तुण्डं मुखम् । तेन दीव्यति ।

१—'द्वयोर्वर्तमानायां स्फटायां फणापि द्वयोः' इति केचित् । नैषा ग्रन्थकृद्रीतिः—इति पीयूषम् ॥

१—यथा 'स्निग्धं भवत्यमृततुल्यमहो कलत्रं हालाहलं विषमिवाप्रगुणं तदेव' यथा 'काममपायि मयेन्द्रियकुण्डैर्यदपि दुष्कृतहालहलौघः' यथा वा 'मधु तिष्ठति वाचि योषितां हृदये हालहलं महाविषम्' इति स्वामी । 'कस्य सह्यो हलाहलः' इत्यनेकार्थकैरवाकरकौमुदी ॥ २—गोनासगोनसौ श्लोकार्धपतिततत्वेनोक्तौ न प्रकृतोपयुक्तौ ॥ ३—'त्वं विष ब्रह्मणः पुत्रः सत्ये धर्मे व्यवस्थितः' इति याज्ञवल्क्योक्तेः–इतिस्वामिमुकुटबुधमनोहराः ॥

ठक् (४।४।२) । संज्ञापूर्वकत्वाद्वृद्ध्यभावे 'अहितुण्डिकः' अपि । 'व्यालग्राहोऽहितुण्डिकः' इत्यमरमाला ॥ (२) ॥*॥ द्वे **'सर्पग्राहिणः'** ॥

॥ इति पाताल-भोगिवर्गविवरणम् ॥

स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम् ।

स्यादिति ॥ नरति, नृणाति वा, । 'नृ नये' (भ्वा०, क्र्या० प० से०) । 'कृवापाजिमिस्वदिसाध्यशूभ्य उण्' (उ० १।१) । 'नरकः पुंसि निरयदेवारातिप्रभेदयोः' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ प्रज्ञाद्यणि (५।४।३८) नारकः । यत्तु—'अन्येषामपि–' (६।३।१३७) इति दीर्घत्वम्–इति स्वामिमुकुटौ । तन्न । अणि वृद्धिसंभवात् । उत्तरपदपरत्वाभावाच्च । यदपि—नराः कायन्त्यत्र । मूलविभुजादित्वात् (वा० ३।२।५) के नरकः,—इति तु स्वामी-इति मुकुटः । तन्न । अधिकरणे उक्तवार्तिकाप्रवृत्तेः । 'कर्तरि कृत्' (३।४।६७) इति बाधात् ॥ (१) ॥*॥ निर्गतोऽयात् ॥ (३) ॥*॥ दुष्टा गतिः । **'दुर्गतिः।** नरके निःखतायां च' इति हैमः ॥ (४) ॥*॥ चत्वारि **'नरकस्य'** ॥

तद्भेदास्तपनावीचिमहारौरवरौरवाः ॥ १ ॥

संहारः कालसूत्रं चेत्याद्याः

तदिति ॥ तस्य नरकस्य भेदाः । तपति । ल्युः (३।१।१३४) । **'तपनोऽरुष्करेऽपि स्याद्भास्करे निरयान्तरे'** ॥ (१) ॥*॥ **'वीचिः** स्वल्पतरङ्गे स्यादवकाशे सुखेऽपि च' इति विश्वः । नास्ति वीचिः सुखमत्र । **'[1]अवीचिस्त्वन्तरङ्गे** नरकान्तरे' इति हैमः ॥ (१) ॥*॥ रुरुर्नाम प्राणी (मृग)-विशेषः । तस्यायम् । 'तस्येदम्' (४।३।१२०) इत्यण् । महतो रुरोरयम् ॥ (१) ॥*॥ **'रौरवो** नरके घोरे' इति [2]मेदिनी ॥ (१) ॥*॥ हरणं हारः । घञ् (३।३।१८) । सम्यग् हारोऽत्र ॥*॥ सम्यग् घातोऽत्र (**'संघातः** पुंसि घाते च संहतौ नरकान्तरे' इति मेदिनी) । इत्येके ॥ (१) ॥*॥ कालान्ययोमयानि सूत्राण्यत्र ॥ (१) ॥*॥ आद्यशब्देन तामिस्रान्धतामिस्रासिपत्रवनादयः । **'नरकभेदानां'** पृथक् पृथक् ॥

१—अत्र तु 'दारिद्र्ये नरके चापि' इति लिखितमासीत् । परंतु हैमे नोपलभ्यते ॥ २—अतरङ्गे कल्लोलरहिते यथा 'अवीचिर्निर्वाते सरससरसीवेयमबला' इत्यादौ वाच्यलिङ्गः ॥ इत्यनेकार्थकैरवाकरकौमुदी ॥ नरके तु तपनसाहचर्यात्पुंलिङ्गः 'अवीचिं गाहन्ते हुतवहशिखापूरितमपि' इति शिल्पलेखः इति—सर्वधरः स्वामी पञ्चिका च—इति मुकुटः ॥ ३—हैमे तु 'भीषणे नरकान्तरे' इत्युपलभ्यते ॥

सत्त्वास्तु नारकाः ।

प्रेताः

सत्त्वा इति ॥ नरकस्थाः सत्त्वाः जन्तवः । नरके भवाः । 'तत्र भवः' (४।३।५३) इत्यण् । प्रागुः 'इण् गतौ' (अ० प० अ०) । 'गत्यर्था–' (३।४।७२) इति क्तः । **'प्रेतो** भूतान्तरे पुंसि मृते स्याद्वाच्यलिङ्गकः' ॥ (१) ॥*॥ [1]द्वे **'नरकस्थप्राणिनाम्'** ॥

वैतरणी सिन्धुः

वैतेति ॥ नारकी नदी । विगतस्तरणिर्यत्र तत्र भवा । अण् (४।३।५३) । विगता तरणिर्नौर्यत्र वा प्रज्ञाद्यण् (५।४।३८) । वितरणेन दानेन लक्ष्यते इति वा । 'शेषे' (४।२।९२) इत्यण् । 'नारका जन्तवः प्रेता नदी वैतरणी स्मृता' इति त्रिकाण्डशेषः । **'वैतरणी** नद्यां प्रेतानां, यातुमातरि' ॥ (१) ॥*॥ एकम् **'वैतरण्याः'** ॥

स्यादलक्ष्मीस्तु निर्ऋतिः ॥ २ ॥

स्यादिति ॥ लक्ष्मीविरुद्धा ॥ (१) ॥*॥ नियता ऋतिर्घृणा यस्याः । **'ऋतिर्**गतौ घृणायां च स्पर्धायां च शुभेऽपि च' इति रभसः । निर्गता ऋतेः शुभात्–इति वा । **'[2]निर्ऋतिः** स्यादलक्ष्म्यां स्त्री, दिशां पालान्तरे पुमान्' ॥ (२) ॥*॥ द्वे **'नारकीयाया अलक्ष्म्याः'** ॥

विष्टिराजूः

विष्टिरिति ॥ विशति क्लेशम् । 'विश प्रवेशने' (तु० प० अ०) । क्तिच् (३।३।१७४) । यद्वा विष्णाति । 'विष विप्रयोगे' (क्र्या० प० से०) । 'क्तिच्क्तौ च–' (३।३।१७४) इति क्तिच् । यद्वा विष्यते । कर्मणि क्तिन् (३।३।९४) । यत्तु—वेतनेन विमुच्यतेऽनेन । 'विल्ल विप्रयोगे' करणे क्तिन्–इति मुकुटो व्याख्यत् । तन्न । विग्रहादिप्रदर्शनस्य परस्परविरुद्धत्वात् । ल्युटा क्तिनो बाधप्रसङ्गाच्च । **'विष्टिः** कर्मकरे मूल्ये भद्राजूप्रेषणेषु च' इति हैमः ॥ (१) ॥*॥ आजवते । 'जू गतौ' (भ्वा० आ० अ०) । 'क्विब्वचिप्रच्छि–' (वा–३।२।१७८) इति क्विब्दीर्घौ । आ अज्यते वा । 'आजूर्वेतनयोर्विष्टिः कर्मकृत्कर्मणोरपि' इति शाश्वतः–इति स्वामी । यत्तु—आजू रेफान्तापि, इति पञ्चिका स्वामी च इति मुकुटः । तन्न । पूर्वप्रदर्शितस्वाम्युक्तविग्रहद्वयेनापि रेफान्तताया अलाभात् ॥ (२) ॥*॥ द्वे स्त्रियौ । द्वे निर्मूल्यक-

---

१—मुकुटोक्तम् 'एकम्' इत्येवोचितम् ॥ २—निरुपद्रवे च वाच्यलिङ्गो यथा 'निर्ऋतिर्धर्मकर्मठः' इति हैमानेकार्थकैरवाकरकौमुदी ॥ ३—विष्टिः कर्मकरे तु वाच्यलिङ्गो यथा 'विशन्तु विष्टयः सर्वे रुद्रा इव महौजसः' इत्यनेकार्थकैरवाकरकौमुदी ॥ ४—'हटादभृतिकः क्लेशो विष्टिराजूश्च कीर्त्यते' इति कोषान्तरादिति मुकुटबुधमनोहरे ॥

र्मकरणे इति मुकुटः, नरके हठात्प्रक्षेपस्येति स्वामी, **'भद्राख्यकरणस्य'** इत्यन्ये ॥

कारणा तु यातना तीव्रवेदना ।

कारणेति ॥ 'कॄ हिंसायाम्' (क्र्या० उ० से०) । 'यत निकारोपस्कारयोः' (चु० उ० से०) । आभ्यां णिच् (३।१।२६) । 'ण्यासश्रन्थ–' (३।३।१०७) इति युच् । **'कारणं** करणे हेतुवधयोश्च नपुंसकम् । स्त्री यातनायां च' ॥ (१) ॥*॥ (२) ॥*॥ 'विद वेदनाख्यानविवासेषु' (चु० आ० से०) । णिच् (३।१।२६) । युच् (३।३।१०७) । तीव्रा चासौ वेदना च ॥ (३) ॥*॥ त्रीणि **'तीव्रदुःखस्य'** ॥ नरकरुज इति स्वामी ॥

पीडाबाधाऽन्यथा दुःखमामनस्यं प्रसूतिजम् ॥ ३ ॥
स्यात्कष्टं कृच्छ्रमाभीलम्

पीडेति ॥ 'पीड अवगाहने' (प० से०) चौरादिकः । भिदाद्यङ् (३।३।१०४) । **'पीडा**र्तिमर्दनोत्तंसकृपासु सरलद्रुमे' इति हैमः ॥ (१) ॥*॥ 'बाधृ विलोडने' (भ्वा० आ० से०) । 'गुरोश्च–' (३।३।१०३) इत्यः । **'बाधा** दुःखे निषेधे च' इति मेदिनी ॥*॥ 'आबाधा' इति वा छेदः । **'आबाधा वेदना** दुःखम्' इति हलायुधः ॥ (२) ॥*॥ 'व्यथ भयसंचलनयोः' (भ्वा० आ० से०) 'घटादयः षितः' इति षित्त्वातिदेशाद्ङ् (३।३।१०४) ॥ (३) ॥*॥ दुष्टानि खान्यस्मिन् । यद्वा दुर्निन्दितं खनति । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । यद्वा दुःखयति । 'सुख दुःख तत्क्रियायाम्' (उ० से०) चुरादिः । पचाद्यच् (३।१।१४) ॥ (४) ॥*॥ मानसे साधु । 'तत्र साधुः' (४।४।९८) इति यत् । मानस्याद्भिन्नम् । 'प्रसूति**जममानस्यं** कृच्छ्रं कष्टं **कलाकलम्'** इति वाचस्पतिः ॥*॥ अमनसो भावः आमनस्यम् । ब्राह्मणादित्वात् (५।१।१२४) ष्यञ्–इति स्वामी (५) ॥*॥ प्रसूतेर्जातम् । 'पञ्चम्याम्–' (३।२।९८) इति डः ॥ (६) ॥*॥ द्वे वैमनस्यस्य इति स्वामी । षडपि मनःपीडार्थाः–इति सभ्याः । 'दुःखप्रसूतिजे क्लीबे पीडा बाधा च वेदना' इति माला । कषति । 'कष हिंसायाम्' (भ्वा० प० से०) । क्तः (३।३।१७४) । 'कृच्छ्रगहनयोः कषः' (७।२।२२) इतीडभावः । **'कष्टं** तु गहने कृच्छ्रे' ॥ (७) ॥*॥ कृन्तति । 'कृती छेदने' (तु० प० से०) । 'कृतेश्छः कू च' (उ० २।२१) इति रक् छश्च । **'कृच्छ्रं**[1] महसि । कष्टे सान्तपने' इति हैमः ॥ (८) ॥*॥ आ समन्ताद् भियं लाति । कः (३।२।३) । **'आभीलं** भीषणे कृच्छ्रेऽपि' इति हैमः ॥ (९) ॥*॥ त्रीणि **'शरीरपीडायाः'** ॥ नवापि **'दुःखस्य'** इत्येके ॥

१—अहसि पापे यथा 'कृत्वानि कृच्छ्राणि रविर्लुनातु' इत्यनेकार्थकैरवाकरकौमुदी ॥ इह त्वम्भसीति लिखितमासीत् ॥

त्रिष्वेषां भेद्यगामि यत् ॥

त्रिष्विति ॥ एषां मध्ये यद्भेद्यगामि द्रव्यगामि तत्त्रिषु । दुःखा सेवा । दुःखः सुतो निर्गुणः । सर्वं दुःखं विवेकिनः ॥

॥ इति नरकवर्गविवरणम् ॥

समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ।
उदन्वानुदधिः सिन्धुः सरस्वान्सागरोऽर्णवः ॥ १ ॥
रत्नाकरो जलनिधिर्यादःपतिरपांपतिः ।

समुद्र इति ॥ समुनत्ति । 'उन्दी क्लेदने' (रु० प० से०) । 'स्फायि–' (उ० २।१३) इति रक् । समीचीना उद्रा जलचरविशेषा यस्मिन्निति वा । सह मुद्रया मर्यादया वर्तते इति वा ॥ (१) ॥*॥ आपो धीयन्तेऽत्र । 'कर्मण्यधिकरणे च' (३।३।९३) इति धाञः किः । (**'अब्धिर्ना** सरसि वारिधौ') ॥ (२) ॥*॥ कुं पृथ्वीं पिपर्ति । 'पॄ पालनपूरणयोः' (जु० प० से०) । 'कर्मण्यण्' (३।२।१) । 'अन्येषामपि–' (६।३।१३७) इति दीर्घः । नञ्समासः (२।२।१८) यद्वा । **न** कूपमृच्छति । 'ऋ गतौ' (भ्वा० प० अ०) । अगाधत्वात् खनितुमशक्यः कुश्च उश्च क्वौ पिपर्ति । 'पॄ पालनपूरणयोः' (जु० प० से०) । 'कर्मण्यण्' (३।२।१) तद्भिन्नः । **('अकूपारः** कूर्मराजसमुद्रयोः') ॥ (३) ॥*॥ पारमावृणोति । 'वृञ् वरणे' (स्वा० उ० से०) । 'कर्मण्यण्' (३।२।१) । पारावारावस्य स्त इति वा । अर्शआद्यच् (५।२।१२७) । **'पारावारः** पयोराशौ **पारावारं** तटद्वये' ॥*॥ पारमपारमस्येति (**पारापारः**) पवर्गादिमध्यः–इति कश्चित् ॥ (४) ॥*॥ सरितां पतिः ॥ (५) ॥*॥ उदकानि सन्त्यत्र 'उदन्वानुदधौ च' (८।२।१३) 'इति मत्वन्तो निपातितः ॥' (६) ॥*॥ उदकानि धीयन्तेऽत्र । 'कर्मण्यधिकरणे च' (३।३।९३) इति किः । 'पेषंवासवाहनधिषु च' (६।३।५८) इत्युदः । 'उदकस्य–' (६।३।५७) इति वा ॥ (७) ॥*॥ स्यन्दन्ते आपोऽत्र । 'स्यन्दू प्रस्रवणे' (भ्वा० आ० से०) । **'स्यन्दे**ः संप्रसारणं धश्च' (उ० १।११) इत्युः । **'सिन्धुर्वं**मधुदेशाब्धिनदे ना, सरिति स्त्रियाम्' इति विश्वमेदिन्यौ ॥ (८) ॥*॥ **'सरो** नीरे तडागे च' इति रुद्रः । सरो नीरं गतिर्वास्यस्मिन् । मतुप् (५।२।९५) । 'तसौ मत्वर्थे' (१।४।१९) इति भत्वम् । **'सरस्वांस्तु** नदे वार्धौ ना, न्यवद्रसिके, स्त्रियाम् । वाणीस्त्रीरत्नवाग्देवीगोनदीषु नदीभिदि । मनुपत्न्यामपि' ॥ (९) ॥*॥ सगरस्य राज्ञोऽयम् । 'तस्येदम्' (४।३।१२०) इत्यण् । न गरो येनामृतेन मणिना वा सह तेन वा ॥ (१०)

१—एषां दुःखादीनाम्–इति स्वामी ॥ २—तथा च हरिप्रबोधे संदष्टयमकम्—'सतमाः सतमालतया पारापारास्तः सदारोदारः । लोकालोकानुकृतिः सह्यः स ह्रयमनभ्रकूटैः कूटैः' इति मुकुटबुधमनोहरे ॥

॥*॥ अर्णांसत्र सन्ति । 'अर्णसो लोपश्च' (५।२) इति वः सलोपश्च ॥ (११) ॥*॥ रत्नानामाकरः ॥ (१२) ॥*॥ जलानि धीयन्तेऽत्र । 'कर्मण्यधिकरणे च' (३।३।९३) इति किः । जलानां निधिरिति वा ॥ (१३) ॥*॥ यादसां जलजन्तूनां पतिः ॥ (१४) ॥*॥ अपां पतिः ॥ (१५) ॥*॥ पञ्चदश **'समुद्रस्य'** ॥

तस्य प्रभेदाः क्षीरोदो लवणोदस्तथापरे ॥ २ ॥

तस्येति ॥ क्षीरमुदकं यस्य । 'उत्तरपदस्य च' (वा० ६।३।५७) इत्युदः ॥ (१) ॥*॥ एवं लवणोदः, इक्षुरसोदः, सुरोदः, दधिमण्डोदः, खादूदः, घृतोदः ॥ **'समुद्रविशेषाणां'** पृथक्पृथगेकैकम् ॥

आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ।
पयः कीलालममृतं जीवनं भुवनं वनम् ॥ ३ ॥
कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ।
अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशंवरम् ॥ ४ ॥
मेघपुष्पं घनरसः

आप इति ॥ आप्नुवन्ति, आप्यन्ते वा । 'आपू व्याप्तौ' (स्वा० प० अ०) । 'आप्नोतेर्ह्रस्वश्च' (उ० २।५८) इति क्विप् ह्रस्वत्वं च ॥*॥ असुनि (उ० ४।२०८) आपः सौन्तं क्लीबं च । 'कबन्धमुदकमापोनीरवार्वारिनारम् । क्लीबमपि' इति संसारावर्तात् ॥ (१) ॥*॥ वारयति । वृञो ण्यन्तात् (३।१।२६) क्विप् (३।२।१७८) । वार् क्लीबंमुक्तसंसारावर्तात् ॥ (२) ॥*॥ 'वसिवपि–' (उ० ४।१२५) इतीञि वारि च । (**'वारि** ह्रीबेरनीरयोः । **वारिर्घट्यां** सरस्त्यां गजबन्धनभुव्यपि') ॥ (३) ॥*॥ सलति । 'षल गतौ' (भ्वा० प० से०) । 'सलिकलि–' (उ० १।५४) इतीलच् । रलयोरेकत्वम् । **'सरिलं सलिरं** सलिलम्' इति वाचस्पतिः ॥ (४) ॥*॥ कम्यते । 'कमु कान्तौ' (भ्वा० आ० से०) । वृषादित्वात् (उ० १।१०६) कलच् । **'कमला** श्रीर्जलं पद्मं **कमलं कमलो** मृगः' इति धरणिदर्शनात् 'कमलम्' इत्येकं नाम । **'मलं** क्लोन्नि भेषजे । पङ्कजे सलिले ताम्रे **कमलन्तु** मृगान्तरे । **कमला** श्रीवरनार्योः' इति हेमचन्द्रः ॥ (५) ॥*॥ जलति । 'जल अपवारणे' (चु० प० से०) पचाद्यच् (३।१।१३४) । **'जलं** गोकलले नीरे ह्रीबेरेऽप्यन्यवज्जडे' इति मेदिनी ॥ (६) ॥*॥ पयते पीयते, वा । 'पय गतौ' (भ्वा० आ० से०) । 'पीङ् पाने' (दि० आ० अ०) वा असुन् (उ० ४।१८९) । **'पयः** क्षीरे च नीरे च' इति हैमः ॥ (७) ॥*॥ कीलां ज्वालामलति वारयति 'अल भूषणादौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) । और्वाग्नेः कीलां लाति वा । **'कीलालं** रुधिरे तोये' इति हैमः ॥ (८) ॥*॥ न मृतं मरणमस्त्यस्मिन् । प्राणस्यापोमयत्वात् । **'अमृतं** यज्ञशेषे स्यात्पीयूषे सलिले घृते । अयाचिते च मोक्षे च ना धन्वन्तरिदेवयोः । **अमृता** मागधीपथ्यागुडूच्यामलकीषु च' ॥ (९) ॥*॥ जीव्यतेऽनेन । 'जीव प्राणधारणे' (भ्वा० प० से०) । करणे ल्युट् (३।३।११६) । **'जीवनं** वर्तते नीरप्राणधारणयोरपि । **जीवनी जीवना** चापि जीवन्तीभेदयोः क्रमात्' ॥ (१०) ॥*॥ भूयते । 'भू प्राप्तौ' (चु० आ० से०) । 'भूसूधूभ्रस्जिभ्यश्छन्दसि' (उ० २।८०) इति क्युन् । यद्वा भवन्त्युत्पद्यन्तेऽनेन । करणे ल्युट् (३।३।११६) संज्ञापूर्वकत्वाद्गुणाभावः । **'भुवनं** विष्टपेऽपि स्यात्सलिले गगने जले' ॥ (११) ॥*॥ वन्यते संभज्यते सेव्यते वा । वन 'संभक्तौ' (भ्वा० प० से०) । 'वनु याचने' (तु० आ० से०) वा । कर्मणि घञ् (३।३।१९) । संज्ञापूर्वकत्वाद्गुण्यभावः । यत्तु—भुवनवद्बाहुलकात् क्युनि 'अनुदात्तोपदेश–' (६।४।३७) इत्यादिना नलोपे वनम्,—इत्युज्ज्वलदत्तः–इति मुकुटः । तन्न । 'अनुदात्तोपदेश–' (६।४।३७) इत्यनुनासिकलोपस्य ङिति झलि विधानात्क्युनि तदप्रसङ्गात् । अन्यथा वन्यत इत्यादावपि प्रसङ्गात् । **'वनं** प्रस्रवणे गेहे प्रेवासेऽम्भसि कानने' इति हैमः ॥ (१२) ॥*॥ कं सुखं बध्नाति । 'बन्ध बन्धने' (क्र्या० प० अ०) । 'कर्मण्यण्' (३।२।१) । **'कबन्धं** सलिले रुण्डे' इति शाश्वतादिदमेकं नाम । **'कबन्धोऽस्त्री** क्रियायुक्तमपमूर्धकलेवरे । क्लीबं जले, पुंस्युदरे राहुरक्षोविशेषयोः' ॥*॥ केचित्तु–'कमन्धम्' इति पठित्वा द्वे नामनी–इत्याहुः ॥ (१३) ॥*॥ उनत्ति । 'उन्दी क्लेदने' (रु० प० से०) । 'उदकम्' (उ० २।३९) इत्युणादिसूत्रेण साधु । यत्तु—उन्दति–इति विगृहीतवन्तौ स्वामिमुकुटौ । तच्चिन्त्यम् । उन्दे रौधादिकत्वात् ॥ (१४) ॥*॥ पाति । 'पा रक्षणे' (अ० प० से०) । 'उदके थुट्च' (उ० ४।२०४) इत्यसुन् थुट् । यत्तु—पीयते–इति विग्रहप्रदर्शनं स्वामिमुकुटाभ्यां कृतम् । तन्न । 'पातेर्बले जुट्' इत्यनुवृत्तिविरोधात् ।

१—बाहुलकात्पक्षया अलुक् ॥ वाक्येनैव नामेति सर्वधरः—इति मुकुटः ॥ 'सुगममेव हि मध्यमपांपतेः' इति दर्शनात्—इति स्वामी ॥ २—'आपोभिर्मार्जनं कृत्वा' इति स्मृतेः—इति मुकुट-बुधमनोहरे ॥ ३—प्रयोगश्च 'वारि पतन्ति नदन्ति मयूराः' इति पूर्वघटकर्परः ॥—पूर्वसाहचर्यात्स्त्रीत्वं वारः इति तु कलिङ्गः ॥ पूर्वोत्तरसाहचर्यात् स्त्रीक्लीबयोर्वारं इति तु पञ्चिका इति मुकुटः ॥

१—अत्र तु 'प्रसूरश्वा जनन्यपि' इत्यपि लिखितमासीत् ॥ तच्च न प्रकृतोपयुक्तम् ॥ २—प्रवासे यथा 'आहूतस्याभिषेकाय विसृष्टस्य वनाय च' इत्यनेकार्थकैरवाकरकौमुदी । अत्र तु 'प्रवाहे' इति लिखितमासीत् ॥ ३—'समरसरसि नृत्यत्कबन्धे' इति वासवदत्तायाम् 'चलितोद्धतकबन्धसंपदाः' इति माघे च प्रयोगात्–इति मुकुटः ॥ ४—'उदकशब्दसमानार्थं उदशब्दो विधत्ते' । तथा च 'प्रसन्नोदम्, इत्यसंज्ञायामप्युदशब्दः प्रयुज्यते' इति (६।३।५७ सूत्रे) कैयट–इति मुकुटः ॥

तत्र पातेर्ग्रहणम्, न पिबतेः ॥ (१५) ॥*॥ पुष्णाति । 'पुष पुष्टौ' (क्र्या० प० से०) । 'पुषः कित्' (उ० ४।४) इति करन् । **'पुष्करं** पङ्कजे व्योम्नि पयःकरिकराग्रयोः । ओषधीद्वीपविहगतीर्थराजोरगान्तरे । **पुष्करं** तूर्यवक्त्रे च काण्डे खड्गफलेऽपि च' ॥ (१६) ॥*॥ सर्वतो मुखान्यस्य । सर्वदिग्गमनात् । **'सर्वतोमुख** उग्रे च क्षेत्रज्ञब्रह्मणोः पुमान् । नपुंसकं तु पानीये सुरवर्त्मन्यपि स्मृतम्' ॥ (१७) ॥*॥ आप्नोति, आप्यते वा । 'आप्लृ व्याप्तौ' (स्वा० प० अ०) 'उदके नुम्भौ च' (उ० ४।२१०) इत्यसुन् हस्वो भान्तादेशो नुमागमश्च । अम्भते वा । 'अभि शब्दे' (भ्वा० आ० से०) । असुन् (उ० ४।१८९) । यत्तु—अमति–इति विग्रहप्रदर्शनं स्वामिमुकुटाभ्यां कृतम् । यच्च–अमेर्भुक् च–इति सूत्रोपन्यसनं मुकुटेन कृतम् । तन्न । तदुक्तसूत्रस्योज्ज्वलदत्तादावनुपलम्भात् । अस्मदुपन्यस्तस्योपलम्भाच्च ॥ (१८) ॥*॥ ऋच्छति । 'ऋ गतौ' (भ्वा० प० अ०) । 'उदके नुट् च' (उ० ४।१९७) इत्यसुन् नुडागमश्च । यत्तु—ऋणोति–इति विगृहीतं स्वामिना । तन्न । 'अर्तेरुच्च' इत्यतः 'अर्तेः' इत्यनुवृत्तेः स्वादेस्तत्राग्रहणात् ॥ (१९) ॥*॥ तौति । तुः सौत्र आवरणार्थः । औणादिको यः (४।११२) ॥ (२०) ॥*॥ पीयते । 'पा पाने' (भ्वा० प० से०) । अनीयर् (३।१।९६) । पायते वा । 'पै शोषणे' (भ्वा० प० अ०) । **'पानीयं** पेयजलयोः' इति हैमः ॥ (२१) ॥*॥ नीयते । 'णीञ् प्रापणे' (भ्वा० उ० से०) । 'स्फायि–' (उ० २।१३) इति रक् । निर्गतं रादभ्रेर्वा । 'निरादयः–' (वा० २।२।१८) इति समासः । 'अभ्रेरापः' इति (तैत्तिरीय) श्रुतेः । निष्क्रान्तो रोऽस्मात् । 'प्रादिभ्यो धातुजस्य–' (वा० २।२।२४) इति बहुव्रीहिः । 'अब्बोऽग्निः' इति स्मृतेः । यत्तु–'ह्रलोपे–' (६।३।१११) इति दीर्घेण 'नीरम्' इति स्वामी–इति मुकुटः । तन्न । नयति 'नीरम्' इति स्वामिग्रन्थादुक्तार्थानवगमात् । निश्चयेन राति सुखम् । 'रा दाने' (अ० प० अ०) । 'आतश्चोपसर्गे' (३।१।१३६) इति को वा ॥*॥ 'नीरवार्वारिनारम्' इति संसारावर्तसंमते 'नार' इति पाठे नरस्येदम् । 'तस्येदम्' (४।३।१२०) इत्यण् । 'आपो वै नरसूनवः' इति स्मृतेः । (**'नार**स्तर्णकनीरयोः' इति मेदिनी) ॥ (२२) ॥*॥ क्षियति । 'क्षि निवासगत्योः' (तु० प० अ०) । 'शुसिचि(क्षि)मीनां दीर्घश्च' (उ० २।२५) इति क्रन् दीर्घत्वं च । यद्वा घस्यते । 'घसेः किच्च' (उ० ४।३४) इतीरन् । 'गमहनजन–' (६।४।९८) इत्युपधालोपः । यत्तु—क्षयति–इति विग्रहप्रदर्शनं मुकुटेन कृतम् । तन्न । उपन्यस्तधातोस्तादृशरूपाभावात् । **'क्षीरं** पानीयदुग्धयोः' इति हैमः ॥ (२३) ॥*॥ अम्बते । 'अबि शब्दे' (भ्वा० आ० से०) । बाहुलकादुः । यत्तु—अम्बति इति स्वामिना विगृहीतम् । तच्चिन्त्यम् । अस्यात्मनेपदित्वात् ॥ (२४) ॥*॥ शं वृणोति । 'वृञ् वरणे' (स्वा० उ० से०) । पचाद्यच् (३।१।१३४) । शंवं संवरणं राति–इति वा । संवयति । 'षंव संबन्धने' । 'शंव च' (चु० प० से०) । बाहुलकादरन्, इति वा । दन्त्यादिस्तालव्यादिश्च । **'शंवरं** सलिले, पुंसि मृगदैत्यविशेषयोः । **शंवरी** चाखुपर्ण्यां स्यात्' इति विश्वः ॥ (२५) ॥*॥ मेघस्य पुष्पमिव । **'मेघपुष्पं** पिण्डाभ्राम्बुनादेये ना हरेर्हये' ॥ (२६) ॥*॥ घनस्य रसः । 'पुंलिङ्गः स्याद् **घनरसः** सान्द्रनिर्यासनीरयोः' इति रभसः । 'नारं घनरसः पुमान्' इति शब्दार्णवः । 'अप्स्वपि शंव(शम्ब) **रपिप्पलकुशकमलकाण्ड**विषवनपयांसि । घनरसमम्बु क्षीरं घृतममृतं जीवनं भुवनम्' इति रत्नकोषात् क्लीबमपि ॥ (२७) ॥*॥ दकशब्दोप्यत्र । 'प्रोक्तं प्राज्ञैर्भुवनममृतं **जीवनीयं दकं** च' इति हलायुधात् ॥*॥ सप्तविंशतिः **'जलस्य'** ॥

त्रिषु द्वे आप्यमम्मयम् ।

त्रिष्विति ॥ अपां विकारः । 'तस्य विकारः' (४।३।१३४) इत्यणन्ताच्चतुर्वर्णादित्वात् (वा० ५।१।१२४) स्वार्थे ष्यञ् । स्त्रियाम् आप्या ॥ (१) ॥*॥ 'एकाचो नित्यम्' ( ) इति मयट् । स्त्रियामम्मयी ॥ (२) ॥*॥ द्वे **'जलविकारस्य'** ॥

भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिः

भङ्ग इति ॥ भज्यते 'भञ्जो आमर्दने' (रु० प० अ०) । कर्मणि घञ् (३।३।१९) । 'भङ्गस्तरङ्गे भेदे च रुग्विशेषे पराजये । कौटिल्ये भयविच्छित्त्योः । (**भङ्गा** शाणे)' इति हैमः ॥ (१) ॥*॥ तरति । 'तॄ प्लवनसंतरणयोः' (भ्वा० प० से०) । 'तरत्यादिभ्यश्च' (उ० १।२०) इत्यङ्गच् ॥ (२) ॥*॥ ऋच्छति । 'ऋ गतौ' (भ्वा० प० अ०) । 'अर्तेरुच्च' (उ० ४।४४) इति मिः । अर्तेरुदादेशः (रपरः) । 'वा स्त्रियाम्' इति काकाक्षिगोलकन्यायेनोर्मिवीचिभ्यां संबध्यते । 'पुंलिङ्गस्त्रीलिङ्गयोर्वीचिमणियष्टिमुष्टयः' 'अशनिर्नुटिशमिपाटलिशाल्मलितरणिश्रेण्यूर्मयः' । 'वस्तिश्च' इति वामनः । **'ऊर्मिः** पीडाजवोत्कण्ठाभङ्गप्राकाश्यवीचिषु । वस्त्रसंकोचलेखायाम्' इति हैमः ॥ (३) ॥*॥ वयति, ऊयते वा । 'वेञ् तन्तुसंताने' (भ्वा० उ० अ०) 'वेञो डिच्च' (उ० ४।७२) इतीचिः । यत्तु—वाति । 'वा गतिगन्धनयोः' (अ० प० अ०) । 'वातेः कित्'–इति मुकुटः । तन्न । तथासति 'विः' इति रूपप्रसङ्गात् । 'वातेर्डिच्च' (उ० ४।१३४) इति सूत्रे 'जनि-

---

१—एतदुत्तरम् 'आप्यं मुखे च तन्मध्ये तद्भवे च स्त्रियां स्थितौ । इज्यादानेऽध्वरेऽर्चायां संगमेऽस्त्री गुरौ त्रिषु' इति लिखितमस्ति । परंतु पूर्वार्धे आप्यस्य स्थाने आस्यशब्दस्यैव हैमविश्वमेदिनीधूपलम्भात् स्वयमपि आस्यशब्दव्याख्यायामस्यैव कोशस्यास्यशब्दघटितस्येवोपन्यस्तत्वाच्च आस्यशब्दस्यैव तदर्थकत्वस्यानुभवसिद्धत्वाच्च न प्रकृतोपयुक्तम् ॥ उत्तरार्धस्य इज्याशब्दार्थबोधकत्वान्न प्रकृतोपयोगि ॥

२—भङ्गो विच्छित्तिः इत्यनेकार्थकैरवाकरकौमुदी ॥

घसिभ्यामिण्' (उ० ४।१३०) इति सूत्रात् 'इण्' इत्यनुवृत्तेः 'वीचिर्नित्यं स्त्री' इति स्वामी। **'वीचिः** स्वल्पतरङ्गे स्यादवकाशे सुखे द्वयोः' ॥ (४) ॥*॥ चत्वारि **'तरङ्गस्य'** ॥

अथोर्मिषु ॥ ५ ॥

महत्सूल्लोलकल्लोलौ

अथेति ॥ उत् लोडयति। 'लोडृ उन्मादे' (भ्वा० प० से०) णिच् (३।१।२६)। पचाद्यच् (३।१।१३४) डलयोरेकत्वम्। यत्तु—लोलयतीति लोलः। पचाद्यच् (३।१।१३४)। उद्गतश्चासौ लोलश्चेति उल्लोलः, इति स्वामी-इति मुकुटः। तन्न। ऊर्ध्वं लोलयति इति स्वामिना विगृहीतत्वात्। स्वकृतनिर्वचनाविशेषाच्च ॥ (१) ॥*॥ कं जलम्। तस्य लोल उन्मादः। 'वा पदान्तस्य' (८।४।५९) इत्यनुस्वारस्य लकारः। कल्लन्तेऽनेन नद्यः। 'कल्ल अव्यक्ते शब्दे' (भ्वा० आ० से०)। बाहुलकादोलच्-इति वा ॥ (२) ॥*॥ द्वे **'महातरङ्गस्य'** ॥

स्यादावर्तोऽम्भसां भ्रमः।

स्यादिति ॥ आवर्तनम्। 'वृतु वर्तने' (भ्वा० प० से०)। भावे घञ् (३।३।१८)। **'आवर्तश्चिन्तने** वारिभ्रमे चावर्तने पुमान्' ॥ (१) ॥*॥ **'जलानां भ्रमणस्य'** एकम् ॥

पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियः ॥ ६ ॥

पृषन्तीति ॥ पर्षति। 'पृषु सेचने' (भ्वा० प० से०)। 'पृषद्बृहन्महत्-' (उ० २।८४) इति साधु। बहुवचनमतन्त्रम्। **'पृषन्मृगे** पुमान्, बिन्दौ न द्वयोः, **पृषतोऽपि** ना। अनयोश्च त्रिषु श्वेतबिन्दुयुक्तेऽप्युभाविमौ' ॥ (१) ॥*॥ विन्दति। 'विदि अवयवे' (भ्वा० प० से०)। बाहुलकादुः। **'बिन्दुर्दन्तक्षतान्तरे** । भ्रुवोर्मध्ये रूपकाव्यकृतौ च पृषते पुमान्। वेदितर्यन्यलिङ्गः स्यात्' ॥ (२) ॥*॥ पर्षन्ति। 'पृषिरञ्जिभ्यां कित्' (उ० ३।१११) इत्यतच्। **'पृषतस्तु** मृगे बिन्दौ खरोहिते। श्वेतबिन्दुयुतेऽपि स्यात्' इति हैमः ॥ (३) ॥*॥ 'प्रुषु प्लुषु दाहे' (भ्वा० प० से०)। संपदादित्वात् (वा० ३।३।१०८) भावे क्विप्। विगता रुद्धा वा प्रुट् दाहोऽस्मात् ॥ (४) ॥*॥ चत्वारि **'जलकणस्य'** ॥

वक्राणि पुटभेदाः स्युः

वक्राणीति ॥ वञ्चन्ति। 'वञ्चु गतौ' (भ्वा० प० से०)। 'स्फायितञ्चि'- (उ० २।१३) इति रक्। 'न्यङ्क्वादीनां च' (७।३।५३) इति कुत्वम्। **'वक्रं** पुटभेदे **वक्रः** कुटिले क्रूरभौमयोः' इति हैमः। **'वक्रः** शनैश्चरे पुंसि, पुटभेदे नपुंसकम्। त्रिषु क्रूरे च कुटिले'। स्वामी तु—चक्राकारेण यान्त्यधः—इति विगृह्यन् चवर्गादित्वं मन्यते। **'चक्रः** कोके पुमान्, क्लीबं व्रजे सैन्यरथाङ्गयोः। राष्ट्रे दम्भान्तरे कुम्भकारोपकरणास्त्रयोः। जलावर्तेऽपि' इति चादौ मेदिनी ॥ (१) ॥*॥ पुटं संश्लिष्टं भिन्दन्ति। 'भिदिर् विदारणे' (रु० उ० अ०)। 'कर्मण्यण्' (३।२।१)। **'पुटभेदस्तु** नगरातोद्ययोस्टिनी मुखे' इति हैमः ॥ (२) ॥*॥ द्वे **'चक्राकारेण जलानामधोयानस्य'** ॥

भ्रमाश्च जलनिर्गमाः।

भ्रमा इति ॥ भ्रमन्ति जलान्यत्र। 'हलश्च' (३।३।१२१) इति घञ्। **'भ्रमोऽम्बुनिर्गमे** भ्रान्तौ कुन्दभ्रमणयोरपि' ॥ (१) ॥*॥ निर्गमनानि। 'गम्लृ गतौ' (भ्वा० प० अ०)। 'ग्रहवृदृनिश्चिगमश्च' (३।३।५८) इत्यप्। करणे वा। 'खनो घ च' (३।३।१२५)। इति घः। जलानां निर्गमाः ॥ (२) ॥*॥ द्वे **'जलनिःसरणजालकस्य'** ॥ नद्यादौ अधःस्थजलस्योर्ध्वनिःसरणस्येत्यन्ये। स्वामी तु—चत्वार्येकार्थानि—इत्याह ॥

कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ॥ ७ ॥

कूलमिति ॥ कूलयति। 'कूल आवरणे' (भ्वा० प० से०)। पचाद्यच् (३।३।१३४)। **'कूलं** तटे सैन्यपृष्ठे तडागस्तूभयोरपि' इति हैमः ॥ (१) ॥*॥ रुणद्धि। 'रुधिर् आवरणे' (रु० उ० से०)। असुन् (उ० ४।१८९) ॥*॥ अदन्तोऽपि। **'रोधः** प्रोक्तश्च रोधसि' इति संसारावर्तात्। तत्राच् (३।१।१३४) ॥ (२) ॥*॥ तीरयति। 'पार तीर कर्मसमाप्तौ' (चु० उ० से०)। पचाद्यच् (३।१।१३४)। यत्तु मुकुटः—तीर्यते तरणकर्म समाप्यतेऽनेनात्र वा। चुरादिण्यन्तात् 'एरच्' (३।३।५६)—इत्याह। तन्न। 'अजड्भ्यां स्त्रीखलनाः' (वा० ३।३।१२६) इति ल्युट्प्रसङ्गात्। 'पुंसि संज्ञायाम्'—(३।३।११८) इति घप्रसङ्गाच्च। **'तीरो** वज्रे तीरं पुनस्तटे' इति हैमः ॥ (३) ॥*॥ +एवं पारम्+ प्रतीरमित्युपसर्गान्तरनिवृत्त्यर्थम् ॥ (४) ॥*॥ तटति। 'तट उच्छ्राये' (भ्वा० प० से०)। पचाद्यच् (३।१।१३४) स्त्रियां तटी। 'जातेः-' (४।१।६३) इति ङीष्॥ (५) ॥*॥ पञ्च **'तीरस्य'** ॥

पारावारे परार्वाची तीरे

पारेति ॥ परं तीरं पारम्। **'पारं** प्रान्ते परतटे' इति हैमः ॥ (१) ॥*॥ अर्वाक् तीरम्-अवारम्। अव अर्यते। 'ऋ गतौ' (भ्वा० प० अ०)। कर्मणि घञ् (३।३।११९)। न वार् अस्त्यत्र-इति वा। अर्शआद्यच् (५।२।१२७) ॥ (१) ॥*॥ **'परतीरावरतीरयोः'** एकैकम् ॥

१—'पृषन्ति बिन्दुपृषताः' इति त्रिभिर्द्वन्द्व इत्यन्ये। तथा च 'पयः पृषन्तिभिः स्पृष्ट्वा वान्ति वाताः शनैः शनैः' इति जाम्बवतीविजयवाक्यम्-इति मुकुटपीयूषबुधमनोहराः ॥

१—जलनिःसरणजालके यथा माघे 'भ्रमागतैरम्बुभिरम्बुराशिः' इति—इति मुकुटः ॥ २—दीर्घेकारादि 'समुद्रतीरञ्जितसर्वलोका सेनापगां व्याप्तवती बलेन' इति द्विसंधानश्लेषात् ॥ ३ इदं वक्ष्यमाणोपयोगि ॥

पात्रं तदन्तरम् ।

पात्रमिति ॥ तयोः पारावारयोरन्तरं मध्यम् । पिबन्त्यत्र पान्त्यस्माद्वा । पिबतेः पातेर्वा ष्ट्रन् (उ० ४।१५९) । **'पात्रं** तु कूलयोर्मध्ये पर्णे नृपतिमन्त्रिणि । योग्यभाजनयोर्यज्ञभाण्डे नाट्यानुकर्तरि' इति हैमः ॥ (१) ॥*॥ एकम् **'तटमध्यवर्तिप्रवाहस्य'** ॥

द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम् ॥ ८ ॥

द्वीप इति ॥ द्विर्गता अन्तर्गता वा आपोऽत्र । 'ऋक्पूर्-' (५।४।७४) इत्यः । समासान्तः 'ब्यन्तरुपसर्गेभ्योऽप ईत्' (६।३।९७) काकाक्षिवत् 'अस्त्रियाम्' इत्युभाभ्यां संबध्यते ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'जलमध्यस्थस्थानस्य'** ॥

तोयोत्थितं तत्पुलिनम्

तोय इति ॥ पुलति । 'पुल महत्त्वे' (भ्वा० प० से०) । 'तलिपुलिभ्यां च' (उ० २।५३) इतीनन् । त्रिकाण्डशेषे तु 'पुलिनं द्वीपमुच्यते' इत्यभिहितम् ॥ (१) ॥*॥ एकं **'जलादचिरनिर्गततटस्य'** ॥

सैकतं सिकतामयम् ।

सैकतमिति ॥ सिकताः सन्त्यस्मिन् । 'सिकताशर्कराभ्यां च' (५।२।१०४) इति मत्वर्थेऽण् ॥ (१) ॥*॥ सिकतानां विकारः । 'मयड्वैतयोः-' (४।३।१४३) इति मयट् ॥ (२) ॥*॥ द्वे **'वालुकामयतटस्य'** ॥

निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ ॥ ९ ॥

निषेति ॥ निषीदन्त्यत्र । 'षदॢ लृ विशरणगत्यवसादनेषु' (भ्वा०, तु० प० अ०) । 'नौ सदेः' (उ० २।१२२) इति ष्वरच् । 'सदिरप्रतेः' (८।३।३६) इति षत्वम् । यद्वा निषदनम् । संपदादि क्विप् (वा० ३।३।१०८) । निषद् आसनस्य वर आवारकः । 'वृञ् आवरणे' (चु० उ० से०) आधृषीयः । पचाद्यच् (३।१।१३४) । **'निषद्वरः** स्मरे पङ्के निशायां तु **निषद्वरी'** इति विश्वः ॥ (१) ॥*॥ जमति । 'जमु अदने' (भ्वा० प० से०) । बाहुलकाद्बालन् । यद्वा ।-'जम्ब अदने' ( ) इति धातुः । भावे घञ् (३।३।१८) । जम्बम् आलाति । 'ला दाने' (अ० प० अ०) । 'आतोऽनुप-' (३।२।३) इति कः । **'जम्बालः** शैवले पैङ्के' ॥ (२) ॥*॥ पच्यते । 'पचि विस्तारे' (चु० प० से०) । कर्मणि घञ् (३।३।१९) । 'हलश्च' (३।३।१२१) इति करणे वा । **'पङ्कोऽस्त्री** कर्दमे पापे' इति मेदिनी ॥ (३) ॥*॥ शीयन्तेऽस्मिन्ननेन वा । 'षदॢ शातने' (भ्वा० तु० प० अ०) । घञ् (३।३।१२१) । यद्वा शीयते नश्यति । ज्वलितिकसन्तेभ्यो णः' (३।१।१४०) । यद्वा श्यति । 'शो तनूकरणे' (दि० प० अ०) । 'शाशपिभ्यां ददनौ' (उ० ४।९७) इति दः । **'शादः** कर्दमशष्पयोः' इति हैमः ॥ (४) ॥*॥ कर्दति । 'कर्द कुत्सिते शब्दे' (भ्वा० प० से०) । 'कलिकर्दोरमः' (उ० ४।८४) ॥ (५) ॥*॥ पञ्च **'कर्दमस्य'** ॥

जलोच्छ्वासाः परीवाहाः

जलोच्छ्वासा इति ॥ जलान्युच्छ्वसन्ति परिवहन्त्येभिः । 'श्वस प्राणने' (अ० प० से०) । 'वह प्रापणे' (भ्वा० उ० अ०) । 'हलश्च' (३।३।१२१) । इति घञ् । 'उपसर्गस्य घञि-' (६।३।१२२) इति वा दीर्घः । यद्वा जलानामुच्छ्वसनम् । परिवहनम् च । भावे घञ् (३।३।१८) ॥ (१) ॥*॥ **'परीवाहो** जलोच्छ्वासे महीभृद्योग्यवस्तुनि' ॥ (२) ॥*॥ द्वे **'प्रवृद्धजलस्य निर्गममार्गस्य'** । समधिकजलस्य सर्वतो वहनस्य वा ॥

कूपकास्तु विदारकाः ।

कूपका इति ॥ कुत्सिताः कूपाः । 'कुत्सिते' (५।३।७४) इति कः । कूपस्य प्रतिकृतिः इति वा । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् । **'कूपको** गुणवृक्षे स्यात्तैलपात्रे कुकुन्दरे । उदपाने चितायां च (**कूपिकाम्भोगतोपले**)' ॥ (१) ॥*॥ विदार्यन्ते । 'दृ विदारणे' (क्र्या० प० से०) णिच् (३।१।२६) बाहुलकात्कर्मणि ण्वुल् । यद्वा विदार्यन्ते । कर्मणि घञ् (३।३।१९) । कुत्सिता विदाराः । कुत्सायां कः (५।३।७४) ॥ (२) ॥*॥ द्वे **'शुष्कनद्यादौ कृतगर्तस्य'** ॥

नाव्यं त्रिलिङ्गं नौतार्ये

नाव्यमिति ॥ नावा तार्यम् । 'नौवयोधर्म-' (४।४।९१) इति यत् । 'वान्तो यि- (६।१।७९) इत्यवादेशः ॥ (१) ॥*॥ एकं **'नौतरणयोग्यजलस्य'** ॥

स्त्रियां नौस्तरणिस्तरिः ॥ १० ॥

स्त्रियामिति ॥ नुद्यते । 'णुद प्रेरणे' (तु० उ० अ०) 'ग्लानुदिभ्यां डौः' (उ० २।६४) । यद्वा नयति । 'णीञ् प्रापणे' (भ्वा० उ० अ०) । 'अन्येभ्योऽपि-' (वा० ३।२।१०१) इति डः । नम् अवति क्विप् (३।२।१७६) 'ज्वरत्वर-' (६।४।२०) इत्यूठौ । वृद्धिः (६।१।८९) ॥ (१) ॥*॥ तरन्त्यनया । 'तॄ प्लवनतरणयोः' (भ्वा० प० से०) । 'अतिसृधम्यश्यवितृभ्योऽनिः' (उ० २।१०२) । **'तरणिस्तरणेऽर्केऽशौ** कुमार्योषधिनौकयोः । यष्टावब्धौ' इति हैमः ॥ (२) ॥*॥ 'अश इः' उ० (४।१३९) । 'कृदिकारात्-' (ग० ४।१।४५) इति ङीष् वा । तरणी । तरी । **'तरिर्दशायां** वेडायां वस्त्रादीनां च पेटके' इति हैमः ॥ (३) ॥*॥ त्रीणि **'नौकायाः'** ॥

१—एतदग्रे **'जगलो** मदनद्रुमे । मेदके पिष्टमद्ये च पुंसि धूर्तेऽभिधेयवत्' इति लिखितमासीत् ॥ तत्तु जगलशब्दार्थबोधकतया न प्रकृतोपयुक्तम् ॥

१—'उपार्जितानामर्थानां त्याग एव हि रक्षणम् । तडागोदकसंस्थानां परीवाह इवाम्भसाम्' इति दीर्घलक्ष्यम् इति स्वामिमुकुटबुधमनोहराः पक्षे दीर्घाभावे 'परिवाहो जगतः करोति किम्' इति माघः—इति मुकुटबुधमनोहरे ॥ २—विश्वमेदीनीपुस्तके तु 'च्युतायाम्' इत्युपलभ्यते ॥

उडुपं तु प्लवः कोलः

उडुपमिति ॥ उडुनो जलात् पाति । 'पा रक्षणे' (अ० प० अ०) 'सुपि स्थः' (३।२।४) इत्यत्र 'सुपि' इति योगविभागात्कः । उडूनीव पाति, इति वा । 'उडुपश्चन्द्रभेलयोः' इति धरणिः ॥ (१) ॥*॥ प्लवते । 'प्लुङ् गतौ' (भ्वा० आ० अ०) । पचाद्यच् (३।१।१३४) । **'प्लवः** प्लक्षे प्लुतौ कपौ । शब्दे कारण्डवे म्लेच्छजातौ भेलकभेकयोः । क्रमनिम्नमहीभागे कुलके जलवायसे । जलान्तरे **प्लवं** गन्धतृणे मुस्तकभिद्यपि' इति हैमः ॥ (२) ॥*॥ कोलति । 'कुल संस्त्याने' (भ्वा० प० से०) 'ज्वलिति–' (३।१।१४०) इति णः । 'पोतप्लवकयोः **कोलः कोलं** तु बदरीफलम्' इति शाश्वतः । **'कोलो** भेलक उत्सङ्गेऽङ्कपाल्यां चित्रके किरौ । **कोलं** तु बदरे **कोला** पिप्पल्यां चव्यभेषजे' इति हैमः ॥ (३) ॥*॥ त्रीणि **'तृणादिनिर्मिततरणसाधनस्य'** ॥

स्रोतोऽम्बुसरणं स्रवतः ।

स्रोत इति ॥ स्रवति । 'सु गतौ' (भ्वा० प० अ०) । 'सुरीभ्यां तुट् च' (उ० ४।२०२) इत्यसुन् तुडागमः । स्रोतो दन्त्यादिः । 'स्रोतः सद्यःसकलसलिलम्' इति दन्त्यादिधूम्विवेकात् । **'स्रोतोऽम्बुवेग इन्द्रिये'** ॥ (१) ॥*॥ एकम् **'अकृत्रिमजलवहनस्य'** ॥

आतरस्तरपण्यं स्यात्

आतर इति ॥ आतरन्त्यनेन । 'पुंसि संज्ञायाम्' (३।३।११८) इति घः । यत्तु—'ऋदोरप्' (३।३।५७)—इति मुकुटः । तन्न । परत्वाल्लघुटः प्रसङ्गात् । 'आतरस्तरपण्यं स्यादनुत्तरम्' इति बोपालितः ॥ (१) ॥*॥ तरणम् । 'ऋदोरप्' (३।३।५७) । तरस्य पण्यम् ॥ (२) ॥*॥ द्वे **'नद्यादितरणे देयमूल्यस्य'** ॥

द्रोणी काष्ठाम्बुवाहिनी ॥ ११ ॥

द्रोणीति ॥ द्रवति । 'द्रु गतौ' (भ्वा० प० अ०) । 'वहिश्रि' (उ० ४।५१) इति निः । 'कृदिकारात्–' (ग० ४।१।४५) इति ङीष् । '[3]द्रोणिः काष्ठाम्बुसेचनी **द्रुणिश्च**' इति रूपरत्नाकरात् द्रुणिरपि । 'द्रुण हिंसागत्योः' (तु० प० से०) । 'इगुपधात् कित्' (उ० ४।१२०) । (ङीषि द्रुणी । **'द्रुण्यम्बुद्रोणिकच्छ्योः'** इति मेदिनी) । **'द्रोणी** काष्ठाम्बुवाहिन्यां गवादन्यामपीष्यते' ॥ (१) ॥*॥ पुनः पुनरम्बुवहति । 'बहुलमाभीक्ष्ण्ये' (३।३।८१) इति णिनिः ॥ (२) ॥*॥ द्वे **'काष्ठपाषाणकृतनौकाकाराम्बुसेचन्याः'** ॥

१—'प्लवंगे च' इति पाठः ॥ २—मुकुटबुधमनोहरयोस्तु 'आतारानुत्तरावप्यत्र' इत्युक्त्वा दीर्घमध्यमेवेदमुदाहृतम् ॥ ३—'मरकतमणिद्रोणिसरला' इति पूर्वकविप्रयोगः—इति मुकुटबुधमनोहरे ॥ ४—'द्रोणीभिरम्भसि चरन्ति महार्णवस्य'—इत्यनेकार्थैकैरवाकरकौमुदी ॥

सांयात्रिकः पोतवणिक्

सांयेति ॥ समुदितानां गमनं द्वीपान्तरंगमनं वा संयात्रा । सा प्रयोजनमस्य । 'तदस्य प्रयोजनम्' (५।१।१०९) इति ठञ् ॥ (१) ॥*॥ पोतेनोपलक्षितो वणिक् ॥ (२) ॥*॥ द्वे **'वहित्रगामिनो वणिजः'** ॥

कर्णधारस्तु नाविकः ।

कर्णेति ॥ **'कर्णः** श्रोत्रमरित्रं च' इति दुर्गः । तं धरति । 'धृञ् धारणे' (भ्वा० उ० अ०) । 'कर्मण्यण्' (३।२।१) ॥ (१) ॥*॥ नावा तरति । 'नौ ह्यचष्ठन्' (४।४।७) ॥ (२) ॥*॥ द्वे **'नाविकस्य'** ॥ नौपृष्ठदण्डधारकस्य–इत्यन्ये ॥

नियामकाः पोतवाहाः

नियेति ॥ नियच्छन्ति पोतम् । 'यम नियमने' (भ्वा० प० अ०) ण्वुल् (३।१।१३३) । **'नियामकः** पोतवाहे कर्मणि धारे नियन्तरि' ॥ (१) ॥*॥ पोतं वहन्ति । **'कर्मण्य ण'** (३।२।१) ॥ (२) ॥*॥ द्वे **'वहित्रवाहकस्य'** ॥

कूपको गुणवृक्षकः ॥ १२ ॥

कूपेति ॥ कूपे कायति । 'कै शब्दे' (भ्वा० प० अ०) । 'सुपि' (३।२।४) इति कः ॥ (१) ॥*॥ गुणानां रज्जूनां वृक्षः । 'संज्ञायां कन्' (५।३।७५) ॥ (२) ॥*॥ द्वे **'नौमध्यस्थरज्जुबन्धनकाष्ठस्य'** । नौबन्धनकीलकस्येत्यन्ये ॥

नौकादण्डः क्षिपणी स्यात्

नौकेति ॥ नौकाया दण्डः ॥ (१) ॥*॥ क्षिप्यतेऽनया । 'क्षिपेः किच्च' (उ० २।१०७) इत्यनिः ॥*॥ बाहुलकाद्गुणे क्षेपणिरपि । **'क्षेपणं** प्रेरणे, नौकादण्डजालभिदोः स्त्रियाम्' ॥ (२) ॥*॥ द्वे **'नौकापार्श्वद्वयबद्धचालनकाष्ठस्य'** ॥

अरित्रं केनिपातकः ।

अरित्रमिति ॥ ऋच्छत्यनेन । 'ऋ गतौ' (भ्वा० प० अ०) । 'अर्तिलूधू–' (३।२।१८४) इतीत्रः ॥ (१) ॥*॥ के जले निपातोऽस्य । 'हलदन्तात्–' (६।३।९) इत्यलुक् । 'शेषात्–' (५।४।१५४) इति कप । 'संज्ञायां कन्' (५।३।७४) वा (२) ॥*॥ द्वे **'नौपृष्ठस्थचालनकाष्ठस्य'** ॥

अभ्रिः स्त्री काष्ठकुद्दालः

अभ्रिरिति ॥ अभ्रति । 'अभ्र गतौ' (भ्वा० प० से०) इन् (उ० ४।११८) ॥ (१) ॥*॥ कुम् उद्दालयति । 'दल विशरणे' (भ्वा० प० से०) 'कर्मण्यण्' (३।२।१) शकन्ध्वादिः (वा० ६।१।९४) । काष्ठस्य कुद्दालः ॥ (२) ॥*॥ द्वे **'पोतादेर्मलापनयनार्थं काष्ठादिरचितकुद्दालस्य'** ॥

१—'संपूर्वस्य यातेर्द्वीपान्तरगमने वृत्तिः' इति चाणक्यटीकेति कलिङ्गः—इति मुकुटः ॥ २—'आतिदैशिककार्यस्यानित्यत्वाद्गुणाभावाभावे क्षेपणिः । 'कृदिकारात्' ग० (४।१।४५) इति ङीषि क्षेपणी च' इति माधवी—इति मुकुटः ॥

सेकपात्रं तु सेचनम् ॥ १३ ॥

सेकेति ॥ सेकस्य पात्रम् ॥ (१) ॥*॥ सिच्यतेऽनेन । 'करणा–' (३।३।११५) इति ल्युट् । **'सेचनं** रक्षणे सेके नौकायाः सेकभाजने' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ द्वे **'नौस्थजलनिःसारणपात्रस्य'** ॥

क्लीबेऽर्धनावं नावोऽर्धे

क्लीब इति ॥ नावोऽर्धम् । 'अर्धं नपुंसकम्' (२।२।२) इति तत्पुरुषः । 'नावो द्विगोः' (५।४।९९) 'अर्धाच्च' (५।४। १००) इति टच् ॥ (१) ॥*॥ एकम् **'अर्धनौकायाः'** ॥

अतीतनौकेऽतिनु त्रिषु ।

अतीतेति ॥ अतीता नौर्येन । 'उरःप्रभृतिभ्यः–' (५।४ १५१) इति कप् ॥ (१) ॥*॥ नावमतिक्रान्तम् । 'अल्पादयः' (वा० २।२।१८) इति तत्पुरुषः । अतिनौः पुमान् स्त्री वा ॥ (२) ॥*॥ द्वे **'नौकामतिक्रान्तजलादेः'** ॥[1]

त्रिष्वागाधात्

त्रिष्विति ॥ अगाधमभिव्याप्य त्रिषु ॥

प्रसन्नोऽच्छः

प्रसन्न इति ॥ प्रासदत् । 'षद्लृ विशरणादौ' (भ्वा०, तु० प० अ०) । 'गत्यर्थ–' (३।३।१७२) इति क्तः । **'प्रसन्ना** स्त्री सुरायां स्यादच्छसंतुष्टयोस्त्रिषु' ॥ (१) ॥*॥ 'छो छेदने' (दि० प० अ०) न च्छयति दृष्टिम् । 'सुपि' (३।२।४) इति कः । न च्छाद्यते वा । 'अन्येष्वपि–' (३।२।१०१) इति डः । **'अच्छो** भल्लूके स्फटिकेऽमलेऽच्छाऽभिमुखोऽव्ययम्' इति हैमः ॥ (२) ॥*॥ द्वे **'निर्मलस्य'** ॥

कलुषोऽनच्छ आविलः ॥ १४ ॥

कलुष इति ॥ लुषति । 'लुष हिंसायाम्' ( ) 'इगुपध–' (३।१।१३५) इति कः । कस्य जलस्य लुषो घातकः । **'कलुषं** त्वाविले पापे' इति विश्वः ॥ (१) ॥*॥ भिन्नोऽच्छात् । नञ्तत्पुरुषः । 'नलोपो नञः' (६।३।७३) । 'तस्माद्बुडचि' (६।३।७४) ॥ (२) ॥*॥ आविलति । 'विल भेदने' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः ॥ (३) ॥*॥ त्रीणि **'मलिनजलस्य'** ॥

निम्नं गभीरं गम्भीरम्

निम्नमिति ॥ निमनति 'ना अभ्यासे' (भ्वा० प० अ०) 'आतश्च–' (३।१।१३६) इति कः ॥ (१) ॥*॥ गाते जलजन्तवोऽत्र । गच्छन्ति वा । 'गाङ् गतौ' (अ० आ० अ०) 'गम्लृ गतौ' (भ्वा० प० से०) । 'गभीरादयश्च' इति 'गभीरगम्भीरौ' (उ० ४।३५) 'इति वा निपातितौ ॥ (२) ॥*॥ (३) ॥*॥ त्रीणि **'गम्भीरस्य'** ॥

१—'येनातिवेगवज्जलादिनातिक्रान्ता नौस्तज्जलस्य नामैकम्' इति पाठः ॥

उत्तानं तद्विपर्यये ।

उत्तानमिति ॥ उद्गतस्तानो विस्तारोऽस्मात् ॥ (१) ॥*॥ तस्य गम्भीरस्य विपर्यये । 'उत्तानमगभीरे स्यादूर्ध्वास्यशयिते त्रिषु' ॥ (१) ॥*॥ एकम् **'उत्तानस्य'** ॥

अगाधमतलस्पर्शे

अगाधमिति ॥ नास्ति गाधः स्थितिरत्र । **'नञोऽस्त्यर्थानाम्–'** (वा० २।२।२४) इति बहुव्रीहिः ॥ (१) ॥*॥ तलस्याधोभागस्य स्पर्शः न सोऽत्र । **'अगाधमतलस्पर्शे** त्रिषु, श्वभ्रे नपुंसकम्' ॥ (२) ॥*॥ द्वे **'अतिनिम्नस्य'** ॥

कैवर्ते दाशधीवरौ ॥ १५ ॥

कैवर्त इति ॥ के जले वर्तन्ते । 'वृतु वर्तने' (भ्वा० आ० से०) पचाद्यच् (३।१।१३४) केवर्तानां मत्स्यानामयं घातकः । 'तस्येदम्' (४।३।१२०) इत्यण् ॥ (१) ॥*॥ दशति मत्स्यान् । 'दंश दशने' (भ्वा० प० अ०) । 'दंशेश्च' (उ० ५।११) इति टटनौ न आ च । यद्वा दाश्यते मूल्यमस्मै । 'दाशृ दाने' (भ्वा० उ० से०) घञ् (३।३।१८) । 'शालो झषे, धीवर एव **दाशः'** इति शभेदात्तालव्यान्तः । 'कैवर्तभृत्ययो**र्दासो दासो** बाणा च चेटिका' इति रुद्रादन्त्यान्तः । **'दासो** भृत्ये च शूद्रे च ज्ञानेऽर्थिनि च धीवरे' ॥ (२) ॥*॥ दधाति मत्स्यान् । 'छित्वरछत्वर–' (उ० ३।१) इति निपातितः ॥ (३) ॥*॥ त्रीणि **'धीवरस्य'** ॥

आनायः पुंसि जालं स्यात्

आनाय इति ॥ नयनम् । 'णीञ् प्रापणे' (भ्वा० उ० अ०) । 'श्रिणीभुवः–' (३।३।२४) इति घञ् । आसमन्ताच्चायोऽनेन । आनयन्ति मत्स्यान् अनेन । 'जालमानायः' (३। ३।१२४) इति घञन्तो निपातितो वा ॥ (१) ॥*॥ जले क्षियते । 'शेषे' (४।२।९२) इत्यण् । जलति घनीभवति । 'जल धान्ये' (भ्वा० प० से०) 'ज्वलिति–' (३।१।१४०) इति णः । **'जालं** वृन्दगवाक्षयोः । क्षारकानायदम्भेषु, नीपे ना, स्त्री तु घोषके' इति रभसः ॥ (२) ॥*॥ द्वे **'शणसूत्रजालस्य'** ॥

शणसूत्रं पवित्रकम् ।

शणेति ॥ शणति । 'शण गतौ' (वा० प० से०) पचाद्यच् (३।१।१३४) । शणस्य सूत्रम् ॥ (१) ॥*॥ पवित्रमुपवीतम् । तद्वदिव । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् । पवित्राद्विपरीतलक्षणया संज्ञायां कः (५।३।७४) ॥ (२) ॥*॥ द्वे **'शणसूत्रजालस्य'** ॥

मत्स्याधानी कुवेणी स्याद्

मत्स्येति ॥ मत्स्या आधीयन्तेऽत्र । 'डुधाञ् धारणपोषणयोः' (जु० उ० अ०) । 'करणाधिकरणयोः–' (३।३। ११७) इति ल्युट् ॥ (१) ॥*॥ कुत्सितं वेणन्तेऽस्यां मत्स्याः ।

'वेणृ गतौ' (भ्वा० उ० से०) । 'हलश्च' (३।३।१२१) इति घञ् । गौरादिङीष् (४।१।४१) ॥ (२) ॥*॥ द्वे **'मत्स्यस्थापनपात्रस्य'** ॥

बलिशं मत्स्यवेधनम् ॥ १६ ॥

बलिशमिति ॥ बलिनो मत्स्यान् श्यति । 'शो तनूकरणे' (दि० प० अ०) 'आतोऽनुप–' (३।२।३) इति कः ॥*॥ डलयोरैक्याद् **'बडिशम्'** अपि । स्त्रियां बडिशापचये तु बडिशी ॥ (१) ॥*॥ विध्यतेऽनेन । 'विध विधाने' (तु० प० से०) 'करणा–' (३।३।११७) इति ल्युट् । मत्स्यानां वेधनम् ॥ (२) ॥*॥ द्वे **'मत्स्यवेधनस्य'** ॥

पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः ।
विसारः शकली च

पृथ्विति ॥ पृथूनि रोमाण्यस्य । रोम पक्षोऽत्र–इति स्वामी । वल्कलम्–इति सर्वधरः ॥ (१) ॥*॥ झषति **'झष हिंसार्थः'** (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) यद्वा झष्यते । 'खनो घ च' (३।३।१२५) इति घः । मुकुटस्तु— 'पुंसि' (३।३।११८) इति घः–इत्याह । तन्न । 'हलश्च' (३।३।१२१) इति घञस्तदपवादत्वात् । 'करणाधिकरणयोः' (३।३।११७) इत्यनुवर्तनाच्च । **'झषा** नागबलायां स्त्री, तापमत्स्याटवीषु ना' ॥ (२) ॥*॥ माद्यति । 'मदी हर्षे' (दि० प० से०) । 'ऋतन्यञ्जि–' (उ० ४।२) इति स्यन् । 'मत्स्यो मीनेऽथ पुंभूम्नि देशे' ॥ (३) ॥*॥ मीनाति, मीयते वा । 'मीञ् हिंसायाम्' (क्या० उ० से०) । 'फेनमीनौ' (उ० ३।३) इति निपातितः । '(**मीनो** राश्यन्तरे झषे)' ॥ (४) ॥*॥ विविधं सरति । 'सृ गतौ' (भ्वा० प० अ०) । प्रज्ञादित्वाण्णिनिः । विसारी । 'विसारिणो मत्स्ये' (५।४।१६) इति स्वार्थेऽण् ॥ (५) ॥*॥ अण्डाज्जायते स्म । 'जनी प्रादुर्भावे' (दि० आ० से०) । 'पञ्चम्यामजातौ' (३।२।९८) इति डः । **'अण्डजो** मृगनाभौ, ना सरटेऽहौ खगे झषे' इति [१]मेदिनी ॥ (६) ॥*॥ विशेषेण सरति । 'सृ गतौ' (भ्वा० प० अ०) । **'व्याधिमत्स्यबलेषु'** (वा० ३।३।७) इति घञ् ॥ (७) ॥*॥ शकलमस्यास्ति । 'अत इनिः' (५।२।११५) । **'शकलं** वल्कलेऽर्धे च' इति तालव्यादावजयः ॥ (८) ॥*॥ अष्टौ **'मत्स्यसामान्यस्य'** ॥

अथ गडकः शकुलार्भकः ॥ १७ ॥

अथेति ॥ गडति । 'गड सेचने' (भ्वा० प० से०) । 'कुन् शिल्पिसंज्ञयोः' (उ० २।३२) । (पचाद्यचि ३।१।१३४) (गडोऽपि) । **'गडो** मीनान्तरायययोः' ॥ (१) ॥*॥ शकुलोऽत्र मत्स्यमात्रे,–इति स्वामी । तस्यार्भकः ॥ (२) ॥*॥ द्वे **'मत्स्यविशेषस्य'** ॥

सहस्रदंष्ट्रः पाठीनः

सहेति ॥ सहस्रं दंष्ट्रा यस्य ॥ (१) ॥*॥ पाठीं पृष्ठं नमयति । 'णम प्रह्वत्वे' (भ्वा० प० अ०) । णिच् (३।१।२६) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । 'अन्येषामपि' (६।३।१३७) इति दीर्घः । अवश्यं पठति । 'पठ व्यक्तायां वाचि' (भ्वा० प० से०) । आवश्यके णिनिः (३।३।१७०) । पाठी द्विजः । तस्येन इवापेक्षितः, हव्यकव्ययोः प्रशस्तत्वाद्वा । **'पाठीनो** गुग्गुलद्रुमे । पाठके मीनभेदे च' इति हैमः ॥ (२) ॥*॥ द्वे **'बहुदंष्ट्रस्य मत्स्यस्य'** ॥

उलूपी शिशुकः समौ ।

उलूपीति ॥ उ विस्मयजनकं रूपमस्यास्ति । अत इनिः (५।२।११५) । रलयोरैक्यम् । ओः शंभो रूपं– उरूपमस्यास्ति, इति वा ॥ (१) ॥*॥ शिशुः शिशुमारः । तस्य प्रतिकृतिरिव । **'इवे** प्रतिकृतौ' (५।३।९६) इति कन् । **'शिशुकः** शिशुमारे स्याद्बालकोलूपिनोरपि' ॥ (२) ॥*॥ द्वे **'शोंशु इति ख्यातमत्स्यविशेषस्य'** ॥

नलमीनश्चिलिचिमः

नलेति ॥ नलवनस्थो मीनः । नडाभो मीन इति वा ॥*॥ **'तलमीनः'** इति केचित्पठन्ति ॥ (१) ॥*॥ 'चिल विलसने' (तु० प० से०) । 'इगुपधात्कित्' (उ० ४।१२०) । वीप्सायां द्वित्वम् (८।१।४) । चिलिं चिलिं विलासं मिमीते । 'माङ् माने' (जु० आ० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । (पृषोदरादिः) (६।३।१०९) । त्रीकारोऽदन्तः । **'नलमीनश्चिलीचिमो** बृहन्मीनोऽब्धिजस्तिमिः' इति रत्नमाला । 'लक्ष्मणा सारसी कौञ्ची नलमीन**चिलीचिमिः**' इति बोपालिताच्चतुरिकारवान्मध्यदीर्घ इदन्तोऽपि ॥ (२) ॥*॥ द्वे **'नलवनचारिणो मत्स्यविशेषस्य'** ॥

प्रोष्ठी तु शफरी द्वयोः ॥ १८ ॥

प्रोष्ठीति ॥ प्रकृष्ट ओष्ठोऽस्याः । 'ओत्वोष्ठ्ययोः' (वा० ६।१।९४) इति पररूपम् । 'नासिकोदरौष्ठ–' (४।१।५५) इति 'जातेः' (४।१।६३) इति वा, ङीष् । '[२]द्व्योः' इत्यनेन संबन्धात् 'प्रोष्ठः' अपि ॥ (१) ॥*॥ शफं राति । 'रा दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । 'जातेः' (४।१।६३) इति ङीष् । पुंसि शफरः ॥ (२) ॥*॥ द्वे **'मत्स्यविशेषस्य'** ॥

१—'पाणिनिप्रत्याहार इव महाप्राणसमाश्लिष्टो झषालिङ्गितश्च समुद्रः' इत्याश्चर्यमञ्जरी ॥ अतो मूर्धन्यान्तः—इति मुकुटबुधमनोहरे ॥ २—विश्वकोशे तु **'अण्डजः** कृकलासे स्यात्खगे मीने भुजंगमे । कस्तूर्यामण्डजा प्रोक्ता' इत्युपलभ्यते ॥

१—हैमे तु 'सहस्रदंष्ट्रे वादालः, पाठीने त्रिंशवल्लिकः, शकुले स्यात्कलकः' इति विशेषमत्स्यत्वेनोक्तः ॥ २—पञ्जिकाकृतः 'द्व्योः' इति प्रोष्ठयापि संबध्नन्ति । नैषा ग्रन्थरीतिः, भिन्नपदत्वाद्—इति पीयूषव्याख्या ॥

क्षुद्राण्डमत्स्यसंघातः पोताधानम्

क्षुद्रेति ॥ क्षुद्रादण्डाज्जाता मत्स्याः–क्षुद्राण्डमत्स्याः । तेषां संघातः ॥ (१) ॥*॥ पोते वहित्रे आधीयते । धाञः (जु० उ० अ०) कर्मणि ल्युट् (३।३।११३) यद्वा पोतोऽर्भक आधीयतेऽत्र । अधिकरणे ल्युट् (३।३।११७) ॥ (२) ॥*॥ द्वे **'अण्डादचिरनिर्गतमत्स्यसङ्घस्य'** ॥

अथो झषाः ।

रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ॥ १९ ॥ तिमिंगिलादयश्च

अथविति ॥ अथो झषविशेषा उच्यन्ते । रोहति । 'रुह बीजजन्मनि प्रादुर्भावे च' (भ्वा० प० अ०) 'रुहे रश्च लो वा' (उ० ३।९४) इतीतच् । रोहणम् । घञ् (३।३।१८) । रोहो जातोऽस्य । तारकादित्वात् (५।२।३६) इतच्वा । **'रोहितं** कुङ्कुमे रक्ते ऋजुशकशरासने । पुंसि स्यान्मीनमृगयोर्भेदे लोहितकद्रुमे' ॥ (१) ॥*॥ मज्जति । 'टुमस्जो शुद्धौ' (तु० प० अ०) । 'मद्गुरादयश्च' (उ० १।४१) इति निपातितः ॥ (१) ॥*॥ शाड्यते । 'शाडृ श्लाघायाम्' (भ्वा० आ० से०) । कर्मणि घञ् (३।३।१९) । डलयोरैक्यम् । **'शालो** झषे, धीवर एव दाशः' इत्यूष्मभेदात्तालव्यादिः । ('कैवर्त इव बद्धराजीवोत्पलसालो वसन्तकालः' इति वासवदत्ताश्लेषाद्दन्त्यादिश्च । कैवर्तपक्षे सालो मत्स्यभेदः । वसन्तपक्षे सालं पुष्पम्) । सालं पुष्पे क्लीबं वृक्षे तु पुमान् । 'पुंसि भूरुहमात्रेऽपि **सालो** वरणसर्जयोः' इति रभसे तु दन्त्यादिः । **'शालो** हाले मत्स्यभेदे **शालौ**कस्तत्प्रदेशयोः' इति हैमः ॥ (१) ॥*॥ राजी रेखास्यास्ति । 'अन्यत्रापि दृश्यते' (५।२।१०९) इति वः । 'अथ **राजीवो** मीनसारङ्गभेदयोः । **राजीवमब्जे**' इति हैमः ॥ (१) ॥*॥ शक्नोति गन्तुं वेगेन । 'शक्लृ शक्तौ' (स्वा० प०अ०) । बाहुलकादुलच् ॥ (१) ॥*॥ ताम्यति । 'तमु ग्लानौ' (दि० प० से०) । 'क्रमितमिशतिस्तम्भामत इच्च' (उ० ४।१२२) इतीन् ॥ (१) ॥*॥ तिमिं गिरति । 'गॄ निगरणे' (तु० प० से०) । 'मूलविभुजा–' (वा० ३।२।५) इति कः । 'अचि विभाषा' (८।२।२१) इति लः । 'गिलेऽगिलस्य' (वा० ६।३।७०) इति नुम् ॥ (१) ॥*॥ आदिशब्दात् तिमिंगिलगिलनन्दीवर्तादयः ॥*॥ **'मत्स्यविशेषाणां'** पृथगेकैकम् ॥

अथ यादांसि जलजन्तवः ।

अथेति ॥ यान्ति वेगेन । 'या प्रापणे' (अ० प० अ०) । असुन् (उ० ४।१८९) । बाहुलकादुक् । यद्वा याति । क्विप् (३।२।१७८) यामत्ति । 'अद भक्षणे' (अ० प० अ०) । असुन् (उ० ४।१८९) यां दस्यति वा । 'दसु उपक्षये' (दि० प० से०) । क्विप् (३।२।१७८) । साहचर्यस्य सर्वत्रानियामकत्वात् 'सान्त–' (६।४।१०) इति दीर्घः ॥ (१) ॥*॥ जलानां जन्तवः ॥ (२) ॥*॥ द्वे **'जलचरमात्रस्य'** ॥

तद्भेदाः शिशुमारोद्रशङ्कवो मकरादयः ॥ २० ॥

तद्भेदा इति ॥ तेषां जलजन्तूनां भेदा उच्यन्ते ॥ शिशून् मारयति । 'मृङ् प्राणत्यागे' (तु० आ० अ०) । णिच् (३।२।२६) । 'कर्मण्यण्' (३।२।१) । **'शिशुमारो**ऽम्बुसंभूतजन्तौ तारात्मकाच्युते' इति विश्वमेदिन्यौ ॥१॥*॥ उनत्ति । 'उन्दी क्लेदने' (रु० प० से०) । 'स्फायि–' (उ० २।१३) इति रक् ॥ (१) ॥*॥ शङ्कतेऽस्मात् । 'शकि शङ्कायाम्' (भ्वा० आ० से०) । 'खरुशङ्कुपीयु–' (उ० १।३६) इति निपातितः । **'शङ्कुः** पत्रशिराजाले संख्याकीलकर्शभुषु । यादोऽस्त्रभेदयोर्मेढ्रे' इति हैमः ॥ (१) ॥*॥ कृणाति । 'कॄ हिंसायाम्' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । मनुष्याणां करः । पृषोदरादिः (६।३।१०९) । यद्वा मङ्कते । 'मकि भूषायाम्' (भ्वा० आ० से०) । अच् (३।१।१३४) । आगमशास्त्रस्यानित्यत्वान्न नुम् । मकं राति । 'रा दाने' (अ० प० अ०) । कः (३।२।३) । **'मकरो** निधौ । नक्रे राशिविशेषे च' इति हैमः ॥ (१) ॥*॥ आदिना ग्राहकुम्भीरादयः ॥*॥ **'जलजन्तुविशेषाणां'** पृथक्पृथक् ॥

स्यात्कुलीरः कर्कटकः

स्यादिति ॥ कुलति । 'कुल संस्त्याने' (भ्वा० प० से०) । 'गम्भीरादयश्च' इतीरन् । कौ लीयते । 'लीङ् श्लेषणे' (दि० आ० अ०) । बाहुलकाद् रक् । यद्वा कुलमस्यास्ति । 'अत इनिः' (५।२।११५) । तमीरयति । 'कर्मण्यण्' (३।२।१) । जनकभक्षकत्वात् । लयनम्–लीः । संपदादिः (वा० ३।३।१०८) । कुत्सिता लीः । तां राति वा ॥ (१) ॥*॥ कृणाति । 'कॄ हिंसायाम्' (क्र्या० प० से०) । 'अन्येभ्योऽपि' (३।२।७५) इति विच् । कटति । 'कटे वर्षावरणयोः' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । कर् चासौ कटश्च । 'अहरादीनां पत्यादिषु वा रेफः' (वा० ८।२।७०) ततः स्वार्थे कन् (५।३।७४) । 'कर्क' इति सौत्रो धातुः । 'शकादिभ्योऽटन्' (उ० ४।८१) वा० । कर्कं श्वेतवर्णं टलति । 'टल गतौ' (भ्वा० प० से०) । डः (वा० ३।२।१०१) वा० । **कर्कटः** । 'कुलीरे करणे स्त्रीणां राशौ खगे' इति हैमः ॥ (२) ॥*॥ द्वे **'कुलीरस्य'** ॥

कूर्मे कमठकच्छपौ ।

कूर्म इति ॥ कुत्सितः कौ वा ऊर्मिर्वेगोऽस्य । 'अच्प्रत्यन्वव–' (५।४।७५) इत्यत्र 'अच्' इति योगविभागादच् समासान्तः । **'ऊर्मिः** स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभङ्गयोः' इति रभसः ॥ (१) ॥*॥ काम्यते । 'कमु कान्तौ'

१—वस्तुतस्तु 'गडकः शकुलार्भकः । क्षुद्राण्डमत्स्यसंघातः पोताधानमथो झषाः । सहस्रदंष्ट्रः पाठीनः' इति श्लोकः 'रोहितो मद्गुरः' इति पाठः—इति पीयूषम् ॥

(भ्वा० आ० से०)। 'कमरेठः' (उ० १।१००)। के जले मठति, इति वा। 'मठ मदनिवासयोः' (भ्वा० प० से०)। पचाद्यच् (३।१।१३४)। **'कमठः** कच्छपे पुंसि भाण्डभेदे नपुंसकम्' ॥ (२) ॥*॥ कच्छेन पिबति। 'पा पाने' (भ्वा० प० अ०)। 'सुपि' (३।२।४) इति योगविभागात्कः। **'कच्छपी** वल्लकीभेदे डुलौ क्षुद्रगदान्तरे। पुंसि विध्यन्तरे कूर्मे मल्लबन्धान्तरेऽपि च' इति विश्वमेदिन्यौ ॥ (३) ॥*॥ त्रीणि **'कूर्मस्य'** ॥

ग्राहोऽवहारः

ग्राह इति ॥ गृह्णाति। 'ग्रह उपादाने' (क्र्या० उ० से०) 'विभाषा ग्रहः' (३।१।१४३) इति णः। **'ग्राहो** ग्रहे जलचरे' इति हैमः ॥ (१) ॥*॥ अवहरति। अवपूर्वो हृञ्। 'शाद्यधा–' (३।१।१४१) इति णः। **'अवहारस्तु** युद्धादिविश्रान्तौ ग्राहचौरयोः। निमैत्रणोपनेतव्ये' इति हैमः ॥ (२) ॥*॥ द्वे **'ग्राहस्य'** ॥

नक्रस्तु कुम्भीरः

नक्र इति ॥ क्रामति दूरस्थलम्। 'क्रमु पादविक्षेपे' (भ्वा० प० से०)। 'अन्यत्रापि–' (वा० ३।२।४८) इति डः। 'न भ्राड्–' (६।३।७५) इति नलोपो न **'नक्रं** नासाग्रदारुणोः। **नक्रो** यादसि' इति हैमैः ॥ (१) ॥*॥ कुम्भिनं हस्तिनमीरयति। 'कर्मण्यण्' (३।२।१) ॥ (२) ॥*॥ द्वे **'नक्रस्य'** ॥

अथ महीलता ॥ २१ ॥

गण्डूपदः किंचुलुकः

अथेति ॥ मह्या लतेव। कृशलदीर्घत्वाभ्याम् ॥ (१) ॥*॥ गण्डूो ग्रन्थयः पदान्यस्य ॥ (२) ॥*॥ किंचिच्चुलुम्पति। 'कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थम्' (वा० ३।१।३५) इति वार्तिकनिर्दिष्टश्चुलुम्पधातुः। 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः। 'टेः' (६।४।१४३) इति उकारमकारपकाराणां लोपः। ततः 'संज्ञायां कन्' (५।३।७५) ॥ (३) ॥*॥ त्रीणि **'केचुवा'** इति ख्यातस्य ॥

निहाका गोधिका समे।

निहाकेति ॥ नियतं जहाति भुवम्। 'ओ हश्व' (उ० ३।४४) इति हाकः कन्। बाहुलकान्न ह्रस्वः ॥ (१) ॥*॥ गुध्यति। 'गुध परिवेष्टने' (दि० प० से०)। ण्वुल् (३।१।१३३)। (पचाद्यचि) (३।१।१३४) गोधापि। **'गोधा** तलनिह्राकयोः' ॥ (२) ॥*॥ द्वे **'गोह' 'जलगोधिका'** इति ख्यातायाः ॥

रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः ॥२२॥

रक्तपेति ॥ रक्तं पिबति। 'आतोऽनुप–' (३।२।३) इति कः। **'रक्तपा** स्याज्जलौकायां डाकिन्यां, ना तु राक्षसे' ॥ (१) ॥*॥ जलमोकोऽस्याः। ओक उचः के' (७।३।६४) इति निपातितोऽदन्त ओकशब्दः ॥ (२) ॥*॥ सान्तोऽपि। **'जलोरगी जलोका** तु जलौका च जलौकसि' इति संसारावर्ताद्बहुवचनं प्रायिकम्। 'जलौकापि जलोका स्याज्जलूका जलजन्तुका' इति तारपालः ॥ (३) ॥*॥ त्रीणि **'जलूकायाः'** ॥

मुक्तास्फोटः स्त्रियां शुक्तिः

मुक्तेति ॥ मुक्ताः स्फुटन्त्यत्र। 'स्फुट विकसने' (तु० प० से०)। 'हलश्च' (३।३।१२१) इति घञ् ॥ (१) ॥*॥ शुच्यति, शोचति, शोकति, वा। 'शुच्य अभिषवे' (भ्वा० प० से०)। 'शुच शोके' (भ्वा० प० से०)। शुक्तिः गतौ (भ्वा० प०) वा। क्तिच् (३।३।१७४)। **'शुक्तिः** कपालशकले शङ्खे शङ्खनकेऽपि च। नख्यश्चावर्तदुर्नाममुक्तास्फोटेषु च स्त्रियाम्' ॥ (२) ॥*॥ द्वे **'शुक्तिकायाः'** ॥

शङ्खः स्यात्कम्बुरस्त्रियौ।

शङ्ख इति ॥ शं खनति जनयति। 'खनु अवदारणे' (भ्वा० उ० से०)। 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः। शं खम् अस्य–इति वा। शाम्यत्यलक्ष्मीं वा। 'शमु उपशमे' (दि० प० से०)। अन्तर्भावितण्यर्थः। 'शमेः खः' (उ० १।१०२)। **'शङ्खः** कम्बौ न योषित्, ना भालास्थिनिधिभिन्नखे' ॥ (१) ॥*॥ काम्यते। 'कमु कान्तौ' (भ्वा० आ० से०)। 'जन्वादयश्च' (उ० ४।१०२) इति निपातितः। **'कम्बुर्वलयशङ्खयोः**। गजे शम्बूके कर्चूरे ग्रीवायामलिकेऽपि च' इति हैमः ॥ (२) ॥*॥ एतौ पुंनपुंसके ॥ द्वे **'शङ्खस्य'** ॥

क्षुद्रशङ्खाः शङ्खनकाः

क्षुद्रेति ॥ क्षुद्राश्च ते शङ्खाश्च ॥ (१) ॥*॥ शङ्कते। 'शकि शङ्कायाम्' (भ्वा० आ० से०)। कर्तरि 'अनुदात्ततश्च हलादेः' (३।२।१४९) इति युच्। 'संज्ञायां कन्' (५।३।८५)।—शङ्खस्य नखा इव **(शङ्खनखाः)**—इति तु मुकुटः। शं खनन्ति। 'बहुलमन्यत्रापि' (उ० २।७८) इति युच्। ल्युट् ( ) वा स्वार्थे कन् (५।३।७५)। (शङ्खनकाः)–इत्यन्ये ॥ (२) ॥*॥ द्वे **'सूक्ष्मशङ्खानाम्'** ॥

१—निमत्रणोपनेतव्यम्=शर्करादिस्वादूकृतं भक्ष्यम् ॥ तत्र यथा 'एतस्मिन्विषयावहारविषमे संसारवारांनिधौ' इत्यनेकार्थकैरवाकरकौमुदी ॥ २—अस्याग्रे 'नक्रः कुम्भीरके पुंसि नक्रं तर्णकनीरयोः' इति लिखितमस्ति ॥ परंतु मेदिन्यां द्वितीयचरणे नारशब्दस्यार्थबोधकताया बोधनेन प्रक्षिप्तप्रायम् ॥

१ 'जलौकसेनेव रक्ताकृष्टिनिपुणेन वेश्याजनेन' इति वासवदत्तायाम् 'जलं च तदोकश्चे'ति जलौकः। ततोऽशीआद्यच्वि (५।२।१२७) एकवचनमदन्तत्वं चोपपाद्यम्—इति मुकुटबुधमनोहरे ॥

शम्बूका जलशुक्तयः ॥ २३ ॥

शम्बूका इति ॥ शाम्यति । 'शम उपशमे' (दि० प० से०) । 'उल्लूकादयश्च' (उ० ४।४१) इति निपातितः । 'शम्बूकपिण्याकमधूकफेनः' इत्यमरमालायां पुंलिङ्गः । ('**शम्बूको** गजकुम्भान्ते घोङ्गे च शूद्रतापसे । जलजन्तुविशेषे च) **शम्बूका** न नपुंसके' इति मेदिनेर्द्विलिङ्गता । 'शम्बूकः **शम्बुकश्चैव** पूर्वः कान्तस्तु सर्वदा । कारणेन विना शेषो (**शम्बुः**) दृश्यते ग्रन्थविस्तरे' इत्युत्पलिनी ॥ (१) ॥*॥ जलजाः शुक्तयः ॥ (२) ॥*॥ द्वे '**सर्वजलशुक्तिकानाम्**' ॥

भेके मण्डूकवर्षाभूशालूरप्लवदर्दुराः ।

भेके इति ॥ बिभेति । 'जिभी भये' (जु० प० अ०) । 'इण्भीका–' (उ० ३।४३) इति कन् । 'भेकको मण्डूकमेघयोः' ॥ (१) ॥*॥ मण्डयति जलाशयम् । मण्डते वा । '**मडि** भूषायाम्' (भ्वा० प० से०) । 'शलमण्डिभ्यामूकण्' (उ० ४।४२) । '**मण्डूकी** मण्डूकपर्ण्यां **मण्डूको** भेकशोणयोः' इति हैमः ॥ (२) ॥*॥ वर्षासु भवति । 'भुवः संज्ञान्तरयोः' (३।२।१७९) इति क्विप् । '**वर्षाभूः** स्त्री च शोथघ्न्यां भूलताप्लवयोः पुमान्' इति विश्वमेदिन्यौ ॥ (३) ॥*॥ शाडते । 'शाडृ गतौ' (भ्वा० आ० से०) । 'खर्जिपिञ्जादिभ्य ऊरोलचौ' (उ० ४।९०) इत्यूरः । डलयोरैक्यम् । शालते वा । 'शाल कत्थने' (भ्वा० आ० से०) । 'परिसरक्रकलासखेदसालूर–' इत्यूष्मविवेकाद्दन्त्यादिरपि ॥ (४) ॥*॥ प्लवते । 'प्लुङ् गतौ' (भ्वा० आ० अ०) । अच् (३।१।१३४) '**प्लवः** प्लक्षे प्लुतौ कपौ । शब्दे कारण्डवे म्लेच्छजातौ भेलैकभेकयोः । क्रमनिम्नमहीभागे कुलके जलवायसे' । 'कैवर्तीमुस्तके गन्धतृणेऽपि स्यान्नपुंसकम्' ॥ (५) ॥*॥ दृणाति शब्दैः कर्णौ 'दृ विदारणे' (क्या० प० से०) । '**मुकुरदर्दुरौ**' (उ० १।४०) इति निपातितः । '**दर्दुरैस्तोयदे** भेके वाद्यभाण्डाद्रिभेदयोः । **दर्दुरी** चण्डिकायां स्याद्वामजाले नपुंसकम्' ॥ (६) ॥*॥ षट् '**मण्डूकस्य**' ॥

शिली गण्डूपदी

शिलीति ॥ शिलति । 'शिल उञ्छे' (तु० प० से०) । 'इगुपध–' । (३।१।१३५) इति कः । 'जातेरस्त्री–' (४।१।६३) इति ङीष् । ('**शिल**मुञ्छे स्याद्, गण्डूपद्यां **शिली** मता । स्तम्भशीर्षे **शिलाशिल्यौ, शिला** तु प्रस्तरे मता । तथा मनःशिलायां च द्वाराधःस्थितदारुणि') ॥ (१) ॥*॥ (२) ॥*॥ 'द्वे किंचुलकभार्यायाः'–इति स्वामी । '**क्षुद्रकिंचुलकजातेः**' ॥

भेकी वर्षाभ्वी

भेकीति ॥ 'वर्षाभ्वी' इत्यसाधु । ङीब्विधायकाभावात् स्त्रियामपि 'वर्षाभूः' इत्येव । 'भेक्यां पुनर्नवायां स्त्री **वर्षाभूर्दर्दुरे** पुमान्' इति यादवः । अन्ये तु—गौरादित्वात् (४।१।४१) ङीषमिच्छन्ति । अत एव भागुर्यमरमालयोः 'वर्षाभ्वी' इति दृश्यते ॥२॥*॥ द्वे '**मण्डूक्याः**' । क्षुद्रमण्डूकस्येत्यन्ये ॥

कमठी दुलिः ॥ २४ ॥

कमठीति ॥ 'जातेः–' (४।१।६३) इति 'पुंयोगात्–' (४।१।४८) इति वा ङीष् । कमठी ॥ (१) ॥*॥ दोलति 'दुल उत्क्षेपे' (चु० प० से०) । आधृषीयः । 'इगुपधात्–' (उ० ४।१२०) इति किः । '**दुलिः** स्त्रियाम् । कमठ्यां, ना मुनौ' ॥ (२) ॥*॥ द्वे '**कच्छप्याः**' ॥

महुरस्य प्रिया शृङ्गी

महुरस्येति ॥ मद्गुरो मत्स्यभेदः । योग्यतया सादृश्याद्वा तस्य प्रिया स्त्री शृणाति । 'शृ हिंसायाम्' (क्या० प० से०) । 'शृणातेर्ह्रस्वश्च' (उ० १।१२६) इति गन् ह्रस्वत्वं कित्त्वं नुडागमश्च । 'पुंयोगात्–' (४।१।४८) 'इति जातेः–' (४।१।६३) इति वा ङीष् । 'मद्गुरी' इत्यपि । 'भार्या भेकस्य वर्षाभ्वी शृङ्गी स्यान्मद्गुरस्य तु । शिली गण्डूपदस्यापि दुलिः स्यात्कमठस्य तु' इत्यमरमाला । ('**शृङ्गी** स्वर्णमीनविशेषयोः । विषायामृषभौषध्याम्') ॥ (१) ॥*॥ एकम् '**महुरस्त्रियाः**' ॥

दुर्नामा दीर्घकोशिका ।

दुर्नामेति ॥ दुर्निन्दितं नामास्याः । 'अनो बहुव्रीहेः' (४।१।१२) इति ङीन्न । ('**दुर्नाम** क्लीबमर्शसि । स्याद्दीर्घकोषिकायां स्त्री') ॥*॥ 'ङाबुभाभ्याम्–' (४।१।१३) ॥*॥ 'अन उपधा–' (४।१।२८) इति वा ङीप् । दुर्नाम्नी । क्षुभ्नादित्वात् (८।४।३९) न णत्वम् ॥ (१) ॥*॥ दीर्घः कोशो यस्याः । 'जातेः–' (४।१।६३) इति ङीष् । 'संज्ञायां कन्' (५।३।७५) । 'केऽणः' (७।४।१३) । (मूर्धन्यषान्तौ च) । 'तालव्या मूर्धन्याश्चैते शटी च परिवेशः । विश्वक्सेनो भ्रेशः प्रतिष्कशः कोशविशदौ च' इत्यूष्मविवेकः ॥ (२) ॥*॥ द्वे '**झिनाजी**' इति ख्यातस्यः '**जलूकाकारस्य जलचरस्य**' ॥

१—दैत्यविशेषेऽपि यथा 'ब्रूत बूत भटाः क स क्व स नरः शम्बूकजीवाहरः' इत्यनेकार्थकैरवाकरकौमुदी ॥ २—भीरौ च यथा 'भेकाः केकारवैः पान्थाः' इत्यनेकार्थकैरवाकरकौमुदी । ३—'मण्डूकौ भेकशोणकौ' इति पाठः ॥ ४—'भेलकतैलयोः' इति पाठः ॥ ५—इतःपूर्वम्—'दुर्दरः पर्वते पुंसि त्रिष्वीषद्भिन्नभाजने' इत्यपि लिखितमस्ति । परंतु मेदिनीहैमयोरकारमध्यस्यैव पाठेन समानानुपूर्वीकत्वे पर्वतार्थकतापौनरुक्त्यस्यापि संभवेन न प्रकृतोपयोगि ॥

१—'क्रीडनेति' लिखितमस्ति । परंत्वेतदानुपूर्वीघटितमेदिन्यां विश्वे च 'मुनौ' इत्येवोपलब्धम् ॥

जलाशया जलाधाराः

जलेति ॥ जलम् आशयो हृदयम् अस्य । जलम् आशेते तिष्ठति अत्र, इति वा । 'पुंसि' (३।३।११८) इति घः । '**जलाशयो** जलाधारे स्यादुशीरे नपुंसकम्' ॥ (१) ॥*॥ आश्रियतेऽत्र । 'धृङ् अवस्थाने' (तु० आ० अ०) । 'अध्यायन्याय–' (३।३।१२२) इति घञ् । जलस्याधाराः ॥ (२) ॥*॥ द्वे '**तडागादीनाम्**' ॥

तत्रागाधजलो ह्रदः ॥ २५ ॥

तत्रेति ॥ तत्र तेषु मध्ये । अगाधं जलं यत्र स जलाशयः । ह्रादते । 'ह्राद अव्यक्ते शब्दे' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) पृषोदरादित्वात् (६।३।१०९) ह्रस्वः ॥ (१) ॥*॥ एकम् '**अगाधजलकूपस्य**' ॥

आहावस्तु निपानं स्यादुपकूपजलाशये ।

आहाव इति ॥ आह्वयन्तेऽत्र । 'ह्वेञ् स्पर्धायां शब्दे च' (भ्वा० उ० अ०) । 'निपानमाहावः' (३।३।७४) ॥ (१) ॥*॥ नियतं पिबन्त्यस्मिन् । 'करणा–' इति ल्युट् ॥ (२) ॥*॥ द्वे '**कूपसमीपरचितजलाधारस्य**' ॥

पुंस्येवान्धुः प्रहिः कूप उदपानं तु पुंसि वा ॥ २६ ॥

पुंसीति ॥ अभ्यते । 'अम गत्यादौ' (भ्वा० प० से०) । 'अर्जिदृशिकम्यमि–' (१।२७) इति कुः धुक् च । यद्वा अन्धयति । 'अन्ध दृष्ट्युपघाते' (चु० उ० से०) । मृगय्वादित्वात् (१।३७) कुः ॥ (१) ॥*॥ प्रहियते । 'प्रे हरतेः कूपे' (उ० ४।१३५) इति इः ङिच्च ॥ (२) ॥*॥ कौति । 'कु शब्दे' (अ० प० से०) । 'कुयुभ्यां च' (उ० ३।२७) इति पो दीर्घश्च । कुत्सिता ईषद्वा आपोऽत्र । 'ऋक्पूर–' (५।४।७४) इत्यः । 'ऊदनोः–' (६।३।९८) इत्यत्र दीर्घनिर्देशादन्यत्राप्यत्, इति वा । '**कूपः** कूपक–मृन्मीने गर्तान्धुगुणवृक्षके' ॥ (३) ॥*॥ उदकं पिबन्त्यस्मिन् । अधिकरणे ल्युट् (३।३।११७) । 'उदकस्योदः–' (६।३।५७) ॥ (४) ॥*॥ तु–स्थाने च उचितः ॥*॥ चत्वारि '**कूपस्य**' ॥

नेमिस्त्रिकास्य

नेमिरिति ॥ अस्य कूपस्य । नयन्त्यनया 'नियो मिः' (उ० ४।४३) । '**नेमि**र्ना तिनिशे, कूपत्रिकाचक्रान्तयोः स्त्रियाम्' ॥ (१) ॥*॥ तिस्रोऽस्त्रयोऽस्याः । 'संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु' (५।१।५८) इति कन् । '**त्रिका** कूपस्य नेमौ स्यात्त्रिकं पृष्ठाधरे त्रैये' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ द्वे '**कूपस्यान्तरे रज्ज्वादिधारणार्थदारुयन्त्रस्य**' ॥

वीनाहो मुखबन्धनमस्य यत् ।

वीनाह इति ॥ विनह्यतेऽनेन । 'णह बन्धने' (दि० उ० अ०) । 'हलश्च' (३।३।१२१) इति घञ् । 'उपसर्गस्य घञि' (६।३।१२२) इति दीर्घः ॥ (१) ॥*॥ '**कूपमुखे इष्टकादिभिर्बद्धस्य**' एकम् ॥

पुष्करिण्यां तु खातं स्यात्

पुष्केति ॥ पुष्कराणि सन्त्यस्याम् । 'पुष्करादिभ्यो देशे' (५।२।१३५) इतीनिः । '**पुष्करिणी** नद्यां सरोजिन्यां जलाशये' ॥ (१) ॥*॥ अखानि । 'खनु अवदारणे' (भ्वा० उ० से०) । क्तः (३।२।१०२) । 'जनसनखनाम्–' (६।४।४२) इत्यात्वम् ॥ (२) ॥*॥ द्वे '**समचतुरस्रखातस्य**' ॥

अखातं देवखातकम् ॥ २७ ॥

अखातमिति ॥ खाताद्भिन्नम् ॥ (१) ॥*॥ देवेन खातम् ॥ (२) ॥*॥ 'अखातो देवखातकः' इति पुंस्काण्डेऽमरदत्तात् पुंस्यपि ॥*॥ द्वे '**अकृत्रिमजलाशयस्य**' ॥ देवद्वारस्थजलाशयस्येत्यन्ये ॥

पद्माकरस्तडागोऽस्त्री

पद्मेति ॥ पद्मानामाकरः ॥ (१) ॥*॥ तड्यते । 'तड आघाते' (चु० प० से०) । 'तडागादयश्च' इति निपातितः । '**तडागस्तु** जलाधारविशेषे यंत्रकूपके' इति मेदिनी । पिनाकादित्वात् (उ० ४।११५) '**तडाकः**' इति कश्चित् ॥*॥ तटम् अकति, अगति वा । 'अक अग कुटिलायां गतौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) । (**तटाकः, तटागः**) इत्येके ॥ (२) ॥*॥ द्वे '**सपद्मागाधजलाशयस्य**' ॥

कासारः सरसी सरः ।

कासार इति ॥ कासते । 'कासृ शब्दे' (भ्वा० आ० से०) । 'तुषारादयश्च' (उ० ३।१३९) इत्यारन् । यदा ईषत् सारोऽस्य । 'ईषदर्थे च' (६।३।१०५) इति कोः कादेशः । कासोऽस्यास्तीति वा । अर्शआद्यच् । कासमृच्छति 'ऋ गतौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) इति वा ॥ (१) ॥*॥ स्रियते 'सृ गतौ' (भ्वा० प० से०) । कर्मण्यसुन् (उ० ४।१८९) । ('**सरो** नीरतडागयोः') ॥ (२) ॥*॥ तत एव महत्त्वे गौरादित्वात् (४।१।४१) ङीष् । ('**सरसी** विश्वकासारे') ॥३॥*॥ त्रीणि '**कृत्रिमपद्माकरस्य**' । पद्मापि सरोमात्रस्येत्यन्ये ॥

वेशन्तः पल्वलं चाल्पसरः

वेशन्त इति ॥ विशन्त्यत्र मेकादयः । 'विश प्रवेशने'

१—अत्र तु 'अन्यलिङ्गकम्' इति लिखितमासीत् । परं तु मूलमेदिनीदृष्टं हैमविश्वानुगुणं गृहीतम् ॥ २—मृन्माने काचभाण्डे यथा–'कूपेषु रूपे क्षिप गन्धतैलम्' इत्यनेकार्थकैरवाकरकौमुदी ॥ ३—उदपानस्य त्वन्तत्वात् 'पुंसि वा' इत्यनेन संबन्धः । पूर्वेषां तु 'पुंस्येव' इत्यनेन—इति मुकुटबुधमनोहरे ॥ ४—त्रये यथा 'तत्रापि त्रिकदर्शनम्' इत्यनेकार्थकैरवाकरकौमुदी ॥

१—विश्वे तु 'कटकेऽपि च' इति दृश्यते । मेदिनीमूलपुस्तके तु 'यत्रकूटके' इत्युपलभ्यते ॥

(तु० प० अ०)। 'जृविशिभ्यां झच्' (उ० ३।१२६) ॥ (१) ॥*॥ पलति पल्यते वा । 'पल गतौ' (भ्वा० प० से०)। 'सानसिपर्णसि'– (उ० ४।१०७) इति वलच् । 'वेशन्तः पल्वलोऽस्त्री' इति वाचस्पतिः ॥ (२) ॥*॥ अल्पं च तत्सरश्च ॥ (३) ॥*॥ त्रीणि **'स्वल्पसरोवरस्य'** ॥

वापी तु दीर्घिका ॥ २८ ॥

वापीति ॥ उप्यते पद्माद्यस्याम् । 'डुवप् बीजतन्तुसंताने' (भ्वा० उ० अ०)। 'वसिवपियजिराजि–' (उ० ४।१२५) इतीन् । 'कृदिकारात्–' (ग० ४।१।४५) इति वा ङीष् । 'वाप्यां वापिरपि स्मृता' इति द्विरूपकोषः ॥ (१) ॥*॥ दीर्घैव । 'संज्ञायां कन्' (५।३।७५) ॥ (२) ॥*॥ द्वे **'वाप्याः'** ॥

खेयं तु परिखा

खेयमिति ॥ खन्यते । 'खनु अवदारणे' (भ्वा० उ० से०)। 'ई च खनः' (३।१।१११) इति यत् ॥ (१) ॥*॥ परितः खन्यते, इति । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः ॥ (२) ॥*॥ द्वे **'दुर्गादिपरितः खातस्य'** ॥

आधारस्त्वम्भसां यत्र धारणम् ।

आधार इति ॥ आधियते जलमस्मिन् । 'अध्यायन्याय–' (३।३।१२२) इति घञ् । **'आधार**श्चाधिकरणेऽप्यालवालेऽम्बुधारणे' ॥ (१) ॥*॥ एकं **'बांध'** इति ख्यातस्य ॥

स्यादालवालमावालमावापः

स्यादिति ॥ आ समन्ताज्जलस्य लवम् आलाति । 'ला आदाने' (अ० प० अ०) । मूलविभुजादित्वात् (वा० ३।२।५) कः ॥*॥ लवमालाति । तद्भिन्नम् । नञ्समासे (**अलवालः**) ह्रस्वादिः–इत्यन्ये ॥ (१) ॥*॥ आवलतेऽम्भोऽनेन । 'वल संवरणे' (भ्वा० प० से०) 'अलश्च' (३।३।१२१) इति घञ् । आ ईषत् वाला वृक्षा अत्र वा ॥ (२) ॥*॥ आ वपन्ति जलमत्र । 'डुवप् बीजतन्तुसंताने' (भ्वा० उ० से०)। 'हलश्च' (३।३।१२१) इति घञ् । **'आवापो** भाण्डपचने परिक्षेपालवालयोः' ॥ (३) ॥*॥ त्रीणि **'वृक्षमूलकृतजलाधारस्य'** ॥

१—'इहैव जम्बूतरुमालवालवत्परीयुषोऽम्भरतेऽब्धिना वृते' इति प्रयोगादीर्घादिः ॥ २—'अलवारोधिषु पयःसु बिभ्रतः सपलाशिराशिरिव मूलसंततिः' इति माघाद्ध्रस्वादिः—इति मुकुटबुधमनोहरे ॥ ३—भाण्डपचनमापाकस्थानम् । तत्र यथा—'आवापधूमपरिधूसरमन्तरिक्षम्' ॥ अरित्विन्तायामपि यथा 'परं प्रत्यावापः फलति कृतसेकस्तरुरिव' ॥ वलयेऽपि यथा 'प्रकोष्ठः शुशुभे' तस्या गतोऽप्यावापशून्यताम्'—इत्यनेकार्थकैरवाकरकौमुदी ॥ ४—'भाण्डवपने' इति पाठः ॥

अथ नदी सरित् ॥ २९ ॥

तरङ्गिणी शैवलिनी तटिनी ह्रदिनी धुनी ।
स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा ॥ ३० ॥

अथेति ॥ नदति । 'णद अव्यक्ते शब्दे' (भ्वा० प० से०)। पचादिषु (३।१।१३४) 'नदट्' इति टित्त्वनिपातनात् 'टिड्ढा–' (४।१।१५) इति ङीष् । (**'नदी** सरिति, शोणादौ ना') ॥ (१) ॥*॥ सरति । 'सृ गतौ' (भ्वा० प० से०)। सरतेरिनिः (उ० १।९७) ॥ (२) ॥*॥ तरङ्गाः सन्त्यस्याम् । अत इनिः (५।२।११५) ॥ (३) ॥*॥ शैवलमस्त्यस्याम् ॥ (४) ॥*॥ तटमस्त्यस्याः ॥ (५) ॥*॥ ह्रदाः सन्त्यस्याम् । **'ह्रादिनी'** इत्यन्ये ॥ (६) ॥*॥ धुनोति वेतसादीन् । क्विप् (३।२।१७८) पृषोदरादित्वात् (६।३।१०९) नुक् । नान्तत्वान्ङीप् (४।१।५) ॥ (७) ॥*॥ स्रोतांसि सन्त्यस्याम् । मतुप् (५।२।९४) ॥*॥ 'अस्माया–' (५।२।१२१) इति विनौ तु **'स्रोतस्विनी'** इत्यपि ॥ (८) ॥*॥ द्वीपमस्त्यस्याम् । मतुप् (५।२।९४) ॥ (९) ॥*॥ स्रवति । 'लटः शतृ–' (३।२।१२४) । 'उगितश्च' (४।१।६) इति ङीप् । 'शप्श्यनोः–' (७।१।८१) इति नुम् ॥ (१०) ॥*॥ निम्नं गच्छति । 'गम्लृ गतौ' (भ्वा० प० अ०)। 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः ॥ (११) ॥ अपां समूह आपम् । तेन गच्छति । डः (वा० ३।२।४८) ॥–॥ अप गच्छति । डः (वा० ३।२।१०१) । ह्रस्वादिरपि । 'विद्यादगारमागार-**मपगा**मापगामपि' इति द्विरूपकोषः ॥ (१२) ॥*॥ द्वादश **'नद्याः'** ॥

गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा ।
भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि ॥ ३१ ॥

गङ्गेति ॥ गच्छति । 'गत् गम्यद्योः' (उ० १।११३) (१) ॥*॥ विष्णुः पदं स्थानं यस्याः । गौरादिः (४।१।४१)। **'विष्णुपदं** नभोऽब्जयोः **विष्णुपदस्तु** क्षीरोदे **विष्णुपदी** सुरापगा । (संक्रान्तिर्द्वारिका चापि)' इति हैमः ॥ (२) ॥*॥ जह्नो राजर्षेस्तनया ॥ (३) ॥*॥ सुराणां निम्नगा । क्षुभ्नादिः (८।४।३९) ॥ (४) ॥*॥ भगीरथस्येयम् । 'तस्येदम्' (४।३।१२०) इत्यण् ॥ (५) ॥*॥ त्रीन् पथो गच्छति । डः (वा० ३।२।४८) यद्वा त्रयाणां पथां समाहारः त्रिपथम् । तेन गच्छति । डः (३।२।४८) ॥ (६) ॥*॥ त्रीणि स्रोतांसि यस्याः, (**'त्रिस्रोता** जह्नुकन्यायां स्रोतस्त्यन्तरे स्त्रियाम्') (७) ॥*॥ भीष्मं सूते । 'षूङ् प्राणिप्रसवे' (अ० आ० अ०)। क्विप् (३।२।१७८) ॥ (८) ॥*॥ अष्टौ **'भागीरथ्याः'** ॥

१—'तुहिनाचल इव पुण्यभागीरथीसहितो नलः' इति दमयन्तीश्लेषः ॥ २—तथा च भारते—'क्षितौ तारयते मर्त्यान्नागांस्तारयतेऽप्यधः । दिवि तारयते देवांस्तेन त्रिपथगा स्मृता' इति—इति मुकुटः ॥

कालिन्दी सूर्यतनया यमुना शमनस्वसा ।

कालिन्दीति ॥ कलिन्दस्येयम् । 'तस्येदम्' (४।३।१२०) इत्यण् ॥ (१) ॥*॥ सूर्यस्य तनया ॥ (२) ॥*॥ यच्छति । 'यम उपरमे' (भ्वा० प० अ०) । 'अर्जियमिशीङ्भ्यश्च' (उ० ३।६१) इत्युनन् ॥ (३) ॥*॥ शमनस्य स्वसा ॥ (४) ॥*॥ चत्वारि **'यमुनायाः'** ॥

रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका ॥ ३२ ॥

रेवेति ॥ रेवते । 'रेवृ प्लवगतौ' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) ॥ (१) ॥*॥ नर्म ददाति द्यति वा । 'डुदाञ् दाने' (जु० उ० अ०) । 'दो अवखण्डने' (दि० प० से०) वा । 'आतोऽनुप–' (३।२।३) इति कः ॥ **'नर्मदः** केलिसचिवे **नर्मदा** सरिदन्तरे' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ सोमात्सोमवंशजात् पुरूरवस उद्भवति । तेनावतारितत्वात् । यद्वा सोमोऽमृतमुद्भवत्यस्याः । स्वर्गप्रदत्वात् । अप् (३।३।५७) । सोमाद्वुद्राद्भवति । पचाद्यच् (३।१।१३४) ॥ (३) ॥*॥ मेकलस्य ऋषेरदेर्वा कन्यका ॥ (४) ॥*॥ चत्वारि **'नर्मदायाः'** ॥

करतोया सदानीरा

करेति ॥ करस्य तोयम् । तदस्त्रास्ति । अर्शआद्यच् (५।२।१२७) । गौरीविवाहे शंकरहस्तच्युतम् ॥ (१) ॥*॥ सदा नीरं यस्याः । 'प्रथमं कर्कटे देवीं द्वयहं गङ्गा रजस्वला । सर्वा रक्तवहा नद्यः करतोयाम्बुवाहिनी' इति स्मृतेः ॥ (२) ॥*॥ द्वे **'गौरीविवाहे कन्यादानोदकाज्जातनद्याः** ॥

बाहुदा सैतवाहिनी ।

बाहुदेति ॥ बाहुं छिन्नं दत्तवती लिखितस्य ऋषेः । 'डुदाञ्' (जु० उ० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । यद्वा बहुदस्य कार्तवीर्यस्येयम् । तेनावतारितत्वात् । 'तस्येदम्' (४।३।१२०) इत्यण् । अजादित्वात् (४।१।४) टाप् ॥ (१) ॥*॥ सितानि वाहनानि यस्यार्जुनस्य । तस्येयम् । यद्वा सितस्यार्जुनस्येयम् । सैती चासौ वाहिनी नदी च ॥ (२) ॥*॥ द्वे **'कार्तवीर्यावतारितनद्याः** ॥

शतद्रुस्तु शुतुद्रिः स्याद्

शतेति ॥ शतधा द्रवति । 'द्रु गतौ' (भ्वा० प० अ०) । 'हरिमितयोर्द्रुवः' (उ० १।३४) 'शते च' (उ० १।३५) इत्युडिंस् ॥ (१) ॥*॥ शु पूजितं तुदति । 'तुद व्यथने' (तु० उ० अ०) 'इगुपधात्कित्' (उ० ४।१२०) इतीन् । बाहुलकाद्धक् । 'इमं मे गङ्गे यमुने सरस्वति शुतुद्रि' इति हि श्रुतिः । यत्तु मुकुटः—शतद्रुरेव पृषोदरादित्वात् (६।३।१०९) आदिवर्णविकारे 'शतद्रुः' इति स्वामी, शितं तीक्ष्णं द्रुता शितद्रुः इति कौमुदी, इत्याह । तच्च । 'एतदबुध्यमानाः शितद्रुः सितद्रुर्वेत्याहुः' इत्यनेन (स्वामिग्रन्थेन) तेनास्वार्थस्य दूषितत्वात् । व्युत्पत्त्यन्तरस्य कृतत्वाच्च ॥ (२) ॥*॥ द्वे **'शतद्रोः'** ॥

विपाशा तु विपाट् स्त्रियाम् ॥३३॥

विपाशेति ॥ पाशं विमोचयति । 'सत्यापपाश–' (३।१।२५) इत्यादिना 'पाशान्मोचने' इति णिच् । पचाद्यच् (३।१।१३४) ॥ (१) ॥*॥ तस्मादेव 'क्विप् च' (३।२।७६) इति क्विपि विपाट् ॥ (२) ॥*॥ द्वे **'पापमोचिन्याः'** ॥

शोणो हिरण्यबाहुः स्यात्

शोण इति ॥ शोणति । 'शोणृ वर्णगत्योः' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । **'शोणः** कृशानौ स्योनाके लोहिताश्वे नदे पुमान् । त्रिषु कोकनदच्छाये' ॥ (१) ॥*॥ हिरण्यं बाह्वास्य ॥*॥ हिरण्यं बहति । 'कर्मण्यण्' (३।२।१) अदन्तः (**हिरण्यवाहः**) ॥ (२) ॥*॥ द्वे **'नरविशेषस्य'** ॥

कुल्याल्पा कृत्रिमा सरित् ।

कुल्येति ॥ कुले प्राणिगणे कुटुम्बे दांपत्ये वा साधुः 'तत्र साधुः' (४।४।९८) इति यत् । **'कुल्या** नदी **कुल्य**मस्थि **कुल्या** वारिप्रणालिका' इति धरणेर्नदीमात्रेऽपि । (**'कुल्यं** स्यात्कीकसेऽप्यष्टद्रोणीशूर्पामिषेषु च । **कुल्या** पयःप्रणाल्यां च नद्यां जीवन्तिकौषधौ । कुलोद्भवे कुलहिते त्रिषु मान्ये पुनः पुमान्') ॥ (१) ॥*॥ एकं **'कृत्रिमस्वल्पनद्याः'** ॥

शरावती वेत्रवती चान्द्रभागी सरस्वती ॥ ३४ ॥
कावेरी

शरावतीति ॥ शराः सन्त्यस्याम् । मतुप् (५।२।९५) । 'शरादीनां च' (६।३।१२०) इति दीर्घः ॥ (१) ॥*॥ वेत्रमस्त्यस्याम् । मतुप् (५।२।९४) ॥ (१) ॥*॥ चन्द्रभागयोः पर्वतयोरियम् । तत्प्रभवत्वात् । 'तस्येदम्' (४।३।१२०) इत्यण् । 'टिड्ढा–' । (४।१।१५) इति ङीप् प्राप्तः 'चन्द्रभागाच्चयाम्' (४।१।४५) इति वाह्वादिगणसूत्रान्न भवति । स्वरूपयोरविशेषात् । **'तापी तु तपती सैत्या, चान्द्रभागी तु चन्द्रिका। चान्द्रभागा, शारदा** तु कश्मीरेषु सरस्वती' इति शब्दार्णवः । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । **'चन्द्रभागा चान्द्रभागा चान्द्रभागी** च सा मता । **चन्द्रभागी** च सैवोक्ता' इति द्विरूपकोषः ॥ (१) ॥*॥ सरांसि सन्त्यस्याम् । मतुप् (५।२।९४) । **'सरस्वांस्तु** नदे वार्धौ नाऽन्यवद्रसिके, स्त्रियाम् ।

१—खमध्येऽपि । तथा च महाकविप्रयोगः—'यन्मेखला भवति मेखलशैलपुत्री'—इति पञ्जिकासर्वधरादयः—इति मुकुटः ॥ २—फलितार्थकथनमेतत् । विग्रहस्तु सिताश्च ते वाहाश्च ते सन्त्यस्यासौ सितवाही अर्जुनः । तस्येयम्—इति बोध्यः ॥ यथाच्युतस्यैव व्याख्यानत्वे उपोत्तमे इकाराश्रवणानापत्तिः ॥

१—'पशुपतिजटाबन्ध इव चन्द्रभागालंकृतो देशः' इति दमयन्तीश्लेषः ॥ २—पक्षे टाप्—इति मुकुटः ॥

वाणी-स्त्रीरत्नवाग्देवी-गो-नदीषु नदीभिदि । मनुपत्न्यामपि' ॥ (१) ॥*॥ कस्य जलस्य वेरं शरीरम् । तस्येयम् । ईषद्वेरमस्या वा । **'कावेरी** स्यात्सरिद्भेदे पण्यनारीहरिद्रयोः' ॥ (१) ॥*॥ **(नदीविशेषाणां पृथक्पृथक्) ॥**

सरितोऽन्याश्च

सरित इति ॥ अन्याः कौशिकी-गण्डकी-चर्मण्वती-गोदावर्यादयः ॥

संभेदः सिन्धुसंगमः ।

समिति ॥ संभिद्यन्ते मिलन्त्यत्र । 'भिदिर् विदारणे' (रु० उ० अ०) । 'हलश्च' (३।३।१२१) इति घञ् । **'संभेदः** स्फुटने सङ्गे' ॥ (१) ॥*॥ सिन्ध्वोः संगमः ॥*॥ एकं **'नद्यादिसंगमस्य' ॥**

द्वयोः प्रणाली पयसः पदव्याम्

द्वयोरिति ॥ नल्यते । 'णल बन्धने' (भ्वा० प० से०) । कर्मणि घञ् (३।३।११९) । 'उपसर्गात्–' (८।४।१४) इति णत्वम् । गौरादिङीष् (४।१।४१) ॥ (१) ॥*॥ **'कृत्रिमजलनिःसरणमार्गस्य'** एकम् ॥

त्रिषु तूत्तरौ ॥ ३५ ॥

देविकायां सरय्वां च भवे दाविकसारवौ ।

त्रिष्विति ॥ दीव्यति । 'दिवु क्रीडादौ' (दि० प० से०) । ण्वुल् (३।१।१३३) । देविकायां नद्याम् । सरति । 'सर्तेरयुः (उ० ३।२२) । 'अयुः' इत्येके । सरय्वां च भवे । 'तत्र भवः' (४।३।५३) इत्यण् । 'देविकाशिंशपा–' (७।३।१) इत्यचामादेरात्त्वम् । 'दाण्डिनायन–' (६।४।१७४) इति लोपः । स्त्रियां 'टिड्ढा–' (४।१।१५) इति ङीप् ॥ (१) ॥*॥ **'देविकासरयूद्भवयोः'** क्रमेणैकैकम् ॥

सौगन्धिकं तु कह्लारम्

सौगन्धिकमिति ॥ सुगन्ध्येव । स्वार्थे 'विनयादिभ्यष्ठक्' (५।४।३४) । शोभनो गन्धः प्रयोजनमस्य । 'प्रयोजनम्' (५।१।१०९) इति ठक्, इति वा । **'सौगन्धिकं** तु कह्लारे पद्मरागे च कत्तृणे । (पुंलिङ्गो गन्धपाषाणे सुगन्धव्यवहारिणि') ॥ (१) ॥*॥ कस्य जलस्य हार इव । के ह्लादते वा । अच् (३।१।१३४) । पृषोदरादिः (६।३।१०९) ॥ (२) ॥*॥ द्वे **'शुक्लकह्लारस्य'** । 'मुण्डी' इति ख्यातस्य इत्यन्ये ॥

हल्लकं रक्तसंध्यकम् ॥ ३६ ॥

हल्लकमिति ॥ हल्लति । 'हल्ल विकसने' ( ) । ण्वुल् (३।१।१३३) । यद्वा हलनम् । संपदादिः (वा० ३।३।१०८) । हलं लाति 'ला दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । 'संज्ञायां कन्' (५।३।७५) ॥ (१) ॥*॥ रक्ते संध्येव । इवार्थे कन् (५।३।९६) 'केऽणः' (७।४।१३) । रक्तान् संधीन् अकति । 'अक कुटिलायां गतौ' (भ्वा० प० से०) मूलविभुजादिः (वा० ३।२।५) इति वा ॥ (२) ॥*॥ द्वे **'रक्तकह्लारस्य'** द्वे रक्तवर्णत्रिकालविकासितपुष्पस्य वा ॥

स्यादुत्पलं कुवलयम्

स्यादिति ॥ उपलति । 'पल गतौ' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) ॥ (१) ॥*॥ कोर्वलयमिव । शोभाकरत्वात् । 'कुवलं तूत्पलं **कुवम्**' इति त्रिकाण्डशेषः । तत्र कौ वलते । 'वल संवरणे' (भ्वा०आ०से०) । पचाद्यच् (३।१।१३) । (**'कुवलं** चोत्पले मुक्ताफलेऽपि बदरीफले') ॥*॥ 'अन्येभ्योऽपि–'(वा०३।२।१०१) इति डे कुवम् । यद्वा कुवते । 'कूङ् शब्दे' (तु०आ०से०) कुटादिः । पचाद्यचि (३।१।१३४) उवङ् (६।४।७७) ॥ (२) ॥*॥ द्वे **'कमलकुमुदादीनां'** सामान्येन । अत एव 'इन्दीवरे मांसशून्ये **उत्पलं** कुष्टभूरुहे' इति रभसः, 'श्यामं शितिकण्ठनीलं **कुवलय**मिन्दीवरं च नीलाब्जम्' इति नाममाला च ॥

अथ नीलाम्बुजन्म च ।

इन्दीवरं च नीलेऽस्मिन्

अथेति ॥ नीलं च तदम्बुजन्म च ॥ (१) ॥*॥ इन्दति । 'इदि परमैश्वर्ये' (भ्वा० प० से) । इन् (उ० ४।११८) । 'कृदिकारात्–' (ग० ४।१।४५) इति ङीष् । इन्दी लक्ष्मीः । तस्या वरमिष्टम् । **'इन्दीवरं** कुवलये शतावर्यां च योषिति' ॥*॥ 'कुवलयं स्या**दिन्दीवार**मित्यपि' इति व्याडेरिन्दीवारमपि ॥ (२) ॥*॥ द्वे **'नीलोत्पलस्य' ॥**

सिते कुमुदकैरवे ॥ ३७ ॥

सिते इति ॥ कौ मोदते । 'मुद हर्षे' (भ्वा०आ०से०) । मूलविभुजादिः (वा० ३।२।५) । 'इगुपध–' (३।१।१३६) इति को वा । **'कुमुदं** कैरवे रक्तपद्मे, स्त्री कुम्भिकोषधौ । गम्भार्यां, पुंसि दिङ्नागे नागशाखामृगान्तरे' ॥*॥ (क्विपि (३।२।१७८) कुमुद् । **'कुमुद्** त्रिषु स्यात्कुपणे कैरवे तु नपुंसकम्' इति मेदिनी) ॥ (१) ॥*॥ के जले रौति । 'रु शब्दे' (अ० प० अ०) । पचाद्यच् (३।१।१३४) 'तत्पुरुषे कृति–' (६।३।१४) इत्यलुक् । केरवस्य हंसस्येदं प्रियम् । 'कैरवं चैन्द्रकान्तं गर्दभं कुमुदं कुमुदे' इति माधवः । (**'कैरवं** कितवे रिपौ । नपुंसकं च कुमुदे, चन्द्रिकायां तु कैरवी) । **'चन्द्रकान्तं** तु कैरवे । चन्द्रकान्तो रत्नभेदे ॥ (२) ॥*॥ द्वे **'शुक्लोत्पलस्य' ॥**

१—कुवलयं चन्द्रविकासि, पद्मं तु सूर्यविकासि, इत्यनयोर्भेदः । 'इन्दोरस्य च मण्डलं कुवलयालंकारकारि ध्रुवम्' इति लक्ष्यसंवादोऽपि —इति बुधमनोहरौ । २—नन्वेवं कथमुत्पलमित्युक्ते नीलोत्पलादिष्वेष बुद्धिर्जायते, न पद्मादौ इति चेत् ॥ उच्यते । यथा सामान्येऽपि धान्यार्थे 'धान्यम्' इत्युक्ते कलमादिष्वेव बुद्धिर्भवति, न मुद्गादौ, एवमिहाप्यदोष इति सर्वधरादयः इति मुकुटः ॥ ३—'गन्धकान्तम्'—इति लिखितम् ॥

शालूकमेषां कन्दः स्याद्

शालूकमिति ॥ एषां सौगन्धिकादीनां कन्दो मूलम् । शल्यते, शलति वा 'शल चलनसंवरणयोः' (भ्वा० आ० से०) । 'शलिमण्डिभ्यामूकण्' (उ० ४।४२) वृद्धिः (७।२।११६) च ॥ (१) ॥*॥ एकम् **'उत्पलकन्दस्य'** ॥

वारिपर्णी तु कुम्भिका ।

वारीति ॥ वारिणि पर्णान्यस्याः । 'पाककर्ण–' (४।१।६४) इति ङीष् । यद्वा वारि पिपर्ति । 'पॄ पालनपूरणयोः' (जु० प० से०) । 'धापॄवस्यज्यतिभ्यो नः' (उ० ३।६) । 'जातेः–' (४।१।६३) इति । ङीप् । अत एव 'कुम्भीको वारिपर्णः स्यात्–' इत्येके पठन्ति ॥ (१) ॥*॥ कुम्भोऽस्त्यस्याः । ठन् (५।२।११५) ॥ (२) ॥*॥ द्वे **'जलकुम्भिकायाः'** ॥

जलनीली तु शेवालं शैवलः

जलेति ॥ जलं नीलयति । 'णील वर्णे' (भ्वा० प० से०) णिच् (३।१।२५) । 'कर्मण्यण्' (३।२।१) ॥ (१) ॥*॥ जले शेते तिष्ठति । 'शीङो वलञ्वलन्वालनः' (उ० ४।३८) **'शेवलश्चैव शेवालः शैवलो** जलनीलिका' (इति वाचस्पतिः) ॥ (२) ॥*॥ (३) ॥*॥ त्रीणि **'शैवालस्य'** ॥

अथ कुमुद्वती ॥ ३८ ॥

कुमुदिन्याम्

अथेति ॥ कुमुदान्यत्र देशे सन्ति 'कुमुदनडवेतसेभ्यो ड्मतुप्' (४।२।८७) 'झयः' (८।२।१०) इति वत्वम् । (**'कुमुद्वती** कैरविण्यां दयितायां कुशस्य च') ॥ (१) ॥*॥ 'पुष्करादिभ्यः–' (५।२।१३५) इतीनौ कुमुदिनी ॥ (२) ॥*॥ द्वे कुमुदयुक्तदेशस्य । कुमुदलतायां इत्यन्ये ॥

नलिन्यां तु बिसिनीपद्मिनीमुखाः ।

नलिन्यामिति ॥ नडाः सन्त्यत्र । 'पुष्करादिभ्यः–' (५।२।१३५) इतीनिः । डलयोरैक्यम् । यद्वा नलमत्रास्ति । 'खलादिभ्यः' (वा० ४।२।५१) इतीनिः (**'नलः** पोटगले राज्ञि पितृदेवे कपीश्वरे ।)' **'नली** मनःशिलायां तु नलिनेऽपि **नलं** मतम्' इति विश्वः । **नलिनी** पुनः । पद्माकरे गङ्गाब्जिन्योः' इति हैमः ॥ (१) ॥*॥ बिसमस्त्यस्याः । पूर्ववदिनिः (वा० ४।२।५१) ॥ (२) ॥*॥ एवं पद्मिनी । मुखशब्दाद्यर्थात् मृणालिनी कमलिनी पुटकिनीत्यादयः । **'पद्मिनी** पद्मसंघाते स्त्रीविशेषे सरोऽम्बुजे' इति मेदिनी । **पद्मिनी** योषिदन्तरे । 'अब्जेऽब्जिन्यां सरस्यां च' इति हैमः ॥ (३) ॥*॥ (त्रीणि **'पद्मसंघातस्य** कमलिन्यां इत्यन्ये) ॥

वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ॥ ३९ ॥
सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ।
पङ्केरुहं तामरसं सारसं सरसीरुहम् ॥ ४० ॥
बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च ।

वेति ॥ पद्यते । 'पद गतौ' (दि० आ० अ०) । 'अर्तिस्तुसु–' (उ० १।१४०) इति मन् । **'पद्मोऽस्त्री** पद्मके व्यूहनिधिसंख्यान्तरेऽम्बुजे । ना नागे, स्त्री फञ्जिकाश्रीचार्वाटीपन्नगीषु च' ॥ (१) ॥*॥ नलति । 'णल गन्धे' (भ्वा० प० से०) इनन् (उ० २।४९) **'नलिनं** नलिकातोयाम्बुजेषु' ॥ (२) ॥*॥ अरं शीघ्रं लिप्सां विन्दति । 'गवादिषु विन्देः–' (वा० ३।१।३८) इति शः । 'शे मुचादीनाम्' (७।१।५९) इति नुम् । अराकाराणि पत्राणि विन्दति वा ॥ (३) ॥*॥ महच्च तदुत्पलं च । **'उत्पलं** कुष्ठभूरुहे । इन्दीवरे मांसशून्ये' इति हैमः ॥ (४) ॥*॥ सहस्रं पत्राण्यस्य ॥ (५) ॥*॥ कं जलमलति । 'अल भूषणादौ' (भ्वा० प० से०) । मूलविभुजादित्वात् (वा० ३।२।५) कः । यद्वा काम्यते । 'कमु कान्तौ' (भ्वा० आ० से०) । 'वृषादिभ्यः' (उ० १।१०६) इति कलच् । **'कमलं** क्लोम्नि भेषजे । पङ्कजे सलिले ताम्रे **कमलस्तु** मृगान्तरे । **कमला** श्रीवरनार्योः' इति हैमः ॥ (६) ॥*॥ शतं पत्राण्यस्य । **'शतपत्रः** शिखण्डिनि । दार्वाघाटे सारसे च कमले तु नपुंसकम्' इति विश्वमेदिन्यौ ॥ (७) ॥*॥ कुशे जले शेते । 'अधिकरणे शेतेः' (३।२।१५) इत्यच् । 'शयवास–' (६।३।१८) इत्यलुक् ॥ (८) ॥*॥ पङ्के रोहति । 'रुह प्रादुर्भावे' (भ्वा० प० अ०) । 'इगुपध–' (३।१।१३६) इति कः । 'तत्पुरुषे कृति' (६।३।१४) इत्यलुक् ॥ (९) ॥*॥ **'तामरं** घृतमर्णश्च' इति रुद्रः । तत्र सन्ति । 'षस स्वप्ने' (अ० प० से०) । 'अन्येभ्योऽपि–' (वा० ३।२।१७१) इति डः । यद्वा तम्यते । 'तमु काङ्क्षायाम्' (दि० प० से०) । घञ् (३।३।१९।) 'नोदात्तोपदेशस्य–' (७।३।३४) इति निषेधस्यानित्यत्वान्न वृद्धिनिषेधः । रस्यते । 'रस आस्वादने' चुरादावदन्तः । 'एरच्' (३।३।५६) । तामं

१—'सकलशेकलशेवलमालिका' इति कथिताभ्युदयात्—इति मुकुटः ॥ २—इतःप्रभृति सूर्यविकासिनामानि । 'निरर्थकं जन्म गतं नलिन्या यया न दृष्टं तुहिनांशुबिम्बम्', 'तीव्रतपनतापप्रियाम्भोजिनी न सहते स्तोकमप्यमृतमुचो रुचश्चन्द्रस्य', 'चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीममिख्याम्' इत्यादि महाकविवर्णनात् ॥ ३—इतः पूर्वं 'नलिकातोयाम्बुजेषु' इति लिखितमासीत् । परंतु तस्य नलिनशब्दार्थताया हैमादिषूपलम्भने नलिनशब्दार्थं एव निवेशितम् ॥

१—तथा च 'सुरगज इव बिभ्रत् पद्मिनीं दन्तलग्नाम्' इत्यादयश्च प्रयोगाः—इति मुकुटः ॥ २—क्लोम हृदयस्य दक्षिणपार्श्वे उदर्यो जलाधारः—इत्यनेकार्थकैरवाकरकौमुदी । 'व्योम्नि' इति लिखितमासीत् ॥

च तद्वत्सं च। **'तामरसं** पद्मे ताम्रकाञ्चनयोरपि' ॥ (१०) ॥*॥ सरसि भवम्। 'तत्र भवः' (४।३।५३) इत्यण्। **'सारसं** सरसीरुहे ।' **'सारसः** पुष्कराख्येन्द्वोः' इति हैमः ॥ (११) ॥*॥ सैरस्यां रोहति। 'इगुपध–' (३।१।१३६) इति कः ॥ (१२) ॥*॥ बिसस्य प्रसूनम् ॥ (१३) ॥*॥ केसरस्य राज्यस्यास्ति। 'अन्येभ्योऽपि दृश्यते' (वा० ५।२।१०९) इति डः। **'राजीवं** नलिने, ना तु भेदे हरिणमीनयोः' ॥ (१४) ॥*॥ पुष्णाति। **'पुष** पुष्टौ' (दि० प० अ०) 'पुषः कित्' (उ० ४।४) इति करन्। **'पुष्करं** द्वीपतीर्थाहिखगरागौषधान्तरे। तूर्यास्येऽसिफले काण्डे शुण्डाग्रे खे जलेऽम्बुजे' इति हैमः ॥ (१५) ॥*॥ अम्भसि रोहति ॥ (१६) ॥*॥ षोडश **'पद्मसामान्यस्य'** ॥

पुण्डरीकं सिताम्भोजम्

पुण्डेति ॥ पुण्डयति। 'मडि भूषायाम्'। 'पुडि च' (भ्वा० प० से०)। 'कर्करीकादयश्च' (उ० ४।२०) इत्यरीकन्। **'पुण्डरीकं** सिताम्भोजे सितच्छत्रे च भेषजे। पुंसि व्याघ्रेऽग्निदिग्वर्गे कोषकारान्तरेऽपि च' ॥ (१) ॥*॥ सितं शुक्लं च तदम्भोजं च ॥ (२) ॥*॥ द्वे **'शुभ्रकमलस्य'** ॥

अथ रक्तसरोरुहे ॥ ४१ ॥

रक्तोत्पलं कोकनदम्

अथेति ॥ रक्तं च तत्सरोरुहं च ॥ (१) ॥*॥ रक्तं च तदुत्पलं च ॥ (२) ॥*॥ कोकांश्चक्रवाकान् नदति। 'णद अव्यक्ते शब्दे' (भ्वा० प० से०)। अन्तर्भावितण्यर्थः। मूलविभुजादिः (वा० ३।२।५)। 'अथ **कोकनदं** रक्तकुमुदे रक्तपङ्कजे' इति मेदिनी ॥ (३) ॥*॥ त्रीणि **'रक्तकमलस्य'** ॥

नाला नालम्

नालेति ॥ नलति। 'णल बन्धे' (भ्वा० प० से०)। 'ज्वलिति–' (३।१।१०९) इति णः। **'नालं** नै ना पद्मदण्डे **नाली** शाककलम्बके' ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'उत्पलादिदण्डस्य'** ॥

अथाऽस्त्रियाम्।

मृणालं बिसम्

अथेति ॥ मृण्यते। 'मृण हिंसायाम्' (तु० प० से०) 'तमिविशिबिडिमृणि–' (उ० १।११८) इति कालन्। अपचयविवक्षायां गौरादित्वात् (४।१।४१) ङीषि **'मृणाली'** इत्यपि। **'मृणालं** नलदे क्लीबं, पुंनपुंसकयोर्विसे।' इति मेदिनी ॥ (१) ॥*॥ विस्यति। 'विस प्रेरणे' (दि० प० से०)। 'इगुपध–' (३।१।१३६) इति कः। 'मृणाले तु विसं **विशम्**' इति द्विरूपकोशः ॥ (४) ॥*॥ द्वे **'अब्जादीनां मूलस्य'** ॥

अब्जादिकदम्बे षण्डमस्त्रियाम् ॥ ४२ ॥

अब्जेति ॥ सनोति। 'षणु दाने' (तु० उ० से०)। 'अमन्ताड्डः' (उ० १।११४) बाहुलकात्सत्वाभावः। **'षण्डः** स्मृतो बैलीवर्दे भवेत् पण्डं तु कानने' इति मूर्धन्यादावजयः। **'षण्डं** पद्मादिसंघाते न स्त्री स्याद् गोपतौ पुमान्' 'शडि रुजायां संघाते च' (भ्वा० आ० से०) घञ् (३।३।१८) 'तालव्यो मूर्धन्योऽब्जादिकदम्बे **शण्ड**शब्दोऽयम्। मूर्धन्य एव वृषभे पूर्वाचार्यैर्विनिर्दिष्टः' इत्यूष्मविवेकः। 'मकुरमुकुरौ दर्पणे, **षण्डः** समूहे, दारदोऽम्बुधौ' इति सारस्वतकोशः ॥ (१) ॥*॥ एकम् **'अब्जादीनां समूहस्य'** ॥

करहाटः शिफाकन्दः

करेति ॥ करं हाटयति। 'हट दीप्तौ' (भ्वा० प० से०) ण्यन्तः। 'कर्मण्यण्' (३।२।१)। (यत्तु)—कं जलं रहति त्यजति। करहं पद्मम्। ततो हटति बहिर्गच्छति—इति मुकुटः। तन्न। 'करहहाटः' इति प्रसङ्गात्। (अटतीति विग्रहेऽपि) वृद्धिप्रसङ्गाच्च। **'करहाटः** पद्मकन्दे देशेऽद्रुमविशेषयोः' इति हैमः ॥ (१) ॥*॥ शिफा मूलतरप्ररोहः तत्सहितः कन्दो मूलम् ॥*॥ 'शिफौ' इति **'कन्दम्'** इति च पृथक् नामनी इत्यन्ये ॥ (२) ॥*॥ द्वे **'पद्मकन्दस्य'** ॥

किंजल्कः केसरोऽस्त्रियाम्।

किंजल्क इति ॥ किंचिज्जलति। 'जल अपवारणे' (चु० प० से०)। बाहुलकात्कः ॥ (१) ॥*॥ के जले सरति। 'सृ गतौ' (भ्वा० प० से०) पचाद्यच् (३।१।१३४)। 'हलदन्तात्–' (६।३।१) इत्यलुक्। दन्त्यसः। ('सवितृ-

---

१—'दुर्जन इव सतामरसः' इति वासवदत्तायां वसन्तवर्णनम्–इति मुकुटः ॥ २—इन्दौ चन्द्रे यथा 'सिञ्जतीव सुधासारैः सारसः सारसैः करैः' इत्यनेकार्थकैरवाकरकौमुदी ॥ ३—सरसि रोहति। 'तत्पुरुषे कृति–' (६।३।१४) इत्यलुकि ह्रस्वेकारोऽपि। तथा च भारविः। 'अयमच्युतस्य वचनैः सरसीरुहजन्मनः' इति–इति मुकुटः ॥ ४—'काश्चिद्राक्षसप्रमदा इव रक्तोत्पलाकृष्टिव्यसनिन्यः' इति दमयन्तीश्लेषः ॥ ५—नाला इत्यपि दृश्यते ॥

१—तथा च 'सान्द्रं चन्दनमङ्गले वलयिता पाणौ मृणालीलता' इति राजशेखरः–इति मुकुटः ॥ २—क्वचिन्मेदिनीपुस्तके तु 'क्लीबपुंसकयोः' इत्युपलभ्यते। एवं चोक्तराजशेखरोक्तिरप्यनुकूलैव ॥ ३—विसं दन्त्यान्तम्। तथाच 'हंसपङ्क्तिरिव विसंवादिनी' इति वासवदत्ता इति मुकुटः ॥ 'मुनय इव विसाधारा जलपक्षिणः' इति दमयन्ती ॥ ४—बलीवर्द उत्सृष्टवृषः। तत्र यथा 'चौरैरपहृते षण्डे पृष्ठतः कोऽनुधावति'। कानने यथा 'कुमुदकमलषण्डे तुल्यरूपामवस्थाम्' इत्यनेकार्थकैरवाकरकौमुदी ॥ ५—वृञ्प्रसङ्गात् ॥ चौरादिकस्यादन्तस्य रहधातोर्वृञ्प्रसङ्गे ततोऽटतीति विग्रहे तु न काप्यनुपपत्तिः ॥ ६—'पुष्पं' इति पाठः ॥ ७—अतएव 'करहाटः शिफा च स्यात् कन्दे सलिलजन्मनाम्' इति हैमनाममालायामुक्तम् ॥

किसलयकसरसभाः' इति सभेदात्) ॥*॥ के शीर्यते । 'शॄ हिंसायाम्' (क्या० प० से०) । 'ऋदोरप्' (३।३।५७) । तौलव्यशः । **'केसरं** हिङ्गुनि क्लीबं, किंजल्के न स्त्रियां, पुमान् । सिंहच्छटायां पुंनागे बकुले नागकेसरे' ॥ (२) ॥*॥ द्वे **'पद्मकेसरस्य'** ॥

संवर्तिका नवदलम्

समिति ॥ संवर्तते । 'वृतु वर्तने' (भ्वा० आ० से०) । 'हृपिशिरुहिवृतिविदिच्छदिकीर्तिभ्यश्च' (उ० ४।११९) इतीन् । **'संवर्तिर्नवपत्रिका'** इति वोपालितः ततः स्वार्थे कन् (५।३।७५) ॥ (१) ॥*॥ नवं च तद्दलं च ॥ (२) ॥*॥ द्वे **'पद्मादीनां नवपत्रस्य'** ॥

वीजकोषो वराटकः ॥ ४३ ॥

वीजेति ॥ वीजस्य कोषः पात्रमाधारः । तालव्यान्तोऽपि ॥ (१) ॥*॥ व्रियते दलैः । 'वृञ् आवरणे' ( ) । 'अन्येभ्योऽपि' ( ) इत्याटच् । ततः स्वार्थे कन् (५।३।७५) । यद्वा—वरं दलवरणम् अटति । 'अट गतौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) ततः स्वार्थे कन् (५।३।७५) । **'वराटकः** पद्मबीजकोशे रज्जौ कपर्दके' ॥ (२) ॥*॥ द्वे **'पद्मबीजस्य'** ॥

१—'आन्दोलकुसुमकेशरशरेणमुखी' इति वासवदत्तायां तालव्यमध्यदर्शनात् ॥—इति मुकुटः ॥

इति वारिवर्गविवरणम् ॥

उक्तान्वर्गान् संगृह्णाति—

उक्तं स्वर्व्योमदिक्कालधीशब्दादिसनाट्यकम् ।
पातालभोगिनरकं वारि चैषां च संगतम् ॥ ४४ ॥
इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
स्वर्वादिकाण्डः प्रथमः साङ्ग एव समर्थितः ॥ ४५ ॥

उक्तमिति ॥ अत्रैकादश वर्गाः ॥

इति श्रीवघेलवंशोद्भवश्रीमहीधरविषयाधिपश्री**कीर्तिसिंह**देवाज्ञया श्री**भट्टोजिदीक्षित**तात्मजश्री**भानुजीदीक्षित**विरचितायाममरटीकायां व्याख्यासुधायां प्रथमकाण्डः संपूर्णतामगात् ।

१—आदिशब्देन पातालस्य ग्रहणम् इति मुकुटः ॥ अत्रायं भावः—अस्मिन्काण्डे द्वावेव मुख्यवर्गौ स्वर्गः पातालश्च । तत्र नाट्यवर्गपर्यन्तं स्वर्गसाधारणपदार्थानां निरूपणात्स्वर्गवर्गत्वम् । तदुत्तरं पातालसंगतार्थनिरूपणात्पातालवर्गत्वम् ॥ अतएवाग्निपुराणे प्रथमकाण्डे एतानेव पदार्थानुक्त्वा उपसंहृतम् 'स्वर्गपातालवर्गाद्या उक्ताः' इति ॥ तत्राद्यशब्देनावान्तरवर्गग्रहणम्—इत्यपि मुकुटे व्यक्तम् ॥

॥ श्रीः ॥

श्रीमदमरसिंहविरचितः

अमरकोषः ।

व्याख्यासुधाख्यया व्याख्यया समेतः ।

द्वितीयं काण्डम् ।

वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः ।
नृब्रह्मक्षत्रविट्शूद्रैः साङ्गोपाङ्गैरिहोदिताः ॥ १ ॥

वर्गा इति ॥ इह द्वितीयकाण्डे वर्गा उक्ता वदितुमारब्धाः । आदिकर्मणि क्तः (३।४।७१) । कीदृशाः, साङ्गोपाङ्गैः, पृथिव्यादिभिरुपलक्षिताः । तत्राङ्गानि मृदादीनि । उपाङ्गानि खिलादीनि । आपणादीनि विपण्यादीनि । शिलादीनि मनःशिलादीनि । वृक्षादीनि पुष्पादीनि । मृगशब्द आरण्यपशुमात्रपरः । 'आरण्याः पशवो मृगाः' इति स्मृतेः । आदिशब्देन पक्षिकीटादीनां ग्रहणम् । तस्य चाङ्गोपाङ्गानि पक्षिपक्षादीनि । यद्वा—मृगानत्तुं शीलं यस्य स मृगादी सिंहः ॥

भूर्भूमिरचलानन्ता रसा विश्वंभरा स्थिरा ।
धरा धरित्री धरणी क्षोणी ज्या काश्यपी क्षितिः २
सर्वंसहा वसुमती वसुधोर्वी वसुंधरा ।
गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही ॥३॥

भूरिति ॥ भवति । कर्तरि क्विप् (३।२।१७८) । **'भूः** स्थानमात्रे कथिता धरण्यामपि योषिति' । यत्तु—'भवत्यस्यां सर्वम्' इति भूः । बहुलवचनात् (३।३।११३)—अधिकरणे क्विप् (३।३।१७८)—इत्याह मुकुटः । तच्च । उक्तरीत्या निर्वाहात् । 'अब्भूः पृथिवी' इति श्रुतिविरोधाच्च ॥ (१) ॥*॥ भवति । 'भुवः कित्' (उ० ४।४५) इति मिः । —'भुवः क्मिन्'—इति मुकुटः । तच्च । तादृशसूत्रादर्शनात् । 'कृदिकारात्—' (ग० ४।१।४५) इति ङीष् वा । **'भूमिः** क्षितौ स्थानमात्रे' इति हैमः ॥ (२) ॥*॥ न चलति । 'चल कम्पने ( ) । पचाद्यच् (३।१।१३४) । अचलाः सन्त्यस्याम्, इति वा । अच् (५।२।१२७) । **'अचलस्तु** गिरिकीलयोः । **अचला** भुवि' इति हैमः ॥ (३) ॥*॥ नास्त्यन्तोऽस्याः । यद्वा अनन्तोऽस्ति धारको यस्याः । **'अनन्तः** केशवे शेषे पुमान्, अनवधौ त्रिषु । **अनन्ता** च विशल्यायां शारिवादूर्वयोरपि । कणादुरालभापथ्यापार्वत्यामलकीषु च । विश्वंभरागुडूच्योः स्या**दनन्तं** सुरवर्त्मनि' ॥ (४) ॥*॥ रसोऽस्यामस्ति । अर्शआद्यच् (५।२।१२७) । रस्यते वा । 'रस आस्वादने' चुरादावदन्तः । घञ् (३।३।११३) । अच् (३।३।५६) वा । यत्तु—घञर्थे को (३।३।५८) वा—इति मुकुटः । तच्च । परिगणनात् । अचः सत्वाच्च । (**'रसा** तु रसनापाठासल्लकीक्षितिकङ्कुषु—') ॥ (५) ॥*॥ विश्वं बिभर्ति । 'डुभृञ्' 'संज्ञायां भृतृवृजि—' (३।२।४६) इति खच् । **'विश्वंभरोऽच्युते शके पुंसि, विश्वंभरा** भुवि' ॥ (६) ॥*॥ तिष्ठति । अजिरादित्वात् (उ० १।५३) किरच् । **'स्थिरा** भूशालपर्ण्योर् ना शनौ मोक्षेऽचले त्रिषु' ॥ (७) ॥*॥ धरति विश्वम् । 'धृञ् धारणे' (भ्वा० उ० अ०) । यद्वा ध्रियते । 'धृङ् अवस्थाने' । (तु० आ० अ०) । पचाद्यच् (३।१।१३४) । धराः सन्त्यस्यां वा । **'धरः** कूर्माधिपे गिरौ । कर्पासतूलेऽथ **धरा** मेदोभूमिजरायुषु' इति हैमः ॥ (८) ॥*॥ 'अशित्रादिभ्य इत्रोत्रौ' (उ० ४।१७३) । गौरादिङीष् (४।१।४१) ॥ (९) ॥*॥ 'अर्तिसृधृ—' (उ० २।१०२) इत्यनिः । 'कृदिकारात्—' (ग० ४।१।४५) इति ङीष् । —गौरादित्वान्ङीष्' (४।१।४१)—इति मुकुटस्य प्रमादः । (**'धरणोऽहिपतौ** लोके स्तने धान्ये दिवाकरे) । **धरणं** धारणे मानविशेषे **धरणी** भुवि' इति हैमः ॥ (१०) ॥*॥ क्षौति । 'टुक्षु शब्दे' (अ० प० अ०) । बाहुलकान्निः । ('कृदिकारात्—' (ग० ४।१।४५) इति ङीष्वा) ॥ (११) ॥*॥ जिनाति । 'ज्या वयोहानौ' (क्र्या० प० अ०) । अन्यादित्वाद्यदन्तो (उ० ४।११२) निपातितः । **'ज्या** मौर्वी **ज्या** वसुंधरा'

१—'निरवधौ' इति पाठः ॥ २—अत एव ह्रस्वेकारान्तोऽपि यथा—'विलसितमनुकुर्वती पुरस्ताद्धरणिरुहाधिरुहैर्वधूलतायाः' इत्यनेकार्थैकैरवाकरकौमुदी ॥

इति शाश्वतः । ('उर्या तु मातरि' इति हैमः) ॥ (१२) ॥*॥ कश्यपस्येयम् । '**काश्यप** उक्तो मुनिमृगयोर्भेदे च **काश्यपी** क्षमायाम्' इति मेदिनी ॥ (१३) ॥*॥ क्षियति । 'क्षि निवासगत्योः' (तु० प० अ०) । 'क्तिच्क्तौ च–' इति (३।३।१७४) क्तिच् । यत्तु—क्षियन्त्यत्र—इति मुकुटः । तन्न । 'अजबभ्याम्–' (वा० (३।३।१२६) इति ल्युटा बाधात् । '**क्षिति**र्गेहे भुवि क्षये' इति हैमः ॥ (१४) ॥*॥ सर्वं सहते 'षह मर्षणे' (भ्वा० आ० अ०) । 'पूःसर्वयोः–' (३।२।४१) इति खच् । ('**सर्वसहः** सहिष्णौ स्यात्**सर्वंसहा** पुनः क्षितौ' ॥ (१५) ॥*॥ वसु धनमस्त्यस्याम् । मतुप् (५।२।९४) ॥ (१६) ॥*॥ वसु दधाति । 'आतोऽनुप–' (३।२।३) इति कः ॥ (१७) ॥*॥ ऊर्णोति, ऊर्ण्यते, वा । 'ऊर्णुञ् आच्छादने' (अ० उ० से०) । 'महति हस्वश्च' (उ० १।३१) इत्युः, नुलोपः, ह्रस्वः, च । 'वोतो गुणवचनात्' (४।१।४४) इति ङीष् ॥ (१८) ॥*॥ वसु धारयति । 'संज्ञायां भृतृवृजि–' (३।२।४६) इति खच् 'खचि ह्रस्वः' (६।४।९४) ॥ (१९) ॥*॥ गोत्राः शैलाः सन्त्यस्याम् । अर्शआद्यच् (५।२।१२७) । गां जलं त्रायते वा । 'त्रैङ् पालने' (भ्वा० आ० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥ (२०) ॥*॥ कुवते । 'कुङ् शब्दे' ( ) । मितद्वादित्वाद् (वा० ३।२।१८०) ङुः ॥ (२१) ॥*॥ प्रथते । 'प्रथ विस्तारे' ( ) । 'प्रथेः षिवन् संप्रसारणं च' (उ० १।१४९) । षित्त्वात् (४।१।४१) ङीष् ॥*॥ 'षवन्' इत्येके । 'पृथिवी **पृथ्वी** पृथ्वी' इति शब्दार्णवः ॥ (२२) ॥*॥ ('प्रथिम्रदि–') (उ० १।२८) इति उप्रत्यये संप्रसारणे 'वोतो गुण–' (४।१।४४) इति ङीषि पृथ्वी । '**पृथ्वी** भूमौ महत्यां च लक्पत्र्यां कृष्णजीरके' ॥ (२३) ॥*॥ क्षमते । 'क्षमूष् सहने' ( ) । 'क्षमेरुपधालोपश्च' (उ० ५।६५) इत्यच् । यत्तु—पृषोदरादित्वात् (६।३।१०९) । अलोपः । बाहुलकान्मन् टिलोपश्च—इति मुकुटः । तन्न । उक्तरीत्या निर्वाहात् ॥*॥ पचाद्यचि (३।१।१३४) क्षमा च ॥ (२४) ॥*॥ अवति अव्यते वा । 'अव रक्षणादौ' (भ्वा० प० से०) । 'अर्तिसृधृ–' (उ० २।१०२) इत्यनिः ॥ (२५) ॥*॥ मेदमस्त्यस्याम् । अत इनिः (५।२।११५) । 'मलघो मेदकुष्ठहा' इति शालिहोत्रः । मेद्यति वा । 'जिमिदा–' (दि० प० से०) । ग्रह्यादित्वात् (३।१।१३४) इनिः ॥ (२६) ॥*॥ मह्यते । 'मह पूजायाम्' चुरादावदन्तः । ण्यन्तात् 'अच इः' (उ० ४।१३९) । महिः । 'कृदिकारात्–' (ग० ४।१।४५) इति ङीष् । यत्तु—मह्यन्ते भूतान्यस्याम्, मह्यते, वा । 'पुंसि' (३।३।११८) इति घः । गौरादिङीष् (४।१।४१)—इति मुकुटः । तन्न । 'हलश्च' (३।३।१२१) इति घञ्प्रसङ्गात् । कर्मणि घस्याप्रसङ्गाच्च । 'करणाधिकरणयोः' अनुवर्तनात् । 'वीचिः पङ्क्तिर्महिः केलिरित्याद्या ह्रस्वदीर्घयोः' इति वाचस्पतिः । यद्वा–महीयते । 'महीङ् पूजायाम्' कण्ड्वादियगन्तः । 'क्विप् च' (३।२।७५) इति क्विप्ल्लोपयलोपौ । 'कृदिकारात्–' (ग० ४।१।४५) इति ङीष् । तदभावे विसर्गः–इति कश्चित् । तन्न 'कारग्रहणान्न' इत्युक्तत्वात् । '**मही** नद्यन्तरे भूमौ मह उद्भवतेजसोः' इति हैमः ॥ २७ ॥*॥ सप्तविंशतिः '**भूमेः**' ॥

मृन्मृत्तिका

मृदिति ॥ मृद्यते । 'मृद क्षोदे' (क्रया० प० से०) । संपदादिः (वा० ३।३।१०८) ॥ (१) ॥*॥ स्वार्थे 'मृदस्तिकन्' (५।४।३९) ॥ (२) ॥*॥ द्वे '**मृदः**' ॥

प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका ।

प्रशस्तेति ॥ मृच्छब्दात् 'सस्नौ प्रशंसायाम्' (५।४।४०) ॥ (१) ॥*॥ (२) ॥*॥ द्वे '**प्रशस्तमृदः**' ॥

उर्वरा सर्वसस्याढ्या

उर्वरेति ॥ ऋच्छति । 'ऋ गतौ' (भ्वा० प० अ०) । पचाद्यच् (३।१।१३४) । यद्वा ईर्यते । 'ऋ गतौ' (क्रया० प० से०) । 'ऋदोरप्' (३।३।५७) । उरूणामरा । यद्वा–उर्व्यते । 'उर्वी हिंसायाम्' (भ्वा० प० से०) । 'खनो घ च' (३।३।१२५) इति घः । 'उपधायां च' (८।२।७८) इति दीर्घस्तु संज्ञापूर्वकत्वान्न । उर्वं राति । कः (३।२।३) । यद्वा संपदादि क्विप् (वा० ३।३।१०८) । 'राल्लोपः' (६।४।२१) । उर् चासौ वरा च । उर्षु वरा वा । '**ऊर्वरा** तु भूमात्रे सर्वसस्याढ्यभुव्यपि' इति हैमः ॥ (९) ॥*॥ सर्वाणि च तानि सस्यानि च । तैराढ्या मृत् । एकम् '**सस्याढ्यभूमेः**' ॥

स्यादूषः क्षारमृत्तिका ॥ ४ ॥

स्यादिति ॥ ऊषति । 'ऊष रुजायाम्' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । ('**ऊषः** क्षारमृदि प्रोक्तः प्रभातेऽपि पुमानयम् । तत्संध्यायां च रन्ध्रे च चन्दनाद्रौ श्रवो विले' इति मेदिनी) ॥ (१) ॥*॥ क्षारयति । 'श्रर संचलने' (भ्वा० प० से०) । णिच् (३।१।२६) । पचाद्यच् (३।१।१३४) । क्षारा चासौ मृत्तिका च ॥ (२)॥*॥ द्वे '**क्षारमृत्तिकायाः**' ॥

ऊषवानूषरो द्वावप्यन्यलिङ्गौ

ऊषेति ॥ ऊषोऽस्त्यस्मिन् । मतुप् (५।२।९४) ॥ (१) ॥*॥ 'ऊषसुषि–' (५।२।१०७) इति रः ॥ (२) ॥*॥ द्वे '**क्षारमृद्विशेषस्य**' ॥

स्थलं स्थली ।

स्थलमिति ॥ स्थलति । 'ष्ठल स्थाने' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । यत्तु—स्थल्यतेऽत्र । 'घञर्थे कः'

१—विश्वकोषे तु, **काश्यपः** स्यान्मुनौ मीनभेदे भूमौ तु **काश्यपी**' इति पाठ उपलभ्यते ॥

(वा० ३।३।५८)—इति मुकुटः । तन्न । परिगणनात्[1] ॥ (१) ॥*॥ स्थली अकृत्रिमा । 'जानपद–' (४।१।४२) इति ङीष् । कृत्रिमा स्थला । स्थलं तूभयसाधारणम् ॥ (२) ॥*॥ द्वे **'स्थलस्य'** ॥

समानौ मरुधन्वानौ

समानाविति ॥ म्रियन्तेऽस्मिन्भूतानि । 'भृमृशी–' (उ० १।७) इत्युः । **'मरुर्ना गिरिधन्वनोः'** ॥ (१) ॥*॥ धन्व्यतेऽस्मात् ।—धविर्गत्यर्थः सौत्रः इति मुकुटः । तन्न । (धातुपाठे (भ्वा० प० से०) दर्शनात् । 'कनिन् युवृषि–' (उ० १।१५६) इति कनिन् । **'धन्वा** तु मरुदेशे ना क्लीबं चापे स्थलेऽपि च' ॥ (२) ॥*॥ द्वे **'निर्जलदेशस्य'** ॥

द्वे खिलाप्रहते समे ॥ ५ ॥

त्रिषु

द्वे इति ॥ खिलति । 'खिल उञ्छे' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । खिल्यते वास्मिन् । 'हलश्च' (३।३।१२१) इति घञ् । संज्ञापूर्वकत्वान्न गुणः । ('खिलमप्रहते क्लीबं सारसंक्षिप्तवेधसोः') ॥ (१) ॥*॥ न प्रहन्यते स्म । 'हन हिंसागत्योः' (अ० प० अ०) । कर्मणि क्तः (३।२।१०२) ॥ (२) ॥*॥ समे समानार्थे । द्वे **'हलाद्यकृष्टस्य'** । (त्रिषु लिङ्गत्रये । स्त्रियां खिला अप्रहता) ॥

अथो जगती लोको विष्टपं भुवनं जगत् ।

अथविति ॥ गच्छति । 'गम्लृ गतौ' (भ्वा० प० उ०) । 'पृषद्बृहन्महज्जगत्–' (उ० २।८४) इति निपातितः । शतृवद्भावात् 'उगितश्च' (४।१।६) इति ङीप् । **'जगती** भुवने क्षमायां छन्दोभेदे जनेऽपि च' ॥ (१) ॥*॥ लोक्यते । 'लोकृ दर्शने' (भ्वा० आ० से०) । घञ् (३।३।१४) । **'लोको** विश्वे जने' इति हैमः ॥ (२) ॥*॥ विशन्त्यत्र । 'विश प्रवेशने' (तु० प० अ०) । 'विटपविष्टपविशिपोलपाः' (उ० ३।१४५) ॥*॥ पादिपाठे तु—पिष्यते पिश्यते, वात्र । 'पिश गतौ' ( ) । 'पिष्लृ संचूर्णने' (रु० उ० अ०) वा । ('भुवनं) **पिष्टपः** पुमान्' इति बोपालितः ॥ (३) ॥ भवन्त्यस्मिन् । 'रजेः क्युन्' (२।७९) 'भूसूधूभ्रस्जिभ्यः' (उ० २।८०) इति क्युन् । ('**भुवनं** विष्टपेऽपि स्यात्सलिले गगने जले') ॥ (४) ॥*॥ यत्तु—जङ्गम्यते–इति स्वामिना विगृहीतम् । यच्च—पुनः पुनर्वृद्धिक्षयो गच्छति–इति मुकुटेन । तन्न । 'वर्तमाने बृहत्–' (उ० २।८४) इति सूत्रे यङर्थस्य वृत्तिकृद्भिरनुक्तेः । गत्यर्थानां कौटिल्य एव यङ्विधानाच्च । **'जगत्** स्याद्विष्टपे क्लीबं, वायौ ना, जङ्गमे त्रिषु' ॥ (५) ॥*॥ 'एकं महाभूतं पृथ्वी, पञ्चमहाभूतेन्द्रियविषयात्मकं तु जगत्' इति पृथ्वीजगतोर्भेदः ॥ पञ्च **'भूतलस्य'** ॥

लोकोऽयं भारतं वर्षम्

लोक इति ॥ अयं जम्बूद्वीपनवमांशः । भरतस्य राज्ञ इदम् । 'तस्येदम्' (४।३।१२०) इत्यण् । 'महर्षिव्यासरचिते जम्बूद्वीपे **च भारतम्**' इति रभसः ॥ (१) ॥*॥ वृष्यते 'वृषु सेचने' (भ्वा० प० से०) । 'भयादीनामुपसंख्यानम्' (वा० ३।३।५६) इत्यच् । 'पुंनपुंसकयोर्वर्षं जम्बूद्वीपाब्दवृष्टिषु' इति रुद्रः । 'वर्षं स्थानं विदुः प्राज्ञा इमं लोकं च भारतम्' इति भारविः । 'उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् । वर्षं तद्भारतं नाम भारती यत्र संततिः' । **'वर्षोऽस्त्री** भारतादौ च जम्बूद्वीपाब्दवृष्टिषु' ॥ एकम् **'भारतवर्षस्य'** ॥

शरावत्यास्तु योऽवधेः ॥ ६ ॥

देशः प्राग्दक्षिणः प्राच्यः

शरेति ॥ शरावत्या नद्या मर्यादायाः । प्राचा सहितो दक्षिणो देशः । प्राच्यां भवः । 'द्युप्राग्पाग्–' (४।२।१०१) इति यत् ॥ (१) ॥*॥ एकम् **'प्राच्यदेशस्य'** ॥

उदीच्यः पश्चिमोत्तरः ।

उदीच्य इति ॥ तत एवावधेः । पश्चिमेन सहित उत्तरो देशः । उदीच्यां भवः । 'द्युप्राग्–' (४।२।१०१) इति यत् ॥ (१) ॥*॥ एकम् **'उदीच्यदेशस्य'** ॥

प्रत्यन्तो म्लेच्छदेशः स्यात्

प्रत्यन्त इति ॥ प्रतिगतोऽन्तम् । 'अत्यादयः क्रान्ताद्यर्थे–' (वा० २।२।१८) इति समासः ॥ (१) ॥*॥ म्लेच्छानां देशः ॥ (२) ॥*॥ 'चातुर्वर्ण्यव्यवस्थानं यस्मिन्देशे न विद्यते । तं म्लेच्छविषयं प्राहुरार्यावर्तमतः परम्' ॥ द्वे **'शिष्टाचाररहितखशादिदेशस्य'** ॥

मध्यदेशस्तु मध्यमः ॥७॥

मध्येति ॥ मध्यश्चासौ देशश्च ॥ (१) ॥*॥ मध्ये भवः

१—अत्र 'धन्व्यपि संज्ञापूर्वकत्वाद्वृद्धभावाच्च' इत्यधिकः पाठः ॥ १—वेधसि विष्णौ यथा हरिवंशस्य 'खिलस्य विष्णोरिषवो गुणा यत्र' इति व्युत्पत्त्या 'खिलेषु' इति संज्ञा ॥ ३—इतः पूर्वम् जगत्स्यादिति लिखितमासीत् । तदत्रैव जगच्छब्दव्याख्याने लिखितम् ॥

१—मुकुटे तु एतदग्रे—अत एव सामान्यविशेषभावाज्जम्बूद्वीपे तदेकदेशे च भारतप्रयोगः । प्रकरणादिभिस्तु तदवगमः । यथा 'एष दूरगुरुभारभारतं वर्षमद्य मम वर्तते वशे' इति मावः । तथा 'एतेन भारतमिलावृतवद्विभाति' इति च । अन्यान्यपि वर्षाणि । यथा 'स्याद्भारतं किंपुरुषं हरिवर्षं च दक्षिणाः । रम्यं हिरण्मयकुरू सुमेरोरुत्तराख्यः । भद्राश्व-केतुमालौ तु द्वौ वर्षौ पूर्वपश्चिमौ । इलावृतं तु मध्यस्थं सुमेरुर्यत्र तिष्ठति' इति वाचस्पतिः–इत्यप्युक्तम् ॥ २—यदाह 'प्रागुदञ्चौ विभजते हंसः क्षीरोदकं यथा । विदुषां शब्दसिध्यर्थं सा नः पातु शरावती'—इति क्षीरस्वामी ॥

'मध्यान्मः' (४।३।८) ॥ (२) ॥*॥ 'हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि । प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः' (२।२१) इति मनुः । विनशनं कुरुक्षेत्रम् । द्वे **'मध्यदेशस्य'** ॥

आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमागयोः ।

आर्येति ॥ आर्या आ समन्ताद् वर्तन्तेऽत्र । 'हलश्च' (३।३।१२१) इति घञ् ॥ (१) ॥*॥ पुण्यस्य भूमिः । पुण्या चासौ भूमिश्च, इति वा ॥ (२) ॥*॥ 'आ समुद्रात्तु वै पूर्वादा समुद्राच्च पश्चिमात् । तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः' इति (२।२२) मनुः । हिमप्रधानोऽगः हिमागः । **'हिमालयोः'** इति पाठे तु हिमेन अल्यते । 'अल भूषणादौ' (भ्वा० प० से०) । घञ् (३।३।१५) । द्वे **'विन्ध्यहिमागमध्यदेशस्य'** ॥

नीवृज्जनपदः

नीवृदिति ॥ नियतो वर्तते । अधिकरणस्य कर्तृत्वविवक्षात्र । 'वृतु वर्तने' (भ्वा० आ० से०) । क्विप् (३।२।१७८) । 'नहिवृति–' (६।३।११६) इति दीर्घः । यत्तु—'नियमेनावश्यतया, नियतं वा वर्तन्ते वसन्ति जना अत्र' इति पुंसि बाहुलकात्, संपदादित्वात् (वा० ३।३।१०८), 'अन्येभ्योऽपि दृश्यते' (३।२।१७८) इति, वा अधिकरणे क्विप् इति मुकुटः । तन्न । बाहुलकस्यागतिकगतित्वात् ॥ (१) ॥*॥ जनः पदं वस्तु यत्र । 'भवेज् **जनपदो जानपदोऽपि** जनदेशयोः' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ द्वे **'जननिवासस्थानस्य'** ॥

देशविषयौ तूपवर्तनम् ॥ ८ ॥

देशेति ॥ दिशति । 'दिश अतिसर्जने' (तु० उ० अ०) । पचाद्यच् (३।१।१३४) । दिश्यते वा । घञ् (३।३।१४) ॥ (१) ॥*॥ विसिनोति 'षिञ् बन्धने' (स्वा० उ० अ०) । पचाद्यच् (३।१।१३४) । 'परिनिविभ्यः–' (८।३।७०) इति षत्वम् ।—विसीयन्तेऽत्रेति, 'एरच्' (३।३।५६)-इति विग्रहे तु मूर्धन्योऽनुपपन्नः । '–सितसय–' (८।३।७०) इति क्ताजन्तयोः सूत्रेऽनुवादात् । **'विषयो** यस्य यो ज्ञातस्तत्र गोचरदेशयोः । शब्दादौ जनपदे च' इति हैमः ॥ (२) ॥*॥ उपवर्तन्तेऽत्र ।—ल्युट् (३।३।११४) इति मुकुटः । तन्न । घञो ल्युडपवादत्वात् । अतः–'अन्यत्रापि' (उ० २।७८) इति युच् ॥ (३) ॥*॥ त्रीणि **'ग्रामसमुदायलक्षणस्य स्थानमात्रस्य'** ॥

त्रिष्वागोष्ठात्

त्रिष्विति ॥ आगोष्ठात् गोष्ठशब्दमभिव्याप्य ॥

नडप्राये नड्वान्नड्वल इत्यपि ।

नडेति ॥ नडाः प्राया यत्र । 'कुमुदनडवेतसेभ्यो ड्मतुप्' (४।२।८७) । 'झयः' (८।२।१०) इति 'मादुपधायाः' (८।२।९) इति वा वत्वम् ॥ (१) ॥*॥ नडाः सन्त्यस्मिन् । 'नडशादाड् ड्वलच्' (४।२।८८) ॥ (२) ॥*॥ द्वे **'नडाधिकदेशस्य'** ॥

कुमुद्वान्कुमुदप्राये

कुमुद्वानिति ॥ कुमुदानि सन्त्यत्र ॥ (१) ॥*॥ कुमुदानि प्रायाण्यत्र ॥ एकम् **'कुमुदबहुलदेशे'** ॥

वेतस्वान्बहुवेतसे ॥ ९ ॥

वेतेति ॥ वेतसाः सन्त्यत्र ॥ (१) ॥*॥ बहवो वेतसा यत्र ॥ एकम् **'बहुवेतसदेशे'** ॥

शाद्वलः शादहरिते

शाद्वल इति ॥ शीयते । 'शदॢ शातने' (भ्वा०, तु० प० अ०) । ज्वलादित्वात् (३।१।१४०) णः । शीयतेऽस्मिन्निति वा । 'हलश्च' (३।३।१२१) इति घञ् । शादो बालतृणमस्मिन् । ड्वलच् (४।२।८८) ॥ (१) ॥*॥ शादैर्बालतृणैर्हरितः ॥ एकं **'नवतृणप्रचुरस्य'** ॥

सजम्बाले तु पङ्किलः ।

सजम्बेति ॥ जम्बालेन पङ्केन सह । 'पङ्कोऽस्मिन्नस्ति । पिच्छादित्वात् (५।२।१००) इलच् ॥ (१) ॥*॥ द्वे **'सकर्दमस्य'** ॥

जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधः ॥ १० ॥

जलेति ॥ जलं प्रायं यत्र ॥ (१) ॥*॥ अनुगता आपोऽत्र । 'ऋक्पूर्–' (५।४।७४) इत्यः । 'ऊदनोर्देशे' (६।३।९८) । ('अनूपो महिषे नाऽम्बुप्रायदेशे तु वाच्यवत्' इति मेदिनी) ॥ (२) ॥*॥ तथाविधो जलप्रायः । कं जलं छयति परिच्छिनत्ति । 'छो छेदने' (दि० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । 'कच्छमनूपम्' इति बोपालितः । (**'कच्छो** द्रुमेदे नौकाङ्गेऽनूपप्राये तटेऽपि च । **कच्छास्तु** देशे, **कच्छा** स्यात्परिधानापराञ्चले[1] । [2]चीर्यां वारा[3]ह्याम्' इति हैमः) । 'त्रिषु' इत्यस्य बाधनार्थं 'पुंसि' इति ॥ (३) ॥*॥ त्रीणि **'जलाधिकदेशस्य'** ॥

स्त्री शर्करा शर्करिलः शार्करः शर्करावति ।

स्त्रीति ॥ (**'शर्करा** खण्डविकृतौ कर्परांशे रुगन्तरे । उपलायाम्' इति हैमः) । शर्करा (अश्मप्राया मृत्) अस्त्यत्र । 'देशे लुबिलचौ च' (५।२।१०५) ॥ (१) ॥*॥ (२) ॥*॥ 'सिकताशर्कराभ्यां च' (५।२।१०४) इत्यण् । (**'शार्करः** स्याद्बुधफेने शर्करान्वितदेशयोः' इति मेदिनी) ॥ (३) ॥*॥

१—परिधानापराञ्चले यथा—'प्रलम्बकच्छाः किल दाक्षिणात्याः' ॥ २—चीरी पक्षिविशेषः ॥ ३—वाराही—वराहाक्रान्ता ओषधी । इत्यनेकार्थकैरवाकरकौमुदी ॥ ४—कर्परांशो मृत्कपालखण्डम्, उपला अश्मरूपा मृत्, तयोर्यथा 'नगतरुशिखरामर्दी सशर्करो मारुतश्चण्डः' इत्यनेकार्थकैरवाकरकौमुदी ॥

'अन्यतरस्याम्' (५।२।९७) ग्रहणान्मतुप् (५।२।९४) च ॥ (४) ॥*॥ चत्वारि **'अश्मप्रायमृदधिकस्य वालुकायुक्तदेशस्य'** ॥

देश एवादिमौ

देश इति ॥ (तत्र) आदौ भवौ । +'मध्यान्मः' (४।३।८) इत्यत्र 'आदेश्च' इति वचनान्मः+ ॥ आदिमौ शर्करा-शार्करिलौ देशे एव नान्यत्र । 'शार्करः, शर्करावान्' इतीमौ तु **'देशादेशयोः'** ॥

एवमुन्नेयाः सिकतावति ॥ ११ ॥

एवमिति ॥ एवं **'सिकता' 'सिकतिलः'** इतीमौ देश एव । **'सैकतः' 'सिकतावान्'** इति तु देशादेशयोः । केचित्तु सिकताशर्कराशब्दौ बहुवचनान्तावाहुः ॥ (४) ॥*॥ चत्वारि **'वालुकाबहुलदेशस्य'** ॥

देशो नद्यम्बुवृष्ट्यम्बुसंपन्नव्रीहिपालितः ।
स्यान्नदीमातृको देवमातृकश्च यथाक्रमम् ॥ १२ ॥

देश इति ॥ नद्यम्बुभिर्वृष्ट्यम्बुभिश्च संपन्नैर्धान्यैः पालितः । नदी माताऽस्य । 'नद्यृतश्च' (५।४।१५३) इति कप् ॥ (१) ॥*॥ देवो माताऽस्य । 'देवो मेघे सुरे राज्ञि' ॥ (१) ॥*॥ क्रमेण एकैकम् **'नद्यम्बुभिर्वृष्ट्यम्बुभिः संपन्नदेशस्य'** ॥

सुराज्ञि देशे राजन्वान् स्यात्

सुराज्ञीति ॥ शोभनो राजा यत्र ।—'न पूजनात्' (५।४।६९) इति टचोऽभावः–इति मुकुटः । तन्न । बहुव्रीहौ टचोऽप्रसङ्गात् । मतुप् (५।२।९४) प्रशंसायाम् (वा० ५।२।९४) 'राजन्वान्सौराज्ये' (८।२।१४) इति साधुः ॥ (१) ॥*॥ एकं **'स्वधर्मपरराजयुक्तदेशस्य'** ॥

ततोऽन्यत्र राजवान् ।

तत इति ॥ अन्यत्र राजमात्रयुक्तदेशे ॥ (१) ॥*॥ एकम् **'सामान्यराजयुक्तदेशस्य'** ॥

गोष्ठं गोस्थानकम्

गोष्ठमिति ॥ गावस्तिष्ठन्ति यत्र । 'घञर्थे–' (वा० ३।३।५८) इति कः । 'अम्बाम्ब–' (८।३।९७) इति षत्वम् । **'गोष्ठं** गोस्थानके, **गोष्ठी** सभासंलापयोः स्त्रियाम्' ॥ (१) ॥*॥ गवां स्थानम् । स्वार्थे कः (५।३।७५) ॥ (२) ॥*॥ द्वे **'गवां स्थानस्य'** ॥

तत्तु गौष्ठीनं भूतपूर्वकम् ॥ १३ ॥

तत्विति ॥ पूर्वं भूतं गोष्ठम् । 'गोष्ठात्खञ् भूतपूर्वे' (५।२।१८) इति खञ् ॥ (१) ॥*॥ एकम् **'भूतपूर्वगोष्ठस्य'** ॥

पर्यन्तभूः परिसरः

पर्यन्तेति ॥ पर्यन्ते भूः ॥ (१) ॥*॥ परितः सरन्त्यत्र । 'पुंसि' (३।३।११८) इति घः । (**'परिसरः** प्रान्तभू–दैवयोर्मृतौ') ॥ (२) ॥*॥ द्वे **'नद्यादिसमीपभूमेः'** ॥

सेतुरालौ स्त्रियां पुमान् ।

सेतुरिति ॥ स्त्रियां वर्तमानायाम् आलौ सेतुः (पुमान्) सिनोति, सीयते वा । 'षिञ् बन्धने' (स्वा० उ० अ०) । 'सितनि–' (उ० १।६।९) इति तुन् ॥ (१) ॥*॥ आ अल्यम्भः । 'अल वारणे' (भ्वा० प० से०) । इन् (उ० ४।११८) । यद्वा–अल्यतेऽनया । 'इणजादिभ्यः' (वा० ३।३।१०८) ॥ (२) ॥*॥ द्वे **'सेतोः' 'पुल'** इति ख्यातस्य ॥

वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकम् ॥ १४ ॥

वामेति ॥ वामैर्वामं वा लूयते । 'लूञ् छेदने' (क्र्या० उ० से०) । बाहुलकाद्रक् ॥ (१) ॥*॥ न अकति । 'अक कुटिलायां गतौ' (भ्वा० प० से०) बाहुलकादुः । यद्वा नम्यते भूरनेन । 'णम प्रह्वत्वे शब्दे च' (भ्वा० प० अ०) । 'फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च' (उ० १।१८) इत्युः, नाकिश्च । इकार उच्चारणार्थः । (**'नाकुर्मुन्यन्तरे पृथ्वीधर–वल्मीकयोः. पुमान्'**) ॥ (२) ॥*॥ बलन्ते प्राणिनोऽत्र । 'अलीकादयश्च' (उ० ४।२५) इति निपातितः । (**'व(ब)ल्मीको** नाकुर्वाल्मीक्यो रोगभेदे') ॥ (३) ॥*॥ त्रीणि **'पिपीलिकादिनिष्कासितमृत्पुञ्जस्य'** ॥

अयनं वर्त्म मार्गोध्वपन्थानः पदवी सृतिः ।
सरणिः पद्धतिः पद्या वर्तन्येकपदीति च ॥ १५ ॥

अयनमिति ॥ अयन्ते ईयते वानेन । 'करणा–' (३।३।११७) इति मुकुटः । तन्न । घञो ल्युडपवादत्वात् । आतो युच् (उ० २।७८) कर्मणि वा ल्युट् (३।३।११३) । **'अयनं** पथि गेहेऽर्कस्योदग्दक्षिणतो गतौ' इति हैमः ॥ (१) ॥*॥ वृत्तं तत् । वर्ततेऽत्र वर्तन्तेऽनेन वा । मनिन् (उ० ४।१४५) ॥ (२) ॥*॥ मृज्यते वितृणीक्रियते पादैः । 'मृजू शुद्धौ' (अ० प० से०) । मार्ग्यते । 'मार्ग अन्वेषणे' (चु० उ० से०) वा । यत्तु—मृग्यतेऽनेन–इति मुकुटेनोक्तम् । तन्न । अलोपस्य स्थानिवत्त्वाल्लक्षणाभावान्नोपधावृद्धिः स्यात् । **'मार्गो** मृगमदे मासे सौम्यर्क्षेऽन्वेषणे पथि' इति हैमः ॥ (३) ॥*॥ अत्ति बलम् (पथिकानाम्) 'अद भक्षणे' (अ० प० अ०) । 'अदेर्धश्च' (उ० ४।११६) इति क्रनिप्, धश्चान्तादेशः । यत्तु—अल्यते सततं गम्यते अनेन–इति मुकुटेनोक्तम् । तन्न । उक्तसूत्रविरोधात् । अततेर्धक्रनिपोरविधा-

१—'वात् मतुप्' इति तु वक्तुं युक्तम् । अत एव 'देशे लुप्' इति सूत्रे 'वादण्मतुप् च' इति सिद्धान्तकौमुद्यामुक्तम् ॥ २—'मध्यान्मः' इति सूत्रे भाष्ये तु 'आदेश्च' इति वचनं नोपलभ्यते । तस्मात् 'अग्रादिपश्चाड्डिमच्' (४।३।२३ सूत्रे) इति वचनादादेर्डिमच् वक्तव्यः ॥

१—वाल्मीकौ प्राचेतसे यथा 'पीयूषमेव नालीकं वल्मीकस्य कवेर्गिरि' इत्यनेकार्थकैरवाकरकौमुदी ॥

नात् । ('अध्वा ना पथि संस्थाने सास्रवस्कन्धकालयोः') ॥ (४) ॥*॥ पथन्तेऽनेन । 'पथे गतौ' (भ्वा० प० से०) । 'पथिमथिभ्यामिनिः' ( ) पतन्त्यनेन इति वा । 'पतेस्थश्च' इतीनिः, थोऽन्तादेशश्च ॥*॥ 'पथः' इत्यदन्तोऽपि । **'वाटः पथश्च मार्गश्च'** इति त्रिकाण्डशेषः ॥ (५) ॥*॥ पद्यतेऽनया । 'पद्यटिभ्यामविः' ( ) । 'कृदिकारात्–' (ग० ४।१।४५) इति ङीष् ॥ (६) ॥*॥ सरन्त्यनया । 'सृ गतौ' (भ्वा० प० अ०) ।—क्तिन् (३।३।९४)–इति मुकुटः । तन्न । 'अजब्भ्याम्–' (वा० ३।३।१२६) इति ल्युट्प्रसङ्गात् । (अतः) करणस्यापि कर्तृत्वविवक्षायां 'क्तिच्क्तौ च' (३।३।१७४) इति क्तिच् । **'सृतिर्**गतौ पथि' इति हैमः ॥ (७) ॥*॥ 'अर्ति–' (उ० २।१०२) इत्यनिः । **'सरणिः** श्रेणिवर्त्मनोः' इति दन्त्यादौ रभसः । **'शुभं** शुभे प्रदीप्ते च, **शरणिः** पथि चावलौ' इति तालव्यादावजयात्तालव्यादिरपि । तत्र 'शृ हिंसायाम्' (क्या० प० से०) । बाहुलकादनिः ॥ (८) ॥*॥ पादाभ्यां हन्यते । 'हन हिंसागत्योः' (अ० प० अ०) । क्तिन् (३।३।९४) । 'हिमकाषिहतिषु च' (६।३।५४) इति पद्भावः । **'पद्धतिः** पथि पद्धौ च' इति हैमः ॥ (९) ॥*॥ पादाय हिता । 'शरीरावयवाद्यत्' (५।१।६) । 'पद्यत्यतदर्थे' (६।३।५३) इति पद्भावः । 'पदमस्मिन्दृश्यम्' (४।४।८७) इति वा ॥ (१०) ॥*॥ वर्तन्तेऽनया । 'वृतेश्च' (उ० २।१०६) इत्यनिः । **'वर्तनी** पथि । वर्तने तर्कुपिण्डे च' इति हैमः ॥*॥ 'चात् (२।१०६ उणादिसूत्रेण) मुट्' इत्येके । तत्र **वर्त्मनि** ॥ (११) ॥*॥ एकः पादोऽस्याम् । 'कुम्भपदीषु च' (५।४।१३९) इति निपातितः । यद्वा 'संख्यासुपूर्वस्य' (५।४।१४०) इति पादस्यान्तलोपः । 'पादोऽन्यतरस्याम्' (४।१।८) इति वा ङीप् । 'पादः पत्' (६।४।१४०) ॥*॥ अत्र पक्षे 'एकपाद्' इत्यपि रूपान्तरम् । **'एकपदं** तत्काले नपुंसकं, वर्त्मनि स्त्री स्यात्' ॥ (१२) ॥*॥ द्वादश **'मार्गस्य'** ॥

अतिपन्थाः सुपन्थाश्च सत्पथश्चार्चितेऽध्वनि ।

अतीति ॥ खती पूजायाम् । 'कुगति–' (२।२।१८) इति समासः । 'न पूजनात्' (५।४।६९) ॥ (१) ॥ (२) ॥*॥ संश्चासौ पन्थाश्च । 'सन्महत्–' (२।१६१) इति तत्पुरुषः 'ऋक्पूर्' (५।४।७४) इत्यः ॥ (३) ॥*॥ त्रीणि **'शोभनमार्गस्य'** ॥

व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः ॥१६॥

व्यध्व इति ॥ विरुद्धोऽध्वा । 'प्रादयो गताद्यर्थे' (वा० २।२।१८) इति समासः । 'उपसर्गादध्वनः' (५।४।८५) इत्यच् ॥ (१) ॥*॥ दुष्टोऽध्वा ॥ (२) ॥*॥ विरुद्धः पन्थाः 'ऋक्पूर्–' (५।४।७४) इत्यः–इति मुकुटः । तन्न । ('पथः संख्याव्ययादेः') (वा० २।४।३०) इति क्लीबताप्रसङ्गात् । अतः 'विरुद्धः पथः' इति विग्रहीतव्यम् ॥ (३) ॥*॥ कुत्सितोऽध्वा । 'कुगति–' (३।२।१८) इति समासः । 'कोः कत्तत्पुरुषेऽचि' (६।३।१०१) ॥ (४) ॥*॥ 'ईषदर्थे च' (६।३।१०५) इति कादेशः । कुमार्गोऽपीषन्मार्गो भवति । कुत्सितः पथः । 'वाटः पथश्च मार्गश्च' इति त्रिकाण्डशेषाददन्तः पथशब्दः । पथशब्देन समासेन पुंस्त्वं निर्वाह्यम् । पथिन्शब्देन समासे 'का पथ्यक्षयोः' (६।३।१०४) इति कादेशे 'पथः संख्याव्ययादेः' (वा० २।४।३०) इति क्लीबत्वं भवति । 'सत्पथस्तु सुपन्थाः स्याद् व्यध्वो विपथकापथौ' इति रभसोऽप्येवम् । (**'कापथः** कुत्सितपथे उशीरे क्लीबमिष्यते') ॥*॥ कुत्सितार्थकुशब्दस्य पथशब्देन समासे **कुपथः**, अपि ॥ (५) ॥*॥ पञ्च **'दुर्मार्गस्य'** ॥

अपन्थास्त्वपथं तुल्ये

अपन्था इति ॥ पथोऽभावः । 'नञ्' (१।२।६) इति तत्पुरुषः ॥ (१) ॥*॥ 'पथो विभाषा' (५।४।७२) इत्यः । 'अपथं नपुंसकम्' (२।४।३०) ॥ (२) ॥*॥ द्वे **'मार्गाभावस्य'** ॥

शृङ्गाटकचतुष्पथे ।

शृङ्गेति ॥ शृङ्गं प्राधान्यमटति । 'अट गतौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) । 'संज्ञायां कन्' (५।३।७५) । (**'शृङ्गाटकं** भवेद्वारिकण्टके च चतुष्पथे') ॥ (१) ॥*॥ चतुर्णां पथां समाहारः । 'तद्धितार्थो–' (२।१।५१) इति समासः 'ऋक्पूर्–' (५।४।७४) इति समासान्तः । 'इदुदुपधस्य–' (८।३।४१) इति षत्वम् । 'पथः संख्या–' (वा० २।४।३०) इति क्लीबत्वम् । (**'चतुष्पथं** चतुर्मार्गसंगमे, ब्राह्मणे तु ना') ॥ (२) ॥*॥ द्वे **'चतुष्पथस्य'** ॥

प्रान्तरं दूरशून्योऽध्वा

प्रान्तरमिति ॥ प्रकृष्टमन्तरमत्र । 'प्रादिभ्यः–' (वा० २।२।२४) इति बहुव्रीहिः । (**'प्रान्तरं** कोटरेऽरण्ये दूरशून्यपथेऽपि च') ॥ (१) ॥*॥ दूरश्चासौ शून्यश्च ॥ एकम् **'दूरशून्यच्छायाजलादिवर्जितमार्गस्य'** ॥

कान्तारं वर्त्म दुर्गमम् ॥ १७ ॥

कान्तारमिति ॥ कस्य जलस्य सुखस्य वान्तः । कान्तमृच्छति । 'ऋ गतौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) ॥ (१) ॥*॥ एकम् **'चोराद्युपद्रवैर्दुर्गममार्गस्य'** ॥

गव्यूतिः स्त्री क्रोशयुगम्

गव्यूतिरिति ॥ 'गोर्यूतौ छन्दस्युपसंख्यानम्', 'अध्वपरिमाणे च' (वा० ६।१।७९) इत्यवादेशः । 'धन्वन्तरसहस्रं

१—आस्रवः कर्मबन्धहेतुक्रिया हिंसादिः तेन सह वर्तते यः स्कन्धः शरीरभावापन्नो रूपरसादिसमूहः सः सास्रवस्कन्धः । इत्यनेकार्थकैरवाकरकौमुदी ॥

तु क्रोशः क्रोशद्वयं पुनः । **गव्यूतं** क्ली तु **गव्यूतिर्गोरुतं गोमतं** च तत्' इति वाचस्पतिः । 'धनुर्हस्तचतुष्टयम्' 'द्वाभ्यां धनुःसहस्राभ्यां **गव्यूतिः** पुंसि भाषितः' इति शब्दार्णवः ॥ (१) ॥*॥ क्रोशयोर्युगम् ॥ (२) ॥*॥ द्वे **'क्रोशद्वयपरिमितस्य'** ॥

नल्वः किष्कुचतुःशतम् ।

नल्व इति ॥ किष्कूणां हस्तानां चतुःशती । 'चतुःशतम्' इति तु पात्रादित्वात् (वा० २।४।३०) । चतुर्गुणं शतम्, इति वा । शाकपार्थिवादिः (वा० २।१।६९) । नल्यते । 'णल बन्धने' (भ्वा० प० से०) । उल्वादित्वात् (उ० ४।९५) वः । कौत्सस्तु 'नल्वं हस्तशतम्' इत्याह ॥ एकम् **'चतुःशतहस्तपरिमितस्य'** ॥

घण्टापथः संसरणम्

घण्टेति ॥ घण्टोपलक्षितः पन्थाः । शाकपार्थिवादिः (वा० २।१।६९) । यद्वा घण्टानां पन्थाः । घण्टाग्रहणं वादित्राणां तद्वतां हस्त्यादीनां चोपलक्षणम् । 'ऋक्पूर्-' (५।४।७४) इत्यः ॥ (१) ॥*॥ संभूय सरन्त्यत्र, अनेन, वा । 'सृ गतौ' (भ्वा० प० अ०) ।—'करणा-' (३।३। ११७) इति ल्युट्-इति मुकुटः । तन्न । घस्य ल्युडपवादत्वात् । बाहुलकाद्वा ल्युट् (३।३।११३) युच् (उ० २।७८) तु युक्तः ॥ (२) ॥*॥ 'दश धन्वन्तरो राजमार्गो घण्टापथः स्मृतः' इति चाणक्यः ॥ द्वे **'राजमार्गस्य'** ॥

तत्पुरस्योपनिष्करम् ॥ १८ ॥

तदिति ॥ तत् संसरणम् । पुरस्य चेद्भवति तदा । उपनिष्किरन्ति निस्सरन्ति सैन्यान्यत्र । 'कॄ विक्षेपे' (तु० प० से०) ।—'ऋदोरप्' (३।३।५७) इति मुकुटः । तन्न । अपो बाधकस्य ल्युटोऽपि 'पुंसि' (३।३।११८) इति घस्यापवादत्वात् । यद्वा उपनिःकीर्यते सैन्यैर्हन्यते । 'कॄत् हिंसायाम्' (क्या० उ० से०) । 'कर्मण्यण्' (३।३।५७) । 'इदुदुपधस्य-' (८। ३।४१) इति षः ॥ (१) ॥*॥ एकम् **'पुरमार्गस्य'** ॥

इति भूमिवर्गविवरणम् ॥

पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनम् ।
स्थानीयं निगमः

पूरिति ॥ पिपर्ति । 'पॄ पालनपूरणयोः' (जु० प० से०) 'भ्राजभास-' (३।३।१७७) इति क्विप् । 'उदोष्ठ्य-' (७। १।१०२) इत्युत्वम् ।—'हलि च' (८।२।७७) इति दीर्घः— इति मुकुटः । तन्न । 'वोः' (८।२।७६) इत्यस्य विषयात् । पूर्यते । 'पुर अग्रगमने' (तु० प० से०) । संपदादि क्विप् (वा० ३।३।१०८) वा । यत्तु—पिपर्ति, पूरयति, वा इति विगृह्य 'पॄ पालने' इति धातुमुपन्यस्य 'भ्राजभास-' इति क्विप्— इति मुकुटः । तन्न । उक्तधातोः 'पूरयति' इति रूपासंभवात् । 'पूरी आप्यायने' (चु० उ० से०) इत्यस्मादुक्तसूत्रेण क्विपोऽविधानात् । सर्वत्र दीर्घोच्चारणश्रवणप्रसङ्गाच्च । ('पूः शरीरे पत्तने च') ॥ (१) ॥*॥ यदपि—'पॄ पालने' इत्यस्माद् 'ऋदोरप्' (३।३।५७) । पूर्वविप्रतिषेधेन गुणादुत्वम्— इत्युक्तम् । तदपि न । पूर्वविप्रतिषेधे प्रमाणाभावात् । 'पिपर्ति' इत्यादावतिप्रसङ्गाच्च । पुरति । 'इगुपध-' (३।१। १३५) इति कः । कर्मणः कर्तृत्वविवक्षात्र । गौरादित्वात् (४।१।४१) 'जातेः'- (४।१।६३) इति वा ङीष् ॥ (२) ॥*॥ नगाः सन्त्यत्र । 'नगपांसुपाण्डुभ्यो रः' (वा० ५।२। १०७) ॥ (३) ॥*॥ पक्षे क्लीबत्वं पत्तनसाहचर्यात् ॥*॥ पतन्ति जना यत्र । 'वीपतिभ्यां तनन्' (उ० ३।१५०) ॥*॥ 'पट्टनं पुटभेदनम्' इति वाचस्पतिः । बाहुलकात् पटेरतनन् ॥ (४) ॥*॥ पुटानि पात्राणि भिद्यन्तेऽत्र । 'भिदिर् विदारणे' (रु० उ० अ०) ।—अधिकरणे ल्युट् (३।३। ११७)—इति मुकुटः । तन्न । 'हलश्च' (३।३।१२१) इति घञो ल्युडपवादत्वात् । युच् (उ० २।७८) तूचितः ॥ (५) ॥*॥ स्थानाय हितम् । 'तस्मै हितम्' (५।१।५) इति छः ॥ (६) ॥*॥ नितरां गच्छन्त्यत्र । 'गोचर-' (३।३। ११९) इति निपातितः । **'निगमाः** पूर्वणिग्वेदनिश्चयाध्ववणिक्पथाः' इति हैमः ॥ (७) ॥*॥ सप्त **'नगरस्य'** ॥

अन्यत्तु यन्मूलनगरात् पुरम् ॥ १ ॥
तच्छाखानगरम्

अन्यदिति ॥ मूलनगरं राजधानी । ततोऽन्यत् यत्तु पुरम् । शाखेव नगरम् ॥ (१) ॥*॥ एकम् **'शाखानगरस्य'** ॥

वेशो वेश्याजनसमाश्रयः ।

वेश इति ॥ विशन्त्यत्र । 'विश प्रवेशने' (तु० प० ण०) । 'हलश्च' (३।३।१२१) घञ् । 'नेपथ्ये गृहमात्रे च वेशो वेश्यागृहेऽपि च' इति तालव्यान्ते रभसः । 'गृहमात्रे गणिकायाः सद्मनि वेशो भवेत्तु तालव्यः । तालव्यो मूर्धन्योऽलंकरणे कथित आचार्यैः' इत्यूष्मविवेकः ॥ (१) ॥*॥ वेश्याजनस्य समाश्रयो वासस्थानम् ॥ (२) ॥*॥ द्वे **'वेश्यानिवासस्य'** ॥

आपणस्तु निषद्यायाम्

आपण इति ॥ आ समन्तात् पणायन्तेऽत्र, पणन्तेऽत्र वा । 'पण व्यवहारे' (भ्वा० आ० से०) । 'गोचरसंचर-' (३।३।११९) इति साधुः ॥ (१) ॥*॥ निषीदन्त्यस्यां जनाः 'षदॢ विशरणगत्यवसादनेषु' (भ्वा०, तु० प० अ०) 'संज्ञायां समज-' (३।३।९९) इति क्यप् । 'सदिरप्रतेः' (८।३। ६६)इतिः ॥ (२)॥*॥ द्वे **'हट्टस्य' 'क्रय्यवस्तुशालायाः'** ॥

१—भट्टक्षीरस्वामी तु 'नल्वं विंशहस्तशतम्' इति दर्शितवान् मुकुटस्तु 'नल्वो विंशं हस्तशतम्' इति दर्शितवान् ॥

१—भाष्ये तु 'नगाच्च' इत्येव दृश्यते ॥

विपणिः पण्यवीथिका ॥ २ ॥

विपणिरिति ॥ विपणन्तेऽत्र 'पण व्यवहारे' (भ्वा० आ० से०)। 'इक् कृष्यादिभ्यः' (वा० ३।३।१०८) 'कृदिकारात्–' (ग० ४।१) इति ङीष् ॥ (१) ॥*॥ पण्यानां वीथी स्वार्थे कन् (५।३।७५) ॥ (२) ॥*॥ द्वे हट्टशून्यविक्रयस्थानस्य । हट्टमार्गस्य इति स्वामी । 'आपणः पण्यवीथी च द्वयं वीथीति संज्ञितम्' इति शाश्वतः । 'आपणः पण्यवीथ्यां च पण्ये च विपणिः स्त्रियाम्' इति रभसः ॥ **'द्वयं क्रय्यवस्तुशालापङ्क्तेः'** ॥

रथ्या प्रतोली विशिखा

रथ्येति ॥ रथं वहति । 'तद्वहति रथयुग–' (४।४।७६) इति यत् । **'रथ्या** तु रथसंघाते प्रतोल्यां पथि चत्वरे' इति हैमः ॥ (१) ॥*॥ प्रतोलयति 'तुल उन्माने' चुरादिः । पचाद्यच् (३।१।१३४) । गौरादिङीष् (४।१।४१) । यत्तु—'एरच्' (३।३।५६)–इति मुकुटेनोक्तम् । तन्न । 'प्रतोलयति' इति विग्रहप्रदर्शनात् । अकर्तरि कारके भावे च एरचो विधानात् ॥ (२) ॥*॥ विशेते 'शीङः किद्भ्रस्वश्च' (उ० ५।२४) इति खः । **'विशिखाः** खनित्रिकायां रथ्यायां विशिखः शरे' इति हैमः ॥ (३) ॥*॥ त्रीणि **'ग्राममध्यमार्गस्य'** ॥

स्याच्चयो वप्रमस्त्रियाम् ।

स्यादिति ॥ चीयते । 'चिञ् चयने' (स्वा० उ० अ०)। कर्मणि 'एरच्' (३।३।५६) ॥ (१) ॥*॥ उप्यतेऽत्र । 'डुवप् बीजतन्तुसंताने' (भ्वा० उ० अ०)। 'वपिवृधिभ्यां रन्' (उ० २।२७)। **'वप्रश्चावरणे** वृन्दे प्राकारे मूलबन्धने' इति धरणिः । **'वप्रस्तातेे** पुमान्, अस्त्री रेणौ क्षेत्रे चये तटे' इति मेदिनी (२) ॥*॥ द्वे **'प्राकाराधारस्य', 'परिखोद्धृतमृत्तिकाकूटस्य'** ॥

प्राकारो वरणः सालः

प्राकार इति ॥ प्र क्रियते । 'डुकृञ् करणे' (त० उ० अ०) । कर्मणि घञ् (३।३।१९) । 'उपसर्गस्य घञि' (६।३।१२३) इति दीर्घः । आङ् वा–'सादकारयोः कृत्रिमे' इति दीर्घः–इति स्वामिमुकुटौ । तन्न । अस्यादर्शनात् ॥ (१) ॥*॥ वृणोति । 'वृञ् वरणे' (स्वा० उ० से०) कर्तरि ल्युट् (३।३।११३)। करणे (३।३।११७) वा । **'वरणो** वरणद्रुमे । प्राकारे, **वरणं** वृत्याम्' इति हैमः ॥ (२) ॥*॥ सल्यते । 'षल गतौ' (भ्वा० प० से०) । कर्मणि घञ् (३।३।१९) । **'सालो** वरणसर्जयोः' इति रभसः ॥*॥ 'तालव्यो नृपद्मषयोः **शालो,** वृक्षे वृतौ द्रुमेदे च । तालव्यदन्त्य उक्तस्तथा स्त्रियां वृक्षशाखायाम्' इत्यूष्मविवेकः । तत्र 'शल गतौ' (भ्वा० प० से०) धातुर्बोध्यः ॥ (३) ॥*॥ त्रीणि **'यष्टिकाकण्टकादिरचितवेष्टनस्य'** ॥

प्राचीनं प्रान्ततो वृतिः ॥ ३ ॥

प्राचीनमिति ॥ प्रागेव । 'विभाषाञ्चेरदिक् स्त्रियाम्' (५।४।८) इति खः ॥*॥ **'प्राचीरम्'** इति पाठे तु प्राचीयते । प्राङ्पूर्वः । 'चिञ् चयने' (स्वा० उ० अ०) । 'शुसिचिमीनां दीर्घश्च' (उ० २।२५) इति क्रन्दीर्घौ ॥ (१) ॥*॥ प्रान्ततः, सप्तम्यास्तसिः ( ) । वरणं वृतिः । 'वृञ् वरणे' (स्वा० उ० अ०)। क्तिन् (३।३।९४) ।—त्रियतेऽनया, इति 'वृतिः' इत्यपि नाम, इति स्वामी–इति मुकुटः । तन्न । करणे ल्युट्प्रसङ्गात् ॥*॥ एकं **'ग्रामादेरन्ते कण्टकादिवेष्टनस्य'** ॥

भित्तिः स्त्री कुड्यम्

भित्तिरिति ॥ भिद्यते । 'भिदिर् विदारणे' (रु० उ० अ०)। क्तिन् (३।३।९४)। **'भित्तिः** कुड्ये प्रमेदे च' इति हैमः ॥ (१) ॥*॥ कुड्यां साधु । 'तत्र साधुः' (४।४।९८) इति यत् । पृषोदरादिः (६।३।१०९)। कुड्यते वा । 'कुडि कार्कश्ये' ( ) । ण्यत् (३।१।१२४)। (**'कुड्यं** भित्तौ विलेपने' इति मेदिनी) ॥ (२) ॥*॥ द्वे **'भित्तेः'** ॥

पङ्कं यदन्तर्न्यस्तकीकसम् ।

पङ्कमिति ॥ यत् कुड्यं मध्यन्यस्तास्थि तत् ईड्यते । 'ईड स्तुतौ' (अ० आ० से०) 'उलूकादयश्च' (उ० ४।४१) इति साधु । 'भवेदेडोकमेडूकमेडुकं च' इति द्विरूपकोशः ॥ (१) ॥*॥ एकम् **'अस्थ्यादिमयकुड्यस्य'** ॥

गृहं गेहोदवसितं वेश्म सद्म निकेतनम् ॥ ४ ॥
निशान्तवस्त्यसदनं भवनागारमन्दिरम् ।
गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः ॥ ५ ॥

गृहमिति ॥ गृह्णाति । 'ग्रह उपादाने' (क्या० उ० से०)

१—मुकुटस्तु—'चत्वार्येव हट्टस्य' इत्यन्ये । 'पर्यापतत्क्रयिकलोकमगण्यपण्यपूर्णापणं विपणिनो विपणिं विमेजुः' इति माघे । 'विपणिर्हट्टः' इति वल्लभेन व्याख्यातम् । अत एव प्रयोगादविपणेः पुंस्त्वमपि—इति सर्वधरः—इत्यप्याह ॥ अत एव हैममेदिन्योः **'विपणिः** पण्यवीथ्यां च भवेदापणपण्ययोः' इत्युपलभ्यते ॥ २—केचित्तु 'विपण्यादीन्पञ्चैकार्थानाहुः । तथा च कौटिल्यः 'विशिखायां सौवर्णिकप्रचारः' इति तु भट्टक्षीरस्वामी—इति मुकुटः ॥ ३—मुकुटपुस्तकयोस्तु 'चयः' इत्युपलभ्यते ॥

१—अस्य वार्तिकस्य, उदाहरणप्रत्युदाहरणयोश्च (६।३।१२२) सूत्रे भाष्ये उपलब्धेरकिंचित्करमेतत् ॥ २—कौ द्योतते इति डप्रकरणे 'अन्यत्रापि' इति डः इति सोमनन्दी । एतेन दकारोऽत्र, न डकारः इति स्वामी—इति मुकुटः ॥

'गेहे कः' (३।१।१४४)। ('**गृहं गृहाश्च** पुंभूम्नि कलत्रेऽपि च सद्मनि' इति मेदिनी) ॥ (१) ॥*॥ गेन गणेशेन ईह्यते कायते । 'ईह चेष्टायाम्' (भ्वा० आ० से०)। कर्मणि घञ् (३।३।१९)। गो गणेशो गन्धर्वो वा ईह ईप्सितो यस्मिन्वा । 'गेहमस्त्री, शालासभे स्त्रियाम्' इति वाचस्पतिः ॥ (२) ॥*॥ उत् ऊर्ध्वम् अवसीयते स्म । 'षोऽन्तकर्मणि' (दि० प० अ०) 'षिञ् बन्धने' (स्वा० उ० अ०) वा । क्तः (३।२।१०२)। 'द्यतिस्यति–' (७।४।४०) इतीत्वम् '**अवसित**मृद्धे ज्ञातेऽप्यवसानगते च वाच्यलिङ्गं स्यात्' ॥ (३) ॥*॥ विशन्त्यत्र । 'विश प्रवेशने' (तु० प० अ०)। मनिन् (उ० ४।१।४५) ॥ (४) ॥*॥ सीदन्त्यत्र । 'षदॢ विशरणादौ' (भ्वा० तु० प० अ०)। मनिन् (उ० ४।१४५) ('**सद्म** स्यान्मन्दिरे नीरे' इति मेदिनी) ॥ (५) ॥*॥ नि केत्यतेऽस्मिन् 'कित निवासे' (भ्वा० प० से०)। अधिकरणे युच् (उ० २।७८) ॥ (६) ॥*॥ निशायामम्यते स्म । 'अम गत्यादौ' (भ्वा० प० से०)। क्तः (३।२।१०२) । 'रुष्यमत्वर–' (७।२।२८) इति नेट् । 'निशान्तं सदनं वस्त्यमगारं मन्दिरं पुरम्' इति वाचस्पतिः । ('**निशान्तं** त्रिषु शान्ते स्यात्क्लीबं तु भवनोषसोः' इति मेदिनी) ॥ (७) ॥*॥ वसनम् । 'वस निवासे' (भ्वा० प० अ०)। 'वसेस्तिः' (उ० ४।१८०)। तत्र साधुः । यत् (४।४।९८)। अप स्त्यायति संहतं भवति । 'ष्ट्यै ष्ट्यै शब्दसंघातयोः' (भ्वा० प० अ०)। 'आतश्चोपसर्गे' (३।१।१३६) इति कः पृषोदरादिः (६।३।१०९)।—'वष्टि भागुरिः' इत्यल्लोपः—इति स्वामिमुकुटौ । तन्न । तत्रापस्याग्रहणात् । '**कुलो**दवसितं **पस्त्यम्**' इति वाचस्पतिः ॥ (८) ॥*॥ सीदन्त्यत्र । 'षदॢ' (भ्वा० प० अ०)। अधिकरणे युच् (उ० २।७८)। '**सदनं** मन्दिरे तोये' ॥*॥ स्वार्थण्यन्ताद्युचि सादनमपि । 'सदनं **सादनम्**' इति द्विरूपकोशः ॥ (९) ॥*॥ ('सदनं मन्दिरे तोये')। भवन्त्यत्र । 'भू' (भ्वा० प० से०)। युच् (उ० २।६८)। भवनमस्त्यत्र वा अर्श आद्यच् (५।२।१२७)। '**भवनं** सदने भावे' इति हैमः ॥ (१०) ॥*॥ अगान् ऋच्छति । 'ऋ गतौ' (भ्वा० प० अ०)। 'कर्मण्यण्' (३।२।१) ॥*॥ आ अग्यते । 'अग कुटिलायां गतौ' (भ्वा० से०)। कर्मणि घञ् (३।३।१९)। 'विद्यादगारमागारमपगामापगामपि' इति द्विरूपकोशः ॥ (११) ॥*॥ मन्द्यते सुप्यतेऽत्र । 'मदि स्तुत्यादौ' (भ्वा० आ० से०)। 'इषिमदि–' (उ० १।५१) इति किरच्।

१—'अन्यत्रापि–' इत्यधिकरणे युच् इति पाठः ॥ २—अत एव हैमनाममालायाम् 'सभोदवसितं कुलम्' इत्यत्र कुलशब्द उपलभ्यते । 'दिव्यदेवकुलालंकृताः स्वर्गा इव मार्गाः' इति दमयन्तीश्लेषश्च । कुत्रचित् 'नल' इति लिखितमासीत् ॥ ३—इदं तु न प्रकृतोपयोगि ॥

'**मन्दिरो** मकरावासे **मन्दिरं** नगरे गृहे' इति हैमः ॥ (१२) ॥*॥ गृहशब्दो भूम्न्येव पुंसि । चात् क्लीबे ॥ (१३) ॥*॥ निचीयते धान्यादिकमत्र । 'चिञ् चयने' (स्वा० उ० अ०)। 'पाय्यसांनाय्य–' (३।१।१२९) इति साधुः । ('निवासचिति–') (३।३।४१) इति घञि निकायोऽपि । '**निकायः** सद्मसंघयोः । परमात्मनि लक्षे च' इति हैमः ॥ (१४) ॥*॥ निलीयतेऽत्र । 'लीङ् श्लेषणे' (दि० आ० अ०)। 'पुंसि' (३।३।११९) इति घः । 'एरच्' (३।३।५६) वा । '**निलयो**ऽस्तमये गृहे । गोपनस्य प्रदेशेऽपि' इति हैमः ॥ (१५) ॥*॥ एवम् आलयः ॥ (१६) ॥*॥ षोडश '**गृहस्य**' ॥

वासः कुटी द्वयोः शाला सभा

वसन्त्यत्र । 'हलश्च' (३।३।१२१) इति घञ् । '**वासो** वेश्मन्यवस्थाने **वासा** स्यादाटरूषके' इति हैमः ॥ (१७) ॥*॥ कुटति कुटिलीभवति । 'कुट कौटिल्ये' (तु० प० से०)। 'इगुपध–' (३।१।१३५) इति कः । 'इगुपधात् कित्' (उ० ४।१२०) इति, ङीनि 'कृदिकारात्–' (ग० ४।१।४५) इति ङीष् वा । '**कुटः** कोट्टे शिलाकुटे घटे गेहे **कुटी सुरा** । चित्रगुच्छा कुम्भदासी' इति हैमः । ('**कूटः** कोटे पुमानस्त्री घटे, स्त्रीपुंसयोर्गृहे । कुटी स्यात्कुम्भदासां तु सुरायां चित्रगुच्छके–' इति मेदिनी) ॥ (१८) ॥*॥ शलन्त्यत्र । 'शल गतौ' (भ्वा० प० से०)। 'हलश्च' (३।३।१२१) इति घञ् । '**शालो** हाले मत्स्यभेदे **शाला**कस्तत्प्रदेशयोः । स्कन्धशाखायाम्' इति हैमः ॥ (१९) ॥*॥ सह भान्त्यत्र । 'अॅन्येभ्योऽपि' (वा० ३।३।१०१) इति डः। '**सभा** द्यूतसमूहयोः । गोष्ठ्यां सभ्येषु शालायाम्' इति हैमः ॥ (२०) ॥*॥ चत्वारि '**सभागृहस्य**' ॥

संजवनं त्विदम् ।

चतुःशालम्

संजेति ॥ संजवन्त्यत्र । 'जु गतौ' सौत्रः । अधिकरणे ल्युट् (३।३।११८) ॥ (१) ॥*॥ चतसृणां शालाः समाहृताः 'आबन्तो वा' (वा० २।४।३०) इति वा क्लीबत्वम् ॥*॥ ऐकम् '**अन्योन्याभिमुखशालाचतुष्टयगृहस्य**' ॥

मुनीनां तु पर्णशालोटजोऽस्त्रियाम् ॥ ६ ॥

मुनीनामिति ॥ पर्णनिर्मिता शाला । शाकपार्थिवादिः (वा०२।१।६९)॥(१)॥*॥'**उ**ँटस्तृणपर्णादिः' इति देशीकोशः ।

१—एकयकारवान् । अत एवानेकार्थकैरवाकरकौमुद्यां घञन्तत्वेनैव व्याख्यातः । युक्तं चैतत् । ण्यदन्तस्य निवासार्थे एव निपातितत्वात् । घञन्तस्येव तु संघाद्यर्थकता संभवति । निकाय्यः ॥ २—हैमसटीकपुस्तके तु नोपलभ्यते ॥ ३—'इनि प्रत्यये' इति वा पाठः ॥ ४—अन्यत्रापि पाठः ॥ ५—द्वे इति मुकुटः ॥ ६—ह्रस्वोकारादिः । तथा च रघुः 'सौधजालमुटजेषु विस्मृतम्' इति—इति मुकुटः ॥

उटाज्जायते । 'पञ्चम्याम्–' (३।२।९८) इति ङः ॥ (२) ॥*॥ द्वे **'मुनीनां गृहस्य'** ॥

चैत्यमायतनं तुल्ये

चैत्यमिति ॥ चीयते । 'चित्याग्निचित्ये च' (३।१।१३२) इति साधुः । चित्याया इदम् । 'तस्येदम्' (४।३।१२०) इत्यण् ।—तस्येदम्—इति विग्रहप्रदर्शनं मुकुटस्य प्रमादः । चित्यायाः स्त्रीलिङ्गत्वात् । 'चैत्यमायतने बुद्धबिम्बेऽप्युद्देश्यपादपे' इति रुद्रः ॥ (१) ॥*॥ आयतन्तेऽत्र । 'यती प्रयत्ने' (भ्वा० आ० से०) । अधिकरणे ल्युट् (३।३।११८) ॥ (२) ॥*॥ द्वे **'यज्ञस्थानस्य'** । उद्देश्यवृक्षस्येत्यन्ये ॥

वाजिशाला तु मन्दुरा ।

वाजीति ॥ वाजिनां शाला ॥ (१) ॥*॥ मन्दन्तेऽत्र । 'मदि स्तुत्यादौ' (भ्वा० आ० से०) । 'मन्दिवाशि–' (उ० १।३८) । इत्युरच् **'मन्दुरा** वाजिशालायां शयनीयार्थवस्तुनि' ॥ (२) ॥*॥ द्वे **'अश्वशालायाः'** ॥

आवेशनं शिल्पिशाला

आवेशनमिति ॥ आविशन्त्यत्र । 'विश प्रवेशने' (तु० प० अ०) । 'करणा–' (३।३।११८) इति ल्युट् । युच् (उ० २।७८) वा । **'आवेशनं** शिल्पिशाले भूतावेशप्रवेशयोः' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ शिल्पिनां शाला ॥*॥ शिल्पस्य शाला, इति तु स्वामी ॥ (२) ॥*॥ द्वे **'स्वर्णकारादीनां शालायाः'** ॥

प्रपा पानीयशालिका ॥ ७ ॥

प्रपेति ॥ प्रपिबन्त्यस्याम् । 'पा पाने' (भ्वा० प० आ०) । 'आतश्चोप–' (३।३।१०६) इत्यङ् ॥ (१) ॥*॥ पानीयस्य शाला । स्वार्थे कन् (५।३) ॥ (२) ॥*॥ द्वे **'जलशालायाः ॥**

मठश्छात्रादिनिलयः

मठ इति ॥ मठन्त्यत्र 'मठ मदनिवासयोः' (भ्वा० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । संज्ञापूर्वकत्वान्न वृद्धिः । यद्वा मठति निवासयति । पचाद्यच् (३।१।१३४) ॥ (१) ॥*॥ छात्रोऽन्तेवासी आदिर्येषां परिव्राजक–क्षपणकादीनां तेषां निलयः । बौद्धानां तु **विहारोऽस्त्री** ॥*॥ एकम् **'शिष्याणां गृहस्य=मठस्य'** ॥

गञ्जा तु मदिरागृहम् ।

गञ्जेति ॥ गञ्जन्त्यस्याम् । 'गजि शब्दार्थः' (भ्वा० प० से०) । 'गुरोश्च हलः' (३।३।१०३) इत्यः । **'गञ्जा** खनौ सुरागृहे । **गञ्जः** स्यात्पुंसि रीढायां भाण्डागारे तु न स्त्रियाम्' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ मदिराया गृहम् ॥ (२) ॥*॥ द्वे **'मद्यसंधानगृहस्य'** ॥

गर्भागारं वासगृहम्

गर्भेति ॥ गर्भ इवागारम् ॥ (१) ॥*॥ वासस्य गृहम् ॥ (२) ॥*॥ द्वे **'गृहमध्यभागस्य'** ॥

अरिष्टं सूतिकागृहम् ॥ ८ ॥

अरिष्टमिति ॥ नास्ति रिष्टमत्र । न रिष्यते स्म हिंसैः इति वा । 'रिष हिंसायाम्' (भ्वा० प० से०) । क्तः (३।२।१०२) । **'अरिष्टो** लशुने निम्बे फेनिले काककङ्कयोः । **अरिष्टम्**शुभे तक्रे सूतिकागार आसवे । शुभे मरणचिह्ने च' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ सूतैव सूतिका । 'सूतकादीनां वा' (वा० ७।३।४५) सूतिकाया गृहम् ॥ (२) ॥*॥ द्वे **'प्रसवस्थानस्य'** चत्वारः पर्यायाः, इत्यन्ये ॥

वातायनं गवाक्षः

वातेति ॥ ईयतेऽनेन । 'इण् गतौ' (अ० प० अ०) करणे ल्युट् (३।३।११८) । युच् (उ० २।७८) वा । वातस्यायनम् ॥ (१) ॥*॥ गवामक्षीव । 'अक्ष्णोऽदर्शनात्' (५।४।७६) इत्यच् । गावो जलानि किरणा वाक्षन्ति व्याप्नुवन्ति एनमनेन वा । 'अक्षू व्याप्तौ' (भ्वा० प० से०) । अकर्तर्यर्थे घञ् (३।३।१९) । यत्तु—'इन्द्राक्षयोः समासे च' इत्यवङ् इति स्वामिनोक्तम् । तन्न । एतद्वचनस्यादर्शनात् । **'गवाक्षी** शक्रवारुण्यां **गवाक्षो** जालके कपौ' ॥ (२) ॥*॥ द्वे **'जालकस्य'** ॥

अथ मण्डपोऽस्त्री जनाश्रयः ।

अथेति ॥ मण्डनं मण्डः । 'मडि भूषायाम्' (भ्वा० प० से०) । घञ् (३।३।१८) मण्डं पाति । 'पा रक्षणे' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । मण्डं पिबति वा ॥ (१) ॥*॥ जनानामाश्रयः ॥ (२) ॥*॥ द्वे **'स्त्रीवासोचितमण्डपस्य'** ॥

हर्म्यादि धनिनां वासः

हर्म्येति ॥ हरति मनः । 'हृञ् हरणे' (भ्वा० उ० अ०) । अभ्र्यादित्वात् (उ० ४।११२) यत् मुट् च ॥ (१) ॥*॥ आदिना स्वस्तिकादि ॥ एकम् **'धनवतां वासगृहस्य'** ॥

प्रासादो देवभूभुजाम् ॥९॥

प्रासेति ॥ देवानां भूभुजां च गृहम् । प्रसीदति मनोऽत्र । 'हलश्च' (३।३।१२१) इति घञ् । 'उपसर्गस्य घञि' (६।३।१२२) इति दीर्घः । आङ् वा ॥ (१) ॥*॥ एकम् **'देवानां राज्ञां च गृहस्य'** ॥

सौधोऽस्त्री राजसदनम्

सौध इति ॥ **'सुधा** स्त्री लेपने मूर्व्यां स्नुहि गञ्जेष्टिकामृते' । सुधा लेपोऽस्यास्ति । ज्योत्स्नादित्वात् (वा० ५।२।१०३) अण् ॥ (१) ॥*॥ राज्ञः सदनं योग्यत्वात् । यद्वा

१—अन्यत्रापि ॥ २—'विभाषा सेना–' (२।४।२५) इति क्लीबतायां 'शिल्पिशालम्' अपि ॥

१—भाष्ये तु 'वा सूतिकापुत्रिकावृन्दारकाणाम्' इत्युपलभ्यते ॥

सदनानां राजा । राजदन्तादिः (२।२।३१) ॥ (२) ॥*॥ द्वे **'राजगृहस्य'** ॥

उपकार्योपकारिका ।

उपेति ॥ उपक्रियते । कर्मणि 'ऋहलोर्ण्यत्' (३।१।१२४) । (**'उपकार्या** राजसद्मन्युपकारोचितेऽन्यवत्') ॥ (१) ॥*॥ उपकरोति ण्वुल् (३।३।१३३) । (**'उपकारिकोपकर्त्र्यां पिष्टमेदे नृपालये'**) ॥*॥ **'उपकार्युपकारिका'** इति द्विरूपकोशदर्शनादुपकार्यपि । तत्र उपकारयति पचाद्यचि (३।१।१३४) गौरादि (४।१।४१) ङीष् । यत्तु—उप अधिकं करोतीति विगृह्य 'कर्मण्यण्' (३।२।१) इत्युक्तं मुकुटेन । तन्न । निपातानामसत्त्वार्थकत्वेन कारकत्वायोगात् ॥ (२) ॥*॥ द्वे **'राजगृहसामान्यस्य'** ॥

स्वस्तिकः सर्वतोभद्रो नन्द्यावर्तादयोऽपि च ॥ १० ॥
विच्छन्दकः प्रभेदा हि भवन्तीश्वरसद्मनाम् ।

स्वस्तिक इत्यादि ॥ स्वस्ति क्षेमं कायति । 'कै शब्दे' (भ्वा० प० अ०) 'आतोऽनुप–' (३।२।३) इति कः । (**'स्वस्तिको** मङ्गलद्रव्ये चतुष्क–गृहभेदयोः') ॥ (१) ॥*॥ सर्वतो भद्रमत्र ॥ (१) ॥*॥ नन्दयतीति नन्दी आवर्तोऽत्र । (**'नन्द्यावर्तः** पुमान्वेश्मप्रभेदे भगवद्भुमे') ॥ (१) ॥*॥ ॥१०॥ विशिष्टच्छन्दोऽत्र । यद्वा विशिष्टाच्छन्दयति साभिलाषान्करोति । ण्वुल् (३।१।१३३) कुन् (उ० २।३२) वा ॥*॥ **'विच्छर्दकः'** इति पाठः–इति स्वामी । तत्र 'उच्छृदिर् दीप्तौ' (रु० उ० से०) । ण्वुल् (३।१।१३३) ॥ (१) ॥*॥ आदिना रुचक–वर्धमानादिपरिग्रहः ॥ **'ईश्वरगृहविशेषाणां'** पृथगेकैकम् ॥

रुयगारं भूभुजामन्तःपुरं स्यादवरोधनम् ॥ ११ ॥
शुद्धान्तश्चावरोधश्च

रुयेति ॥ स्त्रीणामगारम् । अन्तरभ्यन्तरे पुरं गृहम् ॥ (१) ॥*॥ अवरुध्यन्तेऽत्र ल्युट्[१] (३।३।११७) ॥ (२) ॥*॥ घञि (३।३।१४) त्ववरोधः । (**'अवरोधस्तिरोधाने राजदारेषु तद्गृहे'**) ॥ (४) ॥*॥ शुद्धा उपधाशुद्धा रक्षका अन्ते समीपेऽस्य ॥ (३) ॥*॥ चत्वारि **'राज्ञां स्त्रीगृहस्य'** ॥

स्यादट्टः क्षोममस्त्रियाम् ।

स्यादिति ॥ अट्टयते । 'अट्ट अतिक्रमणे' (भ्वा० आ० से०) । कर्मणि घञ् (३।३।१४) । अट्यति वा । अच् (३।३।१३४) ॥ (१) ॥*॥ क्षुवन्त्यत्र । 'टुक्षु शब्दे' (अ० प० से) । 'अर्तिस्तु' (उ० १।१४०) इति मः ॥*॥ प्रज्ञाद्यणि (५।४।३८) **'क्षौमः'** अपि ॥ (२) ॥*॥ द्वे **'हर्म्याद्युपरिगृहस्य'** ॥

१—असत्त्वार्थकानामपि कारकत्वं 'पचादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्ति' इति 'भूवादि–' (१।३।१) सूत्रस्थभाष्यतो लभ्यते ॥ २—एतदग्रे युज्वेति पाठः ।

प्रधाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके ॥ १२ ॥

प्रधाणेति ॥ प्रहण्यते । 'अगारैकदेशे प्रघणः प्रधाणश्च' (३।३।७९) ॥ (१) ॥*॥ **'प्रघणोऽलिन्दके** ताम्रकलशे लोहमुद्गरे' इति हैमः ॥ (२) ॥*॥ अल्यते भूष्यते । 'अल भूषणादौ' (भ्वा० प० से०) बाहुलकात्किन्दच् ॥*॥ प्रज्ञाद्यणि 'आलिन्दः' अपि । 'गृहैकदेशे **आलिन्दः** प्रघाणः प्रघणस्तथा' इत्यमरमाला । 'अलिन्दस्त्वल्पपिण्डिका' इति सुभूतिः[१] ॥ (३) ॥*॥ त्रीणि **'द्वारप्रकोष्ठाद्बहिर्द्वाराग्रवर्तिचतुष्कस्य'** ॥

गृहावग्रहणी देहली

गृहेति ॥ गृह्यतेऽनया । 'ग्रह उपादाने' (क्रया० उ० से०) । 'करणा–' (३।३।११७) इति ल्युट्[२] ॥ (१) ॥*॥ देहनम् 'दिह उपचये' (अ० उ० अ०) भावे घञ् (३।३।१३) देहं गोमयाद्युपलेपं लाति । 'ला दाने' (अ०प०अ०) । 'आतोऽनुप–' (३।२।३) इति कः । गौरादिः (४।१।४१) ॥ (२) ॥*॥ द्वे **'उदुम्बरस्य'** ॥

अङ्गनं चत्वराजिरे ।

अङ्गन मिति ॥ अङ्गत्यत्र । 'अगि गतौ' (भ्वा० प० से०) । 'करणा–' (३।३।११७) इति ल्युट् । **'अङ्गनं** प्राङ्गणे याने कामिन्यामङ्गना मता' इति नान्तवर्गे विश्वः । 'ऐङ्गणम्' इति पाठे तु पृषोदरादिः (६।३।१०९) ॥ (१) ॥*॥ चत्यते । 'चते याचने' (भ्वा० उ० से०) । 'कृगृशृदृचतिभ्यः ष्वरच्' (उ० २।१२१) । **'चत्वरं** स्यात्पथां श्लेषे स्थण्डिलाङ्गनयो-

१—अलिन्दो ह्रस्वादिः 'यस्यामलिन्देषु न चक्रुरेव' इति माघः—इत्यपि मुकुटः ॥ २—एतदग्रे 'युज्वि तु गौरादित्वम्, इति पाठः ॥ ३—यच्च मालतीमाधवव्याख्यायां **जगद्धरः** 'अङ्गणशब्दे विधायकाभावाण्णत्वश्रुतिरयुक्ता । पृषोदरादित्वाण्णत्वमित्यपि वचोऽमूलकमेव' इति । यदपि मुरारिव्याख्यायां **रुचिपतिः** अङ्गनशब्दो णकारान्त इति केचित्पठन्ति । तदप्रामाणिकम् । नच पृषोदरादिपाठेन णत्वमिति वाच्यम् । पृषोदरादिपाठे प्रमाणाभावात् । तथाविधानुप्रासयमकादेरदर्शनाच्च' इति तदुभयमपि मन्दम् । 'कानि पृषोदरादीनि, पृषोदरप्रकाराणि । कानि पृषोदरप्रकाराणि, येषु लोपागमवर्णविकाराः श्रूयन्ते, न चोच्यन्ते' इति भाष्यतः 'कानीति । किमादिशब्दः प्रकारे, अथ व्यवस्थायाम्, इति संदेहात्प्रश्नः । पृषोदरप्रकाराणीति ॥ प्रकार आदिशब्दः, व्यवस्थार्थे ह्यादिशब्दे यथोपदिष्टग्रहणमनर्थकं स्यात्' इति कैयटश्च श्रूयमाणाप्रासलोपागमवर्णविकारस्यैव पृषोदरादित्वस्य लाभात् । गणपाठस्याप्रामाणिकत्वात् प्रामाणिकत्वेऽपि तस्याकृतिगणत्वेनाङ्गणशब्दस्य पृषोदरादित्वे बाधकाभावात् ॥ नच शिष्टाद्युक्तत्वेनाप्रामाणिकतेति वाच्यम् । 'अध्यास्य सौरभेयं मौक्तिकरुचिरङ्गणेषु विहितमतिः' इति शृङ्गारवैराग्यार्थद्वयप्रतिपादकरसिकरञ्जन—काव्ये श्लेषस्य णान्तत्वमन्तरासंभवेन तस्यावश्यकत्वात् ॥

रपि' इति हैमः ॥ (२) ॥*॥ अजन्त्यत्र । 'अज गतौ' (भ्वा० प० से०) । 'अजिरशिशिर–' (उ० १।५३) इति किरच् ॥ (३) ॥*॥ त्रीणि **'प्राङ्गणस्य'** ॥

अधस्ताद्दारुणि शिला

अध इति ॥ शिलति । 'शिल उञ्छे' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । **'शिल** उञ्छे स्त्रियां ग्राव-द्वाराधःस्थितदारुणोः' इति तालव्यादौ रभसः ॥*॥ 'तल-दारु **शिली** योषित्+नासा दारूर्ध्वमस्य यत्+' इति बोपालितात् 'शिली' इत्यपि ॥ (१) ॥*॥ एकम् **'द्वारस्तम्भाधःस्थितकाष्ठस्य'** ॥

नासा दारूपरि स्थितम् ॥ १३ ॥

नासेति ॥ नास्यते । 'णासृ शब्दे' (भ्वा० आ० से०) । 'गुरोश्च–' (३।३।१०३) इत्यः । 'विज्ञेया नासिका **नासा नासा** द्वारोर्ध्वदारु च' इति दन्त्यान्ते रुद्रः । **नासा** दारू-परि द्वारस्य । 'अधोदारु शिला स्त्रियाम्–' इति नाममाला ॥ (१) ॥*॥ **'स्तम्भद्वारस्थकाष्ठस्य'** । **'उपरिभित्तिधारकस्य काष्ठस्य'** वा एकम् ॥

प्रच्छन्नमन्तर्द्वारं स्यात्

प्रच्छन्नेति ॥ प्रकर्षेण छन्नं द्वारम् । 'कुगति–' (२।२।१८) इति समासः ॥ (१) ॥*॥ अन्तःस्थितं द्वारम् । शाक-पार्थिवादिः (२।१।६९) एकं (द्वे) **'सौधादौ गुप्तद्वारस्य'** (**खिडकी**) इति ख्यातस्य ॥

पक्षद्वारं तु पक्षकः ।

पक्षेति ॥ पक्षे पार्श्वे द्वारम् ॥ (१) ॥*॥ पक्ष इव । 'इवे प्रतिकृतौ' (५।३।९६) कन् । संज्ञायां (५।३।९७) वा । (**'पक्षक**स्तु पुमान्पार्श्वद्वारे च पार्श्वमात्रके') ॥ (२) ॥*॥ द्वे **'पार्श्वद्वारस्य'** । 'प्रच्छन्नमन्तर्द्वारं स्यात्पक्षद्वारं तदुच्यते' इति कात्यात् पूर्वान्वयी–इत्यन्ये ॥

वलीकनीध्रे पटलप्रान्ते

वलीकेति ॥ वलत्यावृणोति भित्त्यादि 'अलीकादयश्च' (उ० ४।२५) इति निपातः । **'वलीकः** पटलप्रान्ते' इति पुंस्काण्डे बोपालितात् पुंस्त्वमपि ॥ (१) ॥*॥ नितरां ध्रियते । 'धृङ् अवस्थाने' (तु० आ० अ०) । 'निश्चयेन धरति जलम्' इति वा । 'धृञ् धारणे' (भ्वा० उ० अ०) । मूल-विभुजादिः (वा० ३।२।५) । 'अन्येषामपि' (६।३।१३७) इति दीर्घः । निश्चयेन इन्धे । 'ञि इन्धी दीप्तौ' (रु० आ० से०) । 'स्फायि–' (उ० २।१३) इति रक् । मुकुटोक्ता कर-णव्युत्पत्तिस्तु नादर्तव्या 'कर्तरि कृत्' (३।४।६७) इति वाक्य-शेषात् । **'नीध्रं**(ध्रं) नेमौ वलीकेन्द्रो रेवतीभेऽपि का-

१—'नासा दारूर्ध्वमस्य यत्' इति लिखितमपि न प्रकृतोपयोगि ॥ २—'अधो दारु शिला स्त्रियाम्' इति तु न प्रकृतोपयोगि ॥

ननें' ॥ (२) ॥*॥ पटलस्य छदिषः प्रान्ते ॥ (३) ॥*॥ त्रीणि **'पटलप्रान्ते गृहाच्छादनस्य'** ॥

अथ पटलं छदिः ॥ १४ ॥

अथेति ॥ पटं लाति । 'ला दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । पटति उदकं वा । 'पट गतौ' (भ्वा० प० से०) अन्तर्भावितण्यर्थः । वृषादिः (उ० १।१०६) । **'पटलं** तिलके नेत्ररोगे छदिषि संचये । पिटके परिवारे च' इति हैमः ॥ (१) ॥*॥ छादयति 'छद अपवा-रणे' चुरादिः । 'अर्चिशुचि–' (उ० २।१०८) इतीसिः । 'इ-स्मन्–' (६।४।९७) इति ह्रस्वः ।—'साहचर्यात् सान्तं क्ली-बम्–' इति मुकुटः । तन्न । 'छदिः स्त्रियाम्' इति लिङ्गानु-शासनसूत्रात् ॥ (२) ॥*॥ **'पटम्'** **'चालम्'** अप्यत्र ॥ द्वे **'छादनस्य'** ॥

गोपनसी तु वलभीच्छादने वक्रदारुणि ।

गोपेति ॥ गोपायति । 'गुपू रक्षणे' (भ्वा० प० से०) । बाहुलकान्नसट् प्रत्ययः । अल्लोप (६।४।४८) यलोपौ (६।१।६६) । यद्वा गवां गोभिर्वा पानं गोपानं किरणानां किरणैर्वा शोषणम् । तत् स्यति निवर्तयति । 'षो अन्तकर्मणि' (दि० प० अ०) 'आतोऽनुप–' (३।२।३) इति कः । गौरादिः (४।१।४१) ॥ (१) ॥*॥ वलति । 'वल संवरणे' (भ्वा० प० से०) । बाहुलकादभच् । गौरादिः । 'शुद्धान्ते **वलभीचन्द्र-शाले** सौधोर्ध्ववेश्मनि' इति रभसः ॥ (२) ॥*॥ वक्राणि दारूणि यस्मिन् । [२]द्वे **'कुड्येषु छादनार्थं दत्तस्य वक्र-**

१—अत एव 'पटलछदिषी समे' इति हैमे उक्तम् । व्याख्यातं च तद्व्याख्यात्रा 'छदिः क्लीबलिङ्गः' इति । अतएव भट्टक्षीरस्वामिनापि 'छदिरिसन्तः क्लीबे' इत्येवोक्तम् । किंच छदिषः क्लीबत्वाभावे 'रूपभेदसाहचर्यविशेषविध्यन्यतरेण लिङ्गग्रहः' इति परिभा-षायां न्यूनतापत्तिः स्यात् । तसाद्धैमकोशतः स्वपरिभाषया च छदिषः क्लीबत्वमेव मन्तव्यम् ॥ लिङ्गानुशासनसूत्रे तु 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति भाष्येणानादरणीयतैव बोधितेति तु प्रतिभाति । फलभेदे प्रत्याख्यानासंभवादिति दिक् ॥ २—मुकुटस्तु—वलभ्याश्चन्द्रशालायाः सौधोर्ध्ववेश्मनश्छादने गोपानसीशब्दो वर्तते इति दर्शयन् 'एकम्' इत्येवोक्तवान् ॥ अतएव 'गोपानसीषु क्षणमाश्रितानाम्' इति माघव्याख्यायां वल्लभ-देवोऽपि 'वलभीच्छादनं दारुवक्रं गोपानसीं विदुः' इति कोषान्तर-मुपन्यस्तवान् ॥ अत एव मुकुटेन 'छलेन वलभ्यप्युक्ता' इति प्रोक्तम् ॥ समासघटकतयोक्तया 'छलत्वनिर्वाहः । यदि च वलभ्यपि नामस्वे-वोक्ता भवेत्तदा छलपदोपादानमनर्थकं स्यात् ॥ तसादुक्तरभसको-षप्रामाण्येन वलभी चन्द्रशालापर्यायाऽङ्गीकार्या । अत एव 'रम्या इति प्राप्तवतीः पताकाः' इति माघव्याख्यायां वल्लभदेवो वलभीरुप-रिवसतीः' इति व्याख्यत् । ह्रस्वान्तापि वलभिः । अत एव 'तां कस्यां-

काष्ठस्य' (छ(स)ज्ञा) इति ख्यातस्य ॥ पटलाधारवंशपञ्जरस्य इत्यन्ये ॥

कपोतपालिकायां तु विटङ्कं पुंनपुंसकम् ॥ १५ ॥

कपोतेति ॥ पालयति । 'पाल रक्षणे' (चु० प० से०) । ण्वुल् (३।१।१३३) । कपोतानां पालिका । कपोतान्पालयति कर्मण्यण् (३।२।१) । ङीप् (४।१।१५) । 'संज्ञायां कन्' (५।३।७५) इति वा ॥ (१) ॥*॥ विशेषेण टङ्क्यन्तेऽत्र । 'टकि बन्धने' (चु० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् ।—कर्मण्यच् (३।३।५६) वा—इति मुकुटस्य प्रमादः ॥ (२) ॥*॥ द्वे **'गृहप्रान्ते रचितपक्षिस्थानस्य'** ॥

स्त्री द्वार्द्वारं प्रतीहारः

स्त्रीति ॥ द्वारयति 'द्वृ वरणे' ( ) णिजन्तः । विच् (३।२।७५) । यद्वा द्वार्यते । संपदादिः (३।३।१०८) ॥ (१) ॥*॥ पचाद्यचि (३।१।१३४) द्वारम् । **'द्वारं** निर्गमेऽभ्युपाये' इति हैमः ॥ (२) ॥*॥ प्रतिह्रियते आह्रियते । कर्मणि घञ् (३।३।१४) 'उपसर्गस्य घञि–' (६।३।१२९) इति वा दीर्घः । **'प्रतीहारो** द्वारि द्वाःस्थे द्वाःस्थितायां तु योषिति' ॥ (३) ॥*॥ त्रीणि **'द्वारस्य'** ॥

स्याद्वितर्दिस्तु वेदिका ।

स्यादिति ॥ विगता तर्दिर्हिंसाऽस्याः । 'तर्द हिंसायाम्' (भ्वा० प० से०) । 'सर्वधातुभ्य इन्' (उ० ४।११८) इतीन् ॥ (१) ॥*॥ विदन्त्यस्याम् । इञन्तात् 'कृदिकारात्–' (ग० ४।१।४५) इति वा ङीष् । स्वार्थे कन् (५।३।७५) ॥ (२) ॥*॥ द्वे **'प्राङ्गणादिषु कृतस्योपवेशस्थानस्य'** ॥

तोरणोऽस्त्री बहिर्द्वारम्

तोरेति ॥ तुरन्त्यत्र । 'तुर त्वरणहिंसनयोः' ( ) । अधिकरणे ल्युट् (३।३।११७) । 'तोलयन्त्यत्र,' इति वा । 'तुल उन्माने' (चु० प० से०) । रलयोरेकत्वम् । 'तुतुरत्यनेन 'तुर त्वरणे' जौहोत्यादिकः ॥ (१) ॥*॥ बहिर्द्वारात् । 'अपपरि–' (२।१।१२) इति समासः) । 'बहिश्च तद्द्वारं च' इति वा ॥ (२) ॥*॥ द्वे **'द्वारबाह्यभागस्य'** ॥

पुरद्वारं तु गोपुरम् ॥ १६ ॥

पुरेति ॥ पुरस्य द्वारम् ॥ (१) ॥*॥ गोपायति । 'गुपू रक्षणे' (भ्वा० प० से०) बाहुलकादुरच् । यद्वा पोलति । 'पुल महत्त्वे' (भ्वा० प० से०) । इगुपधत्वात्कः (३।१।१३५) रलयोरभेदः । गोभिः पुरम् । गाः पुरति । 'पुर अग्रगमने' (तु० प० से०) ण्यर्थः । 'मूलविभुजा–' (वा० ३।२।५) इति कः ॥ (२) ॥*॥ द्वे **'नगरद्वारस्य'** ॥

कूटं पूर्द्वारि यद्धस्तिनखस्तस्मिन्

कूटमिति ॥ हस्तिनो नख इव । हस्तिना न खन्यते । इति वा । 'खनु अवदारणे' (भ्वा० उ० से०) 'अन्येभ्योऽपि' (वा० ३।२।१०२) इति डः ॥ (१) ॥*॥ एकं **'पुरद्वारेऽवतारणार्थं कृतस्य क्रमनिम्नस्य मृत्कूटस्य'** ॥

अथ त्रिषु ।

कपाटमररं तुल्ये

अथेति ॥ कं वातं शिरो वा पाटयति । 'पट गतौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) ॥*॥ **कवाटम्** इत्यन्ये । तत्र कं वातं वटति । 'वट वेटने' (भ्वा० प० से०) । स्त्रियाम् 'टिड्ढा–' (४।१।१५) इति ङीप् । 'कुङ् शब्दे' (तु० आ० अ०) । 'ऋदोरप्' (३।३।५७) । कवं शब्दमटतीति वा ॥ (१) ॥*॥ इयर्ति । 'अर्तिकमि–' (उ० ३।११३२) इत्यरन् । स्त्रियाम् गौरादिङीष् (४।१।४१)—इति पञ्जिका । 'कपाटश्च **कवाटश्च** त्रिषु स्यादररं न ना' इति वाचस्पतिः । **'अररं** छदकपाटयोः' इति विश्वमेदिन्यौ ॥*॥ ऋच्छति विच् (३।२।७५) । अरम् ऋच्छति । 'सर्वधातुभ्यः' (उ० ४।११८) इतीनि 'अररिः' इदन्तोऽपि । ('अररं पुनः । कपाटो**ररिः** कवाटः' इति हैमः) ॥ (२) ॥*॥ द्वे **'कपाटस्य'** ॥

तद्विष्कम्भोऽर्गलं न ना ॥ १७ ॥

तदिति ॥ तत् कपाटं विष्कभ्नाति । 'स्कम्भुः' सौत्रो रोधनार्थः । 'कर्मण्यण्' (३।२।३) ।—मुकुटस्तु–आवश्यके णिनिः (३।३।१७०) इति वदन् 'तद्विष्कम्भार्गलम्' इति मूलपाठं मन्यते । 'वेः स्कभ्नातेर्नित्यम्' (८।३।७७) इति षत्वम् ॥*॥ अर्ज्यते । 'अर्ज अर्जने' (भ्वा० प० से०) वृषादित्वात् (उ० १।१०६) कलच् । न्यङ्क्वादित्वात् (७।३।५३) कुत्वम् । (**'स्यादर्गलं** तु कल्लोले परिघेऽपि') । स्त्रियां टाप् (४।१।४) लघुत्वविवक्षायां ङीष् (४।१।५५)—इति पञ्जिका ॥ (१) ॥*॥ एकं **'कपाटरोधनकाष्ठस्य'** ॥

आरोहणं स्यात्सोपानम्

आरोहेति ॥ आरुह्यतेऽनेन । 'रुह प्रादुर्भावे' (भ्वा० प० अ०) । करणे ल्युट् (३।३।११७) । **'आरोहणं** स्यात्सोपाने समारोहे प्ररोहणे' ॥ (१) ॥*॥ सह विद्यमान उप उपरि आनो गमनमनेन ॥ (२) ॥*॥ द्वे **'पाषाणादिकृतसौधाद्यारोहणमार्गस्य'** ॥

चिह्नवनवलभौ', 'चित्रस्थानवलोक्य शून्यवलभावेकैकमाभाषते' इति मेघदूतः । 'दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था' इत्यादिप्रयोगानुरोधाद्दीर्घान्तापि । नह्येतैर्लक्ष्यैर्वलभ्या गोपानसीपर्यायत्वं संभवति । गोपानस्यां वासस्य सुखपूर्वकत्वानुपपत्तेः । प्राचीनतत्तत्काव्याविरोधाच्च । तस्माद्वलभिशब्दे बाहुलकादभिच् प्रत्ययः । 'कृदिकारात्–' इति ङीषि दीर्घान्ततेति दिक् ॥

१—इत उत्तरं 'शुच् (उ० २।७८) वा' इति वा पाठः ॥

१—तथाच कथिताभ्युदये—'प्रेयन्तेऽमी परमररयो हर्म्यवातायनानाम्' इति मुकुटः । २—सोपानं दन्त्यादि 'सोपानपथमुत्सृज्य वायुवेगसमुद्धतः' इत्यत्राश्लीलसमश्लेषात् । इति मुकुटः ॥

निश्रेणिस्त्वधिरोहणी ।

निश्रेणिरिति ॥ नियता श्रेणिः पङ्क्तिरत्र ॥*॥ सविसर्गपाठे निश्चिता श्रेणिरत्र । परसाहचर्यात्स्त्रीत्वम् । **'निश्रेणिरधिरोहण्यां खर्जूरीपादपेऽपि च'** इति हैमः ॥ (१) ॥*॥ अधिरुह्यतेऽनया । ल्युट् (३।३।११७) ॥ (२) ॥*॥ द्वे **'काष्ठादिकृतारोहणमार्गस्य'** ॥

संमार्जनी शोधनी स्यात्

संमेति ॥ संमृज्यतेऽनया । ल्युट् (३।३।११७) 'मृजेर्वृद्धिः' (७।२।११४) ॥ (१)॥*॥ शोध्यतेऽनया । 'शुध शौचे' (दि० प० अ०) ण्यन्ताल्ल्युट् (३।३।११७) ॥ (२) ॥*॥ एषु कर्तरि ल्युट् (३।३।११३) वा । 'वर्धनी' अप्यत्र । ('संमार्जनी **बहुकरी वर्धनी** च **समूहनी**' इति हैमात्) ॥ द्वे **'गृहादिसंमार्जन्याः' 'झाडू'** इति ख्यातायाः ॥

संकरोऽवकरस्तया ॥ १८ ॥

क्षिप्ते

समिति ॥ संकीर्यते । 'कॄ विक्षेपे' (तु० प० से०) । हिंसायाम् (क्या० उ० से०) वा । 'ऋदोरप्' (३।३।५७) ॥*॥ 'संकारः' इति पाठे तु कर्मणि घञ् (३।३।१४) । ['अथ **संस्कारोऽवकारेऽग्निचटत्कृतौ** । **संकारी** भुक्तकन्यायाम्' इति हैमः ॥ मेदिनीकोशे तु हस्वमध्यः] ॥ (१) ॥*॥ अवकीर्यते ॥ (२) ॥*॥ (तया शोधन्या) क्षिप्ते धूल्यादौ ॥ **'कचरा'** इति ख्यातस्य ॥

मुखं निःसरणम्

मुखमिति ॥ खन्यते । 'खनु अवदारणे' (भ्वा० उ० से०) । 'डित्खनेर्मुट् चोदात्तः' (उ० ५।२०) इत्यच् आदेर्मुडागमः । **'मुख**मुपाये प्रारम्भे श्रेष्ठे निःसरणास्ययोः' इति हैमः ॥ (१) ॥*॥ निःसरन्त्यनेन । 'सृ गतौ' (भ्वा० प० अ०) ल्युट् (३।३।११७) । **'निःसरणे** मृतौ । उपाये गेहादिमुखे निर्वाणे निर्गमेऽपि च' इति हैमः ॥ (२) ॥*॥ द्वे **'निर्गमनप्रवेशमार्गस्य'** ॥

संनिवेशो निकर्षणः ।

समिति ॥ संनिविशन्तेऽत्र । 'विश प्रवेशने' (तु० प० अ०) 'हलश्च' (३।३।१२१) इति घञ् ॥ (१) ॥*॥ कर्षणान्निर्गतः । 'निरादयः–' (वा० २।२।१८) इति समासः ॥ (२) ॥*॥ द्वे **'पुरादौ गृहादिरचनापरिच्छिन्नदेशस्य'** ॥

समौ संवसथग्रामौ

समाविति ॥ संवसन्त्यत्र । 'वस निवासे' (भ्वा० प० अ०) 'उपसर्गे वसः' (उ० ३।११६) इत्यथच् ॥ (१) ॥*॥ ग्रसते । 'ग्रसु अदने' (भ्वा० आ० से०) । 'ग्रसेरा च' (उ० १।१४३) इति मन् आत्वम् । **'ग्रामः** खरे संवसथे+ग्रीष्मे ऊष्मर्तुभेदयोः' ॥ (२) ॥*॥ द्वे **'ग्रामस्य'** ॥

१—इदं तु ग्रीष्मशब्दार्थबोधकत्वान्न प्रकृतोपयोगि ॥

वेश्मभूर्वास्तुरस्त्रियाम् ॥ १९ ॥

वेश्मेति ॥ वेश्मनो भूः ॥ (१) ॥*॥ वसन्त्यत्र । 'वसेस्तुन्नगारे णिच्च' (उ० १।७०) इति तुन् । **('वास्तु** स्याद्गृहभूपुर्योर्गृहे सीमसुरङ्गयोः' ॥ (२) ॥*॥ द्वे **'गृहरचनावच्छिन्नभूमेः'** ॥

ग्रामान्त उपशल्यं स्यात्

ग्रामेति ॥ ग्रामस्यान्तं समीपम् ॥ (१) ॥*॥ शल्यमुपगतः प्रादिसमासः (वा० २।२।१८) ॥ (२) ॥*॥ ग्रामग्रहणं चोपलक्षणम् । अत एव **'उपकण्ठो**पशल्ये द्वे' इति त्रिकाण्डशेषः ॥*॥ द्वे **'ग्रामादिसमीपदेशस्य'** ॥

सीमसीमे स्त्रियामुभौ ।

सीमेति ॥ सीयते । 'षिञ् बन्धने' (स्वा० उ० अ०) । 'नामन्सीमन्–' (उ० ४।१५१) इत्यादिना निपातितः 'मनः' (४।१।११) इति न ङीप् ॥ (१) ॥*॥ 'डाबुभाभ्याम्–' (४।१।१३) इति पक्षे डाप् । **('सीमा** घाटस्थितिक्षेत्रेष्वण्डकोषेऽपि च स्त्रियाम्' ॥ (२) ॥*॥ 'औघाटशब्दोऽप्यत्र' ॥*॥ द्वे **'सीमायाः'** ॥ चत्वार्यैकार्थानि इत्यन्ये ॥

घोष आभीरपल्ली स्यात्

घोष इति ॥ घोषन्ति गावोऽत्र । 'घुषिरविशब्दने' (भ्वा० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । **'घोष** आभीरपल्लयां स्याद्गोपालध्वनिघोषके । कांस्ये चाम्बुदनादे ना **घोषा** मधुरिकौषधौ' ॥ (१) ॥*॥ आभीराणां पल्लिः । 'कुटिग्रामकयोः **पल्लिः**' इति शाश्वतः ॥ (२) ॥*॥ द्वे **'गोपग्रामस्य'** ॥

पक्वणः शवरालयः ॥ २० ॥

पक्वण इति ॥ पचन्ति । क्विप् (३।२।१७८) । कणन्ति । 'कण शब्दे' (भ्वा प० से०) पचाद्यच् (३।३।१३४) । पचः कणा यत्र । पाककलहाद्येव प्रधानं तत्र नान्यत् ॥ (१) ॥*॥ शमं रान्ति शवराः । तेषामालयः ॥ (२) ॥*॥ द्वे **'भिल्लग्रामस्य'** ॥

इति पुरवर्गविवरणम् ॥

महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः ।
अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः ॥ १ ॥

महीध्र इत्यादि ॥ महीं धरति । 'धृञ् धारणे' (भ्वा० उ० अ०) । मूलविभुजादित्वात् (वा० ३।२।५) कः ॥ (१) ॥*॥ शिखरमस्यास्ति । अत इनिः (५।२।११५) । **'शिखरी** स्यादपामार्गे शैलपादपयोः पुमान्' ॥ (२) ॥*॥ क्ष्मां बिभर्ति । 'डुभृञ् धारणपोषणयोः' (जु० उ० अ०) । 'क्विप् च' (३।२।

१—तथाच माघः 'शैलोपशल्यनिपतद्रथनेमिधारा–' इति– इति मुकुटः ॥ २—तथाच प्रयोगः 'दिग्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते' इति—इति मुकुटः ॥

७६) इति क्विप् ॥(३)॥*॥ ह्रियते । 'हृञ् हरणे' (भ्वा० उ० अ०)। 'ऋहलोर्ण्यत्' (३।१।१२४)। न हार्यः । **'अहार्यो** हर्तुमशक्ये शैलेऽपि' इति हैमः ॥ (४)॥*॥ धरति । 'धृञ् धारणे' (भ्वा० उ० अ०) । पचाद्यच् (३।१।१३५)। 'धरः कूर्माधिपे गिरौ । कार्पासतूलेऽथ **धरा** मेदोभूमिजरायुषु' इति हैमः ॥ (५)॥*॥ पर्वाणि सन्त्यत्र । 'तप् पर्वमरुज्यां' (वा० ५।२।१२२) यद्वा पर्वति । 'पर्व पूरणे' (भ्वा० प० से) । 'भृमृदृशि–' (उ० ३।११०) इत्यतच् । (**'पर्वतः** पादपे पुंसि शाकमत्स्यप्रभेदयोः । देवमुन्यन्तरे शैले' ॥ (६) ॥*॥ अत्ति, अद्यते, वा 'अद भक्षणे' (अ० प० अ०) 'अदिशदिभूशुभिभ्यः क्रिन्' (उ० ४।६५) । **'अद्रिस्तु** पर्वते । सूर्ये शाखिनि च' इति हैमः ॥ (७) ॥*॥ गां त्रायते । 'त्रैङ् पालने' (भ्वा० आ० अ०) । 'आतः–' (३।२।३) इति कः । **'गोत्रं** क्षेत्रेऽन्वये छत्रे संभाव्ये बोधवर्त्मनोः । वने नाम्नि च, **गोत्रोऽद्रौ, गोत्रा** भुवि गवां गणे' इति हैमः ॥ (८) ॥*॥ गिरति 'गॄ निगरणे' (तु० प० से०) । बाहुलकात्किः । 'ऋत इद्धातोः' (७।१।१००)। **'गिरिः** पूज्येऽक्षिरुजि कन्दुके । शैले गैरेयके गीर्णावपि' इति हैमः ॥ (९) ॥*॥ ग्रसते । 'ग्रसु अदने' (भ्वा आ० से०) 'अन्येभ्योऽपि–' (३।२।७५) इति वनिप् । पृषोदरादिः (६।३।१०९) ॥ (१०) ॥*॥ न चलति । 'चल कम्पने' (भ्वा० प० से०) । पचाद्यच् (३।१।१३५)। **'अचलस्तु** गिरिकीलयोः । **अचला** भुवि' इति हैमः ॥ (११) ॥*॥ प्रचुराः शिलाः सन्त्यत्र । ज्योत्स्नादित्वादण् (वा० ५।२।१०३) ॥ **'शैलो** भूम्नि **शैलं** तु शैलेये तार्क्ष्यशैलके' इति हैमः ॥ (१२) ॥*॥ शिलाभिरुच्चीयते । 'चिञ् चयने' (स्वा० उ० अ०) । 'एरच्' (३।३।५६) ॥ (१३) ॥*॥ त्रयोदश **'पर्वतसामान्यस्य'** ॥

लोकालोकश्चक्रवालः

लोकेति ॥ 'लोकृ दर्शने' (भ्वा० आ० से०) । भावे घञ् (३।३।१३) । न लोकः । लोकालोकौ प्रकाशान्धकारावत्र स्तः । अन्तर्बहिः सूर्यकिरणानां स्पर्शास्पर्शाभ्याम् ॥ (१) ॥*॥ चक्रं भूमण्डलं वलते । 'वल वेष्टने' (भ्वा० आ० से०) । 'कर्मण्यण्' (३।२।१) । डलयोरेकत्वस्मरणात् 'चक्रवाडः' अपि । यद्वा चक्राकारेण वाडते । 'वाडृ आह्वाने' (भ्वा० आ० से०) पचाद्यच् (३।१।१३५) । 'चक्रवालमस्यास्ति' इति वा । अर्चआद्यच् (५।२।१२७) । **'चक्रवालोऽद्रिभेदे स्याच्चक्रवालं तु मण्डले'** इति हैमः ॥ (२) ॥*॥ द्वे **'सप्तद्वीपवत्या भूमेः'** ॥

त्रिकूटस्त्रिककुत्समौ ।

त्रिकूट इति ॥ त्रीणि कूटान्यस्य । **'त्रिकूटं** सिन्धुलवणे **त्रिकूटः** पर्वतान्तरे' इति हैमः ॥ (१) ॥*॥ त्रीणि ककुदसदृशानि शृङ्गाण्यस्य । 'त्रिककुत् पर्वते' (५।४।१४७) ॥ (२) ॥*॥ द्वे **'लङ्काधिष्ठानपर्वतस्य'** ॥

अस्तस्तु चरमक्ष्माभृत्

अस्त इति ॥ असति स्म । 'अस दीप्तौ' (भ्वा० उ० से०) 'गत्यर्था–' (३।४।७२) इति क्तः । यद्वा अस्यते स्म । 'असु क्षेपणे' (दि० प० से०) । क्तः (३।४।७२) । **'अस्तं** क्षितेऽप्यवसिते त्रिषु, ना पश्चिमाचले' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ चरन्त्यत्र । 'चर गतौ' (भ्वा० प० से) 'चरेरमः' (उ० ५।६९) ॥ (२) ॥*॥ **'पश्चिमपर्वतस्य'** द्वे ॥

उदयः पूर्वपर्वतः ॥ २ ॥

उदय इति ॥ उद्यन्ति ग्रहा अस्मात् । 'इण् गतौ' (अ० प० अ०) 'एरच्' (३।३।५६) **'उदयः** पर्वतोन्नत्योः' इति हैमः ॥ (१) ॥*॥ पूर्वः पूर्वतः ॥ (२) ॥*॥ द्वे **'उदयाचलस्य'** ॥

हिमवान्निषधो विन्ध्यो माल्यवान्पारियात्रकः ।
गन्धमादनमन्ये च हेमकूटादयो नगाः ॥ ३ ॥

हिमेति ॥ हिममस्मिन्नस्ति । मतुप् (५।२।९५) ॥ (१) ॥*॥ निषीदति । पचाद्यच् (३।१।१३४)। पृषोदरादिः (६।३।१०९)। **'निषधः** कठिने देशे तद्राजे पर्वतान्तरे' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ विरुद्धं ध्यायति । 'ध्यै चिन्तायाम्' (भ्वा० प० अ०) । 'आतश्चोपसर्गे' (३।१।१३६) इति कः । पृषोदरादिः । (६।३।१०९) यद्वा वि इध्यते । 'चि इन्धी दीप्तौ' (रु० आ० से०) । ण्यत् (३।१।१२४) अन्तर्भावितण्यर्थः । शकन्ध्वादिः (६।१।९४) । वीन्धे वा । अङ्ग्यादिः (उ० ४।१२२)। **'विन्ध्या** स्त्रियां लवल्यां स्यात्पुंसि व्याधाद्रिभेदयोः' ॥ (१) ॥*॥ माल्याकारतास्यास्ति । मतुप् (५।२।९५) ॥ (१) ॥*॥ परितो यात्रया दृश्यते । 'शेषे' (४।२।९२) इत्यण् । स्वार्थे कन् (५।३।७५) ॥ (१) ॥*॥ गन्धेन मादयति । 'मदी हर्षे' (दि० प० से०) । णिजन्तः । नन्द्यादिः (३।१।१३४) । **'स्याद्गन्धमादनो** भृङ्गे गन्धके वानरान्तरे । स्त्री सुरायां नगे न स्त्री'+चिरं जीवि द्विजायोः+ ॥ (१) ॥*॥ हेम्नः कूटो राशिः ॥ (१) ॥*॥ आदिशब्दान् **मलय-दर्दुर-चित्रकूट-मैनाक-सह्यादि**संग्रहः ॥

पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत् ।

पाषाणेति ॥ पिनष्टि । 'पिष्लृ संचूर्णने' (रु० प० अ०)।

१—हैमे तु 'त्रिकूटस्तु सुवेलके' इति पाठो दृश्यते । उक्तपाठस्तु मेदिन्यां दृश्यते ॥

१—पारियात्रकोऽन्तस्यतृतीयः । तथाच 'भुङ्क्ते महीमत्र विधाय यात्रां ससञ्चविन्ध्याचलपारियात्राम्' इत्यन्तयमके वराहः—इति मुकुटः ॥ २—'इदं तु न प्रकृतोपयोगि । चिरजीविककाकयोः' इति पाठः ॥

बाहुलकादानच् । पृषोदरादिः (६।३।१०९) । मूर्धन्यषः । षष्ठ्यनेन । 'षष बाधे ग्रन्थे च' ( ) । 'हलश्च' (३।३।१२१) इति घञ् । अणति । 'अण शब्दे' (भ्वा० प० से०) अच् (३।१।१३४) पाषश्चासावणश्च । यत्तु—'पषेर्णित्' इत्यानच्–इति मुकुटः । तन्न । उक्तसूत्रादर्शनात् ॥ (१) ॥*॥ प्रस्तृणाति । 'स्तृञ् आच्छादने' (क्रया० उ० अ०) पचाद्यच् (३।१।१३४) । **'प्रस्तरो** ग्रावणि मणौ' इति हैमः ॥ (२) ॥*॥ गिरति, गृणाति, वा । 'गॄ निगरणे' (तु० प० से०) 'शब्दे' (क्रया० प० से०) वा । 'अन्येभ्योऽपि' (३।२।७५) इति वनिप् । पृषोदरादिः (६।३।१०९) । यद्वा गरति । 'गॄ सेके' (भ्वा० प० अ०) । मूलविभुजादिः (वा० ३।२।५) । अवति । 'अव रक्षणादौ' (भ्वा० प० से०) । बाहुलकात्कनिः । अश्वासावव च । **'ग्रावा** तु प्रस्तरे पृथ्वीधरे पुंसि' इति मेदिनी ॥ (३) ॥*॥ उप लाति । 'ला दाने' (अ० प० अ०) । 'आतश्चोप–' (३।१।१३६) इति कः । यद्वा पलति । 'पल गतौ' (भ्वा० प० से०) अच् (३।१।१३४) । ओः शंभोः पलो बोधकः । **'उपलो** ग्रावरत्नयोः । **उपला** तु शर्करायाम्' इति हैमः ॥ (४) ॥*॥ अश्नुते । 'अशूङ् व्याप्तौ संघाते च' (स्वा० आ० से०) । 'अन्येभ्योऽपि' (३।२।७५) इति मनिन् ॥ (५) ॥*॥ शिलति । 'शिल उञ्छे' (तु० प० से०) तालव्यादिः । 'इगुपध–' (३।१।१३५) इति कः ॥ (६) ॥*॥ दृणाति । 'दृ विदारणे' (क्रया० प० से०) । 'दृणातेः पुग्ग्रस्वश्च' (उ० १।१३१) इत्यदिः । 'दृषत्पाषाणमात्रके । निष्पेषणार्थपट्टेऽपि' । ('कषायः कूष्माण्डो महिष) वृषभव्योषदृषदः' इत्यूष्मभेदान्मूर्धन्यमध्यः ॥ (७) ॥*॥ सप्त **'पाषाणस्य'** ॥

कूटोऽस्त्री शिखरं शृङ्गम्

कूट इति ॥ कूटयति । 'कूट दाहे' (चु० उ० से०) । पचाद्यच् (३।१।१३४) । यत्तु—'इगुपध–' (३।१।१३५) इति कः–इति मुकुटः । तन्न । कूटेश्चुरादित्वेन णिजन्तत्वादिगुपधत्वासंभवात् । णिजभावे वा । कूट्यते वा घञ् (३।३।१४) **'कूटं** पूर्द्वारैयन्त्रयोः । मायादम्भाद्रिशृङ्गेषु सीराङ्गेऽनृततुच्छयोः । निश्चलेऽयोघने राशौ' इति हैमः ॥ (१) ॥*॥ शिखाऽस्यास्ति । 'शिखाया ह्रस्वश्च' (५।२) इति रः । शिखां राति, इति वा । 'ड्यापोः–' (६।३।६३) इति ह्रस्वः । **'शिखरं** पुलैकाग्रयोः । पक्वदाडिमबीजाभमाणिक्यशकलेऽपि च । गिरिवृक्षाग्रकैक्षासु' इति हैमः । 'अस्त्री' इति पूर्वोत्तराभ्यां संबध्यते ॥ (२) ॥*॥ शृणाति । 'शॄ हिंसायाम्' (क्रया० प० से०) 'शृणातेर्ह्रस्वश्च' (उ० १।१२६) इति गन्नुड्ह्रस्वाः । **'शृङ्गं** प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके । विषाणोत्कर्षयोश्चाथ **शृङ्गः** कूर्चकशीर्षके । स्त्री विषायां स्वर्णमीनभेदयोर्ऋषभौषधौ' इति मेदिनी ॥ (३) ॥*॥ त्रीणि **'पर्वताग्रस्य'** ॥

प्रपातस्त्वतटो भृगुः ॥ ४ ॥

प्रपात इति ॥ प्रपतन्त्यस्मात् । 'पत्लृ गतौ' (भ्वा० प० से०) । 'अकर्तरि–' (३।३।१४) इति घञ् । **'प्रपातो** निर्झरे भृगौ । अवटे पतने कच्छे' इति हैमः ॥ (१) ॥*॥ न तटमत्र ॥ (२) ॥*॥ भृज्जति भृज्यते वा । 'भ्रस्ज पाके' (तु० उ० अ०) । 'प्रथिभ्रदिभ्रस्जां संप्रसारणं सलोपश्च' (उ० १।२८) । न्यङ्क्वादित्वात् कुत्वं (७।३।५३) । **'भृगुः** सानौ जमदग्निप्रपातयोः । शुक्रे रुद्रे च' इति हैमः । 'प्रपातस्तु तटो भृगुः' इति पाठे प्रपत्यते यतस्तटात्स भृगुः ॥ (३) ॥*॥ त्रीणि **'पर्वतात्पतनस्थानस्य'** ॥

कटकोऽस्त्री नितम्बोऽद्रेः

कटक इति ॥ कटति, कट्यते, वा । 'कटे वर्षावरणयोः' (भ्वा० प० से०) । 'कृञ् शिल्पिसंज्ञयोः' (उ० २।३२) । **'कटकस्त्वद्रिनितम्बे** बाहुभूषणे । (सेनायां राजधान्यां च)' इति हैमः ॥ (१) ॥*॥ एकं **'पर्वतमध्यभागस्य मेखलाख्यस्य'** ॥

स्नुः प्रस्थः सानुरस्त्रियौ ।

स्नुरिति ॥ स्नौति जलम्, स्नाति वा । 'ष्णु प्रस्रवणे'

१—'संहर्षपाषाणपुरीषदूषिकानिषेधदुःषेधमृषानुषङ्गिणः' इत्यूष्मविवेकात्—इति मुकुटः ॥ २—मेदिनीस्थोऽयं पाठः । हैमे तु 'प्रस्तारे' इत्यधिकः पाठः ॥ ३—दृषदः शिलासाहचर्यात्स्त्रीत्वम्—इति मुकुटः ॥ ४—यत्रे मृगादिबन्धनार्थे । छले यथा 'छित्त्वा पाशमपास्य कूटरचनां भङ्क्त्वा बलाद्वागुराम्' इत्यनेकार्थकैरवाकरकौमुदी ॥

१—रोमाञ्चाग्रमात्रयोर्यथा 'रुचिरैः शिखरैः काम्या गृहस्त्री च मृगेक्षणा' । पक्वदाडिमबीजाभमाणिक्यखण्डे यथा–'तन्वी श्यामा शिखरदशना' इत्यनेकार्थकैरवाकरकौमुदी ॥ २—हैमे तु 'वृक्षाग्रे पर्वताग्रे च' इति पाठ उपलभ्यते ॥ ३—शृङ्गशब्दः पुंस्यपीति स्वामी पञ्जिका च । तथाच 'जिगाय जम्बूजनितश्रियः श्रियं सुमेरुशृङ्गस्य तदा तदासनम्' इति माघः—इति मुकुटः ॥ ४—हैमे तु 'प्रपातः सौप्तिके भृगौ' इत्येतावदेव पाठ उपलभ्यते । व्याख्यातं च 'सौप्तिको रात्रिधावी' इति । तत्र यथा 'यस्य प्रपातभयतो निशि न प्रसुप्ताः' इत्यनेकार्थकैरवाकरकौमुद्याम् ॥ ५—अनयोः स्नुनितम्बयोः साहचर्यादस्त्रीत्वम् । 'पुमानेव स्नुः' इति सर्वधरः—इति मुकुटः ॥ 'हैमाभिधाननाममालाव्याख्यायामपि स्नुः पुंलिङ्गः'इत्युक्तम् ॥ अत्रेदं प्रतिभाति । सानुशब्दस्यास्त्रीस्नुशब्दस्याप्यस्त्रीत्वमेव । 'पदृशो–' (६।१) इति सूत्रे स्नुमादेशं विधाय तस्य स्थानितायाः सानुशब्दस्यैव भाष्यकृता दर्शितत्वात् । स्थान्यादेशयोर्भिन्नलिङ्गत्वे 'स्थान्यर्थाभिधानसमर्थस्यैवादेशता' इति सिद्धान्तभङ्गापत्तेः । पञ्चकपक्षे लिङ्गस्यापि प्रातिपदिकार्थत्वादिति ॥

(अ० प० अ०)। 'ष्णा शौचे' (अ० प० से०) वा। मितद्वादित्वात् (वा० ३।२।१८०) डुः॥ (१)॥*॥ प्रतिष्ठन्तेऽत्र। घञर्थे कः (वा० ३।३।१०८)। **'प्रस्थोऽस्त्रियां मानभेदे सानावुन्मितवस्तुनि'**॥ (२)॥*॥ सनोति। 'षणु दाने' (त० उ० से०)। 'इसनिजनि–' (उ० १।३) इति युण्। **'सानुरस्त्री** वने प्रस्थे वाल्यामार्गाग्रके विदे'॥ (३)॥*॥ द्वित्वात्प्रस्थोऽप्यस्त्री। त्रीणि **'पर्वतसमभूभागस्य'**॥

उत्सः प्रस्रवणम्

उत्स इति॥ उनत्ति जलेन 'उन्दी क्लेदने' (रु० प० से०)। 'उन्दिगुधिकुषिभ्यश्च' (उ० ३।६८) इति सः। 'कित्' इत्यनुवृत्तेर्नलोपः। 'उन्दति' इति मुकुटेन कृतं विग्रहप्रदर्शनं भ्रामादिकम्। उन्दे रौधादिकत्वात्॥ (१)॥*॥ प्रस्रवन्त्यापोऽस्मात् 'स्रु गतौ' (भ्वा० प० अ०)। 'भीमादयः–' (३।४।७४) इति 'कृत्यल्युटः–' (३।३।११३) इति वाऽपादाने ल्युट्॥ (२)॥*॥ द्वे **'यतो जलं स्रवति तस्य स्थानस्य'**॥

वारिप्रवाहो निर्झरो झरः॥ ५॥

वारीति॥ वारिणः प्रवाहः॥*॥ निर्झरणम्। 'झृष् वयोहानौ' (दि० प० से०) 'ऋदोरप्' (३।३।५७)। यत्तु निर्झरन्त्यनेन—इति विग्रहप्रदर्शनं मुकुटेन कृतम्। तन्न। करणेऽपो दुर्लभत्वात्। ल्युटा बाधात्। शबपि दुर्लभः। झृषो दैवादिकत्वात्॥ (१)॥*॥ एवं झरः॥ षित्त्वात् (३।३।१०४) अङि **'झरा'**॥*॥ 'अच इः' (उ० ४।२३९) **'झरिः'**॥*॥ ततो ङीषि (ग० ४।१।४५) **'झरी'** च॥ (२)॥*॥ उपसर्गान्तरनिवृत्त्यर्थो निर्॥*॥ द्वे **'उत्साद्यिर्गतजलप्रवाहस्य'**। पद्मापि पर्याया इत्यन्ये॥

दरी तु कंदरो वा स्त्री

दरीति॥ दृणाति। 'दृ विदारणे' (क्र्या० प० से०)। पचाद्यौ (३।१।१३४) 'दरट्' इति पाठात् 'टिड्ढा–' (४।१।१५) इति ङीप्। **'दरोऽस्त्री** साध्वसे गर्ते कंदरे तु **दरी** स्मृता। **दराऽव्ययं** मनागर्थे'॥ (१)॥*॥ कं जलम्। तेन दीर्यते। 'ऋदोरप्' (३।३।५७)। **('कंदरोऽङ्कुशे** विवरे च गुहायां च')॥*॥ स्त्रियां टाप्[1] (४।१।४)॥ (२)॥*॥ द्वे **'कृत्रिमस्य गृहाकारस्य गिरिविवरस्य'**॥

देवखातबिले गुहा।

गह्वरम्

देवेति॥ अकृत्रिमे पर्वतस्य बिले। बिलति। 'बिल भेदने' (तु० प० से०)। 'इगुपध–' (३।१।१३५) इति कः (१)॥*॥ गूहति। 'गुहू संवरणे' (भ्वा० प० से०)। 'इगुपध–' (३।१।१३५) इति कः। यत्तु—गुह्यतेऽनया। भिदाद्यङ् (३।३।१०४)—इति मुकुटः। तन्न। 'अजबन्ध्याम्' (वा० ३।३।१२६) इति वार्तिकविरोधात्। **'गुहः** षाण्मातुरे **गुहा**। सिंहपुच्छध्यां च गर्ते च पर्वतादेश्च गह्वरे'॥ (२)॥*॥ गाह्यते। 'गाहू विलोडने' (भ्वा० आ० से०)। 'छित्वरछत्वर–' (उ० ३।१) इति ष्वरजन्तं निपात्यते। **('अथ गह्वरम्**। गुहागहनदम्भेषु निकुञ्जे तु पुमानयम्')॥ (३)॥*॥ केचित्तु—**'देवखाते बिलं** गुहा' इति काल्यात् **'गह्वरं** बिलदम्भयोः' इति शाश्वताच्च। (**'बिलं** रन्ध्रे गुहायां च' इति हैमतश्च) चत्वारि नामानि–इत्याहुः॥ त्रीणि **'अकृत्रिमस्य गिरिबिलस्य'**॥

गण्डशैलास्तु च्युताः स्थूलोपलाः गिरेः॥ ६॥

गण्डेति॥ **'गण्डः** कपोले पिटके' इति विश्वः। गण्ड इव शैलाः। शैलशब्दस्तदवयवे वर्तते। 'विशेषणं विशेष्येण–' (२।१।५७) इति समासः। शैलानां गण्डा इव, इति वा। राजदन्तादिः (२।२।३१)। **'गण्डशैलो** ललाटे स्याच्च्युतस्थूलोपले गिरेः'॥ (१)॥*॥ एकम्। **'गिरेः पतितस्थूलपाषाणस्य'**॥

खनिः स्त्रियामाकरः स्यात्

खनिरिति॥ खन्यते। 'खनु अवदारणे' (भ्वा उ० से०)। 'खनिकषि–' (उ० ४।१४०) इति इः॥*॥ 'कृदिकारात्–' (ग० ४।१।४५) इति वा ङीष्॥*॥ 'इजजादिभ्यः' (वा० ३।३।१०८) इतीञ्। 'खनिरेव मता **खानिः**' इति द्विरूपकोशः॥ (१)॥*॥ आकुर्वन्त्यत्र। 'डुकृञ्' (त० उ० अ०)। आकीर्यन्ते धातवोऽत्र। 'कॄ विक्षेपे' (तु० प० से०)। 'पुंसि संज्ञायाम्' (३।३।११९) इति कः। **'आकरो** निकरे खनौ'॥ (२)॥*॥ द्वे **'रत्नाद्युत्पत्तिस्थानस्य'**॥

पादाः प्रत्यन्तपर्वताः।

पादा इति॥ पद्यते एभिः। 'पद गतौ' (दि० आ० अ०)। 'हलश्च' (३।३।१२१) इति घञ्। **'पादो** मूलोऽस्तुर्यांशाङ्घ्रिषु प्रत्यन्तपर्वते' इति हैमः॥ (१)॥*॥ प्रत्यन्ते महाद्रीणां समीपे ये क्षुद्राः पर्वताः॥ (२)॥*॥ द्वे **'पर्वतसमीपस्थाल्पपर्वतानाम्'**॥

१—'अत्युच्चवस्तुनि' इति पाठान्तरम्॥ २—अग्रके पल्लवे। अत एव विश्वकोषे 'सानुः शृङ्गे वुधे मार्गे वाल्यायां पल्लवे वने' इति पाठ उपलभ्यते॥ ३—तथाच 'कन्दरासु तरुणीरिह नयति रविः' इति माघः—इति मुकुटः॥

१—गह्वरं क्लीबमेव। गह्वरा गह्वरी तूपचारात्, इति तु पञ्जिका—इति मुकुटः। हैमाभिधानचिन्तामणिनाममालाव्याख्यायां तु 'गह्वरः पुंक्लीबलिङ्गः' इत्युक्तम्॥ २—'स्थूलोपलाः' इत्युपलक्षणम्। तेन 'लीलां दधौ राजतगण्डशैलः' इति माघप्रयोग उपपद्यते—इति मुकुटः॥ ३—अतएव 'धृतगम्भीरखनीखनीलिमा' इति नैषधः—इति मुकुटः॥

उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका ॥ ७ ॥

उपेति ॥ उप आसन्ना । अधि आरूढा । 'उपाधिभ्यां त्यकन्नासन्नारूढयोः' (५।२।३४) इति त्यकन् ॥ (१) ॥*॥ एकैकम् **'अद्रेरधऊर्ध्वासन्नभूमेः'** ॥

धातुर्मनःशिलाद्यद्रेः

धातुरिति ॥ दधाति शोभाम् । 'सितनि–' (उ० १।६९) इति तुन् ॥ (१) ॥*॥ 'सुवर्णरूप्यताम्राणि हरितालं मनःशिला । गैरिकाञ्जनकासीससीसलोहाः सहिङ्गुलाः । गन्धकोऽभ्रकमित्याद्या धातवो गिरिसंभवाः' ॥*॥ एकम् **'मनःशिलादिधातोः'** ॥

गैरिकं तु विशेषतः ।

गैरीति ॥ गिरौ भवम् इति विग्रहे गिरिकशब्दादण् (४।३।५३) । अव्यविकन्यायात् । अध्यात्मादित्वात् (वा० ४।३।६०) ठञ् वा । गैरिकं तु विशेषेण धातुः । धातुशब्देनैव प्रसिद्धत्वात् । **'गैरिकं** धातुरक्तमयोः' ॥ (१) ॥*॥ एकम् **'धातुविशेषस्य'** ॥

निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे ॥ ८ ॥

निकुञ्जेति ॥ कावजनि । 'जनी प्रादुर्भावे' (दि० आ० से०) । 'सप्तम्यां जनेर्डः' (३।२।९७) । पृषोदरादिः (६।३।१०९) ।—कुञ्जन्त्यत्र । 'कुजि अव्यक्ते शब्दे' (भ्वा० प० से०) । 'हलश्च' (३।३।१२१) इति घञ्—इति मुकुटः । तन्न । कुंजिधातोर्धातुपाठेऽदर्शनात् । यत्तु 'न्युङ्क्वादेः' इति कुत्वाभावः–इति तदपि न । 'न्युङ्क्वादेः' इत्यस्य कुत्वविधायकत्वात् । निरत्रोपसर्गान्तरव्यावृत्त्यर्थम् । कुञ्जिरावरणार्थो लोकात्–इति क्षीरस्वामी । **'कुञ्जोऽस्त्रियां** निकुञ्जेऽपि हनौ दन्ते च दन्तिनाम्' इति विश्वः । द्वे **'लतादिभिः पिहितस्य स्थानस्य'** ॥

इति शैलवर्गविवरणम् ॥

अटव्यरण्यं विपिनं गहनं काननं वनम् ।

अटवीति ॥ अटन्त्यत्र । 'अट गतौ' (भ्वा० प० से०) । 'पद्यटिभ्यामविः' ( ) । 'कृदिकारात्–' (ग० ४।१।४५) इति ङीष् । यत्तु मुकुटः—अटा वयः पक्षिणोऽत्र । पूर्ववन्ङीष् । संज्ञाशब्दत्वात् 'अनुपसर्जनात्' इति स्त्रीप्रत्ययस्य न निषेधः—इत्याह । तन्न । अटविशब्दस्य कृदन्तत्वाभावात् । 'संज्ञाशब्दत्वात्' इति हेतोरप्रयोजकत्वात् समुदायस्यानुपसर्जनत्वाच्च ॥ (१) ॥*॥ अर्यते । 'ऋ गतौ' (भ्वा० प० से०) । 'अर्तेर्निन्' (उ० ३।१०२) इत्यन्यः ॥ (२) ॥*॥ वेपन्तेऽत्र । 'टुवेपृ कम्पने' (भ्वा० आ० से०) 'वेपितुह्योर्हस्वश्च' (उ० २।५२) इतीनन् । विशेषेण पियन्त्यत्र वा । 'पि गतौ' (तु० प० से०) । बाहुलकान्नक् ॥ (३) ॥*॥ गाह्यते । 'गाहू विलोडने' (भ्वा० आ० से०) । बहुलमन्यत्रापि' (उ० २।७८) इति युच् । 'कृच्छ्रगहनयोः' (७।२।२२) इति निर्देशाद्धस्वः । **'गहनं** वनदुःखयोः । गह्वरे कलिले चापि' इति हैमः ॥ (४) ॥*॥ कानयति दीपयति स्मरादि 'कनी दीप्तिकान्तिगतिषु' (भ्वा० प० से०) । युच् (उ० २।७८) । ल्युः (३।१।१३४) वा । 'कं जलम् अननं जीवनमस्य' इति वा । **'काननं** तु ब्रह्मस्थे विपिने गृहे' इति हैमः ॥ (५) ॥*॥ वनति । 'वन संभक्तौ' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४)[1] ॥ यत्तु—वन्यते । अच्—इति मुकुटः । तन्न । कर्मणि पचाद्यचोऽसंभवात् । **'वनं** नपुंसकं नीरे निवासालयकानने' ॥ (६) ॥*॥ षट् **'अरण्यस्य'** ॥

महारण्यमरण्यानी

महेति ॥ महच्च तदरण्यं च । 'सन्महत्–' (२।१।६१) इति समासः ॥ (१) ॥*॥ महदरण्यम् । **'हिमारण्ययोर्महत्त्वे'** (वा० ४।१।४९) इति ङीषानुकौ ॥ (२) ॥*॥ द्वे **'महतो वनस्य'** ॥

गृहारामास्तु निष्कुटाः ॥ १ ॥

गृहेति ॥ गृहस्यारामाः ॥ (१) ॥ कुटाद्गृहान्निष्क्रान्ताः 'निरादयः–' (वा० २।२।१८) इति समासः । 'निष्कुटस्तु गृहोद्याने स्यात्केदारकवाटयोः' ॥ (२) ॥*॥ द्वे **'गृहसमीपोपवनस्य'** ॥

आरामः स्यादुपवनं कृत्रिमं वनमेव यत् ।

आरेति ॥ आरमन्त्यत्र । 'हलश्च' (३।३।१२१) इति घञ् ॥ (१) ॥*॥ उपगतं वनम् । 'प्रादयो गतावर्थे' (वा० २।२।१८) इति समासः ॥ (२) ॥*॥ एवकारादकृत्रिमवनव्युदासः ॥*॥ द्वे **'कृत्रिमवृक्षसमूहस्य'** ॥

अमात्यगणिकागेहोपवने वृक्षवाटिका ॥ २ ॥

अमेति ॥ वक्ष्यते । 'वट वेष्टने' (भ्वा० प० से) । 'संज्ञायाम्' (३।३।१०९) इति ण्वुल् । 'वुञ्' इति मुकुटस्य प्रमादः । टाप् (४।१।४) । 'प्रत्ययस्थात्–' (७।३।४४) इती-

---

१—'अद्रेरित्यस्य संबन्धिमात्रोपलक्षकत्वादन्यत्रापि ।' 'समुद्रोपत्यका हैमी पर्वताधित्यका पुरी' इति भट्टिरिति स्वाम्यादयः—इति मुकुटः ॥ २—'अथ शुचादयो व्रजन्ता द्विसप्ततिः परस्मैभाषाः' इति प्रतिज्ञायां द्विसप्ततिसंख्याकथनानुरोधेन जगुः, 'कुजि अव्यक्ते शब्दे' इत्यत्र कुजिरपि पूर्वमासीदिति प्रतिभाति । कुर्जि विना द्विसप्ततिसंख्यानुपपत्तिरस्त्येव ॥ ३—'कुत्वाभावः' इत्युक्त्वा 'न क्वादेः' (७।३।५९) इति हि सूत्रं तेनोपन्यस्तम् । पश्चाल्लेखकादिप्रमादात्तथा पाठो जातः—इति सम्यक् । 'न्युङ्क्वादीनां च' इत्येवं सूत्रसत्वेन न्युङ्क्वादेः' इत्येवं सूत्रस्यानुपलम्भेन 'कुत्वविधायकत्वात्' इत्युक्तिर्यादृशी । तत्तु धीमद्भिराकलनीयम् ॥

१—गौरादिङीषि (४।१।४१) वनी च । 'स्ववनी संप्रवदल्पिकापि का' इति नैषधकाव्यात्—इति मुकुटः ॥

त्वम् । वृक्षाणां सा ॥ (१) ॥*॥ एकं **'मन्त्रिणो वेश्यायाश्च गृहस्योपवनस्य'** ॥

पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम् ।

पुमानिति ॥ आक्रीडन्त्यत्र । 'क्रीङ् विहारे' (भ्वा० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । 'ज्ञेयमाक्रीडमुद्यानम्' इत्यमरमालायां तु क्लीबमुक्तम् ॥ (१) ॥*॥ उद्यान्त्यत्र । 'या प्रापणे' (अ० प० अ०) । अधिकरणे ल्युट् (३।३।११७) । **'उद्यानं** स्यान्निःसरणे वनभेदे प्रयोजने' (२) ॥*॥ द्वे **'राज्ञः सर्वोपभोग्यवनस्य'** ॥

स्यादेतदेव प्रमदवनमन्तःपुरोचितम् ॥ ३ ॥

स्यादिति ॥ प्रमदानां वनम् । 'ङ्यापोः–' (६।३।६३) इति ह्रस्वः[1] ॥ (१) ॥*॥ **'यत्र सस्त्रीको राजा क्रीडति तस्य'** एकम् ॥

वीथ्यालिरावलिः पङ्क्तिः श्रेणी

वीति ॥ विथ्यते । 'विथृ याचने' (भ्वा० आ० से०) । 'इगुपधात्कित्–' (उ० ४।१२०) इतीन् । बाहुलकादीर्घः । 'कृदिकारात्–' (ग० ४।१।४५) इति वा ङीष्[2] । **'वीथी** वर्त्मनि पङ्क्तौ च गृहाङ्गे नाट्यरूपके' इति हैमः ॥ (१) ॥*॥ आलति । 'अल भूषणादौ' (भ्वा० प० से०) । आङि । इन् (उ० ४।११८) । **'आलिः** सख्यावलीसेत्वनर्थेषु विशदाशये' इति हैमः ॥ (२) ॥*॥ आ वलति । 'वल संवरणे' (भ्वा० प० से०) । आङि । इन् (उ० ४।११८) ॥ (३) ॥*॥ पञ्चते । 'पञ्चि विस्तारे' (भ्वा० आ० से०) । क्तिच् (३।३।१७४) । **'पङ्क्तिश्छन्दःश्रेण्योः'** इति हैमः ॥ (४) ॥*॥ श्रीयते । 'श्रिञ् सेवायाम्' (भ्वा० उ० से०) । 'वहिश्रि–' (उ० ४।५३) इति निः । **'श्रेण्यालीनां कारुसंहतौ'** इति हैमः ॥ (५) ॥*॥ पञ्च **'सान्तर्पङ्क्तेः'** ॥

लेखास्तु राजयः ।

लेखा इति ॥ लिख्यते । 'लिख अक्षरविन्यासे' (तु० प० से०) । भिदादौ (३।३।१०४) पाठादङ्गुणौ । **'लेखो** लेख्ये दैवते च **लेखा** राज्यां लिपावपि' इति हैमः ॥*॥ रलथोरेकत्वस्मरणात् **'रेखा'** अपि ॥ (१) ॥*॥ राजति 'राजृ दीप्तौ' (भ्वा० उ० से०) । इन् (उ० ४।११८) । 'वपिवसि–' (उ० ४।१२५) इतीण् वा । **'राजी** रेखायां पङ्क्तौ च' इति हैमः ॥ (२) ॥*॥ द्वे **'निरन्तरपङ्क्त्यपङ्क्तिसाधारणायाः'** ॥

वन्या वनसमूहे स्याद्

वन्येति ॥ वनानां समूहः । 'पाशादिभ्यो यः' (४।२।४९) । (**'वन्यं** त्रिषु वनोद्भूते स्त्री वनाम्बुसमूहयोः') ॥ (१) ॥*॥ एकम् **'वनसमूहस्य'** ॥

अङ्कुरोऽभिनवोद्भिदि ॥ ४ ॥

अङ्कुर इति ॥ अङ्कते । 'अकि लक्षणे' (भ्वा० आ० से०) । 'मन्दिवाशिमथि–' (उ० १।३८) इत्युरच् । **'अङ्कुरो** रोम्णि सलिले रुधिरेऽभिनवोद्भमे' इति हैमः ॥*॥ खर्जूरादित्वात् ऊरः 'अङ्कुरश्चाङ्कुरः प्रोक्तः' इति हलायुधः ॥ (१) ॥*॥ उद्भिनत्ति भुवम् । 'भिदिर् विदारणे' (रु० उ० अ०) । 'सत्सूद्विष–' (३।२।६१) इति क्विप् । अभिनवश्चासावुद्भिच्च ॥ (२) ॥*॥ द्वे **'नूतनाङ्कुरस्य'** ॥

वृक्षो महीरुहः शाखी विटपी पादपस्तरुः ।
अनोकहः कुटः सालः पलाशी द्रुद्रुमागमाः ॥ ५ ॥

वृक्ष इति ॥ वृक्षति । 'वृक्ष वरणे' ( ) । पचाद्यच् (३।१।१३४) वृश्च्यते वा । 'ओव्रश्चू छेदने' (तु० प० से०) । सक् (उ० ३।६६) ॥ (१) ॥*॥ मह्यां रोहति 'रुह बीजजन्मनि प्रादुर्भावे च' (भ्वा० प० अ०) ।—मूलविभुजादित्वात् (वा० ३।२।५)कः—इति मुकुटः । तन्न । 'इगुपध–' (३।१।१३५) इत्यस्य सत्त्वात् ॥ (२) ॥*॥ शाखास्यास्ति । व्रीह्यादित्वात् (५।२।११६) इनिः । यद्वा अवश्यं शाखति । 'शाखृ व्याप्तौ' (भ्वा० प० से०) । आवश्यके णिनिः (३।३।१७०) । **'शाखी** स्यात्पादपे वेदे तुरुष्काख्यजने पुमान्' ॥ (३) ॥*॥ विटपः शाखाविस्तारोऽस्यास्ति । 'अत इनिः–' (५।२।११५) ॥ (४) ॥*॥ पादैः पिबति । 'पा पाने' (भ्वा० प० अ०) । 'सुपि' (३।२।४) इति कः[3] । **'पादपः** पादपीठेऽद्रौ पादुकायां तु **पादपा'** इति विश्वः ॥ (५) ॥*॥ तरति । तरन्त्यनेन इति वा । 'तॄ प्लवनसंतरणयोः' (भ्वा० प० से०) । 'भृमृशीङ्–' (उ० १।७) इत्युः ॥ (६) ॥*॥ अनसः शकटस्याकं गतिं हन्ति । 'अन्येष्वपि–' (३।२।१०१) इति हन्तेर्डः ॥ (७) ॥*॥ कुटति । 'कुट कौटिल्ये' (तु० प० से०) । पचाद्यच् (३।१।१३४) 'इगुपध–' (३।१।१३५) इति को वा । मुकुटस्तु—'कौति शब्दायते पक्ष्यत्र' इति । 'कणेष्टः' बाहुलकात् अन्येभ्योऽपि टः कुटादित्वात् (१।२।१) ङित्त्वे गुणाभावः । बाहुलकान्नेकादेशः—इति वदन् टवर्गद्वितीयं मन्यते । तत्र 'कौति' इति विगृह्य कुटादित्वोक्तिः प्रामादिकी । आदादिकस्य 'कौति' इति रूपसंभवात् । तौदादिकस्य 'कुवते' इति रूपस्य संभवात् ॥ (८) ॥*॥ सल्यते । 'षल गतौ' (भ्वा० प० से०) । 'अकर्तरि–' (३।३।१४) इति घञ् । मुकुटस्तु—सलति । वायुना चलति । 'ज्वलतिकसन्तेभ्यो णः' (३।१।१४०)—इत्याह । तन्न । दन्त्यादेस्तत्र पाठाभावात् । तालव्योष्मादेस्तत्र पाठात् । 'पुंसि भूरुहमात्रेऽपि **सालो** वरणसर्जयोः' इति दन्त्यादौ र-

१—ह्रस्वाभावोऽपि । 'प्रविष्टः प्रमदावनम्' इति भट्टिः—इति मुकुटः ॥ २—ङीषभावे ह्रस्वान्तापि 'धनवीथिवीथिम्' इति माघः—इति मुकुटः ॥ ३—सेतुष्वनर्थे इति पाठः ॥

१—'पादपो वृक्षपीठयोः' इति हैमः इति वा पाठः ॥

भसः । **'सालः** सर्जतरौ वृक्षमात्रप्राकारयोरपि' ॥ (९) ॥*॥ पलाशानि सन्त्यस्य । अत इनिः (५।२।११५) । **'पलाशी** वृक्षरक्षसोः' इति विश्वमेदिन्यौ ॥ (१०) ॥*॥ द्रवत्यूर्ध्वम् 'द्रु गतौ' (भ्वा० प० अ०) । मितद्वादित्वात् (वा० ३।२।१८०) द्रुः ॥ (११)॥*॥ **'समुदाये वृत्ताः** शब्दा अवयवेष्वपि वर्तन्ते' इति न्यायात् द्रुः शाखाऽस्यास्ति । 'द्युद्रुभ्यां मः' (५।२।१०८) । 'द्रुमस्तु पादपे पारिजाते किंपुरुषेश्वरे' इति हैमः ॥ (१२) ॥*॥ न गच्छति । 'गम्लृ गतौ' (भ्वा० प० अ०) । पचाद्यच् (३।१।१३४) ॥ (१३) ॥*॥ त्रयोदश **'वृक्षस्य'** ॥

वानस्पत्यः फलैः पुष्पात्

वानेति ॥ वनस्य पतिः । 'पारस्करप्रभृतीनि' (६।१।१५७) इति सुट् । वनस्पतौ भवः 'दिव्यदिव्या–' (४।१।८५) इति ष्यः ॥ (१) ॥*॥ पुष्पाज्जातैः फलैर्हेतुभिः ॥*॥ एकम् **'पुष्पाजातफलोपलक्षितवृक्षस्य'** ॥

तैरपुष्पाद्वनस्पतिः ।

तैरिति ॥ **'वनस्पतिर्ना द्रुमात्रे** विना पुष्पं फलिद्रुमे' ॥ (१) ॥*॥ एकम् **'आम्रादिवृक्षस्य'** ॥

ओषधिः फलपाकान्ता

ओषेति ॥ ओषः क्लेषो दीप्तिर्वा धीयतेऽत्र । 'डुधाञ् धारणपोषणयोः' (जु० उ० अ०) । 'कर्मण्यधिकरणे च' (३।३।९३) इति किः ॥*॥ ('कृदिकारात्' (ग० ४।१।४५) इति ङीषि **'ओषधी'** अपि) ॥ (१) ॥*॥ फलपाक एवान्तो यस्याः । रूपभेदात्स्त्रीत्वम् ॥ एकं **'व्रीहियवादेः'** ॥

स्यादबन्ध्यः फलेग्रहिः ॥ ६ ॥

स्यादिति ॥ फलानि गृह्णाति । 'ग्रह उपादाने' (क्र्या० उ० से०) 'फलेग्रहिरात्मंभरिश्च' (३।२।२६) इति साधुः ॥ (२) ॥*॥ द्वे **'फलसमये फलग्राहकस्य'** ॥

बन्ध्योऽफलोऽवकेशी च

बन्ध्य इति ॥ **'बन्धस्त्वाधौ** च बन्धने' । बन्धे साधुः 'तत्र साधुः' (४।४।९८) इति यत् । यत्तु मुकुटः—दिगादित्वात् (४।३।५४) यत्–इत्याह । तन्न । अस्य सूत्रस्य 'तत्र भवः' (४।३।५३) इत्यत्र पाठात् । 'तत्र साधुः' इत्यस्य 'प्राग्धिताद्यत्' (४।४।७५) इत्यधिकारे पाठात् ॥ (१) ॥*॥ न फलान्यस्य ॥ (२) ॥*॥ अवसन्नाः केशा यस्य सोऽवकेशो निष्केशः । सोऽस्ति दृष्टान्तत्वेनास्य । 'अत इनिः' (५।२।११५)। स यथा निष्केशः । एवमयं निष्फलः । अवकं शून्यमीष्टे तच्छीलः । 'सुप्यजातौ–' (३।२।७८) इति 'णिनिः' इति वा ॥ (३) ॥*॥ त्रीणि **'ऋतावपि फलरहितस्य'** ॥

फलवान्फलिनः फली ।

फलेति ॥ फलान्यस्य सन्ति । मतुप् (५।२।९५) ॥ (१) ॥*॥ 'फलबर्हाभ्यामिनच्' (वा० ५।२।१२२) ॥ (२) ॥*॥ 'अत इनिः' (५।२।११५) ॥ (३) ॥*॥ त्रीणि **'फलसहितवृक्षस्य'** ॥

प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः ॥ ७ ॥

फुल्लश्चैते विकसिते

प्रफुल्लेति ॥ फलति । 'विफला विशरणे' (भ्वा० प० से०) । 'जीतः क्तः' (३।२।१८७) । 'आदितश्च' (७।२।१६) इतीडभावः । 'अनुपसर्गात्फुल्लक्षीब–' (८।२।५५) इति तस्य लः ॥ (७) ॥*॥ प्रादिसमासः (वा० २।२।१८) । प्रफुल्लति वा । 'फुल्ल विकसने' (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (१) ॥*॥ 'उत्फुल्लसंफुल्लयोरुपसंख्यानम्' (वा० ८।२।५५)। **'उत्फुल्लं** करणे स्त्रीणामुत्ताने च विकस्वरे' ॥ (२) ॥*॥ (३) ॥*॥ व्यावृत्तः कोशः संकोचोऽस्मात् । 'प्रादिभ्यो धातुजस्य–' (वा० २।२।२४) इति समासः ॥*॥ मूर्धन्यान्तो वा ॥ (४) ॥*॥ कचति । 'कच बन्धने' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । विगतः कचोऽस्मात् । **'विकचाः** क्षेपणे केतौ ना केशे स्फुटितेऽन्यवत्' ॥ (५) ॥*॥ स्फुटति 'स्फुट विकसने' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । **'स्फुटो** व्यक्तप्रफुल्लयोः । सिते व्याप्ते' इति हैमः ॥ (६) ॥*॥ व्यकासीत् । 'कस गतौ' (भ्वा० प० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः ॥ (८) ॥*॥ अष्टौ **'प्रफुल्लितवृक्षस्य'** ॥

स्युरबन्ध्यादयस्त्रिषु ।

स्युरिति ॥ अबन्ध्यादयो विकसितान्तास्त्रिलिङ्ग्यां स्युः ॥

स्थाणुर्वा ना ध्रुवः शङ्कुः

स्थेति ॥ तिष्ठतीति स्थाणुः । यत्तु सुभूतिः—धेन्वादित्वान्नुः, णत्वं च–इत्याह । तन्न । 'स्थोः णुः' (उ० ३।३७) इति सूत्रस्य सत्त्वात् । धेन्वादिसूत्राभावाच्च । 'वा ना' इति पुंस्त्वम् । रूपभेदात् क्लीबत्वम् । 'स्थाणुरस्त्री' इति वा पाठः । **'स्थाणुः** कीले हरे पुमान् । अस्त्री ध्रुवे' इति मेदिनी ॥ (१) ॥*॥ ध्रुवति । 'ध्रुव गतिस्थैर्ययोः' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । **'ध्रुवो** वटे । वसुयोगभिदोः शंभौ शङ्कावुत्तानपादजे । स्थिरे नित्ये निश्चिते च **ध्रुवं** खेऽजस्रतर्कयोः । **ध्रुवा** मूर्वाशालिपर्ण्योः स्रुग्भेदे गीतभिद्यपि' इति हैमः ॥ (१) ॥*॥ शङ्कतेऽस्मात् । 'शकि शङ्कायाम् (भ्वा० आ० से०) । 'खरुशङ्कु–' (उ० १।३६)

१—'यत्रौषधयो रजन्याम्' इति कुमारः—इति मुकुटः । 'यत्रान्या ओषधयो म्लायन्ते' इति श्रुतिः ॥ २—ग्रहिर्धारणार्थः विकारार्थश्च । तत्र धारणार्थे वृक्ष एव रूढिः । स्वीकारार्थे तु 'फलेग्रहीन्हंसि वनस्पतीनाम्' इति भट्टिः—इति मुकुटः ॥

१—'विकसितं सितम्' इति कीचकवधयमकाद्दन्त्यमध्यः—इति मुकुटः ॥

इति साधुः । **'शङ्कुः** पत्रशिराजाले संख्याकीलकशंभुषु । यादोऽस्त्रभेदयोर्मेढ्रे' इति हैमः ॥ (३) ॥*॥ त्रीणि **'शाखापत्ररहिततरोः'** ॥

ह्रस्वशाखाशिफः क्षुपः ॥ ८ ॥

ह्रस्वेति ॥ शाखा च शिफा=मूलं च ते । ह्रस्वे शाखाशिफे यस्य ॥*॥ क्षौति । 'टु क्षु शब्दे' (अ० प० से०) । बाहुलकात्पोऽगुणश्च ॥ (१) ॥*॥ एकं **'सूक्ष्मशाखामूलस्य शाखोटकादेः'** ॥

अप्रकाण्डे स्तम्बगुल्मौ

अप्रकाण्ड इति ॥ न प्रकाण्डोऽस्य ॥*॥ तिष्ठति । 'ष्ठा गतिनिवृत्तौ' (भ्वा० प० से०) । 'स्थः स्तोऽम्बजबकौ' (उ० ४।९६) । **'स्तम्बो** गुल्मे तृणादीनामकाण्डद्रुमगुच्छयोः' ॥ (१) ॥*॥ गुडति । 'गुड रक्षायाम्' (तु० प० से०) । बाहुलकान्मन् । डलयोरैक्यम् । **'गुल्मः** सेनाघट्टभिदोः सैन्यरक्षणरुग्भिदोः । स्तम्बे, स्त्रियामामलक्येलावनी वल्लवेश्मसु' ॥ (२) ॥*॥ द्वे **'स्कन्धरहितस्य'** ॥

वल्ली तु व्रततिर्लता ।

वल्लीति ॥ वल्लते । 'वल वल्ल संवरणे' (भ्वा० आ० से०) । 'सर्वधातुभ्य इन्' (उ० ४।११८) । ('कृदिकारात्–' (ग० ४।१।४५) इति वा ङीष्) ।—पचाद्यच् (३।२।१३४) गौरादित्वात् (४।१।४१) । ङीष्—इति मुकुटोक्तिश्चिन्त्या । **'वल्ली** स्यादजमोदायां लतायां कुसुमान्तरे' इति हैमः ॥*॥ (वेल्ल (भ्वा० प० से०) धातोरिनि 'वेल्लिः' इत्यपि । अत एव) । 'वल्ली तु **वेल्लिः** सरणौ' इति वाचस्पतिः ॥ (१) ॥*॥ प्रतनोति । 'तनु विस्तारे' (त० उ० से०) । 'क्तिच्क्तौ च संज्ञायाम्' (३।३।१७४) । पृषोदरादित्वात् (६।३।१०९) पस्य वो वा । **'प्रततिर्व्रततिस्तथा'** इति हलायुधः ॥*॥ यद्वा व्रतमिव करोति । व्रतशब्दात् 'तत्करोति–' (वा० ३।१।२६) इति ण्यन्ताद्बाहुलकादतिः । **'व्रततिस्तु** प्रतानिन्यां विस्तारेऽपि' इति हैमः ॥ (२) ॥*॥ लतति । 'लतिः' सौत्रो धातुर्वेष्टनार्थः । पचाद्यच् (३।१।१३४) । **'लता** ज्योतिष्मती दूर्वा शाखावल्लीप्रियङ्गुषु । स्पृक्कामाधव्योः कस्तूर्याम्' इति हैमः ॥ (३) ॥*॥ त्रीणि **'लतामात्रस्य'** ॥

लता प्रतानिनी वीरुद्गुल्मिन्युलप इत्यपि ॥ ९ ॥

लतेति ॥ शाखापत्रसंचयः प्रतानः । सोऽस्त्यस्याः । सा प्रतानिनी । ईदृशी लतावीरुदादिशब्दत्रयवाच्या ॥*॥ विरुणद्धि । 'रुधिर् आवरणे' (रु० उ० अ०) । क्विप् (३।२।१७८) । 'अन्येषामपि–' (६।३।१३७) इति दीर्घः । —'नहिवृति–' (६।३।११६) इति दीर्घः । न्यङ्क्वादित्वात् (७।३।५३) । कुत्वम्—इति स्वाम्युक्तिश्चिन्त्या । रुधेस्तत्रादर्शनात् कुत्वादर्शनाच्च । **'वीरुल्लताविटपयोः** स्त्रियाम्' ॥ (१) ॥*॥ गुल्मः प्रतानोऽस्त्यस्याः । 'अतइनि–' (५।२।११५) वा ॥ (२) ॥*॥ वलति । 'वल संवरणे' (भ्वा० आ० से०) । 'विटपविष्टपविशिपोलपाः' (उ० ३।१४५) इति 'वलेः संप्रसारणं कपश्च' ॥—उल्यते । उलः सौत्र आवरणार्थो दाहार्थो वा । 'कपश्चाक्रवर्मणस्य' इति कपो वा । 'विटपादयः' इत्यपः–इति स्वामिमुकुटौ । तत्र । तादृशसूत्राभावात् । **'उलपस्तु** गुल्मिनीतृणभेदयोः' इति हैमः ॥ (३) ॥*॥ इति त्रीणि **'शाखादिभिर्विस्तृतवल्ल्याः'** ॥

नगाद्यारोह उच्छ्राय उत्सेधश्चोच्छ्रयश्च सः ।

नगेति ॥ नगस्य तरोः ॥*॥ आरोहणम् । भावे घञ् (३।३।१८) दैर्घ्यम् । **'आरोहो** दैर्घ्य उच्छ्राये । आरोहणे गजारोहे स्त्रीकट्यां मानभिद्यपि' इति हैमः ॥ आदिनागिरिदेवालयादिग्रहः ॥*॥ उच्छ्रयणम् । 'श्रिञ् सेवायाम्' (भ्वा० उ० से०) 'उदि श्रयति–' (३।३।४९) इति घञ् ॥ (१) ॥*॥ उत्सेधनम् 'षिध गत्याम्' (भ्वा० प० से०) । 'भारे' (३।३।१८) इति घञ् । **'उत्सेधस्तूच्छ्राये** न स्त्री क्लीबं संनहनेऽपि च' ॥ (२) ॥*॥ श्रिञो बाहुलकात् 'एरच्' (३।३।५६) अपि ॥ (३) ॥*॥ त्रीणि **'वृक्षादिदैर्घ्यस्य'** ॥

अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः ॥ १० ॥

अस्त्रीति ॥ प्रकाण्ड्यते । 'कड भेदने' चुरादिः 'एरच्' (३।३।५६) । पृषोदरादिः (६।३।१०९) काम्यते । 'कमु कान्तौ' (भ्वा० आ० से०) । णिङ् (३।१।३०) 'वरण्डादयश्च' ( ) इति डो वा । **'प्रकाण्डो** विटपे शस्ते मूलस्कन्धान्तरे तरोः' इति विश्वः ॥ (१) ॥*॥ स्कन्यते । 'स्कन्दिर् गतिशोषणयोः' (भ्वा० प० अ०) । कर्मणि घञ् (३।३।१९) पृषोदरादिः (६।३।१०९) यत्तु मुकुटेन—उणादौ स्कन्दिर् धातौ 'कन्देरच् खाङ्गे' (उ० ४।२०७) इत्यच् प्रत्ययो धश्चान्तादेशः–इत्युक्तम् । तन्न । त-

१—आमलकी एला च वृक्षौ । वनी ह्रस्वं वनम्—इत्यनेकार्थैकैरवाकरकौमुदी ॥ अत्र तु 'वल्ली' इति पाठ आसीत् ॥ २—वल्लिर्ह्रस्वान्ता च 'हिरण्मयोर्वीरुद्दवल्लितन्तुभिः' इति माघः—इति मुकुटः ॥ 'वल्लीवल्कपिनद्धधूसरशिराः' इति दमयन्त्यां दीर्घान्ता ॥ ३—'कृदिकारात्' इति ङीषि दीर्घान्तापि 'धराधरेन्द्रं व्रततीततीरिव' इति माघः–इति मुकुटः ॥

१—'विरोचते वीरुत् । इति पाठस्य स्वामिग्रन्थे उपलम्भाद्दीर्घोपपत्तेः ॥ न्यङ्क्वादिगणे 'वीरुत्' इति पाठस्योपलम्भेन स्वामिग्रन्थे च न्यङ्क्वादित्वाद्धत्वम्' इति पाठस्यैवोपलम्भेन 'चकारस्य धत्वं निपात्यते' इत्यर्थस्य स्फुटं प्रतीयमानत्वेपि खण्डनोक्तिः प्रतारणपरैव ॥ २—'आरोहणे गजारोहे' इति हैमे ॥

त्रासुनो विधानात् । अचोऽविधानात् । **'स्कन्धः** स्यान्नृपतावंसे संपरायसमूहयोः । काये तरुप्रकाण्डे च भ्रात्रादौ छन्दसो मिदि' इति धान्तेषु मेदिनी ॥ (२) ॥*॥ द्वे **'मूलमारभ्य शाखावधिभागस्य'** ॥

समे शाखालते

समे इति ॥ शाखति । 'शाखृ व्याप्तौ' (भ्वा० प० से०) पचाद्यच् (३।१।१३४) । यत्तु—शाख्यते वृक्षोऽनया । 'गुरोश्च' (३।३।१०३) इत्यः—इति मुकुटः । तन्न । 'अजबभ्याम्–' (वा० ३।३।१२६) इति वार्तिकविरोधात् । **'शाखा** द्रुमांशे वेदांशे भुजे पक्षान्तरेऽन्तिके' इति हैमः । (१) ॥*॥ द्वे **'शाखायाः'** ॥

स्कन्धशाखाशाले

स्कन्धेति ॥ स्कन्धजा शाखा ॥ (१) ॥*॥ शलति । 'शल चलने' (भ्वा० प० से०) 'ज्वलति–' (३।१।१४०) इति णः । **'शाला** तरुस्कन्धशाखा **शाला** भवनमिष्यते' इति शाश्वतः ॥ (२) ॥*॥ द्वे **'स्कन्धात्प्रथमोत्पन्नशाशाखायाः'** ॥

शिफाजटे ।

शिफेति ॥ शेते । 'शीङ् स्वप्ने' (अ० आ० से०) । बाहुलकात् फक् हस्वश्च । **'शिफा** जटायां सरिति मांसिकायां च मातरि' ॥ (१) ॥*॥ जटति । 'जट संघाते' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) ॥ (२) ॥*॥ द्वे **'तरुमूलस्य जटाग्रस्य'** ॥

शाखाशिफावरोहः स्यात्

शाखेति ॥ वटादेः शाखाया अवलम्बिनी शिफा ॥*॥ अवरोहति लम्बते । 'रुह बीजजन्मनि प्रादुर्भावे च' (भ्वा० प० अ०) । पचाद्यच् (३।१।१३४) 'अवरोहोऽवतरणेऽप्यारोहे च लतोद्गमे' ॥ (१) ॥*॥ एकम् **'शाखामूलस्य'** ॥

मूलाच्चाग्रं गता लता ॥११॥

मूलादिति ॥ मूलादूर्ध्वं गता शिफा लता यत् । मुकुटस्तु 'प्रसङ्गादवरोहस्यार्थान्तरमाह । तरुमूलात्प्रभृति वृक्षाग्रपर्यन्तं गता गुडूच्यादिलताप्यवरोहः' इत्याह ॥ (१) ॥*॥ एकम् **'वृक्षाग्रगामिन्या लतायाः'** ॥

शिरोऽग्रं शिखरं वा ना

शिर इति ॥ श्रियते । 'श्रीञ् सेवायाम्' (भ्वा०उ०से०) । 'श्रयतेः खाङ्गे शिरः किच्च' (उ० ४।११५४) इत्यसुन् धातोः शिरादेशश्च । यत्तु—शेते खाङ्गोपरि तिष्ठति । 'शीङः किच्च' इत्यसुन् शिरादेशश्च—इति मुकुटः । तन्न । उज्ज्वलदत्तादिषूक्तसूत्रादर्शनात् । **'शिरः** प्रधाने सेनाग्रे शिखरे मस्तकेऽपि च' ॥ (१) ॥*॥ अगति । 'अग कुटिलायां गतौ' (भ्वा० प० से०) । 'ऋज्रेन्द्राग्रवज्र–' (उ० २।२८) इति साधु । **'अग्रं** पुरस्तादुपरि परिमाणे पलस्य च । आलम्बने समूहे च प्रान्ते च स्यान्नपुंसकम् । अधिके च प्रधाने च प्रथमे चाभिधेयवत्' ॥ (२) ॥*॥ शिखां राति । 'रा दाने' (अ० प० अ०) कः (३।२।३) । 'शिखरोऽस्त्री द्रुमाग्रे चाद्रिश्रृङ्गपुलकाग्रयोः' ॥ (३) ॥*॥ त्रीणि **'शिखरस्य'** ॥

मूलं बुध्नोऽङ्घ्रिनामकः ।

मूलमिति ॥ मूलति । 'मूल प्रतिष्ठायाम्' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । **'मूलं** शफाद्ययोः । भे निकुञ्जेऽन्तिके वा ना' ॥ (१) ॥*॥ बध्नाति बध्यते वा । 'बन्ध बन्धने' (क्र्या० प० अ०) । **'बन्धेर्ब्रधिबुधी च'** (उ० ३।५) इति नक् । 'बुध्नो ना मूलरुद्रयोः' ॥ (२) ॥*॥ अङ्घ्रेर्नाम नाम यस्य । 'अङ्घ्रिर्ना पादमूलयोः' ॥ (३) ॥*॥ त्रीणि **'मूलमात्रस्य'** ॥

सारो मज्जा नरि

सारविति ॥ सरति कालान्तरम् । 'सृ गतौ' (भ्वा० प० अ०) । 'सृ स्थिरे' (३।३।१७) इति घञ् । **'सारो** बले मज्जनि च स्थिरांशे, न्याय्ये च नीरे च धने च सारम्, । वरेऽन्यवत् **सार**मुदाहरन्ति' ॥ (१) ॥*॥ मज्जति । 'ष्मस्जो शुद्धौ' (तु० प० अ०) । 'श्वनुक्षन्–' (उ० १।१५९) इति साधुः ॥*॥ **समौ** समानलिङ्गौ । **'नरि'** इति वा पाठः । पुंस्त्रीत्वर्थः ॥*॥ 'लज्जावद्राजवन्मज्जा मांससारास्थिसारयोः' इति भागुरेरावन्तोऽपि । 'मज्जोक्ता मज्जया सह' इति द्विरूपकोषाच्च ॥ (२) ॥*॥ द्वे **'वृक्षादेः स्थिरांशस्य'** ॥

त्वक् स्त्री वल्कं वल्कलमस्त्रियाम् ॥ १२ ॥

त्वगिति ॥ त्वचति । 'त्वच संवरणे' (तु० प० से०) । क्विप् (३।२।१८०) यद्वा तनोति, तन्यते वा । 'तनु विस्तारे' (त० उ० से०) । 'तनोतेरनश्च वः' (उ० २।६३) वाचिक् । **('त्वक्** स्त्री चर्मणि वल्के च गुडत्वचि विशेषतः') ॥ (१) ॥*॥ वलति । 'वल संवरणे' (भ्वा० आ० से०) । 'शुकवल्कोल्काः' (उ० ३।४२) इति कन् । यद्वा 'वल्क परिभाषणे' (चु० प० से०) । वल्कयति । पचाद्यच् (३।१।१३४) । **('वल्कं** वल्कलशल्कयोः') ॥ (२) ॥*॥ वलते । बाहुलकात्कलः । वल्कं लाति, इति तु स्वामी । यत्तु—वलतेः कलच्—इति मुकुटः । तन्न । उक्तसूत्रादर्शनात् ॥ (३) ॥*॥ त्रीणि **'त्वचः'** ॥

काष्ठं दारु

काष्ठमिति ॥ काशते । 'काशृ दीप्तौ' (भ्वा०आ०सें०) । 'हनिकुषिनीरमिकाशिभ्यः क्थन्' (उ० २।२) । 'तितुत्र–' (७।२।९) इति नेट् । **'काष्ठं** दारुणि **काष्ठा** च प्रकर्षे स्थानमात्रके । दिशि दारुहरिद्रायां कालमानप्रभिद्यपि' इति हैमः ॥ (१) ॥*॥ दीर्यते । 'दृ विदारणे' (क्र्या० प० से०) । 'दृसनिजनि' (उ० १।३) इति त्रुण् । 'पुंनपुंसकयो **दारुः**' इति

त्रिकाण्डशेषः । 'दारु स्यात्पित्तले काष्ठे देवदारौ नपुंसकम्' ॥ (२) ॥*॥ द्वे **'काष्ठमात्रस्य'** ॥

इन्धनं त्वेध इध्ममेधः समित् स्त्रियाम् ।

इन्धेति ॥ इन्धेऽग्निरनेन । 'ञि इन्धी दीप्तौ' (रु० आ० से०) । 'करणा–' (३।३।११७) इति ल्युट् ॥ (१) ॥*॥ एधतेऽनेन । असुन् (उ० ४।१८९) ॥ यत्तु—बाहुलकान्नलोपो गुणश्च—इति मुकुटः । तन्न । एधतेरुभयासंभवात् ॥ (२) ॥*॥ इध्यतेऽनेन । 'ञि इन्धी दीप्तौ' (रु० आ० से०) । 'इषियुधीन्धि–' (उ० १।१४५) इति मक् । 'अनिदिताम्–' (६।४।२४) इति नलोपः ॥ (३) ॥*॥ एधेः 'हलश्च' (३।३।१२१) इति करणे घञ् । 'ञि इन्धी' (रु० आ० से०) । 'अवेदैधौद्य–' (६।४।२९) इति निपातो वा । एधः पुंस्यैधम् ॥ (४) ॥*॥ समिध्यतेऽनया । संपदादिः (वा० ३।३।१०८) ॥ (५) ॥*॥ **'त्रीण्यग्निसंदीपनतृणकाष्ठादेः'** ॥ द्वे **'यागादौ ह्रूयमानस्य काष्ठस्य'** ॥ पञ्चापि पर्याया इति स्वामी ॥

निष्कुहः कोटरं वा ना

नीति ॥ निश्चयेन कुहयते । 'कुह विस्मापने' (चु० आ० से०) । पचाद्यच् (३।१।१३४)—निश्चयेन कुहयति । 'कुह विस्मापने' । 'इगुपध–' (३।१।१३५) इति कः–इति मुकुटः । तन्न । कुहेश्चुरादावदन्तादात्मनेपदित्वात् ॥ (१) ॥*॥ कुटनं कोटः । 'कुट कौटिल्ये' (तु० प० से०) । भावे घञ् (३।३।१८) । कोटं राति । 'रा दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥ (२) ॥*॥ द्वे **'वृक्षादिरन्ध्रस्य'** ॥

वल्लैरिर्मञ्जरिः स्त्रियौ ॥ १३ ॥

वल्लेति ॥ वल्लते । 'वल्ल संवरणे' (भ्वा० आ० से०) । क्विप् (३।२।१८०) । ऋच्छति । 'ऋ गतौ' (भ्वा०प०अ०) । 'अच इः' (उ० ४।१३९) । वल् चासावरिश्च । यद्वा वल्लेः संपदादित्वात् (वा० ३।३।१०८) क्विप् । वल्लमृच्छति । 'अच इः' (उ० ४।१३९) ॥ (१) ॥*॥ मृजुत्वमृच्छति 'अच इः' (उ० ४।१३९) । शकन्ध्वादिः (वा० ६।१।९४) ॥ (२) ॥*॥ द्वे **'तुलस्यादेरभिनवोद्भिदि'** ॥

पत्रं पलाशं छदनं दलं पर्ण छदः पुमान् ।

पत्रमिति ॥ पतति । 'पल्ल गतौ' (भ्वा० प० से०) । ष्ट्रन् (उ० ४।१५९) । **'पत्रं तु वाहने पर्णे स्यात् पक्षे शरपक्षिणोः'** ॥ (१) ॥*॥ **'पलमुन्मानमांसयोः'** । पलं मांसमश्नाति । 'अश भोजने' (क्या० प० से०) । कर्मण्यण् (३।२।१) । मुकुटस्तु—'पल गतौ' (भ्वा० प० से०) 'घञर्थे कः' । (३।३।५८) । पलति रक्षति जलादेः । 'पाल रक्षणे' पचाद्यजन्तः (३।१।१२४) । पलं चलनमश्नुते व्याप्नोति–इत्याह । तन्न । 'घञर्थे कः' इति न । 'स्थाम्नापाय्यधिहनियुध्यर्थम्' इति परिगणनात् । 'पाल रक्षणे' इति धातोरसत्त्वात् । पचाद्यजन्तस्य 'पलं चलनम्' इति वाक्यासंभवात् । **'पलाशं** छदने मतम् । शती किंशुकरक्षःसु पुंसि स्याद्धरिते त्रिषु' इति मेदिनी । **'पलाशः** किंशुकेऽल्पे । हरिते, **पलाशं** पत्रे' इति हैमः ॥ (२) ॥*॥ छद्यतेऽनेन । 'छद अपवारणे' (चु० उ० से०) । 'आधृषाद्वा' (ग० ३।१।२५) इति णिजभावे पक्षे करणे ल्युट् (३।३।११७) । **'छदनं** च दले पक्षे पिधाने' ॥ (३) ॥*॥ दलति । 'दल विदारणे' (चु० उ० से०) । पचाद्यच् (३।१।१३४) । **'दलमुत्सेधखण्डयोः** । शस्त्रीछदेऽप्यद्रव्ये पत्रे' ॥ (४) ॥*॥ पिपर्ति । 'पॄ पालनपूरणयोः' (जु० प० से०) । 'कॄपॄविषिधाञ्भ्यो नः' । यद्वा पृणति । 'पृण प्रीणने' (तु० प० से०) पचाद्यच् (३।१।१३४) । यद्वा पर्णयति । 'पर्ण हरितभावे' (चु० उ० से०) पचाद्यच् (३।१।१३४) यत्तु मुकुटः—पिपर्ति प्रीणयति । 'पॄ प्रीणने' । पचाद्यचि (३।१।१३४) वा पर्णम् इत्याह । तन्न । असंभवात् । 'पर्णस्त्रिपर्णे पर्णं तु पत्रे' इति हैमः ॥ (५) ॥*॥ छद्यतेऽनेन । णिजभावे 'पुंसि संज्ञायाम्' (३।३।११९) इति घः । णिजन्तस्यापि छाद्यतेऽनेन । 'छादेर्घे–' (६।४।९६) इति ह्रस्वः । **'छदः** पलाशे गरुति ग्रन्थिपर्णतमालयोः' । 'पुमान्' इति विशेषणं सान्तक्लीबभ्रमनिरासार्थम् ॥ (६)॥*॥ **'षट् पत्रमात्रस्य'** ॥

पल्लवोऽस्त्री किसलयम् ।

पल्लव इति ॥ पल्यते । संपदादिः (वा० ३।३।१०८) । लूयते । 'ऋदोरप्' (३।३।५७) । पल् चासौ लवश्च । पद्भ्यां लूयते वा । 'ऋदोरप्' (३।३।५७) । पादवाचकः पच्छब्दोऽस्ति 'तोलि' (८।४।६०) **'पल्लवः** किसले बले । विटपे विस्तरेऽलक्तरागे शृङ्गारविङ्गयोः' । व्याडिस्तु–'पुंसि क्लीबे च **पल्लवः**' ॥ (१) ॥*॥ किंचित्सलति । 'षल गतौ' (भ्वा०

१—'इन्धेर्बाहुलकान्नलोपः, गुणः' इत्येवंपाठस्य मुकुटपुस्तकेषु दर्शनेन सर्वसंगत्या प्रतारणपरमेवैतत् ॥ २—'एधान् हुताशनवतः' इति कालिदासः—इति मुकुटः ॥ ३—ङीषि दीर्घान्ते अपि । 'व्यवृणुत वेल्लितबाहुवल्लरीका' इति माघः । 'नवनवञ्जुलमञ्जरीसमाथकरम्' इति काव्यप्रकाशे—इति मुकुटः ॥

१ पत्रं तकारद्वयवत् । 'विपत्राः साधवो न तरवः' इति दमयन्तीश्लेषात् ॥ २ पलाशं तालव्यान्तम् 'नवपलाशपलाशवनं पुरः' इति माघयमकात्—इति मुकुटः ॥ ३—एतावूशसूत्रं तु नोपलभ्यते । किं तु 'धापृवस्यज्यतिभ्यो नः' (उ० ३।६) इत्येवं सूत्रमुज्ज्वलदत्तादिधृपलभ्यते ॥ ४—लकारद्वयवान् । 'दृश्यन्ते न तु लोकस्य कदापि च विपल्लवाः' इति दमयन्तीयमकात् ॥ ५—दन्त्यसकारवान् 'किसलयैः सलयैरिव' इति रघुयमकात्—इति मुकुटः ॥

प० से०) । बाहुलकात् कयन् प्रत्ययः । पृषोदरादिः (६।३।१०९) ॥ (२) ॥*॥ द्वे **'नवपत्रस्य'** ॥

विस्तारो विटपोऽस्त्रियाम् ॥ १४ ॥

विस्तेति ॥ विस्तरणम् । 'स्तृञ् आच्छादने' (स्वा० उ० अ०) । 'प्रथने वावशब्दे' (३।३।३३) इति भावे घञ् । **'विस्तारस्ततौ** विटपे' ॥ (१) ॥*॥ विटान् पाति । 'पा रक्षणे' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । यद्वा विटानां पानम् । 'पा पाने' (भ्वा० प० अ०) । 'घञर्थे कः' (वा० ३।३।५८) । यद्वा विटति, विट्यते वा । 'विट आक्रोशे' (भ्वा० प० से०) । 'विटपविष्टप–' (उ० ३।१४५) इति कपन् । यत्तु—वट्यते वेष्ट्यतेऽनेन 'वट वेष्टने' (भ्वा० प० से०) । 'विटपादयश्च' इति सूत्रमुपन्यस्तं मुकुटेन । तन्न । एतादृशसूत्रादर्शनात् । **'विटपो** न स्त्रियां स्तम्बशाखाविस्तारपल्लवे । विटाधिपे ना' ॥ (२) ॥*॥ द्वे **'शाखादिविस्तारस्य'** । केचित्तु—उक्तमेदिनीकोषादेव पल्लवादिचतुष्टयमेकार्थमाहुः । 'शाखायां पल्लवे स्तम्बे विस्तारे विटपोऽस्त्रियाम्' इति रभसाच्च । 'स्कन्धादूर्ध्वं तरोः शाखा कटप्रो विटपो मतः' इति कात्याच्च ॥

वृक्षादीनां फलं सस्यम्

वृक्षादीति ॥ आदिना लतागुल्मादिग्रहः । केचित्तु 'वृक्षादीनाम्' इति पूर्वेणापि संबध्नन्ति । फलति । 'फल निष्पत्तौ' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । फलं निष्पन्नं सस्यशब्दवाच्यम् । **'फलं** हेतुकृते जातीफले फलकसस्ययोः । (त्रिफलायां च कक्कोले शस्त्राग्रे व्युष्टिलाभयोः)' ॥ ॥*॥ सस्ति । 'शस षस्ति खने' (अ० प० से०) 'माछासासिभ्यो यः' (उ० ४।१०९) ॥*॥ तालव्यादिपाठे तु 'शसु हिंसायाम्' (भ्वा० प० से०) । शस्यते । 'तकिशसिचति–' (वा० ३।१।९७) इति यत् ।—'क्यपि' इति मुकुटोक्तिश्चिन्त्या । 'अचो यत्' (३।१।९७) इत्यत्र हरीतक्यादीनामुपसंख्यानात् । षसेर्द्विदन्त्यस्य 'तकि–' (वा० ३।१।९७) इत्यत्राग्रहणाच्च ॥ (२) ॥*॥ द्वे **'फलस्य'** ॥

वृन्तं प्रसवबन्धनम् ।

वृन्तमिति ॥ वृणोति । 'वृञ् वरणे' (स्वा० उ० से०) । बाहुलकात् 'अञ्जिघृसि–' (उ० ३।८९) इति क्तः, नुम् च । मुकुटस्तु 'वृणोतेर्नुक्च' इति सूत्रं कल्पितवान् ।—बाहुल्यान्न णत्वम् इति चिन्त्यम् । अनुस्वारं प्रति णत्वस्य (णत्वं प्रति परसवर्णस्य) असिद्धत्वात् । **'वृन्तं** प्रसवबन्धे च घटीधाराकुचाग्रयोः' ॥ (१) ॥*॥ प्रसूयते । 'षु प्रसवे' (भ्वा० प० अ०) । 'ऋदोरप्' (३।३।५७) बध्यतेऽनेन । 'बन्ध बन्धने' (क्र्या० प० से०) करणे ल्युट् (३।३।११७) । प्रसवस्य पुष्पफलपत्रस्य बन्धनम् ॥ (५) ॥*॥ द्वे **'पुष्पादिमूलाधारवृन्तस्य'** ॥

आमे फले शलाटुः स्यात्

आम इति ॥ शलति 'शल चलनसंवरणयोः' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) अटति । 'अट गतौ' (भ्वा० प० से०) मृगय्वादिलात् (उ० १।३७) कुः । शलश्चासावटुश्च । तालव्यादिः । 'शटीशटितं शलाटुः' इत्यूष्मभेदात् ॥ (१) ॥*॥ एकम् **'अपक्वफलस्य'** ॥

शुष्के वानम्

शुष्क इति ॥ 'फले' इत्येव ॥ वायति स्म । 'पै ओवै शोषणे' (भ्वा० प० अ०) । 'गत्यर्थाकर्मक–' (३।४।७२) इति कर्तरि क्तः । 'ओदितश्च' (८।२।४५) इति णत्वम् । वन्यते । 'वनु याचने' (त० आ० से०) घञ् (३।३।१८) वा **'वानं** शुष्कफले शुष्के सीवने गमने कटे । जलसंप्लुतवातोर्मिसुरज्ञासौरभेषु च' इति हैमः ॥ (१) ॥*॥ एकम् **'शुष्कफलस्य'** ॥

उभे त्रिषु ॥ १५ ॥

उभे इति ॥ उभे शलाटुवाने त्रिषु ॥ स्त्रियां 'वा ना' ॥*॥

क्षारको जालकं क्लीबे

क्षारक इति ॥ क्षरति । 'क्षर संचलने' (भ्वा० प० से०) ण्वुल् (३।१।१३३) । **'क्षारको** रसे । कोरके पक्ष्यादिपाशे' इति हैमः । **'क्षारकः** पक्षिमत्स्यादिपिटके जालकेऽपि च' ॥ (१) ॥*॥ जालमिव । 'इवे प्रति–' (५।३।९६) इति कन् । **'जालकं** कोरके दम्भे कुलायानाययोरपि । न पुंसि मोचनफले स्त्रियां तु वसनान्तरे । गिरिसारजलौकायामपि स्याद्विधवास्त्रियाम् । भटानामश्मरचिताङ्गरक्षिण्यां च **जालिका'** ॥ (२) ॥*॥ द्वे **'नवकलिकावृन्दस्य'** ॥

कलिका कोरकः पुमान् ।

कलिकेति ॥ कलयति 'कल गतौ संख्याने च' (चुरादिः) । 'अच इः' (उ० ४।१३९) । स्वार्थे कन् (५।३।७५) ॥ (१) ॥*॥ कुर्यते । 'कुर शब्दे' (तु० प० से०) 'कृवापाजिमिस्वदिसाध्यशूभ्य उरन्' (उ० १।१) । 'कोरकोऽस्त्री कुड्मले स्यात्कक्कोलकमृणालयोः' ॥ (२) ॥*॥ द्वे **'अविकसितकलिकायाः'** ॥

स्याद्बुत्सकस्तु स्तबकः

स्यादिति ॥ गुध्यते 'गुध परिवेष्टने' (दि० प० से०) । 'उन्दिगुधिकुषिभ्यश्च' (उ० ३।६८) इति सः कित् । 'स्तबके

१—कटपो इति पाठः ॥ २—सस्यं दन्त्यादि 'ग्राम्यकविकथाबन्ध इव नारसस्यमनोहर आर्यावर्तः' इति दमयन्तीश्लेषात् ॥

१—पुंसि प्रचुरप्रयोगदर्शनादुक्तम् । न तु नियमार्थम् । क्लीबलिङ्गोऽपि । 'कोरकोऽस्त्री कुड्मलेऽपि' इत्यादिमेदिन्यादिदर्शनात् । अत एव 'समुपहरन् विचकार कोरकाणि' इति माघः—इति मुकुटः ।

हारभेदे च **गुत्सः** स्तम्बेऽपि कीर्तितः' इति दन्त्यान्तेषु रुद्रः ॥*॥ श्रीभोजस्तु 'शस्यादिभ्यश्छक्' इत्याह । स्वार्थे कन् (५।३।७५) । 'पुष्पादिस्तबके **गुच्छो** मुक्ताहारकलापयोः' इति चवर्गान्ते रन्तिदेवः ॥ (१) ॥*॥ स्तूयते । 'ष्टुञ् स्तुतौ' (अ० प० अ०) । 'कृञादिभ्यः' (उ० ५।३५) इति वुन् । यद्वा तिष्ठति । 'स्थः स्तोऽम्बजबकौ' (उ० ४।९६) ॥ (२) ॥*॥ द्वे **'विकासोन्मुखकलिकायाः'** इति मुकुटः ॥ कलिकादिकदम्बस्येत्यन्ये ॥

कुट्मलो मुकुलोऽस्त्रियाम् ॥ १६ ॥

कुट्मल इति ॥ कुट्यते, कुटति, वा । 'कुट छेदने' ( ) 'कौटिल्ये' (तु० प० से०) वा । 'कुटिकशिभ्यां क्मलच्' (उ० १।१०९) इति क्मलचि ॥*॥ बाहुलकात् 'कुडेः' (तु० प० से०) अपि (क्मनि **'कुड्मलः'**) । (**'कुड्मलो** मुकुले पुंसि न द्वयोर्नरकान्तरे') ॥ (१) ॥*॥ मुञ्चति कलिकात्वम् । 'मुच्लृ मोक्षणे' (तु० उ० अ०) । बाहुलकाद्डुलक् ॥—'मुञ्चेरलक् कत्वमुत्वं चातः' इति स्वामिमुकुटौ । तन्न । तादृशसूत्राभावात् ॥ (२) ॥*॥ **'ईषद्विकासोन्मुखकलिकायाः'** द्वे ॥

स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्[1] ।

स्त्रिय इति ॥ सुष्ठु मन्यन्ते आभिः । 'मन ज्ञाने' (दि० प० से०) । असुन् (उ० ४।१८९) । मुकुटस्तु—'सुप्रीतं मनो आभिः' इति विगृह्य 'प्रादिसमासः' इत्याह । तन्न । अन्यपदार्थत्वाऽलाभात् । 'भूम्नि स्त्रियां सुमनसः' इति रत्नकोषः । **'सुमनाः** पुष्पमालत्योः स्त्रियां ना धीरदेवयोः' इति मेदिन्यादेरेकत्वमपि । 'पुष्पं सुमनाः कुसुमम्' इति नाममाला ॥ (१) ॥*॥ पुष्प्यति । 'पुष्प विकसने' (दि० प० से०) । पचाद्यच् (३।१।१३४) । **'पुष्पं** विकास आर्तवे । धनदस्य विमाने च कुसुमे नेत्ररुज्यपि' इति हैमः ॥ (२) ॥*॥ प्रसूयते स्म । 'षूङ् प्राणिप्रसवे' (दि० आ० से०) । 'स्वादय ओदितः' (ग० ३।३।१) । 'ओदितश्च' (८।२।४५) इति निष्ठानत्वम् । **'प्रसूनं** तु प्रसूते फलपुष्पयोः' इति हैमः ॥ (३) ॥*॥ कुस्यति । 'कुस संश्लेषणे' (दि० प० से०) । 'कुसेरुम्भोमेदेताः' (उ० ४।१०६) इत्युमः । संज्ञापूर्वकत्वान्न गुणः । **'कुसुमं** स्त्रीरजोनेत्ररोगयोः फलपुष्पयोः' ॥ (४) ॥*॥ 'सर्वसाधुसमानेषु **समं** स्यादभिधेयवत्' (इति मेदिनी) ॥*॥ चत्वारि **'पुष्पसामान्यस्य'** ॥

मकरन्दः पुष्परसः

मकरन्द इति ॥ मकरमपि यति । कामजनकत्वात् ।

१—क्वचित्पुस्तके 'सुमम्' इति पाठ उपलभ्यते ॥ २—'प्रादिसमासः' इत्यनेन 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' इति वार्तिकस्मरणे तु न काप्यनुपपत्तिः ॥ ३'वेश्या श्मशानसुमना इव वर्जनीया' इति शूद्रकप्रयोगः— इति मुकुटः ॥

'दो अवखण्डने' (दि० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । पृषोदरादिः (६।३।१०९) । यद्वा मकरमप्यन्दति । 'अदि बन्धने' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) । शकन्ध्वादिः (वा० ६।१।९४) । यत्तु–'गतिकारकोपपदानाम्–' (प० २।२।१९) इत्युक्तेः सुबुत्पत्तेः प्राक् समासे प्रथ्ययनवत् पररूपत्वम्—इति मुकुटः । तन्न । उत्तरदले विभक्त्यनुत्पत्तावपि पूर्वदले विभक्तिसत्त्वात् । अन्यथा 'राजदर्शी' 'चर्मकारः' इत्यादौ नलोपो न स्यात् । दृष्टान्तोऽप्यसंगतः । 'प्राध्ययनम्' इत्यस्यैवेष्टत्वात् ॥ (१) ॥*॥ पुष्पस्य रसः ॥ (२) ॥*॥ द्वे **पुष्पमधोः'** ॥

परागः सुमनोरजः ॥ १७ ॥

पराग इति ॥ परा गच्छति । 'गम्लृ गतौ' (भ्वा० प० अ०) 'अन्येष्वपि–' (वा० ३।२।४८) इति डः । 'परागः सुमनोरेणौ धूलीस्नानीययोरपि । गिरिप्रभेदे विख्याताबुपरागे च चन्दने' ॥ (१) ॥*॥ सुमनसां रजः ॥ (२) ॥*॥ द्वे **'पुष्परेणोः'** ॥

द्वीहीनं प्रसवे सर्वम्

द्वीति ॥ द्वाभ्यां स्त्रीपुंसाभ्यां हीनं फले पुष्पे पत्रे च । वक्ष्यमाणमश्वत्थादि फलपुष्पादिषु वर्तमानं नपुंसकं लिङ्गं ज्ञेयमित्यर्थः । विकाराश्रयवयोरुत्पन्नस्य प्रत्ययस्य 'फले लुक्' (४।३।१६३) । 'पुष्पमूलेषु बहुलम्' (वा० ४।३।१६६) इति लुक् ॥

हरीतक्यादयः स्त्रियाम् ।

हरीति ॥ पूर्वोक्तापवादः । 'स्त्रियां' इति हरीतक्याः फलम् । 'हरीतक्यादिभ्यश्च' (४।३।१६७) इति लुप् । 'लुपि युक्तवद्व्यक्तिवचने' (१।२।५१) 'हरीतक्यादिषु व्यक्तिः' (वा० १।२।५२) इति लिङ्गमेव प्रकृतिवत् । न संख्या । आदिना 'कोशातकी (द्राक्षा) बदरी कण्टकारिका' इत्यादयः ॥

आश्वत्थवैणवप्लाक्षनैयग्रोधैङ्गुदं फले ॥ १८ ॥
बार्हतं च

आश्वत्थेति ॥ अश्वत्थस्य फलम् । आश्वत्थम् । 'प्लक्षादिभ्योऽण्' (४।३।१६४) ॥ (१) ॥*॥ वेणोः । 'बिल्वादिभ्योऽण्' (४।३।१३६) । (मयटि (४।३।१४३) प्रकृते अणः) विधेर्नाणो लुक् ॥ (१) ॥*॥ 'न्यग्रोधस्य च केवलस्य' (७।३।५) इत्यैच् ॥ (१) ॥*॥ इङ्गुद्या इदम् ॥ (१) ॥*॥ बृहत्याः फलम् ॥ (१) ॥*॥ **'अश्वत्थादिफलानाम्'** पृथक्पृथगेकैकम् ॥

फले जम्ब्वा जम्बूः स्त्री जम्बु जाम्बवम् ।

फले इति ॥ जमति । 'जमु अदने' (भ्वा० प० से०) । 'अन्दूहम्भूजम्बू–' (उ० १।९३) इत्यनेन कूप्रत्ययो बुगाग-

१—'कौसुमे रेणौ' इति पाठः ॥

मश्च निपातितः । **'जम्बूः** स्यात्पादपान्तरे । तथा सुमेरुसरिति द्वीपभेदेऽपि च स्त्रियाम्' । जम्ब्वाः फलम् । 'जम्ब्वा वा' (४।३।१६५) इत्यण् । तस्य विधानसामर्थ्यान्न लुक् । पक्षे 'ओरञ्' (४।१।१३९) तस्य 'लुप् च' (४।३।१६६) इति वा लुप् । 'लुपि युक्तवत्–' (१।२।५१) । पक्षे 'फले लुक्' (४।३।१६३) । लुपि जम्बूः ॥ (१) ॥*॥ लुकि 'ह्रस्वो नपुंसके–' (१।२।४८) इति ह्रस्वे जम्बु ॥ (२) ॥*॥ अणि जाम्बवम् ॥ (३) ॥*॥ त्रीणि **'जम्बूफलस्य'** ॥

पुष्पे जातिप्रभृतयः स्वलिङ्गाः

पुष्प इति ॥ जात्याः पुष्पम् । जातिः । 'पुष्पमूलेषु बहुलम्' (वा० ४।३।१६६) इति 'अनुदात्तादेरञ् (४।३।१४०) अणः (४।३।) च लुप् । **'यूथिकाशेफालिकामल्लिकाद्याः'** ॥

व्रीहयः फले ॥ १९ ॥

व्रीति ॥ यवानां फलानि । यवाः । 'अवयवे च प्राण्योष–' (४।३।१३५) इत्यण् । 'फलपाकशुषाम्–' (वा० ४।३।१६६) इति लुप् । माषाः । मुद्गाः ॥

विदार्याद्यास्तु मूलेऽपि

वीति ॥ विदार्या भूकूष्माण्ड्या मूलं पुष्पं फलमपि । विदारी । गम्भारी । शालपर्णी ॥

पुष्पे क्लीबेऽपि पाटला ।

पुष्प इति ॥ पाटलायाः पुष्पम् । लुकि (वा० ४।२।१६६) पाटलम् । **'पाटलः** कुसुमे वर्णेऽप्याशुव्रीहिश्च पाटलः' इति शाश्वतात् पुंलिङ्गोऽपि ॥

बोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशनः ॥ २० ॥

अश्वत्थे

बोधीति ॥ बुध्यते । 'बुध अवगमने' (दि० आ० अ०)। 'सर्वधातुभ्य इन्' (उ० ४।११८) । 'नोक्तमनित्यम्' इति न गुणनिषेधः । 'बोधिः पुंसि समाधेश्च भेदे पिप्पलपादपे' । रत्नकोषेऽपि 'पिप्पलो बोधिरश्वत्थः' इति । बोधिश्चासौ द्रुमश्च ॥ (१) ॥*॥ चलं दलमस्य ॥ (२) ॥*॥ पिप्पलं जलमस्यास्ति । मूले सिक्तत्वात् । अर्शआद्यच् (५।२।१२७) । **'पिप्पलं** सलिले वस्त्रच्छेदभेदे च ना तरौ' ॥ (३) ॥*॥ कुञ्जरेणाश्यते । 'अश भोजने' (क्या० प० से०) कर्मणि ल्युट् (३।३।११३) ॥ (४) ॥*॥ शाल्मलिवट्याद्यपेक्षया न श्रुश्चिरं तिष्ठति । 'सुपि स्थः' (३।२।४) इति कः । पृषोदरादिः (६।३।१०९) । यद्वा अश्वत्थं जलमस्यास्ति । अर्शआद्यच् (५।२।१२७) । 'आपः **प्रजाहितं शीतमश्वत्थं पवनं** विषम्' इति केशरमाला । 'अश्वत्थः पिप्पलद्रौ स्यादश्वत्था पूर्णिमा मता' ॥ (५) ॥*॥ पञ्च **'पिप्पलवृक्षस्य'** ॥

अथ कपित्थे स्युर्दधित्थग्राहिमन्मथाः ।
तस्मिन्दधिफलः पुष्पफलदन्तशठावपि ॥ २१ ॥

अथेति ॥ कपयस्तिष्ठन्त्यत्र । पृषोदरादिः (६।३।१०९) ॥*॥ अमरमालायां पवर्गतृतीयमध्यः (**कवित्थः**) अपि पृषोदरादिः ॥ (१) ॥*॥ दधिवर्णो द्रवस्तिष्ठत्यस्मिन् ॥ (२) ॥*॥ गृह्णाति । 'ग्रह उपादाने' (क्या० प० से०) । ग्रह्यादित्वात् (३।१।१३४) णिनिः ॥ (३) ॥*॥ मननम् । 'मन ज्ञाने' (दि० आ० अ०) । संपदादिः (वा० ३।३।१०८) । 'गमः क्वौ' 'गमादीनाम्' (६।४।४०) इति नलोपः । तुक् (६।१।७१) मथति । 'मथे विलोडने' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । मतो मथः । **'मन्मथः** कामचिन्तायां कपित्थे कुसुमायुधे' ॥ (४) ॥*॥ दधि फलेऽस्य ॥ (५) ॥*॥ पुष्पयुक्तं फलमस्य ॥ (६) ॥*॥ दन्तानां शठ इव । अपकारित्वात् ॥ (७) ॥*॥ सप्त **'कपित्थस्य' 'कैथ'** इति ख्यातस्य ॥

उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ।

उद्बिति ॥ उल्लङ्घितमम्बरमनेन । उदतिशयेनाम्बते वा । 'अबि शब्दे' (भ्वा० आ० से०) । बाहुलकादरन् । पृषोदरादिः (६।३।१०९) । **'उदुम्बरस्तु** देहल्यां वृक्षभेदे च पण्डके । कुष्ठभेदेऽपि च पुमांस्त्रिष्वपि स्यान्नपुंसकम्' इति मेदिनी । मुकुटस्तु मेदीनीसंमत्या टवर्गतृतीयमध्यमप्याह । तन्न । तत्र मध्यवर्णनियमाभावात् । आद्यन्तयोरेव नियमात् ॥ (१) ॥*॥ जन्तवः फलेऽस्य ॥ (२) ॥*॥ यज्ञमङ्गति । अगिर्गत्यर्थः (भ्वा० प० से०) । कर्मण्यण् (३।२।१) ॥ (३) ॥*॥ हेमवर्णं दुग्धमस्य ॥ (४) ॥*॥ चत्वारि **'उदुम्बरस्य'** ॥

कोविदारे चमरिकः कुद्दालो युगपत्रकः ॥ २२ ॥

कोवीति ॥ कुं भूमिं विदृणाति 'दृ विदारणे' (क्या० प० से०) । 'कर्मण्यण्' (३।२।१) पृषोदरादिः (६।३।१०९) ॥(१) ॥*॥ चमरमस्यास्ति । 'अत इनिठनौ' (५।२।११५) ॥ (२) ॥*॥ कुमुद्दालयति । 'दल विदारणे' (चु० उ० से०) । 'कर्मण्यण्' (३।२।१) । शकन्ध्वादिः (वा० ६।१।९४) । (**'कुद्दालः** स्यात्पुमान्भूमिदारणे युगपत्रके') ॥ (३) ॥*॥ युगं युग्मं पत्रमस्य ॥ (४) ॥*॥ चत्वारि **'कोविदारस्य', 'कचनार'** इति ख्यातस्य ॥

१—'परिणतजम्बुफलोपभोगहृष्टा' इति किराते ह्रस्वान्तप्रयोगः । तत्र 'फल उत्तरपदे 'इको ह्रस्वोऽयो गालवस्य' (६।३।६१) इति ह्रस्वत्वम्' इति वामनः । अत एव 'जलजम्बूजलाविलास्रवन्त्यः' इति वृक्षेऽपि 'इको ह्रस्वः' इति ह्रस्वत्वम् । 'जम्बुः' इति प्रकृत्यन्तरमस्ति । 'तस्माज्जम्बोः फलरसो नदी भूत्वा प्रवर्तते' इति संसारावर्तः—इति मुकुटः ॥ २—शाश्वतेऽपि स्वामिपुस्तकयोः 'पाटलम्' इति क्लीबपाठस्यैवोपलम्भेन **'पाटला** पाटली स्त्री स्यादस्य पुष्पे पुनर्न ना' इति मेदिन्यां पुंस्त्वस्य निषेधान्न पुंलिङ्गः ॥

सप्तपर्णे विशालत्वक् शारदो विषमच्छदः ।

सप्तेति ॥ काण्डे काण्डे सप्त पर्णान्यस्य ॥ (१) ॥*॥ विशाला त्वगस्य ॥ (२) ॥*॥ शरदि पुष्प्यति । 'कालात्साधुपुष्प्यत्–' (४।३।४३) इत्यण् ॥*॥ शारदी ङ्यन्ताऽपि । **'शारदी** तोयपिप्पल्यां सप्तपर्णे च शारदी' इति दन्त्यान्तेषु रुद्रः । (**'शारदोऽब्दे**, स्त्रियां तोयपिप्पलीसप्तपर्णयोः । सस्ये क्लीबं, शरज्जातनूतनाप्रतिभे त्रिषु' इति मेदिनी' ॥ (३) ॥*॥ विषमाश्छदा यस्य ॥ (४) ॥*॥ चत्वारि **'सप्तपर्णस्य', 'छतवती'** इति ख्यातस्य ॥

आरग्वधे राजवृक्षसंपाकचतुरङ्गुलाः ॥ २३ ॥
आरेवतव्याधिघातकृतमालसुवर्णकाः ।

आरगिति ॥ आ रगणम् । 'रगे शङ्कायाम्' (भ्वा० प० से०) । संपदादिः (वा० ३।३।१०८)। आरगं रोगशङ्कामपि हन्ति । 'कर्मण्यण्' (३।२।१)। 'बहुलं तणि' (वा० २।४।५४) इति हन्तेर्वधोऽदन्तः । 'ण्यल्लोपौ' (वा० ६।४।४८) इत्यल्लोपः । **'रज** रागे' (भ्वा०, दि० उ० अ०) । संपदादिः (वा० ३।३।१०८) आरजं रोगरागमपि हन्ति । यत्तु मुकुटः—आ समन्तात् रुजं वधति छिनत्ति । 'वध छेदनसेवनपूरणेषु' । पृषोदरादिः (६।३।१०९)—इत्याह । तन्न । उक्तधातोः पाणिनीये कुत्राप्यदर्शनात् । यत्तु—वधिः प्रकृत्यन्तरम्—इति 'जनिवध्योश्च' (७।३।३५) इति सूत्रेऽपि वृत्तिः । तन्न । मुनित्रयविरोधात्, इति प्रपञ्चितं मनोरमामण्डने । यदपि स्वामिनोक्तम्—आ समन्ताद् रुजां वधोऽत्र—इति । तदपि न । व्यधिकरणबहुव्रीहित्व-पृषोदरादि (६।३।१०९)-त्वकल्पनप्रसङ्गात् ॥*॥ व्यच्चकोऽपि हखादिरपि । 'आरग्वधोऽथ संपाकः कृतमालस्तथाग्वधः' इति रत्नकोषात् ॥ (१) ॥*॥ राजा चासौ वृक्षश्च । वृक्षाणां राजा । राजदन्तादिः (२।२।३१) इति वा । रोगाणां राजानं वृश्चति, इति वा । 'ओव्रश्चू छेदने' (तु० प० से०) । बाहुलकात् सक् ॥ (२)॥*॥ **'सम्यक् पाकोऽस्य** । दन्त्यादिः । **'संपाकस्तर्कके**, धृष्टे त्रिषु ना चतुरङ्गुले' ॥*॥ शं कल्याणं पाकोऽस्य, इति **(शंपाकः)** तालव्यादिरपि ॥*॥ स्वामी तु—शमीं शिविम् अकति, इति विगृह्य **'शम्याकः'** इति पाठं मन्यते ॥ (३) ॥*॥ चतस्रोऽङ्गुलयः प्रमाणमस्य पर्वणः । तद्योगाद् वृक्षोऽपि ॥ (४) ॥*॥ आरेवयति निःसारयति मलं सारकत्वात् । 'रेवृ, प्लव, गतौ' (भ्वा० आ० से०) । णिच् (३।१।२६) । विच् (३।२।७५) । अतति । 'अत सातत्यगमने' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) आरेव् चासावतश्च ॥ (५) ॥*॥ व्याधीन् हन्ति । 'कर्मण्यण्' (३।२।१) 'हनस्तोऽचिण्णलोः' (७।३।३२) ॥ (६) ॥*॥ कृता मालास्य पुष्पैः ॥ (७) ॥*॥ शोभनो वर्णोऽस्य ॥*॥ सुष्ठु पर्णान्यस्य, इति वा पाठः । **('सुपर्णः** स्वर्णचूडे च गरुडे कृतमालके । **सुपर्णा** 'कमलिन्यां च वैनतेयस्य मातरि') ॥ (८) ॥*॥ अष्टौ **'सोनालु धनवेहेढ'** इति ख्यातस्य ॥

स्युर्जम्बीरे दन्तशठजम्भजम्भीरजम्भलाः ॥ २४ ॥

स्युरिति ॥ जम्भ्यते । 'जभु अदने' (भ्वा० प० से०)। 'गम्भीरादयश्च' (उ० ४।३५) इति साधुः । **'जम्बीरः** प्रस्थपुष्पे स्यात्तथा 'दन्तशठद्रुमे' ॥ (१) ॥*॥ दन्तानां शठ इव । (**'स्याद्दन्तशठो** जम्बीरे कपित्थे कर्मरङ्गके । नागरङ्गेऽपि च पुमान् स्याच्चाङ्गेर्यां तु योषिति' ॥ (२) ॥*॥ जम्भयत्यम्लत्वात् । 'जभी गात्रविनामे' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) । 'रधिजभोर्–' (७।१।६१) इति नुम् । **'जम्भः** स्याद्दानवान्तरे । दन्तभोजनयोरंसे हनौ जम्बीरतूनयोः' ॥ (३) ॥*॥ गम्भीरादित्वात् (उ० ४।३५) इरन् ॥ (४) ॥*॥ वृषादित्वात् (उ० १।१०६) कलच् । (**'जम्भलः** पुंसि जम्बीरे बुद्धदेवान्तरेऽपि च') ॥ (५) ॥*॥ पञ्च **'जम्बीरस्य', 'जम्भेरी'** इति ख्यातस्य ॥

वरणे वरुणः सेतुस्तिक्तशाकः कुमारकः ।

वरेति ॥ वृणोति । 'वृञ् वरणे' (स्वा० उ० से०) । कर्तरि ल्युट् (३।३।११३) । कर्तरि ल्युट् (३।३।११३) (३।३।११७) वा ॥ (१) ॥*॥ 'कृवृदारिभ्य उनन्' (उ० ३।५३) । **'वरुणस्तरुभेदेऽप्सु** प्रतीचीपतिसूर्ययोः' ॥ (२) ॥*॥ **सि**नोति, सीयते, वा । 'षिञ् बन्धने' (स्वा० उ० अ०) । 'सितनि–' (उ० १।६९) इति तुन् । **'सेतु**र्नालौ कुमारके' ॥ (३) ॥*॥ तिक्तः शाकोऽस्य । शाकत्वं चास्य पत्राणां शाकमध्ये पाठात् । **'तिक्तशाक**स्तु खदिरे वरुणे पत्रसुन्दरे' ॥ (४) ॥*॥ कुमारश्चिरतरुणत्वात् । कुमारयति । 'कुमारक्रीडायाम्' (चु० उ० से०) । पचाद्यच् (३।१।१३४) । कुमार इव 'इवे प्रकृतिकृतौ' (५।३।९६) इति कन् ॥ (५) ॥*॥ पञ्च **'वरणस्य'** ॥

पुंनागे पुरुषस्तुङ्ग केसरो देववल्लभः ॥ २५ ॥

पुंनेति ॥ पुमान् नाग इव । 'उपमितं व्याघ्रा–' (२।१।५६) इति समासः । 'पुंनागो नृश्रेष्ठः । प्राधान्यात्स इव । **'पुंनाग**स्तु सितोत्पले । जातीफले नरश्रेष्ठे पाण्डुनागे द्रुमान्तरे ॥' (२) ॥*॥ पुरति । 'पुर अग्रगमने' (तु० प० से०)। 'पुरः कुषन्' (उ० ४।७४) । यत्तु—'पिपर्ति' इति विगृह्य 'पुरः कुषन्' इत्युपन्यस्तं मुकुटेन । तद्भ्रमसात् । **'पुरुष**स्त्वात्मनि नरे पुंनागे च' ॥ (२) ॥*॥ तुङ्ग्यते । 'तुजि हिंसायाम्' (भ्वा० प० से, चु० उ०) । घञ् (३।३।१८) । न्यङ्क्वादिः (७।३।५३) । उच्चत्वाद्वा । **'तुङ्गः** पुंनागनगयोर्बुधे स्यादुन्नतेऽन्यवत् । **तुङ्गी** प्रोक्ता हरिद्रायां वर्वरायामपीष्यते' इति हैमः ॥ (३) ॥*॥ प्रशस्ताः केसरा अस्य । अर्शआद्यच् (५।२।१२७) । **'केसरो** नागकेसरे । तुरंगसिंहयोः

स्कन्धकेशेषु बकुलद्रुमे । पुंनागवृक्षे किंजल्के स्यात्केसरं तु हिङ्गुनि' इति हैमः ॥ (४) ॥*॥ देवानां वल्लभः ॥ (५) ॥*॥ पञ्च 'पुंनागस्य' गुर्जरदेशे **'संदेशरा'** इति ख्यातस्य ॥

पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ।

पारीति ॥ पारमस्यास्ति । 'अत इनिः' (५।२।११५) पारि पारं गतं भद्रमस्य, परितो भद्रमस्य, इति वा । प्रज्ञाद्यण् (५।४।३८) । **'पारिभद्रस्तु** निम्बद्रौ मन्दारे देवदारुणि' ॥ (१) ॥*॥ नियमयति । 'यम उपरमे' (भ्वा० प० से०) । पृषोदरादिः (६।३।१०९) । निंबति । 'णिबि सेचने' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । बबयोरैक्यम् । कर्मणि घञ् (३।३।१९) वा । निम्बसंज्ञकस्तरुः । शाकपार्थिवादिः (वा० २।१।६९) ॥ (२) ॥*॥ मन्दा अरा यस्य । मन्दमृच्छति वा । 'ऋ गतौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) यद्वा मन्दते । 'मदि स्तुत्यादौ' (भ्वा० आ० से०) । 'अङ्गिमदिमन्दिभ्य आरन्' (उ० ३।१३४) ॥ (३) ॥*॥ पारि पारं गतं जातं जन्मास्य । पारिणः समुद्राज्जातो वा । स्वार्थे कन् (५।३।७५) ॥ (४) ॥*॥ चत्वारि **'निम्बतरोः' 'वकायिनी'** इति ख्यातस्य ॥

तिनिशे स्यन्दनो नेमी रथद्रुरतिमुक्तकः ॥ २६ ॥
वञ्जुलश्चित्रकृच्च

तिनीति ॥ अतिशयेन नेशति । 'णिश समाधौ' (भ्वा० प० से०) 'इगुपध–' (३।१।१३५) इति कः । यद्वा अतिक्रान्तो निशाः । 'अल्पाद्यः–' (वा० २।२।१८) इति समासः । पृषोदरादिः (६।३।१०९) ॥ (१) ॥*॥ स्यन्दते । 'स्यन्दू प्रस्रवणे' (भ्वा आ० से०) । 'बहुलमन्यत्रापि' (उ० २।७८) इति युच् । **'स्यन्दनं** तु स्मृतं क्लीबे रथाङ्गे तिनिशे नरि' इति रभसः । **'स्यन्दनं** तु स्रुतौ नीरे, तिनिशे ना, रथेऽस्त्रियाम्' ॥ (२) ॥*॥ नयति । 'णीञ् प्रापणे' (भ्वा० प० से०) । 'नियो मिः' (उ० ४।४३) । 'पुंलिङ्गस्तिनिशे **नेमि**श्चक्रप्रान्ते स्त्रियामपि' इति रुद्रः । 'ढ्रलोपे–' (६।३।१११) इति दीर्घः ॥ (३) ॥*॥ रथस्य द्रुः । तत्रोपयुक्तत्वात् ॥ (४) ॥*॥ अतिशयितो मुक्तो विस्तारोऽस्य । कप् (५।४।१५४) ॥ (५) ॥*॥ वच्यते । 'वञ्जु गतौ' (भ्वा० प० से०) । बाहुलकादुलो जत्वं च । **'वञ्जुलः** पुंसि तिनिशे वेतसाशोकयोरपि' ॥ (६) ॥*॥ चित्रं करोति । अतिदार्ढ्येऽपि लघुत्वात् । क्विप् (३।२।७६) ॥*॥ सप्त **'तिनिशस्य'** ॥

अथ द्वौ पीतनकपीतनौ ।

आम्रताके

अथेति ॥ पीतं करोति । 'तत् करोति–' (वा० ३।१।२६) इति णिच् । 'बहुलमन्यत्रापि' (उ० २।७८) इति युच् ॥ (१) ॥*॥ तनोति । 'तनु विस्तारे' (त० उ० से०) । पचाद्यच् (३।१।१३४) कपीनां कपेर्वर्णस्य वा तनः । 'अन्येषामपि' (६।३।१३७) इति दीर्घः । यद्वा याः लक्ष्म्यास्तन ईतनः, कपीनां कपेर्वा ईतनः ॥ (२) ॥*॥ आम्रमतति 'अत सातत्यगमने' (भ्वा० प० से०) 'कृवादिभ्यो वुन्' (उ० ५।३५) ॥*॥ ह्रस्वादिरपि । अम्लल्लमतति । रलयोरैक्यम् । **'कपिचूतोऽम्रातकोऽस्य** फले पशुहरीतकी' इति त्रिकाण्डशेषः ॥ (३) ॥*॥ त्रीणि **'आम्रातकस्य' 'अंबाडा'** इति ख्यातस्य ॥

मधूके तु गुडपुष्पमधुद्रुमौ ॥ २७ ॥
वानप्रस्थमधुष्ठीलौ

मध्विति ॥ मद्यते मन्यते वा । 'मद पूजायाम्' (भ्वा० प० से०) 'मन ज्ञाने' (दि० आ० अ०) वा । 'उलूकादयश्च' (उ० ४।४१) इति साधुः ॥ (१) ॥*॥ गुड इव पुष्पमस्य ॥ (२) ॥*॥ मधुनामा द्रुमः ॥ (३) ॥*॥ वनप्रस्थे वनैकदेशे भवः । 'तत्र भवः' (४।३।५३) इत्यण् । **'वानप्रस्थो** मधूकेऽपि स्यात्तृतीयाश्रमे पुमान्' ॥ (४) ॥*॥ मधु ष्ठीवति । 'ष्ठिवु निरसने' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । पृषोदरादिः (६।३।१०९) । मधु ष्ठीले गर्भेऽस्य, इति वा ॥ (५) ॥*॥ पञ्च **'मधूकस्य' 'महुआ'** इति ख्यातस्य ॥

जलजेऽत्र मधूलकः ।

जलेति ॥ अत्र मधूके । मधु लाति । 'ला दाने' (अ० प० अ०) । आतोऽनुप–' (३।२।३) इति कः । 'अन्येषामपि–' (६।३।१३७) इति दीर्घः । स्वार्थे कन् (५।३।७५) ॥ (१) ॥*॥ 'गिरिजेऽत्र' इति मूलपाठः–इति सुभूत्यादयः । 'गौरशाको मधूकोऽन्यो गिरिजः सोऽल्पपत्रकः' इति माधवः । 'मधूकोऽन्यो मधूलस्तु जलजो दीर्घपत्रकः' इति स्वामी ॥ एकम् **'जलजमधूकस्य'** ॥

पीलौ गुडफलः स्रंसी

पीलाविति ॥ पीलति । 'पील प्रतिष्टम्भे' (भ्वा० प० से०) । मृगय्वादिलात् (उ० १।३७) उः । (**'पीलुः** पुमान् प्रसूने स्यात् परमाणौ मतङ्गजे । अस्थिखण्डे च तालस्य काण्डपादपभेदयोः') ॥ (१) ॥*॥ गुड इव फलमस्य ॥ (२) ॥*॥ स्रंसयति मलम् । 'स्रंसु अधःपतने' (भ्वा० आ० से०) । आवश्यके णिनिः (३।३।१७०) ॥ (३) ॥*॥ त्रीणि गुर्जरदेशे **'पीलु'** इति ख्यातस्य ॥

तस्मिंस्तु गिरिसंभवे ॥ २८ ॥
अक्षोटकर्परालौ द्वौ

तस्मिन्निति ॥ तस्मिन् पीलौ गिरिजे । अक्ष्णोति 'अक्षू व्याप्तौ संघाते च' (भ्वा० प० से०) । बाहुलकादोटः । 'अक्षस्येवोटाः पर्णान्यस्य' इति वा ॥ (१) ॥*॥ कर्परमालति । 'अल भूषणादौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) । यद्वा कर्परास्यास्ति । सिध्मादित्वात् (५।२।९७)

लच् ॥*॥ **'कन्दरालः'** इति वा पाठः । पूर्ववत् ॥ (२) ॥*॥ द्वे **'पर्वतपीलोः' 'अखरोट'** इति ख्यातस्य ॥

अङ्कोटे तु निकोचकः ।

अङ्कोट इति ॥ अङ्कयते 'अकि लक्षणे' (भ्वा० आ० से०) । बाहुलकादोटः ॥ (१) ॥*॥ निकुच्यते । 'कुच शब्दे तारे' (भ्वा० प० से०) 'कृत्यादिभ्यो वुन्' (उ० ५।३५) ॥ (२) ॥*॥ **'अङ्कोलः'** अपि ॥*॥ द्वे **'अङ्कोलस्य' 'ढेरा'** इति ख्यातस्य ॥

पलाशे किंशुकः पर्णो वातपोथः

पलेति ॥ प्रशस्तानि पलाशान्यस्य । अर्शआद्यच् (५।२।१२७) । यद्वा पलं मांसमश्नाति । 'अश भोजने' (क्या० प० से०) । 'कर्मण्यण्' (३।२।१) । **'पलाशः** किंशुकेऽस्रपे । हरिते **पलाशं** पत्रे' इति हैमः ॥ (१) ॥*॥ किंचित् शुक इव । शुकतुण्डाभपुष्पत्वात् ॥ (२) ॥*॥ पृणति । 'पृण प्रीणने' (तु० प० से०) अच् (३।१।१३४) । यद्वा प्रशस्तानि पर्णान्यस्य । अर्शआद्यच् (५।२।१२७) । यद्वा पिपर्ति । 'पॄ पालनपूरणयोः' (जु० प० से०) 'कृपॄवृषिभ्याण्भ्यो नः' । **'पर्ण** पत्रे किंशुके ना' ॥ (३) ॥*॥ वातं पोथयति 'पुथ हिंसायाम्' (दि० प० से०) । 'कर्मण्यण्' (३।२।१) ॥ (४) ॥*॥ चत्वारि **'पलाशस्य'** ॥

अथ वेतसे ॥ २९ ॥

रथाभ्रपुष्पविदुलशीतवानीरवञ्जुलाः ।

अथेति ॥ अयनम् । 'इण् गतौ' (अ० प० अ०) । 'नपुंसके' (३।३।११४) इति क्तः । वा विकल्पस्येतं ज्ञानं स्यति । 'षोऽन्तकर्मणि' (दि० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । यद्वा ऊयते । 'वेञ् तन्तुसन्ताने' (भ्वा० उ० अ०) । 'वेञस्तुट् च' (उ० ३।११८) इत्यसच् । बाहुलकादात्वं न । यत्तु—'वेतसवाहसपनसाः' इत्यसनि निपातनादेव तुट्–इत्याह मुकुटः । तन्न । उणादिषु तत्सूत्रादर्शनात् ॥ (१) ॥*॥ रम्यतेऽत्र । 'रमु क्रीडायाम्' (भ्वा० आ० अ०) । 'हनिकुषिणीरमिकाशिभ्यः क्थन्' (उ० २।२) । **'रथौ** स्यन्दनवानीरौ' इत्यजयः । **'रथः** पुमानवयवे स्यन्दने वेतसेऽपि च' ॥ (२) ॥*॥ अभ्रमिव अभ्रसमये वा पुष्पमस्य ॥ (३) ॥*॥ वेत्ति, विद्यते, वा । बाहुलकादुलच् गुणाभावश्च । **'विदुलस्तु** पुमानम्बुवेतसे वेतसेऽपि च' ॥ (४) ॥*॥ शीतमस्यास्ति । अच् (५।२।१२७) । 'वेतसे बहुवारे ना गुणे **शीतं** हिमे त्रिषु' इति रभसः । क्लीबलिङ्गमपि । **'शीतं** तुषारवानीरबहुवारद्रुमेषु च' इत्यजयात् ॥ (५) ॥*॥ वायति । 'ओवै शोषणे' (भ्वा० प० अ०) क्विप् (३।२।१७८) । वां शुष्कम् आ समन्ताच्छीरमस्य ॥ (६) ॥*॥ वजति 'वज गतौ' (भ्वा० प० से०) । बाहुकादुलच्, नुम् च । **'वञ्जुलः** पुंसि तिनिशे वेतसाशोकयोरपि' ॥ (७) ॥*॥ सप्त **'वेत'** इति ख्यातस्य ॥

द्वौ परिव्याधविदुलौ नादेयी चाम्बुवेतसे ॥ ३० ॥

द्वाविति ॥ परिविध्यते । 'व्यध ताडने' (दि० प० अ०) । घञ् (३।३।१९) । **'परिव्याधस्तु** पुंसि स्याद्वेतसे च द्रुमोत्पले' ॥ (१) ॥*॥ नद्यां भवा । 'नद्यादिभ्यो ढक्' (४।२।९७) । **'नादेयी** नागरङ्गे स्याज्जयायां जलवेतसे । भूमिजम्ब्वां च जम्ब्वां च काङ्क्षेऽपि च योषिति' ॥ (३) ॥*॥ अम्बुनि जातो वेतसः । शाकपार्थिवादिः (वा० २।१।६९) ॥ (४) ॥*॥ चत्वारि **'जलजातवेतसस्य'** ॥

शोभाञ्जने शिग्रुतीक्ष्णगन्धकाक्षीवमोचकाः ।

शोभेति ॥ शोभामनक्ति । 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' (रु० प० से०) । कर्तरि ल्युट् (३।३।११३) । 'बहुलमन्यत्रापि' (उ० २।७८) इति युज्वा ॥*॥ प्रज्ञाद्यणि (५।३।४८) 'शौभाञ्जनः' ॥*॥ सुष्ठु भा तामनक्ति । ल्युट् (३।३।११३) । प्रज्ञाद्यणि (५।४।३८) (**'सौभाञ्जनः'**) दन्त्यादिरपि ॥ (१) ॥*॥ शिनोति । 'शिञ् निशाने' (स्वा० उ० अ०) । 'जम्बादयश्च' (उ० ४।१०२) इति निपातितः । **'शिग्रुर्ना** शाकमात्रे च शोभाञ्जनमहीरुहे' ॥ (२) ॥*॥ तीक्ष्णो गन्धोऽस्य । 'शेषाद्विभाषा' (५।४।१५४) इति कप् ॥ (३) ॥*॥ अक्षीवते, आक्षीवयति वा । 'क्षीवृ मदे' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) ॥*॥ ह्रस्वादिरपि । **'अक्षीवं** वशिरे, शिग्रौ ना, ऽमत्ते पुनरन्यवत्' ॥ (४) ॥*॥ मोचयति । 'मुच्लृ मोक्षणे' (तु० प० अ०) । णिच् (३।१।२६) । अच् (३।१।१३४) । **'मोचः** शोभाञ्जने पुंसि मोचा शाल्मलिरम्भयोः' । ततः स्वार्थे कन् (५।३।७५) ॥ (५) ॥*॥ पञ्च **'शिग्रोः' 'सहेजँन'** इति ख्यातस्य ॥

रक्तोऽसौ मधुशिग्रुः स्यात्

रक्त इति ॥ असौ शोभाञ्जनः । रक्तपुष्पः । मधुप्रधानः शिग्रुः–इति मुकुटः । रक्तो मधुकरः । 'रक्तकण्ठानाम्' इति दर्शनात् । मधुर्मधुरः । शिग्रुः–इत्येके ॥ (१) ॥*॥ एकम् **'मधुशिग्रोः' 'मगुना'** इति ख्यातस्य ॥

अरिष्टः फेनिलः समौ ॥ ३१ ॥

अरीति ॥ न रिष्टमस्मात् । **'अरिष्टो** लशुने निम्बे फे-

१—लयनम् लीः संश्लेषः । क्विप् (वा० ३।३।१०८) । तया कोचको व्यथाजनकः । 'लिकोचकः' इति तु श्रीकरः—इति मुकुटः ॥ २—'पलाशः किंशुकः शटी । हरिद्रर्णौ राक्षसश्च पलाशं छेदने स्मृतम्' इति पाठः ॥

१—'काक्षीर' इति रान्तमिदम्,—इत्यन्ये—इति मुकुटः । २—'तरुणीजन इवाधिगतशोभाञनो वसन्तसमयः प्रादुरासीत्' इत्याश्चर्यमञ्जरीतस्तालव्यादिः—इति मुकुटः ॥

निले काककङ्कयोः' ॥*॥ रिष्टोऽपि । **'रिष्टं** क्षेमाशुभाभावे पुंसि खड्गे च फेनिले' ॥ (१) ॥*॥ फेनोऽस्यास्ति । 'फेनादिलच्च' (५।२।९९) । (**'फेनिलोऽरिष्टपादपे । फेनिलं** मदनफले बदरे फेनवत्यपि') ॥ (२) ॥*॥ द्वे **'अरिष्टस्य' 'रीठा'** इति ख्यातस्य ॥

बिल्वे शाण्डिल्यशैलूषौ मालूरश्रीफलावपि ।

बीति ॥ बिलति । 'बिल भेदने' (तु० प० से०) । उल्वादिः (उ० ४।९५) (**'बिल्वं** फले श्रीफले ना') ॥ (१) ॥*॥ शण्डते । 'शडि रुजायाम्' (भ्वा० आ० से०) । 'सलि–' (उ० १।५४) इत्यादिनेलच् । शाण्डिलस्य गोत्रापत्यम् । 'गर्गादिभ्यो यञ्' (४।१।१०५) शाण्डिल्य इव, इति । शण्डयति रुचं करोति वा । इलचि (उ० १।५४) स्वार्थे ष्यञ् (वा० ५।१।१२४) । **'शाण्डिल्यः** पावकान्तरे । बिल्वे मुनौ च' इति हैमः ॥ (२) ॥*॥ शिलूषस्यापत्यम् । शैलूष इव इति वा । 'नटे बिल्वे च **शैलूषः**' इति तालव्यादिर्मूर्धन्यान्ते रभसः ॥ (३) ॥*॥ मां लक्ष्मीं परेषां लुनाति । 'लूञ् छेदने' (क्र्या० उ० से०) । बाहुलकाद्रक् ॥ (४) ॥*॥ श्रीपदं श्रीप्रियं वा फलमस्य । शाकपार्थिवादिः (वा० २।१।६९) । **'श्रीफलः** पुंसि मालूरे धात्रीनीलिकयोः स्त्रियाम्' ॥ (५) ॥*॥ पञ्च **'बिल्ववृक्षस्य'** ॥

प्लक्षो जटी पर्कटी स्यात्

प्लेति ॥ प्लक्षरति । 'क्षर संचलने' (भ्वा० प० से०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । कपिलिकादिः (वा० ८।२।१८) । यद्वा प्लक्ष्यते । 'प्लक्ष भक्षणे' (भ्वा० उ० से०) । कर्मणि घञ् (३।३।१९) । प्लक्षति अधो गच्छति वा । अच् (३।१।१३४) । **'प्लक्षो** जटीगर्दभाण्डद्वीपिभल्लुङ्गराशने' ॥ (१) ॥*॥ जटति । 'जट संघाते' (भ्वा० प० से०) । 'सर्वधातुभ्य इन्' (उ० ४।११८) । ङीष् (गं० ४।१।४५) वा । **'जटा** लम्बकचे मूले मांस्यां, प्लक्षे पुनर्जटी' । रुद्रे तु—'गर्दभाण्डे जटीप्लक्षौ' ॥ (२) ॥*॥ पृच्यते । 'पृची संपर्के' (रु० प० से०) । बाहुलकात् कटः । गौरादिङीष् (४।१।४१) । **'पर्कटी** नूतनपले पूगादेः प्लक्षपादपे' । 'शाश्वतेऽपि विज्ञेया पर्कटी **प्लक्षः प्लक्षः** पिप्पलपादपः' ॥ (३) ॥*॥ त्रीणि **'प्लक्षस्य' 'पाकर'** इति ख्यातस्य ॥

न्यग्रोधो बहुपाद्वटः ॥ ३२ ॥

न्यगिति ॥ न्यक् रुणद्धि । 'रुधिर् आवरणे' (रु० उ० अ०) 'कर्मण्यण् (३।२।१) । **'न्यग्रोधस्तु** पुमान् व्याम-वटयोश्च शमीतरौ । **न्यग्रोधी** तूपचित्रायाम्' ॥ (१) ॥*॥ बहवः पादा अस्य । 'संख्यासुपूर्वस्य' (५।४।१४०) ॥ (२) ॥*॥ वटति । 'वट वेष्टने' (भ्वा० प० से०) । अच् (३।१।१३४) । **'वटी**–स्त्रिषु गुणे पुंसि स्याच्चन्यग्रोधकपर्दयोः' ॥ (३) ॥*॥ त्रीणि **'वटस्य'** ॥

गालवः शाबरो लोध्रस्तिरीटस्तिल्वमार्जनौ ।

गालेति ॥ गालवस्यापत्यम् । 'ऋष्यन्धक–' (४।१।११४) इत्यण् । गालं नेत्रस्रवं वायति । 'ओवै शोषणे' (भ्वा० प० अ०) । 'आतोऽनुप–' (३।२।३) इति को वा । **'गालवो** मुनिभेदे स्याल्लोध्रवृक्षे च कीर्तितः' ॥ (१) ॥*॥ शबराणामयम् 'तस्येदम्' (४।३।१२०) इत्यण् । **'शाबरी** शूकशिम्ब्यां स्यात् पुंसि पापापराधयोः । लोध्रे च[1]' इति तालव्यादिः ॥*॥ दन्त्यादिरपि । **'सावरा**ख्यापराधे च लोध्रे पापे च पठ्यते' इति दन्त्यादावजयः ॥ (२) ॥*॥ रुणद्धि 'रुधिर् आवरणे' (रु० उ० अ०) बाहुलकाद्रन् । 'शूद्रादयः' इति रन्—इति मुकुटः । तन्न । तादृशसूत्राभावात् । कपिलिकादिः (वा० ८।२।१८) । (रोध्रोऽपि लत्वाभावे । **'रोध्रो** ना गालवे क्लीबमपराधे च किल्बिषे' इति मेदिनी) ॥ (३) ॥*॥ तीर्यते मलमनेन । 'कृतॄकृपिभ्यः कीटन्' (उ० ४।१८५) । इलम् (७।१।१००) । रपरत्वम् (१।१।५१) ॥ (४) ॥*॥ तिलत्यनेनाङ्गम् । 'तिल स्नेहने' (तु० प० से०) । उल्वादिः (उ० ४।९५) ॥ (५) ॥*॥ मार्ष्ट्यनेन । 'मृजू शुद्धौ' (अ० प० से०) । ल्युट् (३।३।११७) ।—नन्द्यादिल्युः (३।१।१३४)—इति मुकुटः । तन्न । तस्य कर्तरि विधानात् । **'मार्जनं** न द्वयोर्माष्टौ पुंसि स्याल्लोध्रशाखिनि' ॥ (६) ॥*॥ षट् **श्वेतलोध्रस्य'** । आद्यौ श्वेतलोध्रे, शेषा रक्तलोध्रे इति स्वामी ॥

आम्रश्चूतो रसालः

आम्र इति ॥ अम्यते । 'अम गत्यादौ' (भ्वा० प० से०) 'अमितम्योर्दीर्घश्च' (उ० २।१६) इति रक् दीर्घश्च ॥ (१) ॥*॥ चूष्यते स्म । 'चूष पाने' (भ्वा० प० से०) । क्तः (३।२।१०२) । पृषोदरादिः (६।३।१०९) । च्योतति रसम् इति वा । 'च्युतिर् क्षरणे' (भ्वा० प० से०) । अच (३।१।१३४) ॥ (२) ॥*॥ रसमलति । 'अल भूषणादौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) ॥ (३) ॥*॥ त्रीणि **'आम्रवृक्षस्य'** ॥

असौ सहकारोऽतिसौरभः ॥ ३३ ॥

असाविति ॥ सह कारयति मेलयति द्वन्द्वम् । अच् (३।१।१३४) ॥ (१) ॥*॥ अतिशयितं सौरभमस्य ॥*॥ एकम् **'अतिसुगन्धाम्रस्य'** ॥

१—'विटे मुनौ' इति पाठः ॥ २—'सवटोऽप्यवटसंकुलः' इति दमयन्तीशेषः ॥

१—इतः परम् **'शांकरिः** पुंसि कार्तिकेये गणाधिपे' इत्यपि लिखितमासीत् । परंतु तत्र प्रकृतोपयुक्तम् ॥

कुम्भोलूखलकं क्लीबे कौशिको गुग्गुलुः पुरः ।

क्षिति ॥ 'कुम्भोलूखलकम्' इति संघातविगृहीतम् । 'कार्मुके वारनार्यां च **कुम्भः** क्लीबं तु गुग्गुलौ' इति रभसः । 'उदूखले गुग्गुलौ च क्लीबमुक्त**मुलूखलम्**' इति रुद्रः । '**कुम्भोलूखलकं कुम्भं कुम्भोलुः खलकं** वरम्' इति वाचस्पतिः ॥*॥ कमुम्भति । 'उम्भ पूरणे' (तु० प० से०) । 'कर्मण्यण्' (३।२।१) । शकन्ध्वादिः (वा० ६।१।९४) ॥ (१) ॥*॥ ऊर्ध्वं खम् उलूखम् । पृषोदरादिः (६।३।१०९) । उलूखं लाति । 'ला दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । ततः स्वार्थे कन् (५।३।७५) ॥ (२) ॥*॥ कुम्भोलूखलकाकाराद् वृक्षकोशान्निर्यातम् ॥*॥ कोशे भवः । अध्यात्मादिठञ् (वा० ४।३।६०) '**कौशिको** नकुले व्यालग्राहे गुग्गुलुशक्रयोः । कोशजोलूकयोश्च स्याद्विश्वामित्र-मुनावपि । **कौशिकी** चण्डिकायां च नदीभेदे च योषिति' ॥ (३) ॥*॥ गोजति । 'गुज स्तेये' (भ्वा० प० से०) । क्विप् (३।२।१७८) गुजो व्याधेर्गुडति । 'गुड रक्षणे' (तु० प० से०) । बाहुलकादुः । डलयोरेकत्वम् ॥ (४) ॥*॥ पुरति । 'पुर अग्रगमने' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । '**पुरं** पाटलिपुत्रेऽङ्गे गुग्गुलौ तु पुमानयम्' इति रभसः । यत्तु—पिपर्ति । पुरः । 'इगुपध–' इति कः । 'उदोष्ठ्यपूर्वस्य' (७।१।१०२) इत्युत्—इति स्वाम्याह । तन्न 'प्रीञ् तर्पणे कान्तौ च' (क्र्या० उ० से०) इत्यस्य तत्र ग्रहणात् । 'प्रीणातीति प्रियः' इति वृत्तिकृता विगृहीतत्वात् । 'प्रीणातीति प्रियः' इत्युक्त्वा 'इगुपधज्ञाप्रीकिरः कः' इति माधवोक्तेश्च ॥ (५) ॥*॥ पञ्च '**गुग्गुलवृक्षस्य**' ॥

शेलुः श्लेष्मातकः शीत उद्दालो बहुवारकः ॥ ३४ ॥

शेलुरिति ॥ शिलति । 'शिल उञ्छे' (तु० प० से०) । बाहुलकादुः ॥ (१) ॥*॥ श्लेष्माणमतति । 'अत सातत्यगमने' (भ्वा० प० से०) । 'कृन् शिल्पिसंज्ञयोरपूर्वस्यापि' (उ० २।३२) ॥ (२) ॥*॥ श्यायते स्म । 'श्यैङ् गतौ' (भ्वा० आ० अ०) । 'गत्यर्थाकर्मक–' (३।४।७२) इति क्तः । 'द्रवमूर्ति–' (६।१।२४) इति संप्रसारणम् । 'हलः' (६।४।२) इति दीर्घः ॥ (३) ॥*॥ उद्दालयति । 'दल विशरणे' (भ्वा० प० से०) णिच् (३।१।२६) । अच् (३।१।१३४) ॥ (४) ॥*॥ बहून् वारयति । 'वृञ् वरणे' (स्वा० उ० से०) । णिजन्तः (३।१।२६) 'कृन् शिल्पिसंज्ञयोः' (उ० २।३२) ॥ (५) ॥*॥ पञ्च '**उद्दालकस्य**' '**बहुआर**' इति '**लसोडा**' इति ख्यातस्य ॥

राजादनं पियालः स्यात्सन्नकद्रुर्धनुष्पटः ।

राजेति ॥ राजभिरद्यते । 'अद भक्षणे' (अ० प० अ०)। कर्मणि ल्युट् (३।३।११३) । '**राजादनं** क्षीरिकायां पियाले किंशुकेऽपि च' ॥*॥ 'राजातनम्' इति पाठे राजानमतति, इति वा ल्युः (३।१।१३४) । 'राजादनं **प्रसरको** राजातनः' इति वाचस्पतिः ॥ (१) ॥*॥ पीयते । 'पीयुः' सौत्रो धातुः । 'पीयुक्तणिभ्यां कालन् ह्रस्वः' (उ० ३।७६) ॥*॥ बाहुलकात् प्रीणातेः कालनि प्रियालश्च । '**प्रियालश्च पियालकः**' इति माधवः ॥ (२) ॥*॥ सन्नो लीनः कद्रुर्वर्णोऽस्य ॥ (३) ॥ दधन्ति धारयति । 'धन धान्ये' (जु० प० से०) । 'भृ-मृशी–' (उ० १।७) इत्युः । 'धनुः पियालद्रुमः' इति रूपरत्नाकरः । '**धनुः** पुमान् प्रियालद्रौ राशिभेदे शरासने' इति नान्तेषु मेदिनी ॥*॥ उसिः (२।११७) वा । '**धनुः** पियाले ना, न स्त्री राशिभेदे शरासने' इति सान्तेषु च मेदिनी ॥*॥ पटति । 'पट गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) । '**पटः** प्रियालवृक्षे ना सुचेले पुंनपुंसकम्' इति रभसः ॥*॥ 'धनुष इव पटो विस्तारोऽस्य, समस्तं नाम' इति स्वामी ॥ (४) ॥*॥ चत्वारि '**प्रियालस्य**' '**चार**' इति ख्यातस्य ॥

गंभारी सर्वतोभद्रा काश्मरी मधुपर्णिका ॥ ३५ ॥
श्रीपर्णी भद्रपर्णी च काश्मर्यश्चापि

गमिति ॥ कं जलं बिभर्ति । 'डुभृञ् धारणपोषणयोः' (जु० उ० अ०) । 'कर्मण्यण्' (३।२।१) । पृषोदरादित्वात् गत्वम् ॥*॥ '**कंभारी**' इत्यपि ॥ (१) ॥*॥ सर्वतो भद्रं यस्याः । '**सर्वतोभद्र** इत्युक्तः काव्यचित्रे गृहान्तरे । निम्बे ना **सर्वतोभद्रा** गंभारी नटयोषितोः' इति मेदिनी ॥ (२) ॥*॥ काशते । 'काशृ दीप्तौ' (भ्वा० आ० से०) । 'अन्येभ्योऽपि' (३।२।७५) इति मनिन् । 'वनो र च' (४।१।७) इति ङीब्रौ ॥ (३) ॥*॥ मध्विव पर्णान्यस्याः । 'पापकर्ण–' (४।१।६४) इति ङीष् । स्वार्थे कन् (५।३।७५) ॥ (४) ॥*॥ श्रीयुक्तानि पर्णान्यस्याः । '**श्रीपर्ण**स्त्वग्निमन्थेऽब्जे **श्रीपर्णी** शाल्मलौ हठे' इति हैमः । **श्रीपर्णी** काश्मरीकुम्भ्योः क्लीबे पद्माग्निमन्थयोः' ॥ (५) ॥*॥ भद्राणि पर्णान्यस्याः ॥ (६) ॥*॥ काश्मरीशब्दोऽस्त्यस्य । 'अन्येभ्योऽपि दृश्यते' (वा० ५।२।१२०) इति यप् ॥ (७) ॥*॥ सप्त '**काश्मर्याः**' '**खंभारी**' इति ख्यातस्य ॥

अथ द्वयोः ।

कर्कंधूर्बदरी कोली

अथेति ॥ कर्कं कण्टकं दधाति । 'डुधाञ्' (जु० उ० अ०) । 'अन्दूदृन्भू–' (उ० १।९३) इति निपातितः कूप्रत्ययान्तः ॥—शकन्ध्वादित्वात् (वा० ६।१।९४) पररूपम्—

१—कर्मण्यणि स्वार्थे कन् इति मुकुटोक्तं तु युक्तम्। 'वानीरे बहुवारे' इत्यादि रुद्रादिकोषलिखित 'बहुवारे' इति प्रयोगात् ॥

१—'प्रियालपनसाराणि यौवनानीव वनानि' इति दमयन्तीश्लेषात् ॥ २—सन्नः, कद्रुश्च, इति नामनी इति सोमनन्दी—इति मुकुटः ॥

इति स्वामी चिन्त्यः ॥ (१) ॥*॥ बदति । 'बद स्थैर्ये' (भ्वा० प० से०) । 'दिवि भ्रमि–' (उ० ३।११७) इत्यरः । गौरादिङीष् (४।१।४१) । यत्तु—'द्वयोः' इत्युक्तेः कर्कन्धूर्बदरश्च—इति मुकुटः । तन्न । **'बदरी** कोले, क्लीबं तु तत्फले' इति मेदिनीविरोधात् ॥ (२) ॥*॥ कोलति घनीभवति । 'कुल संस्त्याने' (भ्वा० प० से०) । अच् (३।१।१३४) । गौरादिङीष् (४।१।४१) । मुकुटस्तु—इन् (उ० ४।११८) प्रत्यये वा ङीष् (ग० ४।१।४५)—इत्याह । तन्न । कोल्याः फले अण् (४।३।१३४) लुकोः (४।३।१६४) ङीषो लुकि (१।२।४९) च 'कोलि' इति रूपापत्तेः । ('कोलम्' इति रूपानुपपत्तेः) ॥*॥ इनि (उ० ४।११८) (**कोलिः**) ह्रस्वान्तोऽपि ॥ (३) ॥*॥ कौ वलति । 'वल प्राणने' (भ्वा० प० से०) । अच् (३।१।१३४) । **कुवली**शब्दोऽप्यत्र ॥*॥ त्रीणि **'बदर्याः'** ॥

कोलं कुवलफेनिले ॥ ३६ ॥

सौवीरं बदरं घोण्टापि

कोलमिति ॥ कोलीकुवलीबदरीणां फलेऽण् (४।३।१३४) लुकौ (४।३।१६४) । 'लुक् तद्धितलुकि' (१।२।४९) इति ङीषो लुक् । **'कोलं** कोलिफले क्लीबं पिप्पलीचव्ययोः स्त्रियाम्' ॥ (१) ॥*॥ (**'कुवलं** चोत्पले मुक्ताफलेऽपि बदरीफले') ॥ (२) ॥*॥ फेनोऽस्यास्ति । 'फेनादिलच्च' (५।२।९९) ॥ (३) ॥*॥ सुविरदेशे भवम् । 'तत्र भवः' (४।३।५३) इत्यण् । 'स्रोतोऽञ्जने तु **सौवीरं** बदरे काञ्जिकेऽपि च' इति दन्त्यादौ रभसः ॥ (४) ॥*॥ (५) ॥*॥ घोणते । 'घुण भ्रमणे' (भ्वा० आ० से०) बाहुलकाट्टः । **'घोण्टा** तु बदरीपूगवृक्षयोरपि योषिति' (इति मेदिनी) । 'बदरीसदृशाकारो वृक्षः सूक्ष्मफलो भवेत् । अटव्यामेव सा घोण्टा गोपघोण्टेति चोच्यते' ॥ (६) ॥*॥ षट् **'कर्कंधूफलस्य'** । स्वामी तु—आद्यास्त्रयो वृक्षार्थाः । अन्ये फलार्थाः । घोण्टा तूभयार्था—इत्याह । स्वामी तु घोण्टाकोले व्यत्यासेन पठति ॥

अथ स्यात्स्वादुकण्टकः ।

विकङ्कतः स्रुवावृक्षो ग्रन्थिलो व्याघ्रपादपि ॥ ३७ ॥

अथेति ॥ कण्टकोऽस्यास्ति । अर्श आद्यच् (५।२।१२७) स्वादुश्चासौ कण्टकश्च ॥ (१) ॥*॥ विकङ्कते । 'ककिर्गत्यर्थः' (भ्वा० आ० से०) । अतच् प्रत्ययः ॥ (२) ॥*॥ स्रुवाया वृक्षः । **'स्रुवा** द्वयोर्होमपात्रे सल्लकीमूर्वयोः स्त्रियाम्' ॥ (३) ॥*॥ **ग्रन्थिरस्यास्ति** सिध्मादिलाल्लच् (५।२।९७) ॥ (४) ॥*॥ व्याघ्रस्य पादा इव पादा मूलान्यस्य । 'पादस्य लोपः–' (५।४।१३८) इत्यकारलोपः ॥ (५) ॥*॥ पञ्च **'विकङ्कतस्य' 'कठेर'** इति ख्यातस्य ॥

ऐरावतो नागरङ्गः

ऐरेति ॥ इरावत्या विद्युत इवायम् । 'तस्येदम्' (४।३।१२०) इत्यण् । **'ऐरावतोऽभ्रमातङ्गे** नारङ्गे लकुटद्रुमे । नागभेदे च पुंसि स्याद्विद्युत्तद्वेदयोः स्त्रियाम् । नपुंसके महेन्द्रस्य ऋजुदीर्घशरासने' ॥ (१) ॥*॥ नागा रज्यन्त्यत्र । 'रञ्ज रागे' (भ्वा० उ० अ०) । 'हलश्च' (३।३।१२१) इति घञ् । नागस्य सिन्दूरस्येव रङ्गोऽस्य, इति वा ॥*॥ 'नागरङ्गे तु **नारङ्गो नार्यङ्गस्तत्करवासनः**' इति वाचस्पतिः । **'नारङ्गः** पिप्पलीरसे । यमजप्राणिनि विटे नागरङ्गद्रुमेऽपि च' ॥ (२) ॥*॥ द्वे **'नारङ्गी'** इति ख्यातस्य ॥

नादेयी भूमिजम्बुका ।

नेति ॥ नद्यां भवा । 'नद्यादिभ्यो ढक्' (४।२।९७) । **'नादेयी** नागरङ्गे स्याज्जयायां जलवेतसे । भूमिजम्ब्वां जपायां च काङ्क्षुष्ठे च समीक्ष्यते' इति विश्वः ॥ (१) ॥*॥ भूमेर्जम्बूः ह्रस्वात्स्वार्थे कन् (५।३।८६) ॥ (२) ॥*॥ द्वे **'नारङ्गस्य'**, चत्वारि **'नारङ्गस्य'** इत्यन्ये ॥

तिन्दुकः स्फूर्जकः कालस्कन्धश्च शितिसारके ३८

तीति ॥ तिम्यति । 'तिम आर्द्रत्वे' (दि० प० से०) । मृगय्वादिः (उ० १।३७) 'संज्ञायां कन्' (५।३।७५) ॥ (१) ॥*॥ स्फूर्जति । 'टुओ स्फूर्जा वज्रनिर्घोषे' (भ्वा० प० से०) । ण्वुल् (३।१।१३३) ॥ (२) ॥*॥ कालः स्कन्धो यस्य । **'कालस्कन्धस्तमाले** स्यात्तिन्दुके जीवकद्रुमे' इति विश्वः ॥ (३) ॥*॥ शितिः कालः सारो मज्जा यस्य ॥ (४) ॥*॥ चत्वारि **'तिन्दुकस्य' 'तेदुँ'** इति ख्यातस्य ॥

काकेन्दुः कुलकः काकपीलुकः काकतिन्दुके ।

केति ॥ काकानां काकवर्णो वा तिन्दुः ॥ (४) ॥*॥ पृषोदरादिः (६।३।१०९) ॥ (१) ॥*॥ कुलस्य गृहस्य प्रतिकृतिरिव । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् । **'कुलकं** तु पटोले स्यात्संबद्धश्लोकसंहतौ । पुंसि वल्मीककाकेन्दुकुलश्रेष्ठेषु कथ्यते' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ काकैः पील्यते । 'पील प्रतिष्टम्भे' (भ्वा० प० से०) । बाहुलकादुः । 'काकानां पीलुरिव' इति वा ॥ (३) ॥*॥ चत्वारि **'कटुतिन्दुकस्य', 'कुचिला'** इति ख्यातस्य इत्यन्ये ॥

१—नृणाति । बाहुलकादङ्गच् । गकारान्तोऽयम् । 'भवद्वैरिवधूवदने वने च नारङ्गतरूपशोभे भान्ति गण्डशैलस्यलालंकारधारिण्यो लोध्रलताः' इति दमयन्तीशेषात् ॥ २—उक्तं च समन्वयप्रदीपे—'यत्र वाक्यार्थविश्रान्तिः श्लोकेनैकेन जायते । तन्मुक्तकं युगं द्वाभ्यां त्रिभिः स्यात्तिलकं पुनः । चतुर्भिः स्याच्चकलकं पञ्चभिः कुलकं ततः । महाकुलकमित्यार्याः कथयन्ति ततः परम् ॥' इति । तिलकपर्यायान्तरं वैशेषिकम् ॥

गोलीढो झाटलो घण्टापाटलिर्मोक्षमुष्ककौ ॥ ३९ ॥

गोलीति ॥ गोभिर्लिह्यते स्म । 'लिह आस्वादने' (अ० उ० अ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ झाटं संघातं लाति 'आतोऽनुप–' (३।२।३) इति कः ॥ (२) ॥*॥ अहानि । घण्टा । बाहुलकाद्धन्तेष्टो घत्वं च । 'पट गतौ' (भ्वा० प० से०) । घञ् (३।३।१८) । पाटं लाति । बाहुलकाड्डिः । घण्टा चासौ पाटलिश्च ॥*॥ स्वामी तु (घण्टा, पाटलिः) इति नामद्वयमाह ॥ (३) ॥*॥ मोक्षयति रोगम् । मुचेः (तु० प० अ०) सन्नन्तादकर्मकाण्णिजन्तादच् (३।१।१३४) **'मोक्षस्तु** मुक्तिपाटलिमोचने' । यत्तु—'मोक्ष अवसाने' चुरादिः—इति मुकुटः । तन्निर्मूलम् ॥ (४) ॥*॥ मुष्णाति रोगम् । 'मुष स्तेये' (क्या० प० से०) । 'सृवृभूशुषिमुषिभ्यः कक्' (उ० ३।४१) । स्वार्थे कन् (५।३।७५) । यत्तु—'मुष्णाति' इति विगृह्य 'मुष खण्डने' इत्युपन्यस्तम् । तदयुक्तम् । तस्य (दि० प० से०) दन्त्यान्तत्वात् । त्रयादिषु पाठाभावाच्च । 'मुष्को मोक्षकवृक्षे स्यात्संघाते वृषणेऽपि च' ॥ (५) ॥*॥ पञ्च **'लोध्रविशेषस्य'** ॥

तिलकः क्षुरकः श्रीमान्

तिलेति ॥ तिलति । 'तिल स्नेहने' (तु० प० से०) । 'कुन् शिल्पिसंज्ञयोः' (उ० २।३२) तिल इव, इति वा । कन् (५।३।९६) । **'तिलको** द्रुमभेदेऽश्वभेदे च तिलकालके । क्लीबं सौवर्चलक्लोम्नोर्न स्त्रियां तु विशेषके' ॥ (१) ॥*॥ क्षुरति । 'क्षुर विलेखने' (तु० प० से०) । कुन् (उ० २।३२) । **'क्षुरकः** कोकिलाक्षे स्याद्गोक्षुरे तिलकद्रुमे' ॥ (२) ॥*॥ श्रीरस्त्यस्य । मतुप् (५।२।९४) । **'श्रीमां**स्तिलकवृक्षे नामनोज्ञे धनिके त्रिषु' ॥ (३) ॥*॥ त्रीणि **'तिलकस्य'** ॥

समौ पिचुलझावुकौ ।

सेति ॥ 'पिचुः स्यात्तूलकर्षयोः' इति धरणिः । पिचुं तूलं लाति । **'पिचुलो** झावुकेऽपि स्यान्निचुले जलवायसे' ॥ (१) ॥*॥ 'झा' इति शब्दं वेति गच्छति । 'वी गत्यादिषु' (अ० प० अ०) मितद्वादित्वात् (वा० ३।२।१८०) डुः । ततः 'संज्ञायां कन्' (५।३।७५) ॥ (२) ॥*॥ द्वे **'झावुकस्य' 'झातु'** इति ख्यातस्य ॥

श्रीपर्णिका कुमुदिका कुम्भी कैटर्यकट्फलौ ॥ ४० ॥

श्रीति ॥ श्रीः पर्णेषु यस्याः । 'पाककर्णपर्ण–' (४।१।६४) इति ङीप् । स्वार्थे कन् (५।३।७५) । **'श्रीपर्णी** काश्मरीकुम्भ्योः क्लीबे पद्माग्निमन्थयोः' ॥ (१) ॥*॥ कौ मोदते । 'मुदी हर्षे' (भ्वा० अ० से०) 'इगुपध–' (३।१।१३५) इति कः । स्वार्थे कन् (५।३।७५) । **'कुमुदं** कैरवे रक्तपद्मे स्त्री कुम्भिकौषधौ । गंभार्यां पुंसि दिङ्नागे नागशाखामृगान्तरे' ॥ (२) ॥*॥ कुम्भीव कुम्भी रसाधारत्वात् । 'पृश्निकायां च **कुम्भी** स्यात्पाटलौ कट्फलेऽपि च' इति रन्तिदेवः ॥ (३) ॥*॥ केटनम् । 'किट त्रासे' (भ्वा० प० से०) घञ् (३।३।१८) । केटं राति अतितिक्तत्वात् चतुर्वर्णादित्वात् (वा० ५।१।१२४) ष्यञ् ॥ (४) ॥*॥ कटति । 'कटे वर्षावरणयोः' (भ्वा० प० से०) क्विप् (३।२।१७८) कट् फलमस्य ॥ (५) ॥*॥ पञ्च **'कुम्भ्याः', 'कायफल'** इति ख्यातस्य ॥

क्रमुकः पट्टिकाख्यः स्यात्पट्टी लाक्षाप्रसादनः ।

क्रेति ॥ क्रामति । 'क्रमु पादविक्षेपे' (भ्वा० प० से०) । बाहुलकादुः । **'क्रमुकः** पट्टिकालोध्रे गुवाके भद्रमुस्तके' । यत्तु—'शिल्पिसंज्ञयोः–' (उ० २।३२) इति कुनि वा–इत्याह मुकुटः । तन्न । 'क्रमक' इति रूपापत्तेः ॥ (१) ॥*॥ पट्टिका आख्या यस्य ॥ (२) ॥*॥ पट्टोऽस्यास्ति । 'अत इनि–' (५।२।११५) । **'पट्टः** पेषणपाषाणे व्रणादीनां च बन्धने । चतुष्पथे च राजादिशासनान्तरपीठयोः' ॥*॥ यद्वा पट्टिशब्दात् क्तिजन्तान्ङीष् (ग० ४।१।४५) । (**'पट्टिः** स्त्री पट्टभेदे स्याल्लाटे क्रमुकद्रुमे' । **'पट्टी** ललाटभूषायां **पट्टी** लाक्षाप्रसादने' इति टवर्गान्ते विश्वः) ॥ (३) ॥*॥ लाक्षा प्रसीदत्यनेन । युच् (उ० २।७८) करणे । लाक्षां प्रसादयति वा । 'कृत्यल्युटः' (३।३।११३) इति ल्युट् ॥ (४) ॥*॥ चत्वारि **'लोहितलोध्रभेदस्य'** ॥

नूदस्तु यूपः क्रमुको ब्रह्मण्यो ब्रह्मदारु च ॥ ४१ ॥
तूलं च

नूद इति ॥ नुदति पापम् । 'णुद प्रेरणे' (तु० उ० अ०) 'इगुपध–' (३।१।१३५) इति कः । पृषोदरादिः (६।३।१०९) ।—'अन्येषामपि' (६।३।१३७) इति दीर्घः–इति मुकुटः । तन्न । तत्र 'उत्तरपदे' इत्यधिकारात् ।—'घञर्थे कः'—इत्यपि न । यद्वा नुवदति । 'वद व्यक्तायां वाचि' (भ्वा० प० से०) । मूलविभुजादिः (वा० ३।२।५) । कर्मणः कर्तृत्वम् । यद्वा नूयते । 'णू स्तुतौ' (तु० प० से०) कुटादिः । बाहुलकाद्दः ॥*॥ **'तूदः'** इति स्वामी । तत्र 'तुद व्यथने' (तु० उ० अ०) । 'इगुपध–' (३।१।१३५) । इति कः । पृषोदरादिः (६।३।१०९) ॥ (१) ॥*॥ युवन्त्यनेन । 'यु मिश्रणाभिश्रणयोः' (अ० प० से०) । 'कृयुभ्यां च' (उ० ३।२७) इति पो दीर्घश्च । मुकुटस्तु—'पूष वृद्धौ' (भ्व० प० से०) । इगुपधत्वात् (३।१।१३५) कः । पवते वा । 'यूष्वोर्लोपश्च' इति पवतेरूषन् धात्वन्तलोपः—इति वदन् **'पूषः'** इति पाठं मन्यते । किंतु 'यूष्वोर्लोपश्च' इति सूत्रमुज्ज्वलदत्तादौ न दृश्यते ॥ (२) ॥*॥ क्रामति । 'क्रमु पादविक्षेपे' (भ्वा० प० से०) । बाहुलकादुकन् । **'क्रमुको** भद्रमुस्तके । गुवाके पट्टिकालोध्रे' इति हैमः ॥ (३) ॥*॥ 'ब्रह्मणि वैदिके साधुः' 'तत्र साधुः' । (४।४।९८) इति यत् । 'ये चाभावकर्मणोः' ।

१—'कुम्भिकाद्रुमे' इति पाठः ।

(६।४।१६८) इत्यन् प्रकृत्या । (**'ब्रह्मण्यो** ब्रह्मसाधौ स्याद्ब्रह्मदा(से) शनैश्चरे') ॥ (४) ॥*॥ ब्रह्मणो ब्रह्मणि वा दारु ॥ (५) ॥*॥ तूलयति, तूल्यते वा । 'तूल निष्कर्षे' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । घञ् (३।३।१९) वा । 'पुंलिङ्गस्तु पिचौ **तूलः** क्लीबं स्याद्ब्रह्मदारुणि' इति रुद्रः ॥ (६) ॥*॥ षट् **'अश्वत्थाकारस्य' 'पार्श्वपिप्पल'** इति ख्यातस्य । **'तूँत'** इति ख्यातस्य इत्यन्ये ॥

नीपप्रियककदम्बास्तु हलिप्रिये ।

नीपेति ॥ नयति, नीयते वा 'णीञ् प्रापणे' (भ्वा० उ० अ०) 'पानीविषिभ्यः पः' (उ० ३।२३) बाहुलकादुणाभावः । **'नीपः** कदम्बबन्धूकनीलाशोकद्रुमेषु च' ॥ (१) ॥*॥ प्रीणाति । 'प्रीञ् तर्पणे' (क्रया० उ० अ०) । 'कुन् शिल्पिसंज्ञयोः' (उ० २।३२) । **'प्रियकः** पीतसारके । नीपे चित्रमृगे चालौ प्रियंगौ कुङ्कुमेऽपि च' ॥ (२) ॥*॥ कदति । 'कद' सौत्रो हिंसार्थः । 'कृकदिकडिकटिभ्योऽम्बच्' (उ० ४।८२) ।—'कदेर्णिद्वा' इत्यम्बच्—इति मुकुटः । तन्न । तादृशसूत्राभावात् । **'कदम्बं** निकुरम्बे स्यान्नीपसर्षपयोः पुमान्' ॥ (३) ॥*॥ हलिनः प्रियः । सुरायां अधिवासनात् ॥ (४) ॥*॥ चत्वारि **'कदम्ब'** इति ख्यातस्य ॥

वीरवृक्षोऽरुष्करोऽग्निमुखी भल्लातकी त्रिषु ॥ ४२ ॥

वीरेति ॥ वीर इव वृक्षो दुःस्पर्शत्वात् । **'वीरवृक्षस्तु** भल्लातकार्जुनद्रुमयोः पुमान्' ॥ (१) ॥*॥ अरुर्व्रणं करोति 'दिवाविभा–' (३।२।२१) इति टः । 'नित्यं समासेऽनुत्तरपदस्थस्य' (८।३।४५) इति षः । **'अरुष्करो** व्रणकृति त्रिषु, भल्लातके पुमान्' ॥ (२) ॥*॥ अग्निरिव मुखमस्याः, गौरादिः (४।१।४१) । **'भवेदग्निमुखो** देवे विप्रे भल्लातके स्त्रियाम्' ॥ (३) ॥*॥ भल्ल इवातति । 'अत सातत्यगमने' (भ्वा० प० से०) । कुन् (उ० २।३२) । 'जातेः' (४।१।५३) इति ङीष् ॥ (४) ॥*॥ चत्वारि **'भल्लातक्याः' 'भेलावा'** इति ख्यातस्य ॥

गर्दभाण्डे कंदरालकपीतनसुपार्श्वकाः ।
प्लक्षश्च

गर्देति ॥ **'गर्दभो** गन्धभिद्यपि' । गर्दभममिति । 'अम गत्यादिषु' (भ्वा० प० से०) । 'अमन्ताङ्डः' (उ० १। ११४) ॥ (१) ॥*॥ कंदरां लाति । 'आतुः–' (३।२।३) इति कः । **'कंदरालः** पुमान् गर्दभाण्डे प्लक्षतरावपि' ॥ (२) ॥*॥ या लक्ष्म्यास्तन इतनः । कपीनां कपेर्वर्णस्य वा इतनः । **'कपीतनो** गर्दभाण्डशिरीषाम्रातकेषु च । अश्वत्थे च' इति विश्वः ॥ (३) ॥*॥ शोभनं पार्श्वमस्य ॥ (४) ॥*॥ प्रक्षरति । 'क्षर संचलने' (भ्वा० प० से०) । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः । 'कपिलिकादिलात्' (वा० ८।२।१८) लत्वम् । **'प्लक्षो** द्वीपे गर्दभाण्डेऽश्वत्थे जटिनि पक्षके' इति हैमः ॥ (५) ॥*॥ पञ्च **'प्लक्षस्य' 'गेढी'** इति ख्यातस्य ॥

तिन्तिडी चिञ्चाम्लिका

तिन्तीति ॥ तिम्यति । 'तिम आर्द्रीभावे' (दि० प० से०) 'अलीकादयश्च' (उ० ४।२५) इति निपातः । 'तिन्तिडी त्वम्लिका चिञ्चा तिन्तिडीका कपिप्रिया' इति वाचस्पतिः । (**'तिन्तिडी** चुक्रे चिञ्चायाम्' ॥ (१) ॥*॥ 'चिम्' इत्यव्यक्तं शब्दं चिनोति । 'चिञ् चयने' (स्वा० उ० अ०) । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः ॥ (२) ॥*॥ अम्लो रसोऽस्यास्ति । 'अतः' (५।२।११५) इति ठन् । 'अम्लीका चाम्लिका चिञ्चा तिन्तिडीका च तिन्तिला' इति चन्द्रः । (**'अम्लिका** तिन्तिडीकाम्लोद्वारचाङ्गेरिकासु च') ॥ (३) ॥*॥ त्रीणि **'चिञ्चायाः'** ॥

अथो पीतसालके ॥ ४३ ॥

सर्जकासनबन्धूकपुष्पप्रियकजीवकाः ।

अथेति ॥ पीतः सारोऽस्य रलयोरैक्यम् ॥ (१) ॥*॥ सृजति 'सृज विसर्गे' (तु० प० अ०) ण्वुल् (३।१।१३३) । यद्वा सर्ज्यते । 'षर्ज अर्जने' (भ्वा० प० से०) । क्रुन् (उ० २।३२) ॥ (२) ॥*॥ अस्यति रुजम् । 'असु क्षेपणे' (दि० प० से०) । ल्युः (३।१।१३३) । 'प्रियको जीवकोऽसनः' इति रत्नकोशः । **'असनं** क्षेपणे क्लीबं पुंसि स्याज्जीवकद्रुमे' । प्रज्ञाद्यण् (५।४।३८) । 'पीठेभस्कन्धयोः क्लीब**मासनं** ना तु जीवके' इति रुद्रभसौ ॥ (३) ॥*॥ बन्धूकस्येव पुष्पाण्यस्य ॥ (४) ॥*॥ प्रीणाति । 'प्रीञ् तर्पणे' (क्रया० उ० अ०) । कुन् (उ० २।३२) । **'प्रियकः** पीतसारके । नीपे चित्रमृगे चालौ प्रियंगौ कुङ्कुमेऽपि च' ॥ (५) ॥*॥ जीवयति । 'जीव प्राणधारणे' (भ्वा० प० से०) । ण्वुल् (३।१।१३३) । **'जीवकः** प्राणके पीतसारकृपणयोरपि । कूर्चशीर्षे च पुंसि स्यात्' ॥ (६) ॥*॥ षट् **'जीवकस्य' 'विजयसार'** इति ख्यातस्य ॥

साले तु सर्जकार्ष्याश्वकर्णकाः सस्यसंवरः ॥ ४४ ॥

सेति ॥ सल्यते । 'षल गतौ' (भ्वा० प० से०) कर्मणि घञ् (३।३।१९) । सारो दार्ढ्यमतिशयितमस्य । अर्शआद्यच् (५।२।१२७) वा । 'पुंसि भूरुहमात्रेऽपि **सालो**[१] वरणसर्जयोः' इति दन्त्यादौ रभसः ॥ (१) ॥*॥ सर्ज्यते । 'षर्ज अर्जने' (भ्वा० प० से०) । ण्यन्तादच् (३।३।५६) ॥ (२) ॥*॥ कृषति । 'कृष विलेखने' (तु० उ० अ०) । 'इगुपध–'

१—ह्रस्वादि दन्त्यमध्यम् । 'निरसनैरसनैः' इति माधवमकात् ॥ ह्रस्वादितालव्यमध्यमपि । 'विकसितकंदलदर्शनैर्यो वमति दरी मुखैश्च कं दलदशनैः' इति वृन्दावनयमकात्—इति मुकुटः ॥ २—सालो दन्त्यादिः—'सालकाननशोभिनी' इति दण्डिश्लेषात् ॥ 'सालसदृशं भुजवनं भवानी च' इति दमयन्तीश्लेषाच्च ॥

(३।१।१३५) इति कः । चातुर्वर्ण्यादित्वात् (वा० ५।१ १२४) ष्यञ् ॥ (३) ॥*॥ अश्वकर्ण इव पत्रमस्य ॥ (४) ॥*॥ सस्यैः संत्रियते । 'वृञ् वरणे' (स्वा० उ० से०) । 'ग्रहवृद–' (३।३।५८) इत्यप् ॥ (५) ॥*॥ पञ्च **'सालस्य' 'शालवृक्षस्य'** ॥

नदीसर्जो वीरतरुरिन्द्रद्रुः ककुभोऽर्जुनः ।

नेति ॥ नद्याः सर्जः ॥ (१) ॥*॥ वीरश्चासौ तरुश्च । दृढकाष्ठत्वात् ॥ (२) ॥*॥ इन्द्रस्य, इन्द्र इव वा द्रुः ॥ (३) **'ककुप्'** स्त्रियां प्रवेणीदिक्शोभासु चम्पकखजि' । ककुभो दिशः सन्त्यस्य । बहुविस्तारत्वात् । अर्शआद्यच् (५।२। १२७) । 'ककुभो रागभेदेऽपि वीणाङ्केऽर्जुनपादपे' ॥ (४) ॥*॥ अर्ज्यते । 'अर्ज अर्जने' (भ्वा० प० से०) । 'अर्जेर्णिलुक् च' (उ० ३।५८) इत्युनन् ॥*॥ **'पार्थ'**स्तु ककुभे जिष्णौ' इति विश्वात् पार्थोऽपि ॥ (५) ॥*॥ पञ्च **'अर्जुनवृक्षस्य' 'कौपीतक'** इति ख्यातस्य ॥

राजादनः फलाध्यक्षः क्षीरिकायाम्

राजेति ॥ राजभिरद्यते । 'अद भक्षणे' (अ० प० अ०) कर्मणि ल्युट् (३।३।११४) । **'राजादनं** क्षीरिकायां पियाले किंशुकेऽपि च' । **'राजादनः** पियालद्रौ क्षीरिकायां त्रिपत्रके' इति हैमात् पुंलिङ्गोऽपि ॥ (१) ॥*॥ फलानामध्यक्षः ॥ (२) ॥*॥ क्षीरमस्त्यस्याः । 'अतः' (५।२।११५) इति थन् ॥ (३) ॥*॥ त्रीणि **'क्षीरिकायाः' 'खिरणी'** इति ख्यातस्य ॥

अथ द्वयोः ॥ ४५ ॥

इङ्गुदी तापसतरुः

अथेति ॥ इङ्गनम् । 'इगि गतौ' (भ्वा० प० से०) । घञ् (३।३।१८) । इङ्गं द्यति 'दो अवखण्डने' (दी०प०अ०)। 'आतोऽनुप–' (३।२।३) इति कः । पृषोदरादिः (६।३ १०९) । 'जातेः' (४।१।५३) इति ङीष् ॥ (१) ॥*॥ तपस्विन उपयुक्ततरुः ॥ (२) ॥*॥ द्वे **'इङ्गुद्याः' 'इङ्गुआ'** इति ख्यातस्य **'जियापूता'** इति ख्यातस्य–इति मुकुटः ॥

भूर्जे चर्ममृदुत्वचौ ।

भ्विति ॥ ऊर्जनमूर्जः । 'ऊर्ज बलप्राणनयोः' (चु० प० से०) घञ् (३।३।११८) । भूरूर्जोऽस्य ॥ (१) ॥*॥ प्रशस्तं चर्मास्यास्ति । व्रीह्यादित्वात् (५।२।११६) इनिः । **'चर्मी** फलकपाणौ स्याद्भूर्जे भृङ्गिरिटावपि' ॥ (२) ॥*॥ मृदुस्त्वगस्य ॥ (३) ॥*॥ त्रीणि **'भोजपत्रवृक्षस्य'** ॥

पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः ४६

पीति ॥ पिच्छा शाल्मलिनिर्यासोऽस्या अस्ति । पिच्छादित्वात् (५।२।१००) इलच् ॥ (१) ॥*॥ पूरयति । 'पूरी आप्यायने' (चु० उ० से०) । ल्युट् (३।३।११४) । 'टिड्ढा–' (४।१।१५) इति ङीप् । यत्तु मुकुटः—'र्वोः–' (८।२।७६) इत्यादिना दीर्घः—इत्याह । तन्न । हल्पदान्तयोरभावात् । धातोर्दीर्घोपधत्वाच्च । **'पूरणः** पूरके त्रिषु । क्लीबं पिष्टप्रभेदे च **पूरणी** शाल्मलिद्रुमे । (पटारम्भकसूत्रेषु)' ॥ (२) ॥*॥ मुञ्चति रसम् । 'मुच्लृ मोक्षणे' (तु० उ० अ०) । पचाद्यच् (३।१।१३४) । **'मोचः** शोभाञ्जने पुंसि **मोचा** शाल्मलिरम्भयोः' ॥ (३) ॥*॥ स्थिरमायुर्यस्याः । 'षष्टिं वर्षसहस्राणि वने जीवति शाल्मलिः' इति वचनात् ॥ (४) ॥*॥ शालयति । 'शल संचलने' (भ्वा० आ० से०) णिजन्तः । क्विप् (३।२।१७८) । मलते । 'मल धारणे' (भ्वा० आ० से०) । 'सर्वधातुभ्य इन्' (उ० ४।११८) । शाल् चासौ मलिश्च ॥ (५) ॥*॥ पञ्च **'शाल्मल्याः' 'सेंबर'** इति ख्यातस्य ॥

पिच्छा तु शाल्मलीवेष्टे

पीति ॥ पतितुमिच्छति । 'पत्लृ गतौ' (भ्वा० प० से०) सन्नन्तः । पचाद्यच् (३।१।१३४) । पृषोदरादिः (६।३। १०९) । यद्वा पिच्छ(य)ति, पिच्छयते, वा । 'पिच्छ बाधे' (चु० प० से०) । अच् (३।१।१३४) । घञ् (३।३।१९) वा ॥ (१) ॥*॥ शाल्मल्या वेष्टः । **'क्वाथः कषायो निर्यूषो निर्यासो वेष्टकस्तथा'** इति रभसः ॥ (२) ॥*॥ द्वे **'शाल्मलिक्वाथस्य' 'सेंवरीगोंद'** इति ख्यातस्य ॥

रोचनः कूटशाल्मलिः ।

रोचेति ॥ रोचते । 'रुच दीप्तौ' (भ्वा० आ० से०) । 'अनुदात्तेतश्च–' (३।२।१४९) इति युच् । **'रोचना** रक्तकह्लारे गोपित्तवरयोषितोः । **रोचनः** कूटशाल्मल्यां पुंसि स्याद्रोचके त्रिषु' ॥ (१) ॥*॥ कूटश्चासौ शाल्मलिश्च ॥ (२) ॥*॥ द्वे **'कृष्णशाल्मलेः'** । कुत्सितशाल्मलेः इत्येके ॥

चिरविल्वो नक्तमालः करजश्च करञ्जके ॥ ४७ ॥

चिरेति ॥ चिरं विलति । 'विल भेदने' (तु० प० से०) बाहुलकाद्वः ॥*॥ **'चिरिबिल्वः'** इत्यन्ये ॥ (१) ॥*॥ नक्तं मालो धारणमस्य । नक्तमा अलति वा । 'अल भूषणादौ' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) ॥*॥ **'रक्तमालः'** इति स्वामी ॥ (२) ॥*॥ करेण जन्यते । 'अन्यत्रापि' (३।२।१०१) इति डः । कं सुखं जलं वा रजयति । 'कर्मण्यण्' । (३।२।१)-'त्यजरज–' (३।२।१४२) इति निर्देशादङ्क्त्यपि नलोपः । संज्ञापूर्वकत्वान्न वृद्धिः । —णिलोपस्य स्थानिवत्त्वान्नोपधावृद्धिः—इति मुकुटः । तन्न । एवमपि णिनिमित्तवृद्धेर्दुर्वारत्वात् । **'करजं** स्याद्व्याघ्रनखे करजनखयोः पुमान्' ॥ (३) ॥*॥ कं रजयति । 'कर्मण्यण्' (३।२।१) । ('ज्ञापकसिद्धं न सर्वत्र' इत्युक्तेर्नलोपाभावः) । स्वार्थे कन् (५।३।७५) ॥ (४)॥*॥ चत्वारि **'करञ्जवृक्षस्य'** ॥

प्रकीर्यः पूतिकरजः पूतीकः कलिमारकः ।

प्रकीर्यति ॥ प्रकीर्यते । 'कॄ विक्षेपे' (तु० प० से०) । अङ्यादित्वात् (उ० ४।११२) यक् ।—ण्यति पूर्वविप्रतिषेधाद्दीर्घरपरत्वे च–इति मुकुटः । तन्न । पूर्वविप्रतिषेधस्य निर्मूलत्वात् । 'इत्वोत्वाभ्यां गुणवृद्धी विप्रतिषेधेन' (वा० ७।१।१००) इति वचनाच्च । **'प्रकीर्यः** पूतिकरजे विप्रकीर्णे तु वाच्यवत्' ॥ (१) ॥*॥ पूतिश्चासौ करजश्च ॥ (२) ॥*॥ पुनाति । 'पूञ् पवने' (क्र्या० उ० से०) । 'तिन्तिंडीकादयश्च' (उ० ४।२०) इतीकन् तुक्च ॥*॥ ('पूतिकः' इति पाठे पूतिं कायति । 'पूतीकः **पूतिकः**' इति माधवः) ॥ (३) ॥*॥ कलिं मारयति । यदाहेन्दुः—**'पूतीकरञ्जः सुमना**स्तथा कलहनाशनः । मुकुटस्तु—कलिं करोति । 'कर्मण्यण्' (३।२।१) स्वार्थे कन् (५।३।७५) । **कलिकारकः**—इत्याह ॥ (४) ॥*॥ चत्वारि **'कण्टकवत्करञ्जस्य'** ॥

करञ्जभेदाः षड्ग्रन्थो मर्कट्यङ्गारवल्लरी ॥ ४८ ॥

केति ॥ षड् ग्रन्थयो यस्य । 'अच्' 'प्रत्यन्ववपूर्वात्–' (५।४।७५) इत्यत्र 'अच्' इति योगविभागादच् । षड् ग्रन्था यस्य वा । **'षड्ग्रन्था** तु वचायां स्त्री स्यात्करञ्जान्तरे पुमान्' ॥ (१) ॥*॥ मर्कति 'मर्क' सौत्रो धातुः । 'शकादिभ्योऽटन्' (उ० ४।८१) । गौरादिः (४।१।४१) । 'अथ **मर्कटी** । करञ्जभिच्छूकशिम्ब्योः पुंसि वानरलूतयोः' ॥ (१) ॥*॥ अङ्गारवर्णपर्णा वल्लरी ॥ (१) ॥*॥ **'करञ्जभेदानाम्'** एकैकम् ॥

रोही रोहितकः ह्लीहशत्रुर्दाडिमपुष्पकः ।

रोहीति ॥ अवश्यं रोहति 'आवश्यका–' (३।३।१७०) इति णिनिः । **'रोही** रोहितकेऽश्वत्थवटपादपयोः पुमान्' (१) ॥*॥ रोहितो वर्णोऽस्यास्ति । 'अर्शआद्यच्' (५।२।१२७) । स्वार्थे कन् (५।३।७५) । **'रोहितं** कुङ्कुमे रक्ते ऋजुशकशरासने । पुंसि स्यान्मीनमृगयोर्भेदे ना रोहितद्रुमे' ॥ (२) ॥*॥ 'ह्लीहशत्रुर्वनतिक्तश्च **रोहितः**' इति माधवः । ह्लीहः शत्रुः ॥ (३) ॥*॥ दाडिमस्य पुष्पमिव पुष्पमस्य ॥ (४) ॥*॥ चत्वारि **'रोहितकस्य' 'रोहिड'** इति ख्यातस्य ॥

गायत्री बालतनयः खदिरो दन्तधावनः ॥ ४९ ॥

गायेति ॥ गायन्तं त्रायते । 'त्रैङ् पालने' (भ्वा० आ०-अ०) । 'आतोऽनुप–' (३।२।३) इति कः । **'गायत्री** खदिरे स्त्री स्यात्' इति रभसः । **'गायत्री** त्रिपदादेवीछन्दोभित्खदिरेषु च' ॥*॥ 'वह्निगायत्रिणां तथा' इति वैद्यकान्नान्तोऽपि । व्रीह्यादित्वात् (५।२।११६) इनिः ॥ (१) ॥*॥ बालास्तनयाः पत्त्राण्यस्य ॥*॥ 'बालपत्त्रश्च' इति मूलपाठः–इत्यन्ये । **'बालपत्त्रो** यवासः खदिरश्च' इति प्राच्यः । आह च—'खदिरो **रक्तसार**श्च गायत्री दन्तधावनः । **कण्टकी बालपत्त्र**श्च **जिह्मशल्यः क्षितिक्षमः**' ॥ (२) ॥*॥ खदति । 'खद स्थैर्ये हिंसायां च' (भ्वा० प० से०) । 'इषिमदिमुदि–' (उ० १।५१) इति किरच् । **'खदिरी** शाकभेदे स्त्री ना चन्द्रे दन्तधावने' ॥ (३) ॥*॥ दन्तान् धावति । 'धावु गतिशुद्ध्योः' (भ्वा० उ० से०) । ल्युट् (३।३।११४) ॥ (४) ॥*॥ चत्वारि **'खदिरस्य'** ॥

अरिमेदो विट्खदिरे

अरीति ॥ अरिरिव मेदः स्नेहोऽस्य ॥ (१) ॥*॥ विड्गन्धिः खदिरः ॥ (२) ॥*॥ द्वे **'दुर्गन्धिखदिरस्य'** ॥

कदरः खदिरे सिते ।

सोमवल्कोऽपि

कदेति ॥ दृणाति । 'दॄ विदारणे' (क्र्या० प० से०) पचाद्यच् (३।१।१३४) । कस्य जलस्य दरः । **'कदरः** श्वेतखदिरे ककचव्याधिभेदयोः' ॥ (१) ॥*॥ सोम इव वल्कोऽस्य । **'सोमवल्कस्तु** धवलखदिरे कट्फलेऽपि च' ॥ (२) ॥*॥ द्वे **'श्वेतखदिरस्य'** ॥

अथ व्याघ्रपुच्छगन्धर्वहस्तकौ ॥ ५० ॥

एरण्ड उरुबूकश्च रुचकश्चित्रकश्च सः ।
चञ्चुः पञ्चाङ्गुलो मण्डवर्धमानव्यडम्बकाः ॥ ५१ ॥

अथेति ॥ व्याघ्रस्य पुच्छमिव पुच्छमस्य ॥ (१) ॥*॥ गन्धर्वस्य मृगभेदस्य हस्त इव (हस्तः) पत्त्रमस्य ॥ (२) ॥*॥ आ ईरयति वायुम् । 'ईर गतौ कम्पने च' (अ० आ० से०) । अस्माण्णिजन्ताद्बाहुलकादण्डच् ॥ (३) ॥*॥ उरुं महान्तं वायुं वायति । 'ओवै शोषणे' (भ्वा० प० अ०) 'उलूकादयश्च' (उणा० ४।४१) इत्यूकः । 'खपुरः क्रमुको, निचुलो हिज्जल, एरण्ड उरुबूकः' इति बोपालितः । 'उरुबूको-**रुबुकव्याघ्रदलाश्च**' इति रभसः ॥ (४) ॥*॥ रोचते । 'रुच दीप्तौ' (भ्वा० आ० से०) 'कुन् शिल्पिसंज्ञयोः' (उ० २।३२) इति कुन् ॥ (५) ॥*॥ चित्रयति । 'चित्र अद्भुतादौ' (चु० उ० से०) । कुन् (उ० २।३२) **'चित्रकं** तिलके ना तु व्याघ्रभिच्चञ्चुपाठिषु' ॥ (६) ॥*॥ चञ्चति । 'चञ्चु गत्यर्थः' (भ्वा० प० से०) । यत्तु—'चकि, मकि गतौ' इति धातूपन्यसनं मुकुटस्य । तच्चिन्त्यम् । बाहुलकादुः । 'चञ्चुस्त्रोव्यां स्त्रियां पुंसि गोनाडीके व्यडम्बके' ॥ (७) ॥*॥ पञ्चाङ्गुलयोऽस्य । 'तत्पुरुषस्याङ्गुलेः–' (५।४।८६) इत्यच् । यत्तु—'द्वित्रिभ्याम्–' (५।४।१०२) इत्यचच्—इति मुकुटेनोक्तम् । तच्चिन्त्यम् ॥ (८) ॥*॥ मण्डयति । 'मडि भूषा-

१—'दीर्घप्रयोजकरपेरकारत्वे' इत्यर्थः ॥ २—आधुनिकपुस्तकेषु तु 'पर्फरीकादयश्च' इति सूत्रमुपलभ्यते ॥

१—आधुनिकपुस्तकेषु तु खिदेरत्र सूत्रे पाठः । खदिरसिद्धिस्तु (उ० १।५२ सूत्रेण) भवति ॥

याम्' (भ्वा० प० से०) । णिच् (३।१।२६) । पचाद्यच् (३।१।१३४) । 'आमलक्यां स्त्रियां **मण्ड** एरण्डे मोचपिच्छयोः' इति रभसः । '**मण्डः** पञ्चाङ्गुले शाके पुंसि क्लीबं तु मस्तुनि । आमलक्यां स्त्रियां **मण्डा**थास्त्रियां सारपिच्छयोः' ॥*॥ अकारप्रश्लेषोऽपि । '**अमण्ड**पञ्चाङ्गुलवर्धमानगन्धर्वहस्ताः' इति हारावली ॥*॥ आकारादिरपि । 'गन्धर्वहस्तकोऽमण्ड **आमण्डो** व्याघ्रपुच्छकः' इति तारपालः ॥*॥ '**आदण्डः**' इत्येके । (दीर्घदण्डत्वात्) —इति स्वामी ॥ (९) ॥*॥ वर्धते । 'वर्ध छेदनपूरणयोः' (चु० प० से०) । चानश् (३।२।१२९) । '**वर्धमानः** प्रभेदे शरावैरण्डविष्णुषु' ॥ (१०) ॥*॥ व्यडं मलमम्बयति । 'अबि क्षेपणे' (भ्वा० आ० से०) । णिच् (३।१।२६) । ण्वुल् (३।१।१३३) ॥*॥ '**व्यडम्बनः**' इति स्वामी । तत्र ल्युट् (३।३।११४) । युच् (उ० २।७८) वा ॥ (११) ॥*॥ एकादश '**एरण्डस्य**' ॥

अल्पा शमी शमीरः स्यात्

अल्पेति ॥ अल्पा शमी । 'कुटीशमीशुण्डाभ्यो रः' (५।३।८८) ॥ (१) ॥*॥ एकम् '**अल्पशम्याः**' ॥

शमी सक्तुफला शिवा ।

शमीति ॥ शमयति रोगान् । पचाद्यच् (३।१।१३४) । गौरादिः (४।१।४१) । '**शमी** सक्तुफलायां च शिम्बिकायां च वेल्लुलौ[1]' ॥ (१) ॥*॥ सक्तुवत् फलमस्याः । अजादिः (४।१।४) ॥ (२) ॥*॥ शिवं करोति । 'तत्करोति–' (वा० ३।१।२६) इति णिच् । पचाद्यच् (३।१।१३४) । '**शिवा** झाटामलौषधौ । अभयामलकीगौरीफेरुसक्तुफलासु च' ॥ (३) ॥*॥ त्रीणि '**शम्याः**' ॥

पिण्डीतको मरुवकः श्वसनः करहाटकः ॥ ५२ ॥
शल्यश्च मदने

पिण्डीति ॥ पिण्डीं तनोति । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः । 'संज्ञायां कन्' (५।३।७५) । '**पिण्डीतकः** स्यात्तगरे मदनाख्यमहीरुहे' ॥ (१) ॥*॥ मरुं वाति । कुन् (उ० २।३२) ॥ (२) ॥*॥ निर्जलेऽपि श्वसिति । नन्द्यादिः (३।१।१३४) । '**श्वसनं** श्वसिते पुंसि मारुते मदनद्रुमे' ॥ (३) ॥*॥ करं हाटयति । 'हट दीप्तौ' (भ्वा० प० से०) । णिच् (३।१।२६) । 'कर्मण्यण्' (३।२।१) । स्वार्थे कन् (५।३।७५) । '**करहाटः** शिफाकन्दे पद्मस्य मदनद्रुमे' ॥ (४) ॥*॥ शलति । 'शल गतौ' (भ्वा० प० से०) । अस्यादित्वात् (उ० ४।११२) यक् । 'क्ष्वेडाशङ्कुशरे **शल्यं** ना श्वाविन्मदनद्रुमे' इति तालव्यादौ रभसः ॥ (५) ॥*॥ मदयति । 'मदी हर्षग्लेपनयोः' (भ्वा० प० से०) । ल्युः (३।१।१३४) । '**मदनः** स्मरवसन्तद्रुभिद्धत्तूरसिंहके' ॥ (६) ॥*॥ षट् '**मदनस्य**' '**मयनफलाख्यवृक्षस्य**' ॥

शक्रपादपः पारिभद्रकः ।

भद्रदारु द्रुकिलिमं पीतदारु च दारु च ॥ ५३ ॥
पूतिकाष्ठं च सप्त स्युर्देवदारुणि

शक्रेति ॥ शक्रस्य पादपः ॥ (१) ॥*॥ पारि निष्ठां प्राप्तं भद्रमस्य । '**पारिभद्रस्तु** निम्बद्रौ मन्दारे देवदारुणि' ॥ (२) ॥*॥ भद्रं दारु । 'भद्रदारुणि च क्लीबम्' इत्यमरमाला । 'पुंनपुंसकयोर्**दारुः**' इति त्रिकाण्डशेषात् पुंस्यपि ॥ (३) ॥*॥ किलति । 'किल श्वैत्यक्रीडनयोः' (तु० प० से०) । बाहुलकात् किमच् । द्रुश्चासौ किलिमं च ॥ (४) ॥*॥ पीतं च तद्दारु च ॥ (५) ॥*॥ दीर्यते । 'दॄ विदारणे' (क्या० प० से०) । 'दॄसनिजनि–' (उ० १।३) इति त्रुण् । 'पुंनपुंसकयोर्दारु' इति त्रिकाण्डशेषः ॥ (६) ॥*॥ पूति च तत्काष्ठं च ॥ (७) ॥*॥ देवस्य दारु ॥ (८) ॥*॥ अष्ट '**देवदारुवृक्षस्य**' ॥

अथ द्वयोः ।

पाटलिः पाटलाऽमोघा काचस्थाली फलेरुहा ॥५४॥
कृष्णवृन्ता कुबेराक्षी

अथेति ॥ पाति । क्विप् (३।२।१७८) । टलति । 'टल वैक्लव्ये' (भ्वा० प० से०) । 'सर्वधातुभ्य इन्' (उ० ४।११८) । पाश्चासौ टलिश्च ॥ (१) ॥*॥ पाटं लाति । 'आतोऽनुप–' (३।२।३) इति कः । '**पाटला** पाटलौ स्त्री स्यादस्याः पुष्पे पुनर्नं ना' ॥ (२) ॥*॥ न मोघा । '**अलिप्रिया विशालाग्राप्यमोघा** पाटलिर्द्वयोः' इति वाचस्पतिः ॥*॥ '**मोघा** स्त्री पाटलावृक्षे **मोघं** त्रिषु निरर्थके' इति रुद्रात् 'मोघा' अपि । मोहयति । पचाद्यच् (३।१।१३४) न्यङ्क्वादिः (७।३।५३) ॥ (३) ॥*॥ काचस्य काण्यस्य स्थाली पात्रम् ॥*॥ स्वामी तु 'काला' 'स्थाली' इति पठति । कालो वर्णोऽस्या अस्ति । अर्शआद्यच् (५।२।१२७) अजादिः (४।१।४) । '**काला** तु कृष्णवृन्ताख्यामञ्जिष्ठानीलिकासु च' ॥*॥ तिष्ठति । 'ष्ठा गतिनिवृत्तौ' (भ्वा० प० अ०) । 'स्थाचतिमृजेरालज्वालजालीयचः' (उ० १।११६) । '**स्थाली** स्यात्पाटलोखयोः' ॥ (४) ॥*॥ फले रोहति । 'इगुपध–' (३।१।१३५) इति कः । 'तत्पुरुषे कृति–' (६।३।१४) इत्यलुक् ॥ (५) ॥*॥ कृष्णं वृन्तमस्याः । **कृष्णवृन्ता** पाटलायां माषपर्ण्यां च योषिति' ॥ (६) ॥*॥ कुबेरस्येवाक्षि यस्याः । 'अक्ष्णोऽदर्शनात्' (५।४।७६) इत्यच् । गौरादिः (४।१।४१) । मुकुटस्तु—'बहुव्रीहौ सक्थि–' (५।४।११३) इत्यादिना षच्—इत्याह । तन्न । अस्याङ्गत्वात् वृक्षस्याप्राणित्वात् ॥ (७) ॥*॥ सप्त '**पाटलायाः**' '**पाडली**' इति ख्यातस्य ॥

१—'गुग्गुलौ' इति पाठः ॥ 'वायुलौ' इति वा पाठः ॥

श्यामा तु महिलाह्वया ।

लता गोवन्दनी गुन्द्रा प्रियंगुः फलिनी फली ॥५५॥
विष्वक्सेना गन्धफली कारम्भा प्रियकश्च सः ।

श्यामेति ॥ श्यामो वर्णोऽस्त्यस्याः । अर्शआदिः (५।२।१२७) । '**श्यामो** वटे प्रयागस्य वारिदे वृद्धदारके । पिके च कृष्णहरितोः पुंसि स्यात्तद्वति त्रिषु । मरिचे सिन्धुलवणे क्लीबं स्त्री शारिवौषधौ । अप्रसूताङ्गनायां च प्रियंगावपि वल्गुलौ । यमुनायां त्रियामायां कृष्णत्रिवृतिकौषधौ' । (नीलिकायाम्) ॥ (१) ॥*॥ महिलाया आह्वय आह्वयो यस्याः । '–सप्तम्युपमान–' (६।२।२) इति साधुः ॥ (२) ॥*॥ लतति । 'लतिः' सौत्रो धातुः । पचाद्यच् (३।१।१३४) । 'प्रियंगुनखयोर्लता । स्पृक्काज्योतिष्मतीवल्लीलताकस्तूरिकासु च' ॥ (३) ॥*॥ गवि भूमौ वन्द्यते । 'वदि अभिवादनस्तुत्योः' (भ्वा० आ० से०) । कर्मणि ल्युट् (३।३।११३) ॥ (४) ॥*॥ गुन्द्रयति । 'गुद्रि क्षोदे' ( ) अच् (३।१।१३४) । '**गुन्द्र**स्तेजनके स्त्री तु प्रियंगौ भद्रमुस्तके' ॥ (५) ॥*॥ प्रियं गच्छति । मृगय्वादौ (उ० १३७) निपातः । '**प्रियंगुः**[1] स्त्री राजिकाकणयोरपि । फलिन्यां कङ्गुसस्ये च' ॥ (६) ॥*॥ फलमस्त्यस्याः । 'अतः–' (५।२।११५) इतीनिः । '**फलिन्य**मिशिखायां स्त्री फलिन्यां फलिने त्रिषु' ॥ (७) ॥*॥ गौरादित्वात् (४।१।४१) ङीष् । '**फली** फलिन्याम्' ॥ (८) ॥*॥ विष्वक् सिनोति । 'षिञ् बन्धने' (स्वा० उ० अ०) । 'कृवृजॄसि–' (उ० ३।१०) इति नः ।—अच् (३।१।१३४)–इति मुकुटोक्तिश्चिन्त्या । '**विष्वक्सेना** फलिन्यां स्याद् **विष्वक्सेनो** जनार्दने' ॥ (९) ॥*॥ गन्धवत् फलमस्याः । 'पाककर्ण–' (४।१।६४) इति ङीष् । '**गन्धफल्यपि** गुन्द्रायां चम्पकस्य च कोरके' ॥ (१०) ॥*॥ ईषद् रम्भा । 'ईषदर्थे च' (६।३।१०५) इति कोः का ॥ (११) ॥*॥ प्रीणाति । 'प्रीञ् तर्पणे' (क्र्या० उ० से०) । कुन् (उ० २।३२) '**प्रियकः** पीतसारके । नीपे चित्रमृगे चालौ प्रियंगौ कुङ्कुमेऽपि च' ॥ (१२) ॥*॥ द्वादश '**प्रियङ्गुवृक्षस्य**' ॥

मण्डूकपर्णपत्रोर्णनटकङ्गुटुण्टुकाः ॥ ५६ ॥
स्योनाकशुकनासर्क्षदीर्घवृन्तकुटन्नटाः ।
शोणकश्चारलौ

मण्डूकेति ॥ मण्डूक इव पर्णमस्य ॥ (१) ॥*॥ पत्रे ऊर्णाऽस्य । '**पत्रोर्ण** धौतकौशेये क्लीबं स्याच्छोणके पुमान्' ॥ (२) ॥*॥ नटति । 'णट नृत्तौ' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) ॥ (३) ॥*॥ कटून्यङ्गान्यस्य ॥ (४) ॥*॥ 'टुण्टु' इति कायति । 'कै शब्दे' (भ्वा० प० अ०) । 'आतोऽनुप–' (३।२।३।) इति कः । '**टुण्टुकः** शोणकाल्पयोः' ॥ (५) ॥*॥ सीव्यति । 'षिवु तन्तुसंताने' (दि० प० से०) । बाहुलकान्नः । अन्तरङ्गत्वाद्यण् (६।१।७७) । '**स्योनः** किरणसूर्ययोः' तेनाकति, अक्यते, वा । 'अक कुटिलायां गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) घञ् (३।३।१९) वा ॥*॥ श्यायते । 'श्यैङ् गतौ' (भ्वा० प० अ०) । पिनाकादौ (उ० ४।१५) निपातितः । '**श्योनाकः**' तालव्यादिरपि ॥ (६) ॥*॥ शुकनासा इव पुष्पमस्यास्ति । अर्शआद्यच् (५।२।१२७) ॥ (७) ॥*॥ ऋषति । 'ऋषी गतौ' (तु० प० से०) । 'स्फुव्रश्चिकृत्यृषिभ्यः कित्' (उ० ३।६६) इति सेः । '**ऋक्षः** पर्वतराजे स्याद्भल्लूके शोणके पुमान् ॥ (८) ॥*॥ दीर्घं वृन्तमस्य ॥ (९) ॥*॥ कुटन् वक्रीभवन् नटति । 'नट स्पन्दने' ( ) पचाद्यच् (३।१।१३४) ॥ (१०) ॥*॥ शोणति । 'शोणृ वर्णे' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । ('**शोणः** कृशानौ श्योनाके लोहिताश्वे नदे पुमान् । त्रिषु कोकनदच्छाये') । स्वार्थे कन् (५।३।७५) ॥*॥ स्वामी तु—शवति । **शोनकः**—इत्याह ॥ (११) ॥*॥ इयर्ति । 'अर्तेररुः' (उ० ४।७९) । कपिलिकादिः (वा० ८।२।१८) ॥ (१२) ॥*॥ द्वादश '**शोणकस्य**' ॥

तिष्यफला त्वामलकी त्रिषु ॥ ५७ ॥
अमृता च वयस्था च

तिष्येति ॥ 'नित्यमामलके लक्ष्मीर्नित्यं हरितगोमये । नित्यं शङ्खे च पद्मे च नित्यं शुक्ले च वाससि' इति श्रवणात् तिष्यं मङ्गल्यं फलमस्याः । अजादित्वात् (४।१।४) टाप् । तिष्ये कलियुगे फलमस्याः सेवया, इति वा ॥ (१) ॥*॥ आमलते । 'मल धारणे' (भ्वा० आ० से०) । कुन् (उ० २।३२) । 'जातेः' (४।१।५३) इति ङीष् । गौरादित्वकल्पनं तु चिन्त्यम् ॥ (२) ॥*॥ न म्रियन्तेऽनया । 'तनिमृङ्भ्यां किच्च' (उ० ३।८८) इति तन् । '**अमृता** मागधीपल्यागुडूच्यामलकीषु च' ॥ (३) ॥*॥ वयो यौवनं तिष्ठत्यनया । घञर्थे कः (३।३।५८) । '**वयस्था** तु स्त्रियां ब्राह्मीगुडूच्यामलकीषु च । सूक्ष्मैलायां च काकोल्यां पथ्यायां तरुणे त्रिषु' ॥*॥ कायस्थाऽपि । '**कायस्था** तु हरीतक्यामलक्योश्च प्रकीर्तिता' इति रभसः ॥ (४) ॥*॥ चत्वारि '**आमलक्याः**' ॥

त्रिलिङ्गस्तु विभीतकः ।
नाऽक्षस्तुषः कर्षफलो भूतावासः कलिद्रुमः ॥५८॥

त्रीति ॥ विगतं भीतं रोगभयमस्मात् । 'जातेः' (४।१।५३) इति ङीष् । गौरादित्वकल्पनं त्वयुक्तम् । विशिष्टं भीतमस्माद्वा, भूतकल्योराश्रयत्वात् ॥ (१) ॥*॥ अक्षति । 'अक्षू व्याप्तौ' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । '**अक्षो**

१—प्रियंगुर्गकारवती । 'सरलप्रियंगुणाढ्यम्' इति दमयन्तीश्लेषात् ॥

ज्ञानात्मंशकटव्यवहारेषु पाशके । रुद्राक्षे रावणौ सर्पे विभीतकतरावपि । चक्रे कर्षे पुमान् क्लीबं **तुत्थे** सौवर्चलेन्द्रिये' ॥ (२) ॥*॥ **तुष्यति** । 'तुष तुष्टौ' (दि० प० से०) । 'इगुपध–' (३।१।१३५) इति कः ।—'घञर्थे कः' (वा० ३।३।५८)—इत्युक्तिश्चिन्त्या । परिगणनात् 'धान्यत्वचि **तुषः** पुंसि विभीतकतरावपि' इति मूर्धन्यान्ते रुद्रः ॥ (३) ॥*॥ कर्षः फलमस्य ॥ (४) ॥*॥ भूतानामावासः ॥ (५) ॥*॥ कलेर्द्रुमः ॥ (६) ॥*॥ षट् **'विभीतकस्य' 'बहेडा'** इति ख्यातस्य ॥

अभया त्वव्यथा पथ्या कायस्था पूतनाऽमृता ।
हरीतकी हैमवती चेतकी श्रेयसी शिवा ॥ ५९ ॥

अभेति ॥ न भयमस्याः । **'अभया** स्त्री हरीतक्यामुशीरे च नपुंसकम् । निर्भये वाच्यलिङ्गः स्यात्' इति मेदिनी ॥ (१) ॥*॥ न व्यथा यस्याः । **'अव्यथा** निर्व्यथे सर्पे चारटीपथ्ययोः स्त्रियाम्' इति मेदिनी ॥ (२) ॥*॥ पथोऽनपेता । 'धर्मपथ्यर्थन्यायादनपेते' (४।४।९२) इति यत् । **'पथ्या** स्त्री हरीतक्यां हिते त्रिषु' इति मेदिनी ॥ (३) ॥*॥ कायस्तिष्ठत्यनया । 'घञर्थे कः' (३।३।५८) । **'कायस्था** तु हरीतक्यामलक्योश्च प्रकीर्तिता' इति रभसः । **'कायस्थः** परमात्मनि । नरजातिविशेषे ना हरीतक्यां तु योषिति' इति मेदिनी ॥ (४) ॥*॥ पूतं करोति 'तत्करोति–' (वा० ३।३।२६) इति णिच् । 'बहुलमन्यत्रापि' (उ० २।७८) इति युच् । **'पूतना** तु हरीतक्यां दानवीरोगभेदयोः' इति मेदिनी ॥ (५) ॥*॥ (अमृता व्याख्याता) ॥ (६) ॥*॥ हरिर्वर्णः इतो यस्याम् । 'संज्ञायां कन्' (५।३।७५) । गौरादिः (४।१।४१) ॥ (७) ॥*॥ हिमवति जाता । 'तत्र जातः' (४।३।२५) इत्यण् । **'हैमवत्यभयास्वर्णक्षीर्योः** श्वेतवचोभयोः' इति विश्वमेदिन्यौ ॥ (८) ॥*॥ चेतयति । 'चिती संज्ञाने' (भ्वा० आ० से०) । ण्वुल् (३।१।१३३) । गौरादिः (४।१।४१) ॥ (९) ॥*॥ अतिप्रशस्ता । ईयसुन् (५।३।५७) 'प्रशस्यस्य श्रः' (५।३।६०) । 'उगितश्च' (४।१।६) इति ङीप् । **'श्रेयसी** करिपिप्पल्यामभयापाठयोरपि' इति मेदिनी ॥ (१०) ॥*॥ शिवं करोति । 'तत्करोति–' (वा० ३।१।२६) इति णिच् । पचाद्यच् (३।१।१३४) । **'शिवो** मोक्षे महादेवे कीलकग्रहयोगयोः । वालुके गुग्गुलौ वेदे पुण्डरीकद्रुमे पुमान् । सुखे क्षेमे जले क्लीबं **शिवा** झाटामलौषधौ । अभयामलकीगौरीफेरुसक्तुफलासु च' इति मेदिनी ॥ (११) ॥*॥ एकादश **'हरीतक्याः'** ॥

१—शकटे यथा 'हस्तिभिस्तुरगैरक्षैः संबाधेऽस्मिन् रणाङ्गणे' । 'समुदाये प्रवृत्ता अवयवेष्वपि वर्तन्त' इति रथावयवेऽपि वर्तते । विश्वेऽपि 'शकटव्यवहारयोः' इत्युपलभ्यते ॥ २—व्यवहार आयव्ययादिर्न्यायः । तत्र यथा 'राजाध्यक्षः' इत्यनेकार्थकैरवाकरकौमुदी ॥

पीतद्रुः सरलः पूतिकाष्ठं च

पीति ॥ पीतश्वासौ द्रुश्च ।—पीयते चक्षुषाऽयम् । 'पा पाने' (भ्वा० प० से०) । 'पः किच्च' इति तः । 'घुमास्था–' (६।४।६६) इतीत्वम्–इति मुकुटः । तच्चिन्त्यम् । उक्तसूत्रादर्शनात् । क्तप्रत्ययेन गतार्थत्वाच्च ॥ (१) ॥*॥ सरति । 'सृ गतौ' (भ्वा० प० अ०) । बाहुलकादलच् । **'सरलः** । पूतिकाष्ठे नाऽथोदारावकयोस्त्रिषु' इति मेदिनी ॥ (२) ॥*॥ पूतेः पावनस्य काष्ठम् । **'पूतिकाष्ठं** च सरलदेवदारुमहीरुहोः' इति मेदिनी ॥ (३) ॥*॥ त्रीणि **'सरला'** इति ख्यातस्य ॥

अथ द्रुमोत्पलः ।

कर्णिकारः परिव्याधे

अथेति ॥ द्रुमे उत्पलं तदाकारं पुष्पमस्य ।—'सप्तमी–' (२।१।४०) इति योगविभागात् समासः—इति मुकुटोक्तिश्चिन्त्या । बहुव्रीहिविग्रहस्य प्रदर्शनात् ॥ (१) ॥*॥ कर्णिकामियर्ति । 'ऋ गतौ' (जु० प० अ०) । 'कर्मण्यण्' (३।२।१) । **'कर्णिकारः** पुमानारग्वधद्रौ च द्रुमोत्पले' इति मेदिनी ॥ (२) ॥*॥ परिविध्यति । 'व्यध ताडने' (दि० प० अ०) । 'ग्याद्व्यधा–' (२।१।१४१) इति णः । **'परिव्याधस्तु** पुंसि स्याद्व्याधे च द्रुमोत्पले' इति मेदिनी ॥ (३) ॥*॥ त्रीणि **'कर्णिकारस्य' 'कठचम्पा'** इति ख्यातस्य ॥

लकुचो लिकुचो डहुः ॥ ६० ॥

लेति ॥ लक्यते । 'लक आस्वादने' ( ) । बाहुलकादुचः ॥ (१) ॥*॥ पृषोदरादित्वात् (६।३।१०९) इत्वे लिकुचोऽपि ॥ (२) ॥*॥ दहति, तोहति, वा । 'दह भस्मीकरणे' (भ्वा० प० अ०) । 'तुहिर् अर्दने' (भ्वा० प० से०) । मृगय्वादित्वात् (उ० १।३७) निपातितः ॥*॥ **'अडहुः'** इत्यपि—इति स्वामी ॥ (३) ॥*॥ त्रीणि **'लिकुचस्य' 'बडहर'** इति ख्यातस्य ॥

पनसः कण्टकिफलः

पनेति ॥ पनाय्यते स्तूयते 'वेतसेवाहस–' इत्यसजन्तो निपातितः । **'पनसः** कण्टकिफले कण्टके वानरान्तरे । स्त्रियां रोगभ्रमेदे स्यात्' इति मेदिनी । **'पणसः'** इत्यपि पाठः ॥ (१) ॥*॥ कण्टकाः सन्त्यस्य । 'अतः–' (५।२।११५) इतीनिः । कण्टकिफलमस्य ॥ (२) ॥*॥ द्वे **'पनसस्य' 'कटहर'** इति ख्यातस्य ॥

१—उज्ज्वलदत्तादौ तु अदः सूत्रं नोपलभ्यते । किं तु 'अत्यविचमि–' (उ० ३।११७) इति सूत्रेणासच् ॥ २—पनसो दन्त्यान्त्यः । 'प्रियालपनसाराणि यौवनानीव वनानि' इति दमयन्तीश्लेषात् ॥

निचुलो हिज्जलोऽम्बुजः ।

नीति ॥ निचोलति । 'चुल समुच्छ्राये' (चु० प० से०) चुरादीनां णिज्वा । 'इगुपध–' (३।१।१३५) इति कः । यत्तु—'निचोल्यते' इति विगृह्य 'घञर्थे कः' (वा० ३।३। ५८) इत्युक्तं मुकुटेन । तन्न । परिगणनविरोधात् । 'अन्तर-ङ्गत्वेन (णिजाश्रय) गुणप्रसङ्गाच्च । **'निचुलस्तु** निचोले स्या-दिज्जलाख्यमहीरुहे' इति मेदिनी ॥ (१) ॥*॥ हिनोति । 'हि गतौ वृद्धौ च' (स्वा० प० अ०) क्विप् (३।२।१७८) हित् जलमस्य ॥*॥ 'इज्जलः' इत्यपि पाठः । एति । 'इण् गतौ' (अ० प० अ०) । क्विप् (३।२।१७८) तुक् (६।१।७१) इत् जलमस्य । 'निचुलेज्जलहिज्जलाः' इति रभसः ॥ (२) ॥*॥ अम्बुनि जातः । 'जनी प्रादुर्भावे' (दि० आ० से) 'सप्तम्यां जनेर्डः' (३।२।९७) ॥ (३) ॥*॥ त्रीणि **'स्थलवेतसस्य'** 'वानीरे कविभेदे स्यान्निचुलः स्थलवेतसे' इति शब्दार्णवात् । **'समुद्रफलस्य'** इत्यन्ये ॥

काकोदुम्बरिका फल्गुर्मलपूर्जघनेफला ॥ ६१ ॥

केति ॥ काकप्रिया उदुम्बरी । 'संज्ञायां कन्' (५।३। ७५) ॥ (१) ॥*॥ फलति । 'फल निष्पत्तौ' (भ्वा० प० से०) । 'फलिपाटि–' (उ० १।१८) इति साधुः । **'फल्गव-**सारेऽभिधेयवत् । नदीभेदे मलप्वां स्त्री' इति मेदिनी ॥ (२) ॥*॥ **'मलं** पापे च किट्टे च वर्चस्के कृपणे **मलः'** इति धरणिः । मलात् पापात् पुनाति । 'पूञ् पवने' (क्र्या० प० से०) । क्विप् (३।२।१७८) मलं यवते । 'यु जुगुप्सायाम्' (चु० आ० से०) । क्विप् (३।२।१७८) बाहुलकादीर्घः । यद्वा मलते । 'मल धारणे' (भ्वा० आ० से०) बाहुलकादयूः । **'मलयूः'** इति वा पाठः ॥ (३) ॥*॥ जघने फलं यस्याः । 'अमूर्धम–' (६।३।१२) इति सप्तम्या अलुक् ॥ (४) ॥*॥ चत्वारि **'मलप्वाः' 'कदुम्बरी'** इति ख्यातस्य ॥

अरिष्टः सर्वतोभद्रहिङ्गुनिर्यासमालकाः ।
पिचुमर्दश्च निम्बे

अरीति ॥ न रिष्टमशुभमस्मात् । **'अरिष्टो** लशुने निम्बे फेनिले काककङ्कयोः । **अरिष्टमशुभे** तक्रे सूतिकागार आसवे । शुभे मरणचिह्ने च' इति मेदिनी ॥ (१) ॥*॥ सर्वतो भद्रं यस्मात् । **'सर्वतोभद्र** इत्युक्तः काव्यचित्रे गृहान्तरे । निम्बे ना **सर्वतोभद्रा** गम्भारीनटयोषितोः' इति मेदिनी ॥ (२) ॥*॥ हिङ्ग्वाकारो हिङ्गुगन्धो वा निर्यासोऽस्य । **'हिङ्गु-निर्यास** इत्येष निम्बे हिङ्गुरसेऽपि च' इति मेदिनी ॥ (३) ॥*॥ मलते । 'मल धारणे' (भ्वा० आ० से०) ण्वुल् (३। १।१३३) । परस्मैपदं वुन्प्रत्ययविधानं च चिन्त्यम् ॥ (४) ॥*॥ पिचुं कुष्ठभेदं मर्दयति । 'मृद क्षोदे' (क्र्या० प० से०) । णिच् (३।१।२६) 'कर्मण्यण्' (३।२।१) ॥*॥ पिचुं मन्दयति, इति **'पिचुमन्दः'** इति स्वामी ॥ (५) ॥*॥ निम्बँति स्था-स्थ्यम् । 'णिवि सेचने' (भ्वा० प० से०) पचाद्यच् (३।१। १३४) ववयोरैकत्वम् ॥ (६) ॥*॥ षट् **'नीम्ब'** इति ख्या-तस्य ॥

अथ पिच्छिलाऽगुरुशिंशपा ॥ ६२ ॥

अथेति ॥ पिच्छास्त्यस्याः । पिच्छादित्वात् (५।२।१००) इलच् । **'पिच्छिलं** विजिलेऽन्यवत् । स्त्री पोतिकाशिंशपयोः शाल्मलीसिन्धुभेदयोः' ॥ (१) ॥*॥ न गुरुरस्मात् । **'अगुरु** क्लीबे शिंशपायां जोङ्गके, लघुनि त्रिषु' इति रुद्रः ॥ (२) ॥*॥ शीघ्रं शीर्षं वा पाति । 'आतः' (३।२।३) इति कः । पृषोदरादिः (६।३।१०९) । यद्वा 'शिम्' इत्यव्यक्तं शब्दं श-ब्देन वा शपति । 'शप आक्रोशे' (भ्वा० उ० अ०) पचा-द्यच् (३।१।१३४) । शिम्बाभिः शपति, इति वा । 'देविका-शिंशपा–' (७।३।१) इति निर्देशाद्वाशब्दलोपः । द्वितालव्या शिंशपा । 'श्वश्रूस्तथा श्वसुरशाश्वतशिंशपाश्च' इति शमेदात् ॥*॥ अगुरुसारा शिंशपा 'अगरुशिंशपा' इत्येकं नाम–इति स्वामी । तन्न । उक्तरुद्रविरोधात् ॥ (३) ॥*॥ त्रीणि **'सि-सँव'** इति ख्यातस्य ॥

कपिला भस्मगर्भा सा

केति ॥ सा कपिलवर्णपुष्पा सती भस्मगर्भोच्यते । भस गर्भे यस्याः शुक्लसारत्वात् ॥ (१) ॥*॥ एकम् **'कपिलव-र्णायाः** ॥

शिरीषस्तु कपीतनः ।
भण्डिलोऽपि

शीति ॥ शृणाति शीर्यते वा । 'शॄ हिंसायाम्' (क्र्या० प० से०) । 'शॄभ्यां कित्' (उ० ४।२७) इतीषन् ॥ (१) ॥*॥ तनोति । 'तनु विस्तारे' (त० उ० से०) । अच् (३। १।१३४) । यास्तनः ईतनः । कपीनां कपेर्वर्णस्य वा ईतनः ॥ (२) ॥*॥ भण्डति । 'भडि कल्याणे' (चु० प० से०) । 'सलिकल्यनि–' (उ० १।५४) इतीलच् ।—बाहुलकात्–इति मुकुटस्तु चिन्त्यः ॥*॥ रलयोरैक्यात् भण्डिरोऽपि । **'भ-ण्डिरो** भण्डिलो ना' इति वाचस्पतिः ॥ (३) ॥*॥ त्रीणि **'शिरीषस्य' 'सिरीस'** इति ख्यातस्य ॥

अथ चाम्पेयश्चम्पको हेमपुष्पकः ॥ ६३ ॥

अथेति ॥ चम्पाया अपत्यम् । 'स्त्रीभ्यो ढक्' (४।१।१२०)। **'चाम्पेयश्चम्पके** स्वर्णे किंजल्के नागकेसरे' इति मेदिनी ॥ (१) ॥*॥ चम्पयति, चम्प्यते वा । 'चपि गत्याम्' (चु० प० से०), क्वुन् (उ० २।३२) ॥ (२) ॥*॥ हेमवर्ण पुष्पम-

१—वस्तुतस्तु कपिलादिकमपि शिंशपासामान्यपर्यायमेव । अत एव **'कपिला** रेणुकायां च शिंशपागोविशेषयोः' इति मेदिनी । **'कपिलो** वह्निपिङ्गयोः । कुक्कुरे मुनिभेदे च **कपिला** शिंशपातरौ । पुण्डरीककरिण्यां च रेणुकागोविशेषयोः' इति हैमश्च संगच्छते तस्मात् 'पञ्च नामानि' इति युक्तम् ॥

स्य । ('हेमपुष्पं तु चम्पके । अशोकद्वौ जपापुष्पे') । कन् (५।३।७५) ॥ (३) ॥*॥ त्रीणि **'चम्पकस्य'** ॥

एतस्य कलिका गन्धफली स्यात्

एतेति ॥ गन्धः फलं साध्यमस्याः । 'पाककर्ण–' (४।१।५४) इति ङीष् । 'प्रियंगौ स्त्री **गन्धफली** चम्पकस्य च कोरके' इति रुद्रः ॥ (१) ॥*॥ एकं **'चम्पककलिकायाः'** ॥

अथ केसरे ।

वकुलः

अथेति ॥ केसराः सन्त्यस्य । अर्श आद्यच् (५।२।१२७) । के जले सरति । 'सृ गतौ' (भ्वा० प० अ०) । पचाद्यच् (३।१।१३४) वा । **'केसरं** हिङ्गुनि क्लीबं किंजल्के न स्त्रियां पुमान् । सिंहच्छटायां पुंनागे बकुले नागकेसरे' इति मेदिनी ॥ (१) ॥*॥ वङ्कते 'वकिर्गत्यर्थः' (भ्वा० आ० से०) । बाहुलकादुलच् । 'आगमशासनमनित्यम्' इति न नुम् ॥ (२) ॥*॥ द्वे **'बकुलस्य' 'माँसरी'** इति ख्यातस्य ॥

वञ्जुलोऽशोके

वञ्जिवति ॥ वजति 'वज गतौ' (भ्वा० प० से०) । 'बाहुलकादुलच् नुम्' ॥ (१) ॥*॥ न शोकोऽस्मात् । **'अशोकस्त्रिषु** निःशोके पुंसि कङ्केलिपादपे । स्त्रियां तु कटुरोहिण्यां पारदे स्याच्चपुंसकम्' इति मेदिनी ॥ (२) ॥*॥ द्वे **'अशोकस्य'** ॥

समौ करकदाडिमौ ॥ ६४ ॥

समाविति ॥ करोति दोषाभावम् 'कृवादिभ्यो वुन्' (उ० ५।३५) । **'करकस्तु** पुमान् पक्षिविशेषे दाडिमेऽपि च । द्वयोर्मेघोपले, न स्त्री करङ्के च कमण्डलौ' इति मेदिनी ॥ (१) ॥*॥ दलनं दालः । 'दल विशरणे' (भ्वा० प० से०) । घञ् (३।३।१८) दालेन निर्वृत्तः । 'भावप्रत्ययान्तादिमप्' (वा० ४।४।२०) डलयोरेकत्वम् । **'दाडिमस्तु** त्रिलिङ्गः स्यादेलायां करके त्रिषु' इति मेदिनी ॥*॥ दाडिम्बोऽपि । **'दाडिम्बसारपिण्डीरस्वाद्वम्लशुकवल्लभाः'** इति रभसात् ॥ (२) ॥*॥ द्वे **'दाडिमस्य'** ॥

चाम्पेयः केसरो नागकेसरः काञ्चनाह्वयः ।

चेति ॥ चम्पाया अपत्यम् । **'चाम्पेयश्चम्पके** स्वर्णे किंजल्के नागकेसरे' इति मेदिनी ॥ (१) ॥*॥ केसराः सन्त्यस्य अर्शआद्यच् (५।२।१२७) ॥ (२) ॥*॥ नागाख्यः केसरः । **'स्वर्णेभसर्पाख्यो** नागकेसरः **षट्पदप्रियः'** इति रभसः ॥ (३) ॥*॥ काञ्चनस्याह्वय आह्वा यस्य ॥ (४) ॥*॥ चत्वारि **'चाम्पेयस्य'** ॥

जया जयन्ती तर्कारी नादेयी वैजयन्तिका ॥ ६५ ॥

जयेति ॥ जयति । 'जि जये' (भ्वा० प० अ०) । पचाद्यच् (३।१।१३४) **'जया** जयन्तीतिथिभित्पथ्योमातत्सखीषु च । अग्निमन्थे ना जयन्ते विजये च युधिष्ठिरे' इति मेदिनी ॥ (२) ॥*॥ 'तृभूवहि–' (उ० ३।१२८) इति झच् । 'षित्' इत्यनुवृत्तेर्ङीष् (४।१।४१) । **'जयन्ती** वृक्षभिद्दौर्योरिन्द्रपुत्रीपताकयोः । पुमानैन्द्रौ हरे भीमे' इति मेदिनी ॥ (२) ॥*॥ तर्कमृच्छति । 'ऋ गतौ' (भ्वा० प० अ०) । कर्मण्यण् (३।२।१) ॥ (३) ॥*॥ नद्यां भवा । 'नद्यादिभ्यो ढक्' (४।२।९७) 'टिड्ढा–' । (४।१।१५) इति ङीप् ॥ (४) ॥*॥ विजयन्तस्येयम् । 'तस्येदम्' (४।३।१२०) इत्यण् । स्वार्थे कन् (५।३।७५) । यद्वा वैजयन्ती पताकेव । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् ॥ (५) ॥*॥ पञ्च **'वैजयन्तिकायाः' 'अरणी'** इति ख्यातायाः । **'जाही'** इति ख्यातायाः इत्यत्ये ॥

श्रीपर्णमग्निमन्थः स्यात्कणिका गणिकारिका ।

जया

श्रीति ॥ श्रीः पर्णेषु यस्य । **'श्रीपर्णमग्निमन्थेऽब्जे श्रीपर्णी** शाल्मलौ हठे' इति हैमः ॥ (१) ॥*॥ अग्निं मथ्नाति । 'मन्थ विलोडने' (क्र्या० प० से०) । 'कर्मण्यण्' (३।२।१) ॥ (२) ॥*॥ कणति । 'कण शब्दे' (भ्वा० प० से०) । कुन् (उ० २।३२) । गणाः सन्त्यस्या वा । अतः इति ठन् । **'कणिका** सूक्ष्मवस्तुनि । अग्निमन्थे' इति हैमः ॥ (३) ॥*॥ गणनम् । 'गण संख्याने' (चु० उ० से०) । 'इक् कृष्यादिभ्यः' (वा० ३।३।१०८) । गणिं करोति । 'कर्मण्यण्' (३।२।१) । ङीप् (४।१।१५) । स्वार्थे कन् (५।३।७५) । यद्वा गणयति । ऋच्छति । ण्वुल् (३।१।१३३) गणिका चासावारिका च ॥ (४) ॥*॥ जयति । पचाद्यच् (३।१।१३४) । **'जया** जयन्तीतिथिभित्पथ्योमातत्सखीषु च । अग्निमन्थे ना जयन्ते विजये च युधिष्ठिरे' इति मेदिनी ॥ (५) ॥*॥ पञ्च **'जयपर्णस्य'** । **'अरणी'** इति ख्यातायाः इत्येके । दशाप्यरणिपर्यायाः इति स्वामी ॥

अथ कुटजः शक्रो वत्सको गिरिमल्लिका ॥ ६६ ॥

अथेति ॥ कूटे शृङ्गे जायते स्म । 'सप्तम्यां जनेर्डः' (३।२।९७) । पृषोदरादिः (६।३।१०९) ॥*॥ प्रज्ञाद्यणि

१—वकुलोऽन्तस्यादिः । अत एव मुकुटेन 'उच्यते वर्ण्यते कविभिः' इति विग्रहो दर्शितः । नापि व्याख्यात्रा निम्बवत् 'बवयोरभेदः' इत्युक्तम् । तथा च 'भवद्वैरिनगरमिवानेकविधवकुलसंकुलम्' इति दमयन्ती ॥ नच बवयोरैक्येन निर्वाहः । 'व्यालम्बिना' इत्यादौ यत्र बवयोर्व्याकरणेन निर्णयस्तत्रैव तदङ्गीकारात् । नहि वकुलशब्दे व्याकरणेन स्पर्शादित्वं संभवति । अत एव दमयन्तीव्याख्यात्रापि 'महाव्रतिकान्तःपातिभिः' इत्यत्रैव 'बवयोरैक्यम्' इत्युक्तम् । नत्वत्रापि इति दिक् ॥

(५।४।३८) कौटजश्च । **'कौटजः** कुटजः **कोटी'** इति चन्द्रः । (**'कुटजो** वृक्षभेदे स्यादगस्त्यद्रोणयोरपि') ॥ (१) ॥*॥ शक्नोति । 'शक्लृ शक्तौ' (स्वा० प० अ०) । 'स्फायितञ्चि' (उ० २।१३) इतिरक् । **'शक्रः** पुमान् देवराजे कुटजार्जुन-भूरुहोः' ॥ (२) ॥*॥ वदति । 'वद व्यक्तायां वाचि' (भ्वा० प० से०) । 'वृतृवदिवचिहनिकमिकषिभ्यः सः' (उ० ३।६२) । ततः 'संज्ञायां कन्' (५।३।७५) ॥ (३) ॥*॥ गिरिमल्लीव । इवार्थे कन् (५।३।९६) ॥ (४) ॥*॥ चत्वारि **'कुटजस्य' 'कुरैया'** इति ख्यातस्य ॥

एतस्यैव कलिङ्गेन्द्रयवभद्रयवं फले ।

एतेति । कलिं गच्छति । अन्तर्भावितण्यर्थाद्गमेः 'अन्यत्रापि' (वा० ३।२।४८) इति डः ।-'खच्च डिद्वा' (३।२।३८) -इति मुकुटः ।-कलिं गायति इति स्वामी ॥ (१) ॥*॥ यवाकारबीजत्वाद्यवम् । इन्द्रसंज्ञस्य वृक्षस्य यवम् ॥ (२) ॥*॥ भद्रं च तद्यवं च ॥ (३) ॥*॥ **'कलिङ्गेन्द्रयवः** पुमान्' इत्यमरमालादर्शनादिन्द्रयवः पुमानपि । तत्रैव स्त्रीकाण्डपाठात् कलिङ्गा च ॥*॥ त्रीणि **'इन्द्रयवस्य'** कुटजबीजस्य ॥

कृष्णपाकफलाविघ्नसुषेणाः करमर्दके ॥ ६७ ॥

कृष्णेति ॥ कृष्णः पाकोऽस्य । कृष्णपाकं फलमस्य ॥ (१) ॥*॥ आ विजते स्म । 'ओविजी भयचलनयोः' (तु० प० से०) आङ्पूर्वः । 'गत्यर्थाकर्मक-' (३।४।७२) इति क्तः । 'श्वीदितः-' (७।२।१४) इतीण्निषेधः । 'ओदितश्च' (८।२।४५) इति नत्वम् ॥*॥ केचित्तु 'नञ्पूर्वः' इत्याहुः ॥ (२) ॥*॥ शोभना सेना यस्य । 'एति संज्ञायामगात्' (८।३।९९) इति षत्वम् । 'रषाभ्याम्-' (८।४।१) इति णत्वम् । मुकुटस्तु—सुष्ठु सिनोति । 'षिञ् बन्धने' (स्वा० उ० अ०) । 'कृवृतॄसिपिसिद्रुभ्यो नः'-इत्याह । उज्ज्वलदत्तादौ तूणादिसूत्रस्य 'कृवृजॄसिद्रुपन्यनिखपिभ्यो नित्' (३।१०) इति पाठो दृश्यते । (**'सुषेणः** करमर्दे स्याद्विष्णुसुग्रीववैद्ययोः' इति मेदिनी) ॥ (३) ॥*॥ करं मृद्नाति । 'मृद क्षोदे' (क्या० प० से०) । 'कर्मण्यण्' (३।२।१) । स्वार्थे कन् (५।३।७५) । 'मकरन्दः करमर्दः शिरीषो मूर्धपुष्पकः' इति शुभाङ्गः ।—करो मर्दकोऽस्य—इति मुकुटः । तन्न । उक्तकोशविरोधात् ॥ (४) ॥*॥ चत्वारि **'करमर्दकस्य' 'करौंदा'** इति ख्यातस्य ॥

कालस्कन्धस्तमालः स्यात्तापिच्छोऽपि

कालेति ॥ कालः स्कन्धोऽस्य । **'कालस्कन्ध**स्तमाले स्यात्तिन्दुके जीवकद्रुमे' इति मेदिनी ॥ (१) ॥*॥ ताम्यति । 'तमु ग्लानौ' (दि० प० से०) 'तमिविशि-' (उ० १।११८) इति कालन् । **'तमाल**स्तिलके खड्गे तापिच्छे वरुणद्रुमे' इति मेदिनी ॥ (२) ॥*॥ तापिनं छादयति । 'छद अपवारणे' (चु० उ० से०) । 'कर्मण्यण्' (३।२।१) । पृषोदरादिः (६।३।१०९) यत्तु—'तत्पुरुषे कृति-' (६।३।१४) इत्यमोऽलुकि 'तापिंछः'-इति मुकुटः । तन्न । अलौकिकविग्रहेऽमः प्रवेशाभावात् ॥ (३) ॥*॥ त्रीणि **'तमालस्य'** ॥

अथ सिन्दुकः ।

सिन्दुवारेन्द्रसुरसा निर्गुण्डीन्द्राणिकेत्यपि ॥ ६८ ॥

अथेति ॥ स्यन्दते । 'स्यन्दू प्रस्रवणे' (भ्वा० आ० से०) 'स्यन्देः संप्रसारणं धश्च' (उ० १।११) इत्युः । बाहुलकादत्र धो न ॥*॥ मुकुटस्तु धमिच्छति । स्वार्थे 'संज्ञायां कन्' (५।३।७५) तदुक्तम्—'सिन्दुवारः श्वेतपुष्पः सिन्दुकः सिन्धुवारितः । नीलपुष्पः सीतसहो निर्गुण्डी नीनसिन्धुकः' इति ॥ (१) ॥*॥ सिन्दुं वृणोति, वारयति वा । 'वृञ् वरणे' (स्वा० उ० से०) । 'वृञ् आवरणे' (चु० उ० से०) वा । 'कर्मण्यण्' (३।२।१) ॥ (२) ॥*॥ शोभनो रसोऽस्य । इन्द्रस्य सुरसः ॥*॥ **'इन्द्रसुरिसः'** इति स्वामी ॥ (३) ॥*॥ निर्गुडति । 'गुड रक्षायाम्' (तु० प० से०) । 'इगुपध-' (३।१।१३५) इति कः । पृषोदरादिः (६।३।१०९) । गुडाद्वेष्टनान्निर्गता, इति स्वामी । गौरादिः (४।१।४१) । मुकुटस्तु—'गुडिः' अपठितोऽपि भूवादेराकृतिगणत्वाद्द्रष्टव्यः—इत्याह । **'निर्गुण्डी** नीलशेफाल्यां सिन्दुवारद्रुमेऽपि च' इति मेदिनी ॥ (४) ॥*॥ इन्द्रस्य जन्या 'इन्द्रवरुण-' (४।१।४९) इति ङीषानुकौ, जन्यजनकभावलक्षणोऽपि च पुंयोगस्तत्र गृह्यते ।—इन्द्रमानयति । अनेर्ण्यन्तात् 'कर्मण्यण्' (३।२।१) । ङीप् (४।१।१५) । कन् (५।३।७५) ह्रस्वत्वम् (७।४।१३) च इति मुकुटः । **'इन्द्राणी** करणे स्त्रीणां पौलोमीसिन्दुवारयोः' इति मेदिनी ॥ (५) ॥*॥ पञ्च 'सिन्दुवारस्य' **'सँपौडी'** इति ख्यातस्य ॥

वेणी खरा गरी देवताडो जीमूत इत्यपि ।

वेणीति ॥ वेणीव । 'देवताडेऽपि **वेणी** स्यात्प्रवेण्यामपि योषिति' इति रभसः ॥ (१) ॥*॥ तीक्ष्णत्वात् खरा । 'देवताडे **खरा** तीक्ष्णे त्रिषु स्याद्गर्दभे पुमान्' इति रभसः ॥ (२) ॥*॥ गृणाति । 'गृ शब्दे' (क्या० प० से०) । पचाद्यच् । (गौरादिः) (४।१।४१) । **'गरी** खरायां करणे क्लीबं नागविषे विषे' ॥*॥ खरं विषमागिरति । मूषकविषघ्नत्वात् । **'खरागरी'** इत्येकमाहुः ॥*॥—गरामागिरति । 'गरागरी' इति तु स्वामी ॥ तदुक्तम्—'जीमूतको देवताडो **वृन्तकोशो गरागरी'** इति ॥ (३) ॥*॥ **'देवो** मेघे सुरे राज्ञि स्यान्नपुंसकमिन्द्रिये' इति मेदिनी ॥ देवमिन्द्रियं ताडयति । 'तड आघाते' (चु० प० से०) । 'कर्मण्यण्' (३।२।१) । **'देवताडः** सैंहिकेये जीमूते च हुताशने' इति मेदिनी ॥ (४)

१—काव्यकल्पलतायाम् 'रविमिव तापिच्छविराजितं वनम्' इति श्लेषान्निरनुस्वारः-इति मुकुटः ॥

॥*॥ जीमूत इव **'जीमूतोऽद्रौ भृतिकरे देवताडे पयोधरे'** इति मेदिनी ॥ (५) ॥*॥ पञ्च **'देवतालस्य'** ॥

श्रीहस्तिनी तु भूरुण्डी

श्रीति ॥ श्रिया हस्तः । श्रीहस्तो विद्यतेऽस्याः । 'अतः' (५।२।११५) इतीनिः । हस्तं गृह्णाति, हस्तयति, अवश्यं श्रियं हस्तयति । 'आवश्यका-' (३।३।१७०) इति णिनिः, इति वा ॥ (१) ॥*॥ भुवं रुण्डयति आच्छादयति । 'रुटि लुटि स्तेयकरणे' (भ्वा० प० से०) इत्यत्र माधवीयायां वृत्तौ 'रुडि, लुडि, इत्यपरे' इति पाठान्तरमुपन्यस्तम् । 'कर्मण्यण्' (३।२।१) ॥ (२) ॥*॥ हस्तिकर्णपत्रा शाकविशेष इति स्वामी । द्वे (माषादिक्षेत्रभवाया वकुलपुष्पाभलोहितपुष्पायाः **'हस्तिकर्णीभपत्रस्य' 'शिरीहस्थिनी'** इति ख्यातायाः) ॥

तृणशून्यं तु मल्लिका ॥ ६९ ॥

भूपदी शीतभीरुश्च

तृणेति ॥ 'इतो धत्तूरान्तानि पुष्पाणि' इति स्वामी । तृणशून्ये स्थाने साधु । 'तत्र साधुः' (४।४।९८) इति यत् । हलो यमाम् (८।४।६४) यलोपः । **'तृणशून्यं** मल्लिकायां' तथा स्यात्केतकीफले' इति विश्वमेदिन्यौ ॥*॥—'तृणशूले गुल्मे साधु **तृणशूल्यम्'**— इति तु स्वामी ॥ (१) ॥*॥ मल्लते गन्धम् । मल्यते वा । 'मल्ल धारणे' (भ्वा० आ० से०) । 'सर्वधातुभ्य इन्' (उ० ४।११८) । वा ङीष् (ग० ४।१।४५) । स्वार्थे कन् (५।३।७५) । **'मल्लिको** हंसभिद्यपि । **मल्लिका** तृणशून्येऽपि मीनमृत्पात्रभेदयोः' इति मेदिनी ॥ (२) ॥*॥ भुवि पदमस्याः । गौरादिः (४।१।४१) ॥ (३) ॥*॥ शीताद्भीरुः ॥*॥ 'शतभीरुः' इति वा पाठः । शतं वियोगिनो भीरवोऽस्याः । 'मल्लिका **शतभीरुश्च गवाक्षी भद्रमल्लिका** । शीतभीरुर्मदायन्ती भूपदी तृणशून्यकम्' इति वाचस्पतिः ॥ (४) ॥*॥ चत्वारि **'मल्लिकायाः' 'वेल्लि'** इति ख्यातायाः ॥

सैवास्फोता वनोद्भवा ।

सैवेति ॥ आस्फोटयति । 'स्फुटिर् विकसने' (भ्वा० प० से०) । पचाद्यच् । पृषोदरादित्वात् (६।३।१०९) टस्य तो वा । **'आस्फोता** विष्णुकान्तायां वनमल्लयर्कपर्णयोः' इति रभसः । **'आस्फोतस्तु** पुमानर्कपर्णे स्यात्कोविदारके । **आस्फोता** गिरिकर्ण्यां च वनमल्लयां च योषिति' इति मेदिनी ॥ (१) ॥*॥ एकं **'वनमल्लयाः'** ॥

शेफालिका तु सुवहा निर्गुण्डी नीलिका च सा ७०

शेफेति ॥ शेरते शेफा अलयोऽस्याम् । वा ङीष् ( ) । स्वार्थे रकन् (५।३।७५) ॥ (१) ॥*॥ सुष्ठु वहत्यामोदम् । 'वह प्रापणे' (भ्वा० उ० अ०) । पचाद्यच् (३।१।१३४) । **'सुवहा** सल्लक्येलापर्णीगोधापदीषु वीणायाम् । राज्ञाशेफालिकयोः स्त्री, सुखवाह्येऽन्यलिङ्गः स्यात्' (इति मेदिनी) ॥ (२) ॥*॥ नीलवर्णा । 'नीलादौषधौ' 'प्राणिनि च' (वा० ४।१।४२) इति ङीष् । स्वार्थे कन् (५।३।७५) । **'नीलिका** नीलिनीक्षुद्ररोगशेफालिकासु च' (इति मेदिनी) ॥ (४) ॥*॥ चत्वारि **'कृष्णपुष्पाया निर्गुण्ड्याः' 'न्यवारी'** इति ख्यातायाः ॥

सितासौ श्वेतसुरसा भूतवेशी

सितेति ॥ शोभनो रसोऽस्याः । श्वेता चासौ सुरसा च ॥ (१) ॥*॥ भूतानि विशति । 'विश प्रवेशने' (तु० प० अ०) । 'कर्मण्यण्' ॥ (२) ॥*॥ द्वे 'श्वेतनिर्गुण्ड्याः' ॥

अथ मागधी ।

गणिका यूथिकाम्बष्ठा

अथेति ॥ मगधे देशे भवा । 'तत्र भवः' (४।३।५३) इत्यण् । **'मागधो** मगधोद्भूते शुक्लजीरकबन्दिनोः । वैश्यतः क्षत्रियापुत्रे **मागधी** स्यात्तु पिप्पली ॥ यूथी भाषाविशेषश्च' इति हैमः ॥ (१) ॥*॥ चित्ताकर्षकत्वाद्गणिकेव । **'गणिका** यूथीवेश्येभीतर्कारीषु ना तु दैवज्ञे' इति मेदिनी ॥ (२) ॥*॥ यूथमस्यस्याः । 'अत इनिठनौ' (५।२।११५) **'यूथिका**म्रातके पुष्पविशेषेऽपि च योषिति' इति मेदिनी ॥ (३) ॥*॥ अम्बेव मातेव तिष्ठति । 'सुपि स्थः' (३।२।४) इति कः । 'अम्बाम्ब-' (८।३।९७) इति षत्वम् । 'ष्ठ्यापोः' (६।३।६३) इति ह्रस्वः । —अम्बे तिष्ठति—इति स्वामी । **'अम्बष्ठो** देशभेदेऽपि विप्राद्वैश्यासुतेऽपि च' । **'अम्बष्ठाप्यम्ललोण्यां** स्यात्पाठायूथिकयोरपि' इति विश्वमेदिन्यौ ॥ (४) ॥*॥ चत्वारि **'यूथिकायाः' 'जूही'** इति ख्यातायाः ॥

सा पीता हेमपुष्पिका ॥ ७१ ॥

सेति ॥ हेमवर्णं पुष्पमस्याः । 'पाककर्ण-' (४।१।५४) इति ङीष् । **'स्याद्धेमपुष्पिका** यूथ्यां चम्पको हेमपुष्पकः' (इति मेदिनी) ॥ (१) ॥*॥ एकं **'तस्या एव पीतपुष्पायाः'** ॥

अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवी लता ।

अतीति ॥ अतिक्रान्तो मुक्तां शौक्ल्यात् । 'अल्पाद्यः' (वा० २।२।१८) । इति तत्पुरुषः । 'गोस्त्रियोः-' (१।२।४८) इति ह्रस्वः । यद्वा मुक्तान् विरक्तान् । **'अतिमुक्तस्तु** निःसङ्गे वासन्त्यां तिनिशेऽपि च' (इति मेदिनी) ॥ (१) ॥*॥ पुण्डति पुण्ड्यते वा 'मुडि खण्डने' 'पुडि च' (भ्वा० प० से०) । 'स्फायि-' (उ० २।१३) इति रक् । स्वार्थे कन् (५।३।७५) ॥ (२) ॥*॥ वसन्ते पुष्यति । 'कालात्साधुपुष्यत्-' (४।३।४३) इत्यण् । **'वासन्ती** माधवीयूथ्योरुष्ट्रे नावहिते त्रिषु' (इति मेदिनी) ॥ (३) ॥*॥ मधौ पुष्यति । **'मा-**

१—(कनभावे) शेफालीत्यपि-'कथमितरथा शेफालीषु स्खलत्कुसुमास्त्रपि' इति प्रयोगदर्शनात्-इति मुकुटः ॥

१—'अतिरक्तत्वात्' इति भट्टक्षीरस्वामी ॥

धवोऽजे मधौ राधे वसन्ते न स्त्रियां मिसौ । वार्सन्ती कुट्टनीमद्यमधुशर्करासु स्त्रियाम्' इति मेदिनी । रन्तिदेवोऽपि 'वैशाखे **माधवः** कृष्णे **माधवी** चातिमुक्तके' ॥ (४) ॥*॥ पञ्च **'कुन्दभेदस्य'** ॥

सुमना मालती जातिः

स्विति ॥ सुष्ठु मन्यते । 'मन ज्ञाने' (दि० आ० अ०) असुन् (उ० ४।१८९) । यद्वा शोभनं मनोऽस्याम् । 'स्त्रियां **सुमनसो** भूम्नि पुष्पे, जातौ तु भेदतः । विदुष्यपि यदा दृष्टस्तदा भेदेन शिष्यते' इति व्याडिः ॥*॥ 'सुमनायाश्च पत्रेण' इति सुश्रुतदर्शनात् टाबन्तापि ॥ (१) ॥*॥ मां लक्ष्मीं लतति । 'लत' सौत्रो वेष्टनार्थः । मूलविभुजादित्वात् (वा० ३।२।५) कः । गौरादिः (४।१।४१) । मालं तनोति वा । 'अन्येभ्योऽपि' (वा० ३।२।१००) इति ङः । **'मालती** युवतौ काकमाच्यां जातिविशल्ययोः । ज्योत्स्नायां निशि नद्यां च' (इति हैमः) ॥ (२) ॥*॥ जायते । 'जनी प्रादुर्भावे' (दि० आ० से०) । क्तिच् (३।३।१७४) । 'जनसन–' (६।४।४२) इत्यात्वम् । वा ङीष् (ग० ४।१।४१) यत्तु—जायते प्रीतिरनयेति बाहुलकाज्जनेः कर्तरि क्तिच्–इत्याह तन्न । 'अनया' इति करणविग्रहं प्रदर्श्य 'कर्तरि' इति कथनं व्याहतम् । 'बाहुलकात्' इति च । 'क्तिच्क्तौ च' (३।३।१७४) इति सूत्रस्य सत्त्वात् । **'जातिः** स्त्री गोत्रजन्मनोः । अश्मन्तिकामल्लक्यौश्च सामान्यच्छन्दसोरपि । जातीफले च मालत्याम्' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'जातेः' 'चँबेली'** इति ख्यातायाः ॥

सप्तला नवमालिका ॥ ७२ ॥

सप्तेति ॥ सप्त पर्णानि मनोबुद्धीन्द्रियाणि वा लाति । 'ला दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) । इति कः । 'अथ सप्तला । नवमालाचर्मकषागुञ्जासु पाटलौ स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ नवा सुत्या मालास्याः । कप् (५।४।१५४) ॥ (२) ॥*॥ द्वे **'नवमालिकायाः'** ॥

माध्यं कुन्दम्

मेति ॥ माधे साधु, 'तत्र साधुः' (४।४।९८) इति यत् ।–माधे भवम् । दिगादित्वात् (४।३।५४) यत्–इति प्राञ्चः ॥ (१) ॥*॥ कुं भुवं दायति, द्यति वा । 'दैप् शोधने' (भ्वा० प० अ०) 'दो अवखण्डने' (दि० प० अ०) वा । 'आतः' (३।२।३) इति कः । पृषोदरादिः (६।३।१०९) कुणति । 'कुण शब्दे' (तु० प० से०) । 'अब्दादयश्च' (उ० ४।९८) इति दो वा । यत्तु—'तत्पुरुषे' (६।३।१४) इति द्वितीयाया अलुक्–इति मुकुटः । तन्न । अलौकिकविग्रहे द्वितीयाया अप्रवेशात् । षष्ठ्याः प्रवेशाच्च । **'माध्यः** कुन्दः कुरण्टकः' इति पुंस्काण्डे रत्नकोषात् पुंस्त्वमपि । **'कुन्दो** माध्येऽस्त्री मुकुन्दभ्रमिनिध्यन्तरेषु ना' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'कुन्दस्य'** ॥

रक्तकस्तु बन्धूको बन्धुजीवकः ।

रक्तेति ॥ रक्तपुष्पत्वाद्रक्तः । स्वार्थे कन् (५।३।७५) । (**'रक्तको**ऽम्लानबन्धूकरक्तवस्त्रानुरागिषु' इति मेदिनी) ॥ (१) ॥*॥ बध्नाति चित्तम् । 'बन्ध बन्धने' (क्र्या० प० अ०) । 'उलूकादयश्च' (उ० ४।४१) इत्यूकः । **'बन्धूकं** बन्धुजीवे स्याद्बन्धूकः पीतसारके' (इति मेदिनी) ॥ (२) ॥*॥ बन्धुरिव जीवं जलमस्य ॥ (३) ॥*॥ त्रीणि **'बन्धूकस्य' 'दोपहरिया'** इति ख्यातस्य ॥

सहा कुमारी तरणिः

सहेति ॥ आतपं सहते । 'षह मर्षणे' (भ्वा० आ० से०) । अच् (३।१।१३४) टाप् (४।१।४) । **'सहो** बले न स्त्रियां स्यात्स्त्रियां तु नखमेषजे । दण्डोत्पलामुद्गपर्णीकुमारीपृथिवीषु च' (इति मेदिनी) ॥ (१) ॥*॥ कुमारीव । यद्वा कुमारयति । 'कुमार क्रीडायाम्' (चु० उ० से०) । अच् (३।१।१३४) । गौरादिः (४।१।४१) । यद्वा कामयते । 'कमु कान्तौ' (भ्वा० आ० से०) । 'कमेः किदुच्चोपधायाः' (उ० ३।१३८) इत्यारन् । 'वयसि प्रथमे' (४।१।२०) इति ङीप् । **'कुमारी** रामतरुण्यां नवमाल्ये नदीभिदि । कन्याऽपराजितागौरीजम्बूद्वीपेषु च स्मृता' (इति विश्वः) ॥ (२) ॥*॥ तरत्यनया । 'तॄ प्लवनतरणयोः' (भ्वा० प० से०) । 'अर्तिसृधृभ्रम्यम्यश्यवितृभ्योऽनिः' (उ० २।१०२) । **'तरणिर्द्युमणौ** पुंसि कुमारीनौकयोः स्त्रियाम्' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'कुमार्याः' 'घीउकुआरी'** इति ख्यातायाः ॥

अम्लानस्तु महासहा ॥ ७३ ॥

अम्लेति ॥ न म्लायति स्म । 'गत्यर्थाकर्मक–' (३।४।७२) इति क्तः । 'संयोगादेरातो धातोर्यण्वतः' (८।२।४३) इति नत्वम् । **'अम्लान**स्त्वमले क्षिटीभेदे' इति हैमः । **'अम्लानो** महासहायां ना वाच्यलिङ्गस्तु निर्मले' इति मेदिनी ॥ (१) ॥*॥ महती चासौ सहा च । 'सन्महत्–' (२।१।६१) इति तत्पुरुषः । 'आन्महतः–' (६।३।४३) इत्यात्वम् ।—महतो विमर्दस्य सहा वा–इति मुकुटः । तन्न । असामानाधिकरण्येनाऽप्रसङ्गात् । **'महासहा** माषपर्ण्यामम्लानेऽपि च योषिति' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'महासहायाः' 'कटसरया'**–सामान्यस्य ॥

तत्र शोणे कुरबकः

तत्रेति ॥ तत्राम्लाने शोणे रक्ते । कुत्सित ईषद्वाऽलीनां

१—पूर्वार्धं तु मेदिनीपठितम् । उत्तरार्धानुपूर्वी तु मेदिन्यां नोपलभ्यते किंतु 'मधुशर्करावासन्ती—कुट्टिनीमदिरासु च' इत्यमुपलभ्यते ॥

अल्पमकरन्दत्वाद् रवोऽत्र । बहुव्रीहित्वान्न कादेशः । '**कुरवकः** शोणाम्लानझिंटीप्रभेदयोः' (इति मेदिनी) ॥*॥ कु ईषद्रौति । संज्ञायां कुन् (उ० २।३२) । उवङ् (६।४।७७) उकारद्वयवान् (**कुरुवकः**) इति मुकुटः ॥ (१) ॥*॥ (एकम्) '**रक्तवर्णायाः**' ॥

तत्र पीते कुरुण्टकः ।

तत्रेति ॥ रुण्टति । 'रुटि स्तेयकरणे' (भ्वा० प० से०) । ण्वुल् (३।१।१३३) । कुन् (उ० २।३२) वा । कुत्सितः कोर्वा रुण्टकः । 'कुगति–' (२।२।१८) इति समासः । '**कुरुण्टकः** पीतपुष्पाम्लानझिंटिकयोः पुमान्' (इति मेदिनी) ॥*॥–कुर्यते । 'कुर छेदने' (तु० प० से०) । बाहुलकादण्टः । स्वार्थे कन् (५।३।७५) । ('**कुरण्टी** दारुपुत्र्यां ना झिंट्यम्लानप्रभेदयोः' इति मेदिनी) । इत्येकोकारवान् इति कश्चित् । तत्र 'कुर शब्दे' (तु० प० से०) इति पठितुं युक्तम् ॥ (१) ॥*॥ रक्तपीतपुष्पयुक्त–'**कुरुण्टकः**' '**कुटसरया**'–इति ख्याताया एकैकम् ॥

नीलौ झिंटी द्वयोर्वाणा दासी चार्तगलश्च सा ॥७४॥

नीलेति ॥ वण्यते । 'वण शब्दे' (भ्वा० प० से०) । कर्मणि घञ् (३।३।१९) । '**वाणा** तु वाणमूले स्त्री नीलझिंट्यां पुनर्द्वयोः' (इति मेदिनी) ॥ (१) ॥*॥ दस्यते । 'दसु उपक्षये' (दि० प० से०) । कर्मणि घञ् (३।३।१९) । गौरादिः (४।१।४१) । '**दासी** बाणाभुजिष्ययोः' (इति मेदिनी) ॥ (२) ॥*॥ आर्तः क्षीणो गलति । 'गल अदने' (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (३) ॥*॥ त्रीणि '**नीलझिंटिकायाः**' ॥

सैरीयकस्तु झिंटी स्यात्

सैरीयेति ॥ सीरे भवः । 'तत्र भवः' (४।३।५३) इत्यण् । कर्षः । तत्र भवः 'वृद्धाच्छः' (४।२।११४) । 'संज्ञायां कन्' (५।३।७५) । 'सैरेयकः' इति पाठे 'नद्यादिभ्यो ढक्' (४।२।९७) । 'सैरीयकः **सहचरः सैरेयश्च सहाचरः**[1] । पीतो रक्तोऽथ नीलश्च कुसुमैस्तं विभावयेत् । पीतः कुरुण्टको ज्ञेयो रक्तः कुरुवकः स्मृतः । नील आर्तगलो दासीवाणा **ओदनपाक्यपि**' ॥ (१) ॥*॥ 'झिम्' इति रटति अच् (३।१।१३४) । पृषोदरादिः (६।३।१०९) । गौरादिङीष् (४।१।४१) ॥ (२) ॥*॥ द्वे '**झिंटीसामान्यस्य**' ॥

तस्मिन् कुरवकोरुणे ।

तस्मिन्निति ॥ तस्मिन् सैरेयके ॥ (१) ॥*॥ एकम् '**रक्तकुरुण्टकस्य**' ॥

पीता कुरण्टको झिंटी तस्मिन् सहचरी द्वयोः ॥७५॥

पीतेति ॥ सह चरति । पचाद्यौ 'चरट्' इति टित्त्वनिपातनात् ङीप् (४।१।१५) । यत्तु—'भिक्षासेना–' (३।२।१७) इति चकारस्यानुक्तसमुच्चयार्थत्वात् 'चरेष्टः'–इत्याह मुकुटः । तन्न । तत्र प्रमाणाभावात् । ('भवेत्सहचरो झिंट्यां द्वयोरनुचरे त्रिषु' इति मेदिनी) ॥ (१) ॥*॥ 'अन्येषामपि' (६।३।१३७) इति दीर्घत्वे 'सहाचरः' इत्यपि, इति स्वामी–इति मुकुटः । तदपि न । आङैव सिद्धत्वात् ॥ (२) ॥*॥ द्वे '**पीतकुरुण्टकस्य**' ॥

ओड्रपुष्पं जवा

ओड्रेति ॥ आ ईषदुनत्ति । 'उन्दी क्लेदने' (रु० प० से०) 'स्फायितञ्चि–' (उ० २।१३) इति रक्, बाहुलकाद्दस्य डत्वम् । ओड्रं पुष्पमस्य । यत्तु—'उड श्लेषणे' । बाहुलकाद्रन्—इति मुकुटः । तन्न । धातुपाठे उडेरदर्शनात् । ('**ओड्राः** पुंभूम्नि नीवृति । **ओड्रः** ख्यातो जवापुष्पे' इति मेदिनी) ॥ (१) ॥*॥ जवति 'जु' सौत्रो धातुर्गतौ वेगे च । अच् (३।१।१३४) ॥ (१) ॥*॥ जपति । अच् (३।१।१३४) । 'जवायां तु जपा स्मृता' इति धर्मदासः । 'ओड्रपुष्पेऽपि वृक्षेऽपि **जवा**शब्दः प्रकीर्तितः' इति त्रिकाण्डशेषः ॥ (२) ॥*॥ द्वे '**जपायाः**' '**ओडर**' इति ख्यातायाः ॥

पुष्पं वज्रपुष्पं तिलस्य यत् ।

पुष्पमिति ॥ वज्रमिव पुष्पम् ॥ (१) ॥*॥ तिलस्य (यत्) पुष्पम् ॥*॥ एकम् '**तिलपुष्पस्य**' ॥

प्रतिहासशतप्रासचण्डातहयमारकाः ॥ ७६ ॥

करवीरे

प्रतीति ॥ प्रतीपो हासो विकासोऽस्य ॥ (१) ॥*॥ शतं प्रासाः कुन्ता इव पत्राण्यस्य । शतं पुष्पाणि प्रास्यति वा । 'असु क्षेपणे' (दि० प० से०) । 'कर्मण्यण्' (३।२।१) ॥ (२) ॥*॥ चण्डमतति । 'अत सातत्यगमने' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) ॥ (३) ॥*॥ हयानां मारकः ॥ (४) ॥*॥ करं वीरयति । 'वीर विक्रान्तौ' (चु० उ० से०) । 'कर्मण्यण्' (३।२।१) । '**करवीरः** कृपाणे स्यादैत्यभेदाश्वमारयोः । **करवीर्य**दितीश्रेष्ठगवीपुत्रवतीषु च' (इति मेदिनी) ॥ (५) ॥*॥ पञ्च '**करवीरस्य**' '**कणेर**' इति ख्यातस्य ॥

करीरे तु ककरग्रन्थिलावुभौ ।

करीति ॥ किरति । 'कॄ विक्षेपे' (तु० प० से०) 'कॄशॄपॄकटिशौटिभ्य ईरन्' (उ० ४।३०) । यत्तु—'कॄगृशौडिभ्य ईरच्'—इति मुकुटः । तन्न । उणादिवृत्तिषु तत्पाठस्यादर्शनात् । करिणमीरयति वा । 'वंशाङ्कुरे **करीरोऽस्त्री**

१—अत्र रेफो निरुकारः 'कुरवकारवकारणताम्' इति रघुः–इति मुकुटः । 'कुरवकैः कुजन्मभिः सह संवससि' इति दमयन्तीश्लेषश्च ॥ २—'किरातिके कुरु कुरुवकाञ्चितां चिताम्' इति बाणः–इति मुकुटः ॥ ३—अस्यार्धश्लोकस्य 'सैरेयकस्तु झिंटी स्यात्तस्मिन्कुरवकोऽरुणे' इत्यर्धव्याख्योत्तरं व्याख्या युक्ता ॥

वृक्षभिद्घटयोः पुमान् । **करीरी** चीरिकायां च दन्तमूले च दन्तिनाम्' (इति मेदिनी) ॥ (१) ॥*॥ 'क्र' इति करोति । अच् (३।१।१३४) । टः (३।२।२०) वा । **'क्रकरः** करीरवृक्षे दीने क्रकचे च पक्षिभेदे च' (इति मेदिनी) ॥ (२) ॥*॥ ग्रन्थिरस्यास्ति । सिध्मादित्वात् (५।२।९७) लच् । ग्रन्थि लाति वा । **'ग्रन्थिल**स्तु करीरद्रौ विकङ्कततरौ पुमान् । सग्रन्थौ त्रिषु' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'करीरस्य' 'करील'** इति ख्यातस्य ॥

उन्मत्तः कितवो धूर्तो धत्तूरः कनकाह्वयः ॥ ७७ ॥ मातुलो मदनश्च

उन्मत्त इति ॥ उन्मत्तयति । 'तत्करोति–' (वा० ३।१।२६) इति णिच् । पचाद्यच् (३।१।१३४) **'उन्मत्त** उन्मादवति धूस्तूरमुचुकुन्दयोः' (इति मेदिनी) ॥ (१) ॥*॥ कितवाः सन्त्यस्य ग्राहकाः । अर्शआद्यच् (५।२।१२७) । कितान् निवसतो वञ्चति 'वञ्चु गतौ' (भ्वा० प० से०) 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः । **'कितवो** धूर्तवन्मत्ते वञ्चके कनकाह्वये' (इति विश्वः) ॥ (२) ॥*॥ धूर्व्यते स्म । 'धुर्वी हिंसायाम्' (भ्वा० प० से०) कर्मणि क्तः (३।२।१०२) ।—धूर्वति—इति तु प्राञ्चः । तत्र कर्तरि क्तो दुर्लभः । 'मतिबुद्धिपूजार्थेभ्यश्च' (३।२।१८८) इति चकाराद्वा बोध्यः । यद्वा धूर्वणं धूर्तम् । भावे क्तः (३।३।११३) । तदस्यास्ति । अर्शआद्यच् (५।२।१२७) । **'धूर्त** तु खण्डलवने धूस्तूरे ना विटे त्रिषु' (इति मेदिनी) ॥ (३) ॥*॥ धयति धातून् । 'धेट् पाने' (भ्वा० प० अ०) बाहुलकादूरच् । पृषोदरादिः (६।३।१०९) । 'धत्तूरस्तु स्मृतो धूर्तो **देविता** कितवः **शठः**' इति स्वामी ॥*॥ धूसयति । 'धूस कान्तिकरणे' (चु० प० से०) । क्विप् (३।२।१७८) तूर्यते । 'तूरी त्वरणहिंसयोः' (दि० आ० से०) । इगुपधत्वात् कः (३।१।१३५) । धूश्चासौ तूरश्च । **'धुस्तुरस्तु पुण्डरीको धूस्तूरः** कनकाह्वयः' इति शब्दार्णवः–इति मुकुटः ॥ (४) ॥*॥ कनकमाह्वयो यस्य । **'कनकं** हेम्नि पुंसि स्यात्किंशुके नागकेसरे । धत्तूरे काञ्चनारे च कालीये चम्पकेऽपि च' (इति मेदिनी) ॥ (५) ॥*॥ मास्ति नास्ति तुला यस्य । मा श्रीस्तुलास्य, इति वा । कनकनामत्वात् । **'मातुलो** व्रीहिभिन्मातृभ्रात्रोश्च मदनद्रुमे । धत्तूरे' (इति मेदिनी) ॥ (६) ॥*॥ मदयति । 'मदी हर्षग्लेपनयोः' (भ्वा० प० से०) । ल्युः (३।१।१३४) । **'मदनः** स्मरवसन्तद्रुभिद्धत्तूरसिह्लके' (इति मेदिनी) ॥ (७) ॥*॥ सप्त **'धत्तूरस्य'** ॥

अस्य फले मातुलपुत्रकः ।

अस्येति ॥ मातुलस्य पुत्र इव । कन् (५।३।९६) **'मातुलपुत्रक** इत्यपि मामकतनये फले च धूर्तस्य' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'धत्तूरफलस्य'** ॥

फलपूरो बीजपूरः

फलेति ॥ फलेन पूर्यते । 'पूरी आप्यायने' (दि० आ० से०) 'इगुपध–' (३।१।१३४) इति कः । कर्मणि घञ् (३।३।१९) वा । मुकुटस्तु—फलं बीजं च पूरयति । कः—इत्याह । तत्राणुचितः । इगुपधत्वाभावाण्णिजन्तस्य ॥ (१) ॥*॥ एवं बीजपूरः ॥ (२) ॥*॥ द्वे **'मातुलिङ्गस्य' 'विजौरा'** इति ख्यातस्य ॥

रुचको मातुलुङ्गके ॥ ७८ ॥

रुचेति ॥ रोचते । 'रुच दीप्तावभिप्रीतौ च' (भ्वा० आ० से०) अन्तर्भावितण्यर्थः । क्वुन् (उ० ३।३२) । **'रुचको** बीजपूरे च निष्के दन्तकपोतयोः । न द्वयोः सर्जिकाक्षारेऽप्यश्वाभरणमाल्ययोः । सौवर्चलेऽपि मङ्गल्यद्रव्ये चाप्युत्कटेऽपि च' (इति मेदिनी) ॥ (१) ॥*॥ मीनात्यरुचिम् 'मीञ् हिंसायाम्' (क्र्या० उ० अ०) । बाहुलकात्तुन् । लुज्यते । 'लुजि भासार्थः' (चु० प० से०) । घञ् (३।३।१९) न्यङ्क्वादिः (७।३।५३) मातुश्चासौ लुङ्गश्च । स्वार्थे कन् (५।३।७५) ॥ (२) ॥*॥ द्वे **'मातुलिङ्गस्य'** । स्वामी तु चतुर्णां पर्यायतामाह । तदुक्तम्—'फलपूरो बीजपूरः **केसरी बीजपूरकः । बीजकः केसराम्लश्च** मातुलुङ्गश्च पूरकः' । अनेकार्थे—'सौवर्चलं मातुलुङ्गं शिलाचन्दनपेषणी । ग्रीवाभरणकं चैषु चतुर्षु रुचकं स्मृतम्'—इति ॥

समीरणो मरुवकः प्रस्थपुष्पः फणिज्जकः । जम्बीरोऽपि

समीति ॥ समीरयति 'ईर गतौ' (अ० आ० से०) । ल्युः । **'समीरण**स्तु पवने पथिके च फणिज्जके' (इति मेदिनी) ॥ (१) ॥*॥ मरौ वाति । क्वुन् । (उ० २।३२) । 'भवेन्मरुवकः पुष्पभिच्छल्यद्रुफणिज्जके' ॥ (२) ॥*॥ प्रस्थे सानौ पुष्प्यति । 'पुष्प विकसने' (दि० प० से०) । अच् (३।१।१३४) ॥ (३) ॥*॥ फणी जातोऽस्मात् । फणाभपत्रपुष्पत्वात् । फणी उज्झको वर्जकोऽस्य, इति केचित् । उभौ पृषोदरादी (६।३।१०९) ॥ (४) ॥*॥ जम्यते । 'जमु अदने' (भ्वा० प० से०) विच् (३।२।७५) । वीरयति । अच् (३।१।१३४) । जम् चासौ वीरश्च । **'जंवीरः** प्रस्थपुष्पे स्यात्तथा दन्तशठद्रुमे' (इति मेदिनी) ॥ (५) ॥*॥ पञ्च **'जम्बीरस्य' 'मरुआ'** इति ख्यातस्य ॥

अथ पार्णासे कठिंजरकुठेरकौ ॥ ७९ ॥

अथेति ॥ पर्णान्यस्यति । 'असु क्षेपणे' (दि० प० से०) । 'कर्मण्यण्' (३।२।१) । यद्वा पर्णैरसति । 'अस दीप्तौ' (भ्वा० उ० से०) । पचाद्यच् (३।१।१३४) ॥ (१) ॥*॥ कठिनं

१—इतःपरम् 'भद्रायाम्' इत्यपि लिखितमासीत् । तथापि मेदिन्यां तदपाठात्त्यक्तम् ॥

१—'पि कटके' इति पाठः ॥

अर्जयति । 'ऋदृ' (दि० प० से०) ण्यन्तः । 'कर्मण्यण्' (३।२।१) । पृषोदरादिः (६।३।१०९) ॥ (२) ॥*॥ कुण्ठति । 'कुठ प्रतीघाते' 'कुठी च' (भ्वा० प० से०) । 'पति-कठि-कुठि-' (उ० ५।५८) इत्येरक् । आगमशास्त्रस्यानित्यत्वान्न दुक् ॥—'कुठ शुठ प्रतीघाते' 'कुठी च' इत्यतो 'दर्दुरादयश्च' (उ० ५।५०) इति टरक् । पृषोदरादित्वात् (उ० ६।३।१०९) अनुपधालोपः—इति मुकुटः । तन्न । कुठ-धातोः सत्वे पृषोदरादित्वकल्पनैवंपर्य्यात् । टकल्पनाऽपि व्यर्था । एरकासिद्धत्वात् ॥ (३) ॥*॥ त्रीणि **'पर्णासस्य'** ॥

सिनेऽर्जकोऽत्र

र्मीति ॥ अत्र पर्णासे । अर्जयति । 'अर्ज सर्ज अर्जने' (भ्वा० प० से०) । 'ऋज गतिस्थानार्जनोपार्जनेषु' (भ्वा० आ० से०) वा ण्यन्तः । ण्वुल् (३।१।१३३) ॥ (१) ॥*॥ एकं **'श्वेतपर्णासस्य'** ॥

पाठी तु चित्रको वह्निसंज्ञकः ।

पेति ॥ पाठोऽस्यास्ति । 'अतः' (५।२।११५) इतीनिः ॥ (१) ॥*॥ चित्तं बुद्धिं त्रायते । 'त्रैङ् पालने' (भ्वा० आ० अ०) । 'अर्तेऽनुप-' (३।२।३) इति कः । स्वार्थे कन् (५।३।७५) । **'चित्रकं** तिलके ना तु व्याघ्रभिक्षुपाठिषु' (इति मेदिनी) ॥ (२) ॥*॥ वह्निः संज्ञा यस्य । वह्निपर्यायनामक इत्यर्थः ॥ (३) ॥*॥ त्रीणि **'चित्रकस्य' 'चीता'** इति ख्यातम् ॥

अर्कोह्वयसुकास्फोतगणरूपविकीरणाः ॥ ८० ॥

मन्दारश्चार्कपर्णे

अर्केति ॥ अर्के आह्वा यस्य । **'अर्कोऽर्कपर्णे** स्फटिके रक्तं [1]लोहितचन्दने' (इति मेदिनी) ॥ (१) ॥*॥ वसति । 'वस निवासे' (भ्वा० प० अ०) । 'शृस्वृस्निहि-' (उ० १।१०) इत्युः । स्वार्थे कन् (५।३।७५) । **'वसुकं** रोमके पुंसि शिवमल्लयर्कपर्णयोः' (इति मेदिनी) ।—बाहुलकात् 'भृञ्-' इत्युः—इति मुकुटः । तन्न । उक्तसूत्रे वसतेर्ग्रहणात् ॥ (२) ॥*॥ आ स्फोटयति । 'स्फुटिर् विकसने' । (भ्वा० प० से०) । अच् (३।१।१३४) । पृषोदरादिः (६।१।१०९) । **'आस्फोतस्तु** पुमानर्कपर्णे स्यात् कोविदारके । **आस्फोता** गिरिकर्ण्यां च वनमाषां च योषिति' (इति मेदिनी) ॥ (३) ॥*॥ नानारूपाः बहूनि रूपाण्यस्य ॥ (४) ॥*॥ विकिरति । 'कॄ विक्षेपे' (तु० प० से०) । 'कृवृ-' (उ० २।८१) इति क्युन् । इत्वम् (७।१।१००) रपरत्वम् (१।१।५१) बाहुलकादीर्घः ॥*॥ विविधः किरणोऽस्य, इत्यन्ये ॥ (५) ॥*॥ मन्दान् इयर्ति । अण् (३।२।३) मन्दैरर्यते वा । घञ् (३।३।१९) । **'मन्दारः** स्यात्सुरद्रुमे । पारिभद्रेऽर्कपर्णे च **मन्दारो** ह्लिमभूतयोः' (इति मेदिनी) ॥ (६) ॥*॥ अर्कभानि तीक्ष्णानि पत्राण्यस्य ॥ (७) ॥*॥ सप्त **'अर्कस्य' 'आक'** इति ख्यातस्य ॥

अत्र शुक्लेऽलर्कप्रतापसौ ।

अत्रेति ॥ अस्मिन् शुक्ले । अलति । 'अल भूषणादौ' (भ्वा० प० से०) क्विप् (३।२।७६) । अल् चासावर्कश्च । **'अलर्को** धवलार्के स्याद्योगोन्मादितकुक्कुरे' (इति मेदिनी) ।—अलयति-इति मुकुटः । तन्न । णाबुपधावृद्धिप्रसङ्गात् ॥ (१) ॥*॥ प्रतापं चक्षुस्तेजः स्यति । 'षोऽन्तकर्मणि' (दि० प० अ०) । कः (३।२।३) । प्रकृतास्तापसा येन वा ॥ (२) ॥*॥ द्वे **'श्वेतार्कस्य'** ॥

शिवमल्ली पाशुपत एकाष्ठीलो वुको वसुः ॥ ८१ ॥

शिवेति ॥ शिवप्रिया मल्ली ॥ (१) ॥*॥ पशुपतेरयम् । तत्प्रियत्वात् । **'पाशुपतो** वकपुष्पे स्यात्पशुपत्यधिदैवते च तद्भक्ते' (इति मेदिनी) ॥ (२) ॥*॥ एकमस्थि लाति । 'सुपामादित्वात्' (८।३।९८) षत्वं दीर्घत्वं च । **'एकाष्ठीला** वनतिक्तकौषधौ पुंसि बकपुष्पे' (इति मेदिनी) ॥ (३) ॥*॥ वाति । बाहुलकात् कुकः । कुनोऽकारस्योत्वं वा ॥*॥ **'बकः'** इति पाठे कुन् (उ० २।३२) । **'बकस्तु** बकपुष्पे स्यात्कङ्के श्रीदे च रक्षसि' (इति मेदिनी) ॥ (४) ॥*॥ वस्ते, वसति वा । 'शृस्वृस्निहित्रप्यसिवसि-' (उ० १।१०) इत्युः । **'ब (व)-सुर्ना** देवभेदाग्निभाय्योक्कबकराजसु । (क्लीबं वृष्यौषधेऽश्वे च रैरत्नमधुरे त्रिषु') इति मेदिनी) ॥ (५) ॥*॥ पञ्च **'गुल्मा'** इति ख्यातस्य **'बकपुष्पस्य'** ॥

बन्दा वृक्षादनी वृक्षरुहा जीवन्तिकेत्यपि ।

बन्देति ॥ बन्द्यते । 'वदि अभिवादनस्तुत्योः' (भ्वा० आ० से०) । 'गुरोश्च' (३।३।१०३) इत्यः । **('बन्दा** लतान्तरे स्मृता । भिक्षुक्यामपि बन्द्यां च') (इति स्पर्शादौ मेदिनी) ॥ (१) ॥*॥ वृक्षमत्ति । 'अद भक्षणे' (अ०प०अ०) ल्युट् (३।३।११३) । **'वृक्षादनी** तु बन्दायां विदारीकन्दकेऽपि च' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ वृक्षं रोहति । मूलविभुजादित्वात् (३।२।५) कः । वृक्षे रोहति इति वा । 'इगुपध-' (३।१।१३५) इति कः ॥ (३) ॥*॥ जीवति । 'रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि' (उ० ३।१२७) इति झच् षित्त्वात् (४।१।४१) ङीष् । कन् (५।३।७५) । **'जीवन्तिका** गुडूच्यां च जीवाख्यशाकबन्दयोः' (इति मेदिनी) ॥ (४) ॥ चत्वारि **'वृक्षोपरिजातलताविशेषस्य'** ॥

वत्सादनी छिन्नरुहा गुडूची तन्त्रिकाऽमृता ॥ ८२ ॥

जीवन्तिका सोमवल्ली विशल्या मधुपर्ण्यपि ।

वत्सेति ॥ वत्सैरद्यते । 'अद भक्षणे' (अ० प० अ०) । ल्युट् (३।१।११३) ॥ (१) ॥*॥ छिन्ना रोहति । 'इगुपध-' (३।१।१३५) इति कः । 'ह्यापोः' (६।३।६३) इति ह्रस्वः ॥ (२) ॥*॥ गुडति । 'गुड रक्षणे' (तु० प० से०) । बाहुल-

1—'मूलैयोः' इति पाठः ॥

कादूचट् ॥ (३) ॥*॥ तन्त्रयति । 'तन्त्रि कुटुम्बधारणे' (चु० उ० से०) । ण्वुल् (३।१।१३३) ॥ (४) ॥*॥ न मृतमस्याः । **'अमृता** मागधीपथ्यागुडूच्यामलकीषु च' (इति मेदिनी) ॥ (५) ॥*॥ जीवति । झच् (उ० ३।१२७) । **'जीवन्तिका** गुडूच्यां च जीवाख्यशाकबन्दयोः' इति मेदिनी ॥ (६) ॥*॥ सोमस्य वल्ली ॥(७) ॥*॥ विगतं शल्यमस्याः । **'विशल्या**ऽग्निशिखादन्तीगुडूचीत्रिपुटासु च' (इति मेदिनी) ॥ (८) ॥*॥ मधुमयानि पर्णान्यस्याः । 'पाककर्ण–' (४।१।५४) इति ङीष् ॥ (९) ॥*॥ नव **'गुडूच्याः'** ॥

मूर्वा देवी मधुरसा मोरटा तेजनी स्रवा ॥ ८३ ॥
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ।

मूर्वेति ॥ मूर्वति । 'मुर्वी बन्धने' (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (१) ॥*॥ दीव्यति । पचाद्यौ (ग० ३।१।१३४) 'देवट्' इति निपातनात् (४।१।४५) ङीप् । मुकुटोक्तं गौरादित्वं चिन्त्यम् । **'देवी** कृताभिषेकायां तेजनीस्पृक्कयोरपि' (इति मेदिनी) ॥ (२) ॥*॥ मधु रसोऽस्याः । 'भवेन्मधुरसा द्राक्षामूर्विकादुग्धिकासु च' (इति मेदिनी) ॥ (३) ॥*॥ मुरति । 'मुर संवेष्टने' । 'शकादिभ्योऽटन्' (उ० ४।८१) । (**'मोरटं** तु भवेदिक्षुमूलाङ्कोटप्रसूनयोः ।) सप्तरात्रात्परक्षीरे, मूर्विकायां तु **मोरटा'** (इति मेदिनी) ॥ (४) ॥*॥ तेजति । 'तेज पालने' (भ्वा० प० से०) । ल्युट् (३।३।११३) ॥ (५) ॥*॥ स्रवति । 'स्रु गतौ' (भ्वा० प० अ० अच् (३।१।१३४) ॥*॥ संज्ञापूर्वकत्वाद्गुणाभावे स्रुवाऽपि । **'स्रुवा** द्वयोर्होमपात्रे सल्लकीमूर्वयोः स्त्रियाम्' (इति मेदिनी) ॥ (६) ॥*॥ मधु लाति । 'आतोऽनुप–' (३।२।३) इति कः । 'अन्येषामपि' (६।३।१३७) इति दीर्घः ॥ (७) ॥*॥ मधुनः श्रेणिरत्र ॥ (८) ॥*॥ गोः कर्ण इव, गौः कर्णो यस्याः, इति वा । 'पाककर्ण–' (४।१।५४) इति ङीष् **'गोकर्णो**ऽश्वतरेऽपि स्यान्मृगसर्पगणान्तरे । अङ्गुष्ठानामिकोन्माने **गोकर्णी** मूर्विकौषधौ' इति विश्वः[1] ॥ (९) ॥*॥ पीलोरिव पर्णान्यस्याः । 'पाककर्ण–' (४।१।५४) इति ङीष् । **'पीलुपर्णी** चिंचिकायां मूर्वायामौषधीभिदि' (इति मेदिनी) ॥ (१०) ॥*॥ दश **'मूर्वायाः' 'मुहार'** इति ख्यातायाः ॥

पाठाऽम्बष्ठा विद्धकर्णी स्थापनी श्रेयसी रसा ॥८४॥
एकाष्ठीला पापचेली प्राचीना वनतिक्तिका ।

पाठेति ॥ पठ्यते । 'पठ व्यक्तायां वाचि' (भ्वा० प० से०) । कर्मणि घञ् (३।३।१९) । **'पाठ**स्तु पठने ख्यातो विद्धकर्ण्यां तु योषिति' (इति मेदिनी) ॥ (१) ॥*॥ **'अम्बष्ठा**ऽप्यम्ललोण्यां स्यात् पाठायूथिकयोरपि' (इति मेदिनी) ॥ (२) ॥*॥ विद्धौ कर्णौ यया ॥*॥—अविद्धोऽच्छिद्रः पर्णरूपः कर्णोऽस्याः—इति मुकुटः ॥ (३) ॥*॥ स्थापयति । ल्युट् (३।३।११३) । **'स्थापनं** रोपणे, पुंसि वने, पाठौषधौ स्त्रियाम्' (इति मेदिनी) ॥ (४) ॥*॥ अतिशयेन प्रशस्ता । 'प्रशस्यस्य श्रः' (५।३।६०) । **'श्रेयसी** करिपिप्पल्यामभयापाठयोरपि' (इति मेदिनी) ॥ (५) ॥*॥ रस्यते 'रस आस्वादने' (चु० उ० से०) । कर्मणि घञ् (३।३।१९) अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः । **'रसो** गन्धरसे जले । शृङ्गारादौ विषे वीर्ये तिक्तादौ द्रवरागयोः । देहधातुप्रभेदे च पारदस्यादयोः पुमान् । स्त्रियां तु रसनापाठासल्लकीकङ्कुभूमिषु' (इति मेदिनी) ॥ (६) ॥*॥ (७) ॥*॥ पापे चलति । 'चल विलसने' (तु० प०से०) । पचाद्यौ 'चेलट्' इति निपातनात् ङीप् (४।१।१५) । 'गौरादित्वकल्पनं मुकुटकृतं व्यर्थम् । पचेर्यङन्तादचि 'पापक्ति' इति पापचो वायुः । तमीरयति वा । अण् (३।२।१) ॥ (८) ॥*॥ प्राचि भवा । 'विभाषाञ्चेः' (५।४।८) इति खः ॥ (९) ॥*॥ वने तिक्ता । स्वार्थे कन् (५।३।७५) ॥ (१०) ॥*॥ दश **'पाठा'** इति ख्यातायाः ॥

कटुः कटंवराऽशोकरोहिणी कटुरोहिणी ॥ ८५ ॥
मत्स्यपित्ता कृष्णभेदी चक्राङ्गी शकुलादनी ।

केति ॥ कटति 'कटे वर्षावरणयोः' (भ्वा० प० से०) । 'श्वसृवस्निहि–' (उ० १।१०) इत्यत्र चकारादुः ।—'वटिकटिभ्यां च' इत्युः—इति मुकुटः । तन्न । उज्ज्वलदत्तादिषु तत्सूत्रस्यादर्शनात् । **'कटुः** स्त्री कटुरोहिण्यां लताराजिकयोरपि । (नपुंसकमकार्ये स्यात्पुंलिङ्गे रसमात्रके । त्रिषु तद्वत्सुगन्ध्योश्च मत्सरेऽपि खरेऽपि च') (इति मेदिनी) ॥ (१) ॥*॥ कटति । अच् (३।१।१३४) । कटं (रोगम्) वृणोति । 'वृञ् वरणे' (स्वा० उ० से०) । 'संज्ञायां भृतृ–' (३।२।४६) इति खच् । 'अरुर्द्विषत्–' (६।३।६७) इति मुम् ॥*॥—'कटंभरा' इति पाठः—इत्यन्ये । **'कटंभरा** प्रसारण्यां रोहिण्यां गजयोषिति । कलम्बिकायां गोलायां वर्षाभूमूर्वयोरपि' (इति मेदिनी) ॥ (२) ॥*॥ अशोक इव रोहति । 'कर्तर्युपमाने' (३।२।७९) इति णिनिः । **'अशोकरोहिणी** शक्ता चक्राङ्गी शकुलादनी' इति निघण्टुः ॥*॥ व्यस्तमपीदं नाम । **'अशोकः** कटुरोहिण्या**मशोको** वञ्जुलद्रुमे' इति रभसः । (**'अशोक**स्त्रिषु निःशोके पुंसि कङ्केलिपादपे । स्त्रियां तु कटुरोहिण्यां पारदे स्यान्नपुंसकम्' (इति मेदिनी) ॥*॥ **'रोहिणी** कटुरोहिण्याम्' इति रुद्रः । **'रोहिणी** कण्ठरुग्भिदि । भ्रमित्कटंभरासोमवल्केषु लोहितागवोः' (इति मेदिनी) ॥ (३) ॥*॥ कटुश्चासौ रोहिणी च । 'कटुरोहिण्यरिष्टा च प्रोक्ता तिक्तकरोहिणी'

१—विश्वे तु 'गोकर्णोऽश्वतरे सर्पे सारङ्गे प्रमथान्तरे' इत्येवं पाठ उपलभ्यते ॥

इति निघण्टुः ॥ (४) ॥*॥ मत्स्यानां पित्तमिव । तद्वत्स्वादुत्वात् ॥ (५) ॥*॥ कृष्णो वर्णेन भेदश्छेदोऽस्याः । कृष्णं मलं भिनत्ति वा । 'कर्मण्यण्' (३।२।१) । ङीप् (४।१।१५) । 'कृष्णभेदा चण्डरुहा' इति निघण्टुः ॥ (६) ॥*॥ चक्राकारमङ्गमस्याः । गौरादिः (४।१।४१) । 'अङ्गगात्र–' इति निर्मूलम् । **'चक्राङ्गो** मानसौकसि । **चक्राङ्गी** कटुरोहिण्याम्' इति मेदिनी ॥ (७) ॥*॥ शकुलैर्मत्स्यभेदैरद्यते । अत्तेः कर्मणि ल्युट् (३।३।११३) । **'शकुलादनी** स्त्रियां कृष्णभेदे कटुकशाकयोः' (इति मेदिनी) ॥ (८) ॥*॥ अष्टौ **'कटुरोहिण्याः' 'कुटकी'** इति ख्यातायाः ॥

आत्मगुप्ता जडाऽव्यण्डा कण्डूरा प्रावृषायणी ॥८६॥
ऋष्यप्रोक्ता शूकशिम्बिः कपिकच्छुश्च मर्कटी ।

आत्मेति ॥ आत्मना गुप्ता । दुःस्पर्शत्वात् । 'कर्तृकरण–' (२।१।३२) इति समासः ॥ (१) ॥*॥ जडयति । 'तत्करोति–' (वा० ३।१।२६) इति णिजन्तादच् (३।१।१३४) । **'जडा** स्त्रियाम् । शूकशिम्ब्यां हिमप्रस्तमूकाप्रज्ञेषु तु त्रिषु' (इति मेदिनी) । मुकुटस्तु—कण्ड्वादिना दौःस्थ्यजननादिन्द्रियाणि जडयति स्तम्भयति । 'जल अपवारणे' (चु० प० से०)—इत्यवोचत् । तन्न । णौ वृद्धिप्रसङ्गात् । जडति वा । डलयोरैक्यात् ॥*॥—न जहाति शूकान् । अजहा । 'ज्ञेया **जाङ्गलिका** सैव साऽजहा प्रावृषायणी' इतीन्दुः—इति स्वामी ॥ (२) ॥*॥ न विगतमण्डमस्याः । 'अव्यण्डा **वृषभी गुप्ता**' इतीन्दुः । मुकुटस्तु—अधिकमण्डं बीजमस्याः, अधिकममति । 'अम रोगे' (भ्वा० प० से०) 'अमन्ताङ्ः' (पु० १।११४) वा । अध्यण्डा—इत्याह । तत्र मूलं मृग्यम् ॥ (३) ॥*॥ कण्डूं राति । 'रा दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥*॥ पृषोदरादित्वात् (६।३।१०९) ह्रस्वत्वमपि । 'कपिकच्छूश्च कण्डूरा **कण्डुरा** शूकशिम्बिका' इतीन्दुः । मुकुटस्तु—कण्डूरस्त्यस्याः । 'कण्डूकच्छूभ्यां ह्रस्वश्च' इति रो ह्रस्वत्वं च—इत्याह । तन्न । उक्तवार्तिकस्यादर्शनात् ॥ (४) ॥*॥ **'प्रावृषा** तु जलार्णवे' इति त्रिकाण्डशेषः । प्रावृषामेति अयते, वा । कर्तरि ल्युट् (३।३।११३) । 'कृत्यचः' (८।४।२९) इति णत्वम् ॥ (५) ॥*॥ ऋष्यैर्मृगैः प्रोक्ता । ऋषिभिरप्रोक्ता, इति वा । **'ऋष्यप्रोक्ता** शतावर्यतिबलाशूकशिम्बिषु' इति (मेदिनी) ॥ (६) ॥*॥ 'शूकयुक्ता शिम्बिः' । 'शश्वच्छशाङ्कशिशिराणि च शूकशिम्बिः' इत्यूष्मविवेकात् द्वितालव्या । 'शूकशिम्बिस्तु मर्कटी । **शूकशिम्बा** च' इति वाचस्पतिः ॥ (७) ॥*॥ कपीनां कच्छूः । कण्डूहेतुत्वात् ॥ (८) ॥*॥ मर्कटीव । विविधचेष्टाहेतुत्वात् । 'अथ मर्कटी । करञ्जभिच्छूकशिम्ब्योः पुंसि वानरलूतयोः' (इति मेदिनी) ॥ (९) ॥*॥ नव **'मर्कट्याः' 'कँवाच'** इति ख्यातायाः ॥

चित्रोपचित्रा न्यग्रोधी द्रवन्ती शंबरी वृषा ॥ ८७ ॥
प्रत्यक्श्रेणी सुतश्रेणी रण्डा मूषिकपर्ण्यपि ।

चित्रेति ॥ चित्रं रूपमस्याः । **'चित्रा**खुपर्णीगोडुम्बासुभद्रादन्तिकासु च । मायायां सर्पनक्षत्रनदीभेदेषु च स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ उपगता चित्रम् ॥ (२) ॥*॥—न्यग् रुणद्धि । बहुमूलत्वात् । अच् (३।१।१३४) । गौरादिः (४।१।४१)—इति प्राच्यः । न्यञ्चं रुणद्धि, इति वा । 'कर्मण्यण्' (३।२।१) । **'(न्यग्रोधस्तु** पुमान्न्योमवटयोश्च शमीतरौ) । **न्यग्रोधी** वृक्षचित्रायाम्' (इति मेदिनी) ॥ (३) ॥*॥ द्रवति । 'द्रु गतौ' (भ्वा० प० से०) । लटः शतृ (३।२।१२४) ॥ (४) ॥*॥ शं वृणोति । 'वृञ् वरणे' (स्वा० उ० से०) । 'शमि धातोः' (३।२।१४) इत्यच् । गौरादिः (४।१।४१) । मुकुटस्तु—खच् (३।२।४६)—इत्याह । **'(शंबरं** सलिले पुंसि मृगदैत्यविशेषयोः ।) **शंबरी** चाखुपर्ण्यां स्यात्' (इति तालव्यादौ मेदिनी) ॥ (५) ॥*॥ वर्षति । 'वृषु सेचने' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । (**'वृषो** धर्मे बलीवर्दे शृङ्ग्यां पुंराशिभेदयोः । श्रेष्ठे स्यादुत्तरस्थश्च व्यासमूषिकशुक्लके । तथा वास्तुस्थानभेदे पुमानेष प्रकीर्तितः । **वृषा** मूषिकपर्ण्यां च, यतीनामासने **वृषी'**) ॥ (६) ॥*॥ प्रतीची श्रेणी यस्याः ॥ (७) ॥*॥ सुतानां श्रेणी यस्याः ॥ (८) ॥*॥ रमन्तेऽत्र । 'रमु क्रीडायाम्' (भ्वा० आ० अ०) । 'अमन्ताङ्ः' (उ० १।११४) । **'रण्डा**मूषिकपर्ण्यां च विधवायां च योषिति'(इति मेदिनी) ॥*॥ स्वामी तु—चण्ड्यते । 'चण्डा' । 'प्रत्यक्श्रेणी वृषा **चण्डा** पुत्रश्रेण्या**खुपर्णिका**' इति निघण्टुः–इत्याह ॥ (९) ॥*॥ मूषिकः पर्णमस्याः । मूषिककर्णाकारपत्रत्वात् । 'पाककर्ण–' (४।१।५४) इति ङीष् ॥ (१०) ॥*॥ दश **'मूषिकपर्ण्याः' 'मूसाकर्णी'** इति ख्यातायाः ॥

अपामार्गः शैखरिको धामार्गवमयूरकौ ॥ ८८ ॥
प्रत्यक्पर्णी कीशपर्णी किणिहीखरमञ्जरिः ।

अपेति ॥ अपमार्जन्त्यनेन । 'हलश्च' (३।३।१२१) इति घञ् । निष्ठायामनिट्त्वात् कुत्वम् (७।३।५२) । 'उपसर्गस्य घञि' (६।३।१२२) इति दीर्घः । अपकृष्ट आसमन्तान् मार्गोऽस्य, इति वा ॥ (१) ॥*॥ शिखरे प्रायेण भवति । अध्यात्मादित्वात् (**वा०** ४।३।६०) ठक् ॥ (२) ॥*॥ धान्नोऽर्गः । धामार्गं वाति । 'आतोऽनुप–' (३।२।३) इति कः । **'धामार्गव**स्तु पुंसि स्यादपामार्गे च घोषके' (इति मेदिनी) ॥*॥—'अधामार्गवः' । **अधामार्गवो**ऽपामार्गः कोशातकी च इति **द्व्यर्थे**—इति स्वामी ॥ (३) ॥*॥ मयूरप्रतिकृतिः । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् । **'मयूरको**ऽप्यपामार्गे क्लीबं

१—आधुनिकासदुपलब्धप्राचीनस्वामिपुस्तकद्वये तु अकारादित्वं नोपलभ्यते ॥

तुत्थाञ्जने पुनः' (इति मेदिनी) ॥ (४) ॥*॥ प्रत्यञ्चि पर्णान्यस्याः । 'पाककर्ण–' (४।१।५४) इति ङीष् ॥ (५) ॥*॥ कपिलोमतुल्यानि लोमशानि पर्णान्यस्याः ॥*॥ **'केशपर्णी'** इति स्वामी ॥ (६) ॥*॥ किणिनो व्रणान् जिहीते । 'ओहाङ् गतौ' (जु० आ० अ०) । 'आतोऽऽनुप–' (३।२।३) इति कः । गौरादिः (४।१।४१) । किणिनो व्रणान् हन्ति वा । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः ॥ (७) ॥*॥ खरा ञ्जमारिरस्याः ॥*॥ गौरादिः (४।१।४१) वा ॥ (८) ॥*॥ अष्टौ **'अपामार्गस्य'** ॥

हञ्जिका ब्राह्मणी पद्मा भार्गी ब्राह्मणयष्टिका ॥ ८९ ॥ अङ्गारवल्ली बालेयशाकवर्वरवर्धकाः ।

हञ्जीति ॥ हन्ति रोगान् । पचाद्यच् (३।१।१३४) । पृषोदरादिः (६।३।१०९) । 'अङ्गारवल्ली **हञ्जी** च वर्दो वर्वरकस्तथा' (इति निघण्टुः) ॥*॥ भनक्ति रोगान् । 'भञ्जो आमर्दने' (रु० प० अ०) । ण्वुल् (३।१।१३३) वा । पृषोदरादिः (६।३।१०९) (**फञ्जिका,** इति वा–इति मुकुटः) ॥ (१) ॥*॥ ब्रह्मण इयम् । **'ब्राह्मणं** ब्रह्मसंघाते वेदभागे नपुंसकम् । भूमिदेवे तु पुंलिङ्गः फञ्जिकापृक्कयोः स्त्रियाम्' (इति मेदिनी) ॥ (२) ॥*॥ पद्माभं पुष्पमस्याः । **'पद्मोऽस्त्री** पद्मके व्यूहनिधिसंख्यान्तरेऽम्बुजे । ना नागे, स्त्री फञ्जिकाश्रीचार्वाटीपन्नगीषु च' (इति मेदिनी) ॥ (३) ॥*॥ भर्जनम् । 'भ्रस्ज पाके' (तु० उ० से०) । घञ् (३।३।१८) 'भ्रस्जो रोपधयो रमन्यतरस्याम्' (६।४।४७) इति रमागमः । 'चजोः—' (७।३।५२) इति कुत्वम् । 'भृजी भर्जने' (भ्वा० आ० से०) वा । घञ् (३।३।१८) भर्गोऽस्त्यस्याः । ज्योत्स्नादित्वाद्यण् (वा० ५।२।१०३) ॥ (४) ॥*॥ ब्राह्मणयष्टिरिव । तादृशप्रकाण्डत्वात् 'इवे प्रतिकृतौ' (५।३।९६) इति कन् ॥ (५) ॥*॥ अङ्गारवद्वल्लयस्याः । समासान्तविधेरनित्यत्वान्न कप् ॥ (६) ॥*॥ बालेयस्य शाकः । गर्दभभक्ष्यशाकत्वात् ॥ (७) ॥*॥ ववर्ति । 'वृञ् वरणे' (स्वा० उ० से०) यङ्लुगन्तः । पचाद्यच् (३।१।१३४) ॥ (८) ॥*॥ वर्धते । 'वृधु छेदने' (भ्वा० आ से०) । ण्वुल् (३।१।१३३) ॥ (९) ॥*॥ नव **'भार्ग्याः'** ॥

मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ॥ ९० ॥ मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ।

मञ्जिति ॥ मञ्जौ शोभने वर्णे तिष्ठति । 'सुपि स्थः' (३।२।४) इति कः । 'अम्बाम्ब—' (८।३।९७) इति षत्वम् । पृषोदरादिः (६।३।१०९) यद्वा अतिशयेन मञ्जुः । 'अतिशायने तमबिष्ठनौ' (५।३।५५) ॥ (१) ॥*॥ विकसति । 'कष गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) ॥*॥—विकषति । 'कष हिंसायाम्' (भ्वा० प० से०) । **(विकषा)**—इति मुकुटः ॥ (२) ॥*॥ जिङ्गति । 'जिगि गतौ' इति केचित्पठन्ति । गौरादिः (४।१।४१) ॥ (३) ॥*॥ समन्ततोऽङ्गति । 'अगि गतौ' (भ्वा० प० से०) अच् (३।१।१३४) ॥ (४) ॥*॥ काले मिश्यते 'मिश शब्दे' (भ्वा० प० से०) कर्मणि घञ् (३।३।१९) । गौरादिः (४।१।४१) स्वार्थे कन् (५।३।७५) ॥*॥ कालं वर्णं मिषति । 'मिष स्पर्धायाम्' (तु० प० से०) । पूर्ववत् । मूर्धन्यषा इति वा । 'मञ्जिष्ठा **कालमेषी** च' इति निघण्टुः ॥ (५) ॥*॥ मण्डूकवत् पर्णमस्याः । 'पाककर्ण—' (४।१।५३) इति ङीष् । **'मण्डूकपर्णी** मञ्जिष्ठाब्राह्मण्योर्नागे तु शोणके' (इति मेदिनी) ॥ (६) ॥*॥ भण्डति । 'भण्ड आभण्डने' ।—'भडि गतौ'—इति स्वामी । बाहुलकादीरन् । गौरादिः (४।१।४१) भण्डीरी ॥*॥ प्रज्ञाद्यण् (५।४।३८) । **'हेमपुष्पी** च **भाण्डीरी'** इति रभसः ॥ (७) ॥*॥ पचाद्यच् (३।१।१३४) । गौरादिः (४।१।४१) 'भण्डी योजनवल्ल्यपि । **रक्ता** भण्डीरिका च' इतीन्दुः ॥ (८) ॥*॥ योजनगामिनी वल्ली ॥ (९) ॥*॥ नव **'मञ्जिष्ठायाः' 'मँजीठ'** इति ख्यातायाः ॥

यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः ॥ ९१ ॥ रोदनी कच्छुराऽनन्ता समुद्रान्ता दुरालभा ।

येति ॥ यसनम् 'यसु प्रयत्ने' (दि० प० से०) । भावे घञ् (३।३।१८) यासोऽस्त्यस्य । अर्शआद्यच् (५।२।१२७) । याति । बाहुलकादसच् वा ॥ (१) ॥*॥ यौति 'यु मिश्रणामिश्रणयोः' (अ० प० से०) । 'ऋतन्यञि–' (उ० ४।२) इत्यासः (२) ॥*॥ दुःखेन स्पृश्यते । 'स्पृश स्पर्शने' (तु० प० अ०) घञ् । (३।३।१९) । खल् (३।३।१२६) वा । **'दुःस्पर्शो** धन्वयासे ना कण्टकार्या स्त्रियां त्रिषु । खरस्पर्शे' (इति मेदिनी) ॥ (३) ॥*॥ धन्वनो यासः । मरुभवत्वात् ॥ (४) ॥*॥ कुं नाशयति 'णश अदर्शने' (दि० प० अ०) ण्यन्तः । पचाद्यच् (३।१।१३४) । स्वार्थे कन् ॥ (५) ॥*॥ रोदयति । 'रुदिर् अश्रुविमोचने' (अ० प० से०) । ल्युट् (३।३।११३) । **'रोदनं** क्रन्दनेऽस्रेऽपि दुरालम्भौषधौ स्त्रियाम्' (इति मेदिनी) ॥*॥ **'चोदनी'** (इति स्वामी) ॥ (६) ॥*॥ कच्छूं राति । 'रा दाने' (अ० प० अ०) । 'आतः–' (३।२।३) इति कः । पृषोदरादित्वात् (६।३।१०९) ह्रस्वः । **'कच्छुरा** शूकशिम्ब्यां च शटीदुःस्पर्शयोरपि' (इति मेदिनी) ॥ (७) ॥*॥ नान्तोऽस्याः । **'अनन्ता** च विशल्यायां शारिवादूर्वयोरपि । कणादुरालभापथ्यापार्वत्यामलकीषु च । (विश्वंभरागुडूच्योः स्यात्)' (इति मेदिनी) ॥ (८) ॥*॥ समुद्रान्तोऽस्त्यस्याः । अर्शआद्यच् (५।२।१२७) । समुद्रोऽन्तोऽस्या । **'समुद्रान्ता** तु कार्पासीपृक्कादुरालभासु च' (इति मेदिनी) ॥ (९) ॥*॥ दुःखेनालभ्यते । 'डुलभष् प्राप्तौ' (भ्वा० आ० अ०) । 'ईषदुःसुषु–' (३।३।१२६) इति खल् । आगमशासनस्यानित्यत्वान्न नुम् ॥ (१०) ॥*॥ दश **'धन्वयासस्य' 'यवासा'** इति ख्यातस्य ॥

पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिपर्णिका ॥ ९२ ॥
क्रोष्टुविन्ना सिंहपुच्छी कलशिर्धावनिर्गुहा ।

पृश्नीति ॥ पृश्निरल्पं पर्णमस्याः । 'पाककर्ण–' (४।१।५४) इति ङीष् ॥ (१) ॥*॥ पृथगसक्तं पर्णमस्याः । ङीष् (४।१।५४) ॥ (२) ॥*॥ चित्रं पर्णमस्याः ॥ (३) ॥*॥ अङ्घ्रेरालभ्य पर्णान्यस्याः । ङीष् (४।१।५४) स्वार्थे कन् (५।३।७५) ॥*॥ —अङ्घ्रिं मूलमारभ्य वल्लिरस्याः । **'अङ्घ्रिवल्लिका'**—इति मुकुटः ॥ (४) ॥*॥ क्रोष्टुभिर्विन्ना विचारितेव । दतेव, इति वा ॥ (५) ॥*॥ सिंहपुच्छमस्याः सिंहपुच्छाकारपुष्पत्वात् । 'उपमानात् पक्षाच्च पुच्छाच्च' (वा० ४।१।५) इति ङीष् ॥ (६) ॥*॥ **'कलं** शुक्ले त्रिष्वजीर्णे' (इति मेदिनी) । कलं श्यति । 'शो तनूकरणे' (दि० प० अ०) । इन् (उ० ४।११८) । बाहुलकादाकारलोपः ॥ (७) ॥*॥ धावति । 'धावु गतिशुद्ध्योः' (भ्वा० उ० से०) । बाहुलकादनिः ॥ (८) ॥*॥ गूहति । 'गुहू संवरणे' (भ्वा० उ० से०) । 'इगुपध–' (३।१।१३५) इति कः ॥ (९) ॥*॥ नव **'सिंहपुच्छ्याः' 'पिटवनी'** इति ख्यातायाः ॥

निदिग्धिका स्पृशी व्याघ्री बृहती कण्टकारिका ९३
प्रचोदनी कुली क्षुद्रा दुःस्पर्शा राष्ट्रिकेत्यपि ।

निदीति ॥ निदिह्यते स्म । 'दिह उपचये' (अ०उ०अ०) । क्तः (३।२।१०२) । टाप् (४।१।४) स्वार्थे कन् (५।३।७५) ॥ (१) ॥*॥ स्पृशति । 'स्पृश स्पर्शने' (तु० प० अ०) । इगुपध–' (३।१।१३५) इति कः ।—'स्पृश बाधनस्पर्शनयोः'—इति मुकुटोक्तं निर्मूलम् । गौरादिः (४।१।४१) ॥ (२) ॥*॥ व्याजिघ्रति 'व्याघ्रादिभिः–' (२।१।५६) इति लिङ्गात् 'आतश्चोपसर्गे' (३।१।१३६) इति कः । न तु 'पाघ्रा–' (३।१।१३७) इति शः । गौरादिः (४।१।४१) ॥ (३) ॥*॥ बृहति । 'बृह वृद्धौ' (भ्वा० प० आ०) । 'वर्तमाने पृषद्बृहत्–' (उ० २।८४) इति निपातः । शतृवत्त्वान् ङीप् (४।१।६) । 'क्षुद्रायां क्षुद्रवार्ताक्यां **बृहती** छन्दसि क्वचित्' इति शाश्वतः ॥ (४) ॥*॥ कण्टकानियर्ति । 'ऋ गतौ' (जु० प० अ०) । 'कर्मण्यण्' (३।२।१) । स्वार्थे कन् (५।३।७५) ॥ (५) ॥*॥ प्रचोदयति । 'चुद संचोदने' (चु० प० से०) । ल्युट् (३।३।११३) ॥ (६) ॥*॥ कोलति । 'कुल संस्त्याने' (भ्वा० प० से०) । 'इगुपध-' (३।१।१३५) इति कः । गौरादिः (४।१।४१) ।—णिजन्तेन विगृह्य 'कः'—इत्यभिधानं मुकुटस्य चिन्त्यम् । णिजन्तस्येगुपधत्वाभावात् अनुपयोगाच्च ॥ (७) ॥*॥ क्षुणत्ति । 'क्षुदिर् संपेषणे' (रु० उ० अ०) । 'स्फायि–' (उ० २।१३) इति रक् । यत्तु—'क्षुद संप्रेरणे'—इति धातुरुपन्यस्तो मुकुटेन । स धातुपाठे न लभ्यते । **'क्षुद्रा** व्यङ्गानटीकण्टकारिकासरघासु च । चाङ्गेरीवेश्ययोर्हिंस्रामक्षिकामात्रयोरपि' (इति मेदिनी) ॥ (८) ॥*॥ दुस्पृश्यते । 'ईषदुर्–' (३।३।१२६) इति खल् ॥ (९) ॥*॥ **'राष्ट्रं** स्यात्तूपवर्तने । उपद्रवे क्लीबपुंसोः' (इति मेदीनी) । राष्ट्रमस्त्यस्याः । 'अतः–' (५।२।११५) इति ठन् ॥ (१०) ॥*॥ दश **'कण्टकारिकायाः' 'भटकटा'** इति ख्यातायाः ॥

नीली काला कृतकिका ग्रामीणा मधुपर्णिका ॥९४॥
रञ्जनी श्रीफली तुत्था द्रोणी दोला च नीलिनी ।

नीलीति ॥ 'नीलादोषधौ' (वा० ४।१।४३) इति ङीष् । **'नीली** रुग्भेदनीलिन्योः' (इति मेदिनी) ॥ (१) ॥*॥ कल्यते । 'कल क्षेपे' (चु० प० से०) । कर्मणि घञ् (३।३।१९) । यत्तु—कर्मणि 'एरच्' (३।३।५६)—इति मुकुटेनोक्तम् । तन्न । कलधातोरिवर्णान्तत्वाभावात् । वृद्ध्यभावप्रसङ्गाच्च । ण्यन्तत्वे 'कल्यते' इति विग्रहप्रदर्शनस्यासंभवाच्च । वर्णत्वाभावान्न ङीष् । 'काला तु कृष्णत्रिवृतामञ्जिष्ठानीलिकासु च' (इति मेदिनी) ॥ (२) ॥*॥ क्रीतकं क्रयोऽस्त्यस्याः । कपिलिकादित्वात् (वा० ८।२।१८) लत्वम् । 'अतः' (५।२।११५) इति ठन् । 'क्रीतकं विनिमयः' इति स्वामिमुकुटौ ॥ (३) ॥*॥ ग्रामे भवा । 'ग्रामाद्यखञौ' (४।२।९४) । **'ग्रामीणा** नीलिकायां स्त्री ग्रामोद्भूतेऽभिधेयवत्' (इति मेदिनी) ॥ (४) ॥*॥ मधुराणि पर्णान्यस्याः । 'पाककर्ण–' (४।१।५४) इति ङीष् । **'मधुपर्णी तु** गंभार्यां नीलीसंज्ञौषधावपि' (इति मेदिनी) ॥ (५) ॥*॥ रञ्जयति । ल्युट् (३।३।११३) । णिलोपस्य स्थानिवद्भावात् 'असनयोश्च' इति नलोपो न । रज्यतेऽनया, इति विग्रहे तु 'करणा–' (३।३।११७) इति ल्युटि भवत्येव । 'रञ्जेः क्युन्' (उ० २।७९) इति वा । 'गुडारोचनिकानीलीमञ्जिष्ठासु च **रञ्जनी । रजनी** नीलिनीरात्रिहरिद्राजतुकासु च' (इति मेदिनी) ॥ (६) ॥*॥ श्रीमत् फलमस्याः । **'श्रीफलः** पुंसि माल्वरे धात्रीनीलिकयोः स्त्रियाम्' (इति मेदिनी) ॥ (७) ॥*॥ तुद्यते । 'तुद व्यथने' (तु० उ० अ०) । 'पातृतुदि–' (उ० २।६) इति थक् । तुत्थयति वा । 'तुत्थ आवरणे' । पचाद्यच् (३।१।१३४) । **'तुत्थ**मञ्जनभेदे स्यान्नीलीसूक्ष्मैलयोः स्त्रियाम्' (इति मेदिनी) ॥ (८) ॥*॥ द्रवति । 'द्रु गतौ' (भ्वा० प० अ०) 'वहिश्रि–' (उ० ४।५१) इति निः ॥*॥ 'तूणी' इति स्वामी । 'तूण पूरणे' (चु० आ० से०) । तूण्यतेऽनया । 'हलश्च' (३।३।१२१) इति घञ् । गौरादिः (४।१।४१) । **'तूणी** नील्यां निषङ्गे ना' (इति मेदिनी) ॥ (९) ॥*॥ दोलयति । 'दुल उत्क्षेपे' (चु० प० से०) । पचाद्यच् **'दोला** नील्यां यानान्तरेऽपि च' (इति

१—'अनिदिताम्—' (६।४।२४) इति सूत्रे भाष्ये 'रजकरजनरजःसूपसंख्यानम्' इति वार्तिकेन 'रजकरजनरजःसु कित्वादिसिद्धम् । कित एवैत औणादिकाः' इति भाष्येण तत्रत्यकैयटेन 'असनयोश्च' इति वाक्यस्याभावबोधननेन ल्युटि नलोपाप्राप्त्या 'णिलोपस्येत्यादिभवत्येवेत्यन्तग्रन्थोऽसंगत एवेति बोध्यम्' ॥

मेदिनी) ॥*॥ 'मेला' इति स्वामी । 'तुत्था श्रीफलिका **मेला सारवाही** च रञ्जनी' इति निघण्टुः ॥ (१०) ॥*॥ नीलो वर्णोऽस्त्यस्याः । 'अतः' (५।२।११५) इतीनिः ॥ (११) ॥*॥ एकादश **'नील्याः' 'नील'** इति ख्यातस्य ॥

अवल्गुजः सोमराजी सुवल्लिः सोमवल्लिका ॥ ९५ ॥
कालमेषी कृष्णफला वाकुची पूतिफल्यपि ।

अवेति ॥ अवल्गोरशोभनाज्जातः ॥ (१) ॥*॥ सोम इव सोमेन वा राजति । 'राजृ दीप्तौ' (भ्वा० उ० से०) । '–उपमाने' (३।२।७९) इति 'सुप्यजातौ–' (३।२।७८) इति वा णिनिः ॥ (२) ॥*॥ शोभना वल्लिरस्याः ॥ (३) ॥*॥ सोमस्य वल्लिः । स्वार्थे कन् (५।३।७५) ॥ (४) ॥*॥ कालं मिषति । 'मिष स्पर्धायाम्' (तु० प० से०) । 'कर्मण्यण्' (३।२।१) ॥ (५) ॥*॥ कृष्णं फलमस्याः । अजादित्वात् (४।१।४) टाप् ॥ (६) ॥*॥ वातं कोचयति । 'कुच शब्दे तारे' (भ्वा० प० से०) । मूलविभुजादित्वात् (वा० ३।२। ५) कः । पृषोदरादिः (६।३।१०९) ॥*॥ मुकुटस्तु—वाचं गुञ्जति । **'वागुजी'** इत्याह । 'गुजि अव्यक्ते शब्दे' (भ्वा० प० से०) । पूर्ववत् । गौरादिः (४।१।४१) ॥ (७) ॥*॥ पूतिः फलेऽस्त्यस्याः 'पाककर्ण–' (४।३।५३) इति ङीष् ॥ (८ ॥*॥ अष्टौ **'वकुची'** इति ख्यातायाः ॥

कृष्णोपकुल्या वैदेही मागधी चपला कणा ॥ ९६ ॥
उषणा पिप्पली शौण्डी कोला

कृष्णेति ॥ कृष्णो वर्णोऽस्त्यस्याः । अर्शआद्यच् (५।२। १२७) । **'कृष्णा** स्याद्दौपदीनीलीकणाद्राक्षासु योषिति' (इति मेदिनी) ॥ (१) ॥*॥ उपकोलति । 'कुल संस्त्याने बन्धुषु च' (भ्वा० प० से०) अङ्यादिः (उ० ४।११२) ॥*॥ उपगता कुल्याम्, इति वा ॥ (२) ॥*॥ विदेहेषु भवा । **'वैदेही** रोचनासीतावणिक्स्त्रीपिप्पलीषु च' (इति मेदिनी) ॥ (३) ॥*॥ मगधेषु भवा । **'मागधी** स्त्री कणायूथ्योर्वाच्यवन्मगधोद्भवे । पुंसि वैश्यात्क्षत्रियाजे शुक्लजीरकबन्दिनोः ॥ (४) ॥*॥ चपति । 'चप सान्त्वने' (भ्वा० प० से०) । वृषादित्वात् (उ० १।११०६) कलच् । **'चपला** कमलाविद्युत्पुंश्चलीपिप्पलीषु च' (इति मेदिनी) ॥ (५) ॥*॥ कणति । 'कण शब्दे' (भ्वा० प० से०) अन्तर्भावितण्यर्थः । पचाद्यच् (३। १।१३४) । **'कणा** जीरककुम्भीरमक्षिकापिप्पलीषु च' (इति मेदिनी) ॥ (६) ॥*॥ ओषति । 'उष दाहे' (भ्वा० प० से०) । बाहुलकात् क्युन् (उ० २।७८) ॥*॥ दीर्घादिरपि । ऊषति । 'ऊष रुजायाम्' (भ्वा० प० से०) **'ऊषणं** मरिचे क्लीबं कणायामूषणा स्त्रियाम्' (इति मेदिनी) ॥ (७) ॥*॥ पिपर्ति । 'पॄ पालनपूरणयोः' (जु० प० से०) । बाहुलकादलच् । पृषोदरादिः । गौरादिः (४।१।४१) । **'पिप्पलं** सलिले वस्त्रच्छेदभेदे च ना तरौ । निरर्गले पक्षिभेदे कणायां **पिप्पली** स्मृता' (इति मेदिनी) ॥ (८) ॥*॥ शुण्डायां मद्यपानगृहे भवा । **'शौण्डो** मत्ते च विख्याते पिप्पल्यां तु भवेत्स्त्रियाम्' (इति मेदिनी) ॥ (९) ॥*॥ कोलति । 'कुल संस्त्याने' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । **'कोलं** कोलफले क्लीबं पिप्पलीचव्ययोः स्त्रियाम्' (इति मेदिनी) ॥ (१०) ॥*॥ दश **'पिप्पल्याः'** ॥

अथ करिपिप्पली ।

कपिवल्ली कोलवल्ली श्रेयसी वशिरः पुमान् ॥ ९७ ॥

अथेति ॥ करीव पिप्पली । बृहत्त्वात् ॥ (१) ॥*॥ कपिरिव वल्ली ॥*॥ कोल इव वल्ली । तयोस्तुल्यरोमत्वात् ॥ (२) ॥*॥ (३) ॥*॥ अतिशयेन प्रशस्ता । **'श्रेयसी** करिपिप्पल्यामभयापाठयोरपि' (इति मेदिनी) ॥ (४) ॥*॥ वस्ते । 'वस आच्छादने' (अ० आ० से०) । बाहुलकात्किरच् ॥*॥ तालव्यपाठे तु । वष्टि । 'वश कान्तौ' (अ० प० से०) । संज्ञापूर्वकत्वान्न संप्रसारणम् । **'वशिरः** पुमान् । किणिहीहस्तिपिप्पल्योः', 'क्लीबेऽग्धिलवणे स्मृतम्' (इति मेदिनी) ॥ (५) ॥*॥ पञ्च **'गजपिप्पली'** इति ख्यातायाः ॥

चव्यं तु चविकम्

चेति ॥ चर्व्यते । 'चर्व अदने' (भ्वा० प० से०) । ण्यत् (३।१।१२५) । पृषोदरादिः (६।३।१०९) **'चव्यं** तु चविके क्लीबं वचायामपि योषितः' (इति मेदिनी) ॥ (१) ॥*॥ कुन् (उ० २।३२) । चविकम् ॥ (२) ॥*॥ स्त्रियामपि । **'चव्या कोला** च **चविका** चव्यं **कुञ्जरपिप्पली'** इति हट्टचन्द्रः ॥ (१) ॥*॥ द्वे **'चव्य'** इति ख्यातस्य । केचित्तु पूर्वान्वयमाहुः । यदाह चन्द्रनन्दनः– 'चव्या कोलाथ चविका श्रेयसी गजपिप्पली । **चयवना** कोलवल्ली तु चव्यं कुञ्जरपिप्पली' । अत्र पक्षे तुस्थाने चः पाठ्यः ॥

काकचिंचागुञ्जे तु कृष्णला ।

काकेति ॥ काकवर्णा चिंचा ॥*॥ गौरादिः (४।१।४१)– इति स्वामी ॥ (१) ॥*॥ गुञ्जति । 'गुजि अव्यक्ते शब्दे' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । **'गुञ्जा** तु काकचिंचायां पटहे च कलध्वनौ' (इति मेदिनी) ॥ (२) ॥*॥ कृष्णं वर्णं लाति ॥ (३) ॥*॥ त्रीणि **'गुञ्जायाः' 'घोंगची'** इति ख्यातायाः ॥

पलंकषा त्विक्षुगन्धा श्वदंष्ट्रा स्वादुकण्टकः ॥ ९८ ॥
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि ।

पलमिति ॥ पलं मांसं कषति । 'कष हिंसार्थः' (भ्वा० प० से०) । मूलविभुजादित्वात् (वा० ३।२।५) कः । पृषोदरादिः (६।३।१०९) ।—'तत्पुरुषे–' (६।३।१४) इति द्वितीयाया अलुक्—इति मुकुटः । तच्च । अलौकिकविग्रहेऽमोऽप्रवेशात् । **'पलंकषा** गोक्षुरके स्त्रियां राज्ञापलाशयोः' इति मूर्धन्यान्तेषु रभसः । यत्तु—'कर्षति' इति विगृह्य 'पृषोदरा-

दिः' (६।३।१०९)—इत्युक्तम् । तच्चिन्त्यम् । कषितिनैव सिद्धत्वात् । अच्प्रत्ययविधानमपि चिन्त्यम् । कर्मण्यणः प्रसङ्गात् । **'पलंकषा** गोक्षुरके राज्ञागुग्गुलुकिंशुके । तु (मु) ण्डीरीलाक्षयोश्च स्त्री राक्षसे तु पलंकषः' (इति विश्वमेदिन्यौ) ॥ (१) ॥*॥ इक्षुगन्ध इव **गन्धोऽस्याः** । समासान्तो विधिरनित्यः । **'इक्षुगन्धा** कोकिलाक्षे क्रोष्ट्र्यां काशे च गोक्षुरे' (इति मेदिनी) ॥ (२) ॥*॥ शुनो दंष्ट्रेव । संज्ञापूर्वकत्वान्न दीर्घः ॥ (३) ॥*॥ स्वादुः कण्टकोऽस्य ॥ (४) ॥*॥ गोर्धैनोः पृथिव्या वा कण्टकः । **'गोकण्टको** गोक्षुरके स्यपुटे च गवां खुरे' (इति मेदिनी) ॥ (५) ॥*॥ क्षुरति 'क्षुर विलेखने' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः स्वार्थे कन् (५।३।७५) गोर्गौर्वा क्षुरकः ॥ (६) ॥*॥ वनस्य शृङ्गाट इव । 'श्वदंष्ट्रो गोक्षुरस्त्रिकण्टकपुटः श्वदंष्ट्रा स्वादुकण्टकः' इति रभसः ॥ (७) ॥*॥ सप्त **'गोक्षुरस्य' 'गोखुरू'** इति ख्यातस्य ॥

विश्वा विषा प्रतिविषातिविषोपविषारुणा ॥ ९९ ॥
शृङ्गी महौषधं च

वीति ॥ विशति । 'विश प्रवेशने' (तु० प० अ०) । 'अशूप्रुषि–' (उ० १।१५१) इति क्वुन् । **'विश्वं** समस्ते जगति, **विश्वे** देवेषु, नागरे । **विश्वा** चातिविषायां स्यात्' (इति विश्वः) ॥ (१) ॥*॥ वेवेष्टि । 'विष्ल व्याप्तौ' (जु० उ० से०) । 'इगुपध–' (३।१।१३५) इति कः । **'विषं** जलेऽतिविषायां स्त्रियां, क्ष्वेडे तु न स्त्रियाम्' ॥ (२) ॥*॥ प्रतीपं विषमस्याः ॥ (३) ॥*॥ विषमतिक्रान्ता ॥ (४) ॥*॥ विषमुपगता ॥ (५) ॥*॥ अरुणो वर्णोऽस्याः । **'अरुणा**तिविषाश्यामाभिज्ञिष्टात्रितासु च' (इति मेदिनी) ॥ (६)॥*॥ शृणाति । 'शॄ हिंसायाम्' (क्या० प० से०) । 'शृणातेर्हस्वश्च' (उ० १।१२६) इति गन् कित् नुट् च । गौरादिः (४।१।४१) । **'शृङ्गी** विषायामृषभे स्वर्णमीनविशेषयोः' इति विश्वः ॥ (७) ॥*॥ महच्च तदौषधं च । **'महौषधं** तु शुण्ठ्यां स्याद्विषायां लशुनेऽपि च' (इति मेदिनी) ॥ (८) ॥*॥ अष्टौ **'अतिविषायाः' 'अतीस'** इति ख्यातस्य ॥

अथ क्षीराबी दुग्धिका समे ।

अथेति ॥ क्षीरमवति । 'अव रक्षणादौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) ॥ (१) ॥*॥ दुग्धमस्त्यस्याः । ठन् (५।२।११५) ॥ (४) ॥*॥ द्वे **दुग्धिकायाः' 'दुधी'** इति ख्यातायाः ॥

शतमूली बहुसुताऽभीरुरिन्दीवरी वरी ॥ १०० ॥
ऋष्यप्रोक्ताभीरुपत्रीनारायण्यः शतावरी ।
अहेरुः

शतेति ॥ शतं मूलान्यस्याः ॥ (१) ॥*॥ बहवः सुता यस्याः ॥ (२) ॥*॥ **न भीरुः** । स्थिरपत्रत्वात् ॥ (३) ॥*॥ नीलोत्पलाकारपुष्पत्वाद् **इन्दीवरमस्त्यस्याः** । अर्शआद्यच् (५।२।१२७) । **'इन्दीवरं** कुवलये शतावर्यां तु योषिति' (इति मेदिनी) ॥ (४) ॥*॥ वृणोति (गन्धेनेन्द्रियम्) । पचाद्यच् (३।१।१३४) । गौरादिः (४।१।४१) ॥ (५) ॥*॥ ऋष्यैः प्रोक्ता । **'ऋष्यप्रोक्ता** शतावर्यतिबलाशूकशिम्बिषु' (इति मेदिनी) ॥ (६) ॥*॥ अभीरूणि पत्राण्यस्याः । 'पाककर्ण–' (४।१।६४) इति ङीष् ॥ (७) ॥*॥ नारायणाज्जाता । **'नारायणोऽच्युतेऽभीरुगौर्यां नारायणी** मता' (इति मेदिनी) ॥ (८) ॥*॥ शतेनावृणोति । पचाद्यच् (३।१।१३४) । गौरादिः (४।१।४१) । **'शतावरी** तु शच्यां स्यादिन्दीवर्यामपि स्त्रियाम्' (इति मेदिनी) ॥ (९) ॥*॥ न हिनोति । 'हि गतौ' (स्वा० प० अ०) बाहुलकाद्रुः ॥ (१०) ॥*॥ दश **'सहस्रमूल्याः' 'शतावरी'** इति ख्यातायाः ॥

अथ पीतद्रुकालेयकहरिद्रवः ॥ १०१ ॥
दार्वी पचंपचा दारुहरिद्रा पर्जनीत्यपि ।

अथेति ॥ पीतं द्रवति । 'द्रु गतौ' (भ्वा० प० अ०) । मितद्रुादित्वात् (वा० ३।२।१८०) ड्रुः । यत्तु मुकुटेनोक्तम्—'अपष्ट्रादयः' इति कुः—इति । तन्न । टिलोपस्यालाभात् । एतादृशसूत्राभावाच्च ॥ (१) ॥*॥ कलेरयम् । 'सर्वत्राग्निकलिभ्यां ढक्' (वा० ४।२।८) स्वार्थे कन् (५।३।७५) ॥*॥ 'कालीयकः' इति वा पाठः । कालस्य वर्णस्यायम् । 'वृद्धाच्छः' (४।२।११४) । 'निर्दिष्टा वै **कटकिनी** स च **कालेयकः** स्मृतः । **कालीयको दारुनिशा'** इति रुद्रः ॥ (२) ॥*॥ हरिः पिङ्गः पीतो वा द्रुरस्य । **'हरिद्रुः पीतचन्दनम्'** इति निघण्टुः ॥ (३) ॥*॥ दीर्यते । 'दॄ विदारणे' (क्या० प० से०) 'दॄसनि–' (उ० १।३) इति त्रुण् । 'वोतः–' (४।१।४४) इति '–गौरादिभ्यः–' (४।१।४१) इति वा ङीष् । **'दार्वी** दारुहरिद्रायां तथा गोजिह्विकौषधौ' (इति मेदिनी) ॥ (४) ॥*॥ पचति । पचाद्यच् (३।१।१३४) । पृषोदरादिः (६।३।१०९) । **'पीतदारु** पचंपचा' इति निघण्टुः ॥ (५) ॥*॥ दारुश्चासौ हरिद्रा च ॥ (६) ॥*॥ पिपर्ति । 'पॄ पालनपूरणयोः' (जु० प० से०) । विच् (३।२।७५) । पर् चासौ जनी च । परं पालकं स्वास्थ्यं जनयति वा । 'जनी प्रादुर्भावे' (दि० आ० से०) ण्यन्तः । 'कर्मण्यण्' (३।२।१) ॥ (७) ॥*॥ सप्त **'पर्जन्याः' 'दारुहलदी'** इति ख्यातायाः ॥

वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विका ॥१०२॥

वेति ॥ वक्ति वचेरन्तर्भावितण्यर्थात् पचाद्यच् (३।१।१३४) । **('वचः** कीरे **वचौषधौ** । शारिकायां च' (इति मेदिनी) ॥ (१) ॥*॥ उग्रो गन्धोऽस्याः । **'उग्रगन्धाजमोदायां** वचायां छिक्किकोषधौ' (इति मेदिनी) ॥ (२) ॥*॥ षड् ग्रन्था ग्रन्थयो यस्याः । **'षड्ग्रन्था** तु वचायां स्त्री स्यात्करञ्जान्तरे पुमान्' (इति मेदिनी) ॥ (३) ॥*॥ गौर्लो-

मास्याः । गोशब्दो गोलोमसदृशे लाक्षणिकः । अच् (५।४।७५) योगविभागात् समासान्तः । गौरादिङीष् (४।१।४१) । **'गोलोमी** श्वेतदूर्वायां स्याद्वचाभूतकेशयोः' (इति मेदिनी) ॥ (४) ॥*॥ शतं पर्वाण्यस्याः सन्ति । व्रीह्यादित्वात् (५।२।११६) ठन् । डाबन्तात्स्वार्थे कन् (५।३।७५) वा । **'शतपर्विका** तु दूर्वायां वचायामपि योषिति' (इति मेदिनी) ॥ (५) ॥*॥ पञ्च **'वचायाः' 'वच'** इति ख्यातायाः ॥

शुक्ला हैमवती

शुक्लेति ॥ हिमवति भवा । **'हैमवत्य**भयास्वर्णक्षीर्योः श्वेतवचोमयोः' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'श्वेतमूलवचायाः'** ॥

वैद्यमातृसिंह्यौ तु वाशिका ।

वृषोऽटरूषः सिंहास्यो वासको वाजिदन्तकः ॥१०३॥

वैद्येति ॥ वैद्यस्य मातेव ॥ (१) ॥*॥ हिनस्ति । 'हिंसि हिंसायाम्' (रु० प० से०) । पचाद्यच् (३।१।१३४) । पृषोदरादिः (६।३।१०९) । गौरादिः (४।१।४१) । **'सिंही** तु कण्टकार्यां स्यात् (वार्ताकौ वासकेऽपि च' इति मेदिनी) । **'सिंही** स्वर्भानुमातरि । वासावृहत्योः क्षुद्रायाम्' (इति हैमः) ॥ (२) ॥*॥ वाश्यते । 'वाश्ट शब्दे' (दि० आ० से०) । 'गुरोश्च' (३।३।१०३) इत्यः । स्वार्थे कन् । यद्वा उश्यते । 'वश कान्तौ' (आ० प० से०) 'संज्ञायाम्' (३।३।१०९) इति ण्वुल् ॥*॥ दन्त्यान्तोऽपि । वासयति । पचाद्यच् (३।१।१३४) । **'वासो** गृहेऽप्यवस्थाने **वासा** स्यादटरूषके' इति रुद्रः ॥ (३) ॥*॥ वर्षति मधु । 'वृषु सेचने' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । **'वृषः** स्याद्वासके धर्मे सौरभेये च शुक्रले' इति मूर्धन्यान्ते विश्वः । यत्तु—वृष्यते पीयते । 'वृष पाने' । 'घञर्थे कः' (वा० ३।३।५८)—इति मुकुटेनोक्तम् । तन्न । धातुपाठेऽदर्शनात् । परिगणनाच्च ॥ (४) ॥*॥ अटान् गच्छतो रोषति । 'रुष् हिंसायाम्' (स्वा० प० से०) मूलविभुजादिः (वा० ३।२।५) । अटै रूषति । 'रूष मिश्रणे' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति के दीर्घोऽकारवानपि । **'वैद्यमाता टरूषकः ।** सिंहास्यो वाजिदन्तकः' इति रभसः । 'वृषो वासाटरूषकः' इति माधवः ॥ (५) ॥*॥ सिंह आस्यमस्य । सिंहास्यसदृशपुष्पत्वात् ॥ (६) ॥*॥ वासयति ण्वुल् (३।१।१३३) । वस्ते आच्छादयति वा ॥ (७) ॥*॥ वाजी दन्तोऽस्य । वाजिदन्ताभकेसरत्वात् । तादृशपुष्पत्वाद्वा ॥ (८) ॥*॥ अष्टौ **'अटरूषस्य' 'अरडूसा'** इति ख्यातस्य ॥

आस्फोटा गिरिकर्णी स्याद्विष्णुक्रान्तापराजिता ।

आस्फोटेति ॥ आस्फोटयति । 'स्फुटिर् विकसने' (भ्वा० प० से०) ण्यन्तः । अच् (३।१।१३४) । पृषोदरादिः (६।३।१०९) । **'आस्फोता** गिरिकर्ण्यां च वनमल्लयां च योषिति' (इति मेदिनी) ॥ (१) ॥*॥ गिरिर्बालमूषिका कर्णोऽस्याः तत्कर्णतुल्यपत्रत्वात् ॥ (२) ॥*॥ विष्णुना क्रान्ता ॥ (३) ॥*॥ न पराजिता । **'अपराजित** ईशाजेष्वन्तरे नाऽजिते त्रिषु । गिरिकर्णीजयादुर्गाशालपर्णीषु योषिति' (इति मेदिनी) ॥ (४) ॥*॥ चत्वारि **'विष्णुक्रान्तायाः'** । स्वामी तु वासकपर्यायानिमान् मन्यते ॥

इक्षुगन्धा तु काण्डेक्षुकोकिलाक्षेक्षुरक्षुराः ॥ १०४ ॥

ईति ॥ इक्षुः गन्धोऽस्य । इक्षुशब्द इक्षुगन्धसदृशे लाक्षणिकः । **'इक्षुगन्धा** कोकिलाक्षे क्रोष्ट्र्यां काशे च गोक्षुरे' (इति मेदिनी) ॥ (१) ॥*॥ काण्डेनेक्षुरिव ॥ (२) ॥*॥ कोकिलोऽक्षि यस्य । कोकिलशब्दः कोकिलाक्षिसदृशे लाक्षणिकः । 'अक्ष्णोऽदर्शनात्' (५।४।७६) इत्यच् ॥ (३) ॥*॥ इक्षुमिक्षुगन्धं राति । 'आतोऽनुप–' (३।२।३) इति कः ॥ ॥ (४) ॥*॥ क्षुर इव । **'क्षुरः** स्याच्छेदनद्रव्ये कोकिलाक्षे च गोक्षुरे' इति विश्वः ॥ (५) ॥*॥ पञ्च **'कोकिलाक्षस्य' 'तालमखाना'** इति ख्यातस्य ॥

शालेयः स्याच्छीतशिवश्छत्रा मधुरिका मिसिः । मिश्रेयोऽपि

शेति ॥ शालीनां भवनं क्षेत्रं शालेयम् । तदस्यास्ति । अर्शआद्यच् (५।२।१२७) । **'शालेयः** स्यान्मिसौ पुमान् । त्रिषु शाल्युद्भवे क्षेत्रे' (इति मेदिनी) ॥ (१) ॥*॥ शीतमस्यास्ति । अच् (५।२।१२७) । शिवमस्यास्ति । अच् (५।२।१२७) । शीतश्चासौ शिवश्च । 'अथ **शीतशिवं** क्लीबं शैलेयमणिमन्थयोः । पुंसि सक्तुफलावृक्षे तथा मधुरिकौषधौ' (इति मेदिनी) ॥ (२) ॥*॥ छत्रमस्यास्ति । छत्राकारस्तबकत्वात् । **'छत्रा** मिसावतिच्छत्रे कुस्तुम्बुरुशिलीन्ध्रयोः । नपुंसकं चातपत्रे' (इति मेदिनी) ॥ (३) ॥*॥ मधुरो रसोऽस्त्यस्याः । अच् (५।२।११५) । **'मधुरा** शतपुष्पायां मिश्रेयानगरीभिदोः । मधुकुक्कुटिकामेदामधूलीयष्टिकासु च । क्लीबं विसे पुंसि रसे तद्वत्स्यादुप्रियेऽन्यवत्' (इति मेदिनी) ॥ (४) ॥*॥ मस्यते । 'मसी परिमाणे' (दि० प० से०) । इन् (उ० ४।११८) । बाहुलकादत इः । 'स्यान्मांस्यां शतपुष्पायां मधुरायां **मिसिः** स्त्रियाम्' इति दन्त्यान्ते रभसः । **'मिसिः** स्त्री मधुरामांस्योः शतपुष्पाजमोदयोः' (इति मेदिनी) ॥*॥ सोमनन्दी तु **'मिशी' 'मिशिः'** इति तालव्यान्ते आह । मि(मे)शति । 'मिश शब्दे' (भ्वा० प० से०) 'इगुपधात् कित्' (उ० ४।१२०) इति इन् ङीष् (ग० ४।१।४५) वा ॥ (५) ॥*॥ मिश्रयति । अच् (३।१।१३४) । ईयते[1] । 'इण् गतौ' (अ० प० अ०) । 'अचो यत्' (३।१।९७) । मिश्रा चासावेया च । शकन्ध्वादिः (वा० ६।१।९४) ॥ (६)

१—'इयते' इत्युत्तरं 'ईङ् (दि० आ० अ०)' इति वा पाठः ।

॥*॥ षट् **'मधुरिकायाः' 'वनसोंफ'** इति ख्यातायाः ॥

अथ सीहुण्डो वज्रद्रुः स्रुक्स्रुही गुडा ॥ १०५ ॥
समन्तदुग्धा

अथेति ॥ 'सी' इति हुण्डते । 'हुडी वरणे' (भ्वा० आ० से०) पचाद्यच् (३।१।१३४) ।-सिंहतुण्डस्यापभ्रंशोऽयम्—इति स्वामी । पृषोदरादिः । **'वज्रद्रुमः सिहुण्डोऽथ'** इति रभसाद्भरवादिरपि ॥ (१) ॥*॥ 'वज्रद्रुः स्रुक् स्रुही' इति पाठः ।—वज्रनामा द्रुः—इति मुकुटः । स्वामी तु **'वज्रः** स्रुक् स्त्री स्रुही गुडा' इति पठति । **'वज्रा** स्रुह्यां गुडूच्यां च **वज्री** स्रुह्यन्तरे स्मृता' (इति मेदिनी) ॥ (२) ॥*॥ (स्रुह्यति) । 'ष्णुह उद्गिरणे' (दि० प० से०) । क्विप् (३।२।१७८) । 'वा द्रुह्-' (८।२।३३) इति कुत्वम् ॥*॥ भागुरिमते टाप् । 'स्रुही च **स्रुहा** स्रुग्भा स्रुह्' इत्यमरदत्तः ॥ (३) ॥*॥ 'इगुपधात् कित्' (उ० ४।११०) । वा ङीष् (ग० ४।१।४५) ॥ (४) ॥*॥ गुडति । 'गुड वेष्टने' (तु० प० से०) । 'इगुपध-' (३।१।१३५) इति कः । **'गुडो** गोलेक्षुविकृती स्रुहीगुडिकयो**र्गुडा'** इति रुद्रः । **'गुडश्च** स्रुहीगुडयो**र्गुड** ऐक्षवगोलयोः' इत्यजयः ॥ (५) ॥*॥ समन्ताद् दुग्धमस्याः ॥ (६) ॥*॥ षट् **'सेहुण्ड'** इति ख्यातस्य ॥

अथो वेल्लममोघा चित्रतण्डुला ।
तण्डुलश्च कृमिघ्नश्च विडङ्गं पुंनपुंसकम् ॥ १०६ ॥

अथवेति ॥ वेल्लति । 'वेल्ल चलने' (भ्वा० प० से०) । अच् (३।१।१३५) 'अथ **वेल्लं** कृमिघ्नतण्डुलौ' इति रभसः ॥ (१) ॥*॥ न मोघा । **'अमोघं** सफले वाच्यवत् स्त्री पथ्याविडङ्गयोः' (इति मेदिनी) ॥*॥ मोघापि । 'कृमिघ्नं तण्डुलं **मोघा'** इति वाचस्पतिः ॥ (२) ॥*॥ चित्रास्तण्डुला अस्याः ॥ (३) ॥*॥ तड्यते । 'तड आघाते' (चु० प० से०) । 'सानसिवर्णसि-' (उ० १।१०७) निपातः । **'तण्डुलः** स्याद्विडङ्गेऽपि धान्यादिनिकरे पुमान्' (इति मेदिनी) ॥*॥ तन्तुं कृमिसूत्रं लाति । कः (३।२।३) । **'तन्दूलः'** इति मुकुटः ॥ (४) ॥*॥ कृमीन् हन्ति 'अमनुष्यकर्तृके च' (३।२।५३) इति ठक् ॥ (५) ॥*॥ विडति । 'विड भेदने' (तु० प० से०) । 'विडादिभ्यः कित्' (उ० १।१२१) इत्यङ्गच् । **'विडङ्गस्त्रिष्वभिज्ञे स्यात्कृमिघ्ने पुंनपुंसकम्'** (इति मेदिनी) ॥ (५) ॥*॥ षड् **'विडङ्गस्य'** ॥

बला वाट्यालकः

बेति ॥ बलति 'वल संवरणे' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) । बलमस्त्यस्याः इति वा । अर्शआद्यच् (५।२।१२५) । **'बलयुक्तेऽन्यलिङ्गः स्याद्बला** वाट्यालके स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ वाटीमलति । 'अल भूषणादौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) स्वार्थे कन् (५।३।७५) । वाट्या आलकः ॥ (२) ॥*॥ द्वे **'बलायाः' 'वलिआर'** इति ख्यातस्य ॥

घण्टारवा तु शणपुष्पिका ।

घण्टेति ॥ घण्टेवारौति । अच् (३।१।१३४) ॥ (१) ॥*॥ शणः पुष्पं यस्याः । शणशब्दस्तत्पुष्पसदृशे लाक्षणिकः । 'पाककर्ण-' (४।१।६४) इति ङीष् । स्वार्थे कन् (५।३।७५) ॥ (२) ॥*॥ द्वे **'शणपुष्पिकायाः' 'घण्टा'** इति ख्यातायाः ॥

मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च १०७

मृद्वीति ॥ मृद्नाति । मृद्यते वा । 'मृद क्षोदे' (क्या० प० से०) 'किङ्किणीकादयश्च' इति निपातः ॥ (१) ॥*॥ गौः स्तनोऽस्याः । गोस्तनसदृशे गोशब्दो गौणः । 'स्वाङ्गाच्चोपसर्जनात्-' (४।१।५४) इति ङीष् । **'गोस्तनो** हारभेदे ना द्राक्षायां **गोस्तनी** स्त्रियाम्' (इति मेदिनी) ॥ (२) ॥*॥ द्राङ्क्ष्यते । द्राक्षि काङ्क्षायाम्' (भ्वा० प० से०) । कर्मणि घञ् (३।३।१९) । आगमशासनमनित्यम् ॥ (३) ॥*॥ स्वद्यते । स्वद आस्वादने' (भ्वा० आ० से०) 'कृवापा-' (उ० १।१) इत्युण् । 'वोतो गुण-' (४।१।४४) इति ङीष् ॥ (४) ॥*॥ मधू रसोऽस्याः । **'भवेन्मधुरसा** द्राक्षामूर्वीकादुग्धिकासु च' (इति मेदिनी) ॥ (५) ॥*॥ पञ्च **'द्राक्षायाः' 'दाख'** इति ख्यातायाः ॥

सर्वानुभूतिः सरला त्रिपुटा त्रिवृता त्रिवृत् ।
त्रिभण्डी रोचनी

सर्वेति ॥ सर्वा अनुभूतयोऽस्याम् । सर्वैरनुभूयते । कर्मणि क्तिन् (३।३।९४) इति वा ॥ (१) ॥*॥ सरति । 'सृ गतौ' (भ्वा० प० से०) । बाहुलकादलन् ॥*॥ 'सरणा' इति पाठे युच् (३।२।१५०) । 'सर्वानुभूतिः **सरला** त्रिपुटा रेचनी **सरा'** इति वाचस्पतिः ॥ (२) ॥*॥ त्रयः पुटा यस्याः । **'त्रिपुटा** मल्लिकायां च सूक्ष्मैलात्रिवृतोः स्त्रियाम्' (इति मेदिनी) ॥*॥ 'त्रिपुटी' इत्यपि । **'त्रिपुटी** महती खाशा' इति वाचस्पतिः ॥ (३) ॥*॥ त्रिभिरवयवैर्वृता ॥ (४) ॥*॥ त्रीनवयवान् वृणोति । 'वृञ् वरणे' (स्वा० उ० से०) । क्विप् (३।२।१७८) । तुक् (६।१।७१) ॥ (५) ॥*॥ त्रीन् दोषान् भण्डते । 'भडि परिभाषणे' (भ्वा० आ० से०) । 'कर्मण्यण्' (३।२।१) ॥ (६) ॥*॥ रोचते । 'रुच दीप्तावभिप्रीतौ च' (भ्वा० आ० से०) ल्युट् (३।३।११३) ॥*॥ 'रेचनी' इति पाठे **'रिचिर् विरेचने'** (रु० उ० अ०) । **'रेचनी** त्रिवृतादन्योः' । **'रोचनी** कर्कशे

१—उज्ज्वलदत्तादिष्वेवं सूत्रं नोपलभ्यते । तस्मात् 'अलीकादयश्च' (उ० ४।२५) इति निपातः ।

स्मृता' (इति मेदिनी) ॥ (७) ॥*॥ सप्त 'शुक्लत्रिधारा' इति ख्यातायाः ॥

श्यामापालिन्द्यौ तु सुषेणिका ॥ १०८ ॥

काला मसूरविदलार्धचन्द्रा कालमेषिका ।

श्येति ॥ श्यायते । 'श्यैङ् गतौ' (भ्वा० आ० अ०) 'इषियुधि–' (उ० १।१४५) इति मक् ॥ (१) ॥*॥ पालयति । 'पाल रक्षणे' (चु० प० से०) । बाहुलकात् किन्दच् । गौरादिः (४।१।४१) ॥ (२) ॥*॥ सुष्ठु सेनया याति । सेनाशब्दात् 'सत्यापपाश–' (३।१।२५) इति णिच् । पचाद्यच् । 'एति संज्ञायामगात्' (८।३।९९) इति षत्वम् । स्वार्थे कन् (५।३।७५) ॥ (३) ॥*॥ कालयति । 'कल विल क्षेपे' (चु० प० से०) ण्यन्तः । पचाद्यच् (३।१।१३४) ॥ (४) ॥*॥ मसूरवद् विदलमस्याः ॥ (५) ॥*॥ अर्धश्चन्द्रो यस्याः । एतद्विदलस्यार्धचन्द्राकारत्वात् ॥ (६) ॥*॥ कालं मिषति । 'मिष स्पर्धायाम्' (तु० प० से०) । 'कर्मण्यण्' (३।२।१) ॥ (७) ॥*॥ सप्त 'श्यामत्रिधारा' इति ख्यातायाः ॥

मधुकं क्लीतकं यष्टीमधुकं मधुयष्टिका ॥ १०९ ॥

मेति ॥ मध्विव । 'इवे–' (५।३।९६) इति कन् । **'मधुकं** क्लीतके खगे । वन्यन्तरे ना' (इति मेदिनी) ॥ (१) ॥*॥ क्लीबनम् । 'क्लीबृ अधार्ढ्ये' (भ्वा० आ० से०) । भावे क्तः (३।३।११४) । आगमशासनमनित्यम् । क्लीतमधार्ढ्यं कलति । 'कल क्षेपे' (चु० प० से०) । 'चुरादिभ्यो णिज्वा' इति णिजभावः । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः । यत्तु—'क्लीबृ मदे' इत्युक्तं मुकुटेन । तत् 'क्षीबृ मदे' इत्यस्य भ्रमात् । यद्वा संपदादि क्विप् (वा० ३।३।१०८) । बाहुलकाद्वलोपः । क्लीं क्लीबत्वं तकति । वृष्यत्वात् । 'तक हसने' (भ्वा० प० से०) । मूलविभुजादिकः (वा० ३।२।५) ॥ (२) ॥*॥ यष्टी मध्विवास्याः । कप् (५।४।१५४) (३) ॥*॥ मधुयष्टीव । 'इवे–' (५।३।९६) इति कन् । **'मधुयष्टी** च **यष्टी** च यष्टीमधुकमेव च' इति वाचस्पतिः ॥ (४) ॥*॥ चत्वारि **'यष्टिमधुकस्य' 'जेठीमधु'** इति ख्यातस्य ॥

विदारी क्षीरशुक्लेक्षुगन्धा क्रोष्ट्री च यासिता ।

वीति ॥ विदारयति । 'दृ विदारणे' (क्र्या० प० से०) । ण्यन्तः । पचाद्यच् (३।१।१३४) । गौरादिः (४।१।४१) **'विदारी** शालपर्ण्यां च रोगभेदेक्षुगन्धयोः' (इति मेदिनी) ॥ (१) ॥*॥ क्षीरमिव शुक्ला ॥ (२) ॥*॥ इक्षुर्गन्धोऽस्याः । इक्षुशब्दस्तद्गन्धसदृशे गौणः । समासान्तविधेरनित्यत्वान्नेत्वम् ॥ (३) ॥*॥ क्रोशति । 'क्रुश आह्वाने' (भ्वा० प० से०) । 'सितनि–' (उ० १।६९) इति तुन् । 'स्त्रियां च' (७।१।९६) इति तृज्वत् । 'ऋन्नेभ्यो ङीप्' (४।१।५) । मुकुटस्तु—ष्ट्रनि षित्त्वान् ङीप्—इत्याह । **'क्रोष्ट्री** शृगालिकाकृष्णविदारीलाङ्गलीषु च' (इति मेदिनी) ॥ (४) ॥*॥ चत्वारि[1] **'कृष्णभूकूष्माण्डस्य'** । मुकुटस्तु–शुक्लस्य इत्याह । तन्न । 'कृष्णविदारी' इति मेदिनीविरोधात् । एतेन–या सिता शुक्ला—इत्यपास्तम् । 'या असिता' इति छेत्तुमुचितत्वात् । स्वामी तु—विदार्यादित्रयं पठित्वा 'कृष्णो भूकूष्माण्डोऽयं प्राक्षु देशेषु' इत्युक्त्वा 'क्रोष्ट्री तु या सिता' इति पठित्वा 'शुक्लो भूकूष्माण्डः' इत्युक्त्वा 'अन्या क्षीरविदारी–' इति त्रयं पपाठ । तत्र विभागत्रयमनुचितम् । उक्तमेदिनीविरोधात् ॥

अन्या क्षीरविदारी स्यान्महाश्वेतर्क्षगन्धिका ॥११०॥

अन्येति ॥ क्षीरवती विदारी ॥ (१) ॥*॥ महती चासौ श्वेता च ॥ (२) ॥*॥ ऋक्षान् गन्धयति । **'गन्ध अर्दने'** (चु० आ० से०) । मूलविभुजादिः (वा० ३।२।५) कन् (५।३।७५) यद्वा ऋक्षो गन्धोऽस्याः । ऋक्षशब्दस्तद्गन्धसदृशे गौणः ॥ (३) ॥*॥ अन्या असितायाः शुक्ला—कृष्णा—इति मुकुटोक्तं चिन्त्यम् । त्रीणि **'शुक्लभूकूष्माण्डस्य'** ॥

लाङ्गली शारदी तोयपिप्पली शकुलादनी ।

लेति ॥ लाङ्गलाकारोऽस्त्यस्याः । अर्शआद्यच् (५।२।१२७) गौरादिः (३।१।४१) । **'लाङ्गली** तोयपिप्पल्यां क्लीबं तु कुसुमान्तरे । गोदारणे तृणराजगृहदारुविशेषयोः' (इति मेदिनी) ॥ (१) ॥*॥ शरदि भवा । 'संधिवेला–' (४।३।१६) इत्यण् । **'शारदो** वत्सरे नवे । शरद्भवे पीतमुद्गे शालीनेऽप्यथ **शारदी** । सप्तपर्णाम्बुपिप्पल्योः' इति हैमः ॥ (२) ॥*॥ तोयस्य पिप्पलीव ॥ (३) ॥*॥ शकुलैरद्यते । 'अद भक्षणे' (अ० प० अ०) । 'कृत्यल्युटः–' (३।३।११३) इति ल्युट् । 'टिड्ढा–' (४।१।१५) इति ङीप् । युचि (उ० २।७८) तु गौरादित्वम् (४।१।४१) । **'शकुलादनी** स्त्रियां कृष्णभेदीकचट (?)-

---

१—विदार्यादीनां कृष्णभूकूष्माण्डवाचकत्वे स्वोक्तस्य 'क्षीरमिव शुक्ला' इति विग्रहस्यैव विरोधः स्पष्ट एव । क्षीरविदार्यादीनां शुक्लभूकूष्माण्डवाचकत्वे **'क्रोष्ट्री** क्षीरविदारिका' इति हैमस्य **क्रोष्ट्री** शृगालिकाक्षीरविदारीलाङ्गलीषु च' इति विश्वस्य च विरोधः स्पष्ट एव । क्रोष्ट्रीशब्दस्य कृष्णवाचकत्वाङ्गीकारात् । तस्मात् विदार्यादीनां त्रयाणां शुक्लभूकूष्माण्डवाचकत्वं मुकुटोक्तं सम्यक् । ततः 'क्रोष्ट्री तु' इति पाठः स्वाम्युक्तः साधुः । 'असिता' इति व्याख्यासुधोक्तश्छेदः समीचीनः । तथा च अन्या या असिता कृष्णा सा तु 'क्रोष्ट्री क्षीरविदारी महाश्वेता ऋक्षगन्धिका' इति शब्दचतुष्टयवाच्या । अतो न मेदिनीविरोधः । नापि हैमविश्वयोर्विरोधः । एवं च विदार्यादित्रयं शुक्लवाचकम् । क्रोष्ट्र्यादिचतुष्टयं कृष्णवाचकम्' इति मन्तव्यम् । नच 'महाश्वेता' इति नाम्नो यौगिकत्वानुपपत्तिः । महती परिमाणेन । अत एव अश्वेता अश्वेनेता । महती चासावश्वेता च' इति शुना श्वाकारेणेता श्वेता, इति वा योगसंभवात् । अत एव मुकुटेन 'महाप्रमाणा' इत्युक्तम् ॥

शाकयोः' (इति मेदिनी) ॥ (४) ॥*॥ चत्वारि **'जलपिप्पली'** इति ख्यातस्य शाकभेदस्य ॥

खराश्वा कारवी दीप्यो मयूरो लोचमस्तकः ॥१११॥

खरेति ॥ खरमश्नुते । खरैरश्यते वा । 'अशूङ् व्याप्तौ संघाते च' (स्वा० आ० से०) 'अश भोजने' वा । 'उल्वादयश्च' (उ० ४।९५) इति वः । 'अशिप्रुषि–' (उ० १।१५१) इति क्नन् वा ॥ (१) ॥*॥ केन जलेन रौति । 'रु शब्दे' (अ० प० अ०) । पचाद्यच् (३।१।१३४) । करवस्य मयूरस्येयम् । 'तस्येदम्' (४।३।१२०) इत्यण् । यत्तु—'कारोरियम्' कारवस्येयं वा—इति व्याख्यातं मुकुटेन । तन्न । वृद्धत्वाच्छप्रसङ्गत्वात् । **'कारवी** मधुरादीप्यत्वक्पत्रीकृष्णजीरके' (इति मेदिनी) ॥ (२) ॥*॥ दीपनम् । घञ् (३।३।१८) दीपे साधुः । 'तत्र साधुः' (४।४।९८) इति यत् ॥*॥ **'दीपकः'** अपि । 'अलंकारे यवान्यां च **दीपको** लोचमस्तके' इति रभसः ॥ (३) ॥*॥ मीनाति रोगम् । 'मीञ् हिंसायाम्' (क्या० उ० अ०) । मीनातेरूरन्' (उ० १।६७) । मुकुटस्तु—मिनोति प्रक्षिपत्यग्निमान्द्यमिति खर्जूरादित्वात् उरच्—इत्याह । तन्मन्दम् । 'मीनातेरूरन्' इति सूत्रस्य सत्त्वात् । **'मयूरो** नीलकण्ठेऽपि स्यान्मयूरशिखौषधौ' इति रभसः ॥ (४) ॥*॥ लोच्यते । 'लोचृ दर्शने' (भ्वा० आ० से०) । घञ् (३।३।१९) यद्वा लोचयति । 'लोचृ भासने' (चु० उ० से०) । पचाद्यच् (३।१।१३४) । लोचो दर्शनीयो भासमानो वा मस्तकोऽस्य । मुकुटस्तु—लुच्यते—इति विगृहीतवान् । तन्न । 'लुञ्च अपनयने' (भ्वा० प० से०) अस्मात् घञि नलोपविधायकाभावात् ।–**'लोचमर्कटः'** इत्यपि—इति स्वामी ॥ (५) ॥*॥ पञ्च **'मयूरशिखायाः'** ॥

गोपी श्यामा शारिवा स्यादनन्तोत्पलशारिवा ।

गोपीति ॥ गोपायति 'गुपू रक्षणे' (भ्वा० प० से०) आयाभावे पचाद्यच् (३।१।१३४) । गौरादिङीष् (४।१।४१) ॥*॥ केचित्तु अजादित्वात् (४।१।४) टापमाहुः । 'गोपी श्यामा **गोपवल्ली गोपा गोपालिका** च सा' इति वाचस्पतिः ॥ (१) ॥*॥ श्यायते । 'श्यैङ् गतौ' (भ्वा० आ० अ०) । 'इषियुधि–' (उ० १।१४५) इति मक् ॥ (२) ॥*॥ शारणम् । 'शॄ हिंसायाम्' (क्या० प० से०) । 'कॄगॄशॄपॄकटि–' इतीण् । शारिरस्त्यस्याः । 'अन्येभ्योऽपि' (वा० ५।१।१०९) इति वः ॥ (३) ॥*॥ न अन्तोऽस्याः । **'अनन्ता** च विशल्यायां शारिवाद्वयोरपि' (इति मेदिनी) ॥ (४) ॥*॥ उत्पलमस्त्यस्याः । उत्पलाकारपुष्पत्वात् । अर्शआद्यच् (५।२।१२७) । यद्वा उद्यतं पलमनया । उत्पला चासौ शारिवा च ॥ (५) ॥*॥ पञ्च **'उत्पलशारिवायाः' 'गुलीसर'** इति ख्यातस्य ॥

—उज्ज्वलदत्तादिषु तु 'श्वः शकुनौ' (४।१२८) इत्येव सूत्रमुपलभ्यते ॥

योग्यमृद्धिः सिद्धिलक्ष्म्यौ

योग्यमिति ॥ युज्यते । 'युजिर् योगे' (रु० उ० अ०) । 'ऋहलोर्ण्यत्' (३।१।१२४) । यद्वा योगाय प्रभवति । 'योगाद्यच्च' (५।१।१०२) । **'योग्यः** प्रवीणयोगार्होपायिशक्तेषु वाच्यवत् । क्लीबमृद्धोषधौ, पुष्पे नाख्यभ्यासार्कयोषितोः' (इति मेदिनी) ॥ (१) ॥*॥ ऋध्नोति । 'ऋधु वृद्धौ' (स्वा० प० से०) । क्तिच् (३।३।१७४) । **'ऋद्धिः** स्यादौषधीभेदे समृद्धावति योषिति' (इति मेदिनी) ॥ (२) ॥*॥ सिध्यति । 'षिधु संराद्धौ' (दि० प० अ०) । क्तिच् (३।३।१७४) । **'सिद्धिस्तु** मोक्षे निष्पत्तियोगयोः' इति हैमः । (**'सिद्धिः** स्त्री योगनिष्पत्तिपादुकान्तर्धिवृद्धिषु' इति मेदिनी) ॥ (३) ॥*॥ लक्ष (य) ति । लक्ष्यते वा । 'लक्ष दर्शने' (चु० प० से०) । 'लक्षेर्मुट् च' (उ० ३।१६०) इतीः । **'लक्ष्मीः** संपत्तिशोभयोः । ऋद्ध्योषधौ च पद्मायां वृद्धिनामौषधेऽपि च' (इति मेदिनी) ॥ (४) ॥*॥ चत्वारि **'ऋद्ध्याख्यौषधेः'** ॥

वृद्धेरप्याह्वया इमे ॥ ११२ ॥

वृद्धेरिति ॥ इमे उक्ताश्चत्वारो वृद्ध्याख्यौषधेरप्याह्वया नामानि ॥ (४) ॥*॥ वर्धतेऽनया । 'वृधु वृद्धौ' (भ्वा० आ० से०) । क्तिच् (३।३।१७५) । **'वृद्धिस्तु** वर्धने योगेऽप्यष्टवर्गौषधान्तरे । कालान्तरे चाभ्युदये समृद्धावपि योषिति' (इति मेदिनी) ॥ (५) ॥*॥ पञ्च **'वृद्ध्याख्यौषधेः'** ॥

कदली वारणवुसा रम्भा मोचांशुमत्फला ।
काष्ठिला

कदेति ॥ कन्दते । कन्द्यते वा । 'कदि आह्वाने रोदने च' (भ्वा० आ० से०) । वृषादित्वात् (उ० १।१०६) साधुः (आगमशासनमनित्यम्) । केन वायुना दल्यते वा । 'दल विशरणे' (भ्वा० प० से०) 'खनो घ च' (३।३।१२५) इति घः । गौरादिः (४।१।४१) । यत्तु—घञर्थे कः (वा० ३।३।५८)—इति मुकुटः । तन्न । परिगणनात् । मुकुटस्तु—कदेः सौत्रात् 'कदल्यादयः' इत्यलच्—इत्याह । तन्न । कदेः सौत्रस्य धातोरभावात् । उज्ज्वलदत्ताद्युणादिवृत्तिष्वुक्तसूत्रस्यादर्शनात् । **'कदला कदली** पृश्न्यां **कदली-कदलौ** पुनः । रम्भावृक्षेऽथ **कदली** पताकामृगभेदयोः । **कदला** डिम्बिकायां च शाल्मलीभूरुहेऽपि च' (इति मेदिनी) ॥*॥ अजादित्वात् (४।१।४) टापि कदला । **'कदलश्च** कदल्यासौ' इति व्याडिः ॥ (१) ॥*॥ वारणानां वुसा । वुस्यति वुस्यते वा । 'वुस उत्सर्गे' (दि० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । भिदाद्यङ् (३।३।१०४) वा । 'घञर्थे कः' इति परिगणनान्नेह प्रवर्तते ॥*॥ **'वुषा'** इति मूर्धन्यान्ता' इति केचित् ॥ (२) ॥*॥ रभति । 'रभ राभस्ये' (भ्वा० आ० अ०) । पचाद्यच् (३।१।१३४) । 'रभेरशब्लिटोः' (७।१।६३) इति नुम् । रयते वा । घञ् (३।३।१९) । मुकुट-

स्तु—रभन्तेऽनया । 'घञर्थे कः' (वा० ३।३।५८) इत्याह । तन्न । परिगणनात् कस्याप्राप्तेः । सति तु के 'अनिदिताम्–' (६।४।२४) इति नलोपप्रसङ्गाच्च । **'रम्भा** कदल्यप्सरसोर्ना वेणौ वारणान्तरे' (इति मेदिनी) ॥ (३) ॥*॥ मुञ्चति । 'मुच्लृ मोक्षणे' (तु० प० अ०) । पचाद्यच् (३।१।१३४) । **('मोचः** शोभाञ्जने पुंसि **मोचा** शाल्मलिरम्भयोः' इति मेदिनी) ॥ (४) ॥*॥ अंशुमन्ति सूक्ष्मावयववन्ति फलान्यस्याः । यद्वा अंशुमानिव फलान्यस्याः । अजादिः (४।१।४) । 'कदली **सुकुमारा** च रम्भा **भानुफला** मता' इति धन्वन्तरिः ॥ (५) ॥*॥ काण्डिना इत्यते । 'इल खप्रक्षेपणयोः' (तु० प० से०) । घञ् (३।३।१९) ॥ (६) ॥*॥ षट् **'कदल्याः'** ॥

मुद्गपर्णी तु काकमुद्गा सहेत्यपि ॥ ११३ ॥

मुद्गेति ॥ मुद्गः पर्णमस्याः । मुद्गशब्देन मुद्गपर्णसदृशं पर्ण लक्ष्यते । 'पाककर्ण–' (४।१।६४) इति ङीष् ॥ (१) ॥*॥ ईषत् कम् । 'ईषदर्थे च' (६।३।१०५) इति कोः कादेशः । काकेनेषज्जलेन मुदं गच्छति । 'गमश्च' (३।२।४७) इति डः । यद्वा काका मुद्गा हर्षप्राप्ता यस्याम् ॥ (२) ॥*॥ सहते । 'षह मर्षणे' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) **'सहो** बले न स्त्रियां स्यात् स्त्रियां तु नखभेषजे । दण्डोत्पलामुद्गपर्णीकुमारीपृथिवीषु च' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'काकमुद्गायाः' 'मुगौनी'** इति ख्यातायाः ॥

वार्ताकी हिङ्गुली सिंही भण्टाकी दुष्प्रधर्षणी ।

वार्तेति ॥ वार्तमारोग्यमाकयति । 'अक कुटिलायां गतौ' (भ्वा० प० से०) ण्यन्तः । 'कर्मण्यण्' (३।२।१) यद्वा वार्तं फल्गु अकं यस्याः । 'जातेः' (४।१।६३) इति ङीष् । **'वातिङ्गणस्तु वार्ताङ्गो वार्ताकः शाकबिल्वकः'** इति रभसात् पुंस्यपि ॥*॥ **'वार्ता** वातिङ्गणे वृत्तौ' इति विश्वद् 'वार्ता' अपि ॥*॥ 'वार्ताकरेषा गुणसप्तयुक्ता' इति वैद्यकात् ('वातिङ्गणश्च **वार्ताकुः**' इति त्रिकाण्डशेषाच्च) 'वार्ताकुः' अपि ॥ (१) ॥*॥ हिङ्गु लाति । 'आतोऽनुप–' (३।२।३) इति कः । गौरादि ङीष् (४।१।४१) । **'हिङ्गुलो** वर्णकद्रव्ये ना भण्टाक्यां तु हिङ्गुली' (इति मेदिनी) ॥ (२) ॥*॥ हिनस्ति । 'हिंसि हिंसायाम्' (रु० प० से०) । पचाद्यच् । पृषोदरादिः (६।३।१०९) । **'सिंहस्तु** राशिभेदे मृगाधिपे । श्रेष्ठे स्यादुत्तरस्थश्च **सिंही** स्वर्भानुमातरि । वासावृहत्योः क्षुद्रायाम्' इति हैमः ॥ (३) ॥*॥ भक्ष्यते । भण्यते वा । 'भट भृतौ' (भ्वा० प० से०) । 'भण शब्दे' (भ्वा० प० से०) वा । 'पिनाकादयश्च' (उ० ४।१५) इति साधुः ॥ (४) ॥*॥ दुःखेन प्रधृष्यते । 'धिंधृषा प्रागल्भ्ये' (स्वा० प० से०) । कर्मणि ल्युट् (३।३।११३) ॥*॥ आभीक्ष्ण्ये णिनौ (३।२।८१) तु **'दुष्प्रधर्षिणी'** ॥ (५) ॥*॥ पञ्च **'भण्टाक्याः'** ॥

नाकुली सुरसा राम्ना सुगन्धा गन्धनाकुली ॥११४
नकुलेष्टा भुजंगाक्षी छत्राकी सुवहा च सा ।

नेति ॥ नकुलानामियम् । प्रियत्वात् । 'तस्येदम्' (४।३।१२०) इत्यण् । न आकुलत्वं यया वा । **'नाकुली** कुक्कुटीकन्दे राम्नायां चव्यके स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ शोभनो रसोऽस्याः । **'सुरसं** तु त्रिषु स्वादौ, पर्णासे तु नपुंसकम् । स्त्री राम्नानागमात्रोश्च' (इति मेदिनी) ॥ (२) ॥*॥ राति । रायते वा । रस्यते वा । 'रा दाने' (अ० प० अ०) । 'रस आस्वादने' (चु० उ० से०) । 'राम्नासाम्ना–' (उ० ३।१५) इति साधुः ।—'राम्नादयः' इत्यानुपूर्वी मुकुटोक्तोज्ज्वलदत्तादिषु नास्ति । **'राम्ना** तु स्याद्भुजंगाक्ष्यामेलापर्ण्यामपि स्त्रियाम्' (इति मेदिनी) ॥ (३) ॥*॥ शोभनो गन्धः सुगन्धः । 'कुगति–' (२) । (२।१८) इति समासः । सुगन्धोऽस्त्यस्याः । मुकुटस्तु—शोभनो गन्धोऽस्याम् । अर्शआद्यच् (५।२।१२७)—इत्याह । तन्न । 'गन्धस्येत्–' (५।४।१३५) इतीत्प्रसङ्गात् । बहुव्रीहिणोक्तार्थत्वादचोऽप्रसङ्गात् । मत्वर्थे बहुव्रीहिविधानात् ॥*॥ स्वामी तु राम्नासुगन्धयोः स्थाने **'नागसुगन्धा'** इति पठित्वा 'सर्पसुगन्धा' इति व्याख्यत् ॥ (४) ॥*॥ गन्धवती नाकुली ॥ (५) ॥*॥ नकुलानामिष्टा ॥ (६) ॥*॥ भुजंगानक्षति । 'अक्षू व्याप्तौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) यद्वा भुजंगोऽक्षि यस्याः । 'अक्ष्णोऽदर्शनात्' (५।४।७६) इत्यच् । 'जातेः–' (४।१।६३) इति—'गौरादिः–' (४।१।४१) इति वा ङीष् । भुजंगशब्दस्य भुजंगाक्षिसदृशे लक्षणा ॥ (७) ॥*॥ छत्रमर्कति[1] । 'अक कुटिलायां गतौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) ॥ (८) ॥*॥ सुष्ठु वहति । पचाद्यच् (३।१।१३४) । **'सुवहा** सल्लक्येलापर्णीगोधापदीषु वीणायाम् । राम्नाशेफालिकयोः स्त्री मुखवाद्येऽन्यलिङ्गः स्यात्' (इति मेदिनी) ॥ (९) ॥*॥ नव **'रासना'** इति ख्यातायाः ॥

विदारिगन्धांशुमती सालपर्णी स्थिरा ध्रुवा ॥ ११५ ॥

विदेति ॥ विदार्या गन्धः । विदारिगन्धः । 'ह्यापोः–' (६।३।६३) इति ह्रस्वः सोऽस्त्यस्याः । मुकुटस्तु—विदारीगन्ध इव गन्धोऽस्याः—इति विववार । तच्चिन्त्यम् । 'उपमानाच्च' (५।४।१३७) इतीकारप्रसङ्गात् ॥ (१) ॥*॥ अंशवः सन्त्यस्याः । दीर्घमूलत्वात् । **'अंशुमान्** भास्करे सालपर्ण्यामंशुमती स्मृता' (इति मेदिनी) ॥ (२) ॥*॥ सालः पर्णमस्याः । सालशब्दस्य सालपर्णसदृशे लक्षणा ॥*॥ तालव्यशार्ङ्गेष्वपि (**शालपर्णी**) इत्येके ॥ (३) ॥*॥ तिष्ठति, 'अजिरशिबिर–' (उ० १।५३) इति साधुः । अन्तर्भावितण्यर्थो वा

१—'गमश्च' इति सूत्रेऽस्य खचो विधानादसंगतमिदम् ॥ तस्मात् 'अन्येष्वपि–' (३।२।४८) इति वार्तिकेन डो विधेयः ॥

१—अत्र 'छत्राकारपर्णत्वात्' इत्यपि पाठः ॥

तिष्ठतिः । **'स्थिरा** भूसालपर्ण्योर्नी शनौ मोक्षेऽचले त्रिषु' (इति मेदिनी) ॥ (४) ॥*॥ ध्रुवति । 'ध्रुवैं स्थैर्ये' (तु० प० अ०) । **'ध्रुवो** वटे । वसुयोगभिदोः शंभौ शङ्कानुत्तानपादजे । स्थिरे नित्ये निश्चिते च **ध्रुवं** खेऽजस्रतर्कयोः । **ध्रुवा** मूर्वा-शालपर्ण्योः स्रुग्भेदे गीतभिद्यपि' (इति हैमः) ॥ (५) ॥*॥ पञ्च **'शालपर्ण्याः'** ॥

तुण्डिकेरी समुद्रान्ता कार्पासी बदरेति च ।

तुण्डीति ॥ तुण्डिकाञ्शरीराणि ईरयति । 'ईर गतिप्रेरणयोः' (अ० आ० से०) । 'कर्मण्यण्' (३।२।१) ॥ (१) ॥*॥ समुद्रोऽन्तो यस्याः । यद्वा मुद्रया सह वर्तमानोऽन्तः समीपं यस्याः । आच्छादकत्वात् ॥ (२) ॥*॥ करोति कियते वा । 'कृञः पासः' (उ० ५।४५) । जातित्वात् (४।१।६३) गौरादित्वात् (४।१।४१) वा ङीष् । पृषोदरादिः (५।३।१०९)—इति मुकुटोक्तिस्तु चिन्त्या । कर्पासीशब्दस्य ह्रस्वादित्वात् । दीर्घादित्वे प्रामाणिके तु प्रज्ञाद्यणा (५।४।३८) सिद्धत्वात् ॥ (३) ॥*॥ बदति । 'बद स्थैर्ये' (भ्वा० प० से०) । बाहुलकादरः ॥ (४) ॥*॥ चत्वारि **'कार्पास्याः' 'कपास'** इति ख्यातस्य ॥

भारद्वाजी तु सा वन्या

भारेति ॥ भरद्वाजस्य मुनेरियम् । तेन निर्मितत्वात् । 'तस्येदम्' (४।३।१२०) इत्यण् ॥ (१) ॥*॥ सा कर्पासी वन्या चेत्तदा भारद्वाजी । 'वनकर्पासिकायां तु सहा चन्दनवीजिका । भारद्वाजी महावीर्या कुष्ठला कुष्ठनाशिनी' इति वाचस्पतिः । एकं **'वनकर्पास्याः' 'नर्मा'** इति ख्यातायाः ॥

शृङ्गी तु ऋषभो वृषः ॥ ११६ ॥

शृङ्गीति ॥ शृणाति गदम् । 'शॄ हिंसायाम्' (क्र्या० प० से०) । 'शृणातेर्ह्रस्वश्च' (उ० १।१२६) इति गन् नुम् च । गौरादित्वात् (४।१।४१) ङीष् । 'ऋषभेऽतिविषायां च शृङ्गी मद्गुरवल्लभा' इति रुद्राजयौ ॥ (१) ॥*॥ ऋषति । 'ऋषी गतौ' (तु० प० से०) । 'ऋषिवृषिभ्यां कित्' (उ० ३।१२३) इत्यभच् । **'ऋषभस्त्वौषधान्तरे** । खरभिद्वृषयोः कर्णरन्ध्रकुम्भीरपुच्छयोः' (इति मेदिनी) ॥ (२) ॥*॥ वर्षति । 'वृषु सेचने' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः ॥ (३) ॥*॥ त्रीणि **'ऋषभाख्यौषधेः' 'काकडासिंगी'** इति ख्यातायाः ॥

गाङ्गेरुकी नागबला झषा ह्रस्वगवेधुका ।

गेति ॥ गाङ्गं जलमीरयति । 'ईर गतौ क्षेपणे च' (अ० आ० से०) । 'मृगय्वादयश्च' (उ० १।३७) इति साधुः । कन् (५।३।७५) । गौरादिः (४।१।४१) ॥ (१) ॥*॥ नागानां हस्तिनां बला ॥ (२) ॥*॥ झषति वातम् । 'झष हिंसार्थैः' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । **'झषा** नागबलायां स्त्री तापमत्स्याटवीषु ना' (इति मेदिनी) ॥ (३) ॥*॥ गवि भूमावेधते । 'एध वृद्धौ' (भ्वा० आ० से०) । बाहुलकादुः । 'संज्ञायां कन्' (५।३।७५) । ह्रस्वा चासौ गवेधुका च ॥ (४) ॥*॥ चत्वारि **'बलायाः' 'कंकही' 'गंगेरण'** इति ख्यातायाः ॥

धामार्गवो घोषकः स्यात्

धामेति ॥ धाम ऋच्छति । 'ऋ गतौ' (भ्वा० प० अ०) । 'अन्येभ्योऽपि' (३।२।७५) इति विच् । धामार् चासौ गौश्च । 'गोरतद्धितलुकि' (५।४।९२) इति टच् । **'धामार्गवस्तु** पुंसि स्यादपामार्गे च घोषके' (इति मेदिनी) ॥*॥ घोषति । 'घुषिर विशब्दने' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । स्वार्थे कन् (५।३।७५) । **'घोष** आभीरपल्लयां स्याद्घोषपालध्वानघोषके । कांस्ये चाम्बुदनादे ना **घोषा** मधुरिकौषधौ' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'घोषवल्लयाः' 'श्वेतपुष्पतोरयी'** इति ख्यातायाः ॥

महाजाली स पीतकः ॥ ११७ ॥

महेति ॥ जालयति । 'जल आच्छादने' चुरादिः । पचाद्यच् (३।१।१३४) । गौरादिः (४।१।४१) । महती चासौ जाली च ॥ (१) ॥*॥ एकम् **'पीतघोषवल्लयाः' 'घीया'** इति ख्यातायाः ॥

ज्यौत्स्नी पटोलिका जाली

ज्यौत्स्नीति ॥ ज्योत्स्नास्त्यस्याः 'ज्योत्स्नादिभ्य उपसंख्यानम्' (वा० ५।२।१०१) इत्यण् । **'ज्यौत्स्नी** पटोली ज्योत्स्नावन्निशोः' इति हैमः ॥*॥ संज्ञापूर्वकत्वात् वृद्ध्यभावे **'ज्योत्स्नी'** अपि ॥ (१) ॥*॥ पटति । 'पट गतौ' (भ्वा० प० से०) । 'कपिगडिगण्डि–' (उ० १।६६) इत्योलच् । गौरादिः (४।१।४१) स्वार्थे कन् (१।३।७५) । **'पटोलं** वस्त्रभेदे नौषधौ ज्योत्स्न्यां तु योषिति' (इति मेदिनी) ॥ (२) ॥*॥ जलति । 'जल घान्ये' (भ्वा० प० से०) । 'ज्वलिति–' (३।१।१४०) इति णः । 'जातेः–' इति '–गौरा–' (४।१।४१) इति वा ङीष् । **'जालं** गवाक्ष आनाये क्षारके दम्भवृन्दयोः । **जालो** नीपद्रुमे **जाली** पटोलिकौषधौ स्त्रियाम्' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'पटोलिकायाः' 'छिछिंडा' 'तोरयी'** इति ख्यातस्य ॥

नादेयी भूमिजम्बुका ।

नादेति ॥ नद्यां भवा । 'नद्यादिभ्यो ढक्' (४।२।९७) । **'नादेयी** नागरङ्गे स्याज्जायायां जलवेतसे । भूमिजम्ब्वां च जम्ब्वां च अङ्गुष्टेऽपि च योषिति' (इति मेदिनी) ॥ (१) ॥*॥ भूमिलग्ना जम्बुका । शाकपार्थिवादिः (२।१।६९) । भूमिलग्नपत्रत्वात् ॥ (२) ॥*॥—प्रागुक्तापि भ्रमात्पुनरिहोक्ता–इति स्वामी । द्वे **'भूमिजम्बुकायाः'** ॥

१—अत्र 'ध्रुव स्थैर्ये' इत्युत्तरं 'इगुपध–' इति कः इति पाठः ।

स्याल्लाङ्गलिकयग्निशिखा

स्यादिति ॥ लाङ्गलं पुष्पविशेषोऽस्त्यस्याः । ठन् (५।२।११५) । 'जातेः' (४।१।६३) इति '–गौरादि–' (४।१।४१) इति वा ङीष् । लाङ्गलवत् खनति भूमिम् । 'तेन दीव्यति–' (४।४।२) इति ठक् । 'टिड्ढा–' (४।१।१५) इति ङीप् ॥ (१) ॥*॥ अग्नेरिव शिखास्याः । **'अग्निज्वाला** लाङ्गलिकी' इति वाचस्पतिः ॥ (२) ॥*॥ द्वे **'लाङ्गल्याः' 'करिहारी'** इति ख्यातायाः ॥

काकाङ्घी काकनासिका ॥ ११८ ॥

काकेति ॥ काकस्येवाङ्गं नासारूपं फलमस्याः गौरादिः (४।१।४१) ॥ (१) ॥*॥ काकस्येव नासिका यस्याः ॥ (२) ॥*॥ द्वे **'काकजङ्घायाः' 'कौवाठोठी'** इति ख्यातायाः ॥

गोधापदी तु सुवहा

गोधेति ॥ गोधाया इव पादो मूलमस्याः । 'कुम्भपदीषु च' (५।४।१३९) इति साधुः ॥ (१) ॥*॥ सुवहति । पचाद्यच् (३।१।१३४) । 'गोधापदी तु सुवहा **त्रिफला हंसपद्यपि**' इति कोषान्तरम् ॥ (२) ॥*॥ द्वे **'हंसपद्याः'** ॥

मुसली तालमूलिका ।

मुसेति ॥ मुस्यति । 'मुस खण्डने' (दि० प० से०) । वृषादिः (उ० १।१०६) । **'मुसलं** स्यादयोग्रे च पुंनपुंसकयोः स्त्रियाम् । तालमूल्यामाखुपर्णीगृहगोधिकयोरपि' (इति मेदिनी) ॥ (१) ॥*॥ तालो मूलमस्याः । तालशब्दस्तालमूलसदृशे लाक्षणिकः । 'पाककर्ण–' (४।१।६४) इति ङीष् । स्वार्थे कन् (५।३।७५) ॥ (२) ॥*॥ द्वे **'मुसली'** इति ख्यातायाः ॥

अजशृङ्गी विषाणी स्यात्

अजेति ॥ अजः शृङ्गमस्याः । अजशब्दोऽजशृङ्गसदृशे लाक्षणिकः । गौरादिः (४।१।४१) ॥ (१) ॥*॥ फलस्याजशृङ्गसदृशत्वात् विषाणमस्त्यस्याः । अर्शआद्यच् (५।२।११५) । गौरादिङीष् (४।१।४१) । **'विषाणी** क्षीरकाकोल्यामजशृङ्ग्यां च योषिति । कुष्ठनामौषधे क्लीबं त्रिषु शृङ्गेभदन्तयोः' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'अजशृङ्ग्याः' 'मेडासींगी'** इति ख्यातायाः ॥

गोजिह्वादर्विके समे ॥ ११९ ॥

गोजीति ॥ गोजिह्वेव ॥ (१) ॥*॥ दर्वीव । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् ॥*॥ 'दार्विका' इति पाठे दारयति । 'दृ विदारणे' (क्रया० प० से०) । उल्वादित्वात् (उ० ४।९५) साधुः । **'दार्वी** दारुहरिद्रायां तथा गोजिह्विकौषधौ' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'गोजिह्वायाः' 'गोभी'** इति ख्यातायाः ॥

ताम्बूलवल्ली ताम्बूली नागवल्ल्यपि

तेति ॥ ताम्यति । 'तमु ग्लानौ' (दि० प० से०) । क्विप् (३।२।१७८) । 'अनुनासिकस्य–' (६।४।१५) इति दीर्घः । वोलति । 'वुल् मज्जने' (चु० प० से०) चुरादीनां णिज्वा । 'इगुपध–' (३।१।१३५) इति कः । ताम् चासौ वुली च । पृषोदरादिः (६।३।१०९) । ताम्बूलाख्या वल्ली शाकपार्थिवादिः (वा० २।१।६९) ॥ (१) ॥*॥ गौरादिः (४।१।४१) । **'ताम्बूली** नागवल्ल्यां स्त्री क्रमुके तु नपुंसकम्' (इति मेदिनी) ॥ (२) ॥*॥ नागलोकस्य वल्ली ॥ (३) ॥*॥ त्रीणि **'नागवेली'** इति ख्यातायाः ॥

अथ द्विजा ।

हरेणू रेणुका कौन्ती कपिला भस्मगन्धिनी ॥ १२० ॥

अथेति ॥ द्विर्जाता । 'जनी' (दि० आ० से०) । 'अन्येष्वपि–' (३।२।१०१) इति ङः । **'द्विजो** विप्रक्षत्रिययोर्वैश्ये दन्ते विहंगमे । **द्विजा** भार्गीरेणुकयोः' इति हेमचन्द्रः ॥ (१) ॥*॥ हरति । 'कृहृभ्यामेणुः' (उ० २।१।) । 'ढूलोपे–' (६।३।१११) इति दीर्घः । 'कषायेऽपि हरेणुर्ना रेणुकायां स्त्रियां भवेत्' इति रुद्रः ॥ (२) ॥*॥ रेणुरस्या अस्ति । व्रीह्यादित्वात् (५।२।११६) ठन् । 'इसुसुक्तान्तात्कः' (७।३।५१) । रेणुरेव । 'संज्ञायाम्' (५।३।७५) इति कन् वा । मुकुटस्तु —रेणुं करोति । डः (वा० ३।२।१०१) । टाप् (४।१।४) रेणुका । पृषोदरादिः (६।३।१०९)—इत्याह । तत्र 'पृषोदरादिः' इत्युक्तिश्चिन्त्या । **'रेणुकापि** हरेणौ च जामदग्न्यस्य मातरि' (इति मेदिनी) ॥ (३) ॥*॥ कुन्तिषु देशेषु भवा । 'तत्र भवः' (४।३।५३) । इत्यण् ॥ (४) ॥*॥ कपिलो वर्णोऽस्त्यस्याः । अर्शआद्यच् (५।२।१२७) । **'कपिला** रेणुकायां च शिंशपागोविशेषयोः । पुण्डरीककरिण्यां स्त्री वर्णभेदे त्रिलिङ्गकम् । नानले वासुदेवे च मुनिभेदे च कुक्कुरे' (इति मेदिनी) ॥ (५) ॥*॥ भस्मनो गन्धः । भस्मगन्धोऽस्त्यस्याः । 'अतः–' (५।२।११५) इतीनिः ॥ (६) ॥*॥ षट् **'हरेणुकायाः'** ॥

एलाबालुकमैलेयं सुगन्धि हरिबालुकम् ।

बालुकं च

एलेति ॥ एलयति 'इल प्रेरणे' (चु० प० से०) । पचाद्यच् (३।१।१३४) । टाप् (४।१।४) । एला इव बलति । 'बल प्राणने' (भ्वा० प० से०) । बाहुलकादुण् । स्वार्थे कन् (५।३।७५) ॥*॥ 'एलबालुकम्' इति स्वामी । तत्र 'ङ्याप्नोः–' (६।३।६३) इति ह्रस्वः ॥ (१) ॥*॥ इलाया अपत्यम् । 'स्त्रीभ्यो ढक्' (४।१।१२०) ॥ (२) ॥*॥ शोभनो गन्धोऽस्य । 'गन्धस्येत्–' (५।४।१३५) इतीत्त्वम् ॥ (३) ॥*॥ हरिवर्णं बालुकम् (४) ॥*॥ **('बालुका** सिकतासु स्याद्बालुकं त्वेलबालुके' (इति मेदिनी) ॥ (५) ॥*॥ पञ्च **'बालुकाख्यगन्धद्रव्यस्य'** ॥

अथ पालङ्क्यां मुकुन्दः कुन्दकुन्दुरू ॥ १२१ ॥

अथेति ॥ पालनम् । 'पाल रक्षणे' (चु० प० से०) । संपदादिः (वा० ३।३।१०८) । पाला अङ्क्यते । 'अङ्क पदे लक्षणे च' (चु० उ० से०) अदन्तः । 'अचो यत्' (३।१।९७) ॥ (१) ॥*॥ मुक्तिं ददाति । 'दाञ्' (जु० उ० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । पृषोदरादिः (६।३।१०९) **'मुकुन्दः** पारदे विष्णौ रत्नभेदे च कुन्दुरौ' ॥ (२) ॥*॥ कुं भूमिमुनत्ति । 'उन्दी क्लेदने' (रु० प० से०) । 'कर्मण्यण्' (३।२।१) । शकन्ध्वादिः (वा० ६।१।९४) । **'कुन्दो** माध्येऽस्त्री मुकुन्दभ्रमिनिध्यन्तरेषु ना' (इति मेदिनी) ॥ (३) ॥*॥ कुमुनत्ति । उन्दयति वा । 'जत्रवादयश्च' (उ० ४।१०२) इति साधुः ॥ (४) ॥*॥ चत्वारि **'कुन्दस्य' 'पालक'** इति ख्यातशाकस्य । **'कुन्दुरु'** इति ख्यातस्य वा ॥

वालं ह्रीवेरबर्हिष्ठोदीच्यं केशाम्बुनाम च ।

वेति ॥ वालयति । 'वल संवरणे' (भ्वा० आ० से०) ण्यन्तः । पचाद्यच् (३।१।१३४) । **'बालो** ना कुन्तलेऽश्वस्य करिणश्चापि बालधौ । वाच्यलिङ्गोऽर्भके मूर्खे ह्रीबेरे पुंनपुंसकम् । अलंकारान्तरे मेध्ये बाली बाला त्रुटौ स्त्रियाम्' (इति स्वर्शादौ मेदिनी) ॥ (१) ॥*॥ ह्रीयुक्तं वेरमस्य । **'वेरं** कलेबरे क्लीबं वार्ताकौ कुङ्कुमेऽपि च' (इति मेदिनी) ॥ (२) ॥*॥ बर्हिषि कुशे तिष्ठति । 'सुपि स्थः' (३।२।४) इति कः । 'अम्बाम्ब–' (८।३।९७) इति षत्वम् ॥ (३) ॥*॥ उदीचि जातम् । 'शुभ्रादिभ्यः–' (४।२।१०१) इति यत् ॥ (४) ॥*॥ केशाम्बुनोर्नाम नाम यस्य ॥ (५) ॥*॥ पञ्च **'ह्रीवेरस्य' 'नेत्रबाला'** इति ख्यातस्य ॥

कालानुसार्यवृद्धाश्मपुष्पशीतशिवानि तु ॥ १२२ ॥
शैलेयम्

केति ॥ कालेनानुस्रियते । 'ऋहलोर्ण्यत्' (३।१।१२४) ॥ (१) ॥*॥ वर्धते स्म । 'वृधु वृद्धौ' (भ्वा० आ० से०) । 'गत्यर्थाकर्मक–' (३।४।७२) इति क्तः । **'वृद्धो** जीर्णे प्रवृद्धे च त्रिषु क्लीबं तु शैलजे' (इति मेदिनी) ॥ (२) ॥*॥ अश्मनः पुष्पमिव । अश्मप्रभवत्वात् ॥ (३) ॥*॥ शीतं च तच्छिवं च ॥ (४) ॥*॥ शिलायां भवम् 'नद्यादिभ्यः' (४।२।९७) इति ढक् । 'शैलेयं तालपर्ण्यां च सैन्धवे । शैलजे ना तु मधुपे शिलातुल्येऽन्यलिङ्गकम्' (इति मेदिनी) ॥ (५) ॥*॥ पञ्च **'शैलेयस्य' 'शिलाजित'** इति ख्यातस्य ॥

तालपर्णी तु दैत्या गन्धकुटी मुरा ।
गन्धिनी

तालेति ॥ तालः पर्णमस्याः । तालशब्दस्तालपर्णसदृशे लाक्षणिकः । 'पाककर्ण–' (४।१।६४) इति ङीष् ॥ (१) ॥*॥ दितेरियम् । 'दित्यदित्या–' (४।१।८५) इति ण्यः ॥ (२) ॥*॥ गन्धस्य कुटीव ॥ (३) ॥*॥ मुरति । 'मुर वेष्टने' (तु० प० से०) । इगुपधत्वात् (३।१।१३५) कः । ('**मुरा** गन्धद्रव्ये दैत्यान्तरे पुमान्' इति मेदिनी) ॥ (४) ॥*॥ प्रशस्तो गन्धोऽस्याः । 'अत इनिठनौ' (५।२।११५) ॥ (५) ॥*॥ पञ्च **'मुराख्यसुगन्धिद्रव्यस्य'** ॥

गजभक्ष्या तु सुवहा सुरभी रसा ॥ १२३ ॥

महेरणा कुन्दुरुकी सल्लकी ह्लादिनीति च ।

गजेति ॥ गजैर्भक्ष्यते । ण्यत् (३।१।१२४) ॥*॥ घञि (३।३।१९) **'गजभक्षा'** वा ॥ (१) ॥*॥ सुवहति । पचाद्यच् (३।१।१३४) ॥ (२) ॥*॥ सुष्ठु रभते । 'सर्वधातुभ्य इन्' (उ० ४।११८) । आगमानित्यत्वान्न नुम् (७।१।६३) । **'सुरभिः** सल्लकीमातृभिन्मुरागोषु योषिति' (इति मेदिनी) ॥ (३) ॥*॥ रस्यते । 'रस आस्वादने' (चु० उ० से०) अदन्तः । घञ् (३।३।१९) । **'रसः** स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे । बोले रागे गृहे धातौ तिक्तादौ पारदेऽपि च' इति हैमः ॥ (४) ॥*॥ महदीरणमस्याः । महमुत्सवमीरयति वा । ल्युः (३।१।१३४) ॥ (५) ॥*॥ कुन्दुरुरिव प्रतिकृतिः । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् । गौरादिः (४।१।४१) ॥ (६) ॥*॥ सलति । 'षल गतौ' (भ्वा० प० से०) । क्वुन् (उ० २।३२) । पृषोदरादिः (६।३।१०९) । गौरादिः (४।१।४१) । सत्कृत्य लक्ष्यते वा । 'लक आस्वादने' क्वुन् (उ० २।३२) ॥*॥ 'सल्लकी **सिल्लकी ह्लादा'** इति रुद्रः ॥*॥ 'श्वाविद्भुभेदौ शल्लक्यौ' इति तालव्यादौ **रभसः** । तत्र 'शक चलने' (भ्वा० प० से०) धातुः ॥ (७) ॥*॥ शादयत्यवश्यम् । 'ह्लादी सुखे च' (भ्वा० आ० से०) । 'आवश्यका–' (३।३।१७०) णिनिः ॥ (८) ॥*॥ अष्टौ **'कुन्दुरुक्याः' 'साला'** इति ख्यातायाः ॥

अग्निज्वालासुभिक्षे तु धातकी धातृपुष्पिका॥१२४॥

अग्नीति ॥ अग्नेर्ज्वालेव । रक्तपुष्पत्वात् ॥ (१) ॥*॥ सुष्ठु भिक्ष्यते । घञ् (३।३।१९) ॥ (२) ॥*॥ धातुं करोति । 'तत्करोति–' (वा० ३।१।२६) इति ण्यन्तात् ण्वुल् (३।१।१३३) । गौरादिः (४।१।४१) ॥ (३) ॥*॥ धातृ पुष्पमस्याः । शैषिकः कप् (५।४।१५४) ॥ (४) ॥*॥ चत्वारि **'धातक्याः' 'धवा'** इति ख्यातायाः ॥

पृथ्वीका चन्द्रबालैला निष्कुटिर्बहुला

पृथ्वीति ॥ प्रथते । 'प्रथ प्रख्याने' (भ्वा० आ० से०) । 'फर्फरीकादयश्च' (उ० ४।२०) इति साधुः ॥ (१) ॥*॥ चन्द्रस्य कर्पूरस्य बालेव । कर्पूरगन्धित्वात् ॥ (२) ॥*॥ एलयति । 'इल प्रेरणे' (चु० प० से०) पचाद्यच् (३।१।१३४) ॥ (३) ॥*॥ निश्चिता कुटिः कौटिल्यमस्याः । निष्क्रान्ता कुटेर्वा ॥*॥ 'कृदिकारात्–' (ग० ४।१।४५) इति वा ङीष् ।

(**निष्कुटी**) ॥ (४) ॥*॥ बहूनि बीजानि लाति । 'आतोऽनुप–' (३।२।३) इति कः । '**बहुला** नीलिकायां स्यादेलायां गवि योषिति । कृत्तिकासु स्त्रियां भूम्नि विहायसि नपुंसकम् । पुंस्यग्नौ कृष्णपक्षे च वाच्यवत्प्राज्यकृष्णयोः' (इति मेदिनी) ॥ (५) ॥*॥ पञ्च '**एलायाः**' '**एलायची**' इति ख्यातायाः ॥

अथ सा ।

सूक्ष्मोपकुञ्चिका तुत्था कोरङ्गी त्रिपुटा त्रुटिः १२५

अथेति ॥ उपकुञ्चति । 'कुञ्च कौटिल्याल्पीभावयोः' (भ्वा० प० से०) । ण्वुल् (३।१।१३३) ॥ (१) ॥*॥ तुदति । 'तुद व्यथने' (तु० उ० अ०) । 'पातृतुदि–' (उ० २।७) इति थक् । '**तुत्थमञ्जनमेदे स्यान्नीलीसूक्ष्मैलयोः स्त्रियाम्**' (इति मेदिनी) ॥ (२) ॥*॥ कुरति । 'कुर शब्दे' (तु० प० से०) । बाहुलकादङ्गच् । गौरादिः (४।१।४१) ॥ (३) ॥*॥ त्रयः पुटा यस्याः । '**त्रिपुटा** मल्लिकायां च सूक्ष्मैलात्रिवृतोः स्त्रियाम् । सतीनके च तीरे च **त्रिपुटः** समुदाहृतः' (इति मेदिनी) ॥ (४) ॥*॥ त्रुटति । 'त्रुट छेदे' (तु० प० से०) । 'इगुपधात्–' (उ० ४।१२०) इतीन् । '**त्रुटिः** स्त्रीसंशये स्वल्पे सूक्ष्मैलाकालमानयोः' (इति मेदिनी) ॥ (५) ॥*॥ पञ्च '**सूक्ष्मैलायाः**' ॥

व्याधिः कुष्ठं पारिभाव्यं व्याप्यं पाकलमुत्पलम् ।

व्येति ॥ विगत आधिरनेन । '**कौबेरं भास्वरं** कुष्ठं पारिभाव्यं **गदाह्वयम्**' इति रभसः । 'व्याधिः कुष्ठे च रोगे ना' (इति मेदिनी) ॥ (१) ॥*॥ कुष्णाति रोगम् । 'कुष निष्कर्षे' (क्र्या० प० से०) । 'इनिकुषि–' (उ० २।२) इति क्थन् । '**कुष्ठं** रोगे पुष्करेऽस्त्री' (इति मेदिनी) ॥ (२) ॥*॥ परिभावे साधुः । 'तत्र साधुः' (४।४।९८) इति यत् । स्वार्थेऽण् (५।४।३८) ॥ (३) ॥*॥ व्याप्यते । 'आपॄ व्याप्तौ' (स्वा० प० अ०) । 'ऋहलोर्ण्यत्' (३।१।१२४) ॥*॥ वाप्यां भवम् । '**वाप्यम्**' इति क्वचित्पाठः । उप्यते । 'डुवप् बीजसंताने' (भ्वा० प० अ०) । ण्यत् (३।१।१२४) वा ॥*॥ '**आप्यम्**' इति च ॥ (४) ॥*॥ पाकं लाति । '**पाकलं** कुष्ठभैषज्ये पुंसि स्यात्कुञ्जरे ज्वरे' (इति मेदिनी) ॥ (५) ॥*॥ उत्पलति । 'पल गतौ' (भ्वा० प० से०) अच् (३।१।१३४) '**उत्पला** तुषपर्पट्यां क्लीबं कुष्ठप्रसूनयोः' (इति मेदिनी) ॥ (६) ॥*॥ षट् '**कुष्ठस्य**' '**कुठ**' इति ख्यातस्य ॥

शङ्खिनी चोरपुष्पी स्यात्केशिनी

शङ्खीति ॥ **शङ्खाः** सन्त्यस्याः । शङ्काकारपुष्पत्वात् । 'अतः' (५।२।११५) इतीनिः । '**शङ्खिनी** श्वेतचुक्कायां चोरपुष्प्यां वधूभिदि' (इति मेदिनी) ॥ (१) ॥*॥ चोर इव पुष्पं यस्याः । रात्रिविकासित्वात् । 'पाककर्ण–' (४।१।६४) इति ङीष् ॥ (२) ॥*॥ केशाः सन्त्यस्याः । 'अतः' (५।२।११५) इतीनिः । '**केशी** केशवति त्रिषु । दैत्ये ना चोरपुष्प्यां स्त्री' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि '**चोरवल्लयाः**' '**शांखाहुली**' इति ख्यातायाः ॥

अथ वितुन्नकः ॥ १२६ ॥

झटाऽमलाऽज्झटा ताली शिवा तामलकीति च ।

अथेति ॥ वितुद्यते स्म । 'तुद व्यथने' (तु० उ० अ०) । क्तः (३।२।१०२) । स्वार्थे कन् (५।३।७५) ॥ (१) ॥*॥ झट्यते । 'झट संघाते' (भ्वा० प० से०) । घञ् (३।३।१८) संज्ञापूर्वकत्वान्न वृद्धिः । झटति वा अच् (३।१।१३४) ॥ (२) ॥*॥ न मलो यस्याः ॥ (३) ॥*॥ अदव्ययमाश्चर्ये । अत आश्चर्यस्य झटः संघातोऽस्याम् । अस्ति । क्विप् (३।२।१७८) झटति । अच् । (३।१।१३४) । टाप् (४।१।४) । अचासौ झटा च ॥ (४) ॥*॥ तालयति । '**तल प्रतिष्ठायाम्**' (चु० प० से०) ण्यन्तः । अच् (३।१।१३४) । '**तालः** करतलेऽङ्गुष्ठमध्यमाभ्यां च संमिते । गीतकालक्रियामाने करस्फाले द्रुमान्तरे । वाद्यभाण्डे च कांस्यस्य तस्यौ **ताली** झटौषधौ । क्लीबं तु हरिताले स्यात्' (इति मेदिनी) ॥ (५) ॥*॥ शिवमस्त्यस्याम् । अर्शआद्यच् (५।२।१२७) । '**शिवा** झटामलौषधौ । अभयामलकीगौरीफेरुसकुफलासु च' (इति मेदिनी) (६) ॥*॥ तनुश्चासावामलकी च । पृषोदरादिः ॥ (७) ॥*॥ षट् (सप्त) '**भूम्यामलक्याः**' ॥

प्रपौण्डरीकं पुण्डर्यम्

प्रेति ॥ पुण्डरीकेण सदृशम् । 'शेषे' (४।२।९२) इत्यण् । प्रकृष्टं पौण्डरीकम् । यद्वा स्वार्थेऽण् (५।४।३८) । '**साधुपुष्पं स्थलपद्मं दृष्टिकृत् पुण्डरीककम्**' इति रभसः ॥ (१) ॥*॥ पुण्डयति । 'पुडि खण्डने' (भ्वा० प० से०) । अच् (३।१।१३४) पुण्डस्य अर्थं प्रधानम् । शकन्ध्वादिः (वा० ६।१।९४) ॥ (२) ॥*॥ द्वे '**पौण्डर्यस्य**' '**पुण्डरीया**' इति ख्यातस्य ॥

अथ तुन्नः कुबेरकः ॥ १२७ ॥

कुणिः कच्छः कान्तलको नन्दिवृक्षः

अथेति ॥ तुद्यते स्म । 'तुद व्यथने' (तु० उ० अ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ कुत्सितं वेरमस्य । '**कुबेरकः** कुबेरे स्यात्पुंसि नन्द्यारव्यपादपे' । ('**कुबेरः** स्यात्पुंसि नन्दिवृक्षे पुण्यजनेश्वरे' इति मेदिनी) ॥ (२) ॥*॥ कुणति । 'कुण संकोचे' (तु० प० से०) । 'इगुपधात् कित्' (उ० ४।१२०) इतीन् । 'कुणिस्तुन्नकवृक्षे ना कुकरे त्वभिधेयवत्' (इति मेदिनी) ॥*॥ '**तुणिः**' इति क्वचित् पाठः । तूणयति । 'तूण संकोचे' (तु० आ० से०) । 'अच इः' (उ० ४।१३९) । पृषोदरादिः (६।३।१०९) ॥ (३) ॥*॥ कचति । 'कची दीप्तौ' (भ्वा० आ० से०) । बाहुलकाच्छः । यद्वा केन छृणत्ति । 'छृदिर् दीप्त्यादौ' (रु० उ० से०) ।

'अन्येभ्योऽपि–' (वा ३।२।१०१) इति डः । **'अथ कच्छः** स्यादनूपे तुन्नकद्रुमे । नौकाङ्गे पुंसि वाराह्यां चीरिकायां च योषिति' (इति मेदिनी) ॥ (४) ॥*॥ काम्यते । 'कमु क्रान्तौ' (भ्वा० आ० से०) । 'मतिबुद्धिपूजार्थेभ्यश्च' (३।२। १८८) इति क्तः । लकति । 'लक आस्वादने' अच् (३।१। १३४) । कान्तश्चासौ लकश्च ॥ (५) ॥*॥ नन्दनम् । 'टु नदि समृद्धौ' (भ्वा० प० से०) । इन् (उ० ४।११८) । ङीष् (ग० ४।१।४५) वा । नन्द्या वृक्षः ॥ (६) ॥*॥ षट् **'नन्दिवृक्षस्य' 'तुणी'** इति ख्यातस्य ॥

अथ राक्षसी ।

चण्डा धनहरी क्षेमदुष्पत्रगणहासकाः ॥ १२८ ॥

अथेति ॥ रक्षस इयम् । 'तस्येदम्' (४।३।१२०) इत्यण् (१) ॥*॥ चण्डते । 'चडि कोपे' (भ्वा० आ० से०) अच् (३।१।१३४) । **'चण्डा** धनहरीशङ्खपुष्प्योस्त्रिष्वतिकोपने । तीव्रेऽपि' (इति मेदिनी) ॥ (२) ॥*॥ धनं हरति । 'हरतेर-नुद्यमनेऽच्' (३।२।९) गौरादिः (४।१।४१) । **'दुष्कुलीना** धनहरी **विरोकः क्रोधमूर्च्छितः'** इति वाचस्पतिः ॥ (३) ॥*॥ क्षिणोति । 'क्षिणु हिंसायाम्' (त० उ० से) । 'अर्ति-स्तु–' (उ० १।१४०) इति मन् । **'क्षेमोऽस्त्री** लब्धरक्षणे । चण्डायां ना शुभे न स्त्री काल्यायन्यां च योषिति' (इति मेदिनी) ॥ (४) ॥*॥ दुष्टानि पत्राण्यस्य ॥ (५) ॥*॥ गणं हासयति । 'हसे हसने' (भ्वा० प० से०) ण्यन्तः । ण्वुल् (३।१।१३३) ॥*॥ 'गणः' इत्यप्यस्य नाम । **'गणः** प्रमथ-संख्यौघे चण्डासैन्यप्रभेदयोः' इति रुद्रः ॥ (६) ॥*॥ षट् **'चोरा'** इत्याख्यगन्धद्रव्यस्य ॥

व्याडायुधं व्याघ्रनखं करजं चक्रकारकम् ।

व्याडेति ॥ व्याडस्य व्याघ्रस्यायुधमिव ॥ (१) ॥*॥ व्याघ्रस्य नखमिव । क्षुभ्नादिः (८।४।३९) । **'भवेद्व्याघ्रनखं** कन्दगन्धद्रव्यविशेषयोः । नखक्षतान्तरे क्लीबम्' (इति मेदिनी) (२) ॥*॥ करजं नखम् । तदिव ॥ (३) ॥*॥ चक्रस्य कार-कम् ॥ (४) ॥*॥ चत्वारि **'व्याघ्रनखा'**ख्यगन्धद्रव्यस्य ॥

शुषिरा विद्रुमलता कपोताङ्घ्रिर्नटी नली ॥ १२९ ॥

शुषीति ॥ शुषिरस्त्यस्याः । 'ऊषशुषि–' (५।२।१०७) इति रः । शुषिरमस्त्यस्यां वा । 'अर्शआदिभ्योऽच्' (५।२। १२७) ॥ (१) ॥*॥ विद्रुमस्येव लता ॥ (२) ॥*॥ कपोत-स्याङ्घ्रिरिव ॥ (३) ॥*॥ नटति । 'नट स्पन्दने' (चु० प० से०) । अच् (३।१।१३४) । गौरादिः (४।१।४१) ॥ (४) ॥*॥ नलति । 'णल गन्धे' (भ्वा० प० से०) अच् (३।१। १३४) गौरादिः (४।१।४१) । (**'नलः** पोटगले राज्ञि पितृदेवे कपीश्वरे । कमलेऽपि च नद्यां च क्रमेण क्लीबयोषितोः' (इति मेदिनी) ॥ (५) ॥*॥ पञ्च **'मालकांगणी'** इति ख्यातायाः ॥

धमन्यञ्जनकेशी च हनुर्हट्टविलासिनी ।

धमेति ॥ धम्यते । 'धमिः सौत्रः' । 'अर्तिसृधृ–' (उ० २।१०२) इत्यनिः । ङीष् (ग० ४।१।४५) वा । **'धमनो** नाऽनले भस्त्राध्मापककूरयोस्त्रिषु । **धमनी** तु शिराहट्टविला-सिन्योश्च योषिति' (इति मेदिनी) ॥ (१) ॥*॥ अञ्जनमिव केशा अस्याः ॥ (२) ॥*॥ केचित्तु—इदं द्वयं पूर्वान्वयि—इत्याहुः ॥*॥ हन्ति 'शृस्वृस्निहि–' (उ० १।१०) इत्युः । **'हनुर्हट्टविलासिन्यां** मृत्यावस्त्री गदे स्त्रियाम् । द्वयोः कपोला-वयवे' (इति मेदिनी) ॥ (३) ॥*॥ हट्टे विलसति तच्छीला । 'लस क्रीडायाम्' (भ्वा० प० से०) 'सुपि–' (३।२।७८) इति णिनिः ॥ (४) ॥*॥ चत्वारि **'अञ्जनकेश्याः'** ॥

शुक्ति शङ्खः खुरः कोलदलं नखम्

शुक्तिरिति ॥ शोचति । 'शुच शोके' (भ्वा० प० से०) क्तिच् (३।३।७४) । **'शुक्तिः** शङ्खनखे शङ्खे कपालखण्डद्द-ग्रुजोः । नख्यश्वावर्तयोर्मुक्तास्फोटदुर्नामयोरपि' इति हैमः ॥ (१) ॥*॥ शाम्यति । 'शमेः खः' (उ० १।१०२) । **'शङ्खः** कम्बौ निधेर्भेदे स्यान्नख्यामलिकास्थनि' इति हैमः ॥ (२) ॥*॥ खुरति । 'खुर छेदने' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । **'खुरः** शफे कोलदके' इति हैमः ॥ (३) ॥*॥ कोलस्य बदर्या इव दलम् ॥ (४) ॥*॥ न खन-ति । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । **'नखं** पुनर्गन्धद्रव्ये **नखः** करजषण्ढयोः' इति हैमः ॥ (**'नखी** स्त्रीक्लीबयोः शुक्तौ नखरे पुंनपुंसकम्' इति मेदिनी) ॥ (५) ॥*॥ पञ्च **'नखाख्यगन्धद्रव्यस्य'** ॥

अथाढकी ॥ १३० ॥

काक्षी मृत्स्ना तुवरिका मृतालकसुराष्ट्रजे ।

अथेति ॥ आढकमस्त्यस्याः परिच्छेदकत्वेन । अर्शआद्यच् (५।२।१२७) । आढौकते वा । 'ढौक्ङ् गतौ' (भ्वा० आ० से०) । अच् (३।१।१३४) । पृषोदरादिः (६।३।१०९) । गौरादिः (४।१।४१) । **'आढकी** तु तुवर्यां स्त्री परिमाणा-न्तरे त्रिषु' (इति मेदिनी) ॥ (१) ॥*॥ कक्षे भवा । 'तत्र भवः' (४।३।५३) इत्यण् । **'काक्षी** तुवरिकायां च सौराष्ट्र-मृद्यपि स्त्रियाम्' (इति मेदिनी) ॥ (२) ॥*॥ मृत्स्नाऽस्त्यस्याः क्षेत्रत्वेन । अर्शआद्यच् (५।२।१२७) । **'मृत्स्ना** मृत्सातु-वर्योः स्त्री' (इति मेदिनी) ॥ (३) ॥*॥ तुवरोऽस्त्यस्याः ठन् (५।२।११५) टाप् (४।१।४) ॥*॥ 'वार्षिका मल्लिका **तूव-र्याढ**की कच्छुरा छटी' इति बोपालितात् 'तूवरी' च ॥ (४) ॥*॥ मृतमालयति । 'अल भूषणादौ' (भ्वा० प० से०) ण्यन्तः । अण् (३।२।१) । 'संज्ञायां कन्' (५।३।७५) ॥*॥

१—प्रथमसंख्येये ॥

१—नृत्यारम्भे ॥

'अजिता तुवरा स्तुत्या मृत्सा **मृत्तालकम्'** इति कोशाद् द्वितकारं च । मृदि तालः प्रतिष्ठास्य ॥ (५) ॥*॥ सुराष्ट्रे जातम् । 'जनी' (दि० आ० से०) । 'सप्तम्यां जनेर्डः' (३।२।९७) ॥ (६) ॥*॥ षट् **'तुवरिकायाः' 'तुवर्'** इति ख्यातायाः ॥

कुटन्नटं दाशपुरं वानेयं परिपेलवम् ॥ १३१ ॥
प्लवगोपुरगोनर्दकैवर्तीमुस्तकानि च ।

कुटि ॥ कुटन् वक्रीभवन् नटति । 'नट स्पन्दने' (चु० प० से०) अच् (३।१।१३४) ॥ (१) ॥*॥ दाशान् कैवर्तान् पिपर्ति । 'पॄ पालनपूरणयोः' (जु० प० से०) । मूलविभुजादित्वात् (वा० ३।२।५) कः ॥*॥ 'दशपूरम्' इति 'दशपुरं' इति च क्वचित् पाठः । दश पूरयति । 'पूर पूर्तौ' । 'कर्मण्यण्' (३।२।१) । यत्तु—दश पूरयति—इति विगृह्य इगुपधत्वात् (३।१।१३५) 'कः'—इत्याह मुकुटः । तन्न । 'णिजन्तस्येगुपधत्वाभावात् । अकारान्निरुपपदात्सोपपदो विप्रतिषेधेन' (३।२।१)इति वार्तिकाद् अण् प्रसङ्गाच्च ॥*॥ दश पुरोऽस्याः 'ऋक्पूरब्धूर्-' (५।४।७४) इति समासान्तः । **'दशपूरं** दशपुरं प्लवनं जीविताह्वयम्' इति वाचस्पतिः ॥ (२) ॥*॥ वने पानीये जायते । 'नन्द्यादित्वात्' (४।३।९७) ढक् ॥*॥ वन्यं च । 'परिपेलवं प्लवं वन्यं तत् कुटन्नटसंज्ञकम् । जायते मण्डूकाकारं शैवालदलसंचये । कैवर्तीमुस्तके क्लीबं शोणके वा **कुटन्नटः'** इत्यजयः ॥ (३) ॥*॥ परितः पेलवं मृदु ॥ (४) ॥*॥ प्लवते । 'प्लुङ् गतौ' (भ्वा० आ० अ०) । अच् (३।१।१३४) । **'प्लवः** कारण्डवे भेके कुलके भेलके कपौ । शब्दे प्लुतिगतौ प्लक्षे चण्डालजलकाकयोः । **प्लवं** गन्धतृणे प्रोक्तं कैवर्तीमुस्तकेऽपि च' (इति विश्वः) । **'प्लवगो** वानरे भेके सारथौ चोष्णदीधितेः' (इति मेदिनी) ॥ (५) ॥*॥ गां जलं पिपर्ति । 'पॄ पालने' (जु० प० से०) मूलविभुजादिः (३।२।५) गौर्जलं पुरमस्य, इति वा ॥ (६) ॥*॥ गां जलं नर्दयति । 'नर्द शब्दे' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) ॥ (७) ॥*॥ कैवर्तानां जातिः कैवर्ती । कैवर्त्या मुस्तकम् ॥ (८) ॥*॥ अष्टौ **'कैवर्तीमुस्तकस्य' 'मोथा'** इति ख्यातस्य ॥

ग्रन्थिपर्णं शुकं बर्हिपुष्पं स्थौणेयकुक्कुरे ॥ १३२ ॥

ग्रन्थीति ॥ ग्रन्थौ पर्णान्यस्य । ग्रन्थय इव पर्णान्यस्य, इति वा ॥ (१) ॥*॥ शोचति । 'शुच शोके' (भ्वा० प० से०) । 'शु गतौ' ( ) वा । 'शुकवल्कोल्काः' (उ० ३।४२) इति निपातः । 'ग्रन्थिपर्णे शिरीषे **च शुकः** स्यात्' इति विश्वः । 'शुको व्याससुते कीरे रावणस्य च मन्त्रिणि । शिरीषपादपे पुंसि, ग्रन्थिपर्णे नपुंसकम्' (इति मेदिनी) ॥*॥—शुकस्येव बर्हाणि पर्णान्यस्य (**'शुकबर्हम्'**) इत्येकं नाम—इत्येके ॥ (२) ॥*॥ बर्हं पत्रं प्रशस्तमस्य । इनिः (५।२।११५) ॥ पुष्प्यति । 'पुष्प विकसने' (दि० प० से०) । अच् (३।१।१३४) । 'बर्हिपुष्पम्' इत्येकं नाम—इत्येके ॥*॥ **'बर्हपुष्पम्'** इत्यन्ये ॥*॥ **'बर्हम्'** इति पृथग् नाम, इति कश्चित् ॥ (३) ॥*॥ स्थूणाया अपत्यम् । 'स्त्रीभ्यो ढक्' (४।१।१२०) ॥४॥*॥ कुक्कुरोऽस्यास्ति । कुक्कुरशब्दस्तदुन्धे लाक्षणिकः । अर्शआद्यच् (५।२।१२७) ॥ (५) ॥*॥ 'मरुत्' इत्यत्राप्यन्वेति । **'मरुद्देवे** समीरे ना ग्रन्थिपर्णे नपुंसकम्' (इति मेदिनी) ॥*॥ पञ्च **'ग्रन्थिपर्णस्य' 'कुक्कुरवद्रा'** इति ख्यातस्य ॥

मरुन्माला तु पिशुना स्पृक्का देवी लता लघुः ।
समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिकेत्यपि ॥ १३३ ॥

मरुदिति ॥ मरुद्भिर्मील्यते । 'मल धारणे' (भ्वा० आ० से०) । घञ् (३।३।१९) । व्यस्तं समस्तं च नामेदम् । **'स्पृक्का** तु **ब्राह्मणी** देवी मरुन्माला लता लघुः । समुद्रान्तावधूः **कोटिवर्षा** लङ्कोपिका **मरुत्** । मुनि**र्माल्यवती माला मोहना कुटिला** लता' इति वाचस्पतिः । म्रियते । 'मृङ् प्राणत्यागे' (तु० आ० से०) । 'मृग्रोरुतिः' (उ० १।९४) ॥*॥ मल्यते । 'मल धारणे' (भ्वा० आ० से०) । घञ् (३।३।१९)॥ (१) ॥*॥ पिंशति । 'पिश अवयवे' (तु० प० से०) । **'पिशुनं** कुङ्कुमेऽपि च । कपिवक्त्रे च काके ना सूचकक्रूरयोस्त्रिषु । पृक्कायां **पिशुना** स्त्री स्यात्' (इति मेदिनी) ॥ (२) ॥*॥ स्पृश्यते । 'स्पृश स्पर्शने' (तु० प० अ०) । बाहुलकात्कक् ॥*॥ पृषोदरादित्वात् (६।३।१०९) सलोपे 'पृक्का' अपि ॥ (३) ॥*॥ दीव्यति **'देवी** कृताभिषेकायां तेजनीपृक्कयोरपि' (इति मेदिनी) ॥ (४) ॥*॥ लतति । 'लत आघाते' सौत्रः । अच् (३।१।१३४) । **'लता** प्रियंगुशाखयोः । पृक्काज्योतिष्मतीवल्लीलताकस्तूरिकासु च । माधवीदूर्वयोः—' (इति मेदिनी) ॥ (५) ॥*॥ लङ्घते । 'लघि गतौ' (भ्वा० आ० से०) । लङ्घिबंह्योर्नलोपश्च' (उ० १।२९) इत्युः । **'लघुरगुरौ** च मनोज्ञे निःसारे वाच्यवत् क्लीबम् । शीघ्रे कृष्णागरुणि पृक्कानामौषधौ तु स्त्री' (इति मेदिनी) ॥ (६) ॥*॥ समुद्रोऽन्तोऽस्याः ॥ (७)॥*॥ वहति । उह्यते वा । 'वहो धश्च' (उ० १।८३) इत्यूः । 'वधूः स्त्री शारिवौषधौ । स्नुषाशटीनवोढासु भार्यापृक्काङ्गनासु च' (इति मेदिनी) । 'पृक्का च **महिला** वधूः' इति त्रिकाण्डशेषः॥ (८) ॥*॥कोटिभिरग्रैर्वर्षति मधु । 'वृषु सेचने' (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (९) ॥*॥ लङ्कायामुप्यते 'डुवप्' (भ्वा० उ० अ०) कुन् (उ० २।३२) **'वप्त्रिखपि-'** (६।१।

१—इदं मेदिनीवाक्यं प्लवगशब्दार्थबोधकत्वादत्र प्लवगशब्दाच्चोपेक्षणीयम् ॥

१५) इति वस्य उः ॥ (१०) ॥*॥ दश **'स्पृक्कायाः' 'अस्थर'** इति ख्यातस्य ॥

तपस्विनी जटा मांसी जटिला लोमशा मिसी ।

तपेति ॥ तपोऽस्त्यस्याः । जटिलत्वात् । 'अस्माया–'(५।२।१२१) इति विनिः ॥ (१) ॥*॥ जटाऽस्त्यस्याः । अर्श आद्यच् (५।२।१२७) यद्वा जटति 'जट संघाते' (भ्वा० प० से०)। अच् (३।१।१३४) ॥ (२) ॥*॥ मन्यते । 'मनेर्दीर्घश्च' (उ० ३।६४) इति सः । गौरादिः (४।१।४१) । **'मांसं** स्यादामिषे क्लीबं कङ्कोलीजटयोः स्त्रियाम्' (इति मेदिनी) ॥ (३) ॥*॥ जटाऽस्त्यस्याः । पिच्छादीलच् (५।२।१००) । **'जटिला** पिप्पलीमांस्योर्जटायुक्ते तु वाच्यवत्' इति (मेदिनी) ॥ (४) ॥*॥ लोमानि सन्त्यस्याः । लोमादिशः (५।२।१००) **'लोमशो** मुनिमेषयोः । (लोमान्विते स्त्रियां काकजङ्घामांसीवचासु च । शूकशिम्बिमहामेदाकाकोलीषु डाकिनीभिदि)' (इति मेदिनी) ॥ (५)॥*॥—मांसीत्वादामिषी—इति स्वाम्युक्तो विग्रहोऽयुक्तः । तथा पाठस्य क्वचिददर्शनात् । मस्यति । 'मसी परिणामे' (दि० प० से०) । सर्वधातुभ्य इन् (उ० ४।११८) । 'कृदिकारात्' (ग० ४।१।४५) इति वा ङीष् । पृषोदरादिः (६।३।१०९) ॥ (६) ॥*॥ षट् **'जटामांसी'** इति ख्यातायाः ॥

त्वक्पत्रमुत्कटं भृङ्गं त्वचं चोचं वराङ्गकम् ॥१३४॥

त्वगिति ॥ त्वगिव पत्रमस्य ॥*॥ 'त्वग्' अपि नामास्य । **'त्वक्** स्त्री चर्मणि वल्के च गुडत्वचि विशेषतः' (इति मेदिनी) ॥ (१) ॥*॥ अन्यत उत्कटगन्धित्वात् 'संप्रोदश्च कटच्' (५।२।२९) ॥ (२) ॥*॥ बिभर्ति । 'भृञः किञुट् च' (१।१२५) इति गन् ॥ (३) ॥*॥ प्रशस्ता त्वगस्यास्ति । 'अर्शआद्यच्' (५।२।१२७) ॥ (४) ॥*॥ प्रशस्तं चोचमस्यास्ति । 'अर्शआद्यच्' (५।२।१२७) **'त्वक्त्वचचोचशब्दाः स्युर्वल्के चर्मणि पत्रके'** इति धरणिः ॥ (५) ॥*॥ वरमङ्गमस्य । 'शेषाद्विभाषा' (५।४।१५४) इति कप् ॥ (६) ॥*॥ षट् **'त्वक्पत्रस्य' 'तज'** इति ख्यातस्य ॥

कर्चूरको द्राविडकः काल्पको वेधमुख्यकः ।

केति ॥ कर्जति । 'कर्ज व्यथने' (भ्वा० प० से०) । खर्जादित्वात् (उ० ४।९०) ऊरः । पृषोदरादिः (६।३।१०९) । स्वार्थे कन् (५।३।७५) ॥ (१) ॥*॥ द्रविडे देशे जातः । 'तत्र जातः' (४।३।२५) इत्यण् । स्वार्थे कन् (५।३।७५) ॥ (२) ॥*॥ कल्पे विधौ भवः । 'तत्र भवः' (४।३।५३) इत्यण् । कन् (५।३।७५) ॥*॥ पाठान्तरे काले साधुः । 'तत्र साधुः' (४।४।९८) इति यत् । स्वार्थे कन् (५।३।७५) ॥ (३) ॥*॥ वेधे मुख्यः । स्वार्थे कन् (५।३।७५) ॥ (४) ॥*॥ चत्वारि **'कर्चूर'** इति ख्यातस्य ॥

ओषध्यो जातिमात्रे स्युः

ओषेति ॥ जातिमात्रविवक्षायाम् **'ओषधी'** शब्दप्रयोगः ॥

अजातौ सर्वमौषधम् ॥ १३५ ॥

अजेति ॥ द्रव्यमात्रविवक्षायां तु **'औषध'** शब्दप्रयोगः । 'ओषधेरजातौ' (५।४।३७) इत्यण् 'सर्वम्' इत्यनेन—'घृततैलादिकमप्यौषधशब्दवाच्यम्'—इत्युक्तम् ॥

शाकाख्यं पत्रपुष्पादि

शाकेति ॥ शक्यते भोक्तुम् । 'शक्लृ शक्तौ' (स्वा० प० अ०) । घञ् (३।३।१९) यद्वा श्यति । 'शो तनूकरणे' (दि० प० से०) । बाहुलकात् कः ॥ (१) ॥*॥ आदिना फलनाड्यग्रमूलादिपरिग्रहः । 'मूलपत्रकरीराग्रफलकाण्डाधिरूढकम् । त्वक् पुष्पं कवकं चैव शाकं दशविधं स्मृतम्' । अधिरूढकं तालबीजाङ्कुरास्थिमज्जादि ॥

तण्डुलीयोल्पमारिषः ।

तेति ॥ तण्डुलाय हितः । 'तस्मै हितम्' (५।१।५) इति छः । **'तण्डुलीयः** शाकभेदे विडङ्गतरुताप्ययोः' (इति हेममेदिन्यौ) ॥ (१) ॥*॥ **'मारिषः** शाकभिद्यार्थे नाट्योक्त्या पुंसि, योषिति । (दक्षाम्बायाम्)' (इति मेदिनी) । अल्पश्चासौ मारिषश्च ॥ (२) ॥*॥ द्वे **'तण्डुलीयस्य' 'चउराई'** इति ख्यातस्य ॥

विशल्याऽग्निशिखाऽनन्ता फलिनी शक्रपुष्प्यपि ॥ १३६ ॥

विशेति ॥ विगतं शल्यमनया । **'विशल्या** लाङ्गलीदन्तीगुडूचीत्रिपुटासु च । शल्येन रहितायां च प्रियायां लक्ष्मणस्य च' इति हेमचन्द्रः ॥ (१) ॥*॥ अग्नेरिव शिखा संतापो यस्याः । 'अथाग्निशिखमुद्दिष्टं कुसुम्भे कुङ्कुमेऽपि च । लाङ्गलिक्याख्यौषधौ च विशल्यायां च योषिति' (इति मेदिनी) ॥ (२) ॥*॥ न अन्तो यस्याः ॥ (३) ॥*॥ फलानि सन्त्यस्याः । इनिः (५।२।११५) । **'फलिन्यग्निशिखायां** स्त्री फलिन्यां फलिने त्रिषु' (इति मेदिनी) ॥ (४) ॥*॥ शक्रोऽर्जुनतरुः पुष्पमस्याः । शक्रशब्दः पुष्पे लाक्षणिकः । 'पाकर्ण–' (४।१।६४) इति ङीष् ॥ (५) ॥*॥ पञ्च **'अग्निशिखायाः' 'इन्द्रपुष्पी'** इति ख्यातायाः ॥

स्याद्दक्षगन्धा छगलाह्व्यावेगी वृद्धदारकः ।
जुङ्गः

स्यादिति ॥ ऋक्षस्येव गन्धोऽस्याः । समासान्तस्यानि-

१—मूलं मूलकादेः, पत्रं वास्तुकादेः, करीरं वंशाङ्कुरम्, अग्रं वेत्रादेः, फलं कूष्माण्डादेः, काण्डमुत्पलादेर्नालम्, त्वक् मातुलुङ्गादेः, पुष्पं तिन्तिडीकोविदारादेः, कवकं छत्राकं—इति मुकुटः ॥

त्यत्वात् 'उपमानाच्च' (५।४।१३७) इतीच्च ॥*॥ **'ऋष्यगन्धा'** इति पाठान्तरम् ॥ (१) ॥*॥ छगलस्येवान्त्रमस्याः ॥*॥ 'छगला' इति पृथग् नाम—इत्यन्ये । 'छागे तु छगलश्छागीवृद्धदारकयोः स्त्रियाम्' इत्यनेकार्थकोशः ॥ (२) ॥*॥ आवेगोऽस्त्यस्याः 'अर्शआद्यच्' (५।२।१२७) । गौरादिः (४।१।४१) ॥ (३) ॥*॥ वृद्धो दारकोऽस्मात् । वृद्धत्वं दारयति वा । ण्वुल् (३।१।१३३) ॥ (४) ॥*॥ जुङ्गति । 'जुगि वर्जने' (भ्वा० प० से०) । अच् (३।१।१३४) जुङ्ग्यते वा । घञ् (३।३।१९) ॥ (५) ॥*॥ पञ्च **'वृद्धदारकस्य'** ॥

ब्राह्मी तु मत्स्याक्षी वयस्था सोमवल्लरी ॥ १३७ ॥

ब्राह्मीति ॥ ब्रह्मण इयम् । 'ब्राह्मोऽजातौ' (६।४।१७१) इत्यणि टिलोपः ॥ (१) ॥*॥ मत्स्याक्षीव पुष्पमस्याः । मत्स्यशब्दः स्वावयवे गौणः । 'बहुव्रीहौ–' (५।४।११३) इति षच् ङीष् (४।१।४१) ॥ (२) ॥*॥ वयसि तिष्ठत्यनया । 'घञर्थे कः' (वा० ३।३।५८) । **'वयस्था** तु स्त्रियां ब्राह्मीगुडूच्यामलकीषु च । सूक्ष्मैलायां च काकोल्यां पथ्यायां तरुणे त्रिषु' (इति मेदिनी) ॥ (३) ॥*॥ सोमस्य वल्लरी ॥ (४) ॥*॥ चत्वारि **'ब्राह्मयाः'** ॥

पट्टुपर्णी हैमवती स्वर्णक्षीरी हिमावती ।

पट्टीति ॥ पट्टानि पर्णान्यस्याः । 'पाककर्ण–' (४।१।६४) इति ङीष् ॥ (१) ॥*॥ हिमवति जाता । 'तत्र जातः' (४।३।२५) इत्यण् ॥ (२) ॥*॥ स्वर्णमिव क्षीरमस्याः । गौरादिः (४।१।४१) ॥ (३) ॥*॥ हिममस्त्यस्याः । मतुप् (५।२।९४) । 'शरादीनां च' (६।३।१२०) इति दीर्घः ॥ (४) ॥*॥ 'हेमवर्णं पयस्तस्या हिमवद्भूमिसंभवा । सा नागजिह्विकाकारा तन्मूलं वणिजौषधम्' ॥*॥ चत्वारि **'स्वर्णक्षीर्याः' 'मको'** इति ख्यातायाः ॥

हयपुच्छी तु काम्बोजी माषपर्णी महासहा ॥ १३८ ॥

हयेति ॥ हयपुच्छमिव पर्णान्यस्याः । गौरादिः (४।१।४१) ॥ (१) ॥*॥ कम्बोजे देशे भवा । 'तत्र भवः' (४।३।५३) इत्यण् ॥ (२) ॥*॥ माषस्येव पर्णान्यस्याः । 'पाककर्ण–' (४।१।६४) इति ङीष् ॥ (३) ॥*॥ महती सहा 'आन्महतः–' (६।३।४६) इत्यालम् **'महासहा** माषपर्ण्यामम्लानेऽपि च योषिति' (इति मेदिनी) ॥ (४) ॥*॥ चत्वारि **'माषपर्ण्याः'** ॥

तुण्डिकेरी रक्तफला बिम्बिका पीलुपर्ण्यपि ।

तुण्डीति ॥ तुण्डं चञ्चुरस्ति येषाम् । 'अतः' (५।२।११५) इति ठन् । तुण्डिकानीरयति । 'ईर् प्रेरणे' (अ० आ० से०) । 'कर्मण्यण्' (३।२।१) ॥*॥ **(तुण्डकेरी)** इति पाठान्तरे प्रशस्तं तुण्डम् । 'प्रशंसायां कन्' ( ) । तुण्डकमीर्ते । अण् (३।२।१) ॥ (१) ॥*॥ **रक्तं फलमस्याः** । अजादिटाप् (४।१।४) ॥ (२) ॥*॥ बिम्बीं कायति । 'कै शब्दे' (भ्वा० प० से०) । 'आतोऽनुप–' (३।२।३) इति कः । 'ङ्याप्पोः' (६।३।६३) इति ह्रस्वः ॥ (३) ॥*॥ पीलोरिव पर्णमस्याः । पीलुशब्दः स्वावयवे गौणः । 'पाककर्ण–' (४।१।६४) इति ङीष् ॥ (४) ॥*॥ चत्वारि **'तुण्डिकेर्याः' 'कुण्टूरी'** इति ख्यातायाः ॥

वर्वरा कवरी तुङ्गी खरपुष्पाजगन्धिका ॥ १३९ ॥

वर्वेति ॥ वृणोति । 'वृञ् वरणे' (स्वा० उ० से०) । 'कृगृ–' (उ० २।१२१) इति ष्वरच् । अनित्यः षितां ङीष् । **'वर्वरः** पामरे केशे चक्रले नीवृदन्तरे । फञ्जिकायां पुमान् शाकभेदपुष्पभिदोः स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ वृणोति । अच् (३।१।१३४) । गौरादिः (४।१।४१) । कस्य शिरसो वरी । **'कवरं** लवणाम्लयोः । **कवरी** केशविन्यासशाकयोः' इति हैमः ॥ (२) ॥*॥ तुङ्गति । 'तुजि हिंसायाम्' (भ्वा० प० से०) अच् (३।१।१३५) । न्यङ्क्वादिः (७।३।५३) । **'तुङ्गः** पुंनागनगयोर्बुधे स्यादुन्नतेऽन्यवत् । **तुङ्गी** प्रोक्ता हरिद्रायां वर्वरायामपीष्यते' (इति हैमः) ॥ (३) ॥*॥ खरं पुष्पमस्याः ॥ (४) ॥*॥ अजस्येव गन्धोऽस्याः । अजशब्दः खगन्धे लाक्षणिकः ॥ (५) ॥*॥ पञ्च **'खरपुष्पायाः'** ॥

एलापर्णी तु सुवहा राम्ना युक्तरसा च सा ।

एलेति ॥ एलाया इव पर्णान्यस्याः । 'पाक–' (४।१।६४) इति ङीष् ॥ (१) ॥*॥ सुवहति । अच् (३।१।१३४) । **'सुवहा** शल्लक्येलापर्णीगोधापदीषु वीणायाम् । राम्नाशेफालिकयोः स्त्री सुखवाह्येऽन्यलिङ्गः स्यात्' (इति मेदिनी) ॥ (२) ॥*॥ रासते । 'रास शब्दे' (भ्वा० आ० से०) । रास्यते वा । 'राम्नासास्ना–' (उ० ३।१५) इति साधुः ॥ (३) ॥*॥ युक्तो रसो यस्याः ॥ (४) ॥*॥ चत्वारि **'एलापर्ण्याः'** ॥

चाङ्गेरी चुक्रिका दन्तशठाऽम्बष्ठाऽम्ललोणिका १४

चेति ॥ **'चाङ्गस्तु** शोभने दक्षे' (इति मेदिनी) । चाङ्गमीरयति । 'ईर् गतौ' (अ० आ० से०) । 'कर्मण्यण्' (३।२।१) ॥ (१) ॥*॥ चुक्र्यति । 'चुक्र व्यथने' (चु०प०से०) । 'ऋज्रेन्द्र–' (उ० २।२८) इति साधु । स्वार्थे कन् (५।३।७५) । चुक्रमिव । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् वा ॥ (२) ॥*॥ शठति । 'शठ हिंसाक्लेशकैतवे' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) दन्तानां शठा । **'स्याद्दन्तशठो** जम्बीरे कपित्थे करमर्दके । नागरङ्गेऽपि च पुमान् स्याच्चाङ्गेर्यां च योषिति' (इति मेदिनी) ॥ (३) ॥*॥ अम्बे

१—'ऋज्रेन्द्र–' (उ० २।२८) इत्यत्र तु 'चुक्र' इत्युपलभ्यते ॥

तिष्ठति । 'सुपि–' । (३।२।४) इति कः । 'अम्बाम्ब–' (८।३।९७) । इति षत्वम् । **'अम्बष्ठो** देशभेदेऽपि विप्राद्वैश्यासुतेऽपि च । **अम्बष्ठा**प्यम्ललोण्यां स्यात्पाठायूथिकयोरपि' (इति मेदिनी) ॥ (४) ॥*॥ अम्लेभ्य ऊना । स्वार्थे कन् (५।३।७५) । पृषोदरादित्वात् (६।३।१९) णः ॥ (५) ॥*॥ पञ्च **'अम्ललोणिकायाः' 'लोनिजा'** इति ख्यातायाः ॥

सहस्रवेधी चुक्रोऽम्लवेतसः शतवेध्यपि ।

सहेति ॥ सहस्रं शतं वा वेधितुं शीलमस्य । 'विध विधाने' (तु० प० से०) । 'सुपि–' (३।२।७८) इति णिनिः ॥ (१) ॥*॥ चुक्रयत्यनेन । 'ऋज्रेन्द्र–' (उ० २।२८) इति साधुः ॥ (२) ॥*॥ अम्लश्चासौ वेतसश्च । नञ्त्वात् ॥ (३) ॥*॥ चत्वारि **'अम्लवेतसस्य' 'अम्लवेद'** इति ख्यातस्य ॥

नमस्कारी गण्डकाली समङ्गा खदिरेत्यपि ॥ १४१ ॥

नमेति ॥ नमस्करणशीला । 'सुपि' (३।२।७८) इति णिनिः ॥ (१) ॥*॥ गण्डेषु ग्रन्थिषु काली ॥ (२) ॥*॥ समङ्गति । 'अगि गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (३) ॥*॥ खदति । 'खद स्थैर्ये' (भ्वा० प० से०) । 'अजिरशिशिर–' (उ० १।५३) इति साधुः । **'खदिरा** शाकभेदे स्त्री ना चन्द्रे दन्तधावने' (इति मेदिनी) ॥ (४) ॥*॥ चत्वारि **'खदिरायाः' 'हाताज़ोडी'** इति ख्यातायाः ।—नव **'लजालू'** इति ख्यातस्य—इति मुकुटः ॥

जीवन्ती जीवनी जीवा जीवनीया मधुः स्रवा ।

जीवेति ॥ जीवति । 'जीव प्राणधारणे' (भ्वा० प० से०) । शता (३।२।१२४) । 'उगितश्च' (४।१।६) इति ङीप् । **'जीवन्ती** जीवनीशम्योर्गुडूचीवन्दयोरपि' (इति मेदिनी) ॥ (१) ॥*॥ जीव्यतेऽनया । 'करणा–' (३।३।११७) इति ल्युट् । युच् (उ० २।३७) वा । **'जीवनी जीवना** चापि जीवन्तीभेदयोः क्रमात्' (इति मेदिनी) ॥ (२) ॥*॥ जीवयति । पचाद्यच् (३।१।१३४) । **'जीवा** जीवन्तिकामौर्वीवचाशिञ्जितभूमिषु । न स्त्री तु जीविते' (इति मेदिनी) ॥ (३) ॥*॥ जीवनाय हिता । 'तस्मै हितम्' (५।१।५) इति छः ॥ (४) ॥*॥ मन्यते । **'मन** ज्ञाने' (दि० आ० अ०) । 'फलिपाटि–' (उ० १।१८) इत्युः धश्च । **'मधु** पुष्परसे क्षौद्रे मद्ये ना तु मधुद्रुमे । वसन्तदैत्यभिक्षैत्रे स्याज्जीवन्त्यां तु योषिति' (इति मेदिनी) ॥ (५) ॥*॥ स्रवति । 'स्रु गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) ॥*॥ **'मधुस्रवा'** इत्येकं नाम—इत्यन्ये ॥ (६) ॥*॥ षट् **'जीवन्तिकायाः'** गुर्जरदेशे **'दोडी'** इति ख्यातायाः ॥

कूर्चशीर्षौ मधुरकः शृङ्गहस्वाङ्गजीवकाः ॥ १४२ ॥

कूर्चेति ॥ कूर्चं श्मश्रु । तद्वच्छीर्षमस्य ॥ (१) ॥*॥ मधुर एव । स्वार्थे कन् (५।३।७५) । 'स्याङ्गस्वाङ्गो मधुरको **मुकुरश्चिरजीवकः**' इति रभसः ॥ (२) ॥*॥ शृणाति । 'शॄ हिंसायाम्' (क्र्या० प० से०) 'शृणातेर्हस्वश्च' (उ० १।१२६) इति गन् नुट् च । **'शृङ्गं** प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके । विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात्कूर्चशीर्षके । स्त्री विषायां स्वर्णभीनभेदयोर्ऋषभौषधौ' (इति मेदिनी) ॥ (३) ॥*॥ ह्रस्वान्यङ्गान्यस्याः ॥ (४) ॥*॥ जीवयति । ण्वुल् (३।१।१३३) । **'जीवकः** प्राणके पीतसारकृपणयोरपि । कूर्चशीर्षे च पुंसि स्यादाजीवे **जीविका** मता । त्रिषु सेविनि वृद्ध्याशीर्जीविनोराहितुण्डिके' (इति मेदिनी) ॥ (५) ॥*॥ पञ्च **'अष्टवर्गान्तर्गतजीवकस्य'** इति मुकुटः ॥

किराततिक्तो भूनिम्बोऽनार्यतिक्तः

किरेति ॥ किरातदेशोऽस्ति जन्मस्थानमस्य 'अर्शआद्यच्' (५।२।१२७) । किरातश्चासौ तिक्तश्च ॥ (१) ॥*॥ भुवो निम्ब इव ॥ (२) ॥*॥ अनार्यप्रियश्चासौ तिक्तश्च । शाकपार्थिवादिः (वा० २।१।७८) ॥ (३) ॥*॥ 'चिरात्तिक्तः' अपि । **'किरातश्चिरात्तिक्तश्च भूनिम्बहिमकावपि'** इति रभसः ॥*॥ त्रीणि **'भूनिम्बस्य' 'चिरायता'** इति ख्यातस्य ॥

अथ सप्तला ।

विमला सातला भूरिफेना चर्मकषेत्यपि ॥ १४३ ॥

अथेति ॥ सप्त लाति । 'आतोऽनुप–' (३।२।३) इति कः । 'अथ **सप्तला** । वनमालाचर्मकषागुञ्जासु पाटलौ स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ विगता मला यया । 'स्याद्विमला स्त्रियाम् । सातलायां भुवो भेदे निर्मले त्वभिधेयवत्' (इति मेदिनी) ॥ (२) ॥*॥ सातं सुखं लाति । 'आतोऽनुप–' (३।२।३) इति कः ॥ (३) ॥*॥ भूरयः फेना यस्याः ॥ (४) ॥*॥ चर्मणः कषा ॥ (५) ॥*॥ पञ्च **'सप्तलायाः' 'सीहुण्ड'** भेदस्य चर्मघासस्य इत्यन्ये ॥

वायसोली स्वादुरसा वयस्था

वायेति ॥ वायसान् ओलण्डति । 'ओलडि उत्क्षेपणे' (चु० प० से०) । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः । शकन्ध्वादिः (वा० ६।१।९४) ॥ (१) ॥*॥ स्वादू रसोऽस्याः ॥ (२) ॥*॥ वयसि स्थीयतेऽनया । 'घञर्थे कः' (वा० ३।३।५८) । **'वयस्था** तु स्त्रियां ब्राह्मीगुडूच्यामलकीषु च । सूक्ष्मैलायां च काकोल्यां पथ्यायां तरुणे त्रिषु' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'वयस्थायाः' 'ककोडी'** इति ख्यातायाः ॥

अथ मकूलकः ।

निकुम्भो दन्तिका प्रत्यक्श्रेण्युदुम्बरपर्ण्यपि ॥१४४॥

अथेति ॥ मङ्कते । 'मकि मण्डने' (भ्वा० आ० से०) । पिञ्जाद्यूलच् (उ० ४।९०) । स्वार्थे कन् । आगमशासनस्यानित्यत्वान्न नुम् ॥*॥ पृषोदरादित्वात् (६।३।१०९) उत्वे

'**मुकूलकः**' अपि–इत्यन्ये ॥ (१) ॥*॥ कुं भूमिं बिभर्ति । 'संज्ञायां भृतृ–' (३।२।४६) इति खच् । 'खेऽच डिद्वा' (३।२।३८) नियतः कुम्भः । 'प्रादयो गता–' (२।२।१८) इति समासः । '**निकुम्भः** कुम्भकर्णस्य तनये दन्तिकौषधौ' (इति मेदिनी) ॥ (२) ॥*॥ दाम्यति । दम्यते वा । 'दमु उपशमे' (दि० प० से०) । 'हसिमृग्रिण्–' (उ० ३।८६) इति तन् । स्वार्थे कन् (५।३।७५) । '**दन्तोऽद्रिकटके कुञ्जे दशनेऽथौषधौ स्त्रियाम्**' (इति मेदिनी) ॥ (३) ॥*॥ प्रत्यक्षी श्रेण्यस्याः । समासान्तानित्यखाच्च कप् ॥ (४) ॥*॥ उदुम्बरस्येव पर्णान्यस्याः । 'पाककर्ण–' (४।१।६४) इति ङीष् ॥ (५) ॥*॥ पञ्च '**वज्रदन्त्याः**' ॥

अजमोदा तूग्रगन्धा ब्रह्मदर्भा यवानिका ।

अजेति ॥ अजं मोदयति । 'मुद हर्षे' (भ्वा० आ० से०) ण्यन्तः । 'कर्मण्यण्' (३।२।१) । अजादित्वात् (४।१।४) टाप् । अजेन मोदते मोद्यते, वा । पचाद्यच् (३।१।१३४) । घञ् (३।३।१८) वा ॥ (१) ॥*॥ उग्रो गन्धोऽस्याः । '**उग्रगन्धा** वचाक्षेत्रयवान्योश्छिक्किकौषधौ' इति हैमः ॥ (२) ॥*॥ ब्रह्मणा दृभ्यते । 'दृभि ग्रन्थे' (तु० प० से०) । घञ् (३।३।१९) । 'कर्तृकरणे कृता–' (२।१।३२) इति समासः ॥ (३) ॥*॥ दुष्टो यवः । 'इन्द्रवरुण–' (४।१।४९) इति ङीषानुकौ । इवार्थे (५।३।९६) स्वार्थे (५।३।७५) वा कन् ॥*॥ ('यमानिका' इति) समकारपाठे यमेनानिति । 'अन प्राणने' (अ० प० से०) । ण्वुल् (३।१।१३३) ॥ (४) ॥*॥ '**यवानीद्वयस्य**' द्वे द्वे नामनी ।—चत्वारः पर्यायाः—इत्येके ॥

मूले पुष्करकाश्मीरपद्मपत्राणि पौष्करे ॥ १४५ ॥

मूल इति ॥ पौष्करे मूले, इत्यन्वयः । पुष्णाति, पुष्यति वा 'पुष पुष्टौ' (दि० प० अ०, क्या० प० से०) । 'पुषः कित्' (उ० ४।४) इति करन् । '**पुष्करं** पङ्कजे व्योम्नि पयःकरिकराग्रयोः । ओषधिद्वीपविहगतीर्थरागोरुगान्तरे । **पुष्करं** तूर्यवक्त्रे च काण्डे खड्गफलेऽपि च' (इति विश्वः) ॥ (१) ॥*॥ कश्मीरेषु भवम् । 'तत्र भवः' (४।३।५३) इत्यण् ॥ (२) ॥*॥ पद्मस्येव पत्रमस्य ॥*॥ '**पद्मवर्णम्**' इति क्वचित् पाठः ॥ (३) ॥*॥ त्रीणि '**पुष्करमूलस्य**' ॥

अव्यथाऽतिचरा पद्मा चारटी पद्मचारिणी ।

अव्येति ॥ न व्यथते 'व्यथ दुःखसंचलनयोः' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) । '**अव्यथो** निर्व्यथे सर्पे चारटीपथ्ययोः स्त्रियाम्' (इति विश्वमेदिन्यौ) ॥ (१) ॥*॥ अति चरति । अच् (३।१।१३४) ॥ (२) ॥*॥ पद्यते । 'पद गतौ' (दि० आ० अ०) । 'अर्तिस्तु–' (उ० १।१४०) इति मन् ॥ (३) ॥*॥ चारयति । 'शकादिभ्योऽटन्' (उ० ४।८१) ॥ (४) ॥*॥ पद्मे चरितं शीलमस्याः । 'सुपि–' (३।२।७८) इति णिनिः ॥ (५) ॥*॥ पञ्च '**पद्माकस्य**' ॥

काम्पिल्यः कर्कशश्चन्द्रो रक्ताङ्गो रोचनीत्यपि १४६

केति ॥ कम्पिलाया अदूरभवः । संकाशादित्वात् (४।२।८०) ण्यः ॥*॥ कम्पते । 'कपि किंचिच्चलने' (भ्वा० आ० से०) बाहुलकादिल्लः । 'प्रज्ञाद्यण्' (५।४।३८) । कं जलं पीलयति श्लेष्मघ्नत्वात् । 'पील प्रतिष्टम्भे' (भ्वा० प० से०) । कंपूर्वात् 'इगुपध–' (३।१।१३५) इति कः । इति मुकुटः । तन्न । ण्यन्तस्येगुपधत्वाभावात् । अण्यन्तादप्यणः प्रसङ्गाच्च । —इत्थं निर्यकारम् ('**काम्पिल्लः**' इति) मन्यते—इत्येके ॥ (१) ॥*॥ करे कशति । 'कश शब्दे' ( ) । पचाद्यच् (३।१।१३४) । अन्तर्भावितण्यर्थो वा । शकन्ध्वादिः (वा० ६।१।९४) ॥ (२) ॥*॥ चन्दति । 'चदि आह्लादने' (भ्वा० प० से०) 'स्फायितञ्चि–' (उ० २।१३) इति रक् । '**चन्द्रः** कर्पूरकाम्पिल्लसुधांशुस्वर्णवारिषु' (इति मेदिनी) ॥ (३) ॥*॥ रक्तमङ्गमस्य । '**रक्ताङ्गस्तु** महीसुते । कम्पिल्ले स्त्री तु जीवन्त्यां क्लीबं विद्रुमधीरयोः' (इति मेदिनी) ॥ (४) ॥*॥ रोचते । 'रुच दीप्तौ' (भ्वा० आ० से०) । 'कृत्यल्युट–' (३।३।११३) इति ल्युट् । '**रोचनी** कर्कशे स्त्रियाम्' (इति मेदिनी) ॥*॥ '**रेचनी**' इति क्वचित् पाठः ॥ (५) ॥*॥ पञ्च '**रोचन्याः**' '**कपीला**' इति ख्यातायाः ॥

प्रपुन्नाडस्त्वेडगजो दद्रुघ्नश्चक्रमर्दकः ।
पद्माट उरणाख्यश्च

प्रपुन्नेति ॥ पुमांसं नाडयति । 'नड भ्रंशे' चुरादिः । 'कर्मण्यण्' (३।२।१) मस्यानुस्वारे (८।२।१२३) परसवर्णः (८।४।५८) । प्रकृष्टः प्रगतो वा पुन्नाडः ॥ (१) ॥*॥ एडो मेष एव गजो यस्य । भक्षकत्वात् । यद्वा एलनम् । 'इल प्रक्षेपे स्वप्ने च' (तु० प० से०) । घञ् (३।३।१८) । डलयोरेकत्वम् । एडे स्वप्ने गजति । 'गज मदे शब्दे च' (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (२) ॥*॥ दद्रुं हन्ति । 'अमनुष्यकर्तृके च' (३।२।५३) इति टक् । 'अत्पूर्वस्य' (८।४।२२) इति नियमान्न णत्वम् ।—क्षुभ्नादित्वात् (८।४।३९)—इति मुकुटस्तु चिन्त्यः ॥ (३) ॥*॥ चक्रं दद्रुं मृद्नाति । 'मृद क्षोदे' (क्या० प० से०) । 'कर्मण्यण्' (३।२।१) । स्वार्थे कन् (५।३।७५) ॥ (४) ॥*॥ पद्ममिव पद्मां वा पद्मसमूहं वाऽटति । 'अट गतौ' (भ्वा० प० से०) । अण् (३।२।१) ॥ (५) ॥*॥ उरणस्य मेषस्याख्याऽस्य ॥*॥ **उरणस्याक्षीवाक्षि**

१—अस्य वार्तिकस्य 'गमेः सुपि' इति प्रकरणपठितत्वेन 'विहंगः' इत्युदाहरणस्यैव भाष्यकृता दत्तत्वेन च गमेरेव विहितस्य खचो डित्त्वेन खच्सामान्यस्य डित्त्वाग्रहणे मानाभावः । तस्मात्—नि भृशं स्कुभ्नाति विस्तारयति मूलम् । 'स्कुभिः सौत्रो धातुः' । ततोऽच्चि पृषोदरादिः—इति मुकुटोक्तं सम्यक् ॥

१—अत्र 'रूपासिद्धेश्च' इत्यपि पाठः ॥

यस्य। तत्तुल्यपुष्पत्वात्। 'अक्ष्णोऽदर्शनाद्' (५।४।७६) इत्यच्-इति स्वामी ॥ (६) ॥*॥ षट् **'पद्माटस्य' 'पुआड'** इति ख्यातस्य ॥

पलाण्डुस्तु सुकन्दकः ॥ १४७ ॥

पलेति ॥ पलति। 'पल रक्षणे' (भ्वा० प० से०) बाहुलकाद् आण्डुप्रत्ययः ॥ (१) ॥*॥ शोभनमतीव वा कन्दयति। भक्षकजातिभ्रंशकत्वात्। 'कदि रोदने' (भ्वा० प० से०) अच् (३।१।१३४)। स्वार्थे कन् (५।३।७५)। ण्वुल् (३।१।१३३) वा ॥ (२) ॥*॥ द्वे **'पलाण्डोः' 'प्याज'** इति ख्यातस्य ॥

लतार्कदुर्दुमौ तत्र हरिते

लतेति ॥ लतासु अर्क्यते, अर्च्यते विरुद्धलक्षणया निन्द्यते वा। 'अर्क स्तवने' (भ्वा० प० से०)। 'अर्च पूजायाम्' (भ्वा० प० से०) वा। घञ् (३।३।१९) ॥ (१) ॥*॥ दुष्टो द्रुमः ॥ (२) ॥*॥ तत्र पलाण्डौ। हरिते पालाशे ॥*॥ द्वे **'हरिद्वर्णपलाण्डोः'** ॥

अथ महौषधम्।

लशुनं गृञ्जनारिष्टमहाकन्दरसोनकाः ॥ १४८ ॥

अथेति ॥ महच्च तदौषधं च। **'महौषधं** तु शुण्ठ्यां स्याद्विषायां लशुनेऽपि च' (इति मेदिनी) ॥ (१) ॥*॥ अश्नाति। अश्नुते वा। 'अश भोजने' (क्या० प० से०)। 'अशूङ् व्याप्तौ' (स्वा० आ० से०)। 'अशेर्लश् च' (उ० ३।५७) इत्युनन् ॥ (२) ॥*॥ गृञ्जते=भक्ष्यत्वेन कथ्यते रोगेषु। 'गृजि शब्दे' (भ्वा० प० से०)। कर्मणि ल्युट्। **'गृञ्जनम्।** विषदिग्धपशोर्मांसे क्लीबं, पुंसि रसोनके' (इति मेदिनी)। 'लशुनं गृञ्जनं चैव पलाण्डुकवकानि च। वृत्ताकारालिकालाबुजातीया जातिदूषितम्' इति। श्वेतकन्दः पलाण्डुविशेषो गृञ्जनम्। 'लशुनं दीर्घपत्रश्च पिच्छगन्धो महौषधम्। फरणश्च पलाण्डुश्च लतार्कश्चापराजिता। गृञ्जनं यवनेष्टश्च पलाण्डोर्दश जातयः' इति सुश्रुतेनोक्तत्वात्। 'गन्धाकृतिरसैस्तुल्यो गृञ्जनस्तु पलाण्डुना। दीर्घनालाग्रपत्रत्वात् भिद्यतेऽसौ पलाण्डुतः' ॥ (३) ॥*॥ न रिष्टमशुभमस्मात्। **'अरिष्टो** लशुने निम्बे फेनिले काककङ्कयोः। **अरिष्ट**मशुभे तक्रे सूतिकागार आसवे। शुभे मरणचिह्ने च' (इति मेदिनी) ॥ (४) ॥*॥ महत् कन्दमस्य ॥ (५) ॥*॥ रसे आस्वादने ऊन्यते पातकहेतुत्वात्। 'ऊन परिहाणे' (चु० उ० से०)। 'एरच्' (३।३।५६)। घञ् (३।३।१९) वा। स्वार्थे कन् (५।३।७५) कुन् (उ० २।३२) वा ॥ (६) ॥*॥ षट् **'लशुन'** इति ख्यातस्य ॥

पुनर्नवा तु शोथघ्नी

पुनेति ॥ पुनरभीक्ष्णं नवा। नूयते वा 'ऋहोरप्' (३।३।५७)। क्षुभ्नादिः (८।४।३९) ॥ (१) ॥*॥ शोथं हन्ति। 'अमनुष्य–' (३।२।५३) इति टक्। 'टिड्ढा–' (४।१।१५) इति ङीप् ॥ (२) ॥*॥ द्वे **'पुनर्नवायाः' 'गदहपूर्णा'** इति ख्यातायाः ॥

वितुन्नं सुनिषण्णकम्।

वीति ॥ विगतं तुन्नं व्यथनमस्मात्। **'वितुन्नं** सुनिषण्णे च शैवाले च नपुंसकम्' (इति मेदिनी) ॥ (१) ॥*॥ सुष्ठु निषण्णमस्मात् ॥ (२) ॥*॥ द्वे **'वितुन्नस्य' 'विषखपरिआ'** इति ख्यातस्य ॥

स्याद्वातकः शीतलोऽपराजिता शणपर्ण्यपि ॥१४९॥

स्यादिति ॥ वातं करोति 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति ङः ॥ (१) ॥*॥ शीतं लाति। 'आतोऽनुप–' (३।२।३) इति कः ॥*॥ 'शीतलवातकः' इत्यपि नाम। 'शणपर्णी **शीतलवातकः**' इति धन्वन्तरिः ॥ (२) ॥*॥ न पराजिता। **'अपराजित** ईशाज्येष्ठ्यन्तरे नाऽजिते त्रिषु। गिरिकर्णी जयादुर्गाऽशणपर्णीषु योषिति' (इति मेदिनी) ॥ (३) ॥*॥ शणः पर्णान्यस्याः। शणशब्दः शणपर्णसदृशे लाक्षणिकः 'पाककर्ण–' (४।१।६४) इति ङीष् ॥*॥—अशन इव पर्णमस्याः। **(अशनपर्णी)**–इति कश्चित् ॥ (४) ॥*॥ चत्वारि **'शतपर्ण्याः' 'पटशण'** इति ख्यातस्य ॥

पारावताङ्घ्रिः कटभी पण्या ज्योतिष्मती लता।

पारेति ॥ पारावत इवाङ्घ्रिरस्याः ॥ (१) ॥*॥ कटवद्भाति। 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति ङः। गौरादिः (४।१।४१) ॥ (२) ॥*॥ पण्यते। 'पण व्यवहारे' (भ्वा० आ० से०)। 'अवद्यपण्य–' (३।१।१०१) इति साधुः ॥ (३) ॥*॥ ज्योतिरस्त्यस्याः। मतुप् (५।२।९४) ॥ (४) ॥*॥ लतति। 'लतिः सौत्रः'। अच् (३।१।१३४) ॥ (५) ॥*॥ पञ्च **'ज्योतिष्मत्याः' 'मालकांगणी'** इति ख्यातायाः ॥

वार्षिकं त्रायमाणा स्यात्रायन्ती बलभद्रिका ॥ १५० ॥

वेति ॥ वर्षासु भवं जातं वा। 'वर्षाभ्यष्ठक्' (४।३।१८)। **'वार्षिकं** त्रायमाणायां क्लीबं वर्षाभवे त्रिषु' (इति मेदिनी) ॥ (१) ॥*॥ त्रायते। 'त्रैङ् पालने' (भ्वा० आ० अ०)। शानच् (३।२।१२४) चानश् (३।२।१२९) वा। **('त्रायमाणा** वार्षिके स्त्री रक्ष्यमाणेऽभिधेयवत्' इति मेदिनी) ॥ (२) ॥*॥ त्राणम्। त्राः। संपदादिः (वा० ३।३।१०८) त्रा अयति। 'इ गतौ' (भ्वा० प० से०)। शता (३।२।१२४)। (ङीप् ४।१।६)। 'शप्श्यनोः–' (७।१।८१) इति नुम्) ॥ (३) ॥*॥ बलेन भद्रा। स्वार्थे कन् (५।३।७५) ॥ (४) ॥*॥ चत्वारि **'त्रायमाण'** इति ख्यातस्य ॥

विष्वक्सेनप्रिया गृष्टिर्वाराही बदरेति च।

वीति ॥ विष्वक्सेनस्य प्रिया ॥ (१) ॥*॥ गृह्णाति।

क्तिच् (३।३।१७४) । पृषोदरादिः (६।३।१०९) । यत्तु—'गर्षति हिनस्ति रोगम्' 'गृषु हिंसायाम्' क्तिन् (३।३।९४)–इति व्याख्यातं मुकुटेन । तन्न । उक्तधातोरदर्शनात् । कर्तरि क्तिनोऽसंभवाच्च । 'अथ **गृष्टिः** सकृत्सूतगवीबदरयोः स्त्रियाम्' (इति मेदिनी) ॥*॥ 'घृष्टिः' इति पाठान्तरम् । घर्षति । 'घृषु संघर्षे' (भ्वा० प० से०) । क्तिच् (३।३।१७४) । '**घृष्टिः** स्त्री घर्षणस्पर्धाविष्णुक्रान्तासु ना किरौ' (इति मेदिनी) ॥ (२) ॥*॥ वराहस्येयम् । प्रियत्वात् । 'तस्येदम्' (४।३।१२०) इत्यण् '**वाराही** मातृभेदे स्याद्विष्वक्सेनप्रियौषधौ' (इति मेदिनी) ॥ (३) ॥*॥ वदति । 'वद स्थैर्ये' (भ्वा० प० से०) । बाहुलकादरन् । '**ब (व) दरा** गृष्टिकार्पास्योरेलापर्ण्यां स्त्रियां, पुमान् । कर्पासस्यास्थि, **बदरी** कोले क्लीबं तु तत्फले' (इति मेदिनी) ॥ (४) ॥*॥ चत्वारि '**वाराहीकन्द**' इति ख्यातायाः ॥

मार्कवो भृङ्गराजः स्यात्

मार्केति ॥ मारयति । क्विप् (३।२।१७८) । मारि केशशौक्ल्यनाशने कूयते । 'कुङ् शब्दे' (भ्वा० आ० अ०) । 'ऋरोरप्' (३।३।५७) ॥ (१) ॥*॥ भृङ्ग इव राजते । 'राजृ दीप्तौ' (भ्वा० उ० से०) । अच् (३।१।१३४) । ('अथ **भृङ्गराज** उक्तः पक्षिविशेषे च मार्कवे भ्रमरे' (इति मेदिनी) । 'भृङ्गरजः' इति पाठे भृङ्ग इव रजोऽस्य । सान्तोऽदन्तोऽपि । रजशब्दस्य द्वैविध्यात् । 'स्यान्मार्कवो **भृङ्गरजः** भृङ्गराजः सुजागरः' इति रभसात् ॥ (२) ॥*॥ द्वे '**भृङ्गराज**' इति ख्यातस्य ॥

काकमाची तु वायसी ॥ १५१ ॥

काकेति ॥ काकान् मञ्चति । 'मचि धारणोच्छ्रायपूजनेषु' (भ्वा० आ० से०) । 'कर्मण्यण्' (३।२।१) । आगमशास्त्रस्यानित्यत्वान्न नुम् ॥ (१) ॥*॥ वायसानामियम् । 'तस्येदम्' (४।३।१२०) इत्यण् । 'काकोदुम्बरिकायां च काकमाच्यां च **वायसी**' (इति मेदिनी) ॥ (२) ॥*॥ द्वे '**काकमाच्याः**' '**कवप्रिया**' इति ख्यातायाः ॥

शतपुष्पा सितच्छत्राऽतिच्छत्रा मधुरा मिसिः ।
अवाक्पुष्पी कारवी च

शतेति ॥ शतं पुष्पाण्यस्याः । 'सदच्काण्ड–' (ग० ४।१।४) इति टाप् ॥ (१) ॥*॥ सितं बद्धं शुभ्रं वा छत्रमस्याः ॥ (२) ॥*॥ छत्रमतिक्रान्ता । 'अल्पादयः–' (वा० २।२।१८) इति समासः ॥ (३) ॥*॥ मधुरस्त्यस्याः । 'ऊषशुषि–' (५।२।१०७) इति रः । '**मधुरा** शतपुष्पायां मिश्रेयानगरीभिदोः' (इति मेदिनी) ॥ (४) ॥*॥ मस्यति । 'मसी परिणामे' (दि० प० से०) । इन् (उ० ४।११८) । पृषोदरादिः (६।३।१०९) । '**मिसिः** स्त्री मधुरामांस्योः शतपुष्पाजमोदयोः' (इति मेदिनी) ॥ (५) ॥*॥ अवाञ्चि पुष्पाण्यस्याः । गौरादित्वात् (४।१।४१) ङीष् । यत्तु—'पाककर्ण–' (४।१।६४) इति ङीष्—इत्याह मुकुटः । तन्न । 'सदच्काण्ड–' (ग० ४।१।४) (वा० ६४) इत्यस्य तदपवादत्वात् ॥ (६) ॥*॥ के आरौति । पचाद्यच् । यत्तु मुकुट आह—कारोरियम् कारवी इति । तन्न । 'वृद्भ्यश्छः' (४।२।११४) इत्यस्यापवादत्वात् । '**कारवी** मधुरादीप्यत्वक्पत्रीकृष्णजीरके' इति मेदिनी ॥ (७) ॥*॥ सप्त '**मधुरायाः**' '**सौंफ**' इति ख्यातायाः । अन्त्यद्वयम् '**उंधाचली**' इति ख्यातायाः—इत्येके ॥

सरणा तु प्रसारिणी ॥ १५२ ॥
तस्यां कटंभरा राजबला भद्रबलेति च ।

सरेति ॥ सरति । 'सृ गतौ' (भ्वा० प० अ०) । 'बहुलमन्यत्रापि' (उ० २।७८) इति युच् ॥*॥ ल्युटि (३।३।११३) 'सरणी' इत्यपि । 'सरणा **सरणी** चार्वी कटंभरा **महाबला**' इति रुद्रः ॥ (१) ॥*॥ प्रसार्यतेऽङ्गमनया । 'करणा–' (३।३।११३) इति ल्युट् ॥*॥ 'सारणी' इत्यपि । ('**सारणो** राक्षसान्तरे) । रुग्भेदे ना, प्रसारण्यां स्वल्पनद्यां च **सारिणी**' (इति मेदिनी) ॥ (२) ॥*॥ कटं बिभर्ति । 'संज्ञायां भृतृ–' (३।२।४६) इति खच् ॥ (३) ॥*॥ बलानां बलप्रदानां राजेव । राजदन्तादिः (२।२।३१) ॥ (४) ॥*॥ भद्रं बलमस्याः ॥ (५) ॥ ॥*॥ पञ्च '**कुब्जप्रसारिणी**' इति ख्यातायाः ॥

जनी जतूका रजनी जतुकृच्चक्रवर्तिनी ॥ १५३ ॥
संस्पर्शा

जनीति ॥ जायते आरोग्यमनया । 'जनिघसिभ्यामिण्' (उ० ४।१३०) । 'जनिवध्योश्च' (७।३।३५) इति न वृद्धिः । 'कृदि–' (ग० ४।१।४५) इति वा ङीष् । '**जनी** सीमन्तिनीवध्वोरुत्पत्तावोषधीभिदि' (इति मेदिनी) ॥ (१) ॥*॥ जायते । 'जनी' (दि० आ० से०) । 'उलूकादयश्च' (उ० ४।४१) इति साधुः ॥*॥ जतुशब्दात् 'संज्ञायां–' (५।३।७५) इति कनि '**जतुका**' च ॥ (२) ॥*॥ रज्यतेऽनया । 'रज रागे' (भ्वा० उ० अ०) । 'करणा–' (३।३।११७) इति ल्युट् ।–'त्यजरज–' (३।२।१४२) इति निपातनात् क्वचिद-

---

१—इदं च 'घिनुणि च' । घिनुणि चोपसंख्यानं कर्तव्यम् । रागी । घिणुनि निपातनात्सिद्धम् । किं निपातनम् । '–त्यजरज–' (३।२।१४२) इति । अशक्यं धातुनिर्देशे निपातनत्वमाश्रयितुम् । इह हि दोषः स्यात् । '–दशनहः करणे' (३।२।१४२) । दंष्ट्रा । नैतद्धातुनिपातनम् । किं तर्हि प्रत्ययान्तस्यैतद्रूपम् । तस्मिंश्च प्रत्यये लोपो भवति' इति भाष्येण प्रत्ययान्तस्येति । शब्दन्तस्येत्यर्थः । यङ्लुङ्निवृत्त्यर्थश्च तत्र शब्दिर्देशः । यङ्लुङन्ताद्रञ्जेर्न भवति' इति कैयटेन च विरुद्धम् । तस्मात् 'रञ्जेः क्युन्' (उ० २।७९) इति क्युनि कित्त्वान्न लोपः । गौरादित्वात् (४।१।४१) ङीष् इति बोध्यम् ॥

ङित्यपि नलोपः । **'रजनी** नीलिनीरात्रिहरिद्राजतुकासु च' (इति मेदिनी) ॥ (३) ॥*॥ जतु करोति । क्विप् (३।२।१७८) ॥ (४) ॥*॥ चक्रं चक्रमिव वा वर्तितुं शीलमस्याः । 'सुपि–' (३।२।७८) इति णिनिः ॥ (५) ॥*॥ सम्यक् स्पृशति स्पृश्यते वा । 'स्पृश संर्शने' (तु० प० से०) । 'पदरुज–' (३।३।१६) इति घञ् । पचाद्यच् (३।१।१३४) वा । कर्मणि घञ् (३।३।१९) वा ॥ (६) ॥*॥ षट् **'चक्रवर्तिन्याः' 'चकवत'** इति ख्यातस्य ॥

अथ शटी गन्धमूली शड्ग्रन्थिकेत्यपि ।
कर्चूरोऽपि पलाशः

अथेति ॥ शटति । 'शट रुजादौ' (भ्वा० प० से०) । अच् (३।१।१३३) गौरादिः (४।१।४१) ॥ (१) ॥*॥ गन्धं मूलमस्याः ॥ (२) ॥*॥ षड् बहवो ग्रन्थयोऽस्याः ॥ (३) ॥*॥ कर्चति 'कर्च गतौ' ( ) । खर्जादित्वात् (उ० ४।९०) ऊरः । **'कर्चूरः** स्यात् पुमाञ्शट्यां सुवर्णे तु नपुंसकम्' (इति मेदिनी) ॥*॥ **'कर्बुरः'** अपि ॥ (४) ॥* पलमश्नाति । 'अश भोजने' (क्र्या० प० से०) । 'कर्मण्यण्' (३।२।१) पले मांसे आशा यस्य वा । **'पलाशः** किंशुकः शटी । हरिद्रूर्णौ राक्षसश्च पलाशं छदने मतम्' इति हैमः ॥ (५) ॥*॥ पञ्च **'शम्याः' 'कचूर'** इति ख्यातस्य ॥

अथ कारवेल्लः कठिल्लकः ॥ १५४ ॥
सुषवी च

अथेति ॥ **'कारो** वधे निश्चये च वलौ यत्ने यतावपि । (तुषारशैलेऽपि पुमान् स्त्रियां दूत्यां प्रसेवके । सुकर्णकारिकायां च बन्धनागारबन्धयोः)' (इति मेदिनी) । कारं वेल्लति । 'वेल्ल चलने' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) ॥ (१) ॥*॥ कटति । 'कटे वर्षावरणयोः' (भ्वा० प० से०) । बाहुलकादिल्लः ॥*॥ कठति । 'कठ शोके' (भ्वा० प० से०) । अस्मादिल्लः, इत्यन्ये । स्वार्थे कन् (५।३।७५) । **'कठिल्लकस्तु** पर्णासे वर्षाभूकारवेल्लयोः' इति विश्वमेदिनीन्यौ ॥ (२) ॥*॥ सुसुवति । 'षू प्रेरणे' (तु० प० से०) । अच् (३।१।१३४) । 'उपसर्गात्सुनोति–' (८।३।६५) इति षः । गौरादिः (४।१।४१) **'सुषवी** कृष्णजीरके । कारवेल्ले च जीरे च' इति हैमः ॥ (३) ॥*॥ त्रीणि **'कारवेल्लस्य' 'करेला'** इति ख्यातस्य ॥

अथ कुलकं पटोलस्तिक्तकः पटुः ।

अथेति ॥ कोलति । 'कुल संस्त्याने' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । स्वार्थे कन् कुन् (उ० २।३२) वा । **'कुलकं** तु पटोले स्यात्संबद्धश्लोकसंहतौ । पुंसि वल्मीककाकेन्दुकुलश्रेष्ठेषु कथ्यते' (इति मेदिनी) ॥ (१) ॥*॥ पटति । 'पट गतौ' (भ्वा० प० से०) । अन्तर्भावितण्यर्थो वा । 'कपिगडिगण्डि–' (उ० १।६६) इत्योलच् । **'पटोलं** वस्त्रभेदे, नौषधौ ज्यौत्स्न्यां तु योषिति' (इति मेदिनी) ॥ (२) ॥*॥ तिक्त एव । स्वार्थे कन् (५।३।७५) ॥ (३) ॥*॥ पाटयति । 'पट गतौ' (भ्वा० प० से०) । 'फलिपाटि–' (उ० १।१८) इत्युः पटिरादेशश्च । **'पटुर्दक्षे** च नीरोगे चतुरेऽप्यभिधेयवत् । पटोले तु पुमान् क्लीबे छत्रालवणयोरपि' (इति मेदिनी) ॥ (४) ॥*॥ चत्वारि **'पटोलस्य' 'परवर'** इति ख्यातस्य ॥

कूष्माण्डकस्तु कर्कारुः

किति ॥ कु ईषद् ऊष्मा अण्डेषु बीजेषु यस्य । पित्तलत्वात् । 'कूष्माण्ड्युमायां स्त्री, पुंसि कर्कारौ च गणान्तरे । भूणान्तरे' (इति मेदिनी) ॥ (१) ॥*॥ कर्क शुक्लवर्णमृच्छति । 'ऋ गतौ' (भ्वा० प० अ०) । बाहुलकादुण् ॥ (२) ॥*॥ द्वे **'कूष्माण्डस्य'** ॥

ईर्वारुः कर्कटी स्त्रियौ ॥ १५५ ॥

ईर्वेति ॥ ईरणं 'ईर गतौ' (अ० आ० से०) । संपदादिः (वा० ३।३।१०८) । ईरं वृणोति, वारयति वा । 'वृञ् वरणे' (स्वा० उ० से०) । बाहुलकादुण् । 'तुर्यस्वरादिर्' **'ईर्वारुः** कर्कट्यां पठ्यते बुधैः' ॥*॥ ह्रस्वादिरपि । 'उन्मत्तो (?) धुस्तुर **इर्वारुः** कर्कटिः स्यात्' इति पुंस्काण्डे रत्नकोषात् ॥*॥ **'एर्वारुः'** इति पाठे आड् बोध्यः ॥*॥ ('उर्वारुकमिव बन्धनात्' इति श्रुतेः पृषोदरादित्वेनादेरुत्वे **'उर्वारुः'** इति च) ॥ (१) ॥*॥ करं कटति । 'कटे वर्षादौ' (भ्वा० प० से०) । इन् (उ० ४।११८) । शकन्ध्वादिः (वा० ६।१।९४) । ङीष् (वा० ४।१।४१) वा ॥ (२) ॥*॥ द्वे **'काकडी'** इति ख्यातायाः ॥

इक्ष्वाकुः कटुतुम्बी स्यात्

ईति ॥ इक्षुमाकरोति । मितद्वादित्वात् (वा० ३।२।१८०) डुः । यद्वा छिक्कायां जातम् 'इक्षु' इति शब्दमकति । 'अक गतौ' (भ्वा० प० से०) । बाहुलकादुण् । **'इक्ष्वाकुः** कटुतुम्ब्यां स्त्री सूर्यवंशनृपे पुमान्' (इति मेदिनी) ॥ (१) ॥*॥ कटुश्चासौ तुम्बी च ॥ (२) ॥*॥ द्वे **'कटुतुम्ब्याः'** ॥

तुम्ब्यलाबूरुभे समे ।

त्विति ॥ तुम्बति रुचिम् । 'तुवि अर्दने' (भ्वा० प० से०) । अच् (३।१।१३४) । गौरादिः (४।१।४१) । इन् (उ० ४।११८) वा । 'कृत्–' (उ० ४।१।४५) इति वा ङीष् ॥ (१) ॥*॥ न लम्बते । 'लबि अवस्रंसने' (भ्वा० आ० से०) । 'नञि लम्बेर्नलोपश्च' (उ० १।८७) इत्यूर्णित् ।

१—प्रथमोपात्तचरणस्तु विश्वे संभवति । चरमोपात्तचरणस्तु मेदिन्यामुपलभ्यते । हैमे तु मध्यस्थोऽपि नोपलभ्यते ॥

'अलाम्बुस्तु **पिण्डफला तुम्बिस्तुम्बी महाफला**। **तुम्बा** तु वर्तुलाऽलाबूनि(र्नि)म्बचूर्णा तु लाबुका' इति वाचस्पतिः। 'अलाबूस्तुम्बकः प्रोक्तः' इति चन्द्रः ॥ (२) ॥*॥ द्वे **'तुम्बा'** इति ख्यातायाः ॥

चित्रा गवाक्षी गोडुबा

चित्रेति ॥ चीयते। 'चिञ् चयने' (स्वा० उ० अ०)। 'अमिचि–' (उ० ४।१६४) इति क्रः। **'चित्रा**खुपर्णी गोडुम्बासुभद्रादन्तिकासु च । मायायां सर्पनक्षत्रनदीभेदेषु च स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ गां भूमिमक्ष्णोति। 'अक्षू व्याप्तौ' (भ्वा० प० से०)। 'कर्मण्यण्' (३।२।१)। **'गवाक्षी** स्विन्द्रवारुण्यां **गवाक्षो** जालके कपौ' इति हैमः ॥ (२) ॥*॥ गां भुवं तुम्बति। 'तुबि अर्दने' (भ्वा० प० से०)। मूलविभुजादिकः (वा० ३।२।५)। टाप् (४।१।४)। पृषोदरादिः (६।३।१०९)। मुकुटस्तु—गां डुम्बयति। 'डुबि अर्दने' अण् (३।२।१)—इत्याह। तन्न। धातुपाठेषु डुबिधातोरदर्शनात्। अणि ङीप्प्रसङ्गाच्च ॥ (३) ॥*॥ त्रीणि **'कर्कटीविशेषस्य'** ॥

विशाला स्विन्द्रवारुणी ॥ १५६ ॥

विशेति ॥ वि शलति। 'शल चलने' (भ्वा० प० से०)। 'ज्वलति–' (३।१।१४०) इति णः। टाप् (४।१।४) विशति वा। अत्र वा। 'विश प्रवेशने' (तु० प० से०)। 'तमिविशिविडि–' (उ० १।११८) इति कालन्। 'विशाला स्विन्द्रवारुण्यामुज्जयिन्यां तु योषिति। नृपवृक्षभिदोः पुंसि पृथुलेऽप्यभिधेयवत्' (इति मेदिनी) ॥ (१) ॥*॥ इन्द्रं वारयति। 'वृञ् वरणे' चुरादिः। 'कृवृदारि–' (उ० ३।५३) इति बाहुलकाद् ण्यन्तादप्युनन्। यत्तु मुकुटः–इन्द्रवरुणौ देवते अस्याः। अण् (४।२।२४)। 'उत्तरपदस्य च' (७।३।१०) इत्युत्तरपदवृद्धिः—इत्याह। तन्न। मन्त्रहविषोरेव स्वामिनि देवतालक्ष्यव्यवहारात्। 'उत्तरपदस्य च' (७।३।१०) इत्यस्याधिकारत्वेन वृद्धिविधायकलाभावाच्च ॥ (२) ॥*॥ द्वे **'इन्द्रवारुणी'** इति ख्यातायाः ॥

अर्शोघ्नः शूरणः कन्दः

अर्शोघ्नइति ॥ अर्शांसि हन्ति। 'अमनुष्य–' (३।२।५३) इति टक् ॥ (१) ॥*॥ शूर्यते। 'शूरी हिंसायाम्' (दि० आ० से०)। 'बहुलमन्यत्रापि' (उ० २।७८) इति युच्। कर्तरि ल्युट् (३।३।११३) वा। यत्तु–शूरति—इति विगृहीतं मुकुटेन। तन्न। शूरीधातोर्दिवाद्यात्मनेपदित्वात् ॥*॥ सूर्यते। 'सूरी हिंसायाम्'। युच् (उ० २।७८)। ल्युट् (३।१।११३) वा। इति **(सूरणः)** दन्त्यादिरपि ॥ (२) ॥*॥ कन्दति। कन्दयति। कन्यते वा। अच् (३।१।१३४)। घञ् (३।३।१९) वा। **'कन्दोऽस्त्री** सूरणे सस्यमूले जलधरे पुमान्' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'सूरण'** इति ख्यातस्य ॥

गण्डीरस्तु समष्ठिला ।

गण्डीरेति ॥ गण्डति, गण्ड्यते, वा। 'गडि वदनैकदेशे' (भ्वा० प० से०)। बाहुलकादीरन्। यद्वा गण्डीन् ग्रन्थीनीरयति। 'ईर प्रेरणे' (अ० आ० से०) 'कर्मण्यण्' (३।२।१) ॥ (१) ॥*॥ समे तिष्ठति। 'मिथिलादयश्च' (उ० १।५७) इति साधुः। यद्वा सम्यगष्ठिला बीजं यस्याः। 'गण्डीरो ना समष्ठिला' इति माला ॥ (२) ॥*॥ द्वे **'गाण्डरदूर्वी'** इति ख्यातस्यानूपजशाकभेदस्य। **'गडिनी'** इति भाषा ॥

कलम्बी

केति ॥ कडति। 'कड मदे' (भ्वा० प० से०)। 'कृकदिकडिकटिभ्योऽम्बच्' (उ० ४।८२)। डलयोरेकलम्। के जले लम्बते। 'लबि अवस्रंसने' (भ्वा० आ० से०)। पचाद्यच् (३।१।१३४)। गौरादिः (४।१।४१)। **'कलम्बी** तु शतपर्वा कलम्बूर्वासु वीरुधः' इति वाचस्पतिः। **'कलम्बी** शाकभेदेऽपि कदम्बशरयोः पुमान्' (इति मेदिनी) ॥ (१) ॥*॥ एकं **'करेम्बु'** इति ख्यातस्य ॥

उपोदका

उपेति ॥ उपाधिकमुदकमस्याम्। '—उत्तरपदस्य च' (वा० ६।३।५७) इत्युदः। कप् (५।४।१५४)। टाप् (४।१।४) ॥*॥—अपगतोदका। जाङ्गलत्वात्। **'अपोदका'**–इति स्वामी ॥ (१) ॥*॥ एकम् **'पोई'** इति ख्यातस्य ॥

अस्त्री तु मूलकं

मूलेति ॥ 'मूल प्रतिष्ठायाम्' (भ्वा० प० से०)। क्तुन् (उ० २।३२)। यद्वा मूलयति। 'मूल रोहणे' चुरादिः। अच् (३।१।१३४)। 'संज्ञायां कन्' (५।३।७५) ॥ (१) ॥*॥ एकम् **'मूली'** इति ख्यातस्य ॥

हिलमोचिका ॥ १५७ ॥

हिलेति ॥ हिलति। 'हिल भावकरणे' (तु० प० से०)। 'इगुपध–' (३।१।१३५) इति कः। मोचयति। ण्वुल् (३।१।१३३)। हिला चासौ मोचिका च। 'ह्यापोः–' (६।३।६३) इति ह्रस्वः ॥ (१) ॥*॥ एकम् **'हिलसाल'** इति ख्यातस्य ॥

वास्तुकम्

वेति ॥ वसति देहे। चिरं गुणा वाऽस्मिन् वसन्ति। 'वस निवासे' (भ्वा० प० अ०)। 'उलूकादयश्च' (उ० ४।४१) इति साधु ॥*॥ वास्तौ भवम्। अध्यात्मादिठञ् (वा० ४।३।६०)। 'इसुसुक्–' (७।३।५१) इति कः। एवं **(वास्तुकम्)** ह्रस्वमध्यमपि ॥ (१) ॥*॥ एकं **'वथुवा'** इति ख्यातस्य ॥

१—'रम्या वास्तववास्तुकस्तवकिता' इति प्रयोगात्—इति मुकुटः॥

शाकभेदाः स्युः

शाकेति ॥ कलम्ब्याद्याः पञ्च शाकभेदाः स्युः । 'शाकाख्यं पत्रपुष्पादि' इत्यत आरभ्य च । 'मण्डूकपर्णी पालङ्क्या चिल्लिका चाप्युपोदिका । चाङ्गेरी हिलमोचा च कलम्बी शाकजातयः' इति माला ॥

दूर्वा तु शतपर्विका ।

सहस्रवीर्याभार्गव्यौ रुहानन्ता

दूर्वेति ॥ दूर्वति, दूर्व्यते वा । 'दूर्वी हिंसायाम्' (भ्वा० प० से०) । अच् (३।१।१३४) । घञ् (३।३।१९) वा । 'उपधायां च' (८।२।७८) इति दीर्घः ॥ (१) ॥*॥ शतं पर्वाण्यस्याः । 'शेषात्' (५।४।१५४) इति कप् । शतं पर्वति । 'पर्व पूरणे' (भ्वा० प० से०) । ण्वुल् (३।१।१३३) । **'शतपर्विका** तु दूर्वायां वचायामपि योषिति' (इति मेदिनी) ॥ (२) ॥*॥ सहस्रं वीर्याण्यस्याः ॥ (३) ॥*॥ भृगोरियम् । **'भार्गवी** पार्वतीश्रियोः । दूर्वायाम्' (इति मेदिनी) ॥ (४) ॥*॥ छिन्नापि रोहति । 'इगुपध–' (३।१।१३५) इति कः ॥ (५) ॥*॥ न अन्तो यस्याः । **'अनन्ता** च विशल्यायां शारिवादूर्वयोरपि । कणादुरालभाषण्यापार्वत्यामलकीषु च । विश्वंभरागुडूच्योः स्यादनन्तं सुरवर्त्मनि । **अनन्तः** केशवे शेषे पुमान्निरवधौ त्रिषु' (इति मेदिनी) ॥ (६) ॥*॥ षट् **'दूर्वायाः'** ॥

अथ सा सिता ॥ १५८ ॥

गोलोमी शतवीर्या च गण्डाली शकुलाक्षकः ।

अथेति ॥ सा दूर्वा । सिता शुक्ला । गोलोमसु जाता । 'तत्र जातः' (४।३।२५) इत्यण् । संज्ञापूर्वकत्वान्न वृद्धिः । **'गोलोमी** श्वेतदूर्वायां स्याद्वचाभूतकेशयोः' (इति मेदिनी) ॥ (१) ॥*॥ शतं वीर्याण्यस्याः ॥ (२) ॥*॥ गण्डति । 'गडि वदनैकदेशे' (भ्वा० प० से०) । बाहुलकादालच् । गण्डमलति वा । 'कर्मण्यण्' (३।२।१) । 'टिड्ढा–' (४।१।१५) इति ङीप् । गौरादिः (४।१।४१) वा ॥ (३) ॥*॥ शकुलस्य मत्स्यस्येवाक्षि यस्य । 'अक्ष्णोऽदर्शनात्' (५।४।७६) इत्यच् । स्वार्थे कन् (५।३।७५) ॥ (४) ॥*॥ चत्वारि **'शुक्लदूर्वायाः'** । स्वामी तु—परे द्वे दूर्वाभेदस्य—इत्याह ॥

कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम् ॥१५९॥

कुर्विति ॥ कुरून् विन्दति । 'विदृ लाभे' (तु० उ० अ०) । 'अनुपसर्गाल्लिम्प०' (३।१।१३८) इति शः । **'कुरुविन्दं** रत्नभेदे मुस्ताकुल्माषयोः पुमान्' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ मेघनामानि नामान्यस्य ॥ (२) ॥*॥ मुस्तयति । 'मुस्त संघाते' चुरादिः । अच् (३।१।१३४) ॥ (३) ॥*॥ ण्वुल् (३।१।१३३) ॥ (४) ॥*॥ चत्वारि **'मुस्तायाः** **'मोथा'** इति ख्यातायाः ॥

स्याद्भद्रमुस्तको गुन्द्रा

स्यादिति ॥ भन्दते । 'भदि कल्याणे' (भ्वा० आ० से०) 'ऋज्रेन्द्र–' (उ० २।१८) इति साधुः । भद्रं करोति वा । 'तत्करोति' (वा० ३।१।२६) इति ण्यन्तादच् (३।१।१३४) । भद्रश्चासौ मुस्तकश्च ॥*॥ 'भद्रम्' अपि नाम । **'भद्रं** स्यान्मङ्गले हेम्नि मुस्तके करणान्तरे' इति रुद्रः ॥ (१) ॥*॥ गां जलं द्राति । 'द्रा गतौ' (अ० प० अ०) 'आतोऽनुप–' (३।२।३) इति कः । पृषोदरादिः (६।३।१०९) । **'गुन्द्रः**स्तेजनके स्त्री तु प्रियंगौ भद्रमुस्तके' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'नागरमोथा'** इति ख्यातस्य ॥

चूडाला चक्रलोच्चटा ।

चूडेति ॥ चूडास्त्यस्याः । 'प्राणिस्थादातो लजन्यतरस्याम्' (५।२।९६) । **'चूडाला** तूच्चटायां स्त्री चूडावति च वाच्यवत्' (इति मेदिनी) ॥ (१) ॥*॥ चक्रं लाति । 'आतोऽनुप–' (३।२।३) इति कः ॥ (२) ॥*॥ उच्चटति । 'चट गतौ' (भ्वा० प० से०) अन्तर्भावितण्यर्थः । अच् (३।१।१३४) ॥ (३) ॥*॥ त्रीणि **'मुस्ताविशेषस्य'** ॥

वंशे त्वक्सारकर्मारत्वचिसारतृणध्वजाः ॥ १६० ॥
शतपर्वा यवफलो वेणुमस्करतेजनाः ।

वंशे इति ॥—वमति । 'टुवम उद्गिरणे' (भ्वा० प० से०) 'वृभूवमिकुभ्यः शक्'—इति मुकुटः । तन्न । उक्तसूत्रस्योज्ज्वलदत्तादिवृत्तिष्वदर्शनात् । अनुनासिकलोपस्य (६।४।३७) उपधादीर्घस्य (६।४।१५) च प्रसङ्गाच्च । कुशभृशयोर्धात्वन्तरेण सिद्धत्वाच्च । वनति, वन्यते, वा । 'वन शब्दे' (भ्वा० प० से०) । बाहुलकाच् शः । उश्यते, वष्टि, वा । 'वश कान्तौ' (अ० प० से०) घञ् (३।३।१९) । संज्ञापूर्वकत्वान्न वृद्धिः । अच् (३।१।१३४) । 'संख्या वंश्येन' (२।१।१९) इति निर्देशान्नुम् । **'वंशो** वेणौ कुले वर्गे पृष्ठाद्यवयवेऽपि च' (इति विश्वः) ॥ (१) ॥*॥ त्वक् त्वचि वा सारोऽस्य ॥ (२) ॥*॥ कर्म क्रियामृच्छति । 'कर्मण्यण्' (३।२।१) ॥ (३) ॥*॥ 'हलदन्तात्–' (६।३।९) इति वा लुक् ॥ (४) ॥*॥ तृणेषु ध्वज इव ॥ (५) ॥*॥ शतं पर्वाण्यस्य ॥ (६) ॥*॥ यव इव फलान्यस्य । **'यवफलो** मांसिकायां कुटजत्वचिसारयोः' इति हैमः ॥ (७) ॥*॥ वेणति । 'वेणृ निशामनवादित्राद्दानगमनज्ञानचिन्तासु' (भ्वा० उ० से०) । बाहुलकादुः । यद्वा अजति 'अजिवृरीभ्यो निच्च' (उ० ३।३८) इति णुः । 'अजेर्वी–' (२।४।५६) ।—वयन्ति शोभन्ते स्वनेन । 'वी' धातोः 'धेन्वादयश्च' इति नुः, णत्वं च—इति सुभूतिः । तन्न उक्तसूत्राभावात् । 'वी' धातोरादादिकत्वेन 'वयन्ति' इति रूपाभावाच्च । **'वेणु**र्नपान्तरे । त्वक्सारेऽपि च पुंसि स्यात्' (इति मेदिनी) ॥ (८) ॥*॥ मस्कते, अनेन वा । 'मस्क गतौ' (भ्वा० आ० से०) । बाहुलकादरः । यद्वा-

मङ्क्ते । 'मकि मण्डने' (भ्वा० आ० से०) अरः । आगमशास्त्रस्यानित्यत्वान्न नुम् । 'मस्करमस्करिणौ वेणुपरिव्राजकयोः' (६।१।१५४) इति सुट् ॥ (९) ॥*॥ तेजयति शस्त्रमग्निं वा । नन्द्यादिल्युः (३।१।१३४।) । युच् (उ० २।७८) वा ॥ (१०) ॥*॥ दश **'वेणोः'** ॥

वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः ॥१६१॥

वेणेति ॥ ये वेणवोऽनिलेनोद्धतास्ताडिताश्चालिता वा शब्दायन्ते । चीकति । चीकयते वा । शब्दायते । 'चीक मर्षणे' (चु० उ० से०) । 'चीकयतेराद्यन्तविपर्ययश्च' (उ० ५।३६) इति युन् ।—पृषोदरादित्वात् (६।३।१०९) आद्यन्तविपर्ययश्च —इति मुकुटः । तद् उक्तसूत्रादर्शनमूलकम् । यद्वा 'की' इत्यव्यक्तम् चकते । 'चक तृप्त्यादौ' (भ्वा० आ० से०) । अच् (३।१।१३४) । 'संज्ञायां कन्' (५।३।७५) कुन् (उ० २।३२) वा । 'कीच' इत्यव्यक्तं कायति मूलविभुजादिकः (वा० ३।२।५) 'अन्येभ्योऽपि–'(वा० ३।२।१०१) इति डो वा । **'कीचको** दैत्यभिद्वाताहतसस्वनवंशयोः' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'वाताहतवेणूनाम्'** ॥

ग्रन्थिर्ना पर्वपरुषी

ग्रन्थिरिति ॥ ग्रन्थते 'ग्रथि कौटिल्ये' (भ्वा० आ० से०) 'सर्वधातुभ्य इन्' (उ० ४।११८) **'ग्रन्थि**स्तु ग्रन्थिपर्णे ना बन्धे रुग्भेदपर्वणोः' (इति मेदिनी) ॥ (१) ॥*॥ पर्वति । 'पर्व पूरणे' (भ्वा० प० से०) । बाहुलकात्कनिन् । **'पर्व** क्लीबं महे ग्रन्थौ प्रस्तावे लक्षणान्तरे । दर्शप्रतिपदोः संधौ विषुवत्प्रभृतिष्वपि' (इति मेदिनी) ॥ (२) ॥*॥ पिपर्ति 'पॄ पालनपूरणयोः' (जु० प० से०) । 'अर्तिपॄपि–' (उ० २।११७) इत्युस् ॥*॥ बाहुलकादुप्रत्यये उदन्तोऽपि । 'मज्जा सारो, ग्रन्थिः **परुः**, परागः कुसुमरेणुः' इति पुंस्काण्डे रत्नकोषात् ॥ (३) ॥*॥ त्रीणि **'वंशादिग्रन्थेः'** ॥

गुन्द्रस्तेजनकः शरः ।

ग्विति ॥ गोदते । 'गुद क्रीडायाम्' (भ्वा० आ० से०) । बाहुलकाद्रक् । पृषोदरादिः (६।३।१०९) । **'गुन्द्र**स्तेजनके स्त्री तु प्रियंगौ भद्रमुस्तके' (इति मेदिनी) ॥ (१) ॥*॥ तेजयति । 'तिज निशाने' चुरादिः । ण्वुल् (३।१।१३३) । कुन् (उ० २।३२) वा ॥ (२) ॥*॥ श्रृणाति । 'शॄ हिंसायाम्' (क्र्या० प० से०) अच् (३।१।१३४) । **'शर**स्तेजनके बाणे दध्यग्रे ना **शरं** जले' (इति मेदिनी) ॥*॥ **'सुरस्तु मुञ्जो बाणाख्यो** गुन्द्रस्तेजनकः शरः' इति वाचस्पतेर्दन्त्यादिश्च । सरति । 'सॄ गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (३) ॥*॥ त्रीणि **'शरस्य' 'सरहरी'** इति ख्यातस्य ॥

नडस्तु धमनः पोटगलः

नड इति ॥ नडति 'नड गहने' ( ) । अच् (३।१।१३४) ॥ (१) ॥*॥ धमति । 'धम ध्माने' सौत्रः । धम्यते वा 'बहुलम्–' (उ० २।७८) इति युच् । यत्तु—'ध्मो धमश्च' इति नप्रत्ययो धमादेशश्च—इत्याह मुकुटः । तन्न । उज्ज्वलदत्तादिष्वेतत्सूत्रस्यादर्शनात् । कुन्प्रकरणे दर्शनात् । सौत्रधातुना गतार्थत्वाच्च । **'धमनो** नले । क्रूरे भस्त्राध्मापके च **धमनी** कंधरा शिरा । हरिद्रा च' इति हैमः ॥ (२) ॥*॥ पोटेन संश्लेषेण । गलति 'गल अदने' (भ्वा० प० से०) । स्रवणे (चु० आ० से०) अच् (३।१।१३४) । 'अथ **पोटगलः** पुंसि नले च काशमत्स्ययोः' (इति मेदिनी) (३) ॥*॥ त्रीणि **'धमनस्य' 'नलः'** इति ख्यातस्य ॥

अथो काशमक्लियाम् ॥ १६२ ॥

इक्षुगन्धा पोटगलः

अथविति ॥ काशते । 'काश्ट दीप्तौ' (भ्वा० आ० से०) । अच् (३।१।१३४) **'काश**स्तृणे रोगभेदे' (इति हैमः) । **'काशी**वाराणसीपुरी' (इति मेदिनी) । **'काशीकाश**श्च तृणवाचकः' इति शब्देभः । गौरादिङीष् (४।१।४१) ॥ (१) ॥*॥ इक्षुवद्गन्धोऽस्याः । समासान्तविधेरनित्यत्वान्नित्त्वम् (५।४।१३५) । **'इक्षुगन्धा** कोकिलाक्षे क्रोष्ट्र्यां काशे च गोक्षुरे' (इति मेदिनी) ॥ (२) ॥*॥ (पोटगलो व्याख्यातः) ॥ (३) ॥*॥ त्रीणि **'काशस्य'** ॥

पुंभूमनि तु वल्वजाः ।

पुमिति ॥ वलते । 'वल संवरणे' (भ्वा० आ० से०) क्विप् (३।२।१७८) वजति । 'वज गतौ (भ्वा० प० से०) । अच् (३।१।१३४) वल् चासौ वजश्चा 'एको वल्वजः' इति (१।२।४५ सूत्रे) भाष्यकारवचनादेकत्वेऽपि ॥ (१) ॥*॥ एकम् **'वगइ'** इति ख्यातस्य ॥

रसाल इक्षुः

रसेति ॥ रसेनालति, अल्यते, वा=पूरयति पूर्यते, वा । 'अल भूषणादौ' (भ्वा० प० से०) । अच् (३।१।१३४) घञ् (३।३।१९) वा । **'रसालं** सिह्लके वोले **रसाल**श्चेक्षुचूतयोः' (इति मेदिनी) ॥ (१) ॥*॥ इष्यते । 'इष इच्छायाम्' (तु० प० से०) 'इषेः क्सुः' (उ० ३।१५७) । 'षढोः कः सि' (८।२।४१) ॥ (२) ॥*॥ द्वे **'इक्षोः'** ॥

तद्भेदाः पुण्ड्रकान्तारकादयः ॥ १६३ ॥

तदिति ॥ कोषकाराद्या आदिना गृह्यन्ते । 'इक्षुः कर्कटको वंशः कान्तारो वेणुनिःसृतः । इक्षुरन्यः पौण्ड्रकश्च रसालः सुकुमारकः' । पुण्ड्यन्ते । 'पुडि खण्डने' (भ्वा० प० से०) ।

१—'संज्ञायां कन्' (५।३।७५) । कुन् । (उ० २।३२) वाइति लिखितमस्ति । तत्तु ककारत्रयश्रवणापत्त्या प्रक्षिप्तमिव भाति । चकधातोर्डप्रत्यये कनः संगतावपि कुनः सर्वथाऽसंगतेः ॥

'स्फायी–' (उ० २।१३) इत्यादिना रक् ॥*॥ प्रज्ञाद्यण् (५।४।३८)। पौण्ड्रः। **'पुण्ड्रेऽक्षौ पुण्ड्रकः सेव्यः पौण्ड्रको-ऽतिरसो मधुः'** इति वाचस्पतिः। **'पुण्ड्रो** दैत्यविशेषेक्षुभेदयोरतिमुक्तके। (चित्रे कृमौ पुण्डरीके पुंभूम्नि नीवृदन्तरे ॥)' (इति मेदिनी) ॥ (१) ॥*॥ कान्तं रसमृच्छति। 'ऋ गतौ' (भ्वा० प० अ०)। 'कर्मण्यण्' (३।२।१)। स्वार्थे कन् (५।३।७५) ण्वुल् (३।१।१३३) वा ॥ (२) ॥*॥ द्वे **'इक्षुभेदस्य'** ॥

स्याद्वीरणं वीरतरम्

स्यादिति ॥ विं पक्षिणमीरयति। ल्युः (३।१।१३४)। युच् (उ० २।७८) वा।—विशिष्टजनमीरयति। 'शूर वीर विक्रान्तौ' (चु० आ० से०)—इति मुकुटः। तन्न। विग्रहप्रदर्शनधातूपन्यसनयोर्विरुद्धत्वात् ॥ (१) ॥*॥ अच् (३।१।१३४)। अतिशयितं वीरम्। 'द्विवचन–' (५।३।५७) इति तरप्। 'स्याद्वीरणे **वीरतरं** वीरश्रेष्ठे शवे च ना' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'तृणभेदस्य' 'गाँडर'** इति ख्यातस्य ॥

मूलेऽस्योशीरमस्त्रियाम्।

अभयं नलदं सेव्यममृणालं जलाशयम् ॥ १६४ ॥
लामज्जकं लघुलयमवदाहेष्टकापथे।

मूल इति ॥ वीरणस्य मूले। उश्यते। 'वश कान्तौ' (अ० प० से०) 'वशेः कित्' (उ० ४।३१) इतीरन् ॥ (१) ॥*॥ न भयमस्मात्। **'अभया** स्त्री हरीतक्यामुशीरे च नपुंसकम्। निर्भये वाच्यलिङ्गः स्यात्' (इति मेदिनी) ॥ (२) ॥*॥ नलं गन्धं ददाति, दयते वा। 'डुदाञ् दाने' (जु० प० अ०), 'दैङ् पालने' (भ्वा० आ० अ०) वा। 'आतोऽनुप–' (३।२।३) इति कः। **'नलदं** स्यात्पुष्परसोशीरमांसीषु न द्वयोः' (इति मेदिनी) ॥ (३) ॥*॥ सेवितुमर्हम्। 'षेवृ सेवने' (भ्वा० आ० से०)। अर्हे ण्यत् (३।३।१६९)। **'सेव्यं** क्लीबमुशीरे स्यात्सेवार्हे पुनरन्यवत्' (इति मेदिनी) ॥ (४) ॥*॥ मृणालमिव। सादृश्येऽत्र नञ् ॥*॥ 'मृणालम् अप्यत्र'। **'मृणालं** नलदे क्लीबं पुंनपुंसकयोर्बिसे' (इति मेदिनी) ॥ (५) ॥*॥ जले आशेते। अच् (३।१।१३४) यद्वा जलो जड आशयो यस्य। **'जलाशयो** जलाधारे स्यादुशीरे नपुंसकम्' (इति मेदिनी) ॥ (६) ॥*॥ लाति दोषान् अच् (३।१।१३४) क्विप् (३।२।१७८) वा। ला मज्जा सारोऽस्य। कप् (५।४।१५४) इति मुकुटस्तु चिन्त्यः ॥ (७) ॥*॥ लङ्घते रोगान्। लङ्घयते वा भूस्थत्वात्। 'लघि गतौ' (भ्वा० आ० से०)। 'लङ्घिबंह्योर्नलोपश्च' (उ० १।२९) लघु लीयते। 'लीङ् श्लेषणे' (दि० आ० अ०)। अच् (३।१।१३४) समस्तं नाम ॥*॥ व्यस्तमपि। 'लामज्जकं **सुवासं** स्यादमृणालं **लयं लघु**' इति सुश्रुतः। 'लामज्जकं **सुनालः** स्यादमृणालं लयं लघु' ॥ (८) ॥*॥ अवलीयते दाहोऽस्मात्।—अवदीयते दाहोऽनेन, इति–'अवदानम्' इति तु स्वामी—इति मुकुटः। तन्न। स्वामिग्रन्थेऽदर्शनात्। 'अवदीयते दाहोऽनेन' इति स्वामिना व्याख्यातत्वाच्च ॥*॥ केचित्तु—'अवदाहेष्टम्' 'कापथम्' इति नामद्वयमाहुः। 'लामज्जकं लघुलयमवदाहेष्टकापथे। **अवदानमिन्द्रगुप्तमवदाहेष्टकापथे**' इति वाचस्पतिः ॥ (९) ॥*॥ इष्टं कापथमस्य। अधोवायुकरत्वात्। यद्वा इष्टकेव दृढः पन्था यस्य, इष्टकायामपि पन्था यस्य, इति वा ॥ (१०) ॥*॥ दश **'वीरणमूलस्य' 'खश'** इति ख्यातस्य ॥

नलादयस्तृणं गर्मुच्छयामाकप्रमुखा अपि ॥ १६५ ॥

नलेति ॥ तृणजातयः। तृण्यते। 'तृणु अदने' (तं० उ० से०)। घञ् (३।३।१९)। संज्ञापूर्वकत्वाद्गुणो न। घञर्थे कसु परिगणनान्न ॥ (१) ॥*॥ गिरति, गीर्यते वा। 'गृ निगरणे' (तु० प० से०)। 'ग्रो मुट् च' (उ० १।९५) इत्युतिः ( ) ॥ (१) ॥*॥ श्यायते। 'श्यैङ् गतौ' (भ्वा० आ० अ०) 'पिनाकादयश्च' (उ० ४।१५) इति साधुः। यद्वा श्यामं वर्णमकति। 'अक गतौ' (भ्वा० प० से०)। अण् (३।२।१) ॥*॥ 'श्यामाकः **श्यामकोऽपि** च' इति हलायुधः। तत्र मूलविभुजादिके (वा० ३।२।५) शकन्ध्वादित्वम् (वा० ६।१।९४) बोध्यम्। यत्तु—'श्यालूधूभ्यो मकन्'—इत्याह मुकुटः। तन्न। तस्योणादिवृत्तावदर्शनात्। (**साँवा** इति ख्यातः) ॥ (१) ॥*॥ प्रमुखशब्दान्नीवाराद्याः। मुकुटस्तु—अनन्तराः कुशादयो व्यवहिताश्च कङ्कुकोद्रवादयो गृहीताः—इत्याह। कोद्रवादीनामेवं सति हविष्यत्वापातात् ॥

अस्त्री कुशं कुथो दर्भः पवित्रम्

अस्त्रीति ॥ कौ शेते। 'अन्येभ्योऽपि–'(वा० ३।२।१०१) इति डः। यद्वा कुश्यति। 'कुशिर श्लेषे' ( )। 'इगुपध–' (३।१।१३५) इति कः। **'कुशो** रामसुते द्वीपे पापिष्ठे योक्रमत्तयोः। **कुशी** फाले **कुशो** दर्भे कुशा वल्गा **कुशं** जले' इति हैमः) ॥ (१) ॥*॥ कुथ्यति। 'कुथ पूतीभावे' (भ्वा० प० से०) 'इगुपध–' (३।१।१३५) इति कः। –'कुथति'–इति स्वाम्युक्तविग्रहश्चिन्त्यः। **'कुथः** स्त्रीपुंसयोर्वर्णे कम्बलै पुंसि बर्हिषि' (इति मेदिनी) ॥ (२) ॥*॥ दृभ्यते। 'दृभी ग्रन्थे' (तु० प० से०)। घञ् (३।३।१९) ॥ (३) ॥*॥ पूयतेऽनेन। 'पुवः संज्ञायाम्' (३।२।१८५) इतीत्रः। **'पवित्रं** वर्षणे कुशे। ताम्रे पयसि च क्लीबं मेध्ये स्यादभिधेयवत्' (इति मेदिनी) ॥ (४) ॥*॥ चत्वारि **'दर्भविशेषस्य'** ॥

अथ कत्तृणम्।

पौरसौगन्धिकध्यामदेवजग्धकरौहिषम् ॥ १६६ ॥

अथेति ॥ कुत्सितं तृणम्। 'तृणे च जातौ' (६।३।१०३) इति कोः कदादेशः। (**'कत्तृणं** तृणभित्तृश्योः' इति मेदिनी)

॥ (१) ॥*॥ पुरे भवम् । 'तत्र भवः' (४।३।५३) इत्यण् । **'पौरं** त्रिषु पुरोद्भूते कत्तृणे पुंनपुंसकम्' (इति मेदिनी) ॥ (२) ॥*॥ शोभनो गन्धः । सुगन्धः प्रयोजनमस्य । 'प्रयोजनम्' (५।१।१०९) इति ठञ् । **'सौगन्धिको** गन्धवणिक् **सौगन्धिकं** तु कत्तृणे । गन्धोत्पले पद्मरागे कह्लारे' इति हैमः ॥ (३) ॥*॥ ध्यायन्ते पशुभिः । 'ध्यै चिन्तायाम्' (भ्वा० प० अ०) । बाहुलकान्मक् । (**'ध्यामं** दमनके गन्धतृणे श्यामेऽभिधेयवत्' इति विश्वः ।) ॥ (४) ॥*॥ देवैरद्यते स्म । क्तः (३।२।१०२) 'अदो जग्धिर्ल्यप्ति किति' (२।४।३६) ॥ (५) ॥*॥ रोहति । 'रुहेर्बृद्धिश्च' (उ० १।४७) इति टिषच् । 'कत्तृणे **रौहिषं** क्लीबं पुंलिङ्गो हरिणान्तरे' इति मूर्धन्यान्ते रभसः ॥ (६) ॥*॥ षट् **'रोहिस'** इति ख्यातृणविशेषस्य ॥

छत्रातिच्छत्रपालघ्नौ

छत्रेति ॥ छदति, छादयति, वा । छद अपवारणे । त्रन् (उ० ४।१५९) 'इसन्त्रन्किषु च' (६।४।९७) इति ह्रस्वः । **'छत्रा** मिसावतिच्छत्रे कुसुम्बुरुशिलीन्ध्रयोः । नपुंसकं चातपत्रे' (इति मेदिनी) ॥ (१) ॥*॥ अतिक्रान्तश्छत्रम् ॥ (२) ॥*॥ पालं क्षेत्रं हन्ति । 'अमनुष्य–' (३।२।५२) इति ठक् ॥ (३) ॥*॥ त्रीणि **'जलजतृणविशेषस्य'** ॥

मालातृणकभूस्तृणौ ।

मालेति ॥ मालाकाराणि तृणान्यस्य ॥ (१) ॥*॥ भुवस्तृणम् । पारस्करादित्वात् (६।१।१५७) सुट् । 'भूर्' अव्ययं वा ॥ (२) ॥*॥ द्वे **'तृणविशेषस्य'** । स्वामी तु—छत्रादिपञ्च पर्यायानाह ॥

शष्पं बालतृणम्

शष्पमिति ॥ शस्यते । शुष्यति, वा 'शसु हिंसायाम्' (भ्वा० प० से०) । 'शुष शोषणे' (दि० प० अ०) वा । 'खष्पशिल्पशष्प–' (उ० ३।२८) इति साधुः ।—'नीपादयः' इति षः—इति मुकुटस्तु चिन्त्यः । उज्ज्वलदत्तादिवृत्तिषु 'नीपादयः' इति सूत्राभावात् । **'शष्पं** बालतृणे स्मृतम् । पुंसि स्यात् प्रतिमाहानौ' (इति मेदिनी) ॥ (१) ॥*॥ बालं तृणम् ॥ (२) ॥*॥ द्वे **'नवतृणस्य'** ॥

घासो यवसम्

घेति ॥ अद्यते । घञ् (३।३।१९) 'घञपोश्च' (२।४।३८) इत्यदेर्घस्त्व ।—'घस्यते'—इति विगृह्यन्तौ स्वामिमुकुटौ चिन्त्यौ । घसेः सर्वत्र प्रयोगाभावात् । अन्यथा 'घञपोश्च' (२।४।३८) इति सूत्रवैयर्थ्यापातात् ॥ (१) ॥*॥ यौति, यूयते, वा । 'यु मिश्रणेऽमिश्रणे च' (अ० प० से०) । 'वहियुभ्यां णित्' (उ० ३।११९) इत्यसच् । संज्ञापूर्वकत्वान्न वृद्धिः ॥ (२) ॥*॥ द्वे **'गवाद्यदनीयतृणविशेषस्य'** ॥

तृणमर्जुनम् ॥ १६७ ॥

तृणमिति ॥ तृण्यते । 'तृणु अदने' (त० उ० से०) । घञ् (३।३।१९) संज्ञापूर्वकत्वान्न गुणः ॥ (१) ॥*॥ अर्ज्यते । 'अर्ज अर्जने' (भ्वा० प० से०) । 'तृणाख्यायां चित्' (उ० ३।५९) इत्युनन् । **'अर्जुनः** ककुभे पार्थे कार्तवीर्यमयूरयोः । मातुरेकसुतेऽपि स्याद् धवले पुनरन्यवत् । नपुंसकं तृणे नेत्ररोगे स्याद् **अर्जुनी**गवि । उषायां बाहुदानद्यां कुट्टन्यामपि च क्वचित्' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'तृणमात्रस्य'** ॥

तृणानां संहतिस्तृण्या

तृणेति ॥ तृणानां संहतिः समूहः । 'पाशादिभ्यो यः' (४।२।४९) ॥ (१) ॥*॥ एकम् **'तृणसमूहस्य'** ॥

नड्या तु नडसंहतिः ।

नेति ॥ नडानां संहतिः । 'पाशादिभ्यो यः' (४।२।४९) ॥ (१) ॥*॥ एकम् **'नडसमूहस्य'** ॥

तृणराजाह्वयस्तालः

तृणेति ॥ तृणानां राजा । 'राजाहःसखिभ्यष्टच्' (५।४।९१) तृणराज इत्याह्वयो यस्य ॥ (१) ॥*॥ तालयति । 'तल प्रतिष्ठायाम्' चुरादिः । पचाद्यच् (३।१।१३४) । **'तालः** करतलेऽङ्गुष्ठमध्यमाभ्यां च संमिते । गीतकालक्रियामाने करस्फाले द्रुमान्तरे । वाद्यभाण्डे च कांस्यस्य त्सरौ **ताली** जटौषधौ । क्लीबं तु हरिताले स्यात्' (इति मेदिनी) ॥*॥ तलति । अच् (३।१।१३४) **'तलश्चपेटे तालद्रौ तलं** ज्याघातवारणे । त्सरौ स्वभावधरयोस्त्रीघाते च संमतम्' ॥ (२) ॥*॥ द्वे **'तालस्य'** ॥

नालिकेरस्तु लाङ्गली ॥ १६८ ॥

नालीति ॥ नलति, नल्यते, वा । 'णल गन्धे' (भ्वा० प० से०) । बाहुलकादिण् । केन वायुना ईर्यते । **'ईर प्रेरणे'** (अ० आ० से०) । घञ् (३।३।१९) नालिश्चासौ केरश्च ॥*॥ कपिलिकादिः (वा० ८।२।१८) (**नारिकेलः**) ॥ (१) ॥*॥ लङ्गति, 'लगि गतौ' (भ्वा० प० से०) । बाहुलकाद् अलच् दीर्घश्च । गौरादिः (४।१।४१) ॥ (२) ॥*॥ द्वे **'नारिकेलस्य'** ॥

घोण्टा तु पूगः क्रमुको गुवाकः खपुरः

घोण्टेति ॥ घोणते । 'घुण भ्रमणे' (भ्वा० आ० से०) । बाहुलकात् टः । **'घोण्टा** तु बदरीपूगवृक्षयोरपि योषिति' (इति मेदिनी) ॥ (१) ॥*॥ पवते, पुनाति, वा । 'पूङ् पवने' (भ्वा० आ० से०) । 'छापूखडिभ्यः कित्' (उ० १।१२४) इति गन् । मुकुटस्तु—पूज्यते मान्यते सेचनादिना फलद्वारेण, अनेन, वा । घञि कृत्वे पूगः—इत्याह । तन्न । पूजेश्चुरादिण्यन्तत्वेन णिलोपस्य स्थानिवत्त्वेन कृत्वाप्रसङ्गात् ।

१—लद्वितीयरेफचतुर्थः 'नालिकेरश्चितस्तिलकः' इति दमयन्तीश्लेषात् । २—रद्वितीयलचतुर्थः 'नारिकेलीमहावीरैरिव नारिकेलीवनैः' इति वासवदत्ताश्लेषात् ॥

'निष्ठायामनिटः' (७।३।५३) इति वार्तिकाच्च । **'पूगः क्रमुकसंघयोः'** इति हैमः ॥ (२) ॥*॥ क्रामति । 'क्रमु पादविक्षेपे' (भ्वा० प० से०) । बाहुलकादुः 'संज्ञायां कन्' (५।३।७५) । **'क्रमुकस्तु** पुमान् भद्रमुस्तके ब्रह्मदारुणि । फले कार्पासिकायाश्च पट्टिकालोध्रपूगयोः' (इति मेदिनी) ॥ (३) ॥*॥ गुवन्त्यनेन । स्रंसकत्वात् । 'गु पुरीषोत्सर्गे' (तु० प० अ०) । 'पिनाकादयश्च' (उ० ४।१५) इति साधुः । यत्तु मुकुटः—बाहुलकाद्गुणाभाव इति । तन्न । अस्य कुटादित्वात् ॥*॥ 'गुवाकोऽपि च **गूवाकः**' इति तारपालः । तत्र बाहुलकादीर्घः ॥ (४) ॥*॥ खमिन्द्रियमाकाशं वा पिपर्ति । 'पॄ पालनपूरणयोः' (जु० प० से०) । मूलविभुजादिकः (वा० ३।२।५) । 'उदोष्ठ्यपूर्वस्य' (७।१।१०२) । यत्तु—अचि (३।१।१३४) उत्वम् (७।१।१०२) आह मुकुटः । तन्न । 'इत्वोत्वाभ्यां गुणवृद्धी–' (७।१।१०२) इति वार्तिकविरोधात् । यदपि—'पूरी आप्यायने' (दि० आ० से०)—इत्ययं धातुरुपन्यस्तः । तदपि न । 'खपूरः' इति रूपप्रसङ्गात् । (**'खपुरः** क्रमुके भद्रमुस्तकेऽलसकेऽपि च' इति मेदिनी) ॥ (५) ॥*॥ पञ्च **'पूगवृक्षस्य' 'सोपारी'** इति ख्यातस्य ॥

अस्य तु ।

फलमुद्वेगम्

अस्येति ॥ अस्य पूगस्य । उद्वृतो वेगोऽस्मात् । स्रंसकत्वात् । उद्विजन्तेऽनेन । 'ओविजी–' (तु० आ० से०) । 'हलश्च' (३।३।१२१) इति घञ् ॥ (१) ॥*॥ एकं **'क्रमुकफलस्य'** ॥

एते च हिंतालसहितास्त्रयः ॥ १६९ ॥

खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः ।

एत इति ॥ एते नालिकेराद्यास्त्रयो हिंतालेन चतुर्थेन सहिताः खर्जूराद्याश्च चत्वारः । तृणजातीया द्रुमाः । शाकपार्थिवादिः (वा० २।१।७८) हीनोऽल्पस्तालः । पृषोदरादिः (६।३।१०९) ॥ (१) ॥*॥ खर्जति 'खर्ज व्यथने' (भ्वा० प० से०) । 'खर्जिपिञ्जादिभ्य ऊरोलचौ' (उ० ४।९०) इत्यूरः । **'खर्जूरं** रूप्यफलयोः **खर्जूरः** कीटवृक्षयोः' (इति हैमः) ॥ (१) ॥*॥ 'जातेरस्त्री–' (४।१।६३) इति ङीष् । गौरादिः (४।१।४१) वा । **'वनखजूरी'** इति ख्याता ॥ (१) ॥*॥ केतयति । कित निवासे (भ्वा० प० से०) । क्रुन् (उ० २।३२) ण्वुल् (३।१।१३४) वा गौरादिः (४।१।४१) ॥ (१) ॥*॥ तालयति । 'तल प्रतिष्ठायाम्' चुरादिः । अच् (३।१।१३४) । जातित्वात् (४।१।६३) गौरादित्वात् (४।१।४१) वा ङीष् ॥ (१) ॥*॥ **'तृणद्रुमभेदानां पृथक्'** एकैकम् ॥

इति वनौषधिवर्गविवरणम् ॥

सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः ।

सिंह इति ॥ सिञ्चति । 'षिच क्षरणे' (तु० उ० अ०) । 'सिञ्चेः संज्ञायां हनुमौ कश्च' (उ० ५।६२) । यद्वा हिनस्ति । 'हिसि हिंसायाम्' (रु० प० से०) अच् (३।१।१३४) । पृषोदरादिः (६।३।१०९) । **'सिंहः** कण्ठीरवे राशौ सत्तमे चोत्तरस्थितः । **सिंही** तु कण्टकार्यां स्यात्' (इति मेदिनी) । **'सिंही** स्वर्भानुमातरि । वासावृहत्योः क्षुद्रायाम्' (इति हैमः) ॥ (१) ॥*॥ मृगाणामिन्द्रः ॥ (२) ॥*॥ पञ्चते । 'पञ्चि विस्तारे' (भ्वा० आ० से०) पञ्चं विस्तृतमास्यमस्य । यद्वा मुखं पादाश्च पञ्च आस्यानीव यस्य । युद्धे मुख्यत्वात् ॥ (३) ॥*॥ हरिणी पिङ्गले अक्षिणी यस्य । 'बहुव्रीहौ–' (५।४।११३) इति षच् ॥ (४) ॥*॥ केसराः स्कन्धबालाः सन्त्यस्य । 'अतः–' (५।२।११५) इतीनिः । **'केसरी** तुरगे सिंहे पुंनागे नागकेसरे' (इति मेदिनी) ॥*॥ केचित् (**केसरी**) इति तालव्योष्ममध्यमाहुः । के वारि शिरसि वा शीर्यते । 'शॄ हिंसायाम्' (क्र्या० प० से०) । 'ऋदोरप्' (३।३।५७) । 'हलदन्तात्–' (६।३।९) इत्यलुक् । सोऽस्त्यस्य । इन् (५।२।११५) ॥ (५) ॥*॥ हरति । 'अच इः' (उ० ४।१३९) । **'हरिश्चन्द्रार्कवाताश्वशुकभेकयमाहिषु** । कपौ सिंहे हरेऽजेऽशौ शक्रे लोकान्तरे पुमान् । वाच्यवत् पिङ्गहरितोः' (इति मेदिनी) ॥ (६) ॥*॥ षट् **'सिंहस्य'** ॥

शार्दूलद्वीपिनौ व्याघ्रे

शार्दूल इति ॥ शारयति । 'शॄ हिंसायाम्' (क्र्या० प० से०) । स्वार्थणिचः क्विप् । दूयते । 'दूङ् परितापे' (दि० आ० से०) । अन्तर्भावितण्यर्थः । बाहुलकाल्लक् । यद्वा शृणाति । पिज्ञाद्यूलच् (उ० ४।९०) बाहुलकाद्गुकृद्धी । **'शार्दूलो** राक्षसान्तरे । व्याघ्रे च पशुभेदे च सत्तमे तूत्तरस्थितः' (इति मेदिनी) ॥ (१) ॥*॥ द्वौ वर्णौ ईयते । 'इङ् गतौ' (दि० आ० अ०) । बाहुलकात् पो गुणाभावश्च । द्वीपाकारेखावत्त्वाद् द्वीपं चर्मास्त्यस्य । 'अतः–' (५।२।११५) इतीनिः ॥ (२) ॥*॥ व्याजिघ्रति । 'घ्रा गन्धोपादाने' (भ्वा० प० अ०) 'व्याङि घ्रातेश्च जातौ' (उ० ५।६३) इति कः । यद्वा 'आतश्चोपसर्गे' (३।१।१३६) इति कः । 'पाघ्रा–' (३।१।१३७) इति शो न । 'जिघ्रः संज्ञायाम्–' (वा० ३।१।१३७) इति निषेधात् । **'व्याघ्रः** स्यात्पुंसि शार्दूले रक्तैरण्डकरञ्जयोः । श्रेष्ठे नरादुत्तरस्थः कण्टकार्यां तु योषिति' (इति मेदिनी) ॥३ ॥*॥ त्रीणि **'वाघ'** इति ख्यातस्य ॥

तरक्षुस्तु मृगादनः ॥ १ ॥

तरेति ॥ तरं गतिं मार्गं वा क्षिणोति । 'क्षिणु हिंसायाम्' (त० उ० से०) । मितद्वादिडुः (वा० ३।२।१८०) ॥ (१) ॥*॥ मृगमत्ति । **'अद भक्षणे'** (अ० प० अ०)

ल्युः (३।१।१३३) ॥ (२) ॥*॥ द्वे **'तेंदुआवाघ'** इति ख्यातस्य—इत्यन्ये । **'डुण्डातर'** इति ख्यातस्य—इति मुकुटः ॥

वराहः सूकरो घृष्टिः कोलः पोत्री किरः किटिः ।
दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपि ॥ २ ॥

वरेति ॥ वरं श्रेष्ठमाहन्ति । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः । **'वराहो** नाणके किरौ । मेघे मुस्ते गिरौ विष्णौ' इति हैमः ॥ (१) ॥*॥ सवनम् । 'षूङ् प्राणिगर्भविमोचने' (अ० आ० से०) । संपदादिः (वा० ३।३।१०८) । सुवं प्रसवं करोति । 'कृञो हेतु–' (३।२।२०) इति टः ॥*॥ 'तालव्या अपि दन्त्याश्च शम्बशूकरपांशवः' इति शभेदः । शूकोऽस्त्यस्य । खररोमत्वात् । रः । यद्वा शूकं राति । 'रा आदाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । यद्वा 'शूं' इति ध्वनिं करोति । अच् (३।१।१३४) । टः (३।२।२०) वा ॥ (२) ॥*॥ घर्षति । 'घृषु संघर्षे' (भ्वा० प० से०) । क्तिच् (३।३।१७४) । **'घृष्टिः** स्त्री घर्षणस्पर्धाविष्णुकान्तासु ना किरौ' इति विश्वः ॥ (३) ॥*॥ कोलति पीनत्वात् । 'कुल संस्त्याने' (भ्वा० प० से०) । अच् (३।१।१३४) । यद्वा कोलन्त्यज्ञान्यत्र । 'हलश्च' (३।३।१२१) इति घञ् । **'कोलो** भेलक उत्सङ्गेऽङ्कपाल्यां चित्रके किरौ । **कोलं** च बदरे **कोला** पिप्पल्यां चव्यभेषजे' इति हैमः ॥ (४) ॥*॥ पोत्रं मुखाग्रमस्त्यस्य । 'अतः–' (५।२।११५) इतीनिः ॥ (५) ॥*॥ किरति । 'कॄ विक्षेपे' (तु० प० से०) । 'इगुपध–' (३।१।१३५) । इति कः ॥*॥ 'किरिः' इति पाठे बाहुलकात् किः । ('अथ किरः **किरिः** । भूदारः शूकरः' इति हैमः) ॥ (६) ॥*॥ केटति । 'किट गतौ' (भ्वा० प० से०) । 'इगुपधात् कित्' (उ० ४।१२०) । —किटति—इति मुकुटश्चिन्त्यः । किटेस्तौदादिकत्वाभावात् ॥ (७) ॥*॥ दंष्ट्रास्त्यस्य । व्रीह्यादीनिः (५।२।११६) ॥ (८) ॥*॥ घोणा नासास्य । व्रीह्यादिः (५।३।११६) ॥ (९) ॥*॥ स्तब्धानि रोमाणि यस्य ॥ (१०) ॥*॥—क्रुडति । 'क्रुड घनत्वे' (तु० प० से०) । अच् (३।१।१३४)—इति मुकुटः । तन्न कुटादित्वाद्गुणाप्रसङ्गात् । क्रुडनम् । घञ् (३।३।१९) । क्रोडोऽस्यास्ति । अर्श आद्यच् (५।३।१२७) ॥ (११) ॥*॥ भुवं दारयति । 'कर्मण्यण्' (३।२।१) ॥ (१२) ॥*॥ द्वादश **'सूकरस्य'** ॥

कपिप्लवंगप्लवगशाखामृगवलीमुखाः ।
मर्कटो वानरः कीशो वनौकाः

केति ॥ कम्पते । 'कपि चलने' (भ्वा० आ० से०) । 'कुण्ठिकम्प्योर्नलोपश्च' (उ० ४।१४४) इतीन् । **'कपिर्ना** सिह्लके शाखामृगे च मधुसूदने' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ प्लवनम् । 'प्लुङ् गतौ' (भ्वा० आ० अ०) । 'ऋदोरप्' (३।३।५७) प्लवेन गच्छति । 'गमश्च' (३।२।४७) इति खच् । 'खच डिद्वा' (वा० ३।२।३८) ॥*॥ डित्त्वाभावे **'प्लवंगमः'** च । **'प्लवंगमश्च** मण्डूके तथा शाखामृगेऽपि च' (इति मेदिनी) (२) ॥*॥ 'अन्येष्वपि–' (वा० ३।३।४८) इति डः । **'प्लवगः** कपिभेकयोः । अर्कसूते' इति हैमः ॥ (३) ॥*॥ शाखाचारी मृगः पशुः । शाकपार्थिवादिः (वा० २।१।७८) ॥ (४) ॥*॥ वलीयुक्तं मुखमस्य । वली मुखेऽस्य—इति वा ॥ (५) ॥*॥ मर्कति । 'मर्क' धातुर्ग्रहणे । 'शकादिभ्योऽटन्' (उ० ४।८१) मुकुटस्तु—मर्कः सौत्रादूत्यर्थाद्धुरादिखाद्विकल्पितणिचः 'शकादिभ्योऽटन्'—इत्याह । तच्चिन्त्यम् । मर्केश्चौरादिखाभावात् । यदपि—म्रियते । 'जटमर्कटौ' इति मृडोऽटन्ककारश्चान्तादेशः—इत्युक्तम् । तदपि निर्मूलत्वादुपेक्ष्यम् ॥ (६) ॥*॥ वने भवं फलादि । अण् (४।३।५३) वानं राति । **'रा आदाने'** (अ० प० अ०) 'आतोऽनुप–' (३।२।३) इति कः । वानम् । **'वा** गत्यादौ' (अ० प० से०) । संपदादि क्विप् (वा० ३।३।१०८) । विगमनेऽपि नृणाति बालकम् । **'नॄ** नये' (क्या० प० से०) अच् (३।१।१३४) । वा किंचित् नरो वा ॥ (७) ॥*॥ **'की'** इति शब्दमीष्टे । **'ईश ऐश्वर्ये'** (अ० आ० से०) 'मूलविभुजा–' (वा० ३।२।१५) इति कः । यद्वा कस्य वायोरपत्यम् । 'अत इञ्' (४।१।९५) । किर्हनुमान् ईशो यस्य ॥ (८) ॥*॥ वनमोकोऽस्य ॥ (९) ॥*॥ नव **'वानरस्य'** ॥

अथ भल्लुके ॥ ३ ॥

ऋक्षाच्छभल्लभालूकाः

अथेति ॥ भल्लते । 'भल्ल हिंसायाम्' (भ्वा० आ० से०) । बाहुलकादुः । 'संज्ञायां कन्' (५।३।७५) । यत्तु मुकुटेन 'यूकादयश्च' इति सूत्रमुक्तम् । तदुज्ज्वलदत्तादौ न दृश्यते । —भल्लति—इत्युक्तिः स्वामिमुकुटयोश्चिन्त्या ॥*॥ उल्कादित्वात् (उ० ४।४१) दीर्घमध्योऽपि । **'भल्लूको** भल्लुको भल्ल इत्युल्कादयश्च सः' इति पुरुषोत्तमः ॥*॥ प्रज्ञाद्यणि (५।४।३८) **'भाल्लूकः' 'भाल्लुकः'** च ॥ (१) ॥*॥ ऋक्ष्णोति । 'ऋक्ष हिंसायाम्' (स्वा० प० से०) । अच् (३।१।१३४) । **'ऋक्षः** पर्वतभेदे स्याद्भल्लूके शोणके पुमान् । कृतवेधनेऽन्यलिङ्गं नक्षत्रे च नपुंसकम्' (इति मेदिनी) । —ऋक्षति—इति स्वामी चिन्त्यः । ऋक्षेः सौवादिकत्वात् ॥ (२) ॥*॥ अच्छ आभिमुख्येन भल्लते । अच् (३।१।१३४ । —भल्लति—इत्युक्तिः स्वामिमुकुटयोश्चिन्त्या ॥*॥ संघातविगृहीतमिदं नाम । **'अच्छः** स्फटिकभल्लूकनिर्मलेष्वच्छमव्ययम् । आभिमुख्ये' (इति मेदिनी) । (**'भल्लः** स्यात् पुंसि भल्लूके

१—'दधति कुहरभाजां यत्र भल्लूकयूनाम्' इति प्रयोगात्—इति स्वामिमुकुटौ । २—'अच्छभल्लपरिषद्विहरन्ती' इत्यभिनन्दः—इति मुकुटः ।

शस्त्रभेदे तु न द्वयोः । भल्लातक्यां स्त्रियां **भल्ली**' इति मेदिनी ॥ (३) ॥*॥ भालयते । 'भल आभण्डने' चुरादिराकुसीयः ।—भालयति—इति मुकुटश्चिन्त्यः ॥ (४) ॥*॥ चत्वारि **'भालु'** इति ख्यातस्य ॥

गण्डके खड्गखड्गिनौ ।

गण्डेति ॥ गच्छति । 'गम्लृ गतौ' (भ्वा० प० अ०) । 'अमन्ताङ्डः' (उ० १।११४) । स्वार्थे कन् (५।३।७५) । यद्वा गण्डति संहतो भवति । 'गडि वदनैकदेशे' (भ्वा० प० से०) ण्वुल् (३।१।१३३) **'गण्डकः** पुंसि खड्गे स्यात् संख्याविद्याप्रभेदयोः । अवच्छेदेऽन्तराये च **गण्डकी** सरिदन्तरे' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ खडति । 'खड भेदने' (चु० प० से०) । 'छापूखडिभ्यः कित्' (उ० १।१२४) इति गन् । **'खड्गो** गण्डकशृङ्गासिबुद्धभेदेषु गण्डके' (इति विश्वमेदिन्यौ) । (२) ॥*॥ खड्गः **शृङ्गमस्त्यस्य** । इनिः (५।२।११५) । **'खड्गी** ना गण्डके मद्गुघोषे खड्गधरे त्रिषु (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'गंडा'** इति ख्यातस्य ॥

लुलापो महिषो वाहद्विषत्कासरसैरिभाः ॥ ४ ॥

लुलेति ॥ लुडति पङ्के । 'लुड संश्लेषे' (तु० प० से०) । प्रोति । 'आप्लृ व्याप्तौ' **'इगुपध–'** (३।१।१३५) इति कः । डलयोरेकत्वम् । आ (स्वा० प० अ०) । अच् (३।१।१३४) । लुलश्चासावापश्च । यद्वा । लुड्यन्ते । 'लुड विलोडने' ( ) भिदाद्यङ् (३।३।१०४) । लुला विलोडिता आपो येन । 'लुल विमर्दने' इति सौत्रो धातुर्वा ॥*॥ (**'लुलायः**[1] इति) अन्तस्थयकारान्तपाठे बाहुलकादायङ्प्रत्ययः ।—'लुलिकुलिकषिभ्य आयः'—इति मुकुटलिखितसूत्रमुज्ज्वलदत्तादिषु न पश्यामः । यद्वा अयते । 'अय गतौ' (भ्वा० आ० से०) । अच् (३।१।१३४) । लुलश्चासावयश्च ॥ (१) ॥*॥ महति, मह्यते, वा । 'मह पूजायाम्' (भ्वा० प० से०) । 'अविमह्योष्टिषच्' (उ० १।४५) । यद्वा मंहते । 'महिङ् वृद्धौ' (भ्वा० आ० से०) । आगमशासनस्यानित्यत्वान्न नुम् । 'टिड्ढा–' (४।१।१५) इति ङीप् ॥ (२) ॥*॥ वाहानां द्विषन् । वाहेषु द्विषन् वा । 'सप्तमी' (२।१।४०) इति योगविभागात् समासः ॥ (३) ॥*॥ के जले आसरति । 'सृ गतौ' (भ्वा० आ० अ०) । अच् (३।१।१३४) । यद्वा ईषत् सरति । स्थूलकायत्वात् । 'ईषदर्थे च' (६।३।१०५) इति कोः कादेशः ॥ (४) ॥*॥ सीरोऽस्त्येषाम् । इनिः (५।२।११५) । सीरिणां कर्षकाणामिभ इव । शकन्ध्वादिः (वा० ६।१।९४) । प्रज्ञाद्यण् (५।४।३८) । यद्वा **'सीरोऽर्कहलयोः** पुंसि' (इति मेदिनी) । सीरस्य सूर्यस्य इभ इव । पुत्रवाहनत्वात् । पूर्ववत् ॥ (५) ॥*॥ पञ्च **'महिषस्य'** ॥

स्त्रियां शिवा भूरिमायगोमायुमृगधूर्तकाः ।
सृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः ॥ ५ ॥

स्त्रियामिति ॥ शिवः शिवा वा देवताऽस्त्यस्याः । अर्शआद्यच् (५।२।१२७) । शकुनावेदकत्वात् । **'शिवः किलः शिवा** क्रोष्टा भवेदामलकी **शिवा'** इति शाश्वताच्छृगालेऽपि स्त्रीलिङ्गः । चतुष्पदां द्विलिङ्गता वक्ष्यते । तदपवादोऽयम् ॥ (१) ॥*॥ भूरयो माया यस्य ॥ (२) ॥*॥ गां विकृतां वाचं मिनोति । 'डुमिञ् प्रक्षेपणे' (स्वा० उ० से०) । 'कृवापा–' (उ० १।१) इत्युण् ॥ (३) ॥*॥ मृगेषु धूर्त इव 'संज्ञायां कन्' (५।३।७५) ॥ (४) ॥*॥ सृजति मायाम् । 'सृज विसर्गे' (तु० प० अ०) । बाहुलकात् कालन् । न्यङ्क्वादिः (७।३।५३) । असृग् आलाति वा । कः (३।२।३) । पृषोदरादिः (६।३।१०९) ॥*॥ 'तालव्या अपि दन्त्याश्च शम्बशम्बरशूकराः । रशनापि च जिह्वायां **शृगालः** कलशोऽपि च' इति शभेदः । शृङ्गं न लाति । पूर्ववत् । **'शृगालो** वञ्चके दैत्ये **शृगालं** डमरे विदुः' इति विश्वः ॥ (५) ॥*॥ वञ्चयते 'वञ्चु प्रलम्भने' (चु० आ० से०) । ण्वुल् (३।१।१३३) ।—वञ्चयति—इति मुकुटोक्तिश्चिन्त्या । आकुसीयस्य वञ्चेरात्मनेपदित्वात् । **'वञ्चकस्तु** खले धूर्ते गृहबभ्रौ च जम्बुके' (इति मेदिनी) ॥ (६) ॥*॥ क्रोशति । 'क्रुश आह्वाने' (भ्वा० प० से०) । 'सितनि–' (उ० १।६९) इति तुन् । 'तृज्वत् क्रोष्टुः' (७।१।९५) ॥ (७) ॥*॥ 'फे' इत्यव्यक्तं रौति । मितद्वादित्वात् (वा० ३।२।१८०) डुः ॥ (८) ॥*॥ 'फे' इत्यव्यक्तो रवोऽस्य । 'गुहारूपं वृषमेरुः फेरवस्तारवः शिवा । सूकरोऽतिरुजः फेरुः श्वभीरुर्मण्डलाहितः' इति साहसाङ्कः ॥ (९) ॥*॥ जमति । 'जमु अदने' (भ्वा० प० से०) । मृगय्वादिः (उ० १।३७) ।—मितद्वादित्वात् (वा० ३।२।१८०) डुः, वुक्च—इति मुकुटश्चिन्त्यः । थिलोपप्रसङ्गात् । वुकोऽप्रसङ्गाच्च ॥*॥ उलूकादित्वात् (उ० ४।४१) जम्बूकश्च । 'खरोष्ट्रकपिजम्बूकवायसाजम्बरो यमः' इति वाचस्पतिः ॥ (१०) ॥*॥ दश **'जम्बुकस्य'** ॥

ओतुर्विडालो मार्जारो वृषदंशक आखुभुक् ।

ओतुरिति ॥ अवति विष्ठाम्, आखुभ्यो गृहम्, वा । 'अव रक्षणादौ' (भ्वा० प० से०) 'सितनि–' (उ० १।६९) इति तुन् । 'ज्वरत्वर–' (६।४।२०) इत्यूठौ । दीर्घः (६।१।१०१) गुणः (७।३।८४) ॥ (१) ॥*॥ वेडति । विड्यते, वा । 'विड आक्रोशे' (भ्वा०) । 'तमिविशिविडि' (उ० १।११८) इति कालन् । **'विडालो** नेत्रपिण्डे स्याद्वृषदंशके पुमान्' (इति मेदिनी) ॥ (२) ॥*॥ मार्ष्टि मुखम् । 'मृजू शुद्धौ' (अ० प० से०) । 'कञिमृजिभ्यां चित्' (उ० ३।

---

१ तथा च प्रयोगो दृश्यते 'खुरविधुतधरित्रीचित्रकायो लुलायः' इति—इति मुकुटः ॥

१३७) इत्यारन् । 'मृजेर्वृद्धिः' (७।२।११४) । **'मार्जार ओतौ खड्गांशे'** (इति मेदिनी) ॥ (३) ॥*॥ वृषान् मूषकान् दशति । 'दंश दशने' (भ्वा० प० अ०) । 'कर्मण्यण्' (३।२।१) स्वार्थे कन् (५।३।७५) ॥ (४) ॥*॥ आखून् भुङ्क्ते । आखुभ्यो भुनक्ति वा । 'भुज पालनाभ्यवहारयोः' (रु० प० अ०) । क्विप् (३।२।१७८) ॥ (५) ॥*॥ पञ्च **'मार्जारस्य'** ॥

त्रयो गौधारगौधेरगौधेया गोधिकात्मजे ॥ ६ ॥

त्रेति ॥ गोधाया अपत्यम् । 'गोधाया ढक्' (४।१।१२९) ॥ (१) ॥*॥ 'आरगुदीचाम्' (४।१।१३०) ॥ (२) ॥*॥ शुभ्रादित्वात् (४।१।१२३) ढक् ॥ (३) ॥*॥ त्रीणि सर्पाङ्गोधायां जातस्य **'चन्दनगोहा'** इति ख्यातस्य ॥

श्वाविच्छल्यः

श्वेति ॥ श्वानं विध्यति । 'व्यध ताडने' (दि० प० अ०) क्विप् (३।२।१७८) । 'नहिवृति–' (६।३।११६) इति दीर्घः ॥ (१) ॥*॥ शलति । 'शल चलने' (भ्वा० प० से०) । अभ्र्यादित्वात् (उ० ४।११२) यः । **'शल्यं** तु न स्त्रियां शङ्कौ क्लीबं क्ष्वेडेषुतोमरे । मदनद्रुश्वाविधोर्ना' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'शल्यस्य' 'सेह'** इति ख्यातस्य ॥

तल्लोम्नि शलली शललं शलम् ।

तदिति ॥ तस्य श्वाविधो लोमनि । शलति । वृषादित्वात् (उ० १।१०६) कलच् । गौरादित्वात् (४।१।४१) जातित्वात् (४।१।६४) वा ङीष् स्त्रियाम् ॥ (१) ॥*॥ स्त्रीत्वाविवक्षायां शललम् । ('तच्छलाकायां **शललं** शलमित्यपि' इति हैमनाममाला) । 'शललस्तु नृशण्ढयोः' इत्यमरमाला ॥ (२) ॥*॥ पचाद्यचि । **'शलं** तु शल्लकीलोम्नि **शलो** भृङ्गे गणे विधौ' (इति विश्वः) ॥ (३) ॥*॥ त्रीणि **'शल्यरोम्णाम्'** ॥

वातप्रमीर्वातमृगः

वातेति ॥ वातं प्रमिमीते—वाताभिमुखधावनात् । 'वातप्रमीः' (४।१) इत्युणादिसूत्रेण माङ ईप्रत्ययः कित् । 'वातप्रमीर्वातमृगः' इति पुंस्काण्डेऽमरमाला । 'योषिति वातप्रमीः **समीरमृगः**' इति बोपालितात् स्त्रीत्वमप्यस्य—'–कृदिकारात्' (ग० ४।१।४५) इति वा ङीष्—इत्येके । अन्ये तु–कारग्रहणस्य तपरार्थत्वाद्दीर्घान् ङीष् न—इत्याहुः ॥ (१) ॥*॥ वात इव वातस्य वा मृगः ॥ (२) ॥*॥ द्वे **'मृगभेदस्य'** ॥

कोक ईहामृगो वृकः ॥ ७ ॥

कोक इति ॥ कोकते । 'कुक आदाने' (भ्वा० आ० से०) । अच् (३।१।१३४) ॥ (१) ॥*॥ ईहा मृगेष्वस्य । ईहां मृगयते वा । 'कर्मण्यण्' (३।२।१) ।—मृगयति—इति मुकुटश्चिन्त्यः । 'मृग अन्वेषणे' इत्यस्मात्मनेपदित्वात् । ईहाप्रधानो मृगो वा । शाकपार्थिवादिः (वा० २।१।७८) । **'ईहामृगस्तु** पुंसि स्यात् कोकरूपकभेदयोः' (इति मेदिनी) ॥ (२) ॥*॥ वर्कते । 'वृक आदाने' (भ्वा० आ० से०) । 'इगुपध–' (३।१।१३५) इति कः । यद्वा वृणोति । 'वृञ् वरणे' (स्वा० उ० से०) । 'सृवृशुषिमुषिभ्यः कक्' (उ० ३।४१) ॥ (३) ॥*॥ त्रीणि **'वृकस्य' 'विग'** इति ख्यातस्य ॥

मृगे कुरङ्गवातायुहरिणाजिनयोनयः ।

मृग इति ॥ मृग्यते व्याधैः । 'मृग अन्वेषणे' (चु० आ० से०) घञ् (३।३।१९) ।—'घञर्थे कः' (वा० ३।३।५८)—इति मुकुटः । तन्न । परिगणनात् । घञापि रूपसिद्धेः । अदन्तत्वाद्गुणाप्रसङ्गात् । 'मृगः पशौ कुरङ्गे च करिनक्षत्रभेदयोः । अन्वेषणायां याच्ञायां **मृगी** तु वनितान्तरे' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ कौ रङ्गति । **'रगि** गतौ' (भ्वा० प० से०) । अच् (५।२।१२७) । कौ रङ्गोऽस्त्यस्य वा ॥ (२) ॥*॥ वातमयते । 'अय गतौ' (भ्वा० आ० से०) । बाहुलकादुण् ॥*॥ **'वानायुः'** इत्येके । वनभवमयते ॥ (३) ॥*॥ हरति मनः, ह्रियते गीतेन वा । 'इयास्त्याहृञ्विभ्य इनच्' (उ० १।४६) । **'हरिणः** पुंसि सारङ्गे विशदे त्वभिधेयवत् । **हरिणी** हरितायां च नारीभिद्वृत्तभेदयोः । सुवर्णप्रतिमायां च' (इति मेदिनी) ॥ (४) ॥*॥ अजिनस्य योनिः ॥*॥ 'विश्वाची चारुलोचनः' इति रभसः । पञ्च **'हरिणस्य'** ॥

ऐणेयमेण्याश्चर्माद्यम्

ऐणेयमिति ॥ मृग्याश्चर्मास्थिमांसादि । एण्या विकारोऽवयवो वा । 'एण्या ढञ्' (४।३।१५९) ॥ (१) ॥*॥ (एकम्) **'हरिणाजिनस्य'** ॥

एणस्यैणम्

एणेति ॥ एणस्य मृगस्य विकारोऽवयवो वा । 'प्राणिरजतादिभ्योऽञ्' (४।३।१५४) ॥ (१) ॥*॥ (एकम्) ॥

उभे त्रिषु ॥ ८ ॥

उभे इति ॥ उभे ऐणेयैणे ॥

कदली कन्दली चीनश्चमूरुप्रियकावपि ।
समूरुश्चेति हरिणा अमी अजिनयोनयः ॥ ९ ॥

केति ॥ षडेते हरिणभेदा अजिनयोनयः स्युः । के दलति । 'दल विशरणे' (भ्वा० प० से०) । अच् (४।१।१३४) ।—'कन्देर्नलोपश्च' इत्यरन्–इति मुकुटस्तु चिन्त्यः । उज्ज्वलदत्तादिधृक्तसूत्रदर्शनात् । ङीष् (४।१।६३) । **'कदली** हरिणान्तरे । रम्भायां वैजयन्त्यां च' इति (लान्तेषु) हैमः । 'रम्भावृक्षे च **कदली** पताकामृगभेदयोः' (इति लान्तेषु मेदिनी) । **'कदलं** त्रिषु' इत्यमरमाला ॥ (१) ॥*॥ कन्दे सस्यमूले लीयते । 'लीङ् श्लेषणे' (दि० आ० अ०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । यद्वा कन्दति । 'कदि आह्वाने' (भ्वा० प० से०) । वृषादित्वात् (उ० १।१०६)

कलच् । गौरादिः (४।१।४१) । (**'कन्दलं** त्रिषु कर्पालेऽप्यु-परागे नवाङ्कुरे') । 'कलध्वानौ **कन्दली** तु मृगगुल्मप्रभेदयोः' इति लान्तेषु मेदिनी) । अत एव—इन्नन्तावेतौ—इति स्वामी चिन्त्यः ॥ (१) ॥*॥ चिनोति । 'चिञ् चयने' (स्वा० उ० अ०) । बाहुलकाद् नक् दीर्घश्च । **'चीनो** देशांशुक-व्रीहिभेदे तन्तौ मृगान्तरे' (इति मेदिनी) ॥ (१) ॥*॥ चमति । 'चमु अदने' (भ्वा० प० से०) खर्जा-दित्वात् (उ० ४।९०) ऊरः । पृषोदरादित्वात् (६।३।१०९) अत उत् । यद्वा चमूः चम्वां वा ऊरुर्यस्य ॥ (१) ॥*॥ प्रीणाति । प्रीयते वा । 'प्रीञ् तर्पणे' (क्या० उ० अ०) । 'प्रीङ् प्रीणने' (दि० आ० अ०) वा । 'इगुपध-' (३।१।१३५) इति कः । स्वार्थे कन् (५।३।७५) ॥ (१) ॥*॥ शोभनावूरू यस्य ॥ (१) ॥*॥ **'अजिनजातीयमृगाणाम्'** पृथक् ॥

कृष्णसाररुरुन्यङ्कुरङ्कुशंवररौहिषाः ।
गोकर्णपृषतैणर्श्यरोहिताश्चमरो मृगाः ॥ १० ॥

कृष्णेति ॥ कृष्णेन सारः शबलः । 'तृतीया-' (२।१।३०) इति समासः । **'कृष्णसारः** शिंशपायां मृगभेदे सु-हीतरौ' इति हैमः ॥*॥ (**'कृष्णशारः'** इति) तालव्यपाठे । कृष्णश्चासौ शारश्च । 'वर्णो वर्णेन' (२।१।७८) इति समासः । **'शारः** शबलवातयोः' इति तालव्यादौ रभसः ॥ (१) ॥*॥ रौति । 'रु शब्दे' (अ० प० से०) । 'जन्वादयश्च' (उ० ४।१०२) इति साधुः । **'रुरुर्दैत्ये** मृगेऽपि च' इति हैमः ॥ (१) ॥*॥ नितरामञ्चति । 'नावञ्चेः' (उ० १।१७) इति कुः । म्यङ्क्वादित्वात् (७।३।५३) कुत्वम् । **'न्यङ्कुर्मृगे** मुनौ' इति हेमचन्द्रः ॥ (१) ॥*॥ रमते रज्यते वा । मृगय्वादित्वात् (उ० १।३७) साधुः । मुकुटस्तु—रङ्कति गच्छति—इति व्याख्यत् । तन्न । रङ्किधातोर्धातुपाठेऽदर्शनात् ॥ (१) ॥*॥ शं वृणोति । 'वृञ् वरणे' (स्वा० उ० से०) । 'शमि धातोः संज्ञायाम्' (३।२।१४) इत्यच् । **'शंवरो** दानवान्तरे । मत्स्यैणगिरिभेदेषु **शंवरी** पुनरोषधौ' इति हैमः ॥ (१) ॥*॥ रौहिषं तृणभेदमत्ति । 'शेषे' (४।२।९२) इत्यण् । '[1]**रौहिषं** कत्तृणे क्लीबं पुंसि स्याद्धरिणान्तरे' (इति मेदिनी) ॥ (१) ॥*॥ गोरिव कर्णावस्य । **'गोकर्णोऽश्वतरे** सर्पे सारङ्गे च गणान्तरे । अङ्गुष्ठानामिकोन्माने **गोकर्णी** भूविंकौषधौ' इति मेदिनी ॥ (१) ॥*॥ पृषताः सन्त्यस्य । अर्शआद्यच् (५।२।१२७) यद्वा पर्षति । 'पृषु सेचने' (भ्वा० प० से०) । 'पृषिरञ्जिभ्यां कित्' (उ० ३।१११) इत्यतच् । 'मृगे विन्दुः पृषंश्चैव पृषतश्च प्रकीर्तितः' इति व्याडिः । ('पृषतवत् **पृष-न्मृगे** । विन्दौ' इति हैमः) । **'पृषत**स्तु मृगे बिन्दौ खरोहिते । श्वेतबिन्दुयुतेऽपि स्यात्' इति हेमचन्द्रः ॥ (१) ॥*॥ एति । बाहुलकाण्णः ॥ (१) ॥*॥ ऋच्छति । इयर्ति वा बाहुलकात् श्यन् ॥*॥ (**ऋष्यः**) मूर्धन्यान्तोऽपि ऋषति । 'ऋषी गतौ' (तु० प० से०) अङ्यादित्वात् (उ० ४।११२) साधुः ॥*॥ 'रिष्यः' अपि । रिष्यते । 'रिष हिंसायाम्' (दि० प० से०) । अङ्यादिः (उ० ४।११२) । 'एणः **कुरङ्गे मारिष्यः** स्याद्-श्यश्चारुलोचनः' इति त्रिकाण्डशेषः ॥ (१) ॥*॥ रोहति । 'रुह बीजजन्मनि प्रादुर्भावे च' (भ्वा० प० अ०) । 'रुहे रश्च लो वा' (उ० ३।९४) इतीतच् ॥ (१) ॥*॥ चमति, चम्यते, वा । 'चमु अदने' (भ्वा० प० से०) । 'अर्तिकमिभ्रमिचमि-' (उ० ३।१३२) इत्यमरः । **'चमरं** चामरे स्त्री तु मञ्जरीमृगभेदयोः' (इति मेदिनी) ॥ (१) ॥*॥ एते द्वादश **'मृगभेदाः'** ॥

गन्धर्वः शरभो रामः सृमरो गवयः शशः ।
इत्यादयो मृगेन्द्राद्या गवाद्याः पशुजातयः ॥ ११ ॥

गन्धेति ॥ गन्धयति, गन्ध्यते, वा । 'गन्ध अर्दने' चुरादिः । अच् (३।१।१३४) । घञ् (३।३।१९) वा । अर्बति । 'अर्ब गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) । गन्धश्चासावर्बश्च शकन्ध्वादिः (वा० ६।१।९४) यद्वा गन्धे अर्बो बोधोऽस्य । **'गन्धर्वः** पशुभेदे पुंस्कोकिलतुरंगयोः । अन्तराभवसत्त्वे च गायने खेचरेऽपि च' इति (स्वर्गान्ते) विश्वमेदिन्यौ ॥ (१) ॥*॥ शृणाति । 'शॄ हिंसायाम्' (क्या० प० से०) । 'कृशृशलिकलिगर्दिभ्योऽभच्' (उ० ३।१२२) । 'अष्टापदे च करभे **शरभः** स्यान्मृगान्तरे' इति तालव्यादौ रभसः । **'शरभस्तु** पशोर्भिदि । करभे वानरभिदि' (इति मेदिनी) ॥ (१) ॥*॥ **रमते** अन्तर्भावितण्यर्थो वा । 'ज्व-लिति-' (३।१।१४०) इति णः । रमन्तेऽस्मिन्ननेन वा । 'ह-लश्च' (३।३।१२१) इति घञ् । **'रामा** योषाहिङ्गुलिन्योः क्लीबं वास्तुककुष्ठयोः । ना राघवे च वरुणे रैणुकेये हलायुधे । हये च पशुभेदे च त्रिषु चारौ सितेऽसिते' (इति मेदिनी) ॥ (१) ॥*॥ सरणशीलः । 'सृ गतौ' (भ्वा० प० अ०) । 'सृघस्यदः क्मरच्' (३।२।१६०) ॥ (१) ॥*॥ गवते 'गुङ् शब्दे' (भ्वा० आ० अ०) । बाहुलकादयः । यद्वा गवनम् । 'ऋदोरप्' (३।३।५७) गवं गवेन वा याति । मूलविभुजा-दिकः (वा० ३।२।५) ॥ (१) ॥*॥ शशति । 'शश प्लुतगतौ' (भ्वा० प० से०) अच् (३।१।१३४) ॥ (१) ॥*॥ इत्यादयो येऽत्रोक्ताः, ये च पूर्वोक्ताः सिंहादयः, वक्ष्यमाणाश्च ये गोमे-षहस्त्यश्वादयः, सर्वे ते पशुजातयः पशुशब्दवाच्याः । पश्यति सर्वमविशेषेण । 'दृशिर् प्रेक्षणे' (भ्वा० प० अ०) ।

१—हैमे तु 'कलापे' इति लिखितम् । 'समूहे' इति व्याख्यातमनेकार्थकैरवाकरकौमुद्याम् । २ रौहिद्र हलन्तोऽपि 'स एव रौहिषां मध्ये चरति' इति भवभूतिः । 'रुणद्धि कश्चित् क्रमे सुप्तरौहिषी' इत्यभिनन्दः—इति मुकुटः ॥

१—हैमसटीकपुस्तके तु नोपलभ्यते ॥

'अर्जिदृशि–'(उ० १।२७) इत्युः पशिरादेशश्च । यत्तु मुकुटः–पशेः सौत्रधातोः 'अपष्ट्रादयः इति कुः' इति सुभूतिः—इत्याह । तदुक्तसूत्रास्मरणमूलकम् ।—पाश्यन्ते पाशैः—इति स्वाम्यप्येवम् । **'मृगभेदानाम्'** पृथक् ॥

उन्दुरुर्मूषिकोऽप्याखुः

उन्दिति ॥ उनत्ति । 'उन्दी क्लेदने' (रु० प० से०) । बाहुलकादुरुः । **'कन्दुरुन्दुरुरुन्दुरः'** इति शब्दार्णवः ॥ (१) ॥*॥ मुष्णाति । 'मुष स्तेये' (क्र्या० प० से०) । 'मुष्णातेर्दीर्घश्च' (उ० २।४२) इति किकन् ॥*॥ 'मूष स्तेये' (भ्वा० प० से०) दीर्घोपधोऽस्ति । मूषति । ण्वुल् (३।१।१३३) । **'भद्रमूषिक आसन्दी** कुन्दुरुन्दुरुरुन्दुरः । **मूषको वज्रदशनः क्रमः काण्डो बिलेशयः'** इति वाचस्पतिः ॥ (२) ॥*॥ आ खनति । 'खनु अवदारणे' (भ्वा० उ० से०) । 'आङ्परयोः खनिशृभ्यां डिच्च' (उ० १।३३) इत्युः । मुकुटस्तु—'आङि खनिवद्योर्नलोपश्च' इति कुर्नलोपश्च । बाहुलकादलोपः—इति सूत्रमुपन्यास्थत् । तच्चिन्त्यम् । उज्ज्वलदत्तादिविरोधात् ॥ (३) ॥*॥ त्रीणि **'मूषिकस्य'** ॥

गिरिका बालमूषिका ।

गिरीति ॥ गिरति 'कृगृपृकुटि–' (उ० ४।१४३) इति इः किच्च । 'ऋत इत्–'(७।१।१००) संज्ञायां कन् (५।३।७५) ॥ (१) ॥*॥ क्षुद्रत्वात् बाला चासौ मूषिका च । **'खर्वा-खुर्बालमूषिका'** इति दुर्गः ॥ (२) ॥*॥ द्वे **'स्वल्पमूषकजातेः'** ॥

सरटः कृकलासः स्यात्

सरेति ॥ सरति । 'सृ गतौ' (भ्वा० प० अ०) । 'शकादिभ्योऽटन्' (उ० ४।८१) ॥ (१) ॥*॥ कृकं शिरो ग्रीवां कण्ठं च लासयति चालयति । 'लस शिल्पयोगे' चुरादिः 'कर्मण्यण्' (३।२।१) ॥ (२) ॥*॥ द्वे **'सरटस्य' 'किर्काट'** इति ख्यातस्य ॥

मुसली गृहगोधिका ॥ १२ ॥

मुसेति ॥ मुस्यति संशयम् । 'मुस खण्डने' (दि० प० से०) वृषादित्वात् (उ० १।१०६) कलच् । गौरादित्वान्ङीष् ।–जातौ ङीष् (४।१।६३)—इति मुकुटः । तन्न । स्त्रीविषयत्वात् । **'मुसलं** स्यादयोग्रे च पुंनपुंसकयोः स्त्रियाम् । तालमूल्यामाखुपर्णीगृहगोधिकयोरपि' (इति मेदिनी) ॥*॥ तालव्यमध्या **(मुशली)** इति स्वामी ॥ (१) ॥*॥ अल्पा गोधा 'अल्पे' (५।३।८५) इति कन् । गृहस्य गोधिका । **'ज्येष्ठा** स्त्री **कुड्यमत्स्या च गृहगोधा गृहालिका'** इति साहसाङ्कः ।—**'गृहगोलिका'** इति पाठः सभ्यः इति स्वामी ॥ (२) ॥*॥ द्वे **'गृहगोधायाः' 'विछुत्तिया'** इति ख्यातायाः ॥

लूता स्त्री तन्तुवायोर्णनाभमर्कटकाः समाः ।

लूतेति ॥ लुनाति । 'लूञ् छेदने' (क्र्या० उ० से०) । 'हसिमृगृ–' (उ० ३।८६) इति तन् । संज्ञापूर्वकत्वाद्गुणाभावः ।–बाहुलकात्तन्—इति मुकुटस्त्वेतत्सूत्राज्ञानमूलकः । 'लूता **लूतका'** इत्यमरदत्तः । **'लूता** तु रोगे पिपीलिकोर्णनाभयोः' इति हेमचन्द्रः ॥ (१) ॥*॥ तन्तून् वयति । 'वेञ् तन्तुसंताने' (भ्वा० उ० अ०) । 'ह्रावामश्च' (३।२।२) इत्यण् ॥*॥ **तन्त्रं** तन्तून् वयति **'तन्त्रवायः'** इति स्वामी ॥ (२) ॥*॥ ऊर्णेव तन्तुर्नाभावस्य । 'अच्' (५।४।७५) इति योगविभागादच् । 'ड्यापोः–' (६।३।६३) इति ह्रस्वः ॥*॥ मर्कति । **'मर्क'** सौत्रो धातुर्ग्रहणार्थः । शकादित्वात् (उ० ४।८१) अटन् । **'संज्ञायां कन्'** (५।३।७५) **'अथ मर्कटकः** सस्यभेदे वानरलूतयोः' इति मेदिनी ॥ (४) ॥*॥ चत्वारि **'ऊर्णनाभस्य' 'मकडी'** इति ख्यातस्य ॥

नीलङ्गुस्तु क्रिमिः

नीति ॥ नितरां लङ्गति । 'लगि गतौ' (भ्वा० प० से०) । नीलति वा । 'णील वर्णे' (भ्वा० प० से०) 'खरुशङ्कु–' (उ० १।३६) साधुः । 'नीलङ्गुरपि **नीलाङ्गुः'** इति द्विरूपकोशः । **'नीलङ्गुः** स्यात् कृमौ पुंसि भम्भरालयां तु योषिति' इति मेदिनी ॥ (१) ॥*॥ क्रामति । 'क्रमु पादविक्षेपे' (भ्वा० प० से०) । 'क्रमितमिशस्तम्भामत इत्' (उ० ४।१२२) इति किः ॥*॥ बाहुलकात् संप्रसारणमपि । 'द्रुमामये भवेत्पुंसि कीटे च **क्रिमिवत् कृमिः'** इति रभसः । **'क्रिमिर्ना कृमिवत्** कीटे लाक्षायां कृमिले खरे' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'सुनकीडा'** इति ख्यातस्य ॥

कर्णजलौका शतपद्युभे ॥ १३ ॥

कर्णेति ॥ कर्णस्य जलौकेव ॥*॥ **(कर्णजलौकाः)** सान्ता वा ॥ (१) ॥*॥ शतं पादा यस्याः । 'कुम्भपदीषु च' (५।४।१३९) इति साधुः ॥ (२) ॥*॥ सान्तत्वेऽपि स्त्रीत्वबोधनाय–'उभे' इति । द्वे **'कर्णजलौकायाः' 'गोजर'** इति ख्यातस्य ॥

वृश्चिकः शूककीटः स्यात्

वृश्चीति ॥ वृश्चति । 'ओ व्रश्चू छेदने' (तु० प० से०) 'व्रश्चिकृष्योः किकन्' (उ० २।४०) । 'ग्रहिज्या–' (६।१।१६) इति संप्रसारणम् । **'वृश्चिकस्तु** द्रुणे राशौ शूककीटौषधीभिदोः' (इति मेदिनी) ॥ (१) ॥*॥ शूकयुक्तः कीटः ।

---

१ अत्रि (३।१।१३४) । गौरादित्वात् (४।१।४१) जातित्वात् (४।१।६३) वा ङीषि **'मूषी'** अपि ॥ 'हन्ति कीटविषं सर्वं तथा मूषीविषं च यत्' इति शालिहोत्रे—इति मुकुटः ॥ २—**'मुषली'** मूर्धन्यमध्या च इति वर्णदेशना—इति मुकुटः ॥

१—अनेकार्थकैरवाकरकौमुद्यां तु 'कर्दमे गदे' इति व्याख्यातं मङ्कप्रामाण्येन ॥

शाकपार्थिवादिः (वा० २।१।७८) ॥ (२) ॥*॥ द्वे **'ऊर्णादिभक्षककृमिविशेषस्य'** ॥

अलिद्रुणौ तु वृश्चिके ।

अलीति ॥ अलति–दंशे समर्थो भवति । 'अल भूषणादौ' (भ्वा० प० से०) । 'सर्वधातुभ्य इन्' (उ० ४।११८) । 'भञ्जवृश्चिकयो**रलिः**' इति रभसः ॥*॥ बाहुलकादिण्प्रत्यये दीर्घादिरपि । 'वृश्चिको द्रुण **आलिः** स्यात्' इति बोपालितः ॥*॥ नान्तोऽप्यस्ति अलमर्थोऽस्यास्ति । 'व्रीह्यादित्वात्' (५।२।११६) इनिः । 'अव्ययानां भमात्रे टिलोपः' (वा० ६।४।१४४) इति टिलोपः । **'अथाली** स्याद्वृश्चिके भ्रमरे पुमान्' (इति मेदिनी) ॥ (१) ॥*॥ द्रुणति । 'द्रुण हिंसागतिकौटिल्येषु' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । **'द्रुणं** चापेऽलिनि द्रुणः' (इति मेदिनी) ॥*॥ अत्रि (३।१।१३४) **'द्रोणः'** इत्येके—इति स्वामी ॥ (२) ॥*॥ (३) ॥*॥ त्रीणि 'वृश्चिकस्य' **'वीछी'** इति ख्यातस्य ॥

पारावतः कलरवः कपोतः

पारेति ॥ परं जीवमवति । पराच्छत्रोरहंकाराद्वा ज्ञानोपदेशेन । 'अव रक्षणादौ' (भ्वा० प० से०) । शतृप्रत्ययः (३।२।१२४) । 'द्वितीया' (२।१।२४) 'पञ्चमी' (२।१।३७) इति योगविभागात् समासः । परावतो दत्तात्रेयस्यायं गुरुः । 'तस्येदम्' (४।३।१२०) इत्यण् ॥*॥ 'पारापतः' इति पाठे पारादप्यापतति प्रेम्णा । 'पत्लृ गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) । 'पारावतश्च **छेद्यश्च** कपोतो **रक्तलोचनः** । पारापतः कलरवः' इति रभसः ॥ (१) ॥*॥ कलो रवोऽस्य ॥ (२) ॥*॥ कस्य वायोः पोत इव, को वायुः पोतो नौरिवास्य वा । 'पारावतः **कपोतः** स्यात्**कपोतो** विहगान्तरे' इति विश्वः ॥ (३) ॥*॥ त्रीणि **'पारावतस्य' 'परेवा'** इति ख्यातस्य ॥

अथ शशादनः ॥ १४ ॥

पत्री श्येनः

अथेति ॥ शशमत्ति । 'अद भक्षणे' (अ० प० अ०) । ल्युः (३।१।१३३) । ल्युट् (३।३।११३) वा । युच् (उ० २।७८) । 'श्येने पत्रिशशादनौ' (इत्यमरमाला) ॥ (१) ॥*॥ 'अतिशयितं प्रशस्तं वा पत्रमस्य । 'अतः–' (५।२।११५) इतीनिः । 'श्येनाख्यो विहगः **पत्री पत्रिणौ** शरपक्षिणौ' इति शाश्वतः ॥ (२) ॥*॥ श्यायते । 'श्यैङ् गतौ' (भ्वा० आ० अ०) । 'श्यास्त्याहृञविभ्य इनच्' (उ० २।४६) । ('श्येनः पक्षिणि पाण्डुरे' इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'श्येनस्य' 'बाज'** इति ख्यातस्य ॥

१—भाष्ये तु 'अव्ययानां च' इत्येव वार्तिकमुपलभ्यते ॥

उलूके तु वायसारातिपेचकौ ।

उल्विति ॥ उचति । 'उच समवाये' (तु० प० से०) । 'उलूकादयश्च' (उ० ४।४१) इति साधुः । **'उलूकः** पुंसि काकाराविन्द्रे भारतयोधिनि' (इति मेदिनी) ॥ (१) ॥*॥ वायसस्य काकस्यारातिः ॥ (२) ॥*॥ पचति–संतप्रति, पच्यते वा दुःखेन । 'डुपचष् पाके' (भ्वा० उ० अ०) । 'पचिमच्योरिच्चोपधायाः' (उ० ५।३७) इति वुन् । अत इत्वम् । 'पुगन्त–' (७।३।८६) इति गुणः । यत्तु मुकुटः—कृञादित्वात् (उ० ५।३५) वुन् । पृषोदरादित्वात् (६।३।१०९) अत एत्वम्—इत्याह । तन्न । 'पचिमच्योः' इति सूत्रस्थ सत्त्वात् । पृषोदरादित्वकल्पनाया अन्याय्यत्वात् । 'अथ शकाख्यो दिवान्धो वक्रनासिकः । हरिनेत्रो दिवाभीतो नखाशी पीयुषधरौ । काकभीरुर्नक्तचारी' इति त्रिकाण्डशेषः ॥ (३) ॥*॥ त्रीणि **'घूकस्य'** ॥

व्याघ्राटः स्याद्भरद्वाजः

व्याघ्रेति ॥ व्याघ्रमटति । 'अट गतौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) । व्याघ्र इवाटति वा । अच् (३।१।१३४) (१) ॥*॥ भरन् धारको वाजोऽस्य । यद्वा भरद्वाजस्यापत्यम् । ऋष्यण् (४।१।११४) । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । **'भरद्वाजो** गुरोः पुत्रे व्याघ्रटाख्यविहंगमे' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'भरद्वाजपक्षिणः' 'मर्दुल'** इति ख्यातस्य ॥

खञ्जरीटस्तु खञ्जनः ॥ १५ ॥

खञ्जेति ॥ खञ्ज इव ऋच्छति । 'ऋ गतौ' (भ्वा० प० अ०) । बाहुलकात् कीटन् ॥ (१) ॥*॥ खञ्जति । 'खजि गतिवैकल्ये' (भ्वा० प० से०) । नन्द्यादित्वात् (३।१।१३४) ल्युः । **'खञ्जनः** खञ्जरीटे, स्त्री सर्षप्यां, **खञ्जनं** गतौ' (इति मेदिनी)॥ (२) ॥*॥ द्वे **'खञ्जन'** इति ख्यातस्य ॥

लोहपृष्ठस्तु कङ्कः स्यात्

लोहेति ॥ लोहमिव पृष्ठमस्य ॥ (१) ॥*॥ कङ्कते । 'ककि गतौ' (भ्वा० आ० से०) । अच् (३।१।१३४) । 'कङ्कश्छद्मद्विजे ख्यातो लोहपृष्ठकृतान्तयोः' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'बाणोपयोगिपत्रस्य पक्षिभेदस्य' 'कंकहड'** इति ख्यातस्य ॥

अथ चाषः किकीदिविः ।

अथेति ॥ चाषयति । 'चष हिंसायाम्' (चु० प० से०) स्वार्थण्यन्तः । 'चष भक्षणे' (भ्वा० उ० से०) हेतुमण्यन्तो वा । अच् (३।१।१३४) । 'चासः' अपि । 'इक्षुपक्षिभिदोश्चासः' इति दन्त्यान्तेषु रभसः ॥ (१) ॥*॥ 'किकी' इति दीव्यति वाशते । 'दिवु क्रीडादौ' (दि० प० से०) ।

'कृविघृष्वि–' (उ० ४।५६) इति साधुः । 'किकीदिविश्च चाषः स्यात्' इति रत्नकोषः । 'चाषो दिविः किकिः स्मृतः' इति व्याडिः ॥ (२) ॥*॥ द्वे **'चाषस्य' 'चास'** इति ख्यातस्य ॥

कलिङ्गभृङ्गधूम्याटाः

केति ॥ के मूर्ध्नि लिङ्गं चूडास्य । कलिं कलहं गच्छति वा । 'गमश्च' (३।२।४७) इति खच् । 'खच् डिद्वक्तव्यः' (वा० ३।२।३८) । **'कलिङ्गः** पूतिकरजे धूम्याटे भूम्नि नीवृति । न द्वयोः कौटजफले महिलायां तु योषिति' (इति मेदिनी) ॥ (१) ॥*॥ भृङ्ग इव । कृष्णत्वात् । यद्वा बिभर्ति कुलम् । 'भृञः किन्नुट् च' (उ० १।१२५) इति गन् । **'भृङ्गो** धूम्याटषिङ्गयोः । मधुव्रते भृङ्गराजे पुंसि भृङ्गं गुडत्वचि' (इति मेदिनी) ॥ (२) ॥*॥ धूम्या धूमसमूह इवाटति । अच् (३।१।१३४) ॥ (३) ॥*॥ त्रीणि **'भृङ्गस्य'** ॥

अथ स्याच्छतपत्रकः ॥ १६ ॥

दार्वाघाटः

अथेति ॥ शतं पत्राण्यस्य ॥ (१) ॥*॥ दारु आहन्ति । 'दारावाहनोऽणन्त्यस्य च टः–' (वा० ३।२।४९) । वासार्थं दारु आघाटयति । 'घट संघाते' चुरादिः । अण्[1] (३।२।१) ॥ सुभूतिस्तु चिन्त्यः । घट्टिना विगृहीतत्वात् । **'काष्ठकुट्टः शतच्छदः'** इति त्रिकाण्डशेषः ॥ (२) ॥*॥ द्वे **'काष्ठकुट्टस्य' 'काठकोरा'** इति ख्यातस्य ॥

अथ शारङ्गः स्तोककश्चातकः समाः ।

अथेति ॥ शारयति, शार्यते, वातपादिना । 'शृ हिंसायाम्' (क्या० प० से०) ण्यन्तः । 'तरत्यादिभ्यश्च' (उ० १।१२०) इत्यङ्गच् ।—शारेरङ्गच्—इति मुकुटः । तन्न । उज्ज्वलदत्तादिवृत्तिष्वेतत्सूत्रादर्शनात् । 'शारङ्गश्चातके ख्यातः शबले हरिणेऽपि च' इति तालव्यादावजयः ॥*॥ सरति । 'सृवृजोर्वृद्धिश्च' (उ० १।११२) इत्यङ्गच् ।—'सृ गतौ' (भ्वा० प० अ०) । णिच् (३।१।२६) पूर्ववत् । अण् (३।२।१) वृद्धिश्च—इति मुकुटश्चिन्त्यः । अणोऽप्रसङ्गात् । 'सृवृजोः' इति सिद्धत्वाच्च । णिचः प्रयोजनाभावाच्च । 'चातके हरिणे पुंसि **सारङ्गः** शबले त्रिषु' इति दन्त्यादौ रभसात् । यद्वा सारमङ्गमस्य । शकन्ध्वादिः (वा० ६।१।९४) । **'सारङ्गः** पुंसि हरिणे चातके च मतङ्गजे । शबले त्रिषु' (इति मेदिनी) ॥ (१) ॥*॥ स्तोकं कं जलमस्य । स्तोकं कायति वा । 'कै शब्दे' (भ्वा० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥ (२) ॥*॥ चतति । 'चते याचने' (भ्वा० प० से०) । ण्वुल् (३।१।१३३) (३) ॥*॥ त्रीणि **'चातकपक्षिणः' 'पपिहा'** इति ख्यातस्य ॥

१ 'अण्' इत्यस्य स्थाने 'कर्मण्यण्' इति वा पाठः ।

कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः ॥ १७ ॥

कृकेति ॥ कृकेन गलेन वक्ति । 'वच परिभाषणे' (अ० प० अ०) । 'कृके वचः कुश्च' (उ० १।६) इत्युण् । **'कृकवाकुर्मयूरेऽपि** सरटे चरणायुधे' इति विश्वः ॥ (१) ॥*॥ ताम्रा चूडास्य ॥ (२) ॥*॥ कोकनम् । 'कुक आदाने' (भ्वा० आ० से०) । संपदादिभ्यः क्विप् (वा० ३।३।१०८) । कुटति । 'कुट कौटिल्ये' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । कुत्सा कुटः । 'कर्तृकरणे–' (२।१।३२) इति समासः । कुत्सितः कुटो वा । कोः पृथिव्याः कुटो वा । पृषोदरादिः (६।३।१०९) वा । —कुं पृथ्वीं कुटति । इगुपधत्वात् (३।१।१३५) कः—इति मुकुटः । तन्न । अणस्तदपवादत्वात् । 'अकाराद्विरुपपदात्सोपपदो विप्रतिषेधेन' (३।२।१) इति वार्तिकाद्वा । मूलविभुजादित्वम् (वा० ३।२।५) युक्तम् । **'कुक्कुट्यनृतचर्यायां** पुंसि स्याच्चरणायुधे । निषादशूद्रयोः पुत्रे तृणोल्कायां च कुक्कुभे' इति विश्वमेदिन्यौ ॥ (३) ॥*॥ चरणायुधमस्य ॥ (४) ॥*॥ चत्वारि **'कुक्कुटस्य'** ॥

चटकः कलविङ्कः स्यात्

चटेति ॥ चटति । 'चट भेदने' (भ्वा० प० से०) । कुन् (उ० २।३२) ॥ (१) ॥*॥ कलं वङ्कते । 'वकि गतौ' (भ्वा० आ० से०) । अण् (३।२।१) पृषोदरादिः (६।३।१०९) । **'कलविङ्कः** पुमान् ग्रामचटकेऽपि कलिङ्गके' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'चटकस्य'** ॥

तस्य स्त्री चटका

तस्येति ॥ चटकस्य स्त्रीति स्त्रीत्वविवक्षायां 'पुंयोगात्–' (४।१।४८) इति प्राप्तो ङीप् जातिलक्षणङीष् (४।१।६३) च अजादि (४।१।४) पाठाद्बाध्यते । क्षिपकादित्वात् (७।३।४५) नेत्वम् ॥ (१) ॥*॥ एकम् **'चटकस्त्रियाः'** ॥

तयोः ।

पुमपत्ये चाटकैरः

तयोरिति ॥ चटकायाश्चटकस्य वा पुंमपत्यम् । 'चटकाया ऐरक्' (४।१।१२८) 'चटकादपीति वक्तव्यम्' (४।१।१२८) फलितम् । तयोश्चटकाचटकयोः—इति मुकुटः । तन्न । 'पुमान् स्त्रिया' (१।२।६६) इत्यन्तरङ्गैकशेषप्रवृत्त्या द्वन्द्वासंभवात् ॥ (१) ॥*॥ एकम् **'चटकपुमपत्यस्य'** ॥

स्त्र्यपत्ये चटकैव हि ॥ १८ ॥

स्त्र्येति ॥ स्त्री च तदपत्यं चेति । तस्मिन् । 'स्त्रियामपत्ये लुग्वक्तव्यः' (वा० ४।१।१२८) इत्यैरको लुक् । 'लुक्तद्धितलुकि' (१।२।४९) । पुनष्टाप् (४।१।४) ॥ (१) ॥*॥ **एकम् 'चटकस्त्र्यपत्यस्य'** ॥

कर्करेटुः करेटुः स्यात्

कर्केति ॥ 'कर्क' इति रेटति । 'रेटृ भाषणे' (भ्वा० उ०

से०) । मृगय्वादिः (उ० १।३७) ।—'अपष्ठादयश्च'—इति मुकुटस्तु चिन्त्यः । उज्ज्वलदत्तादिष्वस्य सूत्रस्यादर्शनात् ॥ (१) ॥*॥ के वायौ जले वा रेटति । पूर्ववत् । 'कर्करेटुः करेटुः स्यात् करटुः **कर्कराटुकः**' इति रभसः ॥ (२) ॥*॥ द्वे **'अशुभवादिपक्षिभेदस्य'** ॥

कृकणक्करौ समौ ।

कृकेति ॥ 'कृ' इति कणति । 'कण शब्दे' (भ्वा० प० से०) । अच् (३।१।१३४) । कृकेण कण्ठेन अणति वा । 'अण शब्दे' (भ्वा० प० से०) । अच् (३।१।१३४) । शकन्ध्वादिः (वा० ६।१।९४) ॥ (१) ॥*॥ 'क्रं' इति शब्दकरणशीलः । 'कृञो हेतुताच्छील्य–' (३।२।२०) इति टः ॥ (२) ॥*॥ द्वे **'अशुभपक्षिभेदस्य'** ॥

वनप्रियः परभृतः कोकिलः पिक इत्यपि ॥ १९ ॥

वनेति ॥ वनं प्रियमस्य ॥ (१) ॥*॥ परेण काकेन भृतः ॥ (२) ॥*॥ कोकते । **'कुक आदाने'** (भ्वा० आ० से०) । 'सलिकल्यनि–' (उ० १।५४) इति लच् ।—'अजिरादयश्च' इति किरः—इति मुकुटः । तन्न । किरचि गुणाभावप्रसङ्गात् । कोकतेरजिरादिष्वनन्तर्भावात् उज्ज्वलदत्तादिष्वस्य सूत्रस्यादर्शनाच्च ॥ (३) ॥*॥ अपि कायति । 'आतश्चोपसर्गे' (३।१।१३६) इति कः । 'वष्टि भागुरिः' इत्यलोपः ॥ (४) ॥*॥ चत्वारि **'कोकिलस्य'** ॥

काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः ।
ध्वाङ्क्षात्मघोषपरभृद्बलिभुग्वायसा अपि ॥ २० ॥

काके इति ॥ कायति । 'कै शब्दे' (भ्वा० प० से०) । 'इण्भीका–' (उ० ३।४३) इति कन् । **'काकः** स्याद्वायसे वृक्षप्रभेदे पीठसर्पिणि । शिरोवक्षालने मानप्रभेदद्वीपभेदयोः ॥ **काका** स्यात्काकनासायां काकोलीकाकजङ्घयोः । रक्तिकायां मलट्वां च काकमाच्यां च योषिति ॥ **काकं** सुरतबन्धे स्यात् काकानामपि संहतौ' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ करोति शकुनम् । 'शक्यादिभ्योऽटन्' (उ० ४।८१) । के रटति । 'रट परिभाषणे' (भ्वा० प० से०) । अच् (३।१।१३४) वा । **'करटो** गजगण्डे स्यात्कुसुम्भे निन्द्यजीवने । एकादशाहादिश्राद्धे दुर्दुरूढेऽपि वायसे । (**करटो** वाद्यभेदे') (इति विश्वमेदिन्यौ) ॥ (२) ॥*॥ न रिष्टमस्य । **'अरिष्टो** लशुने निम्बे फेनिले काककङ्कयोः' (इति मेदिनी) ॥ (३) ॥*॥ बलिना पुष्टः ॥ (४) ॥*॥ सकृत् प्रजा यस्य ॥ (५) ॥*॥ ध्वाङ्क्षति । 'ध्वाक्षि घोरवाशिते च' (भ्वा० प० से०) अच् (३।१।१३४) । **'ध्वाङ्क्षः** काके बकेऽर्थिनि । गृहे, **ध्वाङ्क्षी** तु काकोल्याम्' (इति हैमः) ॥ (६) ॥*॥ 'काँ, काँ,' इति शब्दनात् आत्मानं घोषयति । 'घुषिर् विशब्दने' (चु० उ० से०) । अण् (३।२।१) ॥ (७) ॥*॥ परं बिभर्ति । 'डुभृञ्' (जु० उ० से०) । क्विप् (३।२।७५) ॥ (८) ॥*॥ बलिं भुङ्क्ते । 'भुज पालनादौ' (रु० प० अ०) । क्विप् (३।२।७५) ॥ (९) ॥*॥ वयते । 'वय गतौ' (भ्वा० आ० से०) । 'वयश्च' (उ० ३।१२०) इत्यसच् ।—वयति—इति मुकुटश्चिन्त्यः । वयतेरात्मनेपदित्वात् । **'वायसोऽगुरुवृक्षेऽपि** श्रीवासध्वाङ्क्षयोः पुमान्' (इति मेदिनी) ॥ (१०) ॥*॥ दश **'काकस्य'** ॥

द्रोणकाकस्तु काकोलः

द्रोणेति ॥ द्रुणति । 'द्रुण हिंसागतिकौटिल्येषु' (तु० प० से०) अच् (३।१।१३४) । द्रोणाख्यः काकः । **'द्रोणो** ना दग्धकाके स्यादश्वत्थाम्नो गुरावपि' इति रुद्रः । **'द्रोणोऽस्त्रियामाढके** स्यादाढकानां चतुष्टये । पुमान् कृपीपतौ कृष्णकाके, स्त्री नीवृदन्तरे ॥ तथा काष्ठाम्बुवाहिन्यां गवादन्यामपीष्यते' इति मेदिनी ॥ (१) ॥*॥ काकयति । 'कक लौल्ये' (भ्वा० आ० से०) स्वार्थण्यन्तः । बाहुलकादोलच् । **'काकोलं** नरकान्तरे, । ना कुलाले द्रोणकाके, विषभेदे तु न स्त्रियाम्' (इति मेदिनी) ॥ (२) ॥*॥ 'द्रोणकाको **दग्धकाको वृद्धकाको वनाश्रयः**' इति त्रिकाण्डशेषः । द्वे **'डोडकाक'** इति ख्यातस्य ॥

दात्यूहः कालकण्ठकः ।

दात्यूहः कालकण्ठकः ।

दात्यूहः कालकण्ठके । चातकेऽपि' इति हैमः ॥ (१) ॥*॥ काले वर्षाकाले कण्ठो ध्वनिरस्य । **'कण्ठः** स्वरेऽन्तिके गले' इति रुद्रः । कालः कण्ठोऽस्य । कप् (५।४।१५४) **'कालकण्ठनीलकण्ठौ** पीतसारे महेश्वरे । दात्यूहे ग्रामचटके खञ्जरीटे शिखावले' इति हेमचन्द्रः ॥ (२) ॥*॥ द्वे **'दात्यूहस्य'** ॥

आतायिचिल्लौ

आतेति ॥ आतायते तच्छीलः । 'तायृ संतानपालनयोः' (भ्वा० आ० से०) । 'सुप्यजातौ–' (३।२।७८) इति णिनिः । यद्यप्यत्र वृत्तिकारादिभिः—'अनुपसर्गे'—इत्युक्तम् । तथा भाष्ये उपसर्गेऽपि णिनिः स्वीकृतः ॥*॥ स्वामी तु—आतपति—इति विगृह्य **'आतापी'** इति पाठं मन्यते ॥ (१) ॥*॥ चिल्लति । 'चिल्ल शैथिल्ये हावकृतौ च' (भ्वा० प० से०) अच् (३।१।१३४) । **'चिल्लः** खगे स **चुल्लश्च पिल्लु-**

१—गृहं गृहविशेषः । यथाहुः-'ध्वजो धूमश्च सिंहश्च श्वा वृषश्च खरो गजः । ध्वाङ्क्षोऽष्टमस्तु प्राच्याद्या ईशानान्ताः क्रमादमी ॥' इत्यनेकार्थकैरवाकरकौमुदी ।—'ध्वाङ्क्षी काकोलिकायां स्यात्–' इति पाठस्तु मेदिनीस्थः ॥

वत् क्लिन्नलोचने । क्लिन्नाक्षिण' इति हैमः ॥ (२) ॥*॥ द्वे **'चील'** इति ख्यातस्य ॥

दाक्षाय्यगृध्रौ

दाक्षेति ॥ दक्षते । 'दक्ष वृद्धौ शीघ्रार्थे च' (भ्वा० आ० से०)। 'श्रुदक्षिस्पृहिगृहिभ्य आय्यः' (उ० ३।९६) दक्षाय्यस्यायम् । अण् (४।३।१२०) ॥ (१) ॥*॥ गृध्यति । 'गृधु अभिकाङ्क्षायाम्' (दि० प० से०)। 'सुसूधाङ्गृधिभ्यः क्रन्' (उ० २।२४)। **'गृध्रः** खगान्तरे पुंसि वाच्यलिङ्गस्तु लुब्धके' (इति मेदिनी)।—गर्धते—इति मुकुटश्चिन्त्यः । मृधेर्दैवादिकत्वात् ॥ (२) ॥*॥ द्वे **'गृध्रस्य' 'गीध'** इति ख्यातस्य ॥

कीरशुकौ

कीरेति ॥ 'कि' इति ईरयति । **अच्** (३।१।१३४)—इगुपधत्वात् (३।१।१३५) कः—इति मुकुटः । तन्न । णिजन्तविग्रहप्रदर्शनादिगुपधत्वाभावात् । **'कीरः** शुके पुंभूम्नि नीवृति' (इति मेदिनी) ॥ (१) ॥*॥ शोकति । 'शुक गतौ' ( ) । 'इगुपध–' (३।१।१३५) इति कः । यद्वा शोभते । शवति वा । 'शुभ दीप्तौ' (भ्वा० आ० से०)। 'शु गतौ' ( ) वा । 'शुकवल्कोल्काः' (उ० ३।४२) इति साधुः । **'शुको** व्याससुते कीरे रावणस्य तु मन्त्रिणि । शिरीषपादपे पुंसि ग्रन्थिपर्णे नपुंसकम्' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'कीरस्य'** ॥

समौ ॥ २१ ॥

सेति ॥ 'समौ' इति त्रिषु योज्यम् ॥

कुङ्क्रौञ्चः

कुङ्क्रिति ॥ कुञ्चति । 'कुञ्च कौटिल्याल्पीभावयोः' (भ्वा० प० से०)। 'ऋत्विग्दधृक्–' (३।२।५९) इति साधुः ॥ (१) ॥*॥ प्रज्ञाद्यण् (५।४।३८) **'क्रौञ्चो** द्वीपप्रभेदे स्यात् पक्षिपर्वतभेदयोः' (इति मेदिनी)। स्त्रियामजादित्वाट्टाप् ॥*॥ **'कुञ्चः'** इति पाठे पचाद्यच् (३।१।१३४) ॥ (२) ॥*॥ द्वे **'क्रौञ्चस्य' 'करांगुळ'** इति ख्यातस्य ॥

अथ बकः कङ्कः

अथेति ॥ वङ्कते । 'वकि कौटिल्ये गतौ च' (भ्वा० आ० से०)। अच् (३।१।१३४)। आगमशास्त्रस्यानित्यत्वान्न नुम् । वबयोरैक्यम् । यद्वा वाति, वायति, वा । 'वा गत्यादौ' (अ० प० से०) 'ओ वै शोषणे' (भ्वा० प० से०) वा कुन् (उ० २।३२)। 'आतो लोपः–' (६।४।६४) 'व' इति कायति वा । मूलविभुजादिः (वा ३।२।५)। वक्ति वा । अच् (३।१।१४) न्यङ्क्वादिः (७।३।५३)। 'बकस्तु बकपुष्पे स्यात् कङ्के श्रीदे च रक्षसि' (इति मेदिनी) ॥ (१) ॥*॥ 'क' इति शब्दम्, के जले वा ह्वयति । 'ह्वेञ् स्पर्धायां शब्दे च' (भ्वा० उ० अ०) मूलविभुजादित्वात् (वा० ३।२।५) कः ॥ (२) ॥*॥ 'दीर्घजङ्घो निशैडः(तः) स्याद्वकोटः शुक्लवायसः । कङ्केरुर्दीर्घबलिभुक् शिखीचन्द्रविहंगमः' इति त्रिकाण्डशेषः ॥*॥ द्वे **'बकस्य'** ॥

पुष्कराह्वस्तु सारसः ।

पुष्केति ॥ पुष्करं पद्मं तस्याह्वा आह्वा यस्य ॥ (१) ॥*॥ सरसि भवः । 'तत्र भवः' (४।२।५३) इत्यण् । **'सारसः** पक्षिभेदेन्द्वोः क्लीबं तु सरसीरुहे' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'सारसस्य'** ॥

कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामकः ॥ २२ ॥

कोकेति ॥ कोकते । 'कुक आदाने' (भ्वा० आ० से०)। अच् (३।१।१३४)। **'कोकश्चके** वृके ज्येष्ठ्यां खर्जूरीद्रुममेकयोः' (इति विश्वः) ॥ (१) ॥*॥ क्रियते निशया वियोगी ।–घञर्थे कः—इति मुकुटः । तन्न । परिगणनात् । वस्तुतस्तु 'ढकि लोपः' (४।१।१३३) इति वत् 'के कृञादीनाम्' (वा० ६।१।१२) इत्यनेनैव कः द्वित्वं च । चकते । 'चक तृप्तौ' (भ्वा० आ० से०)। रक् (उ० २।१३) वा । **'चक्रः** कोके पुमान्, क्लीबं व्रजे सैन्यरथाङ्गयोः । राष्ट्रे दम्भान्तरे कुम्भकारोपकरणास्त्रयोः । जलावर्तेऽपि' (इति मेदिनी) ॥(२)॥*॥ चक्रशब्देनोच्यते । 'वच भाषणे' (अ०प०अ०)। घञ् (३।३।१९) ॥ (३) ॥*॥ रथाङ्गस्य चक्रस्याह्वयो नाम यस्य ॥ (४) ॥*॥ चत्वारि **'चक्रवाकस्य' 'चकवा'** इति ख्यातस्य ॥

कादम्बः कलहंसः स्यात्

कादेति ॥ कदम्बे समूहे भवः 'तत्र भवः' (४।३।५३) इत्यण् । **'कादम्बः** स्यात् पुमान्पक्षिविशेषे सायकेऽपि च' (इति मेदिनी) ॥ (१) ॥*॥ कलो मधुरवाक् हंसः । **'कलहंसस्तु** कादम्बे राजहंसे नृपोत्तमे' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'कादम्बस्य' 'वतक'** इति ख्यातस्य ॥

उत्क्रोशकुररौ समौ ।

उदिति ॥ उत्क्रोशति । 'क्रुश आह्वाने' (भ्वा०प०से०)। अच् (३।१।१३४) ॥ (१) ॥*॥ कवते । 'कुङ् शब्दे' (भ्वा० आ० अ०) 'कुवः क्वरन्' (उ० ३।१३३)।—कुरति । 'कुर शब्दे' (तु० प० से०)। 'कुर छेदने' (तु० प० से०)। बाहुलकात् अरक्—इति स्वामिमुकुटौ 'कुवः क्वरन्' इति सूत्रास्मरणमूलकौ ज्ञेयौ ॥ (२) ॥*॥ द्वे **'कुररस्य'** ॥

---

१ वस्तुतस्तु भाष्ये परिगणनतायां अनुक्तेरुदाहरणतासंभवेनाकिंचित्करमिदम् । अत एव कैयटेनापि (६।१।१२) उक्तवार्तिकव्याख्यायां 'चक्रः' इत्यत्र 'घञर्थे कः' इत्येवोक्तम् सैन्यपर्यायचक्रशब्दव्याख्यायां स्वयमपि 'घञर्थे कः' इत्युक्त्वात्पूर्वापरविरुद्धं च ॥

हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः ॥ २३ ॥

हंसा इति ॥ हन्ति गच्छति । 'वृतॄवदिहनि–' (उ० ३।६२) इति सः । यद्वा अचि (३।१।१३४) । 'भवेद्वर्णागमाद्धंसः' इति सक् । **'हंसः** स्यान्मानसौकसि । निर्लोभनृपविष्णुकर्परमात्मन्यमत्सरे । योगभेदे मन्त्रभेदे शारीरमरुदन्तरे । तुरंगमप्रभेदे च' (इति मेदिनी) ॥ (१) ॥*॥ श्वेता गरुतोऽस्य ॥ (२) ॥*॥ चक्राण्यङ्गान्यस्य । **'चक्राङ्गो** मानसौकसि । **चक्राङ्गी** कदुरोहिण्याम्' (इति मेदिनी) ॥ (३) ॥*॥ मानसं सर ओकोऽस्य ॥ (४) ॥*॥ चत्वारि **'हंसस्य'** ॥

राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः ।

राजेति ॥ चञ्चुसहितैश्चरणैः । शाकपार्थिवादिः (वा० २।१।७८) । यद्वा चञ्चुभिश्चरणैश्चेति द्वन्द्वः । 'द्वन्द्वश्च प्राणितूर्य–' (२।४।२) इत्येकत्वं तु न भवति । 'मुखनासिका–' (१।१।८) इति 'हस्वदीर्घप्लुतः' (१।२।२७) इति च निर्देशेन तस्यानित्यत्वज्ञापनात् । तैर्लोहितैरुपलक्षिताः । हंसानां राजा । राजदन्तादिः (२।२।३१) । **'राजहंस**स्तु कादम्बे कलहंसे नृपोत्तमे' (इति हैममेदिन्यौ) ॥ (१) ॥*॥ एकम् **'राजहंसस्य'** ॥

मलिनैर्मल्लिकाख्यास्ते

मलीति ॥ किंचिद्भ्रूवर्णैश्चञ्चुचरणैरुपलक्षिताः । 'मल्लिक' इति आख्या येषां ते । मल्लते 'मल्ल धारणे' (भ्वा० आ० से०) । 'सर्वधातुभ्य इन्' (उ० ४।११८) । स्वार्थे कन् (५।३।७५) ।—'अच इः' (उ० ४।१३९) —इति मुकुटः । तन्न । मल्लेर्लान्तत्वात् । **'मल्लिको** हंसभेदे स्यात् तृणशून्येऽपि **मल्लिका'** इति रुद्रः । **'मल्लिको** हंसभिद्यपि । **मल्लिका** तृणशून्येऽपि मीनमृत्पात्रभेदयोः' (इति मेदिनी) ॥*॥–मल्लिकाकारमक्षि यस्य । शुक्लापाङ्गत्वात् (इति **'मल्लिकाक्षः'**)—इति स्वामी । 'बहुव्रीहौ सक्थ्यक्ष्णोः' (५।४।११३) इति षच् ॥ (१) ॥*॥ एकं **'हंसभेदस्य'** ॥

धार्तराष्ट्राः सितेतरैः ॥ २४ ॥

धार्तेति ॥ कृष्णैश्चञ्चुचरणैरुपलक्षिताः । धृतराष्ट्रे भवाः । 'तत्र भवः' (४।३।५३) इत्यण् । **'धृतराष्ट्रः** सुराज्ञि स्यात् पक्षिक्षत्रियभेदयोः' इति रभसः । (**'धृतराष्ट्रः** खगे सर्पे सुराज्ञि क्षत्रियान्तरे । **धृतराष्ट्री** हंसपद्याम्' इति हैमः) ॥ (१) ॥*॥ एकम् **'कृष्णचञ्चुचरणहंसस्य'** ॥

शरारिराटिराडिश्च

शरेति ॥ शरं नीरमृच्छति । शरं हिंसां वा । 'ऋ गतौ' (भ्वा० प० अ०) । 'अच इः' (उ० ४।१३९) । 'गुन्द्रेष्वोर्नो **शरं** नीरे' इति तालव्यादौ रभसः ॥*॥ कपिलिकादित्वात् (वा० ९।२।१८) लत्वे **'शरालिः'** अपि ॥*॥ **'शरातिः'** इति पाठान्तरम् । शरमतति । 'अत सातत्यगमने' (भ्वा० प० से०) । 'अज्यतिभ्यां च' (उ० ४।१३१) इतीण् ॥ (१) ॥*॥ आ अटति । इन् (उ० ४।११८) ॥ (२) ॥*॥ आ अडति 'अड उद्यमने' (भ्वा० प० से०) । इन् (उ० ४।११८) ॥—'अक्ष्यडिभ्यामिण्'—इति मुकुटः । तन्न । उज्ज्वलदत्तादावेतत्सूत्रादर्शनात् ॥ (३) ॥*॥ त्रयोऽपि स्त्रीलिङ्गाः । 'आडिः **शरालिर्वरटी** गन्धोली, वानरी कपी' इति स्त्रीलिङ्गकाण्डे रत्नकोषात् ॥*॥ त्रीणि **'शरार्यायाः' 'आडी'** इति ख्यातायाः ॥

बलाका विसकण्ठिका ।

बलेति ॥ वलते । 'वल संवरणे' (भ्वा० आ० से०) । 'वलाकादयश्च' (उ० ४।१४) इति साधुः । बलेनाकति वा । अच् (३।१।१३४) ॥ (१) ॥*॥ विसवत् कण्ठोऽस्याः ॥ (२) ॥*॥ द्वे **'बकभेदस्य'** ॥

हंसस्य योषिद्वरटा

हंसेति ॥ वृणीते सेवते सरः । 'वृङ् संभक्तौ' (क्या० आ० से०) । 'शकादिभ्योऽटन्' (उ० ४।८१) । **'वरटा,** द्वयोर्वरट्यां, स्त्री हंस्यां तु, तत्पतौ पुमान्' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'हंसस्त्रियाः'** ॥

सारसस्य तुलक्ष्मणा ॥ २५ ॥

सारेति ॥ लक्ष्मीरस्त्यस्याः । 'लक्ष्म्या अच्च' (ग० ५।२।१००) इति नः । **'सारस्यां लक्ष्मणा** ना तु सौमित्रौ श्रीमति त्रिषु' इति रुद्रः । **'लक्ष्मणा** त्वोषधीभेदे सारस्यामपि योषिति । रामभ्रातरि पुंसि स्यात् सश्रीके चाभिधेयवत्' इति मेदिनी ॥*॥ निर्मेकारोऽपि । **'लक्ष्मणश्चैव** सारसे' इत्यमरमाला । **'लक्ष्मणं** नाम्नि चिह्नेऽथ सारस्यां **लक्ष्मणा** क्वचित्' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'सारसस्त्रियाः'** ॥

जतुकोऽजिनपत्रा स्यात्

जत्विति ॥ जत्विव । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् । 'रामठे **जतुकं** चर्मपत्राजतुकृतोः स्त्रियाम्' इति चवर्गतृतीयादौ रभसः ॥ (१) ॥*॥ अजिनमिव पत्रमस्याः ॥ (२) ॥*॥ द्वे **'जतुकायाः' 'चामचिरयि'** इति ख्यातायाः ॥

परोष्णी तैलपायिका ।

पेति ॥ परं शत्रुं उष्णं यस्याः । गौरादिः (४।१।४१) ।–'जातेः' (४।१।६३) 'इति ङीष्–' इति मुकुटः । तन्न । 'स्त्री-

१—तत्तत्सूत्रभाष्यकैयटानालोचनसूचकमेतत् ॥

१—'महापुरुषमिव प्रकटमीनशङ्खलक्षणं सरः' इति कादम्बरीश्लेषश्च—इति मुकुटः ॥ २—'दीर्घमध्या च जतुका निशाशश्वद्व्यापिस्थितघनजतूकापटलकम्' इति पूर्वकविप्रयोगदर्शनात्—इति मुकुटः ॥

ल्लाविष्ठा जातिरियम्' इति स्वयमेव व्याख्यातत्वेन—'अस्त्री-विषयात्–' (४।१।६३) इति ङीषो निषेधात् ॥ (१) ॥*॥ तैलं पिबति । 'पा पाने' (भ्वा० प० अ०) ण्वुल् (३।१।१३३) ॥ (२) ॥*॥ 'तनुकृमिस्त्विन्द्रगोपः, परोष्णी तैलपायिका । तैलाभ्यक्ता खलाधारा हीरा पिप्पलिका स्त्रियाम्' इति रभसः ॥*॥ द्वे मुखविष्ठा **'वागुलिकादिनामिकायाः'** ॥

वर्वणा मक्षिका नीला

वर्वेति ॥ 'वर' इति वणति । 'वण शब्दे' (भ्वा० प० से०) । अच् (३।१।१३४) । यद्वा । बर्बति । 'बर्ब गतौ' (भ्वा० प० से०) । युच् (उ० २।७८) ॥ (१) ॥*॥ मशति 'मश शब्दे' (भ्वा० प० से०) । 'हनिमशिभ्यां सिकन्' (उ० ४।१५४) । मक्षति वा । **'मक्ष** रोषे संघाते च' (भ्वा० प० से०) । क्कुन् (उ० २।३२) ण्वुल् (३।१।१३३) वा ॥ (२) ॥*॥ नीलति । 'णील वर्णे' (भ्वा० प० से०) । अच् (३।१।१३४) । 'नीला' इति क्रियाशब्दोऽयं विवक्षितो न तु गुणशब्दः । अतो न ङीष् । गुणविवक्षायां 'नीली' इति भवत्येव ॥ (३) ॥*॥ **'नीलवर्णमक्षिकायाः'** एकम् । केचित्तु नामत्रयमिदमाहुः । तदा तु 'वा संज्ञायाम्' (वा० ४।१।४२) इति युक्त एव ङीषभावः ॥

सरघा मधुमक्षिका ॥ २६ ॥

सरेति ॥ सरं गतिमन्तं घातयति । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । णिलोपे (६।४।५१) टिलोपः (६।४।१४३) । यद्वा रङ्गणं रघः । 'रघि गतौ' (भ्वा० आ० से०) । 'खनो घ च' (३।३।१२५) इति घित्करणात् 'अन्येभ्योऽपि' इति घः । आगमशास्त्रस्यानित्यत्वान्न नुम् । सह रघेण गत्वा वर्तते ॥ (१) ॥*॥ मधुकर्त्री मक्षिका ॥ (२) ॥*॥ द्वे **'मधुमक्षिकायाः'** ॥

पतङ्गिका पुत्तिका स्यात्

पेति ॥ पतति । 'पतेरङ्गच् पक्षिणि' (उ० १।११९) इत्यङ्गच् । स्वार्थे कन् (५।३।७५) संज्ञायां वा ॥ (१) ॥*॥ पुत् कुत्सितं तायते । 'तायृ संतानपालनयोः' (भ्वा० आ० से०) । बाहुलकात् कः यलोपः (६।१।६६) । 'केऽणः' (७।४।१३) इति ह्रस्वः । 'प्रत्ययस्थात्–' (७।३।४४) इतीत्वम् । पुत् कुत्सितं शब्दं तनोति वा । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः स्वार्थे कन् (५।३।७५) ॥ (२) ॥*॥ द्वे **'मधुमक्षिकाविशेषस्य'** ॥

दंशस्तु वनमक्षिका ।

दंश इति ॥ दशति 'दंश दशने' (भ्वा० प० अ०) । अच् (३।१।१३४) । **'दंशः** कीटविशेषे च वर्मदर्शनयोः पुमान्' (इति मेदिनी) ॥ (१) ॥*॥ वनस्य मक्षिका ॥ (२) ॥*॥ द्वे **'वनमक्षिकायाः'** ॥

दंशी तज्जातिरल्पा स्याद्

दंशीति ॥ अल्पा दंशजातिः । अपचयविवक्षायां गौरादित्वात् (४।१।४१) ङीष् ।—'जातेः–' (४।१।६३) इति ङीष —इति मुकुटः ॥ (१) ॥*॥ एकम् **'मक्षिकाल्पजातेः'** ॥

गन्धोली वरटा द्वयोः ॥ २७ ॥

गन्धविति ॥ गन्धयते । 'गन्ध अर्दने' (चु० आ० से०) । बाहुलकादोलच् । गौरादिः (४।१।५१) **('गन्धोली** वरटा-शुण्ड्योर्भद्रायाम्' इति हैमः) ॥ (१) ॥*॥ वृणोति । 'वृञ् वरणे' (स्वा० उ० से०) । 'शकादिभ्योऽटन्' (उ० ४।८१) ॥*॥ ङीषि (४।१।४१) **'वरटी'** अपि । **'वरटा** वरटीहंस्योस्तत्पतौ **वरटः** स्मृतः' इति तारपालः ॥ (२) ॥*॥ द्वे **'वरटायाः' 'वरडे'** इति ख्यातायाः ॥

भृङ्गारी चीरुका चीरी झिल्लिका च समा इमाः ।

भृङ्गेति ॥ भृङ्गं भृङ्गरूपम् आ राति । 'रा दाने' (अ० प० अ०) । मूलविभुजादिः (वा० ३।२।५) । गौरादिः (४।१।४१) यद्वा बिभर्ति । 'शृङ्गारभृङ्गारौ' (उ० ३।१३६) इति साधुः । यद्वा रूपेण भृङ्गमृच्छति । 'ऋ गतौ' (भ्वा० प० अ०) अण् (३।१।२) । 'भृङ्गारी झिल्लिकायां च कनकालौ पुनः पुमान्' (इति मेदिनी) ॥ (१) ॥*॥ 'ची' इति रौति । 'रु शब्दे' (अ० प० अ०) । बाहुलकात् कक् ॥*॥ **'झीरुका'** इति मुकुटः ॥ (२) ॥*॥ चिनोति । 'चिञ् चयने' (स्वा० उ० अ०) 'शुसिचिमीनां दीर्घश्च' (उ० २।२५) इति कन् ।**'जीरी** झिल्लयां, नपुंसकम् । गोस्तने वस्त्रभेदे च रेखालेखनभेदयोः' (इति मेदिनी) ॥ (३) ॥*॥ चिल्लति । 'चिल्ल शैथिल्ये' (भ्वा० प० से०) । अच् (३।१।१३४) पृषोदरादित्वाच्चस्य झः । गौरादिः (४।१।४१) । स्वार्थे कन् (५।३।७५) । **'झिल्ली** चीर्यातपरुचोर्वर्त्मामुद्वर्तनांशके' (इति मेदिनी) ॥ (४) ॥*॥ चत्वारि **'झिल्लिकायाः' 'झिगुरी'** इति ख्यातायाः ॥

समौ पतङ्गशलभौ

समाविति । पतति । 'पतेरङ्गच् पक्षिणि' (उ० १।११९) इत्यङ्गच् । **'पतङ्गः** शलभे शालिप्रभेदे पक्षिसूर्ययोः । क्लीबं सूते' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ शलति 'शल चलने' (भ्वा० प० से०) । 'कृशृशलिकलिगर्दिभ्योऽभच्' (उ० ३।१२२) ॥ (२) ॥*॥ द्वे **'पतंगस्य' 'फणिग'** इति ख्यातस्य ॥

खद्योतो ज्योतिरिङ्गणः ॥२८॥

खेति ॥ खे द्योतते । 'द्युत दीप्तौ' (भ्वा० आ० से०) । अच् (३।१।१३४) । खं द्योतयति । अण् (३।२।१) वा ॥ (१) ॥*॥ ज्योतिर्नक्षत्रम् । तद्वदिङ्गति । 'इगि गतौ' (भ्वा० प० से०) । 'चलनशब्दार्थात्–' (३।२।१४८) इति युच् ॥ (२) ॥*॥ द्वे **'खद्योतस्य'** ॥

मधुव्रतो मधुकरो मधुलिण्मधुपालिनः ।
द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः ॥ २९ ॥

मध्विति ॥ मधु व्रतं भक्ष्यं यस्य ॥ (१) ॥*॥ मधु करोति तच्छीलः । 'कृञो हेतु–' (३।२।२०) इति टः ॥ (२) ॥*॥ मधु लेढि 'लिह आस्वादने' (अ० उ० अ०) । क्विप् (३।२।७६) ॥ (३) ॥*॥ एवं पुष्पलिट् ॥ (७) ॥*॥ मधु पिबति 'पा पाने' (भ्वा० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । 'पिबतेः सुरासीध्वोः' (वा० ३।२।८) इति नियमान्न टक् (३।२।८) ॥ (४) ॥*॥ अलो वृश्चिकलाङ्गूलम् । तदिवास्य । 'अतः–' (५।२।११५) इतीनिः ॥ (५) ॥*॥ द्वौ रेफौ नास्मिन् यस्य ॥ (६) ॥*॥ बिभर्ति । 'भृञः किन्नुट् च' (उ० १।१२५) इति कन् ।—'भृङ्गाङ्गभृङ्गाः' इति—इति मुकुटश्चिन्त्यः । उणादिषु तादृशसूत्राभावात् ॥ (८) ॥*॥ षट् पदान्यस्य ॥ (९) ॥*॥ भ्रमति । 'भ्रमु अनवस्थाने' (दि० प० से०) । 'अर्तिकमिभ्रमिचमि–' (उ० ३।१३२) इति करन् । **'भ्रमरः** कामुके भृङ्गे' (इति मेदिनी) ॥ (१०) ॥*॥ अलति । 'अल भूषणादौ' (भ्वा० प० से०) । 'सर्वधातुभ्य इन्' (उ० ४।११८) । **'अलिः** सुरापुष्पलिहोः' (इति मेदिनी) ॥ (११) ॥*॥ एकादश **'भ्रमरस्य'** ॥

मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक् ।
शिखावलः शिखी केकी मेघनादानुलास्यपि ॥३०॥

मेति ॥ मयते । 'मय गतौ' (भ्वा० आ० से०) । खर्जादित्वात् (उ० ४।९०) ऊरः । मद्यां रौति वा । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः । पृषोदरादिः (६।३।१०९) ॥ (१) ॥*॥ बर्हमस्त्यस्य । 'फलबर्हाभ्यामिनन्' (वा० ५।२।१२२) ॥ (२) ॥*॥ इनिः (५।२।११५) ॥ (३) ॥*॥ नीलः कण्ठोऽस्य ॥ (४) ॥*॥ भुजंगं भुङ्क्ते । 'भुज पालनादौ' (रु० प० अ०) । क्विप् (३।२।७६) ॥ (५) ॥*॥ शिखास्त्यस्य । 'दन्तशिखात् संज्ञायाम्' (५।२।२१३) इति वलच् ॥ (६) ॥*॥ पक्षे व्रीह्यादित्वात् । (५।२।११६) इनिः । **'शिखी** वह्नौ बलीवर्दे शरे केतुग्रहे द्रुमे । मयूरे कुक्कुटे पुंसि शिखावत्यन्यलिङ्गकः' (इति मेदिनी) ॥ (७) ॥*॥ केकास्त्यस्य । व्रीह्यादित्वात् (५।२।११६) इनिः ॥ (८) ॥*॥ मेघनादेनानुलसति तच्छीलः 'लस श्लेषणक्रीडनयोः' (भ्वा० प० से०) । 'सुप्यजातौ–' (३।२।७८) इति णिनिः ॥ (९) ॥*॥ नव **'मयूरस्य'** ॥

केका वाणी मयूरस्य

केकेति ॥ के मूर्धनि कायति । 'कै शब्दे' (भ्वा० प० अ०) । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः । 'हलदन्तात्–' (६।१।९) इत्यलुक् ॥ (१) ॥*॥ एकम् **'मयूरवाण्याः'** ॥

समौ चन्द्रकमेचकौ ।

समाविति ॥ चन्द्र इव । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् ॥ (१) ॥*॥ मेचको वर्णोऽस्त्यस्य । अच् (५।२।१२७) । 'बर्हिकण्ठसमं वर्णं मेचकं ब्रुवते बुधाः' इति काल्यः । **'मेचकः** श्यामले कृष्णे तिमिरे बर्हिचन्द्रके' इति हैमः ॥ (२) ॥*॥ द्वे **'पिच्छस्थचन्द्राकृतेः'** ॥

शिखा चूडा

शीति ॥ शेते । 'शीङो ह्रस्वश्च' (उ० ५।२४) इति खः । **'शिखा** शाखाबर्हिचूडालाङ्गलिक्ष्यग्रमात्रके । चूडामात्रे शिफायां च ज्वालायां प्रपदेऽपि च' (इति मेदिनी) ॥ (१) ॥*॥ चुड्यते । 'चुड समुच्छ्राये' (तु० प० से०) भिदादिपाठाद् (३।३।१०४) अङ् दीर्घः । **'चूडा** वडभौ शिखायां बाहुभूषणे' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'मयूरशिखायाः'** ॥

शिखण्डश्च पिच्छबर्हे नपुंसके ॥३१॥

शिखेति ॥ शिखिनान्यते । 'अम गत्यादिषु' (भ्वा० प० से०) । 'अमन्ताड्डः' (उ० १।११४) । शकन्ध्वादिः (वा० ६।१।९४) । **'शिखण्डो** बर्हचूडयोः' इति हेमचन्द्रः ॥ (१) ॥*॥ 'पिच्छयति । पिच्छयते वा । 'पिच्छ कुट्टने' (चु० प० से०) । अच् । (३।३।१३४) घञ् (३।३।१९) वा । **'पिच्छा** पूगच्छटाकोषमोचाशाल्मलिवेष्टके । भक्तसंभृतमण्डे च पङ्क्तावश्वपदामये । स्त्रियां, पुंसि तु लाङ्गूले न द्वयोर्बर्हचूडयोः' (इति मेदिनी) ॥ (२) ॥*॥ बर्हति । 'बृह वृद्धौ' (भ्वा० प० से०) । अच् (३।१।१३४) । **'बर्ह** पिच्छे दलेऽस्त्रियाम्' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'मयूरपिच्छस्य'** ॥

खगे विहंगविहगविहंगमविहायसः ।
शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः ॥ ३२ ॥
पतत्रिपत्त्रिपतगपतत्पत्त्ररथाण्डजाः ।
नगौकोवाजिविकिरविष्किरपतत्रयः ॥ ३३ ॥
नीडोद्भवा गरुत्मन्तः पित्सन्तो नभसंगमाः ।

खग इति ॥ खे गच्छन्ति । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । **'खगः** सूर्ये ग्रहे देवे मार्गणे च विहंगमे' (इति मेदिनी) ॥ (१) ॥*॥ विहायसि गच्छन्ति । 'गमश्च' (३।२।४७) इति खच् । 'विहायसो विह च' (वा० ३।२।३८) । 'खच डिद्वा' (वा० ३।२।३८) ॥ (२) ॥*॥ (४) शुगे ॥*॥ डे (वा० ३।२।४८) तु । **'विहगस्तु** त्रिलिङ्गः स्यादाशुगे वा विहंगमे' (इति मेदिनी) ॥ (३) ॥*॥ विजहाति भुवम् । 'ओहाक् त्यागे' (जु० प० अ०) 'वहिहाधाञ्भ्यश्छन्दसि' (उ० ४।२२१) इत्यसुन् णिच्च । क्वचिच्छान्दसा अपि भाषायां प्रयुज्यन्ते । तेन लोकेऽपि । यद्वा विहाययति । 'हय गतौ' (भ्वा० प० से०) । 'हि गतौ' (स्वा० प० अ०) वा स्वार्थण्यन्तः । 'सर्वधातुभ्योऽसुन्' (उ० ४।१८९) **'विहायाः** शकुनौ पुंसि गगने पुंनपुंसकम्' (इति

मेदिनी) ॥ (५) ॥*॥ शक्नोति । 'शक्लृ शक्तौ' (स्वा० प० अ०) । 'शकेऽनोन्तोन्त्युनयः' (उ० ३।४९) इति प्रत्ययचतुष्टयम् ॥ (६) ॥*॥ पक्षावस्य स्तः । इनिः (५।२।११५) ॥ (७) ॥*॥ **'शकुनिः** पुंसि विहगे सौबले करणान्तरे' (इति मेदिनी) ॥ (८) ॥*॥ **'शकुन्तः** कीटभेदे स्याद्भासपक्षिविहंगयोः' इति मेदिनी ॥ (९) ॥*॥ **'शकुन्तस्तु** पुमान् पक्षिमात्रपक्षिविशेषयोः । शुभशंसिनिमित्ते च **शकुनं** स्यान्नपुंसकम्' (इति मेदिनी) ॥ (१०) ॥*॥ द्विर्जायते । 'अन्येष्वपि' (३।२।१०१) इति डः । **'द्विजः** स्याद्ब्राह्मणक्षत्रवैश्यदन्ताण्डजेषु ना । **द्विजा** भार्य्यां हरेणौ च' (इति मेदिनी) ॥ (११) ॥*॥ पतत्रमस्त्यस्य । इनिः (५।२।११५) ॥ (१२) ॥*॥ एवं पत्री । **'पत्री** श्येने पत्ररथे काण्डद्रुरथिकाद्रिषु' (इति मेदिनी) ॥ (१३) ॥*॥ पतेन पक्षेण गच्छति । डः (वा० ३।२।४८) ॥ (१४) ॥*॥ पतति । 'पतॢ गतौ' (भ्वा० प० से०) । शता (३।२।१२४) ॥ (१५) ॥*॥ पत्रं पतत्रं रथ इव यस्य ॥ (१६) ॥*॥ अण्डाज्जायते स्म । 'पद्भ्याम्–' (३।२।९८) इति डः । **'अण्डजो** मृगनाभौ स्यात्सरटेऽहौ खगे झषे' (इति मेदिनी) ॥ (१७) ॥*॥ नगो वृक्षः, नगे वा ओको यस्य । **'नगौकाः** पुंसि शरभे पक्षिपद्मास्ययोरपि' इति मेदिनी—जलौकावद् 'आदन्तः' अपि—इति मुकुटः ॥ (१८) ॥*॥ वाजाः पक्षाः सन्त्यस्य । इनिः (५।२।११५) । **('वाजी** बाणाश्वपक्षिषु' इति मेदिनी) ॥ (१९) ॥*॥ विकिरति । 'कॄ विक्षेपे' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः ॥ (२०) ॥*॥ वाति । 'वा गतौ' (अ० प० अ०) 'वातेर्डिच्च' (उ० ४।१३४) इतीण् ॥—'वेञो डित्' (उ० ४।७२)—इति स्वामिमुकुटौ चिन्त्यौ । ईचिप्रत्ययप्रकरणेऽस्य पाठाद् 'वीचिः' इति रूपापत्तेः ॥ (२१) ॥*॥ 'विष्किरः शकुनिर्वा' (६।१।१५०) इति पक्षे सुट् । 'परिनिविभ्यः–' (८।३।७०) इति षत्वम् ॥ (२२) ॥*॥ पतति । 'पतेरत्रिन्' (उ० ४।६९) । —'उणादयो बहुलम्' (३।३।१) इति पतेरत्रिः—इति मुकुट एतत्सूत्राज्ञानमूलकः ॥ (२३) ॥*॥ नीडे उद्भवो येषाम् ॥ (२४) ॥*॥ गरुतः पक्षाः सन्त्यस्य । मतुप् (५।२।९४) 'झयः' (८।२।१०) इति वत्वं तु न । यवादित्वात् (८।२।९) 'तसौ मत्वर्थे' (१।४।१९) इति भत्वम् ॥ (२५) ॥*॥ पतितुमिच्छवः । लटः शता (३।२।१२४) । 'सनि मीमा–' (७।४।५४) इतीस् ॥ (२६) ॥*॥ 'नभसं खं मेघवर्त्म विहायसम्' इति निगमाददन्तम् । नभसं गच्छति । 'गमश्च' (३।२।४७) इति खच् ॥ (२७) ॥*॥ सप्तविंशतिः **'पक्षिमात्रस्य'** ॥

तेषां विशेषा हारीतो मद्गुः कारण्डवः प्लवः ॥ ३४ ॥
तित्तिरिः कुक्कुभो लावो जीवंजीवश्चकोरकः ।
कोयष्टिकष्टिट्टिभको वर्तको वर्तिकादयः ॥ ३५ ॥

तेषामिति ॥ एते पक्षिणां भेदाः । **'हारिः** पथिकसंतानद्यूतादिभङ्गयोः स्त्रियाम्' (इति मेदिनी) । हारिमित ईतो वा हारोऽस्त्यस्मिन् । इनिः (५।२।११५) । हारि मनोहरम् इतं गमनमस्य । यद्वा हारयति 'क्विप्–' (३।२।१७८) । एति स्म । 'ईं गतौ' (अ० प० अ०) गत्यर्था–' (३।४।७२) इति क्तः । हा चासावीतश्च । **'हरितो** विहगान्तरे । मुनौ छद्मनि' इति हेमचन्द्रः । (**'हरियाल'** इति ख्यातः) ॥ (१) ॥*॥ मज्जति । 'दुमस्जो शुद्धौ' (तु० प० अ०) 'भृमृशी–' (उ० १।७) इत्युः । न्यङ्क्वादिः (७।३।५३) । सस्य जश्त्वेन (८।४।५३) दः । **'मद्गुः** पानीयकाकिका' इति रभसः ॥ (१) ॥*॥ रमणम् । 'अमताङ्गः' (उ० १।११४) इति रमेर्डः । ईषद्रण्डः । 'ईषदर्थे च' (६।३।१०५) इति कोः का । कारण्डं वाति । 'आतोऽनुप–' (३।२।३) इति कः ॥ (१) ॥*॥ प्लवते । 'प्लुङ् गतौ' (भ्वा० आ० अ०) । अच् (३।१।१३४) ॥ **'प्लवः** प्लक्षे प्लुतौ कपौ । शब्दे कारण्डवे म्लेच्छजातौ मेलकभेकयोः । क्रमनिम्नमहीभागे कुलके जलवायसे । जलान्तरे **प्लवं** गन्धतृणे मुस्तकविद्यपि' इति हेमचन्द्रः ॥ (१) ॥*॥ 'तित्तिशब्दं' राति । बाहुलकात्किः । **'तित्तिरिः** पक्षिणि मुनौ' इति हैमः ॥*॥ अदन्तपक्षे 'आतोऽनुप–' (३।२।३) इति कः । 'कपोतलावा**तित्तिरा**ः' इति वाचस्पतिः ॥ (१) ॥*॥ 'कुक' इति शब्दं कौति । 'कु शब्दे' (अ० प० अ०) बाहुलकाद्भक् । 'कुक्कु' शब्दं भाषते । 'भाष व्यक्तायां वाचि' (भ्वा० आ० से०) । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः । वनकुक्कुटोऽयम् ॥ (१) ॥*॥ लावयति । 'लूञ् छेदने' (क्र्या० उ० से०) स्वार्थण्यन्तः । अच् (३।१।१३४) ॥ (१) ॥*॥ जीवं जीवयति । तद्दर्शनेन विषनाशकत्वात् । 'कृत्यल्युटो बहुलम्' (वा० ३।३।११३) इति बाहुलकात्खच् । **'जीवंजीवः** खगान्तरे । द्रुमभेदे चकोरे च' इति हैमः ॥ (१) ॥*॥ चकति । 'चक तृप्तौ' (भ्वा० प० से०) । 'कठिचकिभ्यामोरन्' (उ० १।६४) स्वार्थे कन् (५।३।७५) ॥१॥*॥ कं जलं यष्टिरिवास्य । पृषोदरादिः (६।३।१०९) ॥ (१) ॥*॥ 'टिट्टि' शब्दं भाषते । 'टिट्टि' शब्देन भाति वा । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । कन् (५।३।७५) ॥ (१) ॥*॥ वर्तते 'वृतु वर्तने' । ण्वुल् (३।१।१३३) ॥ (१) ॥*॥—उदीचां तु स्त्रियामित्त्वम् । प्राचां न (वा० ७।३।४५) । इति स्त्रियां रूपद्वैयप्रदर्शनाय 'वर्तिका'ग्रहणम्,—इति प्राञ्चः ॥ वस्तुतस्तु 'वृतेस्तिकन्' (उ० ३।१४६) इति तिकन्नन्तस्य मूषिकवत् पुंस्यपि 'वर्तिकः' इति रूपकथनमिदम् । **'वर्तकस्तु** खुरेऽश्वस्य विहगे **वर्तिका** द्वयोः' (इति मेदिनी) ॥ (१) ॥*॥ आदिना शारकादयो ज्ञेयाः । **'पक्षिजातिविशेषाः'** ॥

१—'अव्यक्तशब्दं' इत्यपि पाठः ॥ २—'कोयष्टिष्टिट्टिभः कोकः ककरो वर्तिकादयः' इति क्षीरस्वामिव्याख्यानपाठे तु न रूपद्वयप्रदर्शनम्—इति बोध्यम् ॥

गरुत्पक्षच्छदाः पत्त्रं पतत्त्रं च तनूरुहम् ।

गरुदिति ॥ गिरति । 'गॄ निगरणे' (तु० प० से०) । यद्वा गृणाति । 'गॄ शब्दे' (क्या० प० से०) । 'मृग्रोरुतिः' (उ० १।९४) ॥ (१) ॥*॥ पक्षयति । पक्ष्यते वा । 'पक्ष परिग्रहे' (चु० प० से०) । अच् (३।१।१३४) । घञ् (३।३।१९) वा । **'पक्षस्तु** मासार्धे गृहसाध्ययोः । चुल्लीरन्ध्रे बले पार्श्वे वर्गे केशोत्परश्चये । पिच्छे विरोधे देहाङ्गे सहाये राजकुञ्जरे' इति (मूर्धन्यषान्तेषु) हैमः ॥*॥ सान्तोऽपि । **'पक्षसी** च स्मृतौ पक्षौ' इति शुभाङ्कः ॥ (२) ॥*॥ छाद्यतेऽनेनाङ्गम् । 'छद संवरणे' (चु० उ० से०) । ण्यन्तः । 'पुंसि–' (३।३।१२१) इति घः । 'छादेर्घे–' (६।४।९६) इति ह्रस्वः । 'गरुत्पक्षौ नरौ **छदम्**' इति बोपालितात्क्लीबमपि ॥ (३) ॥*॥ पतत्यनेन । 'दात्रौ–' (३।२।१८२) इति ष्ट्रन् । **'पत्त्रं** तु वाहने पर्णे स्यात् पक्षे शरपक्षिणोः' इति मेदिनी ॥ (४) ॥*॥ पतन्तं त्रायते । 'त्रैङ् रक्षणे' (भ्वा० आ० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । पतेर्बाहुलकादत्रन् वा ॥ (५) ॥*॥ तन्वां रोहति । 'इगुपध–' (३।१।१३५) इति कः ॥ (६) ॥*॥ षट् **'पक्षस्य'** ॥

स्त्री पक्षतिः पक्षमूलम्

स्त्रीति ॥ पक्षस्य मूलम् । 'पक्षात्तिः' (५।२।२५) ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'पक्षमूलस्य'** ॥

चञ्चुस्त्रोटिरुभे स्त्रियौ ॥ ३६ ॥

चञ्चुरिति ॥ चञ्चति । 'चञ्चु गतौ' (भ्वा० प० से०) । बाहुलकादुः । 'चञ्चूश्चञ्चुस्तथा त्रोटिः' इति हलायुधः । मित्रत्वादौ (१) निपातितः । अपष्ठ्वादित्वादित्यन्ये—इति मुकुटः । तन्न । गणद्वयस्योज्ज्वलदत्तादिष्वदर्शनात् । **'चञ्चुः** पचाङ्गुले त्रोट्याम्' इति हैमः ॥ (१) ॥*॥ त्रोट्यते । 'त्रुट छेदने' (चु० आ० से०) चुरादिः । 'अच इः' (उ० ४।१३९) । **'त्रोटिश्चञ्चां** खगान्तरे । मीनकट्फलयोः' इति हैमः ॥ (२) ॥*॥ द्वे **'पक्षितुण्डस्य' 'चोंच'** इति ख्यातस्य ॥

प्रडीनोड्डीनसंडीनान्येताः खगगतिक्रियाः ।

प्रेति ॥ प्रथमम्, ऊर्ध्वम्, संगतम्, वा डयनम्, 'डीङ् विहायसा गतौ' (दि० आ० अ०) । 'नपुंसके भावे क्तः' (३।३।११४) । 'खादय ओदितः' (दि० गणसूत्रम्) इत्योदित्त्वात् (८।२।४५) निष्ठानत्वम् ॥—प्रडीनं तिर्यग्गमनम्—इत्यन्ये ॥ (१) ॥*॥ (२) ॥*॥ (३) ॥*॥ 'एताः' इत्यनेन हि डीनाद्या बोध्याः ॥*॥ **'पक्षिणां गतिविशेषाणां'** पृथक्पृथगेकैकम् ॥

पेशी कोषो द्विहीनेऽण्डम्

पेशीति ॥ पिंशति । 'पिश अवयवे' (तु० प० से०) । 'हृपिशिरुहि–' (उ० ४।११९) इतीन् । 'कृदिकारात्–' (ग० ४।१।४५) इति वा ङीष् । **'पेशी** सुपक्वकणिके मांस्यां खड्गपिधानके । मांसपिण्ड्यामण्डभेदे' (इति तालव्यान्तेषु मेदिनी) ॥ (१) ॥*॥ कुष्यति निष्कामत्यस्मात्स्वयमेव । 'अकर्तरि च' (३।३।१९) इति घञ् । **'कोषोऽस्त्री** कुड्मले पात्रे पेश्यां शब्दादिसंग्रहे । जातिकोशेऽर्थसंघाते दिव्ये खड्गपिधानके' (इति मूर्धन्यान्ते मेदिनी) ॥*॥ तालव्यान्तोऽप्ययम् ॥ **'कोशोऽस्त्री–'** (इति तालव्यान्तेषु मेदिनी) यथा पठितम् ॥ (२) ॥*॥ नामद्वयमिदम् ॥ स्वामी तु—पेशीनां मांसखण्डानां कोशो भाण्डागारः—इति व्याचक्षाणो नामैकमिदमिच्छति ॥*॥ द्वाभ्यां हीने क्लीब इत्यर्थः । अमत्यस्मात् । 'अम गत्यादिषु' (भ्वा० प० से०) 'अमन्ताड्डः' (उ० १।११४) ॥ **'अण्डं** मुष्के च पेश्यां स्यात्' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'अण्डस्य' 'अण्डा'** इति ख्यातस्य ॥

कुलायो नीडमस्त्रियाम् ॥३७॥

कुलेति ॥ कुलं पक्षिसंतानोऽयतेऽत्र । 'अय गतौ' (भ्वा० अ० से०) 'हलश्च' (३।३।१२१) इति घञ् । यद्वा कौ लायो गतिरस्मात् ।—कुलान्ययन्ते निःसरन्त्यतः । 'हलश्च' (३।३।१२१) इति घञ्—इति मुकुटः । तन्न । 'हलश्च' (३।३।१२१) इत्यत्र 'करणाधिकरणयोः' (३।३।११७) इत्यनुवृत्तेरपादानेऽप्राप्तेः । **'कुलायस्तु** पुमान्स्थानमात्रे स्यात् पक्षिवासके' (इति मेदिनी) ॥ (१) ॥*॥ नितराम् ईड्यते । घञ् (३।३।१९) । यद्वा निश्चिता इलन्त्रत्र । 'इल खप्ने' (तु० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । संज्ञापूर्वकत्वान्न गुणः । डलयोरेकत्वम् । **'नीडं** स्थानकुलाययोः' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'पक्षिवासस्य'** ॥

पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः ।

पोत इति ॥ पुनाति, पवते वा । 'पूङ् पवने' (क्या० उ० से०) 'पूङ् पवने' (भ्वा० आ० से०) वा 'हसिमृग्रिणू–' (उ० ३।८६) इति तन् । स्त्रियाम् 'पोती' । 'वयसि प्रथमे' (४।१।२०) इति ङीप् । **'पोतः** शिशौ वह्नित्रे च गृहस्थाने च वाससि' इति मेदिनी ॥ (१) ॥*॥ पायते । पिबति वा । 'पा रक्षणे' (अ० प० अ०) । 'पा पाने' (भ्वा० प० अ०) वा । 'अर्भकपृथुकपाका वयसि' (उ० ५।५३) इति साधुः । स्त्रियाम् अजादित्वात् (४।१।४) टाप् । मुकुटस्तु—'इण्भीका–' (उ० ३।४३) इति कन् । पच्यते परिणम्यतेऽनेन । 'हलश्च' (३।३।१२१) इति घञि वा इत्याह । तन्न । अवयसि चरितार्थयोरनयोर्वयसि 'अर्भक–' (उ० ५।५३) इत्यनेन बाधनात् । **'पाकः** परिणतौ शिशौ । केशस्य जरसा शौक्ल्ये स्थाल्यादौ पचनेऽपि च' (इति मेदिनी) । इत्येतेष्वर्थेषु शिशुभिन्नेषु मुकुटव्याख्या युक्ता । शिशौ त्वसदीया—इति ध्येयम् ॥ (२) ॥*॥ अर्यते वृद्धिं प्राप्यते 'ऋ गतौ प्रा-

१—केशशब्दात्परीभूतः पक्षशब्दश्चरार्थक इत्यर्थः ॥

पणेऽपि च' (भ्वा० प० से०) । 'अर्भकपृथुकपाका वयसि' (उ० ५।५३) इति साधुः । मुकुटस्तु—सदैव इयर्ति चलति, वृद्धिं गच्छति वा । 'अर्तिगृभ्यां भः' (उ० ३।१५२) ततः स्वार्थे कन् (५।३।७५)-इति व्याख्यत् । तन्न । **'अर्भकः** कथितो बाले मूर्खेऽपि च कृशेऽपि च' (इति मेदिनी) इत्यत्र बालभिन्नेऽर्थे सावकाशस्यास्य 'वयसि अर्भक' (उ० ।५।५३) इत्यनेन बाधनात् ॥ (३) ॥*॥ डिम्भयति । 'डिभडिभि संघे' चुरादिः । अच् (३।१।१३४) । **'डिम्भोऽपि** बालिशे बाले' (इति मेदिनी) ङीङ आत्मनेपदित्वात्—'डयति–' इति स्वामी,—डयनं ङीः । डिया भाति—इत्यादि मुकुटश्चोपेक्ष्यौ ॥ (४) ॥*॥ पर्थयति । पर्थ्यते वा 'पृथु प्रक्षेपे' चुरादिः । प्रथते वा । 'प्रथ प्रख्याने' (भ्वा० आ० से०) । 'अर्भकपृथुकपाका वयसि' (उ० ५।५३) इति साधुः ।—पृथु कायति इति स्वामिमुकुटौ चिन्त्यौ । **'पृथुकः** पुंसि चिपिटे शिशौ स्यादभिधेयवत्' (इति मेदिनी) इत्यत्र पूर्ववदवयसि चरितार्थत्वेनास्य वयसि बाधनात् ॥ (५) ॥*॥ शय्यते । 'शव गतौ' (भ्वा० प० से०) । घञ् (३।३।१९) । स्वार्थे कन् (५।३।७५) ॥(६) ॥*॥ श्यति, शायते, वा । 'शो तनूकरणे' (दि० प० अ०) । 'शः कित् सन्वच्च' (उ० १।२०) इत्युः सन्वद्भावाद्विर्वेत्वे ।—शशति श्रुतेन गच्छति । 'शश प्लुतगतौ' (भ्वा० प० से०) । 'शशिरपोरतः' इति (कुः)—इति मुकुटश्चिन्त्यः । उज्ज्वलदत्तादिषु 'शशिरपोरतः' इति सूत्रादर्शनात् ॥ (७) ॥*॥ सप्त **'शिशुमात्रस्य'** ॥

स्त्रीपुंसौ मिथुनं द्वन्द्वम्

स्त्रीति ॥ स्त्री च पुमांश्च 'अचतुर–' (५।४।७७) इति अच् ॥ (१) ॥*॥ मेथति । 'मिथृ मेथृ संगमे' (भ्वा० उ० से०) । 'क्षुधिपिशिमिथिभ्यः कित्' (उ० ३।५५) इत्युनन् ।—बाहुलकाद्गुणाभावः—इति मुकुटस्तु एतत्सूत्राज्ञानमूलकः । **'मिथुनं** न द्वयो राशिभेदे स्त्रीपुंसयुग्मके' (इति मेदिनी) ॥ (२) ॥*॥ द्वौ द्वौ । 'द्वन्द्वं रहस्य–' (८।१।१५) इति साधुः ॥ **'द्वन्द्वं** रहस्ये कलहे तथा मिथुनयुग्मयोः' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'स्त्रीपुरुषरूपयुग्मस्य'** । मुकुटस्तु द्वन्द्वस्योत्तरान्वयित्वमेव स्वीकुर्वन्नुक्तमेदि'नीविरोधादुपेक्ष्यः ॥

युग्मं तु युगलं युगम् ॥ ३८ ॥

युग्ममिति ॥ युज्यते । 'युजिर् योगे' (रु० उ० अ०) । 'युजिरुचितिजां कुश्च' (उ० १।१४६) इति मक् । **'युग्मं यमलयामले'** इति रभसः ॥ (१) ॥*॥ वृषादित्वात् (उ० १।१०६) कलच् । न्यङ्क्वादित्वात् (७।३।५३) कुत्वम् । युगं लाति वा । युगमस्त्यस्य वा । सिध्मादित्वात् (५।२।९७) लच् ॥ (२) ॥*॥ युज्यते । घञ् (३।३।१९) । कुत्वम् (७।३।६२) संज्ञापूर्वकत्वात्—'रथयुगप्रासङ्गम्' (४।४।७६) इति लिङ्गाद्वा गुणाभावः । **'युगो** रथहलावयवे न द्वयोस्तु कृतादिषु । युग्मे हस्तचतुष्केऽपि वृद्धिनामौषधेऽपि च' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'यमलस्य'** ॥

समूहनिवहव्यूहसंदोहविसरव्रजाः ।
स्तोमौघनिकरव्रातवारसंघातसंचयाः ॥ ३९ ॥
समुदायः समुदयः समवायश्चयो गणः ।
स्त्रियां तु संहतिर्वृन्दं निकुरम्बं कदम्बकम् ॥ ४० ॥

समूहेति ॥ समूह्यते । 'ऊह वितर्के' (भ्वा० आ० से०) । घञ् (३।३।१९) ।—'हलश्च' (३।३।१२१) इति मुकुटस्य प्रमादः । तत्र 'करणाधिकरणयोः' इत्यस्यानुवर्तनात् ॥ (१) ॥*॥ नितरामुह्यते । 'वह प्रापणे' (भ्वा० उ० अ०) । 'पुंसि–' (३।३।११८) इति घः । 'खनो घ च' (३।३।१२५) इति वा । वहति वा । अच् (३।३।१३४) ॥ (२) ॥*॥ व्यूह्यते । घञ् (३।३।१९) । **'व्यूहः** स्याद्बलविन्यासे निर्माणे वृन्दतर्कयोः' (इति मेदिनी) ॥ (३) ॥*॥ संदुह्यते । 'दुह प्रपूरणे' (अ० उ० अ०) । घञ् (३।३।१९) ॥ (४) ॥*॥ विसरति । 'सृ गतौ' (भ्वा० प० अ०) । अच् (३।१।१३४) । **('विसरः** प्रसरे व्रजे' इति मेदिनी) ॥ (५) ॥*॥ व्रजति । 'व्रज गतौ' (भ्वा० प० से०) अच् (३।१।१३४) । **'व्रजो** गोष्ठाध्ववृन्देषु' (इति मेदिनी) । करणाधिकरणव्युत्पत्तौ तु 'गोचरसंचर–' (३।३।११९) इति निपातितः ॥ (६) ॥*॥ स्तूयते । 'ष्टुञ् स्तुतौ' (अ० उ० अ०) । 'अर्तिस्तुसु–' (उ० १।१४०) इति मन् ॥ (७) ॥*॥ आ उद्यतेऽनेन 'हलश्च' (३।३।१२१) इति घञ् । न्यङ्क्वादित्वात् (७।३।५३) कुत्वम् । **'ओघो** वेगे जलस्य च । वृन्दे परम्परायां च द्रुतनृत्योपदेशयोः' इति मेदिनी ॥ (८) ॥*॥ निकीर्यते 'कॄ विक्षेपे' (तु० प० से०) । 'ऋदोरप्' (३।३।५७) । **'निकरो** निवहे सारे न्यायदेयधने निधौ' (इति मेदिनी) ॥ (९) ॥*॥ व्रत्यते नियम्यते । 'मुण्डमिश्र–' (३।१।२१) इति ण्यन्ताद्धातशब्दाद् घञ् (३।३।१९) । अच् (३।३।५६) वा 'व्रातच्फलोः–' (५।३।११३) इति लिङ्गाद्वृद्धिः ॥ (१०) ॥*॥ वार्यते आच्छाद्यतेऽनेन 'वृ वरणे' चुरादिः । 'पुंसि–' (३।३।११८) इति घः । **'वारः** सूर्यादिवासरे । द्वारे हरे कुब्जवृक्षे वृन्दावसरयोः क्षणे' (इति मेदिनी) ॥ (११) ॥*॥ संहन्यते । घञ् (३।३।२९) 'हनस्तोऽचिण्णलोः–' (७।३।३२) । 'हो हन्तेः–' (७।३।५४) घः । **'संघातः** पुंसि घाते च संहतौ नरकान्तरे' (इति मेदिनी) ॥ (१२) ॥*॥ संचीयते । 'चिञ् चयने' (स्वा० उ० अ०) । 'एरच्' (३।३।५६) ॥ (१३) ॥*॥ समुदायते । 'अय गतौ' (भ्वा० आ० से०) । आङ् । अच् (३।१।१३४) **'समुदायः** समूहे स्याद्युद्धे' (इति मेदिनी) ॥ (१४) ॥*॥ समुदीयते । 'इण् गतौ'

१—मेदिनीतस्तु द्वन्द्वस्य युग्मपर्यायतायां प्रतीत्या तद्विरोधः । किं तु 'क्त्वन्ताथादि न पूर्वभाक्' इति प्रतिज्ञाविरोधादुपेक्ष्यः ॥

(अ० प० अ०) 'ईङ् गतौ' (अ० प० अ०) वा। 'एरच्' (३।३।५६)। 'भवेत्**समुदयः** संघे संयुगे च समुद्गमे' (इति मेदिनी) ॥ (१५) ॥*॥ समवाय्यते। 'अय गतौ' (भ्वा० आ० से०)। घञ् (३।३।१९) समवयन्त्यनेनास्मिन् वा। घञ् (३।३।११९)—इति मुकुटः। तन्न। 'अजब्भ्याम्—' (वा० ३।३।१२३) इति वार्तिकविरोधात्। बाहुलकस्यागतिकगतित्वात् ॥ (१६) ॥*॥ चीयते। 'चिञ् चयने' (स्वा० उ० अ०)। 'एरच्' (३।३।५६)। '**चयः** समूहे प्राकारमूलवन्धे समाहतौ' (इति मेदिनी) ॥ (१७) ॥*॥ गण्यते। 'गण संघाते' (चु० उ० से०)। घञ् (३।३।१९)। 'एरच्' (३।३।५६) वा। अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः। '**गणः** प्रमथसंख्यायां चण्डीसैन्यप्रभेदयोः' (इति मेदिनी) ॥ (१८) ॥*॥ संहन्यते। क्तिन् (३।३।९४) ॥ (१९) ॥*॥ वृण्यते। 'वृणु भक्षणे' (तु० प० से०)। वृणोति वा। 'अब्दादयश्च' (उ० ४।९८) इति साधुः ॥ (२०) ॥*॥ निकुरति। निकुर्यते वा। 'कुर छेदने' (तु० प० से०)। बाहुलकादम्बच् अत उत्वं च ॥ (२१) ॥*॥ कुत्सितमम्बते, अम्ब्यते वा। 'अबि शब्दे' (भ्वा० आ० से०)। अच् (३।१।१३४) 'कोः कत्—' (६।३।१०१) घञ् (३।३।१९) वा कदति, कथते वा। 'कदिः' सौत्रः। बाहुलकादम्बच् ॥ '**कदम्बं** निकुरम्बे स्यान्नीपसर्षपयोः पुमान्' (इति मेदिनी) ॥ (२२) ॥*॥ द्वाविंशतिः '**समूहस्य**' ॥

वृन्दभेदाः

वृन्देति ॥ समूहविशेषा उच्यन्ते ॥

समैर्वर्गः

सेति ॥ समैरुपलक्षितम्। वृज्यते 'वृजी वर्जने' (अ० आ० से०)। घञ् (३।३।१९)। कुलम् (७।३।५२) ॥ (१) ॥*॥

संघसार्थौ तु जन्तुभिः।

संघेति ॥ संहन्यते। घञ् (३।३।१९)। 'संघोद्धौ गणप्रशंसयोः' (३।३।८६) इति साधुः ॥ (१) ॥*॥ सरति, स्रियते, वा। 'सृ गतौ' (भ्वा० प० अ०)। 'सर्तेर्णित्' (उ० २।५) इति थन्। '**सार्थो** वणिक्समूहे स्यादपि संघातमात्रके' (इति मेदिनी)। 'यूथादयश्च'—इति मुकुटश्चिन्त्यः ॥ (२) ॥*॥ भागुरिस्तु पर्यायतामाह—'संघसंघातपुञ्जौघसार्थयूथकदम्बकाः' इति ॥

सजातीयैः कुलम्

सजेति ॥ सजातीयैरेव जन्मभिरुपलक्षितम्। कोलति। 'कुल संस्त्याने बन्धुषु च' (भ्वा० प० से०)। 'इगुपध—' (३।१।१३५) इति कः। '**कुलं** जनपदे गोत्रे सजातीयगणेऽपि च। भवने च त्रनौ क्लीबम्' (इति मेदिनी) ॥ (१) ॥*॥

यूथं तिरश्चां पुंनपुंसकम् ॥ ४१ ॥

यूथमिति ॥ यौति। यूयते, वा। 'यु मिश्रणे' (अ० प० से०)। 'तिथपृष्ठगूथयोनोथाः' (उ० २।१२) इति साधुः। '**यूथं** तिर्यक्समूहेऽस्त्री पुष्पभेदे च योषिति' (इति मेदिनी) ॥ (१) ॥*॥

पशूनां समजः

पेति ॥ संवीयतेऽत्र। 'अज गतिक्षेपणयोः' (भ्वा० प० से०)। 'समुदोरजः पशुषु' (३।३।६९) इत्यप्। '**समजः** पशुवृन्दे ना विपिने तु नपुंसकम्' (इति मेदिनी) ॥ (१) ॥*॥ एकं '**पशुसंघस्य**' ॥

अन्येषां समाजः

अन्येषामिति ॥ अन्येषां संघः। संवीयतेऽत्र। घञ् (३।३।१९) ॥ (१) ॥*॥ एकं '**पशुभिन्नसंघस्य**' ॥

अथ सधर्मिणाम्।

स्यान्निकायः

अथेति ॥ निचीयते। 'चिञ् चयने' (स्वा० उ० अ०)। 'संघे चानौत्तराधर्ये' (३।३।४२) इति घञ् आदेः कश्च ॥ '**निकायस्तु** पुमाँल्लक्ष्ये सधर्मिप्राणिसंहतौ'। ('समुच्चये संहतानां निलये परमात्मनि' इति मेदिनी) ॥ (१) ॥*॥ '**वृन्दभेदानां**' पृथक् पृथक् ॥

पुञ्जराशी तूत्करः कूटमस्त्रियाम् ॥ ४२ ॥

पुञ्जेति ॥ पिञ्जयति, पिञ्ज्यते वा। 'पिजि हिंसाबलादाननिकेतनेषु' (चु० प० से०)। अच् (३।१।१३४)। घञ् (३।३।१९) वा पृषोदरादिः (६।३।१०९)। यद्वा उन्नत्या पुमांसं जयति। 'अन्येभ्योऽपि—' (वा० ३।२।१०१) इति डः।—पुञ्ज्यते। पुञ्जः—इति स्वामी ॥ (१) ॥*॥ अश्नुते। 'अशू व्याप्तौ' (स्वा० आ० से०)। 'अशिपणाय्यो रुडायलुकौ च' (उ० ४।१३३) इतीण् धातोरुडागमः। यद्वा रश्यते। रशः सौत्रः शब्दार्थः।—दीर्घ्यर्थः—इति स्वामी। बाहुलकादिण्। ण्यन्तात् 'अच इः' (उ० ४।१३९) वा। '**राशिर्मेषादिपुञ्जयोः** (इति मेदिनी) ॥ (२) ॥*॥ उत्कीर्यते। 'कॄ विक्षेपे' (तु० प० से०)। 'ऋदोरप्' (३।३।५७) ॥ (३) ॥*॥ कूटयति। कुट्यते वा। 'कूट आप्रदाने' (चु० आ० से०) 'कूट दाहे मन्त्रणे' (चु० उ० से०) वा अच् (३।१।१३४) घञ् (३।३।१९) वा '**कूटं** पूर्द्वारयन्त्रयोः। मायादम्भाद्रिशृङ्गेषु सीराङ्गेऽनृततुच्छयोः। निश्चलेऽयोघने राशौ' इति हेमचन्द्रः ॥ (४) ॥*॥ चत्वारि '**धान्यादेरुच्छ्रितवृन्दस्य**' ॥

कापोतशौकमायूरतैत्तिरादीनि तद्गणे।

केति ॥ तेषां कपोतशुकमयूरतित्तिरीणां गणे। कपोतानाम्, शुकानाम्, मयूराणाम्, तित्तिरीणाम्, च गणः।

'अनुदात्तादेरञ्' (४।२।४४)। शुक्रात्तु 'तस्य समूहः' (४।२।३७) इत्यण्। आदिना काकवर्तकोलूकादीनां ग्रहः। '**कापोतो** रुचके, क्लीबं कपोतौघेऽञ्जनान्तरे' (इति मेदिनी) ॥ (१) ॥*॥ '**शौकं** शुकगणे स्त्रीणां करणे' (इति मेदिनी) ॥ (२) ॥*॥ '**कपोतादीनां गणस्य**' पृथक् पृथक् ॥

गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते ॥४३॥

गृहेति ॥ छयति, छीयते, वा 'छो छेदने' (दि० प० अ०) बाहुलकादीकन्। '**छेको** गृहाश्रितमृगपक्षिणोर्नागरे त्रिषु' (इति मेदिनी)। '**छेकस्त्रिषु** विदग्धेषु गृहासक्तमृगाण्डजे' इति चवर्गादौ रभसः ॥ (१) ॥*॥ गृह्यते। 'ग्रह उपादाने' (क्या० उ० से०)। 'पदास्वैरिबाह्यापक्ष्येषु च' (३।१।११९) इति क्यप्। '**गृह्यं** गुदे ग्रन्थभेदे क्लीबं, शाखापुरे स्त्रियाम्। गृहासक्तमृगादौ ना, त्रिषु चास्वैरिपक्ष्ययोः' (इति मेदिनी)। ततोऽनुकम्पायां कन् (५।३।७६)। '**गृह्यको** निम्नके छेके' (इति मेदिनी) ॥ (२) ॥*॥ द्वे '**गृहासक्तपक्षिणाम्**' ॥

इति सिंहादिवर्गविवरणम् ॥

मनुष्या मानुषा मर्त्या मनुजा मानवा नराः।

मनुष्या इति ॥ मनोरपत्यम्। 'मनोर्जातावञ्यतौ षुक् च' (४।१।१६१)। स्त्रियाम् '–हयगवय–' (वा० ४।१।६३) इति प्रतिप्रसवेन ङीप् (४।१।६३)। 'हलस्तद्धितस्य' (६।४।१५०) इति यलोपः। मनुषी। 'टिड्ढा–' (४।१।१५) इति ङीषि मानुषी। जातिविवक्षायां ङीषः (४।१।६३) परत्वादञन्तत्वात् (४।१।७३) ङीन् ॥ (१) ॥*॥ (२) ॥*॥ म्रियते। 'मृङ् प्राणत्यागे' (तु० आ० अ०)। 'हसिमृग्रिण्–' (उ० ३।८६) इति तन्। स्वार्थे यत् (वा० ५।४।३६) ॥ (३) ॥*॥ मनोर्जातः। 'जनी प्रादुर्भावे' (दि० आ० से०)। 'पञ्चम्याम्–' (३।२।९८) इति डः ॥ (४) ॥*॥ मनोरथम्। 'तस्येदम्' (४।३।१२०) इत्यण्। यद्वा मनोरपत्यम्। 'ब्राह्मणमाणव—' (४।२।४२) इति ज्ञापकादण्। अञि षुगभावो वा।—औपसंख्यानिकोऽण्—इति मुकुटश्चिन्त्यः। उपसंख्यानाभावात् ॥ (५) ॥*॥ नरति नृणाति वा। 'नॄ नये' (भ्वा० क्या० प० से०)। अच् (३।१।१३४) '**नरोऽजे** मनुजेऽर्जुने। क्लीबं तु रामकर्पूरे' (इति मेदिनी)।—नयन्ति पूर्वपुरुषानुत्तमां गतिम्। 'नयतेर्डिच्च' (उ० २।१००) इति ऋन्। डित्त्वाट्टिलोपः—इति मुकुटः। तन्न एवं सत्यदन्तरूपानुपपत्तेः। ऋदन्तरूपापत्तेश्च। ऋदन्तस्य वक्ष्यमाणत्वाच्च ॥ (६) ॥*॥ षट् '**मनुष्यमात्रस्य**' ॥

१—अत्र 'शौकमव्ययम्' इति तु मेदिन्यामदर्शनास्यक्तम् ॥

स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः ॥ १ ॥

स्युरिति ॥ पाति। 'पा रक्षणे' (अ० प० अ०)। 'पातेर्डुमुसुन्' (उ० ४।१७८) क्वचित् 'पूञो डुमुसुन्' इति पाठः। पुनाति 'पूञ् पवने' (क्या० उ० से०) ॥ (१) ॥*॥ पञ्चभिभूतैर्जन्यते। घञ् (३।३।१९)। 'जनिवध्योश्च' (७।३।३५) इति न वृद्धिः। यद्वा पञ्च जना उत्पादका यस्य ॥ (२) ॥*॥ पुरति। 'पुर अग्रगमने' (तु० प० से०)। 'पुरः कुषन्' (उ० ४।७४) ॥ (३) पृषोदरादित्वात् (६।३।१०९) दीर्घः। यद्वा 'पूरी आप्यायने' (दि० आ० से०)। बाहुलकात्कुषन् ॥ (४) ॥*॥ नयति। 'नयतेर्डिच्च' (उ० २।१००) इत्यून् ॥ (५) ॥*॥ पञ्च '**मनुष्यजातौ पुरुषस्य**' ॥

स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः।
प्रतीपदर्शिनी वामा वनिता महिला तथा ॥ २ ॥

स्त्रीति ॥ स्त्यायति गर्भोऽस्याम्। 'स्त्यायतेर्डूट्' (उ० ४।१६६)। टिलोपः (६।४।१४३)। यलोपः (६।१।६६)। 'टिड्ढा–' (४।१।१५) इति ङीप् ॥ (१) ॥*॥ योषति। युष्यते वा। 'युष' सौत्रः सेवायाम्। 'हृसृरुहियुषिभ्य इतिः' (उ० १।९७) ॥*॥ योष्यते स्म। णिजन्तात्कर्मणि क्तः (३।२।१०२)। '**स्त्रीवधूर्योषिता रामा**' इति त्रिकाण्डशेषः ॥ (२) ॥*॥ अल्पं बलमस्याः। अल्पार्थे नञ् ॥ (३) ॥*॥ योषति, योषयति वा। अच् (३।१।१३४)। युष्यते। योष्यते वा। घञ् (३।३।१९) ॥*॥ ('**जोषा**' इति) चवर्गादिपाठे जुषते, जुष्यते वा। 'जुषी प्रीतिसेवनयोः' (तु० आ० से०) अच्। (३।१।१३४)। घञ् (३।३।१९) वा।—जुषति—इति मुकुटस्य प्रमादः ॥ (४) ॥*॥ 'नृनरयोर्वृद्धिश्च' इति शार्ङ्गरवादि-(४।१।७३) गणे पाठान्ङीन्। जातिलक्षणस्य (४।१।६३) ङीषोऽपवादः, ङीन्संनियोगेन वृद्धिश्च। मुकुटस्तु—नुर्नरस्य वा धर्म आचारोऽस्याः। 'नृनराभ्यां च' (वा० ४।४।४९) इत्यञ्। वृद्धिः (७।२।११७)। 'टिड्ढा–' (४।१।१५) इति ङीप्। नारी। नुर्नरस्य वेयम्। 'तस्येदम्' (४।३।१२०) इत्यणि वृद्धौ (७।२।११७) नारी, इति वा इत्याह। तन्न। 'नृनराभ्याम्' इत्यस्याप्रसिद्धत्वात्। 'तस्येदम्' (४।३।१२०) इत्यणि 'नृनरयोः' इत्यस्य वैयर्थ्यप्रसङ्गात्। ङीप्ङीनोः स्वरभेदाच्च ॥ (५) ॥*॥ सीम्नोऽन्तः। 'शकन्ध्वादिः' (वा० ६।१।९४)। सीमन्तोऽस्त्यस्याः, इनिः (५।२।११५) ॥ (६) ॥*॥ वहति, उह्यते वा। 'वहो धश्च' (उ० १।८३) इत्यूः। मुकुटस्तु—बध्नात्यविद्यया। 'चमितनिबन्धिभ्यः' इत्यूः—इत्याह। तन्न। 'कृषिचमितमिधनिसर्जिखर्जिभ्य ऊः' (उ० १।८०) इति सूत्रे बन्धेरग्रहणात् नलोपविधेरदर्शनाच्च ॥ (७) ॥*॥ प्रतीपं द्रष्टुं शीलमस्याः। अपाङ्गनिरीक्षणात्। 'सुप्यजातौ–' (३।२।७८) इति णिनिः ॥ (८) ॥*॥ वमति लेहम्। 'ठुवम उद्गिरणे' (भ्वा० प० से०)

१—इदं तु भाष्यकैयटानभिज्ञत्वसूचकम् ॥

ज्वलादित्वात् (३।१।१४०) णः । यद्वा वामः कामोऽस्त्यस्याः । अर्शआद्यच् (५।२।१२७) । **'वामं** धने पुंसि हरे कामदेवे पयोधरे । वल्गुप्रतीपसव्येषु त्रिषु नार्यां स्त्रियाम्' (इति मेदिनी) ॥ (९) ॥*॥ वनति । 'वन संभक्तौ' (भ्वा० प० से०) । बाहुलकादितन् । यद्वा वन्यते स्म । क्तः (३।२।१०२) **'वनिता** जातरागस्त्रीस्त्रियोस्त्री त्रिषु याचिते । सेविते' (इति मेदिनी) ॥ (१०) ॥*॥ महति, मह्यते वा । 'मह पूजायाम्' (भ्वा० प० से०) । 'सलिकल्यनिमहि–' (उ० १।५४) इतीलच् । (**'महिला**[1] फलिनीस्त्रियोः' इति मेदिनी) ॥*॥ महस्योत्सवस्य इला भूमिः, इति विग्रहे **'महेला'**[2] अपि ॥ (११) ॥*॥ एकादश **'स्त्रीमात्रस्य'** ॥

विशेषास्तु

वीति ॥ स्त्रीणां विशेषा भेदाः ॥

अङ्गना भीरुः कामिनी वामलोचना ।
प्रमदा मानिनी[3] कान्ता ललना च नितम्बिनी ॥ ३ ॥
सुन्दरी रमणी रामा

अङ्गनेत्यादि ॥ प्रशस्तान्यङ्गान्यस्याः । 'अङ्गात्कल्याणे' (ग० ५।२।१००) इति नः । **'अङ्गनं** प्राङ्गणे यानेऽप्यङ्गना तु नितम्बिनी' इति हैमः ॥ (१) ॥*॥ भयशीला । 'भिभी भये' (जु० प० अ०) । 'भियः कुक्कुकनौ' (३।२।१७४) इति कुः । **'भीरुः** स्यात्कातरे नार्याम्' इत्यजयः । **'भीरुरार्ते** जने स्त्रियाम्' इति रभसः । **'भीरुरार्ते** त्रिलिङ्गः स्याद्वरयोषिति योषिति' (इति मेदिनी) ॥ (१) ॥*॥ भूयान् कामोऽस्याः । इनिः (५।२।११५) । **'कामिनी** भीरुवन्दयोः' (इति मेदिनी) ॥ (१) ॥*॥ वामः कामो लोचने आलोचने नेत्रे वास्याः । यद्वा वामे सुन्दरे लोचने चक्षुषी यस्याः ॥ (१) ॥*॥ प्रमदो हर्षोऽस्त्यस्याः । **'प्रमदः** संमदे मत्ते स्त्रियामुन्मदयोषिति' (इति मेदिनी) ॥ (१) ॥*॥ **'मान**श्चित्तोन्नतौ गृहे । क्लीबं प्रमाणे प्रस्थादौ' (इति मेदिनी) । मानोऽस्त्यस्याः । इनिः (५।२।११५) । **'मानिनी** तु स्त्रियां फल्यां **मानी** मानवति त्रिषु' (इति मेदिनी) ॥ (१) ॥*॥ कम्यते स्म । 'कमु कान्तौ' (भ्वा० आ० से०) । णिङभावे क्तः (३।२।१०२) । **'कान्ता** नार्यां प्रियंगौ स्त्री शोभने त्रिषु ना धवे । लोहे च चन्द्रसूर्ययःपर्यायान्तःशिलासु च' (इति मेदिनी) ॥ (१) ॥*॥ ललते । 'लल ईप्सायाम्' । 'चुरादीनां वा णिच्' इति पक्षे ल्युः (३।१।१३४) युच् (उ० २।७८) वा । यद्वा लडति । 'लड विलासे' (भ्वा० प० से०) । 'बहुलमन्यत्रापि' (उ० २।७८) इति युच् । डलयोरेकत्वम् । **'ललना** कामिनीनारीभेदजिह्वासु योषिति' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ अतिशयितो नितम्बो यस्याः । इनिः (५।२।११५) ॥ (१) ॥*॥ अतीवोनत्ति । 'उन्दी क्लेदने' (रु० प० से०) सुपूर्वः । बाहुलकादरः । शकन्ध्वादिः (वा० ६।१।९४) । गौरादिः (४।१।४१) । **'सुन्दरी** तरुभिन्नारीभिदोः स्त्री रुचिरेऽन्यवत्' (इति मेदिनी) ॥ (१) ॥*॥ रमयति । रम्यते वा । अस्यां वा रम्यते । ल्युट् (३।३।११३, ११७) ॥ (१) ॥*॥ रमते । ज्वलादित्वात् (३।१।१४०) णः ।—रमयति—इति तु मुकुटस्य प्रमादः । ण्यन्तस्य ज्वलादित्वाभावात् । मित्वाण्णिनिमित्तवृद्ध्यभावाच्च । **'रामः** श्यामे हलायुधे । पशुभेदे सिते चारौ राघवे रेणुकासुते । **रामं** तु वास्तुके कुष्ठे **रामा** हिङ्गुलिनीस्त्रियोः' इति हैमः ॥ (१) ॥*॥ उत्कृष्टस्त्रीविशेषाणां पृथक् पृथक् । एते द्वादश भेदाः **'स्त्रीणाम्'** ॥

कोपना सैव भामिनी ।

कोपेति ॥ कुप्यति तच्छीला । 'कुप क्रोधे' (दि० प० से०) 'क्रुधमण्डार्थेभ्यश्च' (३।२।१५१) इति युच् ॥ (१) ॥*॥ अवश्यं भामते । 'भाम क्रोधे' (भ्वा० आ० से०) । 'आवश्यका–' (३।३।१७०) इति णिनिः । ग्रह्यादिणिनिः (३।१।१३४) वा ॥ (२) ॥*॥ द्वे **'कोपनस्त्रियाः'** ॥

वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी ॥ ४ ॥

वरेति ॥ वर आरोहो नितम्बोऽस्याः ॥ (१) ॥*॥ मत्ता क्षीबेव काशते भाति । 'कर्तर्युपमाने' (३।२।७९) इति णिनिः ॥*॥ दन्त्यसपक्षे 'कस गतिशासनयोः' (अ० आ० से०) ॥ (२) ॥*॥ उत्कर्षार्थात् 'उत्' शब्दात्तमप् (५।३।५५) । द्रव्यप्रकार्षान्नामुः (५।४।११) ॥ (३) ॥*॥ वरवर्णोऽस्त्यस्याः । इनिः (५।२।११५) । 'शीते सुखोष्णसर्वाङ्गी ग्रीष्मे या सुखशीतला । भर्तृभक्ता च या नारी सा भवेद्वरवर्णिनी' इति रुद्रः ॥ (४) ॥*॥ चत्वारि **'अत्यन्तोत्कृष्टस्त्रियाः'** ॥

कृताभिषेका महिषी

कृतेति ॥ कृतोऽभिषेकोऽस्याः । मह्यते । 'मह पूजायाम्' (भ्वा० प० से०) 'अविमह्योष्टिषच्' (उ० १।४५) । **'महिषी** नृपयोषिति । सैरिभ्यामौषधीभेदे' इति हेमचन्द्रः ॥ (१) ॥*॥ एकम् **'पट्टाभिषिक्तनृपस्त्रियाः'** ॥

भोगिन्योऽन्या नृपस्त्रियः ।

भोगीति ॥ अतिशयितो भोगोऽस्याः । इनिः (५।२।११५) । 'विहाय महिषीमन्यराजयोषिति **भोगिनी'** (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'अन्यराजस्त्रियाम्'** ॥

पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी ॥ ५ ॥
भार्या जायाथ पुंभूम्नि दाराः

१—तथा च रसिकरञ्जनश्लेषः 'चिरमीक्षे महिलास्यम्' इति शृङ्गारवैराग्यार्थद्वयपरः । २—तथा च दमयन्तीश्लेषः 'परमहेलारतोऽप्यपारदारिकः' इति । ३—भावः शृङ्गारचेष्टाविशेषः । तद्युक्ता **'भाविनी'** —इति तु मुकुटः ॥

१—अथशब्दात् पुंभूम्नो न पूर्वभावत्वम्—इति स्वामी ॥

पत्नीति ॥ पत्युर्यज्ञे संयोगो यया । दंपत्योः सहाधिकारात् 'पत्युर्नो यज्ञसंयोगे' (४।१।३३) ॥ (१) ॥*॥ पाणिगृहीतोऽस्याः । 'पाणिगृहीती भार्यायाम्' (वा० ४।१।५२) इति ङीष् ॥ (२) ॥*॥ द्वयोः पूरणी । 'द्वेस्तीयः' (५।२।५४)। **'द्वितीया** तिथिगेहिन्योर्द्वितीयः पूरणे द्वयोः' इति हेमचन्द्रः ॥ (३) ॥*॥ सह धर्मोऽस्त्यस्याः । पत्या सह कर्मस्वधिकारात् । 'धर्मशीलवर्णान्ताच्च' (५।२।१३२) इतीनिः । वोपसर्जनस्य' (६।३।८२) इति सहस्य वा सः ॥ (४) ॥*॥ म्रियते । भूर्यते वा । 'डुभृञ् धारणपोषणयोः' (जु० प० अ०)। 'भृ भरणादौ' (क्या० प० से०) वा ण्यत् (३।१।१२४)। यत्तु—संज्ञायां भृञः (भ्वा० उ० अ०) 'ऋहलोर्ण्यत्' (३।१।१२४)—इति स्वामी व्याख्यत्। तन्न । 'संज्ञायां समजनिषद–' (३।३।९९) इति क्यपा भाव्यं परत्वात्। संज्ञापर्युदासः (३।१।११२) तु पुंलिङ्गे सावकाशः । 'तदनुबन्धकग्रहणे नातदनुबन्धकस्य' (प० ४।२।९) इति न्यायाद्भृञ एव क्यप् । न डुभृञः ॥ (५) ॥*॥ जायतेऽस्याम् । 'जनेर्यक्' (उ० ४।१११) । 'जायायास्तद्धि जायात्वं यदस्यां जायते पुनः' (९।८) इति मनुः ॥ (६) ॥*॥ दारयन्ति भ्रातॄन् 'दॄ विदारणे' (क्या० प० से०) । णिजन्तः । 'दारजारौ कर्तरि णिलुक् च' (वा० ३।३।२०) इति घञ् । यद्यपि दारयतेः पचाद्यचा (३।१।१३४) सिद्धम् । स्वरश्च समः । 'कर्षात्वतः–' (६।१।१५९) इति घञन्तोदात्तत्वात् । तथापि 'अच्कावशक्तौ' (६।२।१५७) इति स्वरबाधनार्थमिदम् ॥*॥ टाबन्तोऽपि । क्रोडा हारा तथा **दारा** त्रय एते यथाक्रमम् । 'क्रोडे हारे च दारेषु शब्दाः प्रोक्ता मनीषिभिः' इति व्याडिशुभाङ्कौ ॥ (७) ॥*॥ सप्त **'परिणीतायाः स्त्रियाः'** ॥

स्यात्तु कुटुम्बिनी ।

पुरंध्री

स्यादिति ॥ कुटुम्बमस्त्यस्याः । इनिः (५।२।११५)। **'कुटुम्बं** पोष्यवर्गे च' इत्यमरमाला ॥ (१) ॥*॥ **'पुरं** नपुंसकं गेहे' (इति मेदिनी) । पुरं धारयति । 'धृञ् धारणे' (भ्वा० उ० अ०) । स्वार्थण्यन्तः । 'संज्ञायां भृतॄवृ–' (३।२।४६) इति खच् । 'खचि ह्रस्वः' (६।४।९४) । गौरादिः (४।१।४।१) । पृषोदरादिः (६।३।१०९) हलन्तात् 'इगुपधात् किः'—इति मुकुटः । तन्न । धरतेर्हलन्तत्वेगुपधत्वयोरभावात् ॥ (२) ॥*॥ द्वे **'पुत्रादिमत्याः सधवायाः'** ॥

सुचरित्रा तु सती साध्वी पतिव्रता ॥ ६ ॥

सुचेति ॥ शोभनं चरित्रमस्याः ॥ (१) ॥*॥ अस्ति एकस्मिन् पत्यौ । 'अस भुवि' (अ० प० से०) । शतृ (३।२।१२४) । 'श्नसोरल्लोपः' (६।४।१११) । 'उगितश्च' (४।१।६) इति ङीप् । **'सन्** साधौ धीरशस्त्योः । मान्ये सत्ये विद्यमाने त्रिषु साध्व्युमयोः स्त्रियाम्' (इति मेदिनी) ॥ (२) ॥*॥ साध्नोति परकार्यं परलोकं वा । 'साध संसिद्धौ' (स्वा० प० अ०) 'कृवापा–' (उ० १।१) इत्युण् 'वोतो गुण–' (४।१।४४) इति वा ङीष् ॥ (३) ॥*॥ पत्यौ व्रतं नियमोऽस्याः ॥ पतिव्रतमस्याः । पतिशब्दः पतिसेवायां लाक्षणिकः ॥ (४) ॥*॥ चत्वारि **'पतिसेवातत्परायाः'** ॥

कृतसापत्निकाध्यूढाधिविन्ना

कृतेति ॥ सपत्न्येव स्वार्थे कन् (५।३।७५) । कृता सपत्निका यस्याः ॥*॥ **'कृतसापत्निका'** इति क्वचित् पाठः । सपत्न्या भावः । ष्यञ् (५।१।१२४) । ङीष् (४।१।४१) यलोपः (६।४।१५०) स्वार्थे कन् (५।३।७५) ह्रस्वत्वम् (७।४।१३) च । कृता सापत्निका यस्याः ॥*॥ क्वचित् **'कृतसापत्नका'** इति पाठः । सपत्न्या आगतम् । 'तत आगतः' (४।३।७४) इत्यण् । स्वार्थे कन् (५।३।७५) । कृतं सपत्नकमस्याः । '–असुपः' (७।३।४४) इति पर्युदासान्नेत्वम् ॥ (१) ॥*॥ अधि उपरि ऊढमुद्वहनमस्याः । **'अध्यूढा** कृतसापत्न्यनार्या**मध्यूढ** ईश्वरे' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ अधि उपरि विन्नं लाभोऽस्याः । यद्वा अधिका विन्ना लब्धा यस्याः ॥ (३) ॥*॥ त्रीणि अनेकमार्थस्य **'प्रथममूढायाः'** ॥

अथ स्वयंवरा ।

पतिंवरा च वर्या च

अथेति ॥ स्वयं वृणीते । 'वृङ् संभक्तौ' (क्या० आ० से०) । 'संज्ञायां भृतॄवृजि–' (३।२।४६) इति खच् ॥ (१) ॥*॥ एवं पतिं वृणोति ॥ (२) ॥*) व्रियतेऽनया । 'अवद्यपण्य–' (३।१।१०१) इत्यनिरोधे यत् । (**'वर्या** पतिंवरायां स्त्री, वरेण्ये त्रिषु, ना स्मरे' इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'स्वेच्छाकृतपतिवरणायाः'** ॥

कुलस्त्री कुलपालिका ॥ ७ ॥

कुलेति ॥ कुलपालिका स्त्री । शाकपार्थिवादिः । (वा० २।१।७८) ॥ (१) ॥*॥ कुलं पालयति । 'पाल रक्षणे' (चु० प० से०) । 'कर्मण्यण्' (३।२।१) । स्वार्थे कन् (५।३।७५) ॥ (२) ॥*॥ द्वे **'व्यभिचारवारणेन कृतकुलरक्षायाः'** ॥

कन्या कुमारी

केति ॥ कनति । कन्यते वा । 'कनी दीप्तौ' (भ्वा० प० से०)। अन्यादिः (उ० ४।११२) । **'कन्या** नार्यां कुमार्यां च राश्यौषधिविशेषयोः' इति हैमः । **'कन्या** कुमारिकानार्यो-

---

१—'हट्टचन्द्रः' इति वा पाठः ॥ २—(पुरं धरति । 'अच इः', (उ० ४।१३९) । पृषोदरादित्वात् (६।३।१०९) धात्वकारलोपमुमागमौ । पुरंभिर्हस्वान्तापि । तथा च । 'तौ ख्यातकैर्बन्धुमता च राज्ञा पुरंभिभिश्च क्रमशः प्रयुक्तम्' इति रघुः—इति मुकुटः ॥

रौषधिराशिभेदयोः' (इति मेदिनी) ॥ (१) ॥*॥ कम्यते । 'कमु कान्तौ' (भ्वा० आ० से०) । 'कमेः किदुच्चोपधायाः' (उ० ३।१३८) इत्यारन् । 'वयसि प्रथमे' (४।१।२०) इति ङीप् । पूर्वत्र तु न । 'कन्यायाः कनीन च' (४।१।११६) इति लिङ्गात् । यद्वा कुमारयति । 'कुमार क्रीडायाम्' (चु० उ० से०) । अच् (३।१।१३४) । कुत्सितो मारोऽस्या वा । **'कुमारः** स्याच्छुके स्कन्दे युवराजेऽश्वचारके । बालके वरुणद्रौ ना न द्वयोर्जात्यकाञ्चने' (इति मेदिनी) । **'कुमारी** रामतरुणीनवमाल्योर्नदीभिदि । कन्यापराजितागौरीजम्बूद्वीपेषु च स्मृता' इति विश्वः । ('जम्बूद्वीपविभागे च' इति हैमः) ॥ (२) ॥*॥ द्वे **'प्रथमवयस्ककन्यायाः'** ॥

गौरी तु नग्निकानागतार्तवा ।

गौरीति ॥ गूयते । 'गुङ् शब्दे' (भ्वा० आ० अ०) 'ऋजेन्द्र–' (उ० २।२८) इत्यादिना रन्नन्तो निपातितः । गौरादित्वात् (४।१।४१) ङीष् । **'गौरी** त्वसंजातरजःकन्याशंकरभार्ययोः । रोचनीरजनीपिङ्गाप्रियंगुवसुधासु च । आपगाया विशेषेऽपि यादसांपतियोषिति' (इति मेदिनी) ॥ (१) ॥*॥ नंजते स्म । 'ओणजी व्रीडे' (तु० आ० से०) ॥ 'गत्यर्था–' (३।४।७२) इति क्तः । 'ओदितश्च' (८।२।४५) इति नत्वम् । स्वार्थे कन् (५।३।७५) । **'नग्निका** तु कुमार्यां स्यात् पुमान् क्षपणबन्दिनोः' (इति मेदिनी) ॥ (२) ॥*॥ अनागतमार्तवं रजोऽस्याः ॥ (३) ॥*॥ त्रीणि **'अदृष्टरजस्कायाः'** ॥

स्यान्मध्यमा दृष्टरजाः

स्यादिति ॥ बाल्ययौवनयोर्मध्ये भवा । 'मध्यान्मः' (४।३।८) तयोर्मध्ये मा शोभा यस्याम्, वा । **'मध्यमो** मध्यजेऽन्यवत् । पुमान् खरे मध्यदेशेऽप्यवलग्ने तु न स्त्रियाम् । स्त्रियां दृष्टरजोनार्यां कर्णिकाङ्गुलिभेदयोः । व्यक्षरच्छन्दसि तथा' (इति मेदिनी) ॥ (१) ॥*॥ दृष्टं रजो यस्याः, यया, वा ॥ (२) ॥*॥ द्वे **'प्रथमप्राप्तरजोयोगायाः'** ॥

तरुणी युवतिः समे ॥ ८ ॥

तेति ॥ तरति । 'तॄ प्लवनतरणयोः' (भ्वा० प० से०) । 'त्रो रश्च लो वा' (उ० ३।५४) इत्युनन् । 'वयसि–'(४।१।२०) इति ङीप् । 'नञ्स्नञीकक्–' (वा० ४।१।१५) इति वा । 'तरुणी **तलुनीति** च' इति शब्दभेदः । ('**तलुनः** पवने यूनि युवत्यां **तलुनी** स्मृता' इति मेदिनी) ॥ (१) ॥*॥ यौति । 'यु मिश्रणे' (अ० प० अ०) । 'कनिन्युवृषि–' (उ० १।१५६) इति कनिन् । 'यूनस्तिः' (४।१।७७) । यत्तु—'यौतेः कतिः' इति कतिप्रत्ययान्तात् पाक्षिके ङीषि (ग० ४।१।४५) **'युवती'**—इति मुकुटो व्याचख्यौ । तन्न । यौतेः शत्रन्तात्–' ङीपि (४।१।१५) युवतिशब्दाद्वा 'सर्वतोऽक्तिन्नर्थात्' (ग० ४।१।१५) इति ङीषा गतार्थत्वात् । उज्ज्वलदत्तादिवृक्तसूत्राभावाच्च । स्त्रीसामान्येऽप्ययम् । 'प्रमदा चेति विज्ञेया युवतिस्तु तथा स्मृता' इति भागुरिः ॥ (२) ॥*॥ द्वे **'मध्यमवयसि वर्तमानायाः'** ॥

समाः स्नुषाजनीवध्वः

समा इति ॥ स्नौति । 'ष्णु प्रस्रवणे' (अ० प० से०) । 'स्नुवृश्चिकृत्यृषिभ्यः कित्' (उ० ३।६६) इति सः ॥ (१) ॥*॥ जायते वंशोऽस्याम् । 'जनिघसिभ्यामिण्' (उ० ४।१३०) । 'जनिवध्योश्च' (७।३।३५) इति न वृद्धिः । 'कृदि–' (ग० ४।१।४५) इति वा ङीष् । **'जनो** लोके जगद्भेदे पृथग्जने । जनी स्नुषावनितयोः' इति हैमः । **'जनी** सीमन्तिनी वध्वोरुत्पत्तावौषधीभिदि' (इति मेदिनी) ॥ (२) ॥*॥ वहति । 'वहो धश्च' (उ० १।८३) इत्यूः । **'वधूः** पत्न्यां स्नुषानार्योः स्पृक्कासारिवयोरपि । नवपरिणीतायां च' इति हैमः ॥ (३) ॥*॥ त्रीणि **'पुत्रभार्यायाः'** ॥

चिरण्टी तु सुवासिनी ।

चिरेति ॥ चिरेणाटति पितृगेहाद्भर्तृगेहम् । अच् (३।१।१४) पृषोदरादिः (६।३।१०९) । 'वयस्यचरमे' (वा० ४।१।२०) इति ङीप् ॥*॥ चरति । बाहुलकादण्टप्रत्ययें **'चरण्टी'** इत्येके ॥*॥—चिरिणोति चिरण्टी ।—इति स्वामी । तत्र 'चिरि हिंसायाम्' (स्वा० प० से०) इति धातुः; पृषोदरादिः । (**चिरिण्टी** तु सुवासिन्यां स्याद्वितीयवयःस्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ सु अतीव वसति पितृगृहे तच्छीला । 'सुप्यजातौ–' (३।२।७८) इति णिनिः ॥*॥ **'स्ववासिनी'** इत्यपि पाठः । स्वेषु पित्रादिषु वस्तुं शीलमस्याः । **'स्ववासिन्यां** चिरिण्टी स्याद्वितीयवयसि स्त्रियाम्' इति रुद्रः ॥ (२) ॥*॥ द्वे **'प्राप्तयौवनायाः पितृगेहस्थायाः'** ॥

इच्छावती कामुका स्यात्

इच्छेति ॥ इच्छास्त्यस्याः । 'मतुप्' (५।२।११५) ॥ (१) ॥*॥ कामयते । 'कमु कान्तौ' (भ्वा० आ० से०) । 'लषपतपद–' (३।२।१५४) इत्युकञ् । **'कामुकाः** कममे-

१ मुकुटस्तु—लजते । 'ओलजी व्रीडे' (तु० उ० से०)। पृषोदरादित्वादादेर्नत्वम् । केचित्तु 'नोलजी' इति तवर्गपञ्चमादिं पठन्ति—इत्याह ॥

१—पितृकुलस्नेहाच्चिरमिटति गच्छति । 'चिरम्' इत्युपपदे 'इट गतौ' इत्यत 'इगुपध–' इति के पृषोदरादित्वाच्चिराकारनाशे इकारस्य विपर्यये मकारस्य परसवर्णत्वे 'वयसि प्रथमे ङीपि चिरिण्टी'—इति मुकुटः । हैमस्तु स्वोपज्ञनाममालाव्याख्यायाम्—चिरिः सौत्रः स्वादिः । चिरिणोति चिरिण्टी । 'ङिण्टश्चर् च वा' इति साधुः । **'चरिण्टी'** इत्यपि । **'चिरण्टी'** इत्यमरः । **'चरण्टी'** इत्यन्ये—इति प्रोक्तवान् ॥

ऽशोकपादपे चातिमुक्तके' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'धनादीच्छायुक्तायाः' 'यभनादीच्छावत्याः'** वा ॥

वृषस्यन्ती तु कामुकी ॥ ९ ॥

वृषेति ॥ **'वृषो** नरो **वृषः** कालः' इत्यनेकार्थमञ्जरी । वृषं नरं शुक्लं वेच्छत्यात्मनः । 'सुप आत्मनः क्यच्' (३।१।८) । 'अश्वक्षीर–' (७।१।५१) इत्यत्र 'अश्ववृषयोर्मैथुनेच्छायाम्' इति वचनादसुक् । लटः शता (३।२।१२४)। 'उगितश्च' (४।१।६) इति ङीप् । 'आच्छीनद्योर्नुम्' (७।१।८०) ॥ (१) ॥*॥ 'जानपद–' (४।१।४२) इति ङीष् । कामुकी ॥ (२) ॥*॥ द्वे **मैथुनेच्छावत्याः'** ॥

कान्तार्थिनी तु या याति संकेतं साभिसारिका ।

कान्तेति ॥ अभिसरति । 'सृ गतौ' (भ्वा० प० अ०) ण्वुल् (३।१।१३३) ॥ (१) ॥*॥ एकं **'भर्त्रिच्छया रतिस्थानं गच्छन्त्याः'** ॥

पुंश्चली चर्षणी बन्धक्यसती कुलटेत्वरी ॥ १० ॥
स्वैरिणी पांशुला च स्यात्

पुंश्चलीति ॥ पुंसो भर्तुः सकाशाच्चलति पुरुषान्तरं गच्छति । 'चल गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) । गौरादिः (४।१।४१) ।—पुमांसं वृत्ताच्चालयति च्यावयति । कर्मण्यण्तान्ङीप् (४।१।१५)—इति मुकुटः । तन्न । 'चल कम्पने' इत्यनेन कम्पनादन्यत्र मित्त्वाविधानाद्बुद्धिप्रसङ्गात् । संज्ञापूर्वकत्वं वा वृद्धेः ॥ (१) ॥*॥—कर्षति मनः । 'कृष विलेखने' (भ्वा० प० अ०) । 'कृषेरादेश्च चः' (२।१०४) इत्यनिः—इति स्वामी ॥*॥ 'धर्षणी' इति वा पाठः । धर्षयति । 'जिधृषा प्रागल्भ्ये' (स्वा० प० से०) । ल्युट् (३।३।११३) । **'धर्षणं** स्यात्परिभवे रतेऽसत्यां तु **'धर्षणी'** (इति मेदिनी) ॥*॥ **'धर्षिणी'** इति क्वचित् पाठः । 'आवश्यका–' (३।३।१७०) इति णिनिः ॥ (२) ॥*॥ बध्नाति मनोऽत्र । 'बन्ध बन्धने' (क्र्या० प० अ०) । ण्वुल् (३।१।१३३) । गौरादिः (४।१।४१) । (**'बन्धकः** स्याद्विनिमये पुंश्चल्यां स्याच्च **बन्धकी'** इति मेदिनी) ॥ (३) ॥*॥ सत्यात् भिन्ना ॥ (४) ॥*॥ अटति । 'अट गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) । **'कुलं** जनपदे गेहे' इति विश्वः । कुलस्य अटा । शकन्ध्वादिः (वा० ६।१।९४) । **'कुलटा** मनःशिलायां नेपाल्यामपि योषिति' (इति मेदिनी) ॥ (५) ॥*॥ एति तच्छीला 'इण्नशृजि–' (३।२।१६३) इति क्वरप् । 'टिड्ढा–' (४।१।१५) इति ङीप् । **'इत्वर्यसत्यां** पथिके क्रूरकर्मणि च त्रिषु' (इति मेदिनी) ॥ (६) ॥*॥ स्वया, इच्छया स्वेन स्वातन्त्र्येण, वा ईरितुं शीलमस्याः । 'ईर गतौ' (अ० आ० से०) । 'सुपि–' (३।२।७८) इति णिनिः । 'खादीरेरिणोः' (वा० ६।१।८९) इति वृद्धिः ॥ (७) ॥*॥ पांशु पापमस्त्यस्याः 'खमुख–' (वा० ५।२।१०७) इति रः । 'कपिलकादिः' (वा० ८।२।१८) सिध्मादिलात् (५।२।९७) लज् वा । पांशु लाति वा । 'आतोऽनुप–' (३।२।३) इति कः ॥ (८) ॥*॥ अष्टौ **'असत्याः' 'स्वैरिण्याः'** ॥

अशिश्वी शिशुना विना ।

अशीति ॥ न शिशुर्यस्याः । 'सख्यशिश्वी–' (४।१।६२) इति साधुः ॥ (१) ॥*॥ एकम् **'अपत्यरहितायाः'** ॥

अवीरा निष्पतिसुता

अवीति ॥ वीरयति । 'वीर विक्रान्तौ' (चु० उ० से०) । अच् (३।१।१३४) 'पतिपुत्रवती **वीरा'** इति नाममाला । वीरायाः भिन्ना ॥ (१) ॥*॥ **'पतिपुत्ररहितायाः** ॥

विश्वस्ता विधवे समे ॥ ११ ॥

विश्वेति ॥ विफलं श्वसिति स्म । 'गत्यर्था–' (३।४।७२) इति क्तः । आगमशासनस्यानित्यत्वान्नेट् । **'विश्वस्तो** जातिर्विश्वासे **विश्वस्ता** विधवास्त्रियाम्' इति मेदिनी ॥ (१) ॥*॥ विगतो धवोऽस्याः ॥ (२) ॥*॥ 'विश्वस्ताविधवे तुल्ये विशस्तापतिनी च सा' इति वाचस्पतिः ॥*॥ द्वे **'रण्डायाः'** ॥

आलिः सखी वयस्या च

आलिरिति ॥ आलयति । 'अल भूषणादौ' (भ्वा० प० से०) । णिच् (३।१।२६) । 'अच इः' (उ० ४।१३९)। बाहुलकादिण्—इति मुकुटो व्यर्थः । **'आलिः** सखी सेतुरालिरालिरावलिरिष्यते' इति शाश्वतः ॥ (१) ॥*॥ समानं ख्यायते जनैः । 'समाने ख्यः स चोदात्तः' (उ० ४।१३७) इतीण् डित् समानस्य स च । 'सख्यशिश्वी–' (४।१।६२) इति ङीष् । **'सखा** मित्रे सहाये ना वयस्यायां **सखी** मता' (इति मेदिनी) ॥ (२) ॥*॥ वयसा तुल्या । 'नौवयोधर्म–' (४।४।९१) इति यत् ॥ (३) ॥*॥ त्रीणि **'सख्याः'** ॥

पतिवत्नी सभर्तृका ।

पतीति ॥ पतिरस्त्यस्याः । मतुप् (५।२।९४) । 'अन्तवैतपतिवतोर्नुक्' (४।१।३१) इति साधुः ॥ (१) ॥*॥ सह भर्त्रास्ति । 'नद्यृतश्च' (५।४।१५३) इति कप् ॥ (२) ॥*॥ द्वे **'जीवद्भर्तृकायाः'** ॥

वृद्धा पलिक्की

वृद्धेति ॥ वर्धते स्म 'वृधु वृद्धौ' (भ्वा० आ० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । **'वृद्धो** जीर्णे प्रवृद्धे ज्ञे त्रिषु क्लीबं तु शैलजे' (इति मेदिनी) ॥ (१) ॥*॥ पलितमस्त्यस्याः । अच् (५।२।१२७) । 'असितपलितयोः प्रतिषेधः'

१—भाष्ये त्वस्मिन् वार्तिके पांशुशब्दपाठो नोपलभ्यते ॥

'छन्दसि क्रमेके' (वा० ४।१।३९)। नान्तत्वात् (४।१।५) ङीप्॥ (२) द्वे **'पक्वकेश्याः'** ॥

प्रज्ञा तु प्राज्ञी

प्रज्ञेति ॥ प्रजानाति । 'आतश्चोपसर्गे' (३।१।१३६) इति कः । **'प्रज्ञस्तु पण्डिते वाच्यलिङ्गो बुद्धौ तु योषिति'** ॥ (१) ॥*॥ प्रज्ञाद्यण् (५।४।३८) वा ॥ (२) ॥*॥ द्वे **'स्वयंज्ञाज्ञ्याः'** ॥

प्राज्ञा तु धीमती ॥ १२ ॥

प्राज्ञेति ॥ प्रज्ञास्त्यस्याः । 'प्रज्ञाश्रद्धा–' (५।२।१०१) इति णः ॥ (१) ॥*॥ धीरस्त्यस्याः । मतुप् (५।२।९४) ॥ (२) ॥*॥ द्वे **'प्रशस्तबुद्धेः'** ॥

शूद्री शूद्रस्य भार्या स्यात्

शूद्रीति ॥ शूद्रस्य स्त्री । 'पुंयोगा–' (४।१।४८) इति ङीष् ॥ (१) ॥*॥ एकं भिन्नजातीयाया अपि **'शूद्रभार्यायाः'** ॥

शूद्रा तज्जातिरेव च ।

शूद्रेति ॥ 'शूद्रा चामहत्पूर्वा जातिः' (भ्वा० ४।१।४) इति टाप् ॥ (१) ॥*॥ एकमन्यभार्याया अपि **'शूद्रजातीयायाः'** ॥

आभीरी तु महाशूद्री जातिपुंयोगयोः समा ॥ १३ ॥

आभीति ॥ आभीरस्य स्त्री, तज्जातीया वा । 'पुंयोगात्–' (४।१।४८) इति 'जातेः–' (४।१।६३) इति च ङीष् ॥ (१) ॥*॥ एवं महाशूद्री ॥*॥ या तु महती शूद्रा । तत्र **'महाशूद्रा'** इत्येव ॥ (२) ॥*॥ द्वे **'आभीर्याः'** ॥

अर्याणी स्वयमर्या स्यात्

अर्येति ॥ स्वयं पुंयोगं विना जातिमात्रे । 'अर्यक्षत्रियाभ्यां वा' (वा० ४।१।४९) इति स्वार्थे ङीषानुकौ ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'वैश्यजातीयायाः'** ॥

क्षत्रिया क्षत्रियाण्यपि ।

क्षत्रियेति ॥ एवम् ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'क्षत्रियजातीयायाः'** ॥

उपाध्यायाप्युपाध्यायी

उपेति ॥ उपेत्याधीयतेऽस्याः । 'इङश्च' (३।३।२१) इत्यत्र 'अपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीष्' इति (वार्तिकेन) घञ् ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'स्वयं विद्योपदेशिन्याः'** ॥

स्यादाचार्यापि च स्वतः ॥ १४ ॥

स्यादिति ॥ अः चर्यते । 'चर गतौ' (भ्वा० प० से०) । 'ऋहलोर्ण्यत्' (३।१।१२४) ॥ (१) ॥*॥ एकं **'स्वयं मन्त्रव्याख्याज्ञ्याः'** ॥

आचार्यानी तु पुंयोगे

आचेति ॥ आचार्यस्य स्त्री । 'इन्द्रवरुण–' (४।१।४९) इति ङीषानुकौ । आचार्यादणत्वं च' (वा० ४।१।४९) इति णत्वाभावः ॥ (१) ॥*॥ एकम् **'आचार्यभार्यायाः'** ॥

स्यादर्यी

स्यादिति ॥ अर्यस्य स्त्री । 'पुंयोगात्–' (४।१।४८) इति ङीष् ॥ (१) ॥*॥ एकं **'वैश्यपत्न्या अन्यजातीयाया अपि'** ॥

क्षत्रियी तथा ।

क्षेति ॥ एवम् । क्षत्रियस्य स्त्री ॥ (१) ॥*॥ एकम् **'अन्यजातीयाया अपि क्षत्रियपत्न्याः'** ॥

उपाध्यान्युपाध्यायी

उपेति ॥ उपाध्यायस्य स्त्री । **'मातुलोपाध्याय–'** (वा० ४।१।४९) ङीषानुकौ ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'विद्योपदेष्टृभार्यायाः'** ॥

पोटा स्त्रीपुंसलक्षणा ॥ १५ ॥

पोटेति ॥ पोटयति । 'पुट भासने' चुरादि । अच् (३।१।१३४) ।—पुटति । 'पुट संश्लेषणे' (तु० प० से०) । अच् (३।१।१३४)—इति स्वामीमुकुटौ । तन्न । पुटेः कुटादित्वाद्गुणाभावप्रसङ्गात् ॥ (१) ॥*॥ एकं **'स्त्रीपुंसयोः स्तनश्मश्वादिचिह्नयुक्तायाः'** ॥

वीरपत्नी वीरभार्या

वीति ॥ वीरः पतिरस्याः । 'नित्यं सपत्न्यादिषु' (४।१।३५) इति साधुः ॥ (१) ॥*॥ वीरस्य भार्या ॥ (२) ॥*॥ द्वे **'वीरस्य भार्यायाः'** ॥

वीरमाता तु वीरसूः ।

वीरमेति ॥ वीरस्य माता ॥ (१) ॥*॥ वीरं सूते । 'षूङ् प्राणिगर्भविमोचने' (अ० आ० से०) 'सत्सूद्विष–' (३।२।६१) इति क्विप् ॥ (२) ॥*॥ द्वे **'वीरस्य मातरि'** ॥

जातापत्या प्रजाता च प्रसूता च प्रसूतिका ॥ १६ ॥

जातेति ॥ जातमपत्यमस्याः ॥ (१) ॥*॥ प्रजायते स्म । अन्तर्भावितण्यर्थोऽत्र जनिः । 'गत्यर्था–' (३।४।७२) इति क्तः ॥ (२) ॥*॥ प्रासविष्ट । षूङुक्तः । प्राग्वत् ॥ (३) ॥*॥ स्वार्थे कन् (५।३।७५) 'सूतिकापुत्रिका–' (वा० ७।३।४५) इतीत्वं वा । **'प्रसूतं कुसुमे क्लीबं त्रिषु संजातसूनयोः'** (इति मेदिनी) ॥ (४) ॥*॥ चत्वारि **'प्रसूतायाः'** ॥

स्त्री नग्निका कोटवी स्यात्

स्त्रीति ॥ नजते स्म । 'ओ लजी व्रीडे' (तु० आ० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । 'ओदितश्च' (८।२।४५) इति नत्वम् । स्वार्थे कन् (५।३।७५) ॥ **'नग्नो बन्दिक्षपण-**

योः पुंसि, त्रिषु विवाससि' (इति मेदिनी) ॥ (१) ॥*॥ कोटनम् । 'कुट कौटिल्ये' (तु० प० से०) । घञ् (३।३।१८) । कोटं वाति । 'आतोऽनुप–' (३।२।३) इति कः । गौरादिः (४।१।४१) ॥*॥ **'कोट्टवी'** इति पाठे 'कुट्ट छेदने' (चु० प० से०) । बाहुलकादुणः ॥ (२) ॥*॥ द्वे **'नग्नायाः'** ॥

दूतीसंचारिके समे ।

दूतीति ॥ दवति । 'दु गतौ' (भ्वा० प० अ०) । दुनोति 'दु दु उपतापे' (स्वा० प० अ०) वा । 'दुतनिभ्यां दीर्घश्च' (उ० ३।९०) इति क्तः । गौरादिः (४।१।४१) यद्वा दूयते 'दूङ् परितापे' (दि० आ० से०) । क्तिच् (३।३।१७४) । दूयन्तेऽनया वा । बाहुलकात् क्तिन् । 'कृत–' (ग० ४।१।४५) इति वा ङीष् । गौरादिः (४।१।४१) वा ॥ (१) ॥*॥ संचरति । संचारयति, वा । 'चर गतौ' (भ्वा० प० से०) । ण्वुल् (३।१।१३३) **'संचारिका** तु युगले कुट्टनीघ्राणयोरपि' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ द्वे **'दूत्याः'** ॥

कात्यायन्यर्धवृद्धा या कापायवसनाधवा ॥ १७ ॥

केति ॥ कतस्यापत्यम् । 'गर्गादिभ्यो यञ्' (४।१।१०५) । 'सर्वत्र लोहितादि–' (४।१।१८) इति फ्यः । ऋषिपत्नीसदृशत्वात् । **'कात्यायनी** वररुचौ विशेषे च मुनेः पुमान् । कापायवस्त्रविधवार्धजरत्युभयोः स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ एकं **'विशेषणत्रयवत्याः'** ॥

सैरंध्री परवेश्मस्था स्ववशा शिल्पकारिका ।

सायिति ॥ सीरं धरति । 'धृञ् धारणे' (भ्वा० उ० अ०) । मूलविभुजादिकः (वा० ३।२।५) बाहुलकान्मुक् । सीरंध्रस्येयम् । 'तस्येदम्' (४।३।१२१) इत्यण् । शिल्पकरणात् कर्षकस्त्रीव । यद्वा स्वैरं स्वाच्छन्द्यं धरति । प्राग्वत् कः । पृषोदरादिः (६।३।१०९) । गौरादिः । (४।१।४१) । **'सैरंध्री** परवेश्मस्थशिल्पकृत्स्ववशस्त्रियाम्' इति दन्त्यादौ रभसः । 'चतुःषष्टिकलाभिज्ञा शीलरूपादिसेविनी । प्रसाधनोपचारज्ञा **सैरंध्री** परिकीर्तिता' इति काल्यः (**'सैरिंध्री'** इति) इकारमध्यपाठे पृषोदरादित्वं (६।३।१०९) बोध्यम् ॥ (१) ॥*॥ एकं **'विशेषणत्रयवत्याः'** ॥

असिक्नी स्यादवृद्धा या प्रेष्यान्तःपुरचारिणी ॥ १८ ॥

असीति ॥ सिनोति 'षिञ् बन्धने' (स्वा० उ० अ०) । 'अञ्जिघृसिभ्यः क्तः' (उ० ३।८९) । यद्वा सीयते स्म । क्तः (३।२।१०२) 'द्यतिस्यतिमास्थामित्ति किति' (७।४।४०) इतीत्वम् । सिता शुक्लकेशा । तद्विन्ना । 'छन्दसि क्नमेके' (वा० ४।१।३९) इति तस्य क्नः । नान्तत्वान्ङीप् (४।१।५) ।—द्वे वाक्ये (**'असिक्नयन्तःपुरप्रेष्या'** इति हैमात्)—इत्येके ॥ **'असिक्निका** स्यादवृद्धा या प्रेष्यान्तःपुरोषिता' इति काल्यः ॥ (१) ॥*॥ एकं **'कृष्णकेशादित्रिविशेषणायाः'** ॥

वारस्त्री गणिका वेश्या रूपाजीवा

वारेति ॥ वारस्य वृन्दस्य स्त्री साधारणत्वात् ॥ (१) ॥*॥ गणः समूहोऽस्त्यस्याः भर्तृत्वेन । ठन् (५।२।११५) ॥ गणयति । 'गण संख्याने' (चु० उ० से०) । ण्वुल् (३।१।१३३) वा ॥ (२) ॥*॥ **'वेशो** वेश्यागृहे गृहे । नेपथ्ये च' (इति मेदिनी) । वेशेन नेपथ्येन शोभते । 'कर्मवेशाद्यत्' (५।१।१००) । वेशे वेश्यावाटे भवा वा । 'दिगादिभ्यो यत्' (४।३।५४) वेशः प्रवेशोऽस्त्यस्याः । 'अन्येभ्योऽपि–' (वा० ५।४।१२०) इति यच् वा । **'वेश्यं** वेश्यागृहे क्लीबं गणिकायां तु योषिति' (इति मेदिनी) ॥*॥ **'वेष्या'** इति मूर्धन्यमध्यपाठोऽपि । वेवेष्टि । 'विष्लृ व्याप्तौ' (जु० उ० अ०) । अञ्यादिः (उ० ४।११२) ॥ (३) ॥*॥ रूपमाजीवोऽस्याः ॥ (४) ॥*॥ चत्वारि **'वेश्यायाः'** ॥

अथ सा जनैः ।

सत्कृता वारमुख्या स्यात्

अथेति ॥ वारे वेश्यावृन्दे मुख्या ॥ (१) ॥*॥ एकम् **'जनैः सत्कृतवेश्यायाः'** ॥

कुट्टनी शंभली समे ॥ १९ ॥

कुट्टेति ॥ कुट्टयति । 'कुट्ट छेदने' (चु० प० से०) । ल्युट् (३।३।११३) ॥ (१) ॥*॥ शं सुखं भलते । 'भल परिभाषणे' (भ्वा० आ० से०) । अच् (३।१।१३४) । गौरादिः (४।१।४१) । 'शालूकं शंभलीशललशुष्क–' इति शभेदात्तालव्यादिः ॥*॥ सं भलते । इति (**संभली**) दन्त्यादिरपि ॥ (२) ॥*॥ द्वे **'परनारीं पुंसा संयोजयित्र्याः'** ॥

विप्रश्निका त्वीक्षणिका दैवज्ञा

विप्रेति ॥ विविधः प्रश्नोऽस्त्यस्याः । ठन् (५।२।११५) ॥ (१) ॥*॥ शुभाशुभयोरीक्षणमस्त्यस्याः । ठन् (५।२।११५) ॥ (२) ॥*॥ दैवं शुभाशुभं जानाति । 'आतोऽनुप–' (३।२।३) इति कः । **'दैवज्ञो** गणके पुमान् । **दैवज्ञेक्षणिकायां** स्त्री' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'लक्षणादिना शुभाशुभे जानत्याः'** ॥

अथ रजस्वला ।

स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्पवत्यपि ॥ २० ॥
ऋतुमत्यप्युदक्यापि

अथेति ॥ रजोऽस्त्यस्याः । 'रजःकृष्या–' (५।२।११२) इति वलच् । 'तसौ मत्वर्थे' (१।४।१९) इति भत्वान्न रुत्वम् ॥ (१) ॥*॥ स्त्रीधर्मो रजोऽस्त्यस्याः । इनिः (५।२।११५) ॥ (२) ॥*॥ अवति लज्जया । 'अव रक्षणादौ' (भ्वा० प० से०) । 'अवितॄस्तॄतन्त्रिभ्य ईः' (उ० ३।१५८) ॥*॥ 'अविं स्त्रीधर्मिणीं विद्यात्' इति काल्यात् (**अविः**) ह्रस्वान्तापि । 'सर्वधातुभ्य इन्' (उ० ४।११८) ॥ (३) ॥*॥ अत्रेरपत्यम् ।

'इतश्चानिञः' (४।१।१२२) इति ढक्। आत्रेयीवागम्यत्वात्। **'आत्रेयो मुनिरात्रेयी** पुष्पवत्यां सरिद्भिदि' इति हैमः ॥ (४) ॥*॥ मलमस्त्यस्याः। इनिः (५।२।११५)। **'मलिनं** कृष्णदोषयोः। **मलिनी** रजस्वलायाम्' इति हैमः ॥ (५) ॥*॥ पुष्पं रजोऽस्त्यस्याः। मतुप् (५।२।९४) ॥ (६) ॥*॥ ऋतुरस्त्यस्याः। मतुप् (५।२।९४) ॥ (७) ॥*॥ उदकमर्हति। 'संज्ञायाम्' ( ) इति यत् ॥ (८) ॥*॥ अष्टौ **'रजस्वलायाः'** ॥

स्याद्रजः पुष्पमार्तवम्।

स्यादिति ॥ रज्यतेऽनेन। 'भूरञ्जिभ्यां कित्' (उ० ४।२१६) इत्यसुन्। **'रजः** क्लीबं गुणान्तरे। आर्तवे च परागे च रेणुमात्रे च दृश्यते' (इति मेदिनी) ॥ (१) ॥*॥ पुष्पते। 'पुष्प विकसने' (दि० प० से०)। घञ् (३।३।१९)। **'पुष्पं** विकासिकुसुमस्त्रीरजःसु नपुंसकम्' (इति मेदिनी) ॥ (२) ॥*॥ ऋतुरेव। प्रज्ञादिषु। (५।४।३८) **'आर्तवं** स्त्रीरजे पुष्पे क्लीबं स्याद्दनुजे त्रिषु' (इति मेदिनी) ॥ (३) ॥*॥ (त्रीणि **'स्त्रीपुष्पस्य'**) ॥

श्रद्धालुर्दोहदवती

श्रेति ॥ श्रद्दधाति तच्छीला। 'स्पृहिगृहि-' (३।२।१५८) इत्यालुच्। **'श्रद्धालुर्दोहदिन्यां स्त्री** श्रद्धायुक्ते च वाच्यवत्' (इति मेदिनी) ॥ (१) ॥*॥ दोहदं गर्भिण्यभिलाषोऽस्त्यस्याः। मतुप् (५।२।९४) ॥ (२) ॥*॥ द्वे (गर्भवशात्) **'अभिलाषविशेषवत्याः'** ॥

निष्कला विगतार्तवा ॥ २१ ॥

नीति ॥ **'कलं** शुक्रे त्रिष्वजीर्णे नाव्यक्तमधुरध्वनौ' (इति मेदिनी)। कलान्निष्क्रान्ता। 'निरादयः क्रान्ताद्यर्थे' (वा० २।२।१८) इति समासः। निर्गतं कलं शुक्रमस्या वा। **'निष्कलं** तु कलाशून्ये नष्टवीर्ये तु वाच्यवत्' (इति मेदिनी) ॥ (१) ॥*॥ विगतमार्तवं रजोऽस्याः ॥ (२) ॥*॥ द्वे **'रजोहीनायाः'** ॥

आपन्नसत्त्वा स्याद्दुर्विण्यन्तर्वत्नी च गर्भिणी।

आपेति ॥ आपन्नः सत्त्वो जन्तुरनया, अस्यां वा (१) ॥*॥ **'गुरुस्त्रिलिङ्ग्यां महति दुर्जरालघुनोरपि'** (इति मेदिनी)। गुरुर्दुर्जरोऽलघुर्वा गर्भोऽस्त्यस्याः। व्रीह्यादीनिः (५।२।११६)। संज्ञापूर्वकत्वान्न गुणः (६।४।१४६)। यद्वा गर्वते। 'गर्वेरत उच्च' (उ० २।५४) इतीनन्। गौरादिः (४।१।४१) ॥ (२) ॥*॥ अन्तरस्त्यस्यां गर्भः। 'अन्तर्वत्पतिवतोर्नुक्' (४।१।३२) इति साधुः ॥ (३) ॥*॥ गर्भोऽस्त्यस्याः। इनिः (५।२।११५) ॥ (४) ॥*॥ चत्वारि **'गर्भिण्याः'** ॥

गणिकादेस्तु गाणिक्यं गार्भिणं यौवतं गणे ॥ २२ ॥

गेति ॥ गणिकानां समूहः। 'गणिकायाश्च यत्' वाच्यः (वा० ४।२।४०) ॥ (१) ॥*॥ गर्भिणीनां समूहः। 'भिक्षादिभ्योऽण्' (४।२।३८) 'भस्याढे तद्धिते' (वा० ६।३।३५) इति पुंवद्भावः। 'नस्तद्धिते' (६।४।१४४) इति टेर्लोपे प्राप्ते 'इनण्यनपत्ये' (६।४।१६४) इति प्रकृतिभावः ॥ (१) ॥*॥ युवतीनां समूहः। भिक्षादिभ्योऽण् (४।२।३८)। 'भस्याढे तद्धिते' (वा० ६।३।३५) इति पुंवद्भावः। यौतेः शत्रन्तात् 'उगितश्च' (४।१।६) इति ङीप्रन्तो युवतीशब्दोऽयम्। 'यूनस्तिः' (४।१।७७) इति स्त्र्यन्तस्य तु अणि (४।२।३७) विवक्षिते पुंवद्भावे (वा० ६।३।३५) 'अन्' (६।४।१६७) इति प्रकृतिभावे च **'यौवनम्'** इत्येव रूपम्। नच—भिक्षादिषु (४।२।३८) 'युवति' शब्दपाठसामर्थ्याच्च पुंवत्त्वम्। अन्यथा पुंवद्भावेन तैर्निवृत्तावनुदात्तादित्वाभावात् 'अजः' (४।२।४४) अप्राप्तौ 'तस्य समूहः' (४।२।३७) इत्यणि सिद्धे भिक्षादिपाठवैयर्थ्यात्—इति वाच्यम्। भिक्षादिषु 'युवति' शब्दपाठस्य ('भिक्षादिषु युवतिग्रहणानर्थक्यं पुंवद्भावस्य सिद्धत्वात्प्रत्ययविधौ' इत्यादिग्रन्थेन) भाष्ये (४।२।३८) प्रत्याख्यानात्। एतेन—'युवत्या अपुंवत्' इति गणपाठात्—इति स्वामी—युवतीशब्दस्य भिक्षादिषु पाठाङ्गीकारकृतो मतभेदः—इति मुकुटश्च प्रत्युक्तः ॥ (१) ॥*॥ एकैकम् **'समूहस्य'** ॥

पुनर्भूर्दिधिषूरूढा द्विः

पुनरिति ॥ पुनर्भवति संस्कृता। क्विप् (३।२।७६) ॥ (१) ॥*॥ दधाति पापम्। 'डुधाञ् धारणपोषणयोः' (जु० उ० अ०)। धिष्यते। 'धिष शब्दे' (जु० प० से०)। 'अन्दृब्भ्मू-' (उ० १।९३) इति साधुः। यद्वा दिधिं धैर्यं स्यति। 'षोऽन्तकर्मणि' (दि०प०अ०)। प्राग्वत् ॥ (२) ॥*॥ द्वौवारौ ऊढा। 'द्वित्रिचतुर्भ्यः सुच्' (५।४।१८) 'अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनः' (याज्ञवल्क्यः १।६७) ॥*॥ द्वे **'द्विवारं वृतायाः'** ॥

तस्या दिधिषुः पतिः।

तेति ॥ तस्या दिधिष्वाः। दिधिषूमात्मन इच्छति। 'सुप आत्मनः क्यच्' (३।१।८)। क्विप् (३।२।१७८)। 'पुनर्भूपतिरुक्तश्च **पुनर्भूर्दिधिषूस्तथा'** इत्येषोऽप्यूदन्त इति स्वामी ॥*॥ मुकुटस्तु (दिधिषुम्) ह्रस्वमाह बाहुलकात् ॥ (१) ॥*॥ एकम् **'द्यूढापत्युः'** ॥

मनुस्तु—'ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा। सा चाग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूर्मता' ( ) इत्याह ॥

स तु द्विजोऽग्रेदिधिषूः सैव यस्य कुटुम्बिनी २३

स इति ॥ अग्रे प्रधानं दिधिषूर्यस्य। 'अग्रे' इति विभक्तिप्रतिरूपको निपातः। समासान्तविधेरनित्यत्वान्न कप् (५।४।१५३) ॥ (१) ॥*॥ द्विजः क्षत्रियादिरपि। 'दिधिषूः परपूर्वाग्रेदिधिषूस्तत्पुरंध्रिकः' इति नाममाला ॥*॥ एकं **'पुनर्भूप्रधानभार्यस्य'** ॥

कानीनः कन्यकाजातः सुतः

कानीति ॥ कन्याया अपत्यम् । 'कन्यायाः कनीन च' (४।१।११६) इत्यण् ।'**कानीनः** कन्यकासुते । कर्णे व्यासे' इति हेमचन्द्रः ॥ (१) ॥*॥ कन्यकया जातः ॥ (२) ॥*॥ द्वे '**अनूढापत्यस्य**' ॥

अथ सुभगासुतः ।

सौभागिनेयः

अथेति ॥ सुभगायाः सुतः ॥ (१) ॥*॥ सुभगाया अपत्यम् । 'कल्याण्यादीनामिनङ्' (४।१।१२६) इति ढक् । 'हृद्भग–' (७।३।१९) इत्युभयपदवृद्धिः ॥ (२) ॥*॥ द्वे '**सुभगापुत्रस्य**' ॥

स्यात्पारस्त्रैणेयस्तु परस्त्रियाः ॥ २४ ॥

स्यादिति ॥ परस्त्रिया अपत्यम् । प्राग्वत् । 'अनुशतिकादीनां च' (७।३।२०) इत्युभयपदवृद्धिः ॥ (१) ॥*॥ एकं '**परभार्यापुत्रस्य**' ॥

पैतृष्वसेयः स्यात् पैतृष्वस्रीयश्च पितृष्वसुः ।
सुतः

पैत्रिति ॥ पितृष्वसुरपत्यम् । 'ढकि लोपः' (४।१।१३३) ॥ (१) ॥*॥ 'पितृष्वसुश्छण्' (४।१।१३२) ॥ (२) ॥*॥ द्वे '**पितृष्वसुः सुतस्य**' ॥

मातृष्वसुश्चैवम्

मात्रिति ॥ मातृष्वसुरपत्यम् । 'मातृष्वसुश्च' (४।१।१३४) इति प्राग्वत् । (**मातृष्वसेयः । मातृष्वस्रीयः**) ॥ (१) ॥*॥ (२) ॥*॥ द्वे '**मातृष्वसुः सुतस्य**' ॥

वैमात्रेयो विमातृजः ॥ २५ ॥

वैमेति ॥ विरुद्धा माता । 'प्रादयो गता–' (वा० २।१।१८) इति समासः । विमातुरपत्यम् । शुभ्रादित्वात् (४।१।१२३) ढक् ॥ (१) ॥*॥ विमातुर्जातः । 'पञ्चम्यामजातौ' (३।२।९८) इति डः ॥ (२) ॥*॥ द्वे '**अपरमातृसुतस्य**' ॥

अथ बान्धकिनेयः स्याद्बन्धुलश्चासतीसुतः ।
कौलटेयः कौलटेरः

अथेति ॥ बन्धक्या अपत्यम् । 'कल्याण्यादीनामिनङ्' (४।१।१२६) इति ढक् ॥ (१) ॥*॥ बन्धून् लाति ॥ (२) ॥*॥ असत्याः सुतः ॥ (३) ॥*॥ कुटलाया अपत्यम् । 'स्त्रीभ्यो ढक्' (४।१।१२०) ॥ (४) ॥*॥ 'क्षुद्राभ्यो वा' (४।१।१३१) इति ढक् ॥ (५) ॥*॥ यत्तु–'कुलटाया वा' (४।१।१२७) इति ढक्—इति मुकुटः । तन्न । अनेनैनङो विकल्पनात् ॥*॥ पञ्च '**कुटलायाः पुत्रस्य**' ॥

भिक्षुकी तु सती यदि ॥ २६ ॥
तदा कौलटिनेयोऽस्याः कौलटेयोऽपि चात्मजः ।

भीति ॥ कुटलाया अपत्यम् । 'कुलटाया वा' (४।१।१२७) इतीनङ् वा 'स्त्रीभ्यो ढक्' (४।१।१२०) । क्षुद्रालाभावान्न ढक् । अङ्गहीना शीलहीना हि क्षुद्रा ॥ (१) ॥*॥ (२) ॥*॥ द्वे '**सत्या भिक्षार्थं गेहं गेहमटन्त्याः पुत्रस्य**' ॥

आत्मजस्तनयः सूनुः सुतः पुत्रः

आत्मेति ॥ आत्मनो देहाज्जातः । 'पञ्चम्याम्–' (३।२।९८) इति डः ॥ (१) ॥*॥ तनोति कुलम् । तन्यते वा । 'तनु विस्तारे' (तु० उ० से०) । 'वलिमलितनिभ्यः कयन्' (उ० ४।९९) ॥ (२) ॥*॥ सूयते । 'षुङ् प्राणिप्रसवे' (दि० आ० से०) । 'सुवः कित्' (उ० ३।३५) इति नुः । '**सूनुः** पुत्रेऽनुजेऽर्के ना' (इति मेदिनी) ॥ (३) ॥*॥ सूयते स्म । 'षु प्रसवे' (भ्वा० प० अ०) । क्तः (३।२।१०२) ।—सुवति—इति स्वामी । तन्न । दीर्घश्रवणप्रसङ्गात् । क्तस्याप्राप्तेश्च । '**सुतस्तु** पार्थिवे पुत्रे, स्वयपत्ये तु **सुता** स्मृता' (इति मेदिनी) ॥ (४) ॥*॥ पुनाति, पूयते, वा 'पूङ् पवने' (क्र्या० उ० से०) । 'पुवो ह्रस्वश्च' (उ० ४।१६५) इति क्रः । यद्वा पुन्नरकात्त्रायते । 'सुपि' (३।२।४) इति कः । 'पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः । तस्मात् 'पुत्र' इति प्रोक्तः स्वयमेव स्वयंभुवा' (मनुः ९।१३८) ॥ (५) ॥*॥ पञ्च '**पुत्रस्य**' ॥

स्त्रियां त्वमी ॥ २७ ॥
आहुर्दुहितरं सर्वे

स्त्रियामिति ॥ अमी आत्मजाद्याः स्त्रियां वर्तमानाः सन्तो दुहितरं वदन्ति शार्ङ्गरवादित्वात् (४।१।७३) ङीनि 'पुत्री' ।—गौरादौ (४।१।४१) 'पुत्री'—इति स्वामिनः प्रमादः । '**सुता तु दुहिता पुत्री**' इति त्रिकाण्डशेषः ॥ (५) ॥*॥ दोग्धि । 'दुह प्रपूरणे' (अ० उ० अ०) । दहति । 'दह भस्मीकरणे' (भ्वा० प० अ०) । 'नप्तृनेष्टृ–' (उ० २।९५) इति साधु । खस्रादित्वात् (४।१।१०) न ङीप् (४।१।५) ॥ (६) ॥*॥

अपत्यं तोकं तयोः समे ।

अपेति ॥ न पतन्ति पितरोऽनेन । 'पत्लृ गतौ' (भ्वा० प० से०) । बाहुलकाद्यः । अज्यादिः (उ० ४।११२) वा ॥ (१) ॥*॥ तौति । 'तुः' सौत्रो हिंसावृत्तिपूर्तिषु । बाहुलकात् कः । '**तोकं** संतानसुतयोः' इति हैमः ॥ (२) ॥*॥ तयोस्तनयदुहित्रोः । समे समानलिङ्गे ॥

स्वजाते त्वौरसोरस्यौ

स्वेति । 'उरो वक्षसि च श्रेष्ठे' (इति मेदिनी) । उरसा निर्मितः । 'उरसोऽण् च' (४।४।९४) इत्यण् ॥ (१) ॥*॥ चाद्यत् ॥ (२) ॥*॥ स्वस्माज्जातः, इति कुण्डगोलकादिवारणम् ॥*॥ द्वे '**स्वसाज्जातस्य पुत्रस्य**' ॥

१—स्वसात्स्वपाणिगृहीत्यां जातः । तथा च मनुः—'स्वक्षेत्रे संस्कृतायां तु स्वयमुत्पादयेद्धि यम् । तमौरसं विजानीयात् पुत्रं प्राथमकल्पिकम्' (९।१६६) इति । नातः परभार्यायां स्वजन्येऽतिव्याप्तिः । अतएवाभिप्रेत्य मूलकृतापि 'स्वीयायाम्' इति 'स्वकीयः' इति च परित्यज्य 'स्वाभ्यां जाते' इत्यर्थकमेवोक्तम् ॥

तातस्तु जनकः पिता ॥ २८ ॥

तातेति ॥ तनोति । 'दुतनिभ्यां दीर्घश्च' (उ० ३।९० इति क्तः । 'अनुदात्त–' (६।४।३७) इति नलोपः ।—'तात-पलितजर्तुसूरताः' इति तनोतेः क्तः, नलोपदीर्घौ च–इति मुकुटस्तु चिन्त्यः । तादृशसूत्राभावात् । **'तातोऽनुकम्प्ये पितरि'** इति हेमचन्द्रः ॥ (१) ॥*॥ जनयति । ण्वुल् (३।१।१३३) । 'जनिवध्योश्च' (७।३।३५) इति न वृद्धिः । **'जनकः पितृभूपयोः'** इति हैमः ॥ (२) ॥*॥ पाति । 'नप्तृनेष्टृ–' (उ० २।९५) इति साधुः ।—'पित्रादयः' इति तृच् इत्वं च —इति सुभूतिः । तन्न । तादृशसूत्राभावात् ॥ (३) ॥*॥ त्रीणि **'पितुः'** ॥

जनयित्री प्रसूर्माता जननी

जनेति ॥ जनयति । तृच् (३।१।१३३) । 'ऋन्नेभ्यो ङीप्' (४।१।५) ॥*॥ अन्तर्भावितण्यर्थात् **'जनित्री'** ॥ (१) ॥*॥ प्रसूयते । 'सत्सूद्विष–' (३।२।६१) इति क्विप् ॥ (२) ॥*॥ मान्यते । 'मान पूजायाम्' (भ्वा० आ० से०) माति वा । माति गर्भोऽस्यां वा । 'मा माने' (अ० प० अ०) । 'नप्तृनेष्टृ–' (उ० २।९५) इति साधुः । **'माता** गौर्दुर्गा जननी मही । **मातरश्च** ब्रह्माण्यायाः' इति हैमः ॥ (३) ॥*॥ जनयति । 'कृत्यल्युटः–' (३।३।११३) इति ल्युट् ॥ (४) ॥*॥ चत्वारि **'जनन्याः'** ॥

भगिनी स्वसा ।

भेति ॥ भगं कल्याणं यत्नो वा इच्छा वास्त्यस्याः । इनिः (५।२।११५) ॥ (१) ॥*॥ सुष्ठु अस्यति, अस्यते वा । 'असु क्षेपणे' (दि० प० से०) । 'सावसेरुन्' (उ० २।९६) ॥ (२) ॥*॥ द्वे **'स्वसुः'** ॥

ननन्दा तु स्वसा पत्युः

ननेति ॥ न नन्दति–न तुष्यति । 'न नन्दयति भ्रातृजायाम्' इति वा । 'नञि च नन्देः' (उ० २।९८) इति ऋन् ॥*॥ केचित् पूर्वसूत्रात् (२।९७) वृद्धिग्रहणमनुवर्तयन्ति । 'ननन्दा तु स्वसा पत्युर्**ननान्दा नन्दिनी** च सा' इति रभसः ।—'नञि च नन्देर्दीर्घश्च'—इति मुकुटः । तन्न । उज्ज्वलदत्तादावभावात् ॥ (१) ॥*॥ एकं **'भर्तृभगिन्याः'** ॥

नप्त्री पौत्री सुतात्मजा ॥२९॥

नप्त्रीति ॥ न पतन्ति पितरोऽनेन । 'नप्तृनेष्टृ–' (उ० २।९५) इति साधुः । 'ऋन्नेभ्यो ङीप्' (४।१।५) । 'नप्ता, नप्त्री च पौत्रिका' इति रभसः ॥ (१) ॥*॥ पुत्रस्य पुत्र्याश्चापत्यम् । 'अनृष्यानन्तर्ये बिदादिभ्योऽञ्' (४।१।१०४) ॥ (२) ॥*॥ सुतस्य सुतायाश्चात्मजा ॥ (३) ॥*॥ त्रीणि **'सुतकन्यकयोरपत्यस्य'** ॥

भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम् ।

भेति ॥ यतते । 'यती प्रयत्ने' (भ्वा० आ० से०) । 'यतेर्वृद्धिश्च' (उ० ३।९७) इत्यून् ॥ (१) ॥*॥ एकम् **'परस्परं भ्रातृभार्याणाम्'** ॥

प्रजावती भ्रातृजाया

प्रेति ॥ प्रजास्त्यस्याः । मतुप् (५।२।९४) । यत्तु—जायायां प्रविश्य पुनः पुनर्जायते । 'उपसर्गे च संज्ञायाम्' (३।२।९९) इति डः । प्रजः पतिस्तद्योगात् मतुप् (५।२।९४) 'शरादीनां च' (६।३।१२०) इति दीर्घः—इति मुकुटः । तन्न । 'प्रजः' इत्यस्य संज्ञात्वेनाप्रसिद्धत्वात् । अस्मदुक्तरीत्या निर्वाहेनोक्तकल्पनाया व्यर्थत्वाच्च ॥ (१) ॥*॥ भ्रातुर्जाया । (२) ॥*॥ द्वे **'भ्रातृपत्न्याः'** ॥

मातुलानी तु मातुली ॥ ३० ॥

मेति ॥ मातुलस्य स्त्री । 'पुंयोगात्–' (४।१।४८) इति ङीष् । 'मातुलोपाध्याय–' इत्यनुग् वा ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'मातुलभार्यायाः'** ॥

पतिपत्न्योः प्रसू श्वश्रूः

पेति ॥ पत्युर्माता पत्न्याः श्वश्रूः । पत्न्या माता पत्युः श्वश्रूः । श्वशुरस्य स्त्री । 'श्वशुरस्योकाराकारलोपश्च' इत्यूङ् । पुंयोगलक्षणङीषोऽपवादः ॥ (१) ॥*॥ एकम् **'श्वश्वाः'** ॥

श्वशुरस्तु पिता तयोः ।

श्वेति ॥ तयोः पतिपत्न्योः पिता परस्परं श्वशुरः । 'शु' इति आश्वर्ये पूजायां वा । शु आशु अश्नुते, अश्यते वा । 'अशू व्याप्तौ संघाते च' (स्वा० आ० से०) । 'शावशेरासौ' (उ० १।४४) इत्युरन् । द्वितालव्यः 'श्वश्रूः शिशुश्वशुरः' इति शभेदात् ॥ (१) ॥*॥ एकम् **'श्वशुरस्य'** ॥

पितुर्भ्राता पितृव्यः स्यात्

पित्रिति ॥ 'पितृव्यमातुल–' (४।२।३६) इति निपातितः ॥ (१) ॥*॥ द्वे[2] **'पितृव्यस्य'** ॥

मातुर्भ्राता तु मातुलः ॥ ३१ ॥

मेति ॥ ('पितृव्यमातुल–' (४।२।३६) इति निपातितः ।) **'मातुलो** मदनद्रुमे । धत्तूरेहिन्त्रीहिभिदोः पितुः श्यालेऽपि' इति हैमः ॥ (१) ॥*॥ द्वे **'मातुलस्य'** ॥

श्यालाः स्युर्भ्रातरः पत्न्याः

श्येति ॥ श्यायते । 'श्यैङ् गतौ' (भ्वा० आ० अ०) । बाहुलकात्कालन् ।—उच्छिष्टमधुपर्कवाची **'श्या'** शब्दः । श्यां लाति । 'आतोऽनुप–' (३।२।३) इति कः—इति मुकुटः

१—एतच्च वचनं 'श्वशुरः श्वश्वा' (१।२।७१) इति निर्देशसिद्धार्थकथनपरम्—इति मनोरमा ॥ २—मुकुटादिभिस्तु—एकम् इत्युक्तम् ॥

॥*॥—श्यामयति । 'श्यम वितर्के' चुरादिः । अच् (३।१।१३४) पृषोदरादित्वात् (६।३।१०९) मस्य लः—इति श्यामी । **'श्याल**सालसमसूरसूरयः' इति समेदाद्दन्त्यादिः ।—'श्याल वितर्के'—इति मुकुटस्य प्रमादः । श्याल धातोरभावात् ॥ (१) ॥*॥ पत्युः श्यालाः स्युः ॥*॥ एकम् **'पत्नीभ्रातुः'** ॥

स्वामिनो देवृदेवरौ ।

स्वेति ॥ पत्युर्भ्राता पत्न्याः । दीव्यति । 'दिवेर्कः' (उ० २।९९) ॥ (१) ॥*॥ देवते । 'देवृ देवने' (भ्वा० आ० से०) 'अर्तिकमिभ्रमि–' (उ० ३।१३२) इत्वरः ॥ (२) ॥*॥ **'देवृदेवर**देवानः' इति शब्दार्णवः ॥*॥ द्वे **'पत्युः कनिष्ठभ्रातुः'** इति स्वामी । ज्येष्ठस्तु श्वशुर एवेति सुभूत्यादयः ॥

स्वस्रीयो भागिनेयः स्यात्

स्वेति ॥ स्वसुरपत्यम् । 'स्वसुश्छः' (४।१।१४३) ॥ (१) ॥*॥ भगिन्या अपत्यम् । 'स्त्रीभ्यो ढक्' (४।१।१२०) ॥ (२) ॥*॥ द्वे **'भगिनीसुतस्य'** ॥

जामाता दुहितुः पतिः ॥ ३२ ॥

जेति ॥ जायां मिमीते । मिनोति, वा । 'माङ् माने' (जु० आ० अ०) 'डुमिञ् प्रक्षेपणे' (स्वा० उ० अ०) वा । 'नप्तृनेष्टृ–' (उ० २।९५) इति साधुः ॥ (१) ॥*॥ 'विभाषा स्वसृपत्योः' (६।३।२४) इति वालुक् ॥ (२) ॥*॥ द्वे **'जामातुः'** ॥

पितामहः पितृपिता

पितेति ॥ पितुः पिता ॥ (२) ॥*॥ 'मातृपितृभ्यां पितरि डामहच्' 'मातरि षिच्च' (वा० ४।२।३६) । **'पितामहः** पद्मयोनौ जनके जनकस्य च' इति हैमः ॥ (१) ॥*॥ द्वे **'पितामहस्य'** ॥

तत्पिता प्रपितामहः ।

तदिति ॥ तस्य पितामहस्य पिता । प्रकर्षेण पितामहः । 'प्रादयो गता–' (वा० २।२।१८) इति समासः ॥ (१) ॥*॥ एकम् **'प्रपितामहस्य'** ॥

मातुर्मातामहाद्येवम्

मेति ॥ मातुः पितरि डामहच् (वा० ४।२।३६) । प्रकृष्टो मातामहः **(प्रमातामहः)** ॥ (१) ॥*॥ एकैकम् **'मातामहस्य'** ॥

सपिण्डास्तु सनाभयः ॥ ३३ ॥

सेति ॥ समानः पिण्डो देहो मूलपुरुषो निर्वाप्यो वास्य । 'वान्यस्मिन्सपिण्डे–' (४।१।१६५) इत्यादिनिर्देशात् समानस्य सः । यद्वा सह पिण्डेन वर्तते । 'सपिण्डता तु पुरुषे सप्तमे विनिवर्तते' (मनुः ५।६०) ॥ (१) ॥*॥ समानो नाभिर्मूलपुरुषोऽस्य । 'ज्योतिर्जनपद–' (६।३।८५) इति समानस्य सः ॥ (२) ॥*॥ द्वे **'सप्तपुरुषावधिज्ञातिषु'** ॥

समानोदर्यसोदर्यसगर्भ्यसहजाः समाः ।

समेति ॥ समान उदरे शयितः । 'समानोदरे शयितः' (४।४।१०८) इति यत् ॥ (१) ॥*॥ 'विभाषोदरे' (६।३।८८) इति समानस्य वा सः । 'सोदराद्यः' (४।४।१०९) ॥ (२) ॥*॥ समाने गर्भे भवः । 'सगर्भसयूथ–' (४।४।११४) इति यत् । 'सगर्भ' इति निर्देशात्सः । यद्वा सह तुल्ये गर्भे कुक्षौ भवः । **'सह** साकल्यसादृश्ययौगपद्यसमृद्धिषु' इति विश्वः ॥ (३) ॥*॥ सह तुल्य उदरे जातः । 'अन्येष्वपि–' (३।२।१०१) इति डः ॥ (४) ॥*॥ सह उदरेण वर्तते । 'वोपसर्जनस्य' (६।३।८२) इति सः । 'सोदरः' **'सहोदरः'** चात्र । (**'भ्राता तु स्यात्सहोदरः** । समानोदर्यसोदर्यसगर्भ्यसहजा अपि । **सोदरश्च'** इति नाममाला) ।—'सहस्य सोऽन्यतरस्याम्' इति पाक्षिके सभावे—इति मुकुटश्चिन्त्यः तादृशसूत्राभावात् ॥*॥ चत्वारि **'एकोदरोत्पन्नभ्रातुः'** ॥

सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः ॥ ३४ ॥

सेति ॥ समानं गोत्रं कुलमस्य । 'ज्योतिर्जनपद–' (६।३।८५) इति सः ॥ (१) ॥*॥ बध्नाति । 'बन्ध बन्धने' (क्या० प० अ०) । 'शृस्वृस्निहि–' (उ० १।१०) इत्युः । प्रज्ञाद्यण् (५।४।३८) वा । **'बान्धवो** बन्धुमित्रयोः' इति हैमः ॥ (२) ॥*॥ **'बन्धुर्मातृबान्धवयोः'** इति हैमः ॥ (४) ॥*॥ जानाति । क्तिच् (३।३।१७४) । ज्ञायते वा । क्तिन् (३।३।९४) । (**'ज्ञाति**स्तातसगोत्रयोः' इति मेदिनी) ॥ (३) ॥*॥ स्वनति । 'स्वन शब्दे' (भ्वा० प० से०) । 'अन्येभ्योऽपि–' (वा० ३।३।१०१) इति डः ॥ (५) ॥*॥ स्व आत्मीयश्चासौ जनश्च ॥ (६) ॥*॥ षट् **'सगोत्रस्य'** ॥

ज्ञातेयं बन्धुता तेषां क्रमाद्भावसमूहयोः ।

ज्ञेति ॥ ज्ञातेर्भावः । 'कपिज्ञात्योर्ढक्' (५।१।१२७) ॥ (१) ॥*॥ बन्धूनां समूहः । 'ग्रामजनबन्धुभ्यस्तल्' (४।२।४३) ॥ (२) ॥*॥ एकैकम् **'ज्ञातिसमूहस्य'** ॥

धवः प्रियः पतिर्भर्ता

धेति ॥ धवति, धूयते, वा । 'धूञ् कम्पने' (चु० उ० से०) । 'आधृषाद्वा' (चु० गण०) इति वा णिच् । अच् (३।१।१३४) । घञ् (३।३।१९) वा । संज्ञापूर्वकत्वान्न वृद्धिः । 'ऋदोरप्' (३।३।५७) वा । **'धवः** पुमान्नरे धूर्ते पत्यौ वृक्षान्तरेऽपि च' (इति मेदिनी) ॥ (१) ॥*॥ प्रीणाति । 'प्रीञ् तर्पणे' (क्र्या० उ० से०) । 'इगुपध–' (३।१।१३५)

१—क्तिनः स्त्रियां विधानेन स्त्रीलिङ्गत्वापत्त्या 'स्वस्रपर्यायेष्वनुक्तानां द्वन्द्वो न कृतः' इति प्रतिज्ञानुरोधात् 'ज्ञाति' शब्दस्य द्वन्द्वानुपपत्तिः । अतोऽत्र क्तिन्न संगतः ॥

इति कः । **'प्रियो वृष्योषधौ हृद्ये धवे'** इति हैमः ॥ (२) ॥*॥ पाति । **'पा रक्षणे'** (अ० प० अ०) । **'पातेर्डतिः'** (उ० ४।५७) ॥ (३) ॥*॥ बिभर्ति । **'डुभृञ् धारणपोषणयोः'** (जु० उ० से०) । तृच् (३।१।१३३) ॥ (४) ॥*॥ चत्वारि **'पत्युः'** ॥

जारस्तूपपतिः समौ ॥ ३५ ॥

जेति ॥ जारयति । 'जॄष् वयोहानौ' (भ्वा० प० से०) **'दारजारौ कर्तरि णिलुक् च'** (वा० ३।३।२०) इति घञ् । यत्तु—जीर्यतेऽनेन । करणे घञ् (३।३।११९) इति—मुकुटः । तन्न । 'अजङभ्याम्–' (वा० ३।३।१२६) इति वार्तिकविरोधात् । **'जारस्तूपपतौ जार्यौषधीभिदि'** इति हैमः ॥ (१) ॥*॥ उपमितः पत्या । 'अवादयः क्रुष्टाद्यर्थे तृतीयया' (वा० २।२।१८) इति समासः । उपसृष्टा पतिरनेन वा । 'आदिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपश्च' (वा० २।२।२४) इति समासः ॥ (२) ॥*॥ द्वे **'मुख्यादन्यस्य भर्तुः'** ॥

अमृते जारजः कुण्डः

अम्रिति ॥ जाराज्जातः । कुण्ड्यते कुलमनेन । **'कुडि दाहे'** (भ्वा० आ० से०) । घञ् (३।३।११९) । **'कुण्डमभ्यालये मानभेदे देवजलाशये । कुण्डी** कमण्डलौ, जारा(पतिवत्नीसुते पुमान् । पिठरे तु न ना' (इति मेदिनी) । सुते पुमान् । सुतायां तु जातिलक्षणः (४।१।६३) ङीष् भवत्येव ॥ (१) ॥*॥ एकम् **'जीवति पत्यौ जारजातस्य'** ॥

मृते भर्तरि गोलकः ।

म्रिति ॥ 'जारजः' इत्येव । गुड्यते । 'गुड रक्षायाम्' (तु० प० से०) घञ् (३।३।११९) । स्वार्थे कन् (ज्ञा० ५।४।५) । **'गोलको** विधवापुत्रे जारात्, स्यान्मणिके गुडे' (इति मेदिनी) ॥ (१) ॥*॥ एकं **'विधवायां जारजातस्य'** ॥

भ्रात्रीयो भ्रातृजः

भ्रात्रीति ॥ भ्रातुरपत्यम् । 'भ्रातुर्व्यच्च' (४।१।१४४) इति चकाराच्छः ॥ (१) ॥*॥ भ्रातुर्जातः । ङः (३।२।९८) ॥ (२) ॥*॥ द्वे **'भ्रातृपुत्रस्य'** ॥

भ्रातृभगिन्यौ भ्रातरावुभौ ॥ ३६ ॥

भ्रात्रिति ॥ भ्राता च भगिनी च ॥ (१) ॥*॥ भ्राजते । 'भ्राजृ दीप्तौ' (भ्वा० आ० से०) । 'नप्तृनेष्टृ–' (उ० २।९५) इति साधुः । यत्तु—बिभर्ति । 'पित्रादयः' इति तृच् । आदेश्च—इति—भ्राजते । 'स्वस्रादयः' इति ऋन् । जस्य तत्वे—इति च मुकुटेनोक्तम् । तदुपेक्ष्यम् । अपाणिनीयत्वात् । स्वसा च भ्राता च 'भ्रातृपुत्रौ स्वसृदुहितृभ्याम्' (१।२।६८) इत्येकशेषः ॥ (२) ॥*॥ द्वे **'भ्रातृभगिन्योः'** ॥

मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ ।

मेति ॥ माता च पिता च । 'आनङृतो द्वन्द्वे' (६।३।२५) । 'अभ्यर्हितं च' (वा० २।२।३४) इति मातुः पूर्वनिपातः ॥ (१) ॥*॥ **'पिता मात्रा'** (१।२।७०) इत्येकशेषो वा ॥ (२) ॥*॥ **'मातरपितराबुदीचाम्'** (६।३।३२) इति मातुरङन्तादेशो वा ॥ (३) ॥*॥ त्रीणि **'मातापित्रोः'** ॥

श्वश्रूश्वशुरौ श्वशुरौ

श्वेति ॥ श्वश्रूश्च श्वशुरश्च ॥ (१) ॥*॥ **'श्वशुरः श्वश्वा'** (१।२।७१) इत्येकशेषो वा ॥ (२) ॥*॥ द्वे **'सहोक्तयोः श्वश्रूश्वशुरयोः'** ॥

पुत्रौ पुत्रश्च दुहिता च ॥ ३७ ॥

पुत्राविति ॥ पुत्रश्च दुहिता च । 'भ्रातृपुत्रौ–' (१।२।६८) इत्येकशेषः ॥ (१) ॥*॥ **'पुत्रकन्ययोः'** एकम् ॥

दंपती जंपती जायापती भार्यापती च तौ ।

दंपेति ॥ जाया च पतिश्च । राजदन्तादि (२।२।३१) गणे पाठाज्जायाशब्दस्य 'दम्' 'जम्' भावो वा निपात्यते ॥ 'दाराः पुंसि बहुत्वे च दं कलत्रे नपुंसकम्' इत्यमरमाला ॥ **'पत्यां जं दमलिङ्गत्वे'** इति नामप्रपञ्चः ॥ (१) ॥*॥(२)॥*॥ (३) ॥*॥ भार्या च पतिश्च ॥ (४) ॥*॥ 'तौ इत्यनेन पुंस्त्वमुक्तम्' । 'शाल्मली मैथिली मैत्री दंपती जंपती च सा' इति वाचस्पतौ स्त्रीत्वमप्युक्तम् ॥*॥ चत्वारि **'जायापत्योः'** ॥

गर्भाशयो जरायुः स्यात्

गर्भेति ॥ गर्भ आशेते अत्र । 'पुंसि–' (३।३।११८) इति घः ॥ (२) ॥*॥ जरामेति । 'किंजरयोः श्रिणः' (उ० १।४) इति नुण् ॥ (१) ॥*॥ द्वे **'गर्भवेष्टनचर्मणः'** ॥

उल्वं च कललोऽस्त्रियाम् ॥ ३८ ॥

उल्वमिति ॥ उल्बीयते 'लीङ् श्लेषणे' (दि० आ० अ०) । 'उल्वादयश्च' (उ० ४।९५) इति साधुः । यद्वा ओलति, उल्यते, वा । **'उल'** सौत्रो दाहे । वल्यते वा । 'वल प्राणने' (भ्वा० प० से०) प्राग्वत् ॥ (१) ॥*॥ कल्यते । **'कल संख्याने'** (चु० उ० से०) । 'वृषादिभ्यश्चित्' (उ० १।१०६) इति कलः ॥ (२) ॥*॥ द्वे **'शुक्रशोणितसंपातस्य'** । चत्वारि गर्भवेष्टनस्य इत्यन्ये ॥

सूतिमासो वैजननः

स्विति ॥ सूतेः प्रसवस्य मासः ॥ (१) ॥*॥ विजायतेऽस्मिन् । 'करणा–' (३।३।११७) इति ल्युट् । विजनन एव । प्रज्ञाद्यण् (५।४।३८) । यद्वा विजननस्य गर्भमोचनस्यायम् । 'तस्येदम्' (४।३।१२०) इत्यण् । 'नवमे दशमे वापि प्रबलैः सूतिमारुतैः । निःसार्यते बाण इव जन्तुश्छिद्रेण सत्वरः' ( ) ॥ (२) ॥*॥ द्वे **'प्रसवमासस्य'** ॥

गर्भो भ्रूण इमौ समौ ।

गर्भ इति ॥ गीर्यते उद्गीर्यते शब्द्यते वा । 'गॄ निगरणे'

(तु० प० से०) 'गृ शब्दे' (क्या० प० से०) वा । 'अर्ति-गृभ्यां भन्' (उ० ३।१५२) । **'गर्भो** भ्रूणेऽर्भके कुक्षौ संधौ पनसकण्टके' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ भ्रूण्यते । 'भ्रूण आशाविशङ्कयोः' (चु० आ० से०) । घञ् (३।३।१९) । 'भ्रूणः स्त्रीगर्भडिम्भयोः' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'कुक्षिस्थगर्भस्य'** ॥

तृतीया प्रकृतिः शण्ढः क्लीबः पण्डो नपुंसकम् ३९

तृतीति ॥ स्त्रीपुंसावपेक्ष्य तृतीया प्रकृतिः–तृतीयः प्रकारः । असमस्तमेतत् ॥*॥ समासे तु **'तृतीयप्रकृतिः'** ॥ (१) ॥*॥ शाम्यति । 'शमु उपशमे' (दि० प० से०) । 'शमेर्ढः' (उ० १।९९) । 'क्लीबं **शण्ढश्च** कञ्चुकी' इति तालव्यादौ रभसः । **'शण्ढः** स्यात्पुंसि गोपतौ । आकृष्टाण्डे वर्षवरे तृतीयप्रकृतावपि' (इति मेदिनी) (**'शण्डशण्ढौ** तु सौविदौ । वन्ध्यपुंसीङ्वरे क्लीबे' इति हैमः) ॥ (२) ॥*॥ क्लीबते । 'क्लीबृ अधार्ढ्ये' (भ्वा० आ० से०) । 'इगुपध–' (३।१।१३५) इति कः । 'अस्त्री नपुंसके **क्लीबं** वाच्यलिङ्गस्त्वविक्रमे' इति रुद्रः ॥ (३) ॥*॥ पण्डते । 'पडि गतौ' (भ्वा० आ० से०) । अच् (३।१।१३४) । यद्वा पणते । 'पण व्यवहारे स्तुतौ च' (भ्वा० आ० से०) । 'अमन्ताड्डः' (उ० १।११४) ॥ **'पण्डः** षण्ढे, धियि स्त्री स्यात्' (इति मेदिनी) ॥ (४) ॥*॥ 'न स्त्री न पुमान्' इत्यस्य नपुंसकभावो 'नभ्राट्–' (६।३।७५) इत्यत्र निपातनात् । 'स नपुंसको भवेत्' ( ) इति 'भाष्यात्पुंस्यप्ययम्' ॥ (५) ॥*॥ पञ्च **'नपुंसकस्य'** ॥

शिशुत्वं शैशवं बाल्यम्

शिश्विति ॥ शिशोर्भावः । 'तस्य भावस्त्वतलौ' (५।१।११९) । 'आ च त्वात्' (५।१।१२०) इति वा ल्यः ॥ (१) ॥*॥ 'इगन्ताच्च लघुपूर्वात्' (५।१।१३१) इत्यण् ॥ (२) ॥*॥ बालस्य भावः । ब्राह्मणादित्वात् (५।१।१२४) ष्यञ् ॥ (३) ॥*॥ त्रीणि **'बाल्यत्वे'** ॥

तारुण्यं यौवनं समे ।

तेति ॥ तरुणस्य भावः । ष्यञ् (५।१।१२४) ॥ (१) ॥*॥ यूनो भावः । 'ह्रायनान्तयुवादिभ्योऽण्' (५।१।१३०) । 'अन्' (६।४।१६७) इति प्रकृतिभावः ॥ (२) ॥*॥ द्वे **'तारुण्यस्य'** ॥

स्यात्स्थाविरं तु वृद्धत्वम्

स्यादिति ॥ स्थविरस्य भावः । कर्म वा । युवादित्वात् (५।१।१३९) अण् ॥ (१) ॥*॥ वृद्धस्य भावः । ल्यः (५।१।१२०) ॥ (२) ॥*॥ द्वे **'वृद्धत्वस्य'** ॥

वृद्धसंघेऽपि वार्धकम् ॥ ४० ॥

वृद्धेति ॥ वृद्धानां संघः ॥ (१) ॥*॥ वृद्धानां समूहः । 'वृद्धाच्च' (वा० ४।२।३९) इति वुञ् । भावकर्मणोस्तु मनोज्ञादित्वात् (५।१।१३३) वुञ् । अपिशब्दाद्वृद्धत्वेऽपि । वार्धकशब्दात् चतुर्वर्णादित्वात् (वा० ५।१।१२४) स्वार्थे ष्यञि **'वार्धक्यम्'** अपि । **'वार्धकं** वृद्धसंघाते वृद्धत्वे वृद्धकर्मणि' इति विश्वः ॥ (२)॥*॥ द्वे **'वृद्धसमूहस्य'** ॥

पलितं जरसा शौक्ल्यं केशादौ

पेति ॥ फलति । फलनम्, वा । 'फल निष्पत्तौ' 'लिफला विशरणे' वा (भ्वा० प० से०) । 'लोष्टपलितौ' (उ० ३।९२) इति साधुः । यद्वा पलति स्म । 'पल गतौ' (भ्वा० प० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । पलनं वा । 'नपुंसके भावे क्तः' (३।३।११४) **'पलितं** शैलजे तापे केशपाके च कर्दमे' (इति मेदिनी) ॥ (१) ॥*॥ आदिना लोमश्मश्रुणोः ॥*॥ एकम् **'जरया शुक्लस्य'** ॥

विस्रसा जरा ।

वीति ॥ विस्रस्यतेऽनया 'स्रंसु अधःपतने' (भ्वा० आ० से०) भिदाद्यङ् (३।३।१०४) ॥ (१) ॥*॥ जीर्यतेऽनया । 'जॄष् वयोहानौ' (दि० प० से०) 'षिद्भिदादिभ्योऽङ्' (३।३।१०४) । यद्वा जरणम् । भावेऽङ् (३।३।१०४) । 'ऋहशोऽङि गुणः' (७।४।१६) ॥ (२) ॥*॥ द्वे **'जरायाः'** ॥

स्यादुत्तानशया डिम्भा स्तनपा च स्तनंधयी ॥ ४१ ॥

स्यादिति ॥ उत्ताना शेते । 'उत्तानादिषु कर्तृषु' (वा० ३।२।१५) इत्यच् ॥ (१) ॥*॥ डिम्भयति । 'डिभि संघे' चुरादिः । अच् (३।१।१३४) डिम्भ्यते वा । घञ् (३।३।१९) अच् (३।३।५६) वा । **'डिम्भोऽपि** बालिशे बाले' (इति मेदिनी) ॥ (२) ॥*॥ स्तनौ पिबति । 'आतोऽनुप–' (३।२।३) इति कः ।—'सुपि' (३।३।४) इति योगविभागात्कः—इति स्वामिमुकुटौ चिन्त्यौ ॥ (३) ॥*॥ स्तनं धयति । 'धेट् पाने' (भ्वा० प० अ०) । 'नासिकास्तनयोः–' (३।२।१९) इति खश् । धेटष्टित्त्वात् (४।१।१५) ङीप् ॥ (४) ॥ एषु त्रिलिङ्गता । 'त्रिषु जरावराः' इति वक्ष्यमाणत्वात् । स्त्रीलिङ्गनिर्देशः स्त्रीप्रत्ययप्रदर्शनार्थः ॥*॥ चत्वारि **'अतिबालिकायाः'** ॥

बालस्तु स्यान्माणवकः

बाल इति ॥ बल्यते, बलते, वा । 'बल संचलने' (भ्वा० आ० से०) घञ् (३।३।१९) । ज्वलादि (३।१।१४०) णो वा । **'बालोऽज्ञेऽश्वेभपुच्छयोः** । शिशौ हीवेरकचयोर्बाला तु त्रुटियोषितोः । **बाली** भूषान्तरे मेघौ' इति हैमः ॥ (१) ॥*॥ मनोरयम् । 'तस्येदम्' (४।३।१२०) इत्यण् 'ब्राह्मणमाणव–' (४।२।४२) इति निपातनाण्णत्वम् । 'अल्पे' (५।३।८५) इति कन् । 'हारभेदे **माणवको** बाले कुपुरुषेऽपि च' इति रभसः ॥ (२) ॥*॥ द्वे **'बालस्य'** ॥

वयस्थस्तरुणो युवा ।

वयेति ॥ **'वयः** पक्षिणि बाल्यादौ वयो यौवनमात्रके' इति विश्वः । वयसि तिष्ठति । 'सुपि–' (३।२।४) इति योगविभागात् कः ॥ (१) ॥*॥ तरति । **'तॄ** प्लवनतरणयोः' (भ्वा० प० से०) 'त्रो रस्य लो वा' (उ० ३।५४) इत्युनन् । **'तरुणं** कुब्जपुष्पे ना रुचके यूनि तु त्रिषु' इति विश्वः ॥ (२) ॥*॥ यौति । 'यु मिश्रणे' (अ० प० से०) । 'कनिन्युवृषि–' (उ० १।१५६) इति कनिन् ॥ (३) ॥*॥ त्रीणि **'यूनः'** ॥

प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि ॥ ४२ ॥

प्रेति ॥ प्रगतं वयोऽस्य ॥ (१) ॥* ॥ तिष्ठति । 'अजिरशिशिर–' (उ० १।५३) इति निपातः ।—'स्थिरादयः इति किरन्—इति मुकुटस्त्वपाणिनीयः' ॥ (२) ॥*॥ वर्धते स्म । 'वृधु वृद्धौ' (भ्वा० आ० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । **'वृद्धः** प्राज्ञे च स्थविरे **वृद्धं** शैलेयरूढयोः' इति हैमः ॥ (३) ॥*॥ जिनाति स्म । प्राग्वत् क्तः (३।४।७२) । 'ग्रहिज्या–' (६।१।१६) इति संप्रसारणम् । 'हलः' (६।४।२) इति दीर्घः । 'ल्वादिभ्यश्च' (८।२।४४) इति नत्वम् ॥ (४) ॥*॥ जीर्यति स्म । 'जॄष् वयोहानौ' (दि० प० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । (**'जीर्णं** परिपक्वपुराणयोः' इति मेदिनी) ॥ (५) ॥*॥ 'जीर्यतेरतृन्' (३।२।१०४) ॥ (६) ॥*॥ षट् **'वृद्धस्य'** ॥

वर्षीयान्दशमी ज्यायान्

वेति ॥ अतिशयेन वृद्धः । 'द्विवचन–' (५।३।५७) इतीयसुन् । 'प्रियस्थिर–' (६।४।१५७) इति वर्षादेशः ॥ (१) ॥*॥ दशमोऽवस्थाविशेषोऽस्यास्ति । 'वयसि पूरणात्' (५।२।१३०) इतीनिः ॥ (२) ॥*॥ अतिशयेन वृद्धः । 'वृद्धस्य च' (५।३।६२) इति ज्यादेशः । 'ज्यादादीयसः' (६।४।१६०) इत्यात्वम् ॥ (३) ॥*॥ त्रीणि **'अतिवृद्धस्य'** ॥

पूर्वजस्त्वग्रियोऽग्रजः ।

पूर्वेति ॥ पूर्वस्मिन्काले जातः । 'सप्तम्यां जनेर्डः' (३।२।९७) ॥ (१) ॥*॥ अग्रे जातः । **'अग्रात्यत्'** (४।४।११६) 'घच्छौ च' (४।४।११७) इति घः ॥*॥ अभ्याग्रीयौ च ॥*॥ क्वचित् **'अग्रीमः'** इति पाठः । 'अग्रादिपश्चाड्डिमच्' (वा० ४।३।२३) ॥ (२) ॥*॥ अग्रे जातः । डः (३।२।९७) ॥ (३) ॥*॥ त्रीणि **'प्रशमजातस्य'** ॥

जघन्यजे स्युः कनिष्ठयवीयोऽवरजानुजाः ॥ ४३ ॥

जघेति ॥ जघन्येऽवरकाले जातः । डः (३।२।९७) ॥ (१) ॥*॥ अतिशयेन युवा । 'अतिशायने तमबिष्ठनौ' (५।३।५५) । 'युवाल्पयोः कनन्यतरस्याम्' (५।३।६४) ॥*॥ 'द्विवचन–' (५।३।५७) इतीयसुनि **'कनीयान्'** अपि ॥ (२) ॥*॥ पक्षे 'स्थूलदूर–' (६।४।१५६) इति यणादिलोपगुणौ ॥ (३) ॥*॥ अवरस्मिन् काले जातः । डः (३।२।९७) ॥ (४) ॥*॥ अनु पश्चाज्जातः । 'उपसर्गे च' (३।२।९९) इति डः ॥ (५) ॥*॥ पञ्च **'कनिष्ठभ्रातुः'** ॥

अमांसो दुर्बलश्छातः

अमेति ॥ न अल्पं मांसमस्य अल्पार्थे नञ् ॥ (१) ॥*॥ दुष्टं बलमस्य ॥ (२) ॥*॥ छयति स्म । 'छो छेदने' (दि० प० अ०) । 'गत्यर्था–' (३।४।७२) इति क्तः । छायते स्म वा । क्तः (३।२।१०२) । 'शाच्छोरन्यतरस्याम्' (७।४।४१) इत्वम् ॥*॥ 'शातः' इति वा पाठः । तत्र 'शैङ्[1] गतौ' (भ्वा० आ० अ०) । क्तः (३।२।१०२) । 'दुर्बले निशिते स्यातां **शितशाता**विमौ त्रिषु' इति तालव्यादौ रभसः ॥ (३) ॥*॥ त्रीणि **'निर्बलस्य'** ॥

बलवान्मांसलोऽसलः ।

बलेति ॥ बलमस्यास्ति । मतुप् (५।२।९४) ॥ (१) ॥*॥ मांसमस्त्यस्य । सिध्मादिलच् (५।२।९७) ॥ (२) ॥*॥ अंसोऽस्यास्ति । 'वत्सांसाभ्यां कामबले' (५।२।९८) इति लच् ॥ (३) ॥*॥ त्रीणि **'बलवतः'** ॥

तुन्दिलस्तुन्दिकस्तुन्दी बृहत्कुक्षिः पिचिण्डिलः ४४

त्विति ॥ अतिशयितं तुन्दमुदरमस्य । 'तुन्दादिलच्च' (५।२।११७) । चादिनिठनौ । **'तुन्दिभः'** इति पाठे तु 'तुन्दिबलिवटेर्भः' (४।२।१३९) ॥ (१) ॥*॥ (२) ॥*॥ (३) ॥*॥ बृहन् कुक्षिरस्य ॥ (४) ॥*॥ अतिशयितं पिचिण्डमुदरमस्य । पिच्छादिलात् (५।२।१०८) इलच् ॥ (५) ॥*॥ पञ्च **'स्थूलोदरस्य'** ॥

अवटीटोऽवनाटश्चावभ्रटो नतनासिके ।

अवेति ॥ अवनमनं नासिकायाः । 'नते नासिकायाः संज्ञायां टीटञ्नाटञ्भ्रटचः' (५।२।३१) । अवटीटम्, अवनाटम्, अवभ्रटम्, च=नासिकाया नतमस्त्यस्याः । अर्शआद्यच् (५।२।१२७) । अवटीटा, अवनाटा, अवभ्रटा, च नासिकास्त्यस्य पुरुषस्य । अर्शआद्यच् (५।२।१२७) ॥ (१) ॥*॥ (२) ॥*॥ (३) ॥ त्रीणि **'चिपिटनासस्य'** ॥

केशवः केशिकः केशी

केशेति ॥ प्रशस्ताः केशा यस्य । 'केशाद्वोऽन्यतरस्याम्' (५।२।१०९) ॥ (१) ॥*॥ पक्षे इनिठनौ (५।२।११५) (२) ॥*॥ (३) ॥*॥ त्रीणि **'प्रशस्तकेशस्य'** स्थूलकेशस्य वा ॥

बलिनो बलिभः समौ ॥ ४५ ॥

बलीति ॥ बलिस्त्वक्संकोचोऽस्यास्ति । पामादित्वान्नः

१—शो इति धातोस्तूच्चितम् । अत एव शितशातयोः स्वरसत एव पर्यायत्वं संभवति । श्यैङ् धातुस्तु नोपलभ्यते । 'श्यैङ्' धातौ यकाररहितत्वकल्पनं वा गुरुभूतमप्यन्नीकार्यम् ॥

(५।२।१००) ॥ (१) ॥*॥ 'तुन्दिवलि–' (५।२।१३९) इति भः ॥ (२) ॥*॥ द्वे **'श्रथचर्मवतः'** ॥

विकलाङ्गस्तु पोगण्डः

वीति ॥ विकलमङ्गमस्य ॥ (१) ॥*॥ पवते, पुनाति, वा । विच् (३।२।७५) । पौर्गण्ड एकदेशोऽस्य । अपकृष्टं गच्छति वा । 'अमन्ताङ्डः' (उ० १।११४) इति गमेर्डः । पृषोदरादिः (६।३।१०९) । 'पोगण्डो विकलाङ्गकः' इति रत्नकोषः । 'पोगण्डो विकलाङ्गः स्यात्' (इति हलायुधः) ॥*॥ 'अपोगण्डः' इति पाठे नञ्समासः । **'अपोगण्डस्तु** शिशुके विकलाङ्गे च भीरुके' इति विश्वः ॥ (२) ॥*॥ द्वे **'स्वभावन्यूनाधिकाङ्गस्य'** ॥

खर्बो ह्रस्वश्च वामनः ।

खेति ॥ खर्बति । 'खर्ब गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) । **'खर्ब** संख्यान्तरे क्लीबं नीचि वामनके त्रिषु' (इति मेदिनी) ॥ (१) ॥*॥ ह्रसति । ह्रस्यते वा । 'ह्रस शब्दे' (भ्वा० प० से०) । उल्वादिः (उ० ४।९५) **'ह्रस्वो** न्यक्खर्बयोस्त्रिषु' (इति मेदिनी) ॥ (२) ॥*॥ वामयति । 'टुवम उद्गिरणे' (भ्वा० प० से०) । नन्द्यादिल्युः (३।१।१३४) ल्युट (३।३।११४) वा । 'मितां ह्रस्वः' (६।४।९२) इत्यत्र 'वा चित्तविरागे' (६।४।९१) इत्यतो 'वा' इत्यनुवर्तते—इति वृत्तिकृत् । **'वामनो** नीचि खर्बे च त्रिषु पुंसि तु दिग्गजे । ह्रावङ्कोटवृक्षे' (इति मेदिनी) ।—वामोऽस्यास्ति । पामादित्वात् (५।२।१००) नः—इति स्वामी ।—स्त्रियां वामनी—इति मुकुटः ॥ (३) ॥*॥ त्रीणि खर्बपुंसः । **'ह्रस्वस्य'** ॥

खरणाः स्यात्खरणसः

खरेति ॥ खरा तीक्ष्णा नासिकास्य । 'खुरखरायां वा नस्' (वा० ५।४।११८) ॥ (१) ॥*॥ पक्षे 'अज् नासिकायाः–' (५।४।११८) इत्यच् नसादेशश्च । 'पूर्वपदात्–' (८।४।३) इति णत्वम् ॥ (२) ॥*॥ द्वे **'तीक्ष्णनासिकस्य'** ॥

विग्रस्तु गतनासिके ॥ ४६ ॥

विग्रेति ॥ विगता नासिका यस्य । 'प्रादिभ्यो धातुजस्य–' (२।२।२४) इति समासः । 'वेर्भो व्यक्तव्यः' (वा० ५।१।११८) ॥ (१)॥*॥ 'खुखौ च' इति शाकटायनः । 'ख्यश्च' (वा० ५।४।११८) **'विखुः'** **'विखः'** **'विख्यः'** । 'विग्रो विखुर्विनासिकः' इति रभसः । 'विनसा हतबान्धवा' इति तु टे 'पद्दनस्–' (६।१।६३) इति नस् । विगतया नासिकयोपलक्षिता इत्यर्थः ॥ (२) ॥*॥ द्वे **'गतनासिकस्य'** ॥

खुरणाः स्यात्खुरणसः

खुरेति ॥ खुर इव नासिकास्य । प्राग्वत् ॥*॥ द्वे **'पशुखुरसदृशनासिकस्य'** ॥

प्रञ्जुः प्रगतजानुकः ।

प्रेति ॥ प्रगते विरले जानुनी यस्य । 'प्रसंभ्यां जानुनोर्ञुः' (५।४।१२९) ॥ (१) ॥*॥ द्वे **'वातादिना विरलजानुकस्य'** ॥

ऊर्ध्वञ्जुरूर्ध्वजानुः स्यात्

ऊर्ध्वेति ॥ ऊर्ध्वे जानुनी यस्य । 'ऊर्ध्वाद्विभाषा' (५।४।१३०) इति ञुः ॥ (१) ॥*॥ द्वे **'ऊर्ध्वजानुकस्य'** ॥

संञ्जुः संहतजानुकः ॥ ४७ ॥

समिति ॥ संहते जानुनी यस्य । प्राग्वत् ञुः (५।४।१२९) (१) ॥*॥ द्वे संलग्नजानुकस्य । 'प्रञ्जुः प्रगतजानुः स्यात् **प्रञ्जोऽप्यत्रैव** दृश्यते । संञ्जुः संहतजानौ च भवेत् **संञ्जोऽपि** तत्र हि । ऊर्ध्वञ्जुरूर्ध्वजानुः स्यादूर्ध्वञ्जोऽप्यूर्ध्वजानुके' इति साहसाङ्कः । द्वे **'संलग्नजानुकस्य'** ॥

स्यादेडे बधिरः

स्यादिति ॥ आ इलति । 'इल खप्ने' (तु० प० से०) । अच् (३।१।१३४) । डलयोरैक्यम् । यद्वा आ सर्वत ईड्यते, ईट्टे, वा । 'ईड स्तुतौ' (अ० आ० से०) । घञ् (३।३।१९) । अच् (३।१।१३४) वा ॥ (१) ॥*॥ बध्नाति कर्णम्, बध्यते वा । 'बन्ध बन्धने' (क्र्या० प० अ०) 'इषिमदि–' (उ० १।५१) इति किरच् ॥ (२) ॥*॥ द्वे **'श्रवणशक्तिहीनस्य'** ॥

कुब्जे गडुलः

किति ॥ कौ उब्जति । 'उब्ज आर्जवे' (तु० प० से०) । अच् (३।१।१३४) । यद्वा कु ईषदुब्जमार्जवमस्य । शकन्ध्वादिः (वा० ६।१।९४) । **'कुब्जो** वृक्षप्रभेदे ना न्युब्जे स्याद्वाच्यलिङ्गकः' (इति मेदिनी) ॥ (१) ॥*॥ गडति, गड्यते, वा । 'गड सेचने' (भ्वा० प० से०) । बाहुलकादुः । गडुरस्यास्ति । सिध्मादित्वात् (५।२।९७) लच् । **'गडुः** पृष्ठगुडे कुब्जे' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'कुब्जस्य'** ॥

कुकरे कुणिः ।

कुकेति ॥ कुत्सितः करोऽस्य ॥ (१) ॥*॥ कुणति, कुण्यते, वा । 'कुण शब्दोपकरणयोः' (तु० प० से०) । 'इगुपधात् कित्' (उ० ४।१२०) इतीन् । **'कुणिस्तुन्नकवृक्षे** ना कुकरे त्वभिधेयवत्' (इति मेदिनी) ॥*॥ 'निसर्गतः **कूणि**पङ्गुपौगण्डाः' इति नाममालायामार्यापाठाद्दीर्घोकारवानपि ॥ (२) ॥*॥ द्वे **'रोगादिना वक्रकरस्य'** ॥

पृश्निरल्पतनौ

प्रिति ॥ पृशति, पृश्यते, वा । 'स्पृश संस्पर्शे' (तु० प० अ०) । 'घृणिपृश्निपार्णि–' (उ० ४।५२) इति साधुः । पृच्छति, पृच्छ्यते, वा 'प्रच्छ ज्ञीप्सायाम्' (तु० प० अ०) ।

पर्षति, पृष्यते, वा । 'पृषु सेचने' (भ्वा० प० से०) वा ॥ (१) ॥*॥ अल्पा तनुरस्य ॥ (२) ॥*॥ द्वे **'अल्पशरीरस्य'** ॥

श्रोणः पङ्गौ

श्रविति ॥ श्रोणति । 'श्रोणृ संघाते' (भ्वा० प० से०) । अच् (३।१।१३४) । यत्तु—शृणोति । 'राल्लादयः' इति नक् प्रत्ययादिः—इति मुकुटः । तन्न । 'राल्लादयः' इति सूत्राभावात् । नगादेर्विधायकाभावाच्च ॥ (१) ॥*॥ पनते । 'पन स्तुतौ' (भ्वा० आ० से०) । बाहुलकाद् गुः । स्त्रियाम् 'पङ्गोश्च' (४।१।६८) इत्यूङ् ॥ (२) ॥*॥ द्वे **'जङ्घाहीनस्य'** ॥

मुण्डस्तु मुण्डिते ॥ ४८ ॥

मुण्डेति ॥ मुण्ड्यते । 'मुडि खण्डने' (भ्वा० प० से०) । घञ् (३।३।१९) । **'मुण्डो** मुण्डितशीर्षयोः । राहौ दैत्यान्तरे' इति हैमः ॥ (१) ॥*॥ मुण्ड्यते स्म । क्तः (३।२।१०१) ॥ (२) ॥*॥ द्वे **'खण्डितकेशस्य'** ॥

वलिरः केकरे

वेति ॥ वलते । 'वल संवरणे, संचलने वा' (भ्वा० आ० से०) बाहुलकात् किरच् ॥ (१) ॥*॥ के मूर्ध्नि कर्तुं शीलमस्य । 'कृञो हेतु–' (३।२।२०) इति टः । 'हलदन्तात्–' (६।३।९) इत्यलुक् ॥ (२) ॥*॥ **'टेरे** वलिरकेकरौ' इति रभसः ॥*॥ द्वे **'नेत्रवियुक्तस्य'** ॥

खोडे खञ्जः

खविति ॥ खोडति । 'खोडृ गतिप्रतिघाते' (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (१) ॥*॥ खञ्जति । 'खजि गतिवैकल्ये' (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (२) ॥*॥ 'अथ **खञ्जके खोडखोरौ**' इति रभसः ॥*॥ द्वे **'गतिविकलस्य'** ॥

त्रिषु जरावराः ।

त्रिष्विति ॥ जराशब्दादवरा अर्वाचीना उत्तानशयाद्यास्त्रिलिङ्गाः ॥

जडुलः कालकः पिङ्गुः

जेति ॥ जलति । 'जल घातने' (भ्वा० प० से०) । बाहुलकादुलच् ॥*॥ **'जटुलः'** इति मुकुटः । 'जट संघाते' (भ्वा० प० से०) ॥ (१) ॥*॥ कालयति । 'कल क्षेपे' चुरादिः । ण्वुल् (३।१।१३३) ॥ (२) ॥*॥ अपि प्लवते । 'प्लुङ् गतौ' (भ्वा० आ० से०) । मितद्वादित्वात् (वा० ३।२।१८०) ङुः । 'वष्टि भागुरिः–' इत्यल्लोपः ॥ (३) ॥*॥ त्रीणि **'कृष्णवर्णदेहगतचिह्नस्य' 'लसुन'** इति ख्यातस्य ॥

तिलकस्तिलकालकः ॥ ४९ ॥

तीति ॥ तिल इव । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् ॥ (१) ॥*॥ तिल इव कालकः ॥ (२) ॥*॥ द्वे **'देहस्थतिलस्य'** ॥

अनामयं स्यादारोग्यम्

अनेति ॥ आमयस्याभावः । अर्थाभावेऽव्ययीभावः (२।१।६) ॥ (१) ॥*॥ न रोगोऽस्य । अरोगस्य भावः । ब्राह्मणादित्वात् (५।१।१२४) ष्यञ् ॥ (२) ॥*॥ द्वे **'रोगाभावस्य'** ॥

चिकित्सा रुक्प्रतिक्रिया ।

चिकीति ॥ 'कितेर्व्याधिप्रतीकारे' इति सन् । चिकित्सनम् । 'अ प्रत्ययात्' (३।३।१०२) ॥ (१) ॥*॥ रुजः प्रतिक्रिया निरसनम् ॥ (२) ॥*॥ द्वे **'रोगनिवारणस्य'** ॥

भेषजौषधभैषज्यान्यगदो जायुरित्यपि ॥ ५० ॥

भेषेति ॥ भेषयति । 'भेषृ भये' (भ्वा० उ० से०) । ण्यन्तः । अच् (३।१।१३४) । भेषं रोगं जयति । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः । भेषं जयति वा । 'जै क्षये' (भ्वा० प० से०) । 'आतोऽनुप–' (३।२।३) इति कः ।—भिषज इदम् । 'तस्येदम्' (४।३।१२०) इत्यण् । 'अनन्तावसथेतिहभेषजात्' (५।४।२३) इति निर्देशादेत्वम्—इत्यन्ये ॥ (१) ॥*॥ ओषधेरिदम् । 'ओषधेरजातौ' (५।४।३७) इत्यण् ॥ (२) ॥*॥ भेषजमेव । 'अनन्ता–' (५।४।२३) इति ञ्यः ॥ (३) ॥*॥ गदविरुद्धम् । न गदोऽस्मात्, इति वा ॥ (४) ॥*॥ जयति रोगान् । 'जि अभिभवे' (भ्वा० प० अ०) । 'कृवापाजि–' (उ० १।१) इत्युण् ॥ (५) ॥*॥ पञ्च **'औषधस्य'** ॥

स्त्री रुग्रुजा चोपतापरोगव्याधिगदामयाः ।

स्त्रीति ॥ रुजति देहम् । 'रुजो भङ्गे' (तु० प० अ०) । क्विप् (३।२।१७८) रोजनं वा । संपदादि क्विप् (वा० ३।३।१०८) ॥ (१) ॥*॥ 'इगुपध–' (३।१।१३४) इति कः । टाप् (४।१।४) । भिदाद्यङ् वा (३।३।१०५) **'रुजा** लामयभङ्गयोः' इति हैमः ॥ (२) ॥*॥ उपतापयति । 'तप दाहे' चुरादिः । अच् (३।१।१३५) । उपतपनं वा । 'तप संतापे' (भ्वा० प० अ०) । घञ् (३।३।१८) । **'उपतापो** गदे तापे' इति हैमः ॥ (३) ॥*॥ रुजति । 'पदरुज–' (३।३।१६) इति घञ् । रोजनं वा । भावे घञ् (३।३।१८) ॥ (४) ॥*॥ विविधा आधयोऽस्मात् । व्याधानं वा । 'उपसर्गे घोः किः' (३।३।९२) ॥ (५) ॥*॥ गदति । अच् (३।१।१३४) । **'गदः** कृष्णानुजे रोगे **गदा** प्रहरणान्तरे' इति हैमः ॥ (६) ॥*॥ 'अम रोगे' (भ्वा० प० से०) । भावे घञ् (३।३।१८) । आमं यान्त्यनेन । 'या प्रापणे' (अ० प० अ०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । यद्वा । आमयनम् । अनेन । 'मीङ् हिंसायाम्' (दि० आ०

अ०) 'एरच्' (३।३।५६) । घः (३।३।११८) वा ॥ (७) ॥*॥ सप्त **'रोगस्य'** ॥

क्षयः शोषश्च यक्ष्मा च

क्षय इति ॥ क्षयति देयम् । 'क्षि क्षये' (भ्वा० प० अ०) अन्तर्भावितण्यर्थः । अच् (३।१।१३४) । **'क्षयो** गेहे कल्पान्तेऽपचये रुजि' इति हैमः ॥ (१) ॥*॥ शोषयति । 'शुष शोषणे' (दि० प० अ०) । अच् (३।१।१३४) । **'शोषः** शोषणयक्ष्मणोः' इति हैमः ॥ (२) ॥*॥ यक्षयते, यक्ष्यते, वा । 'यक्ष पूजायाम्' चुरादिः । मनिन् (उ० ४।१४५) ॥ (३) ॥*॥ त्रीणि **'राजयक्ष्मणः'** ॥

प्रतिश्यायस्तु पीनसः ॥ ५१ ॥

प्रेति ॥ प्रतिक्षणं श्यायते । 'श्यैङ् गतौ' (भ्वा० आ० अ०) । 'श्याद्यधा–' (३।१।१४१) इति णः ॥*॥ प्रतिश्यायतेऽनया । 'आतश्चोपसर्गे' (३।३।१०६) इत्यङि 'प्रतिश्या' अपि ॥ (१) ॥*॥ पीनं स्यति, सायति, वा । 'षोऽन्तकर्मणि' (दि० प० अ०) । 'क्षै क्षये' (भ्वा० प० अ०) वा । 'आतोऽनुप–' (३।२।३) इति कः ॥ (२) ॥*॥ **'आपीनसः प्रतिश्या** स्यात्' इति रभसः ॥*॥ द्वे **'नासारोगस्य'** ॥

स्त्री क्षुत् क्षुतं क्षवः पुंसि

स्त्रीति ॥ क्षवणम् । 'टुक्षु शब्दे' (अ० प० से०) । संपदादिः (वा० ३।३।१०८) ॥ (१) ॥*॥ भावे क्तः (३।३।११४) ॥ (२) ॥*॥ 'ऋदोरप्' (३।३।५७) ॥ (३) ॥*॥ 'स्त्रियां क्षुत् क्षुतं **हंछिका**' इति रभसः ॥*॥ त्रीणि **'छिक्कायाः'** ॥

कासस्तु क्षवथुः पुमान् ।

केति ॥ कासतेऽनेन । 'कास शब्दकुत्सायाम्' (भ्वा० आ० से०) । 'हलश्च' (३।३।१२१) इति घञ् । (**'काशस्तृणे** रोगभेदे' इति हैमः । 'वाराणस्यां भवेत्**कासी** क्षवथौ ना तृणेऽस्त्रियाम्' इति तालव्यान्ते रभसाच्च तालव्यान्तोऽपि) ॥ (१) ॥*॥ क्षौत्यनेन । 'टुक्षु शब्दे' (अ० प० से०) 'द्वितोऽथुच्' (३।३।८९) । **'क्षवथुः** कासे छिक्कायाम्' इति हेमचन्द्रः ॥ (२) ॥*॥ द्वे **'कासरोगस्य'** ॥

शोफस्तु श्वयथुः शोथः

शवितेति ॥ शवति । 'शव गतौ' (भ्वा० प० से०) । बाहुलकात् फः । थश्च । 'च्छ्वोः–' (६।३।१९) इत्यूठ् । 'आदुगुणः' (६।१।८७) । संज्ञापूर्वकत्वात् 'एत्येध–' (६।१।८९) इति न वृद्धिः । यद्वा शवति । 'शु गतौ' ( ) । **'शोफ**

१—'क्षुवः क्षुते राजिकायाम्' इत्यपि पाठः ।

ओषधिभेदे स्यादुत्कृते लश्विवर्धने' इति हैमः ॥ (१) ॥*॥ श्वयति अनेन । 'टु ओश्वि गतिवृद्ध्योः' (भ्वा० प० से०) । 'द्वितोऽथुच्' (३।३।८९) ॥ (२) ॥*॥ यत्तु—'शु गतौ' । 'यूथादयश्च'—इति मुकुटेनोक्तम् । तन्निर्मूलम् ॥ (३) ॥*॥ त्रीणि **'शोथस्य'** ॥

पादस्फोटो विपादिका ॥ ५२ ॥

पेति ॥ स्फुटनम् । 'स्फुट विकसने' (तु० प० से०) । घञ् (३।३।१८) पादस्य स्फोटः । पादौ स्फोटयति वा । 'कर्मण्यण्' (३।२।१) ॥ (१) ॥*॥ विपद्यतेऽनया । 'पद गतौ' (दि० आ० अ०) । 'रोगाख्यायां ण्वुल् बहुलम्' (३।३।१०८) ॥ (२) ॥*॥ द्वे **'पादस्फोटनरोगस्य'** ॥

किलाससिध्मे

कीति ॥ किलति । 'किल श्वैत्यक्रीडनयोः' (तु० प० से०) । **'इगुपध–'** (३।१।१३५) इति कः । अस्यति । 'असु क्षेपणे' (दि० प० से०) । अच् (३।१।१३४) । किलं च तदसं च । यद्वा केलनम् । बिदाद्यङ् (३।३।१०४) । किलमस्यति । अण् (३।२।१) । किलेन श्वैत्येन असति वा । 'अस दीप्तौ' (भ्वा० उ० से०) । अच् (३।१।१३४) ॥ (१) ॥*॥ सिध्यति 'षिधु गत्याम्' '(संराद्धौ)' (दि० प० अ०) । बाहुलकान्मक् । यत्तु—पामादित्वान्मनिन्—इति मुकुटः । तन्न । पामादेर्मनिन्विधानाभावात् । धातोः पामादिप्रत्ययाभावात् ॥ (२) ॥*॥ 'पादस्फोटोऽथ **त्वक्पुष्पी** किलासं सिध्मलीति च' इति रभसः ॥*॥ द्वे **'सेदुवा'** इति ख्यातस्य ॥

कच्छ्वां तु पाम पामा विचर्चिका ।

केति ॥ कषति । 'कष हिंसायाम्' (भ्वा० प० से०) । 'कषेश्छ च' (उ० १।८४) इत्यूः ॥ (१) ॥*॥ पायत्यङ्गम् । 'पै शोषणे' (भ्वा० प० से०) । मनिन् (उ० ४।१४५) । पायते देहोऽस्माद्वा । 'पा रक्षणे' (अ० प० अ०) । पिबति देहं वा ॥ (२) ॥*॥ स्त्रियां तु 'मनः' (४।१।११) इति न ङीप् । 'डाबुभाभ्याम्–' (४।१।१३) इति डाप् वा ॥ (३) ॥*॥ विचर्च्यते । 'चर्च अध्ययने' (चु० उ० से०) । 'रोगाख्यायां ण्वुल्–' (३।३।१०८) ॥ (४) ॥*॥ चत्वारि **'खसुरोगस्य'** ॥

कण्डूः खर्जूश्च कण्डूया

केति ॥ कण्डूयनम् । 'कण्डूञ् गात्रविघर्षणे' (कण्ड्वादिः) । 'कण्ड्वादिभ्यो यक्' (३।१।२७) संपदादि क्विप्

१—सटीकहैमपुस्तके तु नोपलभ्यते । २—'सिध्मं किलासं त्वक्पुष्पं सिध्म' इति हैमनाममालोक्तनान्तसिध्माशब्दस्य मनिनन्तरा साधनाभावेन तत्र मनिनर्थम् 'पामादिवन्मनिन्' इत्युक्तमपाठस्य संभवे लेखकप्रमादजातपाठेन खण्डनकरणं स्वीयमेधातिशयबोधनाय ॥

(वा० ३।३।१०८) ॥ (१) ॥*॥ 'अ प्रत्ययात्' (३।३।१०२) ॥ (३) ॥*॥ खर्जनम् । 'खर्ज मार्जने च । चाद्यथने' (भ्वा० प० से०) । 'कृषिचमि–' (उ० १।८०) इत्यूः । **'खर्जूः** खर्जूरीकीटकण्डुषु' इति हैमः ॥ (२) ॥*॥ त्रीणि **'गात्रविघर्षणस्य'** ॥

विस्फोटः पिटकस्त्रिषु ॥ ५३ ॥

वीति ॥ विस्फोटति 'स्फुटिर् विशरणे' (भ्वा० प० से०) । अच् (३।१।१३४) । करणे घञ् (३।३।११९) वा ॥ (१)॥*॥ पेटति । 'पिट शब्दसंघातयोः' (भ्वा०प० से०) कुन् (उ० २।३२) । **'पिटकः** स्यात्तु विस्फोटे मञ्जूषायामपीष्यते' इति हेमचन्द्रः । स्त्रियां पिटका । क्षिपकादिः (वा० ७।३।४५) ॥*॥ **'विस्फोटा विटिका** स्त्रियाम्' इत्यमरमालायां वकारादिरपि ॥ (२) ॥*॥ द्वे **'फोडा'** इति ख्यातस्य ॥

व्रणोऽस्त्रियामीर्ममरुः क्लीबे

व्रेति ॥ व्रणति । 'व्रण शब्दे' (भ्वा० प० से०) । अच् (३।१।१३४) । यद्वा व्रणयति । 'व्रण गात्रविचूर्णने' (चु० उ० से०) । अदन्तः । अच् (३।१।१३४) ॥ (१) ॥*॥ ईरयति सुखम् । 'ईर गतिप्रेरणयोः' (अ० आ० से०) । बाहुलकान्मन् ॥ (२) ॥*॥ इयर्ति । 'ऋ गतौ' (जु० प० अ०) । 'अर्तिपॄवपि–' (उ० २।११७) इत्युस् ॥ (३) ॥*॥ त्रीणि **'व्रणस्य'** ॥

नाडीव्रणः पुमान् ।

नेति ॥ नाड्यां व्रणः ॥ (१) ॥*॥ एकं **'सदा गलतो व्रणस्य'** ॥

कोठो मण्डलकम्

कवि॑ति ॥ कुण्ठति । 'कुठि प्रतिघाते' (भ्वा० प० से०)। अच् (३।१।१३४) । आगमशास्त्रस्यानित्यत्वान्न नुम् ॥ (१) ॥*॥ मण्डलमिव । 'इवे प्रतिकृतौ' (५।३।९३) इति कन् ॥ (२) ॥*॥ द्वे **'मण्डलाकारकुष्ठस्य'** ॥

कुष्ठश्वित्रे

कि॑ति ॥ कुणात्यङ्गम् । 'कुष निष्कर्षे' (क्या० प० से०) । 'निकुषि–' (उ० २।२) इति क्थन् । कुत्सितं तिष्ठति वा । 'सुपि–' (३।२।४) इति कः । 'अम्बाम्ब–' (८।३।९७) इति षः । **'कुष्ठं** भेषजरोगयोः' इति हैमः ॥ (१) ॥*॥ श्वेतते । 'श्विता वर्णे' (भ्वा० आ० से०) । 'स्फायीतञ्चि–' (उ० २।१३) इति रक् ॥ (२) ॥*॥ द्वे **'श्वेतकुष्ठस्य'** ॥

दुर्नामकार्शसी ॥ ५४ ॥

दुरि॑ति ॥ दुष्टं नामास्य । पापरोगत्वात् । क्षुभ्नादिः (८।४।३९) ॥ (१) ॥*॥ ऋच्छति । 'ऋ गतौ' (भ्वा० प० अ०) । 'अर्तेर्व्यधौ शुट च' (उ० ४।१९६) इत्यसुन् ॥ (२) ॥*॥ द्वे **'गुदरोगस्य' अर्शोख्यस्य** ॥

आनाहस्तु विबन्धः स्यात्

आने॑ति ॥ आनहनम् । 'णह बन्धने' (दि० उ० अ०)। घञ् (३।३।१८) ॥ (१) ॥*॥ विबन्धनम् । 'बन्ध बन्धने' (क्या० प० अ०) । घञ् (३।३।१८) ॥ (२) ॥*॥ आभ्यां करणे वा घञ् (३।३।११९) ॥*॥ द्वे आध्मानस्य **'मलमूत्रनिरोधस्य'** ॥

ग्रहणी रुक् प्रवाहिका ।

ग्रे॑ति ॥ गृह्णाति जठराग्निम् । 'ग्रह उपादाने' (क्या० उ० से०) । 'कृत्यल्युटः–' (३।३।११३) इति ल्युट् ॥ (१) ॥*॥ प्रवहति । ण्वुल् (३।१।१३३) । प्रवहणम् । 'रोगाख्यायां ण्वुल्–' (३।३।१०८) ॥ (२) ॥*॥ रुक् रोगः । प्रवाहिका रोगो ग्रहणी स्यात् ॥*॥ द्वे **'संग्रहणीरोगस्य'** ॥

प्रच्छर्दिका वमिश्च स्त्री पुमांस्तु वमथुः समाः ॥५५॥

प्रे॑ति ॥ प्रच्छर्दनम् । 'छर्द वमने' (चु० प० से०) । 'रोगाख्या–' (३।३।१०८) इति ण्वुल् ॥ (१) ॥*॥ वमनम् । 'टु वम उद्गिरणे' (भ्वा० प० से०) । 'इक् कृष्यादिभ्यः' (वा० ३।३।१०८) ॥ (२) ॥*॥ 'ट्वितोऽथुच्' (३।३।८९) । **'वमथुः** पुंसि वमने गजस्य करसीकरे' इति (मेदिनी) ॥ (३) ॥*॥ त्रीणि **'वमनस्य'** ॥

व्याधिभेदा विद्रधिः स्त्री ज्वरमेहभगंदराः ।

व्ये॑ति ॥ वेदनम् । छिद्रम् । 'बहुलमन्यत्रापि संज्ञाछन्दसोः' इति रक् । यद्वा विद्राति । 'द्रा स्वप्ने पलायने' (अ० प० अ०) । 'आतश्चोपसर्गे' (३।१।१३६) इति कः । विद्रं दीयतेऽस्याम् । 'डुधाञ्' । 'कर्मण्यधिकरणे च' (३।३।९३) इति किः । यद्वा विद्रस्य धानम् । 'इकृष्यादिभ्यः' (वा० ३।३।१०८) ॥ (१) ॥*॥ ज्वरति । 'ज्वर रोगे' (भ्वा० प० से०) । अच् (३।१।१३४) । ज्वरणं वा । ण्यन्तात् घञ् (३।३।१८) णिलोपस्य स्थानिवत्त्वान्न वृद्धिः । 'एरच्' (३।३।५६) वा ॥ (१) ॥*॥ मेहति । 'मिह सेचने' (भ्वा प० अ०) । अच् (३।१।१३४) । मेहनं वा । घञ् (३।३।१८) ॥ (१) ॥*॥ भगं दारयति । 'भगे च दारेः' (काशिका०) इति खच् ॥ (१) ॥*॥

अश्मरी मूत्रकृच्छ्रं स्यात्

अश्मे॑ति ॥ अश्मानं राति । 'आतोऽनुप–' (३।१।३) इति कः । गौरादिः (४।१।४१) ॥ (१) ॥*॥ मूत्रे कृच्छ्रमत्र ॥ (१) ॥*॥ **'विद्रध्यादीनां व्याधिप्रभेदानां'** प्रत्येकमेकैकम् ।—अश्मर्यास्तु द्वे नाम्नी—इत्येके ॥

पूर्वं शुक्रावधेस्त्रिषु ॥ ५६ ॥

प्वि॑ति ॥ इतः परं शुक्रशब्दात् प्राक्पठिता वाच्यलिङ्गा इत्यर्थः ॥

रोगहार्यगदंकारो भिषग्वैद्यौ चिकित्सके ।

रोगेति ॥ रोगं हरति तच्छीलः । 'सुपि–' (३।२।७८) इति णिनिः ॥ (१) ॥*॥ अगदमरोगं जन्तुं करोति 'कर्मण्यण्' (३।२।१) 'कारे सत्यागदस्य' (६।३।७०) इति मुम् ॥ (२) ॥*॥ भिषज्यति । 'भिषज रुग्जये' । 'कण्ड्वादिभ्यो यक्' (३।१।२७) । क्विप् (३।१।१७८) ॥ (३) ॥*॥ विद्यामधीते । 'तदधीते तद्वेद' (४।२।५९) इत्यण् ॥ (४) ॥*॥ चिकित्सति । 'कितेर्व्याधिप्रतीकारे' इति सन्नन्तात् ण्वुल् (३।१।१३३) ॥ (५) ॥*॥ पञ्च **'वैद्यस्य'** ॥

वार्तो निरामयः कल्य उल्लाघो निर्गतो गदात् ५७

वेति ॥ वृत्तिरस्यास्ति । **'वृत्तेश्च'** (वा० ५।२।१०१) णः । **'वार्ता** तु वर्तने वातिङ्गणे कृष्याद्युदन्तयोः । निःसारारोग्ययोः क्लीबं वृत्तिमन्नीरुजोस्त्रिषु' (इति मेदिनी) ॥ (१) ॥*॥ निष्क्रान्त आमयात् । 'निरादयः–' (वा० २।२।१८) इति समासः । **'निरामयस्तु** पुंसि स्यादिडिक्के विगतामये' इति हैमः । **'निरामयस्तु** पुंसि स्यादिडिक्के त्रिषु नीरुजे' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ कलासु साधुः । 'तत्र साधुः' (४।४।९८) इति यत् । **'कल्यं** प्रभाते मधुनि सज्ये दक्षे निरामये । **कल्या** कल्याणवाचि स्यात्' इति हैमः ॥ (३) ॥*॥ उल्लाघते स्म । 'लाघृ सामर्थ्ये' (भ्वा० आ० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । 'उल्लाघ्यते स्म' इति वा । 'अनुपसर्गात्फुल्ल–' (८।२।५५) इति साधुः । **'उल्लाघो** निपुणे हृष्टे शुचिनीरोगयोरपि' इति हैमः ॥ (४) ॥*॥ चत्वारि **'रोगनिर्मुक्तस्य'** ॥

ग्लानग्लास्नू

ग्लेति ॥ ग्लायति स्म । 'ग्लै हर्षक्षये' (भ्वा० प० अ०) । 'गत्यर्था–' (३।४।७२) इति क्तः । 'संयोगादेः–' (८।२।४३) इति नलम् ॥ (१) ॥*॥ ग्लानशीलः । 'ग्लाजिस्थश्च ग्नुः' (३।२।१३९) ॥ (२) ॥*॥ द्वे **'रोगेण क्षीणस्य'** ॥

आमयावी विकृतो व्याधितोऽपटुः ।
आतुरोऽभ्यमितोऽभ्यान्तः

आमेति ॥ आमयोऽस्यास्ति । 'आमयस्य दीर्घश्च' (वा० ५।२।१२२) इति विनिः ॥ (१) ॥*॥ विक्रियते स्म । क्तः (३।२।१०२) । **'विकृतो** रोग्यसंस्कृतः' । 'बीभत्सश्च' इति हैमः ॥ (२) ॥*॥ व्याधिः संजातोऽस्य । 'तदस्य संजातं तारकादिभ्य इतच्' (५।२।३६) ॥ (३) ॥*॥ **'पटुर्दक्षे** च नीरोगे' (इति मेदिनी) । पटोरन्यः ॥ (४) ॥*॥ आतोतोर्ति । 'तुर त्वरणे' ह्वादिः । 'छान्दसा अपि क्वचिद्भाषायां प्रयुज्यन्ते' । 'इगुपध–' (३।१।१३४) इति कः । मुकुटस्तु—आतुरयति=असुस्थत्वादतित्वरते । 'तुण त्वरणे' (जु० प० से०) । अत इगुपधः कः—इति व्याचख्यौ । तत्र ण्यन्त उपधागुणाभावश्चिन्त्यः । ण्यन्तस्येगुपधत्वाभावात्कप्रत्ययोऽपि । —आतोरति । आतुरः । आतरति रोगं वा—इति स्वाम्यपि चिन्त्यः । तुरेरुक्तरूपाभावात् । तरतेरिष्टरूपासंभवाच्च ॥ (५) ॥*॥ अभ्यम्यते स्म । 'अम रोगे' (चु० उ० से०) । क्तः (३।२।१०२) । चुरादीनां णिचो वैकल्पिकत्वाण्णिजभाव इदम् । अभ्यमतिस्म वा । 'अम गतौ' (भ्वा० प० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । 'रुष्यमत्वर–' (७।२।२८) इति वेट् ॥ (६) ॥*॥ इडभावे 'अनुनासिकस्य—' (६।४।१५) इति दीर्घः ॥ (७) ॥*॥ सप्त **'रोगिणः'** ॥

समौ पामनकच्छुरौ ॥ ५८ ॥

सेति ॥ पामास्यास्ति । पामादित्वात् (५।२।१००) नः ॥ (१) ॥*॥ कच्छूरस्यास्ति । 'कच्छ्वा ह्रस्वश्च' ( ) इति रः । **'कच्छुरा** शूकशिम्ब्यां च शटीदुःस्पर्शयोरपि । **कच्छुरं** वाच्यवत्प्राहुः पामने पुंश्चलेऽपि च' इति विश्वः ॥ (२) ॥*॥ द्वे **'विचर्चिकायुक्तस्य'** ॥

दर्द्रुणो दर्द्रुरोगी स्यात्

देति ॥ दरिद्राति । 'दरिद्रा दुर्गतौ' (अ० प० से०) । 'दरिद्रातेर्यालोपश्च' (उ० १।९०) इति साधुः । दर्द्रूरस्यास्ति । 'शाकीपलाशीदर्द्रूणां ह्रस्वश्च' इति पामादिषु (ग० ५।२।१००) पाठान्नः ॥ (१) ॥*॥ दर्द्रूश्चासौ रोगश्च । 'इको ह्रस्वोऽङ्यः–' (६।३।६१) इति ह्रस्वः । दर्द्रुरोगोऽस्यास्ति । 'द्वन्द्वोपताप–' (५।२।१२८) इतीनिः ॥ (२) ॥*॥ द्वे **'दर्द्रुयुक्तस्य'** ॥

अर्शोरोगयुतोऽर्शसः ।

अर्शेति ॥ अर्शोरोगेण युतः ॥ (१) ॥*॥ अर्शांसि सन्त्यस्य । 'अर्शआदिभ्योऽच्' (५।२।१२७) ॥ (२) ॥*॥ द्वे **'मूलव्याधिमतः'** ॥

वातकी वातरोगी स्यात्

वातेति ॥ वातोऽतिशयितोऽस्य । 'वातातीसाराभ्यां कुक् च' (५।२।१२९) इतीनिः ॥ (१) ॥*॥ वातरोगोऽस्यास्ति । 'द्वन्द्वोपताप–' (५।२।१२८) इतीनिः ॥ (२) ॥*॥ द्वे **'वातरोगिणः'** ॥

सातिसारोऽतिसारकी ॥ ५९ ॥

सेति ॥ सहातिसारेण वर्तते ॥ (१) ॥*॥ अतिसारोऽस्यास्ति । प्राग्वत् (५।२।१२९) इनिः कुक् च ॥ (२) ॥*॥ द्वे **'अतीसारवतः'** ॥

स्युः क्लिन्नाक्षे चुल्लचिल्लपिल्लाः क्लिन्नेऽक्षिण चाप्यमी ।

स्युरिति ॥ (वा० ५।२।३३) क्लिन्नस्य लप्रत्ययः । चुल्

१—अक्षिण तु नपुंसकानि । 'अमी' इति पुंस्त्वं तु शब्दापेक्षया–' इति मुकुटः ॥

चिल्, पिल्, आदेशाः 'अस्य चक्षुषि' इत्यर्थे । चक्षुर्गतः क्लेदरोगश्चुल्लादिवाच्यः । तद्योगाच्चक्षुश्चुल्लादिवाच्यम् । तच्चक्षुर्योगात्पुरुषोऽपि । '**चिल्लः** खगे स**चुल्लश्च पिल्ल**वत् क्लिन्नलोचने । क्लिन्नाक्षिणि' इति हैमः ॥ (१) ॥*॥ (२) ॥*॥ (३) ॥*॥ त्रीणि '**क्लिन्ननेत्रतद्वतोः**' ॥

उन्मत्त उन्मादवति

उन्मेति ॥ उन्मादयति स्म । 'मदी हर्षे' (दि० प० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । 'न ध्याख्या–' (८।२।५७) इति नत्वं न । '**उन्मत्तो** मुचुकुन्दे स्याद्धत्तूरोन्मादयुक्तयोः' इति हैमः ॥ (१) ॥*॥ उन्मदनम् । घञ् (३।३।१८) । उन्मादोऽस्यास्ति । मतुप् (५।२।९४) ॥ (२) ॥*॥ द्वे '**वातकृतचित्तविभ्रमस्य**' ॥

श्लेष्मलः श्लेष्मणः कफी ॥ ६० ॥

श्लेष्मेति ॥ श्लेष्मास्यास्ति । 'सिध्मादिभ्यश्च' (५।२।९६) इति लच् ॥ (१) ॥*॥ पामादित्वात् (५।२।१००) नः ॥ (२) ॥*॥ कफोऽस्यास्ति । 'द्वन्द्वोप–' (५।२।१२८) इतीनिः ॥ (३) ॥*॥ त्रीणि '**कफवतः**' ॥

न्युब्जो भुग्ने रुजा

न्युब्जेति ॥ न्युब्जनम् 'उब्ज आर्जवे' (तु० प० से०) । घञ् (३।५।१८) । 'भुजन्युब्जौ पाण्युपतापयोः' (७।३।३१) इति साधुः । न्युब्जः पृष्ठवक्रत्वकारी यस्यास्ति । अर्शआद्यच् (५।२।१२७) । रुजा रोगेण भुग्ने पुरुषे न्युब्जो वर्तते । 'न्युब्जः कुब्जे कुशक्षुद्रे । अधोमुखेऽपि च न्युब्जं कर्मरङ्गतरोः फले' इति हैमः ॥ (१) ॥*॥ एकम् '**कुब्जस्य**' ॥

वृद्धनाभौ तुण्डिभतुण्डिलौ ।

वृद्धेति ॥ वृद्धा उन्नता नाभिरस्य ॥ (१) ॥*॥ तुण्ड्यते । 'तुडि तोडने' (भ्वा० आ० से०) । 'सर्वधातुभ्य इन्' (उ० ४।११८) । 'तुण्डिबलिवटेर्भः' (५।२।१३९) ॥ (२) ॥*॥ सिध्मादिलात् (५।२।९६) लच् ॥*॥ '**तुन्दिल**' इति पाठे 'तुन्दादिभ्य इलच्' (३।२।११७) ॥ (३) ॥*॥ त्रीणि '**उन्नतनाभियुक्तपुरुषस्य**' ॥

किलासी सिध्मलः

कीति ॥ किलासमस्यास्ति । 'द्वन्द्वोप–' (५।५।१२८) इतीनिः ॥ (१) ॥*॥ सिध्ममस्यास्ति । 'सिध्मादिभ्यश्च' (५।२।९६) इति लच् । '**सिध्मला** मत्स्यविकृतौ वाच्यवत्तु किलासिनि' इति मेदिनी ॥ (२) ॥*॥ द्वे '**सिध्मयुक्तस्य**' ॥

अन्धोऽदृक्

अन्ध इति ॥ अन्धयति । 'अन्ध दृष्ट्युपघाते' (चु० उ० से०) अच् (३।१।१३४) । ('**अन्धं** स्यात्तिमिरे क्लीबं चक्षुर्हीनेऽभिधेयवत्' इति मेदिनी) ॥ (१) ॥*॥ न दृगस्य ॥ (२) ॥*॥ द्वे '**अचक्षुषः**' ॥

मूर्च्छाले मूर्च्छमूर्च्छितौ ॥६१॥

र्मिति ॥ मूर्च्छास्यास्ति । सिध्मादिषु (ग० ५।२।९६) 'क्षुद्रजन्तूपतापाच्च' इति पठितलाल्लच् । 'प्राणिस्थादातः—' (५।२।९५) इति न भवति । 'प्राण्यङ्गादेव' इति (वार्तिकरूपव्याख्यानात् ॥ (१) ॥*॥ मूर्च्छति स्म । 'मूर्च्छा मोहसमुच्छ्राययोः' (भ्वा० प० से०) । क्तः (३।४।७२) । 'राल्लोपः' (३।४।२१) । 'न ध्याख्या–' (८।२।५७) इति न नलम् । '**मूर्तं** स्यान्त्रिषु मूर्च्छाले कठिने मूर्तिमत्यपि' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ मूर्च्छा जातास्य । तारकादित्वात् (५।२।३६) इतच् । '**मूर्च्छितं** सोच्छ्राये मूढे' इति हैमः ॥*॥ त्रीणि '**मूर्च्छावतः**' ॥

शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च ।

श्वितीति ॥ शोचत्यनेन । 'शुच शोके' (भ्वा० प० से०) शोचयति वा । 'ऋज्रेन्द्र–' (उ० २।२८) इति साधुः । '**शुक्रं** तु रेतोऽक्षिरुजोः' इति हैमः ॥ (१) ॥*॥ तेजयति । 'तिज निशाने' (भ्वा० आ० से०) । असुन् (उ० ४।१८९) ॥ (२) ॥*॥ रिणाति । 'री गतिरेषणयोः' (क्र्या० प० अ०) । 'सुरीभ्यां तुट् च' (उ० ४।२०२) इत्यसुन् ॥ (३) ॥*॥ विशेषेण ईजते । 'ईज गतिकुत्सनयोः' (भ्वा० आ० से०) । अच् (३।१।१३४) बवयोरभेदः । वीज्यते वा । घञ् (३।३।१९) । कुत्वं तु न भवति । 'चजोः–' (७।३।५२) इत्यत्र 'निष्ठायामनिटः' इति वार्तिककृता पूरितत्वात् । अस्य च निष्ठायां सेट्त्वात् । यद्वा वीजयति, वीज्यते वा । अनेन वा । 'वीज व्यजने' ( ) । अच् (३।१।१३४) । घञ् (३।३।१८,१९) वा । '**बीजं** तु रेतसि । स्यादाधाने च तत्त्वे च हेतावङ्कुरकारणे' इति हैमः ॥ (४) ॥*॥ वीरेऽक्लीबे साधुः । 'तत्र साधुः' (४।४।९८) इति यत् । यद्वा वीरयति । वीर्यते वा । अनेन वा । 'वीर विक्रान्तौ' (चु० उ० से०) । अञ्यादिः (उ० ५।११२) । 'अचो यत्' (३।१।९७) वा । '**वीर्यं** तेजःप्रभावयोः । शुक्रे शक्तौ च' इति हैमः ॥ (५) ॥*॥ इन्द्रस्यात्मनो लिङ्गम् । 'इन्द्रियमिन्द्रलिङ्ग–' (५।२।९३) इति साधुः । '**इन्द्रियं** तु चक्षुरादिषु रेतसि' इति हेमचन्द्रः ॥ (६) ॥*॥ षट् '**रेतसः**' ॥

मायुः पित्तम्

मेति ॥ मिनोति देहं ऊष्माणम् । 'डुमिञ् प्रक्षेपणे' (स्वा० उ० अ०) । 'कृवापाजि–' (उ० १।१) इत्युण् ॥ (१) ॥*॥ अपि दीयते स्म । 'दो अवखण्डने' (दि० प० अ०) । 'देङ् पालने' (भ्वा० वा० अ०) वा । क्तः (३।२।१०२) । 'अच उपसर्गात्तः' (७।४।४७) । 'वष्टि भागुरिः–' इत्यल्लोपः ।

संज्ञापूर्वकत्वात् 'दस्ति' (६।३।१२४) इति दीर्घो न ॥ (२) ॥*॥ द्वे **'पित्तस्य'** ॥

कफः श्लेष्मा

केति ॥ केन जलेन फलति । 'फल निष्पत्तौ' (भ्वा० प० से०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । यद्वा के शिरसि फणति, फक्कति, वा । प्राग्वत् डः (वा० ३।२।१०१) ॥ (१) ॥*॥ श्लिष्यति । 'श्लिष आलिङ्गने' (दि० प० अ०) । 'सर्वधातुभ्यो मनिन्' (उ० ४।१४५) ॥ (२) ॥*॥ द्वे **'कफस्य'** ॥

स्त्रियां तु त्वगसृग्धरा ॥ ६२ ॥

त्वगिति ॥ त्वचति । 'त्वच संवरणे' (उ० प० से०) । क्विप् (३।२।१७८) यद्वा तनोति । 'तनोतेरनश्च वः' (उ० २।६३) इति क्विक् च । **'त्वक्** स्त्री चर्मणि वल्के च गुडत्वचि विशेषतः' (इति मेदिनी) ॥*॥ 'पुंसि–' (३।३।११८) इति घे 'त्वच' इत्यदन्तोऽपि । **त्वक्त्वचचोचशब्दाः** स्युर्वल्के चर्मणि पत्रके' इति धरणिः ॥ (१) ॥*॥ असृजो रक्तस्य धरा ॥*॥ **'असृग्धरा'** इत्येके ॥ (२) ॥*॥ द्वे **'चर्मणः'** ॥

पिशितं तरसं मांसं पललं क्रव्यमामिषम् ।

पिशीति ॥ पिंशति । 'पिश अवयवे' (तु० प० से०) 'पिशेः किच्च' (उ० ३।९५) इतीतन् । पिश्यते स्म वा क्तः (३।२।१०२) । **'पिशितं** मांसं **पिशिता** मांसिका' इति हैमः ॥ (१) ॥*॥ **'तरो** जवे बले' इति हैमः । तरो बलमस्त्यस्मिन् । अर्शआद्यच् (५।२।१२७) ॥ (२) ॥*॥ मन्यते । 'मन ज्ञाने' (दि० आ० अ०) । 'मनेर्दीर्घश्च' (उ० ३।६४) इति सः ॥ (३) ॥*॥ पलति, पल्यते वा । अनेन वा । 'पल गतौ' (भ्वा० प० से०) । 'वृषादिभ्यश्चित्' (उ० १।१०६) इति कलः । **'पललं** तिलमिश्रे स्यात् **पललं** पिशितेऽपि च' इति शाश्वतः । **'पललं** पङ्कमांसयोः । तिलचूर्णे **पललस्तु** राक्षसे' इति हैमः ॥ (४) ॥*॥ क्लवते । क्लव्यतेऽस्माद्वा । 'क्लव भये' ( ) । न्यन्तो मित् । 'अचो यत्' (३।१।९७) रलयोरेकलम् ।—क्लूयते । 'कुङ् गतौ' (भ्वा० आ० अ०)—इति स्वामी ॥ (५) ॥*॥ आमिषति । 'मिष स्पर्धायाम्' (तु० प० से०) । मेषति वा । 'मिषु सेचने' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः ॥ (६) ॥*॥ षट् **'मांसस्य'** ॥

उत्तप्तं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिङ्गकम् ॥ ६३ ॥

उत्तेति ॥ उत्तप्यते स्म । 'तप संतापे' (भ्वा० प० से०) । क्तः (३।२।१०२) । **'उत्तप्तं** चञ्चले शुष्कमांससंतप्तयोरपि' इति हैमः ॥ (१) ॥*॥ शुष्कं च तन्मांसं च ॥ (२) ॥*॥ वल्लते, वल्लयते वा 'वल्ल संवरणे' (भ्वा० आ० से०) । खर्जादित्वात् (उ० ४।९०) ऊरः । **'वल्लूरं** स्याद्वनक्षेत्रे, वाहनोषरयोरपि । **वल्लूरा** त्रिषु संशुष्कमांसशूकरमांसयोः' इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'शुष्कमांसस्य'** ॥

रुधिरेऽसृग्लोहिताऽस्रक्षतजशोणितम् ।

रुधीति ॥ रुणद्धि । रुध्यते वा । 'रुधिर् आवरणे' (रु० उ० अ०) । 'इषिमदिमुदि–' (उ० १।५१) इति किरच् । **'रुधिरोऽङ्गारके** पुंसि क्लीबं तु कुङ्कुमासृजोः' (इति मेदिनी) ॥ (१) ॥*॥ अस्यते । 'असु क्षेपणे' (दि० प० से०) । बाहुलकात्कृजः । न सृजति वा । 'सृज विसर्गे' (तु० प० अ०) । क्विप् । 'क्विन्प्रत्ययस्य–' (८।२।६२) इति कुः । 'क्विन् प्रत्ययो यस्मात्' इति बहुव्रीहिः । **'ऋत्विग्दधृक्स्रक्–'** (३।२।५९) इति हि सृजेः क्विन् विहितः ॥ (२) ॥*॥ रोहति । रुह्यते वा । 'रुहे रश्च लो वा' (उ० ३।९४) इतीतच् । **'लोहितं** रक्तगोशीर्षे **कुङ्कुमे** रक्तचन्दने । पुमान्नदान्तरे भौमे वर्णे च त्रिषु तद्वति' (इति मेदिनी) ॥ (३) ॥*॥ अस्यते । 'बहुलमन्यत्रापि' इति रक् । **'अस्रः** कोणे कचे पुंसि क्लीबमश्रुणि शोणिते' (इति मेदिनी) ॥ (४) ॥*॥ रज्यते स्म । 'रञ्ज रागे' (भ्वा० उ० अ०) । क्तः (३।२।१०२) । **'रक्तोऽनुरक्ते** नील्यादिरञ्जिते लोहिते त्रिषु । क्लीबं तु कुङ्कुमे ताम्रे प्राचीनामलकेऽसृजि' (इति मेदिनी) ॥ (५) ॥*॥ क्षताज्जातम् । ङः (३।२।९८) ॥ (६) ॥*॥ शोणति स्म । 'शोणृ वर्णगत्योः' (वा० प० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः ।—शोणते—इति मुकुटश्चिन्त्यः ॥ (७) ॥*॥ सप्त **'रक्तस्य'** ॥

वृक्काऽग्रमांसम्

ब्विति ॥ वृक्कयते स्वादुत्वान्मृग्यते । 'वृक्क भक्षणे' (भ्वा० प० से०) । घञ् (३।३।१९) । 'शोणितेषु स्त्रियां **वृक्का वृक्कं** सुरसमद्वयोः' इति रभसः । 'उरस्यपि वृक्कायां हृदयं मानसेऽपि च' इति त्रिकाण्डशेषः ॥ (१) ॥*॥ अग्रं मुख्यं मांसम् ॥ (२) ॥*॥ द्वे **'हृदयान्तर्गतमांसविशेषस्य'** ॥

हृदयं हृत्

हृति ॥ हरति । ह्रियते वा । 'वृहोः षुक्दुकौ च' (उ० ४।१००) इति कयन् । **'हृदयं** मानसे वृक्कोरसोरपि नपुंसकम्' (इति मेदिनी) ॥ (१) ॥*॥ बाहुलकात्केवलोऽपि दुक् ॥ (२) ॥*॥ 'पद्मकोशप्रतीकाशं रुचिरं चाप्यधोमुखम् । हृदयं तद्विजानीयाद्विश्वस्यायतनं महत्' इति ॥*॥ द्वे **'हृदयकमलस्य'** । चत्वारि पर्याया इत्येके ॥

१—'धरणिः' इत्येतत्स्थाने, 'रत्नकोषः' इति वा पाठः ॥

१—हैमनाममालायामपि 'वृक्का हृद् हृदयं वृक्का सुरसं च तदग्रिमम्' इत्युपलभ्यते । 'स्त्रियां वृक्का वृक्कस्तु समयोर्द्वयोः' इति पाठान्तरम् ॥

मेदस्तु वपा वसा ॥ ६४ ॥

मयिति ॥ मेद्यति । 'ञिमिदा स्नेहने' (दि० प० से०) । असुन् (उ० ४।१८९) ॥*॥—घञ् (३।३।१९)—इत्यन्ये ॥ (१) ॥*॥ वपति । उप्यते वा । 'डुवप् बीजतन्तुसंताने' (भ्वा० उ० अ०) । अच् (३।१।१३४) । भिदाद्यङ् (३।३।१०२) वा । **'वपा** विवरमेदसोः' इति हैमः ॥ (२) ॥*॥ वसति, वस्ते, वा । 'वस निवासे' (भ्वा० प० अ०) । 'वस आच्छादने' (अ० आ० से०) वा । अच् (३।१।१३४) ॥ (३) ॥*॥ त्रीणि **'शुद्धमांसस्नेहस्य'** ॥

पश्चाङ्ग्रीवासिरा मन्या

पेति ॥ पश्चाद्भागे ग्रीवायाः सिरा । मन्यतेऽनया । 'संज्ञायां समज–' (३।३।९९) इति क्यप् ॥ (१) ॥*॥ एकं **'ग्रीवायाः पश्चाद्भागे स्थितसिरायाः'** ॥

नाडी तु धमनिः सिरा ।

नेति ॥ नाडयति, नाड्यते, वा । 'नड भ्रंशे' (चुरादिः । **'अच इः'**) (उ० ४।१३९) । **'नाडी** नाले व्रणान्तरे । शिरायां गण्डदूर्वायां चर्यायां कुहनस्य च । तथा षट्क्षणकालेऽपि' (इति मेदिनी) ॥ (१) ॥*॥ धमति । ध्माने धमिः सौत्रः । 'अर्तिसृधृ–' (उ० २।१०२) इत्यनिः । ङीष् (ग० ४।१।४५) । **'धमनी** तु शिराहट्टविलासिन्योश्च योषिति' (इति मेदिनी) ॥ (२) ॥*॥ सिनोति । 'षिञ् बन्धने' (स्वा० उ० अ०) । 'बहुलमन्यत्रापि' इति रक् ॥*॥ तालव्यादिरपि । 'शिरो ना पिप्पलीमूले स्याद्धमन्यां च योषिति' इति तालव्यादौ रभसात् । शिनोति । 'शिञ् निशाने' (स्वा० उ० अ०) । 'बहुलमन्यत्रापि' इति रक् ॥ (३) ॥*॥ त्रीणि **'धमन्याः'** ॥

तिलकं क्लोम

तीति ॥ तेलति । 'तिल गतौ' (भ्वा० प० से०) । तिलति वा । 'तिल स्नेहने' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । स्वार्थे कन् (ज्ञापि० ५।४।५) कुन् (उ० २।३२) वा । **'तिलको** द्रुमरोगाश्वभेदेषु तिलकालके । क्लीबं सौवर्चलक्लोम्नोर्न स्त्रियां तु विशेषके' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ क्लवते । 'क्लुङ् गतौ' (भ्वा० आ० अ०) । मनिन् (उ० ४।१४५) ॥ (२) ॥*॥ द्वे **'उदर्यजलाशयस्य'** ॥

मस्तिष्कं गोर्दम्

मेति ॥ मस्यते, मसनं वा । 'मसी परिणामे' (दि० प० से०) । क्तिन् (३।३।९४) । मस्तिं मस्कते 'मस्क गतौ' (भ्वा० आ० से०) । अच् (३।१।१३४) । पृषोदरादिः (६।३।१०९) ॥ (१) ॥*॥ गूर्यते । गुरते वा । 'गुरी उद्यमने' (तु० आ० से०) । 'अब्दादयः' (उ० ४।९८) इति साधुः ॥ (२) ॥*॥ द्वे **'मस्तकभवस्नेहस्य'** ॥

किट्टं मलोऽस्त्रियाम् ॥ ६५ ॥

कीति ॥ केटति स्म । 'किट गतौ' (भ्वा० प० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । आगमशास्त्रस्यानित्यत्वान्नेट् (१) ॥*॥ मलते । 'मल धारणे' (भ्वा० आ० से०) । अच् (३।१।१३४) । **'मलोऽस्त्री** पापविट्किट्टे कृपणे त्वभिधेयवत्' (इति मेदिनी) । 'वसा शुक्रमसृग्मज्जा कर्णविड्मूत्रविड्नखाः । श्लेष्माश्रुदूषिकाः स्वेदो द्वादशैते नृणां मलाः' ॥ (२) ॥*॥ द्वे **'मलस्य'** ॥

अन्त्रं पुरीतत्

अन्त्रमिति ॥ अमति, अनेन, वा । 'अम गतौ' (भ्वा० प० से०) । 'सर्वधातुभ्यः ष्ट्रन्' (उ० ४।१५९) । 'अमिचिमिदिशसिभ्यः क्रः' (उ० ४।१६४) । संज्ञापूर्वकत्वान्न दीर्घः । अन्तति । 'अति बन्धने' (भ्वा० प० से०) ष्ट्रन् (उ० ४।१५९) वा ।—'अमियमिमिदेस्त्रक्'—इति मुकुटोपन्यस्तं सूत्रं त्वपाणिनीयम् ॥ (१) ॥*॥ पुरीं शरीरं तनोति । क्विप् (३।२।७६) । 'गमादीनां क्वौ' (वा० ६।४।४०) इत्यनुनासिकलोपः । तुक् (६।१।७१) । 'पुरीं तनोति' इति पक्षे 'नहिवृति–' (६।३।११६) इति दीर्घः । 'अनुदात्तोपदेश–' (६।४।३७) इति नलोपः—इति मुकुटस्य प्रमादः । वस्य झल्त्वाभावात् । 'पुरीतदस्त्रियाम्' इति वाचस्पतिः ॥ (२) ॥*॥ द्वे **'आंत'** इति ख्यातस्य ॥

गुल्मस्तु प्लीहा पुंसि

ग्विति ॥ गुज्यतेऽस्मात् 'गुड रक्षायाम्' (तु० प० से०) मक् । 'भीमादयोऽपादाने' (३।४।७४) ॥ (१) ॥*॥ ह्लेहते । 'ह्लिह गतौ' (भ्वा० आ० से०) । 'श्वन्नुक्षन्पूषन्प्लीहन्–' (उ० १।१५९) इति साधुः ॥ (२) ॥*॥ द्वे **'कुक्षिवामपार्श्वे मांसखण्डस्य'** ॥

अथ वल्कसा ।

स्नायुः स्त्रियाम्

अथेति ॥ वस्ते शरीरम् । 'वस आच्छादने' (अ० आ० से०) । 'धापृवस्यज्यतिभ्यो नः' (उ० ३।६) । वस्नं चर्म स्यति । 'षोऽन्तकर्मणि' (दि० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥ (१) ॥*॥ स्नाति । 'ष्णा शौचे' (अ० प० अ०) । बाहुलकादुण् । 'आतो युक् चिण्कृतोः' (७।३।३३) ॥ (२) ॥*॥ द्वे **'अङ्गप्रत्यङ्गसन्धिबन्धनरूपायाः स्नायोः'** ॥

कालखण्डयकृती तु समे इमे ॥ ६६ ॥

कालेति ॥ कालं च तत्खण्डं च ॥ (१) ॥*॥ यमनम् । संपदादिः (वा० ३।३।१०८) । 'गमादीनाम्–' (वा० ६।४।४०) इति मलोपः । आगमानित्यत्वान्न तुक् । यं संयमं

१—प्लीहा टाबन्ता च । 'यकृत्प्लीहे च संबद्धे' इति पालकाप्यात्—इति मुकुटः ॥

करोति क्विप् (३।२।७६) । तुक् (६।१।७१) ॥ (२) ॥*॥ **'करण्डो तु महाम्नायुः, कालेयं** कालखण्डके' इति रभसः ॥*॥ द्वे **'कुक्षेर्दक्षिणभागस्थमांसखण्डस्य' 'कलेजा'** इति ख्यातस्य ॥

सृणिका स्यन्दिनी लाला

स्रिति ॥ सरति 'सृवृषिभ्यां कित्' (उ० ४।४९) इति निः । 'संज्ञायां कन्' (५।३।७५) ॥*॥ 'सर्तेर्नुम् च' (उ० ४।२३) ईकन् कित्त्वं नुम् च । इति **(सृणीका)** दीर्घमध्यापि ॥ (१) ॥*॥ अवश्यं स्यन्दते । 'आवश्यका–' (३।३।१७०) इति णिनिः । ङीप् (४।१।५) ॥ (२) ॥*॥ लालयते । 'लल ईप्सायाम्' चुरादिः । अच् (३।१।१३४) ॥ (३) ॥*॥ त्रीणि **'लाळ'** इति ख्यातायाः ॥

दूषिका नेत्रयोर्मलम् ।

द्रिति ॥ दूषयति । 'दुष वैकृत्ये' (दि० प० अ०) ण्यन्तः । 'दोषो णौ' (६।४।९०) इत्यूलम् । ण्वुल् (३।१।१३३) । 'अच इः' (उ० ४।१३९) । 'कृत्' (ग० ४।१४५) इति ङीष् वा । स्वार्थे कन् (ज्ञापि० ५।४।५) अपि । **'पिच्चोण्डकं नेत्रमलं दूषी** च दूषिकापि च' इति वाचस्पतिः ॥*॥ 'कषिदूषिभ्यामीकन्' (उ० ४।१६) इति **'दूषीका'** अपि ॥ (१) ॥*॥ एकम् **'नेत्रमलस्य'** ॥

मूत्रं प्रस्रावः

स्विति ॥ मूत्र्यते । 'मूत्र प्रस्रवणे' (चु० उ० से०) । घञ् (३।३।१९) ॥ (१) ॥*॥ प्रस्रूयते । 'ष्रु प्रस्रवणे' (भ्वा० प० अ०) । 'प्रे द्रुस्तुस्रुवः' (३।३।२७) इति घञ् । करणे तु परत्वाल्ल्युट्प्रसङ्गः ॥ (२) ॥*॥ द्वे **'मूत्रस्य'** ॥

उच्चारावस्करौ शमलं शकृत् ॥ ६७ ॥

गूथं पुरीषं वर्चस्कमस्त्री विष्ठाविषौ स्त्रियौ ।

उच्चेति ॥ उच्चार्यते त्यज्यते । 'चर गतौ' (भ्वा० प० से०) । ण्यन्तः । घञ् (३।३।१९) अच् (३।३।५६) वा ॥ (१) ॥*॥ अवकीर्यते अधः क्षिप्यते । 'कॄ विक्षेपे' (तु० प० से०) 'ऋदोरप्' (३।३।५७) । 'वर्चस्केऽवस्करः' (६।१।१४८) इति सुट् ॥ (२) ॥*॥ शाम्यति, शम्यते वा । 'शकिशम्योर्नित्' (उ० १।११२) इति कलः ।—'शकिशमिवहिभ्योऽलः'–इति मुकुटोपन्यस्तमपाणिनीयम् ॥ (३) ॥*॥ शक्नोति, शक्यते वा निःसर्तुं निःसारयितुं वा । 'शकेर्ऋतिन्' (उ० ४।५८) ॥ (४) ॥*॥ गूयते । 'गुङ् शब्दे' (भ्वा० आ० अ०) । 'गु पुरीषोत्सर्गे' (तु० प० अ०) वा । 'तिथपृष्ठगूथ–' (उ० २।१२) इति साधुः ॥ (५) ॥*॥ पिपर्ति शरीरम् । 'पॄ पालनपूरणयोः' (जु० प० से०) । 'कृतॄभ्यामीषन्' (उ० ४।२६) । 'शॄपॄभ्यां किच्च' (उ० ४।२७) इतीषन् किच्च । 'उदोष्ठ्यपूर्वस्य' (७।१।१०२) ॥ (६) ॥*॥ वर्चते, वर्च्यते वा । 'वर्च दीप्तौ' (भ्वा० आ० से०) । असुन् (उ० ४।१८९) । कुत्सायां कन् (५।३।७४) ॥ (७) ॥*॥ विविष्टते उदरे । अनया वा पुरुषः । 'आतश्चोपसर्गे' (३।१।१३६) इति कः । अङ् (३।३।१०६) वा । 'उपसर्गात्–' (८।३।६५) इति षत्वम् ॥ (८) ॥*॥ वेवेष्टि । 'विष्लृ व्याप्तौ' (जु० प० अ०) । क्विप् (३।२।१७८) ॥*॥ ('विश्' इति) तालव्यान्तपाठे विशति । 'विश प्रवेशने' (तु० प० अ०) । क्विप् (३।२।१७८) ॥ (९) ॥*॥ नव **'विष्ठायाः'** ॥

स्यात्कर्परः कपालोऽस्त्री

स्यादिति ॥ कल्पते । 'कृपू सामर्थ्ये' (भ्वा० आ० से०) बाहुलकादरः, लत्वाभावश्च । (**'कर्परस्तु** कटाहे स्याच्छस्त्रभेदकपालयोः' इति हैमः) ॥ (१) ॥*॥ कं पालयति । 'कर्मण्यण्' (३।२।१) । कम्पते । 'कपि चलने' (भ्वा० आ० से०) । 'तमिविशि–' (उ० १।११८) इति कालन् । 'कपि' इति निर्देशान्नलोपः । आगमशास्त्रस्यानित्यत्वं वा । **'कपालोऽस्त्री** शिरोऽस्थि स्यात् घटादेः शकले व्रजे' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'शिरोस्थिखण्डस्य'** ॥

कीकसं कुल्यमस्थि च ॥ ६८ ॥

कीति ॥ 'कि' इति कसति । 'कस गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) । **'कीकसः** कृमिजातौ स्यात्पुंसि कुल्ये नपुंसकम्' (इति मेदिनी) ॥ (१) ॥*॥ 'सजातीयगणे गोत्रे देहेऽपि कथितं **कुलम्**' इति विश्वः । कुले भवम् । साधु वा । दिगादित्वात् (४।३।५४) यत् । 'तत्र साधुः' (४।४।९८) इति वा । कोलति, कुल्यते वा 'कुल संस्त्याने' (भ्वा० प० से०) । अङ्यादिः (उ० ४।११२) । **'कुल्यः** कुलोद्भवे मान्ये कुलस्यातिहितेऽपि च । **कुल्यं** स्यात्कीकसेऽप्यष्टद्रोणीशूर्पामिषेषु च । पयःप्रणालीसरितोः **कुल्या** जीवन्तिकौषधौ' इति विश्वः ॥ (२) ॥*॥ अस्यते । 'असिमञ्जिभ्यां क्थिन्' (उ० ३।१५४) ॥ (३) ॥*॥ त्रीणि **'अस्थिमात्रस्य'** ॥

स्याच्छरीरास्थि कङ्कालः

स्यादिति ॥ 'कम्' इत्यव्ययं सुखे शिरसि च । कं कालयति । 'कल क्षेपे' चुरादिः । अच् (३।१।१३४) । यद्वा कङ्कते । 'ककि गतौ' (भ्वा० आ० से०) । बाहुलकात्कालन् ॥ (१) ॥*॥ एकं **'त्वङ्मांसरहितशरीरास्थ्नः'** ॥

पृष्ठास्थि तु कशेरुका ।

पृष्ठेति ॥ कं वायुं श्रृणाति । केन शीर्यते वा । 'के श्रयेरङ् चास्य' (उ० १।८८) इत्यूः । 'संज्ञायां कन्' (५।३।७५) । 'केऽणः' (७।४।१३) इति ह्रस्वः । यद्वा कशति । कश्यते वा । 'कश शब्दे' ( ) । बाहुलकादेरुः ।

१—इदं तु न प्रकृतोपयोगि ॥

स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (१) ॥*॥ एकं **'पृष्ठवंशस्य'** ॥

शिरोस्थनि करोटिः स्त्री

शीति ॥ कं वायुं रोटते । 'रुट दीप्तौ प्रतिघाते च' (भ्वा० आ० से०) । केन रुव्यते वा । इन् (उ० ४।११८) । वा ङीष् (ग० ४।१।४५) । कं रोटयति वा । 'रुट दीप्तौ' चुरादिः । 'अच इः' (उ० ४।१३९) ॥ (२) ॥*॥ द्वे **'मस्तकास्थ्नः'** ॥

पार्श्वास्थनि तु पर्शुका ॥ ६९ ॥

पेति ॥ स्पृशति, पृश्यते, वा । 'स्पृश संस्पर्शने' (तु० प० अ०) । 'स्पृशेः श्वण्शुनौ पृ च' (उ० ५।२७) । स्वार्थे कन् (ज्ञापि० ५।४।५) । यद्वा परं शृणाति । 'आङ्परयोः खनिशॄभ्यां डिच्च' (उ० १।३३) इति कुः । बाहुलकात्परस्याकारलोपः । पर्शुरिव । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् ॥*॥ 'अप्राणिजातेश्च–' (वा० ४।१।६६) इत्यूङि **'पर्शूः'** अपि ॥ (१) ॥*॥ एकं **'पार्श्वास्थ्नः'** ॥

अङ्गं प्रतीकोऽवयवोऽपघनः

अङ्गमिति ॥ अङ्गति । 'अगि गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) । 'अङ्गं गात्रे प्रतीकोपायययोः पुंभूम्नि नीवृति । क्लीबैकत्वे त्वप्रधाने त्रिष्वङ्गवति चान्तिके' (इति मेदिनी) ॥ (१) ॥*॥ प्रत्येति । प्रतीयते वा । 'इण् गतौ' (अ० प० अ०) । 'अलीकादयश्च' (उ० ४।२५) इति साधुः । **'प्रतीकोऽवयवेऽपि स्यात्प्रतिकूलविलोमयोः'** (इति मेदिनी) ॥ (२) ॥*॥ अव यौति । 'यु मिश्रणे' (अ० प० अ०) । अच् (३।१।१३४) ॥ (३) ॥*॥ अपहन्यते 'अपघनोऽङ्गम्' (३।१।१३४) इति साधुः ॥ (४) ॥*॥ चत्वारि **'देहावयवस्य'** ॥

अथ कलेवरम् ।

गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ॥ ७० ॥
कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः ।

अथेति ॥ कले शुके मधुराव्यक्तध्वनौ वा वरं श्रेष्ठम् । 'हलदन्तात्–' (६।३।९) इत्यलुक् । यत्तु–कले रेतसि त्रियते उपयुज्यते । 'कर्मण्यण्' (३।२।१)–इति मुकुटः । तन्न । कर्मोपपदत्वाभावात् । कर्मणि कारके विधायकाभावात् । वृद्धिप्रसङ्गाच्च ॥ (१) ॥*॥ गाते 'गाङ् गतौ' (अ० आ० अ०) । ष्ट्रन् (उ० ४।१५९) इति वा । 'बहुलं तणि' (वा० २।४।५४) इति इणो गा । **'गात्रं** गजाग्रजङ्घादिभागेऽप्यङ्गे कलेवरे' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ वपति, उप्यते, वा । 'डुवप्' । 'अर्तिपॄवपि–' (उ० २।११७) इत्युसिः । **'वपुः** क्लीबं तनौ शस्त्राकृतावपि' (इति मेदिनी) ॥ (३) ॥*॥ संहन्ति । संहन्यते वा । 'कृत्यल्युटः–' (३।३।११३) इति ल्युट । यद्वा संहन्यन्तेऽस्मिन् भूतानि । 'करणा–' (३।३।११७) इति ल्युट् ॥ (४) ॥*॥ शृणाति । शीर्यते वा । 'शॄ हिंसायाम्' (क्या० प० से०) । 'कॄशॄपॄकटि–' (उ० ४।३०) इतीरन् ॥ (५) ॥*॥ वर्षति, वृष्यते, वा । 'वृषु सेचने' (भ्वा० प० से०) । मनिन् (उ० ४।१४५) ॥ (६) ॥*॥ विविधं सुखादि गृह्णाति । अच् (३।१।१३४) । विविधैर्व्याधिभिर्गृह्यते वा । 'ग्रहवृह–' (३।३।५८) इत्यप् । **'विग्रहः** कायविस्तारविभागे ना रणेऽस्त्रियाम्' (इति मेदिनी) ॥ (७) ॥*॥ चीयतेऽन्नादिभिः । 'चिञ् चयने' (स्वा० उ० अ०) । 'निवासचिति–' (३।३।४१) इति घञ् । चस्य कः । **'कायः** कदैवते मूर्तौ संघे लक्षस्वभावयोः । मनुष्यतीर्थे **कायं** स्यात्' (इति मेदिनी) ॥ (८) ॥*॥ दिह्यते । 'दिह उपचये' (अ० उ० अ०) । घञ् (३।३।१९) ॥ (९) ॥*॥ मूर्च्छति । 'मूर्च्छा मोहसमुच्छ्राययोः' (भ्वा० प० से०) । क्तिच् (३।३।१७४) । 'राल्लोपः' (६।४।२१) । **'मूर्तिः** पुनः प्रतिमायां कायकाठिन्ययोरपि' इति हैमः ॥ (१०) ॥*॥ तनोति, तन्यते, वा । 'भृमृशि–' (उ० १।७) इत्युः । **'तनुर्**वपुस्त्वचोः । विरलेऽल्पे कृशे' (इति हैमः) । **'तनुः** काये त्वचि स्त्री स्यात्त्रिष्वल्पे विरले कृशे' इति (नान्तेषु) विश्वमेदिन्यौ ॥*॥ 'अर्तिपॄवपि–' (उ० २।११७) इत्यादिना उसि **'तनु'** सान्तोऽपि ॥*॥ 'प्राणिजातेः–' ( ) ईत्यूङ् ॥ (११) ॥*॥ एकादश **'देहस्य'** ॥

पादाग्रं प्रपदम्

प्रेति ॥ पादस्याग्रम् ॥ (१) ॥*॥ प्रकृष्टं प्रारब्धं प्रगतं वा पदम् । 'प्रादयो गता–' (वा० २।२।१८) इति समासः ॥ (२) ॥*॥ द्वे **'पादाग्रस्य'** ॥

पादः पदंघ्रिश्चरणोऽस्त्रियाम् ॥ ७१ ॥

पाद इति ॥ पद्यते । 'पद गतौ' (दि० आ० अ०) । 'पदरुज–' (३।३।१६) इति घञ् । **'पादो** बुध्ने तुरीयांशे शैलप्रत्यन्तपर्वते । चरणे च मयूखे च' (इति मेदिनी) ॥ (१) ॥*॥ पद्यते । क्विप् (३।२।१७८) । स्वामी तु–'पदोऽङ्घ्रिः'—इति पठन् दान्तं न मन्यते । 'पद्दन्–' (६।१।६३) इत्यादेशविधानाज्ज्ञापकात् । अन्ये तु—पादादेश एवायं पठितः—इत्याहुः । प्रभृतिग्रहणस्य प्रकारार्थत्वेन शसाद्यनन्तर्भूतेऽपि तत्प्रवृत्तेः संभवात् । अत एव औङः इयाम् 'कुकुद्दोषणी' इति (प्रकृतसूत्रे) भाष्योदाहरणमपि संगच्छते । पद्यतेऽनेन । 'खनो घ च' (३।३।१२५) इति घो घित्करणात् 'अन्यतोऽपि' इति पदशब्दोऽन्तः स्याम्युक्तः ॥ (२)

१—'तनुषे तनुषे कम्' इति वासवदत्तायमकात्—इति मुकुटः ॥ २—'वरतनु संप्रवदन्ति कुक्कुटाः' इति भारविः—'इति मुकुटः' ॥ क्षेमेन्द्रेण तु औचित्यविचारचर्चायां यथा कुमारदासस्य 'अयि विज्रहीहि दृढोपगूहनं त्यज नवसंगमभीरु वल्लभम् । अरुणकरोद्गम एष वर्तते वरतनु संप्रवदन्ति कुक्कुटाः' इत्युक्तम् ॥

॥*॥ अंहते, अनेन वा । 'अहि गतौ' (भ्वा० आ० से०) । 'वङ्क्वादयश्च' (उ० ४।६६) इति साधुः ॥*॥ 'अंहो रंहो द्रुहितः संहर्षाहो च घश्रुतयः' ॥ (३) ॥*॥ चरन्त्यनेन । 'करणा–' (३।३।११७) इति ल्युट् । **'चरणोऽस्त्री** बहूचादौ मूले गोत्रे पदेऽपि च । भ्रमणे भक्षणे चापि नपुंसक उदाहृतः' इति मेदिनी ॥ (४) ॥*॥ चत्वारि **'चरणस्य'** ॥

तद्ग्रन्थी घुटिके गुल्फौ

तदिति ॥ तस्य पादस्य ग्रन्थी । घोटतेऽनया । 'घुट परिवर्तने' (भ्वा० आ० से०) । क्नुन् (उ० २।३२) ॥ (१) ॥*॥ गलति, गल्यते वा । 'गल अदने' (भ्वा० प० से०) । 'कलिगलिभ्यां फगस्योच्च' (उ० ५।५६) इति फक् । अत उत्त्वं च ॥ (२) ॥*॥ द्वे **'पादग्रन्थ्योः'** ॥

पुमान्पार्ष्णिस्तयोरधः ।

पुमेति ॥ तयोर्गुल्फयोरधः । पृष्यते अनेन वा । 'पृषु सेचने' (भ्वा० प० से०) । 'घृणिपृश्निपार्ष्णि–' (उ० ४।५२) इति साधुः ।—'पार्ष्ण्यादयश्च' इति त्वपानीणियम् । **'पार्ष्णिः** स्त्रीपुंसयोः पादमूले स्याद् ध्वजिनीकटौ' इति रन्तिदेवः ॥ (१) ॥*॥ एकं **'पादपश्चाद्भागस्य'** ॥

जङ्घा तु प्रसृता

जेति ॥ जायते । 'जनी प्रादुर्भावे' (दि० आ० से०) । 'अच् तस्य जङ्घ च' (उ० ५।३१) । यद्वा जङ्घन्यते कुटिलं गच्छति । हन्तेर्यङ्लुगन्तात् **'अन्येभ्योऽपि'** (वा० ३।१०१) इति डः ॥ (१) ॥*॥ प्रसरति स्म, प्रस्रियते स्म, वा । 'गत्यर्था–' (३।४।७२) इति कर्मणि क्तः (३।२।१०२) वा । प्रकृष्टं सृतं गमनमनया वा ॥ (२) ॥*॥ द्वे **'जङ्घायाः'** ॥

जानूरुपर्वाष्ठीवदस्त्रियाम् ॥ ७२ ॥

जान्विति ॥ जायते । 'दृसनिजनिचरि–' (उ० १।३) इति युण् । 'जनिवध्योश्च' (७।३।३५) इति न प्रवर्तते । अनुबन्धद्वयसामर्थ्यात् । जानुरर्धर्चादिः (२।४।३१) । 'अस्त्रियाम्' इति त्रिभिः संबध्यते । (समस्तत्वात्) ॥ (१) ॥*॥ ऊर्णूयते । 'ऊर्णोतेर्नुलोपश्च' (उ० १।३०) इति कुः । ऊरोः पर्व ॥ (२) ॥*॥ अतिशयितमस्थि यस्मिन् । मतुप् (५।२।९४) । 'आसन्दीवत्–' (८।२।१२) इति साधुः ॥ (३) ॥*॥ त्रीणि **'जानूरुसंधेः'** ॥

सक्थि क्लीबे पुमानूरुः

सेति ॥ सजति, सज्यते, वा । 'षञ्ज सङ्गे' (भ्वा० प० अ०) 'सञ्जयसिभ्यां क्थिन्' (उ० ३।१५४) ॥ (१) ॥*॥ अर्यतेऽनेन । 'ऋ गतौ' (भ्वा० प० से०) । 'अर्तेरुरच् च' इति कुः, ऊरादेशश्च । ऊरुः—इति मुकुटः । तदपाणिनीयम् ।—ऊर्वति । 'ऊर्वी हिंसायाम्' (भ्वा० प० से०) ।—इति स्वामी । तदपि न । उप्रत्ययवलोपयोर्विधायकाभावाच्च । 'ऊर्णोतेर्नुलोपश्च' (उ० १।३०) इत्यस्य 'सत्त्वाच्च' ॥ (२) ॥*॥ द्वे **'जानूपरिभागस्य'** ॥

तत्संधिः पुंसि वङ्क्षणः ।

तदिति ॥ तस्य ऊरोः । वाङ्क्षति वाङ्क्ष्यते, वा । 'वाञ्छि काङ्क्षायाम्' (भ्वा० प० से०) ल्युट् (३।३।११३) । बाहुलकाद्धातोर्हस्वः । वङ्क्षते । वङ्क्षणः—इति स्वामी । यद्वा वक्षति । 'वक्ष रोषसंहत्योः' (भ्वा० प० से०) । ल्युट् (३।३।११३) 'आच्छीनद्योर्नुम्' (७।१।८०) इत्यत्र 'नुम्' इति योगविभागान्नुम् ॥ (१) ॥*॥ एकम् **'ऊरुसंधेः'** ॥

गुदं त्वपानं पायुर्ना

गुदमिति ॥ गोदते । 'गुद क्रीडायाम्' (भ्वा० आ० से०) । 'इगुपध–' (३।१।१३५) इति कः ।—गुद्यति—इति मुकुटस्य प्रमादः । यद्वा गूयतेऽनेन 'गु पुरीषोत्सर्गे' (तु० प० अ०) । गवते । 'गुङ् शब्दे' (भ्वा० आ० अ०) वा 'अन्ददयश्च' (उ० ४।९८) इति साधु ।—'गुदादयः'–इति मुकुटस्त्वपाणिनीयत्वादुपेक्ष्यः ॥ (१) ॥*॥ अपानित्यनेन । 'अन प्राणने' (अ० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् ॥ ॥ (२) ॥*॥ पाति मलनिःसारणेन । 'पा रक्षणे' (अ० प० अ०) 'कृवापा–' (उ० १।१) इत्युण् । यद्वा पिबति वस्त्यौषधम् । 'पा पाने–' (भ्वा० प० अ०) । प्राग्वत् ॥ (३) ॥*॥ त्रीणि **'विष्ठानिर्गममार्गस्य'** ॥

वस्तिर्नाभेरधो द्वयोः ॥ ७३ ॥

वेति ॥ वसति मूत्रमत्र । यद्वा वस्ते, वस्यते, वा । 'वस निवासे' (भ्वा० प० अ०) । 'वस आच्छादने' वा । (अ० आ० से०) 'वसेस्तिः' (उ० ४।१८०) ।—'दृवसिभ्यां क्तिन्–' इति मुकुटस्त्वपाणिनीयः ॥*॥ **'मूत्राशयपुटे** वस्तिः' इति रत्नमाला ॥ (१) ॥*॥ एकं **'नाभ्यधोभागस्य'** ॥

कटो ना श्रोणिफलकं

केति ॥ कटते । 'कटे वर्षावरणयोः' (भ्वा० प० से०) । 'पुंसि–' (३।३।११८) इति घः । 'शवे श्रोणौ किलिञ्जे च गजगण्डे भृशे **कटः**' इति शाश्वतः ॥ (१) ॥*॥ श्रोणेः फलकमिव । चर्माकारत्वात् ॥ (२) ॥*॥ द्वे **'कटीफलकस्य'** ॥

कटिः श्रोणिः ककुद्मती ।

केति ॥ कट्यते । 'कटे वर्षावरणयोः' (भ्वा० प० से०) इन् (उ० ४।१।११८) । वा ङीष् (ग० ४।१।४५) ॥ (१)

१—आशयश्च पुटं च । मूत्रादाशयपुटे । मूत्राशयः मूत्रपुटम्, इत्यर्थः । अतएव हैमीयनाममालायां 'नाभेरधो मूत्रपुटं बस्तिर्मूत्राशयोऽपि च' इत्युक्तम् ॥

॥*॥ श्रोणति । 'श्रोणृ संघाते' (वा० प० से०) । इन् (उ० ४।११८) । वा ङीष् (ग० ४।१।४५) ॥ (२) ॥*॥ ककुद् वृषांस इव मांसपिण्डः ककुत् । सोऽतिशयितोऽस्याम् मतुप् (५।२।९४) । यवादित्वात् (८।२।९) न वत्वम् ॥ (३) ॥*॥ त्रीणि **'कटेः'** ॥ पञ्चापि पर्याया इत्यन्ये ॥

पश्चान्नितम्बः स्त्रीकट्याः

पेति ॥ नितम्बति । नितम्ब्यते, वा । 'तम्ब गतौ' ( ) । अच् (३।१।१३४) घञ् । (३।३।१९) वा । यद्वा निभृतं तम्यते कामुकैः । 'तमु काङ्क्षायाम्' (दि० प० से०) । तम्यति सुरतसंमर्दाद्वा । 'तमु ग्लानौ' (दि० प० से०) । 'उल्वादयश्च' (उ० ४।९५) इति साधुः ॥ (१) ॥*॥ एकं **'स्त्रीकट्याः पश्चाद्भागस्य'** ॥

क्लीबे तु जघनं पुरः ॥ ७४ ॥

क्लीति ॥ हन्यते । हन्तेः शरीरावयवे द्वे च' (उ० ५।३२) इत्यच् ।—'हनो जघ–' इति क्युर्जघादेशश्च—इति मुकुटस्त्वपाणिनीयः । यद्वा वक्रं हन्ति । यङ्लुगन्तात् 'अच—' (३।१।१३४) । 'अनित्यमागमशास्त्रम्' इत्यभ्यासस्य नुक् न । मुकुटस्तु—भृशं हन्यते । हनो यङन्तात् पचाद्यचि नैरुक्ते नलोपे वा—इत्याह । तन्न । हिंसार्थस्य क्लीभावप्रसङ्गात् । गत्यर्थस्य 'भृशं हन्यते' इति विग्रहासंभवात् । गत्यर्थानां कौटिल्य एव यङ्विधानात् । 'हन्यते' इति कर्मविग्रहे पचाद्यचोऽसंभवाच्च । **'जघनं** स्यात् स्त्रियाः श्रोणिपुरोभागे कटावपि' (इति मेदिनी) ॥ (१) ॥*॥ एकं **'स्त्रीकट्या अग्रभागस्य'** ॥

कूपकौ तु नितम्बस्थौ द्वयहीने कुकुन्दरे ।

कूपेति ॥ कूपाविव । 'इवे–' (५।३।९६) इति कन् । **'कूपको** गुणवृक्षे स्यात्तैलपात्रे कुकुन्दरे' इति हैमः ॥*॥ नितम्बे तिष्ठतः । 'सुपि' (३।२।४) इति कः ॥*॥ कुं भूमिं दारयति । 'दृ भये' (क्र्या प० से०) ण्यन्तः । 'कर्मण्यण्' (३।२।१) णिलोपस्य स्थानिवत्त्वान्न वृद्धिः । पृषोदरादिः (६।३।१०९) । कुत्सितं कुंदरम् । ईषत् कुन्दरमत्र, इति वा । यद्वा स्कुन्यते कामिना । 'स्कुदि आप्लवने' (भ्वा० आ० से०) 'मद्गुरादयश्च' (उ० १।४१) इति साधुः ॥ (१) ॥*॥ द्वयेन हीने ॥*॥ एकं **'पृष्ठवंशादधोगर्तयोः'** ॥

स्त्रियां स्फिचौ कटिप्रोथौ

स्त्रीति ॥ स्फायते । 'स्फायी वृद्धौ' (भ्वा० आ० से०) । बाहुलकात् डिच् प्रत्ययः ।—स्फेटयति । 'स्फिट हिंसायाम्' (चु० प० से०) । क्विप् (३।२।१७८) । 'स्फिगपूत–' (६।२।१८७) इति निपातनाट्टस्य चः—इति मुकुटः ॥ (१) ॥*॥ प्रोथति । 'प्रोथृ पर्याप्तौ' (भ्वा० उ० से०) । 'पुंसि–' (३, ३।११८) इति घः । कट्याः प्रोथौ मांसपिण्डौ ॥*॥ कटी, प्रोथौ, इति नामद्वयं वा । 'स्त्रियां स्फिचौ कटिप्रोथौ **कटीप्रोथौ** च पूलकौ' इति रभसः । 'प्रोथोऽश्वघोणाध्वगयोः कट्याम्' इति हैमः ॥ (२) ॥*॥ द्वे **'कटिस्थमांसपिण्डयोः'** ॥

उपस्थो वक्ष्यमाणयोः ॥ ७५ ॥

उपेति ॥ भगशिश्नयोः । उपतिष्ठते । 'सुपि–' (३।२।४) इति कः । अर्धर्चादिः (२।४।३१) । **'उपस्थः** शेफसि क्रोडे तथा मदनमन्दिरे' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ **'भगशिश्नयोः'** एकम् ॥

भगं योनिर्द्वयोः

भेति ॥ भज्यते । 'भज सेवायाम्' (भ्वा० उ० अ०) 'खनो घ च' (३।३।१२५) इति घित्त्वात् 'भजेः' अपि घः । **'भगं** श्रीयोनिवीर्येच्छाज्ञानवैराग्यकीर्तिषु । माहात्म्यैश्वर्ययत्नेषु धर्मे मोक्षे च ना रवौ' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ यौति । 'यु मिश्रणे' (अ० प० से०) । 'वहिश्रि–' (उ० ४।५१) इति निः । 'द्वयोः' इति **'योनिः** स्त्रीपुंसयोश्च स्यादाकरे स्मरमन्दिरे' इति मेदिनी । **'योनिः** कारणे भगतोययोः' इति हैमः ॥ (२) ॥*॥ द्वे **'स्त्रीणामुपस्थस्य'** ॥

शिश्नो मेढ्रं मेहनशेफसी ।

शीति ॥ शशति । 'शश प्लुतगतौ' (भ्वा० प० से०) । शिनोति । 'शिञ् निशाने' (स्वा० उ० अ०) । बाहुलकान्नक् । पृषोदरादिः (६।३।१०९) ।—रास्नादिनिपातान्नक्—इति मुकुटोऽपाणिनीयः ॥ (१) ॥*॥ मेहन्त्यनेन । 'मिह सेचने' (भ्वा० प० अ०) । 'दात्रि–' (३।२।१८२) इति ष्ट्रन् ॥ (२) ॥*॥ करणे ल्युट् (३।३।११७) । **'मेहनं** मूत्रशिश्नयोः' (इति मेदिनी) ॥ (३) ॥*॥ शेते रेतःपाते । 'वृशीङ्भ्यां फुट् च' (उ० ४।२०१) इत्यसुन् ॥*॥ 'पुट् च' इति वा पाठः । **'शेपः'** ॥*॥ बाहुलकात् प-फ-प्रत्ययाभ्यामदन्तावप्येतौ (**शेफशेपौ**) । अत एव 'शेपपुच्छ–' (६।३।२१) इति वार्तिकं संगच्छते ॥ (४) ॥*॥ चत्वारि **'शिश्नस्य'** ॥

मुष्कोऽण्डकोशो वृषणः

ष्विति ॥ मुष्णाति रेतः । 'मुष स्तेये' (क्र्या० प० से०) । 'सृवृभूशुषिमुषिभ्यः कक्' (उ० ३।४१) ।—'भूशुषिमुषिभ्यः कः कित्' इति कः—इति मुकुटोऽपाणिनीयः । **'मुष्को** मोक्षकवृक्षे स्यात्संघाते वृषणेऽपि च' (इति मेदिनी) ॥ (१) ॥*॥ अण्डयोः कोशः ॥ (२) ॥*॥ वर्षति । 'वृषु सेचने' (भ्वा० प० से०) । बाहुलकात् क्युः । 'बहुलमन्यत्रापि' (उ० २।७८) इति युचि वा संज्ञापूर्वकत्वाद्गुणाभावः ॥ (३) ॥*॥ त्रीणि **'अण्डकोशस्य'** ॥

पृष्ठवंशाधरे त्रिकम् ॥ ७६ ॥

पृष्ठेति ॥ पृष्ठवंशस्याधोभागे ॥ त्रयाणां संघः । 'संख्यायाः संज्ञासंघ–' (५।१।५८) । इति कन् । **'त्रिकं** कू-

पस्य नेमौ स्यात्रिकं पृष्ठाधरे त्रये' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'पृष्ठवंशाधोभागस्य'** ॥

पिचण्डकुक्षी जठरोदरं तुन्दम्

पीति ॥ अपि चमत्यन्नम् । अमन्ताङ्गः (उ० १।११४) । 'वष्टि भागुरि–' इत्यलोपः । अपि चण्ड्यतेऽनेन हेतुना । 'चडि कोपे' (भ्वा० आ० से०) । 'पुंसि–' (३।३।११८) । इति घो वा । **'पिचण्ड** उदरे पशोरवयवे पुमान्' (इति मेदिनी) ॥*॥ (पिचिण्डः, इति) इकारद्वयवत्त्वे तु पृषोदरादिः (६।३।१०९) ॥ (१) ॥*॥ कुष्यते निष्कास्यते मलोऽस्मात् । 'कुष निष्कर्षे' (क्रया० प० से०) । 'हुषिकुषिशुषिभ्यः क्सिः' (उ० ३।१५५) ।—'कुषः सिः'—इति मुकुटवाक्यमपाणिनीयम् ॥ (२) ॥*॥ जायतेऽत्र जन्तुर्मलो वा । 'जनेरष्ठ च' (उ० ५।३८) इत्यरप्रत्यये ठोऽन्त्यादेशः । **'जठरो** न स्त्रियां कुक्षौ, बद्धकक्खटयोस्त्रिषु' (इति मेदिनी) । मुकुटस्तु—जनयत्यन्नादिना स्वभरणम् । बाहुलकादरन् । पृषोदरादित्वात् (६।३।१०९) अन्त्यस्य ठः—इति । स उक्तसूत्रास्मरणप्रयुक्तः ।—जमत्याहारम् । जठरम्—इति स्वाम्यप्येवम् ॥ (३) ॥*॥ उदणाति । 'ऋ गतौ' (क्रया० प० से०) । अच् (३।१।१३४) । यद्वा उदच्छति, उदियर्ति, वा । 'ऋ गतौ' (भ्वा०, जु० प० अ०) । अच् (३।१।१३४) । यद्वा उद् दृणाति । 'दृ विदारणे' (क्रया० प० से०) । 'उदि दृणातेरजलौ पूर्वपदान्त्यलोपश्च' (उ० ५।१९) । **'उदरं** तुन्दरणयोः' इति हैमः ॥ (४) ॥*॥ तुदति । 'तुद व्यथने' (तु० उ० अ०) । 'इगुपध–' (३।१।१३५) इति कः । 'आच्छीनद्योः–' (७।१।८०) इत्यत्र 'नुम्' इति योगविभागान्नुम् । यद्वा तर्णोत्यन्नम् 'तृण अदने' (त० उ० से०) । 'अन्ददयश्च' (उ० ४।९८) इति साधुः ॥ (५) ॥*॥ पञ्च **'जठरस्य'** ॥

स्तनौ कुचौ ।

स्तेति ॥ स्तनति कथयति यौवनोदयम् । स्तन्यते शब्द्यते वा कामुकैः । 'ष्टन शब्दे' (भ्वा० प० से०) । अच् (३।१।१३४) । 'पुंसि–' (३।३।११८) इति घो वा ॥ (१) ॥*॥ कुचति । 'कुच संकोचे' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः ॥ (२) ॥*॥ द्वे **'वक्षोजस्य'** ॥

चूचुकं तु कुचाग्रं स्यात्

च्विति ॥ चूष्यते । 'चूष पाने' (भ्वा० प० से०) । बाहुलकादुकः । पृषोदरादिः (६।३।१०९) । 'चूचु' इत्यव्यक्तं कायति पीयमानम् । 'अन्येभ्योऽपि—' (वा० ३।२।१०१) इति डः ॥ (१) ॥*॥ कुचस्याग्रम् ॥ (२) ॥*॥ **'चूचुको** ना **कुचाननम्'** इति रत्नकोषः ॥*॥ द्वे **'स्तनाग्रस्य'** ॥

१ पिचण्डः 'पिचण्डो जठरे प्रोक्तः पशोरवयवेऽपि च' इति हैमः इति वा पाठः । परंतु सटीकहैमपुस्तके नोपलभ्यते ॥

न ना क्रोडं भुजान्तरम् ॥ ७७ ॥

नेति ॥ कुड्यते । 'कुड वाल्पेऽदने' (तु० प० से०) । घञ् (३।३।१९) । मुकुटस्तु—क्रोडति घनीभवति । 'कुड घनत्वे' । अच् (३।१।१३४) ।—इत्याह । तन्न । घनत्वार्थस्य ऋदुपधत्वात् । उदुपधत्वेऽपि कुटादित्वेनाचि गुणासंभवाच्च । **'क्रोडः** कोले शनौ **क्रोड**मङ्के' इति हैमः । **'क्रोडः** शनौ सूकरे ना, न पुमानङ्करक्षसोः' इति मेदिनी ॥ (१) ॥*॥ भुजयोरन्तरम् ॥ (२) ॥*॥ द्वे **'अङ्कस्य'** ॥

उरो वत्सं च वक्षश्च

उरविति ॥ इयर्ति । 'ऋ गतौ' (जु० प० अ०) । 'अर्तेरुच्च' (उ० ४।१९५) इत्यसुन्, उरादेशः किच्च । **'उरो** वक्षसि मुख्ये स्यात्' इति हैमः ॥ (१) ॥*॥ वदति सामर्थ्यम् । 'वद व्यक्तायां वाचि' (भ्वा० प० से०) । 'वद स्थैर्ये' (भ्वा० प० से०) वा । 'वृतृवदिहनि–' (उ० ३।६२) इति सः । **'वत्सः** पुत्राहिवर्षयोः । तर्णके नोरसि क्लीबम्' इति मेदिनी । 'पुत्रादौ तर्णके वर्षे **वत्सो वत्सं** तु वक्षसि' इति रुद्रः ॥ (२) ॥*॥ वक्षति । 'वक्ष संघाते' (भ्वा० प० से०) । असुन् (उ० ४।१८९) ॥ (३) ॥*॥ त्रीणि **'उरसः'** ॥—पञ्चापि वत्सस्य—इत्यन्ये ॥

पृष्ठं तु चरमं तनोः ।

प्रिति ॥ पृष्यते 'पृषु सेचने' (भ्वा० प० से०) । 'तिथपृष्ठगूथ–' (उ० २।१२) इति साधु । **'पृष्ठं** चरममात्रे स्यादेहस्यावयवान्तरे' (इति मेदिनी) ॥ (१) ॥*॥ एकं **'देहपश्चाद्भागस्य'** ॥

स्कन्धो भुजशिरोंऽसोऽस्त्री

स्केति ॥ स्कद्यते । 'स्कन्दिर् गतिशोषणयोः' (भ्वा० प० अ०) । घञ् (३।३।१९) । 'स्कन्देश्च स्वाङ्गे' (उ० ४।२०७) इति बाहुलकादनसुन्यपि धः । **'स्कन्धः** प्रकाण्डे कार्योऽसे विज्ञानादिषु पञ्चसु । नृपे समूहे व्यूहे च' इति हैमः ॥ (१) ॥*॥ भुजस्य शिरः ॥ (२) ॥*॥ अस्यते समाहन्यते भारादिना । 'अंस समाघाते' (चु० उ० से०) । घञ् (३।३।१९) यद्वा अमति, अम्यते, वा । 'अम गतौ' (भ्वा० प० से०) । 'अमेः सन्' (उ० ५।२१) । **'अंसः** स्कन्धे विभागे स्यात्' इति हैमः ॥ (३) ॥*॥ त्रीणि **'भुजशिरसः'** ॥

संधी तस्यैव जत्रुणी ॥ ७८ ॥

समिति ॥ जायते बाहुरस्मात् । 'जवादयश्च' (उ० ४।१०२) इति साधु ॥ (१) ॥*॥ एकम् **'अंसकक्षयोः संधेः'** ॥

बाहुमूले उभे कक्षौ

बेति ॥ कष्यते । 'कष हिंसायाम्' (भ्वा० प० से०)

'वृतॄवदिहनिकमिकषिभ्यः सः' (उ० ३।६२)। **'कक्षा** स्यादन्तरीयस्य पश्चाद्भ्वलपल्लवे । स्पर्शापदे, ना दोर्मूल**कच्छ**वीरुत्तृणेषु च' (इति मेदिनी) ॥*॥ बाहोर्मूलम् ॥ (१) ॥ द्वे **'कक्षस्य'** ॥

पार्श्वमस्त्री तयोरधः ।

पेति ॥ स्पृश्यते । 'स्पृश स्पर्शने' (तु० प० अ०) 'स्पृशेः श्वणूशुनौ पृ च' (उ० ५।२७)। णिलाङ्बुद्धिः (७।२।११५)। यद्वा पर्शूनां समूहः । 'पर्शा णस् वक्तव्यः' (वा० ४।२।४३) सित्त्वात् (१।४।१६) पदत्वेन भत्वाभावाद् 'ओर्गुणः' (६।४।१४६) इति न । **'पार्श्व**मन्तिके । कक्षाधोऽवयवे चक्रोपान्ते पर्शुगणेऽपि च' (इति हैमः) ॥ (१) ॥*॥ एकं **'कक्षयोरधोभागस्य'** ॥

मध्यमं चावलग्नं च मध्योऽस्त्री

मेति ॥ मध्ये भवम् । 'मध्यान्मः' (४।३।८)। **'मध्यमो** मध्यजेऽन्यवत् । पुमान्स्त्वरे मध्यदेशेऽप्यवलग्ने तु न स्त्रियाम् । स्त्रियां दृष्टरजोनार्यां कर्णिकाङ्गुलिभेदयोः । व्यक्षरच्छन्दसि तथा' (इति मेदिनी) ॥ (१) ॥*॥ लग्यते स्म । 'लगे सङ्गे' (भ्वा० प० से०)। 'ध्रुवध्वस्वान्त–' (७।२।१८) इति साधुः । यद्वा । लज्जते स्म । 'ओलस्जी व्रीडे' (तु० आ० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । 'स्कोः–' (८।२।२९) इति सलोपः । 'ओदितश्च' (८।२।४५) इति नत्वम् । 'श्वीदितः' (७।२।१४) इति नेट् । अवकृष्टम्, अवसन्नम्, वा लग्नम् । 'प्रादयो गता–' (वा० २।२।१८) इति समासः । **'अवलग्नो**ऽस्त्रियां मध्ये त्रिषु स्याल्लग्नमात्रके' (इति मेदिनी) ॥ (२) ॥*॥ मध्ये शरीरस्य भवम् । 'अ सांप्रतिके' (४।३।९) इत्यः । यद्वा मां शोभां धत्ते । 'अश्यादयश्च' (उ० ४।११२) इति साधुः । **'मध्य्यं** विलग्ने न स्त्री स्यान्न्याय्येऽन्तरेऽधमे त्रिषु' (इति मेदिनी) ॥ (३) ॥*॥ ('मध्योऽवलग्नं **विलग्नं** मध्यमः' इति नाममाला) ॥*॥ त्रीणि **'देहमध्यस्य'** ॥

द्वौ परौ द्वयोः ॥ ७९ ॥

भुजबाहू प्रवेष्टो दोः स्यात्

द्वाविति ॥ परौ भुजबाहू । भुज्यतेऽनेन । 'भुज पालनाभ्यवहारयोः' (रु० प० अ०) । 'भुजन्युब्जौ–' (७।३।६१) इति साधुः । यद्वा भुजति । 'भुजो कौटिल्ये' (तु० प० से०)। 'इगुपध–' (३।१।१३४) इति कः । 'अधो भुजौ । द्वयोर्बाहौ करे' (इति मेदिनी) ॥ (१) ॥*॥ बाधते । 'बाधृ विलोडने' (भ्वा० आ० से०) । 'अर्जिदृशिकम्यमि–' (उ० १।२७) इत्युः, हश्चान्त्यस्य । मुकुटस्तु—बहन्त्यनेन । 'वहिरहितलिपशिभ्यश्च' इत्युण्—इत्याह । तदपाणिनीयत्वादुपेक्ष्यम् ॥*॥ वहेः 'हलश्च' (३।३।१२१) इति घञ् । वाहते । 'वाह् प्रयत्ने' (भ्वा० आ० से०) । अच् (३।१।१३४) वा **'वाहो**ऽश्वभुजयोः पुमान्' इति दामोदरः । **'वाहो** बाहुरिति स्मृतः' इति देशी कोषः । **'(वाहो**श्वमानयोः । वृषे, **वाहौ** तु बाहौ स्यात्' इति हैमः) ॥ (२) ॥*॥ प्रवेष्टते । 'वेष्ट वेष्टने' (भ्वा० आ० से०) । अच् (३।१।१३४)। (३) ॥*॥ दाम्यत्यनेन । 'दमु उपशमे' (दि० प० से०)। 'दमेर्डोस्' (उ० २।६९) ॥*॥ भागुरिमते टाप् ॥ (४) ॥ 'दोर्दोषा च भुजो बाहुः, पाणिर्हस्तः **करस्**तथा' इति धनंजयः ॥*॥ चत्वारि **'भुजस्य'** ॥

कफोणिस्तु कूर्परः ।

केति ॥ कं सुखं स्फोरयति । 'स्फुर स्फुरणे संचलने च' (तु० प० से०)। ण्यन्तः 'अच इः' (उ० ४।१३९)। पृषोदरादिः (६।३।१०९)। यद्वा केन सुखेन फणति, स्फुरति, वा । 'फण गतौ' (भ्वा० प० से०)। 'स्फुर संचलने' (तु० प० से०) वा । **इन्** (उ० ४।११८)। पृषोदरादिः (६।३।१०९) । 'कफोणिः **कफ**णिर्द्वयोः' इति शब्दार्णवः ॥ (१) ॥*॥ कुरति । 'कुर शब्दे' (तु० प० से०) क्विप् (३।२।१७८) । कोरणम् । संपदादिः (वा० ३।३।१०८) वा पिपर्ति । 'पॄ पालनपूरणयोः' (जु० प० से०) । अच् (३।१।१३४) । कूर् चासौ परश्च । यद्वा कुरा शब्देन परः यद्वा कुप्यत्यनेन वा । 'कुप क्रोधे' (दि० प० से०)। बाहुलकादरन् दीर्घश्च ॥ (२) ॥*॥ 'कफोणिः कूर्परोऽरत्नेः पृष्ठम्' इति नाममाला । द्वे **'कूर्णी'** इति ख्यातस्य भुजमध्यग्रन्थेः ॥

अस्योपरि प्रगण्डः स्यात्

अस्येति ॥ कूर्परस्योर्ध्वे प्रलासन्नो गण्डः कपोशोऽस्य ॥ (१) ॥*॥ एकम् **'कूर्परोपरिभागस्य'** ॥

प्रकोष्ठस्तस्य चास्यधः ॥ ८० ॥

प्रेति ॥ प्रकुप्यतेऽनेन कुसूलादन्नम् । 'कुष निष्कर्षे' (क्या० प० से०)। 'उषिकुषिगार्तिभ्यस्थन्' (उ० २।४) प्रविष्टः कोष्ठं कुसूलम् । 'अल्पाद्यः क्रान्ता–' (वा० २।२।१८) इति समासो वा । **'प्रकोष्ठ**मन्तरं विद्यादरत्निमणिबन्धयोः' इति काल्यः । **'प्रकोष्ठो** मणिबन्धस्य कूर्परस्यान्त-

१—बाहौ यथा—'उद्वेल्लद्भुजवल्लिकंकणझणत्कारस्तदा दुःसहः' । करे यथा 'चञ्चद्भुजभ्रमितचण्डगदाभिघातसंचूर्णितोरुयुगलस्य सुयोधनस्य'—इत्यनेकार्थकैरवाकरकौमुदी ॥

१—'सुवाहा' इति सुबन्धुः । स्वश्वा, सुभुजा च इति मुकुटः ॥ २—'शाम्यन्ति भोगेन न जातु कामा न बाहया वा सुतरः समुद्रः' इत्यनेकार्थकैरवाकरकौमुदी ॥ ३—'बहुदोषो गुरुध्वंसी गोहन्ता जनपीडकः' इति विदग्धमुखमण्डनम्—इति मुकुटः ॥ ४—प्रसङ्गेनोक्तम् । न त्वत्रास्योपयोगः ॥ किंतु पाणिपर्यायकथनम् ॥ ५—दीर्घमात्रकरणे रेफश्रवणानुपपत्तिः । तस्मात्पृषोदरादित्वमङ्गीकार्यम् ॥

रेऽपि च । भूपकक्षान्तरेऽपि स्यात्' (इति मेदिनी) ॥ (१) ॥*॥ एकं **'कफोणेरधो मणिबन्धपर्यन्तस्य'** ॥

मणिबन्धादाकनिष्ठं करस्य करभो बहिः ।

मणीति ॥ मणिर्बध्यतेऽत्र । 'बन्ध बन्धने' (क्या० प० अ०) । 'हलश्च' (३।४।१२१) इति घञ् । (**'मणिबन्धः पाणिमूलम्'** इति हलायुधः । 'कैरोऽस्यादौ **मणिबन्धौ मणिश्च** सः' इति हैमनाममाला) ॥*॥ कनिष्ठाया आ । 'अङ् मर्यादाभिविध्योः' (२।१।१३) इत्यव्ययीभावः ॥*॥ कृणाति । 'कॄञ् हिंसायाम्' (क्या० प० से०) । किरत्यनेन । 'कॄ विक्षेपे' (तु० प० से०) वा । 'कृशृशालिकलिगर्दिभ्योऽभच्' (उ० ३।१२२) ।—'कृशृगर्दिराशिवल्लिभ्योऽभच्' इति मुकुटोऽपाणिनीयः । करे भाति । 'भा दीप्तौ' (अ० प० अ०) । 'सुपि–'(३।२।४) इति को वा । **'करभो** मणिबन्धादिकनिष्ठान्तोष्ट्रतत्सुते' (इति मेदिनी) ॥ (१) ॥*॥ 'ज्ञापकसिद्धं न सर्वत्र' इति बहिर्योगे पञ्चमी (ज्ञापि० २।१।१२) न ॥*॥ एकम् **'करबहिर्भागस्य'** ॥

पञ्चशाखः शयः पाणिः

पञ्चेति ॥ पञ्च शाखा इवाङ्गुलयोऽस्य ॥ (१) ॥*॥ शेतेऽस्मिन् सर्वम् । 'पुंसि–' (३।३।११९) इति घः । **'शवः** शय्याहिपाणिषु' (इति मेदिनी) ॥*॥ 'शमः' इति पाठान्तरम् । शाम्यति कण्डूर्मलो वानेन । 'शमु उपशमे' (दि० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । 'नोदात्तोपदेश–' (७।३।३४) इति न वृद्धिः । 'पाणिः **शामः** शयो हस्तः' इत्यमरमाला ॥ (२) ॥*॥ पणायन्त्यनेन । 'पण व्यवहारे' (भ्वा० आ० से०) । 'अशिपणाय्यो रुडायलुकौ च' (उ० ४।१३३) इतीण् अयप्रत्ययस्य लुक् च ।—पण्यतेऽनेन । बाहुलकात् इञ्—इति मुकुटस्तूक्तसूत्रास्मरणमूलकः ॥ (३) ॥*॥ त्रीणि **'हस्तस्य'** ॥

तर्जनी स्यात्प्रदेशनी ॥ ८१ ॥

तेति ॥ तर्ज्यतेऽनया । 'तर्ज भर्त्सने' (भ्वा० प० से०) । 'करणा–' (३।३।११७) इति ल्युट् ॥ (१) ॥*॥ प्रदिश्यतेऽनया । 'दिश अतिसर्जने' (तु० उ० अ०) । ल्युट् (३।३।११७) ॥*॥ **'प्रदेशिनी'** इति पाठान्तरम् । प्रदिशति । 'सुपि–' (३।२।७८) इति णिनिः । प्रदेशोऽस्त्यस्याः । इनिः (५।२।११५) वा ॥ (२) ॥*॥ द्वे **'अङ्गुष्ठसमीपाङ्गुल्याः'**॥

अङ्गुल्यः करशाखाः स्युः

अङ्ग्विति ॥ अङ्गति । 'अगि गतौ' (भ्वा० प० से०) । 'ऋतन्यञ्जि–' (उ० ४।२) इत्युलिः । अङ्गुं पाणिपादमवयवं लाति । बाहुलकाद्वा । **'अङ्गुलिः** करशाखायां कर्णिकायां गजस्य च' इति हैमविश्वप्रकाशौ ॥*॥ 'बालमूलल्घ्वङ्गुलीनां वा लो रः' (वा० ८।२।१८) । **(अङ्गुरिः)** ॥*॥ **'अङ्गुलस्तु** यवो मतः' इत्यमरदत्तः । **'अङ्गुलो** ना यवमानम्' इति वाचस्पतिः । तत्राङ्गेर्बाहुलकादुलः[1] ॥ (१) ॥*॥ करस्य शाखा इव ॥ (२) ॥*॥ द्वे **'अङ्गुलिमात्रस्य'** ॥

पुंस्यङ्गुष्ठः प्रदेशिनी ।

मध्यमानामिका चापि कनिष्ठा चेति ताः क्रमात् ८२

पुंसीति ॥ अङ्गुशब्दोऽङ्गवाची । अङ्गौ पाणौ तिष्ठति । 'सुपि–' (३।२।४) इति कः । 'अम्बाम्ब–' (८।३।९७) इति षत्वम् ॥ (१) ॥*॥ तर्जन्युक्तापि यथासंख्याय पुनरुक्ता ॥ (१) ॥*॥ मध्यभवा । 'मध्यान्मः' (४।३।८) । **'मध्यमो** मध्यजे स्वरे । देहमध्ये मध्यदेशे **मध्यमा** कर्णिकाङ्गुलिः । राका रजस्वला चापि' इति हैमः ॥ (१) ॥*॥ न नाम ग्रहणयोग्यमस्याः ब्रह्मणोऽनया शिरश्छेदनात् । अत एवास्यां पवित्रीक्रियते ॥ (१) ॥*॥ अत्यल्पा । 'अतिशायने–' (५।३।५५) इतीष्ठन् । 'युवाल्पयोः कन्–' (५।३।६४) **'कनिष्ठोऽल्पेऽनुजे यूनि कनिष्ठा** स्वन्तिमाङ्गुलौ' इति हैमः ॥ (१) ॥*॥ क्रमेण एकैकम् **'अङ्गुलीनाम्'** ॥

पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम् ।

प्विति ॥ पुनर्भवति । अच् (३।१।१३४) ॥*॥ **'पुनर्नवः'** इति वा पाठः ॥ (१) ॥*॥ करे रोहति । 'इगुपध–' (३।१।१३५) इति कः ॥ (२) ॥*॥ न खमस्य । 'न भ्राड्–' (६।३।७५) इति साधुः । **'नखी** स्त्रीपुंसयोः शुक्तौ नखरे पुंनपुंसकम्' (इति मेदिनी) ॥ (३) ॥*॥ न खनति, खन्यते वा । 'डडरेकवकाः' (वा० ३।३।१२५) । नखं राति वा । 'नखरं त्रिषु' इत्यमरमाला ॥ (४) ॥*॥ चत्वारि **'नखस्य'** ॥

प्रादेशतालगोकर्णास्तर्जन्यादियुते तते ॥ ८३ ॥

प्रेति ॥ प्रदिश्यते । 'दिश अतिसर्जने' (तु० उ० अ०) । 'हलश्च' (३।३।१२१) इति घञ् । 'उपसर्गस्य–' (६।३।१२२) इति वा दीर्घः । **'प्रदेशो** देशमात्रे स्यात्तर्जन्यङ्गुष्ठसंमिते' (इति मेदिनी) ॥ (१) ॥*॥ तलत्यत्र । 'तल प्रतिष्ठायाम्' (चु० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । **'तालः** करतलेऽङ्गुष्ठमध्यमाभ्यां च संमिते । गीतकालक्रियामाने करस्फाले द्रुमान्तरे' (इति मेदिनी) ॥ (१) ॥*॥ गोः कर्ण इव । **'गोकर्णोऽश्वतरे सर्पे** सारङ्गे प्रमथान्तरे । अङ्गुष्ठानामिकोन्माने **गोकर्णौ** मूर्विकौषधौ' (इति विश्वः) ॥ (१) ॥*॥ **'तर्जन्यादिसहिते विस्तृतेऽङ्गुष्ठे'** क्रमेणैकैकम् ॥

अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः ।

एति ॥ कनिष्ठया सह वितते[2]ऽङ्गुष्ठे । वितस्यति । वितस्यते वा । 'तसु उपक्षये' (दि० प० से०) । 'वौ तसेः' (उ० ४।१८२) इति तिः ॥—बाहुलकात्तिः—इति मुकुट एतत्सूत्रा-

१—करशब्दोपादानम् 'अस्य' इत्यनेन परामर्शार्थम् ॥

१—'द्विवचन–' (५।३।५७) इतीष्ठन्–इति पाठ आसीत् । तथाप्यनेनेष्ठनो विधानाभावादुपेक्षितः ॥

स्मरणमूलकः ॥ (१) ॥*॥ द्वादश अङ्गुलयः प्रमाणमस्य । 'तद्धितार्थोत्तर–' (२।१।५१) इति द्विगुः । 'द्विगोर्नित्यम्' (वा० ५।२।३७) इति मात्रचो लुक् । 'तत्पुरुषस्याङ्गुलेः' (५।४।८६) इत्यच् ॥ (२) ॥*॥ द्वे **'वितस्तेः'** ॥

पाणौ चपेटप्रतलप्रहस्ता विस्तृताङ्गुलौ ॥ ८४ ॥

पेति ॥ चपति । 'चप सान्त्वने' (भ्वा० प० से०) । अच् (३।१।१३४) । एटति । 'इट गतौ' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । चपश्चासाविटश्च ॥*॥ 'चर्पटः' अप्यत्र । **'चर्पटः** स्फारविपुले चपेटे पर्पटेऽपि च' (इति विश्वमेदिन्यौ) ॥ (१) ॥*॥ प्रतलति 'तल प्रतिष्ठायाम्' (चु० प० से०) । अच् (३।१।१३४) । **'प्रतलं** पातालभेदे तताङ्गुलिकरे पुमान्' (इति मेदिनी) ॥*॥ 'तलम्' अप्यत्र । **'तलं** स्वरूपाधरयोः खड्गमुष्टिचपेटयोः' इति विश्वः । (**'तलश्चपेटे तालद्रौ'** इति हैमतः । '–पुंसि तालमहीरुहे । चपेटे च' इति मेदिनीतश्च पुंस्ययम्) ॥ (२) ॥*॥ प्रसृतो हस्तः । 'प्रादयो गता–' (वा० २।२।१८) इति समासः ॥ (३) ॥*॥ त्रीणि **'विस्तृताङ्गुलौ पाणौ'** ॥

द्वौ संहतौ सिंहतलप्रतलौ[1] वामदक्षिणौ ।

द्वाविति ॥ सिंहस्येव तलमत्र ॥*॥ **'संहतलः'** इति पाठान्तरम् । संहतं संघट्टं लाति । 'आतोऽनुप–' (३।२।३) इति कः ॥ (१) ॥*॥ प्रतते प्रश्लिष्टे वा तले अत्र ॥ (२) ॥*॥ द्वे **'वामदक्षिणयोः पाण्योर्मिलितयोर्विस्तृताङ्गुल्योः'** ॥

पाणिर्निकुब्जः प्रसृतिः

पेति ॥ नितरां कुब्जा प्रकृतिरस्य । प्रसरत्यनेन । क्तिन् (३।३।९४) ॥*॥ 'प्रसृतः' इति वा पाठः । तत्र प्रकृष्टं सृतमस्य । **'प्रसृतः** सप्रसारे स्याद्विनीते वेगिते त्रिषु । अर्धाञ्जलौ तु पुंलिङ्गो जङ्घायां **प्रसृता** मता' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'प्रसृतेः'** ॥

तौ युतावञ्जलिः पुमान् ॥ ८५ ॥

ताविति ॥ तौ प्रसृतौ मिलितौ । अञ्च्यतेऽनेन । 'अञ्चू व्यक्त्यादौ' (रु० प० से०) । 'ऋतन्यञ्जि–' (उ० ४।२) इत्यलिः । **'अञ्जलिस्तु** पुमान् हस्तसंपुटे कुडवेऽपि च' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'अञ्जलेः'** ॥

प्रकोष्ठे विस्तृतकरे हस्तः

प्रेति ॥ बाहौ प्रसारितपाणौ हस्तः । हसति, हस्यतेऽनेन वा । 'हसे हसने' (भ्वा० प० से०) । 'हसिमृग्–' (उ० ३।८६) इति तन् । **'हस्तः** करे करिकरे सप्रकोष्ठकरेऽपि च । ऋक्षे केशात्परो व्राते' (इति मेदिनी) ॥ (१) ॥*॥ विस्तृतः करो यस्य तस्मिन् ॥ एकम् **'विस्तृतकरस्य'** ॥

१—मुकुटस्तु—'संहतलः प्रतलौ' इति सविसर्गपाठमाश्रित्य द्वौ वामदक्षिणौ प्रतलौ मिलितौ संहतल उच्यते । प्रतलद्वयं मिलितं **संहतलः** स्यादित्यर्थः—इत्युक्त्वा एकम्' इत्येवोक्तवान् ॥

मुष्ट्या तु बद्धया ।

स रत्निः स्यात्

स्विति ॥ स हस्तः मुष्यतेऽनया 'मुष स्तेये' (क्र्या० प० से०) । 'स्त्रियां क्तिन्' (३।३।९४) । यद्वा मुष्णाति । क्तिच् (३।३।१७४) । ('संपीडिताङ्गुलि**र्मुष्टिः**' इति हलायुधः) (**'मुष्टिर्द्वयोः फले** । बद्धपाणौ त्सरौ' इति मेदिनी) । बद्धया मुष्ट्योपलक्षितः ॥*॥ ऋच्छति । अर्यतेऽनेन वा । 'ऋ गतौ' (भ्वा० प० अ०) । 'ऋतनि' (उ० ४।२) इति कत्निच् । **'रत्न्यरत्नी** स्त्रियौ बद्धमुष्टितताङ्गुली' इत्यमरमाला ॥ (१) ॥*॥ एकम् **'बद्धमुष्टिहस्तस्य'** ॥

अरत्निस्तु निष्कनिष्ठेन मुष्टिना ॥ ८६ ॥

अरेति ॥ रत्निभिन्नः । नञ्समासः । **'नारत्निः** कफोणौ हस्ते सप्रकोष्ठे चाङ्गुलौ' इति रुद्रः । **'अरत्निर्ना** सप्रकोष्ठतताङ्गुलिकरेऽपि च । कफोणावपि' (इति मेदिनी) ॥ (१) ॥*॥ निर्गता कनिष्ठा यस्मात्तेन मुष्टिनोपलक्षितः ॥*॥ एकम् **'अरत्निहस्तस्य'** ॥

व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम् ।

व्येति ॥ विशेषेण अम्यतेऽनेन । 'अम गतौ' (भ्वा० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । मुकुटस्तु—व्यामीयतेऽनेन । माङो मूलविभुजादित्वात् (वा० ३।२।५) कः—इति व्याख्यत् । तत्र । 'कृत्कर्तरि' (३।४।६७) इत्यस्य प्रवृत्त्या करणे कस्यासंभवात् ।—व्यामीयते रज्ज्वाद्यनेन—इति स्वाम्यप्येवम् ॥ (१) ॥*॥ स्वे स्वे पार्श्वे प्रसारितयोर्बाह्वोर्मध्यम्[1] ॥*॥ एकम् **'व्यामस्य'** ॥

ऊर्ध्वविस्तृतदोःपाणिनृमाने पौरुषं त्रिषु ॥ ८७ ॥

ऊर्ध्वेति ॥ दोषौ च पाणी च । तत् । ऊर्ध्वं विस्तृतं दोःपाणि येन सः । तादृशो नृ । तस्य यन्मानं परिमाणम् । तेन पुंसा वा यन्मीयते तत्र ॥*॥ पुरुषः प्रमाणमस्य । 'पुरुषहस्तिभ्यामण् च' (५।२।३८) । पौरुषो नदः, पौरुषी नदी, पौरुषं सरः । **'पौरुषं** पुरुषस्य स्याद्भावे कर्मणि तेजसि । ऊर्ध्वविस्तृतदोःपाणिनृमाने त्वभिधेयवत्' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'पुरुषप्रमाणस्य'** ॥

कण्ठो गलः

केति ॥ कणति । 'कण शब्दे' (भ्वा० प० से०) । 'कणेठ्ठः' (उ० १।१०३) । कण्ठते । 'कठि शोके' (भ्वा० आ० से०) । अच् (३।१।१३४) । 'समीपगलशब्देषु त्रिषु **कण्ठं** विदुर्बुधाः' इति शाश्वतः । **'कण्ठो** गले संनिधाने ध्वनौ

१—बाहुशब्दस्य प्रकोष्ठवाचकत्वाभावः । 'चतुर्विंशत्यङ्गुलो हस्तः' इति सकलसिद्धान्तभङ्गश्च ॥

मदनपादपे' इति विश्वः ॥ (१) ॥*॥ गिलति । 'गॄ निगरणे' (तु० प० से०) । अच् (३।१।१३४) । 'अचि विभाषा' (८।२।२१) इति वा लः । गीर्यतेऽनेन । 'पुंसि–' (३।३।११८) इति घः । यद्वा गलति । 'गल अदने' (भ्वा० प० से०) । अच् (३।१।१३४) । **'गलः** कण्ठे सर्जरसे' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'ग्रीवाग्रभागस्य'** ॥

अथ ग्रीवायां शिरोधिः कंधरेत्यपि ।

अथेति ॥ गीर्यतेऽनया । 'शेवयह्वजिह्वाग्रीवा–' (१।१५४) इति साधुः । **'ग्रीवे** शिरोधिताच्छिरे' (इति हैमः) ॥ (१) ॥*॥ शिरो धीयतेऽस्याम् । 'कर्मण्यधिकरणे च' (३।३।९३) इति किः ॥ (२) ॥*॥ कं शिरो धारयति । 'संज्ञायां भृतृवृजि–' (३।२।४६) इति खच् । 'खचि ह्रस्वः' (६।४।९४) । यद्वा धरति । 'धृञ् धारणे' (भ्वा० उ० अ०) । अच् । कं शिरसो धरा कंधरा । (३।१।१३४) **'कंधरो** वारिवाहे स्याद्ग्रीवायां **कंधरा** मता' (इति विश्वः) ॥ (३) ॥*॥ त्रीणि **'कंधरायाः'** ॥

कम्बुग्रीवा त्रिरेखा सा

केति ॥ कम्बुः शङ्ख इव ग्रीवा ॥ (१) ॥*॥ तिस्रो रेखा यस्याम् ॥*॥ एकम् **'शङ्खाकारग्रीवायाः'** ॥

अवटुर्घाटा कृकाटिका ॥ ८८ ॥

अवेति ॥ अवटलति । 'टल वैक्लव्ये' (भ्वा० प० से०) । अव टीकते । 'टीकृ गतौ' (भ्वा० आ० से०) । मितद्रादित्वात् (वा० ३।२।१८०) ड्वः । यद्वा न वटति । 'वट वेष्टने' (भ्वा० प० से०) 'वट भाषणे' (चु० उ० से०) बाहुलकादुः । 'अवटुः पुरुषे कृकाटिका घाटा' इति बोपालितः ॥ (१) ॥*॥ घाटयति घाट्यते, वा । 'घट संघाते' चुरादिः । अच् (३।१।१३४) घञ् (३।३।१९) वा ॥ (२) ॥*॥ कृकं कण्ठमटति । 'अट गतौ' (भ्वा० प० से०) । इन् (उ० ४।११८) । स्वार्थे कन् (ज्ञापि० ५।४।५) । ण्वुल् तु परत्वादणा बाधान्न प्राप्नोति ॥ (३) ॥*॥ त्रीणि **'ग्रीवायामुन्नतभागस्य' 'घाटी'** इति ख्यातस्य ।—ग्रीवापश्चाद्भागस्य–इति स्वामिमुकुटौ ॥

वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् ।

वेति ॥ उच्यतेऽनेन । 'वच परिभाषणे' (अ० प० अ०) । ब्रूञो वचिः (२।४।५३) वा । 'गुधृवीपचिवचि–' (उ० ४।१६७) इति त्रः । **'वक्त्रमास्ये** छन्दसि च' इति हेमचन्द्रः ॥ (१) ॥*॥ आस्यन्दते अम्लादिना प्रस्रवति । आस्यन्यते वाय्वादिना द्रवीक्रियते । 'स्यन्दू प्रस्रवणे' (भ्वा० आ० से०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) । इति डः । यद्वा अस्यन्ते वर्णा येन । अस्यते वास्मिन् प्रासः । 'असु क्षेपणे' (दि० प० से०) 'कृत्यल्युटः–' (३।३।११३) इति ण्यत् । 'मुखं मुखान्तरालं च द्वयमास्यमितीरितम्' इति शाश्वतः । **'आस्यं** मुखे च तन्मध्ये तद्भवे च स्त्रियां स्थितौ' (इति मेदिनी) ॥ (२) ॥*॥ वदन्त्यनेन 'वद व्यक्तायां वाचि' (भ्वा० प० से०) । करणे ल्युट् (३।३।११७) ॥ (३) ॥*॥ तुण्डति । 'तुडि तोडने' (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (४) ॥*॥ आनन्त्यनेन । 'अन प्राणने' (अ० प० से०) । ल्युट् (३।३।११७) ॥ (५) ॥*॥ लप्यतेऽनेन । 'लप व्यक्तायां वाचि' (भ्वा० प० से०) ल्युट् (३।३।११७) ॥ (६) ॥*॥ खन्यते । अनेन वा । 'खनु अवदारणे' (भ्वा० उ० से०) । 'डित् खनेर्मुट् चोदात्तः' (उ० ५।२०) इत्यच् स च डित् धातोर्मुडागमः । 'प्राक् खनो मुडुदात्तश्च ततोऽच्च प्रत्ययो भवेत् । प्रजास्रजा यतः खातं तस्मादाहुर्मुखं बुधाः' इति निरुक्तम् । **'मुखमुपाये** प्रारम्भे श्रेष्ठे निःसरणास्ययोः' इति हैमः ॥ (७) ॥*॥ सप्त **'मुखबिलस्य'** । तदुपलक्षिते समुदाये तूपचरात् ॥

क्लीबे घ्राणं गन्धवहा घोणा नासा च नासिका ८९

क्लीबे इति ॥ घ्रायतेऽनेन । 'घ्रा गन्धोपादाने' (भ्वा० प० अ०) । ल्युट् (३।३।११७) **'घ्राणं** क्लीबं नासिकायां घ्राते स्याद्घ्राच्यलिङ्गकम्' (इति मेदिनी) ॥ (१) ॥*॥ वहति 'वह प्रापणे' (भ्वा० उ० अ०) । अच् (३।१।१३४) । गन्धस्य वहा । 'स्याद्गन्धवहा नासायां पुंलिङ्गे मातरिश्वनि' (इति मेदिनी) ॥ (२) ॥*॥ घोणति । अनया वा । 'घुण भ्रमणे' (भ्वा०प०से०) । अच् (३।१।१३४) । 'हलश्च' (३।३।१२१) इति घञ् वा ॥ (३) ॥*॥ नासते । अनया वा । 'णास शब्दे' (भ्वा० आ० से०) । प्राग्वत् । **'नासा** तु नासिकायां च द्वारोर्ध्वदारुणि स्त्रियाम्' (इति मेदिनी) ॥ (४) ॥*॥ नासेर्ण्वुल् (३।१।१३३) । 'घ्राणं गन्धवहा नासा **नसा नस्या** च नासिका' इति साहसाङ्कः । **'कुल्या** गन्धवहा घोणा घ्राणं नासा च नासिका' इति काल्यः ॥ (५) ॥*॥ पञ्च **'नासिकायाः'** ॥

ओष्ठाधरौ तु रदनच्छदौ दशनवाससी ।

ओष्ठेति ॥ उष्यते उष्णाहारेण । 'उष दाहे' (भ्वा० प० से०) । 'उषिकुषि–' (उ० २।४) इति थन् ॥ (१) ॥*॥ न ध्रियते । 'धृङ् अनवस्थाने' (तु० आ० अ०) । 'पुंसि–' (३।३।११८) इति घः । नञ् समासः (२।३।६) । **'अधरस्तु** पुमानोष्ठे, हीनेऽनूर्ध्वे च वाच्यवत्' (इति मेदिनी) ॥ (२) ॥*॥ 'द्वन्द्वश्च प्राणि–' इत्येकत्वं तु न भवति । अनित्यत्वात् । 'ओष्ठाभ्यां युतावधरौ' इति शाकपार्थिवादिः (वा० २।१।७८) वा ॥*॥ रदनाः छाद्यन्तेऽनेन 'छद संवरणे' चुरादिः । 'पुंसि–' (३।३।११८) इति घः । 'छादेर्घे–' (६।४।९६) इति ह्रस्वः ॥ (३) ॥*॥ दशनानां वाससी इव । आवरकत्वात् ॥ (४) ॥*॥ चत्वारि **'उत्तराधरोष्ठमात्रस्य'** ॥

१—'मां विवक्षुरसि किं चलदोष्ठः' इति योगात्—इति मुकुटः ॥

अधस्ताच्चिबुकम्

अधेति ॥ चीवति, चीव्यते, वा । 'चीवृ आदानसंवरणयोः' (भ्वा० उ० से०) । मृगय्वादिः (उ० १।३७) । स्वार्थे कन् (ज्ञापि० ५।४।५) । चिनोति शोभां वा । प्राग्वत् ॥ (१) ॥*॥ 'अधस्तादधरोष्ठस्य **चिबुकः** स्याच्चिबुकं तथा' इति निगमः ॥ (१) ॥*॥ एकम् '**ओष्ठाधोभागस्य**' ॥

गण्डौ कपोलौ

गेति ॥ गण्डति । 'गडि वदनैकदेशे' (भ्वा० प० से०) अच् (३।१।१३४) । '**गण्डः** स्यात्पुंसि खड्गिनि । ग्रहयोगप्रभेदे च वीथ्यङ्गे पिटकेऽपि च । चिह्नवीरकपोलेषु हयभूषणबुद्बुदे' (इति मेदिनी) ॥ (१) ॥*॥ कम्पते । 'कपि चलने' (भ्वा० आ० से०) । 'कपिगडिगण्डि–' (उ० १।६६) इत्योलच् । 'कपि' इति निर्देशान्नलोपः । कं सुखं पोलति । 'पुल महत्त्वे' (भ्वा० प० से०) । 'कर्मण्यण्' (वा० ३।२।१) ॥ (२) ॥*॥ द्वे '**कपोलस्य**' ॥

तत्परो हनुः ॥ ९० ॥

तदिति ॥ ताभ्यां कपोलाभ्यां परः । हन्ति । 'शॄस्वृस्निहि–' (उ० १।१०) इत्युः । '**हनुर्हट्टविलासिन्यां मृत्यावस्त्रे गदे स्त्रियाम् । द्वयोः कपोलावयवे' (इति मेदिनी) ॥ (१) ॥*॥ एकं '**कपोलाधोभागस्य**' ॥

रदना दशना दन्ता रदाः

रेति ॥ रद्यतेऽनेन । 'रद विलेखने' (भ्वा० प० से०) । 'करणा–' (३।३।११७) इति ल्युट् ॥ (१) ॥*॥ दश्यतेऽनेन । करणे ल्युट् (३।३।११७) । '–दहदश–' (३।१।२४) इति निर्देशात्क्वचिदङ्क्ङित्यपि लोपः । यद्वा कर्तरि ल्युट् (३।३।११३) ॥ (२) ॥*॥ दाम्यति । 'दमु उपशमे' (दि० प० से०) । अन्तर्भावितण्यर्थाद्बाहुलकात्तन् । '**दन्तोऽद्रिकटके कुञ्जे दशनेऽथौषधौ स्त्रियाम्' (इति मेदिनी) ॥ (३) ॥*॥ रदति अच् (३।१।१३४) ॥ (४) ॥*॥ चत्वारि '**दन्तस्य**' ॥

तालु तु काकुदम् ।

तेति ॥ तरन्त्यनेन । 'तॄ प्लवनतरणयोः' (भ्वा०प०से०) । 'त्रो रश्च लः' (उ० १।५) इति युण् । तालयति । 'तल प्रतिष्ठायाम्' चुरादिः । मृगय्वादिः (उ० १।३७) वा ॥ (१) ॥*॥ काकुर्जिह्वा उच्यतेऽनुच्यतेऽस्मिन् । अनेकार्थत्वाद्वदिरुत्क्षेपणे वर्तते । घञर्थे कः (वा० ३।३।३८) । पृषोदरादिः (६।३।१०९) । ईषत् कवते । 'कुङ् शब्दे' । (भ्वा० आ० अ०) अब्दादित्वात् (उ० ४।९८) साधुर्वा । यद्वा 'निश्चेष्टं ककुदं शिरः' । ककुदे भवम् । 'तत्र भवः' (४।३।५३) इत्यण् ॥ (२) ॥*॥ द्वे '**तालुनः**' ॥

१—औणादिकः क्युन् युक्तः—इति भाष्यकैयटयोः (६।४।२६) सिद्धान्तः ॥

रसज्ञा रसना जिह्वा

रेति ॥ रसं जानाति । 'ज्ञा अवबोधने' (क्रया० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥ (१) ॥*॥ रसयति । 'रस आस्वादने' (चु० उ० से०) । नन्द्यादित्वात् (३।१।१३४) ल्युः । यद्वा रसयन्त्यनया । 'ण्यासश्रन्थो युच्' (३।३।१०७) । रसति । 'रस शब्दे' (भ्वा० प० से०) । 'बहुलमन्यत्रापि' (उ० २।७८) इति युच् वा । '**रसनं** खजने ध्वनौ । जिह्वायां तु न पुंसि स्यात्' (इति मेदिनी) । 'तालव्या अपि दन्त्याश्च' इत्यादौ 'जिह्वायां **रशना** तथा' इत्युक्तेर्दन्त्यतालव्यमध्योऽयम् । '**रसनं** तु ध्वनौ स्वादे रसज्ञारज्ञयोः स्त्रियाम्' इति रभसः ।—रसेः सौत्रात् 'रसिरुचिरुवृञो युच्'—इति मुकुटोऽपाणिनीयः ॥ (२) ॥*॥ लेढि । लिहन्त्यनया वा । 'लिह आस्वादने' (आ० उ० अ०) । 'शेवयह्वजिह्वा–' (उ० १।१५४) इति साधुः ।—'लिहेः पूर्वजिह्वग्रीवा' इति वन्ग्रत्ययः—इति मुकुटोऽपाणिनीयः ॥ (३) ॥*॥ त्रीणि '**जिह्वायाः**' ॥

प्रान्तावोष्ठस्य सृक्कणी ॥ ९१ ॥

प्रेति ॥ सृजति लालादि । 'सृज विसर्गे' (उ० प० अ०), बाहुलकात्कनिन् । 'प्रान्तावोष्ठस्य सृक्कणी' इति क्लीबकाण्डेऽमरदत्तः ॥*॥ 'कवयुक्तम्' (सृक्कणी) इत्यन्ये ॥*॥ (**सृक्कणी**) ङ्यन्ता—इत्येके ॥*॥—अदन्तं सृक्कम्—इत्यपरे ॥*॥ 'सृक्कि' शब्द इकारान्तः क्लीबम् । तत्र बाहुलकात्किः ॥ (१) ॥*॥ एकम् '**ओष्ठप्रान्तयोः**' ॥

ललाटमलिकं गोधिः

लेति ॥ ललनम् । 'लल ईप्सायाम्' (चु० आ० से०) । 'लड विलासे' (भ्वा० प० से०) वा । डलयोरेकत्वम् । ललं विलासमीप्सां वा अटति । 'अट गतौ' (भ्वा० प० से०) । ललति । उक्तधातुभ्यां बाहुलकादाटच् ॥ (१) ॥*॥ अलति । अल्यते, वा । 'अल भूषणादौ' (भ्वा० प० से०) । 'अलिहृषिभ्यां किच्च' इतीकन् । (उ० ४।२७) । '**अलीकं**महितेऽपि' इति काल्यः ॥*॥ बाहुलकादिकन्नपि । '**अलिकं** ह्रस्वदीर्घमन-

१—'महासृक्कायशोभितो नृसिंहनखाग्रवत्' इति लताश्लेषात् कद्वयम् ॥ 'सितस्य संभावय सृक्कणा कणान्' इति श्रीहर्षप्रयोगात् वकारयुक्तं च । 'न संयोगाद्वमन्तात्' (५।४।१३७) इत्यल्लोपो न ॥ 'स सृक्कणीप्रान्तमसृक्प्रदिग्धं प्रलेलिहानो हरिणारिरुच्चैः' इति पाणिनेर्ङीबन्ता च ॥ 'सृक्के द्वे चैव विज्ञेये चत्वारिंशच्च वक्त्राजाः' इति वचनादन्तं सृक्कमपि ॥ 'सृक्कणि' इतीदन्तमपि 'क्लीबे वारिशब्दवत्' इत्युक्तेः ॥ 'सृक्कि'शब्दो ह्रस्वेकारान्तोऽपि क्लीबः—इत्यपरे । 'सक्थ्यक्ष्णिदधिसृक्कि तथा वारि स्यात्' इत्यरुणः—इति मुकुटः ॥ २—आधुनिकपुस्तकेषु तु 'अनि' इति पाठ उपलभ्यते ॥ ३—अतएव हैमनाममालायाम् 'भाले गोध्यलिकालीकललाटानि' इत्युपलभ्यते ॥

ध्यम्' इति राजदेवः ॥ (२) ॥*॥ गुध्यते । 'गुध परिवेष्टने' (दि० प० से०) । इन् (उ० ४।११८) । गावौ नेत्रे धीयते पुंस्ययम् । 'कर्मण्यधिकरणे च' (३।३।९३) इति किर्वा । पुंस्ययम् । 'गोधिभालौ महाशङ्खः' इति त्रिकाण्डशेषात् ॥ (३) ॥*॥ त्रीणि **'भालस्य'** ॥

ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियौ ।

ऊर्ध्वे इति ॥ भ्रमति । 'भ्रमु चलने' (भ्वा० प० से०) । 'भ्रमेर्ङुः' (उ० २।६८) । यद्वा भ्राम्यति । 'भ्रमु अनवस्थाने' (दि० प० से०) । क्विप् (३।२।१७८) । 'ऊङ् च गमादीनाम्' इति 'गमः क्वौ' (६।४।४०) इत्यत्र वार्तिकेन मलोप ऊङ् चादेशः ॥ (१) ॥*॥ एकं **'नेत्रोपरिभागस्थरोमराजेः'** ॥

कूर्चमस्त्री भ्रुवोर्मध्यं

कूर्चेति ॥ कुरति । कूर्यते, वा । बाहुलकाच्चट् । **'कूर्चमस्त्री भ्रुवोर्मध्ये कत्थनश्मश्रुकैतवे'** (इति मेदिनी) ॥ (१) ॥*॥ एकं **'नासोपरिभ्रूद्वयमध्यस्य'** ॥

तारकाक्ष्णः कनीनिका ॥ ९२ ॥

तेति ॥ तारयति । 'तॄ प्लवनादौ' (भ्वा० प० से०) । 'ण्वुल्' (३।१।१३३) । 'तारका ज्योतिषि' (वा० ७।३।७५) इतीत्वाभावः । **'तारको** दैत्यभित्कर्णधारयोर्न द्वयोर्दृशि । कनीनिकायामृक्षे च न पुमांस्त्रातरि त्रिषु' (इति मेदिनी) ॥ (१) ॥*॥ कनति । 'कनी दीप्तौ' (भ्वा० प० से०) । बाहुलकादीनः । स्वार्थे कन् (ज्ञापि० ५।४।५) । टाप् (४।१४) । इत्वम् (७।३।४४) । **'कनीनिका** तारकेऽक्ष्णः स्यात्कनिष्ठाङ्गुलावपि' (इति मेदिनी) ॥ (२) ॥*॥ 'अक्ष्णः' इति खेचरीव्यावृत्त्यर्थम् ॥*॥ द्वे **'नेत्रकनीनिकायाः'** ॥

लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ।
दृग्दृष्टी च

लवितेति ॥ लोच्यतेऽनेन । 'लोच्लृ दर्शने' (भ्वा० आ० से०) । ल्युट् (३।३।११७) ॥ (१) ॥*॥ नीयतेऽनेन । 'णीञ् प्रापणे' (भ्वा० उ० से०) । ल्युट् (३।३।११७) ॥ (२) ॥*॥ 'दात्री' (३।२।१८२) इति पक्षे ष्ट्रन् । **'नेत्रं** मथिगुणे वस्त्रभेदे मूले द्रुमस्य च । रथे चक्षुषि नद्यां तु **नेत्री** नेतरि वाच्यवत्' (इति मेदिनी) ॥ (३) ॥*॥ ईक्ष्यतेऽनेन । 'ईक्ष दर्शने' (भ्वा० आ० से०) । ल्युट् (३।३।११७) **'ईक्षणं** दर्शने दृशि' (इति मेदिनी) ॥ (४) ॥*॥ चष्टे । चक्षतेऽनेन, वा । 'चक्षिङ्' (अ० आ० अ०) । **'चक्षेः शिच्च'** (उ० ३।११९) इत्युसिः । शित्त्वादनार्धधातुकत्वात् ख्याञ् न ॥—बाहुलकात् ख्याञ् न—इति मुकुटस्त्वपाणिनीयः ॥ (५) ॥*॥ अश्नुते अनेन वा । **'अशू व्याप्तौ'** (स्वा० आ० से०) । **'अशेर्नित्'** (उ० ३।१५६) इति क्विसः ।—**'अशेः षिच्–'** इति मुकुटोऽपाणिनीयः । यद्वाक्षति । **'अक्षू व्याप्तौ'** (भ्वा० प० से०) । इन् (उ० ४।११८) ॥ (६) ॥*॥ पश्यति । **'दृशिर् प्रेक्षणे'** (भ्वा० प० अ०) । क्विप् (३।२।७८) । यद्वा दृश्यतेऽनया । संपदादित्वात् (वा० ३।३।१०८) क्विप् । **'क्विन्प्रत्ययस्य'** (८।२।६२) इति बहुव्रीह्याश्रयणात् क्विप्यपि कुत्वम् ॥ (७) ॥*॥ क्तिन् (३।३।९४) । **'दृष्टिर्ज्ञानेऽक्षिणि दर्शने'** इति हैमः ॥ (८) ॥*॥ अष्ट **'नेत्रस्य'** ॥

अस्रु नेत्राम्बु रोदनं चाश्रमश्रु च ॥ ९३ ॥

अस्रिति ॥ अस्यति । अश्नुते वा कण्ठम् । 'अस्वादित्वात्' (उ० ५।२९) इति रुक्पक्षे । **'अस्रः कोणे कवे पुंसि क्लीवमश्रुणि शोणिते'** (इति मेदिनी) ॥*॥ **'जगरे चाश्रमश्रुणि'** इत्यूष्मभेदात्तालव्यप्रकरणोक्तेश्च तालव्यशमपि ॥ (१) ॥*॥ नेत्रयोरम्बु ॥ (२) ॥*॥ रुद्यते । 'रुदिर् अश्रुविमोचने' (अ० प० से०) । कर्मणि ल्युट् (३।३।११३) बाहुलकात् । **'रोदनं** क्रन्दनेऽस्रेऽपि दुरालम्भौषधौ स्त्रियाम्' इति मेदिनी ॥ (३) ॥*॥ (४) ॥*॥ (५) ॥*॥ पञ्च **'नेत्रोदकस्य'** ॥

अपाङ्गौ नेत्रयोरन्तौ

अपेति ॥ अपाङ्गति 'अगि गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) अपकृष्टोऽङ्गाद्वा । अपकृष्टान्यङ्गान्यस्माद्वा । **'अपाङ्गस्त्वक्षहीने स्यान्नेत्रान्ते तिलकेऽपि च'** इति विश्वः ॥ (१) ॥*॥ 'बाह्यौ' इति शेषः ॥*॥ एकम् **'नेत्रप्रान्तयोः'** ॥

कटाक्षोऽपाङ्गदर्शने ।

केति ॥ कटावतिशयितावक्षिणी यत्र । 'बहुव्रीहौ सक्थ्यक्ष्णोः–' (५।४।११३) इति षच् । कटं गण्डमक्षति वा । 'अक्षू व्याप्तौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) । 'कटाक्षकाक्षौ' इति रभसात् काक्षोऽपि ॥ (१) ॥*॥ अपाङ्गेन दर्शनम् ॥ (२) ॥*॥ द्वे **'कटाक्षस्य'** ॥

कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः ॥ ९४ ॥

केति ॥ कीर्यते शब्दग्रहणाय क्षिप्यते । यद्वा कीर्यते शब्दोऽस्मिन् । किरति शरीरे मुखं वा । 'कॄ विक्षेपे' (तु० प० से०) । 'कॄवृजॄसि–' (उ० ३।१०) इति नः । यद्वा कर्णयति । 'कर्ण भेदने' (चु० उ० से०) अदन्तः । अच् (३।३।१३४) । **'कर्णः** पृथासुते ज्येष्ठे सुवर्णालंकृतावपि' (इति मेदिनी) । यत्तु—करोति शब्दज्ञानम्—इति मुकुटः । तन्न । हस्वान्नप्रत्ययाविधानात् ॥ (१) ॥*॥ शब्दो गृह्यतेऽनेन । 'ग्रहवृह–' (३।३।५८) इत्यप् । संज्ञायां 'हलश्च' (३।३।१२१) इति घञ् विधीयते घापवादत्वात् । योगार्थमात्रे तु स न ॥ (२) ॥*॥ श्रूयतेऽनेन । 'श्रु श्रवणे' (भ्वा० प० अ०) ।

१—'प्रावर्तयन्नदीमस्त्रैर्द्विषां तद्योषितां च सः' इति माघे रक्तार्थेन सह श्लेषादस्रं दन्त्यसम्'—इति मुकुटः ॥

ष्ट्रन् (उ० ४।१५९) ॥ (३) ॥*॥ श्रूयतेऽनया । क्तिन् (३।३।९४) । **'श्रुतिः** श्रोत्रे च तत्कर्मण्यान्नायवार्तयोः स्त्रियाम्' (इति मेदिनी) ॥ (४) ॥*॥ ल्युट् वा करणे (३।३।११७) । **'श्रवणं** श्रुतौ च कर्णे नक्षत्रे न नपुंसकम्' (इति मेदिनी) ॥ (५) ॥*॥ 'सर्वधातुभ्योऽसुन्' (उ० ४।१८९) ॥ (६) ॥*॥ षट् **'कर्णस्य'** ॥

उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम् ।

उत्तेति ॥ उत्तमं च तदङ्गं च 'सन्महत्–' (२।१।६१) इति समासः ॥ (१) ॥*॥ श्रीयते उष्णीषादिना । 'श्रयतेः खाङ्गे शिरः किच्च' (उ० ४।१९४) इत्यसुन् । **'शिरः** प्रधाने सेनाग्रे शिखरे मस्तकेऽपि च' (इति मेदिनी) ॥*॥ 'शिरोवाची **शिरो**ऽन्तो, रजोवाची **रज**स्तथा' ॥ (२) ॥*॥ 'कुमारशीर्षयोः' (३।२।५१) इति ज्ञापकाच्छिरःशब्दस्य शीर्षादेशः ॥ (३) ॥*॥ मुह्यत्यस्मिन्नाहते । 'मुह वैचित्त्ये' (दि० प० से०) । 'खन्नुक्षन्–' (उ० १।१५९) इति साधुः ॥ (४) ॥*॥ मस्यते स्म । 'मसी परणामे परिमाणे वा' (दि० प० से०) । क्तः (३।२।१०२) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (५) ॥*॥ पञ्च **'शिरसः'** ॥

चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः ॥९५॥

चीति ॥ 'चि' इति अव्यक्तं कुरति । 'कुर शब्दे' (तु० प० से०) 'इगुपध–' (३।१।१३५) इति कः ॥*॥ 'कुन्तला **मूर्धजास्त्वस्राश्चिकुराश्चिकुराः** कचाः' इति दुर्गः ॥ (१) ॥*॥ कुन्तं कुन्ताग्राकारं लाति । 'आतोऽनुप–' (३।२।३) इति कः । **'कुन्तल**श्चषके वाले यवे ना भूम्नि नीवृति' इति मेदिनी ॥ (२) ॥*॥ बलति । 'बल प्राणने' (भ्वा० प० से०) । जलादित्वात् (३।१।१४०) णः । बल्यतेऽवरुध्यते वा । घञ् (३।३।१९) । **'बालो** ना कुन्तलेऽश्वस्य गजस्यापि च बालधौ । नालिकेरे हरिद्रायां मल्लिकाभिद्यपि स्त्रियाम् । वाच्यलिङ्गोऽर्भके मूर्खे हीबेरे पुंनपुंसकम् । अलंकारान्तरे मेध्ये **बाली बाला** त्रुटिस्त्रियोः' इति (पवर्गीयादौ) मेदिनी ॥ (३) ॥*॥ कच्यते । 'कच बन्धने' (भ्वा० प० से०) । 'पुंसि–' (३।३।११८) इति घः । कचत्यात्मानं वा । अच् (३।१।१३४) । **'कचः** शुष्कव्रणे केशे बन्धे पुत्रे च गीर्पतेः । **कचा** करेण्वाम्' इति हैमः ॥ (४) ॥*॥ क्लिश्यते 'क्लिश बन्धे' ( ) । 'क्लिश उपतापे' (दि० आ० से०) वा । क्लिश्नाति । 'क्लिशू विबाधायाम्' (क्र्या० प० से०) 'क्लिशेरन् लो लोपश्च' (उ० ५।३३) । के शेते वा । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । 'हलदन्तात्–' (६।३।९) इत्यलुक् । कस्य शिरस ईशो वा । **'केशः** स्यात्पुंसि वरुणे हीबेरे कुन्तलेऽपि च' (इति मेदिनी) ॥ (५) ॥*॥ शिरसि रोहति । 'इगुपध–' (३।१।१३५) इति कः ॥ (६) ॥*॥ षट् **'केशस्य'** ॥

तद्वृन्दे कैशिकं कैश्यम्

तदिति ॥ केशानां समूहः । 'अचित्तहस्ति–' (४।२।४७) इति ठक् ॥ (१) ॥*॥ 'केशाश्वाभ्यां यञ्छावन्यतरस्याम्' (४।२।४८) (२) ॥*॥ द्वे **'केशवृन्तस्य'** ॥

अलकाश्चूर्णकुन्तलाः ।

अलेति ॥ अलति, अल्यते, वा । 'अल भूषणादौ' (भ्वा० प० से०) । 'कृजादिभ्यो वुन्' (उ० ५।३५) । **'अलका** कुबेरपुर्यामस्त्रियां चूर्णकुन्तले' (इति मेदिनी) ॥ (१) ॥*॥ चूर्णस्य कर्चूरादिक्षोदस्य कुन्तलाः ॥ (२) ॥*॥ द्वे **'कुटिलकेशानाम्'** ॥

ते ललाटे भ्रमरकाः

त इति ॥ भ्रमर इव 'इवे प्रतिकृतौ (५।३।९६) इति कन् । 'अथ **भ्रमरको** भृङ्गे गैरिके चूर्णकुन्तले' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'ललाटगतकेशानाम्'** ॥

काकपक्षः शिखण्डकः ॥ ९६ ॥

काकेति ॥ काकस्य पक्ष इव ॥ (१) ॥*॥ शिखाया अण्ड इव । 'इवे–' (५।३।९६) इति, स्वार्थे (ज्ञापि० ५।४।५) वा कन् । शकन्ध्वादिः (वा० ६।१।९४) । **'शिखण्डौ** तु शिखाबर्हौ' इति तालव्यादौ रभसः । **'शिखण्डो** बर्हचूडयोः' (इति मेदिनी) ॥*॥ शकन्ध्वादित्वं केचिन्नेच्छन्ति । **'शिखाण्डक**शिखण्डकौ' इति वाचस्पतिमुभूती ॥ (२) ॥*॥ द्वे **'सामान्येन शिखायाः'** । बालानां शिखाया वा । 'बालानां तु शिरः कार्यं त्रिशिखं मुण्डमेव वा' ॥

कबरी केशवेशः

केति ॥ कूयते । 'कुङ् शब्दे' (भ्वा० आ० अ०) । 'कोरन्' (उ० ४।१५५) । 'जानपद–' (४।१।४२) इति ङीष् ।—कं शिरो वृणोत्याच्छादयति । '–क्वर–' (४।१।४२) इति निर्देशादणं बाधित्वाच् (३।१।१३४)—इति मुकुटः । —कृष्णवर्णा कं वृणोति वा—इति स्वामी चोक्तसूत्रादर्शनमूलकौ । **'कवरं** लवणाम्लयोः । **कवरी** केशविन्यासशाकयोः' (इति हैमः) ॥ (१) ॥*॥ केशानां वेशो मार्जनाबन्धविशेषः ॥ (२) ॥*॥ द्वे **'केशबन्धरचनायाः'** ॥

अथ धम्मिल्लः संयताः कचाः ।

अथेति ॥ धमति । 'धम ध्माने' सौत्रः । विच् (३।२।७५) । मिलति । 'मिल संगमे' (तु० प० से०) । बाहुलकाल्लक् । धम् चासौ मिल्लश्च । 'मो नो धातोः' (८।२।६४) इति सौत्रेषु न भवति ॥ (१) ॥*॥ एकं **'चूडा'** इति ख्यातस्य ॥

शिखा चूडा केशपाशी

शीति ॥ शेते । 'शीङो हस्वश्च' (उ० ५।२४) इति खः । **'शिखा** शाखाबर्हिचूडालाङ्गलिक्ष्यग्रमात्रके । चूडामात्रे शि-

फायां च ज्वालायां प्रपदेऽपि च' (इति मेदिनी) ॥ (१) ॥*॥ चुड्यते । 'चुड समुच्छ्राये' (चु० प० से०)। 'चुरादीनां णिज्वा' इति पक्षे भिदादिपाठात् (३।३।१०४) अङ् दीर्घत्वे । **'चूडा** शिखाग्रयोः । बाहुभूषावलभ्योश्च' इति हैमः ॥ (२) ॥*॥ केशानां पाशः । अल्पः केशपाशो गौरादिः (४।१।४१) ॥ (३) ॥*॥ त्रीणि **'शिरोमध्यस्थचूडायाः' 'चोटी'** इति ख्यातायाः ॥

व्रतिनस्तु जटा सटा ॥ ९७ ॥

व्रतीति ॥ व्रतिनः शिखा । जायते, जन्यते वा । 'जनेष्टन् नलोपश्च' (उ० ३।३०) । यद्वा जटति । 'जट संघाते' (भ्वा० प० से०) । अच् (३।१।१३४) । **'जटा** लम्बकचे मूले मांस्यां ह्रस्वे पुनर्जटी' (इति मेदिनी) ॥ (१) ॥*॥ सटति । 'षट अवयवे' (भ्वा० प० से०) । अच् (३।१।१३४)। **'सटा** जटाकेसरयोः' (इति मेदिनी) ॥ (२) ॥*॥ **'कोटीरस्तु** जटा सटा' इति रभसः ॥*॥ द्वे **'व्रतिनः शिखायाम्'** ॥

वेणिप्रवेणी

वेणीति ॥ वेणति । 'वेणृ निशामनवादित्रादानगमनज्ञानचिन्तासु' (भ्वा० उ० से०) । इन् (उ० ४।११८) ॥ (१) ॥*॥ प्रग्रह उपसर्गान्तरव्यावृत्त्यर्थः ॥ (२) ॥*॥ 'करणिश्रोणिवेणयः' इति स्त्रीकाण्डे निगमः ॥*॥ **'वेणी** सेतुप्रवाहयोः । देवताडे केशबन्धे' इति हैमः ॥*॥ द्वे **'प्रोषितभर्तृकादिधार्यकेशरचनाविशेषस्य'** ॥

शीर्षण्यशिरस्यौ विशदे कचे ।

शीर्षेति ॥ शिरसि भवः । 'शरीरावयवाच्च' (४।३।५५) इति यत् । 'ये च तद्धिते' (६।१।६१) इत्यत्र 'वा केशेषु' इति वचनाद्वा शीर्षन् । **'शीर्षण्यं** तु शीर्षके । सुकेशे पुंसि' (इति मेदिनी) ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'अन्योन्यासंपृक्ते स्नानादिनिर्मले वा केशे'** ॥

पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे ॥ ९८ ॥

पेति ॥ पाश्यते । 'पश बन्धे' चुरादिः । घञ् (३।३।१९)। घः (३।१।११८) वा । **'पाशस्तु** मृगपश्वादिबन्धने । कर्णान्ते शोभनार्थः स्यात्कचान्ते निकरार्थकः । छात्राद्यन्ते च निन्दार्थः' इति हैमः ॥ (१) ॥*॥ पक्ष्यते । 'पक्ष परिग्रहे' (भ्वा० प० से०) । घञ् (३।३।१९) । घः (३।३।११८) वा । **'पक्षो** मासार्धके गेहपार्श्वसाध्यविशेषयोः । केशादेः परतो वृन्दे बले सखिसहाययोः' (इति मेदिनी) ॥ (२) ॥*॥ हसति, हस्यते, वा । 'हसे हसने' (भ्वा० प० से०)। 'हसिमृग्रिण्–' (उ० ३।८६) इति तन् । **'हस्तः** करे करिकरे सप्रकोष्ठकरेऽपि च । ऋक्षे केशात्परो व्राते' (इति मेदिनी)॥ (३) ॥*॥ कचवाचकात् परे सन्तः । कलापोऽर्थो येषाम् ॥*॥ त्रीणि **'कलापार्थस्य'** ॥

तनूरुहं रोम लोम

तेति ॥ तन्वां रोहति । मूलविभुजादिकः (वा० ३।२।५)। **'तनूरुहं** तु लोम्नि स्यात्पतत्रे च नपुंसकम्' इति मेदिनी । **'तनूरुहस्तु** पुत्रे गरुति लोम्नि च' इति हैमः ॥ (१) ॥*॥ रोहति । 'नामन् सीमन् व्योमन् रोमन् लोमन्' (उ० ४।१५१) इति साधुः । यद्वा रूयते । 'रु शब्दे' (अ०प०अ०)। मनिन् (३।२।७५) ॥ (२) ॥*॥ कपिलकादित्वात् (वा० ८।२।१८) लत्वम् । लूयते वा । मनिन् (३।२।७५) ॥ (३) ॥*॥ त्रीणि **'रोम्णः'** ॥

तद्वृद्धौ श्मश्रु पुंमुखे ।

तदिति ॥ तस्य वृद्धिस्तस्याम् । श्म मुखं श्रयति । 'श्रिञ् सेवायाम्' (भ्वा० उ० से०) । इमनि मुखे श्रूयते । 'श्रु श्रवणे' (भ्वा० प० से०) मितद्वादित्वात् (वा० ३।२।१८०) डुः । संपदादिक्विप् (वा० ३।३।१०८) वा । आगमशास्त्रस्यानित्यत्वान्न तुक् ॥ (१) ॥*॥ पुंसो मुखे ॥*॥ एकं **'दाढिकायाः'** ॥

आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनम् ॥ ९९ ॥

आकेति ॥ आकल्पनम् । 'कृपू सामर्थ्ये' (भ्वा० आ० से०) । घञ् (३।३।१८) । 'कृपो रो लः' (८।२।१८) । अकल्प्यते वा । आकल्पयति वा । स्वार्थण्यन्तः । अच् (३।१।१३४)। **'आकल्पः** कल्पने वेशे' (इति मेदिनी) ॥ (१) ॥*॥ वेषणम्, विष्यते, वा । 'विष्लृ व्याप्तौ' (जु०प०से०)। घञ् (३।३।१८,१९) । वेवेष्टि वा । अच् (३।१।१३४) ॥*॥ तालव्यशान्तोऽपि । वेशनम् । विश्यते वा । विशति वा । 'विश प्रवेशने' (तु० प० अ०) । प्राग्वत् । त्रिष्वप्यधिकरणे घञ् (३।३।१९) वा । **'वेशो** वेश्यागृहे गृहे । नेपथ्ये च' (इति मेदिनी) ॥ (२) ॥*॥ नयति । णिच् (३।२।७५)। गुणः (७।३।८४) । निनो नेत्रस्य, नेर्नेतुर्वा पथ्यम् । संज्ञापूर्वकत्वान्न ह्रस्वः । **'नेपथ्यं** तु प्रसाधने । रङ्गभूमौ वेषभेदे' इति हैमः ॥ (३) ॥*॥ प्रत्यङ्गं प्रतिख्यातं वा कर्म । शाकपार्थिवादिः (वा० २।१।७८) ॥ (४) ॥*॥ प्रसाध्यतेऽनेनाङ्गम् । करणे ल्युट् (३।३।११७) ॥ (५) ॥*॥ पञ्च **'अलंकाररचनादिकृतशोभायाः'** ॥

दशैते त्रिषु

देति ॥ एते वक्ष्यमाणा रोचिष्णुपर्यन्ताः ॥

१—केषुचिन्मूलपुस्तकेषु तु 'व्रतिनः स्रा' इति पाठ उपलभ्यते । **'स्रा** जटायां च राक्षस्यां पतने दुर्भगस्त्रियाम्' इति क्वचित्पुस्तके हैमः ॥ 'सुप्तोऽपि प्रबुद्धः' इति कादम्बरीश्लेषश्च ॥

१–रु शब्दे इत्युत्तरम् 'रुङ् गतौ भाषणे वा' इत्यपि पाठः ।

अलंकर्तालंकरिष्णुश्च

अलमिति ॥ अलं करोति । 'तृन्' (३।२।१३५) ॥(१) ॥*॥ 'अलंकृञ्–' (३।२।१३६) इतीष्णुच् ॥ (२) ॥*॥ द्वे **'अलंकरणशीलस्य'** ॥

मण्डितः ।

प्रसाधितोऽलंकृतश्च भूषितश्च परिष्कृतः ॥ १०० ॥

मेति ॥ मण्ड्यते स्म । 'मडि भूषायाम्' (भ्वा०प०से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ प्रसाध्यते स्म । 'साध संसिद्धौ' (स्वा० प० अ०) स्वार्थण्यन्तः । क्तः (३।३।१०२) ॥ (२) ॥*॥ अलं क्रियते स्म ॥ (३) ॥*॥ भूष्यते स्म । 'भूष अलंकारे' (भ्वा० प० से०) ॥ (४) ॥*॥ परिष्क्रियते स्म । क्तः (३।२।१०२) । 'संपदिभ्याम्–' (६।१।१३७) इति सुट् । 'परिनिविभ्यः–' (८।३।७०) इति षत्वम् ॥ (५) ॥*॥ पञ्च **'भूषितस्य'** ॥

विभ्राड् भ्राजिष्णुरोचिष्णू

वीति ॥ भ्राजते तच्छीलः । 'भ्राजभास–' '(३।२।१७७) इति क्विप् ॥ (१) ॥*॥ 'भुवश्च' (३।२।१३८) इति चाद् भ्राजेरपि इष्णुच् ॥ (२) ॥*॥ रोचते तच्छीलः । 'अलंकृञ्–' (३।२।१३६) इतीष्णुच् ॥ (३) ॥*॥ त्रीणि **'अलंकारादिना शोभमानस्य'** ॥

भूषा तु स्यादलंक्रिया ।

भ्विति ॥ भूषणम् । 'गुरोश्च–' (३।३।१०३) इत्यः ॥ (१) ॥*॥ अलंकरणम् । 'कृञः श च' (३।३।१००) ॥ (२) ॥*॥ द्वे **'भूषणक्रियायाः'** ॥

अलंकारस्त्वाभरणं परिष्कारो विभूषणम् ॥ १०१ ॥

मण्डनं च

अलमिति ॥ अलंक्रियतेऽनेन । घञ् (३।३।१९) । **'अलंकारः** कंकणादिषु । उपमादौ' इति हैमः ॥ (१) ॥*॥ एवं परिष्कारोऽपि ॥ (३) ॥*॥ आ भ्रियतेऽनेन । 'भृञ् भरणे' (भ्वा० उ० अ०) । ल्युट् (३।३।११७) ॥ (२) ॥*॥ विभूष्यतेऽनेन ॥ (४) ॥*॥ मण्ड्यतेऽनेन । 'मडि भूषायाम्' (भ्वा० प० से०) । ल्युट् (३।३।११७) । **'मण्डनं** तु प्रसाधने । **मण्डनोऽलंकरिष्णौ'** इति हैमः ॥ (५) ॥*॥ पञ्च **'भूषणाम्'** ॥

अथ मुकुटं किरीटं पुंनपुंसकम् ।

अथेति ॥ मङ्क्तेऽनेन वा । 'मकि मण्डने' (भ्वा० आ० से०) बाहुलकादुटः । आगमशास्त्रस्यानित्यत्वान्न नुम्, एकोकारम् ॥*॥ (**मुकुटम्**, इति) ह्रस्वकारपाठे बाहुलकाद् धातोरत उः ॥ (१) ॥*॥ किरति । अनेन वा । 'कॄ विक्षेपे' (तु० प० से०) । 'कृतॄकृपेः कीटन्' (उ० ४।१८५) ॥ (२) ॥*॥ द्वे **'किरीटस्य'** ॥

चूडामणिः शिरोरत्नम्

चूडेति ॥ चूडाया मणिः । **'चूडामणिः** काकचिंचाफले मूर्धमणावपि' इति हैमः ॥ (१) ॥*॥ शिरसो रत्नम् ॥ (२) ॥*॥ द्वे **'शिरोमणेः'** ॥

तरलो हारमध्यगः ॥ १०२ ॥

तेति ॥ **'तरस्तु** तरणे पुंसि' (इति मेदिनी) । तरं लाति । 'आतोऽनुप–' (३।२।३) इति कः । **'तरलं** चञ्चले त्रिङ्गे भास्वरेऽपि त्रिलिङ्गकम् । हारमध्यमणौ पुंसि यवागूसुरयोः स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ हारस्य मध्यं हारमध्यं गच्छति । 'अन्येष्वपि–' (वा० ३।३।४८) इति डः ॥*॥ एकम् **'हारमध्यमणेः'** ॥

बालपाश्या पारितथ्या

बेति ॥ बालपाशे केशसमूहे साधुः । 'तत्र साधुः' (४।४।९८) इति यत् । बालेषु पाश्या पाशसमूहो वा ॥ (१) ॥*॥ परितस्तथाभूताः परितथा एव । चतुर्वर्णादित्वात् (वा० ५।१।१२४) स्वार्थे ष्यञ् ॥ (२) ॥*॥ द्वे **'सीमन्तस्थितायाः स्वर्णादिपट्टिकायाः'** । स्वामी तु—प्रथमं बालबन्धनमुक्तावलीनाम्—इत्याह ॥

पत्रपाश्या ललाटिका ।

पत्रेति ॥ पाशसमूहः पाश्या पत्रमिव पाश्या ॥ (१) ॥*॥ ललाटस्यालंकारः । 'कर्णललाटात्कनलंकारे' (४।३।६५) ॥ (२) ॥*॥ द्वे **'ललाटाभरणस्य'** ॥

कर्णिका तालपत्रं स्यात्

केति ॥ कर्णस्यालंकारः । प्राग्वत् । **'कर्णिका** कर्णभूषणे । बीजकोशे सरोजस्य करमध्याङ्गुलावपि । कुट्टिन्यां हस्तिहस्ताग्रे' इति हैमः ॥ (१) ॥*॥ तालस्य पत्रम् । **'तालपत्रं** तु कुण्डले । स्यात्तालपत्री रण्डायाम्' इति हैमः ॥ (२) ॥*॥ **'ताटङ्कः'** अप्यत्र । सुवर्णरचितस्यापीदमेव नाम ॥*॥ द्वे **'कर्णाभरणस्य'** ॥

कुण्डलं कर्णवेष्टनम् ॥ १०३ ॥

कुण्डेति ॥ कुण्डते, कुण्ड्यते, वा । 'कुडि दाहे' (भ्वा० आ० से०) । 'कुडि रक्षायाम्' (चु० प० से०) वा । वृषादित्वात् (उ० १।१०६) कलच् । कुण्डं कुण्डलाकारं लाति वा । **'कुण्डलं** कर्णभूषायां पाशेऽपि वलयेऽपि च । काञ्चनद्रुगुडूच्योः स्त्री' (इति मेदिनी) ॥ (१) ॥*॥ कर्णस्य वेष्टनम् । वेष्ट्यतेऽनेन । 'वेष्ट वेष्टने' (भ्वा० आ० से०) । ल्युट् (३।३।११७) ॥ (२) ॥*॥ द्वे **'कुण्डलस्य'** ॥

ग्रैवेयकं कण्ठभूषा

ग्रैवेयेति ॥ ग्रीवायां भवम् । 'कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु' (४।२।९६) इति ढकञ् ॥*॥ –'ग्रीवाया अण्

च' (४।३।५७) इति ढञि **'ग्रैवेयम्'** अपि—इति मुकुटः ॥ (१) ॥*॥ भूष्यतेऽनया । 'भूष अलंकारे' (भ्वा० प० से०) । 'गुरोश्च–' (३।३।१०३) इत्यः । कण्ठस्य भूषा ॥ (२) ॥*॥ द्वे **'ग्रीवाभरणस्य' 'कण्ठा'** इति ख्यातस्य ॥

लम्बनं स्याल्लुलन्तिका ।

लेति ॥ लम्बते । 'लबि अवस्रंसने' (भ्वा० आ० से०) । ल्युः (३।१।१३४) ॥ (१) ॥*॥ लडति । 'लड विलासे' (भ्वा० प० से०) । 'लटः शतृ–' (३।२।१२४) 'उगितश्च' (४।१।६) इति ङीप् । 'शप्श्यनोर्नित्यम्' (७।१।८१) इति नुम् । डलयोरेकत्वम् । ललन्त्येव । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ द्वे **'किंचिल्लम्बमानकण्ठभूषणस्य'** ॥

स्वर्णैः प्रालम्बिका

स्वेति ॥ सैव ललन्तिका सुवर्णैः कृता प्रालम्बते । ण्वुल् (३।१।१३३) ॥ (१) ॥*॥ एकं **'लम्बकण्ठिकायाः'** ॥

अथोरःसूत्रिका मौक्तिकैः कृता ॥ १०४ ॥

अथेति ॥ सैव ललन्तिका मुक्ताभिः कृता ॥*॥ उरसः सूत्रमिव । 'इवे–' (५।३।९६) इति कन् ॥ (१) ॥*॥ एकम् **'मौक्तिकमालायाः'** ॥

हारो मुक्तावली

हेति ॥ ह्रियते मनोऽनेन । ह्रियते वा । घञ् (३।३।१९) यद्वा हारयति मनः । स्वार्थण्यन्तादच् (३।१।१३४) ॥ **'हारो** मुक्तासरे युधि' (इति मेदिनी) ॥ (१) ॥*॥ मुक्तानामावली दीर्घा पङ्क्तिः ॥ (२) ॥*॥ भिदादिपाठात् (३।३।१०६) अङि हारा । **'हारा** मुक्तावली हारः' इति रभसः ॥*॥ द्वे **'मुक्ताहारस्य'** ॥

देवच्छन्दोऽसौ शतयष्टिकः ।

देवेति ॥ 'हारः' शतयष्टिकः सन् । देवैश्छन्द्यते । 'छदि संवरणे' (चु० प० से०) । घञ् (३।३।१९) ॥ (१) ॥*॥ **'यष्टिर्हारलताशस्त्रभेदयोः'** इति विश्वः । **'यष्टिर्लता सरः सरिः'** इत्यनेकार्थमाधवी ॥*॥ एकं **'शतलतिकहारस्य'** ॥

हारभेदा यष्टिभेदाद्युत्सगुत्सार्धगोस्तनाः ॥ १०५ ॥
अर्धहारो माणवक एकावल्येकयष्टिका ।
सैव नक्षत्रमाला स्यात्सप्तविंशतिमौक्तिकैः ॥ १०६ ॥

हारेति ॥ यष्टीनां भेदात् हारभेदाः स्युः । गुध्यते । 'गुध परिवेष्टने' (दि० प० से०) । 'उन्दिगुधिकुषिभ्यश्च' (उ० ३।६८) इति सः कित् । बाहुलकाद्धस्वभावो न । 'गुत्सः स्यात्स्तबके स्तम्बे हारभिद्ग्रन्थिपर्णयोः' इति दन्त्यान्तेषु मेदिनी ॥*॥ छान्तोऽपि । 'स्याद् **गुच्छः** स्तबके स्तम्बे हारभेदकलापयोः' (इति मेदिनी) । गूयते । 'गुङ् शब्दे' (भ्वा० आ० अ०) । बाहुलकाच्छक् । 'द्वात्रिंशल्लतिको **गुच्छः**' ॥ (१) ॥*॥ **'गुच्छार्धस्तत्त्वसंख्यकः'** । गुत्स्यः गुत्सार्धः । समप्रविभागाभावात् पुंस्त्वम् । चतुर्विंशतियष्टिको हारो गुत्सार्धः ॥ (१) ॥*॥ 'चतुस्त्रिंशल्लतो **हारश्चतुःसरिच्च गोस्तनः**' । गोः स्तन इव ॥ (१) ॥*॥ 'विंशतियष्टिको हारो माणवः परिकीर्तितः' । 'अर्धेनैकदेशेन कृतो हारः । शाकपार्थिवादिः (वा० २।१।७२) ॥ (१) ॥*॥ माणवो बालः । स इव । यावादित्वात् (५।४।२९) कन् । **'माणवको** हारभेदे बाले कुपुरुषे वटौ' (इति मेदिनी) ॥ (१) ॥*॥ एकसरा । एका चासावावली च ॥ (१) ॥*॥ एकावृत्त्येव सप्तविंशतिमुक्ताभिः कृता । नक्षत्राणां मालेव ॥ (१) ॥*॥ प्रत्येकमेकैकम् ॥

आवापकः पारिहार्यः कटको वलयोऽस्त्रियाम् ।

आवेति ॥ आ उप्यते । 'डुवप्' (भ्वा० उ० अ०) । कर्मणि घञ् (३।३।११९) । स्वार्थे (ज्ञापि० ५।४।५) संज्ञायां (५।३।७५) वा कन् ॥ (१) ॥*॥ परिहियते 'ऋहलोर्ण्यत्' (३।१।१२४) । परिहार्य एव । प्रज्ञादृण् (५।४।३८) । यद्वा घञन्ताच्चतुर्वर्णादित्वात् (वा० ५।१।१२०) स्वार्थे ष्यञ् । (२) ॥*॥ कटति कट्यते वा । 'कटे वर्षावरणयोः' (भ्वा० प० से०) कुन् (उ० २।३२) । **'कटकोऽस्त्री** नितम्बेऽद्रेर्दन्तिनां दन्तमण्डने । सामुद्रलवणे राजधानीवलययोरपि' (इति मेदिनी) ॥ (३) ॥*॥ वलते । 'वल संवरणे' (भ्वा० आ० से०) । 'वलिमलितनिभ्यः कयन्' (उ० ४।९९) ॥ **'वलयः** कण्ठरोगे ना कङ्कणे पुंनपुंसकम्' (इति मेदिनी) ॥ (४) ॥*॥ चत्वारि **'प्रकोष्ठाभरणस्य'** ॥

केयूरमङ्गदं तुल्ये

कयेति ॥ के बाहुशिरसि यौति । 'यु मिश्रणे' (अ० प० से०) । खर्जादित्वात् (४।९०) ऊरः । बाहुलकाट्टिलोपः । 'हलदन्तात्–' (६।२।९) इति सप्तम्या अलुक् ॥ (१) ॥*॥ अङ्गं दयते, दायति, द्यति वा । 'देङ् पालने' (भ्वा० आ० अ०) । 'दैप् शोधने' (भ्वा० प० अ०) वा । 'दो अवखण्डने' (दि० प० अ०) वा । 'आतोऽनुप–' (३।२।३) इति कः । **'अङ्गदः** कपिभेदे ना केयूरे तु नपुंसकम् । **अङ्गदा** याम्यदिग्दन्तिहस्तिन्यामपि योषिति' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'प्रगण्डभूषणस्य'** ॥

अङ्गुलीयकमूर्मिका ॥ १०७ ॥

अङ्गुलीति ॥ अङ्गुलौ भवम् । 'जिह्वामूलाङ्गुलेश्छः' (४।

१—'सद्यैवेयस्त्वमसि फणिना' इति राजशेखरः इति मुकुटः ॥ २—हैमे तु 'अर्धहारश्चतुःषष्टिर्गुच्छमाणवमन्दराः । अपि गोस्तनगोपुच्छावर्धमर्धं यथोत्तरम्' इत्युक्तम् । अन्ये तु 'चतुःषष्टिलतो हारोऽथाष्टहीना यथोत्तरम् । रश्मिकलापौ माणवकोऽर्धहारोऽर्धगुच्छकः । कलापच्छन्दो मन्दरश्च गुच्छः सप्ततियष्टिकः' इत्याहुः ॥

३।६२)। स्वार्थे कन् (ज्ञापि० ५।४।५) ॥—कपिलकादित्वात् (वा० ८।२।१८) **'अङ्गुलीयकम्'**—इति मुकुटः ॥ तन्न । तत्र रेफानुवादेन लविधानात् । लानुवादेन रेफविधानाभावात् । 'वालमूल–' (वा० ८।२।१८) इति वक्तुं शक्यत्वात् ॥ (१) ॥*॥ ऊर्मिरिव । 'इवे–' (५।३।९६) इति कन् । ऊर्मिं प्रकाशं कायति वा ॥ **'ऊर्मिः** स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभङ्गयोः' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'अङ्गुलीभूषणस्य'** ॥

साक्षराङ्गुलिमुद्रा सा

सेति ॥ सा ऊर्मिका । अक्षरैः सहिता चेत् । अङ्गुल्यां मुदं राति । 'आतः' (३।२।३) इति कः । मोदते वा । 'मुद हर्षे' (भ्वा० आ० से०) । 'स्फायितञ्चि–' (उ० २।१३) इति रक् । अङ्गुल्या मुद्रा ॥ (१) ॥*॥ एकम् ॥

कङ्कणं करभूषणम् ।

कङ्केति ॥ कं शुभं कणति । 'कण शब्दे' (भ्वा० प० से०) । अच् (३।१।१३४) । कङ्कते वा । 'कक लौल्ये' (भ्वा० आ० से०) । 'बहुलमन्यत्रापि' (उ० २।७८) इति 'अनुदात्तेतश्च हलादेः' (३।२।१४९) इति वा युच् । पृषोदरादित्वात् (६।३।१०९) णत्वम् । **'कङ्कणं** करभूषायां सूत्रमण्डनयोरपि' (इति मेदिनी) ॥ (१) ॥*॥ करं भूषयति । करो भूष्यतेऽनेन वा । ल्युट् (३।३।११३,११७) । 'क्लीबं मण्डने सूत्रे **कङ्कणं करभूषणम्**' इति रभसः । 'हस्तमण्डनसूत्रे स्यात् **कङ्कणो** ना **प्रतीसरः**' इति रत्नकोषः ॥ (२) ॥*॥ द्वे **'मणिबन्धभूषणस्य'** ॥

स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा १०८ क्लीबे सारसनं च

स्त्रीति ॥ मखं गतिं लाति । कः (३।२।३) । पृषोदरादिः (६।३।१०९) ।—मीयते । 'डुमिञ् प्रक्षेपणे' (स्वा० उ० अ०) । 'कलम्बादयश्च' इति साधुः—इति मुकुटश्चिन्त्यः । तत्सूत्रस्योज्ज्वलदत्तादिष्वदर्शनात् । **'मेखला**द्रिनितम्बे स्याद्रशनाखङ्गबन्धयोः' इति हैमः ॥ (१) ॥*॥ काञ्चते । 'काचि दीप्तिबन्धनयोः' (भ्वा० आ० से०) । इन् (उ० ४।११८) । वा ङीष् (ग० ४।१।४५) ।—'अन्येभ्योऽपि' इति दीर्घः—इति मुकुटश्चिन्त्यः । धातोरेकदीर्घवत्त्वात् । 'अन्येभ्योऽपि' इत्येतादृशस्य दीर्घविधायकस्याभावात् 'अन्येषामपि' (६।३।१३७) इति वक्तुं युक्तत्वाच्च । **'काञ्ची** स्यान्मेखलादान्नि प्रभेदे नगरस्य च' (इति मेदिनी) ॥ (२) ॥*॥

१—पुंलिङ्गोऽप्ययम् 'अयं मैथिल्यभिज्ञानं काकुत्स्थस्याङ्गुरीयकः' इति भट्टिप्रयोगात्—इति मुकुटः ॥ २—'काञ्चीगुणस्थानमनिन्दितायाः' इति कुमारः 'काञ्चिदामपिहितैकतरोरुः' इति माघः—इति मुकुटः ॥

सपति । 'षप समवाये' (भ्वा० प० से०) । बाहुलकात्तन् स्वार्थे (ज्ञापि० ५।४।५) कन् । सप्तभिरनेकाभिः किङ्किणीभिः, सप्त स्वरान् वा कायति । 'आतः' (३।१।१३६,२।३) इति कः । गौरादिः (४।१।४१) ।—कायन्ति अस्याम् । मूलविभुजादित्वात् (वा० ३।२।५) कः—इति मुकुटश्चिन्त्यः । अधिकरणे तत्प्रवृत्तेरसंभवात् ॥ (३) ॥*॥ अश्यते 'अशूङ् व्याप्तौ संघाते च' (स्वा० आ० से०) । अश्नाति । 'अश भोजने' (क्र्या० प० से०) । 'अशे रश् च' (उ० २।७५) इति यू रशादेशः । यद्वा, रशति । 'रश शब्दे' सौत्रः । 'बहुलमन्यत्रापि' (उ० २।७८) इति युच् । तालव्यमध्या ॥*॥ दन्त्यमध्यापि । 'रस शब्दे' (भ्वा० प० से०) । 'रस आस्वादने' (चु० उ० से०) । 'बहुलम्' (उ० २।७८) इति युच् । 'ण्यासश्रन्थ–' (३।३।१०७) इति वा युच् । 'तालव्या अपि दन्त्याश्च शम्बशम्बलशूकराः । **रशना**पि च जिह्वायाम्' । **'रसनं** निखने स्वादे **रसना** काञ्चिजिह्वयोः' इत्यजयधरणी । **'रसनं** स्वदने ध्याने **रसना** काञ्चिजिह्वयोः । रसनं चापि रास्नायाम्' इति विश्वप्रकाशः । एवमुभयमुभयत्र साधु ॥ (४) ॥*॥ सारमुत्कृष्टं सनमस्य । 'षण संभक्तौ' (भ्वा० प० से०) । घः (३।३।११८) । सहारसनेनाल्पशब्देन वा । 'मेखलायां **सारसन**मुरस्त्रे च तनुत्रिणाम्' इति दन्त्यादौ रभसः ॥ (५) ॥*॥ पञ्च **'स्त्रीकटिभूषणस्य'** ॥ 'स्त्री' इत्यविवक्षितम् । पुंस्कटिभूषणेऽति ।—स्त्रीकट्यां वस्त्रग्रन्थने—इति स्वामी । '–एका यष्टिर्भवेत्**काञ्ची मेखला** त्वष्टयष्टिकाः । **रसना** षोडश ज्ञेयाः **कलापः** पञ्चविंशकः'—इति भेदस्त्विह न विवक्षितः ॥

अथ पुंस्कट्यां शृङ्खलं त्रिषु ।

अथेति ॥ पुंसां कट्यां चेत् काञ्ची । शृङ्खैः खलति । 'खल संचये' (भ्वा० प० से०) । अच् (३।१।१३४) । पृषोदरादि० (६।३।१०९) । **'शृङ्खलं** पुंस्कटीकाञ्च्यां लोहरज्जौ च बन्धने' (इति हैमः) ॥ (१) ॥*॥ एकम् **'पुरुषकटीस्थकाञ्च्याः'** ॥

पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम् ॥१०९॥

पेति ॥ पादस्याङ्गदमिव । यद्वा पाद एवाङ्गम् । पादाङ्गं द्यति, दायति, दयते, वा । 'दो अवखण्डने' (दि० प० अ०) । 'दैप् शोधने' (भ्वा० प० अ०) । 'देङ् पालने' (भ्वा० आ० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥ (१) ॥*॥ तुलां तुलया वा कोटयति । 'कुट प्रतापने' चुरादिः । 'अच इः' (उ० ४।१३९) । तुलाकारं कोटिरग्रमस्य । **'तुलाकोटिर्मानभेदेऽम्बुदे स्याच्चूपुरेऽपि च'** इति हैमः ॥ (२) ॥*॥

१—'क्षुभितसिन्धुमनीरशनैः शनैः' इति भारवियमकात्—इति मुकुटः ॥ २—'रसनाबन्धो रतिकलहेषु, न दानानुमतिषु' इति वासवदत्ताश्लेषात्—इति मुकुटः ॥

मज्जति । 'मजि ध्वनौ' सौत्रः । बाहुलकादीरन् ।—'गम्भीरादयश्च' इतीरन्—इति मुकुटोऽपाणिनीयो गम्भीरादिगणाभावात् ॥ (३) ॥*॥ 'नुवनम्' नूयते, वा । 'णू स्तुतौ' (तु० प० से०) । संपदादिः (वा० ३।३।१०८) । नुवि पुरति । 'पुर अग्रगमने' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । **'मञ्जीरोऽस्त्री स नूपुरः'** इति रभसः ॥ (४) ॥*॥ चत्वारि **'नूपुरस्य'** ॥

हंसकः पादकटकः

हंसेति ॥ हंस इव कायति । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । हंस इव । 'इवे–' (५।३।९६) इति कन् वा ॥ (१) ॥*॥ पादस्य कटको वलयः ॥ (२) ॥*॥ द्वे **'नूपुरस्य'** ॥—षडपि पर्यायाः—इत्येके ॥

किंकिणी क्षुद्रघण्टिका ।

किमिति ॥ किंचित् किणं करोति । किणशब्दात् 'तत्करोति' (वा० ३।१।२६) इति ण्यन्तादच् (३।१।१३४) । गौरादिः (४।१।४१) ॥*॥—**कङ्कणी**—इति स्वामी ॥ कङ्कनम् । 'ककि गतौ' (भ्वा० प० से०) । घञ् (३।३।१८) । कङ्के गतावणति । 'अण शब्दे' (भ्वा० प० से०) । अच् ३।१।१३४) । गौरादिः (४।१।४१) शकन्ध्वादिः (वा० ६।१।९४) । यद्वा कं सुखं कणति । 'कण शब्दे' (भ्वा० प० से०) । अच् (३।१।१३४) । **'कङ्कणः** स्यात्प्रतिसरः **कङ्कणी** क्षुद्रघण्टिका' इति भागुरिः ॥ (१) ॥*॥ घण्टेव । 'इवे–' (५।३।९६) इति कन् । यद्वा घण्टति, घण्टयति, वा 'घटि दीप्तौ' (चु० उ० से०) । ण्वुल् (३।१।१३३) । क्षुद्रा चासौ घण्टिका च ॥ (२) ॥*॥ द्वे **'क्षुद्रघण्टिकायाः'** । **'घुघुराख्यस्य'** ॥

त्वक्फलकृमिरोमाणि वस्त्रयोनिः

त्वेति ॥ त्वगादि । वस्त्रस्य योनिः कारणम् ॥ (१) ॥*॥ एकम् **'वस्त्रयोनेः'** ॥

दश त्रिषु ॥ ११० ॥

देति ॥ वक्ष्यमाणानि तन्त्रकान्तानि दश ॥

वाल्कं क्षौमादि

वेति ॥ वल्कस्य विकारः । 'तस्य विकारः' (४।३।१३४) इत्यण् ॥ (१) ॥*॥ क्षुमाया विकारः । प्राग्वत् ॥ क्षौमादि वाल्कम् । **'क्षौमं** वल्कलजांशुके । शणजेऽतसीजे' (इति मेदिनी) । **'क्षौमवस्त्रस्य'** एकम् ॥

फालं तु कार्पासं बादरं च तत् ।

फेति ॥ फलस्य विकारः । 'तस्य विकारः' (४।३।१३४) इत्यण् । **'फालं** तु वसने **फाल** उत्क्षुतौ' (इति हैमः) 'क्लीबं सीरोपकरणे' (इति मेदिनी) 'पुंसि शंकरसीरिणोः' ॥ (१) ॥*॥ कर्पास्या बदरायाश्च विकारः फलम् । 'अवयवे च–' (४।३।१३५) इत्यण् । तस्य 'फले लुक्' (४।३।१६३) । कार्पासस्य बदरस्य च विकारः । प्राग्वदण् (४।३।१३४) ॥ (२) ॥*॥ (३) ॥*॥ त्रीणि **'कार्पासवस्त्रस्य'** ॥

कौशेयं कृमिकोशोत्थम्

काविति ॥ कोशे संभूतः । 'कोशाड्ढञ्' (४।३।४२) ॥ (१) ॥*॥ एकम् **'पीताम्बरादेः'** ॥

राङ्कवं मृगरोमजम् ॥ १११ ॥

रेति ॥ रङ्कौ भवम् । 'रङ्कोरमनुष्येऽण् च' (४।२।१००) इत्यण् । 'मृगरोमजम्' मृगशब्देन पशुमात्रं ग्राह्यम् । तेन कम्बलाद्यपि राङ्कवम् ॥ (१) ॥*॥ एकम् **'ऊर्णादेः'** ॥

अनाहतं निष्प्रवाणि तन्त्रकं च नवाम्बरे ।

अनेति ॥ न आहतम् ॥ (१) ॥*॥ प्रोयतेऽनया । 'वेञ् तन्तुसंताने' (भ्वा० उ० अ०) । 'करणा–' (३।३।११७) इति ल्युट् । निर्गता प्रवाणी तन्तुवायशलाकास्मात् । 'निष्प्रवाणिश्च' (५।४।१६०) इति साधु ॥ (२) ॥*॥ तन्त्रादचिरापहृतम् । 'तन्त्रादचिरापहृते' (५।२।७०) इति साधु ॥ (३) ॥*॥ नवं च तदम्बरं च ॥ (४) ॥*॥ चत्वारि **'छेदभोगक्षालनरहितवस्त्रस्य'** ॥

तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगम् ॥ ११२ ॥

तदिति ॥ धौतयोः प्रक्षालितयोर्वस्त्रयोर्युगम् । उद्गम्यतेऽभिलष्यते । 'गम्ल गतौ' (भ्वा० प० अ०) । अनीयर् (३।१।९६) ॥ (१) ॥*॥ 'युगम्' इत्यविवक्षितम् ॥*॥ एकम् **'धौतवस्त्रयुगस्य'** ॥

पत्रोर्णं धौतकौशेयम्

पेति ॥ पत्रेषु कृतोर्णा पत्रोर्णास्त्यत्र । अर्शआद्यच् (५।२।१२७) । 'पत्रोर्णं धौतकौशेये **पत्रोर्णः** शोणकद्रुमे' इति हैमः ॥ (१) ॥*॥ धाव्यते स्म । 'धावु गतिशुद्ध्योः' (भ्वा० उ० से०) । क्तः (३।२।१०२) धौतं च तत्कौशेयं च ॥ (२) ॥*॥ द्वे **'धौतकौशेयस्य'** ।—प्रक्षालितकौशेयमेव पत्रोर्णाख्यम्—इत्यन्ये ॥

बहुमूल्यं महाधनम् ।

बेति ॥ बहु मूल्यमस्य ॥ (१) ॥*॥ महद् धनं मूल्यमस्य ॥ (२) ॥*॥ द्वे **'बहुमूल्यवस्तुनः'** ॥

क्षौमं दुकूलं स्यात्

क्षाविति ॥ क्षौति, क्षूयते, वा । 'टु क्षु शब्दे' (अ०

१—वाल्कक्षौमफालकार्पासबादरकौशेयराङ्कवानाहतनिष्प्रवाणितन्त्रकाणि—इति स्वामी ॥—वक्ष्यमाणानि क्षौमादिवर्जवाल्कफालादीनि निष्प्रवाण्यन्तानि दश त्रिषु त्रिलिङ्गानि । चकारादेकादश तन्त्रकम्, इति सुभूतिः—इति मुकुटः ॥

प० से०) । 'अर्तिस्तुसु–' (उ० १।१४०) इति मन् । **'क्षोमपट्टे दुकूलेऽस्त्री'** (इति मेदिनी) ॥*॥—क्षुमाया विकारः । क्षौमम्—इति स्वामी । पर्यायान्तराभिधानाय पुनरभिहितम् ॥ (१) ॥*॥ दुष्टं कूलति । 'कूल आवरणे' (भ्वा० प० से०) 'इगुपध–' (३।१।१३५) इति कः । पृषोदरादिः (६।३।१०९) ॥ (२) ॥*॥ द्वे **'पट्टवस्त्रस्य'** ॥

द्वे तु निवीतं प्रावृतं त्रिषु ॥ ११३ ॥

द्वे इति ॥ नि वीयते स्म । 'व्येञ् संवरणे' (भ्वा० उ० अ०) । क्तः (३।२।१०२) । संप्रसारणादि (६।१।१५) । (६।१।१०८) (६।४।२) ॥*॥—**निवृत्तम्**—इति स्वामी ॥ (१) ॥*॥ प्राव्रियते स्म 'वृञ् वरणे' (स्वा० उ० से०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'प्रावृतवस्त्रस्य'** ॥

स्त्रियां बहुत्वे वस्त्रस्य दशाः स्युर्वस्तयोर्द्वयोः ।

स्त्रीति ॥ दश्यते । 'दंश दशने' (भ्वा० प० अ०) भिदाद्यङ् (३।३।१०६) । **'दशा** वर्त्यामवस्थायां वस्त्रान्ते भूम्नि पुंस्त्रियोः' इति रभसः ॥ (१) ॥*॥ वस्यते । 'वस आच्छादने' (आ० आ० से०) । 'वस स्नेहनादौ' चुरादिः । चुराद्दीनां णिज्वा । 'वसेस्तिः' (उ० ४।१८०) । **'वस्तिर्द्वयोर्निरूहे नाभ्यधो भूम्नि दशासु च'** (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'वस्त्रान्तावयवानाम्'** ॥

दैर्घ्यमायाम आनाहः

दायिति ॥ दीर्घस्य भावः । 'गुण–' (५।१।१२४) इति ष्यञ् ॥ (१) ॥*॥ आयम्यतेऽनेन घञ् (३।३।१९) । आयमनं वा । आयाति वा । 'या प्रापणे' (अ० प० अ०) । 'अर्तिस्तुसु–' (उ० १।१४०) इति मन् ॥ (२) ॥*॥ आनह्यतेऽनेन । 'णह बन्धने' (दि० उ० अ०) घञ् (३।३।१९) ॥*॥ **'आरोहः'** इति क्वचित्पाठः । आरुह्यतेऽनेन । घञ् (३।३।१९) । **'आरोहस्त्ववरोहे च वरयोषित्कटावपि** । आरोहणे गजारोहे दीर्घत्वे च समुच्छ्रये' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **वस्त्रादेर्दैर्घ्यस्य** ॥

परिणाहो विशालता ॥ ११४ ॥

पेति ॥ परिणह्यतेऽनेन । घञ् (३।३।१९) ॥ (१) ॥*॥ विशालस्य भावः तल् (५।१।११९) ॥ (२) ॥*॥ द्वे **'विस्तारस्य' 'पनहा'** इति ख्यातस्य ॥

पटच्चरं जीर्णवस्त्रम्

पेति ॥ पटति । 'पट गतौ' (भ्वा० प० से०) । बाहुलकादत् । भूतपूर्वं पटत् । 'भूतपूर्वे चरट्' (५।३।५३) यद्वा 'पटत्' इत्यव्यक्तं शब्दं चरति करोति । अच् (३।१।१३४) । यद्वा पट इवाचरति । 'सर्वप्रातिपदिकेभ्यः क्विब्वा' (वा० ३।१) । शत्रन्ताच्चरट् (५।३।५३) ॥ (१) ॥*॥ जीर्णं च तद्वस्त्रं च ॥ (२) ॥*॥ द्वे **'जीर्णवस्त्रस्य'** ॥

समौ नक्तकर्पटौ ।

सेति ॥ नजते । 'ओ नजी व्रीडे' (तु० आ० से०) बाहुलकात्तन् । स्वार्थे कन् (ज्ञापि० ५।४।५) । नक्तं कं सुखमस्माद्वा । पृषोदरादित्वात् (६।३।१०९) मलोपः ॥*॥ क्वचित् **'लक्तकः'** इति पाठः । लक्ष्यते स्म । 'लक आस्वादने' ( ) । क्तः (३।२।१०२) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (१) ॥*॥ किरति । 'कॄ विक्षेपे' (तु० प० से०) । कृणाति । 'कॄ हिंसायाम्' (क्रया० प० से०) वा । करोति । 'डुकृञ्' (तु० उ० अ०) वा । विच् (३।२।७५) कर् चासौ पटश्च । यद्वा करस्य पटः । शकन्ध्वादिः (वा० ६।१।९४) ॥ (२) ॥*॥ द्वे **'प्रस्वेदादिमार्जनार्थहस्तस्थवस्त्रखण्डस्य'** । स्वामी तु—द्रवद्रव्यं येन पूयते तत्र रूढोऽयम्—इत्याह । मुकुटस्तु–मलिनत्वादिदुष्टजीर्णवस्त्रखण्डस्य ॥

वस्त्रमाच्छादनं वासश्चेलं वसनमंशुकम् ॥ ११५ ॥

वेति ॥ वस्यतेऽनेन । 'वस आच्छादने' (अ० आ० से०) । ष्ट्रन् (उ० ४।१५९) ॥ (१) ॥*॥ आच्छाद्यतेऽनेन ल्युट् (३।३।११७) ॥ (२) ॥*॥ वस्यतेऽनेन । 'वसेर्णित्' (उ० ४।११८) इत्सुन् ॥ (३) ॥*॥ चिल्यतेऽनेन । 'चिल वसने' (तु० प० से०) । घञ् (३।३।१९) । गौरादिः (४।१।४१) ।—'कल्पचेलट्–' (६।३।४३) इति टित्त्वनिपातनाद्वा ङीप् । **'चेलो** नीचेऽधमे त्रिषु । नपुंसकं तु वसने' । इति मेदिनी ॥ (४) ॥*॥ वस्यतेऽनेन । ल्युट् (३।३।११७) **'वसनं** छादने वस्त्रे' (इति मेदिनी) ॥ (५) ॥*॥ **'अंशुः** सूत्रादिसूक्ष्मांशे किरणे चण्डदीधितेः' (इति हैमः) । अंशून् कायति । कः (३।२।३) । यद्वा अंशुभिः काशते । 'काशृ दीप्तौ' (भ्वा० आ० से०) । अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः । **'अंशुकं** श्लक्ष्णवस्त्रे स्याद्वस्त्रमात्रोत्तरीययोः' (इति मेदिनी) ॥ (६) ॥*॥ **'पटोऽस्त्री कर्पटः शाटः सिचयप्रोतलक्तकाः'** इति रभसः ॥*॥ षट् **'वस्त्रस्य'** ॥

सुचेलकः पटोऽस्त्री

स्विति ॥ शोभनं चेलमेव । स्वार्थे कन् (ज्ञापि० ५।४।५) । स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपि, (५।) ॥ (१) ॥*॥ पटति । 'पट गतौ' (भ्वा० प० से०) । 'पट विस्तारे' (चु० उ० से०) वा । अच् (३।१।१३४) । यद्वा पट्यतेऽनेन । 'पट भासने' (चु० उ० से०) । 'खनो घ च' (३।३।१२१) इति घो घित्वादन्यस्मादपि । 'हलश्च' (३।३।१२१) इति घञि संज्ञापूर्वकत्वाद्वृद्ध्यभावः । 'क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते' ( ) इति घञ्विषये 'पुंसि–' (३।३।११८) इति घो वा—'घञर्थे कः' (वा० ३।३।५८)—इति मुकुटः । तन्न । परिगणनात् । **'पटश्चित्रपटे** वस्त्रेऽस्त्री, प्रियालद्रुमे

पुमान्' (इति मेदिनी) ।—'अस्त्री' इति चिन्त्यम् । द्वयोरदर्शनात्—इति स्वाम्येव चिन्त्यः । उत्तरभसमेदिन्योः 'अस्त्री' इति दर्शनात् ॥ (२) ॥*॥ द्वे **'शोभनवस्त्रस्य'** ॥

ना वराशिः स्थूलशाटकः ।

नेति ॥ वरं श्रेष्ठं वरणं वा अश्नुते । इन् (उ० ४।११८) । 'वराशिर्ना' इति तालव्यान्ते शाब्दिकः ॥*॥ **'वरासिः स्यात्खड्गवरे वरासिः** स्थूलशाटके' इति दन्त्यान्तेषु रभसः ॥ (१) ॥*॥ शटति । 'शट रुजादौ' (भ्वा० प० से०) । ण्वुल् (३।१।१३३) । स्थूलश्चासौ शाटकश्च ॥ (२) ॥*॥ 'वराशिर्ना' इत्यन्वयः ॥*॥ द्वे **'स्थूलपटस्य'** ।—चत्वार एकार्थाः—इत्येके ॥

निचोलः प्रच्छदपटः

नीति ॥ निचोल्यते । 'चुल समुच्छ्राये' चुरादिः । घञ् (३।३।१९) । यद्वा चोल्यते । 'चुड कृतौ' चुरादिः । घञ् (३।३।१९) डलयोरेकत्वम् । **'निचोलं** तु नपुंसकम्' इति रभसः ।—स्त्रियां **'निचोली'** इत्यपि—इति राजदेवः ॥*॥ निचुलोऽपि । **'निचुलस्तु** निचोले स्यादिज्जलाख्यमहीरुहे' (इति मेदिनी) ॥ (१) ॥*॥ प्रच्छदति । प्रच्छद्यते वा । 'छद संवरणे' (चु० उ० से०) । अच् (३।१।१३४) । घः (३।३।११८) वा प्रच्छाद्यतेऽनेन वा । चुरादिण्यन्तात् घः (३।३।१८) । 'छादेर्घे–' (६।४।९६) इति ह्रस्वः । प्रच्छदश्चासौ पटश्च ॥ (२) ॥*॥ द्वे **'डोलिकाद्यावरणपटस्य'** ।—स्त्रीपिधानपटस्य **'बुरका'** इति ख्यातस्य—इत्यन्ये ॥—येन तूलशय्यादि प्रच्छाद्यते तस्य—इति स्वामी ॥

समौ रल्लकम्बलौ ॥ ११६ ॥

सेति ॥ रमते । क्विप् । (३।२।१७८) । 'गमादीनां क्वौ' (वा० ६।४।४०) इति मलोपः । तुक् (६।१।७१) ॥ लाति । क्विप् (३।२।१७८) । रत् चासौ लश्च । स्वार्थे कन् (ज्ञापि० ५।४।५) । 'केऽणः' (७।४।१३) इति ह्रस्वः । यद्वा रमणम् । संपदादिः (वा० ३।३।१०८) । रत् क्रीडा लक्ष्यतेऽनेन । 'लक आस्वादने' ( ) घः (३।३।११८) । रतं लाति । कुन् (उ० २।३२) वा । **'रल्लकः** कम्बले स्मृतः । तथैव कम्बलमृगे' इति हैमः ॥ (१) ॥*॥ कम्बति, कम्ब्यते वा 'कम्ब गतौ' ( ) । वृषादित्वात् (उ० १।१०६) कलच् । संज्ञापूर्वकत्वान्नलोपो न । **'कम्बलः** किमिसास्नयोः । नागप्रभेदे प्रावारे वैकक्ष्ये **कम्बलं** जले' इति हैमः ॥ (२) ॥*॥ द्वे **'कम्बलस्य'** ॥

अन्तरीयोपसंव्यानपरिधानान्यधोंशुके ।

अन्तेति ॥ अन्तरे भवम् । गहादित्वात् (४।२।१३८) छः ॥ (१) ॥*॥ उपसंवीयतेऽनेन । 'व्येञ् संवरणे' (भ्वा० उ० से०) । ल्युट् (३।३।११७) ॥ (२) ॥*॥ परिधीयते । 'डुधाञ् धारणे' (जु० उ० अ०) । **'कृत्यल्युटः–'** (३।३।११३) इति ल्युट् ॥ (३) ॥*॥ अधोदेहभागस्यांशुकम् ॥ (४) ॥*॥ चत्वारि **'परिधानवस्त्रस्य'** ॥

द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा ॥ ११७ ॥
संव्यानमुत्तरीयं च

द्वाविति ॥ प्र वियतेऽनेन । 'वृञ् वरणे' (स्वा० उ० से०) । 'वृणोतेराच्छादने' (३।३।५४) इति घञ् । 'उपसर्गस्य घञि' (६।३।१२२) इति दीर्घः ॥ (१) ॥*॥ उत्तरे ऊर्ध्वभागे आसज्यते । 'षञ्ज सङ्गे' (भ्वा० प० अ०) । घञ् (३।३।१९) ॥ (२) ॥*॥ **'बृहती** वसनान्तरे' (इति मेदिनी) ॥ बृहत्येव । 'बृहत्या आच्छादने' (५।४।६) इति कन् ॥ (३) ॥*॥ संवीयतेऽनेन । ल्युट् (३।३।११७) । **'संव्यानं** छदनेऽशुके' इति विश्वमेदिन्यौ ॥ (४) ॥*॥ उत्तरस्मिन्देहभागे भवम् । गहादित्वात् (४।२।१३८) छः ॥ (५) ॥*॥ पञ्च **'उपरिवस्त्रस्य'** ॥

चोलकूर्पासकौ स्त्रियाः[1] ।

चोलेति ॥ चोल्यतेऽनेन । 'चुल समुच्छ्राये' (चु० प० से०) अच् (३।३।५६) । घः (३।३।११८) वा । अल्पश्चोलः । गौरादिः (४।१।४१) । चोली ॥ (१) ॥*॥ **'कूर्परः** स्यात्कफोणौ च जानुन्यपि च पुंस्ययम्' (इति मेदिनी) । कूर्परेऽस्यते कूर्परोऽस्यतेऽत्र वा । 'असु क्षेपणे' (दि० प० से०) । कूर्परे आस्ते वा । 'आस उपवेशने' (अ० आ० से०) । घञ् (३।३।१९) । अच् (३।१।१३४) वा । पृषोदरादिः (६।३।१०९) । स्वार्थे कन् (ज्ञापि० ५।४।५) । **'कूर्पास**स्त्वर्धचोलकः' इति हारावली ॥ (१) ॥*॥—आप्रपदीनकञ्चुकस्य, **'स्त्रीणां कञ्चुलिकाख्यस्य'** द्वे—इति स्वामी ॥

नीशारः स्यात्प्रावरणे हिमानिलनिवारणे ॥ ११८ ॥

नीति ॥ नितरां शीर्यते हिमानिलावत्र । अनेन वा । 'शॄ हिंसायाम्' (क्र्या० प० से०) । 'शॄ वायुवर्णनिवृतेषु' (वा० ३।३।२१) इति घञ् । 'उपसर्गस्य घञि' (६।३।१२२) इति दीर्घः ॥ (१) ॥*॥ एकम् **'प्रावरणस्य'** ॥

अर्धोरुकं वरस्त्रीणां स्याच्चण्डातकमंशुकम् ।

अर्धेति ॥ 'ऊरोरर्धम्' । 'अर्धं नपुंसकम्' (२।२।२) इति समासः । अर्धोरौ काशते । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः ॥*॥ चण्डां कोपनां वरस्त्रियमतति । कुन् (उ० २।३२) । 'अर्धोरुकं वरस्त्रीणां वासश्चण्डातकः स्मृतः' इति पुंस्काण्डे बोपालितात्पुंलिङ्गोऽपि ॥ (१) ॥*॥ एकं **'लहंगा'** इति ख्यातस्य ॥

१—'स्त्रियाः' इति विशेषेणोक्तम् । पुंसोऽप्येतावुपमानादिति सुभूतिः । 'द्वे स्त्रीपुंसकंचुलिकायाः'—इति मुकुटः ॥

स्याच्चिष्वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हि यत् ॥ ११९ ॥

स्यादिति ॥ आप्रपदं प्राप्नोति । 'आप्रपदं प्राप्नोति' (५।२।८) ॥ (१) ॥*॥ यदाप्रपदं प्राप्नोति तदाप्रपदीनम् ॥*॥ एकं **'पादाग्रपर्यन्तलम्बमानवस्त्रस्य'** ॥

अस्त्री वितानमुल्लोचः

अस्त्रीति ॥ वितन्यते । घञ् (३।३।१९) । **'वितानो** यज्ञ उल्लोचे विस्तारे पुंनपुंसकम् । क्लीबं वृत्तविशेषे स्त्रिलिङ्गो मन्दतुच्छयोः' (इति मेदिनी) ॥ (१) ॥*॥ ऊर्ध्वं लोचति । 'लोचृ भासने' (चु० उ० से०) । ऊर्ध्वं लोच्यते । 'लोचृ दर्शने' (भ्वा० आ० से०) वा । अच् (३।१।१३४) । घञ् (३।३।१९) वा ॥ कुत्वं तु 'निष्ठायामनिटः' (वा० ७।३।५३) इति वचनादस्य तु तत्र सेट्त्वात् ॥ (२) ॥*॥ द्वे **'वितानस्य' 'चंदवा'** इति ख्यातस्य ॥

दूष्याद्यं वस्त्रवेश्मनि ।

द्विति ॥ दूष्यते । 'दुष वैकृत्ये' (दि० प० अ०) । ण्यन्तात् 'अचो यत्' (३।१।९७) । 'दोषो णौ' (६।४।९०) इत्यूः । **'दूष्यं** त्रिषु दूषणीये क्लीबं वस्त्रे च तद्गृहे' (इति मेदिनी) ॥ (१) ॥*॥ आद्येन कुटरपटकुटीपटवासादिग्रहः । एकं **'वस्त्रगेहस्य'** ॥

प्रतिसीरा जवनिका स्यात्तिरस्करिणी च सा ॥ १२० ॥

प्रतीति ॥ प्रति सिनोति । प्रतिसीयते । वा । 'षिञ् बन्धने' (स्वा० उ० अ०) । 'शुसिचिमीनां दीर्घश्च' (उ० २।२६) इति रक् ॥ (१) ॥*॥ जवत्यस्याम् । 'जुः' सौत्रो गतौ वेगे च । ल्युट् (३।३।११७) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥*॥ **'यमनिका'** इति वा पाठः । यमयति । 'यम उपरमे' (भ्वा० प० अ०) । ल्युट् (३।३।११७) । कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ तिरस्करोति । अद्यादित्वात् (३।१।१३४) णिनिः । निपातनाद्ह्रस्वाभावः । संज्ञापूर्वकत्वाद्वा ॥*॥ तिरस्क्रियतेऽनया । ल्युट् (३।१।११७) । **'तिरस्करणी'** ॥ (३) ॥*॥ त्रीणि **'व्यवधानपट्यायाः' 'कनात'** इति ख्यातायाः ॥

क्वचित् 'पर्यङ्किका परिकरः पर्यङ्कश्चावसक्थिका । अञ्चलं वेंशुकान्ते स्यान्नीवी सारसनश्च यः' ॥

परिकर्माङ्गसंस्कारः

पेति ॥ परि मलवर्जनार्था क्रिया परिकर्म स्नानोद्वर्तनादि ॥*॥ **'प्रतिकर्म'** इति क्वचित्पाठः ॥ (१) ॥*॥ अङ्गं संस्क्रियतेऽनेन । घञ् (३।३।१९) ॥ (२) ॥*॥ द्वे **'शरीरशोभाधायककर्मणः'** ॥

स्यान्मार्ष्टिर्मार्जना मृजा ।

स्यादिति ॥ मार्जनम् । 'मृजू शौचालंकरणयोः' चुरादिः । गुणबादित्वात् (वा० ३।३।९४) क्तिन् । 'तितुत्र–' (७।२।९) इति नेट् । णिलोपः (६।४।५१) ।—बाहुलकात्तिः—इत्यन्ये ॥ (१) ॥*॥ 'ण्यासश्रन्थो युच्' (३।३।१०७) । **'मार्जनो** लोध्रशाखिनि । **मार्जनं** शुद्धिकरणे **मार्जना** मुरजध्वनौ' इति हैमः ॥ (२) ॥*॥ भिदाद्यङ् (३।३।१०४) ॥ (३) ॥*॥ त्रीणि **'प्रोञ्छनादिनाङ्गनिर्मलीकरणस्य'** ॥

उद्वर्तनोत्सादने द्वे समे

उद्वेति ॥ उद्वर्त्यतेऽनेन । 'वृतु वर्तने' (भ्वा०आ०से०) । ण्यन्तः । ल्युट् (३।३।११७) ॥ (१) ॥*॥ उत्साद्यतेऽनेन । 'षदॢ विशरणादौ' (तु० प० अ०) । ण्यन्तः । ल्युट् (३।३।११७) । **'उत्सादनं** समुल्लेखोद्वर्तनोद्वाहनेषु च' इति हैममेदिन्यौ ॥ (२) ॥*॥ द्वे **'उद्वर्तनद्रव्येणाङ्गनिर्मलीकरणस्य'** ॥

आप्लाव आप्लवः ॥ १२१ ॥

स्नानम्

आप्लेति ॥ आप्लवनम् । 'प्लुङ् गतौ' (भ्वा० आ० से०) । 'विभाषाङि रुप्लुवोः' (३।३।५०) इति वा घञ् ॥ (१) ॥*॥ पक्षे 'ऋदोरप्' (३।३।५७) ॥ (२) ॥*॥ 'ष्णा शौचे' (अ० प० अ०) । भावे ल्युट् (३।३।११५) ॥ (३) ॥*॥ त्रीणि **'स्नानस्य'** ॥

चर्चा तु चार्चिक्यं स्यासकः

चेति ॥ चर्चनम् । 'चर्च अध्ययने' (चु० उ० से०) । 'चिन्तिपूजिकथि–' (३।३।१०५) इत्यङ् । **'चर्चा** स्याच्चर्ममुण्डायां चिन्तास्यासकयोरपि' (इति हैमः) ॥ (१) ॥*॥ 'धात्वर्थनिर्देशे ण्वुल्' (वा० ३।३।१०८) । **'चार्चिका'** । ततः स्वार्थे ष्यञ् (वा० ५।१।१२४) ॥ (२) ॥*॥ तिष्ठति । 'ष्ठा गतिनिवृत्तौ' (भ्वा० प० से०) । बाहुलकात्सः । स्वार्थे कन् (ज्ञापि० ५।४।५) । **'स्यासकः** पुंसि चार्चिक्ये जलादेरपि बुद्बुदे' इति मेदिनी ॥ (३) ॥*॥ त्रीणि **'चन्दनादिना देहविलेपनस्य'** ॥

अथ प्रबोधनम् ।

अनुबोधः

अथेति ॥ प्रबुद्धिः । 'बुध अवगमने' (दि० आ० अ०) । भावे ल्युट् (३।३।११५) ॥ (१) ॥*॥ अनुपूर्वाद्भावे घञ् ॥ (२) ॥*॥ द्वे **'गतगन्धस्य प्रयत्नेनोद्बोधनस्य'** । यथा कस्तूरिकादेर्मद्यादिना ॥

पत्रलेखा पत्राङ्गुलिरिमे समे ॥ १२२ ॥

पेति ॥ पत्राकारा लेखा । शाकपार्थिवादिः (वा० २।१।७८) ॥ (१) ॥*॥ पत्रार्थोऽङ्गुलिरङ्गुलिव्यापारः ॥ (२) ॥*॥ समे स्त्रियाम् ॥*॥ द्वे **'स्तनकपोलादौ केसरादिना रचितस्य तिलकविशेषस्य'** ॥

तमालपत्रतिलकचित्रकाणि विशेषकम् ।
द्वितीयं च तुरीयं च न स्त्रियाम्

तेति ॥ तमालपत्रमिव । तदाकृतित्वात् । **'तमालपत्रं** तापिच्छे तिलके पत्रके' इति विश्वः ॥*॥ **'तमाल**स्तिलके खड्गे' इति विश्वात्तमालोऽपि ॥ (१) ॥*॥ तिलति । 'तिल स्नेहने' (तु० प० से०) । कुन् (उ० २।३२) । 'तिलकोऽश्वद्रुमभिदोः पुण्ड्रके तिलकालके । **तिलकं** रुचके लोध्रे' इति हैमः ॥ (२) ॥*॥ चित्रयति । 'चित्र चित्रक्रियायाम्' (चु० उ० से०) । कुन् (उ० २।३२) । चित्रं करोति वा । 'अन्येभ्योऽपि (वा० ३।२।१०१) इति डः । **'चित्रकं** तिलके ना तु व्याघ्रभिच्चञ्चुपाटिषु' (इति मेदिनी) ॥ (३) ॥*॥ विशिनष्टि । 'शिल्ल विशेषणे' (रु० उ० अ०) । ण्वुल् (३।१।१३३) । **'विशेषको**ऽस्त्री तिलके विशेषयितरि त्रिषु' (इति मेदिनी) ॥ (४) ॥*॥ द्वितीयं तिलकम्, तुरीयं विशेषकं, च स्त्रियां न भवतः । किं तु पुंनपुंसकयोः ॥*॥ चत्वारि **'ललाटकृतस्य तिलकस्य'** ॥

अथ कुङ्कुमम् ॥ १२३ ॥

काश्मीरजन्माग्निशिखं वरं बाह्लीकपीतनम् ।
रक्तसंकोचपिशुनं धीरलोहितचन्दनम् ॥ १२४ ॥

अथेति ॥ 'कुङ्कुम्' इति शब्दोऽस्ति वाचकत्वेनास्य । अर्शआद्यच् (५।२।१२७) । यद्वा कुक्यते । 'कुक आदाने' (भ्वा० आ० से०) । बाहुलकादुमच् । 'आच्छी–' (७।१।८०) इत्यत्र 'नुम्' इति योगविभागान्नुम् ॥ (१) ॥*॥ कशति, कश्यते वा 'कश शब्दे' ( ) । 'कशेर्मुट् च' (उ० ४।३२) इतीरन् ।—'गम्भीरादयश्च'–इति मुकुट एतत्सूत्रादर्शनमूलकः । कश्मीरे जन्मास्य । **'काश्मीरं** कुङ्कुमेऽपि स्याद्वङ्कपुष्करमूलयोः' (इति मेदिनी) ॥ (२) ॥*॥ अग्निरिव शिखा केसरोऽस्य । 'अथाग्निशिखमुद्दिष्टं कुसुम्भे कुङ्कुमेऽपि च' (इति मेदिनी) ॥ (३) ॥*॥ व्रियते । 'वृञ् वरणे' (स्वा० उ० से०) । 'ग्रहवृह–' (३।३।५८) इत्यप् । **'वरो** वृतौ । विटे जामातरि श्रेष्ठे देवतादेरभीप्सिते । **वरं तु घुसृणे** किंचिदिष्टे' इति हैमः । **'काश्मीरजं वह्निशिखं** बाह्लीकं पीतनं वरम्' (इति वाचस्पतिः) ॥ (४) ॥*॥ वल्हते । 'वल्ह प्राधान्ये' (भ्वा० आ० से०) । बाहुलकादीकन् । वल्हीकदेशे भवम् 'कच्छादिभ्यश्च' (४।२।१३३) इत्यण् । **'बाल्हीकं वाल्हिकं** धीरहिङ्गुनोर्नाश्मदेशयोः' (इति त्रिकाण्डशेषः) ॥*॥ 'काश्मीरं **चारु** वाल्हीकं संकोचं पिशुनं वरम्' इति हलायुधाच्चावपि ॥ (५) ॥*॥ पीतं करोति । 'तत्करोति–' (वा० ३।१।२६) इति ण्यन्ताल्ल्युः (३।१।१३३) । यद्वा पीयते । 'पीङ् पाने' (दि० आ० अ०) । बाहुलकात्तनन्, गुणाभावश्च । **'पीतनं** पीतदारुणि । कुङ्कुमे हरितालेऽपि च पुमानाम्रातके मतः' (इति मेदिनी) ॥ (६) ॥*॥ रज्यते स्म । 'गत्यर्था–' (३।४।७२) इति क्तः ॥ **'रक्तं** नील्यादिरञ्जिते । कुङ्कुमेऽसृज्यनुरक्ते प्राचीनामलकेऽरुणे ॥' (इति हैमः) ॥ (७) ॥*॥ संकोचति, संकुच्यते, वा । यद्वा संकोचयति, संकोच्यते, वा । 'कुच संपर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु' (भ्वा० प० से०) । अच् (३।१।१३४) । घञ् (३।३।१९) वा ।—संकुचति—इति मुकुटो न सम्यक् ॥ 'कुच संकोचने' इत्यस्य कुटादित्वेनाजि गुणाभावप्रसङ्गात् । **'संकोचो** मीनभेदे च बन्धं क्लीबं तु कुङ्कुमे' इति मेदिनी ॥ (८) ॥*॥ पिंशति । 'पिश अवयवे' (तु० प० से०) । 'क्षुधिपिशिमिथिभ्यः कित्' (उ० ३।५५) इत्युनन् । **'पिशुनं** कुङ्कुमेऽपि च । कपिवक्त्रे च काके ना सूचकक्रूरयोस्त्रिषु । पृक्कायां **पिशुना** स्त्री स्यात्' (इति मेदिनी) ॥ (९) ॥*॥ दधाति । धीयते वा । 'डुधाञ् धारणादौ' (जु० उ० से०) । 'सुसूधाञ्गृधिभ्यः क्रन्' (उ० २।२४) । 'घुमास्था–' (६।४।६६) इतीत्वम् । **'धीरो** धैर्यान्विते स्थैरे बुधे क्लीबं तु कुङ्कुमे ॥' (१०) ॥*॥ लोहितं च ॥*॥ लोहितमपि । **'लोहितं** रक्तगोशीर्षे कुङ्कुमे रक्तचन्दने' (इति मेदिनी) ॥ (११) ॥*॥ एकादश **'कुङ्कुमस्य' 'केसर'** इति ख्यातस्य ॥

राक्षा लाक्षा जतु क्लीबे यावोऽलक्तो द्रुमामयः ।

रेति ॥ रक्ष्यते । अनया वा । 'रक्ष पालने' (भ्वा० प० से०) । 'गुरोश्च–' (३।३।१०३) इत्यः । प्रज्ञाद्यण् (५।४।३८) । अजादित्वात् (४।१।४) टाप् । अत एव 'लाक्षायां रक्षणे **रक्षा**' इति रुद्रः ॥ (१) ॥*॥ लक्ष्यते । अनया वा । 'लक्ष दर्शने' (चु० प० से०) । प्राग्वत् ॥ (२) ॥*॥ जायते । 'फलिपाटि–' (उ० १।१८) इत्युः तोऽन्तादेशः । यत्तु—बाहुलकात्तुगात्वाभावश्च—इति मुकुटः स उक्तसूत्रास्मरणमूलकः ॥ (३) ॥*॥ यौति । यूयते वा । अच् (३।१।१३४) । 'ऋदोरप्' (३।३।५७) वा यव एव । प्रज्ञाद्यण् (५।४।३८) । 'यावोऽलक्ते पाकभेदे' इति हैमः ॥ (४) ॥*॥ न लज्जते स्म । 'ओ लस्जी व्रीडे' (तु० आ० से०) । बाहुलकात्तन् । यद्वा न लक्ष्यते स्म । अभक्ष्यत्वात् । क्तः (३।२।१०२) यद्वा न रक्तोऽस्मात् । 'कपिलिकादित्वात्' (वा० ८।२।१८) लत्वम् ॥ (५) ॥*॥ द्रुमाणामामयः ॥ (६) ॥*॥ षट् **'लाक्षाः' 'महावर'** इति ख्यातस्य ॥

लवङ्गं देवकुसुमं श्रीसंज्ञम्

लेति ॥ लुनाति, लूयते, वा । 'तरत्यादिभ्यश्च' (उ० १।१२०) इत्यङ्गच् ॥ (१) ॥*॥ देवानां कुसुमम् । कुसुमेषु देव इव । राजदन्तादिः (२।२।३१) । देवयोग्यं कुसुमं वा । शाकपार्थिवादिः (वा० २।१।७८) ॥ (२) ॥*॥ श्रियः संज्ञा संज्ञा यस्य ॥ (३) ॥*॥ त्रीणि **'लवङ्गस्य'** ॥

अथ जायकम् ॥ १२५ ॥

कालीयकं च कालानुसार्यं च

अथेति ॥ जयति गन्धान्तरम् । 'जि अभिभवे' (भ्वा०

प० से०) ण्वुल् (३।१।१३३) ॥ (१) ॥*॥ कालस्य वर्णस्येदम् । 'वृद्धाच्छः' (४।२।११४) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥*॥ क्वचित् 'कालेयकम्' इति पाठः । कलेरिदम् । 'सर्वत्राग्निकलिभ्याम्' (वा० ४।२।) इति ढक् । 'कालीयकं च **कालेयं** वर्णकं कान्तिदायकम्' इति व्याडिः ॥ (२) ॥*॥ अनुस्रियते । 'सृ गतौ' (भ्वा० प० अ०) । ण्यत् (३।१।१२४) । कालेन वस्तुनानुसार्यम् । **'कालानुसार्यं** शैलेये कालीये शिंशपाद्रुमे' इति विश्वमेदिन्यौ ॥ (३) ॥*॥ त्रीणि **'सुगन्धद्रव्यभेदस्य'** ॥

अथ समार्थकम् ।

वंशकागुरुराजार्हलोहं कृमिजजोङ्गकम् ॥ १२६ ॥

अथेति ॥ वंश इव । 'इवे प्रति–' (५।३।८६) इति कन् ॥*॥ क्वचित् 'वंशिक' इति पाठः । वंशोऽस्त्यत्र । ठन् (५।२।११५) । 'राजार्हं **वंशिकं नतम्** । **वनद्रुमः परमदो** वंशकं लोहनामकम्' इति वाचस्पतिः ॥ (१) ॥*॥ न गुरु । यस्माद्वा । 'कुस्तुम्बुरुकधान्याकमगुरु वा पुंसि **लघु**नाम च' इति बोपालितः । 'अगुरुस्त्वगरौ लघौ । शिंशिपायाम्' इति हैमः । (**'अगुर्वगरु** राजार्हम्' इति हैमः) ॥ (२) ॥*॥ राजानमर्हति । 'अर्हः प्रशंसायाम्' (३।२।१३३) इत्यच् । **'राजार्हं** जोङ्गके क्लीबं राजयोग्येऽभिधेयवत्' इति मेदिनी ॥ (३) ॥*॥ लुह्यते । 'लुह गार्ध्ये' ( ) । घञ् (४।३।१९) । रोहति । अच् (३।१।१३४) । रलयोरैक्यम् । वा ।—'लुजो हः'—इति मुकुटस्त्वपाणिनीयः । **'लोहोऽस्त्री** शस्त्रके **लोहं** जोङ्गके सर्वतैजसे' (इति मेदिनी) ॥ (४) ॥*॥ कृमिभिर्जन्यते । 'अन्येष्वपि' (३।२।१०१) इति डः ॥ (५) ॥*॥ जुङ्गति । जुङ्ग्यते, वा 'जुगि वर्जने' (भ्वा० प० से०) कुन् (उ० २।३२) । पृषोदरादिः (६।३।१०९) । बाहुलकाद्गुणो वा ॥ (६) ॥*॥ ('अगुरु **प्रवरं** लोहं **क्रिमिजग्धमनार्यजम्**' इति शाश्वतः ॥*॥ षट् **'अगुरुणः'** ॥

कालागुर्वगुरु

केति ॥ कालं च तदगुरु च ॥ (१) ॥*॥—'कालागुर्वप्यगुरूच्यते'—इति सुभूतिः । द्वे **'कालागुरुणः'** ॥

स्यात्तन्मङ्गल्या मल्लिगन्धि यत् ।

स्यादिति ॥ मल्लिकापुष्पस्येव गन्धो यस्य । 'उपमानाच्च' (५।४।१३७) इतीत् । यदगुरु मल्लिगन्धि तत् मङ्गल्या स्यात् मङ्गले साधुः । 'तत्र साधुः' (४।३।९८) इति यत् । **'मङ्गल्यः** स्यात्रायमाणाश्वत्थबिल्वमसूरके । स्त्रियां शम्यामधःपुष्पीमिसिशुक्लवचासु च । रोचनायामथो दध्नि क्लीबं शिवकरे त्रिषु' इति मेदिनी ॥ (१) ॥*॥ एकम् **'माङ्गल्यायाः'** ॥

१—'नागरुन्निततिलकः' इति दमयन्तीश्लेषः ॥

यक्षधूपः सर्जरसो रालसर्वरसावपि ॥ १२७ ॥

बहुरूपोऽपि

यक्षेति ॥ यक्षान् धूपायति । 'धूप संतापे' (भ्वा० प० से०) । 'आयादय आधेधातुके वा' (३।१।३१) 'कर्मण्यण्' (३।२।१) ॥ (१) ॥*॥ सर्जस्य सालस्य रसः ॥ (२) ॥*॥ न राति दुःखम् । बाहुलकाल्लक् ॥*॥—राल:—इति स्वामी । **'अराल:** सर्जवक्रियोः' इति, **'रालः** सर्वरसोऽराली **धूपको** वह्निवल्लभः' इति च रभसः ॥ (३) ॥*॥ सर्वे रस्यते । 'रस आस्वादने' (चु० उ० से०) अदन्तः । ण्यन्तः । घञ् (३।३।१९) । अच् (३।३।५६) वा । सर्वे रसा यस्मिन् वा । नानाकृतिगन्धत्वात् ॥ (४) ॥*॥ बहूनि रूपाण्यस्य । **'बहुरूपः** स्मरे विष्णौ सरटे धूपके शिवे' इति हैमः ॥ (५) ॥*॥ पञ्च **'रालस्य'** ॥

अथ वृकधूपकृत्रिमधूपकौ ।

अथेति ॥ वृक इव धूपः । **'वृकधूप**स्तु सरलद्रवकृत्रिमधूपयोः' (इति मेदिनी) ॥ (१) ॥*॥ कृत्रिमश्चासौ धूपश्च । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ द्वे **'नानासुगन्धिकृतस्य दशाङ्गादिधूपस्य'** ॥

तुरुष्कः पिण्डकः सिल्हो यावनोऽपि

त्विति ॥ तुतोर्ति । 'तुर त्वरणे' (जु० प० से०) । बाहुलकादुस्, गुणाभावश्च । स्वार्थे कन् (ज्ञापि० ५।४।५) । **'तुरुष्कः** सिल्हके म्लेच्छजातौ देशान्तरेऽपि च' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ पिण्डते । 'पिडि संघाते' (भ्वा० आ० से०) । अच् (३।१।१३४) । स्वार्थे कन् (ज्ञापि० ५।४।५) ।—पिण्डति । 'पिडि गतौ'—इति मुकुटश्चिन्त्यः । 'पडि गतौ' इत्यस्मात्मनेपदिषु पाठात् । **'पिण्डो** बोले बले सान्द्रे देहागरैकदेशयोः । देहमात्रे निवापे च गोलसिल्हकयोरपि । ओड्रपुष्पे च पुंसि स्यात् क्लीबमाजीवनायसोः । **पिण्डी** तु पिण्डतगरेऽलाबूखर्जूरभेदयोः' (इति मेदिनी ॥ (२) ॥*॥ स्निह्यति 'स्निह प्रीतौ' (दि० प० से०) । अन्तर्भावितण्यर्थः । बाहुलकाल्लक् । पृषोदरादिः (६।३।१०९) ॥ (२) ॥*॥ यवनदेशे भवः । 'तत्र भवः' (४।३।५२) इत्यण् । याव्यते वा । यौतेर्ण्यन्ताद्ण्युट् (३।३।११३) ॥ (४) ॥*॥ चत्वारि **'सिल्हाख्यगन्धद्रव्यस्य' 'लोहवात'** इति ख्यातस्य ॥

अथ पायसः ॥ १२८ ॥

श्रीवासो वृकधूपोऽपि श्रीवेष्टसरलद्रवौ ।

अथेति ॥ पय एव । प्रज्ञाद्यण् (५।४।३८) । पयसो विकारो वा । 'तस्य विकारः' (४।३।१३३) इत्यण् । 'सरलद्रवः **श्रीपिष्टो दधिक्षीरघृताह्वयः**' इति रभसः । **'पायस**स्तु क्लीबपुंसोः श्रीवासपरमान्नयोः' (इति मेदिनी) । (१) ॥*॥ श्रियो वासः । **'श्रीवासो** वृकधूपे स्यात् पङ्कजे मधुसूदने' (इति मेदिनी) ॥*॥ श्रीश्चासौ वासश्च, इति वा ।

'श्रीवेषरचनाशोभाभारतीसरलद्रवे' इति विश्वः ॥ (२) ॥*॥ **'वृकः** स्यात् कृत्रिमेऽनेकधूपेऽपि सरलद्रवे' इति रभसः धूप्यतेऽनेन । 'धूप संतापे' (भ्वा० प० से०) । घञ् (३।३।१८) । वृकनामा धूपः । शाकपार्थिवादिः (वा० २।१।७८) ॥ (३) ॥*॥ श्रियः सरलद्रवस्य पिष्टः । तच्चूर्णेन जनितत्वात्—इति मुकुटः ॥*॥ अन्ये तु—श्रीसंज्ञकः श्रियो वा वेष्टो निर्यासः—इत्याहुः ॥ (४) ॥*॥ सरलस्य देवदारोर्द्रवः ॥ (५) ॥*॥ पञ्च **'सरलद्रवस्य'** ॥

मृगनाभिर्मृगमदः कस्तूरी च

मृगेति ॥ मृगस्य नाभिः ॥ (१) ॥*॥ मृगस्य मदः ॥ (२) ॥*॥ कसति गन्धोऽस्याः । 'कस गतौ' (भ्वा० प० से०) । खर्जादित्वात् (उ० ४।९०) ऊरः । पृषोदरादिः (६।३।१०९) ॥ (३) ॥*॥ 'मृगनाभिर्मृगमदो **मृगः** कस्तूरिकापि च' इति माधवात् 'मृगः' अपि ॥*॥ 'मदः' अपि । **'मदो** रेतसि कस्तूर्याम्' इति मेदिनी ॥*॥ 'मुख्यराट्क्षत्रिये **नाभिः** पुंसि, प्राण्यङ्गके द्वयोः । चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे' इति रभसात् 'नाभिः' अपि ॥*॥ त्रीणि **'कस्तूर्याः'** ॥

अथ कोलकम् ॥ १२९ ॥

कक्कोलकं कोशफलम्

अथेति ॥ कोलति । 'कुल संस्त्याने' (भ्वा० प० से०) । ण्वुल् (३।१।१३३) ॥*॥ रलयोरेकत्वात् 'कोरकम्' अपि । **'कोरकोऽस्त्री** कुड्मले स्यात्कक्कोलकमृणालयोः' (इति मेदिनी)॥ (१) ॥*॥ ककन्तेऽत्र । 'कक लौल्ये' (भ्वा० आ० से०) । संपदादिः (वा० ३।३।१०८) कोलति । ज्वलादित्वात् (३।१।१४०) णः । कक् च तत् कोलं च । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ कोशे फलमस्य ॥ (३) ॥*॥ त्रीणि **'फलकर्पूरस्य' 'गह्वला'** इति ख्यातस्य ॥

अथ कर्पूरमस्त्रियाम् ।

घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका ॥ १३० ॥

अथेति ॥ किरति । 'कॄ विक्षेपे' (तु०प०से०) । कृणाति । 'कॄञ् हिंसायाम्' (क्या० उ० से०) वा । करोति । 'डुकृञ् करणे' (त० उ० अ०) वा । विच् (३।२।७) । पूर्यते । 'पूरी आप्यायने' (दि० आ० से०) । 'इगुपध–' (३।३।१३५) इति कः । कर् चासौ पूरश्च ।—कल्पते । 'कृपू सामर्थ्ये' (भ्वा० आ० से०) । खर्जादित्वात् (उ० ४।९०) ऊरः—इति स्वामिमुकुटौ । तच्चिन्त्यम् । 'कृपो रो लः' (८।२।१८) इति लत्वस्य दुर्वारत्वात् । बाहुलकात्तदभावो वा बोध्यः ॥ (१) ॥*॥ घनो दृढः सारोऽस्य । **'घनः** सान्द्रे दृढे दार्ढ्ये' इति विश्वः । घनस्य सार इव वा । शीतत्वात् शिताभ्राकारत्वाच्च । **'घनसारस्तु** कर्पूरे दक्षिणावर्तपारदे' इति हैमः ॥ (२) ॥*॥ चन्द्रस्य संज्ञा संज्ञा यस्य ॥ (३) ॥*॥ सितं श्वेत्यं बन्धनं वा चन्द्रं वा अभ्रति । 'अभ्र गतौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) । सितं शौक्ल्यमभ्रयति स्वसंबद्धम्, इति वा । शुक्लत्वात् सिताभ्रमिव वा ॥*॥ **'सिताभः'** इति वा पाठः । सिता आभा यस्य ॥ (४) ॥*॥ हिमा चासौ वालुका च ॥ (४) ॥*॥ 'वेणुसारस्तु (रेणुकावर्ण) कर्पूरो **चन्द्रभस्म हिमाह्वयम् । वेधकः'** इति त्रिकाण्डशेषः ॥*॥ पञ्च **'कर्पूरस्य'** ॥

गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम् ।

गन्धेति ॥ गन्धवान् सारः स्थिरभागोऽस्य । गन्ध एव सारोऽस्य वा ॥ (१) ॥*॥ मलये जातः । सप्तम्यां जनेर्डः' (३।२।९७) ॥ (२) ॥*॥ भद्रा श्रीरस्य । 'हस्तिजात्यन्तरे **भद्रो** वाच्यवच्छ्रेष्ठसाधुनोः' इति विश्वः ॥ (३) ॥*॥ चन्दयति । 'चदि आह्लादे' (भ्वा० प० से०) ण्यन्तः । ल्युट् (३।४।११३) ॥ (४) ॥*॥ **'मालयस्तु** स्याच्छ्रीखण्डो रौहिणश्च सः' इति त्रिकाण्डशेषः ॥*॥ चत्वारि **'चन्दनस्य'** ॥

तैलपर्णिकगोशीर्षे हरिचन्दनमस्त्रियाम् ॥ १३१ ॥

तैलेति ॥ तिलपर्णे वृक्षभेदे जाता । 'तत्र जातः' (४।३।२५) इत्यण् । ङीप् (४।१।५) । स्वार्थे कन् (ज्ञादि० ५।४।५) । 'केऽणः' (७।४।१३) इति ह्रस्वः । **'तैलपर्णी** मलयजे श्रीवासे सिह्लकेऽपि च' (इति मेदिनी) ॥ (१) ॥*॥ गोः शीर्षमिव ।—तैलपर्णगोशीर्षौ गिरी आकरावस्य—इति स्वामी ॥ (१) ॥*॥ हरेरिन्द्रस्य चन्दनम् । हरिः कपिलवर्ण चन्दनम् । **'हरिचन्दनमस्त्री** स्यात्रिदशानां महीरुहे । नपुंसकं तु गोशीर्षे ज्योत्स्नाकुङ्कुमयोरपि' (इति मेदिनी) ॥ (१) ॥*॥ **'चन्दनविशेषाणां'** पृथक् पृथक् ॥

तिलपर्णी तु पत्राङ्गं रञ्जनं रक्तचन्दनम् ।
कुचन्दनं च

तिलेति ॥ तिलस्येव पर्णान्यस्याः । 'पाकर्ण–' (४।१।६४) इति ङीप् । यद्वा तिलपर्णी नदी आकरोऽस्याः ॥ (१) ॥*॥ पत्रमेवाङ्गमस्य । पत्रेष्वञ्चति । 'अञ्चि गतौ' (भ्वा० प० से०) अच् (३।१।१३४) । 'पत्राङ्गं न द्वयोर्भूर्जे पद्मके रक्तचन्दने' (इति मेदिनी) ॥ (२) ॥*॥ रञ्जयति । 'रञ्ज रागे' (भ्वा० उ० अ०) ण्यन्तः । युच् (उ० २।७८) । ल्युट् (३।३।११३) वा । **'रञ्जनो** रागजनने **रञ्जनं** रक्तचन्दने' (इति मेदिनी) ॥ (३) ॥*॥ रक्तं च तच्चन्दनं च ॥ (४) ॥*॥ निर्गन्धत्वात् कुत्सितं चन्दनम् । कौ चन्दनम् । इव वा । कुत्सितान्यन्यचन्दनान्यस्माद्वा । **'कुचन्दनं** च पत्राङ्गद्वयभेदे रक्तचन्दने' इति विश्वमेदिन्यौ ॥ (५) ॥*॥ पञ्च **'रक्तचन्दनस्य'** ॥

अथ जातीकोशजातीफले समे ॥ १३२ ॥

अथेति ॥ जात्याः कोशः ॥*॥ **जातिरपि** । 'जातिर्जाती-

फलेऽपि च' इति रभसः ॥*॥ 'कोषोऽप्रकृते पेश्यां पात्रे जातिकोषे' इति रभसः ॥ (१) ॥*॥ जात्याः फलम् ॥*॥ 'फलम्' अपि । **'फलं** लाभे जातिकोषे बाणाग्रे फलकेऽपि च' इति रुद्रः ॥ (२) ॥*॥ द्वे **'जातीफलस्य' 'जाईफल'** इति ख्यातस्य ॥

कर्पूरागरुकस्तूरीकक्कोलैर्यक्षकर्दमः ।

केति ॥ कर्पूरादिभिः समभागैः । यक्षप्रियः कर्दमः ॥ (१) ॥*॥ 'कर्पूरागुरुकस्तूरीकक्कोलघुसृणानि च । एकीकृतमिदं सर्वं यक्षकर्दम इष्यते' इति व्याडिः । 'कुङ्कुमागरुकस्तूरी कर्पूरं चन्दनं तथा । महासुगन्धमित्युक्तं नामतो यक्षकर्दमः' इति 'धन्वन्तरिः' ॥*॥ एकम् **'लेपविशेषस्य'** ॥

गात्रानुलेपनी वर्तिर्वर्णकं स्याद्विलेपनम् ॥ १३३ ॥

गेति ॥ गात्रमनुलिप्यते यया । 'करणा–' (३।३।११७) इति ल्युट् ॥ (१) ॥*॥ वर्त्यते । 'वृतु वर्तने' (भ्वा० आ० से०) । ण्यतः । 'अच इः' (उ० ४।१३९) **'वर्तिर्भेषजनिर्माणे** नयनाञ्जनलेखयोः । गात्रानुलेपनी दीपदशादीपेषु योषिति' (इति मेदिनी) ॥ (२) ॥*॥ वर्णं करोति । ण्वुल् (३।१।१३३) ॥ (३) ॥*॥ विलिप्यतेऽनेन । 'लिप उपदेहे' (तु० उ० अ०) । ल्युट् (३।३।११७) ॥ (४) ॥*॥ चत्वारि **'गात्रानुलेपयोग्यस्य पिष्टघृष्टसुगन्धिद्रव्यस्य'** । द्वौ द्वौ भिन्नार्थौ—इत्येके । 'गात्रानुलेपनी वर्तिर्विगन्ध्यथ विलेपनम् । वर्णकं चाथ **विच्छित्तिः स्त्रीकषायोऽङ्गरागके**[1]' इति रभसात् । आद्यं द्वयमुक्तार्थमेव । वर्णकादिद्वयं घृष्टचन्दनादिलेपमात्रस्य ॥

चूर्णानि वासयोगाः स्युः

च्विति ॥ चूर्ण्यते । 'चूर्ण प्रेरणे' (चु० प० से०) । घञ् (३।३।१९) । **'चूर्णो** धूलौ क्षारभेदे चूर्णानि वासयुक्तिषु' (इति मेदिनी) ॥ (१) ॥*॥ वासे सुगन्धिकरणे योगा उपायाः ॥ (२) ॥*॥ द्वे **'पटवासादिक्षोदस्य'** ॥

भावितं वासितं त्रिषु ।

भेति ॥ भाव्यते स्म । 'भुवोऽवकल्कने' (चु० ग० सू०) इति ण्यन्तात् क्तः (३।२।१०२) । 'भावितं वासिते प्राप्ते' इति हैमः ॥ (१) ॥*॥ वास्यते स्म । 'वस स्नेहनादौ' (चु० उ० से०) । क्तः (३।२।१०२) । **'वासितं** भाविते रुते' इति मेदिनी ॥ (२) ॥*॥ द्वे **'द्रव्यान्तरभावितस्य'** ॥

संस्कारो गन्धमाल्याद्यैर्यः स्यात्तदधिवासनम् १३४

संस्केति ॥ माङ्गल्यधूपादिभिर्वस्त्रादीनां ताम्बूलादीनां च यः संस्कारः तत् । अधिकं वास्यते । 'वास उपसेवायाम्' चुरादिः । ल्युट् (३।३।११३) ॥ (१) ॥*॥ एकम् **'गन्धपुष्पोपचारस्य'** ॥

१—विच्छित्त्यादित्रीणि अङ्गरागस्य नामानि ॥

माल्यं मालास्रजौ मूर्ध्नि

मेति ॥ मूर्ध्नि शिरसि । इदमतन्त्रम् । अन्यत्रापि माला भवत्येव । मल्यते । 'मल धारणे' (भ्वा० आ० से०) । ण्यत् (३।१।१२४) । मालैव वा । चतुर्वर्णादिष्यञ् (वा० ५।१।१२४) । **'माल्यं** कुसुमतत्स्रजोः' (इति मेदिनी) ॥ (१) ॥*॥ घञ् (३।३।१९) । मां लाति वा । कः (३।२।३) । **'माला तु** पङ्क्तौ पुष्पादिदामनि' (इति हैमः) ॥ (२) ॥*॥ सृज्यते । सृजति सुखं वा । 'सृज विसर्गे' (तु० प० अ०) । 'ऋत्विग्–' (३।२।५९) इति क्विन् ॥ (३) ॥*॥ त्रीणि **'मूर्ध्निधृतायाः कुसुमावलेः'** ॥

केशमध्ये तु गर्भकः ।

केशेति ॥ गर्भ इव । 'इवे–' (५।३।९६) इति कन् ॥ (१) ॥*॥ एकम् **'केशमध्यगर्भस्य'** ॥

प्रभ्रष्टकं शिखालम्बि

प्रेति ॥ शिखातो लम्बमानम् । प्रभ्रंशितुं प्रवृत्तम् । 'भ्रंशु अधःपतने' (दि० प० से०) । 'आदिकर्मणि क्तः कर्तरि च' (३।४।७१) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (१) ॥*॥ एकम् **'शिखायां लम्बमानपुष्पस्य'** ॥

पुरो न्यस्तं ललामकम् ॥ १३५ ॥

ण्विति ॥ तदेव माल्यं पुरोभागे न्यस्तं ललाटपर्यन्तम् । ललाममिव । इवार्थे कन् (५।३।९६) ॥ (१) ॥*॥ एकम् **'ललाटधृतपुष्पस्य'** ॥

प्रालम्बमृजुलम्बि स्यात्कण्ठात्

प्रेति ॥ माल्यमेव कण्ठादूर्ध्वं लम्बमानम् । प्रालम्बते । 'लबि अवस्रंसने' (भ्वा० आ० से०) । अच् (३।१।१३४) ॥ (१) ॥*॥ ऋजु लम्बितुं शीलमस्य । 'सुपि–' (३।२।७८) इति णिनिः ॥*॥ एकम् **'कण्ठे ऋजुलम्बमानपुष्पस्य'** ॥

वैकक्षकं तु तत् ।

यत्तिर्यक् क्षिप्तमुरसि

वैकेति ॥ विशिष्टः कक्षोऽस्माद्विकक्षमुरः । तत्र भवम् । 'तत्र भवः' (४।३।५३) इत्यण् । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (१) ॥*॥ यदुरसि उपवीतवत्तिर्यक् क्षिप्तम् । तत् ॥*॥ एकम् **'यज्ञोपवीतवत्तिर्यग्धृतपुष्पस्य'** ॥

शिखास्वापीडशेखरौ ॥ १३६ ॥

शीति ॥ शिखाक्षिप्तं माल्यम् । आपीडयति । 'पीड अवगाहने' (चु० प० से०) अच् (३।१।१३४) ॥ (१) ॥*॥ शिङ्क्ते । 'शिखि गतौ' (भ्वा० प० से०) बाहुलकादरः । आगमशास्त्रस्यानित्यत्वान्न नुम् ॥ (२) ॥*॥ द्वे **'शिखास्थमाल्यस्य'** ॥

रचना स्यात्परिस्पन्दः

रेति ॥ 'रच प्रतियत्ने' अदन्तश्चुरादिः । 'ण्यासश्रन्थो युच्' (३।३।१०७) ॥ (१) ॥*॥ परिस्पन्दनम् । 'स्पदि किंचिच्चलने' (भ्वा० आ० से०) । भावे घञ् (३।३।१८) । अधिकरणे (३।३।१९) च ॥*॥ **'परिस्पन्दः'** इति वा पाठः । 'स्यन्दू प्रस्रवणे' (भ्वा० आ० से०) ॥ (२) ॥*॥ द्वे **'शिल्पादिरचनायाः'** ॥

आभोगः परिपूर्णता ।

आभोग इति ॥ आभोजनम् । प्राग्वत् घञ् (३।३।१८) । **'आभोगो** वरुणच्छत्रे पूर्णतायत्नयोरपि' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ परितः पूर्यते स्म 'पूरी आप्यायने' (दि० आ० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । 'रदाभ्याम्–' (८।२।४२) इति निष्ठानत्वम् । परिपूर्णस्य भावः । तल् (५।१।११९) ॥ (२) ॥*॥ द्वे **'सर्वोपचारपरिपूर्णतायाः'** ॥

उपधानं तूपबर्हः

उपेति ॥ उपधीयते शिरोऽत्र । 'डुधाञ्' (जु० उ० अ०) । 'करणा–' (३।३।११७) इति ल्युट् ॥ (१) ॥*॥ उपबृह्यतेऽत्र । अनेन वा । 'बृह बृद्धौ' (भ्वा० प० से०) । 'बृहू उद्यमने' (तु० प० से०) वा । घञ् (३।३।१९) ॥ (२) ॥*॥ द्वे **'शिरोनिधानस्य'** ॥

शय्यायां शयनीयवत् ॥ १३७ ॥

शयनम्

शेति ॥ शय्यतेऽत्र । 'शीङ् स्वप्ने' (अ० आ० सें०) 'संज्ञायां समज–' (३।३।९९) इति क्यप् । 'अयङ् यि–' (७।४।२२) इत्ययङ् । **'शय्या** स्याच्छयनीयेऽपि गुम्फनेऽपि च योषिति' (इति मेदिनी) ॥ (१) ॥*॥ 'कृत्यल्युटः–'(३।३।११३) इत्यधिकरणेऽनीयर् ॥ (२) ॥*॥ ल्युट् (३।३।११७) अपि । **'शयनं** सुरते निद्राशय्ययोश्च नपुंसकम्' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'तूलिकादेः'** । मुकुटस्तु—शय्यामात्रस्य—इति व्याख्यत् ॥

मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः ।

मेति ॥ मञ्चते । 'मचि धारणोच्छ्रायपूजनेषु' (भ्वा० आ० से०) । अच् (३।१।१३४) ॥ (१) ॥*॥ परितोऽङ्क्यते । 'अकि लक्षणे' (भ्वा० आ० से०) । घञ् (३।२।१९) । 'परेश्च घाङ्कयोः' (८।२।२२) इति वा लत्वम् । **'पल्यङ्को** मञ्चपर्यङ्कवृषीपर्यस्तिकासु च' (इति मेदिनी) ॥ (२) ॥*॥ (३) ॥*॥ खट्यते निद्रालुभिः । 'खट काङ्क्षायाम्' (भ्वा० प० से०) । 'अशूप्रुषि–' (उ० १।१५१) इति कुन् ॥ (४) ॥*॥ चत्वारि **'पर्यङ्कस्य'** ॥

गेन्दुकः कन्दुकः

गयेति ॥ गातें । 'गाङ् गतौ' (अ० आ० अ०) । विच् (३।२।७५) । गा गच्छन्निन्दुरिव । 'इवे' (५।३।९६) इति कन् । गे गगने इन्दुरिव, इति वा ॥ (१) ॥*॥ कन्द्यते । 'कदि आह्वाने रोदने च' (भ्वा० प० से०) । बाहुलकादुः । कं सुखं ददाति, दयते, दयति, यच्छति, वा । मितद्वादित्वात् (वा० ३।२।१८०) ड्वुः । स्वार्थे कन् (ज्ञापि० ५।४।५) कं शिरो दुनोति, दवति, वा । 'टु दु उपतापे' (भ्वा० प० अ०) । 'दु गतौ' (भ्वा० प० अ०) वा । प्राग्वत् ॥ (२) ॥*॥ **'वीटा'** इत्यपि भारते ॥*॥ द्वे **'कन्दुकस्य' 'गेंद'** इति ख्यातस्य ।—**'गालमसूरिया'** इति ख्यातस्य—इत्यन्ये ॥

दीपः प्रदीपः

दीति ॥ दीप्यते । अनेन वा । दीपयति वा । 'दीपी दीप्तौ' (दि० आ० से०) । इगुपधत्वात् (३।१।१३४) कः घञ् (३।३।१९) वा अच् (३।१।१३४) वा ॥ (१) ॥*॥ अन्योपसर्गनिवृत्त्यर्थः प्रः ॥ (२) ॥*॥ **'दीपस्तु स्नेहाशः कज्जलध्वजः । दशेन्धनो गृहमणिर्दोषातिलक** इत्यपि । **शिखातरुर्दीपवृक्षो ज्योत्स्नावृक्षोऽथ लोचकः'** इति त्रिकाण्डशेषः ॥*॥ द्वे **'दीपस्य'** ॥

पीठमासनम् ॥ १३८ ॥

पीति ॥ पठन्त्यत्र । 'पिठ हिंसासंक्लेशनयोः' (भ्वा० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । बाहुलकादीर्घः । पीयतेऽत्र वा । 'पीङ् पाने' (दि० आ० अ०) । बाहुलकाट्टक् । **'विष्टरः** पीठमस्त्रियाम्' इति त्रिकाण्डशेषः ॥ (१) ॥*॥ आस्यतेऽत्र । 'आस उपवेशने' (अ० आ० से०) । 'करणा–' (३।३।११७) इति ल्युट् ॥ (२) ॥*॥ द्वे **'आसनस्य'** ॥

समुद्गकः संपुटकः

सेति ॥ समुद् गच्छति । 'अन्येष्वपि' (वा० ३।२।४८) इति डः । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (१) ॥*॥ संपुट्यते । 'पुट संश्लेषणे' (तु० प० से०) । कुन् (उ० २।३२) ॥ (२) ॥*॥ द्वे **'संपुटस्य'** ॥

प्रतिग्राहः पतद्ग्रहः ।

प्रेति ॥ प्रति गृह्णाति । 'विभाषा ग्रहः' (३।१।१४३) इति णः ॥*॥ पक्षेऽच् (३।१।१३४) । **'प्रतिग्रहः** स्वीकरणे सैन्यपृष्ठे पतद्ग्रहे । योग्येभ्यो विधिवद्देये तद्गृहे च ग्रहान्तरे' इति मेदिनी ॥ (१) ॥*॥ पततो ग्रहः ॥ (२) ॥*॥ द्वे **'पीकदानी'** इति ख्यातायाः ॥

प्रसाधनी कङ्कतिका

प्रसेति ॥ प्रसाध्यतेऽनया । 'साध संसिद्धौ' (भ्वा० प० अ०) । ल्युट् (३।३।११७) । **'प्रसाधनी** तु कङ्कत्यां सिद्धौ,

१—कज्जलस्येदं नाम ॥ २—अनिकारककारा **'कङ्कतिकोपान्तेन केशम्'** इति दमयन्तीश्लेषात् ॥

वेशे **प्रसाधनम्**' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ कङ्कते । 'ककि गतौ' (भ्वा० आ० से०)। बाहुलकादतच् । गौरादिः (४।१।४१)। स्वार्थे कन् (ज्ञापि० ५।४।५)। 'केऽणः' (७।४।१३) इति ह्रस्वः। यद्वा कस्य शिरसोऽङ्काः। शकन्ध्वादिः (वा० ६।१।९४)। कङ्केष्वतति। क्विप् (उ० २।३२)।—कङ्कति। 'ककि लौल्ये'—इति मुकुटः। तच्च। तस्यानिदित्त्वात्। आत्मनेपदित्वाच्च। **'कङ्कती** तु प्रसाधनी' इति स्त्रीकाण्डेऽमरमाला। **'कङ्कतं** तु प्रसाधनम्' इति क्लीबकाण्डे च ॥ (२) ॥*॥ द्वे **'केशमार्जन्याः' 'कङ्ही'** इति ख्यातायाः ॥

पिष्टातः पटवासकः ॥ १३९ ॥

पीति ॥ पिष्टमतति। 'कर्मण्यण्' (३।२।१) ॥ (१) ॥*॥ पटो वास्यतेऽनेन। 'वास उपसेवायाम्' चुरादिः। घः (३।३।११८)। स्वार्थे कन् (ज्ञापि० ५।४।५)। पटं वासयति। 'कर्मण्यण्' (३।२।१) वा। स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ द्वे **'पिष्टातस्य' 'चुक्का'** इति ख्यातस्य ॥

दर्पणे मकुरादर्शौ

देति ॥ दर्पयति। 'दृप हर्षमोचनयोः' (दि० प० अ०) ण्यन्तः। नन्द्यादिः (३।१।१३४)। 'दृप संदीपने' चुरादिर्वा। 'आदर्शो दर्पणः प्रोक्तः' इत्यमरमाला ॥ (१) ॥*॥ मङ्कते। 'मकि मण्डने' (भ्वा० आ० से०) 'मकुरदर्दुरौ' (उ० १४०) इति साधुः ॥*॥ मुञ्चति ज्योतिः। 'मुच्लृ मोचने'। अत्र पक्षे मुकुरो ह्रस्वकारः। **'मकुरः** स्यान्मुकुरवद्दर्पणे बकुलद्रुमे। कुलालदण्डे' (इति मेदिनी) ॥*॥—**'मङ्कुरः'**—इत्यन्ये ॥ (२) ॥*॥ आदृश्यते रूपमत्र। 'दृशिर् प्रेक्षणे' (भ्वा० प० अ०)। 'हलश्च' (३।३।१२१) इति घञ्। **'आदर्शो** दर्पणे टीकाप्रतिपुस्तकयोरपि' (इति मेदिनी) ॥*॥ त्रीणि **'दर्पणस्य'** ॥

व्यजनं तालवृन्तकम् ।

व्येति ॥ व्यजन्त्यनेन। 'अज गतिक्षेपणयोः' (भ्वा० प० से०)। करणे ल्युट् (३।३।११७)। 'वा यौ' (२।४।५७) इति पक्षे वी न। 'बहुलं तणि' (वा० २।४।५४) इति वा स्त्रीभावो न ॥ (१) ॥*॥ तालस्येव वृन्तमस्य। ताले करतले वृन्तमिव बन्धनमस्य। **'वृन्तं** प्रसवबन्धे स्याद्भटधाराकुचाग्रयोः' इति विश्वः ॥ (२) ॥*॥ द्वे **'व्यजनस्य'** ॥

इति वृत्तवर्गविवरणम् ॥

संततिर्गोत्रजननकुलान्यभिजनान्वयौ ।
वंशोऽन्ववायः संतानः

समिति ॥ संतन्यते। 'तनु विस्तारे' (तु० उ० से०)। क्तिन् (३।३।९४) **'संततिः** स्यात्पङ्क्तौ गोत्रे पारम्पर्ये च पुत्रपौत्राणाम्' (इति मेदिनी) ॥ (१) ॥*॥ गूयते। 'गुङ् शब्दे' (भ्वा० प० से०)। ष्ट्रन् (उ० ४।१४५)। **'गोत्रा** भूगव्ययोर्गोत्रः शैले **गोत्रं** कुलाख्ययोः। संभावनीयबोधे च काननक्षेत्रवर्त्मसु' (इति मेदिनी) ॥ (२) ॥*॥ जन्यते। 'जनी प्रादुर्भावे' (दि० आ० से०)। 'जन जनने' वा (जु० प० से०)। ण्यन्तः। 'कर्मणि ल्युट्' (३।३।११३)। **'जननं** वंशजन्मनोः' (इति मेदिनी) ॥ (३) ॥*॥ कूयते। 'कुङ् शब्दे' (भ्वा०आ०से०)। बाहुलकाल्लक्। कोलति। 'कुल संस्त्याने' (भ्वा० प० से०) 'इगुपध–' (३।१।१३५) इति को वा। कुं भूमिं लाति। कः (३।२।३) वा। कौ लीयते। 'लीङ् श्लेषणे' (दि० आ० अ०)। 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः। **'कुलं** जनपदे गोत्रे सजातीयगणेऽपि च। भवने च तनौ क्लीबं कण्टकार्योषधौ **कुली'** (इति मेदिनी) ॥ (४) ॥*॥ अभिजन्यते। कर्मणि घञ् (३।३।१९)। णिलोपस्य स्थानिवत्त्वात् 'जनिवध्योश्च' (७।३।३५) इति निषेधाद्वृद्धिर्न। यद्वा अभितोऽभिमुखो वा जनो जन्मात्र। **'भवेदभिजनः** ख्यातौ जन्मभूम्यां कुलध्वजे। कुलेऽपि च पुमान्' (इति मेदिनी) ॥ (५) ॥*॥ अन्वीयते। 'इ गतौ' (भ्वा० प० अ०)। 'इण् गतौ' (अ० प० अ०) वा। 'एरच्' (३।३।५६) ॥ (६) ॥*॥ उश्यते। 'वश कान्तौ' (अ० प० से०)। घञ् (३।३।१९)। 'आच्छीनद्योः' (७।१।८०) इत्यत्र 'नुम्' इति योगविभागानुम्। यद्वा वन्यते। 'वन संभक्तौ' (भ्वा० प० से०)। बाहुलकाच्छः—वमति। 'भुवमिकुभ्यः' इति शक्—इति मुकुटः। तच्च। उक्तसूत्रस्योज्ज्वलदत्तादिष्वदर्शनात्। **'वंशो** वेणौ कुले वर्गे पृष्ठाद्यवयवेऽपि च' इति विश्वमेदिन्यौ ॥ (७) ॥*॥ अन्ववाय्यते। 'अय गतौ' (भ्वा० आ० से०)। घञ् (३।३।१९) ॥ (८) ॥*॥ संतन्यते। घञ् (३।३।१९)। **'संतानः** संततौ गोत्रे स्यादपत्ये सुरद्रुमे' (इति मेदिनी)। कर्तृकरणाधिकरणेष्वपि विग्रहः संभवति। आद्ये 'तनोतेः' (वा० ३।१।१४०) इति णः। अन्यत्र 'हलश्च' (३।३।१२१) इति घञ् ॥ (९) ॥*॥ नव **'वंशस्य'** ॥

वर्णाः स्युर्ब्राह्मणादयः ॥ १ ॥

वेति ॥ वर्ण्यते। 'वर्ण प्रेरणे' (चु० प० से०) घञ् (३।३।१९)। वर्णयति। अच् (३।१।१३४) वा। **'वर्णो** द्विजादिशुक्लादियज्ञे गुणकथासु च। स्तुतौ ना न स्त्रियां भेदरूपाक्षरविलेपने' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'ब्राह्मणादिवर्णचतुष्टयवाचकस्य'** वर्ण इत्येकम् ॥

विप्रक्षत्रियविट्शूद्राश्चातुर्वर्ण्यमिति स्मृतम् ।

वीति ॥ विप्रश्च क्षत्रियश्च विट् च शूद्रश्च। चत्वार एव वर्णाः 'चतुर्वर्णादीनाम्' (वा० ५।१।१२४) इति स्वार्थे ष्यञ् ॥

१—'किं तदर्पणमस्ति यत्र सकलम्' इति धर्मसेनः। अतः क्लीबमपि—इति मुकुटः ॥

राजवीजी राजवंश्यः

रेति ॥ राज्ञो वीजयितुं शीलमस्य । 'वीज व्यजने' अदन्तः । 'सुपि–' (३।२।७८) इति णिनिः । यद्वा राज्ञो वीजम् । राजवीजमस्यास्ति । इनिः (५।२।११५) ॥ (१) ॥*॥ वंशे भवः । दिगादियत् (४।३।५३) । राज्ञो वंश्यः । राजवंशे साधुः । 'तत्र साधुः' (४।४।९८) इति यत् ॥ (२) ॥*॥ द्वे **'राजवंशोत्पन्नस्य'** ॥

वीज्यस्तु कुलसंभवः ॥ २ ॥

वीति ॥ वीज्यते । 'अचो यत्' (३।१।९७) यद्वा वीजमस्यास्ति । 'अन्यत्रापि दृश्यते' (वा० ५।२।१२०) इति यप् । 'वीजे भवः' । साधुः, वा ॥ (१) ॥*॥ कुले संभवति । अच् (३।१।१३४) । कुले संभवोऽस्य वा । यद्वा संभवत्यस्मात् । 'ऋदोरप्' (३।३।५७) कुलस्य संभवः ॥ (३) ॥*॥ द्वे **'कुलमात्रोत्पन्नस्य'** ॥

महाकुलकुलीनार्यसभ्यसज्जनसाधवः ।

मेति ॥ महच्च तत् कुलं च । महाकुलस्यापत्यम् । 'महाकुलादञ्खञौ' (४।१।१४१) ॥*॥ महत् कुलमस्य, इति विग्रहे तु (**महाकुलः**) हलादिरपि ॥ (१) ॥*॥ कुलस्यापत्यम् । 'कुलात्खः' (४।१।१३९) ॥*॥ 'अपूर्वपदादन्यतरस्यां यड्ढकञौ' (४।१।१४०) ॥ **'कौलेयकः** सारमेये कुलीने' (इति मेदिनी) ॥*॥ **'कुल्यं** स्यात्कीकसेऽप्यष्टद्रोणीसूर्यामिषेषु च । कुल्या पयःप्रणाल्यां च नद्यां जीवन्तिकौषधौ । कुलोद्भवे कुलहिते त्रिषु मान्ये पुनः पुमान्' (इति मेदिनी) ॥ (२) ॥*॥ अर्यते । 'ऋ गतौ' (भ्वा० प० अ०) । 'ऋहलोर्ण्यत्' (३।१।१२४) ॥ (३) ॥*॥ सभायां साधुः । 'सभाया यः' (४।४।१०५) ॥ (४) ॥*॥ संश्वासौ जनश्च । **'सज्जनं** तु भवेत्क्लीबमुपरक्षणघट्टयोः । वाच्यलिङ्गं कुलीने स्यात् कल्पनायां च योषिति' (इति मेदिनी) ॥ (५) ॥*॥ साध्नोति धर्मम् । 'साध संसिद्धौ' (स्वा० प० अ०) । 'कृवापा–' (उ० १।१) इत्युण् । **'साधुर्वाधुषिके चारौ** सज्जने चाभिधेयवत्' (इति मेदिनी) ॥ (६) ॥*॥ षट् **'कुलीनस्य'** ॥

ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये ॥ ३ ॥
आश्रमोऽस्त्री

ब्रेति ॥ ब्रह्म वेदः । तदध्ययनार्थं व्रतमप्युपचाराद्ब्रह्म । ब्रह्म चरितुं शीलमस्य । 'व्रते' (३।२।८०) इति 'सुपि–' (३।२।७८) इति वा णिनिः । यद्वा ब्रह्म तपो ज्ञानं वा चरत्यजस्यवश्यम् । 'आवश्यका–' (३।३।१७०) इति णिनिः ॥ (१) ॥*॥ गृहा दाराः सन्त्यस्य । इनिः (५।२।११५) ॥ (१) ॥*॥ वनमेव प्रस्थो, वनस्य वा प्रस्थः प्रदेशः । वनप्रस्थे भवः । 'तत्र भवः' (४।३।५२) इत्यण् ॥ (१) ॥*॥ भिक्षणशीलः । 'भिक्ष याच्ञायाम्' (भ्वा० आ० से०) । 'सनाशंसभिक्ष उः' (३।२।१६८) ॥ (१) ॥*॥ चत्वारोऽवयवा यस्य । 'संख्याया अवयवे तयप्' (५।२।४२) ॥ चतुरवयवसमुदाये ॥*॥ आश्राम्यन्त्यत्र । अनेन वा । 'श्रमु तपसि' (दि० प० से०) । घञ् (३।३।१९) । 'नोदात्तोपदेशस्य–' (७।३।३४) इति वृद्धिर्न । यद्वा आसमन्ताच्छ्रमोऽत्र । स्वधर्मसाधनक्लेशात् । **'आश्रमो** ब्रह्मचर्यादौ वानप्रस्थे वने मठे । अस्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ एकैकम् **'ब्रह्मचार्यादीनाम्'** ॥

द्विजात्यग्रजन्मभूदेववाडवाः ।

विप्रश्च ब्राह्मणः

द्वीति ॥ द्वे जाती जन्मनी यस्य । 'मातुरग्रेऽधि(वि)जननं द्वितीयं मौञ्जिबन्धनात्' (मनुः २।१६९) । **'द्विजातिर्विप्राण्डजयोश्च पुंलिङ्गः'** (इति मेदिनी) ॥ (१) ॥*॥ अग्र आदौ जन्मास्य । अग्रान्मुखाद्वा जन्मास्य । **'अग्रजन्मा** द्विजश्रेष्ठे भ्रातरि ब्रह्मणि स्मृतः' इति विश्वः ॥ (२) ॥*॥ भुवो भुवि वा देव इव ॥ (३) ॥*॥ **'वडवा** कुम्भदास्यश्वा स्त्रीविशेषो द्विजन्मनाम्' इति रभसः ॥ **'(वडवाऽश्वाकुम्भदास्योः स्त्रीविशेषे द्विजस्त्रियाम्'** इति विश्वः) वडवायां जातः । 'तत्र जातः' (४।३।२५) इत्यण् । वाडव इव वा । वाडनम् । 'वाडृ आह्वाव्ये' (भ्वा० आ० से०) घञ् (३।३।१८) । वालनम् । 'वल निरूपणे' चुरादिर्वा । घञ् (३।३।१८) डलयोरेकत्वम् । वाडोऽस्यास्ति । 'अन्यत्रापि (न्येभ्योऽपि) दृश्यते' (वा० ५।२।१०९) इति वः । वाडं वाति । कः (३।२।३) वा । **'वाडवं** करणे स्त्रीणां घोटिकौघे नपुंसकम् । पातालेऽन्न स्त्रियां पुंसि ब्राह्मणे वडवानले' इति मेदिनी ॥ (४) ॥*॥ विप्राति । 'प्रा पूर्तौ' (अ० प० अ०) । 'आतश्चोपसर्गे' (३।१।१३६) इति कः । उप्यतेऽत्र वा । 'ऋज्रेन्द्र–' (उ० २।१८) इति साधुः । विपाति । विपति । 'विप क्षेपे' ( ) वा ॥ (५) ॥*॥ ब्रह्मणोऽपत्यम् । 'तस्यापत्यम्' (४।१।९२) इत्यण् 'अन्' (६।४।१६७) इति टिलोपो न । ब्रह्माधीते । 'तदधीते तद्वेद' (४।२।५९) इत्यण् वा । ब्रह्म जानाति । 'शेषे' (४।२।९२) इत्यण् वा ॥ (६) ॥*॥ **'वक्त्रजस्त्वनमो विप्रो वर्णज्येष्ठः कचो(ठो)द्विजः । मैत्रः पुनरुक्तजन्मा** स्यात्' इति त्रिकाण्डशेषः । **'सूत्रकण्ठः** पुमान् विप्रे खञ्जरीटकपोतयोः' (इति मेदिनी) ॥*॥ षट् **'ब्राह्मणस्य'** ॥

असौ षट्कर्मा यागादिभिर्युतः ॥ ४ ॥

असाविति ॥ असौ विप्रः । षट् कर्माण्यस्य । 'इज्याध्ययनदानानि याजनाध्यापने तथा । प्रतिग्रहश्च तैर्युक्तः षट्कर्मा विप्र उच्यते' ( ) ॥ (१) ॥*॥ एकं **'षट्कर्मणो विप्रस्य'** ॥

विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः ।
धीरो मनीषी ज्ञः प्रज्ञः संख्यावान्पण्डितः कविः ५
धीमान्सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः ।
दूरदर्शी दीर्घदर्शी

वीति ॥ वेत्ति । 'विद ज्ञाने' (अ० प० से०) । 'लटः

शतृ' (३।२।१२४) । 'विदेः शतुर्वसुः' (७।१।३६) वा । **'विद्वाञ्** ज्ञानिनि धीरे च **विद्वान्**ध्यात्मवेदके' इति धरणिः । **'विद्वान्**आत्मविदि प्राज्ञे पण्डिते चाभिधेयवत्' इति विश्वः ॥ (१) ॥*॥ प्रकृष्टं निश्चिनोति, चेतति, चिन्तयति, वा । पृषोदरादिः (६।३।१०९) ॥ (२) ॥*॥ दोषं जानाति । 'आतोऽनुप–' (३।२।१) इति कः ॥ (३) ॥*॥ अस्ति । शक्ता (३।२।१२४) । 'श्नसोरल्लोपः' (६।४।१११) । **'सन्**साधौ धीरशस्तयोः । मान्ये सत्ये विद्यमाने त्रिषु साध्व्युभयोः स्त्रियाम्' (इति मेदिनी) ॥ (४) ॥*॥ सु सुष्ठु ध्यायति । 'ध्यै चिन्तायाम्' (भ्वा० प० अ०) । 'ध्यायतेः संप्रसारणं च' (वा० ३।२।१८०) इति क्विप् संप्रसारणं च ॥ (५) ॥*॥ कौति धर्मादि । 'कु शब्दे' (अ० प० से०) । कवते वा । 'कुङ् शब्दे' (भ्वा० आ० अ०) । विच् (३।२।७५) । गुणः (७।३।८४) । कोर्वेदस्य विदः । वेत्ति । 'इगुपध–' (३।१।१३५) इति कः । यद्वा कवि वेदे विद्या यस्य । **'विदा** ज्ञाने च निर्दिष्टा मनीषायां च योषिति' (इति मेदिनी) ॥ (६) ॥*॥ बुध्यते । 'बुध ज्ञाने' (दि० आ० अ०) । 'इगुपध–' (३।१।१३५) इति कः । **'बुधः** सौम्ये च पण्डिते' (इति मेदिनी) ॥ (७) ॥*॥ धियं राति । 'रा दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । धियमीरयति । 'ईर गतौ' (अ० आ० से०) । अण् (३।२।१) वा **'धीरो** धैर्यान्विते स्थैरे बुधे क्लीबं तु कुङ्कुमे । स्त्रियां श्रवणतुल्यायाम्' ॥ (८) ॥*॥ मनीषास्यास्ति । व्रीह्यादित्वात् (५।२।११६) इनिः ॥ (९) ॥*॥ जानाति । 'इगुपध–' (३।१।१३५) इति कः । **'ज्ञो** ब्रह्मबुधविद्वत्सु' (इति मेदिनी) ॥ (१०) ॥*॥ एवं प्रज्ञः । **'प्रज्ञस्तु** पण्डिते वाच्यलिङ्गो बुद्धौ तु योषिति' (इति मेदिनी) ॥*॥ **'प्राज्ञः'** इति पाठे तु प्रज्ञास्यास्ति । 'प्रज्ञाश्रद्धा–' (५।२।१०१) इति णः ॥ (११) ॥*॥ संख्या विचारणास्त्यस्य । मतुप् (५।२।९४) ॥ (१२) ॥*॥ पण्ड्यतेऽनया । 'पडि गतौ' (भ्वा० आ० से०) 'गुरोश्च' (३।३।१०३) इत्यः । **'पण्डः** षण्ढे धियि स्त्री स्यात्' (इति मेदिनी) । पण्डा जातास्य । तारकादित्वात् (५।२।३६) इतच् । यद्वा पण्डते स्म । 'गत्यर्था–' (३।४।७४) इति क्तः । इट् (७।२।३५) ॥ (१३) ॥*॥ कवते, कौति, वा । 'कुङ् शब्दे' (भ्वा० आ० अ०) । 'कु शब्दे' (अ० प० अ०) वा । 'अच इः' (उ० ४।१३९)।—'कवृ वर्णे'—इति मुकुटश्चिन्त्यः । तस्यौछ्यान्तत्वात् । कविशब्दस्य दन्तोष्ठ्यान्तेषु पाठात् । 'कविर्वाल्मीकिकाव्ययोः । सूरौ काव्यकरे पुंसि स्यात्खलीने तु योषिति' (इति मेदिनी) ॥ (१४) ॥*॥ धीरस्यास्ति । मतुप् (५।२।११५) । **'धीमान्** पण्डिते च बृहस्पतौ' (इति मेदिनी) ॥ (१५) ॥*॥ सूते, सूयते, वा । 'षूङ् प्रसवे' (अ० आ० से०) । 'षूङ् प्राणिगर्भविमोचने' (दि० आ० से०) वा । 'सूङः क्विः' (उ० ४।६४) । एतेन—सुवति—इति विगृह्य स्वामी प्रत्युक्तः । उक्तनिर्देशासंभवात् ।—सुनोति । 'सुजो दीर्घश्च' इति रिदीर्घौ—इति वदन्मुकुटोऽपि । उज्ज्वलदत्तादिष्वस्यादर्शनात् ॥*॥ केचित्तु **'सूरोऽर्कहलयोः पुंसि'** । सूरः सूर्योऽस्त्युपास्यतयास्य । अत इनौ (**सूरी**) नान्तम्—इत्याहुः । **'दूरदृक्** कोविदः **सूरी'** इति रभसः ॥ (१६) ॥*॥ प्रशस्तं कृतं कर्मास्य । इनिः (५।२।११५) । कृतमनेन । 'इष्टादिभ्यश्च' (५।२।८८) इतीनिर्वा । **'कृती** स्यात्पण्डिते योग्ये' इति हैमः ॥ (१७) ॥*॥ कर्षति । 'कृष विलेखने' (भ्वा० प० अ०) । क्तिच् (३।३।१७४) । बाहुलकात्तिर्वा । संज्ञापूर्वकत्वान्न गुणः । **'कृष्टिः** स्यादाकर्षे स्त्री बुधे पुमान्' (इति मेदिनी) । रन्तिदेवोऽपि—'आकर्षणे स्त्रियां **कृष्टिर्भ**वेन्ना तु विपश्चिति' इति ॥ (१८) ॥*॥ लब्धो वर्णः स्तुतिर्येन ॥ (१९) ॥*॥ विचष्टे । 'चक्षिङ् व्यक्तायां वाचि' (अ० आ० से०) । 'अनुदात्तेतश्च हलादेः' (३।२।१४९) इति युच् । 'असनयोः' (वा० २।४।५४) 'बहुलं तणि' (वा० २।४।५४) इति वा ख्याञ् न ॥ (२०) ॥*॥ दूरान् दूराद्वा पश्यति 'दृशिर् प्रेक्षणे' (भ्वा० प० अ०) । ग्रह्यादिणिनिः (३।१।१३४) । 'सुपि०' (३।२।७८) इति वा ॥ (२१) ॥*॥ एवं दीर्घदर्शी ॥ (२२) ॥*॥ द्वाविंशतिः **'पण्डितस्य'** ॥

श्रोत्रियच्छान्दसौ समौ ॥ ६ ॥

श्रोत्रीति ॥ छन्दोऽधीते । 'श्रोत्रियंश्छन्दोऽधीते' (५।२।८४) इति वा श्रोत्रियन्निपात्यते ॥ (१) ॥*॥ पक्षे 'तदधीते तद्वेद' (४।२।५९) इत्यण् ॥ (२) ॥*॥ द्वे **'संपूर्णशाखाध्यायिनः'** ॥

उपाध्यायोऽध्यापकः

उपेति ॥ उपेत्याधीयतेऽस्मात् । 'इङश्च' (३।३।२१) इति घञ् ॥ (१) ॥*॥ अध्यापयति । ण्वुल् (३।१।१३३) ॥ (२) ॥*॥ 'एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः । योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते' (मनुः २।१४१) ॥*॥ द्वे **'उपाध्यायस्य'** ॥

अथ स निषेकादिकृद्गुरुः ।

अथेति ॥ सोऽध्यापकः । निषेको गर्भाधानमादिर्यस्य सीमन्तोन्नयनादेस्तस्य कर्ता । गृणाति धर्मादि । गिरत्यज्ञानं वा । 'गॄ शब्दे' (क्रया० प० से०) । 'गॄ निगरणे' (तु० प० से०) वा । 'कॄग्रोरुच्च' (उ० १।२४) इत्युः । 'गुरुस्त्रिलिङ्ग्यां महति दुर्जरालघुनोरपि । पुमान्निषेकादिकरे पित्रादौ सुरमन्त्रिणि' (इति मेदिनी) । मनुश्च (२।१४२) 'निषेकादीनि कर्माणि यः करोति यथाविधि । संभावयति चान्नेन स विप्रो गुरुरुच्यते' ॥ (१) ॥*॥ एकम् **'संस्कारादिकर्तुर्गुरोः'** ॥

१—मेदिन्यां 'सीर' शब्दघटितत्वेनास्य प्रमादकृतत्वम् ॥ तस्मात् 'सूरश्चारुभटे सूर्ये' इति विश्वस्योपन्यासः कर्तुं योग्यः ॥

मन्त्रव्याख्याकृदाचार्यः

मेति ॥ मन्त्रस्य वेदस्य व्याख्यानं करोति क्विप् (३।२।७६) तुक् । (६।१।७१) ॥ (१) ॥*॥ आचर्यते । 'चर गतौ' (भ्वा० प० से०) । ण्यत् (३।१।१२४) । मनुः—'उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः । साङ्गं च सरहस्यं च तमाचार्यं प्रचक्षते' (२।१४०) ॥ (२) ॥*॥ द्वे **'मन्त्रव्याख्याकर्तुः'** ॥

आदेष्टा त्वध्वरे व्रती ॥ ७ ॥

यष्टा च यजमानश्च

येति ॥ आदिशत्यृत्विजो यागे स्वेष्टसंपादनाय प्रेरयति । 'दिश अतिसर्जने' (तु० प० अ०) । तृच् (३।१।१३३) ॥*॥ 'आदिष्टी' इति पाठे आदिष्टमनेन । 'इष्टादिभ्यश्च' (५।२।८८) इतीनिः । 'क्तस्येन्विषयस्य कर्मणि' (वा० २।३।६) इति सप्तमी ॥*॥ व्रतं भोजनादिनियमोऽस्यास्ति । 'अतः—' (५।२।११५) इतीनिः । यद्वा व्रतयति । 'व्रताद्भोजनतन्निवृत्त्योः' ( ) इति णिच् । 'व्रते' (३।२।८०) इति णिनिः ॥ (१) ॥*॥ यजते तृच् (३।१।१३३) ॥ (२) ॥*॥ 'पूङ्यजोः शानन्' (३।२।१२८) । शानच् (३।२।१२४) वा ॥ (३) ॥*॥ त्रीणि **'यजमानस्य'** ॥

स सोमवति दीक्षितः ।

स इति ॥ स व्रती सोमपानवति यागे आदेष्टा सन् ॥*॥ दीक्षते स्म । 'दीक्ष मौण्ड्येज्योपनयनादौ' (भ्वा० आ० से०) । 'गत्यर्था—' (३।४।७२) इति क्तः । यद्वा दीक्षा जातास्य । तारकादीतच् (५।२।३६) ॥ (१) ॥*॥ एकम् **'सोमयाजिनः'** ॥

इज्याशीलो यायजूकः

ईति ॥ इज्या शीलमस्य । इज्यां शीलति । 'शील समाधौ' (भ्वा० प० से०) । 'शीलिकामि—' (वा० ३।२।१) इति णः ॥ (१) ॥*॥ पुनः पुनः भृशं वा यजते । '—क्रियासमभिहारे—' (३।१।२२) इति यङ् । 'यजजपदशां यङः' (३।२।१६६) इत्यूकः ॥ (२) ॥*॥ द्वे **'यजनशीलस्य'** ॥

यज्वा तु विधिनेष्टवान् ॥ ८ ॥

येति ॥ यजते स्म । 'सुयजोर्ङ्वनिप्' (३।२।१०३) ॥ (१) ॥*॥ एकम् **'विधिवद्धोतुः'** ॥

स गीर्पतीष्ट्वा स्थपतिः

स इति ॥ स यज्वा बृहस्पतिसवनामकयागेनेष्टवान् सन् । स्थानम् स्थः । 'सुपि स्थः' (३।२।४) इत्यत्र 'स्थः' इति योगविभागात् कः । घञर्थे (वा० ३।३।५८) वा । स्थः पतिः **'स्थपतिः** कञ्चुकिन्यपि । जीवेष्टियाजके शिल्पिभेदे नासत्तमे त्रिषु' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'बृहस्पतियागकर्तुः'** ॥

सोमपीती तु सोमपः ।

सवितिं ॥ सोमस्य पीतम् । सोमपीतमस्यास्ति । इनिः (५।२।११७५) ।—'इष्टादिभ्यश्च' (५।२।८८) इतीनिः—इति मुकुटः ॥*॥ स्वामी तु—पानं पीथम् । 'पातृतुदिवचि—' (उ० २।७) इति थक् । 'शुभास्था—' (६।४।६६) इतीत्वम् । 'सोमपीथः'—इत्याह ॥ (१) ॥*॥ सोमं पिबति । 'आतोऽनुप—' (३।२।३) इति कः ॥*॥ ('सोमपाः' इति) दीर्घपाठे तु क्विप् (३।२।७६) ॥ (२) ॥*॥ सर्वदायम् । दीक्षितस्तु तत्कालम् ॥*॥ द्वे **'सोमयाजिनः'** ॥

सर्ववेदाः स येनेष्टो यागः सर्वस्वदक्षिणः ॥ ९ ॥

सेति ॥ सर्वस्वं दक्षिणा यत्र विश्वजिदादौ स येनेष्टः कृतः । सर्वं वेदयति । विदृ लाभे' (तु० उ० अ०) । ण्यन्तः । सर्वं विन्दति वा । असुन् (उ० ४।१८९) ॥ (१) ॥*॥ एकम् **'विश्वजिदादियज्ञस्य'** ॥

अनूचानः प्रवचने साङ्गेऽधीती

अन्विति ॥ अन्ववोचत् । 'उपेयिवान्—' (३।२।१०९) इति साधुः । **'अनूचानो** विनीते स्यात्साङ्गवेदविचक्षणे' इति विश्वः ॥ (१) ॥*॥ शिक्षाद्यङ्गषट्कोपेते । प्रोच्यते । ल्युट् (३।३।११३) । प्रवचनो वेदस्तत्र । अधीतमनेन । 'इष्टादिभ्यश्च' (५।२।८८) इतीनिः । 'क्तस्येन्विषयस्य—' (वा० २।३।३६) इति सप्तमी ॥*॥ एकम् **'साङ्गवेदाध्येतुः'** ॥

गुरोस्तु यः ।

लब्धानुज्ञः समावृत्तः

ग्विति ॥ गुरोः सकाशाल्लब्धा प्राप्तानुज्ञा आज्ञा येन । समावर्तते स्म । 'गत्यर्था—' (३।४।७४) इति क्तः ॥ (१) ॥*॥ **'गुरुकुलवासान्निवृत्तस्य** एकम् ॥

सुत्वा त्वभिषवे कृते ॥१०॥

स्विति ॥ सुतवान् 'षुञ् अभिषवे'(स्वा० उ० अ०) । 'सुयजोर्ङ्वनिप्' (३।२।१०३) । तुक् (६।१।७१) ॥ (१) ॥*॥ अभिषवेऽवभृथस्नाने ॥*॥ एकम् **'स्नातकस्य'** ॥

छात्रान्तेवासिनौ शिष्ये

छेति ॥ गुरुदोषाच्छादनं छत्रम् । तच्छीलमस्य । **'छत्रादिभ्यो णः'** (४।४।६२) ॥ (१) ॥*॥ अन्ते समीपे वस्तुं शीलमस्य । 'सुपि—' (३।२।७८) इति णिनिः । 'शयवासवासि—' (६।३।१८) इत्यलुक् । **'अन्तेवासी** भवेच्छिष्ये चण्डाले प्रान्तगेऽपि च' इति विश्वः ॥ (२) ॥*॥ शिष्यते । 'शासु अनुशिष्टौ' (अ० प० से०) । 'एतिस्तुशास्—' (३।१।१०९) इति क्यप् । 'शास इदङ्हलोः' (६।४।३४) 'शासिवसि—' (८।३।६०) इति षः ॥ (३) ॥*॥ त्रीणि **'शिष्यस्य'** ॥

शैक्षाः प्राथमकल्पिकाः ।

शायिति ॥ शिक्षामधीयते । 'तदधीते—' (४।२।५९)

इत्यण् । शिक्षाया इमे । तत्र भवा वा । यद्वा शिक्षां लभन्ते । 'शेषे' (४।२।९२) इत्यण् ॥ (१) ॥*॥ प्रथमकल्पः आद्यारम्भः प्रयोजनं येषां ते । 'प्रयोजनम्' (५।१।१०९) इति ठक् । यद्वा प्रथमकल्पमधीयते । 'विद्यालक्षणकल्पान्ताच्च' (वा० ४।२।६०) इति ठक् । **'कल्पः** शास्त्रे विधौ न्याये' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'प्रथमारब्धवेदानाम्'** ॥

एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः ॥ ११ ॥

एकेति ॥ ब्रह्म वेदस्तदध्ययनव्रतमप्युपचाराद्ब्रह्म । एकस्मिन् ब्रह्मणि व्रताचरणं येषां ते । मिथः परस्परम् ॥*॥ समानं ब्रह्म चरन्ति । 'व्रते' (३।२।८०) इति णिनिः 'चरणे ब्रह्मचारिणि' (६।३।८६) इति समानस्य सः ॥ (१) ॥*॥ एकम् **'समानशाखाध्येतॄणाम्'** ॥

सतीर्थ्यास्त्वेकगुरवः

सेति ॥ समाने तीर्थे वसन्ति । 'समानतीर्थे वासी' (४।४।१०७) इति यत् । 'तीर्थे ये' (६।३।८७) इति समानस्य सः ॥ (१) ॥*॥ एको गुरुर्येषां ते ॥ (२) ॥*॥ द्वे **'सहाध्यायिनाम्'** ॥

चितवानग्निमग्निचित् ।

चीति ॥ अग्निमचैषीत् । 'चिञ् चयने' (स्वा० उ० अ०) 'अग्नौ चेः' (३।२।९१) इति क्विप् । तुक् (६।१।७१) ॥ (१) ॥*) एकम् **'अग्न्युपासकस्य'** ॥

पारम्पर्योपदेशे स्यादैतिह्यमितिहाव्ययम् ॥ १२ ॥

पेति ॥ परम्परया आगतः । 'तत आगतः' (४।३।७४) इत्यण् । चतुर्वर्णादित्वात् (५।१।१२४) ष्यञ् । पारम्पर्यश्चासावुपदेशश्च । तस्मिन् ॥*॥ 'अनन्तावसथेति ह–' (५।४।२३) इति ष्यः ॥ (१) ॥*॥ इत्येवं ह किल ॥ (५) ॥*॥ यत्तु मुकुटेनोक्तम्—'पूर्वे च पूर्वतराश्च' इति द्वन्द्वे 'परोवरपरम्परपुत्रपौत्रमनुभवति' (५।२।१०) इति निर्देशात् परम्परादेशे टापि परम्परा । तदुक्तम् 'विनापि प्रत्ययं परम्पराशब्दो दृश्यते' ( ) तच्चिन्त्यम् । सैनियोगशिष्टन्यायेन स्वप्रत्ययसंनियोग एव परम्परादेशविधानात् । परम्पराशब्दस्य स्वव्युत्पन्नत्वात् । तदुक्तम्—'अस्ति हि परम्पराशब्दोऽव्युत्पन्नं प्रातिपदिकम्' इति । यद्वा परं पिपर्ति । पचाद्यच् (३।१।१३४) । स्वपचाजारभरावत् । पृषोदरादिः (६।३।१०९) ॥*॥ द्वे **'परंपरोपदेशस्य'** ॥

उपज्ञा ज्ञानमाद्यं स्यात्

उपेति ॥ उपज्ञानम् । 'आतश्चोपसर्गे' (३।३।१०६) इत्यङ् ॥ (१) ॥*॥ यथोपदेशं विना श्लोकनिर्माणे वाल्मीकेर्ज्ञानम् ॥*॥ एकम् **'आद्यज्ञानस्य'** ॥

ज्ञात्वारम्भ उपक्रमः ।

क्रमेति ॥ उप प्रथमं क्रमणम् । 'क्रमु पादविक्षेपे' (भ्वा० प० से०) । भावे घञ् (३।३।१८) । 'नोदात्तोपदेश–' (७।३।३४) इति न वृद्धिः । **'उपक्रमस्तूपधायां ज्ञात्वारम्भे** च विक्रमे । चिकित्सायाम्' (इति मेदिनी) ॥ (१) ॥*॥ यथा माने नन्दस्य प्रथमारम्भ उपक्रमः सः । एकं **'ज्ञात्वा प्रथमारम्भस्य'** ॥

यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः ॥ १३ ॥

येति ॥ इज्यते । अनेन वा । अत्र वा । 'यज देवपूजादौ' (भ्वा० उ० अ०) । 'यजयाच–' (३।३।९०) इति नङ् । **'यज्ञः** स्यादात्मनि मखे नारायणहुताशयोः' इति हैमः ॥ (१) ॥*॥ सूयते सोमोऽत्र । 'षुञ् अभिषवे' (स्वा० उ० अ०) । 'ऋदोरप्' (३।३।५७) । यद्वा सूयतेऽत्र । अनेन वा । 'षू प्रेरणे' (तु० प० से०) । अप् (३।३।५७) । घः (३।३।११८) वा । **'सवो** यज्ञे च संधाने' इति मेदिनी ॥ (२) ॥*॥ न ध्वरति । 'ध्वृ कौटिल्ये' (भ्वा० प० अ०) । अच् (३।१।१३४) । अध्वानं राति वा । 'आतोऽनुप–' (३।२।३) इति को वा । **'अध्वरः** सावधाने स्याद्वसुभेदे क्रतौ पुमान्' (इति मेदिनी) ॥ (३) ॥*॥ इज्यते । अनेन वा । अत्र वा । यजेर्घञ् (३।३।१९) ॥ (४) ॥ सप्तभिश्छन्दोभिरभिजिह्वाभिर्वा तन्यते । यद्वा तानि सप्त तन्यन्तेऽत्र 'सितनिगमि–' (उ० १।६९) इति तुन् ॥ (५) ॥*॥ मखन्ति देवा अत्र । अनेन वा । 'मख गतौ' (भ्वा० प० से०) 'हलश्च' (३।३।१२१) इति घञ् । संज्ञापूर्वकत्वान्न वृद्धिः । यद्वा 'क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते' ( ) इति घञ्विषयेऽपि 'पुंसि–' (३।३।११८) इति घः ॥ (६) ॥*॥ करोति । क्रियते वा । 'कृञः कतुः' ( ) । **'क्रतुर्यज्ञे** मुनौ पुंसि (इति मेदिनी) ॥ (७) ॥*॥ सप्त **'यज्ञस्य'** ॥

पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः ।
एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकाः ॥ १४ ॥

पेति ॥ पठनम् । पाठनम् वा । भावे घञ् (३।३।१८) **'पाठश्च** पठने ख्यातो विद्धपर्यां तु योषिति' (इति मेदिनी) ॥ (१) ॥*॥ हवनम् । 'हु दानादनयोः' (जु० प० अ०) । 'अर्तिस्तुसुहुसृ–' (उणा० १।१४०) इति मन् ॥ (१) ॥*॥ अतिथीनामदृष्टपूर्वाणां गृहमागतानाम् । सपर्यणम् । 'सपर पूजायाम्' । 'कण्ड्वादिभ्यो यक्' (३।१।२७) । 'अ प्रत्ययात्' (३।३।१०२) । सपर्या पूजा ॥ (१) ॥*॥ तृप्यति । 'तृप प्रीणने' (दि० प० अ०) । भावे ल्युट् (३।३।११५) ॥ (१) ॥*॥ वलनम् । 'वल दाने' (संवरणे) (भ्वा० आ० से०) ।

१—'तृप्यति' इति तु प्रमादलिखितम् ॥

इन् (उ० ४।११८) । **'बलिर्दैत्योपहारयोः** । करे चामरदण्डे च गृहदारुशरांशयोः । त्वक्संकोचे गन्धके च' इति हैमः ॥ (१) ॥*॥ महान्तश्च ते यज्ञाश्च । ब्रह्मयज्ञ आदिर्येषां तानि ब्रह्मयज्ञादीनि नामानि येषां ते ॥*॥ मनुः—'अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्' (३।७०) इति **'पाठादीनाम्'** एकैकम् ॥

समज्या परिषद्गोष्ठी सभासमितिसंसदः ।
आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदः ॥१५॥

सेति ॥ समजन्त्यस्याम् । 'अज गतौ' (भ्वा० प० से०) । 'संज्ञायां समज–' (३।३।९९) इति क्यप् । 'क्यपि च' (वा० २।४।५६) इति वीभावो न ॥ (१) ॥*॥ परितः सीदन्त्यस्याम् 'षदॢ विशरणादौ' (भ्वा०, तु० प० अ०) । संपदादि क्विप् (वा० ३।३।१०८) । 'सदिरप्रतेः' (८।३।६६) इति षत्वम् ॥*॥ 'बाहुलकात्परेरन्त्यलोपे **पर्षद्**' च ॥ (२) ॥*॥ गावोऽनेका वाचस्तिष्ठन्त्यस्याम् । घञर्थे कः (वा० ३।३।१०८) । 'अम्बाम्ब–' (८।३।९७) इति षत्वम् । गौरादिङीष् (४।१।४१) । **'गोष्ठी** सभासंलापयोः स्त्रियाम्' (इति मेदिनी) ॥ (३) ॥*॥ सह भान्त्यस्याम् । 'भा दीप्तौ' (अ० प० अ०) । भिदाद्यङ् (३।३।१०६) । 'समाना भान्त्यस्याम्' इति वा । 'समानस्य' (६।३।८४) इति योगविभागात् 'सभा'– (२।४।२३) इति निर्देशाद्वा समानस्य सः । **'सभा** सामाजिके गोष्ठ्यां द्यूतमन्दिरयोरपि' (इति मेदिनी) ॥ (४) ॥*॥ समयन्त्यस्याम् । 'इ गतौ' (भ्वा० प० अ०) । क्तिन् (३।३।९४) । सह विद्यमाना मिलितैर्वा मितिः प्रमाऽस्याम्, इति वा । **'समितिः** संपराये स्यात्सभायां संगमेऽपि च' (इति मेदिनी) ॥ (५) ॥*॥ संसीदन्त्यस्याम् । क्विप् (वा० ३।३।१०८) ॥ (६) ॥*॥ आतिष्ठन्त्यस्याम् । अधिकरणे ल्युट् (३।३।११७) ॥ (७) ॥*॥ (८) ॥*॥ सीदन्त्यस्याम् । असुन् (उ० ४।१८९) ॥ (९) ॥*॥ नव **'सभायाः'** ॥

प्राग्वंशः प्राग्हविर्गेहात्

प्रेति ॥ प्राञ्चति । 'अञ्चु गतिपूजनयोः' (भ्वा० प० से०) । 'ऋत्विग्–' (३।२।५९) इति क्विन् । प्राङ् वंशो गोत्रं स्थूणा वात्र ॥ (१) ॥*॥ हविःशालायाः पूर्वभागे यजमानादीनां स्थित्यर्थे गेहे प्राग्वंशशब्दो वर्तते ॥*॥ एकम् **'प्राग्वंशस्य'** ॥

सदस्या विधिदर्शिनः ।

सेति ॥ सदसि साधवः । 'तत्र साधुः' (४।४।९८) इति यत् ॥ (१) ॥*॥ विधिं द्रष्टुं शीलं येषां ते । 'सुपि–' (३।२।७८) इति दृशेर्णिनिः । न्यूनाधिकविचारका ऋत्विग्विशेषाः ॥*॥ एकम् **'सदस्यस्य'** ॥

सभासदः सभास्तारः सभ्याः सामाजिकाश्च ते १६

सेति ॥ सभायां सीदन्ति । 'सत्सूद्विष–' (३।२।६१) इति क्विप् ॥ (१) ॥*॥ सभां स्तृणन्ति । 'स्तृञ् आच्छादने' (क्र्या० प० से०) । 'कर्मण्यण्' (३।२।१) ॥ (२) ॥*॥ सभायां साधवः । 'सभाया यः' (४।४।१०५) ॥ (३) ॥*॥ समाजं समवयन्ति । 'समवायान्समवैति' (४।४।४३) इति ठक् । समाजं रक्षन्ति वा । 'रक्षति' (४।४।३३) इति ठक् ॥ (४) ॥*॥ चत्वारि **'सभ्येषु'** ॥

अध्वर्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमात् ।

अध्वेति ॥ अध्वरमिच्छति । 'सुपः–' (३।१।८) इति क्यच् । 'कव्यध्वरपृतनस्य–' (७।४।३९) इति लोपः । 'क्याच्छन्दसि' (३।२।१७०) इत्युः । यद्वा न ध्वरति । 'ध्वृ कौटिल्ये' (भ्वा० प० अ०) । विच् (३।२।७५) अध्वरं याति, यौति, वा । मितद्वादित्वात् (वा० ३।२।१८०) डुः ।—अपष्ट्वादि—इति मुकुटश्चिन्त्यः । गणाभावात् ॥ (१) ॥*॥ उद्गायति साम । 'गै शब्दे' (भ्वा० प० अ०) । 'तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ' (उ० २।९४) ॥ (१) ॥*॥ जुहोति । 'नप्तृनेष्टृत्वष्टृहोतृपोतृ–' (उ० २।९५) इति साधुः ॥ (१) ॥*॥ यजुश्च सामानि च ऋचश्च । 'चार्थे द्वन्द्वः' (२।२।२९) । समासान्तविधेरनित्यत्वात् 'ऋक्पूर्–' (५।४।७४) इत्यकारो न । यजुः सामर्चो विदन्ति । 'सत्सूद्विष–' (३।२।६१) इति क्विप् । यजुर्विदध्वर्युः । सामविदुद्गाता । ऋग्विद् होता । **'ऋत्विग्विशेषाणां'** क्रमादेकैकम् ॥

आग्नीध्राद्या धनैर्वार्या ऋत्विजो याजकाश्च ते ॥१७॥

आग्नीति ॥ अग्नीनिन्धे । 'ञि इन्धी दीप्तौ' (रु० आ० से०) । क्विप् (३।२।७६) । नलोपः (६।४।२४) । अग्नीद्धृत्विक् । अग्नीधः स्थानम् । 'अग्नीधः शरणे रणू भं च' (वा० ४।३।१२०) । आग्नीध्रं स्थानम् । तात्स्थ्यात्सोऽपि । 'स्फायि–' (उ० २।१३) इति रक् । नलोपः (६।४।२४) । अग्नीध्रः—इति मुकुटः । तच्च । स्फाय्यादिष्विन्धेरपाठात् । अस्मदुक्तप्रक्रियायाः सत्त्वाच्च । आग्नीध्र आद्यो येषां ब्रह्मोद्गातृहोत्रध्वर्युब्राह्मणाच्छंसिअच्छावाकनेष्टृादीनां षोडशानाम् ॥ (१) ॥*॥ धनैर्हैतुभिः वरणे करेणैर्वा व्रियन्ते । 'वृङ् संभक्तौ' (क्र्या० आ० से०) । ण्यत् (३।१।१२४) । क्यप् (३।१।१०९) तु वृञ एव ॥*॥ ऋतौ यजति । 'ऋत्विग्–' (३।२।५९) इति साधुः ॥ (२) ॥*॥ यजन्ति । ण्वुल् (३।१।१३३) । **'याजकस्तु** गजे राज्ञो याज्ञिकेऽपि' इति मेदिनी ॥ (३) ॥*॥ त्रीणि ।—'वृताः कुर्वन्ति ये यज्ञमृत्विजो याजकाश्च ते' इति काल्यः—इति मते द्वे **'ऋत्विजाम्'** ॥

वेदिः परिष्कृता भूमिः

वेदिरिति ॥ विद्यते शोधनेन ज्ञायते, विचार्यते, प्राप्यते, वा । 'तॄ पिषिरुहिवृति–' (उ० ४।११९) इतीन् । यद्वा वेदयति, वेद्यते वा । 'विद निवासादौ' चुरादिः । 'अच इः' (उ० ४।१३९) । **'वेदिः** स्यात्पण्डिते पुमान् । स्त्रियामङ्गुलि-

मुद्रायां स्यात् परिष्कृतभूतले' (इति मेदिनी) ॥ (१) ॥*॥ परितः कृता संस्कृता । 'संपरिभ्याम्–' (६।१।१३७) इति सुट् । 'परिनिवि–' (८।३।७०) इति षत्वम् ॥*॥ एकम् **'यज्ञवेद्याः'** ॥

समे स्थण्डिलचत्वरे ।

सेति ॥ स्थलन्त्यस्मिन् । 'ष्ठल स्थाने' (भ्वा० प० से०) । 'मिथिलादयश्च' (उ० १।५७) इति साधुः ॥ (१) ॥*॥ चतन्त्यस्मिन् । 'चते याचने' (भ्वा० उ० से०) 'कृवृगृवृचतिभ्यः ष्वरच्' (उ० २।१२१) **'चत्वरं** स्थण्डिलेऽङ्गणे' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'यागार्थं संस्कृतभूमेः'** ॥—यज्ञार्थं परिष्कृताया अनिन्द्योन्नताया यज्ञभूमेः—इति मुकुटः ॥

चषालो यूपकटकः

चेति ॥ चषति । चष्यते वा । 'चष भक्षणे' (भ्वा० उ० से०) । 'सानसिवर्णति–' (उ० ४।१०७) इति साधुः ॥ (१) ॥*॥ यूपस्याग्रे कृतः कटकाकारः ॥ (२) ॥*॥ द्वे **'यूपकटकस्य'** ॥

कुम्बा सुगहना वृतिः ॥ १८ ॥

क्रिति ॥ कुम्ब्यते अनया, वा । 'कुबि आच्छादने' (भ्वा०, चु० प० से०) । 'चिन्तिपूजिकथि–' (३।३।१०७) इत्यङ् ॥ (१) ॥*॥ सुगहना निबिडा वृतिर्वेष्टनम् । एकम् **'निबिडवेष्टनस्य'** ॥

यूपाग्रं तर्म

त्विति ॥ यूपस्याग्रम् ॥ (१) ॥*॥ तरति, मनिन् (३।२।७५) ॥ (२) ॥*॥ द्वे **'यूपाग्रे'** ॥

निर्मन्थ्यदारुणि त्वरणिर्द्वयोः ।

नीति ॥ निर्मथ्यते । 'मन्थ विलोडने' (भ्वा० प० से०) । ण्यत् (३।१।१२४) निर्मन्थ्यं च तद्दारु च ॥*॥ ऋच्छति । 'ऋ गतिप्रापणयोः' (भ्वा० प० अ०) । 'अर्तिसृधृधमि–' (उ० २।१०२) इत्यनिः । **'अरणिर्वैहिमन्थे** ना द्वयोर्निर्मन्थ्यदारुणि' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'अरणेः'** ॥

दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः ॥ १९ ॥

देति ॥ दक्षिणोऽग्निः । 'दिक्संख्ये संज्ञायाम्' (२।१।५०) इति समासः । मुकुटस्तु—दक्षिणाया दिशोऽग्निः । 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' (वा० ५।३।२८) । दक्षिणाग्निः—इत्याह । तन्न । संज्ञात्वेन 'दिक्संख्ये–' इत्येतत्सूत्रोदाहरणत्वात् । तत्र च 'समानाधिकरणेन' इत्यधिकारात् ॥ (१) ॥*॥ गृहपतिना संयुक्तः । 'गृहपतिना संयुक्ते ञ्यः' (४।४।९०) ॥ (१) ॥*॥ आहूयते प्रणीयते प्रक्षिप्यते वा हविरत्र । 'कृत्यल्युटः–' (३।३।११३) इत्यधिकरणेऽनीयर् । यद्वा आहवनमर्हति । 'तदर्हति' (५।१।६३) इति छः ॥ (१) ॥*॥ क्वचित्तु त्रयाणां द्वन्द्वः पठ्यते ॥ एकैकं **'अग्निविशेषस्य'** ॥

अग्नित्रयमिदं त्रेता

अग्नीति ॥ त्राणम् । त्राः सदा संधुक्षणम् । तामिता । यद्वा त्रायन्ते त्रा आहुतयः । ताभिरिता । त्रिखमिता, इति वा । पृषोदरादिः (६।३।१०९) । **'त्रेता** युगेऽग्नित्रये च' इति हैमः ॥ (१) ॥*॥ एकम् **'अग्नित्रयस्य'** ॥

प्रणीतः संस्कृतोऽनलः ।

प्रेति ॥ प्रकर्षं नीतः । **'प्रणीत** उपसंपन्ने कृते क्षिप्ते प्रवेशिते । 'संस्कृताग्नौ च' इति हेमचन्द्रः ॥ (१) ॥*॥ एकम् **'संस्कृताग्नेः'** ॥

समूह्यः परिचाय्योपचाय्यावग्नौ प्रयोगिणः ॥ २० ॥

सेति ॥ समुह्यते, समूह्यते, वा । 'वह प्रापणे' (भ्वा० उ० अ०) । 'ऊह वितर्के' (भ्वा० आ० से०) वा ॥ (१) ॥*॥ परिचीयते ॥ (२) ॥*॥ उपचीयते ॥ (३) ॥ 'अग्नौ परिचाय्योपचाय्यसमूह्याः' (३।१।१२१) इति साधवः ॥*॥ प्रयोगोऽस्ति येषां ते । अग्नौ प्रयोक्तव्या अग्निनामानीत्यर्थः । **'त्रीण्यग्नौ प्रयोगिणाम्'** ॥

यो गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते ।
तस्मिन्नानाय्यः

य इति ॥ दक्षिणाग्नित्वेन संस्क्रियते ॥*॥ आनीयते 'आनाय्योऽनित्ये' (३।१।१२७) इति साधुः ॥*॥ यस्तु ब्राह्मणवैश्यकुलयोनिः स 'आनेयः' ॥*॥ एकम् **'दक्षिणाग्नितः संस्कृताग्नेः'** ॥

अथाग्नायी स्वाहा च हुतभुक्प्रिया ॥ २१ ॥

अथेति ॥ अग्नेः स्त्री । 'वृषाकप्यग्नि–' (४।१।३७) इत्यैङीष् च ॥ (१) ॥*॥ सुष्ठु आहूयन्ते देवा अनया । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति ङः । स्वाहास्यस्या वा । अर्शआद्यच् (५।२।१२७) ॥ (२) ॥*॥ हुतभुजः प्रिया ॥ (३) ॥*॥ त्रीणि **'अग्नेः प्रियायाम्'** ॥

ऋक्सामिधेनी धाय्या च या स्यादग्निसमिन्धने ।

ऋगिति ॥ समिधामाधानी । 'समिधामाधाने षेण्यण्' (वा० ४।३।१२०) । षित्त्वात् (४।१।४१) ङीष् । 'हलः' (६।४।४९) इति यलोपः ॥ (१) ॥*॥ धीयते पुष्यतेऽग्निरनया । 'पाय्यसांनाय्यनिकाय्यधाय्या–' (३।१।१२९) इति साधुः ॥ (२) ॥*॥ अग्नेः समिन्धने समुद्दीपने या ऋक् तत्र ॥*॥ द्वे **'समित्प्रक्षेपेण वह्निप्रज्वलने या ऋक् प्रयुज्यते तस्याः'** ॥

गायत्रीप्रमुखं छन्दः

गेति ॥ गायन्तं त्रायते । 'आतोऽनुप–' (३।२।३) इति

१—सकलपुस्तकोपलब्धः 'यस्य हलः' (६।४।४९) इत्यस्योपन्यासः प्रामादिकः । तत्सूत्रस्यार्धधातुकाधिकारीयत्वात् । तस्मात् **'हलस्तद्धितस्य'** (६।४।१५०) इत्यस्योपन्यासो योग्यः ॥

कः । गौरादिः (४।१।४१) । यद्वा गानम् । गायः । घञ् (३।३।१८) । युक् (७।३।३३) गायेन गानेन त्रायते । 'त्रैङ् पालने' (भ्वा० आ० अ०) । 'सुपि' (३।२।४) इति योगविभागात् कः । मूलविभुजादित्वकल्पनमपार्थकम् । तस्यानाकारान्तार्थत्वात् **'गायत्री** त्रिपदादेवीछन्दोभित्खदिरेषु च' (इति मेदिनी) ॥ (१) ॥*॥ षडक्षरपदा गायत्री । प्रमुखपदेन उष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यतिजगतीशक्करीत्यादि एकाक्षरवृद्ध्या बोध्यम् ॥*॥ चन्दते । 'चदि आह्लादने दीप्तौ च' (भ्वा० आ० से०) 'चन्देरादेश्च छः' (उ० ४।२।१९) इत्यसुन् ॥ (१) ॥*॥ **प्रथमप्रमुखे** चोभे प्रधाने च प्रकीर्तिते' इत्यजयः ॥*॥ एकम् **'छन्दसाम्'** ॥

हव्यपाके चरुः पुमान् ॥ २२ ॥

हेति ॥ पच्यते । कर्मणि घञ् (३।३।१९) । हव्यं च तत् पाकश्च । यद्वा भावे घञ् (३।३।१८) । पचनं पाकः । हव्यस्य पाकः । 'अनवक्लाविवान्तरूष्मपाक ओदनश्चरुः' इति याज्ञिकाः ॥*॥ चर्यते भक्ष्यते । 'चर गतौ भक्षणे च' (भ्वा० प० से०) । 'भृमृशीतृचरि–' (उ० १।७) इत्युः । मीमांसकैरपि त्रिवृच्चर्वधिकरणे ( ) अन्नपरत्वं चरुशब्दस्याभ्युपगतम् । 'उगवादिभ्यो यत्' (५।१।२) इत्यत्र केयटस्तु(टार्थस्तु) 'स्थालीवाची चरुशब्दः तात्स्थ्यादोदने भाक्तः' इत्याह । विश्वप्रकाशे तु **'चरुर्भाण्डे** च हव्यान्ने' इत्यनेकार्थतोक्ता । 'अथ **चरुः** पुमान्हव्यान्नभाण्डयोः' इति मेदिनी च । स्वामी तु—पक्वं होतव्यं चरुः । चर्यते रध्यते इति । स्थाल्यपि चरुः हव्यस्य पाकोऽत्र—इत्याह । एतेन—केचित्तु 'पच्यतेऽत्रेति । 'हलश्च' (३।३।१२१) इति घञ् । 'पाकं व्युत्पाद्य हव्यपाकस्थाल्यादिरुच्यते । अन्यत्रौपचारिकः' इत्याहुः । तदसत् ।—इति मुकुटः प्रत्युक्तः । प्रयोगदर्शनमपि सूपपादमनेकार्थकतायाम् ॥ (१) ॥*॥ एकम् **'चरोः'** ॥

आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः ।

आमीति ॥ आमिष्यते । 'मिषु सेचने' (भ्वा० प० से०) बाहुलकात् सक् । यद्वा आ मक्षति । 'मक्ष रोषे संघाते च' (भ्वा० प० से०) । अच् (३।१।१३४) । पृषोदरादिः ॥ (१) ॥*॥ श्रृते क्वथिते तप्ते च पयसि दध्नो योजनात् या स्यात् । यत्तु—'आङ्पूर्वान्मिहेर्दीर्घश्च' इति स उपधादीर्घत्वं च इति दीर्घमध्यं मुकुट आचख्यौ तच्चिन्त्यम् । उज्ज्वलदत्तादावदर्शनात् । एकम् **'आमिक्षायाः'** ॥

धवित्रं व्यजनं तद्यद्वचितं मृगचर्मणा ॥ २३ ॥

धेति ॥ धूयतेऽनेन । 'धूञ् कम्पने' (क्या० उ० से०) । 'धू विधूनने' (तु० प० से०) वा । 'अर्तिलूधूसू–' (३।२।१८४) इतीत्रः ॥*॥ धुवतेः कुटादित्वेन (१।२।१) ङित्त्वाद्गुणाभावादुवङि **'धुवित्रम्'** इत्येके ॥ (१) ॥*॥ एकम् **'अग्नेः संधुक्षणाय मृगत्वचा रचितस्य व्यजनस्य'** ॥

पृषदाज्यं सदध्याज्ये

प्रिति ॥ पर्षति, पृष्यते वा । 'पृषु सेचने' (भ्वा० प० से०) । 'वर्तमाने पृषत्–' (उ० २।८४) इति साधुः । पृषच्च तदाज्यं च । यद्वा पृषद्भिः सहितमाज्यम् ॥ (१) ॥*॥ दध्ना सहिते घृते । **'पृषातकं** सदध्याज्ये पृषदाज्यं तदुच्यते' ॥ ॥*॥ एकं **'दधिमिश्रितघृतस्य'** ॥

परमान्नं तु पायसम् ।

पेति ॥ परमं च तदन्नं च । 'सन्महत्–' (२।१।६१) इति समासः । यद्वा परमाणामुत्तमानामन्नम् ॥ (१) ॥*॥ पयसि–संस्कृतम् । 'संस्कृतं भक्षाः' (४।२।१६) इत्यण् । पयसा इति तु मुकुटस्य प्रमादः । 'तत्रोद्धृतम्–' (४।२।१४) इत्यतः 'तत्र' इत्यनुवृत्तेः । **'पायसः** श्रीवासे च **पायसं** परमान्नके' इति हैमः । **'पायसन्तु** क्लीवपुंसोः श्रीवासपरमान्नयोः' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'क्षीरान्नस्य'** ॥

हव्यकव्ये दैवपैत्रे अन्ने

हेति ॥ हूयन्ते प्रीण्यन्ते देवा येन । हूयते प्रक्षिप्यते वा । 'हु दानादनयोः' (जु० प० अ०) । 'अचो यत्' (३।१।९७) ॥ (१) ॥*॥ कूयते पितृभ्यः । 'कु शब्दे' (अ० प० अ०) । 'अचो यत्' (३।१।९७) ।—'कवृ वर्णे (भ्वा० आ० से०) । पोरदुपधात्' (३।१।९८) इति यत्—इति मुकुटस्य प्रमादः । तस्य चित्ररूपपरस्य प्रकृतेऽन्वयासंभवात् । 'श्विता वर्णे' (भ्वा० आ० से०) 'णील वर्णे' (भ्वा० प० से०[1]) इत्यादाविव वर्णस्य रूपार्थकत्वात् ॥ (१) ॥*॥ देवानामिदम् । पितॄणामिदम् 'तस्येदम्' (४।३।१२०) इत्यण् । 'पित्र्ये' इति पाठे पितरो देवता यस्य । 'वाय्वृतु–' (४।२।३१) इति यत् । देवान्नं हव्यम् । पित्रन्नं कव्यम् । द्वे **'हव्यकव्ययोः'** ॥

पात्रं स्रुवादिकम् ॥ २४ ॥

पेति ॥ पाति, पिबत्यनेन वा । ष्ट्रन् (उ० ४।१५९) ।—'दादिभ्यः ष्ट्रन्'—इति मुकुटश्चिन्त्यः । तादृशसूत्रादर्शनात् । **'पात्रं** तु भाजने योग्ये स्रुवादौ राजमन्त्रिणि । तीरद्वयान्तरे च' (इति मेदिनी) ॥ (१) ॥*॥ स्रवति घृतादिकम् । 'स्रु स्रवणे' (भ्वा० प० अ०) । 'स्रुवः कः' (उ० २।६१) ।—'घञर्थे कः'—इति मुकुटश्चिन्त्यः । 'स्रुवः कः' इतिपदोक्तस्य सत्वात् । आदिना चमसोलूखलमुसलस्फ्यादि ॥

१—हव्यात्रे यथा—'हेमपात्रे कृतं दोर्भ्यामाददानः पयश्चरुम्' । भाण्डे यथा—'उत्पलकान्तिकचरुः (लः काञ्चनचरुः) स्वात्मनः पार्श्वदाहकः'—इत्यनेकार्थकैरवाकरकौमुदी ॥

१—'पात्रमात्रे त्रिषु क्लीवं स्रुवादौ राजमन्त्रिणि । तीरद्वयान्तरे योग्ये' इति पाठः ॥

ध्रुवोपभृज्जुहूनां तु स्रुवो भेदाः स्रुचः स्त्रियः ।

ध्रुवेति ॥ ध्रुवति 'ध्रुव स्थैर्ये' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । यद्वा 'ध्रु स्थैर्ये' (तु० प० अ०) । अच् (३।१।१३४) । कुटादित्वात् (१।२।१) ङित्त्वम् । उवङ् (६।४।७७) । **'ध्रुवः** शङ्खौ हरे विष्णौ वटे चोत्तानपादजे । वसुयोगभिदोः पुंसि क्लीबं निश्चिततर्कयोः । स्त्री मूर्वाव्योशालपर्ण्यां गीतीस्रुग्भेदयोस्त्रिषु । संतते शाश्वते च' (इति मेदिनी) ॥ (१) ॥*॥ उपबिभर्ति । 'डु भृञ्' (जु० उ० अ०) क्विप् (३।२।७६) ॥ (१) ॥*॥ जुहोति । 'द्युतिगमिजुहोतीनां द्वे च' 'जुहोतेर्दीर्घश्च' (वा० ३।२।१७८) इति क्विप् दीर्घश्च ॥ (१) ॥*॥ स्रवति । 'स्रु स्रवणे' (भ्वा० प० अ०) । 'स्रुवः कः' (उ० २।६१) । 'स्रुवः पुमान् । **स्रुवो** द्वयोर्होमपात्रे शल्कीमूर्वयोः स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ 'चिक् च' (उ० २।६२) इति स्रवतेश्चिकूप्रत्ययः । सुक् चान्ता ॥ (१) ॥*॥ एते च स्रुचो विशेषाः स्त्रियः स्त्रीलिङ्गाः । स्रुवस्तु पुंलिङ्गः । मुकुटस्तु—'अन्येभ्योऽपि दृश्यते' (३।२।१७८) इति क्विप् । दृशिग्रहणाद्विध्यन्तरोपसंग्रहणार्थत्वात् । धातोश्चुगागमः—इति व्याख्यत् । तन्न । 'चिक् च' (उ० २।६२) इति सूत्रस्य जागरूकत्वात् । किञ्चैवंविधानाच्च । यदपि—'स्रुचः' इति बहुवचननिर्देशाद्बहुत्वम्—इति । तदपि न भेदापेक्षया स्रुचः षष्ठ्यन्तत्वात् । यदपि—ध्रुवासाहचर्याद्द्वयोः स्त्रीत्वमेव—इति । तदपि न 'स्त्रियः' इति विशेषविधेः सत्वात् । यथा 'स्रुवः' इति रूपभेदात्पुंस्त्वे सिद्धे 'ना' इति पुंस्त्वविधिः । तथा 'स्त्रियः' इति स्त्रीत्वविधिर्बोध्यः । नच—स्रुचो विधानाभावे षष्ठ्यानुवादः कथम् । 'चण्डांशोः पारिपार्श्वकाः', 'मुष्ट्या तु बद्धया' इत्यादिवदुपपत्तेः । 'स्त्रियाः' इत्यस्य षष्ठ्यन्तत्वकल्पनं व्यर्थम् ॥*॥ क्वचित् 'स्रुवः' इति षष्ठ्यन्तपाठः । स्रवति । 'क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसंप्रसारणं च' (उ० ६।५७) इति क्विब्दीर्घौ । (स्रुः) ॥*॥ **'यज्ञपात्राणां'** पृथक् पृथक् ॥

उपाकृतः पशुरसौ योऽभिमन्त्र्य क्रतौ हतः ॥ २५ ॥

उपेति ॥ उपाक्रियते स्म । 'कृञ् हिंसायाम्' (स्वा० उ० अ०) । क्तः (३।२।१०२) । **'कूपाकृतोऽध्वरहते पशौ** नोपद्रुते त्रिषु' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ अभितो मन्त्रयित्वा । 'मन्त्रि गुप्तभाषणे' (चु० प० से०) । क्त्वा (३।४।२१) । ल्यप (७।१।३७) । हतो हन्तुमारब्धः ॥*॥ एकं **'क्रतावभिमन्त्रितपशोः'** ॥

१—ध्रुवा वटपत्राकृतिः । उपभृच्चक्राकृतिः । जुहूरर्धचन्द्राकृतिः—इति मुकुटः ॥ २—'किमर्थमिदमुच्यते । न 'क्विप् च' (३।२।७६) 'अन्येभ्योऽपि दृश्यते' इत्येव सिद्धम् । 'क्विब्विधिरनुपपदार्थः । अनुपपदार्थोऽयमारम्भः' इति भाष्यत एव क्विब्विधानाङ्गीकारेण अकिंचित्करमेतत् ॥

परंपराकं शमनं प्रोक्षणं च वधार्थकम् ।

पेति ॥ अकनम् । आकः । परम्पराया आकम् । 'अक कुटिलायां गतौ' (भ्वा० प० से०) । भावे घञ् (३।३।१८) । अञ्चतेर्घञ् वा । यद्वा 'परम्' अतिशयेऽव्ययम् । परं परः श्रेष्ठ आकोऽस्य । अस्माद्वा ॥ (१) ॥*॥ 'शमु उपशमे' दि० प० से०) भावे ल्युट् (३।३।११५) । **'शमनं** शान्तिवधयोः **शमनः** श्राद्धदैवते' इति विश्वमेदिन्यौ । **'शमन**स्तु यमे प्रोक्तः । **शमनं** शान्तिहिंसयोः' इति हैमः ॥*॥ 'शसनम्' इति स्वामी । 'शसु हिंसायाम्' (भ्वा० प० से०) । ल्युट् (३।३।११५) ॥*॥ **'ससनम्'** इत्यन्ये । 'षस स्वप्ने' (अ० प० से०) ॥ (२) ॥*॥ प्रकृष्टमुक्षणम् । 'उक्ष सेचने' (भ्वा० प० से०) । ल्युट् (३।३।११५) । **'प्रोक्षणं** सेकवधयोः' इति हैमः ॥ (३) ॥*॥ वधो हिंसार्थोऽस्य ॥*॥ त्रीणि **'यज्ञार्थं पशुहननस्य'** ॥

वाच्यलिङ्गाः प्रमीतोपसंपन्नप्रोक्षिता हते ॥ २६ ॥

वेति ॥ प्रमीयते स्म । 'मीङ्' (दि० आ० अ०) **'मीञ्'** (क्रया० उ० अ०) वा हिंसायाम् । क्तः (३।२।१०२) । **'प्रमीतं** वाच्यलिङ्गं स्यात्प्रोक्षितेऽपि मृतेऽपि च' इति मेदिनी ॥ (१) ॥*॥ उपसंपद्यते स्म । 'पद गतौ' (दि० आ० अ०) । कर्तरि (३।४।७२) कर्मणि (३।२।१०२) वा क्तः । **'उपसंपन्न**मुदिष्टं निहते च सुसंस्कृते' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ प्रोक्ष्यते स्म । 'उक्ष सेचने' (भ्वा० प० से०) । क्तः (३।२।१०२) । **'प्रोक्षितं** निहते सिक्ते' इति रभसः ॥ (३) ॥*॥ त्रीणि **'यज्ञहतपशोः'** ॥

सांनाय्यं हविः

सामिति ॥ संनीयते । 'णीञ् प्रापणे' (भ्वा० उ० अ०) । 'पाय्यसांनाय्य–' (३।१।१२९) इति साधुः ॥ (१) ॥*॥ हूयते । 'अर्चिशुचि–' (उ० २।१०८) इतीसिः ॥ (२) ॥*॥ सांनाय्यं हविर्विशेषः ॥*॥ द्वे **'हविषः'** ॥

अग्नौ तु हुतं त्रिषु वषट्कृतम् ।

अग्नाविति ॥ हुतं प्रक्षिप्तम् ॥ (१) ॥*॥ 'वषट्' इति मन्त्रोपलक्षणम् । वषट्मन्त्रेण कृतं प्रक्षिप्तम् ॥ (२) ॥*॥ द्वे **'हुतस्य'** ॥

दीक्षान्तोऽवभृथो यज्ञः

दीति ॥ अवभ्रियतेऽनेन । 'डुभृञ्' (जु० उ० अ०) । 'भृञ् भरणे' (भ्वा० उ० अ०) वा । 'अवे भृञः' (उ० २।३) इति क्थन् ॥ (१) ॥*॥ दीक्षाया अन्तः प्रधानकर्मसमाप्तौ क्रियमाणो यो यज्ञः इष्टिविशेषस्तस्य । एकम् **'अवभृथस्नानस्य'** ॥

तत्कर्मार्हे तु यज्ञियम् ॥ २७ ॥

त्रिषु

तदिति ॥ तस्य यज्ञस्य क्रियामर्हति । 'अर्हः' (३।२।

१२) इत्यच् ॥*॥ यज्ञमर्हति । 'यज्ञर्त्विग्भ्याम्–' (५।१।७१) इत्यत्र 'तत्कर्मार्हति' इत्युपसंख्यानाद् घः ॥ (१) ॥*॥ एकं **'क्रतुक्रियासंपादनयोग्यद्विजद्रव्यादेः'** 'त्रिषु' इति यज्ञियान्वितम् ॥

अथ क्रतुकर्मेष्टम्

अथेति ॥ क्रतुश्च यज्ञः, कर्म च दानादि तदिष्टशब्दवाच्यम् । यजनम् । 'नपुंसके भावे क्तः' (३।३।११४) । **'इष्टं** यागे च दाने च वाञ्छितेऽपि प्रयुज्यते' इत्यजयः । 'एकाग्निकर्म हवनं त्रेतायां यच्च हूयते । अन्तर्वेद्यां च यद्दानमिष्टं तदभिधीयते' ( ) इति मनुः । **'इष्टमाशंसितेऽपि** स्यात्पूजिते प्रेयसि त्रिषु । सप्ततन्तौ पुमान् क्लीबे संस्कारे क्रतुकर्मणि' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'इष्टकर्मणः'** ॥

पूर्तं खातादिकर्मणि ।

पूर्त्तेति ॥ खातं पुष्करिणीखननमादिर्यस्य देवालयारामादिनिर्माणस्य । खातादि च तत्कर्म च क्रिया तस्मिन् । पूरणम् । पूर्यन्ते स्म वा । 'पॄ पालनपूरणयोः' (जु० प० से०) । भावे (३।३।११४) कर्मणि (३।२।१०२) वा क्तः । 'न ध्याख्या–' (८।२।५७) इति निष्ठानत्वं न । 'पुष्करिण्यः सभावापीदेवतायतनानि च । आरामाश्च विशेषेण पूर्तं कर्म विनिर्दिशेत्' इति स्मृतिः । **'पूर्तं** त्रिषु पूरिते स्यात्क्लीबं खातादिकर्मणि' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'पूर्तकर्मणः'** ॥

अमृतं विघसो यज्ञशेषभोजनशेषयोः ॥ २८ ॥

अमृतमिति ॥ अमृतमिव । अमृतसाधनत्वात् । **'अमृतं** यज्ञशेषे स्यात् पीयूषे सलिले घृते । अयाचिते च मोक्षे च नाधन्वन्तरिदेवयोः' (इति मेदिनी) ॥ (१) ॥*॥ विशिष्टैरद्यते । 'अद भक्षणे' (अ० प० अ०) । 'उपसर्गेऽदः' (३।३।५९) इत्यप् । 'घञपोश्च' (२।४।३८) इति घस्लृ ॥ (१) ॥*॥ यज्ञस्य शेषो होमावशिष्टाज्यपुरोडाशादिः । देवपित्रतिथिगुर्वादिभुक्तस्य शेषः । तयोः । **'यज्ञियशेषस्य** क्रमेणैकैकम् ॥

त्यागो विहायितं दानमुत्सर्जनविसर्जने ।
विश्राणनं वितरणं स्पर्शनं प्रतिपादनम् ॥ २९ ॥
प्रादेशनं निर्वपणमपवर्जनमंहतिः ।

त्येति ॥ त्यजनम् । 'त्यज हानौ' (भ्वा० प० अ०) । घञ् (३।३।१८) । **'त्यागो** दाने च वर्जने' (इति मेदिनी) ॥ (१) ॥*॥ विहायनम् । हाको (जु० प० अ०) ण्यन्ताद्भावे क्तः (३।३।११४) ॥ (२) ॥*॥ दत्तम् । दाञः (जु० प० अ०) भावे ल्युट् (३।३।११५) । **'दानं** गजमदे त्यागे पालनच्छेदशुद्धिषु' इति विश्वमेदिन्यौ ॥ (३) ॥*॥ सृजेः (तु० प० अ०) च ल्युट् (३।३।११५) ॥ (४) ॥*॥ **'विसर्जनं** परित्यागे दाने संप्रेषणेऽपि च' (इति मेदिनी) ॥ (५) ॥*॥ विपूर्वात् 'श्रणु दाने' इति चुरादेश्च ॥ (६) ॥*॥ वितरतेश्च ॥ ॥*॥ (७) ॥ **'स्पृश संस्पर्शे'** (तु० प० अ०) । **'स्पर्शनो** मारुते पुंसि दाने स्पर्शे नपुंसकम्' इति मेदिनी ॥ (८) ॥*॥ 'पद गतौ' (दि० आ० अ०) । ण्यन्तः । **'प्रतिपादनं** तु दाने च प्रतिपत्तौ प्रबोधने' इति मेदिनी ॥ (९) ॥*॥ 'दिश अतिसर्जने (तु० उ० अ०) ॥ (१०) ॥*॥ 'डुवप्' (भ्वा० उ० अ०) ॥ (११) ॥*॥ 'वृजी वर्जने' (अ० आ०, रु० प०; चु० उ० से०) ॥ (१२) ॥*॥ हन्ति दुरितमनया । 'हन्तेरंह च' (उ० ४।६२) इत्यतिः । **'अंहतिस्त्यागरोगयोः'** इति हैमः ॥ (१३) ॥*॥ त्रयोदश **'दानस्य'** ॥

मृतार्थं तदहे दानं त्रिषु स्यादौर्ध्वदैहिकम् ॥ ३० ॥

त्रिष्विति ॥ मृतायेदम् । 'अर्थेन नित्यसमासः' (२।१।३६) । तच्च तदहश्च । 'तस्याहः' इति वा । 'राजाहः–' (५।४।९१) इति टच् । तदहे प्रेतदिने । देहादूर्ध्वम् । ऊर्ध्वदेहः । राजदन्तादिः (२।२।३१) ऊर्ध्वदेहे भवम् । अध्यात्मादित्वात् (वा० ४।३।६०) ठञ् । अनुशतिकादित्वात् (७।३।२०) उभयपदवृद्धिः ॥*॥ केचिदुत्तरपदवृद्धिं नेच्छन्ति ॥ (१) ॥*॥ प्रेतमुद्दिश्य मरणदिनमारभ्य सपिण्डीकरणपर्यन्तं प्रत्यहं दीयमानस्य जलपिण्डादेरेकम् । 'तदहर्दानम्' इति पाठे तु समासान्तविधेरनित्यत्वान्न टच् । **'और्ध्वदैहिकदानस्य'** एकम् ॥

पितृदानं निवापः स्यात्

पीतीति ॥ पितृभ्यो दानम् ॥ (१) ॥*॥ न्युप्यते, निवपनं वा 'डुवप्' (भ्वा० उ० अ०) । कर्मणि (३।३।१९) भावे (३।३।१८) वा घञ् ॥ (२) ॥*॥ द्वे **'सपिण्डनादूर्ध्वं पित्रुद्देशेन दानस्य'** ॥

श्राद्धं तत्कर्म शास्त्रतः ।

श्रेति ॥ श्रद्धात्रास्ति । 'प्रज्ञाश्रद्धा–' (५।२।१०१) इति णः ॥ (१) ॥*॥ तेषां पितॄणां कर्म । शास्त्रविधानेन ॥*॥ एकम् **'श्राद्धकर्मणः'** ॥

अन्वाहार्थं मासिकः

अन्वेतीति ॥ अनु आ ह्रियते । 'हृञ् हरणे' (भ्वा० उ० अ०) । 'ऋहलोर्ण्यत्' (३।१।१२४) ॥ (१) ॥*॥ मासे भवम् । 'कालाट्ठञ्' (४।३।११) ॥ (२) ॥*॥ 'पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम्' (३।१२२) इति मनुः ॥ द्वे **'मासिकस्य'** ॥

अंशोऽष्टमोऽहः कुतपोऽस्त्रियाम् ॥ ३१ ॥

अंश इति ॥ पञ्चदशमुहूर्तात्मकस्य दिनस्याष्टमो भागः । कुत्सितं तपति । 'तप संतापे' (भ्वा० प० अ०) । 'संज्ञायाम्–' (३।२।४६) इति खच् 'अनव्ययस्य' (६।३।६६) इत्यनुवृत्तेर्न मुम् (६।३।६७) । यद्वा कुं भुवं तपति आगमशास्त्रस्यानित्यत्वान्न मुम् । 'दिवसस्याष्टमे भागे मन्दीभवति भास्करः । स कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयम्' इति शातातपः ।

'कुतपोऽस्त्रियां दौहित्रे वाद्ये छागजकम्बले । कुशे दिनस्याष्टमांशे ना सूर्ये' 'कुतपी पुनः । विट्सारिकायाम्' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'अह्नोऽष्टमभागस्य'** ॥

पर्येषणा परीष्टिश्चान्वेषणा च गवेषणा ।

पेति ॥ 'इषेरनिच्छार्थस्य' (वा० ३।३।१०७) युच् 'परेर्वा' (वा० ३।३।१०७) ॥ (१) ॥*॥ पक्षे क्तिन् (३।३।९४) । **'परीष्टिः** परिचर्यायां प्राकाम्येऽन्वेषणे स्त्रियाम्' इति मेदिनी ॥ (२) ॥*॥ (३) ॥*॥ 'गवेष मार्गणे' । चुरादिण्यन्ताद्युच् (३।३।१०७) ॥ (४) ॥*॥ चत्वारि **'धर्माद्यन्वेषणस्य'** ॥

सनिस्त्वध्येषणा

सेति ॥ सननम् । 'षणु दाने' (तु० उ० से०) । इन् (उ० ४।११८) ॥ (१) ॥*॥ अध्येषणम् । इषेः प्राग्वद्युच् (वा० ३।३।१०७) ॥ (२) ॥*॥ द्वे **'गुर्वाद्याराधनस्य'** ।—गुर्वादेः प्रार्थनया क्वचिदर्थे नियोजनस्य—इति स्वामी ॥

याच्ञाभिशस्तिर्याचनार्थना ॥ ३२ ॥

येति ॥ याचनम् । 'टु याचृ याच्ञायाम्' (भ्वा०उ०से०) । 'यजयाच–' (३।३।९०) इति नङ् ॥ (१) ॥*॥ अभिशंसनम् । 'शंसु स्तुतौ याचने च' (भ्वा० प० से०) । क्तिन् (३।३।९४) । **'अभिशस्तिः** पुनर्लोकापवादे प्रार्थितेऽपि च' इति हैमः ॥*॥ स्वामी तु—अभिषसनम् । 'षस स्वप्ने' (अ० प० से०) । क्तिन् (३।३।९४) । सुषामादित्वात् (८।३।९८) 'पूर्वपदात्' (८।३।१०६) इति वा षत्वम् । **(अभिषस्तिः** ।—इत्यवोचत् ॥ (२) ॥*॥ याचेः चुरादि(स्वार्थिक)ण्यन्तात् 'ण्यास–' (३।३।१०७) इति युच् ॥ (३) ॥*॥ एवम् 'अर्थं याच्ञायाम्' (चु० उ० से०) । युच् (३।३।१०७) ॥ (४) ॥*॥ चत्वारि **'याचनस्य'** ॥

षट् तु त्रिषु

षेति ॥ आगन्तुपर्यन्ताः षट् ॥

अर्घ्यमर्घार्थं पाद्यं पादाय वारिणि ।

अर्घ्येति ॥ अर्घायेदम् । 'पादार्घाभ्यां च' (५।३।२४) इति यत् । अर्घार्थे जले ॥ (१) ॥*॥ पादायेदम् ॥ (१) ॥*॥ एकैकम् **'अर्घ्यपाद्ययोः'** ॥

क्रमादातिथ्यातिथेये अतिथ्यर्थेऽत्र साधुनि ॥ ३३ ॥

क्रेति ॥ अतिथय इदम् । 'अतिथेर्ञ्यः' (५।५।२६) ॥ (१) ॥*॥ अतिथौ साधु । 'पथ्यतिथि–' (४।४।१०४) इति ढञ् ॥ (१) ॥*॥ एकैकम् **'आतिथ्यस्य'** ॥

स्युरावेशिक आगन्तुरतिथिर्ना गृहागते ।

स्युरिति ॥ **'वेशो** वेश्यागृहे गृहे' (इति मेदिनी) । अवेशेऽगृहे भवः । अध्यात्मादित्वात् (वा० ४।३।६०) ठञ् । 'नैकग्रामीणमतिथिं विप्रं सांगतिकं तथा' (म० ३।१०३) ॥ (१) ॥*॥ आगच्छति । 'सितनिगमि–' (उ० १।६९) इति तुन् ॥ (२) ॥*॥ अतति । 'ऋतन्यञ्जि–' (उ० ४।२) इति इथिन् । 'अध्वनीनोऽतिथिर्ज्ञेयः' इति स्मृतिः । **'अतिथिः** कुशपुत्रे स्यात्पुमानागन्तुकेऽपि च' इति विश्वमेदिन्यौ । **'प्राघुणस्त्वतिथिर्द्वयोः'** इति त्रिकाण्डशेषः ॥ (३) ॥*॥ त्रीणि **'गृहागतस्य'** ॥

पूजा नमस्यापचितिः सपर्यार्चार्हणाः समाः ॥ ३४ ॥

प्विति ॥ पूजनम् । 'पूज पूजायाम्' (चु० प० से०) 'चिन्तिपूजि–' (३।३।१०५) इत्यङ् ॥ (१) ॥ नमस्करणम् । 'नमोवरिवस्–' (३।१।१९) इति क्यच् । 'अ प्रत्ययात्' (३।३।१०२) इत्यकारः ॥ (२) ॥*॥ चायनम् 'चायृ पूजानिशामनयोः' (भ्वा० उ० से०) । 'वायतेः क्तिनि चिभावो वाच्यः' ( ) ॥ (३) ॥*॥ कण्ड्वादौ 'सपर पूजायाम्' इति पठ्यते । यक् (३।१।२७) । 'अ प्रत्ययात्' (३।३।१०२) ॥ (४) ॥*॥ 'अर्ह पूजायाम्' (भ्वा० प० से०) । 'गुरोश्च हलः' (३।३।१०३) इत्यः ॥ (५) ॥*॥ 'अर्ह पूजायाम्' चुरादिः । 'ण्यासश्रन्थ–' (३।३।१०७) इति युच् ॥ (६) ॥*॥ षट् **'पूजनस्य'** ॥

वरिवस्या तु शुश्रूषा परिचर्याप्युपासना ।

वेति ॥ वरिवसः करणम् । 'वरिवस्' शब्दः पूजार्थः । 'नमोवरिवस्–' (३।१।१९) इति क्यच् । 'अ प्रत्ययात्' (३।३।१०२) ॥ (१) ॥*॥ शुश्रूषणम् । 'श्रु श्रवणे' (भ्वा० प० अ०) । सन्नन्तः । 'अ प्रत्ययात्' (३।३।१०२) ॥ (२) ॥*॥ परिचरणम् । '–परिचर्यापरिसर्या–' (वा० ३।३।१०१) इति परिचर्या निपात्यते । 'परिचर्या तु सपर्येष्टिः' इति भागुरिः ॥ (३) ॥*॥ उपासनम् । 'आस उपवेशने' (अ० आ० से०) । 'ण्यास–' (३।३।१०७) इति युच् ॥*॥ **'उपासनम्'** इति पाठे ल्युट् (३।३।११५) । **'उपासनं** शराभ्यासेऽप्युपास्तावासनेऽपि च' इति विश्वमेदिन्यौ ॥ (४) ॥*॥ चत्वारि **'सेवायाः'** ॥

व्रज्याटाट्या पर्यटनम्

व्रेति ॥ 'व्रज गतौ' (भ्वा० प० से०) 'व्रजयजोः–' (३।३।९८) इति भावे क्यप् ॥ (१) ॥*॥ अटनम् । '—परिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानम्' (वा० ३।३।१०१) इत्यटाट्या निपातिता ॥ (२) ॥*॥ ल्युट् (३।३।११५) ॥ (३) **'अटा** पर्यटनं **भ्रमः'** इति रत्नकोषादटापि ॥*॥ त्रीणि **'अटनस्य'** ॥

चर्या त्वीर्यापथस्थितिः ॥ ३५ ॥

चेति ॥ चरणम् । 'गदमदचरयमश्च–' (३।१।१००)

१—हैमविश्वसंवादप्राप्तप्रामाण्यमेदिनीपुस्तके **'कुणपी'** इति पाठस्योपलम्भेन प्रकृतानुपयुक्तमिदम् ॥

इति यत् । यद्वा 'परिचर्या' इत्यत्र 'परि' इत्यस्याविवक्षणात् 'चर्या' इति साधुः ॥ (१) ईर्यते ज्ञायते । 'ईर गतौ' (अ० आ० से०) । ण्यत् (३।१।१२४) ईर्यायाः पन्थाः । 'ऋक्पूर्-' (५।४।७४) इत्यः । **'ईर्यापथे ध्यानाद्युपाये परिव्राजकादीनां स्थितेः'** एकम् ॥

उपस्पर्शस्त्वाचमनम्

उपेति ॥ उपस्पर्शनम् । 'स्पृश संस्पर्शे (तु० प० अ०) । घञ् (३।३।१८) । यद्वा उपस्पृश्यन्ते वारीण्यत्र । 'हलश्च' (३।३।१२१) इति घञ् । **'उपस्पर्शः** स्पर्शमात्रे स्नानाचमनयोरपि' (इति मेदिनी) ॥ (१) ॥*॥ 'चमु अदने' (भ्वा० प० से०) ल्युट् (३।३।११५) । आचम्यतेऽम्भोत्र । अधिकरणे ल्युट् (३।३।११७) वा ॥ (२) ॥*॥ द्वे **'आचमनस्य'** ॥

अथ मौनमभाषणम् ।

अथेति ॥ मुनेः कर्म, भावो वा । 'इगन्ताच्च-' (५।१।१३१) इत्यण् ॥ (१) ॥*॥ न भाषणम् । 'भाष व्यक्तायां वाचि' (भ्वा० आ० से०) । भावे ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'मौनस्य'** ॥

आनुपूर्वी स्त्रियां वावृत्परिपाटी अनुक्रमः ॥ ३६ ॥ पर्यायश्च

आन्विति ॥ पूर्वं पूर्वम् । पूर्वानुक्रमेण वा । वीप्सायां योग्यतायां वाव्ययीभावः (२।१।६) । अनुपूर्वं भावः । वर्णदृढादिभ्यः' (५।१।१२३) इति ष्यञ् । षित्त्वात् (४।१।४१) ङीष् । 'हलस्तद्धितस्य' (६।४।१५०) इति यलोपः । 'स्त्रियां वा' इति पक्षे क्लीबता । (**आनुपूर्व्यम्**) ॥ (१) ॥*॥ आवर्तनम् । अत्र वा । 'वृतु वर्तने (भ्वा० आ० से०) । संपदादि क्विप् (वा० ३।३।१०८) ॥ (२) ॥*॥ पैरिपाटनम् । 'पट गतौ' (भ्वा० प० से०) स्वार्थण्यन्तः । 'अच इः' (उ० ४।१३९) । द्विवचनत्वान्न यण् ॥ (३) ॥*॥ अनुक्रमणम् । 'क्रमु पादविक्षेपे' (भ्वा० प० से०) । घञ् (३।३।१८) । 'नोदात्तोपदेशस्य-' (७।३।३४) इति न वृद्धिः ॥ (४) ॥*॥ पर्ययणम् । 'इण् गतौ' (अ० प० अ०) । 'परावनुपात्यय इणः' (३।३।३८) इति घञ् । **'पर्यायः** प्रकारेऽवसरे क्रमे' इति विश्वमेदिन्यौ ॥ (५) ॥*॥ पञ्च **'क्रमस्य'** ॥

अतिपातस्तु स्यात्पर्यय उपात्ययः ।

अतीति ॥ अतिक्रम्य पतनम् । 'पतॢ गतौ (भ्वा० प० से०) । घञ् (३।३।१८) ॥ (१) ॥*॥ पर्ययणम् । 'इण् गतौ' (अ० प० से०) । 'एरच् (३।३।५६) ॥ (२) ॥*॥ उपगतस्यातिक्रम्यायनम् । 'एरच्' (३।३।५६) ॥ (३) ॥*॥ त्रीणि **'क्रमोल्लङ्घनस्य'** ॥

नियमो व्रतमस्त्री

नीति ॥ नियमनम् । 'यमः समुपनिविषु च' (३।३।६३) इत्यप् । **'नियमो** यत्नणायां च प्रतिज्ञानिश्चये व्रते' (इति मेदिनी) ॥ (१) ॥*॥ व्रियते । 'वृञ्' (स्वा० उ० से०) 'वृङ्' (व्रया० आ० से०) वा । 'पृषिरजिभ्यां कित्' (उ० ३।१११) इत्यतच् बाहुलकाद्वृञ्वृङ्भ्यामपि । कित्त्वान्न गुणः । यद्वा व्रजन्त्यनेन स्वर्गम् । गोचरसंचर-' (३।३।११९) इति घः । पृषोदरादिः (६।३।१०९) ॥ (२) ॥*॥ द्वे **'व्रतमात्रस्य'** ॥

तच्चोपवासादि पुण्यकम् ॥ ३७ ॥

तेति ॥ उपवास आदिर्यस्य कृच्छ्रचान्द्रायणप्राजापत्यनक्तभोजनादेः, तदुपवासादि व्रतम् । पुण्यमेव । 'संज्ञायां कन्' (५।३।७५) ॥ (१) ॥*॥ एकं **'उपवासादेर्विहितव्रतस्य'** ॥

औपवस्तं तूपवासः

औपेति ॥ उपवसनम् । 'वसु स्तम्भे' (दि० प० से०) । भावे क्तः (३।३।११४) । अनेकार्थत्वादभोजने वृत्तिः । प्रज्ञाद्यणि (५।४।३८) **'औपवस्तम्'** ॥*॥ क्वचित् **'औपवस्त्रम्'** इति पाठः । उपवसति । तृच् (३।१।१३३) उपवस्तुरिदं कर्म । 'तस्येदम्' (४।३।१२०) इत्यण् ॥ (१) ॥*॥ उपवसनम् । 'वस निवासे' (भ्वा० प० अ०) । घञ् (३।३।१८) ॥*॥ भावे क्ते (३।३।११४) **'उपोषितम्'** ॥*॥ **उपोषणं** तु 'उष दाहे' (भ्वा० प० से०) इत्यस्य ॥ (२) ॥*॥ द्वे **'भोजनविरहस्य'** ॥

विवेकः पृथगात्मता ।

वीति ॥ विवेचनम् । 'विचिर् पृथग्भावे' (रु० उ० अ०) । घञ् (३।३।१८) । **'विवेकः** स्याज्जलद्रोण्यां पृथग्भावविचारयोः' (इति मेदिनी) ॥ (१) ॥*॥ पृथगात्मा यस्य सः । तस्य भावः । तल् (५।१।११९) ॥ (२) ॥*॥ द्वे **'प्रकृतिपुरुषादिभेदज्ञानस्य'** ॥

स्याद्ब्रह्मवर्चसं वृत्ताध्ययनर्द्धिः

स्यादिति ॥ ब्रह्मणो वेदस्य तपसो वा वर्चः । 'ब्रह्महस्तिभ्यां वर्चसः' (५।४।७८) इत्यच् ॥ (१) ॥*॥ वृत्तं चाचारः, अध्ययनं च गुरुमुखाद्वेदाक्षरग्रहणम् । तयोर्ऋद्धिः ॥ (२) ॥*॥ द्वे **'ब्रह्मवर्चसस्य'** ॥

अथाञ्जलिः ॥ ३८ ॥

पाठे ब्रह्माञ्जलिः

अथेति ॥ ब्रह्मणोऽञ्जलिः ॥ (१) ॥*॥ एकं **'वेदपाठकाले कृतस्याञ्जलेः'** ॥

१—'उपस्पृश्यते खान्यत्र' इत्यपि पाठः ॥ २—'कृदिकारात्' (गण० ४।१।४५) इति ङीषि परिपाटी च । 'कृता लङ्काभर्तुर्वदनपरिपाटीषु घटना' इति पूर्वप्रयोगः—इति मुकुटः ॥

पाठे विप्रुषो ब्रह्मबिन्दवः ।

पेति ॥ वेदपाठे मुखान्निर्गतबिन्दवः । ब्रह्मणो बिन्दवः ॥ (१) ॥*॥ एकम् **'मुखनिर्गतबिन्दूनाम्'** ॥

ध्यानयोगासने ब्रह्मासनम्

ध्येति ॥ ध्यानं प्रत्ययैकतानता च, योगश्चित्तवृत्तिनिरोधश्च, तयोरासनम् । यद्वा ध्यानस्य योग उपायः । ध्यानमेव योगो वा । तस्यासनं स्वस्तिकसिद्धपद्मादि । ब्रह्मणः संबन्धि आसनम् ॥ (१) ॥*॥ एकम् **'ब्रह्मासनस्य'** ॥

कल्पे विधिक्रमौ ॥ ३९ ॥

केति ॥ कल्पते । अनेन वा । 'कृपू सामर्थ्ये' (भ्वा० आ० से०) । अच् (३।१।१३३) । घञ् (३।३।१८) वा । **'कल्पः** शास्त्रे विधौ न्याये संवर्ते ब्रह्मणो दिने' (इति मेदिनी) ॥ (१) ॥*॥ वेधनम् । 'विध विधाने' (तु० प० से०) । 'इगुपधात्कित्' (उ० ४।१२०) इतीन् । यद्वा विधानम् । अनेन वा । धाञः (जु० प० अ०) । 'उपसर्गे घोः किः' (३।३।९२) । **'विधि**र्ना नियतौ काले विधाने परमेष्ठिनि' (इति मेदिनी) ॥ (२) ॥*॥ क्रमणम् । अनेन वा । घञ् (३।३।१८, १९) । 'नोदात्तोप–' (७।३।३४) इति न वृद्धिः । **'क्रम**श्चानुक्रमे शक्तौ कल्पे चाक्रमणेऽपि च' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'विधानस्य'** ॥

मुख्यः स्यात्प्रथमः कल्पो

म्विति ॥ मुखमिव । 'शाखादिभ्यो यः' (५।३।१०३) । 'व्रीहिभिर्यजेत' इति यथा ॥ (१) ॥*॥ एकम् **'आद्यविधेः'** ॥

अनुकल्पस्ततोऽधमः ।

अन्विति ॥ अनु हीनः कल्पः । प्रादिसमासः (वा० २।२।१८) ॥ (१) ॥*॥ व्रीह्यभावे 'नीवारैः' इति यथा ॥*॥ एकं **'गौणविधेः'** ॥

संस्कारपूर्वं ग्रहणं स्यादुपाकरणं श्रुतेः ॥ ४० ॥

समिति ॥ संस्कार उपनयनं पूर्वं यत्र तत् । श्रुतेर्ग्रहणम् । उपाक्रियतेऽनेन । ल्युट् ॥ (१) ॥*॥ एकं **'वेदपाठारम्भविधिविशेषस्य'** ॥

समे तु पादग्रहणमभिवादनमित्युभे ।

सेति ॥ पादयोर्ग्रहणं स्पर्शः ॥ (१) ॥*॥ अभिमुखीकरणार्थं वादनम् । 'वद संदेशवचने' चुरादिः । ल्युट् (३।३।११५) । आभिमुख्येन वाद्यते आशीः कार्यतेऽनेन इति वा । ण्यन्ताद्वदेः करणे ल्युट् (३।३।११७) ॥ (२) ॥*॥ द्वे **'नामोच्चारणपूर्वकसंस्कृतप्रयोगेण नमस्कारस्य'** ॥

भिक्षुः परिव्राट् कर्मन्दी पाराशर्यपि मस्करी ॥४१॥

भीति ॥ भिक्षणशीलः । 'भिक्ष याच्ञायाम्' (भ्वा० आ० से०) । 'सनाशंसभिक्ष उः' (३।२।१६८) ॥ (१) ॥*॥ परिस्त्यज्य सर्वं व्रजति । 'व्रज गतौ' (भ्वा० प० से०) । 'परौ व्रजेः षः पदान्ते' (उ० २।५९) इति क्विप् दीर्घश्च पदान्तविषये षत्वं च ।—विण्—इति तु स्वामिनः प्रमादः । उणादौ विणोऽप्रकृत्वात् ॥ (२) ॥*॥ कर्मन्देन प्रोक्तं भिक्षुसूत्रमधीते । 'कर्मन्दकृशाश्वादिनिः' (४।३।१११) ॥ (३) ॥*॥ पराशरस्य गोत्रापत्यम् । 'गर्गादिभ्यो यञ्' (४।१।१०५) । पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीते । 'पाराशर्यशिलालिभ्याम्–' (४।३।११०) इति णिनिः ॥ (४) ॥*॥ मस्कनम् । 'मस्क गतौ' (भ्वा० आ० से०) । बाहुलकादरः । मस्करो ज्ञानं गतिर्वाऽस्यास्ति । 'मस्करमस्करिणौ' (६।१।१५४) इति इनिः । यद्वा मस्करो वेणुरस्यास्ति । इनिः (५।२।११५) । यद्वा मा कर्तुं कर्म निषेद्धुं शीलमस्य । 'मस्करमस्करिणौ–' (६।१।१५४) इति साधुः । यद्वा मुकुर इव शुद्धमन्तःकरणमस्यास्ति । प्राग्वन्निपातः । यद्वा मङ्कते । 'मकि मण्डने' (भ्वा० आ० से०) । बाहुलकादरः । आगमशास्त्रस्यानित्यत्वान्न नुम् । मकरो निधिभेदोऽस्यास्ति । प्राग्वन्निपातः ॥ (५) ॥*॥ पञ्च **'संन्यासिनाम्'** ॥

तपस्वी तापसः पारिकाङ्क्षी

तेति ॥ तपोऽस्यास्ति । 'तपःसहस्राभ्याम्–' (५।२।१०२) इति विनिः । **'तपस्वी** तापसे चानुकम्प्ये त्रिष्वथ योषिति । मांसिकाकटुरोहिण्योः' (इति मेदिनी) ॥ (१) ॥*॥ 'अण् च' (५।२।१०३) ॥ (२) ॥*॥ परिकाङ्क्षितुं शीलमस्य । 'काङ्क्षि परिवर्जने' (भ्वा० प० से०) । 'सुपि–' (३।२।७८) इति णिनिः । पूषोदरादिः । यद्वा पारमत्रास्ति इनिः (५।२।११५) । पारि ब्रह्मज्ञानं काङ्क्षति ॥ (३) ॥*॥ त्रीणि **'तपस्विनः'** ॥

वाचंयमो मुनिः ।

वेति ॥ वाचं यच्छति । 'यम उपरमे' (भ्वा० प० अ०) । 'वाचि यमो व्रते' (३।२।४०) इति खच् । 'वाचंयमपुरंदरौ च' (६।३।६९) ॥ (१) ॥*॥ मन्यते । 'मन ज्ञाने' (दि० आ० अ०) । 'मनेरुच्च' (उ० ४।१२३) इतीन् । **'मुनिः** पुंसि वसिष्ठादौ बङ्गसेनतरौ जिने' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'मौनव्रतिनः'** ॥

तपःक्लेशसहो दान्तः

तेति ॥ तपसः क्लेशः । तं सहते । 'षह मर्षणे' (भ्वा०

१—इदं तु 'मस्करिग्रहणं शक्यमकर्तुम् । कथं 'मस्करी परिव्राजकः' इति इनिनैतन्मत्वर्थीयेन सिद्धम्, मस्करोऽस्यास्तीति मस्करी । न वै मस्करो यस्यास्तीति मस्करी परिव्राजकः' इति भाष्यविरोधादुपेक्ष्यम् ॥ २—इदमेव 'किं तर्हि । मा कृत कर्माणि शान्तिर्वः श्रेयसी, इत्याह । अतो मस्करी परिव्राजकः' इति भाष्यसंमतम् ॥

आ० अ०) अच् (३।२।१३४) । तपःक्लेशस्य सहः ॥ (१) ॥*॥ दाम्यति स्म । 'दमु उपशमे' (दि० प० अ०) । 'गत्यर्था–' (३।४।७२) इति क्तः । 'यस्य विभाषा' (७।२।१५) इति नेट् । 'अनुनासिकस्य–' (६।४।१५) इति दीर्घः ।—'वा दान्त–' (७।२।२७) इति साधुः इति स्वामिनः प्रमादः । तस्य णिजन्तात्कर्मक्तान्तविषयत्वात् । **'दान्तस्तु दमितेऽपि स्यात्तपःक्लेशसहे त्रिषु'** (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'तपःक्लेशसहस्य'** ॥

वर्णिनो ब्रह्मचारिणः ॥ ४२ ॥

वेति ॥ वर्णः स्तुतिरस्यास्ति । 'वर्णाद्ब्रह्मचारिणि' (५।२।१३४) इतीनिः । **'वर्णी** स्याल्लेखके चित्रकरेऽपि ब्रह्मचारिणि' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ ब्रह्म वेदाध्ययनव्रतं चरति । तच्छीलो वा 'व्रते' (३।२।८०) इति 'सुपि–' (३।२।७८) इति वा णिनिः ॥ (२) ॥*॥ द्वे **'ब्रह्मचारिणः'** ॥

ऋषयः सत्यवचसः

ऋषेति ॥ ऋषन्ति जानन्ति । 'ऋषी गतौ' (तु० प० से०) । 'इगुपधात्कित्' (उ० ४।१२०) इतीन् । 'ऋषिर्वेदे वसिष्ठादौ दीधितौ च पुमानयम्' (इति मेदिनी) । स्त्रियां वा ङीष् (ग० ४।१।४५) ॥ (१) ॥*॥ सत्यं वचो येषाम् ॥ (२) ॥*॥ द्वे **'ऋषिसामान्यस्य'** ॥

स्नातकस्त्वाप्लवव्रती ।

स्नेति ॥ स्नाति स्म । 'ष्णा शौचे' (अ० प० अ०) । 'गत्यर्था–' (३।४।७२) इति क्तः । 'संज्ञायां कन्' (५।३।७५) ।–'स्नाताद्वेदसमाप्तौ' (उ० ५।४।२९) इति कन्—इति मुकुटः । तन्न । उक्तवचनादर्शनात् ॥ (१) ॥*॥ आप्लवते । 'प्लुङ् गतौ' (भ्वा० आ० अ०) । पचाद्यच् (३।१।१३४) । आप्लवश्चासौ व्रती च ॥*॥ **'आप्लुतव्रती'** इति पाठे 'गत्यर्था– (३।४।७२) इति क्तः । मुकुटस्तु–आप्लव आप्लुतं वा स्नानम् । तत्र व्रती नित्यस्नायी इत्याह ॥ (२) ॥*॥ द्वे **'समाप्तवेदव्रतस्याश्रमान्तरमगतस्य'** ॥

ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते ॥ ४३ ॥

ये इति ॥ इन्द्रियाणां ग्रामः । निर्जित इन्द्रियग्रामो यैस्ते ॥ (१) ॥*॥ यमनम् । 'यम उपरमे' (भ्वा० प० अ०) । भावे क्तः (३।३।११४) । मलोपः (६।४।३७) । यतमुपरमणमस्ति नित्यं वा येषाम् । 'अतः' (५।२।११५) इतीनिः ॥ (२) ॥*॥ यतन्ते । 'यती प्रयत्ने' (भ्वा० आ० से०) । इन् (उ०४।१०८) ।—'यमेस्तिक्' इति स्वपाणिनीयम् । **'यतिः** स्त्रीपाठविच्छेदे निकारयतिनोः पुमान्' (इति मेदिनी) । अत्र पक्षे यमः क्तिच् (३।३। १७४) अपि सुवचः ॥ (३) ॥*॥ त्रीणि **'निर्जितसर्वेन्द्रियस्य'** ॥

यः स्थण्डिले व्रतवशाच्छेते स्थण्डिलशाय्यसौ । स्थाण्डिलश्च

य इति ॥ स्थण्डिले शेते । 'व्रते' (३।२।८०) इति इनिः ॥ (१) ॥*॥ 'स्थण्डिलाच्छयितरि व्रते' (४।२।१५) इत्यण् ॥ (२) ॥*॥ द्वे **'अनास्तृतभूमिशयनव्रतिनः'** ॥

अथ विरजस्तमसः स्युर्द्वेयातिगाः ॥ ४४ ॥

अथेति ॥ रजस्तमोभ्यां विगताः । 'निरादयः–' (वा० २।२।१८) इति समासः । विगते रजस्तमसी येभ्यः इति वा ॥ (१) ॥*॥ द्वयमतिगच्छन्ति । 'अन्येष्वपि–' (वा० ३।२।४८) इति डः ॥ (२) ॥*॥ द्वे **'निवृत्तरजस्तमोगुणानाम्'** ॥

पवित्रः प्रयतः पूतः

पेति ॥ पवते । 'पूङ् पवने' (भ्वा० आ० से०) । पुनाति । 'पूञ् पवने' (क्रया० उ० से०) वा । 'अशित्रादिभ्य इत्रोत्रौ' (उ० ४।१७३) । **'पवित्रं** वर्षणे कुशे । ताम्रे पयसि च क्लीबं मेध्ये स्यादभिधेयवत्' (इति मेदिनी) ॥ (१) ॥*॥ प्रयच्छति स्म । यमेरकर्मकत्वात्कर्तरि क्तः (३।४।७२) । यद्वा प्रयतते । 'यती प्रयत्ने' (भ्वा० आ० से०) । अच् (३।१।१३४) ॥ (२) ॥*॥ पवते स्म 'पूङ् पवने' (भ्वा० आ० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । **'पूतं** त्रिषु पवित्रे च शटिते बहुलीकृते' (इति मेदिनी) ॥ (२) ॥*॥ त्रीणि **'पवित्रस्य'** ॥

पाषण्डाः सर्वलिङ्गिनः ।

पेति ॥ पापं सनोति । 'षणु दाने' (त० उ० से०) । सनति । 'षण सेभक्तौ' (भ्वा० प० से०) वा । 'अमन्ताड्डः' (उ० १।११४) पृषोदरादिः (३।३।१०९) । मूर्धन्यमध्यः ॥*॥ कवर्गद्वितीयमध्यपाठे तु पाखण्डयति । 'खडि भेदने' (चु० प० से०) । अच् (३।१।१३४) । पालनाच्च त्रयीधर्मः पाशब्देन निगद्यते । तं खण्डयन्ति ते यस्मात् **पाखण्डास्तेन हेतुना'** ॥ (१) ॥*॥ सर्वाणि च तानि लिङ्गानि, सर्वेषां लिङ्गानि वा, सर्वलिङ्गानि सन्ति येषाम् । 'अतः' (५।२।११५) इतीनिः ॥ (२) ॥*॥ द्वे **'दुःशास्त्रवर्तिषु'** ॥

पालाशो दण्ड आषाढो व्रते

पेति ॥ आषाढी पूर्णिमा प्रयोजनमस्य । 'विशाखाषाढादण् मन्थदण्डयोः' (५।१।११०) इत्यण् । **'आषाढो** व्रतिनां दण्डे मासे मलयपर्वते । स्त्री पूर्णिमायाम्' (इति मेदिनी) ॥

१—ऋषिर्व्यञ्जनादिश्च । 'विद्याविदग्धमतयो ऋषयः प्रवृद्धाः' इति बालपण्डितजातकात् । ते च सप्तविधाः—'...महर्षिदेवर्षिब्रह्मर्षिपरमर्षयः । काण्डर्षिश्च श्रुतर्षिश्च.....क्रमावराः' इति रत्नकोषः—इति मुकुटः ॥ २—इदं तु यावादिगणे (५।४।२९) अस्योपलम्भादकिंचित्करम् ॥

१—स्त्रियाम् ॥ २—क्तिन् (३।३।९४) इति पाठान्तरम् ॥

(१) ॥*॥ तस्य विकारः । 'पलाशादिभ्यो वा' (४।३।१४१) इञञ् ॥*॥ व्रते ब्रह्मचर्ये ॥*॥ एकम् **'पालाशदण्डस्य'** ॥

राम्भस्तु वैणवः ॥ ४५ ॥

रेति ॥ **'रम्भा** कदल्यप्सरसोर्ना वेणौ वानरान्तरे' इति मेदिनी । रम्भस्य वेणोर्विकारः । प्राग्वदञ् (४।३।१४१) ॥ (१) ॥*॥ व्रत इत्येव । अन्यत्र वैणव एव ॥*॥ एकम् **'वैणवदण्डस्य'** ॥

अस्त्री कमण्डलुः कुण्डी

अस्त्रीति ॥ कस्य प्रजापतेर्जलस्य वा मण्डः सारः । तं लाति लभते वा । मितद्वादिः (वा० ३।२।१८०) मण्डनम् । 'मडि भूषायाम्' (भ्वा० प० से०) ॥ (१)॥*॥ घञ् । कुणति । 'कुण शब्दोपकरणयोः' (तु० प० से०) । 'अमन्ताड्डः' (उ० १।११४) । 'जानपद–' (४।१४२) इति ङीष् । **'कुण्डम**श्यालये मानभेदे देवजलाशये । कुण्डीकमण्डलौ, जारात्पतिवत्नीसुते पुमान् । पितरे तु न ना' (इति मेदिनी) ॥ (२) ॥*॥ सुतायां तु जातिलक्षणो ङीष् ॥*॥ द्वे **'व्रतिनां जलपात्रस्य'** ॥

व्रतिनामासनं वृषी ।

व्रेति ॥ ब्रुवन्तः सीदन्त्यस्याम् । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । पृषोदरादिः (६।३।१०९) । वर्षति सुखं वा । 'वृषु सेचने' (भ्वा० प० से०) । 'इगुपध–' (२।१।१३५) इति दन्त्यान्तेः कः । गौरादिः (४।१।४१) । मूर्धन्यान्तः ॥*॥ 'अतसी **वृसी** मांसी' इत्यन्ते चन्द्रगोमिदर्शनाद्दन्त्यान्तापि ॥ (१) ॥*॥ एकं **'ब्रह्मचर्याद्यासनस्य'** ॥

अजिनं चर्म कृत्तिः स्त्री

अजीति ॥ अजति । अज्यते, वा । 'अज गतौ' (भ्वा० प० से०) । 'अजेरज च' (उ० २।४८) इतीनच् ॥ (१) ॥*॥ चरति । चर्यते, वा । 'चर गतौ' (भ्वा० प० से०) । मनिन् (उ० ४।१४) । **'चर्म** कृत्तौ च फलके' (इति मेदिनी) ॥ (२) ॥*॥ कृत्यते । 'कृती छेदने' (तु० प० से०) । क्तिन् (३।३।९४) । **'कृत्तिश्चर्मण्यचोर्भूजें** कृत्तिकायां द्वयं स्त्रियाम्' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'मृगादेश्चर्मणि'** ॥

भैक्षं भिक्षाकदम्बकम् ॥ ४६ ॥

भायिति ॥ भिक्ष्यते । 'भिक्ष याच्ञायाम्' (भ्वा० आ० से०) । 'गुरोश्च' (३।३।१०२) इत्यः । भिक्षाणां समूहः । 'भिक्षादिभ्योऽण्' (४।२।३८) ॥ (१) ॥*॥ एकम् **'भिक्षाद्रव्यस्य'** ॥

स्वाध्यायः स्याज्जपः

स्वेति ॥ सु अतीव आवृत्त्या अध्ययनम् । 'इङश्च' (३।३।२१) इति घञ् । स्वार्थमध्ययनं वा ॥ (१) ॥*॥ जपनम् । 'जप मानसे च' (भ्वा० प० से०) । 'व्यधजपोः' (३।३।६१) इत्यप् ॥ (२) ॥*॥ द्वे **'वेदाध्ययनस्य'** ॥

सुत्याभिषवः सवनं च सा ।

स्विति ॥ सवनम् । 'षुञ् अभिषवे' (स्वा० उ० से०) 'संज्ञायां समज–' (३।३।९९) इति क्यप् ॥ (१) ॥*॥ 'ऋदोरप्' (३।३।४७) । 'उपसर्गात्–' (८।३।६५) इति षत्वम् । 'भवेदभिषवः स्नाने मद्यसंधानयज्ञयोः' (इति मेदिनी) ॥ (२) ॥*॥ 'ल्युट् च' (३।३।११५) । **'सवनं** स्नध्वरे स्नाने सोमनिर्दलनेऽपि च' (इति मेदिनी) ॥ (३) ॥*॥ 'सा' इति सुत्या ॥*॥ त्रीणि **'सोमलताकण्डनस्य'** ॥

सर्वैनसामपध्वंसि जप्यं त्रिष्वघमर्षणम् ॥ ४७ ॥

सेति ॥ सर्वाणि एनांसि मानसादिपापानि अपध्वंसयितुं शीलमस्य । 'सुपि–' (३।२।७८) इति णिनिः । जप्यते । 'जप मानसे च' (भ्वा० प० से०) । 'पोरदुपधात्' (३।१।९८) इति यत् ॥*॥ अघं मर्षति । 'मृषु सहने' (भ्वा० प० से०) सहनमभिभवः । यद्वा मृष्यति । ल्युट् (३।३।११३) । स्त्रियां टित्वात् (४।१।१५) ङीष् ॥ (१) ॥*॥ एकम् **'अघमर्षणस्य'** ॥

दर्शश्च पौर्णमासश्च यागौ पक्षान्तयोः पृथक् ।

देति ॥ दर्श अमावास्यायां क्रियमाणत्वादुपचाराद्दर्शशब्देन याग उच्यते । 'पक्षान्तेष्टौ दर्शने च **दर्शः** सूर्येन्दुसंगमे' । (**'दर्शस्तु** स्यादमावास्या यागभेदावलोकने' इति मेदिनी) ॥ (१) ॥*॥ पौर्णमास्यां भवः । 'संधिवेलाद्यृतु–' (४।३।१६) इत्यण् । **'पौर्णमासः** पुमान्यज्ञभेदे स्त्री पूर्णमातिथौ' इति मेदिनी) ॥ (१) ॥*॥ पक्षान्तयोरमावास्यापौर्णमास्योः । पृथग् भिन्नौ । न तु पर्यायः 'दर्शपौर्णमासयोः' **क्रमेणैकम्** ॥

शरीरसाधनापेक्षं नित्यं यत्कर्म तद्यमः ॥ ४८ ॥

शेति ॥ यच्छति । अनेन वा । यमनं वा । पचाद्यच् (३।

१—इदं च प्रागपि 'अमृते जारजः कुण्डः' इत्येतद्व्याख्यायामभिहितम् ॥ २—'गण्डूषा मञ्जूषा वृषी' इति मूर्धन्यान्तेषु लिङ्गकारिका—इति मुकुटः ॥

१—बाहुलकाद् घञ् । 'जापः' इति रक्षितः ॥ तेन 'शूद्रस्य मन्त्रजापं प्रत्यनधिकारात्' ( ) इत्यादिसिद्धिः—इति मुकुटः ॥ 'प्रजापो ब्राह्मण इव क्षत्रियोऽपि न लिप्यते पापैः' इति दमयन्तीश्लेषाच्च ॥ तद्व्याख्यायां च्यण्डपालश्च 'जपनं जापः' इत्यभिहितवान् ॥

१।१३४) 'यमः समुपनिविषु च' (३।३।६३) इत्यप् वा। **'यमोऽन्यलिङ्गो यमजे ना काके शमने शनौ। शरीरसाधनापेक्षनित्यकर्मणि संयमे'** (इति मेदिनी) ॥ (१) ॥*॥ शरीरमात्रेण साध्यं यावज्जीवं कार्यं सत्यास्तेयाहिंसादि यत् तस्यैकम् **'नैत्यिककर्मणः'** ॥

नियमस्तु स यत्कर्माऽनित्यमागन्तुसाधनम्।

नीति ॥ यत् कर्म अनित्यं न तु यावज्जीवं कर्तव्यम्, आगन्तुभिः कादाचित्कैः कामनया समयविशेषादिभिः साधनैः साध्यमुपवासस्नानजपादि। तत्। नियमः। प्राग्वत्। **'नियमो** यन्त्रणायां च प्रतिज्ञानिश्चये व्रते' (इति मेदिनी) ॥१॥*॥ एकम् **'नियमस्य'** ॥

उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे ॥ ४९ ॥

उपेति ॥ प्रोद्धृते बहिष्कृते सति वामस्कन्धार्पितम्। यज्ञस्य सूत्रम्, यज्ञार्थं धृतं सूत्रं वा। शाकपार्थिवादिः (वा० २।१।७८) ॥ (२) ॥*॥ उपवीयते स्म। 'अज गतिक्षेपणयोः' (भ्वा० प० से०)। 'अजेर्व्यघञपोः' (२।४।५६)। 'वी गत्यादिषु' (अ० प० अ०) वा। क्तः (३।२।१०२)। यद्वा उपाजति स्म। उपवेति स्म वा। 'गत्यर्था–' (३।४।७२) इति क्तः ॥ (१) ॥*॥ द्वे **'यज्ञोपवीतस्य'** ॥

प्राचीनावीतमन्यस्मिन्

प्रेति ॥ प्राचीनं प्रदक्षिणम् आवीयते स्म। प्राग्वत् ॥ (१) ॥*॥ अन्यस्मिन् वामकरे प्रोद्धृते सति ॥*॥ एकम् **'विपरीतधृतयज्ञोपवीतस्य'** ॥

निवीतं कण्ठलम्बितम्।

नीति ॥ नि वीयते स्म। प्राग्वत्। नि अधोभागे वीतं गमनमस्य वा। 'नि' इति प्रकृते 'राश्यधोभावविन्यासे' (इति मेदिनी) ॥ (१) ॥*॥ कण्ठाल्लम्बितम् ॥*॥ एकं **'करद्वये बहिष्कृते सति ऋजुभावेन स्थापितयज्ञसूत्रस्य'** ॥

अङ्गुल्यग्रे तीर्थं दैवम्

अङ्गेति ॥ अङ्गुलीनामग्रे। देवानामिदम्। 'तस्येदम्' (४।३।१२०) इत्यण्। देवो देवतास्य 'सास्य देवता' (४।१।२४) इत्यण्। 'देवाद्य (वस्नय) अञौ' (वा० ४।१।८५) इत्यञ् वा ॥ (१) ॥*॥ एकम् **'देवतीर्थस्य'** ॥

स्वल्पाङ्गुल्योर्मूले कायम् ॥ ५० ॥

स्वेति ॥ स्वल्पाङ्गुल्योः कनिष्ठिकयोरधोभागे। कः प्रजापतिर्देवतास्य। 'कस्येत्' (४।२।२५) इत्यण् इदन्तादेशश्च।–'तस्येदम्' (४।२।१२०) इत्यण्—इति मुकुटश्चिन्त्यः। **'कायः** कदैवते मूर्तौ संघे लक्ष्यस्वभावयोः। मनुष्यतीर्थे **कायं** स्यात्' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'कायतीर्थस्य'** ॥

मध्येऽङ्गुष्ठाङ्गुल्योः पित्र्यम्

मेति ॥ अङ्गुष्ठतर्जन्योः। पितरो देवतास्य। 'वाय्वृतुपितुषसो यत्' (४।२।३१)।—पितॄणामिदम्। पैत्रम्। 'तस्येदम्' (४।३।१२०) इत्यण्—इति मुकुटः ॥ (१) ॥*॥ एकम् **'पितृतीर्थस्य'** ॥

मूले ह्यङ्गुष्ठस्य ब्राह्मम्।

म्विति ॥ 'हिः' अवधारणे। 'ब्रह्मा देवतास्य' 'सास्य देवता' (४।२।२४) इत्यण् 'ब्राह्मोऽजातौ' (६।४।१७१) इति साधु ॥ (१) ॥*॥ एकम् **'ब्राह्मतीर्थस्य'** ॥

स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ॥ ५१ ॥

स्यादिति ॥ ब्रह्मणो भावः। 'भुवो भावे' (३।१।१०७) इति क्यप् ॥ (१) ॥*॥ 'तस्य भावस्त्वतलौ' (५।१।११९) ॥ (२) ॥*॥ युनक्ति 'युजिर् योगे' (स० उ० अ०)। 'इगुपध–' (३।१।१३५) इति कः। युजेन सह। 'तेन सह–' (२।२।२८) इति बहुव्रीहिः। 'वोपसर्जनस्य' (६।३।८२) इति सहस्य सः। यद्वा योजनम्। युक् संपदादि क्विप् (वा० ३।३।१०८)। सह युजा सयुज्यस्य सयुजो वा भावः। ब्राह्मणादित्वात् (५।१।१२४) ष्यञ् ब्रह्मणः सायुज्यम् ॥ (३) ॥*॥ त्रीणि **'ब्रह्मभावस्य'** ॥

देवभूयादिकं तद्वत्

देवेति ॥ देवस्य भावः। देवभूयमादिर्यस्य। **'देवत्वम्'**, **'देवसायुज्यम्'**। तद्वत् ब्रह्मभूयादिवत् त्रिरूपी ॥

कृच्छ्रं सांतपनादिकम्।

क्रिति ॥ कृन्तति। अनेन वा। 'कृती छेदने' (तु० प० से०)। 'कृतेश्छः कॄ च' (उ० २।२१) इति रक् छोऽन्तादेशश्च। **'कृच्छ्रमाख्यातमाभीले पापसांतपनादिनोः'** (इति मेदिनी) ॥ (१) ॥*॥ सम्यक्तपनमत्र। प्रज्ञाद्यण् (५।४।३८)। यद्वा संतपति। ल्युट् (३।३।११३)। तस्येदं कर्म। अण् (४।३।१२०)। 'गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतम्' (मनुः ११।२१२) आदिना चान्द्रायणप्राजापत्यपराकादिमहः। एकम् **'प्रायश्चित्तस्य'** ॥

संन्यासवत्यनशने पुमान् प्रायः

समिति ॥ सम्यक् न्यासः आत्यन्तिकस्त्यागः। तद्युक्तेनशनेऽभोजने। प्रकृष्टमयनम्। 'इण् गतौ' (अ० प० अ०)।

१—तथा च पातञ्जलसूत्रम् 'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः' (२।३०) इति ॥ २—तथा च पातञ्जलसूत्रम् 'शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः' (२।३२) इति ॥ ३—तथा च गोभिलसूत्रम् 'दक्षिणं बाहुमुद्धृत्य शिरोऽवधाय सव्येंऽसे प्रतिष्ठापयति दक्षिणं कक्षमन्ववलम्बं भवतीत्येवं यज्ञोपवीती भवति' (१।२।२) इति ॥ ४—तथा च गोभिलसूत्रम् 'सव्यं बाहुमुद्धृत्य शिरोवधाय दक्षिणेंऽसे प्रतिष्ठापयति सव्यं कक्षमन्ववलम्बं भवत्येवं प्राचीनावीती भवति' (१।२।३) इति ॥

'एरच्' (३।३।५६)। 'अय गतौ' (भ्वा० आ० से०)। घञ् (३।३।१८)। **'प्रायो** मरणानशने मृत्यौ बाहुल्यतुल्ययोः' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'प्रायोपवेशस्य'** ॥

अथ वीरहा ॥ ५२ ॥

नष्टाग्निः

अथेति ॥ वीरोऽग्निः । तं हन्ति । 'क्विप् च' (३।२।७६) ॥ (१) ॥*॥ नष्टोऽग्निर्यस्य ॥ (२) ॥*॥ द्वे **'प्रमादादिना यस्याग्निहोत्रिणोऽग्निर्नष्टस्तस्य'** ॥

कुहना लोभान्मिथ्येर्यापथकल्पना ।

क्विति ॥ कुहनम् । 'कुह विस्मापने' चुरादन्तः । 'ण्यासश्रन्थो युच्' (३।३।१०७) । **'कुहना** ग्रामजालं स्यात्' इति रत्नकोषः । **'कुहना** दम्भचर्यायामीर्ष्यालौ **कुहनस्त्रिषु'** (इति मेदिनी) ॥ (१) ॥*॥ मिथ्यातत्त्वे ईर्यापथस्याचारभेदस्य कल्पना संपादना ॥*॥ एकं **'दम्भेन कृतध्यानमौनादेः'** । अर्थलिप्सया मिथ्याधर्माश्रयणस्य वा ॥

व्रात्यः संस्कारहीनः स्यात्

व्रेति ॥ शरीरायासजीवी व्याधादिर्व्रातः स इव । 'शाखादिभ्यो यः' (५।३।१०३) यद्वा व्रातमर्हति । 'दण्डादिभ्यो यः' (५।१।६६) ॥ (१) ॥*॥ संस्कारैर्गर्भाधानादिभिरुपनयनादिभिर्वा हीनः ॥ (२) ॥*॥ द्वे **'संस्कारहीनस्य'** ॥

अस्वाध्यायो निराकृतिः ॥ ५३ ॥

अस्वेति ॥ न स्वाध्यायो वेदाध्ययनमस्य ॥ (१) ॥*॥ आकृतेरध्ययनचेष्टाया निर्गतः ॥ (२) ॥*॥ द्वे **'वेदाध्ययनरहितस्य'** ।—चत्वार्येकार्थानि—इत्येके ॥

धर्मध्वजी लिङ्गवृत्तिः

धेति ॥ धर्मस्य ध्वजश्चिह्नम् । धर्मो ध्वज इव वा । धर्मध्वजोऽस्यास्ति । इनिः (५।२।११५) ॥ (१) ॥*॥ लिङ्गमाश्रमादिचिह्नधारणं वृत्तिर्जीविकाहेतुर्यस्य ॥ (२) ॥*॥ द्वे **'भिक्षाद्यर्थं जटादिधारिणः'** ॥

अवकीर्णी क्षतव्रतः ।

अवेति ॥ अवकरणम् । 'कॄ विक्षेपे' (तु० प० से०) । 'कॄत् हिंसायाम्' (क्या० उ० से०) वा । भावे क्तः (३।३।११४)। अवकीर्णं विक्षिप्तं हिंसितं वा व्रतमनेन । 'इष्टादिभ्यश्च' (५।२।८८) इतीनिः ॥ (१) ॥*॥ क्षतं खण्डितं व्रतमस्य ॥ (२) ॥*॥ द्वे **'खण्डितब्रह्मचर्यादेः'** ॥

सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ॥ ५४ ॥

अंशुमानभिनिर्मुक्ताभ्युदितौ च यथाक्रमम् ।

स्विति ॥ अभि सर्वतः सायंतनेन कर्मणा निश्चयेन मुक्तः, अभि सर्वं सायंतनं कर्म निश्चयेन मुक्तं येन वा ॥ (१) ॥*॥ अभि सर्वत उद् अतिशयेन इतं गतं प्रातस्तनं कर्मास्मात् ॥ (१) ॥*॥ एकैकम् **'अभिनिर्मुक्ताभ्युदितयोः'** ॥

परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहात् ॥ ५५ ॥

पेति ॥ परिविन्दति ज्येष्ठं परित्यज्य भार्यां लभते । 'विदॢ लाभे' (तु० उ० अ०) । 'तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ' (उ० २।९४) ॥ (१) ॥*॥ एकं **'ज्येष्ठे विवाहरहिते कृतदारपरिग्रहस्य कनिष्ठस्य'** ॥

परिवित्तिस्तु तज्ज्यायान्

पेति ॥ परि वर्जनं विन्दति लभते । क्तिच् (३।३।१७४) ॥ (१) ॥*॥ तस्य परिवेत्तुः । ज्यायान् ज्येष्ठः ॥*॥ एकं **'परिवेत्तुर्ज्येष्ठभ्रातुः'** ॥

विवाहोपयमौ समौ ।

तथा परिणयोद्वाहोपयामाः पाणिपीडनम् ॥ ५६ ॥

वीति ॥ विशिष्टं वहनम् । घञ् (३।३।१८) ॥ (१) ॥*॥ उपयमनम् । 'यमः समुपनिविषु च' (३।३।६३) इत्यप् ॥ (२) ॥*॥ चाद् घञ् ॥ (३) ॥*॥ परिणयनम् । 'एरच्' (३।३।५६) ॥ (४) ॥*॥ (उद्वाहस्तु विवाहवत्) ॥ (५) ॥*॥ पाणेः पीडनं ग्रहणम् । 'कृत्योगा च' (वा० २।२।८) इति समासः ॥ (६) ॥*॥ षट् **'विवाहस्य'** ॥

व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतम् ।

व्येति ॥ व्यवायनम् । 'इण् गतौ' (अ० प० अ०) । 'एरच्' (३।३।५६) 'अय गतौ' । घञ् (३।३।१८) वा । (भ्वा० आ० से०) वा ॥ (१) ॥*॥ ग्रामे भवः **'ग्रामाद्यखौ'** (४।२।९४) । ग्राम्याणां जनानां धर्मः ॥ (२) ॥*॥ मिथुनस्य कर्म । 'प्राणभृज्जाति-' (५।१।१२९) इत्यण् । युवादित्वात् (५।१।१३०) वाण् ॥ (३) ॥*॥ नितरां ध्रुवनं हस्तपादादिचालनमत्र ॥ (४) ॥*॥ रमणम् । 'नपुंसके भावे क्तः' (३।३।११४) । 'अनुदात्तोपदेश-' (६।४।३७) इति मलोपः ॥ (५) ॥*॥ पञ्च **'मैथुनस्य'** ॥

त्रिवर्गो धर्मकामार्थैः

त्रीति ॥ त्रयाणां वर्गः समूहः ॥ (१) ॥*॥ धर्मश्च कामश्च अर्थश्च तैः कृत्वा ॥*॥ एकम् **'त्रिवर्गस्य'** ॥

चतुर्वर्गः समोक्षकैः ॥ ५७ ॥

चेति ॥ चतुर्णां वर्गः ॥ (१) ॥*॥ मोक्षेण सहितैर्धर्मकामार्थैः कृत्वा । उपलक्षितो वा ॥*॥ एकम् **'चतुर्वर्गस्य'** ॥

सबलैस्तैश्चतुर्भद्रम्

सेति ॥ बलेन सहितैर्धर्मादिभिः । चत्वारि भद्राणि श्रेष्ठान्यत्र वृन्दे । यद्वा चत्वारि भद्राणि । 'दिक्संख्ये संज्ञायाम्' (२।१।५०) इति समासः । **'भद्रो** वाच्यवच्छ्रेष्ठसाधुनोः' इति विश्वः ॥ (१) ॥*॥ एकम् **'चतुर्भद्रस्य'** ॥

जन्याः स्निग्धा वरस्य ये ।

जेति ॥ जनीं वधूं वहन्ति । 'संज्ञायां जन्या' (४।४।८२) इति यदन्तो निपातितः ॥ (१) ॥*॥ वरस्य जामातुर्ये स्निग्धास्तत्पक्षा वयस्यादयः । **'जन्यो** वरवधूज्ञातिप्रियभृत्यहितेषु च' इति विश्वः ॥ (१) ॥*॥ **'वरपक्षीयाणाम्'** ॥

इति सव्याख्यामरकोषे ब्रह्मवर्गः ॥

मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ।

म्विति ॥ मूर्धन्यभिषिक्तः । राज्यदानसमये मूर्धन्यभिषिच्यते । तत्प्रभवत्वात्सर्वोऽपि मूर्धाभिषिक्तः ॥ (१) ॥*॥ राज्ञोऽपत्यम् । 'राजश्वशुराद्यत्' (४।१।१३७) । 'ये चाभावकर्मणोः' (६।४।१६८) इति प्रकृत्या । यद्वा राजति । 'राजृ दीप्तौ' (भ्वा० उ० से०) । 'राजेरन्यः' (उ० ३।१००) ॥ (२) ॥*॥ बाहुभ्यां जातः । 'पञ्चम्यामजातौ' (३।२।९८) इति डः । बाह्वोर्जातो वा । 'सप्तम्यां जनेर्डः' (३।२।९७) । **'बाहुजः** क्षत्रिये कीरे स्वयंजाततिलेऽपि च' इति विश्वमेदिन्यौ ॥ (३) ॥*॥ क्षदति । 'क्षद संवरणे' सौत्रः । ष्ट्रन् (उ० ४।१५९) । क्षतात्त्रायते वा । पृषोदरादिः (६।३।१०९) । क्षत्रस्यापत्यम् । 'क्षत्राद्घः' (४।१।१३८) ॥ (४) ॥*॥ विशेषेण राजति । 'सत्सूद्विष–' (३।२।६१) इति क्विप् ॥ (५) ॥*॥ पञ्च **'क्षत्रियस्य'** ॥

राज्ञि राट्पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः ॥ १ ॥

रेति ॥ राजति । 'कनिन् युवृषि–' (उ० १।१५६) इति कनिन् । **'राजा** प्रभौ च नृपतौ क्षत्रिये रजनीपतौ । यक्षे शक्रे च पुंसि स्यात्' (इति मेदिनी) ॥ (१) ॥*॥ 'सत्सूद्विष–' (३।१।६१) इति क्विप् ॥ (२) (*) 'पृथिव्या ईश्वरः' । 'सर्वभूमिपृथिवीभ्यामणञौ' इत्यनुवर्तमाने 'तस्येश्वरः' (५।१।४२) इत्यञ् । **'पार्थिवो** नृपतौ भूमिविकारे पार्थिवोऽन्यवत्' (इति विश्वः) । **'पर्थिवो** नृपे । **पार्थिवी** स्यात्तु सीतायां पृथिव्या विकृतौ त्रिषु' (इति मेदिनी) ॥ (३) ॥*॥ क्ष्मां बिभर्ति । क्विप् (३।२।७६) । तुक् (६।१।७१) ॥*॥ **'क्ष्माभुक्'** इति पाठे क्ष्मां भुनक्ति पालयति । क्विप् (३।२।७६) ॥ (४) ॥*॥ तॄन् । पाति । 'पा रक्षणे' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥ (५) ॥*॥ भुवं पाति ॥ (६) ॥*॥ महीं क्षियति । 'क्षि निवासगत्योः' (तु० प० अ०) मह्यां क्षियति वा । 'क्षि क्षयैश्वर्ययोः' (भ्वा० प० अ०) । क्विप् (३।२।७६) । तुक् (६।१।७१) ॥ (७) ॥*॥ सप्त **'राज्ञः'** ॥

राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः ।

रेति ॥ संलग्नोऽन्त एकदेशोऽस्याः । 'प्रादिभ्यो धातुजस्य–' (वा० २।२।२४) इति समासः । समन्तायाः स्वदेशान्यवहितभूमेरिमे राजानः । 'तस्येदम्' (४।३।१२०) इत्यण् । प्रणता अशेषाः सामन्ताः स्वदेशानन्तरराजा यस्य ॥*॥ अधिक ईश्वरः ॥ (१) ॥*॥ एकं **'सर्वसंनिहितनृपवशकारिणः'** ॥

चक्रवर्ती सार्वभौमः

चेति ॥ चक्रे भूमण्डले राजमण्डले वा वर्तितुं शीलमस्य । 'सुपि–' (३।२।७८) इति णिनिः । **'चक्रं** गणे चक्रवाके' इति विश्वः । यद्वा चक्रं सैन्यं वर्तयितुं सर्वभूमौ चालयितुं शीलमस्य । अवश्यं वा चक्रं वर्तयति । 'आवश्यका–' (३।३।१७०) इति णिनिः ॥ (१) ॥*॥ सर्वभूमेरीश्वरः । 'तस्येश्वरः' (५।१।४२) इत्यण् । अनुशतिकादिः (७।३।२०) । 'सार्वभौमस्तु दिङ्नागे सर्वपृथ्वीपतावपि' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ द्वे **'समुद्रपर्यन्तभूमीश्वरस्य'** ॥

नृपोऽन्यो मण्डलेश्वरः ॥ २ ॥

त्रिति ॥ मण्डलस्य भूम्येकदेशस्य ईश्वरः । **'स्यान्मण्डलं** द्वादशराजके च देशे च बिम्बे च कदम्बके च' इति विश्वः ॥ (१) ॥*॥ एकम् **'माण्डलिकस्य'** ॥

येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः ।
शास्ति यश्चाज्ञया राज्ञः स सम्राट्

येनेति ॥ सम्यग् राजति । 'सत्सू–' (३।२।६१) इति क्विप् । 'मो राजि समः क्वौ' (८।३।२५) ॥ (१) ॥*॥ एकं **'सार्वभौमविशेषस्य'** ॥ केचित्तु पृथक् त्रीणि नामान्याहुः । राजसूयकर्ता सम्राट् । द्वादशराजमण्डलस्येश्वरोऽपि सम्राट् । सर्वनृपतीनां शासकोऽपि सम्राट् ॥

अथ राजकम् ॥ ३ ॥

राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात् ।

अथेति ॥ राज्ञां समूहः । 'गोत्रोक्षोष्ट्रोरभ्र–' (४।२।३९) इति वुञ् ॥ (१) ॥*॥ राजन्यानां समूहः । प्राग्वत् ॥ (१) ॥*॥ एकैकम् **'राजसमूहस्य'** ॥

मन्त्री धीसचिवोऽमात्यः

मेति ॥ मन्त्रो गुप्तभाषणमस्यास्ति । 'अतः–' (५।२।११५) इतीनिः । यद्वावश्यं मन्त्रयते । 'मन्त्रि गुप्तभाषणे' (चु० आ० से०) । 'आवश्यक–' (३।३।१७०) इति णिनिः ॥ (१) ॥*॥ धिया धियां वा सचिवः सहायः । धीप्रधानः सचिवो वा ॥ (२) ॥*॥ अमा सह समीपे वा भवः । 'अव्ययात्त्यप्' (४।२।१०४) ॥ (३) ॥*॥ त्रीणि **'मन्त्रिणः'** ॥

अन्ये कर्मसचिवास्ततः ॥ ४ ॥

अन्य इति ॥ ततो धीसचिवादन्ये 'कर्मसु सचिवाः सहायाः ॥ (१) ॥*॥ एकम् **'सहायकारिणाम्'** ॥

महामात्राः प्रधानानि

मेति ॥ **'मात्रा** कर्णविभूषायां वित्ते माने परिच्छदे । (अक्षरावयवे स्वल्पे क्लीबं कात्स्न्यैंऽवधारणे)' (इति मेदिनी) । महती मात्रा येषां ते । **'महामात्रः** समृद्धे चामात्ये हस्तिपकाधिपे' (इति मेदिनी) ॥ (१) ॥*॥ प्रकर्षेण धीयन्ते । 'डुधाञ् धारणपोषणयोः' (जु० प० अ०) । 'कृत्यल्युटः–' (३।३।११३) इति कर्मणि ल्युट् । **'प्रधानं** स्यान्महामात्रे प्रकृतौ परमात्मनि । प्रज्ञायामपि च क्लीबमेकत्वे तूत्तमे सदा' (इति मेदिनी) इति क्लीबलम् । पुंलिङ्गोऽपि । 'महामात्रः

प्रधानः स्यात्' इति पुंस्काण्डे बोपालितात् ॥ (२) ॥*॥ द्वे **'प्रधानस्य'** । त्रीणि कर्मसहायानाम्—इत्येके ॥

पुरोधास्तु पुरोहितः ।

प्वेति ॥ पुरोऽग्रे धीयते । 'पुरसि च' (उ० ४।२।३१) इति धाञोऽसिः ॥ (१) ॥*॥ पुरो धीयते स्म । क्तः (३।२।१०२) । 'दधातेर्हिः' (७।४।४२) ॥ (२) ॥*॥ द्वे **'धर्माध्यक्षस्य'** ॥

द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षदर्शकौ ॥ ५ ॥

द्रेति ॥ ऋणादानादीन्यष्टादश विवादस्थानानि व्यवहाराः । तेषां द्रष्टरि निर्णेतरि । प्रच्छनम् । 'क्विब्वचिप्रच्छिश्री–' (उ० २।२७) इत्युणादिसूत्रेण क्विब्दीर्घौ संप्रसारणाभावश्च । विवचनम् घञ् (३।३।१८) । प्राट् च विवाकश्च । प्राड्विवाकौ प्रश्नविवेकावस्य स्तः । अर्शआद्यच् (५।२।१२७) 'प्रश्नविचारयोः कुशल इत्यर्थः । 'विवादानुगतं पृष्ट्वा पूर्ववाक्यं प्रयत्नतः । विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः' ( ) ॥ (१) ॥*॥ **'अक्षः** कर्षे तुषे चक्रे शकटव्यवहारयोः' इति विश्वः । पश्यति । ण्वुल् (३।१।१३३) । अक्षाणां व्यवहाराणां दर्शकः ॥ (२) ॥*॥ द्वे **'व्यवहाराणां द्रष्टरि'** ॥

प्रतीहारो द्वारपालद्वाःस्थद्वाःस्थितदर्शकाः ।

प्रेति ॥ प्रतिहरणम् । घञ् (३।३।१८) । 'उपसर्गस्य घञि–' (६।२।१२२) इति वा दीर्घः । प्रतीहारो जनवारणमस्त्यस्य । अर्शआद्यच् (५।२।१२७) । मुकुटस्तु—प्रतिराभिमुख्ये । राज्ञोऽभिमुखं जनान् प्रतिहरति बहिः प्रापयति । 'ज्वलितिकसन्तेभ्यो णः' (३।१।१४०)—इति व्याख्यत् । तन्न । हृञो ज्वलादावपाठात् । ज्वलादेराकृतिगणत्वाभावाच्च । **'प्रतीहारो** द्वारि द्वाःस्थे द्वाःस्थितायां तु योषिति' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ द्वारं पालयति । 'कर्मण्यण्' (३।२।१) ॥ (२) ॥*॥ द्वारि तिष्ठति । 'सुपि–' (३।३।४) इति कः ॥ (३) ॥*॥ द्वारि तिष्ठति स्म । 'गत्यर्थाकर्मक–' (३।४।७२) इति क्तः । 'द्वाःस्थितः, दर्शकः' इति व्यस्तं नाम । (**'द्वाःस्थितो वेत्रधारकः'** इति त्रिकाण्डशेषः) । 'स्याद्दर्शको दर्शयिता प्रतीहारोऽपि **दर्शकः**' इति रुद्रः । (द्वाःस्थितस्य दर्शकः इति) समस्तं नाम (इत्यन्ये) । **'द्वारपो द्वाःस्थितादर्शौ'** इति रभसः ॥ (४) ॥*॥ (५) ॥*॥ पञ्च **'द्वारपालस्य'** ॥

रक्षिवर्गस्त्वनीकस्थः

रेति ॥ अवश्यं रक्षन्ति । 'रक्ष पालने' (भ्वा० प० से०) । 'आवश्यका–' (३।३।१७०) इति णिनिः । रक्षिणां वर्गः ॥ (१) ॥*॥ अनीकेन, अनीके वा तिष्ठति । 'सुपि–' (३।२।४) इति कः । **'अनीकस्थो** रणगते हस्तिशिक्षाविचक्षणे । राजरक्षिणि चिह्ने च वीरमर्दनकेऽपि च ॥' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ द्वे **'रक्षकगणस्य'** ॥

अथाध्यक्षाधिकृतौ समौ ॥ ६ ॥

अथेति ॥ अधिगतोऽक्षं व्यवहारम् । 'अत्यादयः–' (वा० २।२।१८) इति समासः । यद्वा अध्यक्षति । 'अक्षू व्याप्तौ' (भ्वा० प० से०) । अच् (३।१।१३४) । **'अध्यक्षोऽधिकृते प्रोक्तः प्रत्यक्षे त्वभिधेयवत्'** (इति मेदिनी) ॥ (१) ॥*॥ अधिकमुपरि वा क्रियते स्म । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'व्यापारितस्य'** ॥

स्थयुकोऽधिकृतो ग्रामे

स्थेति ॥ स्थातुं शीलमस्य । 'लषपदपदस्था–' (३।२।१५४) इत्युकञ् ॥ (१) ॥*॥ एकम् **'एकग्रामाधिकृतस्य'** ॥

गोपो ग्रामेषु भूरिषु ।

गवीति ॥ गोपायति । 'गुपू रक्षणे' (भ्वा० प० से०) 'आयादय आर्धधातुके वा' (३।१।३१) । अच् (३।१।१३४) । **'गोपो** गोपालके गोष्ठाध्यक्षे पृथ्वीपतावपि । ग्रामौघाधिकृते पुंसि शारिवाख्यौषधौ स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ एकं **'बहुग्रामाधिकृतस्य'** ॥

भौरिकः कनकाध्यक्षः

भावीति ॥ भूरिणि सुवर्णे नियुक्तः । 'तत्र नियुक्तः' (४।४।६९) इति ठक् ॥ (१) ॥*॥ कनकस्याध्यक्षः ॥ (२) ॥*॥ द्वे **'सुवर्णाधिकृतस्य'** ॥

रूप्याध्यक्षस्तु नैष्किकः ॥ ७ ॥

रूप्येति ॥ **'रूप्यः** स्यात्सुन्दरे त्रिषु । आहतस्वर्णरजते रजते च नपुंसकम्' (इति मेदिनी) । रूपस्याध्यक्षः ॥ (१) ॥*॥ निष्के हेम्नि नियुक्तः प्राग्वत् । 'टङ्कपतिर्नैष्किको **रजताध्यक्षः**' इति रभसः ॥ (२) ॥*॥ द्वे **'टङ्ककादिशालायां नियुक्तस्य'** ॥

अन्तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जनः ।

अन्तेति ॥ अन्तर् अभ्यन्तरो वंशो गृहम् । अन्तर्वंशे नियुक्तः । 'तत्र नियुक्तः' (४।४।६९) इति ठक् । संज्ञापूर्वकत्वान्न वृद्धिः । यद्वा अन्तर्वंशोऽस्यास्ति । 'अत इनिठनौ' (५।२।११५) ॥ (१) ॥*॥ एकम् **'अन्तःपुराधिकृतस्य जनस्य'** ॥

सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च ते ॥८॥

सावीति ॥ सुष्ठु विदन्तं विद्वांसमपि लान्ति वशवर्तिनं कुर्वन्ति । सुविदल्लाः स्त्रियः । तासामिमे रक्षकाः । 'तस्येदम्' (४।३।१२०) इत्यण् ॥ (१) ॥*॥ 'कञ्चुकश्चोलकोऽस्त्येषाम्' । इनिः (५।२।११५) । **'कञ्चुकी** जोङ्गकतरौ महल्ले पन्नगे विटे' इति हैमः ॥ (२) ॥*॥ तिष्ठन्त्येषु पुरुषाः । 'घञर्थे

कः' (वा० ३।३।५८)। स्थानां दाराणां पतयः पालकाः स्थपतय एव। चतुर्वर्णादित्वात् (वा० ५।१।१२४) स्वार्थे ष्यञ्। **'स्थपतिः** कञ्चुकिन्यपि' (इति मेदिनी) ॥ (३) ॥*॥ सुविदन्ति। 'इगुपध–' (३।१।१३५) इति कः। सुविदा एव। प्रज्ञादित्वात् (५।४।३८) स्वार्थेऽण्। यद्वा सुवेदनम्। संपदादि क्विप् (वा० ३।३।१०८)। सुविद् सुज्ञानमस्त्येषाम्। ज्योत्स्नादित्वात् (वा० ५।२।१०३) अण्। यद्वा सुविज्ञाश्चतुराः स्त्रियस्तासामिमे रक्षकाः। 'तस्येदम्' (४।३।१२०) इत्यण् ॥ (४) ॥*॥ चत्वारि **'राज्ञां रुयगारे बही रक्षाधिकृतस्य'** ॥

शण्ढो वर्षवरस्तुल्यौ

शेति ॥ शाम्यति शिश्नाभावात्। 'शमु उपशमे' (दि० प० से०)। 'शमेर्ढः' (उ० १।९९)। **'शण्ढः** क्लीबस्तु कञ्चुकी' इति (तालव्यादौ) रभसः। **'शण्ढः** स्यात्पुंसि गोपतौ। आकृष्टाण्डे वर्षवरे तृतीयप्रकृतावपि' (इति मेदिनी)। **('शण्ढषण्ढौ** तु सौविदौ। वन्ध्यपुंसीद्वरे क्लीबे' इति हैमः) ॥ (१) ॥*॥ वृणोति। 'वृञ् वरणे' (स्वा० उ० से०)। वरति 'वर आवरणे' ( ) वा। अच् (३।१।१३४)। वर्षस्य रेतःपातस्य वरः। 'ये त्वल्पसत्त्वाः प्रथमाः क्लीबाश्च स्त्रीस्वभाविनः। जात्या न दुष्टाः कार्येषु ते वै वर्षवराः स्मृताः' ॥ (२) ॥*॥ द्वे **'अत्यन्तान्तर्महल्लकानाम्'** ॥

सेवकार्थ्यनुजीविनः।

सेवेति ॥ सेवते। 'षेवृ सेवने' (भ्वा० आ० से०)। ण्वुल् (३।१।३३)। **'सेवकस्तु** प्रसेवे ना वाच्यलिङ्गोऽनुजीविनि' (इति मेदिनी) ॥ (१) ॥*॥ अर्थोऽसंनिहितोऽस्यास्ति। 'अर्थाच्चासंनिहिते' (५।२।१३५) इतीनिः। **'अर्थी** पुमान्याचके स्यात्सेवके च विवादिनि' (इति मेदिनी) ॥ (२) ॥*॥ अनुजीवितुं शीलः। 'सुपि–' (३।२।७८) इति णिनिः ॥ (३) ॥*॥ त्रीणि **'सेवकस्य'** ॥

विषयानन्तरो राजा शत्रुः

वीति ॥ शातयति 'शदॢ शातने' (भ्वा० प० अ०)। ण्यन्तः। 'रुशातिभ्यां कुन्' (उ० ४।१०४)। 'बहुलमन्यत्रापि' (उ० १८०) इति णिलुक्।—शदेः 'जत्वादयश्च' (उ० ४।१०२) इति रुः हस्वश्च—इति मुकुटः। तन्न। उक्तरीत्या निर्वाहात् ॥ (१) ॥*॥ एकं **'स्वदेशाव्यवहितदेशस्य राज्ञः'** ॥

मित्रमतः परम् ॥ ९ ॥

मीति ॥ मेद्यति। 'ञिभिदा स्नेहने' (दि० प० से०) 'अमिचिमिदिशसिभ्यः क्रः' (उ० ४।१६४)।—ष्ट्रन् (उ० ४।१५९)—इति मुकुटः। तन्न। गुणप्रसङ्गात्। सूत्रस्य सत्त्वाच्च। **'मित्रं** सुहृदि न द्वयोः। सूर्ये पुंसि स्त्रियां गन्धद्रव्ये दैत्यान्तरे पुमान्' (इति मेदिनी) ॥ (१) ॥*॥ अतः शत्रोः ॥*॥ एकम् **'मित्रस्य'** ॥

उदासीनः परतरः

विति ॥ अतिशयितः परः परतरः। उदास्ते। 'आस उपवेशने' (अ० आ० से०)। लटः शानच् (३।२।१२४)। 'ईदासः' (७।२।८३) इति ईत्वम् ॥ (१) ॥*॥ एकं **'शत्रुमित्राभ्यां परस्य राज्ञः'** ॥

पार्ष्णिग्राहस्तु पृष्ठतः।

पेति ॥ पार्ष्णिं पश्चात्पदं गृह्णाति। 'कर्मण्यण्' (३।२।१)। 'सैन्यपृष्ठे पुमान् **पार्ष्णिः** पश्चात्पदजिगीषयोः' इति विश्वः ॥ (१) ॥*॥ एकं **'जिगीषोः पृष्ठभागस्थितस्य राज्ञः'** ॥

रिपौ वैरिसपत्नारिद्विषद्वेषणदुर्हृदः ॥ १० ॥
द्विड्द्विपक्षाहितामित्रदस्युशात्रवशत्रवः।
अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः ॥ ११॥

रीति ॥ रपति दोषम्। 'रप व्यक्तायां वाचि' (भ्वा० प० से०)। 'रपेरिच्चोपधायाः' (उ० १।२६) इति कुः ॥ (१) ॥*॥ वीरस्य कर्म भावो वा। युवादित्वात् (५।१।१३०) '–वैरमैथुनिकयोः' (४।३।१२५) इति निर्देशाद्वाऽण्। वैरमस्यास्ति। इनिः (५।२।११५) ॥ (२) ॥*॥ सपत्नीव। 'व्यन् सपत्ने' (४।१।१४५) इति निर्देशादकारः ॥ (३) ॥*॥ इयर्ति विरोधम्। 'ऋ गतौ' (जु० प० अ०)। 'अच इः' (उ० ४।११९) ॥ (४) ॥*॥ द्वेष्टि 'द्विष अप्रीतौ' (अ० उ० अ०) 'द्विषोऽमित्रे' (३।२।१३१) इति शतृ ॥ (५) ॥*॥ द्वेषशीलः। 'क्रुधमण्डार्थेभ्यश्च' (३।२।१५१) इति युच् ॥ (६) ॥*॥ दुष्टं हृदयमस्य। 'सुहृद्दुर्हृदौ मित्रामित्रयोः' (५।४।१५०) इति साधुः ॥ (७) ॥*॥ द्वेष्टि। क्विप् (३।२।६१) ॥ (८) ॥*॥ विरुद्धः पक्षोऽस्य। **'पक्षो** मासार्धके पार्श्वे ग्रहे साध्यविरोधयोः' (इति विश्वमेदिन्यौ)। विविधः पक्षोऽस्य वा ॥ (९) ॥*॥ न हितमस्मात् ॥ (१०) ॥*॥ अमति गच्छति। 'अम गतौ' (भ्वा० प० से०) 'अम रोगे' (चु० उ० से०) 'अमेर्द्विषति चित्' (उ० ४।१७४)। इतीत्रन् ॥ (११) ॥*॥ दस्यति। 'दसु उपक्षये'। (दि० प० से०)। 'यजिमनिशुन्धिदसिजनिभ्यो युच्' (उ० ३।२०) बाहुलकादनादेशस्य (७।१।१) अभावः ॥ (१२) ॥*॥ शातयति। 'रुशातिभ्यां कुन्' (उ० ४।१०४) ॥ (१३) ॥*॥ शत्रुरेव। प्रज्ञाद्यण् (५।४।३८) ॥ (१४) ॥*॥ अभिहन्तुं शीलः। 'सुपि–' (३।२।७८) इति णिनिः ॥*॥ **'द्वेष्योऽभियातिरमित्रः'** इति रत्नकोशः। तत्राभियातेः क्तिच् (३।३।१७४)। बाहुलकात्तिर्वा ॥ (१५) ॥*॥ पिपर्ति रोषम्। 'पॄ पालनपूरणयोः' (जु० प० से०)। अच् (३।१।१३४) ॥ (१६) ॥*॥ न राति सुखम्। 'रा दाने' (अ० प० अ०)। क्तिच् (३।३।१७४) तिर्वा ॥ (१७) ॥*॥ प्रतिकूलमर्थयितुं शीलः 'अर्थ याच्ञायाम्' (चु० उ० से०)। 'सुपि–' (३।२।७८) इति णिनिः ॥ (१८) ॥*॥ परि दोषा-

१—'अनुनासिकपरत्वाभावादनादेशो न इति तु भाष्यसिद्धान्तः॥'

ख्याने पन्थयितुं शीलः । 'पथि गतौ' चुरादिः । णिनिः (३।२।७८) । **'परि'** शब्दश्च प्रकृते 'दोषाख्याने निरसने पूजाव्याप्त्योश्च भूषणे' (इति मेदिनी) ॥ (१९) ॥*॥ ऊनविंशतिः **'शत्रोः'** ॥

वयस्यः स्निग्धः सवयाः

वेति ॥ वयसा तुल्यः । 'नौवयोधर्म–' (४।४।९१) इति यत् ॥ (१) ॥*॥ स्निह्यति 'ष्णिह प्रीतौ' (दि० प० से०) । 'मतिबुद्धिपूजार्थेभ्यश्च' (३।२।१८८) इति चादुर्तमाने क्तः ॥ (२) ॥*॥ समानं वयोऽस्य । 'ज्योतिर्जनपद–' (६।३।८५) इति समानस्य सः ॥ (३) ॥*॥ त्रीणि **'तुल्यवयसः'** ॥

अथ मित्रं सखा सुहृत् ।

अथेति ॥ मेद्यति । 'ञिमिदा स्नेहने' (दि० प० अ०) 'अमिचिमिदिशसिभ्यः क्रः' (उ० ४।१६४) ।—ष्ट्रन् (उ० ४।१५९)–इति मुकुटश्चिन्त्यः ॥ (१) ॥*॥ समानः ख्यायते लोकैः । 'समाने ख्यः सः चोदात्तः' (उ० ४।१३७) इतीण् स च डित् । टिलोपः (६।४।१४३) । 'नौ व्यो यलोपः' इत्यतोऽनुवर्तनाद्यलोपः समानस्य सभावः ॥ (२) ॥*॥ शोभनं हृदयमस्य । 'सुहृदुर्हृदौ–' (५।४।१५०) इति साधुः ॥ (३) ॥*॥ त्रीणि **'मित्रस्य'** ॥

सख्यं साप्तपदीनं स्यात्

सेति ॥ सख्युर्भावः कर्म वा । 'सख्युर्यः' (५।१।१२६) ॥ (१) ॥*॥ सप्तभिः पदैरवाप्यते । 'साप्तपदीनं सख्यम्' (५।२।२२) इति साधु ॥ (२) ॥*॥ द्वे **'सख्युर्धर्मकर्मणोः'** ॥

अनुरोधोऽनुवर्तनम् ॥ १२ ॥

अन्विति ॥ अनुगम्य रोधनम् 'रुधिर् आवरणे' (रु० उ० से०) । घञ् (३।३।१८) ॥ (१) ॥*॥ अनुगम्य वर्तनं चित्ताराधनम् ॥ (२) ॥*॥ द्वे **'आराध्यादेरिङ्संपादनस्य'** ॥

यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः ।
चारश्च गूढपुरुषश्च

येति ॥ अर्हति । 'अर्ह पूजायाम्' (भ्वा० प० से०) । अच् (३।१।१३४) । यो योऽर्हः । यथार्हं वर्णो रूपमस्य । **'वर्णः स्याद्भेदरूपयोः'** इति धरणिः ॥ (१) ॥*॥ प्रकर्षेण निधीयते ज्ञेयमत्र । 'उपसर्गे घोः किः' (३।३।९२) 'प्रणिधिर्याचने चरे' (इति हैमः) ॥ (२) ॥*॥ अपसर्पति । 'सृप्लृ गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (३) ॥*॥ चरति । 'चर गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) । **'चरोऽक्षद्यूतभेदे च भौमे चारे त्रसे चले'** (इति मेदिनी) ॥ (४) ॥*॥ प्रज्ञाद्यणि (५।४।३८) 'चारः' अपि ॥*॥ **'चारः** पियालवृक्षे स्याद्गतौ बन्धापसर्पयोः' (इति मेदिनी) ॥ (५) ॥*॥ स्पशति । 'स्पश बाधनस्पर्शनयोः' (भ्वा० उ० से०) अच् (३।१।१३४) । **'स्पशः** स्यात्संपराये च प्रणिधावपि पुंस्यय-म्' (इति मेदिनी) ॥ (६) ॥*॥ गूढश्चासौ पुरुषश्च ॥ (७) ॥*॥ सप्त **'चारपुरुषस्य'** ॥

आप्तः प्रत्ययितस्त्रिषु ॥ १३ ॥

आप्त इति ॥ आप्यते स्म । 'आप्लृ व्याप्तौ' (स्वा० प० अ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ प्रत्ययो विश्वासः संजातोऽस्य । 'तदस्य संजातम्–' (५।२।३६) इतीतच् । **'प्रत्ययः** शपथे रन्ध्रे विश्वासाचारहेतुषु' इति विश्वः ॥ (२) ॥*॥ द्वे **'विश्वासाधारस्य'** ॥

सांवत्सरो ज्यौतिषिको दैवज्ञगणकावपि ।
स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि ॥ १४ ॥

सांवेति ॥ संवत्सरं वेत्ति । 'तदधीते तद्वेद' (४।२।५९) इत्यण् ॥ (१) ॥*॥ ज्योतिर्नक्षत्राद्यधिकृत्य कृतो ग्रन्थः । 'अधिकृत्य कृते ग्रन्थे' (४।३।८७) इत्यण् । संज्ञापूर्वकत्वान्न वृद्धिः । ज्योतिषमधीते वेद वा । 'क्रतूक्थादि–' (४।२।६०) इति ठक् ॥ (२) ॥*॥ दैवं प्राक्कृतं शुभाशुभं कर्म जानाति । 'आतोऽनुप–' (३।२।३) इति कः ॥ (३) ॥*॥ गणयति । 'गण संख्याने' (चु० उ० से०) । ण्वुल् (३।१।१३३) ॥ (४) ॥*॥ मुहूर्तम् (अधिकृत्य कृतं ग्रन्थम्) अधीते । प्राग्वदण्ठकौ ॥ (५) ॥*॥ ज्ञानमस्यास्ति । इनिः ॥ (६) ॥*॥ ५।२।११५) ॥ (७) ॥*॥ कृतान्तं वेत्ति । उक्थादिठक् (४।२।६०) ॥ (८) ॥*॥ अष्टौ **'ज्यौतिषिकस्य'** ॥

तान्त्रिको ज्ञातसिद्धान्तः

तेति ॥ तन्त्रं सिद्धान्तमधीते वेद वा । प्राग्वढक् (४।२।६०) ॥ (१) ॥*॥ ज्ञातः सिद्धान्तो येन ॥ (२) ॥*॥ द्वे **'तत्त्वार्थज्ञातुः'** ॥

सत्री गृहपतिः समौ ।

सेति ॥ सत्रमस्यास्ति । इनिः (५।२।११५) । **'सत्रमाच्छादने यज्ञे सदादाने च कैतवे'** इति विश्वः ॥ (१) ॥*॥ गृहस्य पतिः ॥ (२) ॥*॥ द्वे **'सदान्नादिदानकर्तुर्गृहस्थस्य'** ॥

लिपिंकरोऽक्षरचणोऽक्षरचुञ्चुश्च लेखके ॥ १५ ॥

लीति ॥ लिपिं करोति । 'दिवाविभा–' (३।२।२१) इति टः ॥*॥ एवं 'लिबिंकरः' अपि ॥ (१) ॥*॥ अक्षरैर्वित्तः । 'तेन वित्तः–' (५।२।५६) इति चणप् ॥ (२) ॥*॥ एवम् 'अक्षरचुञ्चुः' अपि ॥ (३) ॥*॥ लिखति । 'लिख अक्षरविन्यासे' (तु० प० से०) । 'शिल्पिनि ष्वुन्' (३।१।१४५) । ण्वुल् (३।१।१३३) वा ॥ (४) ॥*॥ चत्वारि **'लेखकस्य'** ॥

लिखिताक्षरविन्यासे लिपिर्लिबिरुभे स्त्रियौ ।

लिखीति ॥ लिख्यते स्म । क्तः (३।२।१०२) ॥*॥ अक्षराणां विन्यासः ॥*॥ लिखितं चाक्षरविन्यासश्च । अनयोः

समाहारः । तस्मिन् । कर्मधारयो वा ॥*॥ लिप्यते । 'लिप उपदेहे' (जु० उ० अ०) । 'इक् कृष्यादिभ्यः' (वा० ३।३। १०८) । 'इगुपधात् कित्' (उ० ४।१२०) इतीन् वा ॥ (१) ॥*॥ '-किंलिपिलिबि-' (३।२।२१) इति लिङ्गात् पत्र बो वा ॥ (२) ॥*॥—'लिबिः' सौत्रो धातुः—इति मुकुटः ॥ (२) ॥*॥ द्वे । चत्वार्येव नामानि—इति केचित् ।—'लिखिताक्षरसंस्थाने' इत्येकमेकपदम्—इत्यन्ये । द्वे **'लेखनस्य'** ॥

स्यात्संदेशहरो दूतः

स्यादिति ॥ संदेशं वाचिकं हरति । 'हरतेरनुद्यमनेऽच्' (३।२।९) ॥ (१) ॥*॥ दवति । 'दु गतौ' (भ्वा० प० से०) । 'दुतनिभ्यां दीर्घश्च' (उ० ३।९०) इति क्तः । यद्वा दूयते स्म । 'दूङ् परितापे' (दि० आ० से०) । 'गत्यर्था-' (३। ४।७२) इति क्तः ॥ (२) ॥*॥ द्वे **'संदेशहरस्य'** ॥

दूत्यं तद्भावकर्मणी ॥ १६ ॥

द्वितीति ॥ दूतस्य भावः कर्म वा । 'दूतवणिग्भ्यां च' इति यः ॥*॥ ब्राह्मणादित्वात् (५।१।१२४) ष्यञि **'दौत्यम्'** अपि । केचित्तु—'दूत्यं तद्भागकर्मणी'—इति पाठं मन्यते । तत्र 'दूतस्य भागकर्मणी' (४।४।१२०) इति यत् ॥ (१) ॥*॥ एकम् **'दूतकर्मणः'** ॥

अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि ।

अध्वेति ॥ अध्वानमलं गच्छति 'अध्वनो यत्खौ' (५। २।१६) । 'आत्माध्वानौ खे' (६।४।१६९) ॥ (१) ॥*॥ 'ये चाभावकर्मणोः' (६।४।१६८) इति टिलोपो न ॥ (२) ॥*॥ अध्वानं गच्छति । 'अन्तात्यन्ताध्व-' (३।२।४८) इति डः ॥ (२) ॥*॥ पन्थानं नित्यं गच्छति । 'पन्थो ण नित्यम्' (५।१।७६) स्त्रियां पान्था ॥ (४) ॥*॥ 'पथः ष्कन्' (५।१।७५) । पित्त्वात् ङीष् (४।१।४१) पथिकी ॥ (५) ॥*॥ पञ्च **'पान्थस्य'** ॥

स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलानि च ॥ १७ ॥
राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च ।

स्वेति ॥ स्वामी राजा ।—पुरोहितः—इति श्रीधरः । अमात्यो मन्त्री । सुहृद् मित्रम् । कोशो भण्डारः । राष्ट्रं देशः । पर्वतादि दुर्गाणि । बलं सैन्यम् ॥*॥ राज्यस्य राजकर्मणोऽङ्गानि ॥ (१) ॥*॥ प्रकृष्टं कुर्वन्ति राज्यम् । क्तिच् (३।३। १७४) ॥ (२) ॥*॥ पौराणां नागराणाम् । श्रयन्ति, श्रीयन्ते, वा । 'वहिश्री-' (उ० ४।५१) इति निः । एके मुख्याः सजातीयसमूहाः ॥*॥ कामन्दकीये—'स्वाम्यमात्यश्च राष्ट्रं च दुर्गं कोशो बलं सुहृत् । परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते' । 'पौरश्रेणिभिः सहाष्टाङ्गमपि राज्यम्' इति दर्शितम् । द्वे **'राज्याङ्गानाम्'** ॥

संधिर्ना विग्रहो यानमासनं द्वैधमाश्रयः ॥ १८ ॥
षड् गुणाः

समिति ॥ संधानम् । 'उपसर्गे घोः किः' (३।३।९२) ॥ (१) ॥*॥ विरुद्धं विविधं वा ग्रहणम् । 'ग्रहवृह-' (३।३। ५८) इत्यप् ॥ (१) ॥*॥ यात्यत्र । ल्युट् (३।३।११७) ॥ (१) ॥*॥ आसनम् 'आस उपवेशने' (अ० आ० से०) । ल्युट् (३।३।११५) ॥ (१) ॥*॥ द्विपकारम् । 'संख्याया विधार्थे धा' (५।३।४२) । 'द्वित्र्योश्च धमुञ्' (५।३।४५) ॥ (१) ॥*॥ आश्रयणम् । 'श्रिञ् सेवायाम्' (भ्वा० उ० से०) । 'एरच्' (३।३।५६) ॥ (१) ॥*॥ एतानि षट् **'गुणशब्दवाच्यानि'** ॥

१—काङ्क्षिकास्थमिदम् । भाष्ये तु नास्त्येव—इति सिद्धान्तकौमुदी ॥

१—स्वर्णादिदानेन (पर)बन्धुभिः प्रीत्युत्पादना मित्रीकरणं **संधिः** । अयं च बहुविधो ग्रन्थविस्तरभिया न लिखितः ॥*॥ परमण्डले दाहलुण्ठनच्छेदादि **विग्रहः** ॥ तं च प्रकाशकूटतूष्णींभेदेन त्रिविधमाह ॥*॥ उपचितशक्तेः कृतमूलराष्ट्ररक्षकस्य शत्रोरवस्कन्दनाय यात्रा **यानम्** ॥ तच्च विगृह्ययानम्, संधाययानम्, संभूययानम्, प्रसङ्गयानम्, उपेक्ष्ययानम्, च इति पञ्चविधम् । पञ्चास्थायिनः शत्रोर्बलद्रव्यजनपदवासादिकं हृत्वा पुरोवर्तिनि शत्रौ या यात्रा तद्विगृह्ययानम् । शून्यराज्यग्रहणसमर्थेन शत्रुणा संधिं विधायारेः संमुखगमनं संधाययानम् । बलवदरिणा संधाय संमील्य तैः सह कातरेऽरौ यद्यानं तत् संभूययानम् । एकप्रकृतयानस्यान्तरोपस्थितेऽनुद्वेश्येऽपि यद्यानं तत्प्रसङ्गयानम् । शत्रोर्बलाधानाय पथि प्राप्तेषु शत्रुमित्रेषु अवरेषु वा बलिषु शत्रुमुपेक्ष्य यद्यानं तदुपेक्ष्ययानम् ॥*॥ 'नाहमिदानीं योद्धं समर्थः' इति कालादिप्रतीक्षया विजिगीषोर्दुर्गादीन् वर्धयतः स्थितिरासनम् । तदपि विगृह्यासनम्, संधायासनमित्यादि पूर्ववत् पञ्चविधम् । विग्रहेण शत्रोरवस्कन्देऽशक्तस्य तदेशादिकं विनाश्य दुर्गं प्रविश्यावस्थानं विगृह्यासनम् । तुल्यबलत्वाद्युद्धे क्षीयमाणयोः संधिं कृत्वावस्थानं संधायासनम् । बलिनः शत्रोर्जयेऽशक्तस्य दुर्गाश्रयेणापि स्थातुमशक्यत्वाद्बलिना मित्रेण शत्रुणा वा मिलित्वावस्थानं संभूयासनम् । शत्रुमभिगच्छतो मित्रागमनादेरुत्सवस्य च प्रसङ्गेनान्तरा स्थितिः प्रसङ्गासनम् । बलिनमपि शत्रुं दुर्नयादिना नित्यमपचीयमानमुपेक्ष्य तदपचयापेक्षया स्थितिरुपेक्ष्यासनम् ॥*॥ बलिनोर्वैरिणोर्मध्ये काकाक्षिवदलक्षितस्योभयत्र वाचा समर्पणम् (इत्येकम्) द्वैधम् ॥ बलिना सह संधिः अबलेन सह विग्रहः इत्यपरम् । शत्रोर्वा मूलप्रकृतिभिः सह संधाय शत्रुणा सह विग्रहः इति तृतीयम् । शत्रुणैव वा संधिविग्रहसमुदायहेतोर्दुर्गाश्रयस्य व्यापारः, इति चतुर्थम्—इति चतुर्विधं द्वैधम् ॥*॥ बलवतारिणोच्छिद्यमानस्य हीनशक्तेर्यद्बलवद्भमैविजिगिसमाश्रयणं तदाश्रयः ॥ तस्यैव वा बलिनः शत्रोः सेवया कोषादिदानेन वाश्रयणमाश्रयः—इति द्विविध **आश्रयः** । उक्तं च—'उच्छिद्यमानो रिपुणा निरुपायप्रतिक्रियः । शक्तिहीनः संश्रयते बलिनं धार्मिकं नृपम्' इति ॥—इति मुकुटे विशेषः ॥

शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः ।

शेति ॥ शक्यते जेतुमनया । 'स्त्रियां क्तिन्' (३।३।९४) । शक्तिशब्दवाच्याः ॥*॥ भवत्यनेन । 'श्रिणीभुवः–' (३।३।२४) इति घञ् । प्रकृष्टो भावः । उक्तं हि—'कोशदण्डबलं प्रभुशक्तिः' इति ॥ (१) ॥*॥ उत्सहतेऽनेन 'षह मर्षणे' (भ्वा० आ० से०) । 'हलश्च' (३।३।१२१) इति घञ् । उक्तं हि 'विक्रमबलमुत्साहशक्तिः' इति ॥*॥ संध्यादीनां सामादीनां च यथावस्थापनम्, न तु ज्ञानबलं मन्त्रशक्तिः ।—'पञ्चाङ्गमन्त्रो मन्त्रशक्तिः' इत्यन्ये ॥ **'तिसृणां शक्तीनाम्' ॥**

क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्॥१९॥

क्षेति ॥ क्षयनम् । 'एरच्' (३।३।५६) । अष्टवर्गस्यापचयः क्षयः ॥ (१) ॥*॥ उपचयो वृद्धिः ॥ (१) ॥*॥ उपचयापचयाभावः स्थानम् ॥ (१) ॥*॥ 'कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् । खन्याकरबलादानं शून्यानां च विवेचनम्' इत्यष्टवर्गः ॥*॥ त्रयाणां वर्गः ॥ (१) ॥*॥ इति **'नीतिवेदिनां त्रिवर्गः' ॥**

स प्रतापः प्रभावश्च यत्तेजः कोशदण्डजम् ।

स इति ॥ प्रतापयत्यनेन । 'तप संतापे' (भ्वा० प० अ०) ण्यन्तः । 'पुंसि–' (३।३।११८) इति घः । प्रतपनं वा । भावे घञ् (३।३।१८) ॥ (१) ॥*॥ भवत्यनेन । 'श्रिणीभुवः–' (३।३।२४) इति घञ् । प्रकृष्टो भावः । प्रभवनं वा । भावे घञ् (३।३।१८) ॥ (२) ॥*॥ 'अधिक्षेपावमानादेः प्रयुक्तस्य परेण यत् । प्राणात्यये प्र(प्य)सहनं तत्तेजः समुदाहृतम्' इति भरतः । कोशो धनम् । दण्डो दमः सैन्यं च । ताभ्यां जातम् । 'पञ्चम्याम्–' (६।२।९८) इति ङः ॥*॥ द्वे **'कोशदण्डजतेजसः' ॥**

भेदो दण्डः साम दानमित्युपायचतुष्टयम् ॥ २० ॥

भेति । भेदनम् । 'भिदिर् विदारणे' (रु० उ० अ०) । घञ् (३।३।२८) । शत्रोरमात्यादीनामुपायेन परतो विश्लिष्यात्मसात्करणं भेदः ॥ (१) ॥*॥ दमनम् । 'दमु उपशमे (दि० प० शे०) । 'अमन्ताङ्डः' (उ० १।११४) । दण्डः शास्तिः ॥ (१) ॥*॥ सामनम् । 'साम सान्त्वप्रयोगे' (चु० उ० से०) । बाहुलकात्कनिन् । यद्वा स्यति रोषमनेन । 'षोऽन्तकर्मणि' (दि०प० अ०) । 'सातिभ्यां मनिन्मनिणौ' (उ० ४।१५३) इति मनिन् । मुकुटस्तु–'सामन्दामन्हेमन्' इत्यादिना निपात्यते—इत्याह । तन्न । उज्ज्वलदत्तादिषु तादृशसूत्रादर्शनात् । प्रियवचनादिना क्रोधोपशमनं साम । 'परस्परोपकाराणां दर्शनं गुणकीर्तनम् । संबन्धस्य समाख्यानमाययाः संप्रकाशनम् । वाचां पेशलया साधु तवाहमिति चार्पणम् । इति सामविधानज्ञैः साम पञ्चविधं स्मृतम्' ॥ (१) ॥*॥ स्वधनस्य परेभ्यः प्रतिपादनं दानम् ॥ (१) ॥*॥ उपायतेऽनेन । 'हलश्च' (३।३।१२१) इति घञ् । **'उपायः** सामभेदादौ तथैवोपगतौ पुमान्' (इति मेदिनी) । उपायानां चतुष्टयम् । अन्यत्र सप्तोपाया उक्ताः । 'साम दानं च भेदश्च दण्डश्चेति चतुष्टयम् । मायोपेक्षेन्द्रजालं च सप्तोपायाः प्रकीर्तिताः' ॥ इति **'उपायचतुष्टयम्' ॥**

साहसं तु दमो दण्डः

सेति ॥ सहसि बले भवम् । 'तत्र भवः' (४।३।५३) इत्यण् । **'साहसं** तु दमे दुष्करकर्मणि । अविमृश्यकृतौ धार्ष्ट्ये' इति हैमः ॥ (१) ॥*॥ दमनम् । 'दमु उपशमे' (दि० प० से०) घञ् (३।३।१८) । 'नोदात्तोपदेश–' (७।३।३४) इति न वृद्धिः । **'दमः** स्यात्कर्दमे दण्डे दमने दमथेऽपि च' इति हेमचन्द्रः ॥ (२) ॥*॥ 'अमन्ताङ्डः' (उ० १।११४) । **'दण्डः** सैन्ये दमे यमे । मानव्यूहग्रहभेदेष्वश्वेऽर्थानुचरे मथि । प्रकाण्डे लगुडे कोणे चतुर्थोपायगर्वयोः' इति हैमः ॥ (३) ॥*॥ त्रीणि **'दण्डस्य' ॥**

साम सान्त्वम्

सामेति ॥ 'साम व्याख्यातम्' ॥ (१) ॥*॥ सान्त्वनम् । 'सान्त्व सामप्रयोगे' (चु० प० से०) अदन्तः । 'एरच्' (३।३।५६) । घञ् (३।३।१८) वा ॥ (२) ॥*॥ द्वे **'साम्नः' ॥**

अथो समौ ।

भेदोपजापौ

अथेति ॥ 'भेदो द्वैधे विशेषे स्यादुपजापे विदारणे' (इति विश्वमेदिन्यौ) ॥ (१) ॥*॥ उपांशु जपनम् 'जप व्यक्तायां वाचि' 'जप मानसे च' (भ्वा० प० से०) । घञ् (३।३।१८) ॥*॥ द्वे **'संहतयोर्द्वैधीकरणस्य' ॥**

उपधा धर्मार्थैर्यत्परीक्षणम् ॥ २१ ॥

उपेति ॥ उपधीयते शुद्धिज्ञानमत्र । 'डुधाञ्' (जु० उ० अ०) । 'आतश्चोपसर्गे' (३।३।१०६) इत्यङ् ॥ (१) ॥*॥ आद्येन कामार्थभयग्रहः ॥*॥ एकं **'राज्ञा धर्मार्थकामभयैरमात्यादेः परीक्षणस्य' ॥**

१—भेदस्त्रिविधः । तदुक्तम्—'क्षेहरागापनयनं संहर्षोत्पादनं तथा । संतर्जनं च भेदज्ञैर्भेदस्तु त्रिविधः स्मृतः' इति । राज्ञो द्रोहाय शपथपूर्वकम् 'अमीषामैकमत्यं जातम्' इत्यस्यार्थस्य कपटलेखादीनां राजसदसि प्रक्षेपाद्राज्ञोऽनुयायिषु क्षेहस्य परिजनानां च प्रभौ भक्तेरपनयनमित्येकः । अनुयायिनामेव परस्पराभिभवसंजननं संहर्षोत्पादनम्—इति द्वितीयः ॥*॥ दण्डोऽपि त्रिविधः । तदुक्तम्—'वधोऽर्थग्रहणं चैव परिक्लेशस्तथैव च । इति दण्डविधानज्ञैर्दण्डोऽपि त्रिविधः स्मृतः' इति ॥ परिक्लेशो बन्धनताडनादिः ॥*॥ 'प्रतिदानं तथा तस्य गृहीतस्यानुमोचनम् । द्रव्यादानमपूर्वं च स्वयंग्राहप्रवर्तनम् । देयस्य प्रतिमोक्षश्च दानं पञ्चविधं स्मृतम्'—इति मुकुटे विशेषः ॥

१—अदन्तप्रतिज्ञामध्येऽस्य पाठाभावादिदमसंगतम् ॥

पञ्च त्रिषु

पेति ॥ निःशलाकान्ताः पञ्च ॥

अषडक्षीणो यस्तृतीयाद्यगोचरः ।

अषेति ॥ अविद्यमानानि षड् अक्षीण्यत्र । 'अषडक्षाशितंग्वलंकर्मा–' (५।४।७) इति खः स्वार्थे ॥ (१) ॥*॥ एकं **'द्वाभ्यामेव कृतस्य मन्त्रस्य'** ॥

विविक्तविजनच्छन्ननिःशलाकास्तथा रहः ॥ २२ ॥

रहश्चोपांशु चालिङ्गे

वीति ॥ विविञ्चन्ति जना अत्र । 'विचर् पृथग्भावे' (रु० उ० अ०) ध्रौव्यार्थत्वाद्गत्यर्थत्वाद्वा 'क्तोऽधिकरणे च–' (३।४।७६) इति क्तः । **'विविक्तं** त्रिष्वसंपृक्ते रहःपूतविवेकिषु (वसुनन्दे ना)' इति मेदिनी ॥ (१) ॥*॥ विगतो जनोऽस्मात्॥ (२) ॥*॥ छद्यते स्म 'छद अपवारणे' (चु० उ० से०) । क्तः (३।२।१०२) । आगमशास्त्रस्यानित्यत्वान्नेट् । **छिन्नं** तु रहसि क्लीबं छादिते वाच्यलिङ्गकम्' (इति मेदिनी) । मुकुटस्तु—'वा दान्तशान्त–' (७।२।२७) इति निपातनात्—इत्याह । तन्न । णिजन्तस्य निपातनात् ॥ (३) ॥*॥ 'शलाका शारिका मदनशारिका' इति पर्यायः । 'शल्यं श्वाविच्छलाका स्याच्छवो मदनशारिका' इति तालव्यादौ रभसः । निर्गता शलाकाप्यस्मात् । शलाकाया निर्गतो वा ॥ (४) ॥*॥ 'तथा' शब्दः समुच्चये ॥*॥ रह्यते । 'रह त्यागे' (भ्वा० प० से०) । असुन् (उ० ४।१८९) यद्वा रमन्तेऽत्र । 'देशे ह च' (उ० ४।२१५) इत्यसुन् । होऽन्तादेशश्च । **'रहस्तत्त्वे रते गुह्ये'** (इति मेदिनी) । रभसोऽपि—**'रहो** निधुवनेऽपि **स्याद्रहो गुह्ये** नपुंसकम्' इति ॥ (५) ॥*॥ (६) ॥ उपगता अंशवः किरणा अत्र । **'उपांशुर्जपभेदे स्यादुपांशु** विजनेऽव्ययम्' (इति विश्वहैममेदिन्यः) ॥ (७) ॥*॥ अलिङ्गे द्वे अव्यये ॥*॥ सप्त **'पकान्तस्य'** ॥

रहस्यं तद्भवे त्रिषु ।

रेति ॥ रहो भवम् । दिगादित्वात् (४।३।५४) यत् । **'रहस्या** स्त्री नदीभेदे गोपनीयेऽभिधेयवत्' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'रहस्यस्य'** ॥

समौ विस्रम्भविश्वासौ

सेति ॥ विस्रम्भणम् 'स्रम्भु विश्वासे' (भ्वा० आ० से०) दन्त्यादिः ।[1] तालव्यादिश्च । घञ् (३।३।१८) । **'विश्रम्भः** केलिकलहे विश्वासे प्रणयेऽपि च' (इति विश्वमेदिन्यौ) ॥ (१) ॥*॥ विश्वसनम् । 'श्वस प्राणने' (अ० प० से०) । घञ् (३।३।१८) ॥ (२) ॥*॥ द्वे **'विश्वासस्य'** ॥

प्रेषो प्रंशो यथोचितात् ॥२३॥

प्रयिति ॥ यथोचिताद् यथाप्राप्तात् प्रंशोऽधःपतनम् । 'प्रेषृ चलने' (भ्वा० उ० से०) । प्रेषणम् । घञ् (३।३।१८) ॥ (१) ॥*॥ एकम् **'प्रंशस्य'** ॥

अप्रेषन्यायकल्पास्तु देशरूपं समञ्जसम् ।

अप्र इति ॥ प्रेषादन्यः ॥ (१) ॥*॥ नियमेन ईयते । 'परिन्योर्नीणोः–' (३।३।३७) इनि घञ् ॥ (२) ॥*॥ कल्पनम् । 'कृपू सामर्थ्ये' (भ्वा० आ० से०) । घञ् (३।३।१८) । लत्वम् (८।२।१८) । **'कल्पः** शास्त्रे विधौ न्याये संवर्ते ब्रह्मणो दिने' (इति मेदिनी) ॥ (३) ॥*॥ दिश्यते । 'दिश अतिसर्जने' (तु० उ० अ०) । घञ् (३।३।१९) । देशो रूपमस्य । दिश्यमानस्योचितस्य रूपम् । यद्वा देशनम् । घञ् (३।३।१८)। प्रशस्तं देशनं वा । 'प्रशंसायां रूपप्' (५।३।६६) ॥ (४) ॥*॥ सम्यगञ्जोऽत्र 'अच् प्रत्यन्वव–' (५।४।७५) इत्यत्र 'अच्' इति योगविभागादच् । यद्वा संमतमञ्जसा तत्त्वमत्र 'ह्रस्वो नपुंसके–' (१।२।४७) इति ह्रस्वत्वम् ॥ (५) ॥*॥ पञ्च **'चित्तस्य'** ॥

युक्तमौपयिकं लभ्यं भजमानाभिनीतवत् ॥ २४ ॥

न्याय्यं च त्रिषु षट्

युक्ति ॥ युज्यते स्म । 'युजिर् योगे' (रु० उ० अ०) । क्तः (३।२।१०२) । **'युक्तो** युक्ते पृथग्भूते क्लीबं हस्तचतुष्टये' (इति मेदिनी) ॥ (१) ॥*॥ उपयन्त्यनेन । 'एरच्' (३।३।५६) । उपाय एव । 'उपायाद्ध्रस्वश्च' (ग० ५।४।३४) इति ठक् ह्रस्वश्च ॥ (२) ॥*॥ लभ्यते 'पोरदुपधात्' (३।१।९८) इति यत् । **'लभ्यं** युक्ते च लब्धव्ये' (इति मेदिनी)॥(३)॥*॥ भजते फलमनुबध्नाति । 'भज सेवायाम्' (भ्वा० उ० अ०) । 'ताच्छील्य–' (३।२।१२९) इति चानश् । शानच् (३।२।१२४) वा ॥ (४) ॥*॥ अभिनीयते स्म । 'णीञ् प्रापणे' (भ्वा० उ० अ०) । क्तः (३।२।१०२) । अभिनीतेन तुल्यम् । **'अभिनीतं** संस्कृतं (ते) च न्याय्ये चामर्षणे(र्षिणि) त्रिषु' इति रुद्रः । **'अभिनीतं** त्रिषु न्याय्ये संस्कृतामार्षिणोरपि' (इति मेदिनी) ॥ (५) ॥*॥ न्यायादनपेतम् । 'धर्मपथ्यर्थ–' (४।४।९२) 'इति यत् ॥ (६) ॥*॥ युक्तादयः षट् त्रिषु । षट् **'न्यायागतस्य'** ॥

संप्रधारणा तु समर्थनम् ।

समिति ॥ संप्रधारणम् 'धृञ् धारणे' (भ्वा० उ० अ०) ण्यन्तः । 'ण्यास–' (३।३।१०७) इति युच् ॥ (१) ॥*॥ 'अर्थं उपयाच्ञायाम्' (चु० उ० से०) संपूर्वः । ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'इदमुचितमेव'** इति निश्चयस्य ॥

अववादस्तु निर्देशो निदेशः शासनं च सः ॥ २५ ॥

शिष्टिश्चाज्ञा च

अवेति ॥ 'अव अवलम्बने' । कार्यमवलम्ब्य वदनमत्र ।

१—'तालव्यादिस्तु प्रमादे गतः'—इति तु सिद्धान्तकौमुदी ॥ अमर० ३५

१—विश्वहैमसंवादप्राप्तप्रामाण्यमेदिनीपुस्तके 'युतः' इति पाठस्योपलम्भेन योग्यत्वेन चात्रास्योपन्यासः प्रामादिकः ॥

वदनम् । घञ् (३।३।१८) ॥ (१) ॥*॥ निर्देशः कार्यादेशः । घञ् (३।३।१८) ॥ (२) ॥*॥ एवं निदेशः । (**'निदेशः** शासनोपान्तकथनेषु प्रयुज्यते' इति विश्वः) ॥ (३) ॥*॥ शासेर्ल्युट् (३।३।११५) । (**'शासनं** राजदत्तोर्ण्यां लेखाज्ञाशास्त्रशान्तिषु' इति मेदिनी) ॥ (४) ॥*॥ 'क्तिन्नाबादिभ्यः' (३।३।९४) इति क्तिन् ॥*॥ बाहुलकात्तिः । **'शास्तिः'** ॥ (५) ॥*॥ आज्ञापनम् । 'ज्ञा अवबोधने' (क्रया० प० से०) । 'आतश्चोपसर्गे' (३।३।१०६) इत्यङ् ॥ (६) ॥*॥ षट् **'आज्ञायाः'** ॥

संस्था तु मर्यादा धारणा स्थितिः ।

समिति ॥ संतिष्ठतेऽनया । सम्यगवस्थानं वा । प्राग्वदङ् । (**'संस्थश्वरेऽवस्थिते, स्त्री स्थितौ साहश्यनाशयोः'** (इति मेदिनी) ॥ (१) ॥*॥ 'मर्या इति सीमार्थेऽव्ययम्' तत्र दीयते । प्राग्वदङ् ॥ (२) ॥*॥ धारयति धर्मम् । नन्द्यादि ल्युः (३।१।१३४) । युच् (उ० २।७८) वा । **"धारणाऽङ्गे** च योगेऽस्य न पुंसि स्याद्विधारणे' इति मेदिनी) ॥ (३) ॥*॥ तिष्ठन्त्यत्र । बाहुलकादधिकरणे क्तिन् । स्थानं वा । 'स्थागापा–' (३।३।९५) इति क्तिन् ॥ (४) ॥*॥ चत्वारि **'न्याय्यपथस्थितेः'** ॥

आगोऽपराधो मन्तुश्च

आग इति ॥ एति । 'इण् गतौ' (अ० प० अ०) । 'इणआगअपराधे च' (उ० ४।२१२) इत्यसुन् आगादेशश्च–अगति । 'अग गतौ' (भ्वा० प० से०) । 'वस्यजिभ्यां णित्' इत्यसुन्—इति सुभूतिः । तन्न । उज्ज्वलदत्तादिषूक्तसूत्रस्यादर्शनात् । **'आगोऽपराधे** पापे स्यात्' (इति मेदिनी) । सौन्तं क्लीबम् ॥(१)॥*॥ अपराधनम् । 'राध संसिद्धौ' (स्वा०प०अ०)। घञ् (३।३।१८) ॥(२)॥*॥ मन्यते । 'मन ज्ञाने' (दि० आ० अ०)। 'कमिमनिजनि–' (उ० १।७१) इति तुः । 'मन्तुः पुंस्यपराधेऽपि मनुष्येऽपि प्रजापतौ' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'अपराधस्य'** ॥

समे तूदानबन्धने ॥ २६ ॥

सेति ॥ उत्पूर्वाद् यतेर्भावे ल्युट् (३।३।११५) ॥ (१) ॥*॥ 'बन्ध बन्धने' (क्रया० प० अ०) । भावे ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'बन्धनस्य'** ॥

द्विपाद्यो द्विगुणो दण्डः

द्वीति ॥ द्वौ पादौ परिमाणमस्य । 'पणपाद–' (५।१।३४) इति यत् । 'पद्यत्यतदर्थे' (६।३।५३) इति (न) पद्भावः । प्राण्यङ्गस्यैव पादस्य तत्र ग्रहणात् ॥ (१) ॥*॥ एकम् **'अपराधे शास्त्रेण बोधितदण्डाद्द्विगुणदण्डस्य'** ॥

१—'सोढाहे शतमागांसि' इति माघात्—इति मुकुटः ॥

भागधेयः करो बलिः ।

भेति ॥ भाग एव । 'नामरूप–' (वा० ५।४।३५) इति धेयः ॥ (१) ॥*॥ कीर्यते । 'कृ विक्षेपे' (तु० प० से०) । 'ऋदोरप्' (३।३।५७) । **'करो** वर्षोपले पाणौ रश्मौ प्रत्ययशुण्डयोः' (इति मेदिनी) । प्रज्ञाद्यणि (५।४।३८) **'कारो** वधे निश्चये च बलौ रत्ने यतावपि' (इति विश्वमेदिन्यौ) ॥ (२) ॥*॥ बल्यते । 'बल वधे, दाने' ( ) । इन् (उ० ४।११८) । 'बलिर्दैत्यप्रभेदे च करचामरदण्डयोः । उपहारे पुमानस्त्री जरया श्लथचर्मणि । गृहदारुप्रभेदे च जठरावयवेऽपि च' (इति मेदिनी) ॥ (३) ॥*॥ (**'अर्थागमो** भवेद्दायो भागधेयो बलिः करः' इति हलायुधः) ॥*॥ त्रीणि **'कर्षकादिभ्यो राजग्राह्यभागस्य'** ॥

घट्टादिदेयं शुल्कोऽस्त्री

घेति ॥ घट्टादौ देयम् ॥*॥ शुल्क्यते । 'शुल्क अतिसर्जने' (चु० प० से०) । घञ् (३।३।१९) । **शुल्कं** घट्टादिदेये स्याद्वरादर्घप्रहेऽस्त्रियाम्' (इति मेदिनी) । मुकुटस्तु—शलति प्रतिबन्धोऽनेन 'शुल्कवल्कोल्काः' इति निपातः—इत्याह । तन्न । उज्ज्वलदत्तादिषु 'शुकवल्कोल्काः' (उ० ३।४२) इति पाठस्य दर्शनात् । धातुपाठे 'शुल्क' धातोर्दर्शनाच्च ॥ (१) ॥*॥ आदिना गुल्मप्रतोल्यादिग्रहः ॥*॥ एकम् **'शुल्कस्य'** ॥

प्राभृतं तु प्रदेशनम् ॥ २७ ॥

प्रेति ॥ प्राभ्रियते स्म । भृञ् भरणे' (भ्वा० उ० अ०) । 'डुभृञ् धारणपोषणयोः' (जु० उ० अ०) वा । क्तः (३।२।१०२) ॥ (१) ॥*॥ प्रदिश्यते । 'दिश अतिसर्जने' (तु० उ० अ०) । 'कृत्यल्युटः–' (३।३।११३) इति कर्मणि ल्युट् ॥ (२) ॥*॥ द्वे **'देवताभ्यो मित्रादिभ्यश्च दीयमानस्य'** ॥

उपायनमुपग्राह्यमुपहारस्तथोपदा ।

उपेति ॥ उपेयते । 'इण् गतौ' (अ० प० अ०) । उपाय्यते । 'अय गतौ' (भ्वा० आ० से०) वा । कर्मणि ल्युट् (३।३।११३) ॥ (१) ॥*॥ उपगृह्यते । 'ग्रह उपादाने' (क्रया० उ० से०) । ण्यत् (३।३।१२४) ॥ (२) ॥*॥ उपहिंयते । घञ् (३।३।१९) ॥ (३) ॥*॥ उपदीयते । 'डुदाञ् दाने' (जु० उ० से०) । 'आतश्चोपसर्गे' (३।३।१०६) इत्यङ् ॥ (४) ॥*॥ चत्वारि **'उपढौकनस्य'** ।—षडप्युपढौकनस्य–इत्यन्ये । 'उपायनमुपग्राह्यं प्राभृतं चोपदा स्त्रियाम्' इत्यमरमाला ॥

यौतकादि तु यद्देयं सुदायो हरणं च तत् ॥ २८ ॥

यावि इति ॥ युतकं योनिसंबन्धः । तत्र भवम् । 'तत्र भवः' (४।३।५३) इत्यण् । युतयोर्वरवध्वोरिदम् । 'तस्येदम्'

(४।३।१२०) इत्यण् वा । **'युतकं** युगले युक्ते संशयेऽपि च' इति रभसः । **'युतकं** संशये युगे । नारीवस्त्राञ्चले युक्ते चलनाग्रे च यौतके' (इति मेदिनी) । 'यौतकं यौतुकं च तत्' इति वाचस्पतेरुभध्यमपि । आदिना व्रतभिक्षादिपरिग्रहः ॥*॥ सुदीयते । 'दुदाञ्' (जु० उ० अ०) । घञ् (३।३।१९) । युगागमः (७।३।३३) ॥ (१) ॥*॥ ह्रियते । कर्मणि ल्युट् (३।३।११३) । **'हरणं** यौतकादीनां द्रव्ये भुजे हृतावपि' (इति मेदिनी) ॥ (२) ॥*॥ द्वे (**'कन्यादानकाले व्रतभिक्षादौ च दीयमानद्रव्यस्य'**) ॥

तत्कालस्तु तदात्वं स्यात्

तेति ॥ स चासौ कालश्च ॥ (१) ॥*॥ 'तदा' इत्यस्य भावः ॥ (२) ॥*॥ द्वे **'वर्तमानकालस्य'** ॥

उत्तरः काल आयतिः ।

उत्तेति ॥ आयंस्यन्तेऽत्र । 'यम उपरमे' (भ्वा० प० अ०) । क्तिन् (३।३।९४) । आयास्यति वा । यातेर्बाहुलकाङ्कतिः । **'आयति**स्तु स्त्रियां दैर्घ्ये प्रभावागामिकालयोः' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'उत्तरकालस्य'** ॥

सांदृष्टिकं फलं सद्यः

सामिति ॥ संदृष्टौ प्रत्यक्षे भवम् । अध्यात्मादित्वात् (वा० ४।२।६०) ठञ् ॥ (१) ॥*॥ एकं **'व्यापारानन्तरं जायमानस्य फलस्य'** ॥

उदर्कः फलमुत्तरम् ॥ २९ ॥

विति ॥ **उदर्क्यते** । 'अर्क स्तवने' (चु० प० से०) । घञ् (३।३।१९) । उदर्च्यते । 'अर्च पूजायाम्' (भ्वा० प० से०) वा । उदृच्यते । 'ऋच् स्तुतौ' (तु० प० से०) वा । घञ् (३।३।१९) । **'उदर्क** एष्यत्कालीनफले मदनकण्टके' (इति मेदिनी) ॥ (१) ॥*॥ एकं **'भाविनः कर्मफलस्य'** ॥

अदृष्टं वह्नितोयादि

अदृष्टं वह्निश्च तोयं चादिर्यस्य । भयहेतुत्वाद्भयम् । आदिना 'हुताशनो जलं व्याधिर्दुर्भिक्षं मरकस्तथा । अतिवृष्टिरनावृष्टिर्मूषिकाः शलभादयः' गृह्यन्ते । अदृष्टहेतुकत्वाददृष्टम् ॥ (१) ॥*॥ एकम् **'अदृष्टादिकृतस्य भयस्य'** ॥

दृष्टं स्वपरचक्रजम् ।

दृष्टं दृश्यते स्म क्तः (३।२।१०२) ॥ (१) ॥*॥ स्वश्च परश्च स्वपरौ । तयोश्चक्रे सैन्ये । ताभ्यां जातम् । 'पञ्चम्यामजातौ' (३।२।९८) इति डः ॥*॥ एकं **'स्वपरसैन्यात् परराष्ट्रजाच्चौराटविकादेः परचक्राद्दाहविलोपादेर्भयस्य'** ॥

महीभुजामहिभयं स्वपक्षप्रभवं भयम् ॥ ३० ॥

मेति ॥ अहिरिव । गृहस्थत्वात्, आवृताकारत्वाच्च स्वस्य पक्ष एवाहिः । अहेर्भयम् ॥ (१) ॥*॥ 'निजोऽथ मैत्रश्च समाश्रितश्च संबन्धतः कार्यसमुद्भवश्च । भृत्या गृहीतो विविधोपचारैः पक्षं बुधाः सप्तविधं वदन्ति' । स्वपक्षात्प्रभवति । पचाद्यच् (३।१।१३४) ॥*॥ एकं **'स्वसहायाज्जातभयस्य'** । 'भयम्' इति पूर्वाभ्यामपि संबध्यते ॥

प्रक्रिया त्वधिकारः स्यात्

प्रेति ॥ प्रकर्षाय करणम् । 'कृञः श च' (३।३।१००) । रिङ् (७।४।२८) । **'प्रक्रिया** तूत्पादने स्यादधिकारप्रकारयोः' इति हेमचन्द्रः ॥ (१) ॥*॥ अधि आधिक्यस्य करणम् । घञ् (३।३।१८) ॥ (२) ॥*॥ द्वे **'राज्ञां छत्रधारणादिव्यापारस्य'** ॥

चामरं तु प्रकीर्णकम् ।

चेति ॥ चमति, चम्यते, वा । अनेन वा । 'चमु अदने' (भ्वा० प० से०) । 'अर्तिकमिभ्रमिचमि–' (उ० ३।१३२) इत्यमरः । **'चमरं** चामरे स्त्री तु मञ्जरीमृगभेदयोः' (इति मेदिनी) । **'चमर**श्चामरे दैत्ये **चमरी** तु मृगान्तरे' इति हैमः ॥*॥ प्रज्ञाद्यण् (५।४।३८) वा । अजादित्वात् (४।१।४) टाप् । **'चामरा चामरं बालव्यजनं रोमगुच्छकम्'** इति रभसः । **'चामरं चामरा**पि च । दण्डे च बालव्यजने' (इति मेदिनी) ॥ (१) ॥*॥ प्रकीर्यते स्म । 'कॄ विक्षेपे' (तु० प० से०) । क्तः (३।२।१०२) । 'संज्ञायां कन्' (५।३।७५) । **'प्रकीर्णकं** चामरे स्याद्विस्तरे ना तुरंगमे' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'चामरस्य'** ॥

नृपासनं तु यद्भद्रासनम्

त्रिति ॥ नृपस्यासनम् ॥ (१) ॥*॥ भद्रं च तदासनम् ॥ (२) ॥*॥ द्वे **'मण्यादिकृतराजासनस्य'** ॥

सिंहासनं तु तत् ॥ ३१ ॥

हैमम्

सिंहेति ॥ हेमविकारः । नृपासनम् ॥*॥ सिंहाकारमासनम् । सिंह इव वासनम् ॥ (१) ॥*॥ एकं **'सुवर्णकृतराजासनस्य'** ॥

छत्रं त्वातपत्रम्

छेति ॥ छादयति । अनेन वा । 'छद अपवारणे' (चु० उ० से०) । ण्यन्तः । ष्ट्रन् (उ० ४।१५९) । **'इसन्त्रन्किपु च'** (६।४।९७) इति ह्रस्वः ॥ (१) ॥*॥ आतपात्रायते । 'आतोऽनुप–' (३।२।३) इति कः ॥ (२) ॥*॥ द्वे **'छत्रस्य'** ॥

राज्ञस्तु नृपलक्ष्म तत् ।

रेति ॥ तत् छत्रम् । नृपस्य लक्ष्म ॥ (१) ॥*॥ एकं **'नृपच्छत्रस्य'** ॥

१—अनेन कर्मण्युपपद एव कप्रत्ययस्य सर्वैरङ्गीकृतत्वाच्चिन्त्यमेतत् । तसात्—'सुपि' (३।२।४) इति मुकुटोक्तं सम्यक् ॥

भद्रकुम्भः पूर्णकुम्भः

भेति ॥ भद्रस्य, भद्रो वा कुम्भः ॥ (१) ॥*॥ पूर्णः कुम्भः ॥ (२) ॥*॥ द्वे **'पूर्णघटस्य'** ॥

भृङ्गारः कनकालुका ॥ ३२ ॥

भ्रिति ॥ बिभर्ति जलम् । 'डु भृञ्' (जु० उ० अ०) 'शृङ्गारभृङ्गारौ च' (उ० ३।१३६) इति साधुः ॥ (१) ॥*॥ कनकस्यालुः । 'संज्ञायां कन्' (५।३।७५) ॥ (२) ॥*॥ द्वे **'सुवर्णकृतजलपात्रस्य'** ॥

निवेशः शिविरं षण्ढे

नीति ॥ निविशन्तेऽत्र । 'विश प्रवेशने' (तु० प० से०)। 'हलश्च' (३।३।१२१) इति घञ् । **'निवेशः** सैन्यविन्यासे न्यासे रङ्गविवाहयोः' इति हैमः ॥ (१) ॥*॥ शवन्त्यत्र । 'शव गतौ' (भ्वा० प० से०) । बाहुलकात् किरच् अन इत्वं च ॥ (२) ॥*॥ (षण्ढे) क्लीबे ॥*॥ द्वे **'आगन्तुकसैन्यवसतेः'** ॥

सज्जनं तूपरक्षणम् ।

सेति ॥ सज्जन्ते (न्त्य) नेन । 'षस्ज गतौ' (भ्वा० प० से०) । ल्युट् (३।३।११७) । सत् शोभनं जन्यतेऽनेन वा । 'जनी प्रादुर्भावे' (दि० आ० से०) । घञ् (३।३।१९) । 'जनिवध्योश्च' (७।३।३५) इति न वृद्धिः ॥ (१) ॥*॥ उपरक्ष्यते अनेन । ल्युट् (३।३।११७) ॥ (२) ॥*॥ द्वे **'सैन्यरक्षणाय नियुक्तप्रहरिकादिन्यासस्य'** ॥

हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम् ॥ ३३ ॥

हेति ॥ पदातीनां समूहः । 'भिक्षादिभ्योऽण्' (४।२।३८) । हस्तिनश्च अश्वाश्च रथाश्च पादातं च । सेनाङ्गत्वादेकवद्भावः (२।४।२) ॥*॥ सेनाया अङ्गम् ॥ (१) ॥*॥ चत्वारोऽवयवा यस्य । 'संख्याया अवयवे तयप्' (५।२।४२) ॥*॥—नाविकाटविकादीनां पदातावन्तर्भावः । नौकानां रथेष्वन्तर्भावः । महिषादीनां गजाश्वेऽन्तर्भावः—इति मुकुटः ॥ एकम् **'सेनाङ्गस्य'** ॥

दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः ।
मतङ्गजो गजो नागः कुञ्जरो वारणः करी ॥ ३४ ॥
इभः स्तम्बेरमः पद्मी

देति ॥ अतिशयितौ दन्तावस्य । इनिः (५।२।११७५) ॥ (१) ॥*॥ 'दन्तशिखात् संज्ञायाम्' (५।२।११३) इति वलच् । 'वले' (६।३।११८) इति दीर्घः ॥ (२) ॥*॥ हस्तः शुण्डास्यास्ति । 'हस्ताज्जातौ' (५।२।१३३) इतीनिः ॥ (३) ॥*॥ एवम् 'करी' च ॥ ( ) ॥*॥ द्वौ रदावस्य ॥ (४) ॥*॥ अनेकेन करेण मुखेन च पिबति । 'सुपि' (३।२।४) इति कः ॥ (५) ॥*॥ द्वाभ्यां पिबति । प्राग्वत्कः ॥ (६) ॥*॥ मतङ्गादृषेर्जातः । 'पञ्चम्यामजातौ' (३।२।९८) इति डः ॥ (७) ॥*॥ गजति । 'गज मदने' (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (८) ॥*॥ न अगः । नगे भवो वा । अण् (४।३।५३) । **'नागो** मतङ्गजे सर्पे पुंनागे नागकेसरे । क्रूराचारे नागदन्ते मुस्तके वारिदेऽपि च । देहानिलविशेषे च श्रेष्ठे स्यादुत्तरस्थितः । **नागं** रङ्गे सीसपत्रे स्त्रीबन्धे करणान्तरे' इति हैमः ॥ (९) ॥*॥ अतियिशतः कुञ्जो हनुरस्य । 'खमुखकुञ्जेभ्यो रः' (वा० ५।२।१०७) । **'कुञ्जरोऽनेकपे** केशे **कुञ्जरा** धातकीद्रुमे । पाटलायां च' इति हेमचन्द्रः ॥ (१०) ॥*॥ वारयति शत्रुबलम् । ल्युः (३।१।१३४) । **'वारणं** प्रतिषेधे स्याद्वारणस्तु मतङ्गजे' इति विश्वः ॥ (११) ॥*॥ करोऽस्यास्ति । इनिः (५।२।११५) ॥ (१२) ॥*॥ एति ईयते वा । 'इणः कित्' (उ० ३।१५३) इति भः ॥ (१३) ॥*॥ **'स्तम्बो** गुल्मे तृणादीनामकाण्डद्रुमगुच्छयोः' (इति विश्वः) । स्तम्बे रमते । 'स्तम्बकर्णयो रमिजपोः' (३।२।१३) इत्यच् 'हलदन्तात्–' (६।३।९) इत्यलुक् ॥ (१४) ॥*॥ पद्मं बिन्दुजालमस्त्यस्य । इनिः (५।२।११५) ॥ (१५) ॥*॥ पद्मदश **'हस्तिनः'** ॥

यूथनाथस्तु यूथपः ।

थ्विति ॥ यूथस्य हस्तिवृन्दस्य नाथः ॥ (१) ॥*॥ यूथं पाति । 'आतोऽनुप–' (३।२।३) इति कः ॥ (२) ॥*॥ द्वे **'यूथमुख्यहस्तिनः'** ॥

मदोत्कटो मदकलः

मेति ॥ मदेन दानाम्बुनोत्कटो मत्तः ॥ (१) ॥*॥ मदेन कलते । 'कल शब्दसंख्यानयोः' (भ्वा० आ० से०) अच् (३।१।१३४) । मदे सति कलो ध्वनिर्यस्य, इति वा ॥ (२) ॥*॥ द्वे **'अन्तर्मदस्य हस्तिनः'** ॥

कलभः करिशावकः ॥ ३५ ॥

केति ॥ कलयति । 'कल गतिसंख्यानयोः' (चु० उ० से०) कलते वा । 'कल शब्दसंख्यानयोः' (भ्वा० आ० से०) कलं भाषते वा । 'अन्येभ्योऽपि–' (वा० ३।२।१०२) इति डः ॥ (१) ॥*॥ **'करभो** मणिबन्धादिकनिष्ठान्तोष्ट्रतत्सुतः' (इति मेदिनी) ॥*॥ करिणः शावकः ॥ (२) ॥*॥ द्वे **'करिपोतस्य'** ॥

प्रभिन्नो गर्जितो मत्तः

प्रेति ॥ प्रकर्षेण भिद्यते स्म । क्तः (३।२।१०२) ॥ (१) ॥*॥ गर्जयति । 'गर्ज शब्दे' (चु० प० से०) । अकर्मकत्वात् (३।४।७२) कर्तरि क्तः । गर्जो जातोऽस्य । तारकादित्वात् (५।२।३६) इतच् । **गर्जितं** वारिवाहादिध्वनौ ना मत्त-

१—योगरूढित्वात्तस्यैव तथोच्यते' नान्यः इति— मुकुटः ॥

१—अत्र करभशब्दस्यानुप्रकृतत्वादनुपयुक्तमेतत् ॥

'कुञ्जरे' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ माद्यति । 'मदी हर्षे (दि० प० से०) । प्राग्वत् क्तः (३।४।७२) । 'न ध्याख्या–' (८।२।५७) इति निष्ठानत्वाभावः ॥ (३) ॥*॥ त्रीणि **'जातमदस्य'** ॥

समाबुद्धान्तनिर्मदौ ।

सेति ॥ उद्गतं वान्तं मदवमनमस्मात् । **'उद्धान्त** उद्गीर्णे निर्मदद्विपे' इति हैमः ॥ (१) ॥*॥ मदान्निर्गतः । निर्गतो मदोऽस्माद्वा ॥ (२) ॥*॥ द्वे **'गतमदस्य'** ॥

हास्तिकं गजता वृन्दे

हेति ॥ हस्तिनां समूहः । 'अचित्तहस्तिधेनोष्ठक्' (४।२।४७) ॥ (१) ॥*॥ गजानां समूहः । 'गजसहायाभ्यां च' (वा० ४।२।४३) इति तल् ॥ (२) ॥*॥ द्वे **'हस्तिनां वृन्दे'** ॥

करिणी धेनुका वशा ॥ ३६ ॥

केति ॥ करोऽस्त्यस्याः । इनिः (५।२।११५) । 'ऋन्नेभ्यो ङीप् (४।१।५) ॥ (१) ॥*॥ धेनुरिव । 'इवे प्रति–' (५।३।९६) इति कन् । 'स्याद्धेनुका करिण्यां च धेनावपि पुंसि दानवविशेषे' (इति मेदिनी) ॥ (२) ॥*॥ उश्यते । 'वशकान्तौ' (अ० प० से०) । 'वशिरण्योश्च' (वा० ३।३।५८) इत्यप् । वष्टि वा । अच् (३।१।१३४) **'वशा** नार्यां बन्ध्यायां हस्तिन्यां दुहितर्यपि' (इति हैमः) । तालव्यशा । **'वशा** वन्ध्यासुतायोषास्त्रीगवीकरिणीषु च' इति तालव्यान्तेषु विश्वात् ॥ (३) ॥*॥ त्रीणि **'हस्तिन्याः'** ॥

गण्डः कटः

गेति ॥ गण्डति । 'गडि वदनैकदेशे' (भ्वा० प० से०) अच् (३।१।१३४) **'गण्डः** स्यात्पुंसि खड्गिनि । ग्रहयोगप्रभेदे च वीथ्यङ्गे पिटकेऽपि च । चिह्नवीरकपोलेषु हयभूषणबुद्बुदे' (इति मेदिनी) ॥ (१) ॥*॥ कटति । 'कटे वर्षावरणयोः' (भ्वा० प० से०) । अच् (३।१।१३४) । **'कटः** श्रोणौ द्वयोः पुंसि कलिञ्जेऽतिशये शवे । समये गजगण्डेऽपि पिप्पली तु **कटी** मता' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'गजगण्डयोः'** ॥

मदो दानम्

मेति ॥ माद्यत्यनेन । 'मदी हर्षे' (दि० प० से०) । 'मदोऽनुपसर्गे' (३।३।६७) इत्यप् । मदयति वा । अच् (३।१।१३४) । **'मदो** रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः' (इति मेदिनी) ॥ (१) ॥*॥ द्यत्यनेन । 'दो अवखण्डने' (दि० प० अ०) ल्युट् (३।३।११७) । **'दानं** गजमदे त्यागे पालनच्छेदशुद्धिषु' (इति विश्वमेदिन्यौ) ॥ (२) ॥*॥ द्वे **'मदपतनस्य'** ॥

वमथुः करशीकरः ।

वेति ॥ वम्यते । 'टु वम उद्गिरणे' (भ्वा० प० से०) 'द्वितोऽथुच्' (३।३।८९) **'वमथुर्वमने घासे मातङ्गकरशीकरे'** (इति हैमः) ॥ (१) ॥*॥ करस्य शीकरः ॥ (२) ॥*॥ द्वे **'शुण्डान्निर्गतजलस्य'** ॥

कुम्भौ तु पिण्डौ शिरसः

कुम्भौ ॥ कुं भुवमुम्भति 'उम्भ पूरणे' (तु० प० से०) । 'कर्मण्यण्' (३।२।१) । शकन्ध्वादिः (वा० ६।१।९४) । **'कुम्भो** राश्यन्तरे हस्तिमूर्धांशे राक्षसान्तरे । कार्मुके वारनार्यां च घटे क्लीबं तु गुग्गुलौ' (इति मेदिनी) ॥ (१) ॥*॥ पिण्डते । 'पिडि संघाते' (भ्वा० आ० से०) । अच् (३।१।१३४) । **'पिण्डो** बाले बले सान्द्रे देहागारैकदेशयोः । देहमात्रे निवापे च गोलसिल्हकयोरपि । ओड्पुष्पे च पुंसि स्यात् क्लीबमाजीवनायसोः । **पिण्डी** तु पिण्डतगरेऽलाबूखर्जूरभेदयोः' (इति मेदिनी) ॥*॥ एकम् **'गजकुम्भस्य'** ॥

तयोर्मध्ये विदुः पुमान् ॥ ३७ ॥

तेति ॥ तयोः कुम्भयोः । वेत्ति संज्ञामत्र घातेन । 'विद ज्ञाने' (अ० प० से०) । बाहुलकात्कुः ॥ (१) ॥*॥ एकम् **'गजकुम्भमध्यभागस्य'** ॥

अवग्रहो ललाटं स्यात्

अवेति ॥ अवगृह्यतेऽङ्कुशेन । 'ग्रहवृदृ–' (३।३।५८) इत्यप् । **'अवग्रहो** वृष्टिरोधे प्रतिबन्धे गजालिके' (इति मेदिनी) । रुद्रोऽपि—'गजालिके वृष्टिरोधे प्रतिबन्धेऽप्यवग्रहः' इति ॥ (१) ॥*॥ एकम् **'गजललाटस्य'** ॥

इषीका त्वक्षिकूटकम् ।

इषीति ॥ ईष्यते । 'ईष उञ्छे' (भ्वा० प० से०) **'ईष** गतिहिंसादानेषु' (भ्वा० आ० से०) वा० । 'ईषेः किद्भ्रस्वश्च' (उ० ४।२१) इतीकन् धातोर्ह्रस्वश्च । (ह्रस्वादिर्दीर्घमध्या) ॥*॥ ईषा लाङ्गलकीलिका । सेव । 'इवे प्रति–' (५।३।९६) इति कनि (ह्रस्वमध्या—**ईषिका**), दीर्घादिरपि ॥ (१) ॥*॥ अक्षिकूटकं चक्षुर्गोलकम् ॥*॥ एकम् **'नेत्रगोलकस्य'** ॥

अपाङ्गदेशो निर्याणम्

अपेति ॥ अपाङ्गस्य । अपाङ्गो वा देशः ॥*॥ निर्यात्यनेन । करणे ल्युट् (३।३।११७) । **'निर्याणं** वारणापाङ्गदेशे मोक्षेऽध्वनिर्गमे' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'गजापाङ्गदेशस्य'** ॥

कर्णमूलं तु चूलिका ॥ ३८ ॥

केति ॥ कर्णस्य मूलम् ॥*॥ चूल्यतेऽनया । **'चूलसज्ञ**

१—'ऐषीकमस्त्रमधिकृत्य तदा तमक्ष्णा' इति मुरारिः । 'तस्मिन्नस्यदिषीकास्त्रम्'-इति रघुः—इति मुकुटः । २—चुरादौ तु ह्रस्वादिर्दृश्यते ॥

च्छ्राये' ( ) । 'संज्ञायाम्' (३।३।१०९) इति ण्वुल् । **'चूलिका** नाटकस्याङ्गे कर्णमूले च हस्तिनाम्' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'गजकर्णमूलस्य'** ॥

अधः कुम्भस्य वाहित्थम्

अध इति ॥ कुम्भोऽत्र वातकुम्भः । **'वाहित्थं** वातकुम्भाधः' इति भागुरिः । स च ललाटाधोभागः । (कुम्भयोरन्तरं **विदुः । वातकुम्भ**स्तु तस्याधो **वाहित्थं** तु ततोऽप्यधः' इति हैमनाममाला) ॥*॥ अवश्यं वहति । 'आवश्यका–' (३।३।१७०) इति णिनिः । स तिष्ठत्यत्र । 'घञर्थे कः' (वा० ३।३।५८) । पृषोदरादित्वात् सस्य तः ॥ (१) ॥*॥ एकम् **'गजकुम्भाधोभागस्य'** ॥

प्रतिमानमधोऽस्य यत् ।

प्रेति ॥ प्रतिमीयतेऽनेन 'मीञ् हिंसायाम्' (क्रया० उ० अ०) । 'मीनाति मिनोति–' (६।१।५०) इत्यात्वम् । 'करणा–' (३।३।११७) इति ल्युट् । **'प्रतिमानं** प्रतिच्छाया गजदन्तान्तरालयोः' इति रुद्रः ॥ (१) ॥*॥ एकं **'वाहित्थाधोभागस्य दन्तमध्यस्य'** ॥

आसनं स्कन्धदेशः स्यात्

आसेति ॥ आस्यतेऽत्र । ल्युट् (३।३।११७)। **'आसनं** द्विरदस्कन्धे पीठे यात्रानिवर्तने' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ स्कन्ध एव देशः ॥ (२) ॥*॥ द्वे **'गजस्कन्धदेशस्य'** ॥

पद्मकं बिन्दुजालकम् ॥ ३९ ॥

पेति ॥ पद्ममिव । 'इवे प्रति–' (५।३।९६) इति कन् । **'पद्मकं** स्यात्पद्मकाष्ठबिन्दुजालकयोरपि' (इति मेदिनी) ॥ (१) ॥*॥ बिन्दूनां जालकमिव ॥ (२) ॥*॥ द्वे **'गजमुखादिस्थबिन्दुसमूहस्य'** ॥

पक्षभागः पार्श्वभागः

पक्षेति ॥ पक्षयत्यनेन । 'पक्ष परिग्रहे' चुरादिः । 'पुंसि–' (३।३।११८) इति घः । पक्षस्य, पक्ष एव वा भागः ॥ (१) ॥*॥ पार्श्वस्य पार्श्वमेव वा भागः ॥ (२) ॥*॥ द्वे **'गजपार्श्वस्य'** ॥

दन्तभागस्तु योऽग्रतः ।

देति ॥ दन्तस्य भागः । दन्तसंबन्धी भागो वा । शाकपार्थिवादिः (वा० २।१।७८) ॥ (१) ॥*॥ एकम् **'अग्रभागस्य'** ॥

द्वौ पूर्वपश्चाज्जङ्घादिदेशौ गात्रावरे क्रमात् ॥ ४० ॥

द्वाविति ॥ पूर्वा च पश्चाच्च पूर्वपश्चाच्च ते जङ्घे च । पूर्वपश्चाज्जङ्घे आदी यस्य सः । पूर्वपश्चादिश्चासौ देशश्च । पूर्वजङ्घाभागो गात्रम् । पश्चाज्जङ्घाभागोऽवरम् ॥*॥ गातेऽनेन । 'गाङ् गतौ' (अ० आ० अ०) यद्वा एत्यनेन । 'इण् गतौ' (अ० प० अ०) । 'बहुलं तणि' (वा० २।४।५४) इति गादेशः । ष्ट्रन् (उ० ४।१५९)। **'गात्रं** गजाग्रजङ्घादिभागेऽप्यङ्गे कलेवरे' (इति मेदिनी) ॥ (१) ॥*॥ अव राति । 'रा दाने' (अ० प० अ०) । 'आतश्चोपसर्गे' (३।१।१३६) इति कः । यद्वा न वृणोति, म्रियते, वा । 'वृञ् वरणे' (स्वा० उ० से०) । अच् (३।१।१३४) । 'ग्रहवृह–' (३।३।५८) इत्यप् वा । **'अवरं** गजान्त्यजङ्घादिदेशे चरमे त्रिषु' (इति मेदिनी) । 'गजान्त्यजङ्घादिदेशेऽवरं स्याच्चरमे त्रिषु' इति रुद्रः ॥ (१) ॥*॥ **'गात्रावरे** पूर्वपश्चात्पादयोः परिभाषिते' इति भागुरिः । 'द्वौ पूर्वपश्चाज्जङ्घादिदेशौ **गात्रावरे** न ना' इति रभसः । कश्चित्तु—अष्ठीवद्भागादूर्ध्वमवरम् । अधस्तु गात्रम्—इत्याह ॥*॥ **अपरा** पवर्गादिमध्या च । **'अपरं** तूत्तरार्धे स्यात्पश्चाद्भागे च दन्तिनाम्' इति विश्वः ॥*॥ क्रमेणैकैकम् **'गजजङ्घापूर्वापरभागयोः'** ॥

तोत्रं वैणुकम्

तविति ॥ तुद्यतेऽनेन । 'तुद व्यथने' (तु० उ० अ०) 'दात्री–' (३।२।१८२) इति ष्ट्रन् । **'तोत्रं** तु प्राजने वैणुकेऽपि च' (इति मेदिनी) ॥ (१) ॥*॥ वेणुना निर्वृत्तम् । 'निर्वृत्तेऽक्षद्यूतादिभ्यः' (४।४।१९) इति ठक् । 'इसुसुक्तान्तात्कः' (७।३।५१) ॥*॥ **'वैणुकम्'** इति पाठान्तरम् । संज्ञापूर्वकत्वान्न वृद्धिः ॥ (२) ॥*॥ द्वे **'तोदनदण्डस्य'** ॥

आलानं बन्धस्तम्भे

आलेति ॥ आलीयतेऽत्र । 'लीङ् श्लेषणे' (दि० आ० अ०) । अधिकरणे ल्युट् (३।३।११७) । ('विभाषा लीयतेः' (६।१।५१) इत्यात्वम्) ॥ (१) ॥*॥ बन्धस्य बन्धनस्य स्तम्भः ॥ (२) ॥*॥ द्वे **'बन्धनस्तम्भस्य'** ॥

अथ शृङ्खला ।

अन्दुको निगडोऽस्त्री स्यात्

अथेति ॥ शृङ्गं प्राधान्यं खलति । 'खल संचलने, संचये च' (भ्वा० प० से०) । अन्तर्भावितण्यर्थः । अच् (३।१।१३४) । यद्वा शृङ्गात्प्राधान्यात् खलत्यनेन । 'पुंसि' (३।३।११८) इति घः । भिदाद्यङ् (३।३।१०४) वा । पृषोदरादिः (६।३।१०९) (**'शृङ्खला** पुंस्कटीकाञ्च्यां लोहरज्जौ च बन्धने' (इति हैमः) (**'शृङ्खला** पुंस्कटीवल्लबन्धेऽपि निगडे त्रिषु' इति मेदिनी) ॥ (१) ॥*॥ अन्यतेऽनेन । 'अदि बन्धने' (भ्वा० आ० से०) । 'अन्दूहम्भू–' (उ० १।९३) इति कूः । स्वार्थे कन् (ज्ञापि० ५।४।५) । 'अन्दूः स्त्रियां स्यान्निगडे प्रभेदे भूषणस्य च । (इति मेदिनी) । 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपि' (५) इति पुंस्त्वम् । यद्वा विनयादित्वात्

१—तथा च माघश्लेषः—'बध्वापराणि परितो निगडान्यलावीत्' इति—इति मुकुटः ॥

(५।४।३४) ठक् । 'इसुसु–' (७।३।५१) इति कादेशः । 'केऽणः' (७।४।१३) इति ह्रस्वः ॥ (२) ॥*॥ निर्गतो गडः सेचनमस्मात् । कठिनत्वात् । निगलति वा । 'गल अदने' (भ्वा० प० से०) । अच् (३।१।१३४) । डलयोरेकत्वम् ॥ (३) ॥*॥ त्रीणि **'शृङ्खलस्य' 'बेडी'** इति ख्यातस्य ॥

अङ्कुशोऽस्त्री सृणिः स्त्रियाम् ॥ ४१ ॥

अङ्किति ॥ अङ्क्यतेऽनेन । 'अकि लक्षणे' (भ्वा० आ० से०) । 'सानसिवर्णसि–' (उ० ४।१०७) इति साधुः ॥ (१) ॥*॥ सरति अन्तर्गच्छति । अनया वा । 'सृ गतौ' (भ्वा० प० अ०) । 'सृवृषिभ्यां कित्' (उ० ४।४९) इति निः ॥*॥ तालव्योष्मादिरपि । शृणाति । 'शृ हिंसायाम्' (क्रया० प० से०) । 'शृणिपृष्णिपार्ष्णि–' (उ० ४।५२) इति साधुः । **'शृणिरङ्कुशवाची च काशश्च** तृणवाचकः' इति शभेदः ॥ (२) ॥*॥ 'आरक्षमग्रमवमस्य सृणिं शिताग्रम्' इति तु माघस्य प्रमादः । सृणेः स्त्रीत्वात् ॥*॥ द्वे **'अङ्कुशस्य'** ॥

दूष्या कक्ष्या वरत्रा च

द्विति ॥ दूष्यतेऽनया । 'दूष वैकृत्ये' (दि० प० अ०) । ण्यन्तः । 'दोषो णौ' (६।४।९०) इत्यूत् 'अचो यत्' (३।१।९६) । **'दूष्यं** त्रिषु दूषणीये क्लीबं वस्त्रे च तद्गृहे' (इति मेदिनी) ।—चूष्यते पीयते पृष्ठमांसेनाहृश्यतां नीयते । 'चूष पाने' (भ्वा० प० से०) । कर्मणि 'घञर्थे कः' (वा० ३।३।५८) । **('चूषा')** इति मुकुटः ॥ (१) ॥*॥ कक्षे भवा । 'शरीरावयवाच्च' (४।३।५५) इति यत् । **'कक्ष्या** बृहतिकायां स्यात्काञ्च्यां मध्येभबन्धने । हर्म्यादीनां प्रकोष्ठे च' । (कौर्य हेतौ प्रयोजने' (इति मेदिनी) ॥ (२) ॥*॥ व्रियतेऽनया । 'वृञ् वरणे' (स्वा० उ० से०) । बाहुलकादत्रः । यद्वा वरं त्रायते । 'त्रैङ् पालने' (भ्वा० आ० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥ (३) ॥*॥ त्रीणि **'गजमध्यबन्धनस्य'** ॥

कल्पना सज्जना समे ।

केति ॥ कल्पनम् । 'कृपू सामर्थ्ये' (भ्वा० आ० से०) । ण्यन्तः । 'ण्यासश्रन्थ–' (३।३।१०७) इति युच् । **'अथ कल्पना** । करिणः सज्जनायां स्त्री क्लीबं कृप्तौ च कल्पने' (इति मेदिनी) ॥ (१) ॥*॥ एवं 'षस्ज गतौ' (भ्वा० प० से०) । ण्यन्ताद्युच् (३।३।१०७) । **'सज्जनं** तु भवेत्क्लीबमुपरक्षणघट्टयोः । वाच्यलिङ्गं कुलीने स्यात्कल्पनायां च योषिति' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'पल्याणाद्यारोपणेन सज्जीकरणस्य'** ॥

१ घृणिः किरणः—इति तु सिद्धान्तकौमुदी ॥ २—'स्त्रियाम्' इत्येकदेशेन स्त्रीपुंसशब्दसमुदायो लक्ष्यते । तेन सृणेः पुंस्त्वमपि' इति सुभूत्यादयः । स्त्रियामिति प्रायिकत्वादुक्तम्, इति तु वयम्—इति मुकुटः ॥ ३—इदं च कार्यशब्दार्थबोधकत्वात्प्रकृतानुपयुक्तम् ॥

प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः ॥ ४२ ॥

प्रेति ॥ प्रकर्षेण वीयतेऽस्याम् । 'वी गत्यादिषु' (अ० प० अ०) 'वीज्यात्वरिभ्यो निः' (उ० ४।४८) । **'प्रवेणिः** स्त्री कुथावेण्योः' (इति मेदिनी) । 'कृदिकारात्' (ग० ४।१।४५) इति वा ङीष् । आस्तीर्यते अनेन वा । 'स्तृञ् आच्छादने' (क्रया० उ० से०) । कर्मणि (३।३।११३) करणे (३।३।११७) वा ल्युट् ॥ (२) ॥*॥ व्रियतेऽनेन । 'वृञ् वरणे' (स्वा० उ० से०) । 'कृपृवृहशिभ्यो नः' (उ० ३।१०) यद्वा बहवो वर्णाः सन्त्यस्य । अर्शआद्यच् (५।२।१२७) । **'वर्णः** स्वर्णे व्रते स्तुतौ । रूपे द्विजादौ शुक्लादौ कुथायामक्षरे गुणे । भेदे गीतक्रमे चित्रे यशस्तालविशेषयोः । अङ्गरागे च **वर्ण** तु कुङ्कुमे' इति हैमः ॥ (३) ॥*॥ परिस्तूयते । 'ष्टुञ् स्तुतौ' (अ० उ० अ०) । 'अर्तिस्तुसु–' (उ० १।१४०) इति मन् । परिगतः स्तोमोऽत्र । वर्णस्तोमवत्त्वात् । यद्वा-परिगतः सोमोऽत्र । 'यत्क्रियायुक्ताः (तं प्रति)' (वा० १।४।५९) इति परेः स्तौतिं प्रत्यनुपसर्गत्वाच्च षैः (८।३।६५) ॥ (४) ॥*॥ कुथ्नाति । 'कुन्थ दीप्तौ' (क्रया० प० से०) । अच् (३।१।१३४) । '–दहदश–' (३।१।२४) इति निर्देशात्कचिदङ्क्त्यपि नलोपः । यद्वा कुन्थत्यशोभाम् 'कुथि हिंसायाम्' (भ्वा० प० से०) । आगमशास्त्रस्यानित्यत्वाच्च नुम् । 'इगुपध–' (३।१।१३५) इति कः । यद्वा कुथ्यति । 'कुथं पूतीभावे' (दि० प० से०) । 'इगुपध–' (३।१।३१५) इति कः । 'कुथः स्त्रीपुंसयोर्वर्णकम्बले पुंसि बर्हिषि' (इति मेदिनी) । क्लीबेऽपि । 'स्त्री प्रवेणी' । 'कुथं त्रिषु' इति बोपालितः ॥ (५) ॥*॥ पञ्च **'गजोपर्यास्तरणचित्रकम्बलस्य'** ॥

वीतं त्वसारं हस्त्यश्वम्

वीति ॥ वेति, स्म युद्धादिकर्मणः । 'वी गत्यादौ' (अ० प० से०) । अजति स्म वा । 'अज गतौ' (भ्वा० प० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । **'वीतमसारगजे** स्यादङ्कुशकर्मण्यसारतुरगे च' (इति मेदिनी) ॥ (१) ॥*॥ सारो बलमस्य । हस्ती चाश्वश्च । सेनाङ्गत्वादेकत्वम् (२।४।२) ॥*॥ एकम् **'निर्बलहस्तिगजसमूहस्य'** ॥

वारी तु गजबन्धनी ।

वेति ॥ वार्यतेऽनया । 'वृञ्' (स्वा० उ० से०) ण्यन्तः । 'वसिवपियजि–' (उ० ४।१२५) इतीञ् । **'वारी**

१ सिद्धान्तकौमुद्यां तु 'कृवृजूसिद्रुपन्मनिस्वपिभ्यो नित्' इति पाठो दृश्यते ॥ २—मुकुटस्तु—उपसर्गप्रतिरूपकत्वात्परेर्न 'उपसर्गात्' (८।३।६५) इत्यादिना षत्वम्—इत्याह । युक्तं चैतत् । अन्यथा पूर्वकल्पे षत्वं दुर्वारम् ॥ ३—अस्यार्थस्य भाष्यविरुद्धत्वात्तृतीयप्रकार एव साधुः ॥

स्याद्गजबन्धन्यां कलभ्यामपि योषिति । **वारिर्वा**ग्गजबन्धन्योः स्त्री क्लीबेऽम्बुनि वालुके' (इति मेदिनी) ॥ (१) ॥*॥ बध्यतेऽस्याम् । 'बन्ध बन्धने' (क्र्या० प० अ०) । अधिकरणे ल्युट् (३।३।११७) । गजस्य बन्धनी ॥ (२) ॥*॥ द्वे **'गजबन्धनशालायाः'** ॥

घोटके पीतितुरगतुरंगाश्वतुरंगमाः ॥ ४३ ॥
वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः ।

घोटेति ॥ घोटते । 'घुट परिवर्तने' (भ्वा० आ० से०) । ण्वुल् (३।१।१३३) ॥*॥ पचाद्यचि **'घोटः'** अपि । **'घोट**सैन्धवगन्धर्वा हयवाजितुरंगमाः' इति रभसः ॥ (१) ॥*॥ पिबति । 'पा पाने' (भ्वा० प० अ०) । क्तिन् (३।३।१७४) । 'घुमास्था–' (६।४।६६) इतीत्वम् । **'पीति**र्नाशे स्त्रियां पाने' (इति मेदिनी) ॥ 'वीति' इति पाठे । वेति । 'वी गत्यादिषु' (अ० प० अ०) । क्तिच् (३।३।१७४) । **'वीति**रश्वेऽशने गतौ । प्रजने धावने दीप्तौ' इति हैमः ॥ (२) ॥*॥ तोरणम् । 'तुर त्वरणे' (जु० प० से०) । 'घञर्थे कः' (वा० ३।३।५८) बाहुलकात् । घञ् (३।३।१८) वा । संज्ञापूर्वकत्वान्न गुणः । तुरेण त्वरया गच्छति । 'अन्येभ्योऽपि–' (वा० ३।२।४८) इति डः । **'तुरगी** चाश्वगन्धायां **तुरग**श्चित्तवाजिनोः' (इति मेदिनी) ॥ (३) ॥*॥ अश्नुते । 'अशू व्याप्तौ' (स्वा० आ० से०) । 'अशूप्रुषिलटि–' (उ० १।१५१) इति क्वन् ॥ (५) ॥*॥ तुरेण गच्छति । 'गमेश्च' (३।२।४७) इति खच् । 'खच्च वा डित्' (वा० ३।२।३८) । 'अरुर्द्विष–' (६।३।६७) इति मुम् ॥ (४) ॥*॥ (६) ॥*॥ अवश्यं वजति । 'वज गतौ' (भ्वा० प० से०) । 'आवश्यका–' (३।३।१७०) इति णिनिः । यद्वा वाजाः पक्षा अभूवन् यस्य । इनिः (५।२।११५) । 'वाजी बाणाश्वपक्षिषु' (इति मेदिनी) ॥ (७) ॥*॥ उह्यते । अनेन वा । 'वह प्रापणे' (भ्वा० उ० अ०) । कर्मणि करणे वा घञ् (३।३।११९) । वाह्यतेवाण्यन्तः । अच् (३।३।५६) । वाहते । 'वाह प्रयत्ने' (भ्वा० आ० से०) । अच् (३।३।१३४) । **'वाहो** भुजे पुमान्मानमेदाश्ववृषवायुषु' (इति मेदिनी) ॥ (८) ॥*॥ ऋच्छति । 'ऋ गतौ' (भ्वा० प० से०) । 'अन्येभ्योऽपि–' (३।२।७५) इति वनिप् । मुकुटस्तु—'स्नामदिपद्यर्तिपृशकिभ्यो वनिप्' (उ० ४।११३)—इत्याह । तन्न । तत्र क्वनिपो विधानाद्गुणाभावप्रसङ्गात् । यद्वा अर्वति । 'अर्व गतौ' (भ्वा० प० से०) । बाहुलकात् कनिन् । मुकुटस्तु—बाहुलकाद्वनिप् । 'राल्लोपः' (६।४।२१) । इति (सुभूतिः)—इत्याह । तन्न । वनिब्विधौ बाहुलकस्यानुपयोगात् । 'अन्येभ्योऽपि' (३।२।७५) इति वनिपः सर्वेभ्यः सिद्धत्वात् । उणादिषु वनिपो दर्शनात् । क्वौ झलादौ किति अनुनासिके च राल्लोपस्य विहितत्वेन वनिपि तदसंभवात् । लोपं विनापि रूपसिद्धेश्च । **'अर्वा** तुरंगमे पुंसि कुत्सिते वाच्यलिङ्गकः' (इति मेदिनी) ॥ (९) ॥*॥ गन्धमर्वति । 'अर्व गतौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) । शकन्ध्वादिः (वा० ६।१।९४) । **'गन्धर्व**स्तु नभश्चरे । पुंस्कोकिले गायने च मृगभेदे तुरंगमे । अन्तराभवदेहे च' (इति हैमः) ॥ (१०) ॥*॥ हयति । 'हय गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) । हिनोति वा । 'हि गतौ' (स्वा० प० अ०) । अच् (३।१।१३४) ॥ (११) ॥*॥ सिन्धुषु भवः । 'तत्र भवः' (४।३।५३) इत्यण् । **'सैन्ध**वस्तु सिन्धुदेशोद्भवे हये । मणिमन्थेऽपि' इति हैमः ॥ (१२) ॥*॥ सपति सेनायां समवैति । 'षप समवाये' (भ्वा० प० से०) । क्तिच् (३।३।१७४) । बाहुलकात्तिर्वा ॥ (१३) ॥*॥ त्रयोदश **'घोटकस्य'** ॥

आजानेयाः कुलीनाः स्युः

आजेति ॥ अजनम् । 'अज गतिक्षेपणयोः' (भ्वा० प० से०) । घञ् (३।३।१८) । आजेन क्षेपेणानेयाः प्रापणीया आयत्ता वा । 'अश्वं कुलीनमाजानेयं, शावं किशोरं ब्रुवते' इति नाममाला । 'शक्तिभिर्भिन्नहृदयाः स्खलन्तश्च पदे पदे । आजानन्ति यतः संज्ञामाजानेयास्ततः स्मृताः' इत्यश्वशास्त्रम् ॥ (१) ॥*॥ कुलस्यापत्यानि । 'कुलात् खः' (५।१।१३९) ॥ (२) ॥*॥ द्वे **'कुलीनाश्वानाम्'** ॥

विनीताः साधुवाहिनः ॥ ४४ ॥

वीति ॥ विनीयन्ते स्म । 'णीञ् प्रापणे' (भ्वा० उ० अ०) । क्तः (३।२।१०२) । सुशिक्षिताः । **'विनीतः** सुवाह्येऽस्त्रियां स्याद्गुणिज्यपि पुमांस्त्रिषु । जितेन्द्रियेऽपनीते च निभृते विनयान्विते' (इति मेदिनी) ॥ (१) ॥*॥ साधुवहनशीलाः । 'वह प्रापणे' (भ्वा० उ० अ०) । 'सुपि–' (३।२।७८) इति णिनिः । मुकुटस्तु—'साधुकारिणि च' (वा० ३।१।७८) इति णिनिः—इत्याह । तन्न । एवं सति णिनिना गतार्थत्वात् साधुशब्दस्य प्रयोगो न स्यात् ॥ (२) ॥*॥ द्वे **'सम्यग्गतिमतां वाजिनाम्'** ॥

वनायुजाः पारसीकाः काम्बोजा बाल्हिका हयाः ।

वेति ॥ वनायुषु देशेषु जाताः । 'सप्तम्यां जनेर्डः' (३।२।९७) । 'आजानेयः कुलजो, वनायुजः पारसीक उक्तः' इति रत्नकोषः ॥*॥ प्रज्ञाद्यण् (५।४।३८) वा ॥ (१) ॥*॥ पारसीके देशे भवाः । 'कोपधाच्च' (४।३।१३७) इत्यण् ॥ (१) ॥*॥ कम्बोजेषु भवाः । 'तत्र भवः' (४।३।५३) इत्यर्थे कञ्छाद्यण् (४।२।१३३) ॥ (१) ॥*॥ बल्हिकादेशे भवाः । 'कोपधाच्च' (४।३।१३७) इत्यण् । **'वाल्हीकं बाल्हिकं** धीरहिङ्गुनोर्नाश्वदेशयोः' इति त्रिकाण्डशेषतो

१—सिद्धान्तकौमुद्यामपि प्रकृतसूत्रव्याख्याने **'अर्वा** तुरगगन्ध्ययोः' **'पर्व** ग्रन्थिः प्रस्तावश्च' इत्युदाहरणे गुणाङ्गीकारेण चिन्त्यमेतत् ॥

दीर्घमध्योऽपि ॥ (१) ॥*॥ एते हयविशेषाः प्रत्येकं भिन्नाः । —'वनायुजः पारसीक उक्तः' इति रत्नकोषात्, 'श्वेताश्वं कर्काख्यं, वनायुजमपि पारसीकं तु' इति नाममालायाश्च द्वयोः पर्यायता—इत्यपरे ॥ एकं **'भिन्नदेशीयाश्वानाम्'** ॥

ययुरश्वोऽश्वमेधीयः

येति ॥ याति । 'या प्रापणे' (अ० प० अ०) । 'यो द्वे च' (उ० १।२१) इति कुः । **'ययुः** पुमानश्वमेधतुरगे च तुरंगमे' (इति मेदिनी) ॥ (१) ॥*॥ अश्वमेधाय हितः । 'अश्वमेधाच्छ च' ( ) ॥ (२) ॥*॥ द्वे **'अश्वमेधीयवाहस्य'** ॥

जवनस्तु जवाधिकः ॥ ४५ ॥

जेति ॥ जवनशीलः । 'जु' इति 'सौत्रो धातुर्गतौ वेगे च' । 'जुचङ्क्रम्य–' (३।२।१५०) इति युच् । **'जवनं** तु स्यदे वेगिहये ना वेगिनि त्रिषु' (इति मेदिनी) ॥ (१) ॥*॥ जवेन वेगेनाधिकः ॥ (२) ॥*॥ द्वे **'अधिकवेगस्य'** ॥

पृष्ठ्यः स्थौरी

प्रिति ॥ प्रशस्तमतिशयितं वा पृष्ठमस्य । 'अन्येभ्योऽपि–' (वा० ५।२।१२०) इति यप् ॥ (१) ॥*॥ स्थूलस्येदम् । 'तस्येदम्' (४।३।१२०) इत्यण् । रलयोरेकत्वम् । स्थौरं बलमस्यास्ति । इनिः (५।२।११५) । **'स्थौरी** पृष्ठ्यः **पृष्ठवहः'** इति बोपालितः ॥ (२) ॥*॥ द्वे **'भारवाहिनोऽश्वस्य'** ॥

सितः कर्कः

सीति ॥ करोति, क्रियते वा । 'कृदाधा–' (उ० ३।४०) इति कः । **'कर्कः** कर्कैतने वह्नौ शुक्लाश्वे दर्पणे घटे' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'शुक्लाश्वस्य'** ॥

रथ्यो वोढा रथस्य यः ।

रेति ॥ रथं वहति । 'तद्वहति रथयुगप्रासङ्गम्' (४।४।७६) इति यत् । **'रथ्या** रथौघविशिखावर्तनीषु च योषिति । रथवोढरि पुंलिङ्गः' (इति मेदिनी) ॥ (१) ॥*॥ एकं **'रथवाहकाश्वस्य'** ॥

बालः किशोरः

बेति ॥ कशति । 'कश शब्दे' ( ) । किंचिच्छवति वा । 'शु गतौ' (भ्वा० प० अ०) । 'शव गतौ' (भ्वा० प० से०) वा । 'किशोरादयः' (उ० १।६५) इति साधुः । ('अथ **किशोरोऽश्वस्य** शावके । तैलपर्ण्यौषधौ च स्यात्तरुणावस्थसूर्ययोः' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'अश्वबालस्य'** ॥

वाम्यश्वा वडवा

वेति ॥ वामयति । 'ढु वम उद्गिरणे' (भ्वा० प० से०) स्वार्थण्यन्तः । अच् (३।१।१३४) । 'मितां ह्रस्वः' (६।४।९२) इत्यत्र 'वा' इत्यनुवृत्तेर्न ह्रस्वः । गौरादिः (४।१।४१) । यद्वा वं वरुणममति । तेनाम्यते वा । 'अम गत्यादिषु' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) घञ् (३।३।१९) वा । मुकुटस्तु—वमत्युद्गिरति गर्भम् । 'ज्वलिति–' (३।१।१४०) इति णः—इत्याह । तन्न । 'नोदात्तोपदेशस्य–' (६।३।३४) इति वृद्धिनिषेधात् । **'वामी** शृगालीवडवारासभीकरभीषु च' (इति मेदिनी) ॥ (१) ॥*॥ अश्वजातिः । अजादि (४।१।४) पाठाद्टाप् ॥ (२) ॥*॥ बलं सामर्थ्यमतिशयितमस्याः । 'अन्येभ्योऽपि–' (वा० ५।१।११०९) इति वः । बलं वाति वा । 'आतोऽनुप–' (३।२।३) इति कः । बलेन वजति वा । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः । डलयोरेकत्वम् । **'वडवा** द्विजयोषिति । अश्वायां कुम्भदास्यां च नारीजात्यन्तरेऽपि च' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'वडवायाः'** ॥

वाडवं गणे ॥ ४६ ॥

वेति ॥ वडवानां समूहः । 'खण्डिकादिभ्यश्च' । (४।२।४५) इत्यञ् । **'वाडवं** करणे स्त्रीणां घोटिकौघे नपुंसकम् । पाताले न स्त्रियां पुंसि ब्राह्मणे वडवानले' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'अश्वसमूहस्य'** ॥

त्रिष्वाश्वीनं यदश्वेन दिनेनैकेन गम्यते ।

त्रीति ॥ अश्वेन एकाहेनातिक्रम्यते । 'अश्वस्यैकाहगमः' (५।२।१९) इति खञ् ॥ (१) ॥*॥ एकम् **'एकदिनगम्यदेशस्य'** ॥

कश्यं तु मध्यमश्वानाम्

केति ॥ अश्वादेस्ताडनी, ताडनं वा कशा । तामर्हति । दण्डादित्वात् (५।१।६६) यः । **'कश्यं** त्रिषु कशार्हे स्यात्क्लीबं मध्याश्वमध्ययोः' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'अश्वमध्यस्य'** ॥

हेषा ह्रेषा च निस्वनः ॥ ४७ ॥

हेषेति ॥ हेषणम् । ह्रेषणम् । 'हेषृ ह्रेषृ शब्दे' (भ्वा० आ० से०) । 'गुरोश्च हलः' (३।३।१०३) इत्यः ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'अश्वशब्दस्य'** ॥

निगालस्तु गलोद्देशे

नीति ॥ निगलत्यनेन । 'गल अदने' (भ्वा० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । निगरत्यनेन वा । 'गृ निगरणे' (तु० प० से०) । 'उच्चयोर्गः' (३।३।२९) इति

१—विकल्पद्वयमध्यस्थस्य विधेर्नित्यत्वस्यैव सर्वैरङ्गीकारात् विकल्पानुवृत्तौ मानाभावः । अत एवारुचेः सिद्धान्तकौमुद्यां 'वृत्तिकृत्' इत्युक्तम् । अत एव 'ज्वलह्वलह्मलनमामनुपसर्गाद्वा' इत्यन्तर्गणसूत्रे 'वा' पदसार्थक्यम् । तस्मात् 'ग्लाजाव्यनुवर्मा च' इत्यत्र सर्वसंमत 'वा' पदानुवृत्त्या मित्त्वस्यैव पाक्षिकत्वम् ॥ २—इदं च 'अनाचमिकमिवमीनाम्' (वा० ७।३।३४) इत्यस्यास्मरणमूलकम् ॥

घञ् । 'अचि विभाषा' (८।२।३१) इति वा लः ॥ (१) ॥*॥ गलस्योद्देशः समीपभागः ॥ (२) ॥*॥ 'घण्टाबन्धसमीपस्थो निगालः कीर्तितो बुधैः । तस्मिन्नेव मणिर्नाम रोमजः शुभकृन्मतः' इत्यश्वशास्त्रम् ॥*॥ द्वे **'ग्रीवायाः समीपभागस्य'** ॥

वृन्दे त्वाश्वीयमाश्ववत् ।

व्रिति ॥ अश्वानां समूहः । 'केशाश्वाभ्यां यञ्छावन्यतरस्याम्' (४।२।४८) ॥ (१) ॥*॥ पक्षे 'तस्य समूहः' (४।२।३७) इत्यण् । —'अनुदात्तादेरञ्–' (४।२।४४)— इति मुकुटः । तन्न । कन्नन्तत्वेनाश्वशब्दस्याद्युदात्तत्वात् ॥ (२) ॥*॥ द्वे **'अश्ववृन्दस्य'** ॥

आस्कदिन्तं धोरितकं रेचितं वल्गितं प्लुतम् ॥४८॥
गतयोऽमूः पञ्च धाराः

आस्केति ॥ आस्कन्दनम् । 'स्कन्दिर् गतिशोषणयोः' (भ्वा० प० अ०) स्वार्थण्यन्तः । भावे क्तः (३।३।११४) । आस्कन्दः संजातोऽस्य वा, तारकादित्वात् (५।२।३६) इतच् । एवमिन्नलोपाभावश्च नानुपपन्नः (**'उत्तेरितमुपकण्ठमास्कन्दितकमित्यपि** । उत्प्लुत्योत्प्लुत्य गमनं कोपादेवाखिलैः पदैः' इति हैममाला) ॥ (१) ॥*॥ धोरणम् । 'धोर्क् गतिचातुर्ये' (भ्वा० प० से०) । भावे क्तः (३।३।११४) । स्वार्थे कन् (ज्ञापि० ५।४।५) । **'अथ धौरितकं धौर्यं धा(धो)रणं धौरितं** च तत्' इति वाचस्पतिः । वृद्धिमत्पाठे प्रज्ञाद्यण् (५।४।३८) बोध्यः । ('तत्र धौरितकं धौर्यं धोरणं धोरितं च तत् । बभ्रुकङ्कशिखिक्रोडगतिवत्' इति हैममाला) ॥ (१) ॥*॥ रेचनम् । 'रिचिर् विरेचने' (रु० उ० अ०) ण्यन्तः । क्तः (३।३।११४) (**'उत्तेजितं रेचितं** स्यान्मध्यवेगेन या गतिः' इति हैममाला) ॥ (१) ॥*॥ वल्गनम् । 'वल्ग गतौ' ( ) । क्तः (३।३।११४) । (**'वल्गितं** पुनः । अग्रकायसमुल्लासात्कुञ्चितास्यं नतत्रिकम्' इति नाममाला) ॥ (१) ॥*॥ प्लवनम् । 'प्लुङ् गतौ' (भ्वा० आ० अ०) । क्तः (३।३।११४) । (**'प्लुतं** तु लङ्घनं पक्षिमृगगत्यनुहारकम्' इति हैमः) । **'प्लुतमश्वस्य** गतौ प्लुतस्त्रिमात्रके' इति हैमः ॥ (१) ॥*॥ अमूरश्वानां पञ्च गतयः ॥*॥ धार्यन्तेऽश्वा अत्र, अनया वा 'धृञ् धारणे' ण्यन्तः । (भ्वा० उ० अ०) । भिदाद्यङ् (३।३।१०४) । (**'धारा** सैन्याग्रिमस्कन्धे तुरंगगतिपञ्चके' इति मेदिनी) ॥ (१) ॥*॥ **'गतिविशेषाणाम्'** एकैकम् ॥

घोणा तु प्रोथमस्त्रियाम् ।

घविति ॥ घोणते । 'घुण भ्रमणे' (भ्वा० आ० से०) । अच् (३।१।१३४) ॥ (१) ॥*॥ प्रोथति । 'प्रोथृ पर्याप्तौ' (भ्वा० उ० से०) । अच् (३।१।१३४) । **'प्रोथोऽस्त्री** हयघोणायां ना कव्यामध्वगे त्रिषु' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'अश्वभ्रमणस्य'** ॥

कविका तु खलीनोऽस्त्री

केति ॥ कवते 'कुङ् शब्दे' (भ्वा० आ० अ०) । 'अच इः' (उ० ४।१३९) । स्वार्थे कन् (ज्ञापि० ५।४।५) । यद्वा 'कृञादिभ्यो वुन्–' (उ० ५।३५) । टाप् (४।१।४) इत्वम् (७।३।४४) ॥ (१) ॥*॥ खे मुखबिले लीनः ॥ (२) ॥*॥ द्वे **'खलीनस्य' 'कडिआली'** इति ख्यातायाः ॥

शफं क्लीबे खुरः पुमान् ॥ ४९ ॥

शेति ॥ शं फणति । 'फण गतौ' (भ्वा० प० से०) । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः । पृषोदरादिः (६।३।१०९) । **'शफं** मूले तरूणां स्याद्ववादीनां खुरेऽपि च' (इति मेदिनी) ॥ (१) ॥*॥ खुरति । 'खुर छेदने' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । **'खुरः** कोलदले शफे' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'पादस्य'** ॥

पुच्छोऽस्त्री लूमलाङ्गूले

प्विति ॥ पुच्छति । 'पुच्छ प्रमादे' ( ) अच् (३।१।१३४) । पृषोदरादिः (६।३।१०९) । 'पुच्छभाण्ड–' (३।१।२०) इति निपातनाद्वा ।—इगुपधत्वात्को वा—इति मुकुटश्चिन्त्यः । अन्तरङ्गत्वात्तुकि सतीगुपधत्वाभावात् । **'पुच्छः** पश्चात्प्रदेशः स्याल्लाङ्गूले **पुच्छमिष्यते'** इति मेदिनी ॥ (१) ॥*॥ लूयते । बाहुलकान्मक् ॥ (२) ॥*॥ 'लङ्गति' । 'लगि गतौ' (भ्वा० प० से०) । 'खार्जिपिञ्जादिभ्य ऊरोलचौ' (उ० ४।९०) प्रज्ञाद्यण् (५।४।३८) । 'लाङ्गूलं पुच्छशेफयोः' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'पुच्छस्य'** ॥

बालहस्तश्च बालधिः ।

बेति ॥ 'बालो ना कुन्तलेऽश्वस्य गजस्यापि च बालधौ' (इति पवर्गीयादौ मेदिनी) बालो हस्त इव । दंशादिनिवारकत्वात् । बालानां हस्तः समूहो वा ॥ (१) ॥*॥ बाला धीयन्तेऽत्र । 'कर्मण्यधिकरणे च' (३।३।९३) इति किः ॥ (२) ॥*॥ द्वे **'केशवल्लाङ्गूलमात्रस्य'** ॥

त्रिषूपावृत्तलुठितौ परावृत्ते मुहुर्भुवि ॥ ५० ॥

त्रीति ॥ उपावर्तते स्म । 'वृतु वर्तने' (भ्वा० आ० से०) अकर्मकत्वात् (३।४।७२) क्तः ॥ (१) ॥*॥ लुठति स्म । 'लुठ प्रतिघाते' (तु० प० से०) । क्तः (३।४।७२) ॥ (२) ॥*॥ द्वे **'श्रमशान्त्यर्थं पुनःपुनर्भूमौ लुठितस्याश्वस्य'** ॥

याने चक्रिणि युद्धार्थे शताङ्गः स्यन्दनो रथः ।

येति ॥ यान्त्यनेन । 'या प्रापणे' (अ० प० अ०) । 'करणा–' (३।३।११७) इति ल्युट् । चक्रमस्यास्ति

इनिः (५।२।११५) । युद्धायेदम् । तस्मिन् ॥*॥ शतमङ्गान्यवयवा यस्य ॥ (१) ॥*॥ स्यन्दते 'स्यन्दू प्रस्रवणे' (भ्वा० आ० से०) । 'वलनशब्दार्थादकर्मकाद्युच्' (३।२।१४८) । **'स्यन्दनं** तु क्षुतौ नीरे, तिनिशे ना रथेऽस्त्रियाम्' (इति मेदिनी) ॥ (२) ॥*॥ रमन्तेऽत्र । अनेन वा । 'हनिकुषिनीरमिकाशिभ्यः क्थन्' (उ० २।२)मलोपः (६।४।३७) । **'रथः** पुमानवयवे स्यन्दने वेतसेऽपि च' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'रथस्य'** ॥

असौ पुष्यरथश्चक्रयानं न समराय यत् ॥ ५१ ॥

असाविति ॥ पुष्य इव रथः । पुष्ये यात्रोत्सवादौ रथो वा । अन्तस्थमध्या ॥*॥ पकारमध्यपाठे तु सुकुमारत्वात् 'पुष्पमिव रथः' इति विग्रहः ॥ (१) ॥*॥ एकं **'युद्धं विना यात्रोत्सवादौ सुखभ्रमणार्थस्य रथस्य'** ॥

कर्णीरथः प्रवहणं डयनं च समं त्रयम् ।

केति ॥ कर्णसाध्या श्रवणक्रियोपचारात्कर्णीः । कर्णीऽस्यास्ति । इनिः (५।२।११५) । कर्णी चासौ रथश्च शब्दमात्रेण रथः । नतु वस्तुतो रथः । यद्वा सामीप्यात्कर्णशब्देन स्कन्दो लक्ष्यते । कर्णः स्कन्धः । सोऽस्त्यस्य वाहकत्वेन । स्कन्धवाह्यः । स चासौ रथश्च । 'अन्येषामपि–' (६।३।१३७) इति दीर्घः ॥ (१) ॥*॥ प्रोह्यते । अनेन वा । 'वह प्रापणे' (भ्वा० उ० अ०) । ल्युट् (३।३।११३,११७) ॥ (२) ॥*॥ डीयतेऽनेन 'डीङ् विहायसा गतौ' (दि० आ० से०) ल्युट् (३।३।११७) ॥*॥ **'हयनम्'** इति पाठे 'हय गतौ' (भ्वा० प० से०) । ल्युट् (३।३।११७) ॥ (३) ॥*॥ त्रीणि **'पुरुषस्कन्धवाह्यस्य यानविशेषस्य' 'डोला'** इति ख्यातस्य ॥

क्लीबेऽनः शकटोऽस्त्री स्यात्

क्लीति ॥ अनिति चीत्करोति । 'अन प्राणने' (अ० प० से०) । असुन् (उ० ४।१८९) ।—करणेऽसुन्—इति मुकुटः । तन्न । करणत्वासंभवात् । कर्तृत्वौचित्याच्च ॥ (१) ॥*॥ शक्नोति भारं वोढुम् । जीवयितुं वा । तदुक्तम्—'शकटः शाकिनी गावो यानमास्कन्दनं स्वनम् । अनूपः पर्वतो राजा दुर्भिक्षे नव वृत्तयः' इति । 'शक्लृ शक्तौ' (स्वा० प० अ०) । 'शकादिभ्योऽटन्' (उ० ४।८१) ॥ (२) ॥*॥ द्वे **'शकटस्य'** ॥

गन्त्री कम्बलिवाह्यकम् ॥ ५२ ॥

गेति ॥ गम्यतेऽनया । ष्ट्रन् (उ०४।१४९) । षित्त्वान्ङीष् (४।१।४१) ॥ (१) ॥*॥ कम्बलः सास्नास्यास्ति । इनिः (५।२।११५) । कम्बलिभिर्वृषैर्ह्यते । ण्यत् (३।१।१२४) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ द्वे **'शकटिकायाः ॥'**

शिबिका याप्ययानं स्यात्

शीति ॥ शिवैव । 'संज्ञायां कन्' (५।३।७५) । यद्वा शिवं करोति । 'तत्करोति–' (वा० ३।१।२६) इति ण्यन्ताद् ण्वुल् ॥ (१) ॥*॥ याप्यैरधमैर्वाह्यं यानम् ॥ (२) ॥*॥ द्वे **'पालकी'** इति ख्यातायाः ॥

दोला प्रेङ्खादिका स्त्रियाम् ।

दविति ॥ दोलयति । दोल्यते वा । 'दुल उत्क्षेपे' चुरादिः । अच् (३।१।१३४) घञ् (३।३।१९) वा (१)॥*॥ प्रेङ्ख्यते । 'इखि गतौ' (भ्वा० प० से०) । घञ् (३।३।१९) । 'दोला प्रेङ्खः पुमान् **प्रेङ्खा**, निश्रेणिरंधिरोहणी' इति रत्नकोषः ॥ (२) ॥*॥ आदिना शयनखट्वाद्यादिदोला ॥*॥ द्वे **'दोलायाः' 'हिंदोला'** इति ख्यातायाः । **'डोली'** इति ख्यातायाः वा ॥

उभौ तु द्वैपवैयाघ्रौ द्वीपिचर्मावृते रथे ॥ ५३ ॥

उभाविति ॥ द्वीपिनो व्याघ्रस्य च विकारः । 'प्राणिरजतादिभ्योऽञ्' (४।३।१५४) । द्वैपेन वैयाघ्रेण च चर्मणा परिवृतो रथः । 'द्वैपवैयाघ्रादञ्' (४।२।१२) ॥ (१) ॥*॥ (२) ॥*॥ **'व्याघ्रचर्मवेष्टितरथस्य'** द्वे ॥

पाण्डुकम्बलसंवीतः स्यन्दनः पाण्डुकम्बली ।

पेति ॥ 'स्यात्पाण्डुकम्बलः श्वेतप्रावारप्रावभेदयोः' (इति मेदिनी) । पाण्डुकम्बलेन परिवृतो रथः । 'पाण्डुकम्बलादिनिः' (४।२।११) ॥ (१) ॥*॥ एकं **'शुक्लकम्बलवेष्टितरथस्य'** ॥

रथे काम्बलवस्त्राद्याः कम्बलादिभिरावृते ॥ ५४ ॥

रेति ॥ कम्बलेन वस्त्रेण च प्रावृतो रथः । 'परिवृतो रथः' (४।२।१०) इत्यण् ॥ (१) ॥*॥ आदिना चार्मक्षौमदौकूलादिग्रहः ॥*॥ एकैकम् **'कम्बलाद्यावृतरथस्य'** ॥

त्रिषु द्वैपादयः

त्रीति ॥ (द्वैपादयो वाक्यान्ताः) ॥

रथ्या रथकट्या रथव्रजे ।

रेति ॥ रथानां समूहः । 'खलगोरथात्' (४।२।५०) इति यत् । **'रथ्यो** रथांशे रथवोढरि । **रथ्या** तु रथसंघाते प्रतोल्यां पथि चत्वरे' इति हैमः ॥ (१) ॥*॥ 'इनित्रकट्यचश्च' (४।२।५१) ॥ (२) ॥*॥ रथानां व्रजः ॥ (३) ॥*॥ त्रीणि **'रथसमूहस्य'** ॥

धूः स्त्री क्लीबे यानमुखं

धूरिति ॥ धूर्वति । 'धुर्वी हिंसायाम्' (भ्वा० प० से०) 'भ्राजभास–' (३।२।१७७) इति क्विप् । 'राल्लोपः' (६।४।२१) । 'र्वोः–' (८।२।७६) इति दीर्घः । ('धूर्यानमुखभारयोः' इति हैमः) ॥ (१) ॥*॥ यानस्य मुखं पुरोभागः ॥ (२) ॥*॥ द्वे **'वोढृबन्धनस्थानस्य'** ॥

स्याद्रथाङ्गमपस्करः ॥ ५५ ॥

स्येति ॥ रथस्याङ्गम् ॥ (१) ॥*॥ अपकीर्यते स्वस्थाने

१—इदं च प्रकृतानुपयुक्तम् ॥

क्षिप्यते । 'कृ विक्षेपे' (तु० प० से०) 'ऋदोरप्' (३।३।५७) । 'अपस्करो रथाङ्गम्' (६।१।१४९) इति साधुः ॥ (२) ॥*॥ द्वे **'चक्रेभिन्नस्य रथारम्भकस्य'** ॥

चक्रं रथाङ्गम्

चेति ॥ क्रियते गतिरनेन । 'घञर्थे कः' (वा० ३।३।५८) । 'कृवादीनां के' (वा० ६।१।१२) इति द्विरुम् । **'चक्रः** कोके पुमान्, क्लीबं व्रजे सैन्यरथाङ्गयोः । राष्ट्रे दम्भान्तरे कुम्भकारोपकरणाब्जयोः । जलावर्तेऽपि' (इति मेदिनी) ॥ (१) ॥*॥ रथस्याङ्गम् । **'रथाङ्गं** न द्वयोश्चक्रे ना चक्राङ्गविहंगमे' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'चक्रस्य'** ॥

तस्यान्ते नेमिः स्त्री स्यात्प्रधिः पुमान् ।

तेति ॥ तस्य चक्रस्यान्तो भूसर्शिभागः ॥*॥ नयति रथम् । 'नियो मिः' (उ० ४।४३) । **'नेमि**र्नौ तिनिशे कूपत्रिकाचक्रान्तयोः स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ प्रधीयतेऽनेन । 'डुधाञ्' (जु० उ० अ०) । 'उपसर्गे घोः किः' (३।३।९२) ॥ (२) ॥*॥ द्वे **'चक्रस्यान्तस्य'** ॥

पिण्डिका नाभिः

पीति ॥ पिण्ड्यतेऽरा यस्याम् । 'पिडि संघाते' (भ्वा० आ० से०) । 'हलश्च' (३।३।१२१) इति घञ् । गौरादिः (४।१।४१) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (१) ॥*॥ नह्यन्तेऽरा अत्र । 'णह बन्धने' (दि० उ० अ०) । 'नहो भश्च' (उ० ४।१२६) इतीञ् हस्य भः । यद्वा नभ्यतेऽक्षेण । 'णभ हिंसायाम्' (भ्वा० आ० से०) । 'इञ(ण)जादिभ्यः' (वा० ३।३।१०८) । **'नाभिर्मुख्यनृपे** चक्रमध्यक्षत्रिययोः पुमान् । द्वयोः प्राणिप्रतीके स्यात् स्त्रियां कस्तूरिकामदे' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'रथचक्रमध्ये मण्डलाकारायाः'** ॥

अक्षाग्रकीलके तु द्वयोरणिः ॥ ५६ ॥

अक्षेति ॥ अक्षस्य नाभिक्षेप्यस्यान्ते कीलके । अणति । 'अण शब्दे' (भ्वा० प० से०) । इन् (उ०४।११८) । 'अणिराणिवदक्षाग्रकीले स्यादश्रिसीमयोः' इति विश्वः । 'अणिराणिदक्षाग्रकीलाश्रिसीमसु द्वयोः' (इति मेदिनी) ॥ (१) ॥*॥ द्वे **'अक्षाग्रकीलकस्य'** ॥

१—इदं च 'रथारम्भकं चक्रादन्यत्' इति भट्टक्षीरस्वामिग्रन्थानुरोधेनोक्तम् । मुकुटस्तु—सामान्येन रथस्याङ्गमक्षयुगचक्रादिकमपस्करः—इति, अग्रे—रथाङ्गत्वेनैव गतार्थत्वापि 'चक्रम्' इति विशेषतो नामान्तरप्रतिपादनाय 'तस्यान्ते नेमिः' इत्युक्तये च रथाङ्गस्यानुवादः—इति च प्रोक्तवान् ॥ २—'कृदिकारात्' इति ङीषि 'अणी' आणी च । 'समाधुर्या वाणीमनो हरति' इति दमयन्तीश्लेषात् ॥

रथगुप्तिर्वरूथो ना

रेति ॥ रथस्य गुप्तिरावरणम् ॥ (१) ॥*॥ व्रियते रथोऽनेन । 'वृञ्भ्यामूथन्' (उ० २।६) । (**'वरूथो** रथगुप्तौ स्यात्) वरूथं चर्मवेश्मनोः' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'परप्रहाणाभिघातरक्षार्थं रथसंनाहवदावरणस्य'** ॥

कूबरस्तु युगंधरः ।

कीति ॥ कूवते । 'कूङ् शब्दे' (तु० आ० से०) । बाहुलकाद्वरच् । कुटादिः । **'कूबर**स्त्रिषु चारौ ना कुब्जकेऽस्त्री युगंधरे' (इति मेदिनी) ।—कूयते—इति स्वामी ॥ (१) ॥*॥ युगं वोढृबन्धनकाष्ठं धारयति । 'संज्ञायां भृतृवृजि–' (३।२।४६) इति खच् । 'अरुर्द्विष–' (६।३।६७) इति मुम् ॥ (२) ॥*॥ द्वे **'युगकाष्ठबन्धनस्थानस्य'** ॥

अनुकर्षो दार्वधःस्थम्

अन्विति ॥ अनुकृष्यते । 'कृष विलेखने' (भ्वा० प० अ०) । घञ् (३।३।१९) । **'अनुकर्षो** रथाधःस्थदारुण्यप्यनुकर्षणे' (इति मेदिनी) ॥*॥ नान्तोऽप्ययम् । **'अनुकर्षा** नाक्षतलदारु' इति वोपालितात् ॥ (१) ॥*॥ एकं **'रथस्याधस्तलभागदारुणः'** ॥

प्रासङ्गो ना युगान्तरम् ॥ ५७ ॥

प्रेति ॥ प्रसज्यते । 'षञ्ज सङ्गे' (भ्वा० प० अ०) । घञ् (३।३।१९) । 'उपसर्गस्य घञि–' (६।३।१२२) इति दीर्घः ॥ (१) ॥*॥ रथाद्यङ्गयुगादन्यद्युगं वृषभाणां दमनकाले यदासज्यते तस्यैकम् । स्वामी तु ('युगाद्युगः' इति पाठमाश्रित्य)—युगेनाततिं । युगाद्रथादिः । तस्य युगो ना–इत्याह । अन्येतु—युगान्तरं यद्बध्यते । तस्य—इत्याहुः । **'युगं** द्वितीयं प्रासङ्गः' इति काश्यः । एकं **'अन्यवृषयुग्मस्य'** ॥

सर्वं स्याद्वाहनं यानं युग्यं पत्रं च धोरणम् ।

सेति ॥ सर्वं हस्त्यश्वरथादिदोलान्तम् । वाहयति । वहेः स्वार्थण्यन्तात्कर्तरि ल्युट् (३।३।११३) । अन्ये तु—वह्यतेऽनेन । 'करणा–' (३।३।११७) इति ल्युट् । 'वाहनमाहितात्' (८।४।८) इति निपातनाद्दीर्घः—इत्याहुः ॥ (१) ॥*॥ यान्त्यनेन । करणे ल्युट् (३।३।११७) **'यानं** स्याद्वाहने गतौ' (इति मेदिनी) ॥ (२) ॥*॥ युज्यते अनेन वा । 'युजिर् योगे' (रु० उ० अ०) । 'युग्यं च पत्रे' (३।१।१२१) इति क्यबन्तो निपातः ॥ (३) ॥*॥ पतन्त्यनेन 'पतृ गतौ' (भ्वा० प० अ०) । 'दाम्नी–' (३।२।१८२) इति ष्ट्रन् । **'पत्रं** तु वाहने पर्णे स्यात्पक्षे शरपक्षिणोः' (इति मेदिनी) ॥ (४) ॥*॥ धोरति । अनेन वा । धोरयति वा । 'धोर्ऋ गति-

१—हेमचन्द्रोऽपि स्वोपज्ञनाममालायां 'प्रासङ्गस्तु युगान्तरम्' इति पठित्वा—'द्वितीयं युगं युगान्तरम् । यत्काष्ठं वत्सानां दमनकाले स्कन्ध आसज्यते । यन्मुनिः—'युगं द्वितीयं प्रासङ्गः'—इति व्याख्यातवान् ॥

चातुर्ये' (भ्वा० प० से०) ल्युः (३।१।१३४)। ल्युट् (३।३।११३) वा ॥ (५) ॥*॥ पञ्च **'वाहनमात्रस्य'** ॥

परम्परावाहनं यत्तद्वैनीतकमस्त्रियाम् ॥ ५८ ॥

पेति ॥ विनीतकानामिदम् । यद्वा विनीयते स्म । क्तः (३।२।१०२)। 'संज्ञायां कन्' (५।३।७५)। प्रज्ञाद्यण् (५।४।३८) ॥ (१) ॥*॥ परम्परया यद्वाह्यं वहति । शकटं यथारूढम् । तस्यैकम् **'परम्परावाहनस्य'** ॥

आधोरणा हस्तिपका हस्त्यारोहा निषादिनः ।

आधविति ॥ आधोरयन्ति । ल्युः (३।१।१३४) ॥ (१) ॥*॥ हस्तिनं पान्ति । 'पा रक्षणे' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ हस्तिनमारोहयन्ति । 'कर्मण्यण्' (३।२।१) ॥ (३) ॥*॥ निषीदन्त्यवश्यम् । 'षदॢ विशरणादिषु' (भ्वा० प० अ०) । आवश्यके णिनिः (३।३।१७०) । यद्वा निषादयन्त्युपवेशयन्ति हस्तिनम् । ब्रह्मादित्वात् (३।१।१३४) आवश्यके (३।३।१७०) वा णिनिः ॥ (४) ॥*॥ चत्वारि **'हस्तिपकेषु'** ॥

नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः ५९
सव्येष्टृदक्षिणस्थौ च संज्ञा रथकुटुम्बिनः ।

नीति ॥ नियच्छति । अन्तर्भावितण्यर्थो वा । 'यमु उपरमे' (भ्वा० प० अ०)। तृच् (३।१।१३३) ॥ (१) ॥*॥ प्राजति । 'अज गत्यादौ' (भ्वा० प० से०) । तृच् अन्तर्भावितण्यर्थो वा । 'वलादावार्धधतुके वेष्यते' (भाष्य० २।४।५६) इति वी न ।—प्राजयति—इति स्वामिमुकुटोक्तं चिन्त्यम् । णिचि वीभावस्य नित्यत्वात् । 'प्राजयिता' इति रूपप्रसङ्गाच्च । यदपि—वानुवृत्तेर्वीभावो नास्ति—इति स्वामिनोक्तम् । तदपि चिन्त्यम् । वृत्त्यादौ वानुवृत्तेरदर्शनात् ॥ (२) ॥*॥ यच्छति । तृच् (३।१।१३३) ॥ (३) ॥*॥ सुवति गमयति स्माश्वान् । 'षू प्रेरणे' (तु० प० से०) । क्तः (३।२।१०२) । **'सूत**स्तु सारथौ तक्षिणि क्षत्रियाद्ब्राह्मणीसुते । वन्दिपारदयोः (पुंसि, प्रसूते प्रेरिते त्रिषु)' इति विश्वमेदिन्यौ ॥ (४) ॥*॥ क्षदति । 'क्षद संवरणे' सौत्रः । 'तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ' (उ० २।९४) । मुकुटस्तु 'नप्तृनेष्टृत्वष्टृ–' (उ० २।९५)। इति तृच्—इत्याह । तन्न । नप्त्रादिषु क्षत्तुरग्रहणात् । यदपि—'क्षद स्थैर्ये हिंसायां च' इत्यतस्तृच् (३।१।१३३) तृन् (३।२।१३५) वा—इत्युक्तम् । तदपि न । उक्तपाठस्यादर्शनात् । 'खद स्थैर्ये' (भ्वा० प० से०) इति पाठस्य दर्शनाच्च ॥ (५) ॥*॥ सरत्यश्वान् । 'सृ गतौ' (भ्वा० प० अ०) । अन्तर्भावितण्यर्थः । 'सर्तेर्णिच्च' (उ० ४।८९) इति घथिन् । सरथस्यापत्यम्, वा ॥ (६) ॥*॥ सव्ये वामे तिष्ठति । 'सव्ये स्थश्छन्दसि' (उ० २।१०१) इत्यून् डिच्च । 'स्थास्थिन्थूणाम्' (८।३।९७) इति वक्तव्यात् षत्वम् । 'स्थास्थिनथूनाम्' इति पाठे तु सुषामादित्वात् (८।३।९८) षत्वम् । 'हलदन्तात्' (६।३।९) इत्यलुक् ॥*॥ 'सव्येष्टः' इत्यदन्तोऽपि । 'प्राजिता दक्षिणस्थश्च **सादी** सारथिरुच्यते । सूतः क्षत्ता नियन्ता च यन्ता सव्येष्ट एव च' इत्यमरमाला ॥ (७) ॥*॥ दक्षिणे तिष्ठति । 'सुपि–' (३।२।४) इति कः ॥ (८) ॥*॥ रथं कुटुम्बयितुं शीलमस्य । 'कुटुम्ब धारणे' (चु० आ० से०) । 'सुपि–' (३।२।७८) इति णिनिः । यद्वा रथ एव कुटुम्बम् । रथ कुटुम्बमस्यास्ति । इनिः (५।२।११५) तस्य अष्टौ **'रथकुटुम्बिनः'** ॥

रथिनः स्यन्दनारोहाः

रेति ॥ रथोऽस्यास्ति । इनिः । (५।२।११५) ॥ (१) ॥*॥ स्यन्दनमारोहन्ति । 'रुहॢ बीजजन्मनि प्रादुर्भावे च' (भ्वा० प० अ०) । अप् (३।२।१) ॥ (२) ॥*॥ द्वे **'रथारूढस्य योद्धुः'** ॥

अश्वारोहास्तु सादिनः ॥ ६० ॥

अश्वेति ॥ अश्वमारोहन्ति प्राग्वत् ॥ (१) ॥*॥ सीदन्त्यवश्यम् । 'षदॢ विशरणादौ' (तु० प० अ०) । 'आवश्यका–' (३।३।१७०) इति णिनिः । **'सादी** तुरंगमातङ्गरथारोहेषु दृश्यते' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'अश्ववाराणां' 'असवार'** इति ख्यातस्य ॥

भटा योधाश्च योद्धारः

भेति ॥ भटति । 'भट भृतौ, परिभाषणे वा' (भ्वा० प० से०) । अच् (३।१।१३४) । **'भटः** स्यात् पुंसि वीरे च विशेषे पामरस्य च' (इति मेदिनी) ॥ (१) ॥*॥ युध्यते । 'युध संप्रहारे' (दि० आ० अ०) । अच् (३।१।१३४) ॥ (२) ॥*॥ तृच् (३।१।१३३) ॥ (३) ॥*॥ त्रीणि **'योद्धुः'** ॥

सेनारक्षास्तु सैनिकाः ।

सेनेति ॥ सेनां रक्षन्ति । 'कर्मण्यण्' (३।२।१) ॥ (१) ॥*॥ 'रक्षति' (४।४।३३) इति ठक् । **'सैनिकः** सैन्यरक्षे च स्यात्सेनासमवेतके' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'प्रहरिकादेः'** ॥

सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते ॥ ६१ ॥

सेनेति ॥ सेनायां समवैति । 'सेनाया वा' (४।४।५५) इति ण्यः । **'सैन्यं** सैनिकसेनयोः' इति हैमः ॥ (१) ॥*॥ पक्षे ठक् (४।४।१) ॥ (२) ॥*॥ द्वे **'सेनायां मिलितस्यैकदेशीभूतस्य'** ॥

१—'इदमस्ति । चक्षिङः ख्याञ् । वा लिटि । ततो वक्ष्यामि 'अजेर्वीभावो भवति वा । व्यवस्थितविभाषा' इति' इति भाष्ये स्पष्टमेव विकल्पानुवृत्तेरुपलम्भादकिंचित्करमेतत् ॥

१—तुना—प्रकृतवार्तिकोदाहरणेषु भाष्यकृता 'सव्येष्ठा सारथिः' इत्युदाहरणदानेन कैयटेन 'स्थृशब्द ऋप्रत्ययान्त' इत्येवमुक्तत्वेन चोकारान्तपाठोऽप्रामाणिकः—इत्यरुचिः सूचिता ॥

बलिनो ये सहस्रेण साहस्रास्ते सहस्रिणः ।

वेति ॥ सहस्रं बलानि सन्ति येषाम् । 'तपःसहस्राभ्यां विनीनी' (५।२।१०२) ॥ (२) ॥*॥ 'अण् च' (५।२।१०३) इत्यण् ॥ (१) ॥*॥ द्वे **'सहस्रसंख्याकेन गजादिना बलवतः'** ॥

परिधिस्थः परिचरः

पेति ॥ परिधौ सेनान्ते तिष्ठति । 'सुपि–' (३।२।४) इति कः ॥ (१) ॥*॥ परितश्चरति । अच् (३।१।१३४) ॥ (२) ॥*॥ द्वे **'सेनायां राज्ञो दण्डकारिणः'** । 'प्रयाणे सामन्तस्यापकर्षकस्य'—इत्यन्ये । रथगजादेश्चक्रपादादिरक्षकस्य—इति केचित् ॥

सेनानीर्वाहिनीपतिः ॥ ६२ ॥

सेनेति ॥ सेनां नयति । 'णीञ् प्रापणे' (भ्वा० उ० अ०) । 'सत्सू–' (३।२।६१) इति क्विप् । **'सेनानीः** स्यात् पुमान् कार्तिकेये सेनापतौ पुमान्' (इति मेदिनी) ॥ (१) ॥*॥ वाहिन्याः पतिः ॥ (२) ॥*॥ द्वे **'सेनापतेः'** ॥

कञ्चुको वारबाणोऽस्त्री

केति ॥ कञ्च्यते । 'कचि दीप्तिबन्धनयोः' (भ्वा० आ० से०) । बाहुलकादुकः । **'कञ्चुको** वारबाणे स्यान्नि र्मोके कवचेऽपि च । वर्षापकगृहीताङ्गस्थितवस्त्रे च चोलके । कञ्चुक्यौषधिभेदे' (इति मेदिनी) ॥ (१) ॥*॥ वार्णं वारयति, वृणोति वा । 'वृञ् वरणे' (स्वा० उ० से०) । ण्यन्तो वा । **'कर्मण्यण्'** (३।२।१) । (मयूरव्यंसकादित्वात् '२।१।७२') । राजदन्तादित्वात् (२।२।३१) वा परनिपातः । यद्वा वारमाच्छादकं ज्ञानमस्य । 'पूर्वपदात्–' (८।४।३) इति णत्वम् ॥ (२) ॥*॥ द्वे **'चोलकाकृतिसंनाहस्य'** ॥

यत्तु मध्ये सकञ्चुकाः ।
बध्नन्ति तत्सारसनमधिकाङ्गः

बेति ॥ सारं सनोति । 'षणु दाने' (तु० प० से०) । कर्मणः शेषत्वविवक्षायामच् (३।१।१३४) । यद्वा सारं बलमस्यते दीप्यतेऽनेन । 'अस गतिदीप्त्यादानेषु' (भ्वा० उ० से०) । 'करणा–' (३।३।११७) इति ल्युट् । शकन्ध्वादिः (वा० ६।१।९४) । **'सारसनम**प्युरस्त्रे तनुत्रिणां मेखलायां च' (इति मेदिनी) । विश्वोऽपि—**'सारसनं** मेखलायामुरस्त्रे च तनुत्रिणाम्' इति ॥ (१) ॥*॥ अधिकमङ्गात् ॥*॥ क्वचित्तु 'सारसनाधिपाङ्गे' इति पाठः । यत्काल्यः—'अधिपाङ्गं सारसनम्' इति ॥*॥ दुर्गस्तु—'तस्य सारसनं ज्ञेयं **धिपाङ्गं** च निबन्धनम्' इति ॥ (२) ॥*॥ द्वे **'कञ्चुकदार्ढ्यार्थं मध्यकाये निबद्धस्य'** ॥

अथ शीर्षकम् ॥ ६३ ॥

शीर्षण्यं च शिरस्त्रे

अथेति ॥ शीर्षस्य प्रतिकृतिः । **'इवे–'** (५।३।९६) इति कन् । शीर्षे कं सुखमस्माद्वा ॥ (१) ॥*॥ शिरसे हितम् । **'शरीरावयवाद्यत्'** (५।१।६) । **'ये च तद्धिते'** (६।१।६१) इति शिरःशब्दस्य शीर्षन्नादेशः । **'ये चाभाव–'** (६।४।१६८) इति टिलोपो न । **शीर्षण्यं** शीर्षरक्षणे । **'शीर्षण्यो** विशदे कचे' इति हैमः ॥ (२) ॥*॥ शिरस्त्रायते । **'त्रैङ् पालने'** (भ्वा० आ० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥ (३) ॥*॥ त्रीणि **'शिरस्त्रस्य' 'टोप'** इति ख्यातस्य ॥

अथ तनुत्रं वर्म दंशनम् ।
उरश्छदः कङ्कटको जगरः कवचोऽस्त्रियाम् ॥६४॥

अथेति ॥ तनुं त्रायते । प्राग्वत् ॥ (१) ॥*॥ वृणोति देहम् । 'वृञ् वरणे' (स्वा० उ० से०) । मनिन् (३।२।७५)॥ (२) ॥*॥ दंश्यतेऽनेन । 'दंशि दंशनसर्शनयोः' (चु० आ० से०) 'करणा–' (३।३।११७) इति ल्युट् । **'दंशनं** वर्मदंशयोः' इति हैमः ॥ (३) ॥*॥ उरश्छाद्यतेऽनेन । 'छद अपवारणे' (चु० उ० से०) । 'पुंसि–' (३।३।११८) इति घः । 'छादेर्घे–' (६।४।९६) इति ह्रस्वः ॥ (४) ॥*॥ कङ्कते । 'ककि लौल्ये' (भ्वा० आ० से०) 'शकादिभ्योऽटन्' (उ० ४।८१) स्वार्थे कन् (ज्ञापि० ५।४।५) यद्वा कं सुखं कटति । 'कटे वर्षादौ' (भ्वा० प० से०) अच् (३।१।१३४) । मूलविभुजादिकः (वा० ३।२।५) वा ॥ (५) ॥*॥ जगता गृह्यते । 'प्रातिपदिकाद्धात्वर्थे–' (चु० ग० सू०) इति णिच् (टिलोपश्च) । बाहुलकादरः । जागर्ति । अच् (३।१।१३४) । पृषोदरादिः (६।३।१०९) वा । 'जगरः **कङ्कटो योगः संनाहः** स्यादुरश्छदः' इति बोपालितः ॥ (६) ॥*॥ कं वातं वञ्चति । 'वञ्चु गतौ' (भ्वा० प० से०) । अन्तर्भावितण्यर्थो वा । मूलविभुजादिकः । **'कवचो** गर्दभाण्डे च संनाहे पटहेऽपि च' (इति विश्वमेदिन्यौ) ॥ (७) ॥*॥ सप्त **'संनाहस्य'** ॥

आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत् ।

आम्विति ॥ आमुच्यते स्म । 'मुच्ल मोक्षणे' (तु० उ० अ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ प्रतेरपि ॥ (२) ॥*॥ अपि नह्यते स्म । 'णह बन्धने' (दि० उ० अ०) । क्तः (३।२।१०२) । 'वष्टि भागुरिः–' इत्यल्लोपः ॥ (३) ॥*॥ (४) ॥*॥ चत्वारि **'परिहितकवचादेः'** ॥ (परिहितस्य वस्त्रादेः–इति मुकुटः) ॥

संनद्धो वर्मितः सज्जो दंशितो व्यूढकङ्कटः ॥६५॥

समिति ॥ संनह्यति, संनह्यते, स्म वा । अकर्मकत्वात्कर्तरि (३।४।७२) कर्मणि (३।२।१०२) वा क्तः । **'संनद्धो** वर्मिते व्यूढे' (इति मेदिनी) ॥ (१) ॥*॥ वर्मणा नह्यते स्म । 'सत्याप–' (३।१।२५) इति णिच् । 'णाविष्ठवत्' (वा० ६।४।११५) इति टिलोपः । वर्म संजातमस्य वा । तारकादित्वात् (५।२।३६) इतच् ॥ (२) ॥*॥ सज्जति ।

'षस्ज गतौ' (भ्वा० प० से०)। अच् (३।१।१३४)। 'अथ **सज्जः** स्यात्संनद्धे संभृते त्रिषु' (इति मेदिनी) ॥ (३) ॥*॥ दंशः संजातोऽस्य । इतच् (५।२।३६)। यद्वा-दंश्यते स्म । 'दंशि दंशनादौ' (चु० आ० से०)। क्तः (३।२।१०२) ॥ (४) ॥*॥ व्यूढो धृतः कङ्कटो येन ॥ (५) ॥*॥ पञ्च **'धृतसंनाहस्य'** ॥

त्रिष्वामुक्तादयः

त्रीति ॥ आमुक्तादयो व्यूढकङ्कटान्ताः ॥

वर्मभृतां कावचिकं गणे ।

वेति ॥ कवचिनां समूहः । 'ठञ् कवचिनश्च' (४।२।४१) ॥ (१) ॥*॥ एकं **'धृतसंनाहानां गणस्य'** ॥

पदातिपत्तिपदगपादातिकपदाजयः ॥ ६६ ॥
पद्मश्च पदिकश्च

पेति ॥ पादाभ्यामतति । 'अत सातत्यगमने' (भ्वा० प० से०) । 'अज्यतिभ्यां च' (उ० ४।१३०) 'पादे च' (उ० ४।१३१) इतीण् । 'पादस्य पदाज्यातिगोपहतेषु' (६।३।५२) इति पदः ॥ (१) ॥*॥ एवं पदाजिः ॥ (५) ॥*॥ मुकुटस्तु—'इञजादिभ्यः' (वा० ३।३।१०८) इतीञ्—इत्याह । तन्न । 'स्त्रियाम्' 'अकर्तरि च कारके' 'भावे' इत्यधिकारे तस्य विहितत्वेन 'अतति' 'अजति' इति विग्रहस्य विरुद्धत्वात् ॥ (१) ॥*॥ पद्यते । 'पद गतौ' (दि० आ० अ०)। बाहुलकात्तिः । क्तिच् (३।३।१७४) वा । **'पत्तिः** सेनाभित्पद्पयोर्गतौ' इति हैमः ॥ (२) ॥*॥ पादाभ्यां गच्छति । 'अन्येष्वपि–' (वा० ३।२।४८) इति डः । 'पादस्य–' (६।३।५२) इति पदः ॥ (३) ॥*॥ पदातिरेव । विनयादित्वात् (५।४।३४) ठक् । पादाभ्यामतति । बाहुलकादिको वा ॥*॥ **'पादातिकः'** इति क्वचित्पाठः । पादाभ्यामवति । 'अव रक्षणादौ' (भ्वा० प० से०) । बाहुलकादिकः । यद्वा पादेनावो रक्षणम् । तत्र नियुक्तः । 'तत्र नियुक्तः' (४।४।६९) इति ठक् ॥ (४) ॥*॥ पद्भ्यां गच्छति । पादेन समानार्थः पच्छब्दोऽस्ति । डः (वा० ३।२।४८) ॥ (६) ॥*॥ पादाभ्यां चरति । 'पर्पादिभ्यः ष्ठन्' (४।४।१०)। 'इके चरतौ' (वा० ६।३।५३) इति पद्भावः ॥ (७) ॥*॥ पादातशब्दोऽप्यत्र । 'पदातिपत्तिपादातपादातिकपदाजयः' इत्यमरमाला । यत्तु मुकुटेनोक्तम्—मूलविभुजादिके पादातः–इति । तन्न । 'पादाभ्यां अतति' इति विग्रहेण पचाद्यचा गतार्थत्वात् ॥*॥ सप्त **'पदातेः'** ॥

अथ पादातं पत्तिसंहतिः ।

अथेति ॥ पदातीनां समूहः । 'भिक्षादिभ्योऽण्' (४।२।३८) ॥ (१) ॥*॥ पत्तीनां संहतिः ॥ (२) ॥*॥ द्वे **'पदातिसमूहस्य'** ॥

शस्त्राजीवे काण्डपृष्ठायुधीयायुधिकाः समाः ॥६७॥

शेति ॥ शस्त्रमाजीवति उपजीवति । 'जीव प्राणधारणे' (भ्वा० प० से०)। 'कर्मण्यण्' (३।२।१) ॥(१) ॥*॥ काण्डानि शस्त्राणि पृष्ठे यस्य ॥*॥ **'काण्डस्पृष्टः'** इति मुकुटः । स्पृष्टं गृहीतं काण्डं शस्त्रं येन । 'वाहिताग्न्यादिषु' (२।२।३७) इति परनिपातः ॥ (२) ॥*॥ आयुधेन जीवति । 'आयुधाच्छ च' (४।४।१४) ॥ (३) ॥*॥ चात् ठन् ॥ (४) ॥*॥ चत्वारि **'शस्त्रजीविनः'** ॥

कृतहस्तः सुप्रयोगविशिखः कृतपुङ्खवत् ।

क्रिति ॥ कृतोऽभ्यस्तो हस्तो यस्य ॥ (१) ॥*॥ शोभनः प्रयोगोऽस्य । सुप्रयोगो विशिखोऽस्य ॥ (२) ॥*॥ कृतोऽभ्यस्तः पुङ्खः पुङ्खयुक्तः शरो येन ॥ (३) ॥*॥ त्रीणि **'सम्यक्कृतशराभ्यासस्य'** ॥

अपराद्धपृषत्कोऽसौ लक्ष्याद्यश्च्युतसायकः ॥ ६८ ॥

अपेति ॥ अपराद्धः पृषत्को बाणोऽस्य ॥ (१) ॥*॥ लक्ष्याद्वेध्यात् च्युतो भ्रष्टः सायको यस्य ॥*॥ एकं **'लक्ष्याप्राप्तशरस्य'** ॥

धन्वी धनुष्मान् धानुष्को निषङ्गयस्त्री धनुर्धरः ।

धेति ॥ **'धन्वा** तु मरुदेशे ना क्लीबं चापे स्थलेऽपि च' (इति मेदिनी)। धन्वास्यास्ति । व्रीह्यादित्वात् (५।२।११६) इनिः ॥ (१) ॥*॥ धनुरस्यास्ति । मतुप् (५।२।९४) । 'तसौ मत्वर्थे' (१।४।१९) इति भत्वम् ॥ (२) ॥*॥ धनुः प्रहरणमस्य । 'तदस्य प्रहरणम्' (४।४।५७) इति ठक् । 'इषुसुक्तान्तात्कः' (७।३।५१) ॥ (३) ॥*॥ निषङ्गोऽस्यास्ति । इनिः (५।२।११५) ॥ (४) ॥*॥ **'अस्त्रं** प्रहरणे चापे' इति विश्वः । अस्त्रमस्यास्ति । इनिः (५।२।११५) ॥ (५) ॥*॥ धरति । 'धृञ् धारणे' (भ्वा० उ० अ०) । अच् (३।१।१३४)। धनुषो धरः ॥ (६) ॥*॥ षट् **'धनुर्धरस्य'** ॥

स्यात्काण्डवांस्तु काण्डीरः

स्यादिति ॥ **'काण्डः** स्तम्बे तरुस्कन्धे बाणेऽवसरनीरयोः । कुत्सिते वृक्षभिन्नाडीबन्धे रहसि न स्त्रियाम्' (इति मेदिनी)। काण्डो बाणोऽस्यास्ति । मतुप् (५।२।११५) ॥ (१) ॥*॥ 'काण्डाण्डादीरन्नीरचौ' (५।२।१११) ॥ (२) ॥*॥ द्वे **'बाणधारकस्य'** ॥

शाक्तीकः शक्तिहेतिकः ॥ ६९ ॥

शेति ॥ शक्तिः प्रहरणमस्य । 'शक्तियष्ट्योरीकक्' (४।४।५९) ॥ (१) ॥*॥ शक्तिर्हेतिर्यस्य ॥ (२) ॥*॥ द्वे **'शक्त्यायुधधारिणः'** ॥

१—'तदस्य इत्यंशस्तु पूर्वसूत्रादनुवृत्तः सूत्रं त्ववशिष्टमेव ॥

याष्टीकपारश्वधिकौ यष्टिपर्श्वधहेतिकौ ।

येति ॥ यष्टिः प्रहरणमस्य (ईकन् '४।४।५९') ॥ (१) ॥*॥ परश्वधः परशुः प्रहरणमस्य । 'परश्वधाट्टञ्' (४।४।५८) ॥ (१) ॥*॥ यष्टिश्च पर्श्वधश्च हेती ययोः ॥*॥ एकैकम् **'यष्टि-परशुधृतोः'** ॥

नैस्त्रिंशिकोऽसिहेतिः स्यात्

नास्त्रिति ॥ निस्त्रिंशः प्रहरणमस्य । **'प्रहरणम्'** (४।४।५७) इति ठक् ॥ (१) ॥*॥ असिर्हेतिर्यस्य ॥ (२) ॥*॥ द्वे **'खड्गायुधस्य'** ॥

समौ प्रासिककौन्तिकौ ॥ ७० ॥

सेति ॥ प्रासः कुन्तश्च प्रहरणमस्य । प्राग्वत् (४।४।५७) ॥ (१) ॥*॥ एकैकम् **'प्रासकुन्तायुधिनोः'** ॥

चर्मी फलकपाणिः स्यात्

चेति ॥ चर्मास्यास्ति । व्रीह्यादित्वात् (५।२।११६) इनिः ॥ (१) ॥*॥ फलकं पाणावस्य ॥ (२) ॥*॥ द्वे **'फलकधारकस्य'** ॥

पताकी वैजयन्तिकः ।

पेति ॥ पताकास्यास्ति । व्रीह्यादीनिः (५।२।११५) ॥ (१) ॥*॥ वैजयन्त्यस्यास्ति । व्रीह्यादित्वात् (५।२।११६) ठन् । यद्वा वैजयन्त्या चरति । 'चरति' (४।४।८) इति ठक् ॥ (२) ॥*॥ द्वे **'ध्वजधारकस्य'** ॥

अनुप्लवः सहायश्चानुचरोऽभिसरः समाः ॥ ७१ ॥

अन्विति ॥ अनु पश्चात् प्लवते । 'प्लुङ् गतौ' (भ्वा० आ० अ०) । अच् (३।१।१३५) ॥ (१) ॥*॥ सह अयते । 'अय गतौ' (भ्वा० आ० से०) । एति वा । 'इण् गतौ' (अ० प० अ०) । अच् (३।१।१३४) ॥ (२) ॥*॥ अनु चरति । 'चरेष्टः' (३।२।१६) ॥ (३) ॥*॥ अभितः सरति । अच् (३।१।१३४) ॥ (४) ॥*॥ चत्वारि **'सहायस्य'** ॥

पुरोगाग्रेसरप्रष्ठाग्रतःसरपुरःसराः ।
पुरोगमः पुरोगामी

पुरेति ॥ पुरो गच्छति । 'अन्येष्वपि–' (वा० ३।२।४८) इति डः ॥ (१) ॥*॥ अग्रे सरति । 'पुरोऽग्रतोऽग्रेषु–' (३।२।१८) इति टः ॥ (२) ॥*॥ प्रतिष्ठते गच्छति । 'आतश्चोपसर्गे–' (३।१।१३६) इति कः । 'प्रष्ठोऽग्रगामिनि' (८।३।९२) इति षः । **'प्रष्ठस्त्रिष्वग्रगे श्रेष्ठे पुंसि चाण्डालिकौषधौ'** (इति मेदिनी) ॥ (३) ॥*॥ अग्रतः सरति ॥ पुरः सरति । 'पुरोऽग्रतः–' (३।२।१८) इति टः ॥ (४) ॥*॥ (५) ॥*॥ पुरो गच्छति । अच् (३।१।१३४) । 'गमश्च' (३।२।४७) इति खच् वा ॥ (६) ॥*॥ 'सुप्यजातौ–' (३।२।७८) इति णिनिः ॥ (७) ॥*॥ सप्त **'अग्रेसराणाम्'** ॥

मन्दगामी तु मन्थरः ॥ ७२ ॥

मेति ॥ मन्दं गच्छति तच्छीलः । प्राग्वत् (३।२।७८) ॥ (१) ॥*॥ मन्थति पादौ । 'मथि हिंसासंक्लेशनयोः' (भ्वा० प० से०) । बाहुलकादरन् । मन्थं राति । 'आतोऽनुप–' (३।२।३) इति कः । **'मन्थरः** कोशफलयोर्बाधमन्थानयोः पुमान् । कुसुम्भ्यां न द्वयोर्मन्दे पृथौ वक्रेऽभिधेयवत्' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'शनैर्गमनशीलस्य'** ॥

जङ्घालोऽतिजवस्तुल्यौ

जेति ॥ अतिशयिता जङ्घास्य । सिध्मादित्वात् (५।२।९७) लच् ॥*॥ पिच्छादित्वात् (५।२।१००) इलचि **जङ्घिलोऽपि** । 'प्रज्ञालप्रज्ञिलौ तुल्यौ जङ्घालजङ्घिलादयः' इति वाचस्पतिः ॥ (१) ॥*॥ अतिशयितो जवो वेगो यस्य ॥ (२) ॥*॥ द्वे **'अतिवेगवतः'** ॥

जङ्घाकरिकजाङ्घिकौ ।

जेति ॥ जङ्घासाध्यत्वादुपचाराद्गतिर्जङ्घा । सैव करो राजदेयो भागः, आकरः श्रेष्ठो वा । जङ्घाकरोऽस्यास्ति । ठन् (५।२।११५) जङ्घैव करी हस्ती यस्य, इति वा ॥ (१) ॥*॥ जङ्घाभ्यां जीवति । 'वेतनादिभ्यो जीवति' (४।४।१२) इति ठक् ॥ (२) ॥*॥ द्वे **'जङ्घाजीविनः'** ॥

तरस्वी त्वरितो वेगी प्रजवी जवनो जवः ॥ ७३ ॥

तेति ॥ तरो वेगोऽस्यास्ति । 'अस्मायामेधा–' (५।२।१२१) इति विनिः । **'तरस्वी** शूरवेगिनोः' (इति मेदिनी) ॥ (१) ॥*॥ त्वरते । 'त्वित्वरा संभ्रमे' (भ्वा० आ० से०) । 'ञीतः क्तः' (३।२।१९७) । त्वरा संजातास्य इति वा । इतच् (५।२।३६) । **'त्वरितं** वेगतद्वतोः' (इति हैमः) ॥ (२) ॥*॥ अतिशयितो वेगोऽस्य । इनिः (५।२।११५) ॥ (३) ॥*॥ प्रजवति 'जुः' सौत्रो वेगे गतौ च । 'प्रजोरिनिः' (३।२।१५६) ॥ (४) ॥*॥ 'जुचङ्क्रम्य–' (३।२।१५०) इति युच् । **'जवनं** तु स्यदे वेगिहये ना वेगिनि त्रिषु' (इति मेदिनी) ॥ (५) ॥*॥ अच् (३।१।१३४) **'(जवो** वेगवति त्रिषु) । पुंलिङ्गस्तु भवेद्वेगे चौण्ड्रपुष्पे **जवा** मता' (इति मेदिनी) ॥ (६) ॥*॥ षड् **'वेगवन्मात्रस्य'** ॥

जय्यो यः शक्यते जेतुम्

जेति ॥ जेतुं शक्यः । 'जि जये, अभिभवे वा' (भ्वा० प० अ०) । 'शकि लिङ् च' (३।३।१७२) इति शक्तौ 'अचो यत्' (३।३।९७) । 'क्षय्यजय्यौ शक्यार्थे' (६।१।८१) ॥ (१) ॥*॥ एकम् **'जेतुं शक्यस्य'** ॥

जेयो जेतव्यमात्रके ।

जयिति ॥ शक्यार्थादन्यत्र 'अर्हे कृत्यतृचश्च' (३।३।१६९) इति योग्यतायाम् 'अचो यत्' (३।१।९७) ॥ (१) ॥*॥ एकं **'जेतुं योग्यस्य'** ॥

जैत्रस्तु जेता

जायिति ॥ जयनशीलः । 'तृन्' (३।२।१३५) । प्रज्ञाद्यण् (७।४।३८) ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'जयवतः'** ॥

यो गच्छत्यलं विद्विषतः प्रति ॥ ७४ ॥
सोऽभ्यमित्र्योऽभ्यमित्रीयोऽप्यभ्यमित्रीण इत्यपि ॥

य इति ॥ अमित्रस्याभिमुखम् । 'लक्षणेनाभिप्रती' (२।१।१४) इत्यव्ययीभावः । अभ्यमित्रमलंगामी । 'अभ्यमित्राच्छ च' (५।२।१७) चाद् यत्खौ ॥ (१) ॥*॥ (२) ॥*॥ (३)॥*॥ त्रीणि **'सामर्थ्येन शत्रूणां संमुखं गच्छतः'** ॥

ऊर्जस्वलः स्यादूर्जस्वी य ऊर्जातिशयान्वितः ॥७५॥

ऊर्जेति ॥ **'ऊर्जस्तु** कार्तिकोत्साहबलेषु प्राणनेऽपि च' (इति मेदिनी) । अतिशयित ऊर्जोऽस्यास्ति । 'ज्योत्स्नातमिस्रा–' (५।२।११४) इति वलच्विनी । ऊर्जशब्दोऽदन्तः सान्तश्च । आद्ये सगपि निपात्यः । मुकुटस्तु 'ऊर्जा' शब्दमाबन्तं पठित्वा 'ह्रस्वत्वं च' इत्याह । तन्न । उक्तमेदिनीकोशविरोधात् ॥ (१) ॥*॥ (२) ॥*॥ ऊर्जस्यातिशयः । ऊर्जातिशयेनान्वितः ॥ (३) ॥*॥ 'ऊर्ज बलप्राणनयोः' (चु० प० से०) । भावे घञ् (३।३।१८) । 'गुरोश्च–' (३।३।१०२) । इत्यप्रत्यये टाप्यावन्तोऽपि संभवति । परं तु निपातने स न ग्राह्यः । ह्रस्वस्यापि निपातनीयत्वेन गौरवप्रसङ्गात् । वृत्तिकारस्त्वसुन्नन्तं मन्यते । तत्तु न सम्यक् । 'अस्माया–' (५।२।१२१) इति सिद्धत्वेन निपातनस्य वैयर्थ्यप्रसङ्गात् ॥*॥ त्रीणि **'बलातिशयवतः'** ॥

स्यादुरस्वानुरसिलः

स्येति ॥ प्रशस्तमतिशयितं वा उरो यस्य । विशालत्वात् । मतुप् (५।२।९४) । 'मादुपधाया–' (८।२।९) इति वः ।—'झयः' (८।२।१०) इति वत्वम्—इति तु मुकुटस्य प्रमादः । सस्य झयत्वाभावात् ॥ (१) ॥*॥ पिच्छादित्वात् (५।२।१००) इलच् ॥ (२) ॥*॥–उरसा बलं लक्ष्यते—इति स्वामी ॥*॥ द्वे **'विपुलोरसः'** ॥

रथिनो रथिको रथी ।

रेति ॥ रथोऽस्यास्ति । 'मेधारथाभ्यामिरन्निनचौ' । स्वामी तु—'मेधारथाभ्यामिरन्निरचौ' (वा० ५।२।१०९) इति पठित्वा **'रथिरः'** इति व्याख्याय–'रथिनः' इत्यपपाठः—इत्याह ।–रथस्येनः प्रभुः । शकन्ध्वादिः (वा० ६।१।९४)—इत्यन्ये ॥ (१) ॥*॥ 'अत इनिठनौ' (५।२।११५)॥ (२) ॥*॥ (३) ॥*॥ त्रीणि **'रथस्वामिनः'** ॥

कामंगाम्यनुकामीनः

केति ॥ कामं यथेच्छं गमनशीलः । 'कामम्' इत्यव्ययम् । 'सुपि' (३।२।७८) इति णिनिः ॥ (१) ॥*॥ कामस्य सदृशम् । यथार्थेऽव्ययीभावः (२।१।६)। अनुकामं गामी 'अवारपार–' (५।२।११) इति खः ॥ (२) ॥*॥ द्वे **'यथेष्टं गमनशीलस्य'** ॥

ह्यत्यन्तीनस्तथा भृशम् ॥ ७६ ॥

ह्येति ॥ अन्तस्याव्ययः । अत्ययेऽव्ययीभावः (२।१।६) । अत्यन्तं गामी । 'अवार–' (५।२।११) इति खः ॥ (१) ॥*॥ 'भृशं गामी' इत्यन्वयः ॥*॥ एकम् **'अतिगमनशीलस्य'** ॥

शूरो वीरश्च विक्रान्तः

श्विति ॥ शूरयति । 'शूर, वीर, विक्रान्तौ' (चु० उ० से०) अच् (३।१।१३४) । **'शूरः** स्याद्यादवे भटे' (इति मेदिनी) ॥ (१) ॥*॥ वीरयति । **'वीरो** रसविशेषे स्यादुत्तरे सुभटे त्रिषु । स्त्री सुराक्षीरकाकोलीतामलक्येलवालुके । पतिपुत्रवतीरम्भाविदारीदुग्धिकासु च । मलयूक्षीरविदार्योः क्लीबं श्रृङ्ख्यां नतेऽपि च' इति (पवर्गतृतीयादौ मेदिनी) ॥ (२)॥*॥ विक्रामति स्म । 'क्रमु पादविक्षेपे' (भ्वा० प० से०) । 'गत्यर्था–' (३।४।१२) । इति क्तः ॥ (३) ॥*॥ त्रीणि **'शूरस्य'** ॥

जेता जिष्णुश्च जित्वरः ।

जयिति ॥ जयनशीलः । 'तृन्' (३।२।१३५) ॥ (१) ॥*॥ 'ग्लाजिस्थश्च ग्स्नुः' (३।२।१३९) । **'जिष्णुर्ना** वासवेऽर्जुने । जित्वरे वाच्यवत्' (इति मेदिनी) ॥ (२) ॥*॥ 'इष्णशजि–' (३।२।१६३) इति क्वरप् ॥ (३) ॥*॥ त्रीणि **'जयशीलस्य'** ॥

सांयुगीनो रणे साधुः

सामिति ॥ संयुगे रणे साधुः । 'प्रतिजनादिभ्यः खञ्' (४।४।९९) ॥ (१) ॥*॥ एकं **'युद्धकुशलस्य'** ॥

शस्त्राजीवादयस्त्रिषु ॥ ७७ ॥

शेति ॥ शस्त्राजीवादयः सांयुगीनान्ताः ॥

ध्वजिनी वाहिनी सेना पृतनानीकिनी चमूः ।
वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम् ॥७८॥

ध्वेति ॥ ध्वजाः सन्त्यस्याम् । इनिः (४।२।११५) ॥ (१) ॥*॥ वाहाः सन्त्यस्याम् ॥ (२) ॥*॥ सिनोति । 'षिञ् बन्धने' (स्वा० उ० अ०) । 'कृवृजूसिद्रुपन्यनिस्वपिभ्यो नित्' (उ० ३।१०) इति नः । सह इनेन वा ॥ (३) ॥*॥ प्रियते । 'पृङ् व्यायामे' (तु० आ० अ०) । बाहुलकात्तनन् । गुणाभावश्च । **'पृतना** तु स्त्रियां सेनामात्रसेनाविशेषयोः' (इति मेदिनी) ॥ (४) ॥*॥ अनीकं रणोऽस्ति प्रयोजनत्वेन यस्याः । इनिः (५।२।११५) । **'अनीकिनी** स्त्रियां सेनामात्रसेनाविशेषयोः' (इति मेदिनी) ॥ (५) ॥*॥ चमति शत्रून् । 'कृषिचमितनि–' (उ० १।८०) इत्यूः ।—'चमित-

१—स्वामिना तु भाष्याङ्गीकृतमेवोक्तम् । मुकुटोऽपि प्राथम्येन 'रथिरः' इत्येवोक्तवान् । इनज्वटितवार्तिकं तु भाष्ये नोपलभ्यते ॥

मिवधिभ्य ऊः'–इति मुकुटः । तन्न । तादृशसूत्राभावात् । **'चमूः** सेनाविशेषे च सेनामात्रे च योषिति' (इति मेदिनी) ॥ (६) ॥*॥ वरूथाः सन्त्यस्याम् । इनिः (५।२।११५) (७) ॥*॥ बलति । 'बल प्राणने' (भ्वा० प० से०) । अच् (३।१।१३४) । यद्वा वलते । 'वल संवरणे, संचलने च' (भ्वा० आ० से०) ॥ (८) ॥*॥ सेनैव । चतुर्वर्णादित्वात् (वा० ५।१।१२४) ष्यञ् ॥ (९) ॥*॥ क्रियतेऽनेन । 'घञर्थे कः' (वा० ३।३५८) । 'के कृञादीनाम्' (वा० ६।१।१२) इति द्वित्वम् ॥ (१०) ॥*॥ अनित्यनेन । 'अन प्राणने' (अ० प० से ।) । 'अनिहृषिभ्यां किच्च' उ० ४।१७) इतीकन् । **'अनीकोऽस्त्री** रणे सैन्ये' (इति मेदिनी) ॥ (११) ॥*॥ एकादश **'सेनायाः'** ॥

व्यूहस्तु बलविन्यासः

व्यूहति ॥ व्यूह्यते । 'ऊह वितर्के' (भ्वा० आ० से०) । घञ् (३।३।१८) । **'व्यूहः** स्याद्बलविन्यासे निर्माणे वृन्दतर्कयोः' (इति मेदिनी) ॥ (१) ॥*॥ बलस्य सेनाया विन्यासो विभज्य स्थापनम् ॥ (२) ॥*॥ द्वे **'व्यूहस्य'** ॥

भेदा दण्डादयो युधि ।

भयिति ॥ भेदा विशेषाः । यदाह कामन्दकिः–'तिर्यग्वृत्तिस्तु दण्डः स्याद्भोगोऽन्वावृत्तिरेव च । मण्डलः सर्वतोवृत्तिः पृथग्वृत्तिरसंहतः' इति ॥ दण्डवदवस्थानं **दण्डः ।** अन्योन्यानुगतावृतिर्**भोगः** । सर्पशरीरवदवस्था **मण्डलः ।** गजादीनां विजातीयैरमिश्रितानां स्थानम**संहतः** । शकट–मकर–पताका–सर्वतोभद्र–दुर्जयादयोऽपि ॥

प्रत्यासारो व्यूहपार्ष्णिः

प्रेति ॥ प्रतीपमासारयति भग्नान् । 'सृ गतौ' (भ्वा० प० अ०) । ण्यन्तः । अच् ॥ (१) ॥*॥ व्यूहस्य पार्ष्णिः पृष्ठभागः । **'पार्ष्णिः** स्यादुन्मदस्त्रियाम् । स्त्रियां द्वयोः सैन्यपृष्ठे पादग्रन्थ्यधरेऽपि च' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ द्वे **'व्यूहस्य पृष्ठभागस्य'** ॥

सैन्यपृष्ठे प्रतिग्रहः ॥ ७९ ॥

सैन्येति ॥ सैन्यस्य पृष्ठे धनुःशतद्वयान्तरे स्थितं सैन्यम् । प्रतिगृह्यतेऽनेन 'ग्रहवृह–' (३।३।५८) इत्यप् । **'प्रतिग्रहः** स्वीकरणे सैन्यपृष्ठे पतद्ग्रहे । योग्येभ्यो विधिवद्देये तद्ग्रहे च ग्रहान्तरे' (इति मेदिनी) ॥ (१) ॥*॥ एकं **'सैन्यस्य पश्चाद्भिन्नसंघातस्यानीकस्य'** ॥

एकैकैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका ।

एकेति ॥ एक इभो यस्याम् । एको रथो यस्याम् । त्रयोऽश्वा यस्याम् । पञ्च पदातयो यस्याम् । पद्यते । 'पद गतौ' (दि० आ० अ०) । पत्यते वा । 'पत्लृ गतौ' (भ्वा० प० अ०) । 'स्त्रियां क्तिन्' (३।३।९४) । क्तिच् (३।३।१७४) वा । **'पत्तिर्**ना पदगे, स्त्रियाम् । गतावेकरथैकेभपञ्चपदातिके' (इति मेदिनी) । भरतः—'एको रथो गजश्चैको नराः पञ्च पदातयः । त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते' ॥ (१) ॥*॥ एकं **'सेनाविशेषस्य'** ॥

पत्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ॥८०॥

सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः ।
अनीकिनी

पेति ॥ तिस्रः पत्तयः सेनामुखम् । त्रिभिः सेनामुखैर्गुल्मः । त्रयो गुल्मा गणः । त्रयो गणा वाहिनी । तिस्रो वाहिन्यः पृतना । तिस्रः पृतनाश्चमूः । तिस्रश्चम्बोऽनीकिनी ॥*॥ सेनाया मुखमुपक्रमः ॥ (१) ॥*॥ गुडति, गुड्यते, वा । 'गुड रक्षायाम्' (तु० प० से०) । बाहुलकान्मः । डलयोरैक्यम् । **'गुल्मः** सेनाघट्टभिदोः सेनारक्षणरुग्भिदोः । स्तम्बेऽस्त्रियामामलक्येलावल्ली वस्त्रवेश्मसु' (इति मेदिनी) ॥ (१) ॥*॥ गण्यते । गणयति वा । 'गण संख्याने' (चु० उ० से०) । घञ् (३।३।१९) । अच् (३।१।१३४) वा । **'गणः** प्रथमसंख्यौघे चण्डीसैन्यप्रभेदयोः' (इति मेदिनी) ॥ (१)॥*॥ एकैकं **'सेनाविशेषस्य'** ॥

दशानीकिन्योऽक्षौहिणी

देति ॥ दशानीकिन्योऽक्षौहिणी । ऊहः समूहोऽस्त्यस्याः । इनिः (५।२।११५) । अक्षाणामूहिनी । 'पूर्वपदात्–' (८।४।३) इति णत्वम् । 'अक्षादूहिन्याम्' (वा० ६।१।८९) इति वृद्धिः । यत्तु—सर्वेषामक्षाणामिन्द्रियाणामूहः सविकल्पकं ज्ञानमक्षोहः । सोऽस्त्यस्याः इनिः । (५।२।११५) 'अकृतव्यूहाः–' इति परिभाषया गुणं बाधित्वा वृद्धिः (वा० ६।१।८९)—इति मुकुटेनोक्तम् । तन्न । ऊहिनीशब्देन विग्रहे वृद्धेश्चरितार्थत्वात् । 'अपवादोऽप्यन्यत्र चरितार्थश्चेत्तदाऽन्तरङ्गेण बाध्यते' । तथा 'सर्व इह' इत्यत्रापवादोऽपि सवर्णदीर्घो गुणेन बाध्यते । 'अक्षौहिण्यामित्यधिकैः सप्तत्या त्र्यष्टभिः शतैः । संख्या युक्ता सहस्राणि गजानामेकविंशतिः । एवमेव रथानां तु संख्यानं कीर्तितं बुधैः । पञ्चषष्टिः सहस्राणि षट्

१—तत्तत्सेनाविशेषे गजादीनां निर्णयाय चक्रमिदम् ॥

सेना	पत्तिः	सेनामुखम्	गुल्मः	गणः	वाहिनी	पृतना	चमूः	अनीकिनी	अक्षौहिणी
गजाः, रथाः	१	३	९	२७	८१	२४३	७२९	२१८७	२१८७०
अश्वाः.....	३	९	२७	८१	२४३	७२९	२१८७	६५६१	६५६१०
पदातयः.....	५	१५	४५	१३५	४०५	१२२५	३६४५	१०९३५	१०९३५०

शतानि दशैव तु । संख्यातास्तुरगास्तज्ज्ञैर्विना रथतुरंगमैः । नृणां शतसहस्रं तु सहस्राणि नवैव तु । शतानि त्रीणि चान्यानि पञ्चाशच्च पदातयः' ॥ (१) ॥*॥ एकम् **'अक्षौहिण्याः'** ॥

अथ संपदि ॥ ८१ ॥

संपत्तिः श्रीश्च लक्ष्मीश्च

अथेति ॥ संपदनम् अनया वा । 'पद गतौ' (दि० आ० अ०) । संपदादित्वात् (वा० ३।३।१०८) क्विप् ॥ (१) ॥*॥ 'स्त्रियां क्तिन्' (३।३।९४) ।—'संपत्तिसाकल्यान्तवचनेषु' (२।१।६) इति निर्देशात् स्वयधिकारेऽपि 'वासरूप–' (३।१।९४) न्यायः क्वचित्प्रवर्तते ॥ (२) ॥*॥ श्रीयते सर्वैः । 'श्रिञ् सेवायाम्' (भ्वा० उ० से०) । 'क्विब्वचि–' (उ० २-५७) इत्युणादिसूत्रेण क्विप् । **श्रीर्वेषरचना शोभा भारतीसरलद्रुमे** । लक्ष्म्यां त्रिवर्गसंपत्तौ वेषोपकरणे मतौ' (इति विश्वमेदिन्यौ) ॥ (३) ॥*॥ लक्ष्यते । 'लक्ष दर्शने' (चु० प० से०) । 'लक्षेर्मुट् च' (उ० ३।१६०) इतीप्रत्ययः । **'लक्ष्मीः** श्रीशोभासंपत्प्रियंगुषु' धनोत्कर्षस्य इति हेमचन्द्रः ॥ (४) ॥*॥ चत्वारि **'धनोत्कर्षस्य'** ॥

विपत्तौ विपदापदौ ।

वीति ॥ विपदनम् । अनया वा । संपदादि क्विप् (वा० ३।३।१०८) ॥ (१) ॥*॥ क्तिन् (३।३।९४) ॥ (२) ॥*॥ एवमापत् । **आपत्तिः** ॥ (३) ॥*॥ त्रीणि **'आपदः'** ॥

आयुधं तु प्रहरणं शस्त्रमस्त्रम्

आयुधमिति ॥ आयुध्यन्तेऽनेन । 'युध संप्रहारे' (दि० आ० अ०) । 'घञर्थे कविधानम्, स्थाल्लापाहनियुध्यर्थम्' (वा० ३।३।५८) ॥ (१) ॥*॥ प्रहियतेऽनेन । 'करणा–' (३।३।११७) इति ल्युट् ॥ (२) ॥*॥ शस्यतेऽनेन । 'शसु हिंसायाम्' (भ्वा० प० से०) । 'दात्रीशस–' (३।२।१८२) इति ष्ट्रन् ॥ (३) ॥*॥ अस्यते । 'असु क्षेपणे' (दि० प० से०) असति वा । 'अस दीप्तौ' (भ्वा० उ० से०) ष्ट्रन् (उ० ४।१४९) ॥ (४) ॥*॥ चत्वारि **'प्रहरणमात्रस्य'** ॥

अथास्त्रियौ ॥ ८२ ॥

धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम् । इष्वासोऽपि

अथेति ॥ धनति । 'धन शब्दे' (भ्वा०) । 'अर्तिपॄवपि–' (उ० ४।११७) इत्युसू । **'धनुः** पियाले ना न स्त्री राशिभेदे शरासने । धनुर्धरे त्रिषु' (इति सान्तेषु मेदिनी) ॥*॥ 'भृमृशी–' (उ० १।७) इत्युप्रत्यये उदन्तोऽपि । (**'धनुः** पुमान् पियालद्रौ राशिभेदे शरासने' इति नान्तेषु मेदिनी) ॥*॥ ('कृषिचमितनिधनि–' (उ० १।८०) इत्यूप्रत्ययान्तः) स्त्रियामपि । (**स्थावरं** तु धनुर्गुणी) । **'शरावापो धनूः** स्त्री स्यात् (**तृणता त्रिणतापि च**)' इति त्रिकाण्डशेषात् ॥ (१) ॥*॥ चपस्य वंशभेदस्य विकारः । 'अवयवे च प्राण्यौषधि–' (४।३।१३५) इत्यण् ॥ (२) ॥*॥ धन्वति । 'धवि गतौ' (भ्वा० प० से०) 'कनिन् युवृषि–' (उ० १।१५६) इति कनिन् । **'धन्वा** तु मरुदेशे ना क्लीबं चापे स्थलेऽपि च' (इति मेदिनी) ॥ (३) ॥*॥ शरा अस्यन्तेऽनेन । 'असु क्षेपणे' (दि० प० अ०) । 'करणा–' (३।३।११७) ॥ (४) ॥*॥ कोटति । 'कुट अनृतभाषणे' ( ) । बाहुलकादण्डन् । पृषोदरादिः (६।३।१०९) । कौति । विच् (३।२।७५) कौर्दण्डो वंशोऽस्य वा । **'कोदण्डं** कार्मुके देशभेदभूतलयोरपि' इति हेमचन्द्रः ॥ (५) ॥*॥ कर्मणे प्रभवति । 'कर्मण उकञ्' (५।१।१०३) । 'अथ **कार्मुकः** । वंशे **कार्मुक**मिष्वासे कर्मठे' इति हैमः ॥ (६) ॥*॥ इषवो बाणा अस्यन्तेऽनेन । 'हलश्च' (३।३।१२१) इति घञ् । **'इष्वासो** धन्वधन्विनोः' इति हैमः ॥ (७) ॥*॥ सप्त **'धनुषः'** ॥

अथ कर्णस्य कालपृष्ठं शरासनम् ॥ ८३ ॥

अथेति ॥ कालो यम इव पृष्ठमस्य । कालवर्णं वा पृष्ठमस्य । **'कालपृष्ठं** कर्णचापे पुंसि कङ्कविहंगमे' (इति मेदिनी) ॥*॥ **'कालपृष्ठं** तु कोदण्डमात्रके कर्णधन्वनि । **कालपृष्ठो** मृगभेदे कङ्के' इति हैमः ॥ (१) ॥*॥ एकं **'कर्णधनुषः'** ॥

कपिध्वजस्य गाण्डीवगाण्डिवौ पुंनपुंसकौ ।

केति ॥ कपिर्हनुमान् ध्वजो ध्वजे वा यस्य ॥*॥ गाण्डिर्ग्रन्थिरस्यास्ति । 'कृदिकारात्' (ग० ४।१।४५) इति वा ङीष् । 'गाण्ड्यजगात्–' (५।२।११०) इति वः । अत्र संहितया ह्रस्वदीर्घयोर्ग्रहः । 'जिष्णोर्धनुषि कोदण्डे **गाण्डीवं गाण्डिवं** तथा' इति शाश्वतः । कोदण्डे धनुर्मात्रेऽपि ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'अर्जुनधनुषः'** ॥

कोटिरस्याटनी

कविति ॥ कोटयते । अनया वा । 'कुट प्रतापने' चुरादिः । 'अच इः' (उ० ४।१३९) । **'कोटिः** स्त्रीधनुषोऽग्रेऽश्रौ संख्याभेदप्रकर्षयोः' (इति मेदिनी) ॥ (१) ॥*॥ अटति गुणोऽत्र । 'अट गतौ' (भ्वा० प० से०) । बाहुलकादनिः । वा ङीष् (ग० ४।१।४५) ॥ (२) ॥*॥ द्वे **'धनुषोऽन्त्यस्य'** ॥

गोधे तले ज्याघातवारणे ॥ ८४ ॥

गविति ॥ गुध्येते बाहुभ्याम् । 'गुध परिवेष्टने' (दि० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । 'गोधा तलनिह्नाकयोः' (इति मेदिनी) ॥ (१) ॥*॥ तलति । 'तल प्रतिष्ठायाम्' (भ्वा० प० से०) । अच् (३।१।१३४) । **'तलश्चपेटे तालद्रौ तलं** ज्याघातवारणे । त्सरौ स्वभावाधरयोस्तन्त्रीघाते च सन्यतः । **तलं** स्वरूपेऽनूर्ध्वेऽस्त्री क्लीबं

ज्याघातवारणे' (इति मेदिनी) ॥ (२) ॥*॥ व्यक्तिद्वयाद्बित्वम् ॥ द्वे **'ज्याया गुणस्याघातस्य वारणे'** ॥

लस्तकस्तु धनुर्मध्यम्

लेति ॥ लस्यते स्म । 'लस श्लेषणक्रीडनयोः' (भ्वा० प० से०) । कर्मणि क्तः (३।२।१०२) । आगमशास्त्रस्यानित्यत्वान्नेट् । स्वार्थे कन् (५।४।३८) ॥ (१) ॥*॥ धनुषो मध्यम् ॥ (२) ॥*॥ द्वे **'धनुर्मध्यभागस्य'** ॥

मौर्वी ज्या शिञ्जिनी गुणः ।

मौर्वीति ॥ मूर्वाया विकारः । 'अवयवे च प्राण्योषधि–' (४।३।१३५) इत्यण् ॥ (१) ॥*॥ जिनाति । 'ज्या वयोहानौ' (क्र्या० प० अ०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः ॥ (२) ॥*॥ शिञ्जे । 'शिजि अव्यक्ते शब्दे' (अ० आ० से०) । आवश्यके णिनिः (३।३।१७०) ॥ (३) ॥*॥ गुण्यते । 'गुण आमन्त्रणे' (चु० उ० से०) । घञ् (३।३।१९) । अच् वा । (३।३।५६) । **'गुणो** ज्यासूत्रतन्तुषु । रज्जौ सत्वादौ संध्यादौ शौर्यादौ भीम इन्द्रिये । रूपादावप्रधाने च दोषान्यस्मिन् विशेषणे' इति हैमः ॥ (४) ॥*॥ चत्वारि **'धनुर्गुणस्य'** ॥

स्यात्प्रत्यालीढमालीढमित्यादि स्थानपञ्चकम् ॥८५॥

स्येति ॥ प्रत्यालेहनम् । 'लिह आस्वादने' (अ० उ० अ०) । 'नपुंसके भावे क्तः' (३।३।११३) । **'प्रत्यालीढं** तु चरणन्यासभेदेऽशिते त्रिषु' (इति मेदिनी) ॥ (१) ॥*॥ एवमालीढम् । **'आलीढं** पादन्यासे शिते त्रिषु' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ तत्र 'ऊर्ध्वस्थस्य वामपादप्रसारे दक्षिणपादसंकोचे आद्यम् । विपर्ययेऽन्त्यम् ॥*॥ आदिना **समपद** (३) **विशाख** (४) **मण्डल** (५) ग्रहः । वितस्त्यन्तरेण स्थिते पादद्वये विशाखः [1]रभसस्त्वाह—'वैष्णवं समपादं च वैशाखं मण्डलं तथा । प्रत्यालीढमथालीढं स्थानान्येतानि षड् नृणाम्' इति ॥*॥ पञ्च **'धन्विनां स्थानभेदानाम्'** ॥

लक्ष्मं लक्ष्यं शरव्यं च

लेति ॥ लक्ष्यते । 'लक्ष आलोचने' (चु० आ० से०) । घञ् (३।३।१९) । **'लक्ष्मं** व्याजशरव्ययोः (संख्यायामपि)' (इति हैमः) ॥ (१) ॥*॥ 'अचो यत्' (३।१।९७) ॥ (२) ॥*॥ शरवे हिंसाय हितम् । 'उगवादिभ्यो यत्' (५।१।२) यद्वा शरान् व्ययति । 'व्येञ् संवरणे' (भ्वा० उ० अ०) 'संप्रसारणिभ्यो डः' (वा० ३।२।३) ।—'आतः–' (३।२।३) इति कः । संप्रसारणम् (६।१।१५) । यणि (६।४।८२) च—इति मुकुटः ॥ (३) ॥*॥ त्रीणि **'वेधस्य' 'वेझा(निसाणा)'** इति ख्यातस्य ॥

१—भरत इत्यपि पाठान्तरम् ।

शराभ्यास उपासनम् ।

शेति ॥ शरमोक्षस्याभ्यासः ॥ (१) ॥*॥ उपपूर्वः 'असु क्षेपणे' (दि० प० से०) । 'आस उपवेशने' (अ० आ० से०) वा । भावे ल्युट् (३।३।११५) **'उपासन**मासने । शुश्रूषायां शराभ्यासेऽपि' इति हैमः ॥ (२) ॥*॥ द्वे **'शरक्षेपाभ्यासस्य'** ॥

पृषत्कबाणविशिखा अजिह्मगखगाशुगाः ॥ ८६ ॥
कलम्बमार्गणशराः पत्री रोप इषुर्द्वयोः ।

प्रिति ॥ पर्षति । 'पृषु सेचने' (भ्वा० प० से०) 'लटः शतृ' (३।२।१२४) संज्ञापूर्वकत्वान्न गुणः । यद्वा 'वर्तमाने पृषत्बृहन्महत्–' (उ० २।८४) इति साधुः । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (१) ॥*॥ वणनम् । 'वण शब्दे' (भ्वा० प० से०) । घञ् (३।३।१८) । बाणः शब्दोऽस्त्यस्य । अर्शआद्यच् (५।२।१२७) । **'बाणः** स्याद्दोस्तने दैत्यभेदे केवलकाण्डयोः । बाणा तु बाणमूले स्त्री नीलझिण्ट्यां पुनर्द्वयोः' (इति मेदिनी) ॥ (२) ॥*॥ विशिष्टा शिखाग्रमस्य । **'विशिखा** खनित्रिकायां रथ्यायां **विशिखः** शरे' (इति हैमः) ॥ (३) ॥*॥ जिह्मस्याभावः । अजिह्ममृजु गच्छति । 'अन्येष्वपि' (वा० ३।२।४८) इति डः ॥ (४) ॥*॥ खं गच्छति । 'अन्येष्वपि–' (वा० ३।२।४८) इति डः । **'खगोऽर्कग्रहपक्षिषु** । शरे देवेऽपि' इति हैमः ॥ (५) ॥*॥ आशु गच्छति । 'अन्येष्वपि' (वा० ३।२।४८) इति डः । **'आशुगोऽर्के** शरे वायौ' इति हेमचन्द्रः ॥ (६) ॥*॥ कल्यते । 'कल क्षेपे' (चु० प० से०) । कॄकदिकलिकडिभ्योऽम्बच्' (उ० ४।८२) । **'कलम्बी** शाकभेदेऽपि कदम्बशरयोः पुमान्' (इति मेदिनी) ॥ (७) ॥*॥ मार्गयति । 'मार्ग अन्वेषणे' (चु० उ० से०) । ल्युः (३।१।१३४) । मार्ग्यते वा । 'कृत्यल्युटः' (३।३।११३) इति ल्युट् । **'मार्गणं** याचनेऽन्वेषे **मार्गणस्तु** शरेऽर्थिनि' इति हैमः ॥ (८) ॥*॥ शृणाति । अनेन वा । 'शॄ हिंसायाम्' (क्र्या० प० से०) । 'ऋदोरप्' (३।३।५७) वा । **'शर**स्तु तेजने बाणे दर्भ्यग्रे ना **शरं** जले' इति विश्वमेदिन्यौ ॥*॥ दन्त्यादिपाठे तु सरति । 'सॄ गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) । '(बाणः स्यादस्त्रकण्टकः । **स्थूलक्ष्वेडो विपाटश्च**) **चित्रपुङ्खः** शरः **सरः** । (**पत्रवाहो विकर्षः**)' इति त्रिकाण्डशेषात् ॥ (९) ॥*॥ पत्राणि पक्षाः सन्त्यस्य । इनिः (५।२।११५) । **'पत्री** काण्डे खगे द्रुमे ।

१—पृषन् असृजा सिञ्चन् कषति हिनस्ति । 'अन्येभ्योऽपि' (वा० ३।२।१०२) इति डः—इति मुकुटः ॥ २—सिद्धान्तकौमुद्यादिलिखितकल्यघटितपाठे तु कीर्यते । 'कॄ विक्षेपे' रलयोरेकत्वम् ॥

रथेऽद्रौ रथिके श्येने' इति हेमचन्द्रः ॥ (१०) ॥*॥ रोप्यते अनेन वा । 'रुपु विमोहने' (दि० प० से०) ण्यन्तः । घञ् (३।३।१९) । यद्वा रुप्यतेऽनेन । 'हलश्च' (३।३।१२१) इति घञ् । **'रोपो** रोपणबाणयोः' इति विश्वः ॥ (११) ॥*॥ ईष्यतेऽनेन । 'ईष गतिहिंसादर्शनेषु' (भ्वा० आ० से०) । 'ईषेः किच्च' (उ० १।१३) इत्युः, आदेरिच्च ॥ (१२) ॥*॥ द्वादश **'बाणस्य'** ॥

प्रक्ष्वेडनास्तु नाराचाः

प्रेति ॥ प्रकर्षेण क्ष्वेदन्ते । 'ञिक्ष्विदा अव्यक्ते शब्दे' (भ्वा० आ० से०) । ल्युः (३।१।१३४) । पृषोदरादिः (६।३।१०९) ॥ (१) ॥*॥ नरानाचामन्ति । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः । प्रज्ञाद्यण् (५।४।३८) । यद्वा नराणां समूहो नारम् । नारमाचामति । डः (वा० ३।२।१०१) ॥ (२) ॥*॥ द्वे **'सर्वलोहमयस्य शरस्य'** ॥

पक्षो वाजः

पेति ॥ पक्षति । पक्षतेऽनेन वा । 'पक्ष परिग्रहे' (भ्वा० प० से०) । अच् (३।१।१३४) । घञ् (३।३।१९) वा ॥ (१) ॥*॥ वजत्यनेन । 'वज गतौ' (भ्वा० प० से०) । 'हलश्च' (३।३।१२१) । निष्ठायां सेट्त्वान्न कुत्वम् । वाजयति वा ण्यन्तः । पचाद्यच् (३।१।१३४) ।– न्यङ्क्वादित्वात् (७।३।५३) अकुत्वम्—इति मुकुटश्चिन्त्यः । (**'वाजो** निस्वनपक्षयोः । वेगे पुमानथ क्लीबे घृतयज्ञान्नवारिषु' इति मेदिनी) ॥ (२) ॥*॥ द्वे **'शरपक्षस्य'** ॥

त्रिषूत्तरे ॥ ८७ ॥

त्रीति ॥ वक्ष्यमाणा लिप्तकान्ताः ॥

निरस्तः प्रहिते बाणे

नीति ॥ निरस्यते स्म । 'असु क्षेपणे' (दि० प० से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ एकं **'प्रक्षिप्तबाणस्य'** ॥

विषाक्ते दिग्धलिप्तकौ ।

वीति ॥ दिह्यते स्म । 'दिह उपचये' (अ० उ० अ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ लिप्यते स्म । 'लिप उपदेहे' (तु० उ० अ०) । क्तः (३।२।१०२) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ द्वे **'विषसंबद्धबाणस्य'** ॥

तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः ॥ ८८ ॥

तूण्याम्

त्विति ॥ तूणयति । 'तूण संकोचे' (चु० आ० से०) । पचाद्यच् (३।१।१३४) । तूण्यते शरैः । घञ् (३।३।१९) वा ॥*॥ तूणा च । 'स्त्रियां **तूणे**षुधी उपासङ्गः' इति रत्नकोषः ॥ (१) ॥*॥ गौरादित्वात् (४।१।४१) ङीषपि । (**'तूणी** नील्यां निषङ्गे वा ना' (इति मेदिनी) । **'तूणी** तु नील्यां **तूणो** निषङ्गके' इति विश्वः) ॥ (६) ॥*॥ एवं निषङ्गः । 'उपसर्गात्–' (८।३।६५) इति षत्वम् ॥ (४) ॥*॥ उपासज्यन्तेऽत्र शराः । 'षञ्ज सङ्गे' (भ्वा० प० अ०) 'हलश्च' (३।३।१२१) इति घञ् ॥ (२) ॥*॥ तूर्णी तूणत्वमीर्ते । 'ईर गतौ' (अ० आ० से०) । 'कर्मण्यण्' (३।२।१) । यद्वा तूर्णी शरैः संकोचं राति । 'रा दाने आदाने च' (अ० प० अ०) । 'आतोऽनुप'–(३।२।३) इति कः ॥ (३) ॥*॥ इषवो धीयन्तेऽत्र । 'डुधाञ्' (जु० उ० अ०) । कर्मण्यधिकरणे च (३।३।९३) इति किः ॥ (५) ॥*॥ षट् **'शराधारस्य'** ॥

खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः ।
कौक्षेयको मण्डलाग्रः करपालः कृपाणवत् ॥ ८९ ॥

खेति ॥ खण्डति परम् । खण्ड्यतेऽनेन वा । 'खडि भेदने' 'छापूखडिभ्यः कित्' (उ० १।२४) इति गन् । आगमशास्त्रस्यानित्यत्वान्न नुम् । **'खड्गो** गण्डकशृङ्गासिबुद्धभेदेषु गण्डके' (इति विश्वमेदिन्यौ) ॥ (१) ॥*॥ निर्गतस्त्रिंशतोऽङ्गुलिभ्यः । 'निरादयः क्रान्ता–' (वा० २।२।१८) इति समासः । 'संख्यायास्तत्पुरुषस्य' (वा० ५।४।७३) इति डच् ।—'बहुव्रीहौ संख्येये–' (५।४।७३) इति डच्—इति मुकुटश्चिन्त्यः । बहुव्रीहेरभावात् । **'निस्त्रिंशो** निर्घृणे खड्गे' इति हैमः ॥ (२) ॥*॥ चन्द्र इव हासः प्रभास्य । चन्द्रं हसिति वा । द्युतिमत्त्वात् । 'हसे हसने' (भ्वा० प० से०) । **'चन्द्रहासो**ऽसिमात्रके । दशग्रीवकृपाणे च, कैनीयसि च गुग्गुलौ' (इति हैमः) ॥ (३) ॥*॥ अस्यते । 'असु क्षेपणे' (दि० प० से०) । असति । 'अस दीप्तौ' (भ्वा० उ० से०) । 'सर्वधातुभ्य इन्' (उ० ४।११८) ।—बाहुलकादिः—इति मुकुटश्चिन्त्यः । **'असिः** खड्गे नदीभिदि' इति हैमः ॥ (४) ॥*॥ रेषति । 'रिषु हिंसायाम्' (भ्वा० प० से०) । रिशति वा । 'रिश हिंसायाम् ।' (तु० प० अ) । क्तिच् (३।३।१७४) । **'रिष्टिः** खड्गे ना शुभे स्त्री (इति मेदिनी) ॥*॥ अजादिरिति स्वाम्यादिः । ऋषति । 'ऋषी गतौ' (तु०प०ते०) । क्तिच् (३।३।१७४) । **'करवालमण्डलाग्रकालेयकासिरिष्टयः । ऋष्टिः खड्गस्तरवारिकौक्षेयकौ च नन्दकः'** इति रभसः ॥ (५) ॥*॥ कुक्षौ भवः 'कलकुक्षिग्रीवाभ्यः–' (४।२।९६) इति ढकञ् ॥ (६) ॥*॥ मण्डलमग्रमस्य ॥ (७) ॥*॥ करं पालयति । 'पाल रक्षणे' (चु० प० से०) । 'कर्मण्यण्' (३।२।१) ॥*॥ 'करवालः' इति पाठान्तरम् । करं वलति । 'वल प्राणने' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) । करेण वलति वा ज्वलादिणः (३।१।१४०) । यद्वा वलनम् वालः । 'वल वेष्टने' (भ्वा० आ० से०) । घञ् (३।३।१८) । करे वालो यस्य । करेण वल्यते वा कर्मणि घञ् (३।३।१९) ॥ (८) ॥*॥ कृपां नुदति । 'नुद

१—इदं विश्वहैममेदिनीषु तु चन्द्रहासस्यैतदर्थकत्वं न लभ्यते, इति प्रमादजातम् ॥ २—'शिलाशूलष्टिमुद्गरम्' इति भट्टिश्च—इति मुकुटः । ३—'करपालकः पालकः' इति यमकम्—इति मुकुटः ॥

प्रेरणे' (तु० उ० अ०) । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः । 'पूर्वपदात्–' (८।४।३) इति णत्वम् ॥ (९) ॥*॥ नव **'खड्गस्य'** ॥

त्सरुः खड्गादिमुष्टौ स्यात्

त्सरुरिति ॥ त्सरति । 'त्सर छद्मगतौ' (भ्वा० प० से०) 'भृमृशी–' (उ० १।७) इत्युः ॥ (१) ॥*॥ आदिना कटितलच्छुरिकादिग्रहः ॥*॥ एकम् **'खड्गाद्यायुधमुष्टीनाम्'** ॥

मेखला तन्निबन्धनम् ।

मयिति ॥ मां लक्ष्मीमीखति । मा ईखति वा । माशब्दो निषेधे । 'ईख गतौ' (भ्वा० प० से०) । बाहुलकात्कलच् । यद्वा मां ईं लक्ष्मीं खलति । 'खल संचलने संचये च' (भ्वा० प० से०) । मूलविभुजादिकः (वा० ३।२।५) । अणि वृद्धिः स्यात् ।—मिखेः 'कम्बलादयश्च' इति कलप्रत्ययो गुणश्च निपात्यते—इति मुकुटश्चिन्त्यः । उज्ज्वलदत्तादिधृक्तसूत्रादर्शनात् । **'मेखला** खड्गबन्धे स्यात्काञ्ची शैलनितम्बयोः' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'खड्गादेश्चर्मादिनिर्मितकटिबन्धनस्य'** । युद्धे हस्तात्पतनवारणाय मणिबन्धे प्रधियमाणस्य चर्मादेर्वा ॥

फलकोऽस्त्री फलं चर्म

फेति ॥ फलति । 'ञिफला विशरणे' 'फल निष्पत्तौ' (भ्वा० प० से०) । 'कृत्रादिभ्यो वुन्–' (उ०५।३५) ॥ (१) ॥*॥ अच् (३।१।१३४) । **'फलं** हेतुकृते जातीफले फलकसस्ययोः । त्रिफलायां च कक्कोले शस्त्राग्रे व्युष्टिलाभयोः' (इति) (मेदिनी) ॥ (२) ॥*॥ चरति । चर्यते वा । अनेन वा । मनिन् (उ० ४।१४५) । **'चर्म** कृत्तौ च फलके' इति विश्वः (३) ॥*॥ त्रीणि **'चर्मणः' 'फरि'** इति ख्यातस्य ॥

संग्राहो मुष्टिरस्य यः ॥ ९० ॥

समिति ॥ संगृह्यते । 'ग्रह उपादाने' (क्र्या० उ० से०) । 'समि मुष्टौ' (३।३।३६) इति कर्मणि घञ् ॥ (१) ॥*॥ अस्य फलस्य ॥*॥ एकम् **'मुष्टेः'** ॥

द्रुघणे मुद्गरघनौ

द्रुरिति ॥ द्रुर्वृक्षो हन्यतेऽनेन । 'करणेऽयोविद्रुषु' (३।३।८२) इत्यप्, घनादेशश्च । 'पूर्वपदात्–' (८।४।३) इति णत्वम् । **'द्रुघणो** मुद्गरेऽपि स्याद्बृहिणे च परश्वधे' इति विश्वमेदिन्यौ ॥*॥ केचित्तु—क्षुभ्नादित्वात् (८।४।३९) न (णत्वम्) **'द्रुघनः'**—इत्याहुः ॥ (१) ॥*॥ गिरति । 'गॄ निगरणे' (तु० प० से०) अच् (३।१।१३४) । मुंदो गरः ॥ (२) ॥*॥ हन्यतेऽनेन । 'मूर्तौ घनः' (३।३।८१) इत्यङ्घनादेशौ । **'घनः** सान्द्रे दृढे दार्ढ्ये विस्तारे मुद्गरेऽम्बुदे । संघे मुस्ते **घनं** मध्यनृत्यवाद्यप्रकारयोः' इति हैमः ॥ (३) ॥*॥ त्रीणि **'मुद्गरस्य' 'गुर्जा'** इति ख्यातस्य ॥

स्यादीली करवालिका ।

स्येति ॥ ईर्ते । ईर्यते वा । 'ईर गतौ' (अ० आ० से०) । 'इगुपधात् कित्' (उ० ४।१२९) इति इन् । 'कृदिकारात्' (उ० ४।१।४५) इति ङीष् वा । कपिलिकादिः (वा० ८।२।१८) ईड्यते वा । 'ईड स्तुतौ' (अ०आ०से०) । डलयोरेकत्वम् ।–'इगुपधात्किः'-इति मुकटस्त्वपाणिनीयः । 'इगुपधात् कित्' इति सूत्रपाठात् । तत्रेनोऽनुवर्तनात् ॥*॥ **('इलि'** इति) ह्वखादिपाठे तु 'इल गतौ क्षेपे च' । (तु० प० चु० से०) इति धातुर्बोध्यः ॥ (१) ॥*॥ करं पालयति । 'पाल रक्षणे' (चु० प० से०) । अण् (३।२।१) ङीप् (४।१।१५) कन् (ज्ञापि० ५।४।५) ॥*॥ **'कारवालिका'** इति पाठे तु करं वलते 'वल हिंसादानयोः' (भ्वा० आ० से०) । अण् (३।२।१) करेण वाल्यते वा । णिजन्तात् 'अच इः' (उ० ४।१३९) । कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ द्वे **'तरवार'** इति ख्यातस्य ।–**'गुप्ती'** इति ख्यातस्य—इत्यन्ये ॥

भिन्दिपालः स्रुगस्तुल्यौ

भीति ॥ भिन्दति । 'भिदि अवयवे' (भ्वा० प० से०) इन् (उ० ४।११८) । 'भिन्दिर्द्वादशतालं तु दशकुन्तोऽभिधीयते' इति भरतः । तदवच्छिन्नः कालोऽपि भिन्दिः । भिन्दिं पालयति । अण् (३।२।१) ॥ (१) ॥*॥ सरति । 'सृ गतौ' (भ्वा० प० अ०) । बाहुलकाद्रुक् ॥ (२) ॥*॥ द्वे **'अश्मप्रक्षेपसाधनस्य' 'गोफण'** इति ख्यातस्य ।—नालिकास्त्रस्य—इत्यन्ये ॥

परिघः परिघातनः ॥ ९१ ॥

पेति ॥ परितो हन्यतेऽनेन । 'परौ घः' (३।३।१४) इति साधुः । **'परिघोऽस्त्रे** योगभेदे परिघातेऽर्गलेऽपि च' इति हैमः ॥ (१) ॥*॥ परितो घातयत्यनेन । ल्युट् (३।३।११७) ॥ (२) ॥*॥ द्वे **'लोहबद्धस्य लगुडभेदस्य'** ॥ **'लोहाङ्गी'** इति ख्यातस्य ॥

द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः ।

द्वेति ॥ कुठे गतिप्रतिघाते आरो गतिरस्य । जातित्वात् (४।१।६३) ङीष् । कुटं वृक्षमृच्छति वा । 'ऋ गतौ' (भ्वा० प० अ०) अण् (३।२।१) ॥ (१) ॥*॥ स्वं धियति । 'धि धारणे' (तु० प० अ०) । क्तिच् (३।३।१७४) ॥ (२) ॥*॥ परं शृणाति । 'शॄ हिंसायाम्' (क्र्या० व० से०) । 'आङ्परयोः खनिशॄभ्यां डिच्च' (उ० १।३३) इति कुः ॥ (३) ॥*॥ परस्य श्वयनम् । 'टु ओ श्वि गतिवृद्ध्योः' (भ्वा० प० से) । 'अन्येभ्योऽपि' (वा० ३।२।१०२) इति डः । परश्वं धयति । 'अतोऽनुप–' (३।२।३) इति कः ॥*॥ **('पर्श्वधः')** अपि । यदाह–'यष्टिपर्श्वधहेतिकौ' इति—इति स्वामी ॥*॥ 'परस्वधः' इति पाठे तु परस्य स्वं दधाति । काष्ठदण्डधारकत्वात् । कुठारः स्त्री च स्वधितिः परशुश्च

परश्वधः । कुटाटङ्कः पर्शुः' । 'अथ छुरिका **कोशशायिका**' इति रभसः ॥ (४) ॥*॥ चत्वारि **'कुठारस्य'** ॥

स्याच्छस्त्री चासिपुत्री च छुरिका चासिधेनुका९२

स्येति ॥ शस्यतेऽनया । 'शसु हिंसायाम्' (भ्वा० प० से०) । 'दात्रीशस–' (३।२।१८२) इति ष्ट्रन् । ङीष् (४।१।४१) । **'शस्त्र**मायुधे । लोहे **शस्त्री** छुरिकायाम्' इति हैमः ॥ (१) ॥*॥ असेः पुत्री ॥ (२) ॥*॥ छुरति । 'छुर छेदने' (तु० प० से०) । कुन् (उ० २।३५) । 'इगुपध–' (३।२।१३५) इति के कन् (ज्ञापि० ५।४।५) वा ॥ (३) ॥*॥ असेर्धेनुरिव ॥ (४) ॥*॥ चत्वारि **'छुरिकायाः'** ॥

वा पुंसि शल्यं शङ्कुर्ना

वेति ॥ शलति । 'शल गतौ' (भ्वा० प० से०) । 'अम्यादित्वात् (उ० ४।११२) यः । **'शल्यं** तु न स्त्रियां शङ्कौ क्लीबं क्ष्वेडेषु तोमरे । मदनद्रुश्वाविधोर्ना' इति मेदिनी ॥ (१) ॥*॥ शङ्कतेऽस्मात् । 'शकि शङ्कायाम्' (भ्वा० आ० से०) । 'खरुशङ्कुपीयु–' (उ० १।३६) इति साधुः । **'शङ्कुः** पत्रशिराजाले संख्याकीलकशम्भुषु । यादोऽस्त्रभेदयोर्मेढ्रे' इति हैमः । 'संख्याकीलकयोः **शङ्कुः शङ्कुः** प्रहरणान्तरे' इति शाश्वतः ॥ (२) ॥*॥ द्वे **'बाणाग्रस्य' 'बर्ची'** इति ख्यातस्य ।—**'शेल'** इति ख्यातस्य इत्यन्ये ॥

शर्वेला तोमरोऽस्त्रियाम्।

शेति ॥ शर्वति । 'शर्व गतौ' (भ्वा० प० से०) । तालव्यादिः (पवर्गीयान्तः) वृषादित्वात् (उ० १।१०६) कलच् । 'शार्दूलशर्वेलाशलाटुः' इति शभेदः ॥*॥ स्वामी तु—'सर्व लाति' इति विगृह्य (**सर्वेला**याः) दन्त्यादितामभिप्रैति ॥ (१) ॥*॥ तौति । 'तुः' सौत्रो गतौ । विच् (३।२।७५) । म्रियते । 'मृङ् प्राणत्यागे' (तु० आ० अ०) । अन्तर्भावितण्यर्थः । अच् (३।१।१३४) । तोश्चासौ मरश्च । तौर्गन्ता म्रियतेऽनेन वा । 'पुंसि–' (३।३।११८) इति घः ॥ (२) ॥*॥ द्वे **'तोमरस्य' 'गँडासा'** इति ख्यातस्य ।—**'शार्वली'** इति ख्याताया:—इत्यन्ये ॥

प्रासस्तु कुन्तः

प्रेति ॥ प्रास्यते । 'असु क्षेपणे' (दि० प० से०) । कर्मणि घञ् (३।३।१९) ॥ (१) ॥*॥ कुं शरीरमुनत्ति । 'उन्दी क्लेदने' (रु० प० से०) । बाहुलकात्तः । शकन्ध्वादिः (वा० ६।१।९४) । 'कुन्तः प्रासे चण्डभावे क्षुद्रजातौ गवेधुके । **कुन्ती** पाण्डुप्रियायां च शल्क्यां गुग्गुलद्रुमे' इति विश्वः ॥ (२) ॥*॥ द्वे **'प्रासस्य' 'भाला'** इति ख्यातस्य ॥

कोणस्तु स्त्रियः पाल्यश्रिकोटयः ॥ ९३ ॥

कविति ॥ कुणत्यनेन 'कुण शब्दे' (तु० प० से०) 'हलश्च' (३।३।१२१) इति घञ् । कर्तर्यच् (३।१।१३४) वा । **'कोणो** वाद्यप्रभेदे स्याद्वीणादीनां च वादने । एकदेशे गृहादीनामश्रौ च लगुडेऽपि च' (इति मेदिनी) ॥ (१) ॥*॥ पालयति । 'पाल रक्षणे' (चु० प० से०) । 'अच इः' (उ० ४।१३९) । मुकुटस्तु—पाति । 'ऋतन्यञ्जि–' (उ० ४।२) इत्यादिनालिः—इत्याह । तच्च । तत्र पातेः पाठाभावात् । **'पालिः** कर्णलताग्रेऽश्रौ पङ्क्तावङ्कप्रभेदयोः । छात्रादिदेये स्त्री **पाली** यूकासश्मश्रुयोषितोः' (इति मेदिनी) ॥ (२) ॥*॥ अश्नाति । 'अश भोजने' (क्र्या० प० से०) । अश्नते वा । 'अशू व्याप्तौ' (स्वा० आ० से०) । अङ्क्त्या (वङ्क्त्या) दिः (उ० ४।६६) । मुकुटस्तु—आश्रीयते प्रहारार्थम्, इति । 'आङि श्रिहनिभ्यां ह्रस्वश्च' (उ० ४।१३७) इतीण् ङिच्च । ङित्त्वात् (६।४।१४३) टिलोपः । 'आङो ह्रस्वश्च'—इत्याह । तच्च । उक्तसूत्रादर्शनात् । **'अश्रि** कोणैकदेशयोः' इति धरणिः ॥*॥ **'अस्रः** कोणे शिरसिजे' इति विश्वात् 'अस्रः' अपि ॥ (३) ॥*॥ कोटयति, कोट्यते, वा । 'कुट कौटिल्ये' (तु०प०से०) । 'अच इः' (उ० ४।१३९) । कुट्यते वा । 'इञ(ण)जादिभ्यः' (वा० ३।३।१०८) इतीञ् (ण्) । **'कोटिः** स्त्री धनुषोऽग्रेऽश्रौ सङ्ख्याभेदप्रकर्षयोः' (इति मेदिनी) ॥ (४) ॥*॥ चत्वारि **'कोणभागस्य'** ॥

सर्वाभिसारः सर्वौघः सर्वसंनहनार्थकः।

सेति ॥ सर्वेणाभिसरणम् । 'सृ गतौ' (भ्वा० प० से०) । भावे घञ् (३।३।१८) ॥ (१) ॥*॥ सर्वस्यौघः । **'सर्वौघो** गुरुवेगे च सर्वसंनहने पुमान्' (इति मेदिनी) ॥ (२) ॥*॥ सर्वेषां संनहनम् । सर्वसंनहनमर्थो यस्य ॥ (३) ॥*॥ त्रीणि **'सर्वसैन्यसंनहनस्य'** ॥

लोहाभिहारोऽस्त्रभृतां राज्ञां नीराजनाविधिः॥९४॥

लोहेति ॥ **'लोहोऽस्त्री** शस्त्रके लौहे' (इति मेदिनी) । लोहस्य शस्त्रस्याभितो हरणम् । 'हृञ् हरणे' (भ्वा०उ०अ०) । भावे घञ् (३।३।१८) । 'लोहाभिहार इत्युक्तो विधिर्नीराजनोत्तरः' इत्यमरमाला ॥*॥ **'लोहाभिसार'** इति पाठे तु 'सृ गतौ' (भ्वा० प० से०) धातुर्बोध्यः ॥ (१) ॥*॥ निःशेषेण नितरां वा राजनम् । 'राजृ दीप्तौ' (भ्वा० उ० से०) । ण्यन्तः । 'ण्यासश्रन्थ–' (३।३।१०७) इति भावे युच् । तस्याः सैव वा विधिः । 'नीराजनो विधिः' इति पाठे तु 'निःशेषेण राजनमत्र' इति बहुव्रीहिर्बोध्यः ॥*॥ **'एकं महानवम्यां प्रस्थानात्प्राक् शस्त्रवाहनादिपूजनविधेः'** ॥

यत्सेनयाभिगमनमरौ तदभिषेणनम्।

यदिति ॥ सेनयाभियानम् । 'सत्याप–' (३।१।२५) इति सेनाशब्दाण्णिच् । ल्युट् (३।३।११५) । 'उपसर्गात् सुनोति–'

१—'अथ' इत्यादि छुरिकानाम ॥

१—इदं तु सिद्धान्तकौमुद्यामपि स्पष्टमुपलभ्यमानत्वादकिंचित्करम् ॥

(८।३।६५) इति षत्वम् ॥ (१) ॥*॥ एकम् **'शत्रौ ससैन्यगमनस्य'** ॥

यात्रा व्रज्याभिनिर्याणं प्रस्थानं गमनं गमः ॥ ९५ ॥

येति ॥ यानम् । 'या प्रापणे' (अ० प० अ०) । 'हुयामाश्रमसिभ्यस्त्रन्' (उ० ४।१६८) । **'यात्रा** तु यापनेऽपि स्यादमनोत्सवयोः स्त्रियाम्' इति मेदिनी ॥ (१) ॥*॥ व्रजनम् । 'व्रज गतौ' (भ्वा० प० से०) । 'व्रजयजोः–' (३।३।९८) इति क्यप् ॥(२) ॥*॥ अभिनिर्या (३)॥*॥ प्रस्था (४) ॥*॥ गमि (५) ॥*॥ भ्यो ल्युट् (३।३।११५) ॥*॥ गमेः 'ग्रहवृद–' (३।३।५८) इत्यप् । **'गमो** नाक्षविवर्ते स्यादपर्यालोचितेऽध्वनि' (इति मेदिनी) ॥ (६) ॥*॥ षट् **'प्रस्थानमात्रस्य'** ॥

स्यादासारः प्रसरणम्

स्येति ॥ आसरणम् । 'सृ गतौ' (भ्वा० प० अ०) । घञ् (३।३।१८) । **'आसारः** स्यात्प्रसरणे वेगवृष्टौ सुहृद्बले' इति विश्वः ॥ (१) ॥*॥ प्रसरणे ल्युट् (३।३।११५) ॥*॥ **'प्रसरणी'** इति पाठे 'अर्चिसृधृ–' (उ० २।१०२) इत्यनिः । 'कृदिकारात्' (ग० ४।१।४५) इति ङीष् ॥ (२) ॥*॥ द्वे **'सर्वतोव्यापिसैन्यप्रसरणस्य'** ॥

प्रचक्रं चलितार्थकम् ।

प्रेति ॥ प्रस्थितं चक्रं सैन्यम् ॥ (१) ॥*॥ चलितशब्दस्य समानार्थकम् । 'प्रचक्रं चलितं त्रिषु' इत्यमरमाला ॥ (२) ॥*॥ द्वे **'प्रस्थितसैन्यस्य'** ॥

अहितान्प्रत्यभीतस्य रणे यानमभिक्रमः ॥ ९६ ॥

अहीति ॥ अभिक्रमणम् । 'क्रमु पादविक्षेपे' (भ्वा० प० से०) । भावे घञ् (३।३।१८) । 'नोदात्तोपदेश–' (७।३।३४) इति न वृद्धिः ॥ (१) ॥*॥ एकम् **'निर्भीकयायिनः'** ॥

वैतालिका बोधकराः

वायिति ॥ विविधेन तालेन शब्देन चरन्ति । 'चरति' (४।४।८) इति ठक् । स प्रयोजनमस्य । 'प्रयोजनम्' (५।१।१०९) इति ठक्, वा ॥ (१) ॥*॥ बोधं करोति । 'कृञो हेतु–' (३।२।२०) इति टः ॥ (२) ॥*॥ द्वे **'प्रातर्जागरणकारिणः'** ॥

चाक्रिका घाण्टिकार्थकाः ।

चेति ॥ चक्रेण समूहेन चरन्ति । 'चरति' (४।४।८) इति ठक् ॥ (१) ॥*॥ घण्टया चरन्ति । ठक् (४।४।८) ॥ (२) ॥*॥ बहवो मिलिता ये राज्ञां स्तुत्यादि पठन्ति, तेषां द्वे । क्वचित्तु **'चक्रिका घटिकार्थका'** इति पाठः । तत्र चक्रमस्ति वाद्यत्वेन यस्य । ठन् (५।२।११५) ॥ (१) ॥*॥ घटीं कायति । 'कै शब्दे' (भ्वा० प० अ०) कः (३।२।३) । 'ङ्याप्पोः–' (६।३।६३) इति ह्रस्वः ॥ (२) ॥*॥ द्वे **'बन्दिविशेषेषु'** । **'घडियारी'** इति ख्यातस्य घटिकावादकस्य ॥

स्युर्मागधास्तु मगधाः

स्युरिति ॥ मगध्यन्ति याचन्ते । 'मगध' इति याच्ञार्थः कण्ड्वादियगन्तः । अच् (३।१।१३४) । 'यस्य हलः' (६।४।४९) इति यलोपः । प्रज्ञाद्यण् (५।४।३८) वा ॥ (१) ॥*॥ मुकुटस्तु 'मधु मधुरं कायन्ति' इति विगृह्य **'मधुकाः'** इति पाठं मन्यते ॥ (२) ॥*॥ द्वे **'वंशपरम्पराशंसकानाम्'** ॥

वन्दिनः स्तुतिपाठकाः ॥ ९७ ॥

वेति ॥ वदन्ते । 'वदि अभिवादनस्तुत्योः' (भ्वा० आ० से०) । अद्यादित्वात् (३।१।१३४), 'आवश्यका–' (३।३।१७०) इति वा णिनिः ॥ (१) ॥*॥ स्तुतेः पाठकाः ॥ (२) ॥*॥ 'वन्दिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः' ॥*॥ द्वे **'राजादिस्तुतिपाठकेषु' 'भाट'** इति ख्यातस्य । ('चत्वार एकार्थाः' इत्येके—इति स्वामी) ॥

संशप्तकास्तु समयात्संग्रामादनिवर्तिनः ।

समिति ॥ संशपनम् । 'शप आक्रोशे' (भ्वा० उ० अ०) भावे क्तः (३।३।११४) संशप्तं शपथं कुर्वन्ति । 'तत्करोति' (वा० ३।१।२६) इति णिच् । ण्वुल् (३।१।१३४) । कुन् (उ० २।३५) वा । सम्यक् शप्तं सत्यं येषां ते इति वा ॥ (१) ॥*॥ समयाच्छपथाद्धेतोराचाराद्वा ॥*॥ एकम् **'शपथवशात्संग्रामादपरावर्तिनः'** ॥

रेणुर्द्वयोः स्त्रियां धूलिः पांशुर्ना न द्वयो रजः ॥९८॥

रयिति ॥ रिणाति । रीयते वा । 'री गतिश्लेषणयोः' (क्र्या० प० अ०) । 'अजिवृरीभ्यो निच्च' (उ० ३।३८) इति णुः । **'रेणुः** स्त्रीपुंसयोर्धूलौ पुंलिङ्गः पर्पटे पुनः' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ धुवति । धूयते, वा । 'धू विधूनने' (तु० प० से०) । बाहुलकाल्लिः । धवनम् । 'धूञ् कम्पने' (क्र्या० उ० से०) । संपदादिः (वा० ३।३।१०८) । धुवा लीयते । 'इकृष्यादिभ्यः' (वा० ३।३।१०८) ॥ (२) ॥*॥ पंशति 'पशि नाशने' (चु० प० से०) । 'अर्जिदृशिकम्यमि–' (उ० १।२७) इति साधुः ॥*॥ 'तालव्या अपि दन्त्याश्च शंबशूकरपांशवः' इति शमेदात् (**पांसुः**) दन्त्यान्तश्च ॥ (३) ॥*॥ रजति । 'रज रागे' (भ्वा० उ० अ०) । 'भूरञ्जिभ्यां कित्' (उ० ४।२१७) इत्यसुन् ॥ (४) ॥*॥ चत्वारि **'रजसः'** ॥

१—यच्छ्रीभोजः—'कमर्थिनः कुधुभ्यन्तु कं मगध्यन्तु मागधाः । कमिषुध्यन्तु यज्वानो रामेऽरण्यं मु(तु)रण्यति' इति–इति स्वामिमुकुटौ ॥ २—'अपांसुवसनाः सागरा इव नागराः' इति दमयन्तीश्लेषात् ।

चूर्णे क्षोदः

च्विति ॥ चूर्ण्यते । 'चूर्ण पेषणे' चुरादिः । 'एरच्' (३।३।५६) **'चूर्णानि** वासयोगाः स्युश्चूर्णो धूलिः सशर्करा' इति शाश्वतः ॥ (१) ॥*॥ क्षुद्यते । 'क्षुदिर् संपेषणे' (रु० उ० अ०) । घञ् (३।३।१८) । **'क्षोदः** पेषणचूर्णयोः' इति हैमः ॥ (२) ॥*॥ द्वे **'पिष्टस्य रजसः'** ।—षडेव रजसः—इत्येके ॥

समुत्पिञ्जपिञ्जलौ भृशमाकुले ।

सेति ॥ समुत्पिञ्ज(य)ति । 'पिजि हिंसायाम्' (चु० प० से०) । ण्यन्तः । 'एरच्' (३।३।५६) ॥ (१) ॥*॥ बाहुलकादलच् । पिञ्जं लाति वा ॥ (२) ॥*॥ द्वे **'अतिसंकुलस्य'** ॥

पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियाम् ॥९९॥

पेति ॥ पतति पत्यतेऽनया वा । 'पतॄ गतौ' (भ्वा० प० से०) । 'बलाकादयश्च' (उ० ४।१४ इत्याकः) । यत्तु—'शलिपदिपतिभ्यो नित्' (उ० ४।१४) इत्याकः—इति मुकुटः । तन्न । अपाणिनीयत्वात् । **'पताका** वैजयन्त्यां स्यात्सौभाग्यनाटकाङ्कयोः' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ विजयते । 'जि अभिभवे' (भ्वा० प० अ०) । 'तॄभूवहि–' (उ० ३।१२८) इति झच् । 'विजयन्तस्येयम्' 'तस्येदम्' (४।३।१२०) इत्यण् । **'वैजयन्तो** गृहे शक्रप्रासादध्वजयोः पुमान् । **वैजयन्ती** पताकायां जयन्तीपादपे स्त्रियाम्' (इति मेदिनी) ॥ (२) ॥*॥ केत्यते ज्ञायतेऽनेन । 'कित संशयादौ' (भ्वा० प० से०) । 'करणा–' (३।३।११७) इति ल्युट् । **'केतनं** तु निमन्त्रणे । गृहे केतौ च कृत्ये च' इति मेदिनी ॥ (३) ॥*॥ ध्वजति 'ध्वज गतौ' (भ्वा० प० से०) । अन्तर्भावितण्यर्थो वा । पचाद्यच् (३।१।१३४) । **'ध्वजः** पूर्वदिशो गृहे । शिश्ने चिह्ने पताकायां खड्गाङ्गे शौण्डिकेऽपि च' इति हैमः ॥ (४) ॥*॥ चत्वारि **'पताकायाः'** ॥

सा वीराशंसनं युद्धभूमिर्यातिभयप्रदा ।

सेति ॥ वीरा आशंस्यन्तेऽत्र । 'आङः शसि इच्छायाम्' (भ्वा० आ० से०) । ल्युट् (३।३।११५) ॥ (१) ॥*॥ एकम् **'भयंकरयुद्धभूमेः'** ॥

अहं पूर्वमहं पूर्वमित्यहंपूर्विका स्त्रियाम् ॥ १०० ॥

अहमिति ॥ अहं पूर्वम् । 'सुँप् सुपा' (२।१।४) इति समासः । स्वार्थे कन् (ज्ञापि० ५।४।५) । 'अहं पूर्वम्' इत्यस्याम् । ठन् (५।२।११५) वा ॥ (१) ॥*॥ एकं **'अहं पूर्वमहं पूर्वम्'** इति योधानां धावनक्रियायाः ॥

१—उत्पिञ्जलश्च । 'कुर्वाणमुत्पिञ्जलजातपत्रैः' इति माघः—इति मुकुटः । केचित्तु पिञ्जलमाकुलमाहुः—इति वल्लभः ॥ २—इदं च फलितसूत्रकथनम् ॥

आहोपुरुषिका दर्पाद्या स्यात्संभावनात्मनि ।

आहविति ॥ अहो अहं पुरुषः । 'सुप्सुपा' (२।१।४) इति समासः । अहोपुरुषस्य भावः । मनोज्ञादित्वात् (५।१।१३३) वुञ् ॥ (१) ॥*॥ एकम् **'आत्मनि शक्त्याविष्करणस्य'** ॥

अहमहमिका तु सा स्यात्परस्परं यो भवत्यहंकारः ॥ १०१ ॥

अहेति ॥ अहमहंशब्दोऽस्त्यत्र । वीप्सायां द्वित्वम् (८।१।२) । व्रीह्यादित्वात् (५।२।११६) ठन् । अनित्यत्वात् 'अव्ययानाम्–' (वा० ६।४।१४४) इति न टिलोपः ॥ (१) ॥*॥ एकम् **'परस्पराहंकारस्य'** ॥

द्रविणं तरः सहोबलशौर्याणि स्थाम शुष्मं च ॥ शक्तिः पराक्रमप्राणौ

द्रेति ॥ द्रवत्यनेन । 'द्रु गतौ' (भ्वा० प० अ०) । 'द्रुदक्षिभ्यामिनन्' (उ० २।५०) । **'द्रविणं** काञ्चने धने । पराक्रमे बलेऽपि स्यात्' इति हेमचन्द्रः ॥ (१) ॥*॥ तरत्यनेन । 'तॄ प्लवनादौ' (भ्वा० प० से०) । असुन् (उ० ४।१८९) **'तरो** जवे बले' इति हैमः ॥ (२) ॥*॥ सह्यतेऽनेन । 'षह अभिभवे' (भ्वा० प० अ०) । असुन् (उ० ४।१८९) । **'सहो** बले ज्योतिषि च **सहा** हेमन्तमार्गयोः' इति सान्तेषु हैमः ॥*॥ दण्डोत्पला मुद्गपर्णी कुमारीनखमेषजे । **सहा** स्त्रियां बले न स्त्री' इति रभसाददन्तमपि ॥ (३) ॥*॥ वलते(ल्य)नेन । 'बल प्राणने' (भ्वा० प० से०) । 'खनो घ च' (३।३।१२५) इति घः । **'बलं** गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः । पुमान् हलायुधे दैत्यप्रभेदे वायसेऽपि च । बलयुक्तेऽन्यलिङ्गः स्याद्बाल्यबालके तु योषिति' (इति मेदिनी) ॥ (४) ॥*॥ शूरस्य भावः कर्म वा । ष्यञ् (५।१।१२४) । **'शौर्य**मारभटीशक्त्योः' इति विश्वः ॥ (५) ॥*॥ तिष्ठत्यनेन । 'सर्वधातुभ्यो मनिन्' (उ० ४।१४५) ।–'आतो मनिन्–' (३।२।७५)–इति मुकुटस्तु चिन्त्यः । तस्य कर्तरि विधानात् ॥ (६) ॥*॥ शुष्यत्यनेनारिः । 'शुष शोषणे' (दि० प० अ०) । 'अविसिविसिशुषिभ्यः कित्' (उ० १।१४४) इति मन् । **'शुष्मं** तेजसि, सूर्ये ना' (इति मेदिनी) ॥ (७) ॥*॥ शक्यतेऽनया । 'शक्लृ शक्तौ' (स्वा० प० अ०) । 'स्त्रियां क्तिन्' (३।३।९४) । **'शक्तिरायुधभेदे** स्यादुत्साहादौ बले स्त्रियाम्' इति हैमः ॥ (८) ॥*॥ पराक्रम्यतेऽनेन । 'क्रमु पादविक्षेपे' (भ्वा० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । **'पराक्रमो** विक्रमे स्यात्सामर्थ्योद्योगयोरपि' इति विश्वः ॥ (९) ॥*॥ प्राणित्यनेन । 'अन प्राणने' (अ० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । **'प्राणो** हृन्मारुते बोले काव्यजीवेऽनिले बले । पुंलिङ्गः पूरिते वाच्यलिङ्गः, पुंभूम्नि चासुषु' (इति मेदिनी) ॥ (१०) ॥*॥ दश **'सामर्थ्यस्य'** ॥

विक्रमस्त्वतिशक्तिता ॥ १०२ ॥

वीति ॥ विक्रमणम् । घञ् (३।३।१८) । **'विक्रमस्तु** पुमान्कान्तिमात्रे स्याच्छक्तिसंपदि' (इति मेदिनी) ॥ (१) ॥*॥ अतिशयिता शक्तिर्यस्य । तस्य भावः । तल् (५।१।११९) ॥ (२) ॥*॥ द्वे **'अतिपराक्रमस्य'** ॥

वीरपाणं तु तत्पानं वृत्ते भाविनि वा रणे ।

वीति ॥ वीराणां पानम् । 'वा भावकारणयोः' (८।४।१०) इति णत्वम् ॥ (१) ॥*॥ एकम् **'युद्धारम्भेऽन्ते वा पानकर्मणः'** ॥

युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् ॥ १०३ ॥
मृधमास्कन्दनं संख्यं समीकं संपरायकम् ।
अस्त्रियां समरानीकरणाः कलहविग्रहौ ॥ १०४ ॥
संप्रहाराभिसंपातकलिसंस्फोटसंयुगाः ।
अभ्यामर्दसमाघातसंग्रामाभ्यागमाहवाः ॥ १०५ ॥
समुदायः स्त्रियः संयत्समित्याजिसमिद्युधः ।

युद्धेति ॥ योधनम् । 'युध संप्रहारे' (दि० आ० अ०) (क्तः ३।३।११४) भावे क्त्यौ (३।३।११५) ॥ (१) ॥*॥ (२) ॥*॥ जननम् । 'जनेर्यक्' (उ० ४।१११) । जायते वा । 'भव्यगेय–' (३।४।६८) इति साधुः । **'जन्यं** हट्टे परीवादे संग्रामे च नपुंसकम् । **जन्या** मातृवयस्यायां **जन्यः** स्याज्जनके पुमान् । त्रिषूत्पाद्यजनित्रोश्च नवोढाज्ञातिभृत्ययोः । वरस्त्रिग्धे' इति विश्वमेदिन्यौ ॥ (३) ॥*॥ प्रैधानम् । 'डु धाञ्' (जु० उ० अ०) । 'कृपृवृजिमन्दिनिधाञः क्युः' (उ०२।८१)। **'प्रधनं** युधि दारणे' इति हैमः ॥ (४) ॥*॥ 'दॄ विदारणे' (क्र्या० प०से०) । ण्यन्ताद्भावे ल्युट् । **'प्रविदारण**माख्यातं संपरायेऽवदारणे' (इति मेदिनी) ॥ (५) ॥*॥ मर्धनम् । 'मृधु हिंसायाम्' (भ्वा० उ० से०) । बाहुलकाद्भावे घञर्थे वा कः ॥ (६) ॥*॥ **'स्कन्दिर्** गतिशोषणयोः' (भ्वा० प० अ०) । भावे ल्युट् (३।३।११५) । **'आस्कन्दनं** तिरस्कारे रणे संशोषणेऽपि च' इति विश्वः ॥ (७) ॥*॥ संख्यानम् । चक्षिङः ख्यातेर्वा भावे कः । **'संख्य**माहवे । **संख्यै**कादौ विचारे च' इति हैमः ॥ (८) ॥*॥ समनम् । 'षम वैक्लव्ये' (भ्वा० प० से०) । 'अलीकादयश्च' (उ० ४।२५) इति कीकन् । सम्यगयनम्, वा । 'ई गत्यादौ' (अ० प० अ०) । बाहुलकात् कः ॥ (९) ॥*॥ संपरायनम् । 'अय गतौ' (भ्वा० आ० से०) । 'इ गतौ' (भ्वा० प० अ०) वा । घञ (३।३।१८) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥*॥ विनयादित्वात् (५।४।३४) ठकि **'सांपरायिकः'** अपि ॥ (१०) ॥*॥ समरणम् । 'ऋ गतौ' (क्र्या प० से०) घः (३।३।११८) ॥ 'ऋदोरप्' (३।३।५७) वा । यत्तु—ऋच्छन्त्यत्र । 'ऋ गतौ' (भ्वा० प० अ०) । 'ऋदोरप्' (३।३।५७)—इति मुकुटेनोक्तम् । तन्न । ऋषन्तादपो विधानात् ॥ (११) ॥*॥ अननम् । 'अन गतौ' ( ) 'प्राणने' (अ० प० से०) वा । 'अनीकादकश्च' इति साधुः । न नयनम् । 'णीञ् प्रापणे' (भ्वा० उ० अ०) । बाहुलकात्कन् । नञ्समासः (२।२।६) **'अनीकोऽस्त्री** रणे सैन्ये' इति मेदिनी ॥ (१२) ॥*॥ रणनम् । 'रण शब्दे' (भ्वा० प० से०) । 'वशिरण्योश्च' (वा० ३।२।५८) इत्यप् । **'रणः** कोणे क्वणे पुंसि समरे पुंनपुंसकम्' (इति मेदिनी) ॥ (१३) ॥*॥ **'कलं** तु मधुरध्वनौ' इति धरणिः । कलस्य हननम् । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः ॥ (१४) ॥*॥ विग्रहणम् । 'ग्रहवृदृ–' (३।३।५८) इत्यप् । **'विग्रहो** युधि विस्तारे प्रविभागशरीरयोः' इति हैमः ॥ (१५) ॥*॥ संप्रहरणम् । 'हृञ् हरणे' (भ्वा० उ० अ०) । घञ् (३।३।१८) । **'संप्रहारो** गतौ रणे' इति हैमः ॥ (१६) ॥*॥ अभिसंपतनम् । 'पत्लृ गतौ' (भ्वा० प० से०) । घञ् (३।३।१८) ॥ (१७) ॥*॥ कलनम् । 'कल शब्दादौ' (भ्वा० आ० से०) । इन् (उ० ४।११८) ।—'कलेरिः'—इति मुकुटः । तन्न । तादृशसूत्राभावात् । **'कलिर्बिभीतके शूरे विवादेऽन्ययुगे युधि'** इति हैमः ॥ (१८) ॥*॥ संस्फोटनम् 'स्फुटिर् विशरणे' (भ्वा० प० से०) । घञ् (३।३।१८) । **'संस्फेटः'** इति तु स्वामी । तत्र 'स्पिट अनादरे' (चु० प० से०) ॥ (१९) ॥*॥ संयोजनम् । 'युजिर् योगे' (स्वा० उ० अ०) । घञ् (३।३।१८) ।—'रथयुग–' (४।४।७६) इति निर्देशाद्भुणाभावः । प्रतिजनादिषु (४।४।९९ गणे) 'संयुग' शब्दपाठाद्वा ॥ (२०) ॥*॥ अभ्यामर्दनम् । 'मृद क्षोदे' (क्र्या० प० से०) । घञ् (३।३।१८) । **'अभिमर्दस्तु** पुंसि स्यादवमर्दे संपराये च' (इति मेदिनी) ॥ (२१) ॥*॥ समाहननम् । घञ् (३।३।११८) । **'समाघातो** वधे युद्धे' (इति मेदिनी) ॥ (२२) ॥*॥ संग्रामणम् । 'संग्राम युद्धे' (चु० उ० स०) ण्यन्तः । 'एरच्' (३।३।५६) ॥ (२३) ॥*॥ अभ्यागमनम् । 'ग्रहवृदृ–' (३।३।५८) इत्यप् । **'अभ्यागमः** समरेऽन्तिके । घाते रोधेऽभ्युपगमे' इति हैमः ॥ (२४) ॥*॥ आह्वानम् । 'ह्वेञ् स्पर्धायां शब्दे च' (भ्वा० उ० अ०) । 'आङि युद्धे' (३।३।७२) इत्यप् संप्रसारणं च । **'आहवः** संगरे यज्ञे' इति हैमः ॥ (२५) ॥*॥ समुदयनम् । 'अय गतौ' (भ्वा० आ० से०) । घञ् (३।३।१८) ॥ (२६) ॥*॥ संयतनम् । 'यती प्रयत्ने' (भ्वा० अ० से०) संयमनम् । 'यम उपरमे' (भ्वा० प० अ०) वा संपदादिः (वा० ३।३।१०८) । 'गमादीनाम्' (वा० ६।४।४०) इति मलोपः । तुक् (६।१।

१—स्वामिमुकुटाभ्यां तु प्रदन्धन्ति । धनिर्मारणार्थोऽत्र निधनवत् —इत्युक्तम् ॥

१—सिद्धान्तकौमुद्यादौ तु 'अनीकादयश्च' इति सूत्रं नोपलभ्यते किंतु 'अनिहृषिभ्यां किच्च' (उ० ४।१७) इति सूत्रमुपलभ्यते ॥

७१)[1] ॥ (२७) ॥*॥ समयनम् । 'इ गतौ' (भ्वा० प० से०) । क्तिच् (३।३।१७४) । **'समिति**र्युधि संगमे । साम्ये सभायाम्' इति हेमचन्द्रः ॥ (२८) ॥*॥ अजनम् । 'अज गतौ' (भ्वा० प० से०) । 'इणजादिभ्यः' (वा० ३।३। १०८)। इञ्(ण)विधानसामर्थ्यादजेर्न वी । अन्यथा 'व्यादिभ्यः' इत्येवावक्ष्यत् । 'बहुलं तणि' (वा० २।४।५४) इति वा । **'आजिः** स्त्री समभूमौ संग्रामे' इति मेदिनी ॥ (२९) ॥*॥ समयनम् । 'इ गतौ' (भ्वा० प० अ०) । संपदादिः (वा० ३।३।१०८)। तुक् (६।१।७१) ॥ (३०) ॥*॥ योधनम् । 'युध संप्रहारे' (दि० आ० अ०) । संपदादिः (वा० ३।३।१०८) ॥ (३१) ॥*॥—एषु अनेकार्थत्वात् सर्वे धातवो युद्धार्थाः । सर्वत्राधिकरणे प्रत्ययः—इति मुकुटः ॥*॥ एकत्रिंशत् **'प्रहरणक्रियायाः'** ॥

नियुद्धं बाहुयुद्धे स्यात्

नीति ॥ नियुद्ध्य नितरां वा युद्धम् ॥ (१) ॥*॥ बाहुर्युद्धम् ॥ (२) ॥*॥ द्वे **'बाहुयुद्धस्य'** ॥

तुमुलं रणसंकुले ॥ १०६ ॥

त्विति ॥ तवनम् । तौति वा । 'तु' सौत्रः । बाहुलकान्मुलक् । (**'तुमुलं** रणसंकुले । **तुमुलो** विभीतकद्रौ' इति हैमः) । **'तुमुलं** व्याकुले रणे' इति त्रिकाण्डशेषः ॥ (१) ॥*॥ रणस्य **'संकुलम्'** ॥ (२) ॥*॥ द्वे **'रणव्याकुलतायाः'** ॥

क्ष्वेडा तु सिंहनादः स्यात्

क्ष्वेडेति ॥ क्ष्वेदनम् । 'ञिक्ष्विदा स्नेहनमोचनयोः' (भ्वा० आ० से०) अव्यक्ते शब्दे वा घञ् (३।३।१८) । पृषोदरादिः (६।३।१०९) । रूपभेदात्स्त्रीत्वम् । 'विशेषैर्यद्यबाधितः' इति परिभाषणान्न पुंस्त्वम् । **'क्ष्वेडो** ध्वनौ कणामये विषे । **क्ष्वेडा** वंशशलाकायां सिंहनादे च योषिति । लोहितार्कपर्णफले घोषपुष्पे नपुंसकम् । दुरासदे च कुटिले वाच्यलिङ्गः प्रकीर्तितः' ॥ (१) ॥*॥ सिंहवन्नदनम् । 'णद अव्यक्ते शब्दे' (भ्वा० प० से०) । घञ् (३।३।१८) ॥ (२) ॥*॥ द्वे **'योधानां सिंहनादस्य'** ॥

करिणां घटना घटा ।

केति ॥ घटनम् । 'घट संघाते' चुरादिः । 'ण्यासश्रन्थः—' (३।३।१०७) इति युच् ॥ (१) ॥*॥ 'घटादयः षितः' (भ्वा० ग० सू०) इति षित्त्वात् (३।३।१०३) अङ् । **'घटः** समाधिभेदेभशिरःकूटकुटेषु च । **घटा** घटनगोष्ठीभघटनासु च योषिति' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'हस्तिसंघस्य'** ॥

क्रन्दनं योधसंरावः

क्रेति ॥ 'क्रदि आह्वाने' (भ्वा० प० से०) । भावे ल्युट् (३।३।११५) । **'क्रन्दनं** रोदनेऽपि स्यादाह्वानेऽपि' इति मेदिनी ॥ (१) ॥*॥ योधानां संवरणम् । 'रु शब्दे' (अ० प० अ०) । 'उपसर्गे रुवः' (३।३।२२) इति घञ् ॥ (२) ॥*॥ द्वे **'अन्योन्यस्पर्धया योधानामाह्वानस्य'** ॥

बृंहितं करिगर्जितम् ॥ १०७ ॥

ब्रिति ॥ बृंहणम् । 'बृहि वृद्धौ' (भ्वा० प० से०) 'नपुंसके' (३।३।११४) इति क्तः ॥ (१) ॥*॥ करिणां गर्जनम् । 'गर्ज शब्दे' (भ्वा० प० से०) । पूर्ववत् क्तः (३।३।११४) ॥ (२) ॥*॥ द्वे **'हस्तिगर्जनस्य'** ॥

विस्फारो धनुषः स्वानः

वीति ॥ विस्फरणम् । 'स्फर स्फुरणे' (तु० प० से०) । घञ् (३।३।१८) । विस्फुरणम् । 'स्फुर स्फुरणे' (तु० प० से०) वा 'स्फुरतिस्फुलत्योर्घञि' (६।१।४७) इत्वात्वम् ॥ (१) ॥*॥ एकम् **'धनुषः शब्दस्य'** ॥

पटहाडम्बरौ समौ ।

पेति ॥ पटं हन्ति । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः । **'पटहो** ना समारम्भे आनके पुंनपुंसकम्' (इति मेदिनी) ॥ (१) ॥*॥ आडम्बयति । 'डबि क्षेपे' ( ) बाहुलकादरच् । यद्वा डम्बनम् । भावे घञ् (३।३।१८) । डम्बं राति । रायति वा । 'आतोऽनुप—' (३।२।३) इति कः । 'आडम्बरः समारम्भे गजगर्जिततूर्ययोः' इति विश्वः ॥ (२) ॥*॥ द्वे **'युद्धपटहस्य' 'दमदमा'** इति ख्यातस्य ॥

प्रसभं तु बलात्कारो हठः

प्रेति ॥ प्रगता सभा विचारोऽस्मात् । सभायाः प्रगतो वा । 'क्लीबे तु प्रसभं हठः' इति बोपालितः ॥ (१) ॥*॥—'बलात्' इति निपातो 'हठार्थः'—इति स्वामी । बलात्करणम् । भावे घञ् (३।३।१८) ॥ (२) ॥*॥ हठनम् । 'हठ धृतिशठत्वयोः' (भ्वा० प० से०) । 'पुंसि—' (३।३। ११८) इति 'खनो घ च' (३।३।२५) इति वा घः ॥ **'हठः** स्यात्प्रसभे पृश्न्यांम्' **'हेठो** बाधाविहेठयोः' इति मेदिनी ॥ (३) ॥*॥ त्रीणि **'बलात्कारस्य'** ॥

अथ स्खलितं छलम् ॥ १०८ ॥

अथेति ॥ स्खलम् । 'स्खल संचलने' (भ्वा० प० से०)। क्तः (३।३।११४) । **'स्खलितं** छलिते भ्रेषे' (इति हैमः) ॥ (१) ॥*॥ छालम् । 'छो छेदने' (दि० प० अ०) । वृषादित्वात् (उ० १।१०५) कलच् । 'आतो लोप—' (६।४।६४) इत्याकारलोपः । (**'छलं** छद्मस्खलितयोः' इति हैमः) ॥ (२) ॥*॥ द्वे **'युद्धमर्यादायाश्चलनस्य'** ॥

अजन्यं क्लीब उत्पात उपसर्गः समं त्रयम् ।

अजेति ॥ न जने साधुः । 'तत्र साधुः' (४।४।९८) इति यत् । न जन्यते वा । 'जनेर्यक्' (उ० ४।११) ।

१—'संयत्' पुंस्यपि । 'रवेऽजि संयत्यतुलास्वगौरवे' इति दक्षी—इति मुकुटः ॥

१—हेठशब्दार्थबोधकस्यापि प्रसङ्गादुक्तिः ॥

'तकिशसि' (वा० ३।१।९७) इति ॥ यद्वा ॥ (१) ॥*॥ उत्पतनम् । 'पतॄ गतौ' (भ्वा० प० से०) । घञ् (३।३।१८) । उत्पतति । ज्वलादिः (३।१।१४०) वा ॥ (२) ॥*॥ उपसर्जनम् । उपसृज्यते वा घञ् (३।३।१८, १९) । **'उपसर्गः** पुमान् रोगभेदोपप्लवयोरपि' इति मेदिनी ॥ (३) ॥*॥ त्रीणि **'शुभाशुभसूचकमहाभूतविकारस्य'** ॥

मूर्च्छा तु कश्मलं मोहोऽपि

म्विति ॥ मूर्च्छनम् । 'मूर्च्छा मोहादौ' (भ्वा० प० से०) । 'गुरोश्च हलः' (३।३।१०२) इत्यः । 'उपधायां च' (८।२।७८) इति दीर्घः ॥ (१) ॥*॥ कशनम् । 'कश गतौ' (अ० आ० से०) । 'कुटिकशिकौतिभ्यः प्रत्ययस्य मुट्' (उ० १।१०९) इति कलः । बाहुलकात्—इति मुकुटस्तूपेक्ष्यः ॥ (२) ॥*॥ मोहनम् । 'मुह वैचित्त्ये' (दि० प० से०) । घञ् (३।३।१८) । 'अथ **मोहो** नृलिङ्गः स्यादविद्यायां च मूर्च्छने' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'मूर्च्छायाः'** ॥

अवमर्दस्तु पीडनम् ॥ १०९ ॥

अवेति ॥ अवमर्दनम् । 'मृद क्षोदे' (क्या० प० से०) घञ् (३।३।१८) ॥ (१) ॥*॥ 'पीड अवगाहने' (चु० प० से०) ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'देशादेरुपद्रवदानस्य'** ॥

अभ्यवस्कन्दनं त्वभ्यासादनम्

अभ्येति ॥ 'स्कन्दिर्' (भ्वा० प० अ०) । ल्युट् (३।३।११५) ॥ (१) ॥*॥ 'षद्लृ विशरणादौ' चुरादिः । ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'प्रहारादिना निःशक्तीकरणस्य'** ॥

विजयो जयः ।

वीति ॥ विजयनम् । 'जि जये' (भ्वा० प० अ०) । 'एरच्' (३।३।५६) । **'विजयः** स्याज्जये पार्थे स्त्रियां तिथ्यन्तरे स्मृता । उमासख्याम्' (इति मेदिनी) ॥ (१) ॥*॥ **'जया** जयन्तीतिथिभित्पथ्योमातत्सखीषु च । अभिमन्थे ना जयन्ते विजये च युधिष्ठिरे' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'लब्धस्योत्कर्षस्य'** ॥

वैरशुद्धिः प्रतीकारो वैरनिर्यातनं च सा ॥ ११० ॥

वायिति ॥ वैरस्य शुद्धिः ॥ (१) ॥*॥ प्रतिकरणम् । घञ् (३।३।१८) । 'उपसर्गस्य–' (६।२।१२२) इति दीर्घः ॥ (२) ॥*॥ वैरस्य निर्यातनम् । 'यत निराकारादौ' चुरादिः । ल्युट् (३।३।११५) ॥ (३) ॥*॥ त्रीणि **'वैरशोधनस्य'** ॥

प्रद्रावोद्रावसंद्रावसंदावा विद्रवो द्रवः ।
अपक्रमोऽपयानं च

प्रेति ॥ प्रद्रवणम् 'द्रु गतौ' (भ्वा० प० अ०) । 'प्रेद्रुस्रुस्रुवः' (३।३।२७) इति घञ् ॥ (१) ॥*॥ उद्द्रवणम् । 'उदि श्रयति–' (३।३।४९) इत्यादिना घञ् ॥ (२) ॥*॥ संद्रवणम् । संदवनम् । 'द्रु द्रु गतौ' (भ्वा० प० अ०) । 'समि युद्रुदुवः' (३।३।२३) इति घञ् ॥ (३) ॥*॥ (४) ॥*॥ विद्रवणम् । 'ऋदोरप्' (३।३।५७) ॥ (५) ॥*॥ **'द्रवः** प्रद्रावनर्मणोः । विद्रवे रसगल्लोश्च' (इति हैमः) ॥ (६) ॥*॥ अपक्रमणम् । घञ् (३।३।१८) ॥ (७) ॥*॥ यातेर्ल्युट् (३।३।११५) ॥ (८) ॥*॥ अष्टौ **'पलायनस्य'** ॥

रणे भङ्गः पराजयः ॥१११॥

रेति ॥ भञ्जनम् 'भञ्जो आमर्दने' (रु० प० अ०) । घञ् (३।३।१८) । **'भङ्गो** जयविपर्यये । भेदरोगतरङ्गेषु **भङ्गा** सस्यान्तरे स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ पराजयम् । 'जि अभिभवे' (भ्वा० प० अ०) । 'एरच्' (३।३।५६) ॥ (२) ॥*॥ द्वे **'पराजयस्य'** ॥

पराजितपराभूतौ

पेति ॥ पराजीयते स्म । परैराजीयते स्म वा । 'जि अभिभवे' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ पराभूयते स्म । क्तः (३।३।१०२) ॥ (२) ॥*॥ द्वे **'प्राप्ताभिभवस्य'** ॥

त्रिषु नष्टतिरोहितौ ।

त्रीति ॥ 'त्रिषु' इति पूर्वाभ्यामपि संबध्यते । नश्यति स्म । 'णश अदर्शने' (दि० प० से०) । 'गत्यर्था–' (३।४।७२) इति कर्तरि क्तः ॥ (१) ॥*॥ तिरो धीयते स्म । 'डुधाञ्' हिनोति स्म वा । 'हि गतौ' वा । 'गत्यर्था–' (३।४।७२) इति कर्तरि क्तः । धाञस्तु कर्मणि क्तः (३।२।१०२) ॥ (२) ॥*॥ भावक्रान्तेभ्योऽर्शआद्यच् (५।२।१२७) वा ॥*॥ द्वे **'निलीनस्य'** ॥

प्रमापणं निवर्हणं निकारणं विशारणम् ॥ ११२ ॥
प्रवासनं परासनं निषूदनं निर्हिंसनम् ।
निर्वासनं संज्ञपनं निर्ग्रन्थनमपासनम् ॥ ११३ ॥
निस्तर्हणं निहननं क्षणनं परिवर्जनम् ।
निर्वापणं विशसनं मारणं प्रतिघातनम् ॥ ११४ ॥
उद्वासनप्रमथनक्रथनोज्जासनानि च ।
आलम्भपिञ्जविशरघातोन्माथवधा अपि ॥ ११५ ॥

प्रेति ॥ 'मीञ् हिंसायाम्' (क्या० प० अ०) स्वार्थण्यन्तः ॥ (१) ॥*॥ 'वर्ह हिंसायाम्' (चु० प० से०) ॥ (२) ॥*॥ 'कॄञ् हिंसायाम्' (क्या० उ० से०) ॥ (३) ॥*॥ 'शॄ हिंसायाम्' (क्या० प० से०) ॥ (४) ॥*॥ स्वार्थण्यन्तौ । 'वस छेदे' (चुरादिः) । प्र (५) निर् (९) उत् (२१) पूर्वः । 'असु क्षेपणे' (दि० प० से०) ॥ (६) ॥*॥ (१२) ॥*॥ 'ष्रुद् क्षरणे' (भ्वा० आ० से०) ॥ (७) ॥*॥ 'हिंसि हिंसायाम्' (रु० प० से०) ॥ (८) ॥*॥ 'मारणतोषणनिशामनेषु ज्ञा' (भ्वा० प० अ०) । 'ज्ञप मिच्च' (चु० प० से०)

इति वा ॥ (१०) ॥*॥ 'ग्रथि कौटिल्ये' (भ्वा० आ० से०) । **'निर्गन्धनम्'** इत्यन्ये । तत्र 'गन्ध अर्दने' (चु० आ० से०) अयं धातुः ॥ (११) ॥*॥ 'तृह हिंसायाम्' (रु० प० से०) । निर्पूर्वः । 'तृन्ह्' (तु० प० से०) वा ॥ (१३) ॥*॥ 'हन हिंसायाम्' (अ० प० अ०) ॥ (१४) ॥*॥ 'क्षुणु हिंसायाम्' (त० उ० से०) ॥ (१५) ॥*॥ 'वृजी वर्तने' (रु० प० से०) ॥ (१६) ॥*॥ 'डुवप् बीजसंताने' (भ्वा० उ० अ०) । स्वार्थण्यन्तः 'ओ वै शोषणे' (भ्वा० प० अ०) वा ॥ (१७) ॥*॥ 'शसु हिंसायाम्' (भ्वा० प० से०) ॥ (१८) ॥*॥ 'मृ हिंसायाम्' (क्या० प० से०) ॥ (१९) ॥*॥ 'हन हिंसायाम् ' (अ० प० अ०) ॥ (२०) ॥*॥ स्वार्थण्यन्तौ । 'मथे हिंसायाम्' (भ्वा० प० से०) ॥ (२२) ॥*॥ 'क्रथ हिंसायाम्' (भ्वा० प० से०) ॥ (२३) ॥*॥ 'जसु हिंसायाम्' (दि० प० से०) स्वार्थण्यन्तः ॥ (२४) ॥*॥ एभ्यो भावे ल्युट् (३।३।११५) ॥*॥ आलम्भनम् । 'डुलभष् प्राप्तौ' (भ्वा० आ० अ०) । घञ् (३।३।१८) 'लमेश्च' (७।१।६४) 'उपसर्गात्खल्घञोः' (७।१।६७) इति नुम् ॥ (२५) ॥*॥ पिञ्जनम् । 'पिजि हिंसायाम्' चुरादिः । अच् (३।३।५६) ॥ (२६) ॥*॥ विशरणम् । 'शृ हिंसायाम्' (क्या० प० से०) । 'ऋदोरप्' (३।३।५७) ॥ (२७) ॥*॥ हननम् । 'हन हिंसायाम्' (अ० प० अ०) । घञ् (३।३।१८) । 'हनस्तोऽचिण्णलोः' (७।३।३२) 'हो हन्तेर्ञ्णिन्नेषु' (७।३।५४) ॥ (२८) ॥*॥ उन्मथनम् । 'मथे हिंसायाम्' (भ्वा० प० से०) घञ् (३।३।१८) ॥*॥—मन्थतेर्घञ्—इति मुकुटः । तन्मते **'उन्मन्थः'** इति पाठः ॥ (२९) ॥*॥ हननम् । 'हनो वध च' (३।३।७६) इत्यप् ॥ (२०) ॥*॥ त्रिंशत् **'मारणस्य'** ॥

स्यात्पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः ।
अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनो स्त्रियाम्॥११६॥

स्यादिति ॥ पञ्चानां भावः । तल् (५।१।११९) ॥ **'पञ्चता** पञ्चभावे स्यान्मरणे च योषिति' (इति मेदिनी) ॥ (१) ॥*॥ कालस्य धर्मः ॥ (२) ॥*॥ दिष्टस्य दैवस्यान्तः ॥ (३) प्रलयनम् 'लीङ् श्लेषणे' (दि० आ० अ०) । 'एरच्' (३।३।५६) ॥ (४) ॥*॥ अत्ययनम् । 'इण् गतौ' (अ० प० अ०) । 'इ गतौ' (भ्वा० प० अ०) । 'एरच्' (३।३।५६) । **'अत्ययोऽतिक्रमे दण्डे विनाशे दोषकृच्छ्रयोः'** इति मेदिनी ॥ (५) ॥*॥ अन्तनम् । 'अति बन्धने' (भ्वा० प० से०) । घञ् (३।३।१८) । **'अन्तः** स्वरूपे निकटे प्रान्ते निश्चयनाशयोः । अवयवेऽपि' इति हैमः ॥ (६) ॥*॥ 'णश अदर्शने' (दि० प० से०) । घञ् (३।३।१८) ॥ **'नाशः** पलायने मृत्यौ परिध्वस्तावदर्शने' इति हेमचन्द्रः ॥ (७) ॥*॥ मरणम् । 'मृङ् प्राणत्यागे' (तु० आ० अ०) । 'भुजिमृङ्भ्यां युक्त्युकौ' (उ० ३।२१) इति त्युक् । **'मृत्युर्ना मरणे यमे'** इति मेदिनी ॥ (८) ॥*॥ 'ल्युट् च' (३।३।११५) ॥ (९) ॥*॥ निधानम् । कृपृवृजिमन्दिनिधाञः क्युः (उ० २।८१) । **'निधनं** स्यात् कुले नाशे' (इति मेदिनी) ॥ (१०) ॥*॥ दश **'मरणस्य'** ॥

परासुप्राप्तपञ्चत्वपरेतप्रेतसंस्थिताः ।
मृतप्रमीतौ त्रिष्वेते

पेति ॥ परागता असवोऽस्मात् ॥ (१) ॥*॥ प्राप्तं पञ्चत्वं येन ॥ (२) ॥*॥ परं लोकमितः । परा दूरमितो वा । **'परेतो** वाच्यलिङ्गः स्यान्मृते भूतान्तरे पुमान्' (इति मेदिनी) ॥ (३) ॥*॥ प्रकर्षेण इतः । **'प्रेतो** भूतान्तरे पुंसि मृते स्याद्वाच्यलिङ्गकः' (इति मेदिनी) ॥ (४) ॥*॥ संतिष्ठते स्म । 'गत्यर्था–' (३।४।७२) इति क्तः ॥ (५) ॥*॥ म्रियते स्म । 'मृङ् प्राणत्यागे' (तु० आ० अ०) । 'गत्यर्था–' (३।४।७२) । **'मृतं** मृत्यौ याचिते च' इति हैमः ॥ (६) ॥*॥ प्रमीयते स्म । 'मीङ् हिंसायाम्' (क्या० आ० अ०) । 'गत्यर्था–' (३।४।७२) इति क्तः । **'प्रमीतं** वाच्यलिङ्गं स्यात्प्रोषितेऽपि मृतेऽपि च' इति मेदिनी ॥ (७) ॥*॥ त्रिषु परास्वादयः ॥*॥ सप्त **'मृतस्य'** ॥

चिता चित्या चितिः स्त्रियाम् ॥ ११७ ॥

चीति ॥ चीयते स्म । क्तः (३।२।१०२) । **'चितं** छत्रे त्रिषु **चिता** चित्यायां संहतौ स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ 'चित्याग्निचित्ये च' (३।१।१३२) इति क्यप् । **'चित्यं** मृतकचैत्ये स्याच्चित्या मृतचितौ स्त्रियाम्' (इति मेदिनी) ॥ (२) ॥*॥ क्तिन् (३।३।९४) । **'चितिश्चित्यावृन्दयोः स्त्री'** (इति मेदिनी) ॥ (३) ॥*॥ अधिकरणे वा प्रत्ययः ॥*॥ त्रीणि **'चित्याः'** ॥

कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेवरम् ।

केति ॥ कं बध्यते छिद्यतेऽस्मात् । 'बन्ध बन्धने' (क्या० प० अ०) । घञ् (३।३।११९) । केन वायुना बध्यते वा । **'कबन्धमुदके** रुण्डे **कबन्धो** राहुरक्षसोः' इति हैमः ॥ (१) ॥*॥ एकम् **'छिन्नशिरसो देहस्य'** ॥

श्मशानं स्यात्पितृवनम्

श्मेति ॥ शवाः शेरतेऽत्र । पृषोदरादिः (६।३।१०९) द्वितालव्यम् ॥ (१) ॥*॥ पितॄणां वनम् । पितॄन् वनति वा । 'वन संभक्तौ' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । **'वनं** नपुंसकं नीरे निवासालयकानने' इति मेदिनी ॥ (२) ॥*॥ द्वे **'प्रेतभूमेः'** ॥

कुणपः शवमस्त्रियाम् ॥ ११८ ॥

किति ॥ क्वणति । 'क्वण शब्दे' (भ्वा० प० से०) । 'क्वणेः संप्रसारणं च' (उ० ३।१४३) इति कपन् । **'(कुणपी** पुनः । विदूसारिकायां) **कुणपः** पूतिगन्धे शवेऽपि च' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ शवति । **'शव** गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) । **('शवः** स्यात्कुणपे

'तक्रिशसि' (वा० ३।१।९७) इति ॥ यद्वा ॥ (१) ॥*॥ उत्पतनम् । 'पतॢ गतौ' (भ्वा० प० से०) । घञ् (३।३।१८) । उत्पतति । ज्वलादिः (३।१।१४०) वा ॥ (२) ॥*॥ उपसर्जनम् । उपसृज्यते वा घञ् (३।३।१८, १९) । **'उपसर्गः** पुमान् रोगभेदोपप्लवयोरपि' इति मेदिनी ॥ (३) ॥*॥ त्रीणि **'शुभाशुभसूचकमहाभूतविकारस्य'** ॥

मूर्च्छा तु कश्मलं मोहोऽपि

म्विति ॥ मूर्च्छनम् । 'मूर्च्छा मोहादौ' (भ्वा० प० से०) । 'गुरोश्च हलः' (३।३।१०२) इत्यः । 'उपधायां च' (८।२।७८) इति दीर्घः ॥ (१) ॥*॥ कशनम् । 'कश गतौ' (अ० आ० से०) । 'कुटिकशिकौतिभ्यः प्रत्ययस्य मुट्' (उ० १।१०९) इति कलः । बाहुलकात्—इति मुकुटस्तूपेक्ष्यः ॥ (२) ॥*॥ मोहनम् । 'मुह वैचित्त्ये' (दि० प० से०) । घञ् (३।३।१८) । 'अथ **मोहो** नृलिङ्गः स्यादविद्यायां च मूर्च्छने' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'मूर्च्छायाः'** ॥

अवमर्दस्तु पीडनम् ॥ १०९ ॥

अवेति ॥ अवमर्दनम् । 'मृद क्षोदे' (क्र्या० प० से०) घञ् (३।३।१८) ॥ (१) ॥*॥ 'पीड अवगाहने' (चु० प० से०) ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'देशादेरुपद्रवदानस्य'** ॥

अभ्यवस्कन्दनं त्वभ्यासादनम्

अभ्येति ॥ 'स्कन्दिर्' (भ्वा० प० अ०) । ल्युट् (३।३।११५) ॥ (१) ॥*॥ 'षदॢ विशरणादौ' चुरादिः । ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'प्रहारादिना निःशक्तीकरणस्य'** ॥

विजयो जयः ।

वीति ॥ विजयनम् । 'जि जये' (भ्वा० प० अ०) । 'एरच्' (३।३।५६) । **'विजयः** स्याज्जये पार्थे स्त्रियां तिथ्यन्तरे स्मृता । उमासख्याम्' (इति मेदिनी) ॥ (१) ॥*॥ **'जया** जयन्तीतिथिभित्पथ्योमातत्सखीषु च । अग्निमन्थे ना जयन्ते विजये च युधिष्ठिरे' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'लब्धस्योत्कर्षस्य'** ॥

वैरशुद्धिः प्रतीकारो वैरनिर्यातनं च सा ॥ ११० ॥

वायिति ॥ वैरस्य शुद्धिः ॥ (१) ॥*॥ प्रतिकरणम् । घञ् (३।३।१८) । 'उपसर्गस्य–' (६।२।१२२) इति दीर्घः ॥ (२) ॥*॥ वैरस्य निर्यातनम् । 'यत निराकारादौ' चुरादिः । ल्युट् (३।३।११५) ॥ (३) ॥*॥ त्रीणि **'वैरशोधनस्य'** ॥

प्रद्रावोद्रावसंद्रावसंदावा विद्रवो द्रवः ।
अपक्रमोऽपयानं च

प्रेति ॥ प्रद्रवणम् 'द्रु गतौ' (भ्वा० प० अ०) । 'प्रेङ्खुङ्खुवः' (३।३।२७) इति घञ् ॥ (१) ॥*॥ उद्रवणम् । 'उदि श्रयति–' (३।३।४९) इत्यादिना घञ् ॥ (२) ॥*॥ संद्रवणम् । संदवनम् । 'दु द्रु गतौ' (भ्वा० प० अ०) । 'समि युद्रुदुवः' (३।३।२३) इति घञ् ॥ (३) ॥*॥ (४) ॥*॥ विद्रवणम् । 'ऋदोरप्' (३।३।५७) ॥ (५) ॥*॥ **'द्रवः** प्रद्रावनर्मणोः । विद्रवे रसगल्योश्च' (इति हैमः) ॥ (६) ॥*॥ अपक्रमणम् । घञ् (३।३।१८) ॥ (७) ॥*॥ यातेर्ल्युट् (३।३।११५) ॥ (८) ॥*॥ अष्टौ **'पलायनस्य'** ॥

रणे भङ्गः पराजयः ॥१११॥

रेति ॥ भञ्जनम् 'भञ्जो आमर्दने' (रु० प० अ०) । घञ् (३।३।१८) । **'भङ्गो** जयविपर्यये । भेदरोगतरङ्गेषु **भङ्गा** सस्यान्तरे स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ पराजयम् । 'जि अभिभवे' (भ्वा० प० अ०) । 'एरच्' (३।३।५६) ॥ (२) ॥*॥ द्वे **'पराजयस्य'** ॥

पराजितपराभूतौ

पेति ॥ पराजीयते स्म । परैराजीयते स्म वा । 'जि अभिभवे' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ पराभूयते स्म । क्तः (३।३।१०२) ॥ (२) ॥*॥ द्वे **'प्राप्ताभिभवस्य'** ॥

त्रिषु नष्टतिरोहितौ ।

त्रीति ॥ 'त्रिषु' इति पूर्वाभ्यामपि संबध्यते । नश्यति स्म । 'णश अदर्शने' (दि० प० से०) । 'गत्यर्था–' (३।४।७२) इति कर्तरि क्तः ॥ (१) ॥*॥ तिरो धीयते स्म । 'डुधाञ्' हिनोति स्म वा । 'हि गतौ' वा । 'गत्यर्था–' (३।४।७२) इति कर्तरि क्तः । धाञस्तु कर्मणि क्तः (३।२।१०२) ॥ (२) ॥*॥ भावक्तान्तेभ्योऽशआद्यच् (५।२।१२७) वा ॥*॥ द्वे **'निलीनस्य'** ॥

प्रमापणं निवर्हणं निकारणं विशारणम् ॥ ११२ ॥
प्रवासनं परासनं निषूदनं निहिंसनम् ।
निर्वासनं संज्ञपनं निर्ग्रन्थनमपासनम् ॥ ११३ ॥
निस्तर्हणं निहननं क्षणनं परिवर्जनम् ।
निर्वापणं विशसनं मारणं प्रतिघातनम् ॥ ११४ ॥
उद्वासनप्रमथनक्रथनोज्झासनानि च ।
आलम्भपिञ्जविशरघातोन्माथवधा अपि ॥ ११५ ॥

प्रेति ॥ 'मीञ् हिंसायाम्' (क्र्या० प० अ०) स्वार्थण्यन्तः ॥ (१) ॥*॥ 'वर्ह हिंसायाम्' (चु० प० से०) ॥ (२) ॥*॥ 'कॄञ् हिंसायाम्' (क्र्या० उ० से०) ॥ (३) ॥*॥ 'शॄ हिंसायाम्' (क्र्या० प० से०) ॥ (४) ॥*॥ स्वार्थण्यन्तौ । 'वस छेदे' (चुरादिः) । प्र (५) निर् (९) उत् (२१) पूर्वैः । 'असु क्षेपणे' (दि० प० से०) ॥ (६) ॥*॥ (१२) ॥*॥ 'षूद क्षरणे' (भ्वा० आ० से०) ॥ (७) ॥*॥ 'हिसि हिंसायाम्' (रु० प० से०) ॥ (८) ॥*॥ 'मारणतोषणनिशामनेषु ज्ञा' (भ्वा० प० अ०) । 'ज्ञप मिच्च' (चु० प० से०)

इति वा ॥ (१०) ॥*॥ 'ग्रथि कौटिल्ये' (भ्वा० आ० से०) । **'निर्गन्धनम्'** इत्यन्ये । तत्र 'गन्ध अर्दने' (चु० आ० से०) अयं धातुः ॥ (११) ॥*॥ 'तृह हिंसायाम्' (रु० प० से०) । निर्पूर्वः । 'तृन्ह्' (तु० प० से०) वा ॥ (१३) ॥*॥ 'हन हिंसायाम्' (अ० प० अ०) ॥ (१४) ॥*॥ 'क्षुणु हिंसायाम्' (त० उ० से०) ॥ (१५) ॥*॥ 'वृजी वर्तने' (रु० प० से०) ॥ (१६) ॥*॥ 'डुवप् बीजसंताने' (भ्वा० उ० अ०) । स्वार्थण्यन्तः 'ओ वै शोषणे' (भ्वा० प० अ०) वा ॥ (१७) ॥*॥ 'शसु हिंसायाम्' (भ्वा० प० से०) ॥ (१८) ॥*॥ 'मृ हिंसायाम्' (क्र्या० प० से०) ॥ (१९) ॥*॥ 'हन हिंसायाम्' (अ० प० अ०) ॥ (२०) ॥*॥ स्वार्थण्यन्तौ । 'मथे हिंसायाम्' (भ्वा० प० से०) ॥ (२२) ॥*॥ 'क्रथ हिंसायाम्' (भ्वा० प० से०) ॥ (२३) ॥*॥ 'जसु हिंसायाम्' (दि० प० से०) स्वार्थण्यन्तः ॥ (२४) ॥*॥ एभ्यो भावे ल्युट् (३।३।११५) ॥*॥ आलम्भनम् । 'डुलभष् प्राप्तौ' (भ्वा० आ० अ०) । घञ् (३।३।१८) 'लभेश्च' (७।१।६४) 'उपसर्गात्खल्घञोः' (७।१।६७) इति नुम् ॥ (२५) ॥*॥ पिञ्जनम् । 'पिजि हिंसायाम्' चुरादिः । अघ् (३।३।५६) ॥ (२६) ॥*॥ विशरणम् । 'शॄ हिंसायाम्' (क्र्या० प० से०) । 'ऋदोरप्' (३।३।५७) ॥ (२७) ॥*॥ हननम् । 'हन हिंसायाम्' (अ० प० अ०) । घञ् (३।३।१८) । 'हनस्तोऽचिण्णलोः' (७।३।३२) 'हो हन्तेर्ञ्णिन्नेषु' (७।३।५४) ॥ (२८) ॥*॥ उन्मथनम् । 'मथे हिंसायाम्' (भ्वा० प० से०) घञ् (३।३।१८) ॥*॥—मन्थतेर्घञ्—इति मुकुटः । तन्मते **'उन्मन्थः'** इति पाठः ॥ (२९) ॥*॥ हननम् । 'हनो वध च' (३।३।७६) इत्यप् ॥ (२०) ॥*॥ त्रिंशत् **'मारणस्य'** ॥

स्यात्पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः ।
अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनो स्त्रियाम्॥११६॥

स्यादिति ॥ पञ्चानां भावः । तल् (५।१।११९) ॥ **'पञ्चता** पञ्चभावे स्यान्मरणे च योषिति' (इति मेदिनी) ॥ (१) ॥*॥ कालस्य धर्मः ॥ (२) ॥*॥ दिष्टस्य दैवस्यान्तः ॥ (३) प्रलयनम् 'लीङ् श्लेषणे' (दि० आ० अ०) । 'एरच्' (३।३।५६) ॥ (४) ॥*॥ अत्ययनम् । 'इण् गतौ' (अ० प० अ०) । 'इ गतौ' (भ्वा० प० अ०) । 'एरच्' (३।३।५६) । **'अत्ययोऽतिक्रमे दण्डे विनाशे दोषकृच्छ्रयोः'** इति मेदिनी ॥ (५) ॥*॥ अन्तनम् । 'अति बन्धने' (भ्वा० प० से०) । घञ् (३।३।१८) । **'अन्तः** स्वरूपे निकटे प्रान्ते निश्चयनाशयोः । अवयवेऽपि' इति हैमः ॥ (६) ॥*॥ 'णश अदर्शने' (दि० प० से०) । घञ् (३।३।१८) ॥ **'नाशः** पलायने मृत्यौ परिध्वस्तावदर्शने' इति हेमचन्द्रः ॥ (७) ॥*॥ मरणम् । 'मृङ् प्राणत्यागे' (तु० आ० अ०) । 'भुजिमृङ्भ्यां युक्त्युकौ' (उ० ३।२१) इति त्युक् । **'मृत्युर्ना** मरणे यमे' इति मेदिनी ॥ (८) ॥*॥ 'ल्युट् च' (३।३।११५) ॥ (९) ॥*॥ निधानम् । कृपॄवृजिमन्दिनिधाञः क्युः (उ० २।८१) । **'निधनं** स्यात् कुले नाशे' (इति मेदिनी) ॥ (१०) ॥*॥ दश **'मरणस्य'** ॥

परासुप्राप्तपञ्चत्वपरेतप्रेतसंस्थिताः ।
मृतप्रमीतौ त्रिष्वेते

पेति ॥ परागता असवोऽस्मात् ॥ (१) ॥*॥ प्राप्तं पञ्चत्वं येन ॥ (२) ॥*॥ परं लोकमितः । परा दूरमितो वा । **'परेतो** वाच्यलिङ्गः स्यान्मृते भूतान्तरे पुमान्' (इति मेदिनी) ॥ (३) ॥*॥ प्रकर्षेण इतः । **'प्रेतो** भूतान्तरे पुंसि मृते स्याद्वाच्यलिङ्गकः' (इति मेदिनी) ॥ (४) ॥*॥ संतिष्ठते स्म । 'गत्यर्था–' (३।४।७२) इति क्तः ॥ (५) ॥*॥ म्रियते स्म । 'मृङ् प्राणत्यागे' (तु० आ० अ०) । 'गत्यर्था–' (३।४।७२) । **'मृतं** मृत्यौ याचिते च' इति हैमः ॥ (६) ॥*॥ प्रमीयते स्म । 'मीङ् हिंसायाम्' (क्र्या० आ० अ०) । 'गत्यर्था–' (३।४।७२) इति क्तः । **'प्रमीतं** वाच्यलिङ्गं स्यात्प्रोषितेऽपि मृतेऽपि च' इति मेदिनी ॥ (७) ॥*॥ त्रिषु परास्वादयः ॥*॥ सप्त **'मृतस्य'** ॥

चिता चित्या चितिः स्त्रियाम् ॥ ११७ ॥

चीति ॥ चीयते स्म । क्तः (३।२।१०२) । **'चितं** छन्ने त्रिषु **चिता** चित्यायां संहतौ स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ 'चित्याग्निचित्ये च' (३।१।१३२) इति क्यप् । **'चित्यं** मृतकचैत्ये स्याच्चित्या मृतचितौ स्त्रियाम्' (इति मेदिनी) ॥ (२) ॥*॥ क्तिन् (३।३।९४) । **'चितिश्चित्याद्वृन्दयोः स्त्री'** (इति मेदिनी) ॥ (३) ॥*॥ अधिकरणे वा प्रत्ययः ॥*॥ त्रीणि **'चित्याः'** ॥

कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेवरम् ।

केति ॥ कं बध्यते छिद्यतेऽस्मात् । 'बन्ध बन्धने' (क्र्या० प० अ०) । घञ् (३।३।११९) । केन वायुना बध्यते वा । **'कबन्धमुदके रुण्डे कबन्धो राहुरक्षसोः'** इति हैमः ॥ (१) ॥*॥ एकम् **'छिन्नशिरसो देहस्य'** ॥

श्मशानं स्यात्पितृवनम्

श्मेति ॥ शवाः शेरतेऽत्र । पृषोदरादिः (६।३।१०९) द्वितालव्यम् ॥ (१) ॥*॥ पितॄणां वनम् । पितॄन् वनति वा । 'वन संभक्तौ' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । **'वनं** नपुंसकं नीरे निवासालयकानने' इति मेदिनी ॥ (२) ॥*॥ द्वे **'प्रेतभूमेः'** ॥

कुणपः शवमस्त्रियाम् ॥ ११८ ॥

किति ॥ क्वणति । 'क्वण शब्दे' (भ्वा० प० से०) । 'क्वणेः संप्रसारणं च' (उ० ३।१४३) इति कपन् । **'(कुणपी** पुनः । विट्सारिकायां) **कुणपः** पूतिगन्धे शवेऽपि च' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ शवति । **'शव गतौ'** (भ्वा० प० से०) । अच् (३।१।१३४) । **('शवः** स्यात्कुणपे

पुमान् । नपुंसकं तु पानीये' इति (मेदिनी) ॥ (२) ॥*॥ द्वे **'मृतशरीरस्य'** ॥

प्रग्रहोपग्रहौ वन्द्यां

प्रेति ॥ गृह्यते । 'ग्रह उपादाने' (क्र्या० उ० से०) । 'गृहवृद-' (३।३।५८) इत्यप् । **'प्रग्रहस्तु** तुलासूत्रे वन्द्यां नियमने भुजे । हयादिरश्मौ रश्मौ च सुवर्णहरिपादपे' । (इति मेदिनी) ॥ (१) ॥*॥ **'उपग्रहः** पुमान् वन्द्यामुपयोगेऽनुकूलने' (इति मेदिनी) ॥ (२) ॥*॥ वन्द्यते, वन्दते वा । 'वदि अभिवादनस्तुत्योः' (भ्वा० अ० से०) । इन् (उ० ४।११८) ङीष् (ग० ४।१।४५) ॥ (३) ॥*॥ त्रीणि **'बन्दिशालायाः'** ॥

कारा स्याद्बन्धनालये ।

केति ॥ कीर्यतेऽत्र । 'कॄ विक्षेपे' (तु० प० से०) । 'भिदादिपाठात्' (३।३।१०४) अङ्टीर्घौ । **'कारो** वधे निश्चये च वलौ यत्ने यतावपि । **कार**स्तुषारशैले च **कारा** दूत्यां प्रसेवके । बन्धने बन्धनागारे हेमकारिकयोरपि' इति विश्वः) ॥ (१) ॥*॥ बन्धनस्यालयः ॥ (२) ॥*॥ द्वे **'बन्धनगृहस्य'** ॥

पुंसि भूम्न्यसवः प्राणाश्चैवम्

पुमिति ॥ अस्यन्ते, अस्यन्ति, वा । 'असु क्षेपणे' (दि० प० से०) । अस्यत एभिः, इति वा । 'अस दीप्तौ' (भ्वा० उ० से०) । 'शॄस्वृस्निहि-' (उ० १।१०) इत्युः । —बाहुलकात्—इति मुकुटस्तूपेक्ष्यः ॥ (१) ॥*॥ प्राणन्त्येभिः । 'अन प्राणने' (अ० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । **'प्राणो** हृन्मारुते बोले काव्यजीवेऽनिले बले । पुंलिङ्गः पूरिते वाच्यलिङ्गः पुंभूम्नि चासुषु' (इति मेदिनी) । एवं पुंसि भूम्नि च ॥ (२) ॥*॥ द्वे **'पञ्चवायूनाम्'** ॥

जीवोऽसुधारणम् ॥ ११९ ॥

जीति ॥ जीवनम् । 'जीव प्राणधारणे' (भ्वा० प० से०) । घञ् (३।३।१८) । **'जीवः** प्राणिनि वृत्तौ च वृक्षभेदे बृहस्पतौ । जीवा जीवन्तिकामौर्वीवचाशिञ्जितभूमिषु । न स्त्री तु जीविते' (इति मेदिनी) ॥ (१) ॥*॥ असूनां धारणम् ॥ (२) ॥*॥ द्वे **'जीवनस्य'** ॥

आयुर्जीवितकालो ना

आयुरिति ॥ एति । 'इण् गतौ' (अ० प० अ०) । र्णिच्च' (उ० २।११८) इत्युसिः ॥ (१) ॥*॥ जीवितस्य ः ॥ (२) ॥*॥ द्वे **'जीवावच्छिन्नकालस्य'** ॥

जीवातुर्जीवनौषधम् ।

जेति ॥ जीवत्यनेन । 'जीव प्राणधारणे' (भ्वा० प०) । 'जीवेरातुः' (उ० १।७८) । **'जीवातु**रस्त्रियां भक्ते जीविते जीवनौषधे' (इति मेदिनी) ॥ (१) ॥*॥ जीवनस्यौषधम् ॥ (२) ॥*॥ द्वे **'मृतसंजीवनौषधस्य'** ॥

इति क्षत्रियवर्गविवरणम् ॥

ऊरव्या ऊरुजा अर्या वैश्या भूमिस्पृशो विशः ।

विति ॥ ब्रह्मण ऊर्वोर्भवाः । 'शरीरावयवात्-' (४।३।५५) इति यत् ॥ (१) ॥*॥ ऊरोर्जाताः । 'जनी प्रादुर्भावे' (दि० आ० से०) । 'पञ्चम्यामजातौ' (३।२।९८) इति डः ॥ (२) ॥*॥ अर्यते । 'ऋ गतौ' (भ्वा० प० से०) । 'अर्यः स्वामिवैश्ययोः' (३।१।१०३) ॥ (३) ॥*॥ विशन्ति । 'विश प्रवेशने' (तु० प० अ०) । क्विप् (३।२।१७८) ॥ (६) ॥*॥ स्वार्थे ष्यञ् (वा० ५।१।१२४) ॥ (४) ॥*॥ भूमिं स्पृशन्ति । 'स्पृश स्पर्शने' (तु० प० अ०) । 'स्पृशोऽनुदके क्विन्' (३।२।५८) । **'भूमिस्पृक्** पुंसि मानववैश्ययोः' (इति मेदिनी) ॥ (५) ॥*॥ षट् **'वैश्यस्य'** ॥

आजीवो जीविका वार्ता वृत्तिर्वर्तनजीवने ॥ १ ॥

आजीति ॥ आजीव्यतेऽनेन । 'हलश्च' (३।३।१२१) इति घञ् ॥ (१) ॥*॥ जीव्यतेऽनया 'गुरोश्च हलः' (३।३।१०३) इत्यः । 'संज्ञायां कन्' (५।३।७५) । क्रुन् (उ० २।३२) वा । **'जीवकः** प्राणके पीतसारकृपणयोरपि । कूर्चशीर्षे च पुंसि स्यादाजीवे **जीविका** मता । त्रिषु सेविनि वृध्राशीजीविनोराहितुण्डिके' (इति मेदिनी) ॥ (२) ॥*॥ वृत्तिरस्त्रियाम् 'वृत्तेश्च' (वा० ५।२।१०१) इति णः । **'वार्ता** तु वर्तने वातिङ्गणे कृष्याद्युदन्तयोः । निःसाररोग्ययोः क्लीबे (वृत्तिमन्नीरुजोस्त्रिषु)' इति मेदिनी ॥ (३) ॥*॥ वर्ततेऽनया । क्तिन् (३।३।९४) । **'(वृत्ति**र्विवरणाजीवकैशिक्यादिप्रवर्तने' इति मेदिनी) ॥ (४) ॥*॥ वर्तन्ते जीवन्त्यनेन । ल्युट् (३।३।११७) । **'वर्तनो** वामने क्लीबं वृत्तौ स्त्री पेषणाध्वनोः । न पुंसि पूलनालायां तर्कुपिण्डे च जीवने । वर्तिष्णौ त्रिषु' (इति मेदिनी) ॥ (५) ॥*॥ जीवत्यनेन । ल्युट् (३।३।११७) ॥ (६) ॥*॥ षट् **'जीवनोपायस्य'** ॥

स्त्रियां कृषिः पाशुपाल्यं वाणिज्यं चेति वृत्तयः ।

स्त्रीति ॥ कर्षणम् । 'कृष विलेखने' (भ्वा० प० अ०) 'इकृष्यादिभ्यः' (वा० ३।३।१०८) ॥ (१) ॥*॥ पशून् पालयति । 'पाल रक्षणे' (चु० प० से०) 'कर्मण्यण्' (३।२।१) । तस्य कर्म भावो वा । ष्यञ् (५।१।१२४) ॥ (१) ॥*॥ वणिजां कर्म भावो वा । ष्यञ् (५।१।१२४) ॥*॥ 'दूतवणिग्भ्यां च' इति यप्रत्यये **'वणिज्या'** च । (सत्यानृतं तु वाणिज्यं वणिज्या') इति हैमनाममाला ॥ (१) ॥*॥ प्रत्येकं **'जीवानोपायस्यैकैकम्'** ॥

१—भाष्ये तु 'दूतवणिग्भ्यां च' इति नास्त्येव इति सिद्धान्तकौमुदी ॥

सेवा श्ववृत्तिः

सयिति ॥ सेवनम् । 'षेञ् सेवने' (भ्वा० आ० से०) । 'गुरोश्च हलः' (३।३।१०३) इत्यः ॥ (१) ॥*॥ शुनो वृत्तिरिव, शुन इव वृत्तिर्वा ॥ (२) ॥*॥ द्वे **'परचित्तानुवर्तनस्य'** ॥

अनृतं कृषिः

अन्रिति ॥ न ऋतम् । 'शुनो वृत्तिः स्मृता सेवा गर्हितं तद्विजन्मनाम् । हिंसादोषप्रधानत्वादनृतं कृषिरुच्यते' इति । **'अनृतं** कृषावसत्ये च' इति रुद्रः ॥*॥—**'प्रमृतम्'** इति तु सभ्यः पाठः—इति स्वामी । 'प्रमृतं कर्षणं स्मृतम्' (४।५) इति मनुः ॥ (१) ॥ (२) ॥*॥ द्वे **'कर्षणस्य'** ॥

उञ्छशिलं त्वृतम् ॥ २ ॥

विति ॥ उञ्छनम् । 'उञ्छि उञ्छे' (तु० प० से०) । घञ् (३।३।१८) ॥ (१) ॥*॥ शिलनम् । 'शिल उञ्छे' (तु० प० से०) । कः (वा० ३।३।५८) घञ् (३।३।१८) वा । संज्ञापूर्वकत्वान्न गुणः । **'उञ्छः** कणश आदानं कणिशाद्यर्जनं **शिलम्'** इति यादवः ॥ (२) ॥*॥ अर्यते । ऋच्छति वा । 'निष्ठा' (३।२।१०२) इति 'गत्यर्था–' (३।४।७२) इति वा क्तः । 'ऋतमुञ्छशिलं स्मृतम्' (४।५) इति मनुः । 'पुमानुञ्छः शिलभृतम्' इति बोपालितः ॥ (३) ॥*॥ त्रीणि **'खलादिपतितधान्यसंग्रहस्य'** ॥

द्वे याचितायाचितयोर्यथासंख्यं मृतामृते ।

द्वे इति ॥ मृतं चामृतं च ॥ [१](१) ॥*॥ प्रार्थनाऽप्रार्थनक्रिययोस्तत्कर्मणोर्वा एकैकम् **'याचितायाचितयोः'** ॥

सत्यानृतं वणिग्भावः स्यात्

सेति ॥ सत्यसहितमनृतम् । शाकपार्थिवादिः (वा० २।१।७८) ॥ (१) ॥*॥ वणिजो भावः (२) ॥*॥ द्वे **'वाणिज्यस्य'** ॥

ऋणं पर्युदञ्चनम् ॥ ३ ॥

उद्धारः

ऋणमिति ॥ अर्यते स्म । 'ऋ गतौ' (भ्वा० प० अ०) । क्तः (३।२।१०२) । **'ऋणमाधमर्ण्ये'** (८।२।६०) इति नत्वम् । **'ऋणं** देये जले दुर्गे' इति हैमः ॥ (१) ॥*॥ परित उदञ्च्यते । 'अञ्चु गतौ' (भ्वा० प० से०) । 'कृत्यल्युटः–' (३।३।११३) इति कर्मणि ल्युट् ॥ (२) ॥*॥ उद्ध्रियते । 'हृञ् हरणे' (भ्वा० उ० अ०) । 'धृञ् धारणे' (भ्वा० उ० अ०) वा । कर्मणि घञ् (३।३।१९) । **'उद्धारश्चोद्धृताशृणे'** इति मेदिनी ॥ (३) ॥*॥ त्रीणि **'ऋणस्य'** ॥

अर्थप्रयोगस्तु कुसीदं वृद्धिजीविका ।

अर्थेति ॥ अर्थस्य प्रयोगः ॥ (१) ॥*॥ कुस्यते । कुस संश्लेषणे' (दि० प० से०) । 'कुसेरुम्भो मेदेताः', (उ० ४।१०६) इतीदः । **'कुसीदं** वृद्धिजीवने । वृध्याजीवे' इति हैमः ॥ (२) ॥*॥ वृध्याजीविका ॥ (३) ॥*॥ त्रीणि **'ऋणसंबन्धिकालान्तरद्रव्येण लोके जीविकायाम्'** ॥

याच्ञयाप्तं याचितकम्

येति ॥ याचितेन याच्ञया निर्वृत्तम् । 'अपमित्ययाचिताभ्यां कक्कनौ' (४।४।२१) ॥ (१) ॥*॥ एकम् **'याच्ञया प्राप्तस्य'** ॥

निमयादापमित्यकम् ॥ ४ ॥

नीति ॥ अपमानम् । 'मेङ् प्रणिदाने' (भ्वा० आ० अ०) 'उदीचां माङो व्यतीहारे' (३।४।१९) इति क्त्वा । 'कुगति–' (२।२।१८) इति समासः । **'समासेऽनञ्'** (७।१।३७) इति ल्यबादेशः । 'मयतेरिदन्यतरस्याम्' (६।४।७०) इतीत्वम् । तुक् (६।१।७१) । 'अपमित्य–' आप्तम् । 'अपमित्य–' (४।४।२१) इति कक् ॥ (१) ॥*॥ 'नियमात्' इति 'विभाषा गुणेऽस्त्रियाम्' (२।३।२५) इति पञ्चमी ॥*॥ एकं **'परिवर्तनेनाप्तस्य'** ॥

उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात् ।

उत्तेति ॥ उत्तममृणमस्य ॥ (१) ॥*॥ अधममृणमस्य ॥ (१) ॥*॥ **'ऋणव्यवहारे धनस्वामिधनग्राहकयोः'** क्रमेणैककम् ॥

कुसीदिको वार्धुषिको वृद्ध्याजीवश्च वार्धुषिः ॥ ५ ॥

किति ॥ कुसीदार्थं प्रयच्छति । 'कुसीददशैक–' (४।४।३१) इति ष्ठन् ॥ (१) ॥*॥ वृद्धिं गर्ह्यां प्रयच्छति । 'प्रयच्छति गर्ह्यम्' (४।४।३०) इति ठक् । **'वृद्धेर्वृधुबिभावः'** (वा० ४।४।३०) ॥ (२) ॥*॥ वृद्धिराजीवो जीविकास्य ॥ (३) ॥*॥ पृषोदरादित्वात् (६।३।१०९) कलोपे वार्धुषिः ॥ (४) ॥*॥ चत्वारि **'ऋणं दत्त्वा तद्वृद्ध्या जीविनः'** ॥

क्षेत्राजीवः कर्षकश्च कृषकश्च कृषीवलः ।

क्षेत्रेति ॥ क्षेत्रमाजीवोऽस्य ॥ (१) ॥*॥ कर्षति । 'कृष विलेखने' (भ्वा० प० अ०) । ण्वुल् (३।१।१३३) ॥ (२) ॥*॥ कर्षति । 'कृषेर्वृद्धिश्चोदीचाम्' (उ० २।३८) इति कुन् ॥*॥ वृद्धिपक्षे **'कार्षकः'** अपि ॥ (३) ॥*॥ कर्षणम् । 'इकृष्यादिभ्यः' (वा० ३।३।१०८) । कृषिरस्यास्ति । 'रजः कृषि–' (५।२।११२) इति वलच् । 'वले' (६।३।११८) इति दीर्घः ॥ (४) ॥*॥ चत्वारि **'कृषीवलस्य'** ॥

क्षेत्रं व्रैहेयशालेयं व्रीहिशाल्युद्भवोचितम् ॥ ६ ॥

क्षयिति ॥ व्रीहीणाम् (१) शालीनाम् (१) च भवनं क्षेत्रम् । 'व्रीहिशाल्योर्ढक्' (५।२।२) ॥*॥ **'धान्यसामा-**

१—लक्ष्यादिन्नन्तोऽपि । 'श्रोत्रियस्य कदर्यस्य वदान्यस्यापि वार्धुषी'—इति स्वामी ॥

न्यस्य' 'कलमादेश्चोत्पत्तियोग्यक्षेत्रस्य' एकैकम् ॥

यव्यं यवक्यं षष्टिक्यं यवादिभवनं हि तत् ।

येति ॥ यवानाम् (१) यवकानाम् (१) षष्टिकानाम् (१) च भवनं क्षेत्रम् । 'यवयवकषष्टिकाद्यत्' (५।२।३) ॥*॥ यवकः शूकशून्यो यवः ॥*॥ एकैकम् **'यवादिभवनस्य'** ॥

तिल्यतैलीनवन्माषोमाणुभङ्गाद्विरूपता ॥ ७ ॥

तीति ॥ तिलानाम् (१) माषाणाम् (१) उमानाम् (१) अणूनाम् (१) भङ्गानाम् (१) च भवनं क्षेत्रम् । 'विभाषा तिल–' (५।२।४) इति यत्खञौ (१) ॥ (२) ॥*॥ **माष्यम्** ॥ (१) ॥*॥ **माषीणम्** ॥ (२) ॥*॥ **उम्यम्** ॥ (१) **औमीनम्** ॥ (२) ॥*॥ **अणव्यम्** ॥ (१) ॥*॥ **अणवीनम्** ॥ (२) ॥ **भङ्ग्यम्** ॥ (१) ॥ **भाङ्गीनम्** (२) ॥*॥ **'तिलादिभवनस्य'** प्रत्येकं द्वयं द्वयम् ॥

मौद्गीनकौद्रवीणादि शेषधान्योद्भवक्षमम् ।

मौद्गीति ॥ मुद्गानाम् (१) कोद्रवाणाम् (१) च भवनं क्षेत्रम् । 'धान्यानां भवने' (५।२।१) इति घञ् ॥*॥ आदिना **गौधूमीनम्** ॥ (१) ॥*॥ **कालायीनम्** ॥ (१) ॥*॥ **कौलत्थीनम्** ॥ (१) ॥*॥ **प्रैयङ्गवीणम्** ॥ (१) ॥*॥ **चाणकीनम्** ॥ (१) ॥*॥ इत्यादि ज्ञेयम् **'धान्योद्भवक्षेत्रस्य'** ॥

बीजाकृतं तूप्तकृष्टम्

बीति ॥ बीजेन सहकृतं कृष्टम् । 'कृञो द्वितीयतृतीयशम्बबीजात्कृषौ' (५।४।५८) इति डाच् ।—अबीजं सबीजं संपन्नम् । बीजाकृतम्—इति स्वामी । तन्न । 'अभूततद्भावे' इत्यस्यानुवृत्तेः ॥ (१) ॥*॥ (पूर्वम्) उप्तं च तत् (पश्चात्) कृष्टं च । 'पूर्वकाल–' (२।१।४९) इति समासः ॥ (२) ॥*॥ द्वे **'बीजवापोत्तरं कृष्टस्य'** ॥

सीत्यं कृष्टं च हल्यवत् ॥ ८ ॥

सीति ॥ सीतया संमितम् । 'नौवयोधर्म–' (४।४।९१) इति यत् ॥ (१) ॥*॥ कृष्यते स्म । क्तः (३।२।१०२) ॥ (२) ॥*॥ हलेन कृष्टम् । 'मतजनहलात्करणजल्पकर्षेषु' (४।४।९७) इति यत् ॥ (३) ॥*॥ हल्येन तुल्यम् । 'तेन तुल्यम्' (५।१।११५) इति वतिः ॥*॥ त्रीणि **'कृष्टमात्रस्य'** ॥

त्रिगुणाकृतं तृतीयाकृतं त्रिहल्यं त्रिसीत्यमपि तस्मिन्

त्रीति ॥ त्रिगुणं कृतम् । 'संख्यायाश्च गुणान्तायाः' (५।४।५९) इति डाच् ॥ (१) ॥*॥ तृतीयं कृतम् । 'कृञो द्वितीय–' (५।४।५८) इति डाच् ॥ (२) ॥*॥ त्रिवारं हलेन कृष्टम् । 'मतजन–' (४।४।९७) इति यत् । 'रथसीताहलेभ्यो यद्विधौ' (वा० १।१।७२) इति तदन्तविधेः ॥ (३) ॥*॥ त्रिवारं सीतया संमितम् । यत् (४।४।९१) ॥ (४) ॥*॥ चत्वारि **'वारत्रयकृष्टस्य'** ॥

द्विगुणाकृते तु सर्वं पूर्वं शम्बाकृतमपीह ॥ ९ ॥

द्वीति ॥ **द्वितीयाकृतम्** ॥ (२) ॥*॥ द्विहल्यम् ॥*॥ (३) ॥*॥ **द्विसीत्यम्** ॥ (४) ॥*॥ शमस्यास्ति 'कंशंभ्याम्' (५।२।१३८) इति वा । शम्बशब्दो द्वितीयकर्षणे वर्तते । शम्बं कृतम् । 'कृञो द्वितीय–' (५।४।५८) इति डाच् ॥*॥ 'सरित्सैरिभसम्बाकृतम्' इति दन्त्यादौ वर्णदेशना । तत्र 'षम्ब संबन्धे' (चु० प० से०) ण्यन्तः । सम्ब्यते । घञ् (३।३।१९) । अच् (३।३।५६) वा ॥ (५) ॥*॥ पञ्च **'द्विवारकृष्टस्य'** ॥

द्रोणाढकादिवापादौ द्रौणिकाढकिकादयः ।

द्रोणेति ॥ द्रोणस्य वापः । 'तस्य वापः' (५।१।४५) इति ठञ् ॥ (१) ॥*॥ आढकस्य वापः (५।१।४५) ॥ (१) ॥*॥ आदिना—प्रस्थस्य वापः । **प्रास्थिकः** ॥ (१) ॥*॥ कुडवस्य वापः । **कौडविकः** ॥ (१) ॥ 'वापादौ' इत्यादिना पचाद्यर्थग्रहः । द्रोणम्, आढकं च पचति (इत्यादि) । 'संभवत्यवहरति पचति' (५।१।५२) इति ठक् ॥*॥ **'द्रोणादिपरिमितव्रीह्यादिवापयोग्यक्षेत्रस्य'** एकैकम् ॥

खारीवापस्तु खारीकः

खेति ॥ खार्या वापः । 'खार्या ईकन्' (५।१।३३) ॥ (१) ॥*॥ एकम् **'खारीवापस्य'** ॥

उत्तमर्णाद्यस्त्रिषु ॥ १० ॥

उत्तेति ॥ (खारीकान्ता वाच्यलिङ्गाः) ॥

पुंनपुंसकयोर्वप्रः केदारः क्षेत्रम्

पुमिति ॥ उप्यतेऽत्र । 'डुवप् बीजसंताने' (भ्वा० उ० अ०) । 'वृधिवपिभ्यां रन्' (उ० २।२७) 'वप्रस्तातेे पुमानस्त्री रेणौ क्षेत्रे चये तटे' इति विश्वः (मेदिनी) । **'वप्रः** प्राकाररोधसोः । क्षेत्रे ताते चये रेणौ' इति हैमः ॥ (१) ॥*॥ के जले शिरसि वा दारोऽस्य । 'हलदन्तात्–' (६।३।९) इत्यलुक् । केन जलेन दीर्यत इति वा । 'दॄ विदारणे' (क्र्या० प० से०) । कर्मणि घञ् (३।३।१९) । 'केदाराद्यञ्च' (४।२।४०) इति निर्देशादेत्वम् । **'के'दारो** द्वौ शिवे क्षेत्रे भूमिभेदालवालयोः' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ क्षीयते धान्यैरत्र । 'क्षि निवासगत्योः' (तु० प० अ०) । ष्ट्रन् (उ० ४।१५९) । **'क्षेत्रं** भारतादौ भगाङ्गयोः । केदारे सिद्धभूपत्र्योः' इति हैमः । **'क्षेत्रं** शरीरे केदारे सिद्धस्थानकलत्रयोः' इति विश्वः ॥ (३) ॥*॥ त्रीणि **'क्षेत्रस्य'** ॥

१—केदार एकारवान् 'नमिताः फलभारेण नमिताः शालिमञ्जरीः । केदारेषु च पश्यन्तः के दारेषु विनिःस्पृहाः' इति दमयन्तीयमकात् ॥

अस्य तु ।

कैदारकं स्यात्कैदार्यं क्षेत्रं केदारिकं गणे ॥ ११ ॥

अस्येति ॥ केदाराणां समूहः । 'केदाराद्यञ्च' (४।२।४०) ॥ (२) ॥*॥ चात् (४।२।४०) वुञ् ॥ (१) ॥*॥ क्षेत्राणां समूहः । 'भिक्षादिभ्यः–' (४।२।३८) इत्यण् ।—'तस्य समूहः' (४।२।३७) इत्यण्—इति मुकुटः । तन्न । 'अचित्त–' (४।२।४७) इति ठकस्तदपवादत्वात् ॥ (३) ॥*॥ 'ठञ् कवचिनश्च' (४।२।४१) चात् केदारादपि ॥ (४) ॥*॥ चत्वारि **'क्षेत्रगणस्य'** ॥

लोष्टानि लेष्टवः पुंसि

लविति ॥ लोष्टति । 'लोष्ट संघाते' (भ्वा० आ० से०) पचाद्यच् (३।१।१३४) पुंलिङ्गोऽप्ययम् । 'लेष्टुः शण्डे(ठे)ऽपि लोष्टः स्यात्' इति बोपालितः ॥ (१) ॥*॥ लिश्यते, लिशति, वा । 'लिश गतौ' (तु० प० से०) । बाहुलकात्तुन् ।—'क्लादयश्च'—इति मुकुटस्त्वपाणिनीयः ॥ (२) ॥*॥ द्वे **'मृत्तिकाखण्डस्य'** ॥

कोटिशो लोष्टभेदनः ।

कविति ॥ कोटिना अग्रेण इयति 'शो तनूकरणे' (दि० प० अ०) । 'सुपि' (३।२।४) इति कः । कोटिरस्यास्तीति वा । लोमादित्वात् (५।२।१००) शः ॥ (१) ॥*॥ लोष्टानां भेदनः ॥ (२) ॥*॥ द्वे **'लोष्टभेदनकाष्ठस्य' 'हेगा'** इति ख्यातस्य ॥

प्राजनं तोदनं तोत्रम्

प्रेति ॥ प्रवीयतेऽनेन 'अज गतिक्षेपणयोः' (भ्वा० प० से०) ल्युट् (३।३।११५) । 'वा यौ' (२।४।५७) इति वी न ॥ (१) ॥*॥ तुद्यतेऽनेन 'तुद व्यथने' (तु० उ० अ०) ल्युट् (३।३।११५) ॥ (२) ॥*॥ 'दात्री–' (३।२।१८२) इति ष्ट्रन् । **'तोत्रं** तु प्राजने वेणुकेऽपि च' इति विश्वः (मेदिनी) ॥ (४) ॥*॥ त्रीणि **'वृषभादिप्रेरणदण्डस्य'** ॥

खनित्रमवदारणम् ॥ १२ ॥

खेति ॥ खन्यतेऽवदार्यतेऽनेन । 'खन खनने' (भ्वा० उ० से०) । 'अर्तिलूधू–' (३।२।१८४) इतीत्रः ॥ (१) ॥*॥ अवदार्यतेऽनेन । 'दृ विदारणे' (क्या० प० से०) । ण्यन्तः । ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'कुद्दालादेः'** ॥

दात्रं लवित्रम्

देति ॥ दात्यनेन । 'दाप् लवने' (अ० प० अ०) । 'दात्री–' (३।२।१८२) इति ष्ट्रन् ॥ (१) ॥*॥ लूयतेऽनेन । 'लूञ्' (क्या० उ० से०) । 'अर्ति–' (३।२।१८४) इतीत्रः ॥ (२) ॥*॥ द्वे **'लवित्रस्य'** ॥

आबन्धो योत्रं योक्त्रम्

आबेति ॥ आबध्यतेऽनेन । 'बन्ध बन्धने' (क्या० प० अ०) । 'हलश्च' (३।३।१२१) इति घञ् ॥ (१) ॥*॥ यूयतेऽनेन । 'यु मिश्रणे' (अ० प० से०) । 'दात्री–' (३।२।१८२) इति ष्ट्रन् ॥ (२) ॥*॥ युज्यतेऽनेन । 'युजिर् योगे' (रु० उ० अ०) ष्ट्रन् (३।२।१८२) ॥ (३) ॥*॥ त्रीणि **'वृषादेर्गले युगबन्धनस्य'** ॥

अथो फलम् ।

निरीशं कुटकं फालः कृषिकः

अथविति ॥ फलति । 'णिफला विशरणे' (भ्वा० प० से०) । अच् (३।१।१३४) । **'फलं** हेतुफले जातीफले फलकसस्ययोः । त्रिफलायां च कक्कोले शस्त्राग्रे व्युष्टिलाभयोः । **फली** फलिन्याम्' इति हैमः । स्वामी तु 'हलम्' इति पठित्वा 'हलप्रकरणमारब्धम्' इति व्याख्यत् ॥ (१) ॥*॥ ईशाया निर्गतम् । 'निरादयः' (वा० २।२।१८) इति समासः । स्वामी तु 'निष्क्रान्ता ईषास्मात्' इति विगृह्य **'निरीषम्'** इति मूर्धन्यान्तं पपाठ ॥ (२) ॥*॥ कुटति । 'कुट कौटिल्ये' (तु० प० से०) । क्कुन् (उ० २।३२) ॥*॥ मुकुटस्तु—कूटयति छिनत्ति । 'कूट छेदने' (चु० उ० से०) । इगुपधत्वात् (३।१।१३५) कः । कूटम् । ततः स्वार्थे कन् (ज्ञापि० ५।४।५)—इति वदन् (**कूटकम्**) दीर्घादि मन्यते । अत्र पचाद्यच् (३।१।१३४) उचितः । न तु कः । ण्यन्तस्येगुपधत्वाभावात् ॥ (३) ॥*॥ फालयति । 'णिफला विशरणे' (भ्वा० प० से०) । ण्यन्तादच् (३।१।१३४) । 'फाल उत्खनौ । क्लीबं सीरोपकरणे पुंसि शंकरसीरिणोः' ( ) ॥ (४) ॥*॥ कृषति । 'कृष विलेखने' (तु० उ० अ०) । 'कृषिवृश्च्योः किकन्' (उ० २।४०) । **'कृषिकाकृषिकौ** फालकृषकौ' इति रुद्रात् स्त्रियामपि ॥*॥ क्कुनि (उ० २।३२) तु कृषकः । स्वामी तु—'शिल्पिनि ष्वुन्' (३।१।१४५)–इत्याह । तन्न । फलस्य शिल्पित्वाभावात् । परिगणनाच्च । 'कृषकः पुंसि फाले स्यात्कर्षके त्वभिधेयवत्' इति विश्वः (मेदिनी) ॥ (५) ॥*॥ पञ्चापि **'फालस्य'**—इति कलिङ्गः–द्वयं यत्र काष्ठे फालो निबध्यते तस्य । अन्यद्वयं तु फालस्य–इति स्वामी ॥

लाङ्गलं हलम् ॥ १३ ॥

गोदारणं च सीरः

लेति ॥ लङ्गति । 'लगि गतौ' (भ्वा० प० से०) । बाहुलकात्कलच् । दीर्घश्च ।—'कलम्बा (म्बला) दयश्च'–इति मुकुटस्त्वपाणिनीयः । **'लाङ्गली** तोयपिप्पल्यां क्लीबं तु कुसुमान्तरे । गोदारणे तृणराजगृहदारुविशेषयोः' (इति मेदिनी) ॥ (१) ॥*॥ हलति । 'हल विलेखने' (भ्वा० प० से०) । अच् (३।१।१३४) ॥*॥ 'ज्वलिति–' (३।१।१४०) इति णे 'हालः' अपि । **'हालः फालवहः सीता'** इति विक्रमादित्यः ॥ (२) ॥*॥ गां भूमिं दारयति । ल्युट् (३।३।११३) ।—गौर्भूमिर्दार्यतेऽनेन । करणे ल्युट (३।३।११७) । नन्द्यादि (३।१।

१—स्वामिग्रन्थे तु 'कुन् शिल्पिसंज्ञयोः'-(उ० २।१२)—इत्येव पाठो दृश्यते ॥

१३३) त्युर्वा मुकुटः । तन्न । त्योः कर्तरि विधानात्करणेऽसंभवात् ॥ (३) ॥*॥ सिनोति, सीयते, वा । 'षिञ् बन्धने' (स्वा० उ० अ०) । 'सूसिमिचीनां दीर्घश्च' (उ० २।२५) इति क्रन् दीर्घत्वं च । 'हलतिग्मकरौ **सीरौ**' इति दन्त्यादौ रभसः । '**सीरः** स्यादंशुमालिनि । लाङ्गले' इति हैमः ॥ (४) ॥*॥ चत्वारि '**हलस्य**' ॥

अथ शम्या स्त्री युगकीलकः ।

अथेति ॥ शम्यतेऽनया । 'शम उपशमे' (दि० प० से०) अङ्यादिः (उ० ४।११२) ॥ (१) ॥*॥ युगस्य कीलः स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ द्वे '**युगस्य कीलके**' ॥

ईशा लाङ्गलदण्डः स्यात्

ईशेति ॥ ईष्टे 'ईश ऐश्वर्ये' (अ० आ० से०) । 'इगुपध–' (३।१।१३५) इति कः । 'प्रभुशंकरयोरीशः स्त्रियां लाङ्गलदण्डके' इति तालव्यान्ते रुद्ररभसौ । '**ईशः** स्वामिनि रुद्रे च स्यादीशा हलदण्डके' इति शान्ते विश्वः ॥*॥ ईषते । 'ईष गत्यादौ' (भ्वा० आ० से०) । 'इगुपध–' (३।१।१३५) उभयत्र करणे 'गुरोश्च' (३।३।१०३) इत्यो वा । '**ईषा** पेटी मञ्जूषा' इति मूर्धन्यान्ते चन्द्रगोमी ॥ (१) ॥*॥ लाङ्गलस्य दण्डः ॥ (२) ॥*॥ द्वे '**हलयुगयोर्मध्यकाष्ठस्य**' ॥

सीता लाङ्गलपद्धतिः ॥ १४ ॥

सीति ॥ सीयते । 'षिञ् बन्धने' । (स्वा० उ० अ०) क्तः (३।२।१०२) पृषोदरादिः (६।३।१०९) ।—स्यति भुवम् । 'षोऽन्तकर्मणि' (दि० प० अ०) (बाहुलकात्) क्तः । 'घुमास्था–' (६।४।६६) इतीत्वम्–इति मुकुटः । तन्न । 'यतिस्यतिमास्था–' (७।४।४०) इति विशेषविहितेनेत्वेन बाधात् । '**सीता** लाङ्गलरेखा स्याज्ज्योमगङ्गा च जानकी' इति दन्त्यादौ रभसः । '**सीता** जनकजागङ्गामेदयोर्हलपद्धतौ' इति दन्त्यादौ हैमः ॥*॥ शेते स्म । 'शीङ् स्वप्ने' (अ० आ० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । '**शीता** नभःसरिति लाङ्गलपद्धतौ च **शीता** दशाननरिपोः सहधर्मिणी च । **शीतं** स्मृतं हिमगुणे च तदन्विते च **शीतोऽल्से** च बहुवारतरौ च हृष्टः' इति तालव्यादौ धरणिः ॥ (१) ॥*॥ लाङ्गलस्य पद्धतिः ॥ (२) ॥*॥ द्वे '**लाङ्गलकृतरेखायाः**' ॥

पुंसि मेधिः खले दारु न्यस्तं यत्पशुबन्धने ।

प्वेति ॥ मेध्यन्ते पशवोऽत्र । 'मेधृ संगमे' (भ्वा० उ० से०) इन् (उ० ४।११८) । स्वामी तु—'मेथिः' इति पठति । तत्र 'मेथृ संगमे' इति धातुर्बोध्यः ॥ (१) ॥*॥ एकम् '**धान्यखले पशुबन्धनस्तम्भस्य**' ॥

आशुव्रीहिः पाटलः स्यात्

आश्विति ॥ अश्नुते । 'अशू व्याप्तौ' (स्वा० आ० से०) । 'कृवापा–' (उ० १।१) इत्युण् । '**आशुस्तु** व्रीहिशीघ्रयोः' इति हैमचन्द्रः । 'तृणबीजं तु श्यामाको, व्रीहिराशु च पाटलः' इति (पर्याये) क्लीबमाशु । '**आशु** स्याद्व्रीहिशीघ्रयोः' इति रत्नमालायामपि क्लीबम् ॥ (१) ॥*॥ वर्हत्युपचयं गच्छति । 'वृह वृद्धौ' (भ्वा० प० से०) । 'इगुपधात् कित्' (उ० ४।१२०) इति इन् । पृषोदरादिः (६।३।१०९) । व्रीयते । 'व्रीङ् गत्याम्' (दि० आ० अ०) । बाहुलकाद् हिक्, वा ॥ (२) ॥*॥ पाटं लाति । कः (३।२।३) । पाटलो वर्णेऽस्यास्ति, इति वा ॥ (३) ॥*॥ पाटलः, व्रीहिः, आशु, च इति नामत्रयम् । आशुनामा व्रीहिः पाटल उच्यते इति नामद्वयम्–इति सुभूतिः । 'आशुव्रीहौ **पाटलो** ना श्वेतरक्तेऽन्यलिङ्गवान्' इति रुद्रः ॥*॥ त्रीणि '**षष्टिकादेः**' ॥

सितशूकयवौ समौ ॥ १५ ॥

सीति ॥ सितं शूकं यस्य, इति मध्यतालव्यः ॥*॥—(**शितशूकः**) द्वितालव्यः—इति स्वामी ॥ (१) ॥*॥ यौति । यूयते वा । अच् (३।१।१३४) । अप् (३।३।५७) वा० । '**यवो** धान्येऽपृथक्कृतौ' इति हैमः ॥ (२) ॥*॥ द्वे '**यवानाम्**' ॥

तोक्मस्तु तत्र हरिते

तविति ॥ तकति । तक्यते वा 'तक सहने हासे च' (भ्वा० प० से०) । बाहुलकान्मः, ओलम्, च । ('**तोक्मं** कर्णमले, पुंसि हरिते च हरिद्रवे' इति मेदिनी) ॥ (१) ॥*॥ एकम् '**अपक्वयवस्य**' ॥

कलायस्तु सतीनकः ।
हरेणुखण्डिकौ चास्मिन्

केति ॥ कलयते 'अय गतौ' (भ्वा० आ० से०) अण् (३।२।१) ।—कं वातं लाति । 'आतः–' (३।२।३) इति कः । 'आतः–'(७।३।३३) इति युक्—इति मुकुटः । तन्न । णिति णिति परे विहितस्य युकः के अप्रसङ्गात् ॥ (१) ॥*॥ सति जीवे इनः प्रभुः । 'संज्ञायाम्' (२।१।४४) इति समासः । 'हलदन्तात्' (६।३।९) इत्यलुक् । सतीनं वायुं करोति । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः ।—प्रज्ञाद्यणि (५।४।३८) '**सातीनकः**' अपि—इति माधवी ॥ (२) ॥*॥ हरति । 'हृञ् हरणे' (भ्वा० उ० अ०) । 'कृहृभ्यामेणुः' (उ० २।१) । '**हरेणुः** स्त्री रेणुकायां स तु पुंसि सतीनके' इति रभसात्पुंसि ॥ (३) ॥*॥ खण्डोऽस्यास्ति । 'अत इनिठनौ' (५।२।११५) इति ठन् ॥ (४) ॥*॥ 'कलायस्त्रिकटः प्रोक्तः सतीनो वर्तुलो मतः । हरेणुरङ्कटो ज्ञेयः' इति व्याडिः ॥*॥ चत्वारि '**रेणुकस्य**' ॥

कोरदूषस्तु कोद्रवः ॥ १६ ॥

कोरेति ॥ कोरं रुधिरं दूषयति । 'दुष वैकृत्ये' (दि० प० अ०) । ण्यन्तः । 'कर्मण्यण्' (३।२।१) ॥ (१) ॥*॥ कौति । 'कु शब्दे' (अ० प० अ०) । कवते । 'कुङ् शब्दे' (भ्वा० आ० अ०) । विच् (३।२।७२) । द्रवति । 'द्रु गतौ' (भ्वा० प० अ०) । अच् (३।१।१३४) । कौश्वासौ द्रवश्च । केन वायुना द्रवति वा । पृषोदरादिः (६।३।१०९) ॥ (२) ॥*॥ द्वे **'कोद्रवस्य'** ॥

मङ्कल्यको मसूरः

मेति ॥ मङ्कले साधुः । 'तत्र साधुः' (४।४।९८) इति यत् । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (१) ॥*॥ मस्यति, मस्यते वा । 'मसी परिणामे' (दि० प० से०) । 'मसेरुरन्' (उ० ५।३) इत्यूरनि दीर्घमध्यः ।—'खार्जिपिञ्जादिभ्य ऊरोलचौ' (ऊ० ४।९०) इत्यूरः—इति मुकुटस्त्वेतत्सूत्राज्ञानमूलकः 'मसेश्च' (उ० १।४३) इत्युरनि ह्रस्वमध्यश्च । 'वैश्यायां व्रीहिभेदे च **मसूरा मसुरा** स्त्रियाम् । **मसूरमसुरौ** पुंसि द्वावेतावपि चैतयोः' इति रभसः ॥ (२) ॥*॥ द्वे **'मसूरस्य'** ॥

अथ मकुष्ठकमयुष्ठकौ ।

वनमुद्गे

अथेति ॥ मङ्कति, मङ्क्यते वा । 'मकि मण्डने' (भ्वा० आ० से०) । बाहुलकादुः, नुमभावश्च । तिष्ठति । 'ष्ठा गतिनिवृत्तौ' (भ्वा० प० अ०) । कुन् (उ० २।३२) । मकुटश्चासौ स्थकश्च । 'पूर्वपदात्–' (८।३।१०६) इति षत्वम् । मुकुटस्तु—आद्यचमुकारमाह ॥*॥ विश्वमेदिन्योस्तु **'मुकुष्ठो**व्रीहिभेदे स्यात् (**मकुष्ठो** मन्थरेऽन्यवत्') इति टवर्गद्वितीयान्तः ॥ (१) ॥*॥ मिनोति । 'डुमिञ् प्रक्षेपणे' (स्वा० उ० अ०) । 'भृमृशीङ्–' (उ० १।७) इत्युः । मयश्चासौ स्थकश्च । मुकुटस्तु—मयति । 'मय गतौ' (भ्वा० आ० से०) । 'पुंसि–' (३।३।११८) इति घः । मयो गन्ता । तस्य स्तकः प्रतिबन्धकः । 'ष्ठक प्रतिघाते' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । मयस्य स्तको मयष्ठकः । नैरुक्तो वर्णविकारः—इत्याह । तत्र 'मयते' इत्युदितत्वात् । घः (३।३।११८) अप्ययुक्तः । तस्य कर्तर्यविधानात् ॥ (२) ॥*॥ वनस्य मुद्गः ॥ (३) ॥*॥ त्रीणि **'वनमुद्गस्य' 'मोट'** इति ख्यातस्य ॥

सर्षपे तु द्वौ तन्तुभकदम्बकौ ॥ १७ ॥

सेति ॥ सरति स्नेहोऽस्मात् । 'सृ गतौ' (भ्वा० प० अ०) । 'सर्तेरपः षुक्च' (उ० ३।१४१) इत्यपः षुगागमश्च । 'सर्षपः स्यात् **सरिषपः कुटस्नेहश्च** तन्तुभः' इति त्रिकाण्डशेषः ॥ (१) ॥*॥ तन्तुना भाति । 'भा दीप्तौ' (अ० प० से०) । 'सुपि–' (३।२।४) इति कः ॥*॥ स्वामी तु—तुदति । **तुन्तुभः**—इत्याह । बाहुलकादुभच् । पृषोदरादिः (६।३।१०९) ॥ (२) ॥*॥ कन्दति, कन्दयति, वा । 'कदि हिंसायाम्' 'कदि आह्वाने रोदने च' (भ्वा० प० अ०) । 'कृकदिकडिकटिभ्योऽम्बच्' । (उ० ४।८२) । अनित्यत्वान्न नुम् । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (३) ॥*॥ त्रीणि **'सर्षपस्य'** ॥

सिद्धार्थस्त्वेष धवलः

सीति ॥ सिद्धोऽर्थोऽस्मात् । 'सरिषपः' सिते तस्मिन् **'रक्षोघ्नो भूतनाशनः'** इति रभसः । **'सिद्धार्थस्तु** पुमान् शाक्यसिंहे च सितसर्षपे' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ एकम् **'श्वेतसर्षपस्य'** ॥

गोधूमः सुमनः समौ ।

गविति ॥ गुध्यति, गुध्यते, वा । 'गुध परिवेष्टने' (दि० प० से०) । 'गुधेरूमः' (उ० ५।२) । **'गोधूमो** नागरङ्गे स्यादोषधिव्रीहिभेदयोः' (इति मेदिनी) ॥ (१) ॥*॥ सुष्ठु मन्यते । 'मन ज्ञाने' (दि० आ० अ०) । अच् (३।१।१३४) । 'गोधूमसुमनौ समौ' इति रभसः ॥ (२) ॥*॥ द्वे **'गोधूमस्य'** ॥

स्याद्यावकस्तु कुल्माषः

स्येति ॥ यौति 'यु मिश्रणे' (अ० प० से०) । 'कृवापाजिमिस्वदिसाध्यशूभ्यो वुन्' (उ० ५।३५) । ततः प्रज्ञाद्यण् (५।४।३८) ॥ (१) ॥*॥ कुलं मस्यति 'मसी परिणामे' (दि० प० से०) 'कर्मण्यण्' (३।२।१) पृषोदरादिः (६।३।१०९) । दन्त्यान्तः इति मुकुटः ॥*॥ कुत्सितो माषः । **'कुल्माषो** यावकः पुंसि' इति मूर्धन्यान्तेषु रभसः ॥ (२) ॥*॥—कुल्माषोऽर्धस्विन्नो यवादिः—इति स्वामी ।—शूकशून्यो यवादिः—इति रक्षितादयः ॥*॥ द्वे **'अर्धस्विन्नस्य यवादेः'** ॥

चणको हरिमन्थकः ॥ १८ ॥

चेति ॥ चण्यते । 'चण दाने' (भ्वा० प० से०) । कुन् (उ० २।३२) ॥ (१) ॥*॥—हरीणां मन्थं जनयति । 'अन्येष्वपि–' (३।२।१०१) इति डः—इति मुकुटः । तत्र । 'हरिमन्थजः' इति पाठप्रसङ्गात् । हरिभिर्मथ्यते । 'मथे विलोडने' (भ्वा० प० से०) कर्मणि घञ् (३।३।१९) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ द्वे **'चणकस्य'** ॥

द्वौ तिले तिलपेजश्च तिलपिञ्जश्च निष्फले ।

द्वाविति ॥ निष्पलस्तिलः । 'तिलाच्चिष्पलातिपञ्जपेजौ' (वा० ४।२।३६) ॥ (१) ॥*॥ (२) ॥*॥ 'जर्तिलः' अपि । **'जर्तिलः** कथ्यते सद्भिररण्यप्रभवस्तिलः' ॥*॥ द्वे **'तैलहीनतिलस्य'** ॥

क्षवः क्षुधाभिजननो राजिका कृष्णिकासुरी ॥१९॥

क्षेति ॥ क्षौति । 'टु क्षु शब्दे' (अ० प० से०) । ण्यर्थः । अच् (३।१।१३४) । (**'क्षवः** क्षुते राजिकायाम्' इति मेदि-

नी) ॥ (१) ॥*॥ क्षुधामभिजनयति । नन्द्यादिः (३।१।१३३) ॥*॥—क्षुतमभिजनयति । **'क्षुताभिजननः'**—इति स्वामी ॥ (२) ॥*॥ राजति, राजयति वा । क्नुन् (उ० २।३२) ॥ (३) ॥*॥ कृष्णैव । 'संज्ञायां कन्' (५।३।७५) (४) ॥*॥ असुरस्येयम् । अण् (४।३।१२१) । अस्यति वा । 'असेरुरन्' (उ० १।४२) । प्रज्ञाद्यण् (५।४।३८) ॥ (५) ॥*॥ पञ्च **'कृष्णसर्षपस्य' 'राई'** इति ख्यातस्य ॥

स्त्रियौ कङ्गुप्रियङ्गू द्वे

स्त्रीति ॥ कमङ्गति । 'अगि गतौ' (भ्वा० प० से०) । ण्यन्तो वा । मृगय्वादित्वात् (उ० १।३७) कुः । शकन्ध्वादिः (वा० ६।१।९४) । कं सुखं गच्छति । 'गम्लृ गतौ' (भ्वा० प० अ०) । मितद्वादित्वात् (वा० ३।२।१८०) ङुः ॥ (१) ॥*॥ एवं प्रियं गच्छति ॥ (१) ॥*॥ द्वे **'प्रियङ्गोः'** ॥

अतसी स्यादुमा क्षुमा ।

अतेति ॥ अतति । 'अत सातत्यगमने' (भ्वा० प० से०) । 'अत्यविचमि–' (उ० ३।११७) । गौरादिः (४।१।४१) ॥ (१) ॥*॥ उं शिम्बं माति, मिमीते, वा । 'मा' (अ० प० अ०) 'माङ् माने' (जु० आ० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । अवते, ऊयते, वा 'ऊङ् शब्दे' (भ्वा० आ० अ०) । 'विभाषा तिलमाषोमा–' (५।२।४) इति निपातनान्मक् इति वा । **'उमा**तसी हैमवतीहरिद्राकीर्तिकान्तिषु' (इति मेदिनी) ॥ (२) ॥*॥ क्षौति, क्ष्यूयते, वा । 'टु क्षु शब्दे' (अ० प० अ०) । बाहुलकान् मक् । 'अर्तिस्तुसुहुसृ–' (उ० १।१४०) इति मन् वा । संज्ञापूर्वकत्वान्न गुणः ।—क्षुवते—इति मुकुटस्य प्रमादः । क्षौतेरादिकत्वात् । **'क्षु**मातसीनीलिकयोः' इति विश्वः ॥ (३) ॥*॥ त्रीणि **'अतस्याः'** ॥

मातुलानी तु भङ्गायाम्

मेति ॥ मायास्तुला । मातुलामानयति । 'अन प्राणने' (अ० प० से०) गतौ वा । 'कर्मण्यण्' (३।२।१) । ङीष् (४।१।१४) । मातुलस्य धत्तूरस्य स्त्रीव वा । 'मातुलोपाध्याययोर्डीषानुकौ' (वा० ४।१।४९) ॥ (१) ॥*॥ भज्यते । अनया वा । 'भञ्जो आमर्दने' (रु० प० से०) । 'अकर्तरि च' (३।३।१९) इति 'हलश्च' (३।३।१२१) इति वा घञ् । 'तरङ्गभेदयोर्भङ्गो **भङ्गा** शस्यशणाह्वये' इति रुद्रः ॥ (२) ॥*॥ द्वे **शणाख्यशस्यभेदस्य'** ॥

व्रीहिभेदस्त्वणुः पुमान् ॥ २० ॥

व्रीति ॥ व्रीहिविशेषः । अणति । 'अण शब्दे' (भ्वा० , से०) । 'अणश्च' । 'धान्ये नित्' (१।८।९) इत्युः । **अणु**र्व्रीह्यल्पयोः' इति हैमः ॥ (१) ॥*॥ एकम् **'चीना'** ॥ ख्यातस्य ॥

किंशारुः शस्यशूकं स्यात्

किमिति ॥ किंचित् कुत्सितं वा श्रृणाति । 'शॄ हिंसायाम्' (क्या० प० से०) । 'किंजरयोः श्रिणः' (उ० १।४) इत्युण् । 'अथ **किंशारु**र्धान्यशूके शरेऽपि च' इति हैमः ॥ (१) ॥*॥ शस्यस्य शूकम् ।—शस्यस्य शूकः–इति मुकुटः ॥ (२) ॥*॥ द्वे **'यवाद्यग्रस्य'** ॥

कणिशं शस्यमञ्जरी ।

केति ॥ कणयः कणाः सन्त्यस्य । लोमादित्वात् (५।२।१००) शः । कणिनं स्वावयवं श्यति वा । 'शो तनूकरणे' (दि० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । **'कणिशो** धान्यशीर्षके' इति तालव्यान्ते रत्नकोषः ॥ (१) ॥*॥ शस्यस्य मञ्जरी ॥ (२) ॥*॥ द्वे **'धान्यमञ्जर्याः'** ॥

धान्यं व्रीहिः स्तम्बकरिः

धेति ॥ धाने पोषणे साधुः । 'तत्र साधुः' (४।४।९८) इति यत् । **'धान्यं** तु व्रीहौ धान्याके' इति हैमः ॥ (१) ॥*॥ व्रीणाति । 'व्री वरणे' (क्या० प० अ०) । 'व्रीहिशाल्योर्ढक्' (५।२।२) इति ज्ञापकाद् हिक् । **'व्रीहिः** सामान्यधान्ये स्यादाशुधान्ये च पुंस्ययम्' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ स्तम्बं करोति । 'स्तम्बशकृतोरिन्' (३।२।२४) । व्रीहिसाहचर्यात्पुंस्त्वम् ॥ (३) ॥*॥ त्रीणि **'धान्यसामान्यस्य'** ॥

स्तम्बो गुच्छस्तृणादिनः ॥ २१ ॥

स्तेति ॥ तिष्ठति । अत्र वा । 'ष्ठा गतिनिवृत्तौ' (भ्वा० प० अ०) 'स्यः स्तोऽम्बजबकौ' (उ० ४।९६) ॥ (१) ॥*॥ गवनम् । 'गुङ् शब्दे' (भ्वा० आ० अ०) । 'संपदादिक्विप्' (वा० ३।३।१०८) । तुक् (६।१।७१) । गुतं छयति । 'छो छेदने' (दि० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥ (२) ॥*॥ आदिना व्रीहियवादिग्रहः ॥*॥ द्वे **'यवादीनां मूलस्य'** ॥

नाडी नालं च काण्डोऽस्य

नेति ॥ नलत्यनेन । 'णल गन्धे' (भ्वा० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । नालयति । अच् (३।१।१३४) वा । डलयोरेकत्वम् । गौरादिः (४।१।४१) । **'नाडी** कुहनचर्यायां घटिकागण्डदूर्वयोः । नाले गुणान्तरे स्नायौ' इति हैमः

१—धान्यपदेन सप्तदश धान्यान्युच्यन्ते । व्रीहि (१) यव (२) मसूर (३) गोधूम (४) मुद्ग (५) माष (६) तिल (७) चणक (८) अणु (९) प्रियंगु (१०) कोद्रव (११) मकुष्ठक (१२) कलाय (१३) कुलत्थ (१४) शठ (१५) सर्षप (१६) अतसी (१७) इति सप्तदश—इति मुकुटः ॥ महाभाष्ये (५।२।४) सूत्रे तु 'शणसप्तदशानि धान्यानि' इत्युक्तम् । २—गुणान्तरं चमैरज्जुविशेषः । तत्र यथा 'नाडीभिर्नह्यते युगम्' —इत्यनेकार्थकैरवाकरकौमुदी । 'व्रणान्तरे' इति पाठ आसीत् ॥

॥ (१) ॥*॥ **'नालं** काण्डे मृणाले च **नाली** शाककलम्बके' इति च (हैमः) ॥ (२) ॥*॥ कणति । 'कण शब्दे' (भ्वा० प० से०) । 'जमन्ताड्डः' (उ० १।११४) । बाहुलकाद्दीर्घः । काण्यन्ते वा । **'काण्डो** नालेऽधमे वर्गे द्रुस्कन्धेऽवसरे शरे । सैंह श्लाघाम्बुषु स्तम्बे' इति हैमः ॥ (३) ॥*॥ अस्य गुच्छस्य ॥*॥ त्रीणि **'तृणादिकाण्डस्य'** ॥

पलालोऽस्त्री स निष्फलः ।

पेति ॥ पलति, पल्यते, वा । 'पल गतौ' (भ्वा० प० से०) । 'तमिविशिविडिमृणिकुलिकपिपलिपच्चिभ्यः कालन्' (उ० १।११८) ।—बाहुलकात्—इति मुकुटस्य प्रमादः । पलमलति वा 'अल भूषणादौ' (भ्वा० प० से०) । अण् (३।२।१) ॥ (१) ॥*॥ स काण्डः ॥*॥ एकम् **'धान्यरहितकाण्डस्य'**

कडङ्करो वुसं क्लीबे

केति ॥ गृणाति 'गृ शब्दे' (क्रया० प० से०) । गिरति । 'गृ निगरणे' (तु० प० से०) वा अच् (३।१।१३४) । कडस्य गरः । 'कडंगर–' (५।१।६९) इति निर्देशान्मुक् । यद्वा कडति 'कड मदे' (भ्वा० प० से०) । क्विप् (३।२।१७८) । कड् च तदङ्गं च । कडङ्गं राति । 'रा दाने' (अ० प० अ०) । कः (३।२।३) ॥ **'कडङ्कर'** इति हरदत्तपाठे कृल् धातुः ॥ (१) ॥*॥ वुसति 'वुस उत्सर्गे' । (तु० प० से०) । 'इगुपध' (३।१।१३५) इति कः (वुसं दन्त्यमिति धातुप्रदीपः) ॥*॥ **'वुषवेषतुषारतोषाः'** इति षभेदान्मूर्धन्यान्तमपि ॥ (२) ॥*॥ द्वे **पलालादिक्षोदस्य'** ॥

धान्यत्वचि पुमांस्तुषः ॥ २२ ॥

धेति ॥ धान्यस्य त्वक् ॥ (१) ॥*॥ तुष्यति । 'तुष तुष्टौ' (दि० प० अ०) । 'इगुपध–' (३।१।१३६) इति कः । **'तुषस्तु** धान्यत्वचि विभीतके' इति हेमचन्द्रः ॥ (२) ॥*॥ द्वे **'तुषस्य'** ॥

शूकोऽस्त्री श्लक्ष्णतीक्ष्णाग्रे

श्विति ॥ श्यति । 'शो तनूकरणे' (दि० प० अ०) । 'उल्लूकादयश्च' इति साधुः । (उ० ४।४१) । **'शूकोऽनुकोशशुङ्गयोः'** इति विश्वः ॥ (१) ॥*॥ श्लक्ष्णं कृशं च तत्तीक्ष्णं च तदग्रं च ॥ (२) ॥*॥ किंशारोरन्यः शूको निर्दिष्टः । शूकधान्यशमीधान्यवेदार्थं वा पुनरुक्तः ॥*॥ द्वे **'तीक्ष्णाग्रधान्यस्य'** ॥

शमी सिम्बा

शेति ॥ शाम्यति । 'शम उपशमे' (दि० प० से०) । अच् (३।३।१३४) । गौरादिः (४।१।४१) । **'शमी** सक्तुफलायां च शिम्बिकायां च वल्गुलौ' (इति मेदिनी) ॥ (१) ॥*॥ समति 'षम वैक्लव्ये' (भ्वा० प० से०) । 'उल्बादयश्च' (उ० ४।९५) इति साधुः ॥*॥—शिनोति 'शिञ् निशाने' (स्वा० उ० अ०) । **('शिम्बा'** । **'शिम्बिः' 'शिम्बिः'** इत्यपि–)—इति स्वामी ॥ (२) ॥*॥ द्वे **'शिम्बायाः' 'छिम्बि'** इति ख्यातायाः ॥

त्रिषूत्तरे ।

त्रीति ॥ उत्तरे बहुलीकृतान्ताः ॥

ऋद्धमावसितं धान्यम्

रिति ॥ ऋध्यते स्म । 'ऋधु वृद्धौ' (दि० प० से०) । क्तः (३।२।१०२) । **'ऋद्धं** संपन्नधान्ये च सुसमृद्धे तु वाच्यवत्' इति विश्वः (मेदिनी) ॥*॥ **'रिद्धं'** संसिद्धम् । राधेः (स्वा० प० उ०)—इति स्वामी । तत्र पृषोदरादिः (६।३।१०९) ॥ (१) ॥*॥ आवसीयते स्म । 'षोऽन्तकर्मणि' (दि० प० अ०) । क्तः (३।२।१०२) अवसानं प्राप्तम् । संपन्नं वा । रक्षार्थमाच्छादितं वा । तत्र आवस्यते स्म । 'वस आच्छादने' (अ० आ० से०) **'अवसितमृद्धे** ज्ञातेऽपि (अवसानगते च वाच्यलिङ्गं स्यात्)' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ द्वे **'मर्दनानन्तरमपनीततृणस्य बहुलीकरणयोग्यस्य धान्यराशेः'** ॥

पूतं तु बहुलीकृतम् ॥ २३ ॥

पूति ॥ पूयते स्म । 'पूञ् पवने' (क्रया० उ० से०) । क्तः (३।२।१०२) । **'पूतं** त्रिषु पवित्रे च शठिते बहुलीकृते' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ बहु मानं लाति । कः (३।२।३) । अबहुलं बहुलमकारि ॥ (२) ॥*॥ **'राशीकृतस्य'** । (हैमे तु 'धान्यमावसितं **रिद्धं** तत्पूतं निर्वुसीकृतम्' इत्युक्तम्) ॥

माषादयः शमीधान्ये

मेति ॥ 'माषो मुद्गो राजमाषः कुलत्थश्चणकस्तिलः । काकाण्डश्चीवर इति शमीधान्यगणः स्मृतः' इति रत्नकोषः ॥*॥ शमीप्रभवं धान्यम् ॥ (१) ॥*॥ एकम् **'माषादिशमीधान्यस्य'** ॥

शूकधान्ये यवादयः ।

श्विति ॥ शूकयुक्तं धान्यम् ॥ (१) ॥*॥ आदिना गोधूमादिः । एकम् **'यवादिशूकधान्यस्य'** ॥

शालयः कलमाद्याश्च षष्टिकाद्याश्च

शेति ॥ शाल्यते । 'शालृ आह्वान्ये' (भ्वा० आ० से०) । डलयोरैक्यम् । इन् (उ० ४।११८) । शाल्यते वा । 'शल चलने' (भ्वा० प० से०) ण्यन्तः । 'अच इः' (उ० ४।१३९) । 'शालिस्तु गन्धोलौ कलमादिषु' इति हैमः ॥ (१) ॥*॥ 'षष्टिकाः षष्टिरात्रेण पच्यन्ते' (५।१।९०) ॥ एकम् **'शाल्यादीनाम्'** ॥

१—सहो बलम् ॥

१—'राजार्थम्' इति पाठ आसीत्, परंतु स्वामीग्रन्थे हैमव्याख्यायां च दृष्ट्वा अनुकूलत्वाच्च धृतः ॥

पुंस्यमी ॥ २४ ॥

प्विति ॥ अमी माषाद्याः ॥

तृणधान्यानि नीवाराः

त्रिति ॥ तृणानीव धान्यानि । अकृष्टोत्पन्नत्वात् ॥ (१) ॥*॥ नि व्रियन्ते । 'वृञ् वरणे' (स्वा० उ० से०) 'नौ वृ धान्ये' (३।३।४८) इति घञ् । 'उपसर्गस्य–' (६।३।१२२) इति दीर्घः । '**स्यान्नीवारो** वणिजके वास्तव्येऽपि च दृश्यते' इति विश्वः ॥ (२) ॥*॥ बहुवचनेन श्यामाकादिग्रहः ॥*॥ द्वे '**तृणधान्यानाम्**' ॥

स्त्री गवेधुर्गवेधुका ।

स्त्रीति ॥ गवा जलेन तत्र वा एधते । 'एध वृद्धौ' (भ्वा० आ० से०) । मृगय्वादिलात् (उ० १।३७) कुः ॥ (१) ॥*॥ स्वार्थे कन् (ज्ञापि० ५।४।५) ।—गवे गवार्थं दीयते रक्ष्यतेऽसौ । 'देङ् रक्षणे' (भ्वा० आ० अ०) । मृगय्वादिलात् (उ० १।३७) कुः । नैरुक्तो दकारस्य डः । 'तत्पुरुषे कृति–' (६।३।१३) इत्यलुक् । '**गवेडुः**'–इत्याह मुकुटः ॥*॥ द्वे '**मुन्यन्नविशेषस्य**' ॥

अयोग्रो मुसलोऽस्त्री स्यात्

अयति ॥ अयोऽग्रेऽस्य ॥ (१) ॥*॥ मुस्यति अनेन वा । 'मुस खण्डने' (दि० प० से०) । 'वृषादिभ्यश्च' (उ० १।१०६) इति कलच् । '**मुसलं** स्यादयोग्रे च पुंनपुंसकयोः स्त्रियाम् । तालमूल्यामाखुपर्णीगृहगोधिकयोरपि' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ द्वे '**मुसलस्य**' ॥

उदूखलमुलूखलम् ॥ २५ ॥

उद्इति ॥ ऊर्ध्वं च तत् खं च । ऊर्ध्वखं लाति । 'आतोऽनुप–' (३।२।४) इति कः । पृषोदरादिः (६।३।१०९) । '**उदूखलं** गुग्गुलौ स्यादुलूखलेऽपि न द्वयोः' (इति मेदिनी) ॥ (२) ॥*॥ द्वे '**उलूखलस्य**' ॥

प्रस्फोटनं शूर्पमस्त्री

प्रेति ॥ प्रस्फोट्यतेऽनेन । 'स्फुट विकसने' (भ्वा० आ० से०) । करणे ल्युट् (३।३।११७) ॥ (१) ॥*॥ शूर्पयति, शूर्प्यतेऽनेन वा । 'शूर्प माने' (चु० प० से०) । अच् (३।१।१३४) । 'पुंसि–' (३।३।१०८) इति घो वा । 'शुभशतकिंशारुशूर्पाशुकम्' इति शमेदात्तालव्यादिः ॥*॥ '**सूर्पे** च' इति पाठाद्दन्त्यादिरपि ॥ (१) ॥*॥ द्वे '**शूर्पस्य**' ॥

चालनी तितउः पुमान् ।

चेति ॥ चाल्यते अनया वा । 'चल गतौ' (भ्वा० प० से०) । ण्यन्तः । ल्युट् (३।३।११३, ११७) । 'क्षुद्रच्छिद्रशतोपेतं **चालनं** तितउः स्मृतः' इति काश्यः ॥ (१) ॥*॥ द्वे तनोति । तन्यते वा । अनेन वा । 'तनु विस्तारे' (त० उ० से०) । 'तनोतेर्ड उः सन्वच्च' (उ० ५।५२) । '**चालनं तितउ** प्रोक्तम्' इति क्लीबकाण्डे रत्नकोषः । 'न स्त्री तितउ चालनी' इति त्रिकाण्डशेषः ॥ (२) ॥*॥ द्वे '**चालन्याः** ॥

स्यूतप्रसेवौ

स्यिति ॥ सीव्यते स्म । 'षिवु तन्तुसंताने' (दि० प० से०) । क्तः (३।३।१०२) । 'च्छ्वोः–' (६।४।१९) इत्यूठ् ॥*॥ '**स्योन**प्रसेवौ' इति मुकुटः । तत्रौणादिको नः । '**स्योन**स्यूतप्रसेवकाः' इति रभसः ॥ (१) ॥*॥ प्रसीव्यते 'अकर्तरि च' (३।३।१९) इति घञ् । '**प्रसेव**स्तु वीणाङ्गस्यूतयोर्दतौ' इति हैमचन्द्रः ॥ (२) ॥*॥ द्वे '**वस्त्रशणादिनिर्मितस्य**' '**थैला**' इति ख्यातस्य ॥

कण्डोलपिटौ

केति ॥ कण्ड्यते । 'कडि भेदने' (चु० प० से०) । 'पेटिकडिकण्डिभ्य ओलच्' (उ० १।६६) ॥ (१) ॥*॥ पिटति । 'पिट शब्दसंख्यानयोः' (भ्वा० प० से०) । कर्मकर्तरि 'इगुपध–' (३।१।१३५) इति कः ॥*॥ क्वुनि (उ० २।३२) '**पिटकः**' अपि ॥*॥—'**पिण्डः**'—इति स्वामी । तत्र पिण्ड्यते । 'पिडि संघाते' (भ्वा० आ० से०) कर्मणि घञ् (३।३।१९) । '**पिण्डो** बोले बले सान्द्रे देहागारैकदेशयोः । देहमात्रे निवापे च गोलसिद्धकयोरपि । ओण्ड्रपुष्पे च पुंसि स्यात्क्लीबमाजीवनायसोः । **पिण्डी** च पिण्डतगरेऽलाबूखर्जूरभेदयोः' (इति मेदिनी) ॥ (२) ॥*॥ द्वे '**वंशादिनिर्मितभाण्डस्य**' ॥

कटकिलिञ्जौ ॥ २६ ॥

केति ॥ कटति । 'कटे वर्षादौ' (भ्वा० प० से०) । अच् (३।१।१३४) । '**कटः** श्रोणौ द्वयोः पुंसि किलिञ्जेऽतिशये शवे । समये गजगण्डेऽपि पिप्पल्यां तु **कटी** मता' (इति मेदिनी) ॥ (१) ॥*॥ किल्यतेऽनेन । 'किल श्वैल्यक्रीडनयोः' (तु० प० से०) । 'इगुपधात् कित्' (उ० ४।१२०) इतीन् । वेत्रवीरणादिः । किलेर्जातः । जनेः 'पञ्चम्यामजतौ' (३।२।९८) इति डः । पृषोदरादिः (६।३।१०९) ।—'तत्पुरुषे कृति–' (६।३।१४) इति (द्वितीयायाः) अलुक्—इति मुकुटः । तन्न । कृद्योगे षष्ठ्या विशेषविधानात् ॥ (२) ॥*॥ द्वे '**वंशादिविकारस्य**' ॥

समानौ

सेति ॥ 'समानौ' इति पूर्वेषु त्रिष्वप्यन्वेति ॥

रसवत्यां तु पाकस्थानमहानसे ।

रेति ॥ रसाः सन्त्यस्याम् । मतुप् (५।२।९५) ॥ (१) ॥*॥ पाकस्य स्थानम् ॥ (२) ॥*॥ महच्च तदनश्च–(अनसोपकरणं लक्ष्यते ।) 'अनोऽमायः–' (५।४।९४) इत्यादिना

१—उज्ज्वलदत्तादिग्रन्थे तु 'कपिगण्डिकटिपटिभ्य ओलच्' इत्यानुपूर्वी दृश्यते । तस्माद्बाहुलकादोलच् ।

टच् ।—महदनोऽस्य—इति स्वामी । तन्न । 'अनोश्मायः—' इति तत्पुरुषसमासान्तोपन्यासविरोधात् ॥ (३) ॥*॥ त्रीणि **'पाकस्थानस्य'** ॥

पौरोगवस्तद्ध्यक्षः

पाविति ॥ पुरः पूजिता गौर्भूमिः । पुरोगवी । 'गोरतद्धित' (५।४।९२) इति टच् । तस्या अयम् 'तस्येदम्' (४।३।१२१) इत्यण् । यद्वा पुरः प्रथमं याच्यवस्तुषु गौर्नेत्रमस्य । पुरोगुः । 'गोस्त्रियोः—' (१।२।४८) । ततः 'प्रज्ञाद्यण्' (५।४।३८) ॥ (१) ॥*॥ तस्याध्यक्षः ॥ (२) ॥*॥ द्वे **'महानसाधिकृतस्य'** ॥

सूपकारास्तु वल्लवाः ॥ २७ ॥

आरालिका आन्ध्रसिकाः सूदा औदनिका गुणाः ।

स्विति ॥ शोभना आपोऽस्मिन् । 'ऋक्पूर्—' (५।४।७४) इत्यः । 'कुसुयुभ्यश्च' इत्यपोऽत ऊत् । सवति रसान् । 'षु प्रसवादौ' (भ्वा० प० से०) । 'सुशृभ्यां मिच्च' (उ० ३।२६) इति पो दीर्घश्च ।—'युकुसूनां किच्च'—इत्यपाणिनीयम् । सूपं करोति । 'कर्मण्यण्' (३।२।१) ॥ (१) ॥*॥ वल्लनम् । 'वल्ल संवरणे' (भ्वा० आ० से०) । 'वल्लिः' सौत्रो वा प्रीतौ । भावे घञ् (३।३।१८) । वल्लोऽस्यास्ति । 'अन्येभ्योऽपि—' (वा० ५।२।१०९) इति वः । वल्लं वाति । 'आतोऽनुप—' (३।२।३) इति कः । **'वल्लवः** सूपकारे स्याद्धीमसेने च गोदुहि' इति विश्वः ॥ (२) ॥*॥ अरालं कुटिलं चरन्ति 'चरैति' (४।४।८) इति ठक् ॥ (३) ॥*॥ अन्धो भक्तं शिल्पं येषाम् । 'शिल्पम्' (४।४।५५) इति ठक् ॥ (४) ॥*॥ सूदन्ति छागादीन् । 'षूद हिंसायाम्' (चु० उ० से०) । अच् (३।१।१३४) । कः (३।१।१३५) वा । **'सूदस्तु** कथितः सूपकारे च व्यञ्जनान्तरे' इति विश्वमेदिन्यौ ॥ (५) ॥*॥ ओदनं शिल्पं येषाम् । 'शिल्पम्' (४।४।५५) इति ठक् ॥ (६) ॥*॥ गुणयते । 'गुण निमन्त्रणे' (चु० उ० से०) अदन्तः । अच् (३।१।१३४) । **'गुणो** मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये । त्यागे शौर्यादिसंध्यादिसत्त्वाद्यावृत्तिरज्जुषु । शुक्लादावपि बुद्ध्यां च' (इति मेदिनी) ॥ (७) ॥*॥ सप्त **'पाककर्तुः'** ।—आद्यद्वयं व्यञ्जनकारस्य—इति स्वामी ॥

आपूपिकः कान्दविको भक्ष्यकारः

आप्विति ॥ अपूपाः पण्यमस्य । 'तदस्य पण्यम्' (४।४।५१) इति ठक् ॥ (१) ॥*॥ कन्दौ संस्कृतम् । 'संकृतं भक्षाः' (४।२।१६) इत्यण् । कान्दवं पण्यमस्य । ठक् (४।४।५१) ॥ (२) ॥*॥ भक्ष्यं करोति । 'कर्मण्यण्' (३।२।१) ॥ (३) ॥*॥ त्रीणि **'भक्ष्यकारस्य'** ॥

इमे त्रिषु ॥ २८ ॥

इम इति ॥ इमे पौरोगवादयः ॥

अश्मन्तमुद्धानमधिश्रयणी चुल्लिरन्तिका ।

अश्मेति ॥ अश्मनोऽप्यन्तोऽत्र । शकन्ध्वादिः (वा० ६।१।९४) । **'अश्मन्तमशुभे** चुल्ल्यां मरणेऽनवधावपि । क्षेत्रेऽपि' इति विश्वः (मेदिनी) ॥*॥ **'अश्वन्तः'** इति पाठे असूनामन्तोऽत्र ॥ (१) ॥*॥ उद् धीयतेऽत्र 'धाञः' (जु० उ० अ०) ल्युट् (३।३।११७) । **'उद्धानमुद्वते** वाच्यलिङ्गं चुल्ल्यां नपुंसकम्' इति विश्वः (मेदिनी) ॥*॥ **'उद्धमानम्'** इति पाठे तु—उद्धमायतेऽत्र । 'धमा शब्दादौ' (भ्वा० प० अ०) । ल्युट् (३।३।११७) ॥ (२) ॥*॥ अधिश्रीयतेऽत्र 'श्रीञ् पाके' (क्रया० उ० अ०) । अधिकरणे ल्युट् (३।३।११७) । ङीप् (४।१।१५) ॥ (३) ॥*॥ चुल्लयतेऽत्र । 'चुल्ल भावकरणे' (भ्वा० प० से०) । इन् (उ० ४।११८) । 'चुल्लतेऽत्राग्निरिति वा' । 'चुद प्रेरणे' (चु० प० से०) । बाहुलकाल्लिक् । 'कृदिकारात्' (ग० ४।१।४५) इति वा ङीष् ॥ (४) ॥*॥ अन्त्यतेऽत्र । 'अति बन्धने' (भ्वा० आ० से०) । ण्वुल् (३।३।१०९) । 'अन्तिकं निकटे वाच्यलिङ्गं स्त्री शातलौषधौ । चुल्ल्यां ज्येष्ठभगिन्यां च नाट्योक्तौ कीर्त्यतेऽन्तिका' (इति मेदिनी) ॥ (५) ॥*॥ पञ्च **'चुल्ल्याः'** ॥

अङ्गारधानिकाङ्गारशकट्यपि हसन्त्यपि ॥ २९ ॥

हसन्त्यपि

अङ्गेति ॥ अङ्गारा धीयन्तेऽस्याम् । धाञः (जु० उ० अ०) ल्युट् (३।३।११६) । 'टिड्ढा—' (४।१।१५) इति ङीप् । कन् (ज्ञापि० ५।४।५) ॥ (१) ॥*॥ अङ्गाराणां शकटी ॥ (२) ॥*॥ हसति । 'हसे हसने' (भ्वा० प० से०) । 'लटः शतृ—' (३।२।१२४) । 'शप्श्यनोः' (७।१।८१) इति नुम् । **'हसन्त्यङ्गारधान्यां** च मल्लिकाशाकिनीभिदोः' इति विश्वः ॥ (३) ॥*॥ 'कृत्यल्युटः' (३।३।११३) इति ल्युट् । 'टिड्ढा—' (४।१।१५) इति ङीप् ॥ (४) ॥*॥ चत्वारि **'अङ्गारशकट्याः'** 'बोरसी' इति ख्यातायाः ॥

अथ न स्त्री स्यादङ्गारः

अथेति ॥ अङ्गति । 'अगि गतौ' (भ्वा० प० से०) । 'अङ्गिमदिमन्दिभ्य आरन्' (उ० ३।१३४) । अङ्गमियर्ति वा । 'ऋ गतौ' (जु० प० अ०) । 'कर्मण्यण्' (३।२।१) । 'अङ्गार-

---

१—इदं च 'अत उत्' इत्यन्तमसंगतम् । 'न पूजनात्' (५।४।६९) इत्यनेन समासान्तनिषेधस्य दुर्वारत्वात् । 'कुसुयुभ्यश्च'। इति वार्तिकस्यापि भाष्यादावभावात् 'निर्मूलत्वात्। अत एवैतज्जनकेनापि सिद्धान्तकौमुद्यां हलन्तनपुंसकप्रकरणे 'स्वप्' शब्द उदाहृतः ॥ २—'चरति' इत्यत्र 'तेन' इत्यनुवृत्तेः सर्वसंमतत्वेन चिन्त्यमेतत् ॥

१—स च साग्निर्निरग्निश्च । तत्र साग्नौ यथा—'अङ्गारचुम्बितमिव व्यथमानमास्ते' इति । निरग्नौ यथा—'कलङ्कस्तत्रत्यो व्रजति मलिनाङ्गारतुलनाम्' इत्यादिप्रयोगः—इति मुकुटः ।

मुल्मुके न स्त्री पुंलिङ्गस्तु महीसुते' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ एकम् **'अङ्गारस्य'** ॥

अलातमुल्मुकम् ।

अलेति ॥ लानम् । 'ला दाने' (अ० प० अ०) । क्तः (३।३।११४) । न लातमस्य ॥ (१) ॥*॥ ओषति । 'उष दाहे' (भ्वा० प० से०) । 'उल्मुकदर्वि–' (उ० ३।८४) इति साधुः ॥ (२) ॥*॥ द्वे **'अर्धदग्धकाष्ठस्य'** ।—त्रयोऽपि पर्यायाः—इति मुकुटः ॥

क्लीबेऽम्बरीषं भ्राष्ट्रः

क्लीति ॥ अम्ब्यतेऽत्र वा । 'अबि शब्दे' (भ्वा० आ० से०) । 'अम्बरीषः' (उ० ४।२९) इति साधुः—'शिरीषादयश्च'—इति ख्यपाणिनीयम् । 'अम्बरीषपुरुषोषरौषधम्' इति षभेदान्मूर्धन्यान्तोऽयम् । **'अम्बरीषं** रणे भ्राष्ट्रे क्लीबं पुंसि नृपान्तरे । नरकस्य प्रभेदे च किशोरे भास्करेऽपि च । आम्रातकेऽनुतापे च' **'अनिमिषो** मत्स्यदेवयोः' (इति मेदिनी) ॥ (१) ॥*॥ भृज्यतेऽत्र । 'भ्रस्ज पाके' (तु० उ० अ०) । 'भ्रस्जिगमिनमि–' (उ० ४।१६०) इति ष्ट्रनृच्छी ॥ (२) ॥*॥ द्वे **'भर्जनपात्रस्य'** ॥

ना कन्दुर्वा स्वेदनी स्त्रियाम् ॥ ३० ॥

नेति ॥ स्कन्दिति । 'स्कन्दिर् गतिशोषणयोः' (भ्वा० प० अ०) । 'स्कन्देः सलोपश्च' (उ० १।१४) इति कुः । 'वा' इत्यस्यात्राप्यन्वयः । पक्षे स्त्रीसाहचर्यात् ॥ (१) ॥*॥ खिद्यतेऽस्मात् । अधिकरणे ल्युट् (३।३।११७) । —'वा स्त्रियाम्' इत्यन्वयात् 'स्वेदनः' अपि—इति मुकुटः ॥ (२) ॥*॥ द्वे **'मद्यनिर्माणोपयोगिपात्रस्य' 'कराही'** इति ख्यातस्य ॥

अलिंजरः स्यान्मणिकः

अलीति ॥ अलनम् । 'अल भूषणादौ' (भ्वा० प० से०) । 'इक्रुष्यादिभ्यः' (वा० ३।३।१०८) इन् (उ० ४।११८) वा । अलिं सामर्थ्यं जरयति, जृणाति, वा । 'जॄष् वयोहानौ' (भ्वा० प० से०) । 'जॄ वयोहानौ' (क्या० प० से०) वा । अण् (३।२।१) । अच् (३।१।१३५) वा ॥ (१) ॥*॥ मणति । 'मण शब्दे' (भ्वा० प० से०) । 'सर्वधातुभ्यः–' (उ० ४।११८) इतीन् । स्वार्थे कन् (ज्ञापि० ५।४।५) 'संज्ञायां कन्' (५।३।७५) वा ॥ (२) ॥*॥ द्वे **'महाकुम्भस्य' 'माट'** इति ख्यातस्य ॥

कर्कर्यालुर्गलन्तिका ।

केति ॥ कर्कणम् । 'कर्क हासे' ( ) । घञ् (३।३।१८) । कर्कं राति । 'रा दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । गौरादिः (४।१।६१) **'कर्करी** भाण्डभेदे ना दर्पणे कठिने त्रिषु' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ आ लुनाति । 'लूञ् छेदने' (क्या० उ० से०) । क्विप् (३।२।७६) ॥*॥ हस्वपाठे आलाति 'ला दाने' (अ० प० से०) । मितद्वादित्वात् (वा० ३।२।१८०) ङुः । **'आलुर्गलन्तिकायां** स्त्री क्लीबं मूले च मेलके' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ गलति । 'गल अदने' (भ्वा० प० से०) । शता (३।२।१२४) । 'उगितश्च' इति ङीप् (४।१।६) । 'शप्श्यनोः–' (७।१।८१) इति नुम् । स्वार्थे कन् । (ज्ञापि० ५।४।५) ॥ (३) ॥*॥ त्रीणि **'गलन्तिकायाः' 'करवती'** इति ख्यातायाः ।—कन्दोर्घृतपक्वनिष्काशनसाधनस्य—इत्येके ॥

पिठरः स्थाल्युखा कुण्डम्

पीति ॥ पेठति । 'पिठ बन्धे' (भ्वा० प० से०) 'इगुपध–' (३।१।१३५) इति कः । पिठं राति । 'रा दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥ (१) ॥*॥ तिष्ठत्यत्रौदनादि । 'ष्ठा गतिनिवृत्तौ' (भ्वा० प० अ०) । 'स्थाचति–' (उ० १।११६) इत्यालच् । स्थलत्यत्र वा । 'ष्ठल स्थाने (भ्वा० प० से०) । ज्वलादीण् (३।१।४०) । 'जातेः' (४।१।६३) इति ङीष् । स्थालं च । **'स्थालं** भाजनभेदेऽपि **स्थाली** स्यात्पाटलोखयोः' (इति मेदिनी) ॥ (२) ॥*॥ ओखति । 'उख गतौ' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः ॥*॥ (**'उषा'** इति) मूर्धन्यपाठे 'उष दाहे' (भ्वा० प० से०) ॥ (३) ॥*॥ कुण्डयति । 'कुडि रक्षायाम्' (चु० प० से०) । अच् (३।१।१३४) ।—कुणति । 'कुण शब्दोपतापयोः' (तु० प० से०) । 'कुणादिभ्यः कित्' इति डः—इति मुकुटः । तन्न । उक्तसूत्राभावात् । 'क्वादेः कित्' (उ० १।११५) इति सूत्रस्य सत्त्वात् । **'कुण्डं**मभ्यालये मानभेदे देवजलाशये । **कुण्डी** कमण्डलौ जारात्पतिवल्लीसुते पुमान् । पिठरे तु न ना' इति विश्वः (मेदिनी) ॥ (४) ॥*॥ चत्वारि **'ओदनादिपचनपात्रस्य'** ॥

कलसस्तु त्रिषु द्वयोः ॥ ३१ ॥

घटः कुटनिपौ

केति ॥ केन जलेन लसति । 'लस श्लेषणक्रीडनयोः' (भ्वा० प० से०) । पचाद्यच् (३।१।१३५) ॥*॥ तालव्यान्तपाठे कलं शवति । 'शु गतौ' ( ) । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः । 'तालव्या अपि दन्त्याश्च शम्बशूकरपांशवः । **कलशः** शम्बलं चैव जिह्वायां रशना तथा' इति शभेदः । स्त्रियां जातित्वान्ङीष् (४।१।६३) ॥ (१) ॥*॥ घटति । 'घट चेष्टायाम्' (भ्वा० आ० से०) । अच् (३।१।१३४) । स्त्रियां घटी । **'घटाः** समाधिभेदे ना शिरः कूटकुटेषु च । **घटा** घटनगोष्ठीभघटनासु च योषिति' (इति मेदिनी) ॥ (२) ॥*॥ कुटति 'कुट कौटिल्ये' (तु० प० से०) ।

१—उचितमिदम् । उक्तमेदिन्याङ्गारस्योल्मुकार्थकतोक्तेः ।

२—'अनिमिषशब्दार्थपरमिदं प्रसङ्गेनोक्तम् । न त्वस्यात्रोपयोगः ॥

'इगुपध–' (३।१।१३५) इति कः ॥ (३) ॥*॥ नियतं पिबन्त्यनेन । 'घञर्थे कः' (वा० ३।३।५८) ॥ (४) ॥*॥ कुटनिपावप्यस्त्री (स्त्रियौ) ॥*॥ चत्वारि **'घटस्य'** ॥

अस्त्री शरावो वर्धमानकः ।

अस्त्रीति ॥ शरणम् । 'शॄ हिंसायाम्' (क्या० प० से०) । 'ऋदोरप्' (३।३।५७) । शृणाति वा । अच् (३।१।१३४) शरं शराद्भवति अण् (३।२।१) । अच् (३।१।१३४) वा ॥*॥—(**सरावः**) दन्त्यादिरपि—इति मुकुटः ॥ (१) ॥*॥ वर्धते । 'वृधु वृद्धौ' (भ्वा० आ० से०) । शानच् (३।२।१२४) । शप् (३।१।६८) । मुक् (७।२।८२) । 'संज्ञायां कन्' (५।३।७५) ॥ (२) ॥*॥ द्वे **'पात्रभेदस्य'** ॥

ऋजीषं पिष्टपचनम्

ऋजीति ॥ अर्जति । 'अर्ज अर्जने' (भ्वा० प० से०) । 'अर्जेरुच च' (उ० ४।२८) इतीषन् ॥*॥ **'ऋचीषम्'** इति पाठः—इति कश्चित् । 'ऋच् शब्दे' (तु० प० से०) बाहुलकात्कीषन् ॥ (१) ॥*॥ पच्यतेऽत्र । 'करणा–' (३।३।११७) इति ल्युट् । पिष्टस्य पचनम् ॥ (२) ॥*॥ द्वे **'पिष्टपाकोपयोगिनः पात्रस्य' 'तवा'** इति ख्यातस्य ॥

कंसोऽस्त्री पानभाजनम् ॥ ३२ ॥

कमिति ॥ कम्यते । 'कमु कान्तौ' (भ्वा० आ० से०) 'आयादयः–' (३।१।३१) इति णिङ् न । वृतृवदिहनिकमिकषिभ्यः सः' (उ० ३।६२) । **'कंसोऽस्त्री** तैजसद्रव्ये कांस्ये मानेऽसुरे तु ना' (इति मेदिनी) ॥ (१) ॥*॥ पीयते, इति पानम् । ल्युट् (३।३।११३) । क्षीरादिपानस्य भाजनम् ॥ (२) ॥*॥ द्वे **'पानपात्रस्य'** ॥

कुतूः कुत्तेः स्नेहपात्रम्

कुतिति ॥ कुत्सितं तन्यते । 'तनु विस्तारे' (त० उ० से०) । बाहुलकात् कूः, टिलोपश्च । कौति । 'कु शब्दे' (अ० प० अ०) । बाहुलकात् कूस्तुक्च वा । 'कुत्वा डुपच्' (५।३।८९) इति निर्देशाद्वा ॥ (१) ॥*॥ कुत्तेश्चर्मणः ॥*॥ स्नेहस्य तैलघृतादेः पात्रम् ॥ (२) ॥*॥ द्वे **'तैलघृतादिपात्रस्य'** ॥

सैवाल्पा कुतुपः पुमान् ।

सैवेति ॥ 'सा' इति निर्देशात् कुतूः स्त्रीलिङ्गः ॥*॥ अल्पा कुतूः । 'कुत्वा डुपच्' (५।३।८९) ॥ (१) ॥*॥ एकम् **'अल्पतैलघृतादिपात्रस्य'** ॥

सर्वमावपनं भाण्डं पात्रामत्रं च भाजनम् ॥ ३३ ॥

सेति ॥ आ उप्यतेऽत्र । 'डुवप् बीजतन्तुसंतानें' (भ्वा० उ० अ०) । ल्युट् (३।३।११७) ॥ (१) ॥*॥ 'भदि कल्याणे सुखे च' (भ्वा० आ० से०) । अच् (३।१।१३४) । पृषोदरादिः (६।३।१०९) ॥*॥ भणति । 'भण शब्दे' (भ्वा० प० से०) । 'अमन्ताड्डः' (उ० १।११४) । प्रज्ञाद्यण् (४।४।३८) । **'भाण्डं** मूलवणिग्वित्ते तुरंगाणां च मण्डने । नदीकूलद्वयोर्मध्ये भूषणे भाजनेऽपि च' इति (हैमः) ॥ (२) ॥*॥ पाति । 'पा रक्षणे' (अ० प० अ०) । पिबत्यनेन वा । 'पा पाने' (भ्वा० प० अ०) ष्ट्रन् (उ० ४।१५९) ॥ (३) ॥*॥ अमति 'अमगत्यादिषु' (भ्वा० प० से०) 'अमिनक्षियजिवधिपतिभ्योऽत्रन्' (उ० ३।१०५) ॥ (४) ॥*॥ भाजयति । 'भाज पृथक्कर्मणि' (चु० उ० से०) । ल्युट् (३।१।११३) ॥ (५) ॥*॥ स्यूतादि पिठरादि च सर्वमावपनादिशब्दवाच्यम् ॥*॥ पञ्च **'भाण्डस्य'** ॥

दर्विः कम्बिः खजाका च

देति ॥ दृणाति 'दृ विदारणे' (क्या० प० से०) । 'वृदृभ्यां विन्' (उ० ४।५३) ॥*॥ 'कृदिकारात्–' (ग० ४।१।४५) इति ङीषि **दर्वी** च । (**'दर्वी** पणातद्वौ:' इति हैमः) ॥ (१) ॥*॥ कम्यते । 'कमु कान्तौ' (भ्वा० आ० से०) । बाहुलकाद्विन् ॥ (२) ॥*॥ खजति । 'खज मन्थे' (भ्वा० प० से०) । 'खजेराकः' (उ० ३।११३) ॥ (३) ॥*॥ एतत्साहचर्यात्पूर्वयोः स्त्रीत्वम् ॥*॥ त्रीणि **'दर्व्याः' 'करछुली'** इति ख्यातायाः ॥

स्यात्तर्दूर्दारुहस्तकः ।

स्यादिति ॥ तरति । 'तॄ प्लवनतरणयोः' (भ्वा० प० से०) 'त्रो दुट् च' (उ० १।८९) इत्यूः, दुडागमश्च । तर्दति । 'तर्द हिंसायाम्' (भ्वा० प० से०) । तृणत्ति वा 'उतृदिर् हिंसानादरयोः' (रु० उ० अ०) इति वा । बाहुलकादूः ॥ (१) ॥*॥ हस्तप्रतिकृतिः । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् । दारुणो हस्तकः ॥ (२) ॥*॥ एतत्साहचर्यात्पूर्वः पुंसि ॥*॥ द्वे **'दर्वीभेदस्य'** (पक्षापि पर्यायाः । उक्तहैमानुरोधात्) ॥

अस्त्री शाकं हरितकं शिग्रुः

अस्त्रीति ॥ श्यति । धातुक्षयकारित्वात् । 'शो तनूकरणे' (दि० प० अ०) । बाहुलकात्कन् । शक्नोत्यनेन भोक्तुम् । 'शक्लृ शक्तौ' (स्वा० प० अ०) । 'हलश्च' (३।३।१२१) इति घञ् । **'शाको** द्वीपान्तरेऽपि च । शक्तौ द्रुमविशेषे च पुमान्, हरितकेऽस्त्रियाम्' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ हरितो वर्णोऽस्यास्ति । अर्शआद्यच् (५।२।१२७) स्वार्थे कन् (ज्ञापि० ५।४।५) । हरति, ह्रियते वा । 'हृञ् हरणे' (भ्वा० उ० अ०) । 'हृश्याभ्यामितन्' (उ० ३।९३) । कन् (ज्ञा० ५।४।५) ॥ (२) ॥*॥ शीक्यते शीकते । 'शीकृ सेचने' (भ्वा० आ० से०) बाहुलकाद् रुग्ह्रस्वौ गश्च । शिनोति । 'शिञ् निशाने' (स्वा० उ० अ०) 'जत्र्वादयश्च' (उ० ४।१०२) इति साधुः, इति वा । **'शिग्रुर्ना** शाकमात्रे च शोभाञ्जनमहीरुहे' इति विश्वमेदिन्यौ ॥ (३) ॥*॥ त्रीणि **'वास्तुकादेः शाकस्य'** ॥

अस्य तु नालिका ॥ ३४ ॥

कडम्बश्च कलम्बश्च

अस्येति ॥ कडति 'कड मदे' (भ्वा० प० से०) । 'कृकदिकडिकटिभ्योऽम्बच्' (उ० ४।८२) ॥ (१) ॥*॥ डलयोरैक्यम् । केन लम्बते वा । 'लबि अवस्रंसने' (भ्वा० आ० से०)। अच् (३।१।१३४) । **'कलम्बी** शाकभेदे स्यात्कदम्बशरयोः पुमान्' (इति मेदिनी) । (**'कलम्बः** सायके नीपे नालीशाके **कलम्ब्यपि'** इति विश्वः) ॥ (२) ॥*॥ द्वे **'शाकनालस्य'** (—त्रीणि[1]—इति मुकुटः) ॥

वेसवार उपस्करः ।

वेसेति ॥ वेसनम् 'विस प्रेरणे' (दि० प० से०) । घञ् (३।३।१८) । वेसं प्रेरणं वारयति वृणोति वा । 'वृञ् वरणे' (स्वा० उ० से०) 'कर्मण्यण्' (३।२।१) ॥ (१) ॥*॥ उपस्करोति व्यञ्जनेन समवैति । कृञः (तु० उ० अ०) । अच् (३।१।१३४) 'सैमवाये च' (६।१।१३८) इति सुट्) ॥ (२) ॥*॥ द्वे **'संस्कारार्थे दीयमानस्य हिङ्ग्वादेः'** ।—हिङ्गुजीरकहरिद्राधान्याकशुण्ठीसर्षपादेः—इति मुकुटः । 'चित्रकं पिप्पलीमूलं पिप्पलीचव्यनागरम् । धान्याकं रजनीश्वेतताण्डुलाश्च समांशकाः । वेसवार इति ख्यातः शाकादिषु नियोजयेत्' इत्यात्रेयसंहिता ।—विंशतिः पलानि हरिद्रायाः, दश पलानि धान्याकस्य, पञ्च पलानि शुद्धजीरकस्य, पलसार्धद्वयं मेथिकायाः । एतच्चतुष्टयं भर्जितमेव ग्राह्यम् । त्रीणि पलानि मरीचस्य, अर्धपलं रामठस्य, । एतत्सर्वमेकत्र संयोज्य संमर्दितं **'वेसवार'** इत्युच्यते—इत्यन्ये ॥

तिन्तिडीकं च चुक्रं च वृक्षाम्लम्

तीति ॥ तिम्यति । 'तिम आर्द्रीभावे' (दि० प० से०) । 'अनी(ली)कादयश्च' (उ० ४।२५) इति साधु ॥ (१) ॥*॥ चकति(ते) 'चक तृप्तौ प्रतीघाते च' (भ्वा० आ० से०) । 'चकिरम्योरुच्चोपधायाः' (उ० २।१४) इति रक् । **'चुक्रं** वृक्षाम्ले चाङ्गेर्यां स्त्री पुंस्यम्लेऽम्लवेतसे' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ वृक्षस्याम्लम् ॥ (३) ॥*॥ त्रीणि **'तिन्तिडीकस्याम्लभेदस्य' 'चूका'** इति ख्यातस्य ।—वल्लीविशेषस्य—इत्यन्ये ॥

अथ वेल्लजम् ॥ ३५ ॥

मरीचं कोलकं कृष्णमूषणं धर्मपत्तनम् ।

अथेति ॥ वेल्लनम् । 'वेल्ल चलने' (भ्वा० प० से०) । घञ् (३।३।१८) । वेल्लं जायते । 'जनी' (दि० आ० से०) । अन्तर्भावितण्यर्थः । 'अन्येष्वपि–' (३।२।१०१) इति डः (१) ॥*॥ म्रियते विषमनेन । 'मृङ् प्राणत्यागे' (तु० आ० अ०) । बाहुलकादीचः ॥*॥ **(मरिचम्)** ह्रस्वमध्यमपि ॥ (२) ॥*॥ कोलति । 'कुल संस्त्याने' (भ्वा० प० से०) । 'कृज्वादिभ्यो वुन्' (उ० ५।३५) । ण्वुल् (३।१।१३३ । वा०) ॥ (३) ॥*॥ कर्षति । 'कृष विलेखने' (भ्वा० प० से०) 'कृषेर्वर्णे' (उ० ३।४) इति नक् । **'कृष्णः** सत्यवतीपुत्रे वायसे केशवेऽर्जुने । **कृष्णा** स्याद्द्रौपदीनीलीकणाद्राक्षासु योषिति । मेचके वाच्यलिङ्गः स्यात् क्लीबे मरिचलोहयोः' इति विश्वः (मेदिनी) ॥ (४) ॥*॥ ऊषति । 'ऊष दाहे' 'रुजायाम्' (भ्वा० प० से०) । ल्युट् (३।१।११३) । **'ऊषणं** मरिचे क्लीबं कणायां**मूषणा** स्मृता' (इति मेदिनी) ॥*॥ **(उषणम्)** इति ह्रस्वपाठे । 'उष दाहे' (भ्वा० प० से०) संज्ञापूर्वकत्वाद्गुणाभावः ॥ (५) ॥*॥ धर्मपत्तने जातम् । 'तत्र जातः' (४।३।२५) इत्यण् । संज्ञापूर्वकत्वान्न वृद्धिः ॥ (६) ॥*॥ षट् **'मरीचस्य'** ॥

जीरको जरणोऽजाजी कणा

जीति ॥ जवति । 'जुः' सौत्रः । 'जोरी च' (उ० २।२३) इति रक् । जिनाति वा । 'ज्या वयोहानौ' (क्र्या० प० अ०) 'ज्यश्च' इति रक् । 'संज्ञायाम्–' (५।३।७५) । इति कन् ॥ (१) ॥*॥ जरयति 'जॄष् वयोहानौ' (दि० प० से०)। नन्द्यादिल्युः (३।१।१३४)। **'जरणं** हिङ्गुनि स्मृतम् । **जरणो** जीरकेऽपि स्यात्कृष्णे सौवर्चलेऽपि च' इति विश्वः ॥ (२) ॥*॥ अजमजति । 'अज गतिक्षेपणयोः' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) ङीप् (४।१।१५) **'बहुलं** तणि' (वा० २।४।५४) इति वी न ॥ (३) ॥*॥ कणति । 'कण शब्दे' (भ्वा० प० से०) । अच् (३।१।१३४) । **'कणा** जीरककुम्भीरमक्षिकापिप्पलीषु च । **कणो**ऽतिसूक्ष्मे धान्यांशे' इति विश्वः (मेदिनी) ॥ (४) ॥*॥ चत्वारि **'जीरकस्य'** ॥

कृष्णे तु जीरके ॥ ३६ ॥

सुषवी कारवी पृथ्वी पृथुः कालोपकुञ्चिका ।

क्रिति ॥ सुषवणम् । 'षू प्रेरणे' (तु० प० से०) । 'ऋदोरप्' (३।३।५७) । 'उपसर्गात्सुनोति–' (८।३।६५) इति षत्वम् । सोऽस्त्यस्याः । पिप्पल्यादिः (ग० ४।१।४१) ॥ (१) ॥*॥ कारं वाति । 'वा गतिगन्धनयोः' (अ० प० अ०) । 'आतोऽनुप–' । (३।२।३) इति कः । गौरादिः (४।१।४१) । यद्वा कारणम् । 'कॄञ् हिंसायाम्' (क्र्या० उ० से०) । ण्यन्तः । संपदादि क्विप् (वा० ३।३।१०८) । कारमवति । 'अव रक्षणादौ' (भ्वा० प० से०) । अण् (३।२।१) ङीप् (४।१।१५) संज्ञापूर्वकत्वाच्च वृद्धिः । यत्तु–कारोरियम्—इति मुकुटः ।

१—अत एव 'नाला न ना पद्मदण्डे नाली शाककडम्बके' इति मेदिन्यां नालीशब्दस्य कडम्बवाचकता दृश्यते ॥ २—सिद्धान्तकौमुद्यां तु पूर्वसूत्रे 'उप' ग्रहणमकृत्वोत्तरसूत्रे 'चात्प्रागुक्तयोरर्थयोः' इत्युक्तम् । तस्मात् 'उपात्–' (६।१।१३९) इति सूत्रेण समवायेऽपि सुट् ॥

१—वाक्यम् 'रकि ज्यः संप्रसारणम्' इति (१।२।४ सूत्रस्य)-भाष्यमूलकम् ॥

तन्न । वृद्धत्वाच्छस्य (४।३।११४) प्रसङ्गात् । यदपि—कस्य वायोरारवोऽस्याम्—इति । तदपि न । व्यधिकरणबहुव्रीहिप्रसङ्गात् । **'कारवी** मथुरादीप्यलक्पत्रीकृष्णजीरके' (इति मेदिनी) ॥ (२) ॥*॥ प्रथते । 'प्रथ प्रख्याने' (चु० प० से०) । 'प्रथिम्रदिभ्रस्जां संप्रसारणम्–' (उ० १।२८) इति कुः । 'वोतो गुणवचनात्' (४।१।४४) इति ङीष् । **'पृथ्वी** भूमौ महत्यां च त्वक्पत्र्यां कृष्णजीरके' इति विश्वः ॥ (३) ॥*॥ **'पृथुः** स्यान्महति त्रिषु । त्वक्पर्ण्यां कृष्णजीरेऽस्त्री पुमानग्नौ नृपान्तरे' (इति मेदिनी) ॥ (४) ॥*॥ कालो वर्णोऽस्त्यस्याः । अर्शआद्यच् (५।२।१२७) ॥ (५) ॥*॥ उपकुञ्चति । 'कुञ्च कौटिल्ये' (भ्वा० प० से०) से ण्वुल् (३।१।१३३) ॥ (६) ॥*॥ षट् **'कृष्णवर्णे जीरके'** ॥

आर्द्रकं शृङ्गवेरं स्यात्

आर्द्रेति ॥ आर्द्रायां जातम् । 'पूर्वाह्णापराह्णार्द्रा–' (४।३।२८) इति वुन् । आर्द्रयति जिह्वाम् । कुन् (उ० २।३२) वा । आर्द्रसंज्ञकं वा । 'संज्ञायां कन्' (५।३।७५) । अर्दति कफं वा । 'अर्द हिंसायाम्' (चु० उ० से०) 'अर्देर्दीर्घश्च' (उ० २।१८) इति रक् ॥ (१) ॥*॥ शृङ्गमिव वेरं शरीरमस्य ॥ (२) ॥*॥ द्वे **'आर्द्रकस्य'** ॥

अथ छत्रा वितुन्नकम् ॥ ३७ ॥

कुस्तुम्बुरु च धान्यकम्

अथेति ॥ छत्रमस्त्यस्याः । अर्शआद्यच् (५।२।१२७) । टाप् (४।१।४) । **'छत्रं** स्यादातपत्राणे **छत्रा** मधुरिकौषधौ । धान्याके च शिलीन्ध्रे च' इति हेमचन्द्रः ॥ (१) ॥*॥ विगतं तुन्नं दुःखमस्मात् । कप् (५।४।१५४) । यत्तु—वितुदति मन्दाग्निम्—इति स्वामी । तन्न । सकर्मकात् कर्तरि वर्तमाने क्तस्याभावात् । 'वितुद्यते भक्ष्यार्थम्' इति वा । तुदेः कर्मणि क्तः (३।२।१०२) । कन् (ज्ञापि० ५।४।५) । **'वितुन्नकं** तु धान्याके झाटामलमयूरके' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ कुत्सितं तुम्बति । 'तुबि अर्दने' (भ्वा० प० से०) बाहुलकात् 'कुस्तुम्बुरूणि जातिः' (६।१।१४३) इति निर्देशाद्वा उरुः, सुट् ॥ (३) ॥*॥ धन्यते भक्ष्यार्थिभिः । 'धन शब्दे' (जु० प० से०) । 'पिनाकादयश्च' (उ० ४।१५) इति साधु । स्वामी तु—धान्यमकति । 'अक कुटिलायां गतौ' (भ्वा० प० से०) अण् (३।२।१)—(इत्याह) ॥*॥ ह्रस्वादिः इति मुकुटः । **'धन्याकं धान्यकं धान्यं** कुस्तुम्बुरु **धनीयकम्'** इति रभसः ॥ (४) ॥*॥ चत्वारि **'धान्याकस्य'** ॥

अथ शुण्ठी महौषधम् ।
स्त्रीनपुंसकयोर्विश्वं नागरं विश्वभेषजम् ॥ ३८ ॥

अथेति ॥ शुण्ठति कफम् । 'शुठि प्रतिघाते' (भ्वा० प० से०) । अच् (३।१।१३४) गौरादिः (४।१।४१) ॥*॥ इनि (उ० ८४।११८) तु ह्रस्वान्तोऽपि । 'सधन्याशुण्ठिसैन्धवम्' इति वैद्यकम् । इत्थं च गौरादित्वं न कल्प्यम् । 'कृदिकारात्–' (ग० ४।१।४५) इति सिद्धेः ॥ (१) ॥*॥ महच्च तदौषधं च । **'महौषधं** तु शुण्ठ्यां स्याद्विषायां लशुनेऽपि च' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ विशति । 'विश प्रवेशने' (तु० प० अ०) 'अशुप्रुषि–' (उ० १।१५१) इत्यादिना कुन् । **'विश्वं** कृत्स्ने च भुवने, **विश्वे** देवेषु, नागरे । **विश्वा**प्यतिविषायां स्यात्' इति विश्वः । '(**विश्वा**) अतिविषायां स्त्री, जगति स्यान्नपुंसकम् । न ना शुण्ठ्यां पुंसि देवप्रभेदे लखिले त्रिषु' (इति मेदिनी) ॥ (३) ॥*॥ नगरे भवम् । 'तत्र भवः' (४।३।५३) इत्यण् । **'नागरं** मुस्तके शुण्ठ्यां विदग्धे नगरोद्भवे' (इति मेदिनी) ॥ (४) ॥*॥ विश्वस्य दोषस्य भेषजम् ॥ (५) ॥*॥ पञ्च **'शुण्ठ्याः'** ॥

आरनालकसौवीरकुल्माषाभिषुतानि च ।
अवन्तिसोमधान्याम्लकुञ्जलानि च काञ्जिके ॥ ३९ ॥

आरेति ॥ आर्च्छति 'ऋ गतौ' (भ्वा० प० अ०) । अच् (३।१।१३४) नलति । 'णल गन्धे' (भ्वा० प० से) 'ज्वलिति–' (३।१।१४०) इति णः । आरो नालोऽस्य । 'शेषाद्विभाषा' (५।४।१५४) इति कप् ॥ (१) ॥*॥ सुवीरेषु भवम् । 'तत्र भवः' (४।३।५३) इत्यण् । 'सौवीरं काञ्जिके स्रोतोञ्जने च बदरीफले । ना तु नीवृति' (इति मेदिनी) ॥ (२) ॥*॥ कोलति । 'कुल संस्त्याने' (भ्वा० प० से०) । क्विप् (३।२।१७८) कुल् अर्धखिन्नो माषोऽस्मिन् । कुल् बन्धुर्माषोऽस्य वा । **'कुल्माषं** स्यात्तु काञ्जिके । **कुल्माषोऽर्धखिन्नधान्ये+यवके चणकेऽपि च ।'** इति हेमचन्द्रः ॥ (३) ॥*॥ अभिषूयते स्म । 'षुञ् अभिषवे' (स्वा० उ० अ०) । क्तः (३।२।१०२) । 'उपसर्गात्' (८।३।६५) इति षत्वम् ॥*॥ कुल्माषैर्यवादिभिरर्धखिन्नैरभिषूयतेस्म । **(कुल्माषाभिषुतम्)** इत्येकं नाम—इति स्वामी ॥ (४) ॥*॥ सूयते स्म, इति । 'षुञ्' (स्वा० उ० अ०) । मन् (उ० १।१४०) । अवन्तिषु अभिषुतं सोमम् । शाकपार्थिवादिः (वा० २।१।७८) ॥ (५) ॥*॥ धान्याभिषुतमम्लम् । पूर्ववत् ॥ (६) ॥*॥ कुत्सितं जलम् । पृषोदरादिः (६।१।१०९) ॥ (७) ॥*॥ 'अञ्जू व्यक्त्यादौ' (रु० प० से०) । 'संज्ञायाम्' (३।३।१०९) इति भावे ण्वुल् । 'धात्वर्थनिर्देशे' (वा० ३।३।१०८) वा । के अञ्जिकास्य ॥*॥ 'काञ्जिके' इति पाठे काञ्चयति । 'कचि काचि दीप्तिबन्धनयोः' (भ्वा० आ० से०) । ण्यन्तः । इन् (उ० ४।११८) । 'संज्ञायां कन्' (५।३।७५) **'काञ्जिकं** काञ्जिकं **वीरं कुल्माषाभिषुतं** तथा । अवन्तिसोमं धान्याम्लमारनालं **महारसम्** । सौवीरं च **सु-**

१—इदं तु हैमपुस्तके विश्वमेदिन्योश्च एतदर्थनिर्देशस्यानुपलम्भेन प्रमादलिखितम् ॥

वीराम्लं तथा शुक्तं **तुषोदकम्**' इति धन्वन्तरिः ॥ (८) ॥*॥ अष्टौ '**काञ्जिकस्य**' ॥

सहस्रवेधि जतुकं बाल्हीकं हिङ्गु रामठम् ।

सेति ॥ सहस्रं वेधितुं शीलमस्य । 'विध विधाने' (तु० प० से०) । 'सुप्यजातौ' (३।२।७८) इति णिनिः ॥ (१) ॥*॥ जत्विव । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् । '**जतु-काजिनपत्त्रायां जतुकं** हिङ्गुलाक्षयोः' (इति मेदिनी) ॥ (२) ॥*॥ वल्हीकेषु भवम् । 'तत्र भवः' (४।३।५३) इत्यण् । ह्रस्वमध्यमपि । '(अथ) **वाल्हिकः** । देशभेदेऽश्वभेदे च **वाल्हिकं** हिङ्गु कुङ्कुमम् । (**वाल्हीकवत्**)' (इति हैमः) ॥ (३) ॥*॥ हिनोति । 'हि गतौ वृद्धौ च' (स्वा० प० अ०) । हिमं गच्छति वा । मृगय्वादिः (उ० १।३७) ॥ (४) ॥*॥ रामठदेशोद्भवत्वादुपचारः । रमन्तेऽनेन वा । 'रमु क्रीडायाम्' (भ्वा० आ० अ०) । 'रमेर्वृद्धिश्च' (उ० १।१०१) इत्यठः ।—रमयति । बाहुलकादठः—इति मुकुटश्चिन्त्यः । 'रमेर्वृद्धिश्च' इति सूत्रस्य सत्वात् ॥ (५) ॥*॥ पञ्च '**हिङ्गु-वृक्षस्य निर्यासे**' ॥

तत्पत्री कारवी पृथ्वी बाष्पिका कबरी पृथुः ॥ ४० ॥

तेति ॥ तस्य हिङ्गुतरोः पत्री ॥*॥ 'त्वक्पत्री' इति च पाठः । 'तत्पत्री **त्वचमाख्यातं त्वक्पत्री** कारवीति च' (इति रुद्रः) । '**त्वक्पत्रं** तु वराङ्गके । **त्वक्पत्रीति** च कारव्याम्' इति हैमः (विश्वः) ॥ (१) ॥*॥ कारं वाति । 'वा गतिगन्धनयोः' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । गौरादिः (४।१।४१) ॥ (२) ॥*॥ प्रथते । 'प्रथ प्रख्याने' (चु० उ० से०) । 'प्रथिम्रदिभ्रस्जां संप्रसारणम्' (उ० १।२८) इति कुः । 'वोतो गुणवचनात्' (४।१।४४) इति वा ङीप् । '**पृथ्वी** भूमौ महत्यां च त्वक्पत्र्यां कृष्णजीरके' इति विश्वः (मेदिनी च) ॥ (३) ॥*॥ '**पृथुः** स्यान्महति त्रिषु । त्वक्पत्र्यां कृष्णजीरेऽस्त्री पुमानग्नौ नृपान्तरे' (इति मेदिनी) ॥ (६) ॥*॥ बाष्पमिव । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् । टाप् (४।१।४) ॥*॥ '**बाष्पीका**' इति पाठे पृषोदरादिः (६।३।१०९) ॥ (४) ॥*॥ 'जानपद–' (४।१।४२) इति ङीषि कबरी केशानां संनिवेशविशेषः । सैव ॥*॥ '**कर्बरी**' इति च पाठभेदः—इति स्वामी ॥ (५) ॥*॥ पञ्च (षट्) '**हिङ्गुतरोः पत्र्याम्**' ॥

निशाह्वा काञ्चनी पीता हरिद्रा वरवर्णिनी ।

नीति ॥ निशा आह्वा यस्याः । निशापदेन तत्पर्याया लक्ष्यन्ते ॥ (१) ॥*॥ काञ्चतेऽनया । 'कांचि दीप्त्यादौ' (भ्वा० आ० से०) । '–करणे–' (३।३।११७) इति ल्युट् । 'टिड्ढा–' (४।१।१५) इति ङीप् । '**काञ्चनः** काञ्चनारे स्याच्चम्पके नागकेसरे । उदुम्बरे च धत्तूरे हरिद्रायां तु **काञ्चनी** । क्लीबेऽब्जकेसरे हेम्नि' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ पीयते स्म । 'पीङ् पाने' (दि० आ० अ०) । 'पा पाने' (भ्वा० प० अ०) । कर्मणि क्तः (३।२।१०२) । 'घु-मास्था–' (६।४।६६) इतीत्वम् । '**पीतो** वर्णनिपीतयोः । **पीता** हरिद्रा' इति हैमः ॥ (३) ॥*॥ हरिं वर्णं द्राति । 'द्रा कुत्सायां गतौ' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । हरिभिर्द्रूयते वा । हरितं द्रवति वा । 'द्रु गतौ' (भ्वा० प० अ०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः ॥ (४) ॥*॥ वरश्चासौ वर्णश्च । सोऽस्त्यस्याः । 'अतः–' (५।२।११५) इतीनिः ॥ (५) ॥*॥ पञ्च '**हरिद्रायाः**' ॥

सामुद्रं यत्तु लवणमक्षीवं वसिरं च तत् ॥ ४१ ॥

सेति ॥ समुद्रे भवम् । 'तत्र भवः' (४।३।५३) इत्यण् । '**सामुद्रं** लवणान्तरे । लक्षणे च शरीरस्य' इति हैमः ॥*॥ लुनाति । 'लूञ् छेदने' (क्रया० उ० से०) । नन्द्यादित्वात् (३।१।१३४) ल्युः । 'लवणाल्लुक्' (४।४।२४) इति निपातनाण्णत्वम् । '**लवणं** सैन्धवादौ ना सिन्धुरक्षोभिदो रसे । तद्युक्ते वाच्यलिङ्गः स्यान्नदीभेदद्विषोः स्त्रियाम्' (इति मेदिनी) ॥*॥ अक्ष्ण ईं । अक्षीं वाति, वायति, वा । 'वा गत्यादौ' (अ० प० अ०) । 'ओ वै शोषणे' (भ्वा० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । '**अक्षीवं** वशिरे, शिश्नौ ना, मत्ते पुनरन्यवत्' इति विश्वः (मेदिनी च) ॥ (१) ॥*॥ वसनम् । 'वसु स्तम्भे' (दि० प० से०) । इन् (उ० ४।११८) । वसिं राति 'रा दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥*॥ 'वश कान्तौ' (अ० प० से०) । इन् (उ० ४।११८) । वशिं राति । '**वशिरः** पुमान् । किणिहीहस्तिपिप्पल्योः क्लीबेऽब्भिषलवणे स्मृतः' (इति मेदिनी) ॥ (२) ॥*॥ द्वे '**लवणस्य**' ॥

सैन्धवोऽस्त्री शीतशिवं माणिमन्थं च सिन्धुजे ।

सैन्धेति ॥ सिन्धुषु भवः । 'कच्छादिभ्यश्च' (४।३।१३३) इत्यण् । '**सैन्धवस्तु** सिन्धुदेशोद्भवे हये । माणिमन्थेऽपि' इति हेमचन्द्रः ॥ (१) ॥*॥ शीतं च तच्छिवं च 'अथ **शीतशिवं** क्लीबं शैलेयमणिमन्थयोः । पुंसि सक्तुफलाढ्यक्षे तथा मधुरिकौषधौ' (इति मेदिनी) ॥*॥ शितं शुभ्रम् । सितं च तच्छिवं च । (**सितशिवम्**)—इति मुकुटः ॥ (२) ॥*॥ मणिबन्धाख्यपर्वते भवम् । 'तत्र भवः' (४।३।५३) इत्यण् ॥*॥—मणिमन्थपर्वते भवम् । (**माणिबन्धम्**)—इति तु स्वामी ॥ (३) ॥*॥ सिन्धुषु जातम् । 'सप्तम्यां जनेर्डः' (३।२।९७) ॥ (४) ॥*॥ चत्वारि '**सिन्धुजे लवणे**' ॥

१—हैमपुस्तके सटीकेऽपि '**सैन्धवः** सिन्धुदेशजे । सिन्धूत्थे स्यात्' इत्येव पाठ उपलभ्यते ॥

रौमकं वसुकम्

रौमेति ॥ रुमायां भवम् । अण् (४।३।५३) । 'संज्ञायां कन्' (५।३।७५) ॥ (१) ॥*॥ वसु कायति । 'कै शब्दे' (भ्वा० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । वस्केव । यावादित्वात् (५।४।२९) कन् वा । वस्खस्यस्मिन् । व्रीह्यादित्वात् (५।२।११६) ठन् वा । 'इसुसु–' (७।३।५१) इति कः । **'वसुकं** रौमके, पुंसि शिवमल्लयर्कपर्णयोः' इति विश्वः (मेदिनी) ॥*॥ 'वस्तकम्' इति पाठे वस्त इव । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् । अजगन्धित्वात् । 'रौमके **वस्तकं** वसु' इति नाममाला ॥ (२) ॥*॥ द्वे **'शाम्भरलवणस्य' 'सांभरी'** इति ख्यातस्य ॥

पाक्यं विडं च कृतके द्वयम् ॥ ४२ ॥

पेति ॥ पच्यते । 'ऋहलोर्ण्यत्' (३।१।१२४) 'चजोः–' (७।३।५२) इति कुत्वम् । पाके साधुः, इति वा । 'तत्र साधुः' (४।४।९८) इति यत् ॥ (१) ॥*॥ विडति । 'विड भेदने' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः ॥ (२) ॥*॥ द्वे **'कृतके लवणे' 'खारी'** इति ख्यातस्य ॥

सौवर्चलेऽक्षरुचके

साविति ॥ सुष्ठु वर्च्यते दीप्यते । 'वर्च दीप्तौ' (भ्वा० आ० से०) । वृषादित्वात् (उ० १।१०६) कलच् । प्रज्ञाद्यण् (५।४।३८) । 'अथ **सौवर्चलं** सर्जक्षारे च लवणान्तरे' (इति मेदिनी) ॥ (१) ॥*॥ अक्षति । 'अक्षू व्याप्तौ' (भ्वा० प० से०) । अच् (३।१।१३४) **'अक्षो** रथस्यावयवे व्यवहारे बिभीतके । पाशके शकटे कर्षे ज्ञाने चात्मनि रावणौ । **अक्षं** सौवर्चले तुत्थे हृषीके' इति हेमचन्द्रः ॥ (२) ॥*॥ रोचते । 'रुच दीप्तौ' (भ्वा० आ० से०) क्कुन् (उ० २।३२) । **'रुचको** बीजपूरे च निष्के दन्तकपोतयोः । न द्वयोः सर्जिकाक्षारेऽप्यश्वाभरणमाल्ययोः । सौवर्चलेऽपि मङ्गल्यद्रव्येऽपि कटकेऽपि च' इति विश्वमेदिन्यौ ॥ (३) ॥*॥ त्रीणि **'मधुरलवणस्य' 'सौंचर'** इति ख्यातस्य ॥

तिलकं तत्र मेचके ।

तीति ॥ तिलति । 'तिल स्नेहने' (तु० प० से०) । तेलति । 'तिल गतौ' (भ्वा० प० से०) वा । क्कुन् (उ० २।३२) **'तिलको** द्रुमरोगाश्वभेदेषु तिलकालके । क्लीबं सौवर्चललवणोर्न स्त्रियां तु विशेषके' (इति मेदिनी) ॥ (१) ॥*॥ एकं तस्मिन् **'(सौवर्चले) कृष्णवर्णे'** ॥

मत्स्यण्डी फणितं खण्डविकारे

मेति ॥ मदं मुदं वा स्यन्दते । 'स्यन्दू प्रस्रवणे' (भ्वा० आ० से०) 'कर्मण्यण्' (३।२।१) । 'टिड्ढा–' (४।१।१५) इति ङीप् । पृषोदरादिः (६।३।१०९) ॥ (१) ॥*॥ फाण्यते (स्म) । 'फण गतौ' (भ्वा० प० से०) ण्यन्तः । क्तः (३।२।१०२) ॥ (२) ॥*॥ खण्डो विकारोऽस्य ॥ (३) ॥*॥ त्रीणि **'फाणितस्य' 'राव'** इति ख्यातस्य ।—'शुभ्रखण्डगुटिकायाः क्रमेणैकैकम्' इति मुकुटः ॥

शर्करा सिता ॥ ४३ ॥

शेति ॥ शृणाति पित्तम् । 'शृ हिंसायाम्' (क्या० प० से०) । 'शृः करन्' (उ० ४।३) **'शर्करा** । खण्डविकृतौ कर्परांशे रुगन्तरे । उपलायां शर्करायुक्तदेशे शकलेऽपि च' इति हैमः ॥ (१) ॥*॥ सिनोति । 'षिञ् बन्धने' (स्वा० उ० अ०) । 'अजिघृसिभ्यः क्तः' (उ० ३।८९) । शुक्लवर्णत्वाद्वा सिता । **'सित**मवसिते च बद्धे धवले त्रिषु । शर्करायां स्त्री' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'शर्करायाः' 'मिश्री'** इति ख्यातायाः ॥

कूर्चिका क्षीरविकृतिः स्यात्

किति ॥ कूर्चति । 'कूर्च विकारे' (भ्वादेराकृतिगणत्वाद्वोध्यः । संज्ञायां ण्वुल् (३।३।१०९) । कूर्चो मस्त्वादिरस्त्यस्या वा । 'अतः–' (५।२।११५) इति ठन् । 'दध्ना सह पयः पक्वं यत्तत्स्याद्दधिकूर्चिका । तक्रेण पक्वं यत् क्षीरं सा भवेत्तक्रकूर्चिका' । **'कूर्चिका** सूचिकायां च तूलिकायां च कुञ्चले । कपाटाकुटिके (टोङ्गेदने) क्षीरविकृतावपि योषिति' (इति मेदिनी) ॥ (१) ॥*॥ क्षीरस्य विकृतिः ॥ (२) ॥*॥ ('उमे क्षीरस्य विकृती **किलाटी** कूर्चिका तथा' इति हैमनाममाला) ॥*॥ द्वे **'किलाटिकायाः' 'मावा'** इति ख्यातायाः ॥

रसाला तु मार्जिता ।

रेति ॥ रसानालाति । मूलविभुजादिः (वा० ३।२।५) ॥ (१) ॥*॥ मार्ज्यते स्म । 'मृजू शौचालंकारयोः' (चु० उ० से०) । चुरादिः । क्तः (३।२।१०२) ॥ (२) ॥*॥ 'अर्धाढकः सुचिरपर्युषितस्य दध्नः खण्डस्य षोडश पलानि शशिप्रभस्य । सर्पिः पलं मधु पलं मरिचं द्विकर्षं शुण्ठ्याः पलार्धमपि चार्धपलं चतुर्णाम् । सूक्ष्मे पटे ललनया मृदुपारिघृष्टा कर्पूरधूलिसुरभीकृतपात्रसंस्था । एषा वृकोदरकृता सरसा रसाला यास्वादिता भगवता मधुसूदनेन' इति सूदशास्त्रम् । ('रसालायां तु मार्जितः । **शिखरिणी'** इति हैमनाममाला) ॥*॥ द्वे **'दधिमधुशर्करामरीचार्द्रादिभिः कृतस्य लेह्यस्य' 'शिखरिण'** इति ख्यातायाः ॥

स्यात्तेमनं तु निष्टानम्

स्येति ॥ तिम्यतेऽनेन । 'तिम आर्द्रीभावे' (दि० प० से०) । 'करणे ल्युट्' (३।३।११७) । **'तेमनं** व्यञ्जने क्लेदे **तेमनी** चुल्लिभिष्यपि' इति हेमचन्द्रः ॥ (१) ॥*॥ निष्ठीयतेऽत्र । 'ष्ठा गतिनिवृत्तौ' (भ्वा० प० अ०) । ल्युट् (३।३।११७) ॥ (२) ॥*॥ द्वे **'व्यञ्जनस्य'** ॥

त्रिलिङ्गा वासितावधेः ॥ ४४ ॥

त्रीति ॥ वासितपर्यन्ताः ॥

शूलाकृतं भटित्रं च शूल्यम्

श्विति ॥ शूलेन कृतम् । 'शूलात्पाके' (५।४।६५) इति ङाच् ॥ (१) ॥*॥ भटति । 'भट भृतौ' (भ्वा० प० से०) । 'अशिभ्रादिभ्य इत्रोत्रौ' (उ० ४।१७३) इतीत्रः ।—ग्रहादित्वादित्रच्—इति मुकुटस्तु चिन्त्यः । भट्यते स्म वा ॥ (२) ॥*॥ शूले संस्कृतम् । 'शूलोखाद्यत्' (४।२।३७) ॥ (३) ॥*॥ त्रीणि **'लोहशलाकया पक्वमांसस्य'** ॥

उख्यं तु पैठरम् ।

उख्येति ॥ उखायां संस्कृतम् । यत् (४।२।१७) ॥ (१) ॥*॥ पिठरे संस्कृतं 'संस्कृतं भक्षाः' यत् (४।२।१६) ॥ इत्यण् ॥ (२) ॥*॥ द्वे **'स्थालीसंस्कृतस्यान्नादेः'** ॥

प्रणीतमुपसंपन्नम्

प्रेति ॥ प्रणीयते स्म । कर्मणि क्तः (३।२।१०२) । **'प्रणीत**मुपसंपन्ने कृते क्षिप्ते प्रवेशिते । संस्कृताग्नौ च' इति हैमः ॥ (१) ॥*॥ उपसंपद्यते स्म । 'पद गतौ' (दि० आ० अ०) । 'गत्यर्था–' (३।४।७२) इति क्तः । **'उपसंपन्न**मुद्दिष्टं निहते च सुसंस्कृते' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ द्वे **'पाकेन संस्कृतस्य व्यञ्जनादेः'** ॥

प्रयस्तं स्यात्सुसंस्कृतम् ॥ ४५ ॥

प्रेति ॥ प्रयस्यते स्म । 'यसु प्रयत्ने' (दि० प० से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ सुष्ठु संस्क्रियते स्म । क्तः (३।२।१०२) । 'संपरिभ्याम्–' (६।१।१३७) इति सुट् ॥ (२) ॥*॥ द्वे **'द्रव्यान्तरसंस्कृतस्य पक्वस्य'** ॥

स्यात्पिच्छिलं तु विजिलम्

स्येति ॥ पिच्छोऽस्यास्ति । पिच्छादित्वात् (५।२।१००) इलच् । 'पिच्छा तु शाल्मलीवेष्टे मण्डे चाश्वपदामये । (पङ्क्तौ पूगच्छटाकोशमोचानिजयुतेषु च । **पिच्छः** पुच्छे)' इति विश्वः ॥ (१) ॥*॥ विजनम् । 'ओविजी भयचलनयोः' (तु० आ० से०) । 'इगुपधात् कित्' (उ० ४।१२०) इतीन् । विजिं लाति । 'ला दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥ (२) ॥*॥ द्वे **'मण्डयुक्तभक्तजलयुक्तव्यञ्जनयोः'** ॥

संमृष्टं शोधितं समे ।

सेति ॥ संभृज्यते स्म । 'मृजू शुद्धौ' (अ० प० से०) । कर्मणि क्तः (३।५।१०२) ॥ (१) ॥*॥ शोध्यते स्म । 'शुध शुद्धौ' (दि० प० अ०) । ण्यन्तात् कर्मणि क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'केशकीटाद्यपनयेन शोधितस्यान्नादेः'** ॥

चिक्कणं मसृणं स्निग्धम्

चीति ॥ चिक्कनम् । 'चिक्क गतौ' ( ) । संपदादिक्विप् (वा० ३।३।१०८) । चिक्कं कणति । 'कण शब्दे' (भ्वा० प० से०) । मूलविभुजादिकः (वा० ३।२।५) । यद्वा चिक्कनम् । घञ् (३।३।१८) । चिक्कस्य अणम् 'अण शब्दे' (भ्वा० प० से०) । अच् (३।१।१३४) शकन्ध्वादिः (वा० ६।१९४) ।—चिक्यते । 'चिती संज्ञाने' (भ्वा० प० से०) । 'चित्तेः कणः कश्च' (उ० ४।१७६) इति मुकुटस्त्वपाणिनीयः[१] ॥ (१) ॥*॥ मस्यति । 'मसी परिणामे' (दि० प० से०) । बाहुलकादृणः । यद्वा मसृणोति । 'ऋणु गतौ' (त० उ० से०) । 'इगुपध–' (३।१।१३५) इति कः । पृषोदरादिः (६।३।१०९) । **'मसृणोऽकर्कशे स्निग्धे त्रिषु मायां तु योषिति'** इति विश्वः (मेदिनी) ॥ (२) ॥*॥ स्निह्यति स्म । 'स्निह प्रीतौ' (दि० प० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । 'वा द्रुह–' (८।२।३३) इति घः ॥ (३) ॥*॥ त्रीणि **'स्निग्धस्य'** ॥

तुल्ये भावितवासिते ॥ ४६ ॥

त्विति ॥ भाव्यते स्म 'भुवोऽवकल्कने' इति चुरादिण्यन्तात् क्तः (३।२।१०२) । **'भावितं** वासिते प्राप्ते' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ वास्यते स्म । 'वास उपसेवायाम्' (चु० उ० से०) । क्तः (३।२।१०२) । **वासिता** करिणी नार्योर्वासितं भावितेरुते' (इति मेदिनी) । 'अथ **वासितम्** । वस्त्रच्छन्ने ज्ञानमात्रे भावितेऽप्यथ **'वासिता** । स्त्रीकरिण्योः' इति हैमः ॥ (२) ॥*॥ द्वे **'ग्राहितहिङ्ग्वादिगन्धस्य व्यञ्जनादेः'** ॥

आपक्वं पौलिरभ्यूषः

आपेति ॥ ईषत्पक्वम् । 'आङीषदर्थे' (वा० २।२।१८) इति समासः ॥ (१) ॥*॥ पोलति । 'पुल महत्त्वे' (भ्वा० प० से०) । ज्वलादित्वात् (३।१।१४०) णः । भावे घञ् (३।३।१८) वा । पोलेन निर्वृत्तः । सुतंगमादित्वात् (४।२।८०) इञ् । अभ्यूषसाहचर्यात्पुंसि ॥ (२) ॥*॥ अभ्यूषति । अभ्यूषते वा । 'ऊष रुजायाम्–' (भ्वा० प० से०) । 'इगुपध–' (३।२।१३५) इति कः । घञ् (३।३।१८) वा ॥*॥ **'तोक्मं हरितो यवोऽभ्यूषः'** इति बोपालितात् ह्रस्वादिः (क्षमध्यः) अपि तत्र 'उष दाहे' (भ्वा० प० से०) इति धातुर्बोध्यः ॥*॥ अस्मादेवाचि (३।१।१३४) **'अभ्योषः'** अपि, इत्येके ॥ (३) ॥*॥ त्रीणि **'हरितयवादेर्भर्जितस्य'** ॥

लाजाः पुंभूम्नि चाक्षताः ।

लेति ॥ लज्यन्ते । 'लज भर्जने' (भ्वा० प० से०) । घञ् (३।३।१९) पुंसि बहुत्वे । **'लाजः** स्यादार्द्रतण्डुले । नपुंसकमुशीरेऽथ स्त्रियां पुंभूम्नि चाक्षते' (इति मेदिनी) ॥ (१) ॥*॥ क्षणनम् । 'क्षणु हिंसायाम्' (त० उ० से०) । 'नपुं-

---

१—इदं तु सिद्धान्तकौमुद्यामेतज्जनकेनापि 'चित्तेः कणः कश्च' (उ० ४।१७६) । बाहुलकादुणः । 'चिक्कणं मसृणं स्निग्धम्' इत्यस्योपन्यस्तत्वेन तदसरणमूलकम् ॥

सके भावे क्तः' (३।३।११४) । न क्षतं येषां ते । चौ भिन्नक्रमः । अक्षताश्च पुंभूम्नि, इत्यर्थः । मुकुटस्तु—'अक्षतम्' इति पठित्वा 'क्षणु हिंसायाम्' (तु० उ० से०) । कर्मणि क्तः (३।२।१०२) । क्षतं खण्डितम् । न क्षतमक्षतम् । इति विगृह्य । ते (लाजाः) नित्यपुंलिङ्गा नित्यबहुवचनान्ताश्च —इति व्याचख्यौ । **'अक्षतं** न द्वयोः पण्डे लाजेषु, त्रिष्वहिंसिते । यवेऽपि क्वचित्' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'भृष्टव्रीह्यादेः'** ॥ केचित्तु—अखण्डतण्डुला अक्षताः—इत्याहुः ॥

पृथुकः स्याच्चिपिटकः

प्रिति ॥ प्रथते । 'प्रथ प्रख्याने' (चु० उ० से०) । 'पृथुकपाकाः–' (उ० ५।५३) इति साधुः । **'पृथुक**श्चिपिटेऽर्भके' इति हेमचन्द्रः ॥ (१) ॥*॥ नासिकाया नतम् । 'इनच्पिटच्चिकचि च' (५।२।३३) इति पिटच्, नेश्विरादेशः । चिपिटमिव । 'संज्ञायां कन्' (५।३।७५) । 'इवे–' (५।३।९६) इति वा कन् ॥ (२) ॥*॥ द्वे **'चिवडा'** इति ख्यातस्य ॥

धाना भृष्टयवे स्त्रियः ॥ ४७ ॥

धेति ॥ 'दधति । डुधाञ्' (जु० उ० से०) । 'धापृवस्यज्यतिभ्यो नः' (उ० ३।६) । बहुवचननिर्देशाद्भूम्नि । **'धाना** भृष्टयवेऽङ्कुरे धान्याके चूर्णसक्तुषु' इति हैमः ॥ (१) ॥*॥ भृष्टश्चासौ यवश्च ॥ (२) ॥*॥ द्वे **'भर्जितयवानाम्'** ॥

पूपोऽपूपः पिष्टकः स्यात्

प्विति ॥ पवनम् । 'पूञ् पवने' (क्रया० उ० से०) संपदादिक्विप् (वा० ३।३।१०८) पुवं पाति, पिबति, वा । 'आतोऽनुप–' (३।२।३) इति कः । मुकुटस्तु—पुनाति । पूपः । 'नीपादयश्च' इति पः कित्—इति । तन्न । तादृशसूत्रस्यापाणिनीयत्वात् ॥ (१) ॥*॥ न पूय्यते । 'पूयी विशरणे' (भ्वा० आ से०) । बाहुलकात् पः । वलि लोपः (६।१।६६) यद्वा अपुवं पाति पिबति वा ॥ (२) ॥*॥ पिष्टस्य विकारः । 'संज्ञायाम्' (४।३।१४७) इति कन् । **'पिष्टको** घृतपूपादौ नेत्ररोगान्तरेऽपि च' इति विश्वः (मेदिनी) ॥ (३) ॥*॥ त्रीणि **'अपूपस्य'** ॥

करम्भो दधिसक्तवः ।

केति ॥ केन जलेन रम्यते मिश्रीक्रियते । केन वायुना वा नीयते । 'रभिः' (भ्वा० आ० अ०) अनेकार्थः । 'अकर्तरि च–' (३।३।१९) इति घञ् । 'रभेरशब्लिटोः' (७।१।६३) इति नुम् ॥*॥ **'करम्बः'** इति पाठे केन जलेन रम्यते । 'रवि शब्दे' (भ्वा० आ० से०) । अच् (३।१।१३४) यद्वा किरति, कीर्यते, वा । 'कॄ विक्षेपे' (तु० प० से०) 'कॄकदिकडिकटिभ्योऽम्बच्' (उ० ४।८२) ॥ (१) ॥*॥ सचते । 'षच समवाये' (भ्वा० उ० से०) 'सितनिगमि–' (उ० १।६९) इत्यादिना तुन् ॥*॥ **('धानाचूर्णं** तु **सक्तवः'** इति नाममाला) । दध्युपसिक्ताः सक्तवः । 'अन्नेन व्यञ्जनम्' (२।१।३४) इति समासः । शाकपार्थिवादिः (२।१।७८) वा ॥ (२) ॥*॥ द्वे **'दधिमिश्रसक्तुनः'** ॥

भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री सदीदिविः ॥ ४८ ॥

भीति ॥ बभस्ति । 'भस दीप्तौ' (जु० प० से) । बाहुलकात्सः । 'बहुलं छन्दसि' (७।४।७८) इतीत्वम् । 'ब्राह्मणभिस्सा' इति (६।३।१ सूत्रे) भाष्यप्रयोगाल्लोकेऽपि । यद्वा भेदनम् । संपदादिः (वा० ३।३।१०८) । भिदं स्यति । 'षो अन्तकर्मणि' (दि० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । 'पृषोदरादिः' (६।३।१०९) । मुकुटस्तु—भ्यस्यते भक्ष्यते । 'भ्यस भये' (भ्वा० प० से०) भक्षणार्थः । 'भ्यसेः संप्रसारणं सश्च'—इत्याह । तदपाणिनीयम् ॥ (१) ॥*॥ भज्यते स्म । 'भज सेवायाम्' (भ्वा० उ० अ०) कर्मणि क्तः । **'भक्तमन्ने** तत्परे च' इति हेमचन्द्रः ॥ (२) ॥*॥ अद्यते । 'अद भक्षणे' (अ० प० से०) । 'अदेर्नुम्धौ च' (उ० ४।२०६) इत्यसुन् । अन्धयति वा । 'अन्ध दृष्ट्युपघाते' (चु० उ० से०) । असुन् (उ० ४।१८९) ॥ (३) ॥*॥ अद्यते स्म । क्तः (३।२।१०२) । 'अन्नाण्णः' (४।४।८५) इति निपातनात् 'बहुलं तणि' (वा० २।४।५४) इति वा न जग्धिः । **'अन्नं** भक्ते च भुक्ते स्यात्' इति (मेदिनी) ॥ (४) ॥*॥ उनत्ति । 'उन्दी क्लेदने' (रु० प० से०) । 'उन्देर्नलोपश्च' (उ० २।७६) इति युच् । ऊर्दतेऽनेन वा । 'ऊर्द क्रीडायाम्' (भ्वा० आ० से०) । करणे ल्युट् (३।३।११७) । पृषोदरादिः (६।३।१०९) । **'ओदनं** न स्त्रियां भक्ते बलायामोदनी स्त्रियाम्' (इति मेदिनी) । दीदिविसहितोऽस्त्री, इत्यन्वयः ॥ (५) ॥*॥ दीव्यत्यनेन । 'दिवु क्रीडायाम्' (दि० प० से०) । 'दिवो द्वे दीर्घश्चाभ्यासस्य' (उ० ४।५५) इति किन् ।—'ह्व्यादयश्च' इति किन्—इति मुकुटस्त्वपाणिनीयः ।—'सः' इति विशेषणात्पुंसि—इति स्वामी । **'दीदिवि**र्धिषणे पुंसि स्यादन्ने च तदस्त्रियाम्' इति विश्वः ॥ (६) ॥*॥ षट् **'सिद्धान्नस्य'** ॥

भिस्सटा दग्धिका

भीति ॥ भिस्सां टीकते । 'टीक्ङ् गतौ' (भ्वा० आ० से०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति ङः । 'ङ्याप्पोः–' (६।३।६३) इति ह्रस्वः ॥ (१) ॥*॥ दह्यते स्म । क्तः (३।२।१०२) । कुत्सिता दग्धा । 'कुत्सिते' (५।३।७४) इति कन् ॥ (२) ॥*॥ **'दग्धौदनस्य'** ॥

सर्वरसाग्रे मण्डमस्त्रियाम् ।

सेति ॥ रसश्चासावग्रश्च । सरस्याग्रः, इति वा । अग्रो

रसः इति राजदन्तादिः (२।२।३१) वा । सर्वस्य रसाग्रः ॥ (१) ॥*॥ **मण्डते, मण्ड्यते**, वा । 'मडि भूषायाम्' (भ्वा० आ० से०) । अच् (३।१।१३४) । घञ् (३।३।१८) वा । मन्यते वा । 'मन ज्ञाने' (दि० आ० अ०) । 'वमन्ताङ्गः' (उ० १।११४) **'मण्डः** पश्चाङ्गुले शाकभेदे क्लीबं तु मस्तुनि । आमलक्यां स्त्रियां मण्डाधास्त्रियां सारपिच्छयोः' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ द्वे **'मण्डकस्य'** ॥

मासराचामनिस्रावा मण्डे भक्तसमुद्भवे ॥ ४९ ॥

मेति ॥ मास्यते । 'मसी परिणामे' (दि० प० से०) । ण्यन्तः बाहुलकादरन् । मा श्रीः सरत्यत्र, इति वा । 'सृ गतौ' (भ्वा० प० अ०) । 'पुंसि–' (३।३।११८) इति घः ॥ (१) ॥*॥ आचम्यते । 'चमु अदने' (भ्वा० प० से०) । 'अकर्तरि च' (३।३।१९) इति घञ् । वृद्धिः (७।२।११६) ॥ (२) ॥*॥ निस्राव्यते । 'स्रु गतौ' (भ्वा० प० अ०) । ण्यन्तः । 'एरच्' (३।३।५६) । घञ् (३।३।१९) वा ॥*॥— **'विस्रावः'** इति मुकुटः ॥ (३) ॥*॥ भक्तात्समुद्भवति ॥*॥ त्रीणि **'भक्तोद्भवमण्डस्य'** ॥

यवागूरुष्णिका श्राणा विलेपी तरला च सा ।

येति ॥ यौति, यूयते वा । 'यु मिश्रणे' (अ० प० से०) । 'सृयुवचिभ्योऽःयूजागूजक्कुचः' (उ० ३।८१) इत्यागूच् ॥ (१) ॥*॥ उष्णैव । 'ब्राह्मणकोष्णिके संज्ञायाम्' (५।२।७१) इति कन् ॥ (२) ॥*॥ श्रायते स्म । 'श्रा पाके' (अ० प० अ०) । कर्मणि क्तः (३।२।१०२) । 'संयोगादेरातः' (८।२।४३) इति निष्ठानत्वम् ॥ (३) ॥*॥ विलिम्पति । 'लिप उपदेहे' (तु० उ० अ०) । पचाद्यच् (३।१।१३४) । गौरादिः (४।१।४१) ॥ (४) ॥*॥ तरणम् । तरः । 'तॄ प्लवनादौ' (भ्वा० प० से०) । 'ऋदोरप्' (३।३।५७) । तरं लाति । 'आतोऽनुप–' (३।२।३) इति कः ॥ (५) ॥*॥ पञ्च **'यवाग्वाः' 'लपसी'** इति ख्यातायाः ॥

गव्यं त्रिषु गवां सर्वम्

गेति ॥ गोरिदम् । 'गोपयसोर्यत्' (४।३।१६०) । 'वान्तो यि प्रत्यये' (६।१।७९) । **'गव्यं** नपुंसकं ज्यायां रागद्रव्येऽप्यथ स्त्रियाम् । गोसमूहे त्रिलिङ्गं तु गोदुग्धादौ च गोहिते' (इति मेदिनी) ॥ (१) ॥*॥ सर्वं भवविकारावयवादि ॥*॥ एकम् **'गोरसस्य'** ॥

गोविट् गोमयमस्त्रियाम् ॥ ५० ॥

गविति ॥ गोर्विट् ॥ (१) ॥*॥ गोः पुरीषम् । 'गोश्च पुरीषे' (४।३।१४५) इति मयट् ॥ (२) ॥*॥ द्वे **'गोमयस्य'** ॥

तत्तु शुष्कं करीषोऽस्त्री

तेति ॥ कीर्यते । 'कॄ विक्षेपे' (तु० प० से०) । 'कृतॄभ्यामीषन्' (उ० ४।२६) ॥ (१) ॥*॥ एकम् **'शुष्कगोमयस्य'** ॥

दुग्धं क्षीरं पयः सम्म् ।

द्विति ॥ दुह्यते स्म । क्तः (३।२।१०२) । **'दुग्धं** क्षीरे पूरिते च' इति हेमचन्द्रः ॥ (१) ॥*॥ क्षयणम् । 'क्षीष् हिंसायाम्' (क्या० प० अ०) । संपदादिः (वा० ३।३।१०८) । क्षियमीरयति । 'ईर गतौ' (अ० आ० से०) ण्यन्तः । 'कर्मण्यण्' (३।२।१) । घस्यते वा । 'घस्लृ अदने' (भ्वा० प० अ०) । 'घसेः किच्च' (उ० ४।३४) इतीरन् । 'गमहनजन–' (६।४।९८) इत्युपधालोपः । 'खरि च' (८।४।५५, भा० ६१) इति चर्त्वम् । 'शासिवसि–' (८।३।६०) इति षत्वम् । **'क्षीरं** पानीयदुग्धयोः' इति हैमः ॥ (२) ॥*॥ पीयते । 'पीङ् पाने' (दि० आ० अ०) । पयते वा । 'पय गतौ' (भ्वा० आ० से०) असुन् (उ० ४।१८९) । **'पयः** क्षीरे च नीरे च' इति हैमः ॥ (३) ॥*॥ त्रीणि **'दुग्धस्य'** ॥

पयस्याज्यदध्यादि

पेति ॥ पयसो विकारः 'गोपयसोर्यत्' (४।३।१६०) ॥ (१) ॥*॥ आज्यं च दधि चादिर्यस्य । आदिना तक्रं नवनीतं च ॥*॥ एकम् **'घृतदध्यादेः'** ॥

द्रप्सं दधि घनेतरत् ॥ ५१ ॥

द्रेति ॥ तृप्यन्त्यनेन । 'तृप प्रीणने' (दि० प० अ०) । 'अश्यादयश्च' (उ० ४।११२) इति 'त्रप्स्यम्' इति निपातः–इति मुकुटः । 'द्रप्सम्' इति स्वामी पठति । दृप्यन्त्यनेन । 'दृप हर्षादौ' (दि० प० अ०) 'अनुदात्तस्य च' (६।१।५९) इत्यम् । बाहुलकात् सः ।—द्रप्सं द्राक् प्सानीयम्–इति सर्वानन्दः । 'द्रप्सं दध्यघनं तथा' इति नाममाला ॥ (१) ॥*॥ घनात् कठिनादन्यत् ॥*॥ एकं **'शिथिलदध्नः' 'दगडा'** इति ख्यातस्य । केचित्तु 'द्रप्स' स्थाने सरं पठन्ति । सरति । 'सृ गतौ' (भ्वा० प० अ०) । अच् (३।१।१३४) । 'वाणद्रप्सौ **सरौ'** इति दुर्गात् ।—उपरि प्लवमानम्—इति व्याचक्षते ॥

घृतमाज्यं हविः सर्पिः

घ्रिति ॥ घ्रियते । 'घृ सेके' (भ्वा० प० अ०) । 'अज्यतिघृसिभ्यः क्तः' (उ० ३।८९) । **'घृत**माज्यामबुदीप्तेषु' इति हेमचन्द्रः ॥ (१) ॥*॥ आज्यतेऽनेन । 'अञ्जू व्यक्त्यादौ' (रु० प० से०) 'अज्यतेः संज्ञायाम्' (वा० ३।१।१०९) इति क्यप् ॥ (२) ॥*॥ हूयते 'हु दानादौ' (जु० प० अ०) । 'अर्चिशुचिहुसृपिच्छादिच्छर्दिभ्य इसिः' (वा० २।१०८) इतीसिः । **'हविः** सर्पिषि होतव्ये' इति हैमः ॥ (३) ॥*॥ सर्पति 'सृपॄ गतौ' (भ्वा० प० से०) इसिः (वा० २।१०८) ॥ (४) ॥*॥ चत्वारि **'घृतस्य'** ॥

नवनीतं नवोद्धृतम् ।

नेति ॥ नवं च तन्नीतं च । 'विशेषणम्–' (२।१।५७) इति समासः ॥ (१) ॥*॥ नवं च तदुद्धृतं च ॥*॥ एकम् **'अकृताग्निसंयोगस्य नवोद्धृतस्य'** ॥

तत्तु हैयङ्गवीनं यद् ह्योगोदोहोद्भवं घृतम् ॥ ५२ ॥

तेति ॥ दुह्यते इति दोहः । कर्मणि घञ् (३।३।१९) गवां दोहः । ह्यो गोदोहः । ह्योगोदोहादुद्भवति । अच् (३।१।१३४) तस्य 'हैयङ्गवीनं संज्ञायाम्' (५।२।२३) इति निपातः ॥ (१) ॥*॥ एकम् **'एकरात्रपर्युषिताद्दध्न उत्पन्नस्य घृतस्य'** ॥

दण्डाहतं कालशेयमरिष्टमपि गोरसः ।

देति ॥ दण्डेन मथाहतं विलोडितम् । 'कर्तृकरणे–' (२।१।३२) इति समासः ॥ (१) ॥*॥ कलश्यां मन्थपात्रे भवम् । 'इतिकुक्षि–' (४।३।५६) इति ढञ् ॥ (२) ॥*॥ अरिष्टमक्षेमं यस्मात् । 'अनेक–' (२।२।२४) इति समासः । **'अरिष्टमशुभे तक्रे सूतिकागार आसवे । शुभे मरणचिह्ने च'** इति विश्वः ॥ (३) ॥*॥ गोरसस्य दुग्धस्य विकारत्वादुपचारात् ॥ (४) ॥*॥ चत्वारि **'घोलस्य'** ॥

तक्रं ह्युदश्वित्मथितं पादाम्ब्वर्धाम्बु निर्जलम् ॥५३॥

तेति ॥ तञ्चति । तञ्च्यते वा । 'तञ्चु गतौ' (भ्वा० प० से०) । 'स्फायितञ्चि–' इति रक् (उ० २।१३) । न्यङ्क्वादिः (७।३।५३) ॥ (१) ॥*॥ उदकेन श्वयति वर्धते । 'टु ओश्वि गतिवृद्ध्योः' (भ्वा० प० से०) । क्विप् (३।२।७६) । तुक् (६।१।७१) । 'उदकस्योदः संज्ञायाम्' (६।३।५७) । 'उदश्वितः–' (४।२।१९) इति निर्देशादसंप्रसारणम् ॥ (१) ॥*॥ मथ्यते स्म । 'मथे विलोडने' (भ्वा० प० से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ एकैकं क्रमेण **'चतुर्थांशजलघोलर्धिजलघोलनिर्जलघोलानाम्'** ॥

मण्डं दधिभवं मस्तु

मेति ॥ दध्नो भवति ॥*॥ मस्यते 'मसी परिणामे' (दि० प० से०) 'सितनि–' (उ० १।६९) इति तुन् ॥ (१) ॥*॥ एकं **'वस्त्रनिःसृतदधिजलस्य'** ।—दध्न उपरिभागस्य—इत्यन्ये ॥

पीयूषोऽभिनवं पयः ।

पीति ॥ पीयति । पीय्यते अनेन वा । 'पीयू प्रीतौ' (सौत्रः) । 'पीयेरूषन्' (उ० ४।७६) **'पीयूषं** सप्तदिवसावधिक्षीरे तथामृते' इति विश्वमेदिन्यौ ॥*॥ मुकुटस्तु—**'पेयूषम्'** इति पठति । तत्र बाहुलकाद्धुणः । यत्तु—पीयते इदम् । 'पीङ् पाने' (दि० आ० अ०) । 'अन्येभ्योऽपि' (३।२।७५) इति विच् । पेः पानकर्ता । 'यूष हिंसायाम्' (भ्वा० आ० से०) इत्यतः इगुपधत्वात् कः (३।१।१३५) । यूषो नाशयिता । पेर्यूषः—इति व्याख्यातम् । तन्न । 'इदम्' इति कर्मनिर्देशात् । कर्तरि विचो विधानात् । 'इदम्' इति कर्तृनिर्देशश्चेत् । तर्हि 'पानकर्तृनाशयितृ' इति वक्तुं युक्तम् ॥ (१) ॥*॥ एकं **'नवप्रसूताया गोः क्षीरस्य'** ॥

अशनाया बुभुक्षा क्षुत्

अशेति ॥ अशनस्येच्छा । 'सुपः–' (३।१।८) इति क्यच् । 'अशनाया–' (७।४।३४) इतीत्वाभावः । 'अप्रत्ययात्' (३।३।१०३) इत्यः ॥ (१) ॥*॥ भोक्तुमिच्छा 'भुज पालनाभ्यवहारयोः' (रु० प० अ०) । 'धातोः कर्मणः' (३।१।७) इति सन् ॥ (२) ॥*॥ क्षोधनम् । 'क्षुध बुभुक्षायाम्' (दि० प० अ०) । क्विप् (३।२।१७८) ॥*॥ भागुरिमते टापि **'क्षुधा'** च ॥ (३) ॥*॥ त्रीणि **'क्षुधः'** ॥

ग्रासस्तु कवलः पुमान् ॥ ५४ ॥

ग्रेति ॥ ग्रस्यते । 'ग्रसु अदने' (भ्वा० आ० से०) । 'अकर्तरि च' (३।३।१९) इति घञ् ॥ (१) ॥*॥ केन वलते । 'वल तृप्तौ' (भ्वा० आ० से०) । अच् (३।१।१३४) ॥ (२) ॥*॥ द्वे **'ग्रासस्य'** ॥

सपीतिः स्त्री तुल्यपानम्

सेति ॥ पानम् । 'पा पाने' (भ्वा० प० अ०) 'स्त्रियां क्तिन्' (३।३।९४) । 'घुमास्था–' (६।४।६६) इतीत्वम् । समाना पीतिः । 'समानस्य छन्दसि–' (६।३।८४) इति सभावः । सह पीतिर्वा । 'सहस्य सः संज्ञायाम्' (६।३।७८) ॥ (१) ॥*॥ तुल्यं च यत्पानं च ॥ (२) ॥*॥ द्वे **'बहुभिः संमील्य पानस्य'** ॥

सग्धिः स्त्री सहभोजनम् ।

सेति ॥ अदनम् । 'अद भक्षणे' (अ० प० अ०) । क्तिन् (३।३।९४) 'बहुलं छन्दसि' (२।४।३९) इति घस् । 'घसिभसोर्हलि च' (६।४।१००) इत्युपधालोपः । 'झलो झलि' (८।२।२६) इति सलोपः । 'झषस्तथोर्धोऽधः' (४।२।४०) । 'झलां जश् झशि' (८।४।५३, भा० ५९) इति घस्य गः । समाना ग्धिः पूर्ववत् ॥ (१) ॥*॥ सहभोजनम् । 'सुप् सुपा' (२।१।४) इति समासः ॥ (२) ॥*॥ द्वे **'बहुभिः संमील्य भोजनस्य'** ॥

उदन्या तु पिपासा तृट् तर्षः

उदेति ॥ उदकस्येच्छा । अशनायावत् ॥ (१) ॥*॥ पातुमिच्छा । 'पा पाने' (भ्वा० प० अ०) । 'धातोः' (३।१।७) इति सन् । 'अ प्रत्ययात्' (३।३।१०३) ॥ (२) ॥*॥ तर्षणम् । 'जितृषा पिपासायाम्' (दि० प० से०) संपदादिः (वा० ३।३।१०८) । (**'तृट् तृष्णावत्तर्षवच्च** भवेल्लिप्सापिपासयोः' इति हैमः) ॥ (३) ॥*॥ घञ् (३।३।१८) वा ॥*॥ **'तृषा** लिप्सातृषोः स्त्रियाम्' इति विश्वः (मेदिनी) ॥ (४) ॥*॥ चत्वारि **'पिपासायाः'** ॥

जग्धिस्तु भोजनम् ॥ ५५ ॥

जेमनं लेह आहारो निघसो न्याद इत्यपि ।

जेति ॥ अदनम् । 'अद भक्षणे' (अ० प० अ०) । क्तिन् (३।३।९४) । 'अदो जग्धिः' (२।४।३६) ॥ (१) ॥*॥ भुजेः (रु० आ० अ०) ल्युट् (३।३।११५) ॥ (२) ॥*॥ 'जिमु अदने' (भ्वा० प० से०) । ल्युट् (३।३।११५) ॥ (३) ॥*॥ 'लिह आस्वादने' (अ० उ० अ०) । घञ् (३।३।१८) ॥*॥ 'लेपः' इति पाठे 'लिप उपदेहे' (तु० प० अ०) घञ् (३।३।१८) । **'लेपस्तु** लेपने । अशने च सुरायां च' इति हेमचन्द्रः ॥ (४) ॥*॥ आहरणम् । 'हृञः' (भ्वा० उ० अ०) घञ् (३।३।१८) ॥ (५) ॥ * ॥ न्यदनम् । अदेः (अ० प० अ०) 'नौ ण च' (३।३।६०) इत्यप्, णश्च । 'घञपोश्च' (२।४।३८) घस्लादेशः ॥ (६) ॥*॥ (७) ॥*॥ सप्त **'भोजनस्य'** ॥

सौहित्यं तर्पणं तृप्तिः

साविति ॥ सुहितस्य भावः । ष्यञ् (५।१।१२४) ॥ (१) ॥*॥ 'तृप प्रीणने' (दि० प० अ०) । ल्युट् (३।३।११५) ॥ (२) ॥*॥ क्तिन् (वा० ३।३।९४) ॥ (३) ॥*॥ त्रीणि **'तृप्तेः'** ॥

फेला भुक्तसमुज्झितम् ॥ ५६ ॥

फेयिति ॥ फेल्यते । 'फेल्ल गतौ' (भ्वा० प० से०) । 'गुरोश्च' (३।३।१०४) इत्यः ॥ (१) ॥*॥ पूर्वं भुक्तं पश्चात्समुज्झितम् । 'पूर्वकालैक–' (२।१।४९) इति समासः ॥ (२) ॥*॥ द्वे **'भुक्तोत्सृष्टस्य'** ॥

कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम् ।

केति ॥ कमनम् । 'कमु कान्तौ' (भ्वा० आ० से०) । घञ् (३।३।१८) । 'विशेषैर्यद्यबाधितः' इति क्लीबत्वम् । **'कामं** बाढेऽनुमतिरेतसोः । **कामः** स्मरेच्छाकाम्येषु' । इति हैमः ॥ (१) ॥*॥ (२) ॥*॥ (३) ॥*॥ 'आप्लृ व्याप्तौ' (स्वा० प० अ०) । भावे क्तः (३।३।११४) ॥ (४) ॥*॥ एषणम् । 'इषु इच्छायाम्' (तु० प० से०) । क्तः (३।३।११४) । **'इष्टमाशंसितेऽपि स्यात्पूजिते प्रेयसि त्रिषु । सप्ततन्तौ पुमान् क्लीबे संस्कारे क्रतुकर्मणि'** इति विश्वः (मेदिनी) ॥ (५) ॥*॥ आप्तमिष्टम् । 'आप्लृ व्याप्तौ' (स्वा० प० अ०) । सन् (३।१।७) । क्तः (३।३।११४) । 'आज्ञप्यृधामीत्' (७।४।५५) । 'अव्ययं विभक्ति–' (२।१।६) इत्यव्ययीभावः ॥ (६) ॥*॥ षट् **'इच्छानतिक्रमस्य'** ॥

गोपे गोपालगोसंख्यगोधुगाभीरबल्लवाः ॥ ५७ ॥

गविति ॥ गां पाति । 'पा रक्षणे' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । **'गोपो** गोपालके गोष्ठाध्यक्षे पृथ्वीपतावपि । ग्रामौधाधिकृते पुंसि सारिवाख्यौषधौ स्त्रियाम्' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ गां पालयति । 'पाल रक्षणे' (चु० प० से०) । 'कर्मण्यण्' (३।२।१) । **'गोपालो** नृपगोपेशे+**गोकिलो** मुसले हले +' (इति मेदिनी) ॥ (२) ॥*॥ गां संचष्टे । 'चक्षिङ् व्यक्तायां वाचि' (अ० आ० से०) । 'चक्षिङः ख्याञ्' (२।४।५४) 'समि ख्यः' (३।२।२७) इति कः ॥ (३) ॥ * ॥ गां दोग्धि । 'सत्सूद्विष–' (३।२।६१) इति क्विप् ॥*॥ मूलविभुजादित्वात् (वा० ३।२।५) । के 'गोदुहः' अपि । 'गोपगोदुहबल्लवाः' इति त्रिकाण्डशेषः ॥ (४) ॥*॥ आ समन्ताद्व्रियं राति । 'आतः–' (३।२।३) इति कः । आ अभि ईरयति वा । 'ईर गत्यादौ' (अ० आ० से०) । पचाद्यच् (३।१।१३४) ॥ (५) ॥*॥ वल्लनम् । 'वल्ल संवरणे' (भ्वा० आ० से०) घञ् (३।३।१८) । वल्लं वाति, वायति, वा । 'वा गत्यादौ' (अ० प० अ०) । 'ओ वै शोषणे' (भ्वा० प० अ०) वा । 'आतः–' (३।२।३) इति कः ॥ (६) ॥*॥ षट् **'गोपालानाम्'** ॥

गोमहिष्यादिकं पादबन्धनम्

गोमेति ॥ गौश्च महिषी च, गोमहिष्यौ आदी यस्य । तत् ॥*॥ पादे बन्धनमस्य ॥*॥ 'यादवं धनम्' इति पाठे तु गोमहिष्यादिकं धनम् । यदूनामिदम् । 'तस्येदम्' (४।३।१२०) इत्यण् । 'गवादि **यादवं** वित्तम्' इति बोपालितः ॥ (१) ॥*॥ आदिना खराजाविकादिग्रहः ॥*॥ एकम् ॥

द्वौ गवीश्वरे ।

गोमान् गोमी

द्वाविति ॥ गवामीश्वरः ॥ (१) ॥*॥ बहवो गावोऽस्य । भूम्नि मतुप् (५।२।९४) ॥ (२) ॥*॥ 'ज्योत्स्ना–' (५।२।११४) इति निमिश्च ॥ (३) ॥*॥ त्रीणि **'गवां स्वामिनः'** ॥

गोकुलं तु गोधनं स्याद्गवां व्रजे ॥ ५८ ॥

गविति ॥ गवां कुलम् ॥ (१) ॥*॥ गवां धनं समूहः । 'गोकुले धनगोधने' इति व्याडिः ॥ (२) ॥*॥ द्वे **'गोसंघातस्य'** ॥

त्रिष्वाशितंगवीनं तद्गावो यत्राशिताः पुरा ।

त्रीति ॥ आशिता भोजिता गावो यत्र । 'अषड–' (५।४।७) इति खः । नुम् तु निपातितः ॥ (१) ॥*॥ एकं **'पूर्वं गवां चरणस्थानस्य'** ॥

उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः ॥ ५९ ॥

अनड्वान् सौरभेयो गौः

विति ॥ उक्षति । 'उक्ष सेचने' (भ्वा० प० से०) । 'श्वनुक्षन्–' (उ० १।१५९) इति कनि ।—बाहुलकात्कनिन्—इति मुकुटस्त्वेतत्सूत्रादर्शनमूलकः ॥ (१) ॥*॥ भन्दति (ते) । 'भदि कल्याणे' (भ्वा० आ० से०) । 'ऋज्रेन्द्र–' (उ० २।२८) इति साधुः ।—'स्फायितञ्चि–' (उ० ३।१३)

१—इदं तु न प्रकृतोपयोगि 'गोकिलशब्दार्थबोधकत्वात्' ॥

इति रक्—इति तु मुकुटस्य प्रमादः । **'भद्रः** शिवे खञ्जरीटे वृषभे तु कदम्बके । करिजातिविशेषे ना क्लीबं मङ्गलमुस्तयोः । काञ्चने च स्त्रियां राज्ञा कृष्णा व्योमनदीषु च । तिथिभेदे प्रसारिण्यां कट्फलानन्तयोरपि । त्रिषु श्रेष्ठे च साधौ च न पुंसि करणान्तरे' (इति मेदिनी) ॥ (२) ॥*॥ वरणम् । 'वर ईप्सायाम्' (चु० उ० से०) । संपदादिः (वा० ३।३।१०८) । ईश्च वर् च ईवरौ । तौ ददाति । कः (३।२।३) । अतिशयितं बलमस्य । 'अतः—' (५।२।११५) इतीनिः । बली चासौ ईवर्दश्च ॥ (३) ॥*॥ ऋषति 'ऋषी गतौ' (तु० प० से०) । 'ऋषिवृषिभ्यां कित्' (उ० ३।१२३) इत्यभच् ॥ (४) ॥*॥ वर्षति । 'वृषु सेचने' (भ्वा० प० से०) । अभच् (उ० ३।१२३) **'वृषभः** श्रेष्ठवृषयोः' इति विश्वः ॥ (५) ॥*॥ 'इगुपध—' (३।१।१३५) इति कः । **'वृषो** धर्मे बलीवर्दे शृङ्ग्यां पुंराशिभेदयोः । श्रेष्ठे स्यादुत्तरस्थश्च वासमूषकशुक्रले । **वृषा** मूषिकपर्ण्यां च' (इति मेदिनी) ॥ (६) ॥*॥ अनः शकटं वहति । 'अनसि वहेः क्विबनसो डश्च' ( ) ॥ (७) ॥*॥ सुरभ्या अपत्यम् । 'स्त्रीभ्यो ढक्' (४।१।१२०) ।—'इतश्चानिञः' (४।१।१२२)—इति मुकुटस्य प्रमादः । तत्र 'ध्रुवः' इत्यनुवृत्तेः ॥ (८) ॥*॥ गच्छति । 'गमेर्डोः' (उ० २।६७) । 'गौ स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान् । स्त्री सौरभेयीदृग्बाणदिग्वाग्भूष्वप्सु भूम्नि च' इति विश्वमेदिन्यौ ॥ (९) ॥*॥ नव **'वृषभस्य'** ॥

उक्षणां संहतिरौक्षकम् ।

विति ॥ उक्षणां समूहः । 'गोत्रोक्षोष्ट्र—' (४।२।३९) इति वुञ् ॥ (१) ॥*॥ एकम् **'वृषसङ्घस्य'** ॥

गव्या गोत्रा गवाम्

गेति ॥ गावां संहतिः । 'खलगोरथात्' (४।२।५०) इति यः ॥ (१) ॥*॥ 'इनित्रकट्यचश्च' (४।१।५१) इति त्रः ॥ (२) ॥*॥ द्वे **'गोसमूहस्य'** ॥

वत्सधेन्वोर्वात्सकधैनुके ॥६०॥

वेति ॥ वत्सानां समूहः । 'गोत्रोक्षोष्ट्र—' (४।२।४९) इति वुञ् ॥ (१) ॥*॥ धेनूनां समूहः । 'अचित्तहस्ति—' (४।२।४७) इति ठक् ॥ (१) ॥*॥ **'वत्सधेनुसमूहयोः'** प्रत्येकमेकैकम् ॥

उक्षा महान्महोक्षः स्यात्

विति ॥ महांश्चासावुक्षा च । 'अचतुर—' (५।४।७७) इति साधुः ॥ (१) ॥*॥ एकम् **'महोक्षस्य'** ॥

वृद्धोक्षस्तु जरद्गवः ।

विति ॥ वृद्धश्चासावुक्षा च । पूर्ववत् ॥ (१) ॥*॥ जरंश्चासौ गौश्च । 'पूर्वकालैक—' (२।१।४९) इति समासः 'गोरतद्धितलुकि' (५।४।९२) इति टच् ॥ (२) ॥*॥ द्वे **'वृद्धवृषभस्य'** ॥

उत्पन्न उक्षा जातोक्षः

विति ॥ जातश्चासावुक्षा च । 'अचतुर—' (५।४।७७) इति साधुः ॥ (१) ॥*॥ एकं **'भ्रष्टदम्यभावस्य'** ॥

सद्यो जातस्तु तर्णकः ॥ ६१ ॥

सेति ॥ तृणोति । 'तृणु भक्षणे' (त० उ० से०) । ण्वुल् (३।१।१३३) ॥ (१) ॥*॥ एकम् **'सद्योजातवत्सस्य'** ॥

शकृत्करिस्तु वत्सः स्यात्

शेति ॥ शकृत् करोति । 'स्तम्बशकृतोरिन्' (३।२।२४) ॥ (१) ॥*॥ वदति । 'वद व्यक्तायां वाचि' (भ्वा० प० से०) 'वृतृवदिहनिकमिकषिभ्यः सः' (उ० ३।६२) । **'वत्सः** पुन्नादिवर्षयोः । तर्णके नोरसि क्लीबम्' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ द्वे **'वत्सस्य'** ॥

दम्यवत्सतरौ समौ ।

देति ॥ दमनार्हः । 'दमु शमने' (दि० प० से०) । 'अर्हे कृत्यतृचश्च' (३।३।१०९) इत्यर्थे 'पोरदुपधात्' (३।१।९८) इति यत् ॥ (१) ॥*॥ तनुर्वत्सः । 'वत्सोक्षाश्व—' (५।३।९१) इत्यादिना ष्टरच् ॥ (२) ॥*॥ द्वे **'वत्सभावमतीत्य द्वितीयं वयः स्पृष्टस्य'** ॥

आर्षभ्यः षण्डतायोग्यः

आर्षेति ॥ ऋषभस्य प्रकृतिः । 'ऋषभोपानहोर्ञ्यः' (५।१।१४) ॥ (१) ॥*॥ षण्डताया योग्यः ॥*॥ एकम् **'स्पष्टतारुण्यस्य'** ॥

षण्डो गोपतिरिङ्गरः ॥ ६२ ॥

षेति ॥ सनोति । सन्यते वा 'षणु दाने' (तु० उ० से०) । 'अमन्ताङ्डः' (उ० १।११४) । बाहुलकान्न सलम् । **'षण्ढं** पद्मादिसंघाते न स्त्री स्याद्गोपतौ पुमान्' इति मूर्धन्यादौ ढान्ते (मेदिनी) ॥*॥ 'शण्ढः' इति पाठे 'शमेर्ढः' (उ० १।९९) **'शण्ढः** स्यात्पुंसि गोपतौ । आ(अ)कृष्टाण्डे वर्षवरे तृतीयप्रकृतावपि' (इति मेदिनी) ॥ (१) ॥*॥ गवां पतिः ॥ (२) ॥*॥ एषणम् इट् । 'इषु इच्छाम्' (तु० प० से०) । क्विप् (३।२।१७८) । इषा चरति । अच् (३।१।१३४) ॥*॥ केचित् **'इत्वरः'** इति पठन्ति । एति तच्छीलः । **'इणनशजि—'** (३।२।१६३) इति क्वरप् । तुक् (६।१।७१) ॥ (३) ॥*॥ त्रीणि **'सांड'** इति ख्यातस्य ॥

स्कन्धप्रदेशस्तु वहः[1]

स्केति ॥ वहति युगमनेन । 'गोचरसंचर—' (३।३।११९) इति साधुः । **'वहः** स्याद्वृषभस्कन्धे वाहे गन्धवहेऽपि च' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ एकम् ॥

साना तु गलकम्बलः ।

सेति ॥ सस्ति । 'पस स्नेहे' (अ० प० से०) । 'राज्ञा-

१—'स्कन्धदेशस्तस्य वहः' इति पाठान्तरम् ॥

साल्ला–' (उ० ३।१५) इति साधुः ॥ (१) ॥*॥ गलस्य कम्बलः । **'कम्बलो** नागराजे स्यात्साल्लाप्रावारयोः कृमौ । **'(कम्बल**श्चोत्तरासङ्गे **कम्बलं** सलिले मतम्)' इति विश्वः ॥ (२) ॥*॥ द्वे **'गलकम्बलस्य'** ॥

स्यान्नस्तितस्तु नस्योतः

स्येति ॥ नसनम् । 'णस कौटिल्ये' (भ्वा० आ० से०) । क्तः (३।३।११४) नस्तं कृतमस्य । 'प्रातिपदिकाद्धात्वर्थे–' (चु० अ० सू०) इति णिच् । ततः कर्मणि क्तः (३।२।१०२) ॥ (१) ॥*॥ नासिकायां भवा । 'शरीरावयवाच्च' (४।३।५५) इति यत् । 'नञ्नासिकाया यत्तस्थुद्रेषु' (वा० ६।१।६३) इति नसादेशः । नस्यया नासारज्ज्वा उतः ॥*॥ **'नस्तोतः'** इति पाठः—इति कश्चित् । नस्यते । कर्मणि क्तः (३।२।१०२) । नस्तयोतः ॥ (२) ॥*॥ द्वे **'नासारज्जुयुक्तस्य'** ॥

प्रष्ठवाड् युगपार्श्वगः ॥ ६३ ॥

प्रेति ॥ प्रष्ठमग्रगामिनं वहति । 'वहश्च' (३।२।६४) इति ण्विः ॥*॥ स्वामी तु—पञ्चमं षष्ठं वा वर्षं वहन्ति, इति विगृह्य (**'प्रष्ठवाट्'** इति) रेफरहितं पठति । तत्र पृषोदरादित्वं (६।३।१०९) बोध्यम् ॥ (१) ॥*॥ युगस्य स्कन्धकाष्ठस्य पार्श्वं गच्छति । 'अन्येष्वपि–' (वा० ३।२।४८) इति डः ॥ (२) ॥*॥ द्वे **'दमनकाले कण्ठारोपितकाष्ठवाहस्य'** ॥

युगादीनां तु वोढारो युग्यप्रासङ्ग्यशाकटाः ।

ण्विति ॥ युगम् (१) प्रासङ्गम् (१) शकटम् (१) वहति । 'तद्वहति रथयुगप्रासङ्गम्' (४।४।७६) इति यत् ॥*॥ 'शकटादण्' (४।४।८०) ॥*॥ क्रमेणैकैकम् **'रथादिवाह्याश्ववृषभाणाम्'** ॥

खनति तेन तद्वोढास्येदं हालिकसैरिकौ ॥ ६४ ॥

खेति ॥ हलेन (१) सीरेण (२) खनति । 'तेन दीव्यति खनति–' (४।४।२) इति ठक् ॥*॥ हलम् (१) सीरम् (२) वहति । 'हलसीराट्ठक्' (४।४।८१) ॥*॥ हलस्य (१) सीरस्य (२) इदम् । 'हलसीराट्ठक्' (४।३।१२४) ॥*॥ द्वे **'उक्तार्थेषु नाम्नी'** ॥

धूर्वहे धुर्यधौरेयधुरीणाः सधुरंधराः ।

ण्विति ॥ वहतीति वहः । अच् (३।१।१३४) । धुरो वहः ॥ (१) ॥*॥ 'धुरो यड्ढकौ' (४।४।७७) ॥ (२) ॥*॥ (३) ॥*॥ 'खः सर्वधुरात्' (४।४।७८) इति योगविभागात् खः ॥ (४) ॥*॥ धुरं धारयति । 'संज्ञायां भृतृवृजि–' (३।२।४६) इति खच् । 'खचि ह्रस्वः' (६।४।९४) 'वाचंयमपुरंदरौ च' (६।३।६९) इति चकारस्यानुक्तसमुच्चयार्थत्वादक् । 'अरुर्द्विष–' (६।३।६७) इति मुम् ॥ (५) ॥*॥ पञ्च **'धुरंधरवृषभस्य'** ॥

उभावेकधुरीणैकधुरावेकधुरावहे ॥ ६५ ॥

विति ॥ एका चासौ धूश्च । 'ऋक्पूरब्धूः–' (५।४।७४) इत्यः । एकधुरां वहति । 'एकधुराल्लुक् च' (४।४।७९) इति खः ॥ (१) ॥*॥ (लुक्पक्षे 'लुक् तद्धितलुकि' (१।२।४९) इति टापो निवृत्तौ एकधुरः) ॥ (२) ॥*॥ एकधुराया वहः ॥ (३) ॥*॥ त्रीणि **'धुरंधरस्य'** ॥

स तु सर्वधुरीणो यो भवेत्सर्वधुरावहः ।

स इति ॥ सर्वा चासौ धूश्च । सर्वधुरां वहति । 'खः सर्वधुरात्' (४।४।७८) इति खः ॥ (१) ॥*॥ सर्वधुराया वहः ॥ (२) ॥*॥ द्वे **'धुरीणश्रेष्ठस्य'** ॥

माहेयी सौरभेयी गौरुक्षा माता च शृङ्गिणी ॥६६॥
अर्जुन्यङ्क्या रोहिणी स्यात्

मेति ॥ **'गौरुक्षा प्रिया इला मही'** इति निरुक्तम् । मह्या अपत्यं स्त्री । 'स्त्रीभ्यो ढक्' (४।१।१२०) ।—मह्यते । 'मह पूजायाम्' (भ्वा० प० से०) । 'पुंसि–' (३।३।११८) इति घः । 'खनो घ च' (३।३।१२५) इति वा । महाया अपत्यम्—इति तु स्वामी ॥ (१) ॥*॥ सुरभ्या अपत्यम् ॥ (२) ॥*॥ गच्छति । 'गमेर्डोः' (उ० २।६७) ॥ (३) ॥*॥ वसति क्षीरमस्याम् । 'वस निवासे' (भ्वा० प० अ०) । 'स्फायि–' (उ० २।१३) इति रक् । 'वचिस्वपि–' (६।१।१५) इति वस्य उः । 'न रपर–' (८।३।११०) इति षत्वाभावः । **'उक्षो** वृषे च किरणे **ऽप्युक्षार्जुन्युपचित्रयोः'** (इति मेदिनी) । **'उक्षस्तु** वृषभे प्रोक्तः किरणे च तथा पुमान्' ॥ (४) ॥*॥ मान्यते । 'मान पूजायाम्' (भ्वा० आ० से०) । 'नप्तृनेष्टृ–' (२०।२।९५) इति साधुः । **'मातरौ** गोजनन्यौ द्वे' इति रुद्रः । **'माता** गौर्यादिजननी गो ब्रह्माण्यादिभूमिषु' इति विश्वः (मेदिनी) ॥ (५) ॥*॥ शृङ्गमस्त्यस्याः । 'अतः' (५।२।११५) इतीनिः ॥ (६) ॥*॥ अर्जुनवर्णयोगात् । 'अन्यतो ङीष्' (४।१।४०) । **'अर्जुनः** ककुभे पार्थे कार्तवीर्यमयूरयोः । मातुरेकसुतेऽपि, स्याद्धवले पुनरन्यवत् । नपुंसकं तृणे नेत्ररोगे स्यादर्जुनी गवि । उषायां बाहुदानद्यां कुट्टिन्यामपि च क्वचित्' इति विश्वः (मेदिनी) ॥ (७) ॥*॥ न हन्यते, हन्ति दातारम्, वा । 'अन्नयादयश्च' (उ० ४।११२) इति साधुः ॥ (८) ॥*॥ रोहितवर्णयोगात् । 'वर्णादनुदात्तात्–' (४।१।३९) इति ङीन्नौ । **'रोहिणी** सोमवल्के मे कण्ठरोगोमयोर्गवि । (लोहिताकटुरोहिण्योः)' इति हेमचन्द्रः ॥ (९) ॥*॥ नव **'गवि'** ॥

स्यादुत्तमा गोषु नैचिकी ।

स्येति ॥ नीचैश्चरति । 'चरति' (४।४।८) इति ठक् । 'अव्ययानाम्–' (६।४।१४४) इति टिलोपः । यद्वा **'निचि'**

१—'वाचंयम—' इत्यत्र 'इच एकाचोऽम्' इत्यतः 'अम्' इत्यस्यानुवृत्तेः 'अत्रापि अम्' एव विधेयः । तथा च मुमोऽत्रोपन्यासो व्यर्थः ॥ मकूविधानलेखस्तु सिद्धान्तकौमुद्या अप्यज्ञानमूलकः ॥

'कर्णशिरोदेशे' इति रभसः । ततः स्वार्थे कन् (ज्ञापि० ५।४।५) । प्रशस्तं निचिकमस्याः । 'ज्योत्स्नादिभ्यः' (वा० ५।२।१०३) इत्यण् । 'नैचिकी गौरुत्तमा तु **नीचिकी** सा प्रकीर्तिता' इति नाममाला ॥ (१) ॥*॥ एकम् **'श्रेष्ठाया गोः'** ॥

वर्णादिभेदात्संज्ञाः स्युः शवलीधवलादयः ॥ ६७ ॥

वेति ॥ आदिना प्रमाणावयवादिग्रहः । शवलयोगात् । 'अन्यतो ङीष्' (४।१।४०) ॥ (१) ॥*॥ धवलयोगात् । अनुदात्तत्वाभावान्न ङीष् । मुकुटस्तु—'धवली'—इत्याह । तत्र गौरादिङीष् (४।१।४१) ॥ (१) ॥*॥ आदिना 'कृष्णा-कपिला-पाटला' इत्यादयः । प्रमाणभेदात् दीर्घा ह्रस्वा खर्वा वामनी, इत्यादयः । अङ्गभेदात् पिङ्गाक्षी लम्बकर्णी वक्र-शृङ्गी, इत्यादयः **'धवलादिसंज्ञानाम्'** ॥

द्विहायनी द्विवर्षा गौः

द्वीति ॥ द्वौ हायनौ यस्याः । 'दामहायना-' (४।१।२७) इति ङीष् ॥ (१) ॥*॥ द्वे वर्षे वयःप्रमाणमस्याः । आर्हीयष्टक् ( ) तस्य 'अर्ध्यर्ध-' (५।१।२८) इति लुक् ॥ (२) ॥*॥ द्वे **'द्विवर्षाया गोः'** ॥

एकाब्दा त्वेकहायनी ।

एकेति ॥ एकोऽब्दो यस्याः ॥ (१) ॥*॥ एको हायनो यस्याः । 'ङीष्' (४।१।२७) ॥ (२) ॥*॥ द्वे **'एकवर्षाया गोः'** ॥

चतुरब्दा चतुर्हायणी

चेति ॥ चत्वारोऽब्दा यस्याः ॥ (१) ॥*॥ चत्वारो हाय-ना यस्याः ङीष् (४।१।२७) । 'त्रिचतुर्भ्यां हायनस्य' (वा० ८।४) इति णत्वम् ॥ (२) ॥*॥ द्वे **'चतुर्वर्षाया गोः'** ॥

एवं त्र्यब्दा त्रिहायणी ॥ ६८ ॥

एवमिति ॥ त्रयोऽब्दा यस्याः ॥ (१) ॥*॥ त्रयो हा-यना यस्याः ॥ (२) ॥*॥ द्वे **'त्रिवर्षाया गोः'** ॥

वशा वन्ध्या

वेति ॥ वष्टि । 'वश कान्तौ' (अ० प० से०) । अच् (३।१।१३४) **'वशो** जनस्पृहायत्तेष्वायन्नत्वप्रभुत्वयोः । **वशा** नार्यां वन्ध्यगव्यां हस्तिन्यां दुहितर्यपि' इति हैमः ॥ (१) ॥*॥ बध्नाति । 'बन्ध बन्धने' (क्या० प० अ०) । ष्यत् (३।१।१२४) ।—अन्येषामपि दृश्यते (उ० ४।११२)—इति मुकुटः ॥ (२) ॥*॥ द्वे **'वन्ध्यायाः'** ॥

अवतोका स्रवद्गर्भा

अवेति ॥ अवगलितं तोकमपत्यं यस्याः ॥ (१) ॥*॥ स्रवन् गर्भो यस्याः ॥ (२) ॥*॥ द्वे **'अकस्मात् पतित-गर्भायाः'** ॥

अथ संधिनी ।

आक्रान्ता वृषभेण

अथेति ॥ संधानम् । 'डुधाञ्' (जु० उ० अ०) । 'आतश्च-' (३।३।१०६) इत्यङ् । संधास्यस्याः । व्रीह्या-दित्वात् (५।२।११६) इनिः ॥ + अवश्यं संधत्ते वा । 'आवश्यका-' (३।३।१७०) इति णिनिः+ । **'संधिनी** वृ-षभाक्रान्ताकालदुग्धोस्रयोः स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ एकं **'कृतमैथुनायाः'** ॥

अथ वेहद्गर्भोपघातिनी ॥ ६९ ॥

अथेति ॥ विहन्ति गर्भम् । 'संश्वत्तृपद्वेहत्-' (उ० २।८४) इति साधुः ॥ (१) ॥*॥ गर्भमुपहन्ति । 'सुप्यजातौ-' (३।२।७८) इति णिनिः ॥ (२) ॥*॥ द्वे **'वृषयोगेन गर्भ-पातिन्याः'** ॥

काल्योपसर्या प्रजने

केति ॥ प्रजने गर्भग्रहणे प्राप्तकाला ॥*॥ उपस्रियते वृषेण । 'सृ गतौ' (भ्वा० प० अ०) 'उपसर्या काल्या प्रज-ने' (३।१।१०४) इति साधुः ॥ (१) ॥*॥ एकं **'गर्भग्रह-णयोग्यायाः'** ॥

प्रष्ठौही बालगर्भिणी ।

प्रेति ॥ प्रष्ठं वहति । 'वहश्च' (३।२।६४) इति ण्विः । 'वहः' (४।१।७१) इति ङीप् ॥*॥ **'पष्ठौही'** इति पाठे पृषोदरादित्वात् (६।३।१०९) रलोपः ॥ (१) ॥*॥ बाला चासौ गर्भिणी च ॥ (२) ॥*॥ द्वे **'प्रथमं गर्भं धृतवत्याः'** ॥

स्यादचण्डी तु सुकरा

स्येति ॥ न चण्डी ॥ (१) ॥*॥ सु सुखं करोति । अच् (३।१।१३४) सु क्रियते वा । **'ईषदुःसुषु-'** (३।३।१२६) इति खल् ॥ (२) ॥*॥ द्वे **'सुशीलायाः'** ॥

बहुसूतिः परेष्टुका ॥ ७० ॥

बेति ॥ बह्वी सूतिर्यस्याः ॥ (१) ॥*॥ परमिच्छति । परैरिष्यते, वा । बाहुलकात्तुः । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ द्वे **'बहुप्रसूतायाः'** ॥

चिरसूता वष्कयिणी

चीति ॥ चिरं सूता । 'सुप्सुपा' (२।१।४) इति समा-सः ॥ (१) ॥*॥ वष्कते । 'वष्क गतौ' (चु० उ० से०) । बाहुलकादयन् । वष्कयस्तरुणवत्सः । सोऽस्त्यस्याः 'अतः-' (५।२।११५) इतीनिः । **'अट्कुप्वाङ्-'** (८।४।२) इति णत्व-म् ।-'पूर्वपदात्-' (८।४।३)—इति मुकुटस्य प्रमादः । स-मासाभावात् ॥*॥ यद्वा **'वष्कयस्त्वेकहायनो वत्सः'** इति

१—इदमसंगतम् । णिनेः कित्त्वाभावात् आतो लोपाप्राप्तेः णित्वात् 'आतो युक्' (७।३।३३) इति युगापत्तेश्च । अत एवैत-ज्जनकेन सिद्धान्तकौमुद्यां 'स्यायी' 'गोसंदायः' इत्यत्र युगेव कृतः ॥

शाकटायनः। तेन नीयते। संपदादिः (वा० ३।३।१०८)। 'सर्वतोऽश्वित्रार्थात्' (ग० ४।१।४५) इति ङीष्। गौरादित्वात् (४।१।४५) वा। 'पूर्वपदात्' (८।४।३) इति णत्वम्। अत्र पक्षे (वष्कयणी) इकाररहित उपान्त्यः॥ (२)॥*॥ द्वे 'दीर्घकालेन प्रसूतायाः'॥

धेनुः स्यान्नवसूतिका।

धयिति॥ धीयते। 'धेट् पाने' (भ्वा० प० से०)। 'धेट इच्' (उ० ३।३४) इति नुः।—'धेन्वादयश्च—' इति मुकुटस्वपाणिनीयः 'धेनुर्गोमात्रके दोग्ध्र्याम्' इति हैमः॥ (१)॥*॥ नवं सूतं प्रसवोऽस्याः। 'शेषात्—' (५।४।१५४) इति कप्। 'प्रत्ययस्थात्—' (७।३।४४) इतीत्वम्॥ (२)॥*॥ द्वे 'नूतनप्रसूतायाः'॥

सुव्रता सुखसंदोह्या

स्विति॥ शोभनं व्रतमस्याः॥ (१)॥*॥ सुखेन संदुह्यते। ण्यत् (३।१।१२४)॥ (२)॥*॥ द्वे 'सुशीलायाः'॥

पीनोध्नी पीवरस्तनी॥७१॥

पीति॥ पीनमूधोऽस्याः। 'ऊधसोऽनङ्' (५।४।१३१)। 'बहुव्रीहेरूधसो ङीष्' (४।१।२५)॥ (१)॥*॥ पीवरः स्तनोऽस्याः। 'स्वाङ्गाच्चोपसर्जनात्' (४।१।५४) इति ङीष्॥ (२)॥*॥ 'स्थूलस्तन्याः'॥

द्रोणक्षीरा द्रोणदुग्धा

द्रविति॥ द्रोणपरिमितं क्षीरमस्याः॥ (१)॥*॥ द्रोणं दोग्धि। 'दुहः कप् घश्च' (३।२।७०) इति कप् घश्चान्तादेशः॥ (२)॥*॥ द्वे 'द्रोणपरिमितदुग्धदात्र्याम्'॥

धेनुष्या बन्धके स्थिता।

धयिति॥ 'संज्ञायां धेनुष्या' (४।४।८९) इति साधुः॥॥*॥ एकम् 'बन्धनस्थिताया गोः'॥

उर्मीना सा यैव प्रतिवर्षं प्रसूयते॥ ७२॥

इति॥ समायां समायां विजायते। 'समां समां विजायते' (५।२।१२) इति खः, उत्तरदले टाब्विभक्तयोर्लोपः पूर्वयलोप एव॥ (१)॥*॥ एकम् 'प्रतिवर्षं प्रसवित्र्या'॥

तु क्लीवमार्पीनम्

ति॥ वहति। 'वह प्रापणे' (भ्वा० उ० से०)। 'उन्दी क्लेदने' (रु० प० से०) असुन् (उ० ९)। 'ऊधसोऽनङ्'। (५।४।१३१) इत्यादिनिर्देशादू-।—'श्वेः संप्रसारणं च' (उ० ४।१९३) इत्यनुवृत्तौ दीर्घश्च' इत्यसुन्—इति मुकुटस्वपाणिनीयः॥ (१) आ प्यायते स्म। 'ओ प्यायी वृद्धौ' (भ्वा०आ०से०)। -' (३।४।७२) इति क्तः। 'प्यायः पी' (६।१।२८)। 'आद्यूर्वस्यान्धूधसोः' (वा० ६।१।२८) इति वा, पीभावः। 'ओदितश्च' (८।२।४५) इति निष्ठानत्वम्॥ (२)॥*॥ द्वे 'क्षीराशयस्य'॥

समौ शिवककीलकौ।

सेति॥ श्यति गात्रकण्डूम्, शेतेऽत्र वा। 'सर्वनिघृष्व—' (उ० १।१५३) इति साधुः। स्वार्थे कन् (ज्ञापि० ५।४।५)॥ (१)॥*॥ कील्यते (अत्र)। 'कील बन्धे' (भ्वा० प० से०)। 'हलश्च' (३।३।१२१) इति घञ्। स्वार्थे कन् (ज्ञापि० ४।४।५)॥ (२)॥*॥ द्वे 'पशुबन्धनकाष्ठस्य'॥

न पुंसि दाम संदानम्

नेति॥ यति। 'दो अवखण्डने'। दीयते वा, अनेन वा। 'देङ् रक्षणे' (भ्वा० आ० अ०)। मनिन् (उ० ४।१४५)॥ (१)॥*॥ संदीयते। संपूर्वो दाण् बन्धने। ल्युट् (३।३।११३)॥ (२)॥२॥ द्वे 'दोहनकाले पादबन्धनरज्ज्वोः'॥

पशुरज्जुस्तु दामनी॥ ७३॥

पेति॥ पशुबन्धनी रज्जुः। शाकपार्थिवादिः (वा० २।१।७८)॥ (१)॥*॥ दामैव। प्रज्ञाद्यण् (५।४।३८) 'अन्' (६।४।१६७) इति प्रकृतिभावः। 'टिड्ढा—' (४।१।१५) इति ङीप्। 'नित्यं संज्ञाच्छन्दसोः' (४।१।२९) इति ङीष् वा॥*॥—'बन्धनी'—इति पाठः—इति कश्चित्॥ (२)॥*॥ द्वे 'पशुबन्धनरज्ज्वोः'॥

वैशाखमन्थमन्थानमन्थानो मन्थदण्डके।

वायिति॥ विशाखा प्रयोजनमस्य। 'विशाखाषाढात्—' (५।१।११०)। 'वैशाखो मासभेदेऽपि मन्थाने च प्रकीर्तितः' (इति मेदिनी)॥ (१)॥*॥ मथ्यतेऽनेन 'हलश्च' (३।३।१२१) इति घञ्। 'मन्थो रवौ मथि। साक्तवे नेत्ररोगे च' इति हैमः॥ (२)॥*॥ मन्थति। बाहुलकादानच्। तान्छील्ये चानश् (३।२।१२९) वा। मुकुटेन तु 'परमे कित्' इत्यनुवृत्तौ 'मन्तः' (उ० ४।११७) इत्यनेनानः—इत्युक्तम्। तन्न। अनेनेनेर्विधानात्। आनस्याविधानात्। यदपि—मन्थेः शानचि मन्थानः, इति स्वामी—इत्युक्तम्। तदपि न। मन्थेः परस्मैपदित्वात्। आत्मनेपदिभ्यः शानचो विधानात्। मुक्प्रसङ्गाच्चानशापि न। आगमशास्त्रस्यानित्यत्वं वा बोध्यम्॥ (३)॥*॥ मथ्यतेऽनेन। 'मन्थः' (उ० ४।११७) इतीनिः कित्। यत्तु—'पथिमथिभ्यामिन्'—इति मुकुटेनोक्तम्। तदपाणिनीयम्॥ (४)॥*॥ मन्थस्य दण्डः॥ (२)॥*॥ पञ्च 'मन्थनदण्डस्य'॥

कुठरो दण्डविष्कम्भे

किति॥ कुठति। 'कुठ गतिप्रतिघाते' ( )। बाहुलकात्करन्।—'कुठश्च' इत्वरः—इति मुकुटस्वपाणिनीयः॥*॥ 'कुटरः' इति पाठे तु 'कुट कौटिल्ये' (तु० प० से०)।

बाहुलकादरः ॥ (१) ॥*॥ दण्डं विष्कम्भाति । 'स्कम्भु रोधने' सौत्रः । 'कर्मण्यण्' (३।२।१) । 'वेः स्कभ्नातेर्नित्यम्' (८।३।७७) इति षत्वम् ॥ (१) ॥*॥ द्वे **'मन्थबन्धनकाष्ठस्य'** । गर्गरीमुखस्य वा । **'मन्थदण्डधारककाष्ठस्य'** वा ॥

मन्थनी नर्गरी समे ॥ ७४ ॥

मेति ॥ मथ्यतेऽस्याम् । 'करणा–' (३।३।११७) इति ल्युट् ॥ (१) ॥*॥ 'गर्गं' इति शब्दं राति । 'आतः–' (३।२।३) इति कः । गौरादिः (४।१।४१) गिरति वा । 'गॄ निगरणे' (तु० प० से०) । बाहुलकाद्वरट् ॥ (२) ॥*॥ द्वे **'मन्थनपात्रस्य'** ॥

उष्ट्रे क्रमेलकमयमहाङ्गाः

विति ॥ ओषति । उष्यते वा । 'उष दाहे' (भ्वा० प० से०) । ष्ट्रन् (उ० ४।१५९) संज्ञापूर्वकत्वाद्गुणाभावः ।—'उषिखनिभ्यः कित्' इति ष्ट्रन्—इति मुकुटस्वपाणिनीयः ॥ (१) ॥*॥ क्रामति 'क्रमु पादविक्षेपे' (भ्वा० प० से०) । विच् (३।२।७५) । इलति । 'इल क्षेपे' (तु० प० से०) । एलयति । 'इल गतौ' (चु० प० से०) । ण्वुल् (३।१।१३३) क्रम् वासावेलकश्च ॥ (२) ॥*॥ मीनाति । 'मीञ् हिंसायाम्' (क्रया० उ० अ०) । मयते 'मय गतौ' (भ्वा० आ० से०) मे वा । अच् (३।१।१३४) । (**'मयः** शिल्पिनि दैत्यानां करभेऽश्वतरेऽपि च' इति मेदिनी) ॥ (३) ॥*॥ महान्त्यङ्गान्यस्य । 'अनेकम्–' (२।२।२४) इति बहुव्रीहिः ॥ (४) ॥*॥ चत्वारि **'उष्ट्रस्य'** ॥

करभः शिशुः ।

केति ॥ किरति, कीर्यते वा । 'कॄशॄशलि(कलि)गर्दिभ्योऽभच्' (उ० ४।१२२) । **'करभो** मणिबन्धादिकनिष्ठान्तोष्ट्रतत्सुते' इति मेदिनी) ॥ (१) ॥*॥ एकम् **'उष्ट्रशिशोः'** ॥

करभाः स्युः शृङ्खलका दारवैः पादबन्धनैः ॥ ७५ ॥

केति ॥ 'शृङ्खलमस्य बन्धनं करभे' (५।२।७९) इति कन् ॥ (१) ॥*॥ एकं **'दारुविकारशृङ्खलाप्रायबन्धनयुक्तस्य करभस्य'** ॥

अजा छागी

अजेति ॥ अजति । 'अज गतौ' (भ्वा० प० से०) पचाद्यच् (३।१।१३४) । 'अजाविभ्याम्–' (५।१।८) इति निर्देशान्न वी । 'अजाद्यतष्टाप्' (४।१।४) । **'अज**श्छागे हरे विष्णौ रघुजे वेधसि स्मरे' इति हैमः ॥ (१) ॥*॥ छ्यति, छायते, वा । 'छो छेदने' (दि० प० से०) । 'छापूखडिभ्यः कित्' (उ० १।१२४) इति गन् । 'जातेः–' (४।१।६३) इति ङीष् ॥ (२) ॥*॥ द्वे **'अजायाः'** ॥

१—इदं च 'उषिखनिभ्यां कित्' (उ० ४।१६२) इति सूत्रासारणमूलकम् ॥

स्तभच्छागवस्तच्छगलका अजे ।

स्तेति ॥ स्तभ्नोति । 'स्तम्भु रोधने' (सौत्रः) मूलविभुजादित्वात् (वा० ३।२।५) कः । पचाद्यचि (३।१।१३४) तु नलोपो न स्यात् ॥*॥ **तुभ** इति पाठे, तोभते । 'तुफ हिंसायाम्' (भ्वा० आ० से०) ॥*॥ **'शुभ'** इति पाठे 'शुभ हिंसायाम्' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः ॥ (१) ॥*॥ वस्तयति । 'वस्त अर्दने' (चु० आ० से०) चुरादिः । अच् (३।१।१३४) ॥ (३) ॥*॥ छायते । 'छो छेदने' (दि० प० अ०) 'छो गुक् ह्रस्वश्च' (उ० १।११३) इत्यलच् । स्वार्थे कन् ॥ (४) ॥*॥ पञ्च **'अजस्य'** ॥

मेढ्रोरभ्रोरणोर्णायुर्मेषवृष्णय एडके ॥ ७६ ॥

मयिति ॥ मेहति । 'मिह सेचने' (भ्वा० प० अ०) । ष्ट्रन् (उ० ४।१४९) ॥ (१) ॥*॥ उरु भ्रमति । 'भ्रमु चलने' (भ्वा० प० से०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । पृषोदरादिः (१।३।१०९) । यद्वा उना शंभुना रभ्यते । 'रभ राभस्ये' (भ्वा० आ० अ०) । बाहुलकाद्रक् ॥ (२) ॥*॥ ऋच्छति, अर्यते, वा । 'ऋ गतौ' (भ्वा० प० अ) । 'अर्तेः क्युरुच्च' (उ० ५।१७) इति क्युन् ॥ (३) ॥*॥ ऊर्णा अस्य । 'ऊर्णाया युस्' (५।२।१२३) ॥ (४) ॥*॥ मिषति । 'मिष स्पर्धायाम्' (तु० प० से०) । अच् (३।१।१३४) ॥ (५) ॥*॥ वर्षति । 'वृषु सेचने' (भ्वा० प० से०) । 'सृवृशिभ्यां कित्' (उ० ४।४९) इति निः ।—'सृणिवेणिवृष्णिपार्ष्णिचूर्णयः' इति निः—इति मुकुटस्वपाणिनीयः ॥ (६) ॥*॥ इलति । एलयति वा । 'इल गतिक्षेपणयोः' (तु० प० से०) । ण्वुल् (३।१।१३३) । डलयोरैक्यम् (७) ॥*॥ सप्त **'मेषस्य'** ॥

उष्ट्रोरभ्राजवृन्दे स्यादौष्ट्रकौरभ्रकाजकम् ।

विति ॥ उष्ट्राणाम् (१), उरभ्राणाम् (१), अजानाम् (१), समूहः । 'गोत्रोक्षो–' (४।२।३९) इति वुञ् ॥*॥ प्रत्येकमेकैकम् ॥

चक्रीवन्तस्तु चालेया रासभा गर्दभाः खराः

चेति ॥ चक्रवत्क्रमणं चक्रम् । तदस्यास्ति । मयु २।९४) । 'आसन्दीवत्–' (८।२।१२) इति साधुः ॥ (॥*॥ वलय उपसंहाराय संहितः 'छदिरुपधि–' (५।१।१३) इति ढञ् । वलेरपत्यम् । 'इतश्चानिञः' (४।१।१२१) इति ढग् वा । **'बालेयो** गर्दभे पुंसि मृदौ बलिहिते त्रिषु' इति (मेदिनी) ॥ (२) ॥*॥ रासते । 'रास शब्दे' (भ्वा० आ० से०) । 'रासिवल्लिभ्यां च' (उ० ३।१२५) इत्यभच् ॥ (३) ॥*॥ गर्दति । 'गर्द शब्दे' (भ्वा० प० से०) । 'कॄशॄशलिकलिगर्दिभ्योऽभच्' (उ० ३।१२२) । **'गर्दभं** श्वेतकुमुदे **गर्दभो** गन्धमिश्रयपि । रासभे, **गर्दभी** क्षुद्रजन्तुरोगप्रभेदयोः' इति विश्वः (मेदिनी) ॥ (४) ॥*॥ खं मुखबिलमतिशयित-

मस्य । 'खमुख' (वा० ५।२।१०७) इति रः । **'खरो** रक्षोन्तरे तीक्ष्णे दुःस्पर्शे रासभेऽपि च' इति हेमचन्द्रः ॥ (५) ॥*॥ पञ्च **'गर्दभस्य'** ॥

वैदेहकः सार्थवाही नैगमो वाणिजो वणिक् ।
पण्याजीवो ह्यापणिकः क्रयविक्रयकश्च सः ॥ ७८ ॥

वायिति ॥ विदेहेषु भवः धूमादित्वात् (४।२।१२७) वुञ् । विदेगिध वा । 'दिह उपचये' (अ० उ० अ०) । ण्वुल् (३।१।१३३) । प्रज्ञाद्यण् (५।४।३८) । 'वै निश्चितो देह उपचयो यस्य' इति वा । **'वैदेहको** वाणिजके शूद्राद्वैश्यासुतेऽ च' इति विश्वः (मेदिनी)हेमचन्द्रौ ॥ (१) सार्थं वहन्ति । 'कर्मण्यण्' (३।२।१) ॥ (२) ॥*॥ निगमे भवः । 'तत्र भवः' (४।३।५३) इत्यण् । **'नैगमः** स्यादुपनिषद्वणिजोः (नागरेऽपि च)' इति विश्वः (मेदिनी) ॥*॥ संज्ञापूर्वकत्वाद्वृद्ध्यभावे 'निगमः' अपि । **'निगमो** वाणिजे पुर्याम् (कटे वेदे वाणिक्पथे)' इति विश्वः (मेदिनी) ॥ (३) ॥*॥ पणते । 'पण व्यवहारे स्तुतौ च' (भ्वा० आ० से०) । 'पणतेरिज्यादेश्च बः' (उ० २।७०) प्रज्ञाद्यण् (५।४।३८) ॥ (४) ॥*॥ **'वणिक्** स्त्रियाम् । वणिज्यायां, पुमान् वाणिजके च करणान्तरे' इति विश्वः (मेदिनी) ॥ (५) ॥*॥ पण्यते । 'पण व्यवहारे' (भ्वा० आ० से०) । 'अवद्यपण्य–' (३।१।१०१) इति साधुः । पण्यमाजीवो यस्य ॥ (६) ॥*॥ आपणो व्यवहारोऽस्यास्ति । 'अतः–' (५।२।११५) इति ठन् ॥ (७) ॥*॥ क्रयविक्रयाभ्यां जीवति । 'वस्नक्रयविक्रयाट्ठन्' (४।४।१३) (८) ॥*॥ अष्टौ **'क्रियविक्रयाभ्यां वर्तमानस्य'** ॥

विक्रेता स्याद्विक्रयिकः

वीति ॥ विक्रीणाति । 'डुक्रीञ् द्रव्यविनिमये' (क्या० उ० अ०) । तृच् (३।१।१३३) ॥ (१) ॥*॥ विक्रयेण जीवति । 'वस्नक्रयविक्रयाट्ठन्' (४।४।१३) ॥ (२) ॥*॥ द्वे **'वस्त्रपात्रादि दत्वा तन्मूल्यं गृह्णतः'** ॥

क्रायकः क्रयिकः समौ ।

क्रेति ॥ क्रीणाति । ण्वुल् (३।१।१३३) ॥ (१) ॥*॥ क्रयेण जीवति । ठन् (४।४।१३) ॥ (२) ॥*॥ द्वे **'मूल्येन वस्त्रादि गृह्णतः'** ॥

वाणिज्यं तु वणिज्या स्यात्

वेति ॥ वणिजां कर्म । ब्राह्मणादित्वात् (५।१।१२४) ष्यञ् ॥ (१) ॥*॥ 'दूतवणिग्भ्यां च' इति यः ॥ (१) ॥*॥ द्वे **'वणिक्कर्मणः'** ॥

मूल्यं वस्नोऽप्यवक्रयः ॥ ७९ ॥

ल्यिति ॥ मूलेनानाम्यम् । 'नौवयो–' (४।४।९१) इति यत् ॥ (१) ॥*॥ वसत्यत्र । 'धापूवस्यज्यतिभ्यो नः' (उ० ३।६) **'वस्नं** वस्त्रे धने मूल्ये भृतौ' इति हेमचन्द्रः ॥ (२) ॥*॥ अवक्रीयतेऽनेन । 'पुंसि–' (३।३।११८) इति घः— 'एरच्' (३।३।५६)—इति मुकुटः । तन्न । ल्युटा बाधात् ॥ (३) ॥*॥ त्रीणि **'विक्रेयवस्तूनां मूल्यस्य'** ॥

नीवी परिपणो मूलधनम्

नीति ॥ नितरामिन्वति । 'इवि प्रीणने' (भ्वा०प०से०) । 'अनित्यमागमशासनम्' इति न नुम् । **'इगुपधात्कित्'** (उ० ४।१२०) इतीन् । 'कृदिकारात्–' (ग० ४।१।४५) इति ङीष् ।–'निपूर्वाद्वेञो निरी च' इति ङिः । 'कृदिकारात्' (ग० ४।१।४५) इति ङीष् । 'व्यो यलोपः' नेर्दीर्घः । नीवी— इत्याह मुकुटः । **'नीवी** स्त्रीकटीवस्त्रबन्धने । मूलद्रव्ये परिपणे' इति हैमः ॥ (१) ॥*॥ परिपण्यते वृद्ध्यर्थं प्रयुज्यते । 'पुंसि–' (३।३।११८) इति घः ॥ (२) ॥*॥ मूलं च तद्धनं च ॥ (३) ॥*॥ त्रीणि **'क्रयविक्रयादिव्यवहारे यन्मूलधनं तस्य'** ॥

लाभोऽधिकं फलम् ।

लेति ॥ लभ्यते । 'डुलभष् प्राप्तौ' (भ्वा० आ० अ०) । 'अकर्तरि–' (३।३।१९) इति घञ् ॥ (१) ॥*॥ अध्यारूढम् । 'अधिकम्' (५।२।७३) इति साधु ॥ (२) ॥*॥ फलति । 'फल निष्पत्तौ' (भ्वा० प० से०) । अच् (३।१।१३४) । **'फलं** जतीफले सस्ये हेतूत्थे व्युष्टिलाभयोः' । (त्रिफलायां च कक्कोले, स्त्रियङ्तु **फली** स्मृता)' इति विश्वः (मेदिनी) । **'फलं** हेतुकृते जातीफले फलकसस्ययोः । त्रिफलायां च कक्कोले शस्त्राग्रे व्युष्टिलाभयोः । **फली** फलिन्याम्' इति हैमः ॥ (३) ॥*॥ त्रीणि **'अधिकफलस्य'** ॥

परिदानं परीवर्तो नैमेयनिमयावपि ॥ ८० ॥

पेति ॥ परिवृत्त दानम् ॥*॥ क्वचित् **'प्रतिदानम्'** इति पाठः ॥ (१) ॥*॥ परिवर्तनम् । भावे घञ् (३।३।१८) । 'उपसर्गस्य–' (६।३।१२२) इति दीर्घः ॥ (२) ॥*॥ निमानम् । 'मेङ् प्रणिदाने' (भ्वा० आ० अ०) । 'अचो यत्' (३।१।९७) । आत्वम् (६।१।४५) 'ईद्यति' (६।४।६५) । गुणः (७।३।८४) । प्रज्ञाद्यण् (५।४।३८) च ॥ (३) ॥*॥ निर्मीयते । 'मीङ् हिंसायाम्' दि०

१—इति काशिका ॥ माधवस्तु 'वणिज्याशब्दः स्वभावात्स्त्रीलिङ्गः । भाव एव प्रत्ययः । न तु कर्मणि' इत्याह ॥ भाष्ये तु 'दूतवणिग्भ्यां च' इति नास्त्येव—इति वैयाकरणसिद्धान्तकौमुदी ॥ 'तस्मात् वणिजि साधुः' 'तत्र साधुः' (४।४।९८) इति यत् इति बोध्यम् ॥

१—उज्ज्वलदत्तादिषु तु 'नौ व्यो यलोपः पूर्वस्य च दीर्घः' (४।१३६) इति सूत्रं लभ्यते ॥ २—परिपण आडम्बरः—इत्यनेकार्थकैरवाकरकौमुदी ॥ —३ इतः प्रभृति एरजिन्तः पाठः कश्मीरपुस्तकस्थः अन्यत्र तु न ॥

आ० अ०) । 'एरच्' (३।३।५६) ॥ (४) ॥*॥ चत्वारि **'परिवर्तनस्य' 'अदलाबदला'** इति ख्यातस्य ॥

पुमानुपनिधिर्न्यासः

प्विति ॥ उपनिधीयते । 'डुधाञ्' (जु० उ० अ०) । 'उपसर्गे घोः किः' (३।३।९२) ॥ (१) ॥*॥ न्यस्यते । 'अ-सु क्षेपणे' (दि० प० से०) । कर्मणि घञ् (३।३।१९) ॥ (२) ॥*॥ द्वे **'निक्षेपस्य'** ॥

प्रतिदानं तदर्पणम् ।

प्रेति ॥ प्रतीपं दानम् ॥ (१) ॥*॥ तस्यार्पणम् ॥ (२) ॥*॥ द्वे **'स्वामिने निक्षेपार्पणस्य'** ॥

क्रये प्रसारितं क्रय्यम्

क्रेति ॥ क्रीयते । 'अचो यत्' (३।१।९७) । गुणः (७।३।८४) 'क्रय्यस्तदर्थे' (६।१।८२) इति साधु ॥ (१) ॥*॥ एकं **'ग्राहका गृह्णीयुरिति बुद्ध्यापणे प्रसारितस्य'** ॥

क्रेयं क्रेतव्यमात्रके ॥ ८१ ॥

क्रयिति ॥ (१) ॥*॥ एकं **'हट्टे प्रसारणयोग्यस्य'** ॥

विक्रेयं पणितव्यं च पण्यं

वीति ॥ विक्रीयते । 'अचो यत्' (३।१।९७) ॥ (१) ॥*॥ पण्यते । 'पण व्यवहारे' (भ्वा० आ० से०) । 'तव्यत्त-व्यानीयरः' (३।१।९६) ॥ (२) ॥*॥ 'अवद्यपण्य-' (३।२।१०१) इति साधु ॥ (३) ॥*॥ त्रीणि **'विक्रयक्रिया-कर्मणः'** ॥

क्रय्यादयस्त्रिषु ।

क्रेति ॥ (पण्यान्ताः) ॥

क्लीबे सत्यापनं सत्यंकारः सत्याकृतिः स्त्रियाम् ॥८२॥

क्लीति ॥ सत्यस्य करणम् । 'सत्यापपाश-' (३।१।२५) इति णिजापुकौ । भावे ल्युट् (३।३।११४) । **'सत्यापना सत्याकृतिः'** इति स्त्रीकाण्डे बोपालितात् **'ण्यासश्रन्थः-'** (३।३।११७) इति युजपि ॥ (१) ॥*॥ घञ् (३।३।१८) । 'का-रे सत्यागदस्य' (६।३।८७) इति मुम् ॥ (२) ॥*॥ क्तिन् (३।३।९४) । 'सत्यादशपथे' (५।४।६६) इति डाच् ॥ (३) ॥*॥ त्रीणि **'साई'** इति ख्यातायाः ॥

विपणो विक्रयः

वीति ॥ विपणनम् । घञ् (३।३।१८) । संज्ञापूर्वकत्वाच्च वृद्धिः । 'खनो घ च' (३।३।१२५) इति घो वा ॥ (१) ॥*॥ विक्रयणम् । 'एरच्' (३।३।५६) ॥ (२) ॥*॥ द्वे **'विक्रयक्रियायाः'** ॥

संख्याः संख्येये ह्यादश त्रिषु ।

समिति ॥ दशन्ति, दशन्ते, वा । 'दंश दशने' (भ्वा० प० अ०) । बाहुलकात्कनिन् । दशशब्दमभिव्याप्य । 'आङ् मर्यादाभिविध्योः' (२।१।१३) 'नपुंसकात्-' (५।४।१०९) इति पक्षे टच् न । एकादिका नवदशपर्यन्ताः संख्याः संख्येये, त्रिलिङ्गाश्च । तेन 'एको विप्रः' इत्यादि भवति, न तु 'विप्रस्यैकः' इत्यादि ॥

विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः ॥८३॥

वीति ॥ 'विंशतिः' इत्याद्या यासां ताः संख्याः संख्येय-संख्ययोर्वर्तन्ते । एकवचनान्ताश्च । यथा 'विंशतिर्गावः' 'गवां विंशतिः' इति ॥

संख्यार्थे द्विबहुत्वे स्तः

समिति ॥ विंशत्यादीनां यदा संख्यार्थः, तदा द्विवचन-बहुवचने अपि स्तः । यथा 'द्वे विंशती, तिस्रो विंशतयः' इति ॥

१—एकाया दशान्ताः संख्याः संख्येयेषु वर्तमानास्त्रिलिङ्गाः । एका शाटी, एकः पटः, एकं कुण्डम् । दश स्त्रियः, दश पटाः, दश कुण्डानि । आदशेति । अष्टादशान्ताः—इति क्षीरस्वामी ॥ आदशेति । दशशब्दश्रुतिपर्यन्तमष्टादशं यावत् संख्या एकादिकाः संख्येये द्रव्ये वर्तन्ते । हिरवधारणे । तेन सामानाधिकरण्येनैव तासां वृत्तिरित्यर्थः । यथा 'एको विप्रः' 'दश विप्राः' इति, न तु वैयधिकरण्येन वृत्तिरिति, न तु 'एको विप्रस्य, दश विप्राणाम्' इत्यादिः ।—इति मुकुटः ॥ अत्र चैकाया अष्टादशान्ता संख्या संख्येये वर्तते । यदाह वाचस्पतिः । 'अष्टादशभ्य एकायाः संख्याः संख्येयगोचराः' इति—इति सोपज्ञनाममालाव्याख्यायां हेमाचार्यः ॥ इदं च प्रायिकम् । 'बहुषु बहुवचनम्' (१।४।२१) इति सूत्रभाष्ये 'किंसंबन्ध्येकत्वे, किंसंबन्धिद्वित्वे, किंसंबन्धिबहुत्वे' इत्यर्थे 'कस्यैकस्मिन्, कयोर्द्वयोः, केषां बहुषु' इति प्रयोगेण संख्यापरत्वस्यापि प्रतीतेः ॥ इदं त्वत्रावगन्तव्यम् । संख्यापरत्वेऽप्येषां स्वाश्रयद्रव्यगतसंख्याविशिष्टधर्ममात्रप्रतिपादकता । अत एवोक्तभाष्यप्रयोगे द्विबहुत्वादिः—इति ॥ २—विंशत्याद्याः सर्वा एव संख्याः संख्येये संख्यायां च नित्यमेकवचनान्ता एव वर्तन्ते ॥ यद्भाष्यम्—'आदशभ्यः संख्या संख्येये वर्तते । ऊर्ध्वं संख्याने संख्येये च' इति ॥ विंशतिः पटाः । विंशतिः पटानाम् । शतं गावः । शतं गवाम्—इति क्षीरस्वामी ॥ विंशत्याद्यास्तु संख्याशब्दा एकत्वे वर्तमानाः संख्येये संख्याने च वर्तन्ते । यथा 'विंशतिर्पटाः, विंशतिर्पटानाम् । शतं गावः, शतं गवाम्' इति ॥ यदाह वाचस्पतिः—'ऊनविंशत्यादिकास्तु सर्वाः संख्येयसंख्ययोः' इति—इति हेमचन्द्रः ॥ ३—संख्यामात्रार्थे वर्तमानाया विंशत्यादेः संख्याया द्विवचन-बहुवचने अपि स्त एकशेषेण । 'द्वे विंशती, तिस्रो विंशतयः । गवां विंशती, गवां विंशतयः' इति क्षीरस्वामी ॥ यद्वा तु भेदविवक्षायां संख्यान्तरस्यार्थेऽभिधेये विंशत्यादयो वर्तन्ते, तदा तत्सामाना-

तासु चानवतेः स्त्रियः ।

नेति ॥ तासु विंशत्यादिषु नवतिमभिव्याप्य स्त्रीलिङ्गाः । यथा 'विंशत्या पुरुषैः कृतम्, विंशतिः कुण्डानि' इति ॥

पङ्क्तेः शतसहस्रादि क्रमादशगुणोत्तरम् ॥ ८४ ॥

पेति ॥ द्वौ पञ्चकौ । 'पङ्क्तिविंशति–' (५।१।५९) इति साधुः । '**पङ्क्तिर्दशाक्षरच्छन्दोदशासंख्यावलीषु च**' इति विश्वः ॥*॥ पङ्क्तेर्दशगुणोत्तरं क्रमात् शतसहस्रादि ज्ञेयम् । यथा 'दश पङ्क्तयः शतम्, दश शतानि सहस्राण्ययुतम्' इत्यादि ॥

यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम् ।

याविति ॥ यौतेर्बाहुलकाद्भावे कर्तरि वा तुन् योतुः सोधनम्, सोधकः वा । 'तस्येदम्' (४।३।१२०) ॥*॥ 'प्रोवकारः' । 'माने वयः' (४।३।१६२) ॥ (२) ॥*॥ मीयतेऽनेन । 'माङ् माने' (दि० आ० अ०) । 'पाय्यसांनाय्य–' (३।१।१२९) इति साधु ॥ (३) ॥*॥ मानमर्थो यस्य ॥ (४) ॥*॥ चत्वारि '**मानार्थस्य**' ॥

मानं तुलाङ्गुलिप्रस्थैः

मानभेदानाह—**मानमिति** ॥ तोल्यतेऽनया । 'तुल उन्माने' (चु० प० से०) । भिदाद्यङ् (३।३।१०३) ।—'अतुलोपमाभ्याम्–' (२।३।७२) इति निर्देशाद्गुणाभावः ॥

गुञ्जाः पञ्चाद्यमाषकः ॥८५॥

ञ्जिति ॥ मष्यतेऽनेन । 'मष हिंसायाम्' (भ्वा० प० से०) 'हलश्च' (३।३।१२१) इति घञ् । '(**माषो** व्रीह्यन्तरे मूल्ये मानत्वग्दोषभेदयोः' इति मेदिनी) । कन् (ज्ञापि० ५।४।५) । आद्यश्चासौ माषश्च । शास्त्रीयत्वात् ॥ (१) ॥*॥ एकम् '**माषकस्य**' ॥

ते षोडशाक्षः कर्षोऽस्त्री

तयिति ॥ अक्षति । 'अक्षू व्याप्तौ' (भ्वा० प० से०) । अच् (३।१।१३४) '**अक्षो** रथस्यावयवे व्यवहारे बिभीतके । सायके शकटे कर्षे ज्ञाने चात्मनि रावणौ । **अक्षं** सौवर्चले तुत्थे हृषीके स्यात्' इति हेमचन्द्रः ॥ (१) ॥*॥ कर्षति । 'कृष विलेखने' (भ्वा० प० अ०) । अच् (३।१।१३४) । 'कर्षो ना कर्षणे मानप्रभेदे पुंनपुंसकम्' (इति मेदिनी) ॥ (२) ॥*॥ द्वे '**कर्षस्य**' ॥

पलं कर्षचतुष्टयम् ।

पेति ॥ पलति 'पल गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) । '**पलमुन्मानमांसयोः**' इति हैमः ॥ (१) ॥*॥ कर्षाणां चतुष्टयम् ॥ (२) ॥*॥ द्वे '**पलस्य**' ॥

सुवर्णविस्तौ हेम्नोऽक्षे

स्विति ॥ शोभनो वर्णः स्तुतिः, वा यस्य । रुद्रस्तु '**सुवर्णं** स्वर्णविस्तयोः' इति क्लीबमाह । '**सुवर्णो** ना स्वर्णकर्षे **सुवर्णा** च मखान्तरे । स्त्री कृष्णागुरुणि क्लीबे काञ्चने हरिचन्दने' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ विस्यते स्म । 'विस उत्सर्गे' (दि० प० से०) । क्तः (३।२।१०२) । आगमस्यानित्यत्वान्नेट् ॥ (२) ॥*॥ द्वे '**अक्षमानस्य**' ॥

कुरुविस्तस्तु तत्पले ॥ ८६ ॥

किति ॥ कुरुषु विस्तः ॥ (१) ॥*॥ तस्य हेम्नः पले ॥*॥ एकम् '**अक्षपलस्य**' ॥

तुला स्त्रियां पलशतम्

त्विति ॥ तोलयन्ति । 'तुल उन्माने' चुरादिः । अच् (३।१।१३४) । '–अतुलोपमाभ्याम्–' (२।३।७२) इति निपातनाद्गुणाभावः । णिजभावे तु 'इगुपध–' (३।१।१३५) इति कः । '**तुला** सादृश्यमानयोः । गृहाणां दारुबन्धाय पीठिकायामपीष्यते । राशौ पलशते भाण्डे (**तुलं** स्याद्रुद्रदारुणि । आकाशे च पिचौ न स्त्री)' इति विश्वहेमचन्द्रौ (मेदिनी) ॥ (१) ॥*॥ पलानां शतम् ॥*॥ एकम् '**तुलायाः**'॥

भारः स्याद्विंशतिस्तुलाः ।

भेति ॥ भ्रियते । 'भृञ् भरणे' (भ्वा० उ० अ०) । 'अकर्तरि च' (३।३।१९) इति घञ् । '**भारः** सहस्रद्वितये पलानामपि वीवधे' इत्यजयः । '**भारः** स्याद्वीवधे विष्णौ पलानां द्विसहस्रके' (इति मेदिनी) ॥*॥ (क्रयादेर्दीर्घान्तात्) अपि (३।३।५७) भरः ॥ (१) ॥*॥ एकम् '**भारस्य**' ॥

धिकरण्याद्युपचारेण तेभ्यो द्विवचनबहुवचने अपि स्तो भवतः । यथा 'द्वे विंशती, तिस्रो विंशतयः' इति ॥ सामानाधिकरण्याभावेऽपि 'गवां विंशती, गवां विंशतयः' इति मुकुटः ॥ द्विबहुत्वयोर्वर्तमानास्तु विंशत्याद्याः संख्यायामेव वर्तन्ते—इति हेमचन्द्रः । 'पङ्क्तिविंशति–' (५।१।५९) इति सूत्रे भाष्यप्रदीपोद्योते नागेशभट्टेन तु—विंशत्यादयो द्व्यादयश्च धर्मशक्ता एव । धर्मैकांशेऽभेदाच्च व्यक्तौ कार्याणि । तयोश्च भेदाभेदौ । विंशत्यादयः कदाचिद्भेदेन संख्यां वदन्ति 'गवां विंशतिः' इति । कदाचिदभेदेन 'विंशतिर्गावः' इति ॥ यद्यप्यभेदेन, तदापि धर्मगतसंख्याविशिष्टेनैव तत्र द्रव्यप्रतीतिः शब्दशक्तिस्वभावात् । यथा 'गावो धनम्' इत्यादौ प्रतिहेतुत्वगुणगतसंख्यावैशिष्ट्येनैव द्रव्यप्रतीतिर्धनत्वस्य ॥ स्वांस्तु विशेषः । तत्र कदाचित्स्वगतसंख्यावैशिष्ट्येनापि प्रतीतिः ॥ अन्यगतसंख्यावैशिष्ट्यमन्यस्य कथम्, इति चेत् । आरोपेण, इति गृहाण ॥ द्व्यादस्तु स्वगतवाच्यसंख्याविशिष्टद्रव्याभेदेन तद्गतसंख्याविशिष्टमेव धर्मं प्रतिपादयन्ति शब्दशक्तिस्वभावात्, इति न कदाचिदपि तत्रैकवचनम् ॥ नापि विंशत्यादिभ्यो बहुवचनम् ॥ विंशतिप्रचये तु बहुवचनमिष्टमेव ॥ 'द्व्येकयोः–' (१।४।२२) इत्यादौ तु विंशतिवदेव धर्मगतसंख्याविशिष्टद्रव्यस्यैव प्रतीतिः, इति द्विवचनम् । एवं प्रतीतिरीदृशवृत्तिविषयैव, इति नातिप्रसङ्गः–इति निष्कर्ष उक्तः ॥

आचितो दश भाराः स्युः

आचीति ॥ आचीयते स्म । 'चिञ् चयने' (स्वा० उ० अ०) । क्तः (३।२।१०२) । 'भारैर्दशभिराचितिः' इति रत्नकोषः । **'आचितः** शकटोन्मेये पलानामयुतद्वये' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ एकम् **'आचितस्य'** ॥

शाकटो भार आचितः ॥८७॥

शेति ॥ शकटेन उह्यते । 'शेषे' (४।२।९२) इत्यण् ॥ (१) ॥*॥ एकम् **'आचितभारस्य'** ॥

कार्षापणः कार्षिकः स्यात्

केति ॥ कर्षस्यायम् 'तस्येदम्' (४।३।१२०) इत्यण् । आपणनम् । 'पण व्यवहारादौ' (भ्वा० आ० से०) । 'नित्यं पणः–' (३।३।६६) इत्यप् **'खनो घ च'** (३।३।१२५) इति घो वा । कार्षस्य कार्षेण वा आपणः । **'कार्षापणोऽस्त्री** कार्षिके पणषोडशकेऽपि च' (इति मेदिनी) ॥ (१) ॥*॥ कर्षस्यायम् । अध्यात्मादित्वात् (वा० ४।३।६०) ठञ् ॥ (२) ॥*॥ द्वे **'रजतरूप्यस्य'** ॥

कार्षिके ताम्रिके पणः ।

केति ॥ ताम्रस्यायम् । 'अध्यात्मादित्वात् (वा० ४।३।६०) ठञ् ॥*॥ पण्यतेऽनेन । 'पण व्यवहारादौ' (भ्वा० आ० से०) । 'नित्यं पणः–' (३।३।६६) इत्यप् । 'पुंसि–' (३।३।११८) इति घो वा । 'हलश्च' (३।३।१२१) घञ् वा । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । **'पणो** वराटमाने स्यान्मूल्ये कार्षापणे ग्रहे । क्रय्यशाकादिके द्यूते व्यवहारे भृतौ धने' (इति विश्वमेदिन्यौ) ॥ (१) ॥*॥ एकं **'ताम्रकृतकार्षापणस्य'** तुलामानमुक्तम् ॥

॥ अङ्गुलिमानं च हस्तादि नृवर्गे उक्तम् ॥

प्रस्थमानं त्वाह—

अस्त्रियामाढकद्रोणौ खारी वाहो निकुञ्चकः ॥८८॥
कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक् ।

अस्त्रीति ॥ आढौकते । 'ढौक गतौ' (भ्वा० आ० से०) । अच् (३।१।१३४) । पृषोदरादिः (६।३।१०९) । **'आढकी** च तुवर्या स्त्री परिमाणान्तरे त्रिषु' (इति मेदिनी) ॥ (१) ॥*॥ एकं (सर्वतो दशाङ्गुलिमानस्य) । द्रवति । 'द्रु गतौ' (भ्वा० प० से०) । 'कृवृजूसिद्रुपल्यनिखपिभ्यो नित्' (उ० ३।१०) इति नः । 'द्रोणोऽस्त्रियामाढके स्यादाढकादिचतुष्टये । पुमान् कूपीपतौ कृष्णकाकेऽस्त्री नीवृदन्तरे । स्त्रियां काष्ठाम्बुवाहिन्यां गवादिन्यामपीष्यते' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ खमाराति । मूलविभुजादिः (वा० ३।२।५) । गौरादिः (४।१।४१) ॥ (१) ॥*॥ उह्यतेऽनेन । 'वह प्रापणे' (भ्वा० उ० अ०) 'हलश्च' (३।३।१२१) इति घञ् । **'वाहोऽश्वमानयोः** । वृषे, **वाहा** तु वाहौ स्यात्' इति हेमचन्द्रः ॥ (१) ॥*॥ निकुञ्चति । 'कुञ्च कौटिल्ये' (भ्वा० प० से०) । अच् (३।१।१३४) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (१) ॥*॥ कुण्ड्यते, कुण्डते, वा । 'कुडि दाहे' (भ्वा० आ० से०) । बाहुलकात् कवच्प्रत्ययः । अनित्यत्वान्न नुम् ॥*॥ **'कुटपः'** इत्यपि पाठः—इति मुकुटः । तत्र 'कुट कौटिल्ये' (तु० प० से०) । कुटेः कपन् (उ० ३।१४२) ॥ (१) ॥*॥ प्रस्थीयतेऽनेन । 'घञर्थे कः' (वा० ३।३।५८) । **'प्रस्थोऽस्त्रियां** मानभेदे सानावत्युच्चवस्तुनि' (इति मेदिनी) ॥ (१) ॥*॥ आद्यर्थेन मानीभविकाप्रवर्तिकादिग्रहः । **'वाहो** विंशतिखारीभिर्भविका स्यादनेन तु । **प्रवर्तः** पञ्चखारीभिः सस्यमाने प्रकीर्तितः' । 'पलं प्रकुञ्चकं मुष्टिः कुडवस्तच्चतुष्टयम् । चत्वारः कुडवाः प्रस्थस्तुःप्रस्थमथाढकम् । अष्टाढको भवेद्द्रोणो द्विद्रोणः सूर्प उच्यते । सार्धसूर्पो भवेत्खारी द्विद्रोणा गोण्युदाहृता । तामेव भारं जानीयाद्वाहो भारचतुष्टयम्' ॥*॥ **'परिमाणानाम्'** पृथगेकैकम् ॥

पादस्तुरीयो भागः स्यात्

पेति ॥ पद्यते । 'पद गतौ' (दि० आ० अ०) । 'पद्रुज–' (३।३।१९) इति घञ् । '(**पदं** शब्दे च वाक्ये च व्यवसायप्रदेशयोः) । पादतन्निघ्नयोः स्थानत्राणयोरङ्घ्रवस्तुनोः । श्लोकपादेऽपि च क्लीबं पुंलिङ्गः किरणे पुनः । **पादो** बुध्ने तुरीयांशे शैलप्रत्यन्तपर्वते । चरणे च मयूखे च' (इति मेदिनी) ॥ (१) ॥*॥ **एकं 'चतुर्थभागस्य'** ॥

अंशभागौ तु वण्टके ॥ ८९ ॥

अंशेति ॥ अंश्यते 'अंश विभाजने' ( ) अदन्तः । कर्मणि घञ् (३।३।१९) ।—'अंशेः शन्' इति त्वपाणिनीयः । **'अंशो** विभाजने प्रोक्त एकदेशेऽपि वस्तुनः' इति हेमचन्द्रः ॥ (१) ॥*॥ भज्यते । 'भज सेवायाम्' (भ्वा० उ० अ०) । कर्मणि घञ् (३।३।१९) । **'भागो** रूपार्धके भाग्यैकदेशयोः' इति हैमः ॥ (२) ॥*॥ वण्ट्यते । 'वटि विभाजने' (चु० प० से०) कर्मणि घञ् (३।३।१९) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (३) ॥*॥ त्रीणि **'विभागस्य'** ॥

द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु ।
हिरण्यं द्रविणं शुभ्रमर्थैरविभवा अपि ॥ ९० ॥

द्रेति ॥ द्रवित । 'द्रव्यं च भव्ये' (५।३।१०४) इति साधुः । **'द्रव्यं** भव्ये धने क्ष्मादौ जतुद्रुमविकारयोः । विनये भेषजे रीत्याम्' इति हैमः ॥ (१) ॥*॥ विद्यते स्म । 'विदृ लाभे' (तु० उ० अ०) । 'वित्तो भोगप्रत्ययथयोः' (८।२।५८) इति साधुः । **'वित्तं** क्लीबं धने वाच्यलिङ्गे स्थाते विचारिते' (इति मेदिनी) ॥ (२) ॥*॥ स्वपतौ साधु । 'पथ्यतिथि–'

१—पुनरित्यन्तस्यात्र लेखोऽनुचितः । पदशब्दार्थबोधकस्य पदशब्दव्याख्यायां स्वयं लिखितस्यात्र पादशब्दव्याख्यायामप्रक्रान्तत्वात् ॥

(४।४।१०४) इति ढञ् ॥ (३) ॥*॥ रिच्यते । 'रिचिर् विरेचने' (रु० उ० अ०) । 'पातृतुदिवचिरिचि–' (उ० ३।७) इति थक् ।—'वमिकाशि–' इत्यादिना थन्—इति मुकुटस्त्वपाणिनीयः ॥ (४) ॥*॥ ऋच्यते । 'ऋच् शब्दे' (तु० प० से०) । बाहुलकात् क्थन् ॥ (५) ॥*॥ धनति । 'धन धान्ये' (जु० प० से०) । अच् (३।१।१३४) । **'धनं** तु गोधने वित्ते' इति विश्वः (मेदिनी) ॥ (६) ॥*॥ वसति, उष्यते, वाऽस्मिन् गुणैः । 'वस निवासे' (भ्वा० प० अ०) । 'शृस्वृस्निहि–' (उ० १।१०) इत्युः ।—'पद्यसिवसि–' इत्यादिना उः—इति मुकुटस्त्वपाणिनीयः । वस्ते, वस्यते वा । 'वस आच्छादने' (अ० आ० से०) उः । **'वसुर्मयूखाग्निजनाधिपेषु** योक्षे सुरे स्याद्वसु हाटके च । वृष्ण्यौषधस्थानधनेषु रत्ने वसु स्मृतं स्यान्मधुरेऽन्यवच्च' इति विश्वप्रकाशः ॥ (७) ॥*॥ हर्यति । 'हर्य गतिकान्त्योः' (भ्वा० प० से०) । 'हर्यतेः' 'कन्यन् हिर् च' (उ० ५।४४) ।—जिहीते भाग्यवन्तम् । 'ओहाङ् गतौ' (जु० आ० अ०) । 'हो हिर् च' इत्यन्यप्रत्ययो हिरादेशश्च—इति मुकुटस्त्वपाणिनीयः । **'हिरण्यं** चे(रे)तसि द्रव्ये शातकुम्भवराटयोः । अक्षये मानभेदे च स्यादकुप्ये नपुंसकम्' (इति मेदिनी) ॥ (८) ॥*॥ द्रवति, द्रूयते वा । 'द्रु गतौ' (भ्वा० प० अ०) । **'द्रुदक्षिभ्यामिनन्'** (उ० २।५०) **'द्रविणं** न द्रयोर्वित्ते काञ्चने च पराक्रमे' इति विश्वः (मेदिनी) ॥ (९) ॥*॥ दिवं मनति । 'म्ना अभ्यासे' (भ्वा० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । **'द्युम्नं** वित्ते बलेऽपि च' इति हेमचन्द्रः (मेदिनी) ॥ (१०) ॥*॥ अर्थ्यते । 'अर्थ उपयाच्ञायाम्' (चु० आ० से०) । 'अकर्तरि–' (३।३।१९) इति घञ् । ऋच्छति, अर्यते वा । 'ऋ गतौ' (भ्वा० प० अ०) । 'उषिकुषिगार्तिभ्यस्थन्' (उ० २।४) । **'अर्थो** विषयार्थनयोर्धनकारणवस्तुषु । अभिधेये च शब्दानां निवृत्तौ च प्रयोजने' (इति मेदिनी) ॥ (११) ॥*॥ राति सुखम्, रायते वा । 'रा आदाने' (अ० प० अ०) । 'रातेर्डैः' (उ० २।६६) । **'रा** द्रयोर्विभवे स्वर्णे' इति रुद्रः ॥ (१२) ॥*॥ विभवति । अच् (३।१।१३४) । **'विभवो** धननिर्वृत्योः' इति हैमः ॥ (१३) ॥*॥ त्रयोदश **'द्रव्यस्य'** ॥

स्यात्कोषश्च हिरण्यं च हेमरूप्ये कृताकृते ।

स्येति ॥ कुष्यते । 'कुष निष्कर्षे' (क्र्या० प० से०) । 'अकर्तरि–' (३।३।१९) इति घञ् ॥*॥ कुश्यते । 'कुश संश्लेषणे' ( ) 'तालव्या मूर्धन्याश्चैते' इत्यधिकारे **'कोशविशदौ** च' इति शभेदः ॥ (१) ॥*॥ (२) ॥*॥ हेम च रूप्यं च । कृतं चाकृतं च । घटिताघटिते ॥*॥ द्वे **'घटिताघटितहेमरूप्ययोः'** ॥

ताभ्यां यदन्यत्तत्कुप्यम्

तेति ॥ गुप्यते । 'गुपू रक्षणे' (भ्वा० प० से०) **'राजसूय०'** (३।१।११४) इति साधु ॥ (१) ॥*॥ एकम् **(हेमरूप्याभ्यामन्यस्य) 'ताभ्रादेर्धातोः'** ॥

रूप्यं तद्वयमाहतम् ॥ ९१ ॥

रूप्यमिति ॥ **'आहतं** तु मृषार्थके । गुणिते ताडिते चापि' इति हैमः । आहतं रूपमस्य । 'रूपादाहतप्रशंसयोर्यप्' (५।२।१२०) ॥ (१) ॥*॥ एकम् **'आहतरूपस्य हेमरौप्यादेः'** ॥

गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः ।

गेति ॥ गरुत्मतो जातत्वात् 'तस्येदम्' (४।३।१२०) इत्यण् ॥ (१) ॥*॥ मरकं तरन्त्यनेन । 'तॄ' (भ्वा० प० से०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः ॥ (२) ॥*॥ अश्मनो गर्भः ॥ (३) ॥*॥ हरिद्वर्णो मणिः । शाकपार्थिवादिः (वा० २।१।७८) ॥ (४) ॥*॥ चत्वारि **'गारुत्मतस्य'** ॥

शोणरत्नं लोहितकः पद्मरागः

शोणेति ॥ शोणं च तद्रत्नं च ॥ (१) ॥*॥ लोहितमेव । 'लोहितान्मणौ' (५।४।३०) इति कन् ॥ (२) ॥*॥ पद्ममिव रागोऽस्य । 'अनेकमन्य–' (२।२।२४) इति समासः ॥ (३) ॥*॥ त्रीणि **'पद्मरागस्य'** ॥

अथ मौक्तिकम् ॥ ९२ ॥

मुक्ता

अथेति ॥ मुक्तैव । 'विनयादिभ्यष्ठक्' (५।४।३४) ॥ (१) ॥*॥ मुच्यते स्म । 'मुच्लृ मोक्षणे' (तु० उ० अ०) । क्तः (३।२।१०२) । **'मुक्ता** मौक्तिकपुंश्चल्योः' इति हैमः ॥ (२) ॥*॥ द्वे **'मौक्तिकस्य'** ॥

अथ विद्रुमः पुंसि प्रवालं पुंनपुंसकम् ।

अथेति ॥ विशिष्टो द्रुमः । यद्वा विशिष्टे द्रौ भवः । 'द्युद्रुभ्यां मः' (५।२।१०८) । **('विद्रुमो** रत्नवृक्षेऽपि प्रवालेऽपि पुमानयम्' इति मेदिनी) ॥ (१) ॥*॥ प्रबलति । 'बल प्राणने' (भ्वा० प० से०) । 'ज्वलिति–'(३।१।१४०) इति णः । **'प्रवालोऽस्त्री** किसलये वीणादण्डे च विद्रुमे' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ द्वे **'प्रवालस्य'** ॥

रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च ॥ ९३ ॥

रेति ॥ रमन्तेऽस्मिन् । 'रमु क्रीडायाम्' (भ्वा० आ० अ०) । बाहुलकात् क्नप् । तुक् (६।३।१।७१) । **'रत्नं** स्वजातिश्रेष्ठे स्यान्मणौ' इति हैमः ॥ (१) ॥*॥ मण्यते 'मण शब्दे' (भ्वा० प० से०) । इन् (उ० ४।११८) । **'मणिः**

१—तद्वयं कुप्याकुप्यम्—इति क्षीरस्वामी ।—तयोर्हेमरूप्ययोर्द्वयम्—इति मुकुटः ॥

स्त्रीपुंसयोरश्मजातौ मुक्तादिकेऽपि च)। (कण्ठदेशस्थनेऽजाया लिङ्गाग्रेऽलिञ्जरेऽपि च)' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ अश्मजातौ मरकतादौ ॥*॥ द्वे '**रत्नस्य**' ॥

स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् ।
तपनीयं शातकुम्भं गाङ्गेयं भर्म कर्बुरम् ॥ ९४ ॥
चामीकरं जातरूपं महारजतकाञ्चने ।
रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम् ॥ ९५ ॥

स्वेति ॥ सुष्ठु ऋणोति । 'ऋणु गतौ' (त० उ० से०) । पचाद्यच् (३।२।१३४) यद्वा अर्णनम् । घञ् (३।३।१८) । शोभनोऽर्णो गतिरनेन ॥ (१) ॥*॥ शोभनो वर्णोऽस्य । सुष्ठु वर्ण्यते वा । 'वर्ण वर्णने' (चु० प० से०) ण्यन्तः । 'एरच्' (३।३।५६) ॥ (२) ॥*॥ कनति । 'कनी दीप्तौ' (भ्वा० प० से०) । 'कृवादिभ्यो वुन्' (उ० ५।३५) । '**कनकं** हेम्नि पुंसि स्यात्किंशुके नागकेसरे । धत्तूरे काञ्चनारे च कालीये चम्पकेऽपि च' (इति मेदिनी) ॥ (३) ॥*॥ हिनोति, हीयते वा । 'हि गत्यादौ' (स्वा० प० अ०) । मनिन् (उ० ४।१४५) ॥ (५) ॥*॥ हटति । 'हट दीप्तौ' (भ्वा० प० से०) । ण्वुल् (३।१।१३३) । हाटयति वा । कुन् (उ० २।३२) ॥ (६) ॥ तप्यतेऽनेन । 'तप संतापे' (भ्वा० प० अ०) । 'कृत्यल्युटः' (३।३।११३) इत्यनीयर् ॥ (७) ॥*॥ शतकुम्भे पर्वते भवम् । 'तत्र भवः' (४।३।५३) इत्यण् ॥*॥ अनुशतिकादिः (७।३।२०) । ('**शातकौम्भम्**') इति तु स्वामी ॥ (८) ॥*॥ गङ्गाया अपत्यम् । शुभ्रादित्वात् । (४।१।१२३) ढक् । 'यं गर्भं सुषुवे गङ्गा पावकाद्दीप्ततेजसम् । तदुल्बं पर्वते न्यस्तं हिरण्यं समपद्यत' इति वायुपुराणम् । '**गाङ्गेयः** स्यात्पुमान्भीष्मे क्लीबं स्वर्णकसेरुणोः' (इति मेदिनी) ॥ (९) ॥*॥ बिभर्ति, भरति वा । मनिन् (उ० ४।१४५) ('**भर्म** स्यात्काञ्चने भूतौ' इति मेदिनी) ॥ (१०) ॥*॥ कर्वत्यनेन । 'कर्व दर्पे' (भ्वा० प० से०) । मद्गुरादिः (उ० १।४१) । '**कर्बुरं** सलिले हेम्नि **कर्बुरः** पापरक्षसोः । **कर्बुरा** कृष्णवृन्तायां शबले पुनरन्यवत्' इति विश्वः (मेदिनी) ॥ (११) ॥*॥ चमीकरे आकरे भवम् । 'तत्र भवः' (४।३।५३) इत्यण् । यद्वा चमनम् । 'चमु अदने' (भ्वा० प० से०) । 'इञजादिभ्यः' (वा० ३।३।१०८) । 'अनाचमेः' (७।३।३४) इति आङोऽविवक्षितत्वाद्वृद्धिः । 'कृदिकारात्–' (ग० ४।१।४५) इति ङीष् । चामीं करोति । 'कृञो हेतु–' (३।२।२०) इति टः ॥ (१२) ॥*॥ जातं रूपं यस्य । यद्वा प्रशस्तं जातम् । 'प्रसंसायां रूपप्' (५।३।६६) ॥ (१३) ॥*॥ महच्च तद्रजतं च । 'सन्महत्–' (२।१।६१) इति समासः । 'आन्महतः' (६।३।४६) इत्यात्वम् ॥ (१४) ॥*॥ काञ्चति(ते) । 'काञ्चि दीप्तौ' (भ्वा आ० से०) । नन्द्यादिल्युः (३।१।१३४)—पृषोदरादिः (६।३।१०९)—इति मुकुटस्तु चिन्त्यः । 'काञ्चि' धातोरेव सत्त्वात् ॥ (१५) ॥*॥ रोचते । 'रुच दीप्तौ' (भ्वा० आ० से०) । 'युजिरुजितिजां कुश्च' (उ० १।१४६) इति मक् । '**रुक्मं** लोहे सुवर्णे च' इति हेमचन्द्रः ॥ (१६) ॥*॥ कृतस्वरे आकरविशेषे भवम् । अण् (४।३।५३) । कृताः पठिताः स्वरा येन । तस्मै देयम् । 'शेषे' (४।२।९२) इत्यण् ॥ (१७) ॥*॥ जम्बूरसस्य नद्यां भवम् । 'तत्र भवः' (४।३।५३) इत्यण् ॥ (१८) ॥*॥ अष्टौ धातवः पदानि स्थानान्यस्य । 'अष्टनः संज्ञायाम्–' (६।३।१२५) इति दीर्घः । यद्वा अष्टानामपदम् ॥ (१९) ॥*॥ एकोनविंशतिः '**सुवर्णस्य**' ॥

अलंकारसुवर्णे यच्छृङ्गीकनकमित्यदः ।

अलमिति ॥ अलंकारसंबन्धि सुवर्णम् ॥*॥ शृङ्गिणामी । शृङ्गी । कनति । 'कनी दीप्तौ' (भ्वा० प० से०) कुन् (उ० २।३२) । '**शृङ्गी**' इति पृथग् नाम वा । 'स्त्री **शृङ्गी मण्डनसुवर्णम्**' इति रत्नकोषः । 'भूषणं कनकं शृङ्गी' इति नाममाला च । अल्पं शृङ्गं प्राधान्यं वा यस्याः । गौरादिः (४।१।४१) । 'स्त्री स्यात्काचिन्मृणाल्यादि' इति वचनात् ॥ (१) ॥*॥ एकम् '**अलंकारस्वर्णस्य**' ॥

दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि ॥ ९६ ॥

द्विति ॥ सुवर्णापेक्षया दुष्टो वर्णोऽस्य, अनेन वा । '**दुर्वर्णं** त्रिष्वसद्वर्णे क्लीबमैलेयरूप्ययोः' (इति मेदिनी) ॥ (१) ॥*॥ रजति, रज्यते वा । 'रञ्ज रागे' (भ्वा० उ० अ०) 'पृथिरञ्जिभ्यां कित्' (उ० ३।१११) इत्यतच् । '**रजतं** त्रिषु शुक्ले स्यात् क्लीबं हारे च दुर्वर्णे' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ 'रूप रूपक्रियायाम्' (चु० उ० से०) । ण्यन्तः । 'अचो यत्' (३।१।९७) । '**रूप्यः** स्यात्सुन्दरे त्रिषु । आहतस्वर्णरजते रजते च नपुंसकम्' इति विश्व(मेदिनी)हेमचन्द्रौ ॥ (३) ॥*॥ खर्जति । 'खर्ज व्यथने' (भ्वा० प० से०) । खर्जेपिञ्जादिभ्य ऊरोलचौ' (उ० ४।१४०) इत्यूरः । '**खर्जूरं** रूप्यफलयोः **खर्जूरः** कीटवृक्षयोः' (इति हैमः) ॥ (४) ॥*॥ श्वेतते । 'श्विता वर्णे' (भ्वा० आ० से०) । अच् (३।१।१३४)। '**श्वेतो** द्वीपादिभेदयोः । **श्वेता** वराटिकाकाष्ठपाटलाशङ्खिनीषु च । क्लीबं रूप्येऽन्यवच्छुक्ले' (इति मेदिनी) ॥ (२) ॥*॥ पञ्च '**रूप्यस्य**' ॥

रीतिः स्त्रियामारकूटो न स्त्रियाम्

रीति ॥ रीयते । 'रीङ् क्षरणे' (दि० आ० अ०) । रिणाति वा । 'री गतिरेषणयोः' (क्या० प० अ०) । 'स्त्रियां क्तिन्' (३।३।९४) । '**रीतिः** स्त्रियां स्यन्दप्रचारयोः । पित्तले लोहकिट्टे च' (इति मेदिनी) ॥ (१) ॥*॥ 'ऋ गतौ'

१—शृङ्गिर्हस्वान्ता च । तथा च बाणः—'वर्षपर्वतसमूहनिवान्तःस्थितापरिमाणशृङ्गिहेमकूटं राजकुलम्' इति—मुकुटः ॥

(भ्वा० प० अ०) । भावे घञ् (३।३।१८) आरं कूटयते ॥ 'कूट दाहे' (चु० उ० से०) । अच् (३।१।१३४) । **'आरकूटोऽस्त्रियां द्रव्यं रीतिस्तु रीतिकोमलम्'** इति रभसः ॥ (२) ॥*॥ द्वे **'पित्तलस्य'** ॥

अथ ताम्रकम् ।

शुल्वं म्लेच्छमुखं द्यष्ठवरिष्ठोदुम्बराणि च ॥ ९७ ॥

अथेति ॥ ताम्यति, तम्यते, वा । 'तमु काङ्क्षायाम्' (दि० प० से०) । 'अमितम्योर्दीर्घश्च' (उ० २।१६) इति रक् । स्वार्थे कन् (ज्ञापि० ५।४।५) ।–'तम्यमिचमां दीर्घश्च' इति रक्—इति मुकुटस्त्वपाणिनीयः ॥ (१) ॥*॥ शलति । 'शल गतौ' (भ्वा० प० से०) । 'उल्वादयश्च' (उ० ४।९५) इति, साधु । यद्वा शुल्वयति, शुल्व्यते, वा । 'शुल्व माने' (चु० प० से०) । अच् (३।१।१३४) घञ् (३।३।१९) 'एरच्' (३।३।५६) वा । **'शुल्वं** ताम्रे यज्ञकर्मण्याचारे जलसंनिधौ' इति हेमचन्द्रः ॥ (२) ॥*॥ म्लेच्छदेशे मुखमुत्पत्तिरस्य । म्लेच्छस्य मुखमिव, इति वा ॥ (३) ॥*॥ द्वे हेमरूप्ये अश्नुते स्म । 'अशू व्याप्तौ' (स्वा० आ० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः ॥ (४) ॥*॥ अतिशयेन वरम्, उरु, वा अतिशायने इष्ठन् । (५।३।५५) । 'प्रियस्थिर–' (६।४।१५७) इत्युरोर्वर् । **'वरिष्ठं** ताम्रके क्लीबम्' इति टवर्गद्वितीयान्ते रुद्रः । **'वरिष्ठं** मरिचेऽपि च । ताम्रे क्लीबं तित्तिरौ ना वरोरुतमयोस्त्रिषु' इति विश्वः (मेदिनी) ॥ (५) ॥*॥ उं शंभुं वृणोति । 'वृञ् वरणे' (स्वा० उ० से०) । 'संज्ञायां भृतृवृजि–' (३।२।४६) इति खच् । 'अरुर्द्विषत्–' (६।३।६७) इति मुम् । उत्कृष्टमुंवरम् । प्रादिसमासः (वा० २।२।१८) । **'उदुम्बरस्तु** देहल्यां वृक्षभेदे च पण्डके । कुष्ठभेदेऽपि च पुमांस्ताम्रे तु स्यान्नपुंसकम्' (इति मेदिनी) ॥*॥ प्रज्ञाद्यणि (५।४।३८) तु । **'औदुम्बरं** भवेत्ताम्रे फलादौ यज्ञशाखिनः' इत्यजयः ॥ (६) ॥*॥ षट् **'ताम्रस्य'** ॥

लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी ।
अश्मसारः

लोह इति ॥ लोहति, लुह्यते, वा । 'लुह गार्ध्ये' ( ) । अच् (३।१।१३४) । घञ् (३।३।१९) वा । लूयतेऽनेन वा । 'लूञ् छेदने' (क्रया० उ० से०) । बाहुलकाद् हः । रुह्यते, रोहति वा 'रुह प्रादुर्भावे' (भ्वा० प० अ०) । घञ् (३।३।१९) । अच् (३।१।१३४) वा । कपिलिकादित्वात् (वा० ८।२।१८) लत्वम् । **'लोहोऽस्त्री** शस्त्रके **लोहं** जोङ्गके सर्वतैजसे' (इति मेदिनी) ॥*॥ प्रज्ञाद्यणि **'लौहम्'** ॥ (१) ॥*॥ शस्यतेऽनेन । 'शसु हिंसायाम्' (भ्वा० प० से०) । 'दाम्नीशस्–' (३।२।१८२) इति ष्ट्रन् । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ तेजयति, तेज्यते वा, अनेन वा । 'तिज निशाने' (चु० प० से०) । 'तिजेर्दीर्घश्च' (उ० ३।१८) इति क्सः । **'तीक्ष्णं** सामुद्रलवणे विषलोहाजिमुष्ककै । क्लीबं, यवाग्रके पुंसि तिग्मात्मत्यागिनोस्त्रिषु' (इति मेदिनी) ॥ (३) ॥*॥ पिण्डते, पिण्ड्यते वा । 'पिडि संघाते' (भ्वा० आ० से०) । अच् (३।१।१३४) । घञ् (३।३।१९) वा । **'पिण्डो** बोले बले सान्द्रे देहागारैकदेशयोः । देहमात्रे निवापे च गोलसिह्लकयोरपि । ओण्ड्रपुष्पे च पुंसि स्यात् क्लीबमाजीवनायसोः । पिण्डी तु पिण्डतगरेऽलाबूखर्जूरभेदयोः' (इति मेदिनी) ॥ (४) ॥*॥ कालं च तदयश्च । 'अनोऽश्मायःसरसाम्–' (५।४।९४) इति टच् ॥ (५) ॥*॥ एति, अयते वा । असुन् (उ० ४।१८९) ॥ (६) ॥*॥ अश्मनः सारः । 'अश्मसारं च शस्त्रकम्' इत्यमरमाला ॥ (७) ॥*॥ सप्त **'लोहस्य'** ॥

अथ मण्डूरं शिङ्घाणमपि तन्मले ॥ ९८ ॥

अथेति ॥ मण्डते(ति) । 'मडि भूषायाम्' (भ्वा० प० से०) । खर्जादित्वात् (उ० ४।९०) ऊरच् ॥ (१) ॥*॥ शिङ्घ्यते । 'शिघि आघ्राणे' (भ्वा० प० से०) । 'आणको लूधूशिङ्घिधाञ्भ्यः' (उ० ३।८३) । पृषोदरादिः (६।३।१०९) । सिंहमाणयति वा । कर्मण्यण् (**'शिङ्घाणं** काचपात्रे च लोहनासिकयोर्मले' इति मेदिनी) ॥*॥ **'सिंहानम्'** इति पाठे सिंहवदनिति । 'अन प्राणने' (अ० प० से०) । अच् (३।१।१३४) । सिंहमानयति वा । 'कर्मण्यण्' (३।२।१) ॥ (२) ॥*॥ तस्य लोहस्य मले ॥*॥ द्वे **'लोहकिट्टस्य'** ॥

सर्वं स्यात्तैजसं लोहम्

सेति ॥ तेजसो विकारः । 'तस्य विकारः' (४।३।१३४) इत्यण् । यद्वा तेजोऽस्त्यस्य । ज्योत्स्नादयण् (वा० ५।२।१०३) ॥*॥ एकं **'सर्वधातूनाम्'** ॥

विकारस्त्वयसः कुशी ।

वीति ॥ कुं भूमिं श्यति । 'शो तनूकरणे' (दि० प० अ०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति ङः । 'जानपद—' (४।१।४२) इति ङीष् । **'कुशी** फालेऽपि वल्गायां (**कुशा,** पापिष्ठमत्तयोः । **कुशो** वाच्यवदाख्यातः)' इति विश्वः । **'कुशो** रामसुते दर्भे पापिष्ठे योक्मत्तयोः । **कुशी** लोहविकारे स्यात्**कुशा** वल्गा **कुशं** जले' (इति हैमः) ॥ (१) ॥*॥ एकम् **'अयोविकारस्य'** ॥

क्षारः काचः

क्षेति ॥ क्षरति । 'क्षर संचलने' (भ्वा० प० से०) । 'ज्वलिति–' (३।१।१४०) इति णः । **'क्षारः** काचे रसे गुडे । भस्मनि धूर्ते लवणे' इति हेमचन्द्रः ॥ (१) ॥*॥ कचते । 'कच बन्धने दीप्तौ च' (भ्वा० आ० से०) । अच् (३।१।१३४) । प्रज्ञाद्यण् (५।४।३८) काचयति वा । अच् (३।१।१३४) । **'काचः** शिक्ये मणौ नेत्ररोगभेदे मृदन्तरे' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ द्वे **'काचस्य'** ॥

अथ चपलो रसः सूतश्च पारदे ॥ ९९ ॥

अथेति ॥ चोपति । 'चुप मन्दायां गतौ' (भ्वा० प० से०)। 'चुपेरचोपधायाः' (उ० १।१११) इति कलः । यद्वा चपनम् । 'चप शक्तौ' ( )। ण्यन्तः । 'एरच्' (३।३।५६)। चपं लाति । 'ला आदाने' (अ० प० अ०) । कः (३।२।३)। '**चपल**श्चोरके चले । क्षणिके चिकुरे शीघ्रे पारदे प्रस्तरान्तरे । मीने च **चपला** तु स्यात् पिप्पल्यां विद्युति श्रियाम् । पुंश्चल्यामपि' इति हेमचन्द्रः ॥ (१) ॥*॥ रस्यते । 'रस आस्वादने' चुरादयदन्तः । 'एरच्' (३।३।५६) । रसयति घातून् वा । अच् (३।१।१३४) । '**रसः** स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे । बोले रागे गृहे धातौ तिक्तादौ पारदेऽपि च । **रसा** तु रसनापाठासल्लकीक्षितिकङ्कुषु' (इति हैमः) ॥ (२) ॥*॥ शिवेन सूयते स्म । 'षू प्रसवे' (दि० आ० से०)। क्तः (३।२।१०२) । '**सूत**स्तु सारथौ तक्षिण क्षत्रियाद्ब्राह्मणीसुते । वन्दिपारदयोः पुंसि प्रसूते प्रेरिते त्रिषु' इति विश्वः (मेदिनी) ॥ (३) ॥*॥ पारं ददाति । 'डुदाञ् दाने' (जु० उ० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥*॥ 'पारते' इति पाठे पारं तनोति । 'तनु विस्तारे' (त० उ० से०)। 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । '**रसेन्द्रः** पारदः प्रोक्तः **पारतो**ऽपि निगद्यते' इति तारपालः । 'पारतस्तु मनाक्पाण्डुः सूतस्तु रहितो मलात् । पारदस्तु मनाक् शीतः सर्वे तुल्यगुणाः स्मृताः' इति शब्दार्णवः ॥ (४) ॥*॥ चत्वारि '**पारदस्य**' ॥

गवलं माहिषं शृङ्गम्

गेति ॥ अलति । 'अल भूषणादौ' (भ्वा० प० से०)। अच् (३।१।१३४)। गवामलम् । यद्वा गवनम् । 'गुङ् शब्दे' (भ्वा० आ० अ०)। 'ऋदोरप्' (३।३।५७) गवं लाति । कः (३।२।३) ॥ (१) ॥*॥ एकं '**महिषशृङ्गस्य**' ॥

अभ्रकं गिरिजामले ।

अभ्रेति ॥ अभ्रति, अभ्र्यते वा । 'अभ्र गतौ' (भ्वा० प० से०)। कुन् (उ० २।३२)। अभ्रस्य प्रतिकृतिर्वा । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् ॥ (१) ॥*॥ गिरौ जातम् । 'जनी प्रादुर्भावे' (दि० आ० से०)। 'सप्तम्यां जनेर्डः' (३।२।९७) । ('**गिरिज**ं त्वभ्रकेऽपि स्याच्छिलाजतुनि शैलजे । लोहेऽपि **गिरिजा** गौरीमातुलुङ्ग्योश्च योषिति' इति मेदिनी) ॥ (२) ॥*॥ अमति । 'अम गतौ' (भ्वा० प० से०)। वृषादित्वात् (उ० १।१०६) कलच् । न मलमस्य, इति वा । ('**अमल**ं त्वभ्रके क्लीबं लक्ष्म्यां स्त्री निर्मले त्रिषु' इति मेदिनी)। '**गिरिजं निरिजाबीजममलं** गवलध्वजम्' इति वाचस्पतिः ॥ (३) ॥*॥ त्रीणि '**अभ्रकस्य**' ॥

स्रोतोञ्जनं तु सौवीरं कापोताञ्जनयामुने ॥ १०० ॥

स्रविति ॥ अज्यते नयनमनेन । 'अञ्जू व्यक्त्यादौ' (रु० प० से०)। करणे ल्युट् (३।३।११७) । स्रोतोजमञ्जनम् । शाकपार्थिवादिः (वा० २।१।७८) ॥ (१) ॥*॥ सुवीरे देशे भवम् । तत्र 'भवः' (४।३।५३) इत्यण् । '**सौवीरं** काञ्जिके स्रोतोञ्जने च बदरीफले । ना तु नीवृति' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ कपोतस्येदम् । कपोतवर्णत्वात् । 'तस्येदम्' (४।३।१२०) इत्यण् । कापोतं च तदञ्जनं च ॥ (३) ॥*॥ यमुनायां भवम् । अण् (४।३।५३) । यद्वा यमुनाया इदम् । तद्वच्छ्यामलत्वात् ॥ (४) ॥*॥ चत्वारि '**सौवीराञ्जनस्य**' '**सुर्मा**' इति ख्यातस्य ॥

तुत्थाञ्जनं शिखिग्रीवं वितुन्नकमयूरके ।

त्विति ॥ तुत्थयति, तुत्थ्यते, वा । 'तुत्थ आवरणे' ( )। पचाद्यच् (३।१।१३४)। 'एरच्' (३।३।५६) वा । तुत्थं च तदञ्जनं च ॥ (१) ॥*॥ शिखिनो ग्रीवा । शिखिग्रीवास्यास्ति । अर्शआद्यच् (५।२।१२७) तद्वद्वर्णत्वात् ॥ (२) ॥*॥ वितुद्यते स्म । 'तुद व्यथने' (तु० उ० अ०) । क्तः (३।२।१०२)। स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (३) ॥*॥ मयूरस्य प्रतिकृतिः । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् । मयूरं कायति वा । सादृश्यात् । 'कै शब्दे' (भ्वा० प० अ०) । कः (३।२।३) ॥ (४) ॥*॥ चत्वारि '**तुत्थाञ्जनस्य**', '**तूतिया**' इति ख्यातस्य ॥

कर्परी दार्विका काथोद्भवं तुत्थम्

केति ॥ कल्पते । 'कृपू सामर्थ्ये' (भ्वा० आ० से०) । बाहुलकादरट् लत्वाभावश्च ॥ (१) ॥*॥ दार्वी दारुहरिद्रा । तद्विकारोऽपि दार्वी अभेदोपचारात् । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ तत्तुत्थं काथोद्भवमावर्तितं सदुक्तपर्यायम् ॥*॥ तुत्थं चास्य नाम । '**तुत्थं स्यादमृतासङ्गं** कर्परी **तुन्न**मित्यपि' इति रभसः ॥ (३) ॥*॥ त्रीणि '**आवर्तननिष्पन्नस्य रसाञ्जनभेदस्य**' ॥

रसाञ्जनम् ॥ १०१ ॥

रसगर्भं तार्क्ष्यशैलम्

रेति ॥ रसजमञ्जनम् । शाकपार्थिवादिः (वा० २।१।७८) ॥ (२) ॥*॥ रसो गर्भेऽस्य ॥ (२) ॥*॥ तार्क्ष्यशैले भवम् । अभेदोपचारात्, इति मुकुटः ॥ (३) ॥*॥ त्रीणि '**रसाञ्जनस्य**' । स्वामी तु—तुत्थाञ्जनादि पञ्च पर्यायानुक्त्वा दार्विकाकाथोद्भवादिपञ्चकं रसवतीपर्यायानाह ॥

१—रसः प्रायेण महिषशृङ्गे स्याप्यतेऽतो रसानन्तरमस्य कथनम्—इति मुकुटः ॥ २—'**गिरिजामलम्**—' इत्येकं नाम—इति स्वामिमुकुटौ ॥

१—स्वामी तु तुत्थाञ्जनादिपञ्चकं कर्पर्यन्तं तुत्थाञ्जनपर्यायमुक्त्वा दार्विकाकाथोद्भवे तुत्थरसाञ्जनादित्रयमाह—इति मुकुटः ॥

गन्धाश्मनि तु गन्धकः ।
सौगन्धिकश्च

गेति ॥ गन्धयुक्तोऽश्मा । शाकपार्थिवादिः (वा० २।१।७८) ॥ (१) ॥*॥ गन्धोऽस्यास्ति । अर्शआद्यच् (५।२।१२७) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥*॥ **'गन्धिकः'** इति पाठे 'अत इनिठनौ' (५।२।११५) इति ठन् ॥ (२) ॥*॥ शोभनो गन्धोऽस्य । विनयादित्वात् (५।४।३४) स्वार्थे ठक् ॥*॥ 'आमोदलेशयोर्गन्धः स **सुगन्धः सुगन्धकः**' इति रभसः ॥ (३) ॥*॥ त्रीणि **'रसाञ्जनस्य'** ॥

चक्षुष्याकुलाल्यौ तु कुलत्थिका ॥ १०२ ॥

चेति ॥ चक्षुषे हिता । 'शरीरावयवाद्यत्' (५।१।६) । **'चक्षुष्यः** केतके पुण्डरीकसंज्ञकपादपे । कुलत्थिकासुभगयोः स्त्रियामक्षिहितेऽन्यवत्' (इति मेदिनी) ॥ (१) ॥*॥ कुलमलति । 'अल भूषणादौ' (भ्वा० प० से०) ।—'कर्मण्यण्' (३।२।१) । ङीप् (४।१।१५) । 'चक्षुष्या **कुम्भकारी** च कुलाली च कुलत्थिका' इति रत्नकोषः ॥ (२) ॥*॥ कुलत्थप्रतिकृतिः । 'इवे–' (५।३।९६) इति कन् । यद्वा कुले तिष्ठति । 'सुपि–' (३।२।४) इति कः । स्वार्थे कन् (ज्ञापि० ५।४।५) पृषोदरादिः (६।३।१०९) ॥ (३) ॥*॥ त्रीणि **'तुत्थविशेषस्य'** ॥

रीतिपुष्पं पुष्पकेतु पौष्पकं कुसुमाञ्जनम् ।

रीति ॥ रीतेः पित्तलस्य पुष्पमिव । तन्मलत्वात् ॥ (१) ॥*॥ पुष्पस्य केतुरिव । नाशकत्वात् । 'उदन्तनपुंसकेषु पुष्पकेतु कुसुमाञ्जनम्' इति रुद्रः ॥ (२) ॥*॥ पुष्पस्य प्रतिकृतिः 'इवे–' (५।३।९६) इति कन् । ततः स्वार्थेऽण् (५।४।३८) ॥ (३) ॥*॥ कुसुममिव, कुसुमनाशकं वा अञ्जनम् ॥ (४) ॥*॥ चत्वारि **'रीतिकायां ध्यायमानायां जातस्य मलस्य'** ॥

पिञ्जरं पीतनं तालमालं च हरितालके ॥ १०३ ॥

पीति ॥ पिञ्जनम् । 'पिजि वर्णे' (अ० आ० से०) । घञ् (३।३।१८) । 'निष्ठायामनिटः' (वा० ७।३।५३) इति वचनान्न कुत्वम् । पिञ्जं वर्णविशेषं राति । कः (३।२।३) । **'पिञ्जरोऽभ्रान्तरे** पीते क्लीबं स्वर्णे च पीतने' ॥ (१) ॥*॥ पीतं वर्णं नयते । 'णय गतौ' (भ्वा० आ० से०) । 'णीञ्' (भ्वा० उ० अ०) वा । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । **'पीतनं** पीतदारुणि । कुङ्कुमे हरितालके च (पुमानाम्रातके मतः)' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ तालयति, तल्यते वा । 'तल प्रतिष्ठायाम्' (चु० प० से०) । ण्यन्तः । अच् (३।१।१३४, ३।३।५६) । **'तालः** कालक्रियामाने हस्तमानद्वयेदयोः । करास्फोटे करतले हरितालेऽस्त्रयोरपि' (इति हैमः) । **'तालः** करतलेऽङ्गुष्ठमध्यमाभ्यां च **संमिते** । गीतकालक्रियामाने करस्फाले द्रुमान्तरे । वाद्यभाण्डे च कांस्यस्य त्सरौ **तालौ** जटौषधौ । क्लीबं तु हरितालेऽस्यात्' इति विश्वः (मेदिनी) ॥ (३) ॥*॥ आलयति । **'अल** भूषणादौ' (भ्वा० प० से०) । अच् (३।१।१३४) । आलाति वा । 'ला आदाने' (अ० प० अ०) । 'आतश्चोपसर्गे' (३।१।१३६) इति कः । **'आलं** स्यादनल्पहरितालयोः' इति हेमचन्द्रः ॥ (४) ॥*॥ हरितं वर्णमालाति । 'आतोऽनुप–' (३।२।३) इति कः । स्वार्थे कन् (ज्ञापि० ५।४।५) । **'हरितालमलं तालवर्णकं नटभूषणम्'** इति माधवः । 'हरितालेतु **कर्बूरं गोदन्तो नट**संज्ञकः' इति त्रिकाण्डशेषः ॥ (५) ॥*॥ पञ्च **'हरितालस्य'** ॥

गैरेयमर्थ्यं गिरिजमश्मजं च शिलाजतु ।

गैरयिति ॥ गिरौ भवम् । **'नद्यादिभ्यः'** (४।२।९७) इति ढक् ॥ (१) ॥*॥ अर्थ्यते । 'अर्थ उपयाच्ञायाम्' (चु० आ० से०) ण्यन्तः । 'अचो यत्' (३।१।९७) । अर्थादनपेतम्, वा । 'धर्मपथ्य–' (४।४।९२) इति यत् । **'अर्थ्यो** विपश्चिति न्याय्ये त्रिष्वर्थ्यं तु शिलाजतु' इति यान्ते रुद्रः ॥ (२) ॥*॥ गिरेर्जातम् 'जनी प्रादुर्भावे' (दि० आ० से०) । 'पञ्चम्यामजातौ' (३।२।९८) इति डः । **'गिरिजं** लभ्रकेऽपि स्याच्छिलाजतुनि शैलजे । लोहेऽपि **गिरिजा** गौरीमातुलुङ्ग्योश्च योषिति' (इति मेदिनी) ॥ (३) ॥*॥ अश्मनो जातम् ॥ (४) ॥*॥ शिलाया जत्विव । षष्ठीतत्पुरुषः ॥ (५) ॥*॥ पञ्च **'शिलाजतुनः'** ॥

बोलगन्धरसप्राणपिण्डगोपरसाः समाः ॥ १०४ ॥

बोलेति ॥ बोलयति । 'बुल मज्जने' (चु० प० से०) अच् (३।१।१३४) । वाति, वा । 'वा गतिगन्धनयोः' (अ० प० अ०) । पिज्ञादित्वात् (उ० ४।९०) ऊलच् ॥ (१) ॥*॥ गन्धवान् रसोऽस्य ॥*॥ राजदन्तादित्वात् (२।२।३१) **'रसगन्धः'** अपि—इति स्वामी ॥ (२) ॥*॥ प्राणिति, अनेन वा । 'अन प्राणने' (अ० प० से०) । अच् (३।१।१३४) । 'हलश्च' (३।३।१२१) इति घञ् वा । **'प्राणो** हन्मारुते बोले काव्यजीवेऽनिले बले । पुंलिङ्गः पूरिते वाच्यलिङ्गः पुंभूम्नि चासुषु' (इति मेदिनी) ॥ (३) ॥*॥ पिण्डते । 'पिडि संघाते' (भ्वा० आ० से०) । अच् (३।१।१३४) । **'पिण्डो** वृन्दे जपापुष्पे गोले बोलेऽङ्गसिह्वयोः । कवले **पिण्डं** तु वेश्मैकदेशे जीवनायसोः । बले सान्द्रे **पिण्डखर्ल**बूखर्जूर्योस्तगरेऽपि च' इति हेमचन्द्रः ॥ (४) ॥*॥ गां जलं स्यति । 'षोऽन्त-

---

१—अत्राङ् उपसर्गस्य सत्त्वेनानुपसर्गपदघटितसूत्रस्याप्राप्त्या तदुपन्यासो भ्रान्तिमूलकः । अत एवैतज्जनकेनापि सिद्धान्तकौमुद्यां 'अनुपसर्गे किम् । गोसंदायः' इत्युक्तम् । तस्मात् 'मूलविभुजादित्वात्कः' इति व्याख्येयम् । यद्वा हरितमलति । 'कर्मण्यण्' (३।२।१) इत्यण् इति बोध्यम् ॥

कर्मणि' (दि० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । गोसः—इति मुकुटः ॥*॥ **'गोपः'** इति स्वामी । गो-र्जलात् पाति । 'पा रक्षणे' (अ० प० अ०) । 'सुपि' (३।२।४) इति कः ॥ (५) ॥*॥ रसयति, रस्यते, अनेन वा । 'रस आस्वादने' (चु० उ० से०) । अच् (३।१।१३४) ॥*॥ गोपे उत्पत्तौ रसोऽस्य । **'गोपरसः'** इति समस्तमपि—इति स्वामी ॥ (६) ॥*॥ षट् **'गन्धरसस्य' 'वोर'** इति ख्यातस्य ॥

हिण्डीरोऽब्धिकफः फेनः

हीति ॥ 'हिण्डी' इति 'हिण्डी' इति वा शब्दमीरयति 'ईर गतौ कम्पने च' (अ० आ० से०) । अच् (३।३।१३४) । अण् (३।२।१) वा । हादिः ॥*॥ **(डिण्डीरः)** । डादिर्वा पाठः ॥ (१) ॥*॥ अब्धेः कफ इव ॥ (२) ॥*॥ स्फायते । 'स्फायी वृद्धौ' (भ्वा० आ० से०) । 'फेनमीनौ' (उ० ३।३) इति साधुः ॥ (३) ॥*॥ त्रीणि **'समुद्रफेनस्य'** ॥

सिन्दूरं नागसंभवम् ।

सीति ॥ स्यन्दते । 'स्यन्दू प्रस्रवणे' (भ्वा० आ० से०) । 'स्यन्देः संप्रसारणं च' (उ० १।६८) इत्यूरन् ।–'खर्जादिखादूरः' बाहुलकात्संप्रसारणं च—इति मुकुटोऽपाणिनीयः । **'सिन्दूर**स्तरुभेदे **स्यात्सिन्दूरं** रक्तचूर्णके । **सिन्दूरी** रोचनारक्तचेलिकाधातकीषु च' (इति मेदिनी) ॥ (१) ॥*॥ नागं सीसं संभवः (उत्पत्तिस्थानम्) अस्य ॥ (२) ॥*॥ द्वे **'सिन्दूरस्य'** ॥

नागसीसकयोगेष्टवप्राणि

नेति ॥ नगे भवः । 'तत्र भवः' (४।३।५३) इत्यण् । **'नागं** नपुंसकं रङ्गे सीसके करणान्तरे । **नागः** पन्नगमातङ्गकुराचारिषु तोयदे । नागकेसरपुंनाग (नागदन्तप्रभेदके । 'देहानिलप्रभेदे च श्रेष्ठे स्यादुत्तरस्थितः' इति मेदिनी) ॥ (१) ॥*॥ सिनोति । 'षिञ् बन्धने' (स्वा० उ० अ०) । क्विप् (३।२।१७८) । अनित्यत्वान्न तुक् । ईस्यति । 'षोऽन्तकर्मणि' (दि० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । सिच तदीसं च । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ योगे धातुसंबन्धे इष्टम् । 'सप्तमी–' (२।१।४०) इति समासः ॥ (३) ॥*॥ उप्यते । 'डुवप् बीजसंताने' (भ्वा० उ० अ०) । 'वृधिवपिभ्यां रन्' (उ० २।२७) ॥*॥ **'वर्ध्र'** इति मुकुटः । वर्धते । 'वृधु वर्धने' (भ्वा० आ० से०) । रन् (उ० २।२७) । **('वर्ध्रः** सीसवरत्रयोः' इति हैमः) ॥ (४) ॥*॥ चत्वारि **'सीसस्य' 'सीसो'** इति ख्यातस्य ॥

त्रपु पिच्चटम् ॥ १०५ ॥

रङ्गवङ्गे

त्रेति ॥ त्रपते । 'त्रपूष् लज्जायाम्' (भ्वा० आ० से०) । 'शस्त्वलिहि–' (उ० १।१०) इत्युः । **'रङ्गसीसकयोस्त्रपुः'**

इति रुद्रः ॥ (१) ॥*॥ पिच्चयति, पिच्चते वा । 'पिच्च छेदने' (भ्वा०) । अच् (३।१।१३४) पिच्चं टौकते । 'टौक्ट गतौ' (भ्वा० आ० से०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । पिच्चयति । 'शकादिभ्योऽटन्' (उ० ४-८१) वा । **'पिच्चटो** नेत्ररोगे स्यात्क्लीबं सीसकरङ्गयोः' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ रङ्गति । 'रगि गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) । **('रङ्गो** ना रागे नृत्यरणक्षितौ । अस्त्री त्रपुणि' इति मेदिनी) ॥ (३) ॥*॥ वङ्गति । 'वगि गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) । **'वङ्गं** सीसकरङ्गयोः । वार्ताकेऽपि च कार्पासे पुंभूम्नि नीवृदन्तरे' इति मेदिनी) । **'वङ्गः** कार्पासे वृन्ताके **वङ्गा** जनपदान्तरे । वङ्गं त्रपुणि सीसे च' इति हैमः ॥ (४) ॥*॥ चत्वारि **'वङ्गस्य' 'राँग'** इति ख्यातस्य ॥

अथ पिचुस्तूलः

अथेति ॥ पिचति । 'पिचु मर्दने' ( ) पचति वा । मृगय्वादिः (उ० १।३७) । **'पिचु**र्ना कुष्ठभेदे च कर्षे तूलेऽसुरान्तरे' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ तूलयति । तूल्यते, वा । 'तूल निष्कर्षे' (भ्वा० प० से०) 'इगुपध–' (३।१।१३५) इति कः । घञ् (३।३।१९) वा । **'तूलं** स्याद्भ्रमदारुणि । आकाशेऽथ पिचौ न स्त्री' इति विश्वः (मेदिनी) ॥*॥ **'पिचुतूलः'** इति रभसात्संघातोऽपि ॥ (२) ॥*॥ द्वे **'कार्पासस्य' 'रूई'** इति ख्यातस्य ॥

अथ कमलोत्तरम् ।

स्यात्कुसुम्भं वह्निशिखं महारजनमित्यपि ॥ १०६ ॥

अथेति ॥ कमलादुत्तरम् ॥ (१) ॥*॥ कुस्यति । 'कुस संश्लेषणे' (दि० प० से) । 'कुसेरुम्भोमेदेताः' (उ० ४।१०६) इत्युम्भः । बाहुलकान्न गुणः । **'कुसुम्भं** हेमनि महारजने ना कमण्डलौ' (इति मेदिनी) ॥ (२) ॥*॥ वह्निवत् शिखास्य ॥ (३) ॥*॥ रज्यतेऽनेन । ल्युट् (३।३।११५) । 'रजकरजनरजःसूपसंख्यानम्' (वा० ६।४।२४) इति नलोपः । 'रञ्जेः कुन्' (उ० २।७९) वा । महच्च तद्रजनं च । 'सन्महत्–' (२।१।६१) इति समासः । **'महारजन**मुद्दिष्टं शातकुम्भकुसुम्भयोः' (इति मेदिनी) ॥ (४) ॥*॥ चत्वारि **'कुसुम्भस्य' 'कुसुम्भ'** इति ख्यातस्य ॥

मेषकम्बल ऊर्णायुः

मेषेति ॥ मेषलोमकृतः कम्बलः । शाकपार्थिवादिः (वा० २।१।७८) ॥ (१) ॥*॥ ऊर्णास्यास्ति । 'ऊर्णाया युस्' (५।२।१२३) । **'ऊर्णायुर्ना** क्षणाभङ्गे मेषकम्बलमेषयोः' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ द्वे **'कम्बलस्य'** ॥

१—अत्र 'रङ्गः' इति पाठः प्रामादिकः । रङ्गार्थकथने उद्देश्यतावच्छेदकविधेययोरैक्येन शाब्दबोधाजनकत्वात् । वार्ताकादिवाचकत्वाभावाच्च । मूलपुस्तके तथा पाठस्यानुपलम्भाच्च ॥

शशोर्णं शशलोमनि ।

शेति ॥ शशस्य ऊर्णा । 'शशोर्णं कारणं करम्' इति चन्द्रगोमिलिङ्गानुशासनात् क्लीबलम् ॥ (१) ॥*॥ शशस्य लोम ॥ (२) ॥*॥ द्वे **'शशलोम्नः'** ॥

मधु क्षौद्रं माक्षिकादि

मेति ॥ मन्यते । 'मन ज्ञाने' (दि० आ० अ०) । 'फलिपाटि–' (उ० १।१८) इति साधु । **'मधु** पुष्परसे क्षौद्रे मद्ये ना तु मधुद्रुमे । वसन्तदैत्यभिक्षैत्रे स्याज्जीवन्त्यां तु योषिति' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ क्षुद्राभिर्मक्षिकाभिः कृतम् । 'क्षुद्राभ्रमर–' (४।३।११९) इत्यञ् । **'क्षौद्रं** तु मधुनीरयोः' इति हेमचन्द्रः ॥ (२) ॥*॥ मक्षिकाभिः कृतम् । 'संज्ञायाम्' (४।३।११७) इत्यण् ॥ (३) ॥*॥ आदिना **भ्रामर-वाटक-पौतिका**दिग्रहः ॥*॥ त्रीणि **'मधुनः'** ॥

मधूच्छिष्टं तु सिक्थकम् ॥ १०७ ॥

मेति ॥ मधुन उच्छिष्टम् ॥ (१) ॥*॥ सिञ्चति, सिच्यते, वा । 'षिच क्षरणे' (तु० उ० अ०) 'पातॄतुदिवचिरिचिसिचिभ्यस्थक्' (उ० १।२।७) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ द्वे **'मधूच्छिष्टस्य' 'मोम'** इति ख्यातस्य ॥

मनःशिला मनोगुप्ता मानोह्वा नागजिह्विका ।
नैपाली कुनटी गोला

मेति ॥ मनःशब्दवाच्या शिला । शाकपार्थिवादिः (वा० २।१।७८) ॥ (१) ॥*॥ मनसा गुप्ता । 'कर्तृकरणे' (२।१।३२) इति समासः ॥ (२) ॥*॥ मनःशब्देन ह्यते कथ्यते । ह्वेञ् (भ्वा० उ० से०) । 'ऑतश्चोपसर्गे' (३।३।१०६) इत्यङ् ॥ (३) ॥*॥ नागानां जिह्वेव । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (४) ॥*॥ नेपाले भवा । 'तत्र भवः' (४।३।५३) इत्यण् । **'नैपाली** नवमालीमनःशिलासुवहासु च' इति विश्वः ॥ (५) ॥*॥ कौ नटति । 'नट अवस्यन्दने' (चु० प० से०) । अच् (३।१।१३४) । गौरादिः (४।१।४१) । यद्वा कुत्सिता नटीव ॥ (६) ॥*॥ गां दीप्तिं लाति । कः (३।२।३) । गुड्यते वा । 'गुड वेष्टने' (तु० प० से०) । घञ् (३।३।१९) । डलयोरैक्यम् । **'गोला** गोदावरीसख्योः कुनटीदुर्गयोः स्त्रियाम् । पात्राञ्जने मण्डने चालिञ्जरे वालखेलने' +**'चेला** लक्ष्म्यां पुमान् कम्पे कम्पयुक्तेऽभिधेयवत्–' (इति मेदिनी) ॥ (७) ॥*॥ सप्त **'मनःशिलायाः'** ॥

यवक्षारो यवाग्रजः ॥ १०८ ॥

पाक्यः

येति ॥ यवानां क्षारः ॥ (१) ॥*॥ यवाग्राज्जायते स्म । 'पञ्चम्याम्–' (३।२।९८) इति डः ॥ (२) ॥*॥ पाके साधुः 'तत्र साधुः' (४।४।९८) इति यत् ॥ (३) ॥*॥ त्रीणि **'यवक्षारस्य'** ॥

अथ स्वर्जिकाक्षारः कापोतः सुखवर्चकः ।
सौवर्चलं स्याद्रुचकम्

अथेति ॥ स्वर्जिकारसजः क्षारः । शाकपार्थिवादिः (वा० २।१।७८) ॥ (१) ॥*॥ कपोतवर्णोऽस्यास्ति । ज्योत्स्नादित्वात् (वा० ५।२।१०३) अण् ॥ (२) ॥*॥ सुखं वर्चयति । 'वर्चे दीप्तौ' (भ्वा० आ० से०) । क्नुन् (उ० २।३२) ॥ (३) ॥*॥ सुवर्चलाया इदम् । 'तस्येदम्' (४।३।१२०) इत्यण् । 'अथ **सौवर्चलं** सर्जक्षारे च लवणान्तरे' (इति मेदिनी) ॥ (४) ॥*॥ रोचतेऽनेन । 'रुच दीप्तावभिप्रीतौ च' (भ्वा० आ० से०) । क्नुन् (उ० २।३२) । **'रुचको** बीजपूरे च निष्के दन्तकपोतयोः । न द्वयोः सर्जिकाक्षारेऽप्यश्वाभरणमाल्ययोः । सौवर्चलेऽपि मङ्गल्यद्रव्येऽपि कटकेऽपि च' (इति मेदिनी) ॥ (५) ॥*॥ पञ्च **'क्षारभेदस्य' 'साजीक्षार'** इति ख्यातस्य ॥

त्वक्क्षीरी वंशरोचना ॥१०९॥

त्वेति ॥ त्वचो वंशात् क्षीरमस्याः । गौरादिः (४।१।४१) ॥ (१) ॥*॥ रोचते । नन्द्यादिः (३।१।१३४) वंशस्य रोचना । 'स्याद्वंशरोचना **वांशी तुकाक्षीरी तुकाशुभा) । त्वक्क्षीरी वंशजा शुभ्रा वंशक्षीरी** तु **वैणवी'** इति शाश्वतः ॥ (२) ॥*॥ द्वे **'वेणुजन्यस्यौषधिविशेषस्य'** ॥

शिग्रुजं श्वेतमरिचम्

शीति ॥ शिग्रोर्जायते स्म । 'पञ्चम्याम्' (३।३।९८) इति डः ॥ (१) ॥*॥ श्वेतं मरिचमिव ॥ (२) ॥*॥ द्वे **'शोभाञ्जनबीजस्य'** ॥

मोरटं मूलमैक्षवम् ।

मोरेति ॥ मुरति । 'मुर वेष्टने' (तु० प० से०) 'शकादिभ्योऽटन्' (उ० ४।८१) ॥ (१) ॥*॥ इक्षोरिदम् ॥*॥ एकम् **'इक्षुविकारस्य'** ॥

ग्रन्थिकं पिप्पलीमूलं चटकाशिर इत्यपि ॥ ११० ॥

ग्रेति ॥ ग्रन्थेः प्रतिकृतिः । 'इवे–' (५।३।९६) इति कन् । **'ग्रन्थिकं** पिप्पलीमूले गुग्गुलुग्रन्थिपर्णयोः । करीरे पुंसि दैवज्ञे सहदेवाख्यपाण्डवे' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ पिप्पल्या मूलम् ॥ (२) ॥*॥ चटकायाः शिर इव ॥*॥ 'शिरः' अपि । **'शिरो** ना पिप्पलीमूले' इति रभसः । (**'शिरो** ना पिप्पलीमूले स्याद्धमन्यां च योषिति' इति रान्ते मेदिनी) ॥ (३) ॥*॥ त्रीणि **'पिप्पलीमूलस्य'** ॥

१—इदमसंगतम् । अत्रोपसर्गाभावेनैतत्सूत्रानाप्तेः । तस्मात् 'कृतो बहुलम्' (वा० ३।३।११३) इति न्यासे 'सुपि' (३।२।४) इति योगविभागेन के प्राप्ते 'कविधौ संप्रसारणिभ्यो डः' (वा० ३।२।३) इति डप्रत्ययो बोध्यः ॥ २—अत्र 'चलम्' इत्यस्य स्थाने 'त्र्योः' इति पाठं कल्पयित्वा अत्र पाठः प्रामादिकः मूले हैमविश्वश्च लक्ष्म्यादीनां गोलाशब्दार्थेऽनुपलम्भात् । किंतु मूलानुसारेण लशब्दार्थकथनम् ॥

गोलोमी भूतकेशो ना

गवि॑ति ॥ गोलोन्नामियम् । अण् (४।३।१२०) । संज्ञापूर्वकत्वाद्वृद्ध्यभावोऽपि । **'गोलोमी** श्वेतदूर्वायां स्याद्वचाभूतकेशयोः' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ भूतानां केश इव । भूतः केशोऽस्य वा ॥ (२) ॥*॥ द्वे **'भूतकेशस्य'** ॥

पत्राङ्गं रक्तचन्दनम् ।

पेति ॥ पत्राण्यङ्गेऽस्य । **'पत्राङ्गं** न द्वयोर्भूर्जे पद्मके रक्तचन्दने' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ रक्तं चन्दनमिव । रक्तसारत्वात् ॥ (२) ॥*॥ द्वे **'रक्तसारद्रव्यस्य' 'पतङ्ग'** इति ख्यातस्य ॥

त्रिकटु ऽ्यूषणं व्योषम्

त्री॑ति ॥ त्रयाणां कटूनां समाहारः ॥ (१) ॥*॥ ऊषति । 'उष दाहे' (भ्वा० प० से०) । ल्युट् (३।१।१३४) । त्रयाणां भूषणानां समाहारः । पात्रादिः (वा० २।४।३१) ॥ (२) ॥*॥ विशेषेण ओषति । 'उष दाहे' । (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (३) ॥*॥ त्रीणि **'शुण्ठीपिप्पलीमरीचानां समाहारस्य'** ॥

त्रिफला तु फलत्रिकम् ॥११॥

त्री॑ति ॥ त्रयाणां फलानां समाहारः अजादिः (४।१।४) ॥*॥ तृफति । 'तृफ तृप्तौ' (तु० प० से०) ।-'तृफश्च' (उ० १।१०४) इति कलः । 'त्रिफला **तृफला**पि च' इति त्रिकाण्डशेषः ॥ (१) ॥*॥ फलानां त्रिकम् ॥ (२) ॥*॥ द्वे **'हरीतक्यामलकविभीतकफलानां समाहारस्य'** ॥

॥ इति वैश्यवर्गविवरणम् ॥

शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः ।

श्वि॑ति ॥ शोचति । 'शुच शोके' (भ्वा० प० से०) । 'शुचेर्दश्च' (उ० २।१९) इति रक् दीर्घश्च ।—'शदे रक् चात ऊत्वं च'—इति सुभूतिरपाणिनीयः ॥ (१) ॥*॥ अवरोऽधमो वार्णोऽस्य । अवरश्चासौ वर्णश्च, इति वा ॥ (२) ॥*॥ वृष्यते, वर्षति वा । 'वृषु सेचने' (भ्वा० प० से०) । 'वृषादिभ्यश्च' (उ० १।१०६) इति कलच् । वृषं धर्मं लुनाति वा 'लूञ् छेदने' (क्या० उ० से०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०) इति डः । वृषं लाति वा । कः (३।२।३) ॥ (३) ॥*॥ जघन्यात् पादाज्जाताः । 'जनी प्रादुर्भावे' (दि० आ० से०) । 'पद्भ्याम्–' (३।२।९८) इति डः । **'जघन्यं** मेहने क्लीबे चरमे गर्हितेऽन्यवत्' (इति मेदिनी) ॥ (४) ॥*॥ चत्वारि **'शूद्रस्य'** ॥

आचाण्डालात्तु संकीर्णा अम्बष्ठकरणादयः ॥ १ ॥

आचे॑ति ॥ संकीर्यते स्म । 'कॄ विक्षेपे' (तु० प० से०) । क्तः (३।२।१०२) । 'ॠत इद्धातोः' (७।१।१००) 'रदाभ्याम्–' (८।२।४२) इति नत्वम् ॥ (१) ॥*॥ अम्बष्ठश्च करणश्च । अम्बष्ठकरणावादी येषां ते । आदिना उग्रादिग्रहः ॥*॥ एकम् **'संकराणाम्'** ॥

शूद्राविशोस्तु करणः

श्वि॑ति ॥ शूद्रा च विट् च । तयोः सुतः ॥*॥ किरति, कीर्यते, वा । 'कॄ' (तु० प० से०) । 'बहुलमन्यत्रापि' (उ० २७८) इति मुच् । 'कृत्यल्युटः–' (३।३।११३) इति वा । **'करणं** हेतुकर्मणोः । वालवादौ हसे लेपे नृत्यगीतप्रभेदयोः । क्रियाभेदेन्द्रियक्षेत्रकायसंवेशनेषु च । कायस्थे साधने क्लीबं पुंसि शूद्राविशोः सुते' इति विश्वः ॥ (१) ॥*॥ एकं **'वैश्यात्क्षुद्रायां जातस्य'** ॥

अम्बष्ठो वैश्याद्विजन्मनोः ।

अम्बे॑ति ॥ वैश्या च द्विजन्मा च । तयोः सुतः ॥*॥ अम्बे तिष्ठति । 'ष्ठा' (भ्वा० प० अ०) । 'सुपि–' (३।२।४) इति कः । 'अम्बाम्ब–' (८।३।९७) इति षत्वम् । **'अम्बष्ठो** देशभेदेऽपि विप्राद्वैश्यासुतेऽपि च । **अम्बष्ठा**प्यम्ललोण्यां स्यात्पाठायूथिकयोरपि' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ एकम् **'वैश्याब्राह्मणाभ्यामुत्पन्नस्य'** ॥

शूद्राक्षत्रिययोरुग्रः

श्वि॑ति ॥ शूद्रा च क्षत्रियश्च । तयोः सुतः ॥*॥ उच्यति । 'उच समवाये' (दि० प० से०) । ऋज्रेन्द्र– (उ० २।२८) इति निपातनात्साधुः । **'उग्रः** शूद्रासुते क्षत्राद्वदे पुंसि त्रिषूत्कटे । स्त्री वचाक्षुतयोः' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'शूद्राक्षत्रियाभ्यामुत्पन्नस्य'** ॥

मागधः क्षत्रियाविशोः ॥ २ ॥

मे॑ति ॥ क्षत्रिया च विट् च । तयोः सुतः ॥*॥ मगध्यति । 'मगध वेष्टने' कण्ड्वादिः । अच् (३।१।१३४) । 'यस्य हलः' (६।४।४९) इति यलोपः । प्रज्ञादिण् (५।४।३८) । **'मागधो** मगधोद्भूते शुक्लजीरकवन्दिनोः । वैश्यतः क्षत्रियापुत्रे **मागधी** स्यात्तु पिप्पली । यूथी भाषाविशेषश्च' इति हेमचन्द्रः ॥ (१) ॥*॥ एकम् **'क्षत्रियावैश्याभ्यामुत्पन्नस्य'** ॥

माहिष्योऽर्याक्षत्रिययोः

मे॑ति ॥ अर्या च क्षत्रियश्च तयोः सुतः ॥*॥ **महिष्यां** साधुः । 'तत्र साधुः' । (४।४।९८) इति यत् । स्वार्थेऽण् (२।४।३८) । यद्वा मह्यते, महति वा । 'मह पूजायाम्' (भ्वा० प० से०) 'अविमह्योष्टिषच्' (उ० १।४५) । चतुर्वर्णादित्वात् (वा० ५।१।१२४) स्वार्थे ष्यञ् ॥ (१) ॥*॥ एकम् **'वैश्याक्षत्रियाभ्यां जनितस्य'** ॥

क्षत्तार्याशूद्रयोः सुतः ।

क्षे॑ति ॥ अर्या च शूद्रश्च । तयोः सुतः ॥*॥ क्षदति, क्षद्यते, वा । 'क्षद संभृतौ' ( ) । '–शंसिक्षदादिभ्यः–'

(उ० २।९४) इति तृच् । **'क्षत्ता** शूद्रात्क्षत्रियाजे प्रतीहारे च सारथौ । भुजिष्यातनयेऽपि स्यान्नियुक्तवेधसोः पुमान्' (इति मेदिनी) ॥ (१) ॥*॥ अर्या स्वामिनी । सा च क्षत्रिया योग्यत्वात् । तेन 'क्षत्रियायां च शूद्रजे' इत्यनेनाविरोधः ॥*॥ एकम् **'अर्याशूद्राभ्यामुत्पन्नस्य'** ॥

ब्राह्मण्यां क्षत्रियात्सूतः

ब्रेति ॥ सूयते स्म । 'षूङ् प्रसवे' (दि० आ० से०) । क्तः (३।४।७२) । **'सूतः** पारदसारथ्योः प्रसूतेरितबन्दिषु । ब्राह्मण्यां क्षत्रियाज्जाते तक्षिण' इति हैमः ॥ (१) ॥*॥ एकम् **'ब्राह्मण्यां क्षत्रियाज्जातस्य'** ॥

तस्यां वैदेहको विशः ॥ ३ ॥

तेति ॥ विदेहेषु भवः । 'तत्र भवः' (४।३।५३) इत्यण् । विदेहस्यापत्यम् । 'जनपद–' (४।१।१६८) इत्यञ् । स्वार्थे कन् (ज्ञापि० ५।४।५) । **'वैदेहको** वाणिजके शूद्राद्वैश्यासुतेऽपि च' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ एकम् **'ब्राह्मण्यां वैश्याज्जातस्य'** ॥

रथकारस्तु माहिष्यात्करण्यां यस्य संभवः ।

रेति ॥ माहिष्याद्वैश्याक्षत्रियसुतात् करण्यां शूद्रायां वैश्यादुत्पन्नायाम् ॥*॥ रथं करोति । 'कृञ्' (त० उ० अ०) । 'कर्मण्यण्' (३।२।१) । **'रथकारस्तु** माहिष्यात् करणी च तक्षणि' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'करण्यां माहिष्यादुत्पन्नस्य'** ॥

स्याच्चण्डालस्तु जनितो ब्राह्मण्यां वृषलेन यः ॥ ४ ॥

स्येति ॥ चण्डति । 'चडि कोपे' (भ्वा० प० से०) 'पतिचण्डिभ्यामालच्' (उ० १।११७) ॥ (१) ॥*॥ प्रत्येकमेकैकं **'(संकरविशेषाणाम्)'** ॥

कारुः शिल्पी

केति ॥ करोति । 'कृवापा–' (उ० १।१) इत्युण् । **'कारुस्तु** कारके शिल्पे विश्वकर्मणि शिल्पिनि' इति हेमचन्द्रः ॥ (१) ॥*॥ शिल्पमस्यास्ति । 'अत–' (५।२।११५) इतीनिः । **'शिल्पी** तु वाच्यवत्कारौ स्त्रियां कोलदलौषधौ' (इति मेदिनी) ॥ (१) ॥*॥ 'तक्षा च तन्तुवायश्च नापितो रजकस्तथा । पञ्चमश्चर्मकारश्च कारवः शिल्पिनो मताः' ॥*॥ द्वे **'चित्रकारादेः'** ॥

संहतैस्तैर्द्वयोः श्रेणिः सजातिभिः ।

समिति ॥ श्रयति, श्रीयते, वा 'श्रिञ् सेवायाम्' (भ्वा० उ० से०) । 'वहिश्रिश्रुयु–' (उ० ४।५१) इति निः । **'श्रेणिः** स्त्रीपुंसयोः पङ्क्तौ समानशिल्पिसंहतौ' (इति मेदिनी) ॥ (१) ॥*॥ एकं **'सजातीयशिल्पिसंघस्य'** ॥

१ 'वैश्यान्मागधवैदेहौ राजविप्राङ्गनासु च' (१०।११) इति मनुवाक्यानुकूलमूलविरुद्धोऽनेकार्थकोषो नादरणीयः ॥

कुलकः स्यात्कुलश्रेष्ठी

कीति ॥ कोलति 'कुल संस्त्याने बन्धुषु च' (भ्वा० प० से०) । कुन् (उ० २।३२) । **'कुलकं** तु पटोले स्यात्संबद्धश्लोकसंहतौ । पुंसि वल्मीककाकेन्दुकुलश्रेष्ठेषु कथ्यते (इति मेदिनी) ॥*॥ 'कुलिकः' इति पाठे कुलमधीनत्वेनास्यास्ति । ठन् (५।२।११५) । **'कुलिको** नागभेदे स्याद्बुभेदे कुलसत्तमे' (इति मेदिनी) ॥ (१) ॥*॥ कुलश्रेष्ठत्वमस्यास्ति । इनिः (५।२।११५) ॥ (२) ॥*॥ द्वे **'कारुसङ्घे मुख्यस्य'** ॥

मालाकारस्तु मालिकः ॥ ५ ॥

मेति ॥ मालां करोति । अण् (३।२।१) ॥ (१) ॥*॥ मालास्यास्ति । 'व्रीह्यादिभ्यश्च' (५।२।११६) इति ठन् । यद्वा माला शिल्पमस्याः 'शिल्पम्' (४।४।५५) इति ठन् । **'मालिका** सप्तलापुत्री ग्रीवालंकरणेऽपि च । पुष्पमाल्ये नदीभेदे पक्षिभेदे च मालिकः' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'मालाकारस्य' 'माली'** इति ख्यातस्य ॥

कुम्भकारः कुलालः स्यात्

कीति ॥ कुम्भं करोति । अण् (३।२।१) । **'कुम्भकारी** कुलत्थ्यां च पुंसि स्याद्घटकारके' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ कुं भूमिं लालयति । 'लड विलासे' (भ्वा० प० से०) । अण् (३।२।१) । डलयोरैक्यम् । कुलमालाति वा । कः (वा० ३।२।५) । कुलमलति वा । अण् (३।२।१) । कुलमाछुनाति वा । डः (वा० ३।२।१०१) । 'धूके **कुलालः** कुक्कुभे कुम्भकारेऽञ्जनान्तरे' ॥ (२) ॥*॥ द्वे **'कुलालस्य'** ॥

पलगण्डस्तु लेपकः ।

पेति ॥ पलं मांसम् । तत्तुल्येन मृदादिना गण्डति वदनैकदेशमिव करोति । 'गडि वदनैकदेशे' (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (१) ॥*॥ लिम्पति । 'लिप उपदेहे' (तु० उ० से०) । ण्वुल् (३।१।१३३) ॥ (२) ॥*॥ द्वे **'गृहादौ लेपकारस्य'** ॥

तन्तुवायः कुविन्दः स्यात्

तेति ॥ तन्तून् वयति । 'वेञ् तन्तुसंताने' (भ्वा० उ० अ०) । 'ह्रावामश्च' (३।२।२) इत्यण् ॥*॥ **'तन्त्रवायः'** इति पाठे तन्तवो वितन्यन्ते यस्मिंस्तत्तन्त्रम् । तद्वयति ॥*॥ **'तन्त्रवापः'** इति पाठान्तरम् । तत्र 'डुवप्' (भ्वा० उ० अ०) । अण् (३।२।१) ॥ (१) ॥*॥ कुं भुवम्, कुत्सितं वा विन्दति । 'विदॢ लाभे' (तु० उ० अ०) । 'गवादिषु विन्देः संज्ञायाम्' (वा० ३।१।१३८) इति शः । कुप्यति । 'कुप कोपे' (दि० प० से०) । 'कुपेर्वा वश्च' (उ० ४।८६) इति किन्दच् ॥ (२) ॥*॥ द्वे **'पटानां निर्मातरि'** ॥

तुन्नवायस्तु सौचिकः ॥ ६ ॥

त्विति ॥ तुन्नं छिन्नं वयति । 'वेञ्' (भ्वा० उ० अ०) । अण् (३।२।१) ॥ (१) ॥*॥ सूची शिल्पमस्य । 'शिल्पम्'

(४।४।५५) इति ठक् ॥ (२) ॥*॥ द्वे **'कञ्चुक्यादेर्निर्मातरि'** ॥

रङ्गाजीवश्चित्रकारः

रेति ॥ रङ्गेणाजीवति । 'जीव प्राणधारणे' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । रङ्ग आजीवोऽस्य, इति वा ॥ (१) ॥*॥ चित्रं करोति । 'दिवाविभानिशा–' (३।२।२१) इति टः ॥ (२) ॥*॥ द्वे **'चित्रकारस्य'** ॥

शस्त्रमार्जोऽसिधावकः ।

शेति ॥ शस्त्रं मार्ष्टि । 'मृजू शुद्धौ' (अ० प० से०) । अण् (३।२।१) ॥ (१) ॥*॥ असिं धावति । 'धावु गतिशुद्ध्योः' (भ्वा० उ० से०) । अण् (३।२।१) । 'स्वार्थे कन्' (ज्ञापि० ५।४।५) । कुन् (उ० २।३२) वा ॥ (२) ॥*॥ द्वे **'शस्त्रघर्षणोपजीविनः'** ॥

पादूकृच्चर्मकारः स्यात्

पेति ॥ पद्यतेऽनया । 'पद गतौ' (दि० आ० अ०) । 'णित्कश्चिपद्यर्तेः' (उ० १।८५) इति ऊः । पादूं करोति । क्विप् (३।२।७६) ॥ (१) ॥*॥ चर्म करोति । अण् (३।२।१) ॥ (२) ॥*॥ द्वे **'चर्मकारस्य'** ॥

व्योकारो लोहकारकः ॥ ७ ॥

व्योकेति ॥ **'व्यो'** इत्यव्ययं लोहवीजवाची—इति श्रीभोजः । व्यो करोति । अण् (३।२।१) ॥ (१) ॥*॥ लोहं करोति । अण् (३।२।१) । स्वार्थे कन् (ज्ञापि० ५।४।५) । 'व्योकारोऽयस्करोऽयस्कारो लोहकारः स्यात्' इति रत्नकोषः ॥ (२) ॥*॥ द्वे **'लोहकारस्य'** ॥

नाडिंधमः स्वर्णकारः कलादो रुक्मकारके ।

नेति ॥ नाडीं वंशनलीं धमति । 'धमा शब्दाग्निसंयोगयोः' (भ्वा० प० से०) । 'नाडीमुष्ट्योश्च' (३।२।३०) । इति खश् । 'खित्यनव्ययस्य' (६।३।६६) इति ह्रस्वः ॥ (१) ॥*॥ स्वर्णं करोति । अण् (३।२।१) ॥ (२) ॥*॥ कलामादत्ते । 'डुदाञ्' (जु० उ० अ०) । मूलविभुजादित्वात् (वा० ३।२।४) कः ॥ (३) ॥*॥ रुक्मं करोति । अण् (३।२।१) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (४) ॥*॥ चत्वारि **'स्वर्णकारस्य'** ॥

स्याच्छाङ्खिकः काम्बविकः

स्येति ॥ शङ्खः शिल्पमस्य । 'शिल्पम्' (४।४।५५) इति ठक् ॥ (१) ॥*॥ कम्बुः शिल्पमस्य । ठक् (४।४।५५) । '—शाश्वतिकः' (२।४।९) इति निर्देशात्कादेशोऽनित्यः । कम्बोर्विकारोऽस्यास्ति, इति वा । ठन् (५।२।११५) ॥ (२) ॥*॥ द्वे **'शङ्खवादकस्य'** ॥

शौल्विकस्ताम्रकुट्टकः ॥ ८ ॥

शाविति ॥ शुल्वघट्टनं शिल्पमस्य । 'शिल्पम्' (४।४।५५) इति ठक् ॥ (१) ॥*॥ ताम्रं कुट्टयति । 'कुट्ट छेदने' (चु० प० से०) । अण् (३।२।१) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ द्वे **'ताम्रकारस्य'** ॥

तक्षा तु वर्धकिस्त्वष्टा रथकारश्च काष्ठतट् ।

तेति ॥ तक्ष्णोति 'तक्षू तनूकरणे' (भ्वा० प० से०) । '–युवृषि–' (उ० १।१५६) इत्यादिना कनिन् ॥ (१) ॥*॥ वर्धते । 'वर्ध छेदने' (चु० प० से०) । अच् (३।१।१३४) । वर्धं कषति । 'कष हिंसायाम्' (भ्वा० प० से०) । बाहुलकाद्डिः ॥ (२) ॥*॥ त्वक्षति । 'त्वक्षू तनूकरणे' (भ्वा० प० से०) । तृच् (३।१।१३३) । **'त्वष्टा** पुमान्देवशिल्पितक्ष्णोरादित्यभिद्यपि' (इति मेदिनी) ॥ (३) ॥*॥ रथं करोति । अण् (३।२।१) ॥ (४) ॥*॥ काष्ठं तक्षति । क्विप् (३।२।७६) ॥ (५) ॥*॥ पञ्च **'सुतार इति ख्यातस्य'** ॥

ग्रामाधीनो ग्रामतक्षः

ग्रेति ॥ ग्रामेऽधि । 'सप्तमी' (२।१।४०) इति समासः । 'अषडक्ष–' (५।४।७) इति खः ॥ (१) ॥*॥ ग्रामस्य तक्षा । 'ग्रामकौटाभ्यां च तक्ष्णः' (५।४।९५) इति टच् ॥ (२) ॥*॥ द्वे **'ग्रामत्वष्टुः'** ॥

कौटतक्षोऽनधीनकः ॥ ९ ॥

कौटेति ॥ कुट्यां भवः । 'तत्र भवः' (४।३।५३) इत्यण् । कौटश्चासौ तक्षा च । टच् (५।४।९५) ॥ (१) ॥*॥ नाधीनः । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥*॥ एकम् **'कौटत्वष्टुः'** ॥

क्षुरिमुण्डिदिवाकीर्तिनापितान्तावसायिनः ।

क्षिति ॥ क्षुरोऽस्यास्ति । 'अतः–' (५।२।११५) इतीनिः ॥ (१) ॥*॥ मुण्डं करोति 'मुण्डमिश्र–' (३।१।२१) इति णिच् । अह्यादित्वात् (३।१।१३४) णिनिः ॥ (२) ॥*॥ दिवा कीर्तिरस्य । **'दिवाकीर्तिस्तु** पुंसि स्यान्नापितान्तावसायिनोः' इति विश्वः (मेदिनी) ॥ (३) ॥*॥ न पियति स्म । 'पि गतौ' (तु० प० अ०) । 'गत्यर्थ–' (३।४।७२) इति क्तः । न—अपितः । निषेधार्थकेन नशब्देन 'सुप्सुपा' (२।१।४) इति समासः । यद्वा नापनम् । 'आपॄ व्याप्तौ' (स्वा० प० अ०) । घञ् (३।३।१८) । नापो जातोऽस्य । 'तदस्य संजातम्' (५।२।३६) इतीतच् ॥ (४) ॥*॥ नखानामन्तमवसातुं शीलमस्य । 'षोऽन्तकर्मणि' (दि० प० अ०) । 'षै क्षये' (भ्वा० प० अ०) वा । 'सुपि–' (३।२।७८) इति णिनिः । 'आतो युक्–' (७।३।३३) । (**'अन्तावसायी** श्वपचे मुनिभेदे च नापिते' इति मेदिनी) ॥ (५) ॥*॥ पञ्च **'नापितस्य'** ॥

निर्णेजकः स्याद्रजकः

नीति ॥ निर्णेनेक्ति । 'णिजिर् शुद्धौ' (जु० उ० से०) ण्वुल् (३।१।१३३) । 'उपसर्गादसमासे–' (८।४।१४) इति णत्वम् ॥ (१) ॥*॥ रजति । 'रञ्ज रागे' (भ्वा० उ० अ०) । नू (उ० २।३२) ॥ (२) ॥*॥ द्वे **'रजकस्य'** ॥

शौण्डिको मण्डहारकः ॥ १० ॥

शाविति ॥ (**'शुण्डा** पानगृहे मता । अम्बुहस्तिनीवेश्याहस्तिहस्तसुरासु च' इति मेदिनी) । शुण्डा सुरा पण्यमस्य । 'तदस्य पण्यम्' (४।४।५१) इति ठक् ॥ (१) ॥*॥ मण्डं सुराग्रसं हरति । 'कर्मण्यण्' (३।२।१) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ द्वे **'शौण्डिकस्य'** ॥

जावालः स्याद्जाजीवः

जेति ॥ जवमलति, आलाति वा । 'अल भूषणादौ' (भ्वा० प० से०) । अण् (३।२।१) । कः (वा० ३।२।५) वा । जवालोऽजः । तस्यायम् ॥ (१) ॥*॥ अजा आजीवो जीविकास्य ॥ (२) ॥*॥ द्वे **'अजाजीवनस्य'** ॥

देवाजीवी तु देवलः ।

देवेति ॥ देवैराजीवितुं शीलमस्य । 'सुप्यजातौ–' (३।२।७८) इति णिनिः ॥*॥ (**देवाजीवः**, इति) अदन्तपाठे देव आजीवोऽस्य ॥ (१) ॥*॥ देवान् जीविकार्थं लाति । कः (३।२।३) । देवं लक्षणया तत्स्वं लाति वा ॥ (२) ॥*॥ द्वे **'देवपूजोपजीविनः'** ॥

स्यान्माया शाम्बरी

स्येति ॥ विश्वं माति यस्याम्, मिमीते, वा । 'मा माने' (अ० प० अ०) । 'माङ् माने' (जु० आ० अ०) वा । 'माच्छाससिभ्यो यः' (उ० ४।१०९) । मां याति वा । 'आतोऽनुप–' (३।२।३) इति कः । **'माया** स्याच्छाम्बरी-बुध्नोर्मायः पीताम्बरेऽसुरे' (इति मेदिनी) ॥ (१) ॥*॥ शम्बराख्यदैत्यस्येदम् । 'तस्येदम्' (४।३।१२०) इत्यण् ॥ (२) ॥*॥ द्वे **'इन्द्रजालादिमायायाः'** ॥

मायाकारस्तु प्रातिहारिकः ॥११॥

मेति ॥ मायां करोति । अण् (३।२।१) ॥ (१) ॥*॥ प्रतिहरणम् । 'हृञ्' (भ्वा० उ० अ०) भावे घञ् (३।३।१८) । प्रतिहारो व्याजः प्रयोजनमस्य 'प्रयोजनम्' (५।१।१०९) इति ठक् ॥ (२) ॥*॥ द्वे **'इन्द्रजालिकस्य'** ॥

शलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः । भरता इत्यपि नटाः

शायिति ॥ शिलादिना प्रोक्तं नटसूत्रमधीयते । 'पाराशर्यशिलालिभ्याम्–' (४।३।११) इति णिनिः ॥ (१) ॥*॥ शिलूषस्य ऋषेरपत्यम् । अण् (४।१।११४) । 'नटे विल्वे च शैलूषः' इति तालव्यादिमूर्धन्यान्तेषु रभसः ॥ (२) ॥*॥ जायया जीवन्ति । 'जीव प्राणधारणे' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः ॥ (३) ॥*॥ कृशाश्वेन प्रोक्तं नटसूत्रमधीयते । 'कर्मन्दकृशाश्वादिनिः' (४।४।१११) ॥ (४) ॥*॥ भरतस्य मुनेः शिष्याः । अण् (४।३।१२०) । संज्ञापूर्वकत्वान्न वृद्धिः । यद्वा बिभर्ति स्वाङ्गम् । 'डु भृञ्' (जु० उ० अ०) । 'भृमृदृशि–' (उ० ३।१११) इत्यतच् ।—बिदाद्यञो (४।१।१०४) वा । 'यञञोश्च' (२।४।६४) इति लुकि भरतः—इति मुकुटः । तन्न । अबहुवचने वृद्धिप्रसङ्गात् । पूर्वव्याख्याविरोधाच्च ॥ (५) ॥*॥ नटति । 'नट नृत्तौ' (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (६) ॥*॥ **'रङ्गावतारी** शैलूषो नटो भरत**भारतौ**' इति वाचस्पतिः ॥ ॥*॥ षट् **'नटानाम्'** ॥

चारणास्तु कुशीलवाः ॥ १२ ॥

चेति ॥ चारयन्ति कीर्तिम् । 'चर गतौ' (भ्वा० प० से०) । णिजन्तः । नन्द्यादिल्युः (३।१।१३४) (१) ॥*॥ कुत्सितं शीलमस्येषाम् । 'कुगति–' (२।२।१८) इति समासः । 'अन्यत्रापि दृश्यते' (वा० ५।२।१०९) इति वा । कुशीलं वान्ति वा । 'वा गत्यादौ' (अ० प० अ०) । कः (३।२।३) ॥ (२) ॥*॥ द्वे **'बन्दिविशेषस्य'** ॥

मार्दङ्गिका मौरजिकाः

मेति ॥ मृदङ्गो लक्षणया तद्वादनं शिल्पमेषाम् । 'शिल्पम्' (४।४।५५) इति ठक् ॥ (१) ॥*॥ मुरजः शिल्पमेषाम् । ठक् (४।४।५५) ॥ (२) ॥*॥ द्वे **'मृदङ्गवादनशीलस्य'** ॥

पाणिवादास्तु पाणिघाः ।

पेति ॥ पाणिं वादयन्ति । 'वदेः' (भ्वा० प० से०) । ण्यन्तादण् (३।२।१) ॥ (१) ॥*॥ पाणिं घ्नन्ति । 'पाणिघताडघौ शिल्पिनि' (३।२।५५) इति साधुः ॥ (२) ॥*॥ द्वे **'करतालिकावादनशीलस्य'** ॥

वेणुध्माः स्युर्वैणविकाः

वयिति ॥ वेणुं धमन्ति । 'ध्मा शब्दादौ' (भ्वा० प० से०) । 'आतोऽनुप–' (३।२।३) इति कः ॥ (१) ॥*॥ वेणोर्विकारः । 'ओरञ्' (४।३।१३९) । वैणवं शिल्पमस्य । ठक् (४।४।५५) ॥ (२) ॥*॥ द्वे **'वेणुवादनशीलस्य'** ॥

वीणावादास्तु वैणिकाः ॥१३॥

वीति ॥ वीणां वादयन्ति ॥ (१) ॥*॥ वीणा शिल्पमेषाम् ॥ (२) ॥*॥ द्वे **'वीणावादनशीलस्य'** ॥

जीवान्तकः शाकुनिकः

जीति ॥ जीवानामन्तकः ॥ (१) ॥*॥ शकुनान् हन्ति । 'पक्षिमत्स्य–' (४।४।३५) इति ठक् ॥ (२) ॥*॥ द्वे **'पक्षिणां हन्तरि'** ॥

द्वौ वागुरिकजालिकौ ।

द्वाविति ॥ वागुरया (१) जालेन (२) च चरति । 'चरति' (४।४।८) इति ठक् ॥ (२) ॥*॥ द्वे **'जालेन मृगान्बध्नतः'** ॥

वैतंसिकः कौटिकश्च मांसिकश्च समं त्रयम् ॥ १४ ॥

वायिति ॥ वीतंसेन मृगपक्ष्यादिबन्धनोपायेन चरति ॥ (१) ॥*॥ कूटेन मृगादिबन्धनयन्त्रेण चरति ॥ (२) ॥*॥ मांसं पण्यमस्य । 'तदस्य पण्यम्' (४।४।५१) इति ठक् ॥ (३) ॥*॥ त्रीणि **'मांसविक्रयजीविनः'** ॥

भृतको भृतिभुक्कर्मकरो वैतनिकोऽपि सः ।

भ्रिति ॥ भ्रियते स्म । 'भृञ् भरणे' (भ्वा० उ० अ०) । क्तः (३।२।१०२) । स्वार्थे कन् (ज्ञापि० ५।४।५) । यद्वा भृतिं करोति । 'तत्करोति–' (३।१।२६) इति णिजन्ताक्कुन् (उ० २।३२) ॥ (१) ॥*॥ भृतिं वेतनं भुङ्क्ते । क्विप् (३।२।७६) ॥ (२) ॥*॥ कर्म करोति । 'कर्मणि भृतौ' (३।२।२२) इति टः ॥ (३) ॥*॥ वेतनेन जीवति । 'वेतनादिभ्यो जीवति' (४।४।१२) इति ठक् ॥ (४) ॥*॥ चत्वारि **'वेतनोपजीविनः'** ॥

वार्तावहो वैवधिकः

वेति ॥ वार्तायाः वहः ॥ (१) ॥*॥ विवधं वीवधं वा वहति । 'विभाषा विवधात्' (वा० ४।४।१७) इति ठन् । पक्षे ठक् ॥ (२) ॥*॥ द्वे **'वार्तायाः वाहकस्य' 'कवडिया'** इति ख्यातस्य ॥

भारवाहस्तु भारिकः ॥ १५ ॥

भेति ॥ भारं वहति । अन् (३।२।१) ॥ (१) ॥*॥ भारोऽस्ति वाह्यत्वेनास्य । 'अतः–' (५।२।११५) इति ठन् ॥ (२) ॥*॥ द्वे **'भारवाहकस्य'** ॥

विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः ।
निहीनोऽपसदो जाल्मः क्षुल्लकश्चेतरश्च सः ॥ १६ ॥

वीति ॥ विगतो वर्णो यस्य यस्माद्वा । **'वर्णो** द्विजादौ शुक्लादौ स्तुतौ रूपयशोऽक्षरे' इति विश्वः ॥ (१) ॥*॥ पामानं राति । कः (३।२।३) । यद्वा पा धर्मः म्रियते येन । 'मृङ्' (तु० प० अ०) । 'पुंसि–' (३।३।११८) इति घः ॥ (२) ॥*॥ निकृष्टामीं लक्ष्मीं चिनोति । 'चिञ्' (स्वा० उ० अ०) । 'अन्येभ्योऽपि दृश्यते' (वा० ३।२।१०१) इति ङः ॥ (३) ॥*॥ प्रकृतौ भवः । अण् (४।३।५३) । यद्वा प्रकृष्टमकृतमकार्यमस्य ॥ (४) ॥*॥ सज्जनेभ्यः पृथग्भूतो जनः । शाकपार्थिवादिः (वा० २।१।७८) ॥ (५) ॥*॥ निश्चयेन हीनः । 'कुमति–' (२।२।१८) इति समासः ॥ (६) ॥*॥ अपकृष्टमपकृष्टे वा सीदति । 'षदॢ विशरणादौ' (भ्वा० प० अ०) । अच् (३।१।१३४) ॥ (७) ॥*॥ जालयति । 'जल आच्छादने' (चु० प० से०) । जालं करोति । बाहुलकान्मः । 'नेड् वशि कृति' (७।२।८) । **'जाल्मस्तु** पामरे । असमीक्ष्यकारिणि च' इति हैमः ॥ (८) ॥*॥ क्षुद्रं लाति । कः (३।२।३) स्वार्थे कन् (उ० २।३२) वा । यद्वा क्षुणत्ति, क्षुद्यते वा 'क्षुद क्षोदे' (रु० उ० अ०) । 'स्फायितञ्चि–' (उ० २।१३) इति रक् । कपिलिकादिः (८।२।१८) । यद्वा क्षुदा लक्ष्यते । 'लक आस्वादने' ( ) । 'पुंसि–' (३।३।११८) इति घः ॥*॥ कवर्गद्वितीयादिरपि । **'खुल्लकस्त्रिषु** नीचेऽल्पे' इति रभसात् । खदनम् । 'खद हिंसायाम्' (भ्वा० प० से०) । संपदादिः (वा० ३।३।१०८) । पृषोदरादिः (६।३।१०९) । खुदं लाति । कुन् (उ० २।३२) ॥ (९) ॥*॥ इना कामेन तीर्यते । 'तॄ' (भ्वा० प० से०) । 'ऋदोरप्' (३।३।५७) । इतं गमनं करोति वा । 'तत्करोति–' (वा० ३।१।२६) इति णिच् । यद्वा इतेन ज्ञानेन क्षीते । 'प्रातिपदिकाद्धात्वर्थे' (चु० सू०) इति णिच् । बाहुलकादरः । यद्वा 'इ' इत्यव्ययमपकर्षे । 'द्विवचन–' (५।३।५७) इति तरप् । द्रव्यप्रकर्षत्वाच्चामुः ॥ (१०) ॥*॥ दश **'नीचस्य'** ॥

भृत्ये दासेयदासेरदासगोप्यकचेटकाः ।
नियोज्यकिंकरप्रैष्यभुजिष्यपरिचारकाः ॥ १७ ॥

भ्रिति ॥ भ्रियते । 'भृञ् भरणे' (भ्वा० उ० अ०) । 'भृञोऽसंज्ञायाम्' (३।१।११२) इति क्यप् । **'भृत्यः** दासे भृतौ **भृत्या'** इति विश्वः ॥ (१) ॥*॥ दास्या अपत्यम् । 'द्व्यचः' (४।१।१२१) इति ढक् ॥ (२) ॥*॥ 'क्षुद्राभ्यो' वा' (४।१।१३१) इति ढक् च ॥ (३) ॥*॥ दंसयति दंस्यते वा । 'दसि दीप्तौ' (चु० प० से०) । 'दंसेष्टनौ न आ च' (उ० ५।१०) । यद्वा दास्यते । 'दासॢ दाने' (भ्वा० उ० से०) । घञ् (३।३।१८) ॥*॥ (**दाश,** इति) तालव्यान्तपक्षे 'दंशेश्च' (उ० ५।११) ॥ (४) ॥*॥ गुप्यते । 'गुपू रक्षणे' (भ्वा० प० से०) । ण्यत् (३।१।१२४) । स्वार्थे कन् (ज्ञापि० ५।४।५) गोप्यं कायति वा । 'कै शब्दे' (भ्वा० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥ (५) ॥*॥ चेट्यते । 'चिट परप्रेष्ये' (भ्वा० प० से०) । कृवादिभ्यो वुन् (उ० ५।३५) ॥ (६) ॥*॥ नियुज्यते । 'युजिर् योगे' (रु० उ० अ०) । ण्यत् (३।१।१२४) । 'प्रयोज्यनियोज्यौ शक्यार्थे' (७।३।६८) इति साधुः ॥ (७) ॥*॥ **'किंचित्** कुत्सितं वा करोति । 'दिवाविभा–' (३।२।२१) इत्यत्र 'किंयत्तद्वहुषु' इति (वार्तिकेन) अच् ॥ (८) ॥*॥ प्रेष्यते । 'इष गतौ' (दि० प० से०) आभीक्ष्ण्ये (क्या० प० से०) वा । ण्यत् (३।१।१२४) । 'प्रादूहो–' (वा० ६।१।८९) इति वृद्धिः ॥ (९) ॥*॥ भुङ्क्ते स्वाम्युच्छिष्टम् । भुज्यते वा । 'रुचिभुजिभ्यां किष्यन्' (उ० ४।१७९) ॥ (१०) ॥*॥ परिचरति । 'चर गत्यादौ' (भ्वा० प० से०) । ण्वुल् (३।१।१३३) ॥ (११) ॥*॥ एकादश **'दासस्य'** ॥

पराचितपरिस्कन्दपरजातपरैधिताः ।

पेति ॥ परेणाचितः । 'चिञ् चयने' (स्वा० उ० अ०) ।

क्तः (३।२।१०२) ॥ (१) ॥*॥ परिस्कन्दति । 'स्कन्दिर् गत्यादौ' (भ्वा० प० अ०) । पचाद्यच् (३।१।१३४) । 'परेश्च' (८।३।७४) इति वा षत्वम् ॥ (२) ॥*॥ परस्माज्जातः । परपोषित्वात् ॥*॥ **'पराजितः'** इति पाठे परैराजीयते स्म । 'जि अभिभवे' (भ्वा० प० अ०) । क्तः (३।२।१०२) । यद्वा परेषामाजः क्षेपणं जातोऽस्य । तारकादिः (५।२।३६) ॥ (३) ॥*॥ परैरेधितः संवर्धितः ॥ (४) ॥*॥ चत्वारि **'औदासीन्येन परपोषितस्य'** ॥

मन्दस्तुन्दपरिमृज आलस्यः शीतकोऽलसोऽनुष्णः॥

मेति ॥ मन्दते स्वपिति । 'मदि स्तुत्यादौ' (भ्वा० आ० से०) । अच् (३।१।१३४) । **'मन्दोऽतीक्ष्णे च मूर्खे च स्वैरे चाभाग्यरोगिणोः** । अल्पे च त्रिषु पुंसि स्याद्धस्तिजात्यन्तरे शनौ' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ तुन्दमुदरं परिमार्ष्टि । 'मृजू शुद्धौ' (अ० प० से०) । 'तुन्दशोकयोः–' (३।२।५) इति कः ॥ (२) ॥*॥ न लसति । 'लस श्लेषणे' (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (५) ॥*॥ स्वार्थे ष्यञ् (वा० ५।१।१२४) ॥ (३) ॥*॥ शीतं करोति । 'शीतोष्णाभ्यां कारिणि' (५।२।७२) इति कन् ॥ (४) ॥*॥ **'उष्णो** ग्रीष्मे पुमान्दक्षाशीतयोरन्यलिङ्गकः' (इति मेदिनी) । उष्णो दक्षः । उष्णादन्यः ॥ (६) ॥*॥ षट् **'अलसस्य'** ॥

दक्षे तु चतुरपेशलपटवः सूत्थान उष्णश्च ।

देति ॥ दक्षते । 'दक्ष वृद्धौ शीघ्रार्थे च' (भ्वा० आ० से०) अच् (३।१।१३४) । **'दक्षः** प्रजापतौ रुद्रवृषभे कुक्कुटे पटौ । द्रुमे **दक्षा** तु मेदिन्याम्' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ चतति, चत्यते वा । 'चते याचने' (भ्वा० उ० से०) 'मन्दिवाशिमथिचतिचक्ष्यट्टिभ्य उरच्' (उ० १।३८) ॥ (२) ॥*॥ पेशनम् । 'पिश समाधौ' (तु० प० से०) । घञ् (३।३।१८) । पेशं लाति । कः (३।२।३) । पेशोऽस्यास्ति । सिध्मादित्वात् (५।२।९७) लज् वा ॥ (३) ॥*॥ पाटयति । णिजन्तः । 'फलिपाटि–' (उ० १।१८) इति साधुः । **'पटुर्दक्षे** च नीरोगे चतुरेऽप्यभिधेयवत् । पटोले तु पुमान्क्लीबे छत्रालवणयोरपि' (इति मेदिनी) ॥ (४) ॥*॥ सुष्ठु उत्थानमुद्योगोऽस्य ॥ (५) ॥*॥ उष्णत्वं शीघ्रकारित्वमस्यास्ति । अर्शआद्यच् (५।२।१२७) । **'उष्णो** ग्रीष्मे पुमान्दक्षशीतयोरन्यलिङ्गकः' (इति मेदिनी) ॥ (६) ॥*॥ षट् **'दक्षस्य'** ॥

चण्डालप्लवमातङ्गदिवाकीर्तिजनंगमाः ॥ १९ ॥
निषादश्वपचावन्तेवासिचाण्डालपुक्कसाः ।

चेति ॥ चण्डते । 'चडि कोपे' (भ्वा० आ० से०) । 'पतिचण्डिभ्यामालच्' (उ० १।११७) ॥ (१) ॥*॥ प्लवते । 'प्लुङ् गतौ' (भ्वा० आ० अ०) । अच् (३।१।१३४) **'प्लवः** प्लक्षे प्लुतौ कपौ । शब्दे कारण्डवे म्लेच्छजातौ मेककमेलयोः । क्रमनिम्नमहीभागे कुलके जलवायसे । जलान्तरे **प्लवं** गन्धतृणे मुस्तकभिद्यपि' इति हैमः । **'प्लवः** स्यात्प्लवने भेले मेकेऽवौ श्वपचे कपौ । जलकाके च कुलके प्रवणे पर्कटीद्रुमे । कारण्डवाख्यविहगे शब्दे प्रतिगतौ पुमान्) । कैवर्तीमुस्तके गन्धतृणेऽपि स्यान्नपुंसकम्' (इति मेदिनी) ॥ (२) ॥*॥ मतङ्गस्यापत्यम् । शिवादित्वात् (४।१।११३) अण् । मतङ्गस्यायम्, वा । 'तस्येदम्' (४।३।१२०) इत्यण् ॥ (३) ॥*॥ दिवा कीर्तिरस्य ।—दिवा अकीर्तिरस्य—इति मुकुटः ॥ (४) ॥*॥ अधार्मिकाञ्जनान् गच्छति, जनेभ्यो गच्छति, वा । 'गमश्च' (३।२।४७) इति खच् ॥ (५) ॥*॥ निषीदति पापमस्मिन् । 'षदॢ विशरणादौ' (भ्वा० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । **'निषादः** स्वरभेदेऽपि चण्डाले धीवरान्तरे' (इति मेदिनी) ॥ (६) ॥*॥ श्वानं पचति । अँच् (३।१।१३४) ॥*॥ न्यङ्क्वादित्वात् (ग० ७।३।५३) कुत्वे **'श्वपाकः'** अपि ॥ (७) ॥*॥ ग्रामादेरन्ते वसति । 'सुप्यजातौ–' (३।२।७८) इति णिनिः । 'शयवास–' (६।३।१८) इत्यलुक् ॥ (८) ॥*॥ स्वार्थे अँञ् (५।३।११७) । 'चाण्डालः' अपि ।—प्रज्ञाद्यणि चाण्डालः—इत्येके । तन्न । 'कुलालवरुडकर्मारनिषादचण्डालमित्रामित्रेभ्यश्छन्दसि' (५।४।३६ सूत्रे) इति वार्तिकेन छन्दस्यण्विधानाल्लोके तदभावात् ॥ (९) ॥*॥ पुत् कुत्सितं पुण्यं वा (३।१।१३४) । मूलविभुजादिकः (वा० ३।२।५) वा । पृषोदरादिः (६।३।१०९) ॥*॥ **'पुष्कसी** कालिकानील्योः' **'पुष्कसः** श्वपचेऽधमे' इति (विश्वे) दर्शनात्पुष्कसोऽपि ॥*॥ (हैमे तु **'वुक्कसी—वुक्कस'**—शब्दावुपलभ्येते) ॥ (१०) ॥*॥ दश **'चाण्डालस्य'** ॥

भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः ॥ २० ॥

भयिति ॥ किरातादयस्त्रयो म्लेच्छजातयश्चण्डालभेदाः । यत्तु—म्लेच्छशब्दवाच्याः—इति मुकुटः । तन्न । जातिपदवैयर्थ्यप्रसङ्गात् । 'म्लेच्छाः' इत्येव वक्तुं युक्तत्वात् ॥*॥ किरति । 'कॄ विक्षेपे' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । अतति । 'अत सातत्यगमने' (भ्वा० प० से०) । अच् (३।१।१३४) । किरश्चासावदश्च । **'किरातो** म्लेच्छभेदे स्याद्भूनिम्बेऽल्पतनावपि । स्त्रियां चामरवाहिन्यां

१—यद्यपि 'कर्मण्यण्' (३।२।१) सूत्रभाष्ये 'अनुपपदस्यावकाशः । पचतीति पचः । कर्मोपपदस्यावकाशः । कुम्भकारः । इहोभयं प्राप्नोति । ओदनपाचः कर्मोपपदो भवति विप्रतिषेधेन' इत्युक्तम् । तथापि पचादिगणे 'श्वपच' इति प्रतिपदोक्तोपादानादणं बाधित्वाजेव भवति ॥ २—अस्य तु बहुत्वे 'चण्डालाः' इत्येव रूपम् । 'चाण्डालाः' इति रूपे तु 'तस्येदम्' (४।३।१२०) इत्यण् बोध्यः । छान्दसा अपि कचिल्लोके 'सन्धिः' इत्यादय इव प्रयुज्यन्ते इति वा बोध्यम् ॥

कुट्टनीदुर्गयोरपि' (इति मेदिनी) ॥ (१) ॥*॥ शवति । 'शव गतौ' (भ्वा० प० से०) । बाहुलकादरः । शवं राति वा । कः (३।२।३) । **'शवरो** म्लेच्छभेदे च पानीये शंकरेऽपि च' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ पोलति 'पुल महत्त्वे' (भ्वा० प० से०) । 'कुणिपुलिभ्यां किन्दच्' (उ० ४।८५) इति मुकुटः । **'पुलिन्दः** कथ्यते म्लेच्छे पुलिन्देऽपि निगद्यते' इति तारपालः । 'पुलिन्दः **पञ्चशवरः**' इति रत्नकोषः ॥ (१) ॥*॥ म्लेच्छति । 'म्लेच्छ अव्यक्ते शब्दे' (भ्वा० प० से०) अच् (३।१।१३४) म्लेच्छानां जातयोऽवान्तरभेदाः । 'गोमांसभक्षको यस्तु लोकबाह्यं च भाषते । सर्वाचारविहीनोऽसौ म्लेच्छ इत्यभिधीयते' । सूतसंहितायामपि । 'ब्राह्मण्यां वैश्यतो जातः क्षत्ता भवति नामतः । अस्यामनेन चौर्येण म्लेच्छो विप्रात्प्रजायते ॥' इति ॥

व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः ।

व्येति ॥ विध्यति । 'व्यध ताडने' (दि० प० अ०) । 'ग्याद्यधा–' (३।१।१४१) इति णः ॥ (१) ॥*॥ मृगवधेनाजीवति । 'इगुपध–' (३।१।१३५) इति कः ॥ (२) ॥*॥ मृगान् वधार्थं याति । 'या प्रापणे' (अ० प० अ०) । 'मृगय्वादयश्च' (उ० १।३७) इति कुः । **'मृगयुः** पुंसि गोमायौ व्याधे च परमेष्ठिनि' (इति मेदिनी) ॥ (३) ॥*॥ लुभ्यते स्म । 'लुभ गार्ध्ये' (दि० प० से०) । क्तः (३।२।१०२) । स्वार्थे (ज्ञापि० ५।४।५) । संज्ञायाम् (५।३।७५) वा कन् ॥ (४) ॥*॥ चत्वारि **'व्याधस्य'** ॥

कौलेयकः सारमेयः कुक्कुरो मृगदंशकः ॥ २१ ॥
शुनको भषकः श्वा स्यात्

काविति ॥ कुले भवः । 'कुलकुक्षि–' (४।२।९६) इति ढकञ् । **'कौलेयकः** सारमेये कुलीने' इति हैमः (मेदिनी) ॥ (१) ॥*॥ सरमाया अपत्यम् । 'स्त्रीभ्यो ढक्' (४।१।१२०) ॥ (२) ॥*॥ कोकते । 'कुक आदाने' (भ्वा० आ० से०) । क्विप् (३।२।१७८) । कुरति । 'कुर शब्दे' (तु० प० से०) । कः (३।१।१३५) । कुक् चासौ कुरश्च । **'कुक्कुरः** सारमेये ना ग्रन्थिपर्णे नपुंसकम्' इति विश्वः (मेदिनी) ॥ (३) ॥*॥ मृगान् दशति । 'दंश दशने' (भ्वा० प० अ०) । अण् (३।२।१) । कन् (ज्ञापि० ५।४।५) ॥ (४) ॥*॥ शुनति । 'शुन गतौ' (तु० प० से०) कुन् (उ० २।३२) ॥ (५) ॥*॥ भषति । 'भष पैशुन्ये' (भ्वा० प० से०) कुन् (उ० २।३२) ॥ (६) ॥*॥ श्वयति । 'टु ओ श्वि गतिवृद्ध्योः' (भ्वा० प० से०) । 'श्वन्नुक्षन्–' (उ० १५९) इति साधुः ॥ (७) ॥*॥ **'कुक्कुरस्तु शुनि श्वानः कपिलो मण्डलः शुनः'** इति वाचस्पतिः ॥*॥ सप्त **'शुनकस्य'** ॥

अलर्कस्तु स योगितः ।

अलेति ॥ अलम् अर्क्यते । 'अर्क स्तवने' (चु० प० से०) । अर्च्यते वा । 'अर्च पूजायाम्' (भ्वा० प० से०) । घञ् (३।३।१९) । शकन्ध्वादिः (वा० ६।१।९४) । **'अलर्को** धवलार्कै स्याद्योगोन्मादितकुक्कुरे' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ योगो मत्ततोपायो जातोऽस्य । तारकादित्वात् (५।२।३६) इतच् । यद्वा योग्यन्ते स्म । 'युगि वर्जने' (भ्वा० प० से०) । ण्यन्तः । अनित्यत्वान्न नुम् । क्तः (३।२।१०२) ॥*॥ एकं **'मत्तशुनः'** ॥

श्वा विश्वकद्रुर्मृगयाकुशलः

श्वेति ॥ विश्वकं सर्वं द्रवति । 'द्रु गतौ' (भ्वा० प० अ०) । मितद्वादित्वात् (वा० ३।२।१८०) डुः । यद्वा विश्वं कन्दति । 'कदि आह्वाने' (भ्वा० प० से०) । जश्वादिः (उ० ४।१०२) । **'विश्वकद्रुस्त्रिषु** खले श्वानाखेटशुनोः पुमान्' (इति मेदिनी) ॥ (१) ॥*॥ मृगयायां कुशलः ॥*॥ एकम् **'मृगयाकुशलशुनः'** ॥

सरमा शुनी ॥ २२ ॥

सेति ॥ सरति । 'सृ गतौ' (भ्वा० प० अ०) । बाहुलकादमः । (**'सरमा** कुक्कुरीदेवशून्योः स्याद्राक्षसीभिदि' इति मेदिनी) ॥ (१) ॥*॥ शुनी गौरादिः (४।१।४१) ॥ (२) ॥*॥ द्वे **'शुन्याः'** ॥

विट्चरः सूकरो ग्राम्यः

वीति ॥ विषं विष्ठां चरति । 'चर गत्यादौ' (भ्वा० प० से०) । अच् (३।१।१३४) । मूलविभुजादिकः (वा० ३।२।५) वा । विषश्चरो वा ॥ (१) ॥*॥ एकम् **'ग्राम्यसूकरस्य'** ॥

वर्करस्तरुणः पशुः ।

वेति ॥ वर्कते । 'वृक आदाने' (भ्वा० आ० से०) । बाहुलकादरन् । **'वर्करः** परिहासे स्याच्छागे युवपशावपि' इति विश्वः (मेदिनी) । **'वर्करो** मेषशावकः' इति रक्षितः ॥ (१) ॥*॥ एकम् **'तरुणपशुमात्रस्य'** ॥

आच्छोदनं मृगव्यं स्यादाखेटो मृगया स्त्रियाम् २३

आच्छविति ॥ आच्छिद्यन्तेऽत्र । ल्युट् (३।३।११७) । पृषोदरादिः (६।३।१०९) ॥ (१) ॥*॥ मृगा व्यध्यन्तेऽत्र । 'व्यध गतौ' (भ्वा० उ० से०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः ॥ (२) ॥*॥ आखिद्यतेऽत्र । 'खिट त्रासे' (भ्वा० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् ॥ (३) ॥*॥ मृग्यन्तेऽत्र 'मृग अन्वेषणे' (चु० आ० से०) । '–परिचर्यापरिसर्यामृगया–' (वा० ३।३।१०१) इति साधुः ॥ (४) ॥*॥ चत्वारि **'शिकार'** इति ख्यातस्य ॥

दक्षिणार्लुब्धयोगाद्दक्षिणेर्मा कुरङ्गकः ।

देति ॥ दक्षिणेऽरुरस्य ॥*॥ दक्षिणे ईर्ममस्य । 'दक्षिणेर्मा लुब्धयोगे' (२।५।१२६) इति साधुः ॥ (१) ॥*॥ एकम् **'दक्षिणवणस्य'** ॥

चौरैकागारिकस्तेनदस्युतस्करमोषकाः ॥ २४ ॥
प्रतिरोधिपरास्कन्दिपाटच्चरमलिम्लुचाः ।

चाविति ॥ चोरणम् । 'चुर स्तेये' (चु० प० से०) ।

'अ प्रत्ययात्' (३।३।१०२) । संज्ञापूर्वकत्वान्न गुणः । चुरा शीलमस्य । 'छत्रादिभ्यो णः' (४।४।६२) । **'चोरः** पाटच्चरेऽपि स्याच्चौरपुष्पौषधावपि' इति विश्वः (मेदिनी) ॥ पचाद्यचि **'चौरः'** अपि ॥ (१) ॥*॥ एकमसहायमगारं प्रयोजनमस्य । 'ऐकागारिकट् चौरे' (५।१।११३) इति साधुः ॥ (२) ॥*॥ स्तेनयति । 'स्तेन चौर्ये' (चु० उ० से०) । पचाद्यच् (३।१।१३४) ॥ (३) ॥*॥ दस्यति । 'दसु उपक्षये' (दि० प० से०) । '–जनिमनिदसिभ्यो युः' (उ० ३।२०) । 'अनुनासिकयोः' इत्युक्तत्वान्नानः (७।१।१) । **'दस्युश्चौरे** रिपौ पुंसि' इति हैमः (मेदिनी) ॥ (४) ॥*॥ तत् करोति 'किंयत्तद्वहुषु' (वा० ३।२।२१) इलच् । 'तद्वहतोः करपत्लोः' (ग० ६।१।१५७) इति सुट्तलोपौ ॥ (५) ॥*॥ मुष्णाति । 'मुष स्तेये' (क्या० प० से०) । ण्वुल् (३।१।१३३) ॥ (६) ॥*॥ प्रतिरोद्धुं शीलमस्य । 'रुधिर् आवरणे' (रु० उ० अ०) । 'सुपि–' (३।२।७८) इति णिनिः ॥ (७) ॥*॥ परान् आस्कन्तुं शीलमस्य । 'स्कन्दिर् गत्यादौ' (भ्वा० प० अ०) । 'सुपि–' (३।२।७८) इति णिनिः ॥ (८) ॥*॥ पाटयंश्चरति । अच् (३।१।१३४) । पृषोदरादिः (६।३।१०९) ॥*॥ 'चौरजीर्णपटयोः **पटच्चरः'** इति नामानुशासनम् ॥ (९) ॥*॥ मल्यते । ('मल धारणे') भ्वा० आ० से०) । इन् (उ० ४।११८) । मलिं धृतं म्लोचति । 'म्लुच स्तेये' (भ्वा० प० से०) । मूलविभुजादिकः (वा० ३।२।५) । **'मलिम्लुचो** मांसमेदे चौरज्वलनयोः पुमान्' इति विश्वः (मेदिनी) ॥ (१०) ॥*॥ दश **'चोरस्य'** ॥

चौरिका स्तैन्यचौर्ये च स्तेयम्

चाविति ॥ चौरस्य भावः कर्म वा । मनोज्ञादित्वात् (५।१।१३३) वुञ् ॥ (१) ॥*॥ स्तेनस्य भावः कर्म वा । 'स्तेनाद्यन्नलोपश्च' (५।१।१२५) इत्यत्र 'स्तेनात्' इति योगविभागात् ष्यञ् ॥ (२) ॥*॥ (यन्नलोपौ) ॥ (४) ॥*॥ चौरस्य कर्म ष्यञ् (५।१।१२४) ॥ (३) ॥*॥ 'स्तेयं स्तैन्यं च चौर्ये स्याच्चौरिकाचोरिके स्त्रियाम्' इति वाचस्पतिः ॥*॥ चत्वारि **'चोरकर्मणः'** ॥

लोप्त्रं तु तद्धनम् ॥ २५ ॥

लवित्रि ॥ लुप्यते । 'लुपॢ छेदने' (तु० उ० से०) । ष्ट्रन् (उ० ४।१।१५९) ॥*॥ लूनः ष्ट्रनि 'लोत्रम्' अपि । **'लोत्रमश्रुणि** चोरिते' इति विश्वः ॥ (१) ॥*॥ तस्य चोरस्य धनम् ॥*॥ एकम् **'स्तेयद्रव्यस्य'** ॥

वीतंसस्तूपकरणं बन्धने मृगपक्षिणाम् ।

वीति ॥ वितंसयते । 'तसि अलंकारे' (चु० प० से०) । घञ् (३।३।१९) । 'उपसर्गस्य–' (६।३।१२२) इति दीर्घः । **'वीतंसो** बन्धनोपाये मृगाणामपि पक्षिणाम् । तेषामेव च विश्वासहेतोः प्रावरणेऽपि च' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ एकं **'मृगादिबन्धनसाधनस्य'** ॥

उन्माथः कूटयन्त्रं स्यात्

विति ॥ उन्मथ्यतेऽनेन । 'मथे विलोडने' (भ्वा० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । 'उन्माथः कूटयन्त्रे स्यान्मारणे घातके पुमान्' (इति मेदिनी) ॥ (१) ॥*॥ कूटस्वरूपं यन्त्रम् ॥ (२) ॥*॥ द्वे **'मृगादिबन्धनयन्त्रस्य'** ॥

वागुरा मृगबन्धनी ॥ २६ ॥

वेति ॥ अवा गुरते । 'गुरी हिंसायाम्' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । 'वष्टि भागुरि–' इत्यकारलोपः ॥ (१) ॥*॥ मृगो बध्यतेऽनया । 'बन्ध बन्धने' (क्या० प० अ०) । 'करणा–' (३।३।११७) इति ल्युट् ॥ (२) ॥*॥—वातेर्भद्रादित्वाद्रण् गुक् चागमः—इति मुकुटस्त्वपाणिनीयः ॥*॥ द्वे **'जालविशेषस्य'** ॥

शुल्वं वराटकः स्त्री तु रज्जुस्त्रिषु वटी गुणः ।

श्वित्रि ॥ शुल्व्यते, शुल्वयति वा । 'शुल्व विसर्गे' (चु० प० से०) ण्यन्तः । 'एरच्' (३।३।५६) । अच् (३।१।१३४) वा 'रज्जुः शुल्वा वराटो ना' इति रत्नकोषात्त्र्यपि । **'शुल्वं** ताम्रे यज्ञकर्मण्याचारे जलसंनिधौ' इति विश्वः (मेदिनी) ॥*॥ स्वामी तु—**'सुम्यं वटाकरः'**—इति पठति । सु पूजितं मीयते । 'मीङ् गत्याम्' (दि० आ० अ०) । 'एरच्' (३।३।४६) । बाहुलकाद्यण् । सुमे पुष्पे साधु । 'तत्र साधुः' (४।४।९८) इति यत् ॥ (१) ॥*॥ वटं वेष्टनमाकरोति । पचाद्यच् (३।१।१३४) ॥ (२) ॥*॥ सृज्यते । 'सृज विसर्गे' (तु० उ० अ०) । 'सृजेरसुम् च' (उ० १।१५) चात्सलोपः ॥—सृजेः कुरसुगागमश्च—इत्यादिमुकुटस्त्वपाणिनीयः । 'रज्जुर्वेण्यां गुणे योषित्' इति विश्वमेदिन्यौ ॥ (३) ॥*॥ वटति । 'वट वेष्टने' (भ्वा० प० से०) । अच् (३।१।१३४) । गौरादिः (४।१।४१) । वट्यते वा । 'खनो घ च' (३।३।१२५) इति घः । **'वटी** त्रिषु गुणे पुंसि स्याच्यग्रोधकपर्दयोः' (इति मेदिनी) ॥ (४) ॥*॥ गुण्यते । 'गुण आमन्त्रणे' (चु० उ० से०) अदन्तः । 'एरच्' (३।३।५६) **'गुणो** मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये । त्यागे शौर्यादिसंध्यादिसत्त्वाद्यावृत्तिरज्जुषु । शुक्लादावपि वर्व्यां च' (इति मेदिनी) ॥ (५) ॥*॥ पञ्च **'रज्जोः'** ॥

उद्घाटनं घटीयन्त्रं सलिलोद्वाहनं प्रहेः ॥ २७ ॥

उद्घेति ॥ उद्घाट्यते, अनेन वा । 'घट संघाते' (भ्वा० उ० से०) ण्यन्तः । ल्युट् (३।३।११३,११७) ॥ (१) ॥*॥ घटीनां यन्त्रम् ॥ (२) ॥*॥ प्रहेः कूपात् । सलिलमुद्वाह्यतेऽनेन ॥*॥ द्वे **'अरट'** इति ख्यातस्य ॥

पुंसि वेमा वापदण्डः

पुंसीति ॥ वयत्यनेन । 'वेञ् तन्तुसंताने' (भ्वा० उ० अ०) 'वेञः सर्वत्र' (उ० ४।१५०) इति मनिन् ॥ (१) ॥*॥ वपनम् । 'डुवप्' (भ्वा०उ०अ०) । घञ् (३।३।१८) । वापस्य दण्डः ॥*॥ **'वायदण्डः'** इति क्वचित् पाठः । तत्र

वेञो भावे घञ् । 'आतो युक्' (७।३।३३) । वायस्य दण्डः ॥ (२) ॥*॥ द्वे **'वस्त्रव्यूतिदण्डस्य'** ॥

सूत्राणि नरि तन्तवः ।

स्त्रिति ॥ सूत्र्यते । 'सूत्र वेष्टने' (चु० उ० से०) अदन्तः । 'एरच्' (३।३।५६) । सीव्यते, अनेन वा । 'षिवु तन्तुसंताने' । (दि० प० से०) । 'सिविसूच्योष्टेरू च' (उ० ४।१६३) त्रात् कित् ष्ट्रन् प्रत्ययः । **'सूत्रं** तु सूचनाकारिग्रन्थे तन्तुव्यवस्थयोः' इति हैमः ॥ (१) ॥*॥ **नरि** पुंसि ॥*॥ तन्यते । 'तनु विस्तारे' (त० उ० से०) । 'सितनि–' (उ० १।६९) इति तुन् ॥*॥ **'सूत्रतन्तुः'** इति हारावल्याः संहतोऽपि ॥ (२) ॥*॥ द्वे **'सूत्राणाम्'** ॥

वाणिर्व्यूतिः स्त्रियौ तुल्ये

वेति ॥ वाणनम् । 'वण शब्दे' चुरादिः । 'अच इः' (उ० ४।१३९) ॥ (१) ॥*॥ विशिष्टा ऊतिः । वेञः 'ऊतियूति–' (३।३।९७) इत्यादिना क्तिनि निपातितः ॥ (२) ॥*॥ द्वे **'वस्त्रादिवानस्य'** ॥

पुस्तं लेप्यादिकर्मणि ॥ २८ ॥

प्विति ॥ पुस्त्यते । 'पुस्त आदरादौ' (चु० प० से०) णिच् । 'एरच्' (३।३।५६) ॥ (१) ॥*॥ 'मृदा वा दारुणा वाथ वस्त्रेणाप्यथ चर्मणा । लोहरत्नैः कृतं वापि पुस्तमित्यभिधीयते' । लेप्यमादिर्यस्य । तच्च तत्कर्म च । आदिना काष्ठपुत्तलिकादि ॥*॥ एकम् **'वस्त्रादिलेप्यस्य'** ॥

पञ्चालिका पुत्रिका स्याद्वस्त्रदन्तादिभिः कृता ।

पेति ॥ पञ्चभिर्वर्णैरल्यते । 'अल भूषणादौ' (भ्वा० प० से०) । घञ् (३।३।१९) । स्वार्थे कन् (ज्ञापि० ५।४।५) । टाप् (४।१।४) । 'प्रत्ययस्थात्–' (७।३।४४) 'इतीत्वम्' । 'संज्ञायाम्' (३।३।१०९) इति ण्वुल् वा । संज्ञापूर्वकत्वान्न वृद्धिः ॥*॥ **'पाञ्चालिका'** इति पाठे पञ्चालदेशे भवा । 'जनपदतदवध्योश्च' (४।२।१२४) इति वुञ् । आदिवृद्धिः (७।२।११७) । **'पाञ्चालिका** स्त्रियां वस्त्रपुत्रिकागीतिभेदयोः' (इति मेदिनी) ॥ (१) ॥*॥ पुत्रीव । 'इवे–' (५।३।९५) इति कन् । यावादित्वात् (५।४।२९) वा । **'स्यात्पुत्रिका** पुत्तलिकादुहित्रोर्यावतूलिके । ना पुत्रे शरभे धूर्ते शैलवृक्षप्रभेदयोः' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ आदिना काष्ठमृच्छिलादिकृता ॥*॥ द्वे **'लेप्यादेः'** ॥

पिटकः पेटकः पेटा मञ्जूषा

पीति ॥ पेटति । 'पिट संघाते' (भ्वा० प० से०) । कुन् (उ० २।३२) । **'पिटक**स्त्रिषु विस्फोटे मञ्जूषायां पुनः पुमान्' (इति मेदिनी) ॥ (१) ॥*॥ ण्वुल् (३।१।१३३) । **'पेटकः** पुस्तकादीनां मञ्जूषायां कदम्बके' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ अच् (३।१।१३४) ॥*॥ **'पेडा'** इति मुकुटः । तत्र पिण्डते । 'पिडि संघाते' (भ्वा० आ० से०) । अच् (३।१।१३४) । अनित्यत्वान्न नुम् ॥*॥ **'पीडा'** इति स्वामी । तत्र पीडयति । 'पीड अवगाहने' (चु० प० से०) । अच् (३।१।१३४) ॥ (३) ॥*॥ मज्जति, अत्र वा । 'टुमस्जो शुद्धौ' (तु० प० अ०) । 'मस्जेर्नुम् च' (उ० ४।७७) इत्यूषन् । यत्तु—द्विजकारः इति मुकुटः । तन्न । 'मस्जेरन्त्यात्पूर्वो वा नुम्' (१।१।४७ सूत्रे) इति वार्तिकविरोधात् ॥ (४) ॥*॥ चत्वारि **'वस्त्रालङ्कारादिस्थापनमञ्जूषायाः'** **'पेटी'** इति ख्यातायाः । मुकुटस्तु—आबद्धयम् **'झार्यी'** इति ख्यातायाः । अन्त्यद्वयं **'मञ्जूषा'** इति ख्यातायाः—इत्याह ॥

अथ विहंगिका ॥ २९ ॥

भारयष्टिः

अथेति ॥ विहंगस्य प्रतिकृतिः । 'इवे प्रतिकृतौ' (५।३।९६) इति कन् । विहायसा गच्छति वा । 'गमश्च' (३।२।४७) इति खच् । 'विहायसो विह च' 'खच्च डिद्वाच्यः' (वा० ३।२।३८) । यावादित्वात् (५।४।२९) कन् ॥*॥ मुकुटस्तु—**'विहंगमा'**—इति पठति ॥ (१) ॥*॥ भारस्य यष्टिः ॥ (२) ॥*॥ द्वे **'शिक्याधारलगुडस्य'** । **'कावडि'** इति ख्यातायाः ॥

तदालम्बि शिक्यं काचः

तेति ॥ तामालम्बितुं शीलमस्य । 'लबि अवस्रंसने' (भ्वा० आ० से०) । 'सुपि–' (३।२।७८) इति णिनिः ॥ (१) ॥*॥ स्रंसतेऽस्मात् । 'स्रंसु अधःपतने' (भ्वा० आ० से०) । 'स्रंसेः शिः कुट् किच्च' (उ० ५।१६) इति यत्, धातोः शिरादेशो यतः कुट् ।—शक्नोति वोढुम् । अश्व्यादिः (उ० ४।११२) इति मुकुटस्त्वेतत्सूत्रादर्शनमूलकः । कच्यतेऽत्र । 'कच बन्धे' (भ्वा० आ० से०) । 'हलश्च' (३।३।१२१) इति घञ् । **'काचः** शिक्ये मणौ नेत्ररोगभेदे मृदन्तरे' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ द्वे **'शिक्यस्य'** ॥

अथ पादुका ।

पादूरुपानत्स्त्री

अथेति ॥ पद्यतेऽनया । 'पद गतौ' (दि० आ० अ०) । 'णित्कशिपद्यर्तेः' (उ० १।८५) इत्यूः । स्वार्थे कन् (ज्ञापि० ५।४।५) वा ॥ (१) ॥*॥ (२) ॥*॥ पादं उपनह्यते, पादमुपनह्यति वा । 'णह बन्धने' (दि० उ० अ०) । संपदादित्वात् (वा० ३।३।१०८) 'क्विप् च' (३।२।७६) इति वा क्विप् । 'नहिवृति–' (६।३।११६) इति दीर्घः ॥ (३) ॥*॥ त्रीणि **'पादत्राणस्य'** ॥

सैवानुपदीना पदायता ॥ ३० ॥

सैवेति ॥ पदस्यानु । 'यस्य चायामः' (२।१।१६) इत्यव्ययीभावः । अनुपदं पादायामप्रमाणा बद्धा । 'अनुपद-

१—ण्वुलि वृद्धावपि धात्वकारस्य सवर्णदीर्घेण क्षत्यभावादत्रास्य लेखोपयोगो दुर्ज्ञानः ।

१—भाष्ये तु 'अन्त्यात्पूर्वो मस्जेर्मिनू–' इति पाठः । अयं तु सिद्धान्तकौमुदीस्थः ॥

सर्वा–' (५।२।९) इति खः ॥ (१) ॥*॥ एकम् **'विस्तृतपादत्राणस्य'** ॥

नध्री वर्ध्री वरत्रा स्यात्

नेति ॥ नह्यतेऽनया । 'णह बन्धने' (दि० उ० अ०) । 'दात्रि–' (३।२।१८२) इति ष्ट्रन् ॥ (१) ॥*॥ वर्धते । 'वृधु वर्धने' (भ्वा० आ० से०) । 'वृधिवपिभ्यां रन्' (उ० २। २७) । गौरादित्वात् (४।१।४१) ङीष् ॥ (२) ॥*॥ व्रियतेऽनया । 'वृञ् वरणे' (स्वा० उ० से०) । 'वृञश्चित्' (उ० ३। १०७) इत्यत्रन् ॥ (३) ॥*॥ त्रीणि **'चर्ममयरज्जोः'** ॥

अश्वादेस्ताडनी कशा ।

अश्वेति ॥ ताड्यतेऽनया । 'तड आघाते' (चु० प० से०) ण्यन्तः । ल्युट् (३।३।११७) ॥*॥ कशति । 'कश शब्दे' ( ) । 'कश गतिशासनयोः' (अ० आ० से०) वा । अनिलो नुम् । अच् (३।१।१३४) ॥ (१) ॥*॥ आदिना उष्ट्रगर्दभचौरादिग्रहः ॥*॥ एकम् **'प्रतोदस्य'** ॥

चाण्डालिका तु कण्डोलवीणा चण्डालवल्लकी ॥३१॥

चेति ॥ चण्डालस्येयम् । 'तस्येदम्' (४।३।१२०) इत्यण् । 'टिड्ढा–' (४।१।१५) इति ङीप् । स्वार्थे कन् (ज्ञापि० ५।४।५) चण्डालेन कृता वा । 'कुलालादिभ्यो वुञ्' (४।३। ११८) **'चाण्डालिका** किंनरायामुमायामोषधीभिदि' (इति मेदिनी) ॥ (१) ॥*॥ कण्डते । 'कडि मदे' (भ्वा० प० से०) । बाहुलकादोलच् ।—'कडिकपि–'—इति मुकुटस्त्वपाणिनीयः । कण्डोलस्य चण्डालस्य वीणा ॥*॥ **'कटोलवीणा'** इति पाठे तु कटति । 'कटे वर्षादौ' (भ्वा० प० से०) । 'कपिगडि–' (उ० १।६६) इत्योलच् ॥ (२) ॥*॥ चण्डालस्य वल्लकी ॥ (३) ॥*॥ त्रीणि **'चाण्डालिकायाः'** **'किंगरि'** इति ख्यातायाः ॥

नाराची स्यादेषणिका

नेति ॥ खल्पो नाराचो बाणभेदः । गौरादिः (४।१।४१) ॥ (१) ॥*॥ इष्यतेऽनया 'इष गतौ' (दि० प० से०) । ल्युट् (३।३।११७) । कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ द्वे **'सुवर्णतुलायाः'** ॥

शाणस्तु निकषः कषः ।

शेति ॥ शण्यते । 'शण दाने' (भ्वा० प० से०) । 'अकर्तरि–' (३।३।१९) इति घञ् । श्यति वा । 'शो तनूकरणे' (दि० प० अ०) । बाहुलकाण्णः । 'पुंसि[2] स्यात्, **शाणो** मासचतुष्टये । लोहादीनां च निकषे **शाणी** प्रावरणान्तरे' (इति मेदिनी) ॥ (१) ॥*॥ निकषति । 'कष हिंसायाम्' (भ्वा० प० से०) । अच् (३।१।१३४) ।—निकष्यतेऽत्र । 'गोचर–' (३।३।११९) इत्यादिना घः—इति मुकुटश्चिन्त्यः । तत्र कषेरपाठात् । नेर्ग्रहणमुपसर्गान्तरनिवृत्त्यर्थम् । **'निकषः** शाणफलके **(निकषा** यातुमातरि)' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ (३) ॥*॥ त्रीणि **'सुवर्णपरीक्षणपाषाणस्य'** । खड्गादितीक्ष्णीकरणयन्त्रस्य इत्यन्ये ॥

वृश्चनः पत्रपरशुः

व्रिति ॥ वृश्च्यतेऽनेन । 'ओ व्रश्चू छेदने' (तु० प० से०) 'करणाधि–' (३।३।११७) इति ल्युट् ॥ (१) ॥*॥ पत्रमिव परशुः ॥ (२) ॥*॥ द्वे **'सुवर्णादिच्छेदनद्रव्यस्य'** ॥—लघुकरवतस्य—इत्यन्ये ॥

एषिका तूलिका समे ॥ ३२ ॥

एषीति ॥ इष्यते । 'इष गत्यादौ' (दि० प० से०) । 'कृत्यादिभ्यो वुन्' (उ० ५।३५) ॥*॥ **'ईषिका'** इति पाठे ईष्यते । ईषति वा । 'ईष उञ्छे' (भ्वा० प० से०) । कुन् (उ० २।३२) ॥ (१) ॥*॥ तूलति । 'तूल निष्कर्षे' (भ्वा० प० से०) । कुन् (उ० २।३२) ॥ (१) ॥*॥ द्वे **'वीरणादिशलाकायाः'** ॥

तेजसावर्तनी मूषा

तेजेति ॥ तेजसो विकारः सुवर्णादिरावर्त्यतेऽस्याम् 'वृतु वर्तने' (भ्वा० आ० से०) । ण्यन्तः । अधिकरणे ल्युट् (३।३। ११७) ॥ (१) ॥*॥ मूषति । 'मूष स्तेये' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः ॥*॥ 'मुष स्तेये' (क्र्या० प० से०) इत्यस्मात् भिदाद्यङि (३।३।१०४) हस्वादिरपि ह्रस्वा मूषा मूषी गौरादिः (४।१।४१) । मूषा । **'मूषा त्वावर्तनी मूषी'** इति शब्दार्णवः । यत्तु–'मुष स्तेये' (क्र्या० प० से०) 'गुरोश्च हलः' (३।३।१०३) इत्यकारप्रत्ययः । टापि 'अन्येषामपि–' (६।१।१३७) इति दीर्घत्वे मूषा मुषा च–इति मुकुटः । तन्न । गुरुलाभावात् । दीर्घस्य धातोः सत्वेन 'अन्येषामपि–' इत्यस्यानुपयोगाच्च ॥ (२) ॥*॥ द्वे **'मूषायाः'** ॥

भस्त्रा चर्मप्रसेविका ।

भेति ॥ भस्यतेऽनया । 'भस दीप्तौ' (जु० प० से०) 'हुयामाश्रुभसिभ्यस्त्रन्' (उ० ४।१६८) । 'तितुत्र–' (७।२। ९) इति नेट् । अजादिः (४।१।४) ॥ (१) ॥*॥ चर्मणा प्रसीव्यते । 'षिवु तन्तुसंताने' (दि० प० से०) । 'कृत्यादिभ्यो वुन्' (उ० ५।३५) । 'संज्ञायाम्' (३।३।१०९) इति ण्वुल् वा ॥ (२) ॥*॥ द्वे **'अग्निज्वलनार्थस्य'** ॥

आस्फोटनी वेधनिका

आस्फविति ॥ आस्फोट्यतेऽनया । 'स्फुट भेदने' चुरादिः । करणे ल्युट् (३।३।११७) ॥*॥ ललन्ती स्फोटयतीति **'लास्फोटनी'** । पृषोदरादिः (६।३।१०९) इति मुकुटः ॥ (१) ॥*॥ विध्यतेऽनया । 'विध विधाने' (तु० प० से०) । ल्युट् (३।३।११७) । स्वार्थे कन् (ज्ञापि० ५।४।५)

१—सिद्धान्तकौमुद्यादिषु कशेरनिदित्त्वाङ्गीकाराद्व्यर्थमिदम् । २—'पुंसि स्यात्' इत्यस्य स्वयमपि वेणुशब्दव्याख्यायां तच्छेषत्वेनैव व्याख्यातत्वेनात्र लेखोऽनुचित इव भाति ॥

'वेधनी तु लास्फोटन्यां **स्फोटनी वृषदंशिका**' इति वाचस्पतिः ॥ (२) ॥*॥ द्वे **'मुक्तादिवेधिन्याः'** ॥

कृपाणी कर्तरी समे ॥ ३३ ॥

कृति ॥ कृपामणति । 'अण शब्दे' (भ्वा० प० से०) । अण् (३।२।१) । ङीप् (४।१।१५) ॥ (१) ॥*॥ कृन्तति । 'कृती छेदने' (तु० प० से०) । बाहुलकादरः । यद्वा कर्तनम् । घञ् (३।३।१८) । कर्तं राति । 'रा दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । गौरादिः (४।१।४१) ॥ (२) ॥*॥ द्वे **'कर्तर्याः'** ॥

वृक्षादनी वृक्षभेदी

वृक्षादनी ॥ वृक्षमत्ति । 'अद भक्षणे' (अ० प० अ०) । 'कृत्यल्युटः–' (३।३।११३) इति ल्युट् ॥ (१) ॥*॥ वृक्षं भेत्तुं शीलमस्य । 'भिदिर् विदारणे' (रु० उ० अ०) 'सुपि–' (३।२।७८) इति णिनिः ॥ (२) ॥*॥ द्वे **'काष्ठतनूकरणसाधनस्य'** ॥

टङ्कः पाषाणदारणः ।

टेति ॥ टङ्कयति । 'टकि बन्धने' चुरादिः । अच् (३।१।१३४) । 'टम्' इति शब्दं कायति वा । 'कै शब्दे' (भ्वा० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । 'सुपि–' (३।२।४) इति वा ॥ (१) ॥*॥ पाषाणो दार्यतेऽनेन । 'दृ विदारणे' (क्या० प० से०) । ण्यन्तः ल्युट् (३।३।११७) ॥ (२) ॥*॥ द्वे **'पाषाणदारणार्थस्य घनभेदस्य'** ॥

क्रकचोऽस्त्री करपत्रम्

क्रेति ॥ 'क्र' इति कचति 'कच शब्दे' (भ्वा० आ० से०) अच् (३।१।१३४) । **'(क्रकचः** करपत्रेऽस्त्री ग्रन्थिलाख्यतरौ पुमान्' इति मेदिनी) ॥ (१) ॥*॥ करेण कराद्वा पतति । 'पत्लृ पतने' (भ्वा० प० से०) । ष्ट्रन् (उ० ४।१५९) ॥ (२) ॥*॥ द्वे **'काष्ठादिविदारणार्थस्य शस्त्रस्य' 'करोत'** इति ख्यातस्य ॥

आरा चर्मप्रभेदिका ॥ ३४ ॥

आरेति ॥ आ इयर्ति, ऋच्छति वा । 'ऋ गतौ' (जु०, भ्वा० प० अ०) । अच् (३।१।१३४) । आर्यते वा । भिदादौ (३।३।१०४) 'आरा शस्त्र्याम्' इति पाठात् साधुः । (**'आरा** चर्मप्रभेदिन्यां पुंसि भौमशनैश्चरे' इति मेदिनी) ॥ (१) ॥*॥ चर्मणः प्रभेदिका ॥ (२) ॥*॥ द्वे **'चर्मखण्डनार्थस्य शस्त्रभेदस्य'** ॥

सूर्मी स्थूणायःप्रतिमा

स्विति ॥ शोभना ऊर्मिः बहुव्रीहिर्वा । 'सर्वतोऽक्षिचर्थात्–' (ग० ४।१।४५) इति गौरादित्वात् (४।१।४१) वा ङीष् ।—'ग्रीष्मजालमशूर्म–' इति मप्रत्यये शूरादेशे च—इति मुकुटस्थपाणिनीयः ।—**'शूर्मी** तालव्यादिः'—इत्यप्युक्तम् 'सूर्म्य शुषिरामिव' इति श्रुतिविरोधात् ॥ (१) ॥*॥ तिष्ठति । 'ष्ठा गतिनिवृत्तौ' (स्वा० प० अ०) । 'राल्लासाल्लास्थूणा–' (उ० ३।१५) इति साधुः । **'स्थूणा** सूर्म्या स्तम्भे रुगन्तरे' इति हैमः ॥ (२) ॥*॥ अयसः प्रतिमा ॥ (३) ॥*॥ त्रीणि **'लोहप्रतिमायाः'** ॥

शिल्पं कर्म कलादिकम् ।

शीति ॥ शील्यते । 'शील समाधौ' (भ्वा० प० से०) । शल्यते वा । 'शल गतौ' (भ्वा० प० से०) । 'खष्पशिल्प–' (उ० ३।२८) इति साधुः । **'शिल्पं** सुवे क्रियादिके' इति विश्वः (हैमः) ॥ (१) ॥*॥ कला नृत्यगीतादिरूपा चतुःषष्टिभेदभिन्ना । आदिना सुवर्णकारादिकर्मग्रहः ॥*॥ एकम् **'कलाकौशल्यादिकर्मणः'** ॥

प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया ॥ ३५ ॥

प्रतिकृतिरर्चा पुंसि प्रतिनिधिः

प्रेति ॥ प्रतिकृत्य मीयतेऽनेन । 'माङ् माने' (अ० आ० अ०) । ल्युट् (३।३।११७) ॥ (१) ॥*॥ प्रतिकृतिर्बिम्बं यस्य । 'कुगति–' (२।२।१८) इति समासः ॥ (२) ॥*॥ प्रतिमीयतेऽनया । 'आतश्चोपसर्गे' (३।३।१०६) । इत्यङ् । (**'प्रतिमा** गजदन्तस्य बन्धे चानुकृतावपि' इति मेदिनी) ॥ (३) ॥*॥ प्रतियात्यतेऽनया । 'यत निकारोपस्कारयोः' (चुरादिः) 'ण्यासश्रन्थः–' (३।३।१०७) इति युच् ॥ (४) ॥*॥ प्रकृष्टा छाया ॥ (५) ॥*॥ प्रकृष्टा कृतिः । प्रतिनिधेः कृतिर्वा ॥ (६) ॥*॥ अर्च्यते । 'अर्च पूजायाम्' (भ्वा० प० से०) । 'गुरोश्च हलः' (३।३।१०३) इत्यः ॥ (७) ॥*॥ प्रतिनिधीयते सदृशीक्रियते । 'डुधाञ्' (जु० उ० अ०) । 'उपसर्गे घोः किः' (३।३।९२) ॥ (८) ॥*॥ अष्टौ **'प्रतिमायाः'** ॥

उपमोपमानं स्यात् ।

उपेति ॥ उपमातेर्भावेऽङ् (३।३।१०६) ॥ (१) ॥*॥ ल्युट् (३।३।११५) । करणे (३।३।११७) वा ॥ (२) ॥*॥ द्वे करणे भावे च । येनोपमीयते, या चोपमितिः, तयोरेते नाम्नी । केचित्तु—पूर्वान्विते—इत्याहुः ॥

वाच्यलिङ्गाः समस्तुल्यः सदृक्षः सदृशः सदृक् ३६ साधारणः समानश्च

वेति ॥ समति । 'सम वैक्लव्ये' (भ्वा० प० से०) अच् (३।१।१३४) ॥ (१) ॥*॥ तुलया संमितः । **'नौवयो–'** (४।४।९१) इति यत् ॥ (२) ॥*॥ समान इव पश्यति । 'त्यदादिषु–' (३।२।६०) इति कञ्क्विनौ वंसश्च । 'दृग्दृशवतुषु' (६।३।८९) 'दृक्षे च' (वा० ६।३।८९) इति सभावः

१—समानशब्दस्य त्यदादित्वाभावादत्रास्योपन्यासोऽसंगतः । तस्मात् 'समानान्ययोश्च' (वा० ३।२।६०) इत्यनेन बोध्यौ ॥
२—'दृग्दृशवतुषु' (६।३।८९) इत्यत्र 'दृक्षे च' इति वार्तिकबलादनुक्तोऽपि क्सः कल्प्यते—इति 'त्यदादिषु–' (३।२।६०) इत्यत्र भाष्यप्रदीपोद्द्योतकृत् ॥

॥ (३) ॥*॥ (४) ॥*॥ (५) ॥*॥ सह आधारणेन वर्तते । 'वोपसर्जनस्य' (६।३।८२) इति सभावः । साधायाः संसिद्धेरणो वाचक इव ॥ (६) ॥*॥ सह मानेन वर्तते । समानं मानमस्य, इति वा । 'समानस्य च्छन्दसि' (६।३।८४) इति सः ॥ (७) ॥*॥ सप्त वाच्यलिङ्गाः ॥ सप्त **'तुल्यस्य'** ॥

स्युरुत्तरपदे त्वमी ।
नभसंकाशनीकाशप्रतीकाशोपमादयः ॥ ३७ ॥

स्युरिति ॥ अमी निभादय उत्तरपदस्था एव सदृशवचना वाच्यलिङ्गाः स्युः । यथा 'पितृनिभः पुत्रः' 'मातृनिभा कन्या' 'देवनिभमपत्यम्' इति । नियतं भाति । 'आतश्चोपसर्गे' (३।१।१३६) इति कः । **'निभस्तु** कथितो व्याजे पुंलिङ्गः सदृशे त्रिषु' (इति मेदिनी) ॥ (१) ॥*॥ संकाशते । 'काश्ट दीप्तौ' (भ्वा० आ० से०) । अच् (३।१।१३४) । **'संकाशः** सदृशेऽन्तिके' इति हैमः ॥ (२) ॥*॥ नितरां काशते । 'इकः काशे' (६।३।१२३) इति दीर्घः । **'नीकाशो** निश्चये तुल्ये' इति विश्वः (मेदिनी) ॥ (३) ॥*॥ प्रति काशते ॥ (४) ॥*॥ आदिना भूतरूपकल्पादयः यथा पितृभूतः, पितृरूपः, पितृकल्पः, इति ॥

कर्मण्या तु विधाभृत्याभृतयो भर्म वेतनम् ।
भरण्यं भरणं मूल्यं निर्वेशः पण इत्यपि ॥ ३८ ॥

केति ॥ कर्मणा संपद्यते । 'कर्मवेषाद्यत्' (५।१।१००) । कर्मणि साधुर्वा । 'तत्र साधुः' (४।४।९८) इति यत् ॥ (१) ॥*॥ कर्माणि विधीयन्तेऽनया । 'डुधाञ्' (जु० उ० अ०) । 'आतश्चोपसर्गे' (३।३।१०६) इत्यङ् ॥ (२) ॥*॥ भ्रियन्ते कर्मकरा अनया । 'भृञ् भरणे' (भ्वा० उ० अ०) । 'संज्ञायां समज–' (३।३।९९) इति क्यप् ॥ (३) ॥*॥ 'कर्मणि भृतौ' (३।२।२२) इति निर्देशात् क्तिन्नपि ॥ (४) ॥*॥ भ्रियतेऽनेन । 'डुभृञ्' (जु० उ० अ०) 'भृञ्' (भ्वा० उ० अ०) वा । मनिन् (उ० ४।१४५) ॥ (५) ॥*॥ वीयतेऽनेन । 'वी गत्यादौ' (अ० प० अ०) । 'वीपतिभ्यां तनन्' (उ० ३।१५०) ॥ (६) ॥*॥ भरणे साधु । 'तत्र साधुः' (४।४।९८) इति यत् ॥ (७) ॥*॥ भ्रियतेऽनेन । ल्युट् (३।३।११७) । **'(भरणी** घोषके ऋक्षे) **भरणं** वेतने भृतौ' इति विश्वः (मेदिनी) ॥ (८) ॥*॥ मूलेनानाम्यम् । 'नौवयोधर्म–' (४।४।९१) इति यत् । **'मूल्यं** स्याद्वेतने वह्ने' इति विश्वः (मेदिनी) ॥ (९) ॥*॥ निर्विश्यते अनेन वा । 'विश प्रवेशने' (तु० प० से०) । 'अकर्तरि च' (३।३।१९) इति 'हलश्च' (३।३।१२१) इति वा घञ् । **'निर्वेशस्तु** पुमान्भोगे वेतने मूर्च्छनेऽपि च' (इति मेदिनी) ॥ (१०) ॥*॥ पण्यते । 'नित्यं पणः परिमाणे' (३।३।६६) इत्यप् । 'पुंसि–' (३।३।११८) इति घो वा । **'पणो** वराटमाने स्यान्मूल्ये कार्षापणे

१—भृतिरत्र पोषणमात्रम्—इत्यनेकार्थकैरवाकरकौमुदी ॥

ग्लहे । क्रय्यशाकादिके द्यूतव्यवहारे भृतौ धने' (इति मेदिनी) ॥ (११) ॥*॥ एकादश **'वेतनस्य'** ॥

सुरा हलिप्रिया हाला परिस्रुद्वरुणात्मजा ।
गन्धोत्तमा प्रसन्नेराकादम्बर्यः परिस्रुता ॥ ३९ ॥
मदिरा कश्यमद्येऽपि

स्विति ॥ सुष्ठु राति याम् । 'रा दाने' (अ० प० अ०) । सु अतीव रायन्त्यनया वा । 'रै शब्दे' (भ्वा० प० से०) । 'आतश्चोपसर्गे' (३।३।१०६) इत्यङ् । **'सुरा** चषकमद्ययोः' । पुंलिङ्गस्त्रिदिवेशे स्यात्' (इति मेदिनी) ॥ (१) ॥*॥ हलिनो बलस्य प्रिया ॥ (२) ॥*॥ हलमस्त्यस्याम् । 'हल विलेखने' (भ्वा० प० से०) । ज्वलादित्वात् (३।१।१४०) णः । हल्यतेऽनया वा । 'हलश्च' (३।३।१२१) इति घञ् । **'हालः** सातवाहनपार्थिवे । **हाला** सुरायाम्' इति विश्वः (हैमः) ॥ (३) ॥*॥ परितः स्रवति । 'ष्रु स्रवणे' (भ्वा० प० से०) । क्विप् (३।३।७६) । तुक् (६।१।७१) ॥ (४) ॥*॥ वरुणालयोऽपि वरुणः । तस्यात्मजा ॥ (५) ॥*॥ गन्धेनोत्तमा । गन्ध उत्तमो यस्या वा । राजदन्तादिः (२।२।३१) ॥ (६) ॥*॥ प्रसीदति स्म । 'षद विशरणादौ' (भ्वा० प० अ०) । 'गत्यर्था–' (३।४।७२) इति क्तः । 'रदाभ्याम्–' (८।२।४२) इति निष्ठानत्वम् । **'प्रसन्ना** स्त्री सुरायां स्यादच्छसंतुष्टयोस्त्रिषु' (इति मेदिनी) ॥ (७) ॥*॥ इं कामं राति 'रा दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥ (८) ॥*॥ कुत्सितमम्बरम् । 'कुगति–' (२।२।१८) इति समासः । 'कोः कत्तत्पुरुषेऽचि' (६।३।१०१) । कदम्बरं नीलाम्बरमस्यास्ति । अर्शआद्यच् (५।२।१२७) । तस्येयम् । 'तस्येदम्' (४।३।१२०) इत्यण् । कदम्बे जातो रसः । 'तत्र जातः' (४।३।५३) इत्यण् । कादम्बं राति वा । कः (३।२।३) । 'गौरादिः' (४।१।४१) । **'कादम्बरस्तु** दध्यग्रे मद्यभेदे नपुंसकम् । स्त्री वारुणीपरभृताभारतीसारिकासु च' (इति मेदिनी) ॥ (९) ॥*॥ भागुरिमते टापि 'परिस्रुता' । यद्वा परितः सूयते स्म लोकैः । 'सू गतौ' (भ्वा० प० अ०) । क्तः (३।२।१०२) । **'परिस्रुता** स्त्री वारुण्यां स्यन्ने स्यादभिधेयवत्' (इति मेदिनी) ॥ (१०) ॥*॥ माद्यत्यनया । 'मदी हर्षे' (दि० प० से०) । 'इषिमदिमुदि–' (उ० १।५१) इत्यादिना किरच् ॥ (११) ॥*॥ कश्यते अनेन वा । 'कश शब्दे' ( ) बाहुलकाद्यः । 'मद्याश्वमध्ययोः **कश्यम्'** इति रन्तिदेवः । **'कश्यस्त्रिषु** कशार्हे स्यात्क्लीबं मद्याश्वमद्ययोः' इति विश्वः (मेदिनी) ॥ (१२) ॥*॥ माद्यत्यनेन । 'गदमदचर–' (३।१।१००) इति यत् ॥ (१३) ॥*॥ त्रयोदश **'मद्यसामान्यस्य'** ॥

अवदंशस्तु भक्षणम् ।

अवेति ॥ अवदश्यते । 'दंश दशने' (भ्वा० प० अ०) । कर्मणि घञ् (३।३।१९) । भावे (३।३।१८) वा ॥ (१) ॥*॥ एकं **'पानरुचिजनकभक्षणस्य'** ॥

शुण्डा पानं मदस्थानम्

श्विति ॥ शुन्यते । 'शुन गतौ' (तु० प० से०) । 'जमन्ताडुः' (उ० १।११२) । '**शुण्डा** पानगृहे मता । (अप्यम्बुहस्तिनी वेश्याहस्तिहस्तसुरासु च' इति मेदिनी) । '**शुण्डा**पि जलहस्तिन्यां मदिराकरिहस्तयोः । नालिन्यां वारयोषायां **शुण्डस्तु** मदनिर्झरे)' इति विश्वः ॥ (१) ॥*॥ पिबन्त्यत्र । 'पा पाने' (भ्वा० प० अ०) । 'अधिकरणे ल्युट्' (३।३।११७) । '**पानं** पीतिभाजनरक्षणे' (इति मेदिनी) ॥ (२) ॥*॥ मदस्य स्थानम् ॥ (३) ॥*॥ त्रीणि '**मद्यगृहस्य**' ॥

मधुवारा मधुक्रमाः ॥ ४० ॥

मेति ॥ मधुनो वारः ॥ (१) ॥*॥ मधुनः क्रमः ॥ (२) ॥*॥ द्वे '**मधुपानावसरस्य**' ॥

मध्वासवो माधवको मधु माद्वीकमद्वयोः ।

मेति ॥ मधुकपुष्पं मधु । तस्यासवः ॥ (१) ॥*॥ मधुना कृतः संधितः । 'कुलालादिभ्यो वुञ्' (४।३।११८) ॥ (२) ॥*॥ मन्यते । 'मन ज्ञाने' (दि० आ० अ०) । 'फलिपाटि–' (उ० १।११८) इति साधु । '**मधु** पुष्परसे क्षौद्रे मद्ये ना तु मधुद्रुमे । वसन्तदैत्यभिच्चैत्रे स्याज्जीवन्त्यां तु योषिति' इति विश्वमेदिन्यौ ॥ (३) ॥*॥ मृद्वीका द्राक्षा । तस्या विकारः । 'तस्य विकारः' (४।३।१३४) इत्यण् 'अनुदात्तादेः' (४।३।१४०) इत्यञ् वा ॥*॥ केचित्तु—'**माध्वीकम्**' इति पठन्ति । तत्र पृषोदरादित्वम् ॥ (४) ॥*॥ अद्वयोः क्लीबमित्यर्थः ॥*॥ चत्वारि '**मधुकपुष्पकृतमद्यस्य**' ॥ स्वामी तु—द्वौ द्वौ पर्यायौ—इत्याह ॥

मैरेयमासवः शीधुः

मायिति ॥ मिरायां देशविशेषे ओषधिविशेषे वा भवम् । 'तद्यादिभ्यो ढक्' (४।२।९७) ॥ (१) ॥*॥ आसूयते । 'षुञ् अभिषवे' (स्वा० उ० अ०) । 'ऋदोरप्' (३।३।५७) ॥ (२)॥*॥ शेरतेऽनेन । 'शीङो धुक्–' (उ० ५।३८) अर्धर्चादिः (२।४।३१) । 'पुंनपुंसकयोर्दारुजीवातुस्थाणुशीधवः' इति त्रिकाण्डशेषः ॥ (३) ॥*॥ यद्यपि 'शीधुरिक्षुरसैः पक्वैरपक्वैरासवो भवेत् । मैरेयं धातकीपुष्पगुडधानाम्बुसंहितम्' इति माधवः । तथापि मेदमनादृत्योक्तम् ॥*॥ त्रीणि '**इक्षुशाकादिजन्यस्य मद्यस्य**' ॥

मेदको जगलः समौ ॥ ४१ ॥

मेदेति ॥ मेद्यति । 'ञिमिदा स्नेहने' (दि० प० से०) । 'वुन् कृञादिभ्यः–' (उ० ५।३५) ॥ (१) ॥*॥ भृशं गलति, गल्यते वा । '**गल** अदने' (भ्वा० प० से०) यङ्लुगन्तादच् (३।१।१३४) । संज्ञापूर्वकत्वात् 'दीर्घोऽकितः' (७।४।८३) इति दीर्घो न । '**जगलो** मदनद्रुमे । मेदके पिष्टमद्ये च' (इति मेदिनी) ॥ (२) ॥*॥ द्वे '**सुराकल्कस्य**' ॥

१ कर्मण्यचोऽप्राप्त्या त्रिन्त्यमिदम् ॥

संधानं स्यादभिषवः

समिति ॥ संधीयते । 'डुधाञ्' (जु० उ० अ०) । ल्युट् (३।३।११३) । भावे (३।३।११५) वा । '**संधानं** स्यादभिषवे तथा संघट्टनेऽपि च' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ अभिषूयते । 'षुञ् अभिषवे' (स्वा० उ० अ०) । 'ऋदोरप्' (३।३।५७) । भावे वा । 'भवेद्**भिषवः** स्नाने मद्यसंधानयज्ञयोः' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ द्वे '**आम्रादिसंधानस्य**' ॥

किण्वं पुंसि तु नग्नहूः ।

कीति ॥ कणनम् । 'कण' शब्दे (भ्वा० प० से०) । 'उल्बादयश्च' (उ० ४।९५) इति साधुः । कर्मणि वा । '**किण्वं** पापे सुरावीजे' इति विश्वः ॥ (१) ॥*॥ ह्वानम्, हूयते वा । 'ह्वेञ्' (भ्वा० उ० अ०) संपदादि क्विप् (वा० ३।३।१०८) । नग्नस्य हूः ॥ (२) ॥*॥ द्वे '**नानाद्रव्यकृतसुरावीजस्य**' ॥ —मत्तनग्नकृताह्वानस्य—इत्यन्ये ॥

कारोत्तरः सुरामण्डः

केति ॥ कारेण क्रियया उत्तरः ।–'**कारोत्तमः**–' इति स्वामी ॥ (१) ॥*॥ सुराया मण्डः ॥ (२) ॥*॥ द्वे '**सुरामण्डस्य**' ॥

आपानं पानगोष्ठिका ॥ ४२ ॥

आपेति ॥ आ संभूय पिबन्त्यत्र । ल्युट् (३।३।११७) ॥ (१) ॥*॥ पानस्य गोष्ठी । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ द्वे '**पानार्थायाः सभायाः**' ॥

चषकोऽस्त्री पानपात्रम्

चेति ॥ चष्यतेऽनेन । 'चष भक्षणे' (भ्वा० उ० से०) । कुन् (उ० २।३२) । '**चषकोऽस्त्री** सुरापात्रे मद्यमद्यप्रभेदयोः' (इति मेदिनी) ॥ (१) ॥*॥ पानस्य पात्रम् ॥ (२) ॥*॥ द्वे '**मद्यपात्रस्य**' ॥

सरकोऽप्यनुतर्षणम् ।

सेति ॥ स्रियते 'सृ गतौ' (भ्वा० प० अ०) । 'वुन् कृञादिभ्यः' (उ० ५।३५) । '**सरकः** शीधुपानेक्षुशीधुनोर्मद्यभाजने' इत्यजयः । अपिशब्दात् सरकोऽप्यस्त्री । 'सरकं वा **नानुतर्षो** ना' इति रत्नकोषः ॥ (१) ॥*॥ अनुतर्षणम् । अनेन वा । 'तृषा पिपासायाम्' (दि० प० से०) । भावे (३।३।११४) करणे (३।३।११७) वा ल्युट् ॥*॥ घञि (३।३।१८) 'अनुतर्षः' अपि । 'चषकश्चानुतर्षश्च सरकश्च' इति भागुरिः ॥ (२) ॥*॥ द्वे '**मद्यपानस्य**' ।—चत्वारि '**मद्यपानपात्रस्य**'—इति मुकुटः ॥

धूर्तोऽक्षदेवी कितवोऽक्षधूर्तौ द्यूतकृत्समाः ॥ ४३ ॥

धूर्तेति ॥ धूर्वति । 'धुर्वी हिंसायाम्' (भ्वा० प० से०) । 'हसिमृग्रिण्–' (उ० ३।८६) इति तन् । 'राल्लोपः' (६।४।२१) । '**धूर्तं** तु खण्डलवणे धत्तूरे ना विटे त्रिषु' (इति मेदिनी) । '**धार्तः**' इति पाठे धावनम् । 'धावु गतौ' (भ्वा०

उ० से०)। संपदादिः (वा० ३।३।१०८)। बाहुलकाद्वलोपः। धा धावनेनार्तिः धार्तिरस्यास्ति । ज्योत्स्नादित्वात् (वा० ५।२।१०३)। यद्वा धा धावनेनार्तः ॥ (१) ॥*॥ अक्षैर्दीव्यति । 'सुपि–' (३।२।७८) इति णिनिः ॥ (२) ॥*॥ 'कि ज्ञाने' (जु० प० अ०)। भावे क्तः (३।३।११४)। कितं वायति । 'ओ वै शोषणे' (भ्वा० प० अ०) कितने वाति वा । 'वा गन्धने' (अ० प० अ०)। 'आतोऽनुप–' (३।२।३) इति कः **'कितवो धूर्त**वन्मत्ते वञ्चके कनकाह्वये' इति विश्वः ॥ (३) ॥*॥ अक्षेषु धूर्तः । 'सप्तमी शौण्डैः' (२।१।४०) इति समासः ॥ (४) ॥*॥ द्यूतं करोति । क्विप् । (३।२।७६) ॥ (५) ॥*॥ पञ्च **'द्यूतकृतः'** ॥

स्युर्लज्जकाः प्रतिभुवः

स्युरिति ॥ लज्यते स्म । 'ओलस्जी व्रीडे' (तु० आ० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (१) ॥*॥ प्रति प्रतिनिधिर्भवति । क्विप् (३।२।७६) ॥ (२) ॥*॥ द्वे **'ऋणादौ प्रतिनिधिभूतस्य' 'जामिन'** इति ख्यातस्य ॥

सभिका द्यूतकारकाः ।

सेति ॥ सभाद्यूतमाश्रयत्वेनास्यास्ति । व्रीह्यादित्वात् (५।२।११६) ठन् । **'सभा**द्यूतं सभागृहम्' इति रुद्रः ॥ (१) ॥*॥ द्यूतं कारयन्ति । अण् (३।२।१)। स्वार्थे कन् । (ज्ञा० ५।४।५)। ण्वुलि (३।१।१३३) तु द्यूतस्य कारकः ॥ (२) ॥*॥ द्वे **'ये द्यूतं कारयन्ति तेषाम्'** ॥

द्यूतोऽस्त्रियामक्षवती कैतवं पण इत्यपि ॥ ४४ ॥

द्यूति ॥ देवनम् । 'दिवु क्रीडादौ' (दि० प० से०) । भावे क्तः (३।३।११४) ॥ (१) ॥*॥ अक्षाः पाशकाः सन्त्यस्याम् । मतुप् (५।२।९४) । लोकात्स्त्रीत्वम् ॥ (२) ॥*॥ कितवस्य कर्म । युवादित्वात् (५।१।१३०) अण् । **'कैतवं** तु छले द्यूते **कैतवः** कितवे रिपौ' (इति मेदिनी) ॥ (३) ॥*॥ पणो ग्लहोऽस्त्यस्मिन् । अर्श आद्यच् (५।२।१२७) ॥ (४) ॥*॥ चत्वारि **'द्यूतक्रीडनस्य'** ॥

पणोऽक्षेषु ग्लहः

पेति ॥ पण्यते उत्सृज्यते । 'पण व्यवहारे' (भ्वा० आ० से०) । 'नित्यं पणः–' (३।३।६६) इति योगविभागादप् ॥ (१) ॥*॥ ग्लह्यते अनेन । 'ग्लहू आदाने' (भ्वा० आ० से०) । 'पुंसि–' (३।३।११८) इति घः 'हलश्च' (३।३।१२१) इति घञ् वा । संज्ञापूर्वकत्वान्न वृद्धिः । गृह्यते वा । 'अक्षेषु ग्लहः' (३।३।७०) इति साधुः ॥ (२) ॥*॥ द्वे **'द्यूते लाप्यमानस्य'** ॥

अक्षास्तु देवनाः पाशकाश्च ते ।

अक्षा इति ॥ अक्षति । 'अक्षू व्याप्तौ' (भ्वा० प० से०) । अच् (३।१।१३४) । **'अक्षो** ज्ञानात्मशकटव्यवहारेषु पाशके । रुद्राक्षेन्द्राक्षयोः सर्पे विभीतकतरावपि । चक्रे कर्षे पुमान् क्लीबं तुत्थे सौवर्चलेन्द्रिये' (इति मेदिनी)। (१) ॥*॥ दीव्यन्ति येन । 'करणा–' (३।३।११७) इति ल्युट् । **'देवनं** व्यवहारे स्याज्जिगीषाक्रीडयोरपि । अक्षेषु **देवनः** प्रोक्तः' (इति विश्वः) ॥ (२) ॥*॥ पाशयति । 'पश बन्धे' चुरादिः । ण्वुल् (३।१।१३३) । कुन् (उ० २।३२) वा ॥ (३) ॥*॥ त्रीणि **'पशकस्य'** ॥

परिणायस्तु शारीणां समन्तान्नयनेऽस्त्रियाम् ॥४५॥

पेति ॥ परितो वामदक्षिणतो नयनम् । 'णीञ्' (भ्वा० उ० अ०) 'परिन्योः–' (३।३।३७) इति घञ् ॥ (१) ॥*॥ एकम् **'शारीणां समन्तान्नयनस्य'** ॥

अष्टापदं शारिफलम्

अष्टेति ॥ पञ्चौ पञ्चौ अष्टौ पदान्यस्य । 'अष्टनः संज्ञायाम्' (६।३।१२५) इति दीर्घः । अष्टापदमस्त्रियाम् । **'अष्टापदोऽस्त्री** कनके शारीणां फलकेऽपि च । (**अष्टापदी** चन्द्रमल्लयां शरभे मर्कटे पुमान्)' इति मेदिनी ॥ (१) ॥*॥ शारीणां फलं पट्टः । **'फलं** हेतुसमुत्थे स्यात्फलके व्युष्टिलाभयोः' इति विश्वः ॥ (२) ॥*॥ **'शारीणां खेलनाधारपट्टस्य'** द्वे ॥

प्राणिद्यूतं समाह्वयः ।

प्रेति ॥ प्राणिभिः कृतं द्यूतम् ॥ (१) ॥*॥ सम्यगाह्वयन्तेऽत्र । 'ह्वेञ्' (भ्वा० उ० अ०) । 'पुंसि–' (३।३।११८) इति घः । बाहुलान्नात्वम् ॥ (२) ॥*॥ द्वे **'द्यूतस्य'** ॥

सर्वलिङ्गासंग्रहादसंपूर्णतां परिहरति—

उक्ता भूरिप्रयोगत्वादेकस्मिन्येऽत्र यौगिकाः ॥ ४६ ॥
ताद्धर्म्यादन्यतो वृत्तावूह्या लिङ्गान्तरेऽपि ते ।

उक्ता इति ॥ अत्र वर्गे ये यौगिकाः शब्दा मालाकार–मार्दङ्गिक–वैणविकादयः पुंसि प्रचुरप्रयोगदर्शनादेकस्मिंल्लिङ्गे पुंसि ये यौगिका उक्ताः, ते ताद्धर्म्यात्तद्योगवशात्तेषामन्यतोऽन्यत्र जातौ वृत्तौ सत्यामन्यत्र स्त्रियां क्लीबे चोहनीयाः । यथा 'मालाकारी स्त्री, मालाकारं कुलम्', इत्यादि । येऽप्ययौगिकाः करण–मालिक–कुम्भकारादयः, ते जातिवचनत्वाच्छूद्रादिवत् 'जातेः' (४।१।६३) इत्यादिना ङीषि लिङ्गान्तरे स्त्रीलिङ्गे क्लीबत्वेऽपि बोद्धव्याः ॥

॥ इति शूद्रवर्गविवरणम् ॥

इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
भूम्यादिकाण्डो द्वितीयः साङ्ग एव समर्थितः ॥४७॥

इति श्रीवघेलवंशोद्भवश्रीमहीधरविषयाधिपश्रीमहाराजकुमारश्रीकीर्तिसिंहाज्ञया श्रीभट्टोजिदीक्षितात्मजश्रीभानुजीदीक्षितविरचितायाममरटीकायां व्याख्यासुधाख्यायां द्वितीयः काण्डः संपूर्णतामगात् ॥

॥ श्रीः ॥

श्रीमदमरसिंहविरचितः

अमरकोषः ।

व्याख्यासुधाख्यया व्याख्यया समेतः ।

तृतीयं काण्डम् ।

विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि ।
लिङ्गादिसंग्रहैर्वर्गाः सामान्ये वर्गसंश्रयाः ॥ १ ॥

विशेष्येति ॥ इह सामान्यकाण्डे एतैः कृत्वोपलक्षिता वर्गा उच्यन्ते । कीदृशास्ते वर्गाः । स्वर्गादयः संश्रय आश्रयो येषां ते । सुकृत्यादयो देवासुरमनुष्येष्वेव विशेषणत्वेन, कर्मपरायणादयो व्यापारतया, संबध्यन्ते लिङ्गान्यादौ येषां तानि । तेषां संग्रहाः । आदिना नामानि लङ्का–शेफालिका–इत्यादीनि ॥

अस्मिन्वर्गे लिङ्गज्ञानोपायमाह—

स्त्रीदाराद्यैर्यद्विशेष्यं यादृशैः प्रस्तुतं पदैः ।
गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदकाः ॥ २ ॥

स्त्रीति ॥ स्त्रीदारकलत्रादिभिः पदैर्यल्लिङ्गसंख्याविशिष्टैः स्त्रीदारकलत्रादिरूपं यद्विशेष्यं प्रक्रान्तम्, गुणादिशब्दास्तल्लिङ्गसंख्याविशिष्टास्तस्य विशेषणानि स्युः । तथा हि 'सुकृतिनी स्त्री, सुकृतिनो दाराः, सुकृति कलत्रम्' । 'दण्डिनी स्त्री, दण्डिनो दाराः, दण्डि कलत्रम्' । 'पाचिका स्त्री, पाचका दाराः, पाचकं कलत्रम्' ॥

सुकृती पुण्यवान्धन्यः

स्विति ॥ सुकृतमस्यास्ति । इनिः (५।२।११५) ॥ (१) ॥*॥ पुण्यमस्यास्ति । मतुप् (५।२।९४) ॥ (२) ॥*॥ धनं लब्धा । 'धनगणं लब्धा' (४।४।८४) इति यत् । **'धन्या धात्र्यामलक्योः स्याद्धन्यं पुण्यवति त्रिषु'** इति विश्वमेदिन्यौ ॥ (३) ॥*॥ त्रीणि **'सभाग्यस्य'** ॥

महेच्छस्तु महाशयः ।

मेति ॥ महतीच्छा यस्य ॥ (१) ॥*॥ **'आशयः स्यादभिप्राये मानसाधारयोरपि'** (इति मेदिनी) । महानाशयोऽस्य ॥ (२) ॥*॥ द्वे **'महाभिलाषस्य'** ॥

हृदयालुः सुहृदयः

हृदिति ॥ प्रशस्तं हृदयमस्य । 'हृदयाच्चालुरन्यतरस्याम्' (वा० ५।२।१२२) ॥ (१) ॥*॥ शोभनं हृदयमस्य । मित्रत्वाविवक्षणान्न हृद्भावः ॥*॥ **'सहृदयः'** इति वा पाठः ॥ सह हृदयेन । 'तेन सह–' (२।२।२८) इति बहुव्रीहिः ॥ (२) ॥*॥ प्राणिमात्रस्य तथात्वादत्र प्रशस्तहृदयपरत्वं हृदयशब्दस्य ॥*॥ द्वे **'शुद्धमनसः'** ॥

महोत्साहो महोद्यमः ॥ ३ ॥

मेति ॥ महानुत्साहोऽस्य ॥ (१) ॥*॥ महानुद्यमोऽस्य ॥ (२) ॥ * ॥ द्वे **'दुःसाध्यकृत्येऽपि साधनपरस्य'** ॥

प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः ।
वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि ॥ ४ ॥

प्रेति ॥ प्रकृष्टा वीणास्य । यद्वा वीणया प्रगायति, प्रगीयते वा । 'सत्यापपाश–' (३।१।२५) इति णिजन्ताद् पचाद्यच् (३।१।१३३) । कर्मणि घञ् (३।३।१९) वा 'एरजण्यन्तानाम्' इति नाच् (३।३।५६) ॥ (१) ॥*॥ निपुणति । 'पुण कर्मणि शुभे' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः ॥ (२) ॥*॥ अभि जानाति । 'आतश्चोपसर्गे' (३।१।१३६) इति कः ॥ (३) ॥*॥ (४) ॥*॥ न्यक्षासीत् । 'गत्यर्था–' (३।४।७२) इति क्तः । 'निनदीभ्याम्–' (८।३।८९) इति षत्वम् ॥ (५) ॥*॥ शिक्षा जातास्य । तारकादिः (५।२।३६) । यद्वा अशिक्षिष्ट । 'शिक्ष विद्योपादाने' (भ्वा० आ० से०) । अकर्मकत्वात्कर्तरि क्तः (३।४।७२) ॥ (६) ॥*॥ विज्ञानं बुद्धिः । 'विज्ञानं यज्ञं तनुते' इति श्रुतेः । विज्ञाने नियुक्तः । 'तत्र नियुक्तः' (४।४।६९) इति ठक् । यद्वा विज्ञानेन जयति । 'तेन दीव्यति–' (४।४।२) इति ठक् । यत्तु

१—'एरजण्यन्तानाम्' इति तु वचनमनार्षम्—इति 'एरच्' (३।३।५६) सूत्रे कैयटः ॥

विज्ञानं नैपुण्यम् । तेन व्यवहरति । 'तेन दीव्यति–' (४।४।२) इत्यादिना ठक्—इत्यभाणि मुकुटेन । तच्च । उक्तसूत्रे 'व्यवहरति' इत्यस्यानुपादानात् । 'कठिनान्त–' (४।४।७२) इति सूत्रेऽर्थोपादानेऽपि विज्ञानस्यानुपादानात् ॥*॥ व्रीह्यादि (५।२।११६) ठनि **'विज्ञानिकः'** इत्यपि ॥ (७) ॥*॥ कृतं मुखमस्य । सर्वस्य कृतमुखत्वादत्र कृतशब्दस्य संस्कृतपरत्वम् ॥ (८) ॥*॥ कृतं कर्म प्रशस्तमस्य । इनिः (५।२।११५) ॥ (९) ॥*॥ कुशान् लाति । कः (३।२।३) । कौ पृथिव्यां शलति वा । 'शल चलने' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । णिजर्थे लक्षणा वा । कौ शलति चालयति राजकार्याणि । यद्वा **'कुः** पापेषदर्थयोः' । कोः पापात् शलति बुद्धिवैभवात् । **'कुशलः** शिक्षिते त्रिषु । क्षेमे च सुकृते चापि पर्याप्तौ च नपुंसकम्' इति विश्वमेदिन्यौ ॥ (१०) ॥*॥ दश **'कुशलस्य'** ॥

पूज्यः प्रतीक्ष्यः

प्विति ॥ पूज्यते । 'पूज पूजायाम्' (चु० प० से०) । 'अचो यत्' (३।१।९७) । **'पूज्यः** श्वशुरवन्द्ययोः' इति हैमः ॥ (१) ॥*॥ प्रतीक्ष्यते । 'ईक्ष दर्शने' (भ्वा० आ० से०) । 'ऋहलोर्ण्यत्' (३।१।१२४) । **'प्रतीक्ष्यः** प्रतिपाल्ये स्यात्पूज्ये च' (इति हैमः) ॥ (२) ॥*॥ द्वे **'पूज्यस्य'** ॥

सांशयिकः संशयापन्नमानसः ।

सांशेति ॥ संशयमापन्नः । 'संशयमापन्नः' (५।१।७३) इति ठक् ॥ (१) ॥*॥ संशयमापन्नं यस्य, यस्मिन्, वा ॥ (२) ॥*॥ द्वे **'संदेहविषयस्य', 'संदेहाश्रयस्य'** वा ॥

दक्षिणेयो दक्षिणार्हस्तत्र दक्षिण्य इत्यपि ॥ ५ ॥

देति ॥ दक्षिणामर्हति । 'कडंगरदक्षिणाच्छ च' (५।१।६९) इति छयतौ ॥ (१) ॥*॥ (२) ॥*॥ दक्षिणामर्हति । 'अर्ह पूजायाम्' (भ्वा० प० से०) । 'अर्हः' (३।२।१२) इत्यच् ॥ (३) ॥*॥ त्रीणि **'दक्षिणायोग्यस्य'** ॥

स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे ।

स्युरिति ॥ 'मां याचस्व' इति वदति । 'वदेरान्यः' (उ० ३।१०४) । **'वदान्यो** दानशौण्डे स्याच्चारुवादिनि वाच्यवत्' (इति मेदिनी) ॥ (१) ॥*॥ स्थूलं कूटं लक्ष्यमस्य । स्थूलैर्महद्भिर्लक्ष्यते वा । कर्मणि ण्यत् (३।२।१२४) ॥*॥ (**'स्थूललक्ष्य'** इति) अयकारपाठे तु घञ् (३।३।१९) ॥ (२) ॥*॥ दाने शौण्डः । 'सप्तमी शौण्डैः' (२।१।४१) इति समासः । **'शौण्डो** मत्तेऽपि विख्याते' इति विश्वः ॥ (३) ॥*॥ बहु प्रददाति । 'प्रे दाञ्ञः' (३।२।६) इति कः ॥ (४) ॥*॥ चत्वारि **'अतिदातुः'** ॥

जैवातृकः स्यादायुष्मान्

जैवेति ॥ जीवति । जीवेः आतृकन् वृद्धिश्च (उ० १।७९) । **'जैवातृकः** पुमान्सोमे कृष्णकायुष्मतोस्त्रिषु' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ अतिशयितमायुरस्य । मतुप् (५।२।९४) 'तसौ मत्वर्थे' (१।४।१९) इति भत्वान्न रुत्वम् (८।२।६६) ॥ (२) ॥*॥ द्वे **'सायुषः'** ॥

अन्तर्वाणिस्तु शास्त्रवित् ॥ ६ ॥

अन्तेति ॥ अन्तर्वाण्यस्य । संमासान्तविधेरनित्यत्वान्न कष् । (५।४।१५३) । 'गोस्त्रियोः–' (१।२।४८) इति ह्रस्वः । यद्वा अन्तर्वाणयति । 'वण शब्दे' (भ्वा० आ० से०) । स्वार्थे णिजन्तात् 'अच इः' (उ० ४।१३९) ॥ (१) ॥*॥ शास्त्रं वेत्ति । 'सत्सू–' (३।२।६१) इति क्विप् ॥ (२) ॥*॥ द्वे **'शास्त्रविदः'** ॥

परीक्षकः कारणिकः

पेति ॥ परीक्ष्यते । 'ईक्ष दर्शने' (भ्वा० आ० से०) । ण्वुल् (३।१।१३३) ॥ (१) ॥*॥ **'करणं** हेतुकर्मणोः' (इति मेदिनी) । करणैश्चरति । 'चरति' (४।४।८) इति ठक् ॥ (२) ॥*॥ द्वे **'परीक्षाकारकस्य'** ॥

वरदस्तु समर्धकः ।

वेति ॥ वरं ददाति । कः (३।२।३) । **'वरदः** पुनः । प्रसन्ने शान्तचित्ते च वरदा तु कुमारिका' इति हैमः ॥ (१) ॥*॥ समृद्ध्नोति । 'ऋधु वृद्धौ' (स्वा० प० से०) ण्वुल् (३।१।१३३) ॥ (२) ॥*॥ द्वे **'वरदस्य'** ॥

हर्षमाणो विकुर्वाणः प्रमना हृष्टमानसः ॥ ७ ॥

हेति ॥ हर्षति । 'हृषु अलीके' (भ्वा० प० से०) । 'ताच्छील्य–' (३।२।१२९) इति चानश् । यत्तु—हृष्यति—इति विगृहीतं मुकुटेन । तच्च । दैवादिकत्वाच्छयनि सति 'हृष्यमाणः' इत्यापत्तेः ॥ (१) ॥*॥ विकुरुते । चानश् (३।२।१२९) । शानच् (३।२।१२४) वा ॥ (२) ॥*॥ प्रकृष्टं मनो यस्य ॥ (३) ॥*॥ हृष्टं मानसमस्य ॥ (४) ॥*॥ चत्वारि **'हर्षितमनसः'** ॥

दुर्मना विमना अन्तर्मनाः स्यात्

द्विति ॥ दुःस्थितं मनोऽस्य ॥ (१) ॥*॥ विगतं विविधं वा मनोऽस्य ॥ (२) ॥*॥ अन्तर्मनोऽस्य ॥ (३) ॥*॥ त्रीणि **'दुःखितमनसः'** ॥

उत्क उन्मनाः ।

उत्क इति ॥ उद्गतं मनोऽस्य । 'उत्क उन्मनाः' (५।२।८०) इत्युद्गतमनस्कवृत्तेरुच्छब्दात्स्वार्थे कन् ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'उत्कण्ठितमनसः'** ॥

१—वाणिरम्बु । 'व्यूतौ मूल्ये सरस्वत्याम्' इति हैमादिकोषेषु 'यद्वाणिसद्वाणिनी' इत्यादि महाकविप्रयोगेषु ह्रस्वान्तस्यापि वाणिशब्दस्य दर्शनेन तेन समासे तु ह्रस्वोऽयं नाङ्गीकरणीयः ॥

दक्षिणे सरलोदारौ

देति ॥ दक्षते । 'दक्ष वृद्धौ शीघ्रार्थे च' (भ्वा० आ० से०) । 'इदक्षिभ्यामिनन्' (उ० २।५०) । 'दक्षति' इति परस्मैपदप्रयोगस्तु मुकुटस्य चिन्त्यः । **'दक्षिणो** दक्षिणोद्भूतसरलच्छन्दवर्तिषु । अवामे त्रिषु यज्ञादिविधिदाने दिशि स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ सरति । 'सृ गतौ' (भ्वा० प० अ०) अलच् (उ० १।१०६) । **'सरलः** पूतिकाष्ठे नाथोदारावक्रयोस्त्रिषु' (इति मेदिनी) ॥ (२) ॥*॥ उत्कृष्टमा समन्ताद् राति । 'आतश्च–' (३।१।१३६) इति कः । उदर्यते । 'ऋ गतिप्रापणयोः' (भ्वा० आ० से०) । कर्मणि घञ् (३।३।१९) वा । **'उदारो** दातृमहतोर्दक्षिणेऽप्यभिधेयवत्' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'ऋज्वाशयस्य'** ॥

सुकलो दातृभोक्तरि ॥ ८ ॥

स्विति ॥ सुकल्यते । 'कल शब्दसंख्यानयोः' (भ्वा० आ० से०) । 'ईषदुः–' (३।३।१२६) इति खल् । शोभना कला यस्य, इति वा ॥ (१) ॥*॥ एकम् **'दातृभोक्त्रोः'** ॥

तत्परे प्रसितासक्तौ

तेति ॥ परमुत्तमं यस्य । तेन पूर्यते । 'पॄ पालनपूरणयोः' (जु० प० से०) 'ऋदोरप्' (३।३।५७) वा ॥ (१) ॥*॥ प्रासायि । 'षिञ् बन्धने' (स्वा० उ० अ०) । कर्मणि क्तः (३।२।१०२) ॥ (२) ॥*॥ असज्जि । 'षञ्ज सङ्गे' (भ्वा० प० अ०) ॥ (३) ॥*॥ त्रीणि **'तात्पर्ययुक्तस्य'** ॥

इष्टार्थोद्युक्त उत्सुकः ।

इष्टेति ॥ इष्टश्चासावर्थश्च । तत्र उद्युक्तः ॥ (१) ॥*॥ उद् उद्योगं, सवति । 'षु प्रसवैश्वर्ययोः' (भ्वा० प० अ०) सुनोति वा 'षुञ् अभिषवे' (स्वा० उ० अ०) । विचि (३।२।७५) संज्ञापूर्वकत्वाद्गुणाभावः । क्विपि (३।२।७६) । आगमशास्त्रस्यानित्यत्वात्तुगभावो वा । ततः 'संज्ञायां कन्' (५।३।७५) । यद्वा उत्सुवति । 'षू प्रेरणे' (तु० प० से०) । मितद्वादित्वात् (वा० ३।२।१८०) ड्डुः । 'सत्सू–' (३।२।६१) इति क्विप् वा । कनि (ज्ञापि० ५।४।५) 'केऽणः' (७।४।१३) इति ह्रस्वः ॥ (२) ॥*॥ द्वे **'इष्टार्थोद्यमवतः'** ।—पञ्चापि तत्परपर्यायाः इत्येके ॥

प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः ॥ ९ ॥

प्रेति ॥ प्रत्येकमगात् । प्रतीयते स्म, इति वा 'इण् गतौ' (अ० प० अ०) । गत्यर्थत्वात् कर्तरि (३।४।७२), कर्मणि (३।२।१०२) वा क्तः ॥ (१) ॥*॥ प्रथते स्म । 'प्रथ प्रख्याने' (भ्वा० आ० से०) । अकर्मकत्वात् कर्तरि (३।४।७२) क्तः ॥ (२) ॥*॥ अख्यायि । 'ख्या प्रकथने' (अ० प० अ०) । 'चक्षिङः ख्याञ्' (२।४।५४) वा । क्तः (३।२।१०२) ॥ (३) ॥*॥ अवेदि । 'विदॢ लाभे' (तु० उ० अ०) । क्तः (३।२।१०२) । 'वित्तो भोगप्रत्ययोः' (८।२।५८) इति साधुः ॥ (४) ॥*॥ व्यज्ञायि । 'ज्ञा अवबोधने' (क्र्या० प० अ०) । क्तः (३।२।१०२) यद्वा विजानाति । 'मतिबुद्धि–' (३।२।१८८) इति क्तः ॥ (५) ॥*॥ व्यश्रावि । 'श्रु श्रवणे' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥ (६) ॥*॥ षट् **'प्रसिद्धस्य'** ॥

गुणैः प्रतीते तु कृतलक्षणाहतलक्षणौ ।

ग्विति ॥ कृतमुच्चारितं लक्षणं नामास्य । **'लक्षणं** नाम्नि चिह्ने च' इति विश्वः ॥ (१) ॥*॥ **'आहतं** गुणितेऽपि स्यात्' इति विश्वः । आहतमभ्यस्तं लक्षणं यस्य ॥ (२) ॥*॥ द्वे **'गुणैः प्रसिद्धस्य'** ॥

इभ्य आढ्यो धनी

इभ्य इति ॥ इभमर्हति । दण्डादित्वात् (५।१।६६) यः । यद्वा एः कामाद् भ्यसते । 'भ्यस भये' (भ्वा० आ० से०) । 'अन्येभ्योऽपि–' वा० (३।२।१०१) इति डः । **'इभ्यो** धनवतीभ्यां तु वरेण्यां सल्लकीतरौ' इति हेमचन्द्रः ॥ (१) ॥*॥ आध्यायति । 'आतः–' (३।१।१३६) इति कः । पृषोदरादिः (६।३।१०९) ॥ (२) ॥*॥ बहुधनमस्य । इनिः (५।२।११५) ॥ (३) ॥* त्रीणि **'बहुधनस्य'** ॥

स्वामी त्वीश्वरः पतिरीशिता ॥ १० ॥

अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः ।

स्वेति ॥ स्वमस्यास्ति । 'स्वामिनैश्वर्ये' (५।२।१२६) इति साधुः । **'स्वामी** प्रभुविशाखयोः' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ ईष्टे । 'ईश ऐश्वर्ये' (अ० आ० से०) । 'स्थेशभास–' (३।२।१७५) इति वरच् । 'ईश्वरो मन्मथे शंभौ नाढ्ये स्वामिनि वाच्यवत् । **ईश्वरी चेश्वरो**मायाम्' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ पाति 'पा रक्षणे' (अ० प० अ०) । 'पातेर्डतिः' (उ० ४।५७) । **'पतिर्**धवे ना त्रिष्वीशे' इति विश्वः (मेदिनी) ॥ (३) ॥*॥ ईष्टे । 'तृन्' (३।२।१३५) । तृच् (३।१।१३३) वा ॥ (४) ॥*॥ अधिभवति । 'भुवः संज्ञान्तरयोः' (३।२।१७९) इति क्विप् ॥ (५) ॥*॥ नयति । 'णीञ् प्रापणे' (भ्वा० उ० से०) । ण्वुल् (३।१।१३३) । 'नायको नेतरि श्रेष्ठे हारमध्यमणावपि' इति विश्वहेमचन्द्रौ ॥ (६) ॥*॥ तृच् (३।१।१३३) ॥ (७) ॥*॥ प्रभवति । 'विप्रसंभ्यः–' (३।२।१८०) इति ड्डुः ॥ (८) ॥*॥ परिवर्हति । परिवृंहति वा । 'वृह वृहि वृद्धौ' (भ्वा० प० से०) । 'प्रभौ परिवृढः' (७।२।१२१) इति साधुः ॥ (९) ॥*॥ अधि पाति । 'आतश्चोपसर्गे' (३।१।१३६) इति कः ।—मूलविभुजादिः (वा० ३।२।५)—इति मुकुटोक्तिश्चिन्त्या ॥ (१०) ॥*॥ दश **'अधिपतेः'** ॥

१—अस्य सार्वधातुकमात्रविषयत्वादत्र लेखो निर्मूलः ॥

अधिकर्द्धिः समृद्धः स्यात्

अधीति ॥ अधिका ऋद्धिरस्य ।—'ऋधु वृधौ' (स्वा० प० से०) इति धातूपन्यासो मुकुटस्य व्यर्थः ॥ (१) ॥*॥ समृध्नोति स्म । 'ऋधु वृद्धौ' (स्वा० प० से०)। अकर्मकत्वात् क्तः (३।४।७२) ॥ (२) ॥*॥ द्वे **'अतिसंपन्नस्य'** ॥

कुटुम्बव्यापृतस्तु यः ॥ ११ ॥

स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयम् ।

किति ॥ कुटुम्बपोषणे संसक्तः । व्याप्रियते स्म । 'पृङ् व्यायामे' (तु० आ० अ०) । अकर्मकत्वात् क्तः, (३।४।७२) । **'व्यापृत**स्तरुणो युवा' इति बोपालितः ॥ (१) ॥*॥ अभ्यागारे नियुक्तः । 'अगारान्ताट्टन्' (४।४।७०) । अभि अधिक आगारिको वा ॥ (२) ॥*॥ आधानमाधिः । 'उपसर्गे' (३।३।९२) इति किः । उपगत आधिम् । 'अल्पाद्यः–' (वा० २।२।१८) इति समासः । यत्तु—उपादधाति कुटुम्बम्—इति विगृह्य—'उपसर्गे' (३।३।९२) इति किः—इत्युपन्यस्तं मुकुटेन । तन्न । कर्तरि किप्रत्ययास्मरणात् । **'उपाधिर्धर्मचिन्तायां कुटुम्बव्यापृते छले'** इति विश्वमेदिन्यौ ॥ (३) ॥*॥ त्रीणि **'कुटुम्बव्यापृतस्य'** ॥

वराङ्गरूपोपेतो यः सिंहसंहननो हि सः ॥ १२ ॥

वरेति ॥ अङ्गानि च रूपं च, अङ्गरूपाणि । वराणि च तान्यङ्गरूपाणि च । तैरुपेतः ॥*॥ सिंहं श्रेष्ठं संहननमस्य । संहनने सिंहः इति वा । राजदन्तादिः (२।२।३१) ॥ (१) ॥*॥ एकम् **'सौन्दर्योपेतस्य'** ॥

निर्वार्यः कार्यकर्ता यः संपतन् सत्त्वसंपदा ।

नीति ॥ निश्चयेन व्रियते । 'वृञ् वरणे' (स्वा० उ० से०)। 'ऋहलोर्ण्यत्' (३।१।१२४) ॥*॥ **'निर्धार्यः'** इति पाठे 'धृञ् धारणे' (भ्वा० उ० अ०) इति साधुः ॥ (१) ॥*॥ 'व्यसनेऽभ्युदये वापि ह्यविकारं सदा मनः । तत्तु सत्त्वमिति प्रोक्तम्' । तत्संपदा संपतन् उद्यमं । कुर्वन् 'संयुक्तः' इति वा पाठः ॥*॥ एकं **'निःशङ्ककार्यकर्तुः'** ॥

अवाचि मूकः

अवेति ॥ न वाग्यस्य ॥ (१) ॥*॥ 'मू' इति कायति । 'आतोऽनुप–' (३।२।३) इति कः । यत्तु—मूयते बध्यते वागस्य । 'मूङ् बन्धने' (भ्वा० आ० से०) । बाहुलकात् अवतिमवतिभ्याम् कक्—इति मुकुटेनोक्तम् । तन्न । धातुप्रत्ययानां कारकेषु विहितत्वात्संबन्धे विधानाभावात् । अवतेः प्रयोजनाभावात् । 'धातोः' इत्येकत्वविवक्षणेन धातुसमुदायात् प्रत्ययाभावाच्च । उक्तसूत्राभावाच्च । **'मूको** दैत्यावाग्दीनेषु,' इति हैमः ॥ (२) ॥*॥ द्वे **'मूकस्य'** ॥

अथ मनोजवः स पितृसंनिभः ॥ १३ ॥

अथे

मनो जवं वेगवद्यस्मिन् । यत्तु—मनो जवति प्रविशतीति । अच् (३।१।१३४)—इति मुकुटेनोक्तम् । तन्न । उक्तविग्रहात्पितृसंनिभस्यालाभात् । अधिकरणविवक्षायां ल्युचोऽसंभवात् । अपः (३।३।५७) औचित्यात् । 'मनोजवपितृसधर्माणः' इति नाममाला ॥*॥ स्वामी तु–**'मनोजवसः'** चमसादिवत्—इत्याह ॥ (१) ॥*॥ पितेव सम्यग्विभाति । 'भा दीप्तौ' (अ० प० अ०)। 'आतश्चोपसर्गे' (३।१।१३६) इति कः ॥ (२) ॥*॥ द्वे **'पितृसमस्य'** ॥

सत्कृत्यालंकृतां कन्यां यो ददाति स कूकुदः ।

सेति ॥ कोकते । 'कुक आदाने' (भ्वा० आ० से०) । 'इगुपध–' (३।१।१३५) इति कः । पृषोदरादिः (६।३।१०९)। यद्वा कवनम् । कूः । 'कूङ् शब्दे' (तु० आ० से०) । संपदादिः (वा० ३।३।१०८) । कुवः शब्दस्य कुर्भूः कीर्तिभूमिः' इति यावत् । कूकुं ददाति, कूका दायति वा । 'दैप् शोधने' (भ्वा० प० अ०)। 'आतोऽनुप–' (३।२।३) इति 'सुपि–' (३।२।४) इति योगविभागाद्वा कः ॥ (१) ॥*॥ एकम् **'सत्कारपूर्वं कन्यादातुः'** ॥

लक्ष्मीवांल्लक्ष्मणः श्रीलः श्रीमान्

लेति ॥ लक्ष्मीरस्यास्ति । मतुप् ।(५।२।९४)॥ (१) ॥*॥ 'लक्ष्म्या अ च' (ग० ५।२।१००) इति 'पामादित्वान्नः' अत्वंच । **'लक्ष्मणा** त्वोषधीभेदे सारस्यामपि योषिति । रामभ्रातरि पुंसि स्यात्सश्रीके चाभिधेयवत्' (इति मेदिनी) ॥ (२) ॥*॥ श्रीरस्यास्ति । सिध्मादित्वात् (५।२।९७) लच् । श्रियं लाति वा ॥*॥ कपिलिकादित्वात् (वा० ८।२।१८) लत्वे **'श्रीलः'** इत्यपि ॥ (३) ॥*॥ मतुप् (५।२।९४) अपि ॥ (४) ॥*॥ चत्वारि **'श्रीमतः'** ॥

स्निग्धस्तु वत्सलः ॥ १४ ॥

स्नीति ॥ स्निह्यति स्म । 'स्निह प्रीतौ' (दि० प० अ०) । अकर्मकत्वात् (३।४।७२) क्तः । 'वा द्रुह–' (८।२।३३) इति वा घः ॥ (१) ॥*॥ **'वत्सः** पुत्रादिवर्षयोः' (इति मेदिनी) । वत्से पुत्रादिस्नेहपात्रेऽभिलाषोऽस्यास्ति । 'वत्सांसाभ्याम्–' (५।२।९८) इति लच् ॥ (२) ॥*॥ द्वे **'वत्सलस्य'** ॥

स्याद्दयालुः कारुणिकः कृपालुः सूरतः समाः ।

स्येति ॥ 'स्पृहिगृहि–' (३।२।१५८) इत्यालुच् ॥ (१) ॥*॥ करुणा शीलमस्य । 'शीलम्' (४।४।६१) इति ठक् ॥ (२) ॥*॥ कृपां लाति । मितद्वादित्वात् (वा० ३।२।१८०) डुः ॥ (३) ॥*॥ शोभन उः शंभुः । सूः । स्थि रतः, रतं वा यस्य । यद्वा सुरमते । 'सौ रमेः क्तो दमेः पूर्वपदस्य च दीर्घः' (उ० ५।१४) । यत्तु—'तातपलितसूरताः' इति रमेः

क्तः दीर्घश्च—इति वचनमुपन्यस्तं मुकुटेन । तत् पञ्चपाद्यादौ न लभ्यते ॥ (४) ॥*॥ चत्वारि **'दयालोः'** ॥

स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दो निरवग्रहः॥ १५ ॥

स्वेति ॥ स्व आत्मा तन्त्रं प्रधानमस्य ॥ (१) ॥*॥ अपगतमावृतमावरणमस्य । **'अपावृतस्तु** पिहिते स्वतन्त्रेऽपि च वाच्यवत्' (इति विश्वमेदिन्यौ) ॥ (२) ॥*॥ स्वेनेरितुं शीलमस्य । 'ईर गतौ' (अ० आ० से०) । 'सुप्यजातौ–' (३।२।७८) इति णिनिः । 'स्वादीरेरिणोः' (भ्वा० ६।१।८९) इति वृद्धिः ॥ (३) ॥*॥ स्वः छन्दोऽभिलाषो यस्य ॥ (४) ॥*॥ निष्क्रान्तोऽवग्रहान्नियमात् । 'निरादयः–' (वा० २।२।१८) इति समासः ॥ (५) ॥*॥ पञ्च **'स्वतन्त्रस्य'** ॥

परतन्त्रः पराधीनः परवान्नाथवानपि ।

पेति ॥ परस्तन्त्रं प्रधानं यस्य ॥ (१) ॥*॥ परस्मिन्नधि । 'सप्तमी शौण्डैः' (२।१।४०) इति समासः । 'अषडक्ष–' (५।४।४।७) इति खः । यत्तु—परोऽध्युपर्यस्य—इति विगृहीतम् । तन्न । शौण्डादिष्वधिपाठवैयर्थ्यापातात् ॥ (२) ॥*॥ परः स्वाम्यस्यास्ति । मतुप् (५।२।९४) ॥ (३) ॥*॥ नाथोऽस्यास्ति ॥ (४) ॥*॥ चत्वारि **'परतन्त्रस्य'** ॥

अधीनो निघ्न आयत्तोऽस्वच्छन्दो गृह्यकोऽप्यसौ १६

अधीति ॥ इनमधिगतः । 'अल्पादयः–' (वा० २।२।१८) इति समासः । अधि उपरि, इनोऽस्य इति वा ॥ (१) ॥*॥ निहन्यते निगृह्यते । हन्तेः 'घञर्थे कः' (वा० ३।३।५८) ॥ (२) ॥*॥ आयतते स्म । 'यती प्रयत्ने' (भ्वा० आ० से०) । अकर्मकत्वात् (३।४।७२) क्तः ॥ (३) ॥*॥ न स्वः छन्दोऽस्य ॥ (४) ॥*॥ गृह्यते । 'ग्रह उपादाने' (क्या० उ० से०) । 'पदास्वैरि–' (३।१।११९) इति क्यप् । स्वार्थे कन् (ज्ञापि० ५।४।५) । **'गृह्यको** निघ्नके छेके' इति विश्वमेदिन्यौ ॥ (५) ॥*॥ पञ्च **'अधीनसामान्यस्य'** ॥ एके तु नवभिः पर्यायमाहुः ॥

खलपूः स्याद्बहुकरः

खेति ॥ 'खलं भूस्थानकल्केषु' इति विश्वः । खलं पुनाति । 'पूञ् पवने' (क्या० उ० से०) । क्विप् (३।२।७६) ॥ (१) ॥*॥ बहु करोति, भुवं संमार्ष्टि । किंयत्तद्बहुष्वज्विधानम्' (वा० ३।२।२१) इत्यच् । स्त्रियां बहुकरा । यत्तु—ताच्छील्यविवक्षायां तु टः (३।२।२०) एव । स्त्रियां 'बहुकरी'—इत्युक्तं मुकुटेन । तन्न । टापवादत्वेनाज्विधानात् ॥ (२) ॥*॥ द्वे **'भुवं मार्जयतः'** ॥

दीर्घसूत्रश्चिरक्रियः ।

दीति ॥ **'सूत्रं** तन्तुव्यवस्थयोः' इति विश्वः । दीर्घं सूत्रं व्यवस्था यस्य ॥ (१) ॥*॥ चिरा क्रिया यस्य ॥ (२) ॥*॥ द्वे **'अतिविलम्बेन क्रियासंपादकस्य'** ॥

जाल्मोऽसमीक्ष्यकारी स्यात्

जेति ॥ जालयति, जाल्यते वा । 'जल अपवारणे' (जु० प० से०) । बाहुलकान्मः ।—धूमवन् मः—इति मुकुटस्तु चिन्त्यः । 'इषियुधि–' (उ० १।४५) इति सूत्रे जलेरग्रहणात् । धूमेऽपि गुणप्रसङ्गात् 'मक्' इति वक्तुं युक्तत्वाच्च । **'जाल्मस्तु** पामरे । असमीक्ष्यकारिणि च' इति हैमः ॥ (१) ॥*॥ असमीक्ष्याविचार्य कर्तुं शीलमस्य । 'सुपि–' (३।२।७८) इति णिनिः ॥ (२) ॥*॥ द्वे **'अविचारिणः'** ॥

कुण्ठो मन्दः क्रियासु यः ॥ १७ ॥

कीति ॥ कुण्ठति । 'कुठि प्रतिघाते आलस्ये च' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । (**'कुण्ठोऽकर्मण्यमूर्खयोः'** इति मेदिनी) ॥ (१) ॥*॥ एकं **'मन्दक्रियस्य'** ॥

कर्मक्षमोऽलंकर्मीणः

केति ॥ कर्मसु क्षमः ॥ (१) ॥*॥ 'सप्तमी' (२।१।४०) इति योगविभागात्समासः ॥ (१) ॥*॥ कर्मणे क्रियायै अलं समर्थः । 'प्राप्तापन्नालंपूर्व–' (वा० २।४।२६) इति परवल्लिङ्गनिषेधात्समासः । 'पर्याप्तयः–' (वा० २।२।१८) इति वा । 'अषडक्ष–' (५।४।७) इति खः ॥ (२) ॥*॥ द्वे **'क्रियाकरणे समर्थस्य'** ॥

क्रियावान् कर्मसूद्यतः ।

क्रीति ॥ क्रियास्यास्ति । मतुप् (५।२।९५) ॥ (१) ॥*॥ एकम् **'उद्योगोद्यतस्य'** ॥

स कार्मः कर्मशीलो यः

स इति ॥ कर्म शीलमस्य । 'छत्रादिभ्यो णः' (४।४।६२) वा । स्त्रियां कार्मी ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'कर्मसु फलमनपेक्ष्य प्रवृत्तस्य'** ॥

कर्मशूरस्तु कर्मठः ॥ १८ ॥

केति ॥ कर्मणि शूरः । सप्तमीसमासः (२।१।४०) ॥ (१) ॥*॥ 'कर्मणि घटोऽठच्' (५।२।३५) ॥ (२) ॥*॥ द्वे **'प्रयत्नेन प्रारब्धकर्मपरिसमापकस्य'** ॥

भरण्यभुक्कर्मकरः

भेति ॥ भरण्यं वेतनं भुङ्क्ते । क्विप् (३।२।७६) ॥*॥ क्वचित् **'कर्मण्यभुक्'** इति पाठः । तत्र कर्मणि साधु । 'तत्र साधुः' (४।४।९८) इति यत् । कर्मण्यं वेतनम् ॥ (१) ॥*॥ कर्म करोति । 'कर्मणि भृतौ' (३।२।२२) इति टः ॥ (२) ॥*॥ द्वे **'मूल्येन कर्म कुर्वतः'** अयं शूद्रवर्गे उक्तोऽपि 'भरण्यभुग्' इति पर्यायान्तरकथनार्थमनूदितः ॥

कर्मकारस्तु तत्क्रियः ।

केति ॥ कर्म करोति । 'कर्मण्यण्' (३।२।१) ॥ (१) ॥*॥ 'तत्क्रियः कर्मकारक्रियः' 'अभृतक्रियः' इत्यर्थः ॥*॥ **'यो वेतनं विना कर्म करोति तस्य'** एकम् ॥

अपस्नातो मृतस्नातः

अपेति ॥ अपकृष्टं स्नातः । 'प्रादयो गताद्यर्थे' (वा० २।२।१८) इति समासः ॥ (१) ॥*॥ मृते स्नातः । सप्तमीसमासः (२।१।४०) ॥ (२) ॥*॥ द्वे **'मृतमुद्दिश्य स्नातस्य'** ॥

आमिषाशी तु शौष्कलः ॥ १९ ॥

आमीति ॥ आमिषमश्नाति । 'अश भोजने' (क्र्या० प० से०) । 'सुपि–' (३।२।७८) इति णिनिः ॥ (१) ॥*॥ **'शुष्कली** शुष्कमांसेऽपि मांसपात्रेऽपि सा मता' । तामत्ति । 'शेषे' (४।२।९२) इत्यण् । स्वामी तु **'शाष्कलः'** इति पाठति । तत्र पृषोदरादिः (६।३।१०९) ॥*॥ संज्ञापूर्वकत्वाद्वृद्ध्यभावोऽपि । **'शुष्कलः** शुष्कमांसस्य फणिके पिशिताशिनि' इति हैमः ॥ (२) ॥*॥ द्वे **'मांसाशिनः'** ॥

बुभुक्षितः स्यात्क्षुधितो जिघत्सुरशानायितः ।

बिति ॥ बुभुक्षा जातास्य । तारकादित्वात् (५।२।३६) इतच् ॥ (१) ॥*॥ क्षुध्यति स्म । अकर्मकत्वात् (३।४।७२) क्तः । 'वसतिक्षुधोः–' (७।२।५२) इतीट् ॥ (२) ॥*॥ **अत्तुमिच्छुः** । अदेः सनि 'लुङ्सनोर्घस्लृ' (२।४।३७) । 'सनाशंस–' (३।२।१६८) इत्युः ॥ (३) ॥*॥ अशनस्येच्छा । **'अशनाया–'** (७।४।३४) इति साधुः । अशनाया जातास्य । तारकादिः (५।२।३६) ॥ (४) ॥*॥ चत्वारि **'क्षुधितस्य'** ॥

परान्नः परपिण्डादः

पेति ॥ परस्यान्नम् । परान्नं नित्यमस्य । 'अर्शआदिभ्योऽच्' (५।२।१२७) ॥ (१) ॥*॥ **'पिण्डमाजीवने'** इति धरणिः । परस्य पिण्डम् । तदत्ति । 'कर्मण्यण्' (३।२।१) ॥ ॥*॥ द्वे **'परान्नजीवनस्य'** ॥

भक्षको घसरोऽग्रः ॥ २० ॥

भेति ॥ भक्षयति । 'भक्ष अदने' (चु० प० से०) । ण्वुल् (३।१।१३३) ॥ (१) ॥*॥ घसति 'घस्लृ अदने' (भ्वा० प० अ०) । 'सृघस्यदः क्मरच्' (३।२।१६०) ॥ (२) ॥*॥ अत्ति ॥ (३) ॥*॥ त्रीणि **'भक्षणपरस्य'** ॥

आद्यूनः स्यादौदरिको विजिगीषाविवर्जिते ।

आद्यिति ॥ आदेवीत् । अकर्मकत्वात् क्तः (३।४।७२) । 'दिवोऽविजिगीषायाम्' (८।२।४९) इति निष्ठानत्वम् । 'यस्य विभाषा' (७।२।१५) इति नेट् ॥ (१) ॥*॥ उदरे प्रसितः । 'उदराट्ठगाद्यूने' (५।२।६७) इति ठक् ॥ (२) ॥*॥ द्वे **'औदरिकस्य'** ॥

उभौ त्वात्मंभरिः कुक्षिंभरिः स्वोदरपूरके ॥ २१ ॥

विति ॥ आत्मानं कुक्षिं च बिभर्ति । 'फलेग्रहिरात्मंभरिश्च' (३।२।२६) इति साधुः ॥ (१) ॥*॥ चात् ('भृञः कुक्ष्यात्मनोर्मुम् च' इति वार्तिकेन च) कुक्षिंभरिः ॥ (२) ॥*॥ द्वे **'स्वोदरपूरकस्य'** ॥

सर्वान्नीनस्तु सर्वान्नभोजी

सेति ॥ सर्वेषामन्नानि । सर्वान्नानि भक्षयति । 'अनुपदसर्वान्न–' (५।२।९) इति खः ॥ (१) ॥*॥ सर्वान्नानि भोक्तुं शीलमस्य । 'सुपि–' (३।२।७८) इति णिनिः ॥ (२) ॥*॥ द्वे **'सर्ववर्णान्नभक्षकस्य'** ॥

गृध्नुस्तु गर्धनः ।

लुब्धोऽभिलाषुकस्तृष्णंक्[1]

ग्रिति ॥ गर्धनशीलः । 'गृधु अभिकाङ्क्षायाम्' (दि० प० से०) । 'त्रसिगृधि–' (३।२।१४०) इति क्नुः ॥ (१) ॥*॥ 'जुचङ्क्रम्य–' (३।२।१५०) इति युच् ॥ (२) ॥*॥ लुभ्यति । 'लुभ गार्ध्ये' (दि० प० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । **'लुब्ध** आकाङ्क्षिणि व्याधे' इति हेमचन्द्रः ॥ (३) ॥*॥ अभिलष्यति । 'लष कान्तौ' (भ्वा० उ० से०) । 'लषपतपद–' (३।२।१५४) इत्युकञ् ॥ (४) ॥*॥ तृष्यति । 'जितृषा पिपासायाम्' (दि० प० से०) । 'खपितृषोर्नेजिङ्' (३।२।१७२) ॥ (५) ॥*॥ पञ्च **'लुब्धस्य'** ॥

समौ लोलुपलोलुभौ ॥ २२ ॥

सेति ॥ गर्हितं लुम्पति । 'लुपॢ छेदे' (तु० उ० अ०) 'लुपसद–' (३।१।२४) इति यङन्तादच् (३।१।१३४) ॥ (१) ॥*॥ भृशं लुभ्यति । 'लुभ गार्ध्ये' (दि० प० से०) । 'धातोरेकाचः' (३।१।२२) इति यङन्तादच् (३।१।१३४) ॥ (२) ॥*॥ द्वे **'अतिलुब्धस्य'** ॥

उन्मदस्तून्मदिष्णुः स्यात्

उन्मेति ॥ उद्गतो मदो हर्षोऽस्य ॥*॥ क्वचित् **'सोन्मादः'** इति पाठः । तत्र सह उन्मादेन वर्तते । सोपसर्गत्वान्मनेर्घञ् ॥*॥ सु अतिशयित उन्मादोऽस्य । **'सून्मादः'** इत्यपि ॥ (१) ॥*॥ उन्मदनशीलः । 'मदी हर्षे' (दि० प० से०) । 'अलंकृञ्–' (३।२।१३६) इतीष्णुच् ॥ (२) ॥*॥ द्वे **'उन्मादशीलस्य'** ॥

अविनीतः समुद्धतः ।

अवीति ॥ न व्यनायि । 'णीञ् प्रापणे' (भ्वा० उ० अ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ समुद्धन्ति स्म । समुद्धन्यते स्म, इति वा । हन्तेर्गत्यर्थत्वात् कर्तरि (३।४।७२) कर्मणि (३।२।१०२) वा क्तः । **'समुद्धतं** समुद्दीर्णेऽप्यविनीते च वाच्यवत्' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'उद्धतस्य'** ॥

१—तृष्णाशब्दात् 'तत्करोति–' (वा० ३।१।२६) इति ण्यन्तात् ण्वुलि (३।१।१३३) **'तृष्णकः** अदन्तोऽपि' इति सर्वधरः—इति मुकुटः ॥

मत्ते शौण्डोत्कटक्षीबाः

मेति ॥ माद्यति । 'गत्यर्था–' (३।४।७२) इति मदेः क्तः 'न ध्याख्या–' (८।२।५७) इति न निष्ठानत्वम् ॥ (१) ॥*॥ शुण्डायां पानागारे भवः । 'तत्र भवः' (४।३।५३) इत्यण् । **'शौण्डो** मत्ते च विख्याते पिप्पल्यां च भवेत् स्त्रियाम्' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ उद्गतः कट आवरणमावारको वास्य । यद्वा उद्गतमदवृत्तेरुच्छब्दात् स्वार्थे 'संप्रोदश्च' (५।२।२९) इति कटच् । **'उत्कटस्तीव्रमत्तयोः'** इति हैमः ॥ (३) ॥*॥ क्षीवते स्म । 'क्षीवृ मदे' (भ्वा० आ० से०) । अकर्मकत्वात् कर्तरि क्तः (३।४।७२) । 'अनुपसर्गात्–' (८।२।५५) इति साधुः । कः (३।१।१३५) वा ॥*॥ नान्तोऽप्ययम् । 'क्षीबाणौ समबुध्यत' इति व्यासप्रयोगात् । तत्र बाहुलकात् कनिन् ॥ (४) ॥*॥ चत्वारि **'उन्मत्तस्य'** ॥

कामुके कमितानुकः ॥ २३ ॥

कम्रः कामयिताभीकः कमनः कामनोऽभिकः ।

केति ॥ कामयते । 'कमु कान्तौ' (भ्वा० आ० से०) । 'लषपतपद–' (३।२।१५४) इत्युकञ् । **'कामुकः** कमनेऽशोकपादपे चातिमुक्तके' इति (मेदिनी) ॥*॥ णिङ्यभावे च तृच् (३।१।१३३) ॥ (५) ॥*॥ (२) ॥*॥ अनुकामयते । 'अनुकाभिका–' (५।२।७४) इति साधुः ॥ (३) ॥*॥ 'नमिकम्पि–' (३।२।१६७) इति रः ॥ (४) ॥*॥ अभि कामयते । 'अनुकाभिका–' (५।२।७४) इति साधुः । **'अभिकः** कामुके क्रूरे निर्भये त्रिषु ना कवौ' (इति मेदिनी) ॥ (६) ॥*॥ (९) ॥*॥ 'अनुदात्तेतश्च–' (३।२।१४९) इति युच् । **'कमनः** कामुके कामेऽभिरूपेऽशोकपादपे' (इति मेदिनी) ॥ (७) ॥*॥ णिङन्ताद्युच् (उ० २।७८) ॥ (८) ॥*॥ नव **'कामुकस्य'** ॥

विधेयो विनयग्राही वचनेस्थित आश्रवः ॥ २४ ॥

वीति ॥ विधातुं शक्यः । 'अचो यत्' (३।१।९७) । 'ईद्यति' (६।४।६५) । गुणः (७।३।८४) ॥ (१) ॥*॥ प्रवृत्तौ निवृत्तौ वा विनयं ग्रहीतुं शीलमस्य । 'सुपि–' (३।२।७८) इति णिनिः ॥ (२) ॥*॥ वचने तिष्ठति स्म । 'गत्यर्था–' (३।४।७२) इति क्तः । 'तत्पुरुषे कृति–' (६।३।९) इत्यलुक् ॥ (३) ॥*॥ आशृणोति । 'श्रु श्रवणे' (भ्वा० प० अ०) पचाद्यच् (३।१।१३४) । **'आश्रवो** वचनस्थिते । प्रतिज्ञायां च क्लेशे च' इति हैमः ॥ (४) ॥*॥ चत्वारि **'प्रवृत्तिनिवृत्त्योर्विधातुं शक्यस्य'** ॥

वश्यः प्रणेयः

वेति ॥ वशमधीनत्वं गतः । 'वशं गतः' (४।४।८६) इति यत् । **'वशमाययतायां स्यात्'** इति विश्वः ॥ (१) ॥*॥ प्रकर्षेण नेतुं शक्यः । 'अचो यत्' (३।१।९७) ॥ (२) ॥*॥ द्वे **'स्वाधीनस्य'** ॥

निभृतविनीतप्रश्रिताः समाः ।

नीति ॥ नितरामभारि । 'भृञ् भरणे' (भ्वा० उ० अ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ व्यनायि । 'भीञ्' (भ्वा० उ० से०) । क्तः (३।२।१०२) । **'विनीतस्तु** निभृते निर्जितेन्द्रिये । वाणिजे साधुवाह्यश्वे विनयग्राहिते हिते' इति हैमः ॥ (२) ॥*॥ प्रथममश्रायि गुणैः । 'श्रिञ् सेवायाम्' (भ्वा० उ० से०) क्तः (३।२।१०२) ॥ (३) ॥*॥ त्रीणि **'विनययुक्तस्य'** ॥

धृष्टे धृष्णग्वियातश्च

ध्रिति ॥ धृष्णोति स्म । 'जिधृषा प्रागल्भ्ये' (स्वा० प० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । 'धृषिशसी–' (७।२।१९) 'इतीडभावः' ॥ (१) ॥*॥ 'धृषेश्च' इति नजिङ् ॥*॥ **'धृष्णुः'** इति पाठे 'त्रसिगृधि–' (३।२।१४०) इति क्नुः ॥ (२) ॥*॥ विरुद्धं यातं चेष्टितं यस्य । विरुद्धमयासीद्वा । 'गत्यर्था–' (३।४।७२) इति क्तः ॥ (३) ॥*॥ त्रीणि **'निर्लज्जस्य'** ॥

प्रगल्भः प्रतिभान्विते ॥ २५ ॥

प्रेति ॥ प्रगल्भते । 'गल्भ धार्ष्ट्ये' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) ॥ (१) ॥*॥ प्रतिभानम् । 'आतश्च–' (३।३।१०६) इत्यङ् । 'प्रज्ञा नवनवोन्मेषशालिनी **प्रतिभा** मता' इति रुद्रः । प्रतिभयान्वितः ॥ (२) ॥*॥ द्वे **'प्रत्युत्पन्नमतेः'** ॥

स्यादधृष्टे तु शालीनः

स्येति ॥ शालाप्रवेशमर्हति । 'शालीनकौपीने–' (५।२।२०) इति साधुः ॥ (२) ॥*॥ द्वे **'सलज्जस्य'** ॥

विलक्षो विस्मयान्विते ।

वीति ॥ विशेषेण लक्षयति 'लक्ष आलोचने' (भ्वा० आ० से०) । अच् (३।१।१३४) ॥ (१) ॥*॥ विस्मयेनाश्चर्येणान्वितः ॥ (२) ॥*॥ द्वे **'परकीयधर्मशीलादौ प्राप्ताश्चर्यस्य'** ॥

अधीरे कातरः

अधीति ॥ न धीरो धैर्यं यस्य ॥ (१) ॥*॥ ईषत्तरति । अच् (३।१।१३४) । 'ईषदर्थे' (६।३।१०५) इति कोः कादेशः ॥ (२) ॥*॥ द्वे **'रोगादिलक्षणेनाकुलमनसः'** ॥

त्रस्नौ भीरुभीरुकभीलुकाः ॥ २६ ॥

त्रेति ॥ त्रस्यति । 'त्रसी उद्वेगे' (दि० प० से०) । 'त्रसिगृधि–' (३।२।१४०) इति क्नुः ॥ (१) ॥*॥ बिभेति । 'ञिभी भये' (जु० प० अ०) । 'भियः क्रुक्रुकनौ' (३।२।१७४) । 'क्रुकञपि' (वा० ३।२।१७४) । **'भीरुरार्ते**

१—'धृषेश्चेति वाच्यम्' इति काशिकादौ—इति सिद्धान्तकौमुदी ॥

त्रिलिङ्गः स्याद्वरयोषिति योषिति' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ (३) ॥*॥ चत्वारि **'भयशीलस्य'** ॥

आशंसुराशंसितरि

आशेति ॥ आशंसते । 'आङः शसि इच्छायाम्' (भ्वा० आ० से०) । 'सनाशंसभिक्षः–' (३।२।१६८) इत्युः ॥ (१) ॥*॥ 'तृन्' (३।२।१३५) ॥ (२) ॥*॥ द्वे **'इष्टार्थप्रार्थीच्छोः'** ॥

गृह्यालुर्ग्रहीतरि ।

ग्रिति ॥ गृह्णाति । 'गृह ग्रहणे' चुरादावदन्तः 'स्पृहिगृहिं–' (३।२।१५८) इत्यालुच् 'अयामन्ता–' (६।४।५५) इति णेरयादेशः ॥ (१) ॥*॥ (गृह्णाति) । 'ग्रह उपादाने' (क्र्या० उ० से०) । 'तृन्' (३।२।१३५) । 'ग्रहोऽलिटि–' (७।२।३७) इतीटो दीर्घः ॥ (२) ॥*॥ द्वे **'ग्रहणशीलस्य'**॥

श्रद्धालुः श्रद्धया युक्ते

श्रेति ॥ श्रद्दधाति । 'स्पृहि–' (३।२।१५८) इत्यालुच् ॥ (१) ॥*॥ एकम् **'श्रद्धालोः'** ॥

पतयालुश्च पातुके ॥ २७ ॥

पेति ॥ पतयति । 'पत गतौ' (चु० उ० से०) । 'आलुच्' (३।२।१५८) ॥ (१) ॥*॥ (भौवादिकात्) 'लषपत–' (३।२।१५४) इत्युकञ् ॥ (२) ॥*॥ द्वे **'पतनशीलस्य'** ॥

लज्जाशीलोऽपत्रपिष्णुः

लेति ॥ लज्जा शीलमस्य ॥ (१) ॥*॥ अपत्रपते । 'अलंकृञ्–' (३।२।१३६) इतीष्णुच् ॥ (२) ॥*॥ द्वे **'लज्जाशीलस्य'** ॥

वन्दारुरभिवादके ।

वेति ॥ वन्दते । 'वदि अभिवादनस्तुत्योः' (भ्वा० आ० से०) । 'शृवन्द्योरारुः' (३।२।१७३) ॥ (१) ॥*॥ अभिवादयति । ण्वुल् (३।१।१३३) ॥ (२) ॥*॥ द्वे **'वन्दनशीलस्य'** ॥

शरारुर्घातुको हिंस्रः

शेति ॥ शृणाति । 'शॄ हिंसायाम्' (क्र्या० प० से०) । आरुः (३।२।१७३) ॥ (१) ॥*॥ हन्ति । 'लषपत–' (३।२।१५४) इत्युकञ् ॥ (२) ॥*॥ हिनस्ति । 'हिसि हिंसायाम्' (रु० प० से०) । 'नमिकम्पि–' (३।२।१६७) इति रः । **'हिंस्रा** काकादनीमांसोः स्त्रियां स्याद्घातुकेऽन्यवत्' इति विश्वमेदिन्यौ ॥ (३) ॥*॥ त्रीणि **'हिंसाशीलस्य'** ॥

स्याद्वर्धिष्णुश्च वर्धनः ॥ २८ ॥

स्येति ॥ वर्धते । 'वृधु वृद्धौ' (भ्वा० आ० से०) । 'अलंकृञ्' (३।२।१३६) इतीष्णुच् ॥ (१) ॥*॥ 'अनुदात्तेतश्च–' (३।२।१४९) इति युच् । **'वर्धनं** छेदने वृद्धौ **वर्धनी** तु गलन्तिका' इति हैमः ॥ (२) ॥*॥ द्वे **'वर्धनशीलस्य'** ॥

उत्पतिष्णुस्तूत्पतिता

उत्पेति ॥ उत्पतति । 'पत गतौ' (भ्वा० प० से०) इष्णुच् (३।२।१३६) ॥ (१) ॥*॥ 'तृन्' (३।२।१३५) ॥ (२) ॥*॥ द्वे **'ऊर्ध्वपतनशीलस्य'** ॥

अलंकरिष्णुस्तु मण्डनः ।

अलमिति ॥ अलंकरणशीलः । 'अलंकृञ्–' (३।२।१३६) इतीष्णुच् ॥ (१) ॥*॥ मण्डनशीलः । 'मडि भूषायाम्' (भ्वा० प० से०) । 'कृधमण्डार्थेभ्यश्च' (३।२।१५१) । इति युच् ॥ (२) ॥*॥ द्वे **'अलंकरणशीलस्य'** ॥

भूष्णुर्भविष्णुर्भविता

भ्विति ॥ भवनशीलः । 'ग्लाजिस्थश्च ग्स्नुः' (३।२।१३९) चाद्भुवः ॥ (१) ॥*॥ 'भुवश्च' (३।२।१३८) इतीष्णुच् ॥ (२) ॥*॥ 'तृन्' (३।२।१३५) ॥ (३) ॥*॥ त्रीणि **'भवनशीलस्य'** ॥

वर्तिष्णुर्वर्तनः समौ ॥ २९ ॥

वेति ॥ वर्तनशीलः । 'वृतु वर्तने' (भ्वा० आ० से०) 'अलंकृञ्–' (३।२।१३६) इतीष्णुच् ॥ (१) ॥*॥ 'अनुदात्तेतश्च' (३।२।१४९) इति युच् ॥ (२) ॥*॥ द्वे **'वर्तनशीलस्य'** ॥

निराकरिष्णुः क्षिप्नुः स्यात्

नीति ॥ निराकरणशीलः । इष्णुच् (३।२।१३६) ॥ (१) ॥*॥ क्षेपणशीलः । 'क्षिप प्रेरणे' (तु० उ० अ०) । 'त्रसिगृधि–' (३।२।१४०) इति क्नुः ॥ (२) ॥*॥ द्वे **'निराकरणशीलस्य'** ॥

सान्द्रस्निग्धस्तु मेदुरः ।

सेति ॥ सान्द्रो घनः स्निग्धश्चिक्कणः ॥ (१) ॥*॥ मेदनशीलः । 'ञिमिदा स्नेहने' (भ्वा० आ० से०) । 'भञ्जभासमिदो घुरच्' ॥ (२) ॥*॥ द्वे **'निबिडस्निग्धस्य'** ॥

ज्ञाता तु विदुरो विन्दुः

ज्ञेति ॥ जानाति 'तृन्' (३।२।१३५) ॥ (१) ॥*॥ वेदनशीलः । 'विदिभिदि–' (३।२।१६२) ॥*॥ इति कुरच् ॥ (२) ॥*॥ 'विन्दुरिच्छुः' (३।२।१६९) इति साधुः ॥ (३) ॥*॥ त्रीणि **'ज्ञानशीलस्य'** ॥

विकासी तु विकस्वरः ॥ ३० ॥

वीति ॥ विकसति । 'कस गतौ' (भ्वा० प० से०) । 'वौ कषलस–' (३।२।१४३) इति घिनुण् । **'विकासः** स्फुटने व्यक्तौ' इति दन्त्यान्ते धरणिः । तस्मादिनिः (५।२।११५) वा ॥ (१) ॥*॥ 'स्थेशभास–' (३।२।१७५) इति वरच् ॥ (२) ॥*॥ द्वे **'विकसनशीलस्य'** ॥

१—इदं च सिद्धान्तकौमुद्यनुरोधेन । भाष्ये तु 'भुव इट्प्रतिषेधश्च' इत्युपलभ्यते ॥

विसृत्वरो विसृमरः प्रसारी च विसारिणि ।

वीति ॥ विसरणशीलः । 'सृ गतौ' (भ्वा० प० अ०) । 'इष्णशुजि–' (३।२।१६३) इति क्वरप् 'ह्रस्वस्य–' (६।१।७१) इति तुक् ॥ (१) ॥*॥ 'सृघस्य–' (३।२।१६०) इति क्मरच् ॥ (२) ॥*॥ प्रसरणशीलः । 'प्रे लप–' (३।२।१४६) इति घिनुण् ॥ (३) ॥*॥ विसरणम् । घञ् (३।३।१८) । विसारोऽस्यास्ति । इनिः (५।२।११५) ॥ (४) ॥*॥ चत्वारि **'प्रसारिणः'** ॥

सहिष्णुः सहनः क्षन्ता तितिक्षुः क्षमिता क्षमी ३१

सेति ॥ सहनशीलः । 'षह मर्षणे' (भ्वा० आ० से०) । 'अलंकृञ्–' (३।२।१३६) इतीष्णुच् ॥ (१) ॥*॥ 'अनुदात्तेतश्च (३।२।१४९) इति युच् ॥ (२) ॥*॥ क्षमणशीलः । 'क्षमू सहने' (दि० प० से०) । 'तृन्' (३।२।१३५) ॥ (३) ॥*॥ तिजेः क्षमायाम् । 'गुप्तिज्किद्भ्यः–' (३।१।५) इति सन् । तितिक्षणशीलः 'सनाशंस–' (३।२।१६८) इत्युः ॥ (४) ॥*॥ तृनः 'स्वरति–' (७।२।४४) इति पक्षे इट् ॥ (५) ॥*॥ 'शमित्यष्टाभ्यो–' (३।२।१४१) इति घिनुण् ॥ (६) ॥*॥ षट् **'सहनशीलस्य'** ॥

क्रोधनोऽमर्षणः कोपी

क्रेति ॥ क्रोधनशीलः 'क्रुध कोपे' (दि० प० अ०) । 'क्रुधमण्डा–' (३।२।१५१) इति युच् ॥ (१) ॥*॥ न मर्षणशीलः । युच् (३।२।१५१) ॥ (२) ॥*॥ अवश्यं कुप्यति । 'आवश्यका–' (३।३।१७०) इति णिनिः ॥ (३) ॥*॥ त्रीणि **'क्रोधनस्य'** ॥

चण्डस्त्वत्यन्तकोपनः ।

चेति ॥ चण्डते । 'चडि कोपे' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) । **'चण्डस्तु** यमदासेऽतिकोपने । तीव्रे दैत्यविशेषे च **चण्डी** तु शिवयोषिति । **चण्डा** धनहरीशङ्खपुष्प्योः' इति हेमचन्द्रः ॥ (१) ॥*॥ अत्यन्तं कुप्यति । 'क्रुधमण्डार्थेभ्यश्च' (३।२।१५१) इति युच् ॥ (२) ॥*॥ द्वे **'अतिक्रोधनस्य'** ॥

जागरूको जागरिता

जेति ॥ जागरणशीलः । 'जागृ निद्राक्षये' (अ० प० से०) । 'जागरूकः' (३।२।१६५) ॥ (१) ॥*॥ 'तृन्' (३।२।१३५) ॥ (२) ॥*॥ द्वे **'जागरूकस्य'** ॥

घूर्णितः प्रचलायितः ॥ ३२ ॥

घ्विति ॥ घूर्णते स्म । 'घूर्ण भ्रमणे' (भ्वा० आ० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । घूर्णा जातास्य, इति वा । तारकादिः (५।२।३६) ॥ (१) ॥*॥ प्रचल इवाचरति । 'कर्तुः क्यङ् सलोपश्च' (३।१।११) । प्रचलायते स्म । 'गत्यर्था–' (३।४।७२) इति क्तः । प्रचलाया जातास्य, इति वा ॥ (२) ॥*॥ द्वे **'संजातघूर्णस्य'** ॥

स्वप्नक् शयालुर्निद्रालुः

स्वेति ॥ स्वपनशीलः । 'ञिष्वप् शये' (अ० प० अ०) । 'स्वपितृषोर्नजिङ्' (३।२।१७२) ॥ (१) ॥*॥ शयनशीलः 'शीङ् स्वप्ने' (अ० आ० से०) । 'शीङश्च' (वा० ३।२।१५८) इत्यालुच् । **'शयालुः** स्यादजगरे निद्राशीले च कुक्कुरे' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ निद्राशीलः । 'द्रा कुत्सायां गतौ' (अ० प० अ०) । 'स्फुहिगृहि–' (३।२।१५८) इत्यालुच् ॥ (३) ॥*॥ त्रीणि **'निद्राशीलस्य'** ॥

निद्राणशयितौ समौ ।

नीति ॥ निद्राति स्म । अकर्मकत्वात् (३।४।७२) क्तः 'संयोगादेः–' (८।२।४३) इति वः ॥ (१) ॥*॥ शेते स्म । 'शीङ्' (अ० आ० से०) । पूर्ववत् (३।४।७२) क्तः 'निष्ठ शीङ्–' (१।२।१९) इति न कित्त्वम् ॥ (२) ॥*॥ द्वे **'निद्रां प्राप्तस्य'** ॥

पराङ्मुखः पराचीनः

पेति ॥ पराञ्चत्यनभिमुखो भवति । 'अञ्चु गतिपूजनयोः' (भ्वा० प० से०) । 'ऋत्विग्–' (३।२।५९) इति क्विन् । पराक् मुखमस्य ॥ (१) ॥*॥ 'विभाषाञ्चेः–' (५।४।८) इति स्वार्थे कः ॥ (२) ॥*॥ द्वे **'विमुखस्य'** ॥

स्यादवाङ्प्यधोमुखः ॥ ३३ ॥

स्येति ॥ अवाञ्चत्यधोमुखो भवति । क्विन् (३।२।५९) ॥ (१) ॥*॥ अधो मुखं यस्य ॥ (२) ॥*॥ द्वे **'अधोमुखस्य'** ॥

देवानञ्चति देवद्यङ्

दयिति ॥ 'विष्वग्देवयोः–' (६।३।९२) इत्यद्रिः ॥ (१) ॥*॥ एकम् **'देवानुवर्तिनः'** ॥

विष्वद्यङ् विष्वगञ्चति ।

वीति ॥ मूर्धन्यमध्यः ॥*॥ (विश्वद्यङ्) तालव्यमध्यश्च ॥ (१) ॥*॥ एकं **'सर्वतो गच्छतः'** ॥

यः सहाञ्चति सध्र्यङ् सः

य इति ॥ सहस्य सध्रिः' (६।३।९५) । स्त्रियां सध्रीची ॥ (१) ॥*॥ एकं **'सहचरितस्य'** ॥

स तिर्यङ् यस्तिरोऽञ्चति ॥ ३४ ॥

स इति ॥ 'स्तिरसस्तिर्यलोपे' । (६।३।९४) ॥ (१) ॥*॥ एकं **'वक्रं गच्छतः'** ॥

वदो वदावदो वक्ता

वेति ॥ वदति । 'वद व्यक्तायां वाचि' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) ॥ (१) ॥*॥ 'चरिचलि–' (वा० ६।१।१२) इति द्वित्वादि ॥ (२) ॥*॥ वक्ति । 'वच भाषणे' (अ० प० अ०) । 'तृन्' (३।२।१३५) । **'वक्ता** तु पण्डितेऽपि स्याद्वाग्मिन्यप्यभिधेयवत्' इति विश्वः (मेदिनी) ॥ (३) ॥*॥ त्रीणि **'वक्तुः'** ॥

वागीशो वाक्पतिः समौ ।

वेति ॥ वाचामीशः ॥ (१) ॥*॥ वाचां पतिः ॥ (२) ॥*॥ द्वे **'पटुवचनस्य'** ॥

वाचोयुक्तिपटुर्वाग्मी वावदूकोऽतिवक्तरि ॥ ३५ ॥

वेति ॥ वाचो युक्तिः सयुक्तिकत्वम् । 'वाग्दिक्पश्यद्भ्यः–' (वा० ६।३।२१) इत्यलुक् । तत्र पटुः ॥ (१) ॥*॥ प्रशस्ता वागस्य । 'वाचो ग्मिनिः' (५।२।१२४) । **'वाग्मी** पटौ सुराचार्ये' इति विश्वमेदिन्यौ ॥ (२) ॥*॥ कुर्वादिषु (ग० ४।१।१५१) 'वावदूक'शब्दपाठाद् 'वदेः' ऊकः ॥ (३) ॥*॥ अति वक्ति । साधुकारिणि **'तृन्'** (३।२।१३५) । तृच् (३।१।१३३) वा ॥ (४) ॥*॥ चत्वारि **'वावदूकस्य'** ॥

स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् ।

स्येति ॥ जल्पति । 'जल्प व्यक्तायां वाचि' (भ्वा० प० से०) । 'जल्पभिक्ष–' (३।२।१५५) इति षाकन् । षित्वात् स्त्रियां ङीष् ॥ (१) ॥*॥ बहुगर्ह्या वागस्य । 'आलजाटचौ बहुभाषिणि' (५।२।१२५) । 'कुत्सायामिति वाच्यम्' (वा० ५।२।१२५) ॥ (२) ॥*॥ (३) ॥*॥ (४) ॥*॥ चत्वारि **'बहुगर्ह्यभाषिणः'** ॥

दुर्मुखे मुखराबद्धमुखौ

द्विति ॥ दुर्निन्दितं मुखमस्य । **'दुर्मुखः** कपिभिन्नागभिदोर्ना मुखरे त्रिषु' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ निन्दितं मुखमस्य । 'खमुख–' (५।२।१०७) इति रः । मुखशब्दो लक्षणयात्र वचनपरः ॥ (२) ॥*॥ न बद्धं नियमितं मुखमस्य ॥ (३) ॥*॥ त्रीणि **'अप्रियवादिनः'** ॥

शक्तः प्रियंवदे ॥ ३६ ॥

शेति ॥ शक्नोति । 'शकॢ शक्तौ' (स्वा० प० अ०) । 'मूङ्शक्यबिभ्यः क्तः' (उ० ४।१०८) ॥ (१) ॥*॥ प्रियं वदति । 'प्रियवशे वदः खच्' (३।२।३८) ॥ (२) ॥*॥ द्वे **'प्रियवादिनः'** ॥

लोहलः स्यादस्फुटवाग्

लविति ॥ लोहनम् । 'लुह गार्ध्ये' इति बोपदेवः । भावे घञ् (३।३।१८) । लोहं लाति । 'आतोऽनुप–' (३।२।३) इति कः । यद्वा रोहयतेर्बाहुलकादलच् । कपिलिकादित्वात् (वा० ८।२।१८) लत्वम् । **'लोहलः** शङ्खलाधार्येऽव्यक्तवाचिनि च त्रिषु' इति विश्वः (मेदिनी) हेमचन्द्रौ ॥ (१) ॥*॥ न स्फुटा वागस्य ॥ (२) ॥*॥ द्वे **'अस्पष्टभाषितुः'** ॥

गर्ह्यवादी तु कद्वदः ।

गेति ॥ गर्ह्यं वदति । 'सुप्यजातौ' (३।२।७८) इति णिनिः ॥ (१) ॥*॥ कुत्सितं वदति । 'रथवदयोश्च' (६।३।१०२) इति कोः कत् ॥ (२) ॥*॥ द्वे **'दुर्भाषिणः'** ॥

समौ कुवादकुचरौ

सेति ॥ कुत्सितो वादोऽस्य ॥ (१) ॥*॥ कुत्सितं चरति । अच् (३।१।१३४) ॥ (२) ॥*॥ द्वे **'कुकथनशीलस्य'** ॥

स्यादसौम्यस्वरोऽस्वरः ॥३७॥

स्येति ॥ असौम्यो रूक्षः स्वरो यस्य ॥ (१) ॥*॥ अप्रशस्तः स्वरो यस्य ॥ (२) ॥*॥ द्वे **'काकादिवद्रूक्षस्वरस्य'** ॥

रवणः शब्दनः

रेति ॥ रवणशीलः । 'रु शब्दे' (अ० प० अ०) । 'चलनशब्दार्थात्–' (३।२।१४८) इति युच् ॥ (१) ॥*॥ शब्दनशीलः । 'शब्द शब्दक्रियायाम्' (चु० उ० से०) युच् (३।३।१४८) ॥ (१) ॥*॥ द्वे **'शब्दकरणशीलस्य'** ॥

नान्दीवादी नान्दीकरः समौ ।

नेति ॥ नान्दीवदनशीलः । 'सुपि–' (३।२।७८) इति वदेर्णिनिः ॥ (१) ॥*॥ नान्दीं करोति वदति 'दिवाविभा–' (३।२।२१) इति टः ॥ (२) ॥*॥ 'आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रवर्तते । देवद्विजनृपादीनां तस्मान्नान्दीति कीर्त्यते' इति भरतः ॥*॥ **'नाटकादौ मङ्गलार्थं भेर्यादिवादकस्य'** द्वे ॥

जडोऽज्ञे

जेति ॥ जलति । 'जल घातने' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । डलयोरभेदः । 'इष्टं वानिष्टं वा सुखदुःखं वा न वेत्ति यो मोहात् । परवशगः स भवेदिह नित्यं जडसंज्ञकः पुरुषः', **'जडा** स्त्रियाम् । शूकशिम्ब्यां हिमग्रस्तमूकाप्रज्ञेषु' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ न जानाति । 'इगुपधज्ञा–' (३।१।१३५) इति कः ॥ (२) ॥*॥ **'जडमतेः'** ॥

एडमूकस्तु वक्तुं श्रोतुमशिक्षिते ॥ ३८ ॥

एडेति ॥ एडो बधिरश्चासौ मूकश्च । **('एडमूकोऽन्यलिङ्गः** स्याच्छठे वाक्श्रुतिवर्जिते' इति मेदिनी) ॥*॥ ('अनेडमूकः' इति पाठान्तरे 'नास्त्येडमूकोऽस्मात्' इत्यर्थः । 'त्रिलिङ्गोऽनेडमूकः स्याच्छठे वाक्श्रुतिवर्जिते' इति रभसः ॥ (१) ॥*॥ एकम् **'भाषणश्रवणयोरनर्हस्य'** ॥

तूष्णींशीलस्तु तूष्णीकः

त्विति ॥ तूष्णीं शीलमस्य ॥ (१) ॥*॥ 'शीले को मलोपश्च' (वा० ५।३।७१) । 'केऽणः' (७।४।१३) इति णाणो ह्रस्वः मलोपसामर्थ्यात् । अन्यथा ठमेव विदध्यात् ।—'शीलम्' (४।४।६१) इति ठकि 'अव्ययानाम्–' (वा० ६।४।१४४) इति टिलोपेन सिद्धत्वात्—इति मुकुटः । तन्न । क-

१—ङीपूङीषोः फलभेदं वदता स्वरंकृतभेदस्यानङ्गीकृतत्वेन पूर्वापरविरुद्धमेतत् । बहुत्र 'संज्ञापूर्वकत्वेन वृद्ध्यभावस्य स्वयमप्यङ्गीकृतत्वादकिंत्किरं च ॥

विधानस्य स्वरार्थत्वात् । ठकि उदात्तनिवृत्तिस्वरेण मध्योदात्तताप्रसङ्गाच्च । वृद्धि(७।२।११८)प्रसङ्गाच्च ॥ (२) ॥*॥ द्वे **'मौनशीलस्य'** ॥

नग्नोऽवासा दिगम्बरः ।

नेति ॥ नजते स्म । 'ओ नजी व्रीडे' (सु० आ० से०) । अकर्मकत्वात् क्तः (३।४।७२) । 'ओदितश्च' (८।२।४५) इति नत्वम् । **'नग्नो** वन्दिक्षपणयोः पुंसि त्रिषु विवाससि' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ न वासोऽस्य ॥ (२) ॥*॥ दिगेवाम्बरं यस्य । **'दिगम्बरः** स्यात्क्षपणेऽधने तमसि शंकरे' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'नग्नस्य'** ॥

निष्कासितोऽवकृष्टः स्यात्

नीति ॥ निष्कास्यते स्म । 'कस गतौ' (भ्वा० प० से०) । ण्यन्तः । क्तः (३।२।१०२) ॥ (१) ॥*॥ अवकृष्यते स्म । 'कृष विलेखने' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'निष्कासितस्य'** ॥

अपध्वस्तस्तु धिक्कृतः ॥ ३९ ॥

अपेति ॥ अपध्वस्यते स्म । 'ध्वंसु अधःस्रंसने, गतौ च' (भ्वा० आ० से०) । क्तः (३।२।१०२) । **'अपध्वस्तः** परित्यक्ते निन्दितेऽप्यवचूर्णिते' (इति मेदिनी) ॥ (१) ॥*॥ 'धिक्' इति कृतः ॥ (२) ॥*॥ द्वे **'धिक्कृतस्य'** ॥

आत्तगर्वोऽभिभूतः स्यात्

आत्तेति ॥ आत्तो गर्वो यस्य ॥*॥ **'आत्तगन्धः'** इति पाठान्तरम् । **'गन्धो** गन्धक आमोदे संबन्धे लेशगर्वयोः' इति विश्वः । **'गन्धो** गर्वो **लवोऽपि** च' इति त्रिकाण्डशेषः ॥ (१) ॥*॥ अभिभूयते स्म । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'गर्वारूढस्य'** ॥—चत्वारः पर्यायाः—इत्येके ॥

दापितः साधितः समौ ।

देति ॥ दाप्यते स्म । 'दाप्' (जु० उ० अ०) ण्यन्तः ॥*॥ **'दायितः'** इति पाठान्तरम् । तत्र 'दय दाने' (भ्वा० आ० से०) इति धातुः ॥ (१) ॥*॥ साध्यते स्म । 'साध संसिद्धौ' (स्वा० प० अ०) ॥ (२) ॥*॥—द्वे **'धनादिकं प्रदापितस्य'**—इति मुकुटः । प्रदापितस्य धनादेर्वा ॥

प्रत्यादिष्टो निरस्तः स्यात्प्रत्याख्यातो निराकृतः ॥४०॥

प्रेति ॥ प्रत्यादिश्यते स्म । 'दिश अतिसर्जने' (तु० उ० अ०) । क्तः (वा० ३।२।१०२) ॥ (१) ॥*॥ निरस्यते स्म । 'असु क्षेपणे' (दि० प० से०) । क्तः (३।१।१०२) **'निरस्तः** प्रेषितशरे संत्यक्ते त्वरितोदिते । निष्क्रान्ते प्रतिहते च' इति हैमः ॥ (२) ॥*॥ प्रत्याख्यायते स्म । 'ख्या प्रकथने' (अ० प० अ०) । चक्षिङादेशो वा क्तः (३।२।१०२) ॥ (३) ॥*॥ निरकारि । कृञ् (त० उ० अ०) । क्तः (३।२।१०२) ॥ (४) ॥*॥ चत्वारि **'प्रत्याख्यातस्य'** ॥

निकृतः स्याद्विप्रकृतः

नीति ॥ न्यकारि । क्तः (३।२।१२) । **'निकृतं** विप्रलब्धे स्याच्छठे विप्रकृते त्रिषु' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ विप्राकारि ॥ (२) ॥*॥ द्वे **'तिरस्कृतस्य'** ॥

विप्रलब्धस्तु वञ्चितः ।

वीति ॥ विप्रलभ्यते स्म । 'डुलभष् प्राशौ' (भ्वा० आ० अ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ 'वञ्चु गतौ' (भ्वा० प० से०) । ण्यन्तः । वञ्च्यते स्म । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'वञ्चितस्य'** ॥

मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः ॥ ४१ ॥

मेति ॥ मनो हतं यस्य ॥ (१) ॥*॥ प्रति हन्यते स्म । क्तः (३।२।१०२) । 'भवेत्**प्रतिहतं** द्विष्टे प्रतिस्खलितरुद्धयोः' (इति मेदिनी) ॥ (२) ॥*॥ प्रतिबध्यते स्म । 'बन्ध बन्धने' (क्र्या० प० अ०) । क्तः (३।२।१०२) ॥ (३) ॥*॥ हन्यते स्म । क्तः ॥ (४) ॥*॥ चत्वारि **'कृतमनोभङ्गस्य'** ॥

अधिक्षिप्तः प्रतिक्षिप्तः

अधीति ॥ अधिक्षिप्यते स्म । 'क्षिप प्रेरणे' (तु० उ० अ०) । क्तः (३।२।१०२) । **'अतिक्षिप्तः** प्रणिहिते कुत्सिते भर्त्सिते त्रिषु' इति विश्वहेमचन्द्रौ (मेदिनी) ॥ (१) ॥*॥ प्रत्यक्षेऽपि । **'प्रतिक्षिप्तं** वारिते स्यात्प्रेषिते पञ्चैकं त्रिषु' (इति मेदिनी) । (**'प्रतिक्षिप्तं** प्रतिहते प्रेषिते च निराकृते' इति विश्वः) ॥ (२) ॥*॥ द्वे **'कृताक्षेपस्य'** ॥

बद्धे कीलितसंयतौ ।

बेति ॥ बद्ध्यते स्म । 'बन्ध बन्धने' (क्र्या० प० अ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ कील्यते स्म । 'कील बन्धे' (भ्वा० प० से०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ संयम्यते स्म । 'यम उपरमे' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥ (३) ॥*॥ त्रीणि **'बद्धस्य'** ॥

आपन्न आपत्प्राप्तः स्यात्

आपेति ॥ आपद्यते स्म । 'पद गतौ' (दि० आ० अ०) । क्तः (३।२।१०२) । **'आपन्नः** सविपत्तौ च प्राप्तेऽपि वाच्यलिङ्गकः' (इति विश्वमेदिन्यौ) ॥ (१) ॥*॥ आपदं प्राप्तः ॥ (२) ॥*॥ द्वे **'आपद्ग्रस्तस्य'** ॥

कांदिशीको भयद्रुतः ॥४२॥

केति ॥ 'कां दिशं यामि' इत्याह । 'तदाहेति माशब्दादिभ्यः' (वा० ४।४।१) इति ठक् । पृषोदरादिः (६।३।१०९) । मुकुटस्तु—'कदि वैक्लव्ये' (भ्वा० आ० से०) । भावघञन्तात् मत्वर्थ इनिः (५।२।११५) । कन्वी । 'शीकृ

१—परिगत-प्रणिहित-पल्लवित-प्रतिहत-प्रतिक्षिप्तशब्दरूपम्—इति भाति ॥

सेचने' (भ्वा० आ० से०)। भावे घञ् (३।३।१८)। शीकः क्षरणार्थत्वादश्रुपाते वर्तते। वैक्लव्ययुक्तोऽश्रुपातः। कान्दिशीकः। तद्योगाज् ज्योत्स्नाद्यण् (५।२।१०३)—इत्याह ॥ (१) ॥*॥ अदुद्रुवत्। 'द्रु गतौ' (भ्वा० प० से०)। कर्तरि क्तः (३।४।७२)। भयाद्द्रुतः। 'पञ्चमी' (२।१।३७) इति योगविभागात् समासः ॥ (२) ॥*॥ द्वे **'भयेन पलायितस्य'** ॥

आक्षारितः क्षरितोऽभिशस्ते

आक्षेति ॥ आक्षार्यते स्म। 'क्षर संचलने' (भ्वा० प० से०)। ण्यन्तः। क्तः (३।२।१०२) आक्षारो मैथुनं प्रत्याक्रोशो जातोऽस्य इति वा। इतच् (५।२।३६) ॥ (१) ॥*॥ **'क्षारितः** स्राविते क्षारे चाभिशस्तेऽपि च त्रिषु' (इति मेदिनी) ॥ (२) ॥*॥ अभिशस्यते स्म। 'शसु हिंसायाम्' (भ्वा० प० से०)। क्तः (३।२।१०२)। 'यस्य विभाषा' (७।२।११५) इति नेट्। 'धृषिशसी–' (७।२।१९) इति वा ॥ (३) ॥*॥ त्रीणि **'मेथुननिमित्तं मिथ्यादूषितस्य'** ॥

संकसुकोऽस्थिरे।

समिति ॥ संकसति। 'कस गतौ' (भ्वा० प० से०)। 'समि कस उकन्' (उ० २।२९)।—'यूकादयः' इति कन्, उक् चागमः—इति मुकुटस्त्वपाणिनीयः ॥ (१) ॥*॥ न स्थिरः ॥ (२) ॥*॥ द्वे **'चलस्वभावस्य'** ॥

व्यसनार्तोपरक्तौ द्वौ

व्येति ॥ व्यसनेनार्तः ॥ (१) ॥*॥ उपरज्यते स्म। 'रञ्ज रागे' (भ्वा० प० अ०)। क्तः (३।२।१०२) 'उपरक्तो, व्यसनार्ते राहुग्रस्तेन्दुसूर्ययोः' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ द्वे **'दैवमानुषपीडायुक्तस्य'** ॥

विह्वस्तव्याकुलौ समौ ॥४३॥

वीति ॥ विक्षिप्तो हतोऽस्य। **'विह्वस्तस्तु** विह्वले पण्डकेऽकरे' इति हैमः ॥ (१) ॥*॥ व्याकोलति। 'कुल संस्त्याने बन्धुषु च' (भ्वा० प० से०)। 'इगुपध–' (३।१।१३५) इति कः ॥ (२) ॥*॥ द्वे **'शोकादिभिरितिकर्तव्यताशून्यस्य'** ॥

विक्लवो विह्वलः

वीति ॥ विक्लवते। 'क्लुङ् गतौ' (भ्वा० आ० से०)। अच् (३।१।१३४) ॥ (१) ॥*॥ विह्वलति। 'ह्वल चलने' (भ्वा० प० से०)। अच् (३।२।१३४) ॥ (२) ॥*॥ द्वे **'स्वाङ्गान्येव धारयितुमशक्तस्य'** ॥

स्यात्तु विवशोऽरिष्टदुष्टधीः।

स्यादिति ॥ विरुद्धं वष्टि। 'वश कान्तौ' (अ०प०से०)। अच् (३।१।१३४)। **'विवशश्चिष्ववश्यात्मारिष्टदुष्टधियोरपि'** (इति मेदिनी) ॥ (१) ॥*॥ अरिष्टेन दुष्टा। अरिष्टदुष्टा धीर्यस्य ॥ (२) ॥*॥ द्वे **'आसन्नमरणलक्षणेन दूषितमतेः'** ॥

कश्यः कशार्हे

केति ॥ कशामर्हति 'दण्डादिभ्यो यः' (५।१।६६)। **'कश्यं** कशार्हमद्ययोः। अश्वमध्येऽपि' इति हैमः ॥ (१) ॥*॥ कशामर्हति। 'अर्हः' (३।२।१२) इत्यच् ॥ (२) ॥*॥ द्वे **'ताडनार्हस्य'** ॥

संनद्धे त्वाततायी वधोद्यते ॥ ४४ ॥

समिति ॥ संनह्यति स्म। 'णह बन्धने' (दि०उ०अ०)। अकर्मकत्वात् कर्तरि क्तः (३।४।७२)। भावक्तान्तादर्शआद्यच् (५।२।१२७) वा ॥*॥ आततं यथा तथायितुं शीलमस्य। 'अय गतौ' (भ्वा० आ० से०)। 'सुपि–' (३।२।७८) इति णिनिः ॥ (१) ॥*॥ एकम् **'वधोद्यतस्य'** ॥

द्वेष्ये त्वक्षिगतः

द्वेयिति ॥ द्वेष्टुमर्हः। 'द्विष अप्रीतौ' (अ० उ० अ०)। ण्यत् (३।१।१२४) ॥ (१) ॥*॥ अक्षिविषयं गतः। शाकपार्थिवादिः (वा० २।१।७८) ॥ (२) ॥*॥ द्वे **'द्वेषार्हस्य'** ॥

वध्यः शीर्षच्छेद्य इमौ समौ।

वेति ॥ वधमर्हति स्म। 'दण्डादिभ्यो यः' (५।१।६६)। यद्वा हन्तुमर्हः। 'हनो वध च' (वा० ३।१।९७) इति यत् ॥ (१) ॥*॥ शीर्षस्य शिरसश्छेदः। तमर्हति। 'शीर्षश्छेदाद्यच्च' (५।१।६५) ॥ (२) ॥*॥ द्वे **'शिरश्छेदार्हस्य'** ॥

विष्यो विषेण यो वध्यः

वीति ॥ विषेण वध्यः। 'नौवयोधर्म–' (४।४।९१) इति यत् ॥ (१) ॥*॥ एकम् **'विषेण वध्यस्य'** ॥

मुसल्यो मुसलेन यः॥ ४५ ॥

म्विति ॥ मुसलेन वध्यः 'दण्डादिभ्यो यः' (५।१।६६) (१) ॥*॥ एकम् **'मुसलेन वध्यस्य'** ॥

शिश्विदानोऽकृष्णकर्मा

शीति ॥ अकृष्णं शुक्लं कर्मास्य ॥ (२) ॥*॥ शिश्विन्दे। 'श्विदि श्वैत्ये' (भ्वा० आ० से०)। लिटः कानच् (३।२।१०६) अनित्यत्वान्न नुम् ॥ (१) ॥*॥ द्वे अपापकर्मणः। **'कृष्णकर्मा'** इति पाठान्तरम् ॥ (२) ॥*॥ तत्र 'श्विता वर्णे' (भ्वा० आ० से०) धातुः। श्वेतितुमिच्छति। 'श्वितेर्दश्च' (उ० २।९२) इत्यानच्, दत्वम्, सनो लुक् ॥ (१) ॥*॥ द्वे **'पापकर्मणः'** ॥

चपलश्चिकुरः समौ।

चेति ॥ चपति। 'चप सान्त्वने' (भ्वा० प० से०)। पृ-

१—वध उपलक्षणम्। यत्स्मृतिः—'अग्निदो गरदश्चैव शस्त्रपाणी धनापहः। क्षेत्रदारहरश्चैव षडेते त्वाततायिनः' इति क्षीरस्वामी ॥

षादित्वात् (उ० १।१०६) कलच् । **'चपलश्चोरणे चले ।** क्षणिके चिकुरे शीघ्रे पारदे प्रस्तरान्तरे । मीनेऽपि **चपला** तु स्यात्पिप्पल्यां विद्युति श्रियाम् । पुंश्चल्याम्' इति हैमः ॥ (१) ॥*॥ 'चि' इति अव्यक्तं कुरति । 'कुर शब्दे' (तु० प० से०) । 'इगुपध–' (३।१।१३४) इति कः । **'चिकुरोऽहौ गृहबभ्रौ केशे चञ्चलशैलयोः । पक्षिवृक्षभिदोश्चापि' इति** हैमः ॥ (२) ॥*॥ द्वे **'दोषमनिश्चित्य वधादिकमाचरतः' ॥**

दोषैकदृक् पुरोभागी

दविति ॥ दोषे एकस्मिन् दृक् ज्ञानं यस्य ॥ (१) ॥*॥ पुरः पूर्वं भजते । 'भज सेवायाम्' । 'संपृचा–' (३।२।१४२) इति घिनुण् ॥ (२) ॥*॥ द्वे **'दोषैकग्राहकस्य' ॥**

निकृतस्त्वनृजुः शठः ॥ ४६ ॥

नीति ॥ निकृन्तति । 'कृती छेदने' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । **'निकृतं** विप्रलब्धे स्याच्छठे विप्रकृते त्रिषु' (इति मेदिनी) ॥ (१) ॥*॥ ऋजुविरुद्धः । 'नञ्' (२।२।६) इति तत्पुरुषः । 'नलोपो नञः' (६।३।७३) ॥ (२) ॥*॥ शठति 'शठ कैतवे च' (भ्वा० प० से०) । 'पचाद्यच्' (३।१।१३४) । **'शठो** मध्यस्थपुरुषे धूर्ते धत्तूरकेऽपि च' इति हेमचन्द्रः ॥ (३) ॥*॥ त्रीणि **'वक्राशयस्य' ॥**

कर्णेजपः सूचकः स्यात्

केति ॥ कर्णे जपति । 'जप व्यक्तायां वाचि' (भ्वा० प० से०) । 'स्तम्बकर्णयोः–' (३।२।११३) इत्यच् । 'हलदन्तात्–' (६।३।९) इत्यलुक् ॥ (१) ॥*॥ सूचयति । 'सूच पैशुन्ये' (चु०) दन्त्यादिरदन्तः । ण्वुल् (३।१।१३३) । **'सूचकः** शुनि दुर्जने । कथके सीवनद्रव्ये मार्जारे वायसेऽपि च' इति हैमः ॥ (२) ॥*॥ द्वे **'कर्णेजपस्य' ॥**

पिशुनो दुर्जनः खलः ।

पीति ॥ पिंशति । 'पिश अवयवे' (तु० प० से०) । 'श्रुधिपिशिमिथिभ्यः कित्' (उ० ३।५५) इत्युनन् ।—बाहुलकादुनन्—इति मुकुटोक्तिस्त्वेतत्सूत्रास्मरणमूलिका । **पिशुनं** कुङ्कुमेऽपि च । कपिवक्त्रे च काके ना सूचककूरयोस्त्रिषु । पृक्कायां **पिशुना** स्त्री स्यात्' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ दुष्टो जनः । 'कुगति–' (२।२।१८) इति समासः ॥ (२) ॥*॥ खलति । 'खल संचये' (भ्वा० प० से०) । अच् (३।१।१३४) । खं छिद्रं लाति वा । **'खलः** कल्के भुवि स्थाने क्रूरे कर्णेजपेऽधमे' इति हैममेदिन्यौ ॥ (३) ॥*॥ त्रीणि **'परस्परभेदकस्य' ॥** स्वामी तु सूचकपर्याय एवैतानाह ॥

नृशंसो घातुकः क्रूरः पापः

घ्रीति ॥ नृन् शंसति 'शंसु हिंसायाम्' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) ।–अजन्तः–इति मुकुटोक्तं न सम्यक् । अजपवादस्याणो जागरूकत्वात् ॥ (१) ॥*॥ हननशीलः । 'लषपत–' (३।२।१५४) इत्युकञ् ॥ (२) ॥*॥ कृन्तति । 'कृती छेदने' (तु० प० से०) । 'कृतेश्छः क्रू च' (उ० २।२१) इति रक् प्रत्ययो धातोः क्रू आदेशश्च । यत्तु मुकुटेन—कृणाति—इति विगृह्य—कृतेः 'दूरादयश्च' इति रक् क्रू आदेशश्च, कुङो वा दूरादित्वाद्रक् दीर्घः—इत्युक्तं तदुपयुक्तसूत्रास्मरणमूलकम् परस्परविरुद्धं च । 'दूरादयश्च' इति सूत्रं च नास्ति । 'क्रूरस्तु कठिने घोरे नृशंसेऽप्यभिधेयवत्' इति विश्वः (मेदिनी) ॥ (३) ॥*॥ पापमस्यास्ति । अर्शआद्यच् (५।२।१२७) ॥ (४) ॥*॥ चत्वारि **'परद्रोहकारिणः' ॥**

धूर्तस्तु वञ्चकः ॥ ४७ ॥

ध्विति ॥ 'धुर्वति । 'धुर्वी हिंसायाम्' (भ्वा० प० से०) । 'हसिमृग्रिण्–' (उ० ३।८६) इति तन् । राल्लोपः (६।४।२१) । **'धूर्ते** तु खण्डलवणे **धूर्तो** धत्तूरमायिनोः' इति हेमचन्द्रः ॥ (१) ॥*॥ वञ्चयति । 'वञ्च गतौ' (भ्वा० प० से०) । ण्यन्तः । ण्वुल् (३।१।१३३) । **'वञ्चकस्तु** खले धूर्ते गृहबभ्रौ च जम्बुके' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ द्वे **परप्रतारकस्वभावस्य' ॥**

अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः ।

अज्ञ इति ॥ न जानाति । 'इगुपध–' (३।१।१३५) इति कः । **'अज्ञस्तु** जडमूर्खयोः' इति विश्वः ॥ (१) ॥*॥ मुह्यति स्म । 'मुह वैचित्ये' (दि० प० अ०) । गत्यर्था–' (३।४।७२) इति क्तः । **'मूढस्तन्त्रितबालयोः'** इति विश्वः ॥ (२) ॥*॥ जातं जन्मकालविशेषमनतिक्रम्य वर्तते । पदार्थानतिवृत्तावव्ययीभावः (२।१।६) तदस्यास्ति । अर्शआद्यच् (५।२।१२७) ॥ (३) ॥*॥ मुह्यति । 'मुहेः खो मूर्च' (उ० ५।२२) ॥ (४) ॥*॥ विधेयं विधानम् । तस्यायमधिकारी । अविद्यावद्विषयत्वाच्छास्त्राणाम् । 'तस्येदम्' (४।३।१२०) इत्यण् ॥ (५) ॥*॥ बलिशस्य मत्स्यवेधनस्यायम् । मूर्खत्वादपूज्यत्वात् । **'बालिशस्तु** शिशौ मूर्खे' (इति मेदिनी) ॥ (६) ॥*॥ षट् **'मूर्खस्य' ॥**

कदर्ये कृपणक्षुद्रकिंपचानमितंपचाः ॥ ४८ ॥

केति ॥ कुत्सितोऽर्थः स्वामी । 'कुगति–' (२।२।१८) इति समासः । 'कोः कत्तत्पुरुषेऽचि' (६।३।१०१) ॥ (१) ॥*॥ कृपां करोति । 'तत्करोति–' (वा० ३।१।२६) इति णिच् । कृप्यते 'कृत्यल्युटो–' (३।३।११३) इति कर्मणि ल्युट् । अजादेशस्य स्थानिवत्त्वान्न गुणः (७।३।८६) । यद्वा कृप्यते कृपाविषयीक्रियते । 'कृपू सामर्थ्ये' (भ्वा० आ० से०) । बाहुलकात्क्युन् । ल्युटि (३।३।११३) वा संज्ञापूर्वकत्वाद्गुणाभावः । बाहुलकाल्लत्वाभावः । यद्वा 'कृप कृपायां गतौ च' (भ्वा० आ० से०) इत्यस्य बाहुलकात्संप्रसारणम् । यद्वा

'कृप' इत्यत्र मतान्तरे 'कृप' इति पाठः । अत एव 'कृपेः ष्यङ् कृपायाम्' इति बोपदेवः । ततो बाहुलकात्क्युन् ॥ (२) ॥*॥ क्षुणत्ति । 'क्षुदिर् संपेषणे' (रु० उ० अ०) । 'स्फायितञ्चि–' (उ० २।१३) इति रक् । **'क्षुद्रो** दरिद्रे कृपणे निकृष्टेऽल्पनृशंसयोः । **क्षुद्रा** व्याघ्रीनटीव्यङ्गावृहतीसरघासु च । चाङ्गेरिकायां हिंस्रायां मक्षिकामात्रवेश्ययोः' इति हेमचन्द्रः ॥ (३) ॥*॥ किं पचति । 'ताच्छील्य–' (३।२।१२९) इति चानश् शानच् (३।२।१२४) वा । 'अनित्यमागमशासनम्' इति न नुम् । 'किं क्षेपे' (२।१।६४) इति समासः ॥ (४) ॥*॥ मितं पचति । 'मितनखे च' (३।२।३४) इति खच् ॥ (५) ॥*॥ यद्वा **'किंपचः' 'अनमितंपचः'** इति छेदः । पचाद्यच् (३।१।१३४) ॥ (४) ॥*॥ न मितंपचोऽमितंपचः । तद्भिन्नोऽनमितंपचः ॥ (५) ॥*॥ पञ्च **'कृपणस्य'** ॥

निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः ।

नीति ॥ निर्गतं स्वमस्य । स्वान्निष्क्रान्तो वा ॥ (१) ॥*॥ दुःस्था विधा प्रकारः समृद्धिर्वास्य । **'दुर्विधो** वाच्यलिङ्गः स्याद्दुर्गतेऽपि खलेऽपि च' (इति मेदिनी) ॥ (२) ॥*॥ दीयते स्म । 'दीङ् क्षये' (दि० आ० अ०) । 'गत्यर्था–' (३।४।७२) इति क्तः । 'स्वादय ओदितः' (दि० ग० सू०) । 'ओदितश्च' (८।२।४५) इति नत्वम् । (**'दीना** स्त्री मूषिकस्त्रियाम् । वाच्यवद्दुर्गते भीते' इति मेदिनी) ॥ (३) ॥*॥ दरिद्राति । 'दरिद्रा दुर्गतौ' (अ० प० से०) । पचाद्यच् (३।१।१३४) ॥ (४) ॥*॥ दुर्गच्छति स्म । 'गत्यर्था–' (३।४।७२) इति क्तः ॥ (५) ॥*॥ पञ्च **'निर्द्रव्यस्य'** ॥

वनीयको याचनको मार्गणो याचकार्थिनौ ॥ ४९ ॥

वेति ॥ वननम् 'वनु याचने' (त० आ० से०) । 'सर्वधातुभ्य इन्' (उ० ४।११८) । वनिर्याच्ञा । वनिमिच्छति । 'सुप आत्मनः क्यच्' (३।१।८) । ण्वुल् (३।१।१३३) ॥*॥ **'वनीपकः'** इति पाठे वनीं पाति । कः (३।२।३) ततः संज्ञायां कन् (५।३।७५) । 'कुन्' (उ० २।३२) वा । यत्तु मुकुटेन—'वनति–' इति विगृह्य—'वनिर्याच्ञा'—इत्युक्तम् । तच्चिन्त्यम् । 'याचकः' इत्यापत्तेः ॥ (१) ॥*॥ याचति । 'ट् याचृ याच्ञायाम्' (भ्वा० उ० से०) । ल्युः (३।१।१३४) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ मार्गति । 'मार्ग अन्वेषणे' (चु० उ० से०) । 'बहुलमन्यत्रापि' (उ० २।७८) इति युच् ॥ (३) ॥*॥ याचति । ण्वुल् (३।१।१३३) ॥ (४) ॥*॥ अर्थोऽस्यास्ति । 'अर्थाच्चासंनिहिते' (वा० ५।२।१३५) इतीनिः । अर्थयते । 'अर्थ याचने' (चु० आ० से०) । गृध्यादिणिनिः (३।१३३) वा ॥ (५) ॥*॥ पञ्च **'याचकस्य'** ॥

अहंकारवानहंयुः

अहेति ॥ अहंकारोऽस्यास्ति । मतुप् (५।२।९४) ॥ (१) ॥*॥ अहमस्यास्ति । 'अहम् शुभम्' इति मान्तम् (विभक्तिप्रतिरूपकम्) अव्ययम् । 'अहंशुभमोर्युस्' (५।२।१४०) ॥ (२) ॥*॥ द्वे **'साहंकारस्य'** ॥

शुभंयुस्तु शुभान्वितः ।

श्विति ॥ शुभमस्ति । युस् (५।२।१४०) ॥ (१) ॥*॥ शुभेनान्वितः । 'कर्तृकरणे–' (२।१।३१) इति समासः ॥ (२) ॥*॥ द्वे **'शोभनयुक्तस्य'** ॥

दिव्योपपादुका देवाः

दीति ॥ दिवि भवाः । 'द्युप्रागपा–' (४।२।१०१) इति यत् । उपपद्यन्ते । 'पद गतौ' (दि० आ० अ०) । 'लषपतपद–' (३।२।१५५) इत्युकञ् । ते च ते च ॥ (१) ॥*॥ नारकव्यावृत्तये दिव्यपदम् । मातापित्रादिदृष्टकारणनिरपेक्षा अदृष्टसहकृतेभ्योऽणुभ्यो जाता ये देवाः, ते दिव्योपपादुका उच्यन्ते ॥*॥ एकम् **'देवानाम्'** ॥

नृगवाद्या जरायुजाः ॥ ५० ॥

त्रिति ॥ ना च गौश्चाद्यौ येषाम् । आद्यशब्देन खराश्वादीनां ग्रहणम् ॥*॥ जरायोर्गर्भाशयाज्जाताः । 'पञ्चम्याम्' (३।२।९८) इति जनेर्डः ॥ (१) ॥*॥ एकम् **'नृगवादीनाम्'** ॥

स्वेदजाः कृमिदंशाद्याः

स्वेदेति ॥ स्वेदजनकत्वादूष्मा स्वेदः । स्वेदाज्जाताः । डः (३।२।९८) ॥ (१) ॥*॥ कृमिश्च दंशश्चाद्यौ येषाम् । आद्यशब्देन मशकमत्कुणादिग्रहणम् ॥*॥ एकम् **'कृमिदंशादीनाम्'** ॥

पक्षिसर्पाद्योऽण्डजाः ।

पेति ॥ पक्षी च सर्पश्चादी येषाम् । आदिशब्देन नक्रमत्स्यपिपीलिकादिग्रहः ॥*॥ अण्डे जाताः । 'सप्तम्यां जनेः–' (३।२।९७) इति डः ॥ (१) ॥*॥ एकम् **'पक्षिसर्पादीनाम्'** ॥

॥ इति प्राणिवर्गः ॥

उद्भिदस्तरुगुल्माद्याः

उद्भीति ॥ तरुश्च गुल्मश्चाद्यौ येषाम् । आद्यशब्देन तृणौषधिलतादिग्रहः ॥*॥ भुवमुद्भिन्दन्ति । 'भिदिर् विदारणे' (रु० उ० प०) । 'सत्सू–' (३।१।६१) इति क्विप् । उद्भिदः ॥ (१) ॥*॥ उच्यन्ते (इति शेषः) ॥*॥ एकम् **'तरुगुल्मादीनाम्'** ॥

उद्भित्पर्यायानाह—

उद्भिदुद्भिज्जमुद्भिदम् ॥ ५१ ॥

उद्भीति ॥ उद्भिदुक्तः ॥ (१) ॥*॥ उद्भेदनमुद्भित् । 'संपदादिभ्यः क्विप्' (वा० ३।३।१०८) । उद्भिदो जातम् । 'पञ्चम्याम्' (३।२।९८) इति डः ॥ (२) ॥*॥ उद्भिनत्ति ।

'इगुपध–' (३।१।१३५) इति कः ॥ (३) ॥*॥ त्रीणि **'उद्भिदाम्'** ॥

सुन्दरं रुचिरं चारु सुषमं साधु शोभनम् ।
कान्तं मनोरमं रुच्यं मनोज्ञं मंजु मंजुलम् ॥ ५२ ॥

स्विति ॥ सु द्रियते । 'द्रङ् आदरे' (तु० आ० अ०) । 'ग्रहवृद–' (३।३।५८) इत्यप् । पृषोदरादिः (६।३।१०९) । यद्वा सु उनत्ति चित्तं द्रवीकरोति । 'उन्दी क्लेदने' (रु० प० से०) । बाहुलकादरः । शकन्ध्वादिः (वा० ६।१।९४) । स्त्रियां गौरादित्वात् (४।१।४१) ङीष् ॥ (१) ॥*॥ रोचते । 'रुच दीप्तावभिप्रीतौ च' (भ्वा० आ० से०) । 'इषिमदिमुदि–' (उ० १।५१) इति किरच् ॥ (२) ॥*॥ चरति चित्ते । 'चर गतौ' (भ्वा० प० से०) । 'दृसनिजनि–' (उ० १।३) इति ञुण् । **'चारुर्बृहस्पतौ पुंसि शोभने त्वभिधेयवत्'** इति विश्वः (मेदिनी) ॥ (३) ॥*॥ सु शोभनं समं सर्वमस्य । 'सुविनिर्दुर्भ्यः–' (८।३।८८) इति षत्वम् ॥ (४) ॥*॥ साध्नोत्यर्थम् । 'साध संसिद्धौ' (स्वा० प० अ०) । 'कृवापा–' (उ० १।१) इत्युण् । **'साधुर्जैने मुनौ वार्धुषिके सज्जनरम्ययोः'** इति हेमचन्द्रः ॥ (५) ॥*॥ शोभते । 'शुभ दीप्तौ' (भ्वा० आ० से०) । 'अनुदात्तेतश्च–' (३।२।१४९) इति युच् । **'शोभनो** योगभेदे ना सुन्दरे वाच्यलिङ्गकः' (इति मेदिनी) । ॥ (६) ॥*॥ कम्पते स्म । 'कमु कान्तौ' (भ्वा० आ० से०) । क्तः (३।२।१०२) । 'यस्य विभाषा' (७।२।१५) इति नेट् । 'अनुनासिकस्य–' (६।४।१५) इति दीर्घः । यद्वा कनति स्म । 'कनी दीप्त्यादौ' (भ्वा० प० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । **'कान्ता** नार्यां प्रियङ्गौ स्त्री शोभने त्रिषु ना धवे । लोहे च चन्द्रसूर्ययःपर्यायात्तु शिलासु च' इति विश्वमेदिन्यौ ॥ (७) ॥*॥ मनो रमयति । 'रमु क्रीडायाम्' (भ्वा० आ० से०) ण्यन्तः । 'कर्मण्यण्' (३।२।१।) ॥*॥ **'मनोहरम्'** इति पाठे मनो हरति । 'हरतेरनुद्यमने–' (३।२।९) इत्यच् ॥ (८) ॥*॥ रोचते, रुच्यते, वा । 'राजसूय–' (३।१।११४) इति साधुः ॥ (९) ॥*॥ मनसा जानाति । 'इगुपध–' (३।१।१३५) इति कः । निवृत्तप्रेषणोऽत्र जानातिः ।—मूलविभुजादित्वात् (वा० ३।२।५) कः—इति मुकुटः । तन्न । तस्यापि कर्तरि विहितत्वेन 'ज्ञायते' इति विग्रहप्रदर्शनस्य विरुद्धत्वात् । यदपि—'सुप्सुपा–' (२।१।४) इति समासः—इति । तदपि न । 'कर्तृकरणे–' (२।१।३२) इति तत्पुरुषविधायकस्य सत्त्वात् ॥ (१०) ॥*॥ मज्जयते । 'मजि ध्वनौ' इति सौत्रो धातुः । बाहुलकादुः ॥ (११) ॥*॥ मज्जु मंजुत्वं लाति । 'आतोऽनुप–' (३।२।३) इति कः । मंजुलं च चलाञ्चले । रम्ये कुञ्जे **मंजुलस्तु** दात्यूहे' इति हैमः ॥ (१२) ॥*॥ द्वादश **'मनोरमस्य'** ॥

तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात् ।

तेति ॥ न सिच्यते मनोऽत्र । 'षिच क्षरणे' (तु० उ० अ०) । 'करणा–' (३।३।११७) इति ल्युट् । 'संज्ञायां कन्' (५।३।७५) ॥*॥ (**'आसेचनम्'**) इति दीर्घादिपाठे आङ् बोध्यः ॥ (१) ॥*॥ एकम् **'यद्दर्शनान्नृप्तिर्न भवति तस्य'** ॥

अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम् ॥ ५३ ॥

अभीति ॥ अभित इष्यते स्म । 'इषु इच्छायाम्' (तु० प० से०) । क्तः (३।२।१०२) । **'अभीत्थंभूतकथने' 'अभि** वीप्साभिमुख्ययोः' इति विश्वः ॥ (१) ॥*॥ अभ्यासुमिष्यते स्म । 'आङ् व्याप्तौ' (स्वा० प० अ०) । सन् (३।१।७) । 'आब्ज्यृधामीत्' (७।४।५५) । क्तः (३।२।१०२) ॥ (२) ॥*॥ हृदयस्य प्रियम् । 'हृदयस्य प्रियः' (४।४।९५) इति यत् । 'हृदयस्य हृल्लेख–' (६।३।५०) इति हृदादेशः । **'हृद्यं** धवलजीरे च हृत्प्रिये हृद्भवेऽपि च । वशकृद्वेदमन्त्रे च **हृद्या** वृद्ध्याख्यमेषजे' इति विश्वः ॥ (३) ॥*॥ दय्यते स्म । 'दय दानादौ' (भ्वा० आ० से०) क्तः (३।२।१०२) ॥ (४) ॥*॥ वल्ल्यते, वल्लते च । 'वल्ल संवरणे' (भ्वा० आ० से०) । 'रासिवल्लिभ्यां च' (उ० ३।१२५) इत्यभच् । **'वल्लभो** दयितेऽध्यक्षे सल्लक्षणतुरंगमे' इति विश्वः (मेदिनी) ॥ (५) ॥*॥ प्रीणाति । 'प्रीञ् तर्पणे' (क्या० उ० अ०) । 'इगुपध–' (३।१।१३५) इति कः । **'प्रियो** वृद्धौषधे हृद्ये धवे' इति हैमः ॥ (६) ॥*॥ षट् **'प्रियस्य'** ॥

निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः ।
कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः ॥ ५४ ॥

नीति ॥ निकृष्यते स्म । 'कृष विलेखने' (भ्वा० प० अ०, तृ० उ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ प्रतिकृष्यते स्म ॥ (२) ॥*॥ ऋच्छति । 'ऋ गतौ' (भ्वा० प० से०) । 'अन्येभ्योऽपि–' (३।२।७५) इति वनिप् । यद्वा ऋच्छतेः 'अवद्यावमाधमार्वरेफाः कुत्सिते' (उ० ५।५४) इति वन्नन्तो निपातः । **'अर्वा** तुरंगमे पुंसि कुत्सिते वाच्यलिङ्गकः' (इति मेदिनी) ॥ (३) ॥*॥ रिफ्यते । 'रिफ कत्थनयुद्धनिन्दाहिंसादानेषु' (तु० प० से०) । 'अकर्तरि च–' (३।३।१९) इति घञ् । यद्वा रिफतेः 'अवद्यावमाधम–' (उ० ५।५४) इति अप्रत्ययान्तो निपातः । **'रेफो** रवर्णे पुंसि स्यात्कुत्सिते वाच्यवत् पुनः' इति विश्वः ॥*॥ 'रेपँ' इति पाठे 'री गतिरेषणयोः' (क्या० प० अ०) । बाहुलकात् पः । **'रेपः** स्यान्निन्दिते क्रूरे' इति विश्वः ॥ (४) ॥*॥ याप्यते । 'या प्रापणे' (अ० प० अ०) ण्यन्तः । अचो यत्' (३।१।९७) । **'याप्यं** तु यापनीये स्यान्निन्दितेऽप्यभिधेयवत्' (इति मेदिनी) ॥ (५) ॥*॥ अवत्यस्मादात्मानम् । 'अव रक्षणादौ' (भ्वा० प० से०) । 'अवद्या–' (उ० ५।५४) इति सूत्रेणामप्रत्यया-

१—रेपाः सान्तोऽपि । 'प्रापे रूपी पुरा रेपाः' इति माघस्य व्यक्षरयमकम्—इति मुकुटः ॥

न्तो निपातः ॥ (६) ॥*॥ तत्रैव वकारस्य पक्षे धकारः । **'अधमः** स्यादूर्ह्व ऊने' इति विश्वः ॥ (७) ॥*॥ कुत्सितं पूयते । 'पूयी विशरणे' (भ्वा० आ० से०) । अच् (३।१।१३४) ॥*॥ पृषोदरादित्वात् (३।३।१०९) अत्वे **'कपूयः'** इत्यपि ॥ (८) ॥*॥ कुत्सा संजातास्य । तारकादिः (५।२।३६) ॥ (९) ॥*॥ न उद्यते । 'अवद्यावमा–' (उ० ५।५४) इति निपातः ॥ (१०) ॥*॥ खेटति । 'खिट त्रासे' (भ्वा० प० से०) । अच् (३।१।१३४) । **'खेटः** कफे ग्राममेदे चर्मण्यस्त्रियवैति त्रिषु' (इति मेदिनी) ॥ (११) ॥*॥ गर्ह्यते । 'गर्ह कुत्सायाम्' (भ्वा० आ० से०) । 'ऋहलोर्ण्यत्' (३।१।१२४) ॥ (१२) ॥*॥ अणति । 'अण शब्दे' (भ्वा० प० से०) ॥ अच् (३।१।१३४) । कुत्सायां कन् (५।३।७४) ॥ (१३) ॥*॥ त्रयोदश **'गर्ह्यस्य'** ॥

मलीमसं तु मलिनं कच्चरं मलदूषितम् ।

मेति ॥ मलोऽस्यास्ति । 'ज्योत्स्नातमिस्रा–' (५।२।११४) इति साधुः । **'मलीमसं** तु मलिने पुष्पकासीसलोहयोः' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ (**'मदनः** सिक्थके स्मरे) । राढे वसन्ते धत्तूरे **मलिनं** कृष्णदोषयोः । **मलिनी** रजःस्वलायाम्' इति हैमः ॥ (२) ॥*॥ कुत्सितं चरति । अच् (३।१।१३४) । 'रथवदयोश्च' (६।३।१०२) इति चकारात् 'कोः कत्तत्पुरुषे–' (६।३।१०१) इति योगविभागाद्वा कोः कत् ॥ (३) ॥*॥ मलेन दूषितम् । 'कर्तृकरणे–' (२।१।३२) इति समासः ॥ (४) ॥*॥ चत्वारि **'मलिनस्य'** ॥

पूतं पवित्रं मेध्यं च

प्विति ॥ पूयते स्म । 'पूङ् पवने' (भ्वा० आ० से०) 'पूञ् पवने' (क्या० उ० से०) वा । क्तः (३।२।१०२) । **'पूतं** त्रिषु पवित्रे च शठिते बहुलीकृते' (इति मेदिनी) ॥ (१) ॥*॥ पुनाति । कर्तरि चर्षिदेवतयोः' (३।२।१८६) इतीत्रः । **'पवित्रं** तु मेध्ये ताम्रे कुशे जले । अर्घोपकरणे चापि **पवित्रा** तु नदीभिदि' इति हैमः ॥ (२) ॥*॥ मेधनार्हम् । 'मेधृ संगमे च' (भ्वा० उ० से०) । ण्यत् (३।१।१२४) (**'मेध्यं** त्रिषु शुचौ रक्तवचारोचनयोः स्त्रियाम्' इति मेदिनी) ॥ (३) ॥*॥ 'पवित्रः पूतः' इति, प्राणिविषय उक्तम् । इह त्वप्राणिनि ॥*॥ त्रीणि **'पवित्रस्य'** ॥

वीभं तु विमलात्मकम् ॥ ५५ ॥

वीति ॥ वीन्धे । 'ञि इन्धी दीप्तौ' (रु० आ० से०) 'वाविन्धेः' (उ० २।३६) इति क्रन् ।—'इन्धे रक्'—इति मुकुटस्तु चिन्त्यः ॥ (१) ॥*॥ विमल आत्मा स्वभावो यस्य ॥ (२) ॥*॥ द्वे **'स्वभावनिर्मलस्य'** ॥

निर्णिक्तं शोधितं मृष्टं निःशोध्यमनवस्करम् ।

नीति ॥ निर्णिज्यते स्म । 'णिजिर् शौचपोषणयोः' (जु० उ० अ०), क्तः (३।२।१०२) ॥ (१) ॥*॥ शोध्यते स्म ॥ 'शुध शौचे' (दि० प० अ०) ण्यन्तः । क्तः (३।२।१०२) ॥ (२) ॥*॥ मृज्यते स्म । 'मृजू शुद्धौ' (अ० प० से०) क्तः (३।२।१०२) ॥ (३) ॥*॥ निष्क्रान्तं शोध्यमस्मात् । शोध्यान्निष्क्रान्तम्, इति वा ॥ (४) ॥*॥ नावस्करोऽत्र ॥ (५) ॥*॥ पञ्च **'अपनीतमलस्य'** ॥

असारं फल्गु

असेति ॥ न सारोऽत्र ॥ (१) ॥*॥ फलति । 'ञिफला विशरणे' (भ्वा० प० से०) ॥ 'फलिपाटि–' (उ० १।१८) इति साधुः । **'फल्गुः** काकोदुम्बरिके वृक्षे निरर्थकेऽपि च' इति हैमः । **'फल्गवसारेऽन्निधेयवत्** । नदीभेदे मलघ्वां स्त्री' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ द्वे **'निःसारस्य'** ॥

शून्यं तु वश्चिकं तुच्छरिक्तके ॥ ५६ ॥

श्विति ॥ शुने हितम् । 'शुनः संप्रसारणं वा च दीर्घः' (ग० ५।१।२) इति यत् । **'शून्यं** बिन्दौ च निर्जने । **शून्या** तु नलिका' इति हैमः ॥ (१) ॥*॥ उश्यते । 'वश कान्तौ' (अ० प० से०) 'सर्वधातुभ्य इन्' (उ० ४।११८) । 'संज्ञायां कन्' (५।३।७५) ॥ (२) ॥*॥ तोदनम् । संपदादित्वात् (वा० ३।३।१०८) भावे क्विप् । तुदा व्यथया छयति । 'छो छेदने' (दि० प० अ०) । मूलविभुजादित्वात् (वा० ३।२।५) कः । तुदं छयति वा । 'आतोऽनुप–' (३।२।३) इति कः ॥ (३) ॥*॥ रिच्यते स्म । 'रिच वियोजनसंपर्चनयोः' (चु० उ० से०) क्तः (३।२।१०२) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (४) ॥*॥ चत्वारि **'तुच्छस्य** ॥

क्लीबे प्रधानं प्रमुखं प्रवेकानुत्तमोत्तमाः ।
मुख्यवर्यवरेण्याश्च प्रवर्हिनवरार्ध्यवत् ॥ ५७ ॥
परार्ध्याग्र्याग्रहरप्राग्र्याग्र्यार्यमग्रियम् ।

क्लीति ॥ प्रदधाति । ल्युट् (३।३।११३) युच् (उ० २।७८) वा । **'प्रधानं** स्यान्महान्मात्रे प्रकृतौ परमात्मनि । प्रज्ञायामपि च क्लीबमेकत्वे तूत्तमे सदा' (इति मेदिनी) ॥ (१) ॥*॥ प्रकृष्टं मुखमस्य । **'प्रमुखं** प्रथमे मुख्ये' इति हैमः ॥ (२) ॥*॥ प्रविच्यते । 'विचिर् पृथग्भावे' (रु० उ० अ०) । घञ् (३।३।१९) ॥ (३) ॥*॥ **नोत्तमोऽस्मात्** ॥ (४) ॥*॥ अतिशयेनोत्कृष्टः । उत्कृष्टार्थवृत्तेरुच्छब्दात्तमप् । द्रव्यप्रकर्षार्थत्वान्नामुः । यद्वा । उत्ताम्यति । 'तमु काङ्क्षायाम्' (दि० प० से०) अच् (३।१।१३४) । उत्ताम्यते वा । घञ् (३।३।१९) । 'नोदात्त—' (७।३।३४) इति न वृद्धिः ॥ (५) ॥*॥ मुखमिव । मुखे भवो वा । शाखादित्वात् (५।३।१०३) यः ॥ (६) ॥*॥ वर्यते । 'वर ईप्सायाम्' चुरादावदन्तः । 'अचो यत्' (३।१।९७) ॥ (७) ॥*॥ **त्रियते** । 'वृञ् वरणे' (स्वा० उ० से०) । 'वृज एण्यः' (उ० ३।९८) ॥ (८) ॥*॥ प्रवर्हति । 'वृह वृद्धौ' (भ्वा०प०से०) । अच् (३।१।१३४) ॥ (९) ॥*॥

१—इदं तु मदनशब्दार्थबोधकमिति न प्रकृतोपयोगि ॥

अवरस्मिन्नर्घे भवः । 'अर्घाद्यत्' (४।३।४) । 'परावराधमोत्तमपूर्वाच्च' (४।३।५) । न अवरार्घ्यः । 'नञ्' (२।२।६) इति समासः ॥ (१०) ॥*॥ परस्मिन्नर्घे भवः । यत् (४।३।५) ॥ (११) ॥*॥ अगति । 'अग कुटिलायां गतौ' (भ्वा० प० से०) । 'ऋज्रेन्द्र–' (उ० २।१८) इति साधुः । **'अग्रं** पुरस्तादुपरि परिमाणे पलस्य च । आलम्बने समूहे च प्रान्ते च स्यान्नपुंसकम् । अधिके च प्रधाने च प्रथमे चाभिधेयवत्' (इति मेदिनी) ॥ (१२) ॥*॥ प्रकृष्टमग्रम् । प्राग्रे हरति । 'हरतेरनुद्यमनेऽच्' (३।२।९) ॥ (१३) ॥*॥ प्राग्रे भवः 'अग्राद्यत्' (४।४।११६) ॥ (१४) ॥*॥ (१५) ॥*॥ 'घच्छौ च' (४।४।११७) ॥ (१६) ॥*॥ (१७) ॥*॥ सप्तदश **'श्रेष्ठस्य'** ॥

श्रेयाञ्श्रेष्ठः पुष्कलः स्यात्सत्तमश्चातिशोभने ॥५८॥

श्रयति ॥ अतिशयने प्रशस्यः । 'अतिशायने तमबिष्ठनौ' (५।३।५५) । 'द्विवचनविभज्योपपदे तरबीयसुनौ' (५।३।५७) । 'अजादी गुणवचनादेव' (५।३।५८) । 'प्रशस्यस्य श्रः' (५।३।६०) **'श्रेयो** मुक्तौ शुभे धर्मेऽतिप्रशस्ते च वाच्यवत् । **श्रेयसी** करिपिप्पल्यामभयापाठयोरपि' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ **'श्रेष्ठो** वरे कुबेरे च' इति हैमः ॥ (२) ॥*॥ पुष्यति । 'पुष पुष्टौ' (दि० प० अ०) । 'पुषः कित्' 'कलश्च' (उ० ४।४।५) ।–'पुषः करन्' । कपिलिकादिः (वा० ८।२।१८)—इति मुकुटः । तच्चिन्त्यम् । तादृशपाठाभावात् । असदुक्तसूत्रसत्त्वाच्च । **'पुष्कलस्तु** पूर्णे श्रेष्ठे' इति हैमः ॥ (३) ॥*॥ अतिशयेन सत् । तमप् (५।३।५५) । **'सत्तमः** स्यात्पूज्यतमे साधीयस्युत्तमे त्रिषु' (इति मेदिनी) ॥ (४) ॥*॥ अतिशयेन शोभनः ॥ (५) ॥*॥ पञ्च **'अतिशोभनस्य'** ॥ 'वर्यं प्रधानं युक्तमनुत्तमं सत्तमं प्रवर्हणं च' इति नाममालायाम् (सत्तमस्य) । अग्रं प्राग्रहरं श्रेष्ठं मुख्यवर्यप्रवर्हणम्' इति त्रिकाण्डशेषे च श्रेष्ठस्य पाठादेकविंशतिरेव शोभनस्य—इत्यन्ये ॥

स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुञ्जराः ।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥ ५९ ॥

स्युरिति ॥ पुमांश्चासौ गौश्च 'गोरतद्धितलुकि' (५।४।९२) इति टच् ॥ (१) ॥*॥ श्रेष्ठस्यार्थः । श्रेष्ठार्थो गोचरो येषां ते । क्वचित् 'वाचकाः' इति पाठः ॥*॥ एते **'श्रेष्ठवाचकाः'** ॥

अप्राग्र्यं द्वयहीने द्वे अप्रधानोपसर्जने ।

अप्रेति ॥ प्राग्र्याद्भिन्नम् ॥ (१) ॥*॥ प्रधानादन्यत् ॥ (२) ॥*॥ उपसृज्यते । 'सृज विसर्गे' (तु० प० अ०) । कर्मणि ल्युट् (३।३।११३) ॥ (३) ॥*॥ त्रीणि **'अप्रधानस्य'** ॥

विशङ्कटं पृथु बृहद्विशालं पृथुलं महत् ॥ ६० ॥
वड्रोरुविपुलम्

वीति ॥ विस्तृतार्थवृत्तैर्विशब्दात् 'वेः शालच्शङ्कटचौ' (५।२।२८) ॥ (१) ॥*॥ **'विशाला** त्विन्द्रवारुण्यामुज्जयिन्यां च योषिति । नृपवृक्षभिदोः पुंसि पृथुले त्रिष्वभिधेयवत्' इति विश्वमेदिन्यौ ॥ (४) ॥*॥ प्रथते । 'प्रथ प्रख्याने' (भ्वा० आ० से०) 'प्रथिम्रदि–' (उ० १।२८) इति कुः संप्रसारणं च । **'पृथु**र्विशाले भूपाले बाष्पिकाकृष्णजीरयोः' इति हेमचन्द्रः ॥ (२) ॥*॥ बर्हति । 'बृह बृद्धौ' (भ्वा० प० से०) । 'वर्तमाने पृषद्बृहन्महत्–' (उ० २।८४) इति निपातः ॥ (३) ॥*॥ पृथुत्वमस्यास्ति । सिध्मादित्वात् (५।२।९७) लच् । पृथुत्वं लाति वा ॥ (५) ॥*॥ महति । 'मह पूजायाम्' (भ्वा० प० से०) ॥ (६) ॥*॥ वलते । 'वल संवरणे संचरणे च' (भ्वा० आ० से०) । 'बहुलमन्यत्रापि' ( ) इति रक् ।—'शृङ्गादयः' इति रक्—इति मुकुटः । तच्च । उज्ज्वलदत्तादावदर्शनात् । डलयोरेकत्वस्मरणम् ॥ (७) ॥*॥ ऊर्णोति । 'ऊर्णुञ् आच्छादने' (अ० उ० से०) 'महति ह्रस्वश्च' (उ० १।३१) इति कुप्रत्ययः नुलोपः ह्रस्वश्च ॥ (८) ॥*॥ विपोलति । 'पुल महत्त्वे' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । **'विपुलः** पृथुलेऽगाधे मेरुपश्चिमभूधरे' इति विश्वमेदिन्यौ ॥ (९) ॥*॥ नव **'विस्तीर्णस्य'** ॥

पीनपीत्नी न स्थूलपीवरे ।

पीति ॥ प्यायते स्म । 'ओप्यायी वृद्धौ' (भ्वा० आ० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । 'ओदितश्च' (८।२।४५) इति नत्वम् । 'प्यायः पी' (६।१।२८) ॥ (१) ॥*॥ प्यायते । 'प्यैङ् वृद्धौ' (भ्वा० आ० अ०) । 'ध्याप्योः संप्रसारणं च' (उ० ४।११५) इति क्तनिप् । स्त्रियां तु 'वनो र च' (४।१।७) इति ङीब्रौ ॥ (२) ॥*॥ स्थूलयति । 'स्थूल बृंहणे' (चु० आ० से०) । अच् (३।१।१३४) । **'स्थूलः** पीने जडे' इति हैमः ॥ (३) ॥*॥ प्यायते । 'छिवर–' (उ० ३।१) इति निपातः । **'पीवरः** स्थूलकूर्मयोः' इति हेमचन्द्रः ॥ (४) ॥*॥ चत्वारि **'स्थूलस्य'** ॥

स्तोकाल्पक्षुल्लकाः श्लक्ष्णं सूक्ष्मं दभ्रं कृशं तनु ॥६१॥
स्त्रियां मात्रा त्रुटी पुंसि लवलेशकणाणवः ।

स्तविति ॥ स्तुच्यते । 'ष्टुच प्रसादे' (भ्वा० आ० से०) । घञ् (३।३।१९) । न्यङ्क्वादिः (७।३।५३) । स्तूयते । बाहुलकात् स्तुञः कः । **'स्तोक**स्त्रिष्वल्पे चातके पुमान्' (इति मेदिनी) ॥ (१) ॥*॥ अल्यते वार्यते । 'अल भूषणादौ' (भ्वा० प० से०) । बाहुलकात्पः ॥ (२) ॥*॥ क्षोदनम् । 'क्षुदिर् संपेषणे' (रु० उ० अ०) । संपदादिः (वा० ३।३।१०८) क्षुदं लाति । 'आतोऽनुप–' (३।२।३) इति कः । 'तोर्लि' (८।४।६०) (भ्वा० ५५) स्वार्थे कन् (ज्ञापि० ५।४।५) । यद्वा

क्षुद्यते। 'स्फायितञ्चि–' (उ० २।१३) इति रक्। रलयोरेकत्वस्मरणात् कपिलिकादित्वात् (वा० ८।२।१८) वा लत्वम्। **'क्षुल्लकस्त्रिषु नीचेऽल्पे'** इति विश्वः॥ (३) ॥*॥ 'श्लिष्यते, श्लिष्यति, वा। 'श्लिष आलिङ्गने' (दि० प० अ०)। श्लिषेरच्चोपधायाः' (उ० ३।१९) इति क्वन्नः॥ (४) ॥*॥ सूच्यते। 'सूच पैशुन्ये' (चु० प० से०)। 'सूचेः स्मन्' (उ० ४।११७)। **'सूक्ष्मं** स्यात्कतकेऽध्यात्मे पुंस्यणौ त्रिषु चाल्पके' इति विश्वः (मेदिनी)॥ (५) ॥*॥ दभ्यते। 'दम्भु दम्भने' (स्वा० प० से०)। 'स्फायितञ्चि–' (उ० २।१३) इति रक्॥ (६) ॥*॥ कृश्यते स्म। 'कृश तनूकरणे' (दि० प० से०)। 'स्फुल्लक्षीब–' (८।२।५५) इति साधुः॥ (७) ॥*॥ तन्यते। 'तनु विस्तारे' (त० उ० से०)। '—तनिचरि–' (उ० १।७) इत्युः। 'तनुः काये त्वचि स्त्री स्यात्त्रिष्वल्पे विरले कृशे' इति विश्वमेदिन्यौ॥ (८) ॥*॥ मीयते। 'माङ् माने' (दि० आ० अ०) ष्ट्रन् (उ०४।१५९)। अनित्यः षितां ङीष्। टाप् (४।१।४)। **'मात्रं** त्ववधृतौ स्वार्थे कात्स्न्र्ये **मात्रा**परिच्छदे। अक्षरावयवे द्रव्ये मानेऽल्पे कर्णभूषणे। काले वृत्ते च' इति हैमः॥ (९) ॥*॥ त्रुट्यते। 'त्रुट छेदने' (चु० आ० से०)। 'इगुपधात्कित्' (उ० ४।१२०) इतीन्॥ (१०) ॥*॥ लूयते। 'लूञ् छेदने' (क्रया० उ० से०)। 'ऋदोरप्' (३।३।५७)। **'लवः** कालभिदि छिदि। विलासे रामजे लेशे तथा किंजल्कपक्ष्मणोः। गोपुच्छलोमस्वपि च' इति हैमः॥ (११) ॥*॥ लिशति। 'लिश गतौ' (तु० प० से०)। अच् (३।१।१३४)। लिश्यते वा। घञ् (३।३।१९)॥ (१२) ॥*॥ कणति। 'कण निमीलने' (चु० उ० से०)। अच् (३।१।१३४)। **'कणो** धान्यांशलेशयोः। **कणा** जीरकपिप्पल्योः' इति हेमचन्द्रः॥ (१३) ॥*॥ अणति, अण्यते, वा। 'अण शब्दे' (भ्वा० प० से०)। 'अणश्च' (उ० १।८) इत्युः। **'अणुर्वीह्यल्पयोः'** इति हैमः॥ (१४) ॥*॥ चतुर्दश **'सूक्ष्मस्य'**॥

अत्यल्पेऽल्पिष्ठमल्पीयः कनीयोऽणीय इत्यपि ॥६२॥

अत्येति॥ अतिशयेनाल्पः॥ (१) ॥*॥ 'अजादी गुणवचनादेव' (५।३।५८) इतीष्ठन्नीयसुनौ॥ (२) ॥*॥ (३) ॥*॥ 'युवाल्पयोः कनन्यतरस्याम्' (५।३।६४) इति कन् वा॥ (४) ॥*॥ अतिशयेनाणुः। ईयसुन् (५।३।५५)॥ (५) ॥*॥ चत्वारि (पञ्च) **'अत्यल्पस्य'**॥

प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु।
पुरुहूं पुरु भूयिष्ठं स्फिरं भूयश्च भूरि च ॥ ६३ ॥

प्रेति॥ प्रभवति स्म। 'गत्यर्था–' (३।४।७२) इति क्तः। 'प्रभूतमुद्गते प्राज्ये' इति हैमः॥ (१) ॥*॥ प्रचोरति। 'चुर स्तेये' (चु० प० से०)। चुरादीनां णिज्वैकल्पिकः। 'इगुपध–' (३।१।१३५) इति कः। 'प्रगतं चुरायाः' इति वा॥ (२) ॥*॥ प्रवीयते। 'अज गतौ' (भ्वा० प० से०) इति वी न। यद्वा प्रकर्षेणाज्यते काम्यते। 'अञ्जू व्यक्त्यादौ' (रु० प० से०)। आङ्पूर्वात् **'अञ्जेः संज्ञायाम्'** (वा० ३।१।१०९) इति क्यप्॥ (३) ॥*॥ दभ्रादण्यत्। नञ्समासः (२।२।६)॥ (४) ॥*॥ बहून् लाति। 'आतोऽनुप–' (३।२।३) इति कः। **'बहुला** नीलिकायां स्यादेलायां गवि योषिति। कृत्तिकासु स्त्रियां भूम्नि विहायसि नपुंसकम्। पुंस्यग्नौ कृष्णपक्षे च वाच्यवत्प्राज्यकृष्णयोः' इति विश्वमेदिन्यौ॥ (५) ॥*॥ बंहते 'बहि वृद्धौ' (भ्वा० आ० से०) 'लङ्बिबंह्योर्नलोपश्च' (उ० १।२९) इत्युः। यत्तु—बृंहते वर्धते बहु पूर्यते। मितद्वादित्वात् (वा० ३।२।१८०) डुः—इति मुकुटेनोक्तम्। तन्न। टिलोपेनोक्तरूपासिद्धिप्रसङ्गात्। **'बहु** स्याज्यादिसंख्यासु विपुलेऽप्यभिधेयवत्' इति विश्वः (मेदिनी)॥ (६) ॥*॥ पुरून् हन्ति गच्छति। 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः। यद्वा पुरून् जहाति जिहीते वा। 'अतोऽनुप–' (३।२।३) इति कः॥ (७) ॥*॥ पिपर्ति, पूर्यते, वा। 'पॄ पालनपूरणयोः' (जु० प० से०)। 'पृभिदि०' (उ० १।२३) इति कुः। यत्तु— 'पृकृतॄगृधृषिभ्यः कुः' इति सूत्रं पठितं मुकुटेन। तन्न 'कृगॄरुच्च' इति पृथक्सूत्रात्। अन्यथोत्वाभावप्रसङ्गात्। **'पुरुः** प्राज्येऽभिधेयवत्। पुंसि स्याद्देवलोके च नृपभेदपरागयोः' इति हैमः (मेदिनी)॥ (८) ॥*॥ अतिशयेन बहु। 'बहोर्लोपो भू च बहोः' (६।४।१५८) 'इष्टस्य यिट् च' (६।४।१५९)। स्वार्थे चेष्ठिष्ठाद्यः॥ (९) ॥*॥ स्फायते। 'स्फायी वृद्धौ' (भ्वा० आ० से०)। 'अजिरशिशिर–' (उ० १।५३) इति साधुः॥*॥ 'स्फारम्' इत्यपि पाठः। रक् (उ० २।१३)। **'स्फारस्तु** स्फरकादिनां बुद्बुदे विपुलेऽपि च' इति हेमचन्द्रः॥ (१०) ॥*॥ अतिशयेन बहु। 'बहोर्लोपो भू च बहोः' (६।४।१५८)॥ (११) ॥*॥ भवति। 'अदिशदिभूश्रुभिभ्यः क्रिन्' (उ० ४।६५) **'भूरि** स्यात्प्रचुरे स्वर्णे' इति हैमः। (**'भूरिर्ना** वासुदेवे च हरे च परमेष्ठिनि। नपुंसकं सुवर्णे च प्राज्ये स्याद्वाच्यलिङ्गकः' इति मेदिनी)॥ (१२) ॥*॥ द्वादश **'बहुलस्य'**॥

परश्शताद्यास्ते येषां परा संख्या शतादिकात्।

पेति॥ शतात्परे। 'पञ्चमी' (२।१।३७) इति योगविभागात्समासः। राजदन्तादिः (२।२।३१)। पारस्करादित्वात् (६।१।१५७) सुट्॥ (१) ॥*॥ आद्येन परस्सहस्राः॥*॥ एकं **'शतात्परस्य'**॥

गणनीये तु गणेयम्

गेति॥ आर्या छन्दः॥*॥ गण्यते 'गण संख्याने' (चु० उ० से०)। अनीयर् (३।१।९६)॥ (१) ॥*॥ 'अचो यत्'

१—इत्यादिपाठस्तु हेमानेकार्थकैरवाकरकौमुदीपुस्तके नास्ति। मेदिन्यादिष्वपि लवशब्दस्यैतदर्थकता नोपलभ्यते॥

(३।१।९७) । संज्ञापूर्वकत्वाण्णिलोपाभावः । 'चिन्तिपूजि–' (३।३।१०५) इत्यङ्विधानाद्वुणाभावार्थाद्वा । अन्यथा 'अप्रत्ययात्' (३।३।१०२) इत्यनन्तरं पठित्वाकारमेव विदध्यात् । यत्तु—'अ प्रत्ययात्' (३।३।१०२) इत्यकारे प्राप्ते गुणाभावार्थादङ्विधानात्—इति मुकुटेनोक्तम् । तच्चिन्त्यम् । 'ण्यासश्रन्थो युच्' (३।३।१०७) इति युचा प्रत्ययस्य बाधनात् ॥ (२) ॥*॥ द्वे **'गणयितुं शक्यस्य'** ॥

संख्यातं गणितम्

समिति ॥ संख्यायते स्म । 'ख्या प्रकथने' (अ० प० अ०) । चक्षिङादेशो वा । क्तः (३।२।१०२) ॥ (१) ॥*॥ गण्यते स्म । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'संख्यातस्य'** ॥

अथ समं सर्वम् ॥ ६४ ॥

विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम् ।
समग्रं सकलं पूर्णमखण्डं स्यादनूनके ॥ ६५ ॥

अथेति ॥ समति । 'षम वैक्लव्ये' (भ्वा० प० से०) । अच् (३।१।१३४) । सर्वार्थे सर्वनाम । **'समा** संवत्सरे स्त्रियाम् । सर्वसाधुसमानेषु **समं** स्यादभिधेयवत्' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ सरति । 'सृ गतौ' (भ्वा० प० अ०) । 'सर्वनिघृष्व–' (उ० १।१५३) इति साधुः । –'सर्तेर्वः'–इति मुकुटस्त्वपाणिनीयः । यद्वा सर्वति । 'षर्व गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (२) ॥*॥ विशति । 'विश प्रवेशने' (तु० प० अ०) । 'अशूप्रुषि–' (उ० १।१५२) इति क्कुन् । **'विश्वं** कृत्स्ने च भुवने विश्वे देवेषु नागरे । **विश्वा**प्यतिविषायां स्यात्' (इति विश्वः) ॥ (३) ॥*॥ न शोषोऽस्य ॥ (४) ॥*॥ कृत्यते । 'कृती वेष्टने' (रु० प० से०) । 'कृत्यशूभ्यां क्स्नः' (उ० ३।१७) । **'कृत्स्नं** सर्वाम्बुकुक्षिषु' (इति मेदिनी) ॥ (५) ॥*॥ समस्यते स्म । 'असु क्षेपणे' (दि० प० से०) । क्तः (३।२।१०२) ॥ (६) ॥*॥ निवृत्तं खिलमस्य ॥ (७) ॥*॥ न खिलमस्य ॥ (८) ॥*॥ निष्क्रान्तं शेषात् । 'निरादयः–' (वा० २।२।१८) इति समासः ॥ (९) ॥*॥ संगतमग्रमस्य । समं ग्रसते वा । 'ग्रसु अदने' (भ्वा० आ० से०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः ॥ (१०) ॥*॥ सह कलाभिः ॥ (११) ॥*॥ पूर्यते स्म । 'पूरी आप्यायने' (दि० आ० से०) । कर्तरि (३।३।१७४) कर्मणि (३।२।१०२) वा क्तः । 'पूर्णः शब्दे (शक्ते) समग्रे ना पूरिते त्वभिधेयवत्' (इति मेदिनी) ॥*॥ **'पूर्वम्'** इति पाठः—इति स्वामी । पूर्वति । 'पूर्व पूरणे' (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (१२) ॥*॥ न खण्ड्यते । 'खडि भेदने' (चु० प० से०) । घञ् ॥ (१३) ॥*॥ ऊनयति । 'ऊन परिहाणे' (चु० उ० से०) । अच् (३।१।१३४) । न ऊनम् । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (१४) ॥*॥ चतुर्दश **'समग्रस्य'** ॥

घनं निरन्तरं सान्द्रम्

घेति ॥ हन्यते 'हन हिंसागत्योः' (अ० प० अ०) 'मूर्तौ घनः' (३।३।७७) इत्यप् घनादेशश्च । **'घनः** सान्द्रे दृढे दार्ढ्ये विस्तारे मुद्गरेऽम्बुदे । संघे मुस्ते **घनं** मध्ये नृत्यवाद्यप्रभेदयोः' इति हेमचन्द्रः ॥ (१) ॥*॥ निर्गतमन्तरात् । निर्गतमन्तरमस्मिन् वा ॥ (२) ॥*॥ सह अन्यते । 'अदि बन्धने' (भ्वा० प० से०) । बाहुलकाद्रक् ॥ (३) ॥*॥ त्रीणि **'निबिडस्य'** ॥

पेलवं विरलं तनु ।

पेलेति ॥ पेलनम् । 'पिल भेदने' (तु० प० से०) घञ् (३।३।१८) । पेलोऽस्यास्ति । 'अन्येभ्योऽपि–' (वा० ५।२।१०९) इति वः ॥ (१) ॥*॥ वि राति । बाहुलकात्कलन् ॥ (२) ॥*॥ तन्यते । 'भृमृ–' (उ० १।७) इत्युः । **'तनुर्वेपुस्त्वचोः** । विरलेऽल्पे कृशे' इति हैमः ॥ (३) ॥*॥ त्रीणि **'विरलस्य'** ॥

समीपे निकटासन्नसंनिकृष्टसनीडवत् ॥ ६६ ॥
सदेशाभ्याशसविधसमर्यादसवेशवत् ।
उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोव्ययम् ६७

सेति ॥ संगता आपो यस्मिन् । 'ऋक्पूर्–' (५।४।७४) इत्यः । 'ह्रस्वान्तरुपसर्गेभ्योऽप ईत्' (६।३।९७) ॥ (१) ॥*॥ निबन्धम् 'संप्रोदश्व–' (५।२।२९) इति चापत्ये कटच् । निकटति वा । 'कटे वर्षावरणयोः' । (भ्वा० प० से०) । अच् (३।१।१३४) ॥ (२) ॥*॥ आसीदति स्म । 'गत्यर्था–' (३।४।७२) इति क्तः । आसद्यते स्म, इति वा । क्तः (३।२।१०२) ॥ (३) ॥*॥ संनिकृष्यते स्म । 'कष' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥ (४) ॥*॥ समानं नीडं वासस्थानमस्य । सह नीडेन, इति ॥ (५) ॥*॥ समानो देशोऽस्य ॥ (६) ॥*॥ अभ्यश्यते । 'अशू व्याप्तौ' (स्वा० आ० से०) । घञ् (३।१९) ॥*॥ मुकुटस्तु—अभ्यासीदति । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः—इति दन्त्यसमाह । **'अभ्यासोऽभ्यसनेऽन्तिके'** इति दन्त्यान्तेषु (विश्वमेदिन्यौ) ॥ (७) ॥*॥ समाना विधास्य । यद्वा सह विधया ॥ (८) ॥*॥ समाना मर्यादास्य ॥ (९) ॥*॥ समानो वेशोऽस्य ॥ (१०) ॥*॥ उपगतः कण्ठम् । 'अव्ययादयः–' (वा० २।२।१८) इति समासः । उपगतः कण्ठः सामीप्यमस्य, इति वा ॥ (११) ॥*॥ अन्तोऽस्यास्ति । ठन् (५।२।११५) । **'अन्तिकं** निकटे वाच्यलिङ्गं स्त्री शोभनौषधौ । चुल्लयां ज्येष्ठभगिन्यां च नाव्योक्त्यां कीर्त्यतेऽन्तिका' इति विश्वमेदिन्यौ ॥ (१२) ॥*॥

१—'भ्यग्राभिपतिता ह्यमी'—इति क्वचित्पाठः—इति पीयूषव्याख्या ॥

अभ्यर्द्यते स्म । अभ्यर्दति स्म, इति वा । 'अर्द्द गतौ' (भ्वा० प० से०) । कर्मणि (३।२।१०२) कर्तरि (३।४।७२) वा क्तः । 'अभेश्चाविदूर्ये' । (७।२।२५) इतीडभावः ॥ (१३) ॥*॥ अभिमुखमग्रमस्य ॥ (१४) ॥*॥ 'पर्यभिभ्यां च' (५।३।९) इति तसिल् ।–तसिः–इति स्वामिमुकुटोक्तिस्तु स्वरानादराभिप्रायेण ॥ (१५) ॥*॥ पञ्चदश **'समीपस्य'** ॥

संसक्ते त्वव्यवहितमपटान्तरमित्यपि ।

समिति ॥ संसज्यते स्म । 'षञ्ज सङ्गे' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ न व्यवधीयते स्म । क्तः (३।२।१०२) । 'दधातेर्हिः' (७।४।४२) ॥ (२) ॥*॥ पटेनान्तरम् । न पटान्तरमत्र । मुकुटस्तु—'अपदान्तरम्'—इत्याह ॥ (३) ॥*॥ त्रीणि **'संलग्नस्य'** ॥

नेदिष्ठमन्तिकतमम्

नेदीति ॥ अतिशयेनान्तिकम् । इष्ठन् । (५।३।५५) । 'अन्तिकबाढयोर्नेदसाधौ' (५।३।६३) ॥ (१) ॥*॥ तमप् (५।३।५५) ॥ (२) ॥*॥ द्वे **'अतिनिकटस्य'** ॥

स्यादूरं विप्रकृष्टकम् ॥ ६८ ॥

स्यादिति ॥ दुःखेनेयते । 'दुरीणो लोपश्च' (उ० २।२०) इति साधुः ॥ (१) ॥*॥ विप्रकृष्यते स्म । कृषेः क्तः (३।२।१०२) । स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (२) ॥*॥ द्वे **'दूरस्य'** ॥

दवीयश्च दविष्ठं च सुदूरे

देति ॥ अत्यन्तं दूरम् । ईयसुन् (५।३।५७) । स्थूलदूरयुव–' (६।४।१५६) इति साधुः ॥ (१) ॥*॥ इष्ठन् (५।३।५५) ॥ (२) ॥*॥ सु अत्यन्तं दूरम् ॥ (३) ॥*॥ त्रीणि **'अत्यन्तदूरस्य'** ॥

दीर्घमायतम् ।

दीति ॥ दृणाति । 'दृ विदारणे' (क्रया० प० से०) । बाहुलकाद्भक् ॥ (१) ॥*॥ आयम्यते स्म । क्तः (३।२।१०२) । आयतते वा । 'यती प्रयत्ने' (भ्वा० आ० से०) । अच् (३।१।१३४) ॥ (२) ॥*॥ द्वे **'विस्तृतस्य'** ॥

वर्तुलं निस्तलं वृत्तम्

वेति ॥ वर्तते । बाहुलकादुलच् ॥ (१) ॥*॥ निर्गतं तलमस्य । **'निस्तलं** वर्तुले चले' इति विश्वः ॥ (२) ॥*॥ वर्तते स्म । 'गत्यर्था–' (३।४।७२) इति क्तः । **'वृत्तं** (वृत्तौ) दृढे मृते । चरित्रे वर्तुले छन्दः खतीताधीतयोर्वृते[२]' इति हैमः ॥ (३) ॥ त्रीणि **'वर्तुलस्य'** ॥

१—वृत्तौ वर्तने यथा—'ऋतेन वृत्तं प्रवदन्ति मुख्यम्' इति ॥ २—वृते यथा—'कण्टकैर्विटपी वृत्तः' इति चानेकार्थकैरवाकरकौमुदी ॥

बन्धुरं तून्नतानतम् ॥ ६९ ॥

बेति ॥ बध्नाति । 'बन्ध बन्धने' (क्रया० प० अ०) । 'मद्गुरादयश्च' (उ० १।४१) इति साधुः । (**'बन्धुरं** मुकुटे पुंसि स्त्री चक्रतैलकल्कयोः । **बन्धूके** बधिरे हंसे त्रिषु स्याद्रम्यनम्रयोः । **बन्धुरा** पण्ययोषायां स्त्रियां भूम्नि च सक्तुषु' इति मेदिनी) ॥*॥ (**'बन्धूरबन्धुरौ** रम्ये नम्रे, हंसे तु **बन्धुरः** । बन्धूके च विडङ्गे च **बन्धुरा** पण्ययोषिति' इति विश्वादीर्घोपधोऽपि) ॥ (१) ॥*॥ उन्नतं च तदानतं च ॥ (२) ॥*॥ द्वे **'उन्नतानतस्य'** ॥

उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गे

उच्चेति ॥ उच्चिनोति । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । उच्चैस्त्वमस्त्यत्र वा । 'अर्शआदिभ्योऽच्' (५।२।१२७) । 'अव्ययानाम्–' (वा० ६।४।१४४) इति टिलोपः ॥ (१) ॥*॥ प्रकृष्टा अंशवोऽस्य ॥ (२) ॥ उन्नमति स्म । 'णम प्रह्वत्वे' (भ्वा० प० अ०) । 'गत्यर्था–' (३।४।७२) इति क्तः ॥ (३) ॥*॥ उद्गतमग्रमस्य ॥ (४) ॥*॥ उच्छ्रयति स्म । 'श्रिञ् सेवायाम्' (भ्वा० प० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । **'उच्छ्रितं** त्रिषु संजाते समुन्नद्ध(त)प्रवृद्धयोः' (इति मेदिनी) ॥ (५) ॥*॥ तुङ्ग्यते । 'तुजि हिंसायाम्' (भ्वा० प० से०) । घञ् (३।३।१९) । **'तुङ्गः** पुनागनगयोर्बुधे स्यादुन्नतेऽन्यवत् । **तुङ्गी** प्रोक्ता हरिद्रायां वर्वरायामपीष्यते' इति हैमः ॥ (६) ॥*॥ षट् **'उन्नतस्य'** ॥

अथ वामने ।

न्यञ्चीचखर्वह्रस्वाः स्युः

अथेति ॥ वामयति मदम् । 'टुवम उद्गिरणे' (भ्वा० प० से०) नन्यादिल्युः (३।१।१३४) ॥ (१) ॥*॥ न्यञ्चति । 'अञ्चु गतौ' (भ्वा० प० से०) । 'ऋत्विग्–' (३।२।५९) । इति क्विन् ॥ (२) ॥*॥ नीचैस्त्वमस्त्यत्र । अर्शआद्यच् (५।२।१२७) । 'अव्ययानाम्–' (६।४।१४४) इति टिलोपः । **'नीचः** पामरखर्वयोः' इति **हैम**चन्द्रः ॥ (३) ॥*॥ खर्वति । 'खर्व गतौ' (भ्वा० प० से०) । अच् (३।१।१३४) । (**'खर्व** संख्यान्तरे क्लीबं नीचे वामनके त्रिषु' इति मेदिनी) ॥ (४) ॥*॥ ह्रसति । 'ह्रस शब्दे' (भ्वा० प० से०) बाहुलकाद्वः । **'खर्वह्रस्वौ** न्यग्वामनौ' इति **हैम**मेदिन्यौ ॥ (५) ॥*॥ पञ्च **'ह्रस्वस्य'** ॥

अवाग्रेऽवनतानते ॥ ७० ॥

अवेति ॥ अवनतमग्रमस्य ॥ (१) ॥*॥ अवनमति स्म । 'गत्यर्था–' (३।४।७२) इति क्तः ॥ (२) ॥*॥ आनमति स्म ॥ (३) ॥*॥ त्रीणि **'अधोमुखमस्य'** ॥

अरालं वृजिनं जिह्ममूर्मिमत्कुञ्चितं नतम् ।
आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि ॥ ७१ ॥

अरेति ॥ ऋच्छति । 'ऋङ गतौ' (भ्वा० प० अ०) ।

विच् (३।२।७५) । अरमालाति । मूलविभुजादिकः (वा० ३।२।५) अरा लाति वा । **'अरालः** कुटिले सर्जरसे च समदन्तिनि' इति विश्वः ॥ (१) ॥*॥ वृज्यते । 'वृजी वर्जने' (अ० आ० से०) । 'वृजेः किच्च' (उ० २।४७) इतीनन् । **'वृजिनं** कल्मषे क्लीबं केशे ना कुटिले त्रिषु' (इति मेदिनी) ॥ (२) ॥*॥ जहाति, हीयते वा । 'ओहाक् त्यागे' (जु० प० अ०) । 'जहातेः सन्वदालोपश्च' (उ० १।१४१) इति मन् । **'जिह्मस्तु** कुटिले मन्दे **जिह्मं** तगरपादपे' इति हैमः ॥ (३) ॥*॥ **'ऊर्मिः** (स्त्रीपुंसयोर्वीच्यां) प्रकाशे वेगभङ्गयोः । वस्त्रसंकोचरेखायां वेदनापीडयोरपि' (इति मेदिनी) । ऊर्मिरस्यास्ति । मतुप् (५।२।९४) । यवादिः (ग० ८।२।९) ॥ (४) ॥*॥ कुञ्चति स्म । 'कुञ्च कौटिल्ये' (भ्वा० प० से०) । क्तः ३।४।७२) । बाहुलकात् संज्ञापूर्वकत्वाद्वा नलोपाभावः ॥ (५) ॥*॥ नमति स्म । क्तः (३।४।७१) । **'नतं** तगरपाठ्यां स्यात् क्लीबं, कुटिलनम्रयोः । (त्रिषु)' (इति मेदिनी) ॥ (६) ॥*॥ आविध्यते स्म । **'व्यध** ताडने' (दि० प० अ०) क्तः (३।२।१०२) । 'ग्रहिज्या–' (६।१।१६) इति संप्रसारणम् । **'आविद्धो** वाच्यलिङ्गः स्यात्कुटिले च पराहते' (इति मेदिनी) ॥ (७) ॥*॥ कुटिं कौटिल्यं लाति । 'आतोऽनुप–' (३।२।३) इति कः । कुटति वा । 'कुट कौटिल्ये' (तु० प० से०) 'मिथिलादयश्च' (उ० १।५७) इतीलच् । **'कुटिला** लापगायां स्त्री भुमे तु वाच्यलिङ्गकः' (इति मेदिनी) ॥ (८) ॥*॥ भुजति स्म 'भुजो कौटिल्ये' (तु० प० से०) 'गत्यर्था–' (३।४।७२) इति क्तः । 'ओदितश्च' (८।२।४५) इति नत्वम् ॥ (९) ॥*॥ वेल्लति स्म । 'वेल्ल चलने' (भ्वा० प० से०) 'गत्यर्था–' (३।४।७२) इति क्तः । **'वेल्लितं** गमने क्लीबं कुटिले विधुते त्रिषु' (इति मेदिनी) ॥ (१०) ॥*॥ वञ्चति । 'वञ्चु गतौ' भ्वा० प० से०) । 'स्फायितञ्चि–' (उ० २।१३) इति रक् । **'वक्रं** पुटभेदे **वक्रः** कुटिले क्रूरभौमयोः' इति हैमः ॥ (१) ॥*॥ एकादश **'वक्रस्य'** ॥

ऋजावजिह्मप्रगुणौ

ऋजेति ॥ अर्जति । 'अर्ज अर्जने' (भ्वा० प० से०) 'अर्जिदृशि–' (उ० १।२७) इति साधुः । यत्तु—अपष्ठादित्वात्कुः—इति मुकुटेनोक्तम् । तच्चिन्त्यम् । 'अपदुःसुषु स्थः'(उ० १।२५) इत्यस्य प्राप्त्यभावात् । गुणाभावाच्च ॥ (१) ॥*॥ **मित्रो जिह्मात्** ॥ (२) ॥*॥ **प्रकृष्टा गुणा यस्य** ॥ (३) ॥*॥ त्रीणि **'अवक्रस्य'** ॥

व्यस्ते त्वप्रगुणाकुलौ ।

व्यस्ते इति ॥ व्यस्यते स्म । 'असु क्षेपणे' (दि० प० से०) । क्तः (३।२।१०२) । **'व्यस्तं** तु व्याकुले व्यासे' इति विश्वः ॥ (१) ॥*॥ **भिन्नः प्रगुणात्** ॥ (२) ॥*॥ आकोलति । **'कुल** संस्त्याने' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः ॥ (३) ॥*॥ त्रीणि **'आकुलस्य'** ॥

शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः॥ ७२ ॥

शेति ॥ शश्वद्भवः । 'तत्र भवः' (४।३।५३) इत्यण् । अनित्योऽव्ययानां टिलोपः, बहिषष्टिलोपवचनात् (वा० ४।१।८५) ज्ञापकात् ॥*॥ अध्यात्मादित्वात् (वा० ४।३।६०) ठञपि । 'शाश्वतिकः' (२।४।९) इति निर्देशान्न कादेशः (७।३।५१) ॥ (१) ॥*॥ ध्रुवति । 'ध्रुव स्थैर्ये' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । **'ध्रुवो** वटे । वसुयोगभिदोः शंभौ शङ्खावुत्तानपादजे । स्थिरे (नित्ये) निश्चिते च **(ध्रुवं** खेऽजस्रतर्कयोः । **ध्रुवा** मूर्वाशालपर्ण्योः स्रग्भेदे गीतभिद्यपि' इति हैमः ॥ (२) ॥*॥ नियतं भवः । 'त्यब् नेर्ध्रुवे' (वा० ४।२।१०४) । **'नित्यं** स्यात्संततेऽपि च । शाश्वते त्रिषु' (इति मेदिनी) ॥ (३) ॥*॥ सदा भवः । 'सायंचिरम्–' (४।३।२३) इति ट्युट्युलौ (ट्युटुलौ) ॥ (४) ॥*॥ सना भवः । **'सनातनोऽच्युते** । पितॄणामतिथौ रुद्रवेधसोः शाश्वते स्थिरे' इति हेमचन्द्रः ॥ (५) ॥*॥ पञ्च **'नित्यस्य'** ॥

स्थास्नुः स्थिरतरः स्थेयान्

स्थेति ॥ स्थानशीलः । 'ग्लाजिस्थश्च ग्स्नुः (३।२।१३९) ॥ (१) ॥*॥ अतिशयेन स्थिरः । तरप् (५।३।५७) ॥ (२) ॥*॥ ईयसुनि (५।३।५७) 'प्रियस्थिर–' (६।४।१५७) इति साधुः ॥ (३) ॥*॥ त्रीणि **'अतिस्थिरस्य'** ॥

एकरूपतया तु यः ।

कालव्यापी स कूटस्थः

एकेति ॥ कूटवत् तिष्ठति 'सुपि स्थः' (३।२।४) इति कः । **'कूटोऽस्त्री** निश्चले राशौ' (इति मेदिनी) ॥ (१) ॥*॥ एकम् **'कूटस्थस्य'** ॥

स्थावरो जङ्गमेतरः॥ ७३ ॥

स्थेति ॥ स्थानशीलः । 'स्थेशभास–' (३।२।१७५) इति वरच् ॥ (१) ॥*॥ जङ्गमादितरः ॥ (२) ॥*॥ द्वे **'अचरस्य'** ॥

चरिष्णुजङ्गमचरं त्रसमिङ्गं चराचरम् ।

चेति ॥ चरणशीलम् । 'चर गतौ' (भ्वा० प० से०) । 'अलंकृञ्–' (३।२।१३६) इतीष्णुच् ॥ (१) ॥*॥ वक्रं गच्छति । गत्यर्थानाम् 'निलं कौटिल्ये–' (३।१।२३) इति यङ् । स्वाम्यादिस्तु भृशार्थ एव यङमिच्छति । अच् (३।१।१३४) ॥ (२) ॥*॥ चरति । अच् (३।१।१३४) **'चरोऽक्षद्यूतभेदे** च भौमे चारे त्रसे चले' (इति मेदिनी) ॥ (३) ॥*॥ त्रसति । 'त्रसी उद्वेगे' (दि० प० से०) । अच् (३।१।१३५) ॥ (४) ॥*॥ इङ्गति । 'इगि गतौ' (भ्वा० प० से०) । अच्

(३।१।१३४) 'इङ्गः स्यादिङ्गितेऽङ्गते । ज्ञानजङ्गमयोश्चापि' इति हेमचन्द्रः ॥ (२) ॥*॥ 'चरिचलि–' (वा० ६।१।१२) इति द्वित्वादि । **'चराचरं** जङ्गमे स्यादिङ्गविष्टपयोरपि' (इति हैमः) ॥ (६) ॥*॥ षट् **'चरस्य'** ॥

चलनं कम्पनं कम्प्रं चलं लोलं चलाचलम् ॥ ७४ ॥
चञ्चलं तरलं चैव परिप्लवपरिप्लवे ।

चेति ॥ चलनशीलम् । 'चल गतौ' (भ्वा० प० से०) । 'चलनशब्दा–' (३।२।१४८) इति युच् । **'चलनं** भ्रमणे कम्पे कम्प्रे तु वाच्यलिङ्गकम् । चलनी वस्त्रघर्घर्यां वारीभेदेऽपि च क्वचित्' इति विश्वमेदिन्यौ ॥ (१) ॥*॥ कम्पनशीलम् । 'कपि चलने' (भ्वा० आ० से०) । **'कम्पनं** न द्वयोः कम्पे कम्प्रे स्यादभिधेयवत्' (इति मेदिनी) ॥ (२) ॥*॥ 'नमिकम्पि–' (३।२।१६७) इति रः ॥ (३) ॥*॥ चलति । अच् (३।१।१३४) ॥ (४) ॥*॥ लोडति । 'लुड विलोडने' (भ्वा० प० से०) । क्वचिदपवादविषयेऽप्युत्सर्गप्रवृत्तेरच् (३।१।१३४) । डलयोरेकत्वम् ॥ (५) ॥*॥ 'चरिचलि–' (वा० ६।१।१२) इति द्वित्वादि ॥ (६) ॥*॥ चञ्चति । 'चञ्चु गतौ' (भ्वा० प० से०) । बाहुलकादलच् । **'चञ्चला** तु तडिल्लक्ष्म्योश्चञ्चलश्चपले (कामुके)ऽनिले' (इति मेदिनी) ॥ (७) ॥*॥ तरति । आलच् (बाहुलकात्) । **'तरलं** चञ्चले पिञ्जे भास्करेऽपि त्रिलिङ्गकम् । हारमध्यमणौ पुंसि यवागूसुरयोः स्त्रियाम्' इति विश्वमेदिन्यौ ॥ (८) ॥*॥ परिप्लवते । 'प्लुङ् गतौ' (भ्वा० आ० से०) । अच् (३।१।१३४) ॥ (९) ॥*॥ प्रज्ञाद्यण् (५।४।३८) । **'पारिप्लवश्चाकुले स्याच्चञ्चले च'** इति हैमः (मेदिनी) ॥ (१०) ॥*॥ दश **'चलस्य** ॥

अतिरिक्तः समधिकः

अतीति ॥ अतिरिच्यते स्म । 'रिचिर् विरेचने' (रु० उ० अ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ सम्यगधिकः ॥ (२) ॥*॥ द्वे **'अधिकभूतस्य'** ॥

दृढसंधिस्तु संहतः ॥ ७५ ॥

द्रिति ॥ दृढः संधिः संधानमस्य ॥ (१) ॥*॥ संहन्यते स्म क्तिः (३।२।१०२) । **'संहतं** संगते दृढे' इति हैमः ॥ (२) **'दृढसंधानस्य'** ॥

कक्खटं कठिनं क्रूरं कठोरं निष्ठुरं दृढम् ।
जरठं मूर्तिमन्मूर्तम्

केति ॥ कक्खति । 'कख हसने' (भ्वा० प० से०) । 'शकादिभ्योऽटन्' (उ० ४।११२) ॥*॥ **(कक्खटम् इति)** कवर्गद्वितीयादिः—इत्यन्ये ॥ (१) ॥*॥ कठति । 'कठ कृच्छ्रजीवने' (भ्वा० प० से०) 'बहुलमन्यत्रापि' (उ० ३।४९) इतीनच् । **'कठिनमपि** निष्ठुरे स्यात् स्तब्धेऽपि त्रिषु नपुंसकं स्थाल्याम् । **कठिनी** खटिकायामपि **कठिना** गुडशर्करायां च' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ कृन्तति । 'कृती छेदने' (तु० प० से०) । **कृतेश्छः क्रू च'** (उ० २।२१) इति रक् । —कृणाति—इति स्वामिमुकुटोक्तविग्रहस्तु चिन्त्यः । **'क्रूरा** नृशंसघोरोष्णकठिनाः' इति हैमः ॥ (३) ॥*॥ 'कठिचकिभ्यामोरन्' (उ० १।६४) । **'कठोरौ** पूर्णकठिनौ' इति हैमः ॥ (४) ॥*॥ निष्ठति । मन्थुरादिः (उ० १।४१) ॥ (५) ॥*॥ दर्हति, दंहति, स्म वा । 'दह दहि वृद्धौ' (भ्वा० प० से०) । 'दृढः स्थूलबलयोः' (७।२।२०) इति साधुः । **'दृढं** स्थूले नितान्ते च प्रगाढे बलवत्यपि' (इति मेदिनी) ॥ (६) ॥*॥ जीर्यति । 'जॄष् वयोहानौ' (दि० प० से०) । बाहुलकादठच् । **'जरठः** कर्कशे पाण्डौ कठिनेऽप्यभिधेयवत्' इति विश्वः ॥ (७) ॥*॥ मूर्तिः काठिन्यमस्यास्ति । मतुप् (५।२।९४) ॥ (८) ॥*॥ मूर्च्छति स्म । 'मूर्च्छा मोहसमुच्छ्राययोः' (भ्वा० प० से०) । अकर्मकत्वात् क्तः (३।४।७२) । ('आदितश्च' (७।२।१६) इति नेट्) । 'न ध्याख्या–' (८।२।५७) इति नत्वं न । **'मूर्ते** स्यात्रिषु मूर्छाले कठिने मूर्तिमत्यपि' इति विश्वः (मेदिनी) ॥ (९) ॥*॥ नव **'कठिनस्य'** ॥

प्रवृद्धं प्रौढमेधितम् ॥ ७६ ॥

प्रेति ॥ प्रवर्धते स्म 'वृधु वृद्धौ' (भ्वा० आ० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः ॥ (१) ॥*॥ प्रोह्यते स्म । 'वह प्रापणे' (भ्वा० उ० अ०) । क्तः (३।२।१०२) । 'प्रादूहो–' (वा० ६।१।८९) इति वृद्धिः ॥ (२) ॥*॥ एधते स्म । 'एध वृद्धौ' (भ्वा० आ० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः ॥ (३) ॥*॥ त्रीणि **'प्रवृद्धस्य'** ॥

पुराणे प्रतनप्रत्नपुरातनचिरंतनाः ।

पुरेति ॥ पुरा भवम् । 'सायंचिरम्–' (४।३।२३) इति 'ट्युट्युलौ । 'पुराणप्रोक्तेषु–' (४।३।१०५) इति निर्देशात्तुण्न । 'अबाधकान्यपि निपातनानि' इति पक्षे भवति । **'पुराणं** प्रत्नशास्त्रयोः । **पुराणः** षोडशपर्णे' (इति हैमः) ॥ (१) ॥*॥ 'नश्च पुराणे प्रात्' (वा० ५।४।३०) इति ट्युः ॥ (२) ॥*॥ त्नः (वा० ५।४।३०) च ॥ (३) ॥*॥ पुरा भवम् । ट्युः (४।३।२३) ॥ (४) ॥*॥ **चिरे** भवम् । 'सायंचिरम्–' (४।३।२३) इति ट्युः, निपातनान्मान्तत्वम् ॥ (५) ॥*॥ पञ्च **'पुरातनस्य'** ॥

१—पुराणशब्देन पुरातनशब्दस्य बाधः प्राप्तोऽपि पृषोदरादित्वात् (६।३।१०९) नेति बोध्यम् । 'अबाधकान्यपि निपतनानि' इति तु भाष्यविरुद्धम्—इति परिभाषेन्दुशेखरे नागेशः । २—'नश्च पुराणे प्राद्वक्तव्यः । ल्यप्-तनप्-खाश्च प्रत्यया वक्तव्याः' इति भाष्ये तनप्प्रत्ययस्यैव विधानेनात्र तद्विरोधात् ट्युविधानमसंगतम् । अत एव स्वामिमुकुटाभ्यामपि तनप्रत्यय एवाङ्गीकृतः ॥

प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः ॥ ७७ ॥
नूत्नश्च

प्रेति ॥ प्रतिनवमग्रमस्य ॥ (१) ॥*॥ अभिनवते । 'णु स्तुतौ' (अ० प० अ०) । 'ऋदोरप्' (३।३।५७) ॥ (२) ॥*॥ 'अचो यत्' (३।१।९७) ॥ (३) ॥*॥ नव एव । 'नवस्य नूरादेशस्तनपूतनपूखाश्च प्रत्ययाः' (वा० ५।४।३०) ॥ (४) ॥*॥ (५) ॥*॥ (६) ॥*॥ नूयते । अप् (३।३।५७) ॥ (७) ॥*॥ सप्त **'नूतनस्य'** ॥

सुकुमारं तु कोमलं मृदुलं मृदु ।

स्विति ॥ सुष्ठु कुमार्यते । 'कुमार क्रीडायाम्' चुरादन्तः । 'पुंसि–' (३।३।११८) इति घः । 'एरच्' (३।३।५६) वा । यद्वा सुकाम्यते । 'कमेः किदुच्चोपधायाः' (उ० ३।११३८) इत्यारन्, अत उत्वं च ॥ (१) ॥*॥ बाहुलकादलच्, अत उत्वं च । **'कोमलं** मृदुले जले' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ मृदुर्गुणोऽस्यास्ति । 'सिध्मादिभ्यश्च' (५।२।९७) इति लच् ॥ (३) ॥*॥ मृद्यते । 'मृद क्षोदे' (क्र्या० प० से०) । 'प्रथिमृदिभ्रस्जाम्–' (उ० १।२८) इति कुः संप्रसारणं च । मृगय्वादित्वात् (उ० १।३७) कुः—इति मुकुटो व्यर्थः । **'मृद्वतीक्ष्णे** च कोमले' इति हैमः ॥ (४) ॥*॥ चत्वारि **'कोमलस्य'** ॥

अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्ययम् ॥ ७८ ॥

अन्वेति ॥ अन्वञ्चति । 'अञ्चु गतौ' (भ्वा० प० से०) । क्विन् (३।२।५९) ॥ (१) ॥*॥ अनुगतमक्षमिन्द्रियम् ॥ (२) ॥*॥ अनु गच्छति । **'गम्लृ** गतौ' (भ्वा० प० अ०) । 'अन्येभ्योपि–' (वा० ३।२।४८) इति डः ॥ (३) ॥*॥ पदस्य पश्चात् पश्चादर्थेऽव्ययीभावः (२।१।६) ॥ (४) ॥*॥ चत्वारि **'पश्चादित्यर्थे'** ॥

प्रत्यक्षं स्यादैन्द्रियकम्

प्रेति ॥ अक्षमिन्द्रियं प्रतिगतम् । 'अत्यादयः–' (वा० २।२।१८) इति समासः ॥ (१) ॥*॥ इन्द्रियेणानुभूयते । कुलालादित्वात् (४।३।११८) वुञ् ॥ (२) ॥*॥ द्वे **'इन्द्रियज्ञानस्य'** ॥

अप्रत्यक्षमतीन्द्रियम् ।

अप्रेति ॥ भिन्नं प्रत्यक्षात् ॥*॥ **'मनध्यक्षम्'** इति पाठः—इत्यन्ये । अक्षेष्वधि । अध्यक्षम् । विभक्त्यर्थेऽव्ययीभावः (२।१।६) । अतिक्रान्तमध्यक्षम् ॥ (१) ॥*॥ इन्द्रियमतिक्रान्तम् ॥ (२) ॥*॥ द्वे **'इन्द्रियेणाज्ञातस्य'** ॥

एकतानोऽनन्यवृत्तिरेकाग्रैकायनावपि ॥ ७९ ॥
अप्येकसर्ग एकाग्र्योऽप्येकायनगतोऽपि च ।

एकेति ॥ एकं तानयति । 'तनु श्रद्धोपकरणयोः' (चु० उ० से०) । 'कर्मण्यण्' (३।२।१) । एकस्तानो विस्तारोऽस्य, इति वा ॥ (१) ॥*॥ न अन्या वृत्तिरस्य ॥ (२) ॥*॥ एकम् एकस्मिन् वा अग्रमस्य ॥ (३) ॥*॥ एकमयनमस्य ॥ (४) ॥*॥ एक एकस्मिन् वा सर्गो निश्चयोऽस्य ॥ (५) ॥*॥ एकमग्र्यं ज्ञेयमस्य ॥*॥ प्रज्ञाद्यणि (५।४।३८) **'ऐकाग्र्यः'** इति ॥ (६) ॥*॥ एकं च तदयनं च एकायनं गतः । एकस्मिन्नयने गतं ज्ञानमस्य, इति वा ॥ (७) ॥*॥ सप्त **'एकाग्रस्य'** ॥

पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्याः

पुमिति ॥ आ प्रथमं दीयते गृह्यते । 'उपसर्गे घोः किः' (३।३।९२) ॥ (१) ॥*॥ पूर्वेति । 'पूर्व पूरणे' (भ्वा० प० से०) । अच् (३।१।१३४) । **'पूर्व** तु पूर्वजे । प्रागयं श्रुतभेदेषु' (इति हैमः) ॥ (२) ॥*॥ पुरो भवः । 'दक्षिणापश्चात्पुरसस्त्यक्' (उ० ४।२।९८) ॥ (३) ॥*॥ प्रथते । 'प्रथ प्रख्याने' (भ्वा आ० से०) । 'प्रथेरमच्' (उ० ५।६८) । **'प्रथमस्तु** भवेदादौ प्रधानेऽपि च वाच्यवत्' (इति मेदिनी) ॥ (४) ॥*॥ आदौ भवः । दिगादित्वात् (४।३।५३) यत् ॥ (५) ॥*॥ पञ्च **'आद्यस्य'** ॥

१—सिद्धान्तकौमुद्यां तु—'कुटिकशिकौतिभ्यः प्रत्ययस्य मुट्' । बाहुलकाद्गुणः कोमलम्—इत्युक्तम् । २—ऋकारवतो धातोरुपादाने 'संप्रसारणं च' इत्युक्तिर्भवदीया व्यर्था । तस्मात् रेफवतो भौवादिकस्योपन्यासो युक्तः । अत एव भवज्जनकेनापि प्रकृतसूत्रव्याख्यायां, 'त्रयाणां कुः संप्रसारणम्' इत्येवोक्तम् । ३—पीयूषाख्यव्याख्यायामपि अनुपदशब्दस्यैवाव्ययीभावत्वमुक्तम् । स्वामिना तु—'अन्वक्–अन्वक्ष–अनुपद–' इत्येतत्त्रयमव्ययं वर्तते । क्लीबत्वं तु (अन्वक्ष–अनुपद–इति) द्वयोः—इत्युक्तम् । युज्यते चान्वक्शब्दस्याव्ययत्वम् । 'अन्वग्ययौ मध्यमलोकपालः' इत्यत्र 'अन्वङ्' इति रूपापत्तेः । 'ताम्' इत्यत्र 'कर्तृकर्मणोः–' (२।३।६५) इति षष्ठ्यापत्तेश्च । अव्ययत्वे तु 'न लोकाव्यय–' (२।३।६९) इति षष्ठीनिषेधेन 'अव्ययात्–' (२।४।८२) इति सुपो लुका लुप्तत्वेन न काप्यनुपपत्तिः । ग्रामं यातीत्यादावानुभविकस्य याधात्वर्थव्यापारजन्यविलक्षणसंयोगाश्रयत्वस्य गव्यभावेन तामित्यस्य 'ययौ' इत्येतत्कर्मत्वाभावात् । 'ययौ' इत्येतत्कर्म तु 'निलयाय' इति प्रागुक्तमेव । नहि सश्रीचोरेकतरक्रियाकर्मत्वमेकतरस्य भवति । 'पुत्रेण सहागतः पिता' इत्यर्थे 'पुत्रमागच्छति स पिता' इति प्रयोगाभावात् । गोराङ्गोश्च 'छायेव तां भूपतिरन्वगच्छत्' इत्यनेन सभ्यक्त्वप्रतिपादनात् । तत्र च 'तृतीयार्थे' इत्यनेनानोः कर्मप्रवचनीयसंज्ञेति दिक् ।

१—प्रथमम् आदीयते गृह्यते—इति मुकुटपाठ एव साधीयान् । भवल्लिखितपाठे 'आ' इत्यस्य 'प्रथमम्' इत्यर्थकत्वसंभवेऽपि 'दीयते' इत्यस्य 'गृह्यते' इत्यर्थकताया विना लक्षणं सर्वसुबोध्यत्वाभावात् ॥

अथास्त्रियाम् ॥ ८० ॥

अन्तो जघन्यं चरममन्त्यपाश्चात्यपश्चिमम् ।

अथेति ॥ अमति । 'अम गतौ' (भ्वा० प० से०) । बाहुलकात्तन् अन्तिति वा । 'अति बन्धने' (भ्वा० प० से०) । अच् (३।१।१३४) । **'अन्तः** स्वरूपे निकटे प्रान्ते निश्चयनाशयोः । (अवयवेऽपि)' इति हेमचन्द्रः ॥ (१) ॥*॥ जघने भवम् । दिगादित्वात् (४।३।५४) यत् । शरीरावयवत्वात् (४।३।५५ वा०) **'जघन्यं** मोहने क्लीबं चरमे गर्हितेऽन्यवत्' (इति मेदिनी) ॥ (२) ॥*॥ चरति । 'चर गतौ' (भ्वा० प० से०) । 'चरेश्च' (उ० ५६९) इत्यमच् ॥ (३) ॥*॥ अन्ते भवम् । दिगादित्वात् (४।३५४) । **'अन्त्यस्त्वन्तभवेऽधमे'** इति हैमः ॥ (४) ॥*॥ पश्चाद्भवम् । 'दक्षिणा–' (४।२।९८) इति त्यक् ॥ (५) ॥*॥ 'अग्रादिपश्चाड्डिमच्' (वा० ४।३।२३) ॥ (६) ॥*॥ षट् **'अन्त्यस्य'** ॥

मोघं निरर्थकम्

मवित्ति ॥ मुह्यन्त्यस्मिन् । 'मुह वैचित्ये' (दि० प० अ०) । 'हलश्च' (३।३।१२१) इति घञ् । न्यङ्क्वादिः (७।३।५३) ।—मुहेरचि—इति मुकुटोक्तिश्चिन्त्या । **'मोघो** दिने निष्फले च **मोघा** स्यात्पटालातरौ' इति हैमः ॥ (१) ॥*॥ निर्गतोऽर्थोऽस्मात् ॥ (२) ॥*॥ द्वे **'निष्प्रयोजनस्य'** ॥

स्पष्टं स्फुटं प्रव्यक्तमुल्बणम् ॥ ८१ ॥

स्पेति ॥ स्पश्यते स्म । 'स्पश बाधनस्पर्शनयोः' (भ्वा० उ० से०) ण्यन्तः । क्तः (३।२।१०२) । 'वादान्त–' (७।२।२७) इति साधुः । मुकुटस्तु—स्पश्यते स्म—इति विगृहीतवान् । तत्रेट्प्रसङ्गो दुर्वारः ॥ (१) ॥*॥ स्फुटति । 'स्फुट विकसने' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । **'स्फुटो** व्यक्तप्रफुल्लयोः । सिते[२] व्याप्ते' इति हैमः ॥ (२) ॥*॥ प्रव्यज्यते स्म । 'अञ्जू व्यक्त्यादौ' (रु० प० से०) । क्तः (३।२।१०२) । प्रव्यच्यते स्म, इति वा । 'अञ्चु विशेषणे' (चु० उ० से०) क्तः (३।२।१०२) ॥ (२) ॥*॥ उद्वणति । 'वण शब्दे' (भ्वा० प० से०) । अच् (३।१।१३४) । पृषोदरादिः (६।३।१०९) ॥ (४) ॥*॥ चत्वारि **'स्पष्टस्य'** ॥

साधारणं तु सामान्यम्

सेति ॥ सह आधारणेन । 'आभीक्ष्ण्यसाधारणादञ्–' (वा० ५।४।३६) इति स्वार्थेऽञ् । स्त्रियां ङीप् (४।१।१५) ॥ (१) ॥*॥ सह मानेन । समानस्य भावः । ष्यञ् (५।१।१२४) । चातुर्वर्ण्यादित्वाद् (वा० ५।१।१२४) वा स्वार्थे ष्यञ् ॥ (२) ॥*॥ द्वे **'अनेकसंबन्धिन एकस्य'** ॥

एकाकी त्वेक एककः ।

एकेति ॥ एक एव 'एकादाकिनिच्चासहाये' (५।३।५२) ॥ (१) ॥*॥ चकारात्कन्लुकौ च । **'एकं** संख्यान्तरे श्रेष्ठे केवलेतरयोस्त्रिषु' (इति मेदिनी) ॥ (२) ॥*॥ (३) ॥*॥ त्रीणि **'असजातीयासहायस्य'** ॥

भिन्नार्थका अन्यतर एकस्त्वोऽन्येतरावपि ॥ ८२ ॥

भीति ॥ भिन्नोऽर्थो येषां ते ॥ (१) ॥*॥ अन्य एव ॥ 'अल्पाच्तरम्' (२।२।३४) इतिवत् स्वार्थे तरप् ।—द्वयोर्निर्धारणे डतरच् (५।३।९२)—इति मुकुटस्त्वपाणिनीयः ॥*॥ ॥*॥ क्वचित् **'एकतरः'** इति पाठः । तत्र 'एकाच्च प्राचाम्' (५।३।९४) इति डतरच् ॥ (२) ॥*॥ इति । 'इण्भी–' (उ० ३।३३) इति कन् ॥ (३) ॥*॥ तनोति । 'तनोतेरनश्च वः' (उ० २।६३) चात् क्विप्—इत्येके । आगमानित्यत्वात्तुग् वैकल्पिकः । केचित्तु चिकमेवानुवर्तयन्ति । एवं मतभेदसिद्धौ त्वत्तत्वशब्दौ सर्वादिषु पठितौ ॥ (४) ॥*॥ अनिति । 'अन प्रणने' (अ० प० से०) । अश्यादित्वात् (उ० ४।११२) यः । **'अन्योऽसदृशेतरयोः'** इति हैमः ॥ (५) ॥*॥ तरणम् । 'ऋदोरप्' (३।३।५७) नरः । एः कामस्य तरः । इना कामेन तरति इति वा । अच् (३।१।१३४) । **'इतरः** पामरेऽन्यस्मिन्' इति हेमचन्द्रः ॥ (६) ॥*॥ षट् **'भिन्नार्थकाः'** ॥

उच्चावचं नैकभेदम्

उच्चेति ॥ उदक् चावाक् च । 'मयूरव्यंसकादयश्च' (२।१।७२) इति साधुः ॥ (१) ॥*॥ एको भेदोऽस्य । न एकभेदम् । 'सुप्सुपा' (२।१।४) इति समासः । न एको भेदोऽत्र, इति वा । उत्तरपदशब्दस्य समासचरमावयवे रूढत्वान्मध्यमपदे नलोपाभावः ॥ (२) ॥*॥ द्वे **'अनेकप्रकारस्य'** ॥

उच्चण्डमविलम्बितम् ।

विति ॥ उच्चण्डनम् 'चडि कोपे' (भ्वा० आ० से०) । घञ् (३।३।१८) ॥ (१) ॥*॥ विलम्ब्यते स्म । 'लबि अवस्रंसने' (भ्वा० आ० से०) । क्तः (३।२।१०२) । न विलम्बितम् ॥*॥ स्वामी—**अवलम्बनम्**—इति पठति ॥ (२) ॥*॥ द्वे **'उत्तालस्य'** ॥

१—'कृतो बहुलम्' इति भाष्यसंमतन्यासेऽधिकरणेऽप्यचः सिद्धत्वेन 'न्यङ्कादीनां च' इत्यत्र विण्ण्यतोरनुवृत्त्यभावस्य 'न्यङ्कादित्वात्कुत्वम् । भृगुः' इति वदतो भवज्जनकस्यापि संमतत्वेन कुत्वस्यापि सिद्धत्वेन च 'चिन्त्या' इत्युक्तिरेव चिन्त्या । २—सितव्याप्तयोर्यथा—'सुधांशुरोचिःस्फुटकुट्टिमेषु'—इत्यनेकार्थकैरवाकरकौमुदी ।

१—'एकलः' इत्यपि पाठः—'शांभवी शक्तिरेकला'—इति पीयूषव्याख्या ।

अरुंतुदं तु मर्मस्पृक्

अर्वेति ॥ अरुंषि तुदति । 'तुद व्यथने' (तु० उ० अ०) । 'विध्वरुषोस्तुदः' (३।२।३५) इति खच् । 'अरुर्द्विषत्–' (६।३।६७) इति मुम् ॥ (१) ॥*॥ मर्म स्पृशति । 'स्पृश उपतापे' (तु० प० अ०) । 'स्पृशोऽनुदके–' (३।२।५८) इति क्विन् ॥ (२) ॥*॥ द्वे **'मर्मपीडकस्य'** ॥

अबाधं तु निरर्गलम् ॥ ८३ ॥

अबेति ॥ न बाधास्य ॥ (१) ॥*॥ निष्क्रान्तमर्गलायाः । 'निरादयः–' (वा० २।२।१८) इति समासः ॥ (२) ॥*॥ द्वे **'अबाधितस्य'** ॥

प्रसव्यं प्रतिकूलं स्यादपसव्यमपष्टु च ।

प्रेति ॥ प्रगतं सव्यात् । **'प्रसव्यं** वाच्यलिङ्गं प्रतिकूलानुकूलयोः' (इति मेदिनी) ॥ (१) ॥*॥ प्रतीपं कूलात् ॥ (२) ॥*॥ अपगतं सव्यात् । **'अपसव्यं** त्रिलिङ्गं तु दक्षिणप्रतिकूलयोः' इति विश्वः (मेदिनी) ॥ (३) ॥*॥ अपतिष्ठति । 'अपदुःसुषु स्थः' (उ० १।२५) इति कुः । सुषामादिः (८।३।९८) **'अपष्टुः** पुंसि काले च वामे स्यादन्यलिङ्गकः' (इति मेदिनी) ॥ (४) ॥*॥ चत्वारि **'विरुद्धार्थस्य'** ॥

वामं शरीरं सव्यं स्यात्

वेति ॥ सूयते । 'षू प्रेरणे' (तु० प० से०) । 'अचो यत्' (३।१।९७) । **'सव्यं** वामे च दक्षिणे' इत्यजयः । **'सव्यं** तु दक्षिणे । वामे च प्रतिकूले च' इति विश्वः (हैमः) ॥ (१) ॥*॥ एकम् **'सव्यशरीरस्य'** ॥

अपसव्यं तु दक्षिणे ॥ ८४ ॥

अपेति ॥ अपक्रान्तं सव्यात् ॥ (१) ॥*॥ एकम् **'दक्षिणशरीरभागस्य'** ॥

संकटं ना तु संबाधः

समिति ॥ संकटति । 'कटे वर्षावरणयोः' (भ्वा० प० से०) । अच् (३।१।१३४) यद्वा संबाधार्थात् 'सम्' शब्दात् स्वार्थे 'संप्रोदश्च–' (५।२।९२) इति कटच् ॥ (१) ॥*॥ सम्यग् बाधन्तेऽत्र । 'बाधृ लोडने' (भ्वा० आ० से०) 'हलश्च' (३।३।१२१) इति घञ् । **'संबाधः** संकटे भेगे' इति विश्वः ॥ (२) ॥*॥ द्वे **'संकीर्णस्य'** ॥

कलिलं गहनं समे ।

केति ॥ कलते, कल्यते, वा । 'कल शब्दसंख्यानयोः' (भ्वा० आ० से०) 'सलिकलि–' (उ० १।५४) इतीलच् ॥ (१) ॥*॥ गाह्यते । 'गाहू विलोडने' (भ्वा० आ० से०) । 'बहुलमन्यत्रापि' (उ० २।७८) इति युच् । पृषोदरादित्वात् (६।३।१०९) ह्रस्वः । गस्य गानस्य गतेर्वा हनम् । **'गहनं** वनदुःखयोः । गह्वरे कलिले चापि' इति विश्वहैमौ ॥ (२) ॥*॥ द्वे **'दुष्प्रवेशस्य'** ॥

संकीर्णं संकुलाकीर्णे

समिति ॥ संकीर्यते स्म । 'कॄ विक्षेपे' (तु० प० से०) क्तः (३।२।१०२) **'संकीर्णं** निचितेऽपि स्यादशुद्धे लभिधेयवत्' (इति मेदिनी) ॥ (१) ॥*॥ संकोलति । 'कुल संस्त्याने' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । यत्तु–शकिधातोरुलचि 'शङ्कुलम्' तालव्यादि इति तु स्वामी—इति मुकुटेनोक्तम् । तच्चिन्त्यम् । 'संकोलति' इति स्वामिना विगृहीतत्वात् ॥ (२) ॥*॥ आकीर्यते स्म । 'कॄ विक्षेपे' (तु० प० से०) । क्तः (३।२।१०२) ॥ (३) ॥*॥ त्रीणि **'नानाजातीयसंमिलितस्य'** । यथा संकीर्णवर्गः । केचित्तु एतान्पूर्वपर्यायानाहुः । 'संकीर्णमृषिपत्नीनाम्' इति प्रयोगात् ॥

मुण्डितं परिवापितम् ॥ ८५ ॥

मिति ॥ मुण्ड्यते स्म । 'मुडि खण्डने' (भ्वा० आ० से०) । क्तः (३।२।१०) ॥ (१) ॥*॥ परिवाप्यते स्म । मुण्डनार्थोऽत्र वपिः । ण्यन्तः । क्तः (३।२।१०२) ॥*॥ द्वे **'कृतमुण्डनस्य'** ॥

ग्रन्थिते संदितं दृब्धम्

ग्रेति ॥ ग्रथ्यते स्म । **'ग्रन्थ संदर्भे'** (क्र्या० प० से०)। क्तः (३।२।१०२) ॥*॥ **'ग्रन्थितम्'** इति पाठान्तरम् । तत्र 'ग्रथि कौटिल्ये' (भ्वा० आ० से०) इति धातुः । **'ग्रन्थितं** गुम्फिते क्रान्ते हिंसिते च त्रिलिङ्गकम्' (इति मेदिनी) ॥ (१) ॥*॥ संदीयते स्म । 'दो अवखण्डने' (दि० प० अ०) । क्तः (३।२।१०२) । 'थतिस्यति–' (७।४।४०) इतीत्वम् ॥*॥ **'गुम्फितम्'** इति पाठे 'गुम्फ ग्रन्थे' (तु० प० से०) ण्यन्तः ॥ (२) ॥*॥ दृभ्यते स्म । 'दृभी ग्रन्थे' (तु० प० से०) । क्तः (३।२।१०२) ॥ (३) ॥*॥ त्रीणि **'गुम्फितस्य'** ॥

विसृतं विस्तृतं ततम् ।

वीति ॥ विसरति स्म । 'सृ गतौ' (भ्वा० प० अ०) । 'गत्यर्थाः–' (३।४।७२) इति क्तः ॥ (१) ॥*॥ विस्तीर्यते स्म । 'स्तृञ् आच्छादने' (क्र्या० उ० से०) । क्तः (३।२।

१—दक्षिणे यथा–'वामो बाहुर्मृडान्याः करकलितरणत्कंकणालीकरालो यस्मिन्सव्यो भुजगवलयवान्' इत्यनेकार्थकैरवाकरकौमुदी । २—भगे योनौ यथा—'करिहस्तेन संबाधे प्रविश्यान्तर्विलोडिते । उपसर्पन् ध्वजः पुंसः साधनान्तर्विराजते' इत्यनेकार्थकैरवाकरकौमुदी ।

१—'सप्तैकार्थानि' इत्येके—इति पीयूषाख्यव्याख्या । २—'वपिः प्रकिरणे दृष्टश्छेदने चापि वर्तते । केशान्वपति' इति (इति (६।१।४५ सूत्रे) भाष्यात् । ३—'गुन्थितम्' इति कन्नित्—इति पीयूषव्याख्या ।—'मवितं मर्दितम्' इति पाठे 'मृद क्षोदे' (क्र्या०) —ऽनेकार्थत्वात् ग्रन्थने इति स्वामी—इति मुकुटः ॥

१०२) ॥ (२) ॥*॥ तन्यते स्म । 'तनु विस्तारे' (त० उ० से०) । क्तः (३।२।१०२) । **'ततं** व्याप्ते विस्तृते च त्रिलिङ्गकम् । क्लीबं वीणादिवाद्ये स्यात्पुंलिङ्गस्तु सदागतौ' (इति मेदिनी) ॥ (३) ॥*॥ त्रीणि **'लब्धप्रसरस्य'** ॥

अन्तर्गतं विस्मृतं स्यात्

अन्तेति ॥ अन्तर्गम्यते स्म, गच्छति स्म वा । 'गम्लृ गतौ' (भ्वा० प० अ०) । क्तः (३।२।१०२,४।७२) । **'अन्तर्गतं** विस्मृते स्यान्मध्यप्राप्ते च वाच्यवत्' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ विस्मर्यते स्म । 'स्मृ आध्याने' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'विस्मृतस्य'** ॥

प्राप्तंप्रणिहिते समे ॥ ८६ ॥

प्रेति ॥ प्राप्यते स्म । 'आप्लृ व्याप्तौ' (स्वा० प० अ०) । क्तः (३।२।१०२) । **'प्राप्तं** लब्धे समञ्जसे' (इति मेदिनी) ॥ (१) ॥*॥ प्रणिधीयते स्म । क्तः (३।२।१०२) । 'दधातेर्हिः' (७।४।४२) ॥ (२) ॥*॥ द्वे **'स्थापितस्य'** ॥

वेल्लितप्रेङ्खिताधूतचलिताकम्पिता धुते ।

वेल्लीति ॥ वेल्ल्यते स्म । 'वेल्ल चलने' (भ्वा० प० से०) । क्तः (३।२।१०२) । **'वेल्लितं** गमने क्लीबं कुटिले विधुते त्रिषु' (इति मेदिनी) ॥ (१) ॥*॥ प्रेङ्ख्यते स्म । 'इखि गतौ' (भ्वा० प० से०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ आधूयते स्म । 'धू विधूनने' (तु० प० से०) । 'धूञ् कम्पने' (क्या० प० से०) वा । क्तः (३।२।१०२) ॥ (३) ॥*॥ चल्यते स्म । 'चल कम्पने' (भ्वा० प० से०) । क्तः (३।२।१०२) ॥ (४) ॥*॥ आकम्प्यते स्म । 'कपि चलने' (भ्वा० आ० से०) । क्तः (३।२।१०२) ॥ (५) ॥*॥ धूयते स्म । 'धूञ् कम्पने' (स्वा० उ० अ०) । क्तः (३।२।१०२) । **'धुतम्** । त्यक्ते विधूते' इति हैमः (मेदिनी) ॥ (६) ॥*॥ षट् **'ईषत्कम्पितस्य'** ॥

नुत्तनुन्नास्तनिष्ठ्यूताविद्धक्षिप्तेरिताः समाः ॥ ८७ ॥

न्विति ॥ नुद्यते स्म । 'णुद प्रेरणे' (तु० उ० अ०) । क्तः (३।२।१०२) । 'नुदविद–' (८।२।५५) इति वा नत्वम् ॥ (१) ॥*॥ (२) ॥*॥ अस्यते स्म । 'असु क्षेपणे' (दि० प० से०) । क्तः (३।२।१०२) । **'अस्तः** क्षिप्ते पश्चिमाद्रौ' इति हैमः ॥ (३) ॥*॥ निष्ठीव्यते स्म । 'ष्ठिवु निरसने' (भ्वा० प० से०) क्तः (३।२।१०२) । 'यस्य–' (७।२।१५) इति नेट् । 'च्छ्वोः–' (६।४।१९) इत्यूट् ॥ (४) ॥*॥ आविध्यते स्म । 'व्यध ताडने' (दि० प० अ०) । क्तः (३।२।१०२) । **'आविद्धो** वाच्यलिङ्गः स्यात्कुटिले च पराहते' (इति मेदिनी) ॥ (५) ॥*॥ क्षिप्यते स्म । 'क्षिप प्रेरणे' (तु० उ० अ०) । क्तः (३।२।१०२) ॥ (६) ॥*॥ ईर्यते स्म । 'ईर गतौ कम्पने च' (अ० आ० से०) । क्तः (३।२।१०२) ॥ (७) ॥*॥ सप्त **'प्रेरितस्य'** ॥

परिक्षिप्तं तु निवृतम्

पेति ॥ परितः क्षिप्यते स्म । क्तः (३।२।१०२) ॥ (१) ॥*॥ निव्रियते स्म । 'वृञ् वरणे' (क्या० उ० से०) क्तिः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'परिखादिना वेष्टितस्य'** ॥

मूषितं मुषितार्थकम् ।

म्विति ॥ मूष्यते स्म । **'मुष स्तेये'** (भ्वा० प० से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ मुष्यते स्म । 'मुष स्तेये' (क्या० प० से०) । क्तः (३।२।१३४) । **'मूषितं** हृतखण्डिते' इति विश्वः (मेदिनी) ॥ (२) ॥*॥ द्वे **'चोरितस्य'** ॥

प्रवृद्धप्रसृते

प्रेति ॥ प्रवर्धते स्म । 'वृधु वृद्धौ' (भ्वा० आ० से०) । 'गत्यर्थ–' (३।४।७२) इति क्तः ॥ (१) ॥*॥ प्रसरति स्म । 'सृ गतौ' (स्व० प० अ०) । क्तः (३।४।७२) ॥ (२) ॥*॥ द्वे **'प्रसृतस्य'** ॥

न्यस्तनिसृष्टे

न्येति ॥ न्यस्यते स्म । 'असु क्षेपणे' (दि० प० से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ निसृज्यते स्म । 'सृज विसर्गे' (दि० आ० अ०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'त्यक्तस्य'** ॥

गुणिताहते ॥ ८८ ॥

ग्विति ॥ गुण्यते स्म । 'गुण आमन्त्रणे' (चु० उ० से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ आहन्यते स्म । 'हन्' (अ० प० अ०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'गुणितस्य'** ॥

निदिग्धोपचिते

नीति ॥ निदिह्यते स्म । 'दिह उपचये' (अ० उ० अ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ उपचीयते स्म । 'चिञ् चयने' (स्वा० उ० अ०) । क्तः (३।३।१०२) । 'भवेदुपचितं दिग्धे समृद्धे वाच्यलिङ्गकम्' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'पुष्टिं प्रापितस्य'** ॥

गूढगुप्ते

ग्विति ॥ गुह्यते स्म । 'गुहू संवरणे' (भ्वा० उ० से०) । क्तः (३।२।१०२) । **'गूढं** रहसि गुह्ये च न द्वयोः संवृते त्रिषु' (इति मेदिनी) ॥ (१) ॥*॥ गुप्यते स्म । 'गुपू गोप-

१—वपेः क्तः । **'प्रोक्तम्'** इत्यत्र पाठ इति तु गोवर्धनः—इति मुकुटः ॥

१—'गुपू रक्षणे' (भ्वा० प० से०) इति तूच्चितम् । अन्यथा त्रेटो दुर्वारत्वात् ॥

नादौ' (भ्वा० आ० से०) । क्तः (३।२।१०२) ॥ 'गुप्तं गूढे त्रातं' इति हैमः ॥ (२) ॥*॥ द्वे **'कृतगोपनस्य'** ॥

गुण्डितरूषिते ।

ग्विति ॥ गुण्ड्यते स्म । 'गुडि वेष्टने' (चु० प० से०) । क्तः (३।२।१०२) ॥*॥ **'गुण्ठितम्'** इति पाठे 'गुठि वेष्टने' (चु० प० से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ रूष्यते स्म । रूषिर्वेष्टनार्थोऽपठितोऽपि भ्वादौ द्रष्टव्यो भ्वादेरवृत्कृतत्वात् । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'धूलिलिप्तस्य' गुण्डालित'** इति ख्यातस्य ॥

द्रुतावदीर्णे

द्रुतेति ॥ द्रूयते स्म । 'द्रु गतौ' (भ्वा० प० अ०) । क्तः (३।२।१०२) । **'द्रुतं** शीघ्रविलीनयोः' इति हैमः ॥ (१) ॥*॥ अवदीर्यते स्म । 'दृ विदारणे' (क्या० प० से०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'प्रापितद्रवीभावस्य'** ॥

उद्गूर्णोद्यते

विति ॥ उद्गूर्यते स्म । 'गुरी उद्यमने' (दि० आ० से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ उद्यम्यते स्म । 'यम उपरमे' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'उत्तोलितस्य'** ॥

काचितशिक्यिते ॥ ८९ ॥

केति ॥ काचे धृतम् । 'प्रातिपदिकाद्धात्वर्थे' (चु० ग०) इति णिच् । क्तः ॥ (१) ॥*॥ एवं शिक्ये धृतम् ॥ (२) ॥*॥ द्वे **'शिक्ये स्थापितस्य'** ॥

घ्राणघ्राते

घ्रेति ॥ घ्रायते स्म । 'घ्रा गन्धोपादाने' (भ्वा० प० अ०) । क्तः (३।२।१०२) । 'नुदविद–' (८।२।५५) इति वा नत्वम् । **'घ्राणं** तु घ्रातघोणयोः' इति हैमः ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'आघ्रातस्य'** ॥

दिग्धलिप्ते

दीति ॥ दिह्यते स्म । 'दिह उपचये'—(अ० उ० अ०) । क्तः (३।२।१०२) । **'दिग्धो** विषाक्तबाणे स्यात्पुंसि लिप्तेऽन्यलिङ्गकः' (इति मेदिनी) ॥ (१) ॥*॥ लिप्यते स्म । 'लिप उपदेहे' (तु० उ० अ०) । क्तः (३।२।१०२) । **'लिप्तं** भुक्तविलिप्तयोः । विषाक्ते' इति हैमः ॥ (२) ॥*॥ द्वे **'लिप्तं'** इति ख्यातस्य ॥

समुदक्तोद्धृते

सेति ॥ समुदच्यते स्म 'अञ्चु गतौ' (भ्वा० प० से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ उद्ध्रियते स्म । 'हृञ् हरणे' (भ्वा० उ० से०) । 'धृञ् धारणे' (भ्वा० उ० अ०) वा । क्तः (३।२।१०२) 'उद्धृतं स्यात्रिधूत्क्षिप्ते परिभुक्तोज्झितेऽपि च' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'कूपादेर्निष्कासितजलादेः'** ॥

समे ।

सेति ॥ समे इति प्रवृद्धप्रसृते इत्यादिषु अन्वेति ॥

वेष्टितं स्याद्वलयितं संवीतं रुद्धमावृतम् ॥ ९० ॥

वेष्टीति ॥ वेष्ट्यते स्म । 'वेष्ट वेष्टने' (भ्वा० आ० से०) । क्तः (२।२।१०२) । **'वेष्टितं** रुद्धे लासके करणान्तरे' (इति मेदिनी) ॥ (१) ॥*॥ वलयं जातमस्य । तारकादिः (५।२।३६) । यद्वा वलयवत्कृतम् । 'तत्करोति' (वा० ३।१।२६) इति णिच् । क्तः (३।२।१०२) ॥ (२) ॥*॥ संवीयते स्म । 'व्येञ् संवरणे' (भ्वा० उ० अ०) । क्तः (३।२।१०२) ॥ (३) ॥*॥ रुध्यते स्म । 'रुधिर् आवरणे' (रु० उ० अ०) । क्तः (३।२।१०२) ॥ (४) ॥*॥ आव्रियते स्म । 'वृञ् आवरणे' (क्र्या० उ० से०) । क्तः (३।२।१०२) ॥ (५) ॥*॥ पञ्च **'नद्यादिवेष्टितस्य'** ॥

रुग्णं भुग्ने

र्विति ॥ रुज्यते स्म । 'रुजो भङ्गे' (तु० प० अ०) । क्तः (३।२।१०२) । 'ओदितश्च' (८।२।४५) इति नत्वम् ॥ (१) ॥*॥ भुज्यते स्म । 'भुजो कौटिल्ये' (तु० प० अ०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'वक्रस्य'** ॥

अथ निशितक्षुतशातानि तेजिते ।

अथेति ॥ निशायते स्म । 'शो तनूकरणे' (दि० प० अ०) । क्तः (३।२।१०२) । 'शाच्छोः–' (७।४।४१) इति वेत्वम् ॥ (१) ॥*॥ (२) ॥*॥ क्षूयते स्म । 'क्षु तेजने' (अ० प० अ०) । क्तः (३।२।१०२) ॥ (३) ॥*॥ तेज्यते स्म । 'तिज निशाने' चुरादिः । क्तः (३।२।१०२) ॥ (४) ॥*॥ चत्वारि **'शाणादिना तीक्ष्णीकृतस्य'** ॥

स्याद्विनाशोन्मुखं पक्वम्

स्यादिति ॥ विनशनं विनाशः । भावे घञ् (३।३।१८) । उद्गतं मुखमारम्भोऽस्य विनाशे उन्मुखम् ॥ (१) ॥*॥ पच्यते स्म । 'डुपचष् पाके' (भ्वा० उ० अ०) । क्तः (३।२।१०२) । 'पचो वः' (८।२।५२) **'पक्वं** परिणते नाशाभिमुखे' इति हैमः ॥ (२) ॥*॥ द्वे **'विनाशोन्मुखस्य'** ॥

ह्रीणह्रीतौ तु लज्जिते ॥ ९१ ॥

ह्रीति ॥ अह्रैषीत् । 'ह्री लज्जायाम्' (जु० प० अ०) । क्तः (३।२।१०२) । 'नुदविद–' (८।२।५५) इति वा नत्वम् ॥ (१) ॥*॥ (२) ॥*॥ लज्जा जातास्य । तारकादिः (५।२।३६) ॥ (३) ॥*॥ त्रीणि **'संजातलज्जस्य'** ॥

वृत्ते तु वृत्तवावृत्तौ

व्रिति ॥ व्रियते स्म । 'वृञ् वरणे' (क्र्या० उ० से०) क्तः (३।२।१०२) ॥ (२) ॥*॥ वृत्यते स्म । 'वृतु वर्तने' (भ्वा० आ० से०) । क्तः (३।२।१०२) । **'वृत्तं** वृत्तौ दृढे मृते । चरित्रे वर्तुले छन्दः खतीताधीतयोर्वृते' इति हैमचन्द्रः ॥

(२) ॥*॥ केचित्तु 'वावृतु वर्तने' (दि० आ० से०) इति पठन्ति तन्मते वावृत्यते स्म । क्तः (६।२।१०१) ॥ (३) ॥*॥ त्रीणि **'स्वयंवरादौ स्वीकृतस्य वरादेः'** ॥

संयोजित उपाहितः ।

समिति ॥ संयोज्यते स्म । 'युजिर् योगे' (रु० उ० अ०) । ण्यन्तः । क्तः (३।२।१०२) ॥ (१) ॥*॥ उपाधीयते । क्तः (३।२।१०२) । 'दधातेर्हिः' (७।४।४२) । **'उपाहितोऽनलोत्पाते पुमानारोपिते त्रिषु'** (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'मेलितस्य'** ॥

प्राप्यं गम्यं समासाद्यम्

प्रेति ॥ प्राप्यते । 'आप्लृ व्याप्तौ' (स्वा० प० अ०) । ण्यत् (३।१।१२४) ॥ (१) ॥*॥ गम्यते । 'गम्लृ गतौ' (स्वा० प० अ०) । 'पोरदुपधात्' (३।१।९८) इति यत् ॥ (२) ॥*॥ समासद्यते । 'षदॢ विशरणादौ' (तु० प० अ०) । ण्यत् (३।१।१२४) ॥ (३) ॥*॥ त्रीणि **'आसुं शक्यस्य'** ॥

स्यन्नं रीणं स्रुतं स्रुते ॥ ९२ ॥

स्येति ॥ स्यद्यते स्म । 'स्यन्दू प्रस्रवणे' (भ्वा० आ० से०) । क्तः (३।२।१०२) । 'रदाभ्याम्–' (८।२।४२) इति नत्वम् ॥ (१) ॥*॥ रीयते स्म । 'रीङ् प्रस्रवणे' (दि० आ० अ०) । क्तः (३।२।१०२) । 'स्रादय ओदितः' (दि० ग० सू०) इति नत्वम् (८।२।४५) ॥ (२) ॥*॥ स्रूयते स्म । 'स्रु गतौ' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥ (३) ॥*॥ स्रूयते स्म । 'ष्णु प्रस्रवणे' (अ० प० से०) । क्तः (३।२।१०२) ॥ (४) ॥*॥ चत्वारि **'प्रस्रुतस्य'** ॥

संगूढः स्यात्संकलितः

समिति ॥ संगुह्यते स्म । 'गुहू संवरणे' (भ्वा० उ० से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ संकल्यते स्म । 'कल संख्याने' (भ्वा० आ० से०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'अङ्कान्तरेणैकीकृतस्याङ्कादेः'** ॥

अवगीतः ख्यातगर्हणः ।

अवेति ॥ अवगीयते स्म । 'गै शब्दे' (भ्वा० प० से०) । क्तः (३।२।१०२) । 'घुमास्था–' (६।४।६६) इतीत्वम् । **'अवगीतं तु** निर्वादे दृष्टगर्हितयोरपि' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ ख्याता गर्हणा यस्य ॥ (२) ॥*॥ द्वे **'प्रसिद्धनिन्द्यस्य'** ॥

विविधः स्याद्विधुविधो नानारूपः पृथग्विधः ॥ ९३ ॥

वीति ॥ विचित्रा विधा यस्य ॥ (१) ॥*॥ बहवो विधा यस्य ॥ (२) ॥*॥ नाना रूपमस्य ॥ (३) ॥*॥ पृथग् विधा यस्य ॥ (४) ॥*॥ चत्वारि **'नानारूपस्य'** ॥

अवरीणो धिक्कृतश्चापि

अवेति ॥ अव रीयते स्म । 'रीङ् स्रवणे' (दि० आ० अ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ धिगकारि । क्तः (३।२।१०२) ॥ (२) ॥*॥ पर्यायान्तरं दर्शयितुमुक्तस्यैव धिक्कृतस्यानुवादः । यद्वा निर्भर्त्सित उक्तः, अत्र तु निन्दितमात्रे ॥*॥ द्वे **'निन्दितमात्रस्य'** ॥

अवध्वस्तोऽवचूर्णितः ।

अवेति ॥ अवध्वस्यते स्म । 'ध्वंसु गतौ च' (भ्वा० आ० से०) । क्तः (३।२।१०२) । **'अवध्वस्तं** परित्यक्ते निन्दितेऽप्यवचूर्णिते' इति विश्वः ॥*॥—**'अपध्वस्तः'** इत्यपि पाठः ॥ (१) ॥*॥ अवचूर्ण्यते स्म । 'सत्याप–' (३।१।२५) इति ण्यन्तात् क्तः (३।२।१०२) । यद्वा 'चूर्ण पेषे' चुरादिः ॥ (२) ॥*॥ द्वे **'क्षिप्तसुधादिचूर्णस्य'** ॥

अनायासकृतं फाण्टम्

अनेति ॥ (१) ॥*॥ फण्यते स्म । 'फण गतौ' (भ्वा० प० से०) । क्तः (३।२।१०२) । 'क्षुब्धस्वान्त–' (७।२।१८) इति साधुः ॥ (२) ॥*॥ द्वे **'अनायासेन कृतस्य काथविशेषस्य'** ॥

स्वनितं ध्वनितं समे ॥ ९४ ॥

स्वेति ॥ स्वन्यते स्म 'स्वन शब्दे' (भ्वा० प० से०) क्तः (३।२।१०२) ॥ (१) ॥*॥ ध्वन्यते स्म । 'ध्वन शब्दे' (भ्वा० प० से०) क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'कृतशब्दस्य'** ॥

बद्धे संदानितं मूतमुद्दितं संदितं सितम् ।

बेति ॥ बध्यते स्म । 'बन्ध बन्धने' (क्या० प० से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ संदान्यते स्म 'दान खण्डने' (भ्वा० उ० से०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ मूयते स्म । 'मूङ् बन्धने' (भ्वा० आ० से०) । क्तः (३।२।१०२) । ॥ (३) ॥*॥ उद्यते स्म । संयते स्म । 'दो अवखण्डने' (दि० प० अ०) । क्तः (३।२।१०२) । 'यतिस्यति–' (३।४।४०) इतीत्वम् ॥ (४) ॥*॥ (५) ॥*॥ सीयते स्म । 'षिञ् बन्धने' (स्वा० उ० अ०) । क्तः (३।२।१०२) ॥ (६) ॥*॥ षट् **'बद्धस्य'** ॥

१—'ततो वावृत्यमानासौ रामशालां न्यविक्षत' इति भट्टिः—इति स्वामिमुकुटौ ।—इत्थमबुद्ध्वा 'वृत्तव्यावृत्तौ' इति पेठुः—इति क्षीरस्वामी । २—'उपाहितां वक्षसि पीवरस्तनीं' इति भारविः—इति मुकुटः ।

१—'मूर्णम्' इति पाठे 'मुर्व बन्धने' (भ्वा० प० से०) । क्तः (३।२।१०२) । 'राल्लोपः' (६।४।२१) इति वलोपः । 'हलि च' (८।२।७७) इति दीर्घः । निष्ठानत्वम् (८।२।४२)...इति मुकुटः । २—उद्दीहते । संदीयते इति युक्तम् । यकि परे 'ओतः श्यनि' (७।३।७१) इति लोपस्याप्राप्तेः ।

निष्पक्वं कथितम्

नीति ॥ निश्चयेन पक्वम् ॥ (१) ॥*॥ क्थ्यते स्म । 'क्थे निष्पाके' (भ्वा० प० से०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'साकल्येन पक्वस्य'** ॥

पाके क्षीराज्यपयसां शृतम् ॥ ९५ ॥

पेति ॥ श्रायते स्म । 'श्रा पाके' (अ० प० अ०) । क्तः (३।२।१०२) । 'शृतं पाके' (६।१।२७) इति साधुः ॥ (१) ॥*॥ एकम् **'क्षीरादिषु कृतपाकस्य'** ॥

निर्वाणो मुनिवह्नयादौ

नीति ॥ निर्वाति स्म । 'वा गतिगन्धनयोः' (अ० प० अ०) । 'गत्यर्था–' (३।४।७२) इति क्तः । 'निर्वाणोऽवाते' (८।२।५०) इति साधुः । आदिना 'निर्वाणो हस्ती' । 'निमग्नः' इत्यर्थः । **'निर्वाण**मस्तंगमने निवृत्तौ गजमज्जने । संगमेऽप्यपवर्गे च' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ एकम् **'मुनिवह्नयादौ प्रयुक्तस्य'** ॥

निर्वातस्तु गतानिले ।

निर्वेति ॥ गतश्चासावनिलश्च । तस्मिन् निवहने (?) । पृथक् पदं वा ॥ (१) ॥*॥ एकम् **'अनिले गते सति निर्वातस्य** ॥

पक्वं परिणते

पेति ॥ परिणमति स्म । 'णम प्रह्वत्वे' (भ्वा० प० अ०) अकर्मकत्वात् । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'परिणामं प्राप्तस्य'** ॥

गूनं हृन्ने

ग्विति ॥ गूयते स्म । 'गु पुरीषोत्सर्गे' (तु० प० अ०) । क्तः (३।२।१०२) । 'दुग्वोर्दीर्घश्च' (वा० ८।२।४४) इति वलम् ।–'ल्वादिभ्यश्च' (८।२।४४)—इति मुकुटोक्तिश्चिन्त्या । तौदादिकत्वेनास्य ल्वादित्वाभावात् ॥ (१) ॥*॥ हृयते स्म । 'हृद पुरीषोत्सर्गे' (भ्वा० आ० अ०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'गुदनिष्काशितपुरीषस्य'** ॥

मीढं तु मूत्रिते ॥ ९६ ॥

मीति ॥ मिह्यते स्म । 'मिह सेचने' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ मूत्र्यते स्म । 'मूत्र प्रस्रावे' (चु० उ० से०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'उपस्थनिष्काशितमूत्रस्य'** ॥

पुष्टे तु पुषितम्

प्विति ॥ पुष्यते स्म । 'पुष पुष्टौ' (दि० प० अ०) क्तः । (३।२।१०२) ॥ (१) ॥*॥ भौवादिकस्य त्विट् ॥ (२) ॥*॥ द्वे **'यस्य पोषणं कृतं तस्य'** ॥

सोढे क्षान्तम्

सविति ॥ सह्यते स्म । 'षह मर्षणे' (भ्वा० आ० से०) । क्तः (३।२।१०२) । 'सहिवहोरोदवर्णस्य' (६।३।११२) ॥ (१) ॥*॥ क्षम्यते स्म । 'क्षमूष् सहने' (दि० प० से०) । क्तः (३।२।१०२) । 'अनुनासिकस्य–' (६।४।१५) इति दीर्घः ॥ (२) ॥*॥ द्वे **'क्षमां प्रापितस्य'** ॥

उद्धान्तमुद्वते ।

उद्वेति ॥ उद्वम्यते स्म । 'टुवम उद्गिरणे' (भ्वा० प० से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ उद्वम्यते स्म । 'गमॄ गतौ' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'वमित्वा त्यक्तस्यान्नादेः'** ॥

दान्तस्तु दमिते

देति ॥ दम्यते स्म । 'दमु उपशमे' (दि० प० से०) णिजन्तः । क्तः (३।२।१०२) । 'वा दान्तशान्त–' (७।२।२७) इति साधुः । **'दान्तस्तु** दमितेऽपि स्यात्तपःक्लेशसहे त्रिषु' (इति मेदिनी) । यत्तु मुकुटेन–अणिजन्तस्य निपातनमुक्तम्–। तच्चिन्त्यम् । 'वा दान्त–' इत्यत्र 'णेः' इत्यनुवर्तनात् । अणिजन्तस्य 'यस्य विभाषा' (७।२।१५) इति नित्यनिषेधात् निपातं विनापि सिद्धत्वात् ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'कृतं दमनं यस्य वृषभादेस्तस्य'** ॥

शान्तः शमिते

शेति ॥ शम्यते स्म । 'शमु उपशमे' (दि० प० से०) ण्यन्तः । क्तः (३।२।१०२) ।—शान्तो रोगः । विवृत्त इत्यर्थः—इति यत् केवलस्य निपातनं मुकुटेन स्वीकृतम् । तच्चिन्त्यम् । 'वा दान्त–' इत्यत्र 'णेः' इत्यनुवर्तनात् । **'शान्तोऽ**तिमुक्तरसयोः पुंसि त्रिषु शमान्विते । अव्ययं धारणे **शान्तम्'** (इति मेदिनी) ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'शमनं प्रापितस्य'** ॥

प्रार्थितेऽर्दितः ॥ ९७ ॥

प्रेति ॥ प्रार्थ्यते स्म । 'अर्थ याच्ञायाम्' (चु०आ०से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ अर्द्यते स्म । 'अर्द गतौ याचने च' (भ्वा० प० से०) । क्तः (३।२।१०२) । **'अर्दितं** याचितेऽपि स्याद्वातव्याधौ च हिंसिते' (इति मेदिनी) ॥ (२) ॥*॥ द्वे **'याचितस्य'** ॥

ज्ञप्तस्तु ज्ञपिते

ज्ञेति ॥ ज्ञप्यते स्म । मारणादौ ज्ञा मित् । ण्यन्तः । क्तः (३।२।१०२) । 'वा दान्त–' (७।२।२७) इति साधुः ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'बोधं प्रापितस्य'** ॥

छन्नश्छादिते

केति ॥ छाद्यते स्म । 'छद अपवारणे' (चु० उ० से०) ।

१—'ओहाङः' के **'उद्धानम्'** इति 'ओ वै शोषणे' श्लसात् के **'उद्वानम्'** इति वा क्वचित्पाठः—इति मुकुटरहस्यम् । २—पूर्ववण्णिच् । पक्षे इडभावः णिलोपः—इति पाठस्य मुकुटपुस्तकेषु स्पष्टमुपलभ्यमानत्वेनेदं मुकुटखण्डनं प्रतारणापरमेव ॥

क्तः (३।२।१०२) । 'वा दान्त–' (७।२।२७) इति साधुः । **'छन्नं** रहश्छादितयोः' इति हैमः ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'आच्छादितस्य'** ॥

पूजितेऽञ्चितः ।

ष्विति ॥ पूज्यते स्म 'पूज पूजायाम्' (चु० प० से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ अञ्च्यते स्म । 'अञ्चु पूजायाम्' (भ्वा० प० से०) क्तः (३।२।१०२) । 'अञ्चेः पूजायाम्' (७।२।५३) इतीट् । 'नाञ्चेः पूजायाम्' (६।४।३०) इति नलोपाभवः ॥*॥ **'अर्चितः'** इति पाठे 'अर्च पूजायाम्' (भ्वा० प० से०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ द्वे **'पूजितस्य'** ॥

पूर्णस्तु पूरिते

ष्विति ॥ पूर्यते स्म । 'पूरी आप्यायने' (दि०आ०से०) । ण्यन्तः । क्तः (३।२।१०२) । 'वा दान्त–' (७।२।२७) इति साधुः । **'पूर्णः** कृत्स्ने पूरिते च' इति हैमः ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'पूर्णस्य'** ॥

क्लिष्टः क्लिशिते

क्लीति ॥ क्लिश्यते स्म । 'क्लिश विबाधने' (क्या० प० से०) । क्तः (२।२।१२२) । 'क्लिशः क्त्वानिष्ठयोः' (७।२।५२) इति वेट् ॥ (२) ॥*॥ द्वे **'प्राप्तक्लेशस्य'** ॥

अवसिते सितः ॥ ९८ ॥

अवेति ॥ अवस्यति स्म । अवसीयते स्म वा । 'षोऽन्तकर्मणि' (दि० प० से०) । क्तः (३।२।१२२) । 'द्यतिस्यति–' (७।४।४०) इतीत्वम् ॥ (१) ॥*॥ **'सित**स्त्ववसिते बद्धे वर्णे **सिता** तु शर्करा' इति हैमः ॥ (२) ॥*॥ द्वे **'समाप्तस्य'** ॥

मुष्टप्लुष्टोषिता दग्धे

ष्विति ॥ मुष्यते स्म । मुष्टे स्म । 'मुषु मुषु दाहे' (भ्वा० प० से०) । क्तः (३।२।१०२) । 'यस्य–' (७।२।१५) इति नेट् ॥ (१) ॥*॥ (२) ॥*॥ उष्यते स्म । 'उष दाहे' (भ्वा० प० से०) । क्तः (३।२।१०२) **'उषितं** व्युषिते प्लुष्टे' इति हैमः ॥ (३) ॥*॥ दह्यते स्म । 'दह भस्मीकरणे' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥ (४) ॥*॥ चत्वारि **'दग्धस्य'** ॥

तष्टत्वष्टौ तनूकृते ।

तेति ॥ तक्ष्यते स्म । त्वक्ष्यते स्म । 'तक्षू त्वक्षू तनूकरणे' (भ्वा० प० से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ (२) ॥*॥ अतनुस्तनुरकारि । 'कृञ्' (त० उ० से०) क्तः (३।२।१०२) ॥ (३) ॥*॥ त्रीणि **'तनूकृतस्य'** ॥

वेधितच्छिद्रितौ विद्धे

वेधीति ॥ वेध्यते स्म । 'विध विधाने' (तु० प० से०) ण्यन्तः । क्तः (३।२।१०२) ॥ (१) ॥*॥ छिद्र्यते स्म । 'छिद्र वेधे' (चु० उ० से०) । अदन्तः । क्तः (३।२।१०२) ॥ (२) ॥*॥ विध्यते स्म । 'व्यध ताडने' (दि० प० अ०) ॥ क्तः (३।२।१०२) । **'विद्धं** स्याद्वेधिते क्षिप्ते सदृशे बाधिते त्रिषु' इति विश्वः (मेदिनी) ॥ (३) ॥*॥ त्रीणि **'विद्धस्य'** ॥

विन्नवित्तौ विचारिते ॥ ९९ ॥

वीति ॥ विद्यते स्म । 'विद विचारणे' (रु० आ० अ०) । क्तः (३।२।१०२) । 'नुदविद–' (८।२।५५) इति वा नत्वम् यत्तु—'विभाषा गमहन–' (७।२।६८) इतीडविकल्पात् 'यस्य विभाषा' (७।२।१५) इतीडभावः—इत्युक्तं मुकुटेन । तच्च । अस्यानिट्त्वात् । **'विन्नं** विचारिते लब्धे' इति विश्वः (मेदिनी) ॥ (१) ॥*॥ **'वित्तं** क्लीबं धने, वाच्यलिङ्गं ख्याते विचारिते' इति (मेदिनी ॥ (२) ॥*॥ विचार्यते स्म । 'चर गतौ' (भ्वा० प० से०) ण्यन्तः । क्तः (३।२।१०२) ॥ (३) ॥*॥ त्रीणि **'प्राप्तविचारस्य'** ॥

निष्प्रभे विगतारोकौ

नीति ॥ निष्क्रान्ता प्रभास्मात् ॥ (१) ॥*॥ विगच्छति स्म । 'गम्लृ गतौ' (भ्वा० प० अ०) । 'गत्यर्था–' (३।४।७२) इति क्तः । **'विगतौ** वीतनिष्प्रभौ' इति रुद्रः ॥ (२) ॥*॥ रोचनम् । रोकः 'रुच दीप्तौ' (भ्वा० आ० से०) घञ् (३।३।१८) । न रोकोऽस्य ॥ (३) ॥*॥ त्रीणि **'दीप्तिहीनस्य'** ॥

विलीने विद्रुतद्रुतौ ।

वीति ॥ विलीयते स्म । 'लीङ् श्लेषणे' (दि० आ०अ०) । 'गत्यर्थ–' (३।४।७२) इति क्तः । 'स्वादय ओदितः' (दि० ग० सू०) इति नत्वम् (८।२।४५) ॥ (१) ॥*॥ विद्रवति स्म । 'द्रु गतौ (भ्वा० प० अ०) । 'गत्यर्था–' (३।४।७२) इति क्तः ॥ (२) ॥*॥ **'द्रुतं** शीघ्रविलीनयोः' इति हैमः ॥ (३) ॥*॥ त्रीणि **'स्वतःप्राप्तद्रवीभावस्य'** ॥

सिद्धे निर्वृत्तनिष्पन्नौ

सीति ॥ सिध्यति स्म । 'षिधु संराद्धौ' (दि० प० अ०) । 'गत्यर्था—' (३।४।७२) इति क्तः । **'सिद्धो** व्यासादिके देवयोनौ निष्पन्नमुक्तयोः । नित्ये प्रसिद्धे' इति हैमः ॥ (१) ॥*॥ निर्वर्तते स्म । 'वृतु वर्तने' (भ्वा० आ० से०) । क्तः (३।४।७२) ॥ (२) ॥*॥ निष्पद्यते स्म । 'पद गतौ' (दि० आ० अ०) । क्तः (३।४।७२) ॥ (३) ॥*॥ त्रीणि **'सिद्धस्य'** ॥

दारिते भिन्नभेदितौ ॥ १०० ॥

देति ॥ दार्यते स्म । 'दृ विदारणे' (क्या० प० से०) ण्यन्तः । क्तः (३।२।१०२) ॥ (१) ॥*॥ भिद्यते स्म । 'भिदिर् विदारणे' (रु० उ० अ०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ चुरादिण्यन्तः । क्तः (३।२।१०२) ॥ (३) ॥*॥ त्रीणि **'भेदं प्रापितस्य'** ॥

ऊतं स्यूतमुतं चेति त्रितयं तन्तुसंतते ।

विती ॥ ऊय्यते स्म । 'ऊयी तन्तुसंताने' (भ्वा० आ० से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ सीव्यते स्म । 'षिवु तन्तुसंताने' (दि० प० से०) । क्तः (३।२।१०२) 'च्छ्वोः–' (६।४।१९) इति । यत्तु–'षिवु तन्तुसंताने' दीर्घादिः । 'च्छ्वोः–' इत्यूठ् । वलि लोपः । स्यूतम्—इति मुकुटेनोक्तम् । तदसंबद्धम् । दीर्घादित्वस्य बाधात् । वस्योठि कृते वलिलोपासंभवाच्च । **'स्यूतिः** सीवनसंतत्योः स्त्रियां **स्यूतः** प्रसेवके । (ना त्रिषूते)' (इति मेदिनी) ॥ (२) ॥*॥ ऊयते स्म । 'वेञ् तन्तुसंताने' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥ (३) ॥*॥ संतन्यते स्म । क्तः (३।२।१०२) । तन्तुभिः संततम् 'कर्तृकरणे–' (२।१।३३) इति समासः ॥ (४) ॥*॥ चत्वारि **'तन्तुसंततेः** ॥

स्यादर्हिते नमस्कृत-
नमसितमपचायितार्चितापचितम् ॥ १०१ ॥

स्येति ॥ अर्च्यते स्म । 'अर्ह पूजायाम्' (भ्वा० प० से०) क्तः (३।२।१०२) ॥ (१) ॥*॥ नमः कृतम् । 'नमोवरि–' (३।१।१९) इति क्यच् । क्तः (३।२।१०२) ॥ (२) ॥*॥ 'क्यस्य विभाषा' (६।४।५०) इति यलोपः ॥ (३) ॥*॥ अपचायते स्म । 'चायृ पूजानिशामनयोः' (भ्वा० उ० से०) । क्तः (३।२।१०२) ॥ (४) ॥*॥ अर्च्यते स्म । 'अर्च पूजायाम्' (भ्वा० प० से०) । क्तः (३।२।१०२) ॥ (५) ॥*॥ 'चायतेश्चिः' इति चिभावः ॥ (६) ॥*॥ षट् **'नमस्कृतस्य'** ॥

वरिवसिते वरिवस्यितमुपासितं चोपचरितं च ।

वेति ॥ वरिवः कृते । 'नमोवरिवः–' (३।१।१९) इति क्यच् । क्तः । (३।२।१०२) । 'क्यस्य विभाषा' (६।४।५०) ॥ (१) ॥*॥ (२) ॥*॥ उपास्यते स्म । 'आस उपवेशने' (अ० आ० से०) । क्तः (३।२।१०२) ॥ (३) ॥*॥ उपचर्यते स्म । चरेः क्तः (३।२।१०२) ॥ (४) ॥*॥ चत्वारि **'पूजितस्य** ॥

संतापितसंतप्तौ धूपितधूपायितौ च दूनश्च ॥ १०२ ॥

समिति ॥ संताप्यते स्म । 'तप दाहे' चुरादिः । क्तः (३।२।१०२) ॥ (१) ॥*॥ तप्यते स्म । 'तप संतापे' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ धूप्यते स्म । 'धूप संतापे' (भ्वा० प० से०) । 'आयादयः–' (३।१।३१) इति वा आयः । क्तः (३।२।१०२) ॥ (३) ॥*॥ (४) ॥*॥ दूयसे स्म । 'टुदु उपतापे' (स्वा० प० अ०) । क्तः (३।२।१०२) । 'दुग्वोर्दीर्घश्च' (वा० ८।४।४४) इति नत्वम् ॥ (५) ॥*॥ एभ्योऽकर्मकेभ्यः कर्तरि क्तेऽप्येतान्येव रूपाणि ॥*॥ पञ्च **'संतापितस्य'** ॥

हृष्टे मत्तस्तृप्तः प्रहृष्टः प्रमुदितः प्रीतः ।

हृति ॥ हर्षति स्म । 'हृषु अलीके' (भ्वा० प० से०) । हृष्यति वा । 'हृष तुष्टौ' (दि० प० से०) । क्तः (३।४।७२) । 'हृषेर्लोमसु' (७।२।२९) इति विकल्पेट्कत्वात् 'यस्य विभाषा' (७।२।१५) इति नेट् । **'हृष्टो** रोमाञ्चितेऽपि च । जातहर्षे प्रतिहृते विस्मितेऽप्यभिधेयवत्' (इति मेदिनी) (१) ॥*॥ माद्यति स्म । 'मदी हर्षे' (दि० प० से०) । क्तः (३।४।७२) । 'न ध्याख्या–' (८।२।५७) इति नत्वं न ॥ (२) ॥*॥ तृप्यति स्म । 'तृप प्रीणने' (दि० प० अ०) । क्तः (३।४।७२) ॥ (३) ॥*॥ प्रह्लाद्यते स्म । 'ह्लादी सुखे च' (भ्वा० आ० से०) । क्तः (३।४।७२) 'रदाभ्याम्–' (८।२।४२) इति नत्वम् । 'ह्लादो निष्ठायाम्' (६।४।९५) इति ह्रस्वः ॥ (४) ॥*॥ प्रमोदते स्म । 'मुदं हर्षे' (भ्वा० आ० से०) । क्तः (३।४।७२) ॥ (५) ॥*॥ प्रीयते स्म । 'प्रीङ् प्रीणने' (दि० आ० अ०) । क्तः (३।४।७२) ॥ (६) ॥*॥ षट् **'प्रमुदितस्य'** ॥

छिन्नं छातं लूनं कृत्तं दातं दितं छितं वृक्णम् १०३

छीति ॥ छिद्यते स्म । 'छिदिर् द्वैधीकरणे' (रु० उ० अ०)। क्तः (३।२।१०२) । **'छिन्नं** कृत्ते त्रिलिङ्गं स्याद्भुङ्ग्यामपि योषिति' (इति मेदिनी) ॥ (१) ॥*॥ छायते स्म । 'छो छेदने' (दि० प० अ०) । क्तः (३।२।१०२) । 'शाच्छोरन्यतरस्याम्' (७।४।४१) इतीत्वं वा ॥ (२) ॥*॥ (७) ॥*॥ लूयते स्म । 'लूञ् छेदने' (क्या० उ० से०) । क्तः (३।२।१०२) । 'ल्वादिभ्यः' (८।२।४४) इति नत्वम् ॥ (३) ॥*॥ कृत्यते स्म । 'कृती छेदने' (तु० प० से०) । क्तः (३।२।१०२) ॥ (४) ॥*॥ दायते स्म । 'दाप् लवने' (अ० प० अ०) । क्तः (३।२।१०२) ॥ (५) ॥*॥ दीयते स्म । 'दो अवखण्डने' (दि० प० अ०) । क्तः (३।२।१०२) । 'यतिस्यति–' (७।४।४०) इतीत्वम् ॥ (६) ॥*॥ वृश्च्यते स्म । 'ओव्रश्चू छेदने' (तु० प० से०) । क्तः (३।२।१०२) ॥ (८) ॥*॥ अष्टौ **'खण्डितस्य** ॥

स्रस्तं ध्वस्तं भ्रष्टं स्कन्नं पन्नं च्युतं गलितम् ।

स्रेति ॥ स्रस्यते स्म । ध्वस्यते स्म । भ्रश्यते स्म । 'स्रंसु ध्वंसु भ्रंशु अवस्रंसने' (भ्वा० आ० से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ (२) ॥*॥ (३) ॥*॥ स्कद्यते स्म । 'स्कन्दिर् गत्यादौ' (भ्वा० प० से०) । क्तः (३।२।१०२) ॥ (४) ॥*॥ पद्यते

१—इदं तु न वार्तिकम् । नापि सूत्रम् । किंतु 'अपन्वितश्च' (७।२।३ ०) इति निपातनलभ्यमिदम् ॥

१—प्रतिहृते यथा—'शीतहृष्टरदनैः सवेपथुः' इत्यनेकार्थकैरवाकरकौमुदी ॥ २—ह्लादते इति विग्रहस्तु न कर्तरि भवति । भौवादिकत्वात् ॥ किंतु ह्लादते इत्युन्नितम् ॥

स्म । 'पद गतौ' (दि० आ० अ०) । क्तः (३।२।१०२) ॥ (५) ॥*॥ च्यूयते स्म । 'च्युङ् गतौ' (भ्वा० आ० अ०) । क्तः (३।२।१०२) ॥ (६) ॥*॥ गल्यते स्म । 'गॅल अदने' (चु० उ० से०) । क्तः (३।२।१०२) ॥ (७) ॥*॥ एभ्यो 'गत्यर्थाकर्मक–' (३।४।७२) इति कर्तरि क्ते एतान्येव रूपाणि ॥*॥ सप्त **'च्युतस्य'** ॥

लब्धं प्राप्तं विन्नं भावितमासादितं च भूतं च १०४

लेति ॥ लभ्यते स्म । 'डुलभष् प्राप्तौ' (भ्वा० आ० अ०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ प्राप्यते स्म । 'आपॢ व्याप्तौ' (स्वा० प० अ०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ विद्यते स्म । 'विदॢ लाभे' (तु० उ० अ०) । क्तः (३।२।१०२) ॥ (३) ॥*॥ भाव्यते स्म । 'भू प्राप्तौ' (चु० आ० से०) । 'आधृषाद्वा' (चु० ग० सू०) इति णिजन्तः । क्तः (३।२।१०२) ॥ (४) ॥*॥ (६) ॥*॥ आसाद्यते स्म । 'षदॢ विशरणादौ' (तु० प० अ०) ण्यन्तः । क्तः (३।२।१०२) ॥ (५) ॥*॥ षट् **'प्राप्तस्य'** ॥

अन्वेषितं गवेषितमन्विष्टं मार्गितं मृगितम् ।

अन्वयिति ॥ अन्वेष्यते स्म । 'एषॄ गतौ' (भ्वा० आ० से०) । 'इषिः' (दि० प० से०) ण्यन्तो वा । क्तः (३।२।१०२) ॥ (१) ॥*॥ गवेष्यते स्म । 'गवेष मार्गणे' (चु० उ० से०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ अन्विष्यते स्म । 'इषु इच्छायाम्' (तु० प० से०) । क्तः (३।२।१०२) ॥ (३) ॥*॥ मार्ग्यते स्म । 'मार्ग अन्वेषणे' (चु० उ० से०) । क्तः (३।२।१०२) ॥ (४) ॥*॥ मृग्यते स्म । 'मृग अन्वेषणे' (चु० आ० से०) । क्तः (३।२।१०२) ॥ (५) ॥*॥ पञ्च **'गवेषितस्य'** ॥

आर्द्रं सार्द्रं क्लिन्नं तिमितं स्तिमितं समुन्नमुत्तं च ॥ १०५ ॥

आर्द्रमिति ॥ अर्द्यते स्म । 'अर्द गतौ' (भ्वा० प० से०) । 'अर्देर्दीर्घश्च' (उ० २।१८) इति रक् । **'आर्द्रा** नक्षत्रभेदे स्यात्स्त्रियां क्लिन्नेऽभिधेयवत्' (इति मेदिनी) ।—उपसर्गाद्गतेर्डः । पूर्वपदस्य नैरुक्तो रेफः । आङ्पूर्वादर्देः (आ अर्द्यते इति विग्रहे) 'स्फायितञ्चि–' इति रकि वा आर्द्रम्—इति मुकुटस्तूक्तसूत्रादर्शनमूलकः ॥ (१) ॥*॥ सहार्द्रत्वेन ॥ (२) ॥*॥ क्लिद्यति स्म । 'क्लिदॄ आर्द्रीभावे' (दि० प० से०) । अकर्मकत्वात्कर्तरि क्तः (३।४।७२) ॥ (३) ॥*॥ तिम्यति स्म । स्तिम्यति स्म । 'तिम ष्टीम आर्द्रीभावे' (दि० प० से०) । अकर्मकत्वात्कर्तरि क्तः (३।४।७२) । **'स्तिमितस्तरले क्लिन्ने'** इति रुद्रः ॥ (४) ॥*॥ (५) ॥*॥ समुन्नत्ति स्म । 'उन्दी क्लेदने' (रु० प० से०) । अकर्मकत्वात् क्तः (३।४।७२) । 'नुदविद–' (८।२।५५) इति वा नत्वम् ॥ (६) ॥*॥ (७) ॥*॥ सप्त **'क्लिन्नस्य'** ॥

त्राणं त्रातं रक्षितमवितं गोपायितं च गुप्तं च ।

त्रेति ॥ त्रायते स्म । 'त्रैङ् पालने' (भ्वा० आ० अ०) । क्तः (३।२।१०२) । 'नुदविद–' (८।२।५५) इति वा नत्वम् । **'त्राणं** त्राते रक्षणे च त्रायमणौषधावपि' इति हैमः ॥ (१) ॥*॥ (२) ॥*॥ रक्ष्यते स्म । 'रक्ष पालने' (भ्वा० प० से०) । क्तः (३।२।१०२) ॥ (३) ॥*॥ अव्यते स्म । 'अव रक्षणादौ' (भ्वा० प० से०) । क्तः (३।२।१०२) ॥ (४) ॥*॥ गोपाय्यते स्म । 'गुपू रक्षणे' (भ्वा० प० से०) । 'आयादय आर्धधातुके वा' (३।१।३१) । क्तः (३।२।१०२) (५) ॥*॥ गुप्यते स्म । क्तः (३।२।१०२) । **'गुप्तं** गूढे त्राते' इति हैमः ॥ (६) ॥*॥ षट् **'रक्षितस्य'** ॥

अवगणितमवमतावज्ञाते अवमानितं च परिभूते ॥ १०६ ॥

अवेति ॥ अवगण्यते स्म । 'गण संख्याने' (चु० उ० से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ अवमन्यते स्म । 'मन ज्ञाने' (दि० आ० अ०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ अवज्ञायते स्म । क्तः (३।२।१०२) ॥ (३) ॥*॥ अवमान्यते स्म । 'मान पूजायाम्' (भ्वा० आ० से०) । क्तः (३।२।१०३) ॥ (४) ॥*॥ परिभूयते स्म । क्तः (३।२।१०२) ॥ (५) ॥*॥ पञ्च **'अवमानितस्य'** ॥

त्यक्तं हीनं विधुतं समुज्झितं धूतमुत्सृष्टम् ।

त्येति ॥ त्यज्यते स्म । 'त्यज हानौ' (भ्वा० प० अ०) । क्तः (३।०।१०२) ॥ (१) ॥*॥ हीयते स्म । 'ओहाक् त्यागे' (जु० प० अ०) । क्तः (३।२।१०२) । 'धुमास्था–' (६।४।६६) इतीत्वम् ॥ (२) ॥*॥ विधूयते स्म । 'धूञ् कम्पने' (स्वा० उ० अ०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ समुज्झ्यते स्म । 'उज्झ उत्सर्गे' (तु० प० से०) । क्तः (३।२।१०२) ॥ (४) ॥*॥ धूयते स्म । 'धू विधूनने' (तु० प० से०) । क्तः (३।२।१०२) । **'धूतौ** कम्पितभर्त्सितौ' इति हेमचन्द्रः ॥ (५) ॥*॥ उत्सृज्यते स्म । 'सृज विसर्गे' (तु० प० अ०) । क्तः (३।२।१०२) ॥ (६) ॥*॥ षट् **'उत्सृष्टस्य'** ॥

उक्तं भाषितमुदितं जल्पितमाख्यातमभिहितं लपितम् ॥ १०७ ॥

उक्तमिति ॥ उच्यते स्म । 'वच परिभाषणे' (अ० प० अ०) । ब्रूञो वचिः, वा । क्तः (३।२।१०२) ॥ (१) ॥*॥ भाष्यते स्म । 'भाष व्यक्तायां वाचि' (भ्वा० आ० से०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ उद्यते स्म । 'वद व्यक्तायां वाचि' (भ्वा० प० से०) । क्तः (३।२।१०२) ॥ (३) ॥*॥

१—अस्यात्रोल्लेखोऽसंगतः । गत्यर्थकत्वासंभवात् । तस्मात् 'गल स्रवणे' (चु० आ० से०) इति लेखनीयम् ॥

जल्प्यते स्म । 'जल्प व्यक्तायां वाचि' (भ्वा० प० से०) क्तः (३।२।१०२) ॥ (४) ॥*॥ आख्यायते स्म । 'ख्या प्रकथने' (अ० प० अ०) । चक्षिङ आदेशो वा । क्तः (३।२।१०२) ॥ (५) ॥*॥ अभिधीयते स्म । क्तः (३।२।१०) । 'दधातेर्हिः' (७।४।४२) ॥ (६) ॥*॥ लप्यते स्म, 'लप व्यक्तायां वाचि' (भ्वा० प० से०) क्तः (३।२।१०२) ॥ (७) ॥*॥ सप्त **'उक्तस्य'** ॥

बुद्धं बुधितं मनितं विदितं प्रतिपन्नमवसितावगते ।

बुद्धमिति ॥ बुध्यते स्म । 'बुध अवगमने' (दि० आ० अ०) । क्तः (३।२।१०२) । **'बुद्धः** पण्डिते बोधिते जिने' इति हैमः ॥ (१) ॥*॥ भ्वादिः सेट्कः ॥ (२) ॥*॥ मन्यते स्म । 'मनु अवबोधने' (त० आ० से) । क्तः (३।२।१०२) । 'यस्य विभाषा' (७।२।१५) इति निषेधस्यानित्यत्वादिट् । तदनित्यत्वे च 'कृती छेदने' (तु० प० से०) इतीदित्करणं लिङ्गम् । अन्यथा 'सेऽसिचि–' (७।२।५७) इति वेट्कत्वात्सिद्धे किं तेन । यद्वा 'मन च' इति भ्वादिः 'मनिन्' —बोपदेवः पठति । स सेट् ॥ (३) ॥*॥ विद्यते स्म 'विद ज्ञाने' (अ० प० से०) । क्तः (३।२।१०२) ॥ (४) ॥*॥ प्रतिपद्यते स्म । 'पद गतौ' (दि० आ० अ०) । क्तः (३।२।१०२) ॥ (५) ॥*॥ अवसीयते स्म । 'षो अन्तकर्मणि' (दि० प० अ०) । क्तः (३।२।१०२) । 'द्यतिस्यति–' (७।४।४०) इतीत्त्वम् ॥ (६) ॥*॥ अवगम्यते स्म । 'गम्लृ गतौ' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥ (७) ॥*॥ सप्त **'अवगतस्य'** ॥

ऊरीकृतमुररीकृतमङ्गीकृतमाश्रुतं प्रतिज्ञातम् ॥१०८॥
संगीर्णविदितसंश्रुतसमाहितोपश्रुतोपगतम् ।

ऊरीकृतमिति ॥ ऊरी क्रियते स्म । क्तः (३।२।१०२) ॥ (१) ॥*॥ उररी क्रियते स्म । क्तः (३।२।१०२) ॥ (२) ॥*॥ अनङ्गमङ्गमकारि । क्तः (३।२।१०२) ॥ (३) ॥*॥ आश्रूयते स्म । 'श्रु श्रवणे' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥ (४) ॥*॥ प्रतिज्ञायते स्म । क्तः (३।२।१०२) ॥ (५) ॥*॥ संगीर्यते स्म । 'गृ निगरणे' (तु० प० से०) क्तः (३।२।१०२) ॥ (६) ॥*॥ विद्यते स्म । 'विद ज्ञाने' (अ० प० से०) क्तः (३।२।१०२) । (**'विदितं** बुधिताश्रुतयोः' इति मेदिनी) ॥ (७) ॥*॥ संश्रूयते स्म । क्तः (३।२।१०२) ॥ (८) ॥*॥ समाधीयते स्म । क्तः (३।२।१०२) 'दधातेर्हिः' (७।४।४२) ॥ (९) ॥*॥ उपश्रूयते स्म (३।२।१०२) ॥ (१०) ॥*॥ उपगम्यते स्म । क्तः (३।२।१०२) ॥ (११) ॥*॥ एकादश **'अङ्गीकृतस्य'** ॥

ईलितशस्तपणायितपनायितप्रणुतपणितपनितानि ॥ १०९ ॥
अपि गीर्णवर्णिताभिष्टुतेडितानि स्तुतार्थानि ।

ईलीति ॥ ईड्यते स्म । 'ईड स्तुतौ' (अ० आ० से०) । क्तः (३।२।१०२) । डलयोरैक्याद्वा लः ॥ (१) ॥*॥ (११) ॥*॥ शस्यते स्म 'शंसु स्तुतौ' (भ्वा० प० से०) । क्तः (३।२।१०२) **'शस्तं** क्षेमे प्रशस्ते च' इति हैमः ॥ (२) ॥*॥ पणाय्यते स्म । 'पण व्यवहारे स्तुतौ च' (भ्वा० आ० से०) । आयो वा (३।१।३१) । क्तः (२।३।१०२) ॥ (३) ॥*॥ (६) ॥*॥ पनाय्यते स्म । 'पन च' (भ्वा० आ० से०) आयो वा (३।१।३१) । क्तः (३।२।१०२) ॥ (४) ॥*॥ (७) ॥*॥ प्रणूयत स्म । 'णु स्तुतौ' (अ० प० से०) । क्तः (३।२।१०२) ॥ (५) ॥*॥ गीर्यते स्म । 'गृ शब्दे' (क्या० प० से०) क्तः (३।२।१०२) ॥ (८) ॥*॥ वर्ण्यते स्म । 'वर्ण वर्णक्रियाविस्तारगुणवचनेषु' (चु० उ० से०) क्तः (३।२।१०२) ॥ (९) ॥*॥ अभिष्टूयते स्म । 'ष्टुञ् स्तुतौ' (अ० उ० अ०) । क्तः (३।२।१०२) ॥ (१०) ॥*॥ स्तुतमर्थो येषां तानि ॥ (१२) ॥*॥ द्वादश **'स्तुतार्थानि** ॥

भक्षितचर्वितलिप्तप्रत्यवसितगिलितखादितप्सातम् ॥११०॥
अभ्यवहृताश्नजग्धग्रस्तग्लस्ताशितं भुक्ते ।

भेति ॥ भक्ष्यते स्म । 'भक्ष अदने' (चु० प० से०) । क्तः (३।२।१०२) ॥ (१) ॥*॥ चर्व्यते स्म । 'चर्व अदने' (भ्वा० प० से०) । क्तः (३।२।१०२) ॥ (२) ॥*॥ लिप्यते स्म । 'लिप उपदेहे' (तु० उ० से०) क्तः (३।२।१०२) ॥*॥ क्वचित्तु **'लीढम्'** इति पाठः । तत्र 'लिह आस्वादने' (अ० उ० अ०) धातुः ॥ (३) ॥*॥ प्रत्यवसीयते स्म । 'षो अन्तकर्मणि' (दि० प० अ०) । क्तः (३।२।१०२) ॥ (४) ॥*॥ —गीर्यते स्म । 'गृ निगरणे' (तु० प० से०) क्तः (३।२।१०२) । 'अचि विभाषा' (८।२।२१) इति वा लत्वम्—इति स्वामी । तत्र 'श्युकः किति' (७।२।११) इतीण्निषेधप्रसङ्गात् । गरणम् । गिलिः । 'इक्रृष्यादिभ्यः' (वा० ३।३।१०८) । 'अचि–' (८।२।२१) इति वा लत्वम् । गिलिर्जातास्य । तारकादिः (५।२।३६) ॥ (५) ॥*॥ खाद्यते स्म । 'खाद भक्षणे' (भ्वा० प० से०) । क्तः (३।२।१०२) ॥ (६) ॥*॥ प्सायते स्म 'प्सा भक्षणे' (अ० प० अ०) ॥ (७) ॥*॥ अभ्यवहियते स्म । क्तः (३।२।१०२) ॥ (८) ॥*॥ अद्यते स्म । क्तः (३।२।१०२) 'अदोऽनन्ने' (३।२।६८) इति ज्ञापकाज्ज-ग्धिर्वा ॥ (९) ॥*॥ (१०) ॥*॥ ग्रस्यते स्म । ग्लस्यते स्म । 'ग्रसु ग्लसु अदने' (भ्वा० आ० से०) । क्तः (३।२।१०२) ॥ (११) ॥*॥ (१२) ॥*॥ अश्यते स्म । 'अश भोजने' (क्र्या० प० से०) । क्तः (३।२।१०२) ॥ (१३) ॥*॥ भुज्यते स्म । 'भुज पालनाभ्यवहारयोः' (रु० प० अ०) क्तः (३।२।१०२) ॥ (१४) ॥*॥ चतुर्दश **'खादितस्य'** ॥

क्षेपिष्ठक्षोदिष्ठप्रेष्ठवरिष्ठस्थविष्ठबंहिष्ठाः ॥ १११ ॥
क्षिप्रक्षुद्राभीप्सितपृथुपीवरबहुप्रकर्षार्थाः ।

क्षेपीति ॥ अतिशयेन क्षिप्रः । इष्ठन् (५।३।५५) ।

'स्थूलदूर–' (६।४।५६) इति साधुः ॥ (१) ॥*॥ अतिशयेन क्षुद्रः । पूर्ववत् (५।३।५५) (६।४।५६) ॥ (१) ॥*॥ अतिशयेन प्रियः । 'प्रियस्थिर–' (६।४।५७) इति साधुः ॥ (१) ॥*॥ अतिशयेन उरुः । पूर्ववत् (६।४।५७) ॥ (१) ॥*॥ अतिशयेन स्थूलः । 'स्थूलदूर–' (६।४।५६) इति साधुः ॥ (१) ॥*॥ अतिशयेन बहुलः । 'प्रियस्थिर–' (६।४।५७) इति साधुः ॥ (१) ॥*॥ 'पीवर' इति पाठस्त्वयुक्तः । छन्दोभङ्गात् । 'पीव' इति पाठे नान्तो युक्तः ॥*॥ क्षेपिष्ठादीनां क्षिप्रादिभिर्यथासंख्यं ज्ञेयम् ॥*॥ एकैकम् **'क्षिप्रादीनाम्'** ॥

साधिष्ठद्राघिष्ठस्फेष्ठगरिष्ठह्रसिष्ठवृन्दिष्ठाः ॥११२॥
बाढव्यायतबहुगुरुवामनवृन्दारकातिशये ।

सेति ॥ अतिशयेन बाढः इष्ठन् (५।३।५५) । 'अन्तिकबाढयोर्नेदसाधौ' (५।३।६३) ॥ (१) ॥*॥ अतिशयेन दीर्घः । 'प्रियस्थिर–' (६।४।५७) इति साधुः ॥ (१) ॥*॥ अतिशयेन स्थिरः । पूर्ववत् (६।४।५७) ॥ (१) ॥*॥ अतिशयेन गुरुः । पूर्ववत् (६।४।५७) ॥ (१) ॥*॥ अतिशयेन ह्रस्वः । 'स्थूल–' (६।४।५६) इति साधुः ॥ (१) ॥*॥ अतिशयेन वृन्दारकः । 'प्रियस्थिर–' (६।४।५७) इति साधुः ॥ (१) ॥*॥ साधिष्ठादीनां बाढादिभिर्यथासंख्यं बोध्यम् ॥*॥ एकैकम् **'बाढादीनाम्'** ॥

॥ इति विशेष्यनिघ्नवर्गविवरणम् ॥

प्रकृतिप्रत्ययाद्यर्थाद्यैः संकीर्णे लिङ्गमुन्नयेत् ।

प्रेति ॥ संकीर्णार्थैः संकीर्णलिङ्गैश्चारब्धत्वासंकीर्णे वर्गे प्रकृत्यर्थादिभिर्लिङ्गमूहेत । यथा 'अपरस्परः' । अयं हि लिङ्गविशेषाभिधायिप्रत्ययस्याविधानात्प्रकृतिः । अस्य च 'परवल्लिङ्गम्–' (२।४।२६) इत्यतिदेशात्परशब्दस्येव लिङ्गं भवति । परशब्दस्य च सर्वनामत्वान्त्रिलिङ्गत्वम् । न च 'द्वन्द्वे च' (१।१।३१) इति निषेधः । तस्य समुदायविषयत्वेनावयवविषयत्वाभावात् । यत्तु—अयं हि विभक्तिप्रकृतित्वात्प्रकृतिः–इति मुकुटेनोक्तम् । तन्न । एवं सति सर्वत्र प्रकृत्यर्थेनैव लिङ्गनिर्णये प्रत्ययार्थेन लिङ्गनिर्णयाभिधानस्य वैयर्थ्यप्रसङ्गात् । प्रत्ययार्थेन यथा—शान्तिः । स्त्रियां क्तिनो विधानात् । विधूननम् । नपुंसके ल्युटो विहितत्वात् । आद्यशब्देन रूपभेदादिग्रहः । रूपभेदेन कर्मादेः । क्लीबत्वादि । साहचर्येण डिम्बादेः पुंस्त्वादि । यद्वा भिन्नजातीयेन लिङ्गेन संसर्गे सति अत्र वर्गे वर्गान्तरे च प्रकृत्यर्थाद्यैर्लिङ्गं ज्ञेयम् । लिङ्गसंग्रहे वक्ष्यमाणमपि लिङ्गमुन्नेयत्वेनेहोक्तम् ॥

कर्म क्रिया

केति ॥ क्रियते । कृञो भावे कर्मणि च मनिन् (उ० ४।१४५) । **'कर्म** व्याप्ये क्रियायां च पुंनपुंसकयोर्मतम्' इति रुद्रः ॥ (१) ॥*॥ 'श च' (३।३।१००) । 'रिङ् शयग्लिङ्क्षु' (७।४।२८) । 'अचि श्नु–' (६।४।७७) इतीयङ् ॥ (२) ॥*॥ द्वे **'क्रियायाः'** ॥

तत्सातत्ये गम्ये स्युरपरस्पराः ॥१॥

तेति ॥ तत्सातत्ये क्रियायाः क्रियावतां च नैरन्तर्ये ॥*॥ 'अपरे च परे च' इति द्वन्द्वः । 'अपरस्पराः क्रियासातत्ये' (६।१।१४४) इति सुञ्निपात्यते । क्रियासातत्ये 'अपरस्परं गच्छन्ति' । 'निर्दिष्टं कर्मसातत्ये सुधीभिरपरस्परम्' इति भागुरिः । क्रियावतां सातत्ये तु लिङ्गत्रयम् । 'अपरस्पराः सार्थाः स्त्रियश्चागच्छन्ति' । 'अपरस्पराणि कुलानि' ॥ (१) ॥*॥ एकं **'नैरन्तर्येण क्रियायाः क्रियावतश्च'** ॥

साकल्यासङ्गवचने पारायणतुरायणे ।

सेति ॥ साकल्यं च आसङ्गश्च । तौ वक्तः वचेः कर्तरि ल्युट् (३।३।११३) ॥*॥ पारस्य अयनम् । 'पूर्वपदात्–' (८।४।३) इति णत्वम् ।—क्लीबलिङ्गमेव—इत्येके ॥*॥ 'परायणम्' इति वा पाठः । परमयनम् । 'आश्रये तत्पराभीष्टे **परायणपदं** विदुः' इति शाश्वतः ॥ (१) ॥*॥ तोतोर्ति । 'तुर त्वरणे' (जु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । तुरस्यायनम् । यत्तु—त्वरणम् । तुरणं वा । तुः तुरा आसमन्तादयनम्—इति स्वामिमुकुटौवाहतुः । तन्न । अन्तर्वर्तिविभक्त्या पदान्तत्वेन 'वोंरुपधायाः–' (८।२।७६) इति दीर्घप्रसङ्गात् ॥ (१) ॥*॥ एकैकम् **'साकल्यासङ्गवचनयोः'** ॥

यदृच्छा स्वैरिता

येति ॥ ऋच्छनम् । ऋच्छा । 'ऋच्छ गत्यादौ' (तु० प० से०) । 'गुरोश्च हलः' (३।३।१०४) इत्यप्रत्ययः । या ऋच्छा । 'विशेषणम्–' (२।१।५७) इति समासः ॥ (१) ॥*॥ स्वेनेरितुं शीलमस्य । 'सुप्यजातौ–' (३।२।७८) इति णिनिः । स्वैरिणो भावः । 'तस्य भावः–' (५।१।११९) इति तल् ॥ (२) ॥*॥ द्वे **'स्वातन्त्र्यस्य'** ॥

हेतुशून्या त्वास्था विलक्षणम् ॥ २ ॥

हयिति ॥ हेतुना कारणेन शून्या आस्था स्थितिः ॥*॥ विगतं लक्षणमालोचनं यत्र । **'विलक्षणं** मतं स्थानं यद्धवेन्निष्प्रयोजनम्' इति भागुरिः ॥ (१) ॥*॥ एकम् **'हेतुशून्यास्थायाः'** ॥

१—'रङ्गपारायणं नाम लङ्केयं मम मैथिलि' इति भट्टिः–इति मुकुटः । २—यथाक्रमं साकल्यवचनं पारायणम् । 'आसङ्गवचनं परायणम्' इति मुकुटग्रन्थतः 'तुरायण' शब्दस्य तत्रोल्लेखाभावध्वननेन तन्नामलेखनमसंगतमेव । अत एव पीयूषव्याख्यायामपि—क्वचित्परायणस्थाने तुरायणम् इतीच्छन्ति । अजहल्लिङ्गे । 'अथ मोहपरायणा सती' इति दर्शनात्त्रिषु, इति कश्चित्—इत्युक्तम् ॥

शमथस्तु शमः शान्तिः

शेति ॥ शमनम् । 'शमु उपशमे' (दि० प० से०) । 'शमादिभ्योऽथच्' ॥ (१) ॥*॥ 'भावे' (३।३।१८) इति घञ् । 'नोदात्तोपदेश–' (७।४।३३) इति वृद्ध्यभावः ॥ (२) ॥*॥ 'स्त्रियां क्तिन्' (३।३।९४) । 'अनुनासिकस्य' (६।४।११५) इति दीर्घः ॥ (३) ॥*॥ त्रीणि **'कामक्रोधाद्यभावस्य'** ॥

दान्तिस्तु दमथो दमः ।

देति ॥ दमनम् । 'दमु उपशमे' (दि० प० से०) । (पूर्ववत्प्रक्रिया) ॥ त्रीणि **'तपःक्लेशसहनस्य'** ॥

'अवदानं कर्मवृत्तम्'

अवेति ॥ 'दैप् शोधने' (भ्वा० प० अ०) । भावे ल्युट् (३।३।११४) ॥*॥ क्वचित् **'अपदानम्'** इति पाठः ॥ (१) ॥*॥ वर्तनम् । 'वृतु वर्तने' (भ्वा० आ० से०) । भावे क्तः (३।३।११४) । कर्मणः कर्मणि वा वृत्तम् ॥ (२) ॥*॥ द्वे **'प्रशस्तकर्मणः'** ॥

काम्यदानं प्रवारणम् ॥ ३ ॥

केति ॥ कामोऽस्ति यत्र । 'अन्यत्रापि–' (वा० ५।२।१२०) इति यप् ।—हिमादित्वाद्यप्—इति मुकुटस्त्वपाणिनीयः । यद्वा काम्यते । 'कमु कान्तौ' (भ्वा० आ० से०) । 'अचो यत्' (३।१।९७) काम्येनेच्छया, काम्यस्य वरस्त्रीहस्त्यश्वादेर्वा, दानम् ॥ (१) ॥*॥ प्रव्रियते । 'वृञ् वरणे' चुरादिः । ल्युट् (३।३।११५) । 'प्रवारणं **महादानम्**' इति त्रिकाण्डशेषः । (**'प्रवारणं** निषेधे स्यात्काम्यदाने च न द्वयोः' इति मेदिनी) ॥ (२) ॥*॥ द्वे **'काम्यदानस्य'** ॥

वशक्रिया संवनन[३]म्

वेति ॥ वशस्य करणम् । 'कृञः श च' (३।३।१००) ॥ (१) ॥*॥ संपूर्वः 'वनु याचने' (त० आ० से०) इति वशीकरणार्थः ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'वशीकरणस्य'** ॥

मूलकर्म तु कार्मणम् ।

मिति ॥ ओषध्यादिमूलेन कर्म ॥ (१) ॥*॥ कर्मैव । 'तद्युक्तात्कर्मणोऽण्' (५।४।३६) । (**'कार्मणं** मन्त्रतन्त्रादियोजने कर्मठेऽपि च' इति मेदिनी) ॥ (२) ॥*॥ द्वे **'ओषधीनां मूलैरुच्चाटनादिकर्मणः' 'कामेण'** इति ख्यातस्य ॥

१—इदं तु सूत्रं नोपलभ्यते । सिद्धान्तकौमुद्यामपि 'शीङ्शपि–' (उ० ३।११३) इति सूत्रव्याख्यायाम्—बाहुलकाच्छमिदमिम्याम्—इत्युक्तम् ॥ २—'प्रवारणम्' दन्तोष्ठ्यमध्यम् । **'प्रचारणम्'** चवर्गाद्यमध्यं वा—इति पीयूषाख्यव्याख्या । ३—'संवननम्' तृतीयस्तवर्गपञ्चमः **'संवपनम्'** पवर्गाद्यः, इत्येके । 'संवदनम्' तवर्गतृतीयः, इत्यपरे । 'जयश्रियः संवदनं यतस्तत्' इति मणौ रघुवंशः—इति मुकुटपीयूषौ ।

विधूननं विधुवनम्

वीति ॥ 'धूञ् कम्पने' चुरादिः । 'धूञ्प्रीणोः–' (वा० ७।३।३७) इति नुक् । ल्युट् (३।३।११५) ॥ (१) ॥*॥ 'धूञ् विधूनने' (तु० प० से०) । ल्युट् (३।३।११५) । 'गाङ्कुटादिभ्यः–' (१।२।१) इति ङित्त्वाद्गुणाभावः ॥ (२) ॥*॥ द्वे **'कम्पनस्य'** ॥

तर्पणं प्रीणनावनम् ॥ ४ ॥

तेति ॥ 'तृप प्रीणने' (दि० प० अ०) । ल्युट् (३।३।११५) ॥ (१) ॥*॥ 'प्रीञ् तर्पणे' (क्र्या० उ० अ०) । स्वार्थण्यन्तान्नुक् (वा० ७।३।३७) । ल्युट् (३।३।११५) ॥ (२) ॥*॥ 'अव रक्षणे' (भ्वा० प० से०) ल्युट् (३।३।११५) ॥ (३) ॥*॥ त्रीणि **'प्रीणनस्य'** ॥

पर्याप्तिः स्यात्परित्राणं हस्तवारणमित्यपि ।

पेति ॥ पर्याप्नं पर्याप्नोतिस्त्राणार्थः । क्तिन् (३।३।९४) ॥ (१) ॥*॥ 'त्रैङ् पालने' (भ्वा० आ० अ०) । ल्युट् (३।३।११५) ॥ (२) ॥*॥ हस्तेन हस्तस्य वा वारणम् ॥*॥ क्वचित् '(हस्त) धारणम्' इति पाठः । प्रहारोद्यतस्य हस्तस्य धारणं रोधः ॥ (३) ॥*॥ त्रीणि **'मारणोद्यतनिवारणस्य'** ॥

सेवनं सीवनं स्यूतिः

सयिति ॥ 'षिवु तन्तुसंताने' (दि० प० से०) । ल्युट् (३।३।११५) ॥ (१) ॥*॥ पूषोदरादित्वात् (६।३।१०९) वा दीर्घः ।–ष्टिवसिव्योर्वा दीर्घः—इति स्वामी ।—'अन्येषामपि–' (६।३।१३७) इति दीर्घः—इति मुकुटः । तन्न । वचनाभावात् । पूर्वपदत्वाभावाच्च ॥ (२) ॥*॥ क्तिन् (३।३।९४) । 'च्छ्वोः–' इति पाठस्तु न्याय्यः ॥*॥ त्रीणि **'सूचीक्रियायाः'** ॥

विदरः स्फुटनं भिदा ॥ ५ ॥

वीति ॥ विदरणम् । 'दृ विदारणे' (क्र्या० प० से०) । 'ऋदोरप्' (३।३।५७) । यत्तु—'ग्रहवृदृ–' (३।३।५८) इत्यप्–इति मुकुटेनोक्तम् । तन्न । 'दृङ् आदरे' (तु० आ० अ०) इति ह्वस्यैव ग्रहणात् । 'दृ विदारणे' इत्यस्य स्वयमुपन्यस्तत्वात् ॥ (१) ॥*॥ 'स्फुट विकसने' (तु० प० से०) कुटादिः । ल्युट् (३।३।११५) ॥ (२) ॥*॥ 'भिदिर् विदारणे' (रु० उ० अ०) भिदाद्यङ् (३।३।१०६) ॥ (३) ॥*॥ त्रीणि **'द्विधाभावस्य'** ॥

आक्रोशनमभीषङ्गः

आक्रविति ॥ 'क्रुश आह्वाने' (भ्वा० प० से०) । ल्युट् (३।३।११५) ॥ (१) ॥*॥ **'षञ्ज सङ्गे'** (भ्वा० प० अ०) । घञ् (३।३।१८) **'उपसर्गस्य घञि–'** (६।३।१२२) इति दीर्घः ॥ (२) ॥*॥ द्वे **'शापस्य'** ॥

१—इदमसंगतम् । णौ परे नुग्विधानेन ण्यन्तान्नुको विधानाभावात् ॥

संवेदो वेदना न ना ।

समिति ॥ 'विद ज्ञाने' (अ० प० से०) । घञ् (३।३।१८) ॥ (१) ॥*॥ 'विद् चेतनाख्याननिवासेषु' चुरादिः । 'ण्यास–' (३।३।१०७) इति युच् । यद्वा 'विद ज्ञाने' (अ० प० से०) । 'घट्टिवन्दिविदिभ्यश्च' (वा० ३।३।१०७) इति 'युच्' । 'ल्युट् च' (३।३।११५) इति ल्युटि क्लीबत्वम् ॥ (२) ॥*॥ द्वे **'अनुभवस्य'** ॥

संमूर्च्छनमभिव्याप्तिः

समिति ॥ 'मूर्च्छा मोहसमुच्छ्रायोः' (भ्वा० प० से०) । ल्युट् (३।३।११५) ॥ (१) ॥*॥ अभिव्यापनम् । 'आप्लृ व्याप्तौ' (स्वा० प० अ०) । 'क्तिन्नाबादिभ्यः' (वा० ३।३।९४) इति क्तिन् ॥ (२) ॥*॥ द्वे **'सर्वतोव्याप्तेः'** ॥

याञ्चा भिक्षार्थनार्दना ॥ ६ ॥

येति ॥ याचनम् । 'टुयाचृ याच्ञायाम्' (भ्वा० उ० से०) । 'यजयाच–' (३।३।९०) इति नङ् ॥ (१) ॥*॥ भिक्षणम् । 'भिक्ष याचने' (भ्वा० उ० से०) । 'गुरोश्च–' (३।३।१०३) इत्यः ॥ (२) ॥*॥ 'अर्थ याच्ञायाम्' (चुरादिः से०) 'ण्यास–' (३।३।१०७) इति युच् ॥ (३) ॥*॥ 'अर्द गतौ याचने च' (भ्वा० प० से०) स्वार्थण्यन्तः । युच् (३।३।१०७) ॥ (४) ॥*॥ चत्वारि **'याच्ञायाः'** ॥

वर्धनं छेदने

वेति ॥ 'वर्ध छेदनपूरणयोः' (चु० प० से०) । ल्युट् (३।३।११५) । **'वर्धनं** छेदने वृद्धौ' इति दन्तोष्ठ्यादावजयः ॥ (१) ॥*॥ 'छिदिर् द्वैधीकरणे' (रु० उ० अ०) ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'कर्तनस्य'** ॥

अथ द्वे आनन्दनसभाजने ।

आप्रच्छनम्

अथेति ॥ 'टुनदि समृद्धौ' (भ्वा० प० से०) ल्युट् (३।३।११५) ॥*॥ **'आमन्त्रणम्'** इति क्वचित्पाठः । तत्र 'मित्रि गुप्तभाषणे' (चु० आ० से०) ॥ (१) ॥*॥ 'सभाज प्रीतिदर्शनयोः' (चु० उ० से०) । ल्युट् (३।३।११५) ॥ (२) ॥*॥ 'प्रच्छ ज्ञीप्सायाम्' (तु० प० अ०) । आङ्पूर्वः प्रच्छिरानन्दनार्थः । ल्युट् (३।३।११५) ॥ (३) ॥*॥ त्रीणि **'आलिङ्गनकुशलप्रश्नादिनानन्दनस्य'** ॥

अथाम्नायः संप्रदायः

अथेति ॥ आम्नानम् । 'म्ना अभ्यासे' (भ्वा० प० अ०) । घञ् (३।३।१८) 'आतः–' (७।३।३३) इति युक् ॥ (१) ॥*॥ संप्रदानम् । 'दाञ्' (जु० उ० अ०) । घञ् (३।३।१८) । युक् (७।३।३३) ॥ (२) ॥*॥ द्वे **'गुरुपरम्परागतसदुपदेशस्य'** ॥

क्षये क्षिया ॥ ७ ॥

क्षेति ॥ क्षयणम् । 'क्षि क्षये' (भ्वा० प० अ०) । 'एरच्' (३।३।५३) ॥ (१) ॥*॥ 'क्षीष् हिंसायाम्' (क्या० प० अ०) । 'षिद्भिदादिभ्योऽङ्' (३।३।१०४) ॥ (२) ॥*॥ द्वे **'अपचयस्य'** ॥

ग्रहे ग्राहः

ग्रेति ॥ ग्रहणम् । 'ग्रह उपादाने' (क्या० उ० से०) । 'ग्रहवृदृ–' (३।३।५८) इत्यप् ॥ (१) ॥*॥ स्वार्थण्यन्तादच् (३।३।५६) । घञ् (३।३।१८) वा ॥ (२) ॥*॥ द्वे **ग्रहणस्य'** ॥

वशः कान्तौ

वेति ॥ 'वश कान्तौ' (अ० प० से०) 'वशिरण्योः–' (वा० ३।३।५८) इत्यप् ॥ (१) ॥*॥ 'कमु कान्तौ' (भ्वा० आ० से०) । 'आयादयः–' (३।१।३१) इति णिङभावे क्तिन् (३।३।९४) ॥ (२) ॥*॥ द्वे **'इच्छायाः'** ॥

रक्षणस्त्राणे

रेति ॥ 'रक्ष पालने' (भ्वा० प० से०) । 'यजयाच–' (३।३।९०) इति नङ् ॥ (१) ॥*॥ 'त्रैङ् पालने' (भ्वा० आ० अ०) ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'रक्षणस्य'** ॥

रणः क्वणे ।

रेति ॥ रणनम् । 'रण शब्दे' (भ्वा० प० से०) । 'वशिरण्योः' (वा० ३।३।५८) इत्यप् ॥ (१) ॥*॥ क्वणनम् । 'क्वण शब्दे' (भ्वा० प० से०) । 'क्वणो वीणायाम्' (३।३।६५) इति साधुः ॥ (२) ॥*॥ द्वे **'शब्दकरणस्य'** ॥

व्यधो वेधे

व्येति ॥ व्यधनम् । 'व्यध ताडने' (दि० प० अ०) । 'व्यधजपोः–' (३।३।६१) इत्यप् ॥ (१) ॥*॥ वेधनम् । 'विध विधाने' (तु० प० से०) । घञ् (३।३।१८) ॥ (२) ॥*॥ द्वे **'वेधनस्य'** ॥

पचा पाके

पेति ॥ पचनम् । 'डु पचष् पाके' (भ्वा० उ० अ०) । षित्त्वादङ् (३।३।१०४) ॥ (१) ॥*॥ घञ् (३।३।१८) द्वे ॥ (२) ॥*॥ द्वे **'पचनस्य'** ॥

हवो हूतौ

हेति ॥ ह्वानम् । 'ह्वेञ् स्पर्धायां शब्दे च' (भ्वा० उ० अ०) । 'भावेऽनुपसर्गस्य' (३।३।७५) इत्यप्, संप्रसारणं च ॥ (१) ॥*॥ क्तिन् (३।३।९४) ॥ (२) ॥*॥ द्वे **'आह्वानस्य'** ॥

१—मुकुटेन तु '–प्रीतिसेवनयोः' इति पाठो धृतः । स्वामिना तु—'प्रीतिदर्शने' इति पाठोऽङ्गीकृतः ॥

वरो वृतौ ॥ ८ ॥

वेति ॥ वरणम् । 'वृञ् वरणे' (स्वा० उ० से०) । 'ग्रहवृह–' (३।३।५८) इत्यप् । 'तपोभिरिष्यते यस्तु देवेभ्यः स वरो मतः' ॥ (१) ॥*॥ क्तिन् (३।३।९४) ॥ (२) ॥*॥ द्वे **'वेष्टनसंभक्त्योः'** ॥

ओषः प्लोषे

ओष इति ॥ ओषणम् 'उष दाहे' (भ्वा० प० से०) घञ् (३।३।१८) ॥ (१) ॥*॥ प्लोषणम् । 'प्लुष दाहे' । (भ्वा० प० से०) । घञ् (३।३।१८) ॥ (२) ॥*॥ द्वे **'दाहस्य'** ॥

नयो नाये

नेति ॥ नयनम् । 'णय गतौ' (भ्वा० प० से०) । घञ् (३।३।१८) । संज्ञापूर्वकत्वान्न वृद्धिः । यद्वा 'णीञ्' (भ्वा० उ० अ०) । 'एरच्' (३।३।५६) । 'क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते' ॥ (१) ॥*॥ 'णीञ् प्रापणे' (भ्वा० उ० अ०) 'श्रिणीभुवो–' (३।३।२४) इति घञ् ॥ (२) ॥*॥ द्वे **'नीतेः'** ॥

ज्यानिर्जीर्णौ

ज्येति ॥ ज्यानम् । 'ज्या वयोहानौ' (क्या० प० अ०) । 'ग्लाम्लाज्याहाभ्यो निः' (वा० ३।३।९५) ॥ (१) ॥*॥ जरणम् । 'जॄष् वयोहानौ' (दि० प० से०) । क्तिन् (३।३।९४) । 'ऋल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः' (वा० ८।२।४४) । 'रदाभ्याम्–' (८।२।४२) इति नत्वम् ॥ (२) ॥*॥ द्वे **'जीर्णत्वस्य'** ॥

भ्रमो भ्रमौ ।

भ्रेति ॥ भ्रमणम् । 'भ्रमु अनवस्थाने' (दि० प० अ०) । घञ् (३।३।१८) । 'नोदात्तोपदेशस्य–' (७।३।३४) इति वृद्ध्यभावः ।—मित्त्वाद्भ्रस्वः—इति मुकुटस्तु चिन्त्यः । णिच्यस्य प्रवृत्तेः ॥ (१) ॥*॥ 'इकॄष्यादिभ्यः' (वा० ३।३।१०८) ॥ (२) ॥*॥ द्वे **'भ्रमणस्य'** ॥

स्फातिर्वृद्धौ

स्फेति ॥ 'स्फायी वृद्धौ' (भ्वा० आ० से०) । क्तिन् (३।३।९४) 'स्फातिर्वृद्धिः **प्रसारो** ना' इति बोपालितः ॥ (१) ॥*॥ वर्धनम् । 'वृधु वृद्धौ' (भ्वा० आ० से०) । क्तिन् (३।३।९४) ॥ (२) ॥*॥ द्वे **'वृद्धेः'** ॥

प्रथा ख्यातौ

प्रेति ॥ प्रथनम् । 'प्रथ प्रख्याने' (भ्वा० आ० से०) । भिदादिङ् (३।३।१०४) ॥ (१) ॥*॥ ख्यानम् । 'ख्या प्रकथने' (अ० प० अ०) । चक्षिङादेशो वा । क्तिन् (३।३।९४) ॥ (२) ॥*॥ द्वे **'ख्यातेः'** ॥

स्पृष्टिः पृक्तौ

स्प्रिति ॥ स्पर्शनम् । 'स्पृश संस्पर्शे' (तु० प० अ०) । क्तिन् (३।३।९४) ॥ (१) ॥*॥ पर्चनम् । 'पृची संपर्के' । (रु० प० से०) । क्तिन् (३।३।९४) ॥ (२) ॥*॥ द्वे **'स्पर्शनस्य'** ॥

स्रवः स्रवे ॥ ९ ॥

स्रेति ॥ स्रवनम् । 'ष्णु प्रस्रवणे' (अ० प० से०) । 'ऋदोरप्' (३।३।५७) ॥ (१) ॥*॥ 'सु गतौ' (भ्वा० प० अ०) ॥ (२) ॥*॥ द्वे **'प्रस्रवणस्य'** ॥

विधा समृद्धौ

वयिति ॥ विधानम् । 'धाञ्' (जु० उ० अ०) । 'आतश्च–' (३।३।१०६) इत्यङ् । **'विधा** गजान्ने ऋद्धौ च' (इति मेदिनी) ॥*॥ क्वचित् **'एधा'** इति पाठः । 'एध वृद्धौ' (भ्वा० आ० से०) । 'गुरोश्च–' (३।३।१०३) इत्यः ॥ (१) ॥*॥ समर्धनम् । 'ऋधु वृद्धौ' (भ्वा० आ० से०) । क्तिन् (३।३।९४) ॥ (२) ॥*॥ द्वे **'धनसंपत्तेः'** ॥

स्फुरणे स्फुरणा

स्फ्वति ॥ 'स्फुर स्फुरणे संचलने च' कुटादिः । ल्युट् (३।३।११५) । (धातुपाठे) अदुपधपाठे **'स्फुरणम्'** अपि ॥ (१) ॥*॥ स्वार्थण्यन्ताद्युच् (३।३।१०७) संज्ञापूर्वकत्वान्न गुणः ॥ (२) ॥*॥ द्वे **'स्फुरणस्य'** ॥

प्रमितौ प्रमा ।

प्रेति ॥ प्रमाणम् । 'डुमिञ् प्रक्षेपणे' (स्वा० उ० अ०) क्तिन् (३।३।९४) ॥ (१) ॥*॥ 'माङ् माने' (दि० आ० अ०) । 'आतश्चो–' (३।३।१०६) इत्यङ् ॥ (२) ॥*॥ द्वे **'प्रमाज्ञानस्य'** ॥

प्रसूतिः प्रसवे

प्रेति ॥ प्रसवनम् । 'षूङ् प्राणिप्रसवे' (दि० आ० से०) । क्तिन् (३।३।९४) ॥ (१) ॥*॥ 'ऋदोरप्' (३।३।५७) ॥ (२) ॥*॥ 'षू प्रेरणे' (तु० प० से०) वा ॥ (२) ॥*॥ द्वे **'प्रसवनस्य प्रेरणस्य वा'** ॥

श्च्योते प्राधारः

श्यवितिं ॥ श्च्योतनम् । 'श्च्युतिर् क्षरणे' (भ्वा० प० से०) । घञ् (३।३।१८) ॥ (१) ॥*॥ प्रचरणम् । 'घृ क्षरणदीप्त्योः' (जु० प० अ०) । घञ् (३।३।१८) । 'उपसर्गस्य–' (६।३।१२२) इति दीर्घः ॥ (२) ॥*॥ द्वे **'क्षरणस्य'** ॥

क्रमथः क्रमे ॥ १० ॥

क्रेति ॥ क्रमनम् । 'क्रमु ग्लानौ' (दि० प० से०) ।

१—इदमसंगतम् । भिदादिष्वेतत्पाठस्याभावात् । 'घटादयः षितः' (भ्वा० ग० सू०) इति षित्त्वादेव सिद्धे तत्पाठकल्पनस्याप्यनुचितत्वात् ॥

'शमादिभ्योऽथच्' ॥ (१) ॥*॥ घञि (३।३।१८) 'नोदात्तोपदेश–' (७।३।३४) इति वृद्धिर्न ।—मित्त्वाद्ध्रस्वत्वम्—इति मुकुटस्तु चिन्त्यः । मितां णौ ह्रस्वविधानात् ॥ (२) ॥*॥ द्वे **'ग्लानेः'** ॥

उत्कर्षोऽतिशये

उत्कर्षणम् । 'कृष विलेखने' (भ्वा० प० अ०) । घञ् (३।३।१८) ॥ (१) ॥*॥ अतिशयनम् शीङः 'एरच्' (३।३।५६) ॥ (२) ॥*॥ द्वे **'उत्कर्षस्य'** ॥

संधिः श्लेषे

संधानम् । धालः 'उपसर्गे घोः किः' (३।३।९२) ॥ (१) ॥*॥ श्लेषणम् । 'श्लिष आलिङ्गने' (दि० प० अ०) । घञ् (३।३।१८) ॥ (२) ॥*॥ द्वे **'संधानस्य'** ॥

विषय आशये ।

विसयनम् । 'षिञ् बन्धने' (स्वा० उ० अ०) । 'एरच्' (३।३।५६) 'परिनिविभ्यः सेव–' (८।३।७०) इति षः । यत्तु—बध्यन्तेऽत्र, इति 'पुंसि–' (३।३।११८) इति घः । विसीयते विसिनोति वात्र—इति मुकुटेनोक्तम् । तन्न । भावप्रत्ययानामेव पूर्वापरयोर्दर्शनेनाधिकरणार्थस्यानौचित्यात् । ल्युट्प्रसङ्गाच्च । बध्यन्तेऽत्र । 'पुंसि–' इति 'घः' इत्यस्यानुपयोगाच्च ॥ (१) ॥*॥ शीङः 'एरच्' (३।३।५६) ॥*॥ **'आश्रयः'** इति पाठे 'एरच्' (३।३।५६) ॥ (२) ॥*॥ द्वे **'आश्रयस्य'** ॥

क्षिपायां क्षेपणम्

क्षेपणम् । 'क्षिप प्रेरणे' (तु० उ० अ०) । भिदाद्यङ् (३।३।१०४) ॥ (१) ॥*॥ ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'प्रेरणस्य'** ॥

गीर्णिर्गिरौ

गिलनम् । 'गॄ निगरणे' (तु० प० से०) । क्तिन् (३।३।९४) । 'ऋत्वादिभ्यः क्तिन्निष्ठावत्' (वा० ८।२।४४) ॥ (१) ॥*॥ 'इकृष्यादिभ्यः' (वा० ३।३।१०८) ।—साहचर्यात्स्त्रीलम्—इति मुकुटश्चिन्त्यः । 'स्त्रियाम्' इत्यधिकारात् ॥ (२) ॥*॥ द्वे **'गिलनस्य'** ॥

गुरणमुद्यमे ॥ ११ ॥

'गुरी उद्यमे' (तु० प० से०) कुटादिः । ल्युट् (३।३।११५) ॥ (१) ॥*॥ उद्यमनम् । 'यम उपरमे' (भ्वा० प० से०) घञ् (३।३।१८) । संज्ञापूर्वकत्वाद्गुणाभावः ॥ (२) ॥*॥ द्वे **'भाराद्युद्यमनस्य'** ॥

१ दैवादिकस्य दीर्घादि 'गूरी' धातोः 'गूरणम्' इति स्वामी–इति मुकुटः ।—चुरादेः **'गोरणम्'** अपि—इति स्वामी । पीयूषव्याख्यायामपि—गुरणं ह्रस्वादि । गूरणं दीर्घादीत्येके । गोरणमित्यपरे—इति प्रकटितम् ॥

उन्नाय उन्नये

उन्नयनम् । 'अवोदोर्नियः' (३।३।२६) इति घञ् ॥ (१) ॥*॥ 'क्वचिदपवादविषये उत्सर्गोऽभिनिविशते' इत्यच् ॥ (२) ॥*॥ द्वे **'उन्नयनस्य'** ॥

श्रायः श्रयणे

श्रयणम् । 'श्रिञ् सेवायाम्' (भ्वा० उ० से०) । 'श्रिणीभुवो–' (३।३।२४) इति घञ् ॥ (१) ॥*॥ ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'सेवायाः'** ॥

जयने जयः ।

'जि जये' (भ्वा० प० अ०) । ल्युट् (३।३।११५) ॥ (१) ॥*॥ 'एरच्' (३।३।५६) ॥ (२) ॥*॥ द्वे **'जयस्य'** ॥

निगादो निगदे

निगदनम् । 'गद व्यक्तायां वाचि' (भ्वा० प० से०) । 'नौ गद–' (३।३।६४) इत्यप् वा ॥ (१) ॥*॥ घञ् (३।३।१८) ॥ (२) ॥*॥ द्वे **'गदनस्य'** ॥

मादो मदे

मदनम् । 'मदी हर्षे' (दि० प० से०) । 'मदोऽनुप–' (३।३।६७) इत्यप् ॥ (१) ॥*॥ 'सघ मादस्थयोः–' (६।३।९६) इति निर्देशात् 'क्वचिदपवादः–' इति न्यायाद्वा घञ् (३।३।१८) ॥*॥ (२) ॥*॥ द्वे **'हर्षस्य'** ॥

उद्वेग उद्गमे ॥ १२ ॥

उद्वेजनम् । 'ओविजी भयचलनयोः' (तु० आ० से०) । घञ् (३।३।१८) ॥ (१) ॥*॥ उद्गमणम् । 'भ्रमु अनवस्थाने' (दि० प० अ०) । घञ् (३।३।१८) । 'नोदात्तोप–' (७।३।३४) इति न वृद्धिः ॥ (२) ॥*॥ द्वे **'उद्वेजनस्य'** ॥

विमर्दनं परिमले

'मृद क्षोदे' (क्रया० प० से०) । ल्युट् (३।३।११५) ॥ (१) ॥*॥ परिमलनम् । 'मल धारणे' (भ्वा० आ० से०) । घञ् (३।३।१८) । संज्ञापूर्वकत्वान्न वृद्धिः ॥ (२) ॥*॥ द्वे **'कुङ्कुमादिमर्दनस्य'** ॥

अभ्युपपत्तिरनुग्रहः ।

अभ्युपपदनम् । 'पद गतौ' (दि० आ० अ०) । क्तिन् (३।३।९४) ॥ (१) ॥*॥ अनुग्रहणम् । 'ग्रह उपादाने' (क्रया० उ० से०) । 'ग्रहवृद–' (३।३।५८) इत्यप् ॥ (२) ॥*॥ द्वे **'हितसंपादनाहितनिवारणप्रवृत्तेः'** ॥

निग्रहस्तु निरोधः स्यात्

निग्रहणम् । अप् (३।३।५८) ॥ (१) ॥*॥ निरोधनम् । 'रुधिर् आवरणे' (रु० उ० अ०) । घञ् (३।३।१८) ॥ (२) ॥*॥ द्वे **'निरोधस्य'** ॥

१—विग्रहस्तु विरोधः–' इति पाठः—इति स्वामी ।

अभियोगस्त्वभिग्रहः ॥१३॥

अभियोजनम् । 'युजिर् योगे' (रु० उ० अ०) । घञ् (३।३।१८) ॥ (१) ॥*॥ अभिग्रहणम् । अप् (३।३।५८) **'अनुग्रहोऽभिग्रहणेऽप्यभियोगे च गौरवे'** इति रुद्रः ॥ (२) ॥*॥ द्वे **'कलहाह्वानस्य'** ॥

मुष्टिबन्धस्तु संग्राहः

मुष्टेर्बन्धः ॥ (१) ॥*॥ संग्रहणम् । 'समि मुष्टौ' (३।३।३६) इति ग्रहेर्घञ् ॥ (२) ॥*॥ द्वे **'मुष्टिबन्धनस्य'** ॥

डिम्बे डमरविप्लवौ ।

डिम्बनम् । 'डि विनोदे' ( ) । घञ् (३।३।१८) । 'डीङ् विहायसा गतौ' (दि० आ० अ०) । डयनं विद्रवः डिम्बम् । उणादिनिपातः—इति मुकुटस्तु निर्मूलः । 'भयध्वनौ पुष्कसेऽपि **डिम्बः** क्लीहनि विप्लवे' इति रभसः ॥ (१) ॥*॥ 'डम' इति शब्दस्य राणम् । 'रा दाने' (अ० प० अ०) । बाहुलकाद्भावार्थे कः ॥ (२) ॥*॥ विप्लवनम् 'प्लुङ् गतौ' (भ्वा० आ० अ०) । **'ऋदोरप्'** (३।३।५७) ॥ (३) ॥*॥ त्रीणि **'धाडकलुण्ठनादेः'** । अशस्त्रकलहस्य—इति स्वामी ॥

बन्धनं प्रसितिश्चारः

'बन्ध बन्धने' । (क्रया० प० अ०) ल्युट् (३।३।११५) ॥ (१) ॥*॥ प्रसयनम् । 'षिञ् बन्धने' (स्वा० उ० अ०) । 'क्तिन्' (३।३।९४) ॥ (२) ॥*॥ चरणम् । 'चर गतौ' (भ्वा० प० से०) अनेकार्थत्वाद्बन्धने । घञ् (३।३।१८) । **'बन्धापसर्पयोश्चारः'** इति रुद्रः ॥ (३) ॥*॥ त्रीणि **'बन्धनस्य'** । मुकुटस्तु—बन्धनसाधनरज्जुनिगडादेः—इत्याह । तन्न । भावप्रकरणात् । स्वामी तु **'चार'** स्थाने **'स्वारम्'** पठित्वा स्वारादीनां चतुर्णां पर्यायतामाह । स्वरति । 'स्वृ शब्दोपतापयोः' (भ्वा० प० से०) । अच् (३।१।१३४) प्रज्ञाद्यण् (५।४।३८) ॥

स्पर्शः स्प्रष्टोपतप्तरि ॥ १४ ॥

स्पृशति । 'स्पृश बाधनस्पर्शनयोः' (तु० आ० से०) । 'पदरुज—' (३।३।१६) इत्यत्र 'स्पृश उपतापे' (वार्ति०) इति कर्तरि घञ् ॥*॥ (**'स्पर्श'**) इति रेफहीनपाठे तु 'स्पश-स्पर्शबाधनयोः' (भ्वा० उ० से०) इति घातोरच् (३।१।१३४) ॥ (१) ॥*॥ स्पृशति । तृच् (३।३।१३३) । 'अनुदात्तस्य च—' (६।१।४९) इत्यमागमः ॥ (२) ॥*॥ उपतपति । 'तप संतापे' (भ्वा० प० अ०) । तृच् (३।१।१३३) ॥ (३) ॥*॥ यद्वा स्वरस्पर्शयोर्भावे घञ् । स्प्रष्टोपतप्त्रोर्भावे 'कृत्यल्युटो बहुलम्' (३।३।११३) इति तृच् । भावप्रकरणानुरोधात् ॥*॥ त्रीणि **'संतप्तस्य' 'संतापस्य वा'** ॥

निकारो विप्रकारः स्यात्

निकृष्टीकरणम् । कृञो घञ् (३।३।१८) । **'निकारः स्यात्परिभवे धान्यस्योत्क्षेपणेऽपि च'** इति धरणिः ॥ (१) ॥*॥ विप्रकरणम् । घञ् (३।३।१८) ॥ (२) ॥*॥ द्वे **'अपकारस्य'** ॥

आकारस्त्विङ्ग इङ्गितम् ।

आकरणम् । घञ् (३।३।१८) ॥ (१) ॥*॥ इङ्गनम् । 'इगि गतौ' (भ्वा० प० से०) । घञ् (३।३।१८) ॥ (२) ॥*॥ क्तः (३।३।११४) ॥ (३) ॥*॥ त्रीणि **'अभिप्रायानुरूपचेष्टायाः'** ॥

परिणामो विकारो द्वे समे विकृतिविक्रिये ॥ १५ ॥

परिणमनम् । 'णम प्रह्वत्वे' (भ्वा० प० अ०) । घञ् (३।३।१८) ॥ (१) ॥*॥ विकरणम् । घञ् (३।३।१८) ॥ (२) ॥*॥ विकरणम् । क्तिन् (३।३।९४) ॥ (३) ॥*॥ **'कृञः श च'** (३।३।१००) ॥ (४) ॥*॥ चत्वारि **'प्रकृतेरन्यथाभावस्य'** । द्वयोः साम्यं स्त्रीत्वात् ॥

अपहारस्त्वपचयः

अपहरणम् । 'हृञ् हरणे' (भ्वा० उ० अ०) । घञ् (३।३।१८) ॥ (१) ॥*॥ अपचयनम् । 'एरच्' (३।३।५६) ॥ (२) ॥*॥ द्वे **'अपहरणस्य'** ॥

समाहारः समुच्चयः ।

समाहरणम् । घञ् (३।३।१८) ॥ (१) ॥*॥ समुच्चयनम् । 'चिञ् चयने' (स्वा० उ० अ०) । 'एरच्' (३।३।५६) ॥ (२) ॥*॥ द्वे **'राशीकरणस्य'** ॥

प्रत्याहार उपादानम्

प्रत्याहरणम् । घञ् (३।३।१८) ॥ (१) ॥*॥ उपाद्दाञो ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'स्वविषयेभ्य इन्द्रियपरावर्तनस्य'** ॥

विहारस्तु परिक्रमः ॥ १६ ॥

विहरणम् । घञ् (३।३।१८) ॥ (१) ॥*॥ परिक्रमणम् 'क्रमु पादविक्षेपे' (भ्वा० प० से०) । घञ् । 'नोदात्तोपदेश—' (७।३।३४) इति वृद्धिर्न ॥ (२) ॥*॥ द्वे **'क्रीडार्थसंचरणस्य'** ॥

अभिहारोऽभिग्रहणम्

अभिहरणम् । घञ् (३।३।१८) ॥ (१) ॥*॥ अभिग्रहेर्ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'आभिमुख्येन ग्रहणस्य'** ॥

निर्हारोऽभ्यवकर्षणम् ।

निर्हरणम् । घञ् (३।३।१८) ॥ (१) ॥*॥ अभ्यवकृषेर्ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'शस्त्रादेर्युक्त्या निःसारणस्य'** ॥

अनुहारोऽनुकारः स्यात्

अनुहरणम् । घञ् (३।३।१८) ॥ (१) ॥*॥ अनुकरणम् । घञ् (३।३।१८) ॥ (२) ॥*॥ द्वे **'सदृशकरणस्य'** ॥

अर्थस्यापगमे व्ययः ॥ १७ ॥

व्ययनम् । 'व्यय वित्तसमुत्सर्गे' (चु० उ० से०) अदन्तः । घञ् (३।३।१८) । 'एरच्' (३।३।५६) वा ॥ (१) ॥*॥ एकम् **'द्रव्यापगमस्य'** ॥

प्रवाहस्तु प्रवृत्तिः स्यात्

प्रवहणम् । 'वह प्रापणे' (भ्वा० उ० से०) । घञ् (३।३।१८) ॥ (१) ॥*॥ प्रवर्तनम् । 'वृतु वर्तने' (भ्वा० आ० से०) । क्तिन् (३।३।९४) ॥ (२) ॥*॥ द्वे **'अविच्छेदेन जलादिप्रवृत्तेः'** ॥

प्रवहो गमनं बहिः ।

प्रकृष्टो वहः । 'गोचरसंचर–' (३।३।११९) इति साधुः । **'प्रवहस्तु बहिर्यात्रामातरिश्वप्रभेदयोः'** इति विश्वः (मेदिनी) ॥ (१) ॥*॥ एकम् **'बहिर्यात्रायाः'** ॥

वियामो वियमो यामो यमः संयामसंयमौ ॥ १८ ॥

वियमनम् । 'यमः समुपनिविषु च' (३।३।६३) इत्यप् वा । चादनुपसर्गेऽप्यप् वा । पक्षे घञ् । षट्र संयमनस्य । स्वामी तु—द्वे विविधयमनस्य द्वे **'उपरतिमात्रस्य'** । द्वे संयमनस्य—इत्याह ॥

हिंसाकर्माभिचारः स्यात्

हिंसाफलं कर्म । शाकपार्थिवादिः (वा० २।१।७८) ॥ (१) ॥*॥ अभिचरणम् । घञ् (३।३।१८) ॥ (२) ॥*॥ द्वे **'मारणादिक्रियायाः'** ॥

जागर्या जागरा द्वयोः ।

जागरणम् । 'जागर्तेरकारो वा' (वा० ३।३।१०१) । पक्षे (शे) यक् (३।१।६६) । 'जाग्रोऽवि–' (७।३।८५) इति गुणः ॥ (१) ॥*॥ (२) ॥*॥ भावे घञि पुंसि ॥*॥ द्वे **'जागरणस्य'** ॥

विघ्नोऽन्तरायः प्रत्यूहः

विहननम् 'घञर्थे कः' (वा० ३।३।५८) ॥ (१) ॥*॥ अन्तर्मध्ये, अन्तरस्य व्यवधानस्य वायनम् । 'अय गतौ' (भ्वा० आ० से०) । 'इण् गतौ' (अ० प० अ०) वा । घञ् (३।३।१८) । अच् (३।२।५६) वा ॥ (२) ॥*॥ प्रत्यूहनम् । घञ् (३।३।१८) ॥ (३) ॥*॥ त्रीणि **'विघ्नस्य'** ॥

स्यादुपघ्नोऽन्तिकाश्रये ॥ १९ ॥

उपहन्यते । उपहननम् वा । 'उपघ्न आश्रये' (३।३।८५) इति साधुः ॥ (१) ॥*॥ अन्तिके आश्रीयते, आश्रयणं वा । 'एरच्' (३।३।५६) ॥ (२) ॥*॥ द्वे **'संनिहिताश्रयस्य' 'आश्रयनस्य वा'** ॥

निवेश उपभोगः स्यात्

निवेशनम् । विशतेर्घञ् (३।३।१८) ॥ (१) ॥*॥ उपभोजनम् । **'भुज पालनाभ्यवहारयोः'** (रु० प० से०) । घञ् (३।३।१८) ॥ (२) ॥*॥ द्वे **'उपभोगस्य'** ॥

परिसर्पः परिक्रिया ।

समन्तात्सर्पणम् । 'सृप्लृ गतौ' (भ्वा० प० से०) । घञ् ॥ (१) ॥*॥ परिकरणम् । 'कृञः श च' (३।३।१००) । 'रिङ् शयग्लिङ्क्षु' (७।४।२८) ॥ (२) ॥*॥ द्वे **'परिजनादिना वेष्टनस्य'** ॥

विधुरं तु प्रविश्लेषः

विगता धूः कार्यभारः । **'ऋक्पूर–'** (५।४।७४) इत्यः ॥ (१) ॥*॥ प्रविश्लेषणम् । 'श्लिष आलिङ्गने' (दि० आ० अ०) । घञ् (३।३।१८) **'वैकल्येऽपि च विश्लेषे विधुरं विकले त्रिषु'** इति त्रिकाण्डशेषः ॥ (२) ॥*॥ द्वे **'विश्लेषस्य'** ॥

अभिप्रायश्छन्द आशयः ॥ २० ॥

अभिप्रयणम् । 'प्रीञ् तर्पणे' (क्रया० उ० अ०) । घञ् (३।३।१८) ॥ (१) ॥*॥ छन्दनम् । 'छदि संवरणे' (चु० प० से०) । घञ् (३।३।१८) ॥ (२) ॥*॥ आशयनम् । 'शीङ्' (अ० आ० से०) । 'एरच्' (३।३।५६) ॥ (३) ॥*॥ त्रीणि **'अभिप्रायस्य'** ॥

संक्षेपणं समसनम्

संक्षिपेर्ल्युट् (३।३।११५) ॥ (१) ॥*॥ 'असु क्षेपणे' (दि० प० से०) । ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'संक्षेपस्य'** ॥

पर्यवस्था विरोधनम् ।

पर्यवस्थानम् । 'आतश्चो–' (३।३।१०६) इत्यः ॥ (१) ॥*॥ 'रुधिर् आवरणे' (रु० उ० अ०) । ल्युट् ॥ (२) ॥*॥ द्वे **'विरोधस्य'** ॥

परिसर्या परीसारः

परिसरणम् । 'सृ गतौ' (भ्वा० प० अ०) । 'परिचर्या-परिसर्या–'(वा० ३।३।१०१) इति साधुः ॥ (१) ॥*॥ घञ् (३।३।१८) । 'उपसर्गस्य घञि–' (६।३।१२२) इति दीर्घः ॥ (२) ॥*॥ द्वे **'सर्वतो गमनस्य'** ॥

स्यादास्था त्वासना स्थितिः ॥ २१ ॥

आसनम् । 'आस उपवेशने' (अ० आ० से०) । ण्यत् (३।१।११३) ॥ (१) ॥*॥ 'ण्यास–' (३।३।१०६) इति युच् ॥ (२) ॥*॥ स्थानम् । 'ष्ठा गतिनिवृत्तौ' (भ्वा० प० अ०) । 'स्थागा–' (३।३।९५) इति क्तिन् ॥ (३) ॥*॥ त्रीणि **'आसनस्य'** ॥

विस्तारो विग्रहो व्यासः

विस्तरणम् । 'स्तृञ् आच्छादने' (क्रया० उ० से०) ।

१—गुणात्परत्वाद्विडादेशे **'जाग्रिया'** इति धातुपारायणम् ॥ क्तिनि (३।३।९४) 'जागर्ति' अपीति सुभूतिः—इति मुकुटः ॥

'प्रथने वावशब्दे' (३।३।३३) इति घञ् ॥ (१) ॥*॥ विप्रहणम् । 'ग्रहवृद–' (३।३।५८) इत्यप ॥ (२) ॥*॥ व्यसनम् । 'असु क्षेपणे' (दि० प० से०) । घञ् (३।३।१८) ॥ (३) ॥*॥ त्रीणि **'विस्तारस्य'** ॥

स च शब्दस्य विस्तरः ।

सः व्यासः । 'ऋदोरप्' (३।३।५६) ॥ (१) ॥*॥ एकम् **'शब्दविस्तरस्य'** ॥

स्यान्मर्दनं संवहनम्

'मृद क्षोदे' (क्या० प० से०) । ल्युट् (३।३।११५) ॥ (१) ॥*॥ 'वह प्रापणे' (भ्वा० उ० अ०) । स्वार्थण्यन्ताल्युट् (३।३।११५) ।—'वाहनमाहिताग्नि' (८।४।८) इति निपातनाद्दीर्घः—इत्येके ॥ (२) ॥*॥ द्वे **'पादमर्दनादेः'** ॥

विनाशः स्याददर्शनम् ॥ २२ ॥

विनशनम् । 'णश अदर्शने' (दि० प० से०) । घञ् (३।३।१८) ॥ (१) ॥*॥ दर्शनस्य भावः ॥ (२) ॥*॥ द्वे **'तिरोधानस्य'** ॥

संस्तवः स्यात्परिचयः

संस्तवनम् । 'ष्टुञ् स्तुतौ' (अ० उ० अ०) । 'ऋदोरप्' (३।३।५७) ॥ (१) ॥*॥ सन्मताच्चयनम् । 'चिञ् चयने' (स्वा० उ० अ०) । 'एरच्' (३।३।५६) ॥ (२) ॥*॥ द्वे **'परिचयस्य'** ॥

प्रसरस्तु विसर्पणम् ।

प्रसरणम् । 'सृ गतौ' (भ्वा० प० से०) । बाहुलकादप् ॥ (१) ॥*॥ 'सृप्लृ गतौ' (भ्वा० प० से०) । ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'व्रणादिविसरणस्य'** ॥

नीवाकस्तु प्रयामः स्यात्

निवचनम् । घञ् (३।३।१८) 'उपसर्गस्य–' (६।२।१२२) इति दीर्घः ॥ (१) ॥*॥ प्रयमणम् । यमेर्घञ् (३।३।१८) ॥ (२) ॥*॥ द्वे **'धान्यसंचयस्य, क्रयादरस्य वा'** ॥

संनिधिः संनिकर्षणम् ॥ २३ ॥

संनिधानम् । धाञः 'उपसर्गे घोः किः' (३।३।९२) ॥ (१) ॥*॥ कृषेर्ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'संनिधानस्य'** ॥

लवोऽभिलावो लवने

लवनम् । 'लूञ् छेदने' (क्या० उ० से०) । 'ऋदोरप्' (३।३।५७) ॥ (१) ॥*॥ 'निरभ्योः पूल्वोः' (३।३।५८) इति घञ् ॥ (२) ॥*॥ ल्युट् (३।२।११५) ॥ (३) ॥*॥ त्रीणि **'छेदनस्य'** ॥

निष्पावः पवने पवः ।

निष्पवनम् । घञ् (३।३।२८) ॥ (१) ॥*॥ ल्युट् (३।३।११५) ॥ (२) ॥*॥ अप् (३।३।५७) ॥ (३) ॥*॥ त्रीणि **'धान्यादीनां बहुलीकरणस्य'** ॥

प्रस्तावः स्यादवसरः

प्रस्तवनम् । 'ष्टुञ् स्तुतौ' (अ० प० अ०) । 'प्रे द्रुस्तुस्रुवः' (३।३।२७) इति घञ् ॥ (१) ॥*॥ अवसरणम् । 'सृ गतौ' (भ्वा० प० अ०) बाहुलकादप् ॥ (२) ॥*॥ द्वे **'प्रसङ्गस्य'** ॥

त्रसरः सूत्रवेष्टनम् ॥ २४ ॥

त्रसनम् । 'त्रसी उद्वेगे' (दि० प० से०) । अरन् बाहुलकादौणादिकः) । त्रसेर्भद्रादिखाररन्—इति मुकुटस्त्वपाणिनीयः ॥*॥ **'तसरः'** इति पाठे 'तन्यृषिभ्यां क्सरन्' (उ० ३।७५) ॥ (१) ॥*॥ द्वे **'सूत्रस्य वेष्टनक्रियायाः'** ॥

प्रजनः स्यादुपसरः

प्रजननम् । 'जनी' (दि० आ० से०) । घञ् (३।३।१८) 'जनिवध्योः–' (७।३।३५) इति न वृद्धिः ॥ (१) ॥*॥ उपसरणम् । 'सृ गतौ' (भ्वा० प० अ०) । 'प्रजने सर्तेः' (३।३।७१) इत्यप् ॥ (२) ॥*॥ द्वे **'प्रथमगर्भग्रहणस्य'** ॥

प्रश्रयप्रणयौ समौ ।

प्रश्रयणम् । 'श्रिञ्' (भ्वा० उ० से०) । 'एरच्' (३।३।५६) ॥*॥ **'प्रसर'** इति पाठे सरतेर्बाहुलकादप् । **'प्रसरः प्रणये वेगे'** (इति मेदिनी) ॥ (१) ॥*॥ प्रणयनम् । 'णीञ्' (भ्वा० उ० अ०) । 'एरच्' (३।३।५६) ॥ (२) ॥*॥ द्वे **'प्रीत्या प्रार्थनस्य'** ॥

धीशक्तिर्निष्क्रमः

धियः शक्तिः । साष्टधा—'शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा । ऊहापोहौ च विज्ञानं तत्त्वज्ञानं च धीगुणाः' ॥ (१) ॥*॥ निष्क्रमणम् । 'क्रमु पादविक्षेपे' (भ्वा० प० से०) । घञ् (३।३।१८) । 'नोदात्तोप–' (७।३।३४) इति वृद्धिर्न । **'निष्क्रमो** निर्गमे ख्यातो बुद्धिसंपदि **निष्क्रमः'** इति रुद्रः ॥ (२) ॥*॥ द्वे **'बुद्धिसामर्थ्यस्य'** ॥

अस्त्री तु संक्रमो दुर्गसंचरः ॥ २५ ॥

संक्रमणम् । घञ् (३।३।१८) । 'नोदात्तोप–' (७।३।३४) इति न वृद्धिः ॥ (१) ॥*॥ संचरणम् । 'चर गतौ' (भ्वा० प० से०) । 'पुंसि–' (३।३।११८) इति घः । दुर्गस्य संचरः ॥*॥ घञि तु 'संचारः' । **'संचारो** निर्गमो भ्रमाम्बुपथः' इति रत्नकोषः ॥ (२) ॥*॥ द्वे **'दुर्गप्रवेशनक्रियायाः'** ॥

१—'संवहनम्'–इत्यपपाठः । 'संभोगान्ते सममुपचितौ दृस्तसंवाहनानाम्' इति मेघदूतः—इति मुकुटपीयूषौ । २—संनिधं च **'संनिधं** समीपमुपकण्ठम्' इति बोपालितः—इति मुकुटः ॥

प्रत्युत्क्रमः प्रयोगार्थः

प्रत्युत्क्रमणम् । घञ् (३।३।१८) ॥ (१) ॥*॥ प्रयोजनम् । 'युजिर्योगे' (रु० उ० अ०) । घञ् (३।३।१८) । प्रयोगोऽर्थो यस्य ॥*॥ 'प्रयुद्धार्थः' इति पाठे प्रकृष्टं युद्धमर्थोऽस्य । 'प्रत्युत्क्रमः **प्रयुद्धार्थः**' इति भागुरिः ॥ (२) ॥*॥ द्वे **'कर्मारम्भे प्रथमप्रयोगस्य'** ॥

प्रक्रमः स्यादुपक्रमः ।

स्यादभ्यादानमुद्धात आरम्भः

प्रक्रमणम् । घञ् (३।३।१८) ॥ (१) ॥*॥ उपक्रमणम् ॥ (२) ॥*॥ आभिमुख्येनादानम् ॥ (३) ॥*॥ उद्धननम् । 'हन्' (अ० प० अ०) घञ् (३।३।१८) । 'हनस्तोऽचिण्णलोः' (७।३।३२) ॥ (४) ॥*॥ आरम्भणम् । 'रभ राभस्ये' (भ्वा० आ० अ०) । घञ् (३।३।१८) 'रभेरशब्लिटोश्च' (७।२।६१) इति नुम् ॥ (५) ॥*॥ पञ्च **'आरम्भस्य'** । (आद्यौ प्रथमारम्भस्य । त्रीणि आरम्भमात्रस्य—इत्यन्ये) ॥

संभ्रमस्त्वरा ॥ २६ ॥

संभ्रमणम् । 'भ्रमु अनवस्थाने' (दि० प० से०) । घञ् (३।३।१८) । 'नोदात्तोप–' (७।३।३४) इति न वृद्धिः ॥ (१) ॥*॥ त्वरणम् । 'त्वित्वरा संभ्रमे' (भ्वा० आ० से०) । 'घटादयः षितः' (भ्वा० ग०) इति षित्त्वातिदेशादङ् (३।३।१०४) । **'आवेगस्तु त्वरा त्वरिः'** इति वाचस्पतिः ॥ (२) ॥*॥ द्वे **'त्वरायाः'** ॥

प्रतिबन्धः प्रतिष्टम्भः

प्रतिबन्धनम् । 'बन्ध बन्धने' (क्र्या० प० अ०) । घञ् (३।३।१८) ॥ (१) ॥*॥ प्रतिष्टम्भनम् । 'ष्टम्भु रोधे' (सौत्रः) । घञ् (३।३।१८) ॥ (२) ॥*॥ **'विष्कम्भः** प्रतिबन्धो **वियोगः'** इति बोपालितः ॥*॥ द्वे **'रोधस्य'** ॥

अवनायस्तु निपातनम् ।

अवनयनम् । 'णीञ् प्रापणे' (भ्वा० उ० अ०) । 'अवोदोर्नियः' (३।३।२६) इति घञ् ॥ (१) ॥*॥ पतेः स्वार्थण्यन्ताल्लयुट् (३।३।११५) ॥*॥ **'नियातनम्'** इति पाठे 'यत निकारोपस्कारयोः' (चु० उ० से०) धातुः ॥ (२) ॥*॥ द्वे **'अधोनयनस्य'** ॥

उपलम्भस्त्वनुभवः

उपलम्भनम् । 'डुलभष् प्राप्तौ' (भ्वा० आ० अ०) । घञ् (२।२।१८) । 'उपसर्गात्खल्घञोः' (७।१।६७) इति नुम् ॥ (१) ॥*॥ अनुभवनम् । 'ऋदोरप्' (३।३।५७) ॥ (२) ॥*॥ द्वे **'अनुभवस्य'** ॥

समालम्भो विलेपनम् ॥ २७ ॥

समालम्भनम् । घञ् (३।३।१८) ॥ (१) ॥*॥ 'लिप उपदेहे' (तु० उ० अ०) । ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'कुङ्कुमादिनोपलेपस्य'** ॥

विप्रलम्भो विप्रयोगः

विप्रलब्धिः । लमेर्घञ् (३।३।१८) ॥ (१) ॥*॥ विप्रयोजनम् 'युजिर् योगे' (रु० उ० अ०) । घञ् (३।३।१८) ॥ (२) ॥*॥ द्वे **'रागिणोर्वियोजनस्य'** ॥

विलम्भस्त्वतिसर्जनम् ।

विलब्धिः । लमेर्घञ् (३।३।१८) ॥ (१) ॥*॥ 'सृज विसर्गे' (दि० आ० अ०) । ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'दानस्य'** ॥

विश्रावस्तु प्रविख्यातिः

विश्रवणम् । 'श्रु श्रवणे' (भ्वा० प० अ०) । 'वौ क्षुश्रुवः' इति घञ् ॥ (१) ॥*॥ प्रविख्यानम् । क्विन् (३।३।९४) ॥ (२) ॥*॥ द्वे **'अतिप्रसिद्धेः'** ॥

अवेक्षा प्रतिजागरः ॥ २८ ॥

अवेक्षणम् । 'ईक्ष दर्शने' (भ्वा० आ० से०) । 'गुरोश्च हलः' (३।३।१०३) इत्यः ॥ (१) ॥*॥ प्रतिजागरणम् । 'जागृ' (अ० प० से०) । घञ् (३।३।१८) । 'जाग्रोऽविचिण्–' (७।३।८५) इति गुणः ॥ (२) ॥*॥ द्वे **'अवेक्षणस्य'** ॥

निपाठनिपठौ पाठे

निपठनम् । 'पाठ व्यक्तायां वाचि' (भ्वा० प० से०) । 'नौ गदनद–' (३।३।६४) इत्यव् वा पक्षे घञ् (३।३।१८) ॥ (१–३) ॥*॥ त्रीणि **'पठनस्य'** ॥

तेमस्तेमौ समुन्दने ।

तेमनम् । स्तेमनम् । 'तिम ष्टिम आर्द्रीभावे' (दि० प० से०) । भावे घञ् (३।३।१८) ॥ (१) ॥*॥ (२) ॥*॥ 'उन्दी क्लेदने' (रु० प० से०) । ल्युट् (३।३।११५) ॥ (३) ॥*॥ त्रीणि **'आर्द्रीभावस्य'** ॥

आदीनवास्रवौ क्लेशे

आदानम् । 'दीङ् क्षये' (दि० आ० अ०) । भावे क्तः (३।३।११४) । 'खादय ओदितः' (दि० ग०) । 'ओदितश्च' (८।२।४४) इति नत्वम् । आदीनस्य वानम् । 'घञर्थे कः' (वा० ३।३।५८) इति बाहुलकाद्वातेः कः ॥ (१) ॥*॥ आस्रवणम् । 'स्रु गतौ' (भ्वा० प० अ०) । 'ऋदोरप्' (३।३।५७) ॥ (२) ॥*॥ क्लेशनम् । 'क्लिशू विबाधने' (क्र्या० प० से०) । घञ् (३।३।१८) ॥ (३) ॥*॥ त्रीणि **'क्लेशस्य'** ॥

मेलके सङ्गसंगमौ ॥ २९ ॥

मेलनम् । 'मिल संश्लेषे' (तु० प० से०) । घञ् (३।३।

---

१ इदमसंगतम् । उक्तसूत्रे रमेरग्रहणात् ॥ अस्मात् 'रमेरशब्लिटोः' (७।२।६४) इत्यनेन नुम् वक्तव्यः ॥

१८) स्वार्थे कन् (ज्ञापि० ५।४।५) ॥ (१) ॥*॥ सञ्जनम् । 'षञ्ज सङ्गे' (भ्वा० प० अ०) । घञ् (३।३।५८) ॥ (२) ॥*॥ संगमनम् । 'ग्रहवृद–' (३।३।५८) इत्यप् । 'ना मेलः संगमो ना वा' इत्यमरमाला ॥ (३) ॥*॥ त्रीणि **'संगमस्य'** ॥

संवीक्षणं विचयनं मार्गणं मृगणा[1] मृगः ।

सम्यक् विविधमीक्षणम् । 'ईक्ष दर्शने' (भ्वा आ० से०) । ल्युट् (३।३।११५) ॥ (१) ॥*॥ 'चिञ् चयने' (स्वा० उ० अ०) । ल्युट् (३।३।११५) ॥ (२) ॥*॥ 'मार्ग अन्वेषणे' (चु० उ० से०) ल्युट् (३।३।११५) ॥ (३) ॥*॥ 'मृग अन्वेषणे' (चु० आ० से०) अदन्तः । 'ण्यास–' (३।३।१०७) इति युच् ॥ (४) ॥*॥ घञ् (३।३।१८) ॥ (५) ॥*॥ पञ्च **'अन्वेषणस्य'** ॥

परिरम्भः परिष्वङ्गः संश्लेष उपगूहनम् ॥ ३० ॥

परिरम्भणम् । 'रभ राभस्ये' (भ्वा० आ० अ०) । घञ् (३।३।१८) । 'रभेरशब्लिटोः' (७।१।६३) इति नुम् ॥ (१) ॥*॥ परिष्वजनम् । 'ष्वञ्ज परिष्वङ्गे' (भ्वा० आ० अ०) । घञ् (३।३।१८) । 'परिनिविभ्यः–' (८।३।७०) इति षत्वम् ॥ (२) ॥*॥ संश्लेषणम् । 'श्लिष आलिङ्गने' (दि० प० अ०)। घञ् (३।३।१८) ॥ (३) ॥*॥ 'गुहू संवरणे' (भ्वा० उ० से०) । ल्युट् (३।३।११५) ॥ (४) ॥*॥ चत्वारि **'आलिङ्गनस्य'** ॥

निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम् ।

वर्णशब्दात् 'सत्याप–' (३।१।२५) इति णिच् । ल्युट् (३।३।११५) ॥ (१) ॥*॥ 'ध्यै चिन्तायाम्' (भ्वा० प० अ०) । ल्युट् (३।३।११५) ॥ (२) ॥*॥ 'दृशिर् प्रेक्षणे' (भ्वा० प० अ०) ॥ (३) ॥*॥ 'लोकृ दर्शने' (भ्वा० आ० से०) ॥ (४) ॥*॥ 'ईक्ष दर्शने' (भ्वा० आ० से०) ॥ (५) ॥*॥ पञ्च **'वीक्षणस्य'** ॥

प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः ॥ ३१ ॥

'ख्या प्रकथने' (अ० प० अ०) । चक्षिङादेशो वा ॥ (१) ॥*॥ 'असु क्षेपणे' (दि० प० से०) । ल्युट् (३।३।११५) ॥ (२) ॥*॥ प्रत्यादेशनम् । 'दिश अतिसर्जने' (तु० प० अ०) । घञ् (३।३।१८) ॥ (३) ॥*॥ निराकरणम् । कृञः क्तिन् (३।३।९४) ॥ (४) ॥*॥ चत्वारि **'निराकरणस्य'** ॥

उपशायो विशायश्च पर्यायशयनार्थकौ ।

उपशयनम् । विशयनम् । 'व्युपयोः शेतेः पर्याये' (३।३।३९) इति घञ् ॥ (१) ॥*॥ (२) ॥*॥ पर्यायेण शयनम् । पर्यायशयनमर्थौ ययोस्तौ ॥*॥ द्वे **'पर्यायेण प्रहरकादावुपशयनस्य'** ॥

अर्तनं च ऋतीया च हृणीया च घृणार्थके ॥ ३२ ॥

'ऋतिः' सौत्रः । ईयङः (३।१।३१) अभावे ल्युट् (३।३।११५) ॥ (१) ॥*॥ ईयङ्पक्षे 'अप्रत्ययात्' (३।३।१०२) ॥ (२) ॥*॥ 'हृणीङ्' कण्ड्वादिः । यक् (३।१।२७) । 'अप्रत्ययात्' (३।३।१०२) ॥ (३) ॥*॥ 'मोहो वीज्या जुगुप्सा च हृणीया हृणिया घृणा' इति वाचस्पतिः ॥*॥ चत्वारि **'जुगुप्सनस्य'** ॥

स्याद्व्यासो विपर्यासो व्यत्ययश्च विपर्यये ।

व्यत्यसनम् । 'असु क्षेपणे' (दि० प० से०) घञ् (३।३।१८) ॥ (१) ॥*॥ विपर्यसनम् । घञ् (३।३।१८) ॥ (२) ॥*॥ व्यत्ययनम् । 'इण्' (अ० प० अ०) । 'एरच्' (३।३।५६) ॥ (३) ॥*॥ विपर्यसनम् । 'इण्' (अ० प० अ०) 'एरच्' (३।३।५६) ॥ (४) ॥*॥ चत्वारि **'व्यतिक्रमस्य'** ॥

पर्ययोऽतिक्रमस्तस्मिन्नतिपात उपात्ययः ॥ ३३ ॥

पर्ययणम् । 'इण्' । 'एरच्' (३।३।५६) ॥ (१) ॥*॥ अतिक्रमणम् । घञ् (३।३।१८) ॥ (२) ॥*॥ अतिपतनम् । 'पतॢ गतौ' (भ्वा० प० से०) । घञ् (३।३।१८) ॥ (३) ॥*॥ उपात्ययनम् । 'इण्' । 'एरच्' (३।३।५६) ॥ (४) ॥*॥ चत्वारि **'अतिक्रमस्य'** ॥

प्रेषणं यत्समाहूय तत्र स्यात्प्रतिशासनम् ।

'शासु अनुशिष्टौ' (अ० प० से०) । ल्युट् (३।३।११५) ॥ (१) ॥*॥ एकं **'भृत्यादिप्रेषणस्य'** ॥

स संस्तावः क्रतुषु या स्तुतिभूमिर्द्विजन्मनाम् ॥३४॥

समेत्य स्तुवन्त्यत्र । 'ष्टुञ् स्तुतौ' (अ० उ० अ०) । 'यज्ञे समि स्तुवः' (३।३।२१) इति घञ् ॥ (१) ॥*॥ एकं **'यज्ञे स्तावकद्विजावस्थानभूमेः'** ॥

निधाय तक्ष्यते यत्र काष्ठे काष्ठं स उद्धनः ।

ऊर्ध्वं हन्यतेऽस्मिन् । 'उद्धनोऽत्याधानम्' (३।३।८०) इति साधुः ॥ (१) ॥*॥ एकम् ॥

स्तम्बघ्नस्तु स्तम्बघनः स्तम्बो येन निहन्यते ॥ ३५ ॥

स्तम्बो हन्यते येन । 'स्तम्बे क च' (३।३।८३) इति कापौ घनादेशश्च ॥*॥ (१) ॥*॥ (२) ॥*॥ द्वे **'तृणादिगुच्छोन्मूलनसाधनस्य'** ।—नीवारादिप्रहणार्थं कृतवंशपात्रस्य—इत्यन्ये ॥

आविधो विध्यते येन

आविध्यते येन । 'व्यध ताडने' (दि० प० अ०) । 'घञर्थे कः' (वा० ३।३।१८) ॥ (१) ॥*॥ एकं **'भ्रमरसूच्यादेः' 'वर्मा'** इति ख्यातस्य ॥

१—'अन्वीक्षणम्' 'अन्वेषणम्' इत्येके पेठुः इति स्वामी ॥ २—'परिचर्यापरिसर्यामृगया' (वा० ३।३।१०१) इत्यादिना निपातनात् **'मृगया'** इति मुकुटः ॥

तत्र विष्वक्समे निघः ।

नियतं हन्यते । 'निघो निमितम्' (३।३।८७) इति साधुः ॥ (१) ॥*॥ एकं **'तुल्यारोहपरिणाहवृक्षादेः'** ॥

उत्कारश्च निकारश्च द्वौ धान्योत्क्षेपणार्थकौ ॥ ३६ ॥

उत्करणम् । निकरणम् । 'क विक्षेपे' । (तु० प० से०) 'कॄ धान्ये' (३।३।३०) इति घञ् ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'धान्यानामूर्ध्वक्षेपणस्य'** ॥

निगारोद्गारविक्षावोद्ग्राहा निगरणादिषु ।

निगरणम् । 'गॄ निगरणे' (तु० प० से०) 'उच्योर्ग्रः' (३।३।२९) इति घञ् ॥ (१) ॥*॥ उद्गरणम् । 'गॄ शब्दे' (क्रया० प० से०) । 'उन्योः–' (३।३।२९) इति घञ् ॥ (१) ॥*॥ विक्षवणम् । 'टु क्षु शब्दे' (अ० प० से०) । 'वौ क्षुश्रुवः' (३।३।२५) इति घञ् ॥ (१) ॥*॥ उद्ग्रहणम् । 'ग्रह उपादाने' (क्रया० उ० से०) । 'उदि ग्रहः' (३।३।३५) इति घञ् ॥ (१) ॥*॥ आदिना उद्गरणम्, विक्षवणम्, उद्ग्रहणम् ॥*॥ क्रमेणैकैकम् ॥

आरत्यवरतिविरतय उपरामे

आर्येयम् ॥ आरमणम् । 'रमु क्रीडायाम्' (भ्वा० आ० से०) । क्तिन् (३।३।९४) ॥ (१) ॥*॥ एवमवविभ्याम् ॥ (२) ॥*॥ (३) ॥*॥ उपरमणम् । घञ् (३।३।१८) ॥ (४) ॥*॥ चत्वारि **'उपरमणस्य'** ॥

अथास्त्रियां तु निष्ठेवः ॥ ३७ ॥

निष्ठ्यूतिर्निष्ठेवनं निष्ठीवनमित्यभिघ्नानि ।

'ष्ठिवु निरसने' (दि० प० से०) घञ् (३।३।१८) । यत्तु—'निष्ठीव्यति'–इति—विगृह्य–'पचाद्यच्'—इत्युक्तं मुकुटेन । तन्न । निष्ठ्यूत्यादिभिरेकत्वासंभवात् ॥ (१) ॥*॥ क्तिन् (३।३।९४) ॥ (२) ॥*॥ ल्युट् (३।३।११५) । 'ष्ठिविषिव्योर्ल्युटि दीर्घो वा' इति स्वामी । पृषोदरादित्वाद्वा दीर्घः–इति मुकुटः ॥ (३) ॥*॥ (४) ॥*॥ चत्वारि **'मुखेन श्लेष्मनिरसनस्य'** ॥

जवने जूतिः

'जुः' सौत्रो वेगे । ल्युट् (३।३।११५) ॥ (१) ॥*॥ क्तिन् (३।३।९४) । 'ऊतियूति–' (३।३।९७) इति साधुः । (२) ॥*॥ द्वे **'वेगस्य'** ॥

सातिस्त्ववसाने स्यात्

'षोऽन्तकर्मणि' (दि० प० अ०) । क्तिन् (३।३।९४) । 'ऊतियूति–' (३।३।९७) इति साधुः ॥ (१) ॥*॥ ल्युट् (३।३।११५) ॥ (२) ॥*॥ द्वे **'समापनस्य'** ॥

अथ ज्वरे जूर्तिः ॥ ३८ ॥

ज्वरणम् । 'ज्वर रोगे' (भ्वा० प० से०) । घञ् (३।३।१८) । संज्ञापूर्वकत्वाद्वृद्ध्यभावः ॥ (१) ॥*॥ क्तिन् (३।३।९४) । 'ज्वरत्वर–' (६।४।२१) इत्यूठ् ॥ (२) ॥*॥ द्वे **'ज्वरणस्य'** ॥

उदजस्तु पशुप्रेरणम्

उदजनम् । 'अज गतौ' (भ्वा० प० से०) । 'समुदोरजः पशुषु' (३।३।६९) इत्यप् । 'अघञपोः' इति पर्युदासाद्वृद्धिभावो न ॥ (१) ॥*॥ पशूनां प्रेरणम् ॥ (२) ॥*॥ द्वे **'पशुप्रेरणस्य'** ॥

अकरणिरित्यादयः शापे ।

अकरणम् । 'आक्रोशे नञ्यनिः' (३।३।११२) ॥ (१) ॥*॥ आदिना **अजननिः, अवग्राहः, निग्राहः** । 'आक्रोशेऽवन्योर्ग्रहः' (३।३।४५) इति घञ् ॥*॥ एकम् **'आक्रोशनस्य'** ॥

गोत्रान्तेभ्यस्तस्य वृन्दमित्यौपगवकादिकम् ॥ ३९ ॥

अपत्यप्रत्ययान्तेभ्यः 'तस्य समूहः' (४।२।३७) इत्यर्थे 'गोत्रोक्षोष्ट्र–' (४।२।३९) इति वुञ् ॥ (१) ॥*॥ आदिना **'गार्गकम्' 'दाक्षकम्'** ॥

आपूपिकं शाष्कुलिकमेवमाद्यमचेतसाम् ।

अचेतसां वृन्दम् ॥*॥ अपूपानां समूहः । शष्कुलीनां समूहः । 'अचित्तहस्तिधेनोष्ठक्' (४।२।४७) । आदिना **साष्कुलिकम्** ॥

माणवानां तु माणव्यम्

माणवानां समूहः । 'ब्राह्मणमाणव–' (४।२।४२) इति यत् ॥

सहायानां सहायता ॥ ४० ॥

सहायानां समूहः । 'गजसहायाभ्याम्–' (वा० ४।२।४३) इति तल् ॥

हल्या हलानाम्

हलानां समूहः । 'पाशादिभ्यो यः' (४।२।४९) ॥

ब्राह्मण्यवाडव्ये तु द्विजन्मनाम् ।

ब्राह्मणानां वाडवानां समूहः । 'ब्राह्मण–' (४।२।४२) इति यत् ॥

द्वे पर्शुकानां पृष्ठानां पार्श्वं पृष्ठ्यमिति क्रमात् ॥ ४१ ॥

पर्शूनां समूहः । 'पर्शो णस्' (वा० ४।२।४३) । 'सिति च' (१।४।१६) इति पदलाद्धत्वाभावः ॥ (१) ॥*॥ पृष्ठानां समूहः । 'पृष्ठाद्यन्' (वा० ४।२।४२) । यज्ञविषय इदं स्मरन्ति ॥

खलानां खलिनी खल्यापि

खलानां समूहः । 'इनित्रकट्यचश्च' (४।२।५१) इ-

तीनिः ॥ (१) ॥*॥ 'खलगोरथात्' (४।२।५०) इति यः ॥ (२) ॥*॥

अथ मानुष्यकं नृणाम् ।

मनुष्याणां समूहः । 'गोत्रोक्षोष्ट्र–' (४।२।३९) इति वुञ् । 'प्रकृत्याके राजन्य–' (वा० ६।४।१६२) इति यलोपो न ॥

ग्रामता जनता धूम्या पाश्या गल्या पृथक्पृथक् ४२

ग्रामाणां समूहः जनानां समूहः । 'ग्रामजन–' (४।२।४२) इति तल् ॥ (१) ॥*॥ (१) ॥*॥ धूमानां पाशानां गलानां च समूहः । 'पाशादिभ्यो यः' (४।२।४९) ॥ (१) ॥*॥ (१) ॥ गलो बृहत्काशः ॥ (१) ॥*॥

अपिसाहस्रकारीषचार्मणाथर्वणादिकम् ।

सहस्राणाम्, करीषाणाम्, चर्मणाम्, अथर्वणाम्, च समूहः । 'भिक्षादिभ्योऽण्' (४।२।३८) । आदिना 'वार्मणम्' 'आङ्गारम्' ॥

इति संकीर्णार्थवर्गः ॥

संकीर्णार्थत्वं च घञादीनां कर्तृभिन्ने कारके भावे च विधानात्, उणादीनां भावकारकेषु विधानात्, भावे प्रायेण विग्रहो दर्शितः, कारकेषु तु यथासंभवमूह्यः ॥

इति संकीर्णवर्गविवरणम् ॥

नानार्थाः केऽपि कान्तादिवर्गेष्वेवात्र कीर्तिताः ।
भूरिप्रयोगा ये येषु पर्यायेष्वपि तेषु ते ॥ १ ॥

अनेकार्थाः केचिदत्रैव वर्गे कान्ता आदयो येषां खान्तगान्तादीनां तेषु वर्गेषु कथिताः । यथा 'क' शब्दः । ये कान्तादयो येषु पर्यायेषु प्रचुरप्रयोगाः, ते तेषु कथिताः । अपिशब्दादिहापि । यथा 'नाक'–शब्दः । अतः पुनरुक्तिर्नोद्भाव्या, इति भावः ॥

आकाशे त्रिदिवे नाकः

न अकं दुःखमत्र ॥

लोकस्तु भुवने जने ।

लोक्यते । 'लोकृ दर्शने' (भ्वा० आ० से०) । घञ् (३।३।१८) ॥

पद्ये यशसि च श्लोकः

श्लोक्यते । 'श्लोकृ संघाते' (भ्वा० आ० से०) घञ् (३।३।१८) ॥

शरे खड्गे च सायकः ॥ २ ॥

स्यति । 'षोऽन्तकर्मणि' (दि० प० अ०) । ण्वुल् (३।१।१३३) । युक् (७।३।३३) ॥

जम्बुकौ क्रोष्टुवरुणौ

जमिति । 'जमु अदने' (भ्वा० प० से०) । 'मितद्वादयश्च' (वा० ३।२।१८०) इति साधुः । **'जम्बुकः** फेरवे नीचे पश्चिमाशापतावपि' (इति मेदिनी) ॥

पृथुकौ चिपिटार्भकौ ।

पृथुरेव । 'संज्ञायां कन्' (५।३।७५) । प्रथते । 'प्रथ प्रख्याने' (भ्वा० आ० अ०) । 'अर्भकपृथुकपाका वयसि' (५।५३ उणा०) इति साधुर्वा । **'पृथुकः** पुंसि चिपिटे शिशौ स्यादभिधेयवत्' (इति मेदिनी) ॥

आलोकौ दर्शनोद्योतौ

आलोकनम् । 'लोकृ दर्शने' (भ्वा० आ० अ०) । घञ् (३।३।१८) **'आलोकस्तु** पुमान्द्योते दर्शने वन्दि भाषणे' (इति मेदिनी) ॥

भेरीपटहमानकौ ॥ ३ ॥

अनिति । 'अन प्राणने' (अ० प० से०) । ण्वुल् (३।१।१३३) । **'आनकः** पटहे भेर्यां मृदङ्गे ध्वनदम्बुदे' (इति मेदिनी) ॥

उत्सङ्गचिह्नयोरङ्कः

अङ्कतेऽनेन । 'अकि लक्षणे' (भ्वा० आ० से०) । 'हलश्च' (३।३।१२१) इति घञ् । 'अङ्को रूपकभेदागश्चिह्ने रेखाजिभूषणे । रूपकाशान्तिकोत्सङ्गस्थानेऽकं पापदुःखयोः' (इति मेदिनी) ॥

कलङ्कोऽङ्कापवादयोः ।

कलति । 'कल शब्दसंख्यानयोः' (भ्वा० आ० से०) । क्विप् (३।२।१७८) । कल् चासावङ्कश्च । **'कलङ्कोऽङ्केऽपवादे** च कालायसमलेऽपि च' (इति मेदिनी) ॥

तक्षको नागवर्धक्योः

तक्षति । 'तक्षू तनूकरणे' (भ्वा० प० से०) । ण्वुल (३।१।१३३)॥

अर्कः स्फटिकसूर्ययोः ॥ ४ ॥

अर्क्यते । 'अर्क स्तवने' (चु० प० से०) 'अर्च पूजायाम्' (भ्वा० प० से०) वा । घञ् (३।३।१८) । **'अर्कोऽर्कपर्णे** स्फटिके रवौ ताम्रे दिवस्पतौ' (इति मेदिनी) ॥

मारुते वेधसि ब्रह्मे पुंसि कः कं शिरोऽम्बुनोः ।

कायति । 'कै शब्दे' (भ्वा० प० अ०) । कचति (ते) । 'कच दीप्तौ (बन्धने)' (भ्वा० आ० से) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । **'को** ब्रह्मणि समीरात्मयमक्षेषु भास्करे । मयूरेऽग्नौ च पुंसि स्यात् सुखशीर्षजरेषु **कम्'** (इति मेदिनी) ॥

१—इदं तु न प्रकृतोपयोगि । 'अङ्क' शब्दार्थबोधकत्वात् ॥
२—इदमसंगतम् । अर्क्यते, इति विग्रहविरोधात् । निष्ठायां सेट्त्वेन कुत्वाप्राप्तेश्च ।

स्यात्पुलाकस्तुच्छधान्ये सङ्क्षेपे भक्तसिक्थके ॥ ५ ॥

पोलनम् । 'पुल महत्त्वे' (भ्वा० प० से०) । संपदादिः (वा० ३।३।१०८) । पुलमकति । 'अक कुटिलायां गतौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) पोलति वा । 'बलाकादयश्च' (उ० ४।१४) इति साधुः ॥

उलूके करिणः पुच्छमूलोपान्ते च पेचकः ।

पचति । पच्यते वा दुःखेन । 'पचिमच्योरिच्चोपधायाः' (उ० ५।३७) इति वुन् ॥

कमण्डलौ च करकः

करोति । 'कृवृदिभ्यो वुञ्' (उ० ५।३४) **'करकस्तु** पुमान्पक्षिविशेषे दाडिमेऽपि च । द्वयोर्मेघोपले न स्त्री करङ्के च कमण्डलौ' (इति मेदिनी) ॥

सुगते च विनायकः ॥ ६ ॥

विनयति । 'णीञ्' (भ्वा० उ० अ०) । ण्वुल् (३।१।१३३) । **'विनायकस्तु** हेरम्बे ताक्ष्ये विघ्ने जिने गुरौ' (इति मेदिनी) ॥

किष्कुर्हस्ते वितस्तौ च

कायतेऽनेन । 'कै शब्दे' (भ्वा० प० अ०) । 'मृगय्वादिः' (उ० १।३७) । **'किष्कु**र्द्वयोर्वितस्तौ च सप्रकोष्ठकरेऽपि च' (इति मेदिनी) ॥

शूककीटे च वृश्चिकः ।

वृश्चति । 'ओव्रश्चू छेदने' (तु० प० से०) 'व्रश्चिकृषोः किश्चन्' (उ० २।४०) । **'वृश्चिकस्तु** द्वणौ राशौ शूककीटौषधीभिदोः' (इति मेदिनी) ॥

प्रतिकूले प्रतीकस्त्रिष्वेकदेशे तु पुंस्ययम् ॥ ७ ॥

प्रतिगता ईं लक्ष्मीर्येन यं वा । 'नद्यृतश्च' (५।४।१५३) इति कप् । **'प्रतीकोऽ**वयवेऽपि स्यात्प्रतिकूलविलोमयोः' (इति मेदिनी) ॥

स्याद्भूतिकं तु भूनिम्बे कट्फले भूस्तृणेऽपि च ।

भवति । 'क्तिच्क्तौ च संज्ञायाम्' (३।२।१७४) इति क्तिच् । संज्ञायां कन् (५।३।७५) । 'स्याद्भूतिकं तु भूनिम्बे दीप्य-भूस्तृणकतृणे' (इति मेदिनी) ॥

ज्योत्स्निकायां च घोषे च कोशातकी

कोशमतति । 'अत सातत्यगमने' (भ्वा० प० से०) कुन् (उ० २।३२) । गौरादिः (४।१।४१) । **'कोशातकः** कचे पुंसि पटोल्यां घोषके स्त्रियाम्' (इति मेदिनी) । **'ज्योत्स्ना** चन्द्रमसो भासि स्फुरज्ज्योतिर्निशि स्मृता' इत्यजयः । (**'ज्यौत्स्नी** पटोलीज्योत्स्नावन्निशोः' इति हैमः) ।-ज्यौत्स्निका-पटोलिका, घोषो=ऽपामार्गः-इति स्वामी ॥

अथ कट्फले ॥ ८ ॥

सिते च खदिरे सोमवल्कः स्यात्

सोम इव वल्को बलमस्य ॥

अथ सिह्लके ।

तिलकल्के च पिण्याकः

पण्यते । 'पण व्यवहारे' (भ्वा० प० से०) । 'पिनाकादयश्च' (उ० ४।१५) इति साधुः । **'पिण्याकोऽ**स्त्री तिलकल्के हिङ्गुबाह्लीकसिह्लके' (इति मेदिनी) ॥

बाह्लीकं रामठेऽपि च ॥ ९ ॥

उह्यते । वहति वा । 'वह प्रापणे' (भ्वा० उ० अ०) । 'अलीकादयश्च' (उ० ४।२५) इति साधुः । **'बाह्लीकं** बाह्लिकं धीरहिङ्गुनोर्नाश्वदेशयोः' इति रभसः ॥

महेन्द्रगुग्गुलूलूकव्यालग्राहिषु कौशिकः ।

कुशिकस्यापत्यम् । ऋष्यण् (४।१।११४) । **'कौशिको** नकुले व्यालग्राहिगुग्गुलुशक्रयोः । विश्वामित्रे च कोशज्ञोलूकयोरपि **कौशिकः । कौशिकी** चण्डिकायां च नदीभेदे च कौशिकी' (इति विश्वः) ॥

रुक्तापशङ्कास्वातङ्कः

आतङ्कनम् । 'तकि कृच्छ्रजीवने' (भ्वा० प० से०) । घञ् (३।३।१८) 'हलश्च' । (३।३।१२१) इति करणे वा । **'आतङ्को** रोगसंतापशङ्कासु मुरजध्वनौ' (इति मेदिनी) ॥

स्वल्पेऽपि क्षुल्लकस्त्रिषु ॥ १० ॥

क्षोदनम् । 'क्षिप्विदा (क्षुदिर्) संचूर्णने' (रु० उ० अ०) । संपदादिः (वा० ३।३।१०८) । क्षुदं क्षुधं वा लाति । कुन् (उ० २।३२) । **'क्षुल्लकस्त्रिषु** नीचेऽल्पे' (इति मेदिनी) ॥

जैवातृकः शशाङ्केऽपि

जीवति । 'जीव प्राणधारणे' (भ्वा० प० से०) । 'आतृकन् वृद्धिश्च' (उ० १।७९) । **'जैवातृकः** पुमान्सोमे दीर्घायुक्कुशयोस्त्रिषु' (इति मेदिनी) ॥

खुरेऽप्यश्वस्य वर्तकः ।

वर्तते । 'वृतु वर्तने' (भ्वा० आ० से०) । ण्वुल् (३।१।१३३) । **'वर्तकस्तु** खुरेऽश्वस्य विहगे **वर्तिका** द्वयोः' इति मेदिनी) ॥

व्याघ्रेऽपि पुण्डरीको ना

पुण्डयति । 'पुडि भूषायाम्' (भ्वा० प० से०) । 'फर्फरीकादयश्च' (उ० ४।२०) इति साधुः । **'पुण्डरीकः** सिताम्भोजे सितच्छत्रे च मेषजे । पुंसि व्याघ्रोऽग्निदिङ्नागे कोशकारान्तरेऽपि च' (इति मेदिनी) ॥

यवान्यामपि दीपकः ॥ ११ ॥

दीपयति । 'दीपी दीप्तौ' (दि० आ० से०) । ण्यन्तः ।

ण्वुल् (३।२।१३३) **'दीपकं** वागलंकारे वाच्यवद्दीप्तिकारके । दीपकश्चाजमोदायां यवानीबर्हिचूडयोः' (इति मेदिनी) ॥

शालावृकाः कपिक्रोष्टुश्वानः

शालां वृणोति । 'वृञ् वरणे' (स्वा० उ० से०) 'सृवृभूशुषिमुषिभ्यः कक्' (उ० ३।४१) ।—पृषोदरादिः—इति मुकुटश्चिन्त्यः ॥

स्वर्णेऽपि गैरिकम् ।

गिरौ भवम् अध्यात्मादित्वाट्ठक् (वा० ४।३।६०) । **'गैरिकं** धातुरुक्मयोः' (इति मेदिनी) ॥

पीडार्थेऽपि व्यलीकं स्यात्

अलति । 'अल भूषणादौ' (भ्वा० प० से०) । 'अलीकादयश्च' (उ० ४।२५) इति साधुः । विगतमलीकम् । **'व्यलीको** नागरे स्मृतः । **व्यलीकम**प्रियाकार्यवैलक्ष्येष्वपि पीडने' इति विश्वः ॥

अलीकं त्वप्रियेऽनृते ॥ १२ ॥

'अलीकमप्रियेऽपि स्यादिव्य (स्याद्गोध्य) सत्ये नपुंसकम्' (इति मेदिनी) ॥

शीलान्वयावनूके

अनूच्यन्ति । 'उच समवाये' (दि० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । न्यङ्क्वादिः (७।३।५३) **'अनूकं** तु कुले शीले पुंसि स्याद्भूतजन्मनि' (इति मेदिनी) । यद्वा अनु कायति । 'कै शब्दे' (भ्वा० प० अ०) । 'आतश्चो–' (३।१।१३६) इति कः । 'अन्येषामपि–' (६।३।१३७) इति दीर्घः ॥

द्वे शल्के शकलवल्कले ।

शलति । 'शल चलने' (भ्वा० प० से०) । 'इण्भीका–' (उ० ३।४३) इति कन् ॥

साष्टे शते सुवर्णानां हेम्युरोभूषणे पले ॥ १३ ॥

दीनारेऽपि च निष्कोऽस्त्री

निश्चयेन कायति । 'आतश्चोप–' (३।१।१३६) इति कः । 'इगुपध–' (८।३।४१) इति षः । यद्वा निषीदन्ति । 'षद' । 'नौ सदेर्डिच्च' (उ० ३।४५) इति कन् । 'सदिरप्रतेः' (८।३।६६) । इति षः । **'निष्कम**स्त्री साष्टहेमशते दीनारकर्षयोः । वक्षोलंकरणे हेममात्रे हेमपदेऽपि च' (इति मेदिनी) । दीनारः सांव्यवहारिकं रूपकम् ॥

कल्कोऽस्त्री समलैनसोः ।

दम्भेऽपि

कल्यते । 'कल शब्दसंख्यानयोः' (भ्वा० आ० से०) 'कृदाधारा–' (उ० ३।४०) इति कः । 'त्रिषु पापाशये **कल्कोऽस्त्री** विट्किट्टभदन्तयोः' '(कल्कः पापाशये तापे दम्भे विट्किट्टयोरति)' इति विश्वः । **'कल्कोऽस्त्री** घृततैलादिशेषे दम्भे विभीतके ।' ('विट्किट्टयोश्च पापे च त्रिषु पापाशये पुनः)' (इति मेदिनी) ॥

अथ पिनाकोऽस्त्री शूलशंकरधन्वनोः ॥ १४ ॥

पनाय्यते । 'पन स्तुतौ' (भ्वा० प० से०) । 'पिनाकादयश्च' (उ० ४।१५) इति साधुः । **'पिनाकेऽस्त्री** रुद्रचापे पांशुवर्षत्रिशूलयोः' (इति मेदिनी) ॥

धेनुका तु करेण्वां च

धेनुरेव । स्वार्थे कन् (ज्ञापि० ५।४।५) । **'स्याद्धेनुका** करिण्यां च धेनावपि ना तु दानवविशेषे' (इति मेदिनी) ॥

मेघजाले च कालिका ।

कालो वर्णोऽस्त्यस्याः । ठन् (५।१।११५) । यद्वा काल्येव । स्वार्थे कन् (ज्ञापि० ५।४।५) । 'धूसरीयोगिनीमेदोमानवाब्देषु **कालिका** । क्रमदेयवस्तुमूल्ये काण्यें काक्यां घनेषु च' इति रभसः । **'कालिका** चण्डिकाभेदे काण्यें वृश्चिकपत्रयोः । क्रमदेयवस्तुमूल्ये धूसरीनवमेघयोः । पटोलशाखारोमालीमांसीकाकीशिवासु च । मेघावलौ च' (इति मेदिनी) ॥

कारिका यातनाकृत्योः

करणम् 'धात्वर्थनिर्देशे ण्वुल्' (वा० ३।२।१०८) । **'कारिका** नटयोषिति । कृतौ विवरणश्लोके शिल्पयातनयोरपि । नपुंसकं तु कर्मादौ **कारकं** कर्तरि त्रिषु' (इति मेदिनी) । 'वृत्त्योः' इति पाठे विवरणश्लोके ॥

कर्णिका कर्णभूषणे ॥ १५ ॥

करिहस्ताङ्गुलौ पद्मबीजकोश्याम्

कर्णेस्यालंकारः 'कर्णललाटात्–' (४।३।६५) इति कन् । **'कर्णिका** करिहस्ताग्रे करमध्याङ्गुलावपि । क्रमुकादिच्छटांशेऽब्जवराटे कर्णभूषणे । **कर्णिका** कथ्यतेऽत्यन्तसूक्ष्मवस्त्वग्निमन्थयोः' (इति मेदिनी) ॥

त्रिषूत्तरे ।

खान्तेभ्यः प्राक् ॥

वृन्दारकौ रूपिमुख्यौ

प्रशस्तं वृन्दमस्य । 'श्रृङ्गवृन्दाभ्यामारकन्' (वा० ५।२।१२२) । **'वृन्दारकः** सुरे पुंसि मनोज्ञश्रेष्ठयोस्त्रिषु' (इति मेदिनी) ॥

एके मुख्यान्यकेवलाः ॥ १६ ॥

एति ॥ 'इण् गतौ' (अ० प० अ०) । 'उ० इण्भीका–' (३।४३) इति कन् । **'एकं** संख्यान्तरे श्रेष्ठे केवलेतरयोस्त्रिषु' (इति मेदिनी) ॥

स्यादाम्भिकः कोक्कुटिको यश्चादूरेरितेक्षणः ।

कुक्कुटीं पश्यति । 'संज्ञायां ललाटकुक्कुट्यौ पश्यति' (४।४।४६) इति ठक् ॥

१—इति प्रारभ्य कणिकाशब्दार्थबोधकत्वान्न प्रकृतोपयोगि ।

लालाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च यः ॥ १७ ॥

ललाटं पश्यति । '**लालाटिकः** प्रभोर्भालदर्शिन्याश्लेषणान्तरे । कार्याक्षमे' (इति मेदिनी) । 'भावदर्शी' इति वा पाठः । '**लालाटिकः** सदालस्यप्रभुभावनिदर्शिनि' इत्यजयः ॥

इति कान्तवर्गः ॥

मयूखस्त्विट्करज्वालासु

मिमीते । 'माङ् माने' (जु० आ० अ०) । '**माङ ऊखो मय च**' (उ० ५।२५) । '**मयूखः** किरणेऽपि च । ज्वालायामपि शोभायाम्' (इति मेदिनी) ॥

अलिबाणौ शिलीमुखौ ।

शिली शल्यं मुखे यस्य ॥

शङ्खो निधौ ललाटास्थि कम्बौ न स्त्री

शाम्यत्यनेन । 'शमु उपशमे' (दि० प० से०) । 'शमेः खः' (उ० १।१०२) । '**शङ्खः** कम्बौ न योषिन्ना भालास्थिन निधिभिन्नखे' (इति मेदिनी) ॥

इन्द्रियेऽपि खम् ॥ १८ ॥

खनति । 'खनु अवदारणे' (भ्वा० उ० से०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) । 'खमिन्द्रिये पुरे क्षेत्रे शून्ये बिन्दौ विहायसि । संवेदने देवलोके शर्मण्यपि नपुंसकम्' (इति मेदिनी) ॥

घृणिज्वाले अपि शिखे

शेते । 'शीङो हुस्वश्च' (५।२४) । '**शिखा** शाखाबर्हिचूडालाङ्गलिक्यग्रमात्रके । चूडामात्रे शिफायां च ज्वालायां प्रपदेऽपि च' (इति मेदिनी) ॥

इति खान्ताः ॥

शैलवृक्षौ नगावगौ ।

न गच्छति । 'गम्लृ गतौ' (भ्वा० प० अ०) । 'अन्येष्वपि–' (वा० ३।२।४८) इति 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति वा डः । 'नगोऽप्राणिष्व–' (६।३।७७) इति नञ् वा प्रकृत्या । '**नगो** महीरुहे शैले भास्करे पवनाशने' । ('**अगः** स्यान्नगवत्तरौ शैले सरीसृपे भानौ' इति हैमः) ॥

आशुगौ वायुविशिखौ

आशु गच्छति । पूर्ववत् (वा० ३।२।४८) ॥

शरार्कविहगाः खगाः ॥ १९ ॥

खे गच्छति । पूर्ववत् (वा० ३।२।४८) । '**खगः** सूर्ये ग्रहे देवे मार्गणे च विहंगमे' (इति मेदिनी) ॥

पतङ्गौ पक्षिसूर्यौ च

पतति । 'पतॢ गतौ' (भ्वा० प० से०) । 'पतेरङ्गच् पक्षिणि' (उ० १।११९) । '**पतङ्गः** शलभे शालिप्रभेदे पक्षिसूर्ययोः । क्लीबं सूते' (इति मेदिनी) ॥

पूगः क्रमुकवृन्दयोः ।

पुनाति । 'पूङ् पवने' (क्र्या० उ० से०) । 'छापूखञिभ्यः कित्' (उ० १।१२४) इति गन् ॥

पशवोऽपि मृगाः

मृग्यते । 'मृग अन्वेषणे' (चु० आ० से०) घञ् (३।३।१९) । '**मृगः** पशौ कुरङ्गे च करिनक्षत्रभेदयोः । अन्वेषणायां याच्ञायां **मृगी** तु वनितान्तरे' (इति मेदिनी) ॥

वेगः प्रवाहजवयोरपि ॥ २० ॥

वेजनम् । 'ओविजी भयचलनयोः' (तु० आ० से०) । घञ् (३।३।१८) । ('**वेगो** रयप्रवाहयोः । रेतःकिंपाकयोश्चापि' इति हैमः) ॥

परागः कौसुमे रेणौ स्त्रानीयादौ रजस्यपि ।

परागच्छति । डः (वा० ३।२।४८) । '**परागः** कौसुमे रेणौ धूलिस्नानीययोरपि । गिरिप्रभेदे विख्यातावुपरागे च चन्दने' (इति मेदिनी) ॥

गजेऽपि नागमातङ्गौ

न अगः । '**नागं** नपुंसकं रङ्गे सीसके करणान्तरे । **नागः** पन्नगमातङ्गक्रूराचारिषु तोयदे । नागकेसरपुंनागनागदन्तकमस्तके । देहानिलप्रभेदे च श्रेष्ठे स्यादुत्तरस्थितः' (इति मेदिनी) ॥ (१) ॥*॥ मतङ्गस्यायम् । 'तस्येदम्' (४।३।१२०) इत्यण् । ('**मातङ्गः** श्वपचे गजे' इति मेदिनी) ॥ (२) ॥*॥

अपाङ्गस्तिलकेऽपि च ॥ २१ ॥

अपगतोऽङ्गात् । 'निरादयः–' (वा० २।२।१८) इति समासः । '**अपाङ्गो** नयनस्यान्ते स्याच्चित्रकप्रधानयोः' इत्यजयः । '**अपाङ्गस्त्वङ्गहीने** स्यान्नेत्रान्ते तिलकेऽपि च' (इति मेदिनी) ॥

सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु ।

सृज्यते । 'सृज विसर्गे' (दि० आ० अ०) । घञ् (३।३।१९) । '**सर्गस्तु** निश्चयाध्यायमोहोत्साहात्मसृष्टिषु' (इति मेदिनी) । निर्मोक्षस्त्यागः, मोक्षाभावो वा ॥

योगः संनहनोपायध्यानसंगतियुक्तिषु ॥ २२ ॥

योजनम् । 'युज समाधौ' (दि० आ० अ०) । 'युजिर् योगे' (रु० उ० अ०) । घञ् (३।३।१८) । '**योगोऽपूर्वार्धसंप्राप्तौ संगतिध्यानयुक्तिषु** । वपुःस्थैर्यप्रयोगे च विष्कम्भादिषु मेषजे । विश्रब्धघातके द्रव्योपायसंनहनेष्वपि । कार्मणेऽपि च' (इति मेदिनी) । संनहनं कवचम् । उपायः सामादिः ॥

भोगः सुखे रुयादिभृतावहेश्च फणकाययोः ।

भोजनम् । 'भुज पालनाभ्यवहारयोः' (रु० प० अ०) । 'भुजो कौटिल्ये' (तु० प० से०) घञ् (३।२।१८) । '**भोगः**

सुखे धने पुंसि (चाहेः) शरीरफणयोर्मतः । पालनेऽभ्यवहारे च योषिदादिभृतावपि' (इति मेदिनी) । भृतिर्भाडिः । आदिना हस्त्यश्वादिकर्मकाराणां च भृतिः । 'पालनेऽभ्यवहारे च निर्वेशे पण्ययोषिताम्' इति विश्वः ॥

चातके हरिणे पुंसि सारङ्गः शबले त्रिषु ॥ २३ ॥

सारमङ्गं यस्य । शकन्ध्वादिः (वा० ६।१।९४) । सारं गच्छति, इति वा । खच् (वा० ३।२।३८) । सहारङ्गेण, इति वा । **'सारङ्गः** पुंसि हरिणे चातके च मतङ्गजे । शबले त्रिषु' (इति मेदिनी) ॥

कपौ च प्लवगः

प्लवेन गच्छति । डः (वा० ३।२।४८) । **'प्लवगो** वानरे मेके सारथौ चोष्णदीधितेः' (इति मेदिनी) ॥

शापे त्वभिषङ्गः पराभवे ।

अभिषज्जनम् । 'षञ्ज संगे' (भ्वा० प० अ०) । 'उपसर्गात्–' (८।३।६५) इति षः । **'अभिषङ्गः** पुंलिङ्गः पराभवाक्रोशशपथेषु' (इति मेदिनी) ॥

यानाद्यङ्गे युगः पुंसि युगं युग्मे कृतादिषु ॥ २४ ॥

योजनम् । युज्यते वा । 'युजिर् योगे' (रु० उ० अ०) । घञ् (३।३।१८,१९) । संज्ञापूर्वकत्वान्न गुणः । 'रथयुग–' (४।४।७६) इति निपातनाद्वा । **'युगो** रथे हलाद्यङ्गे न द्वयोस्तु कृतादिषु । युग्मे हस्तचतुष्केऽपि वृद्धिनामौषधेऽपि च' (इति मेदिनी) ॥

स्वर्गेषुपशुवाग्वज्रदिग्नेत्रघृणिभूजले ।
लक्ष्यदृष्ट्या स्त्रियां पुंसि गौः

गच्छति । गम्यते वा, अनेन वा । 'गमेर्डोः' (उ० २।६७) । 'गौर्नादित्ये बलीवर्दे किरणक्रतुभेदयोः । स्त्री तु स्याद्दिशि भारत्यां भूमौ च सुरभावपि । नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु' इति केशवः । 'गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान् । स्त्री सौरभेयीदृग्बाणदिग्वाग्भूष्वप्सु भूम्नि च' (इति मेदिनी) ॥

लिङ्गं चिह्नशेफसोः ॥ २५ ॥

लिङ्ग्यतेऽनेन । 'लिगि गतौ' (भ्वा० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । **'लिङ्गं** चिह्नेऽनुमाने च सांख्योक्तप्रकृतावपि । शिवमूर्तिविशेषे च मेहनेऽपि नपुंसकम्' (इति मेदिनी) ॥

शृङ्गं प्राधान्यसान्वोश्च

शृणाति । 'शॄ हिंसायाम्' (क्र्या० प० से०) । 'शृणातेर्ह्रस्वश्च' (उ० १।१२६) इति गन् नुट् च । **'शृङ्गं** प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके । विषाणोत्कर्षयोश्चाथ **शृङ्गः** स्यात्कूर्चशीर्षके । स्त्री विषायां स्वर्णमीनभेदयोर्ऋषभौषधौ' (इति मेदिनी) ॥

वराङ्गं मूर्धगुह्ययोः ।

वरं च तदङ्गं च । **'वराङ्गं** योनिमातङ्गमस्तकेषु गुडत्वचि' (इति मेदिनी) ॥

भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु ॥ २६ ॥

भज्यते । 'भज सेवायाम्' (भ्वा० उ० से०) 'पुंसि–' (३।३।११८) इति घः । 'खनो घ च' (३।३।१२५) इति धो वा । **'भगं** श्रीयोनिवीर्येच्छाज्ञानवैराग्यकीर्तिषु । माहात्म्यैश्वर्ययत्नेषु धर्मे मोक्षेऽथ ना रवौ' (इति मेदिनी) ॥

इति गान्ताः ॥

परिघः परिघातेऽस्त्रेऽपि

परिहननम् । 'परिहन्यतेऽनेन वा' । 'हन हिंसागत्योः' (अ० प० अ०) । 'परौ घः' (३।३।८४) इत्यप् घादेशश्च । 'परिघो योगभेदेऽस्त्रविशेषेऽर्गलघातयोः' (इति मेदिनी) ॥

'परेश्च घाङ्कयोः' (८।२।२२) इति लत्वमपि । **('परिघः** काचकलशे घटे प्राकारगोपुरे' इति हैमभेदिन्यौ) ॥

ओघो वृन्देऽम्भसां रये ।

वहति 'वह प्रापणे' (भ्वा० उ० अ०) । पचाद्यच् (३।१।१३४) । न्यङ्क्वादित्वात् (७।३।५३) साधुः । **'ओघो** वेगे जलस्य च । वृन्दे परम्परायां च द्रुतनृत्योपदेशयोः' (इति मेदिनी) ॥

मूल्ये पूजाविधावर्घः

अर्घ्यतेऽनेन । 'अर्ह पूजायाम्' (भ्वा० प० से०) । **'हलश्च'** (३।३।१२१) इति घञ् । न्यङ्क्वादिः (७।३।५३) । 'अर्घिर्घान्तरं वा' ॥

अंहोदुःखव्यसनेष्वघम् ॥ २७ ॥

अध्यतेऽनेन । 'अधि गत्याक्षेपे' (भ्वा० आ० से०) । घञ् (३।३।१९,१२१) 'अनित्यमागमशासनम्' इति नुम् ॥

त्रिष्विष्टेऽल्पे लघुः

लङ्घ्यते । 'लघि गतौ' (भ्वा० आ० से०) । 'लङ्घिबंह्लोर्नलोपश्च' (उ० १२९) इत्युः । 'कृष्णागुरुणि शीघ्रे च **लघु** क्लीबेऽगुरौ त्रिषु । निःसारे च मनोज्ञे च पृक्कायां च लघुः स्त्रियाम्' इति रभसः । **'लघुनि** गुरौ च मनोज्ञे निःसारे वाच्यवत् क्लीबम् । शीघ्रे कृष्णागुरुणि च पृक्कानामौषधौ तु स्त्री' (इति मेदिनी) ॥

इति घान्ताः ॥

काचाः शिक्यमृद्भेदद्दृग्रुजः ।

कच्यते अनेन वा 'कच बन्धे' (भ्वा० आ० से०) । घञ् (३।३।१९,१२१) 'न क्वादेः' (७।३।५९) इति कुत्वं न । णिजन्तात् पचाद्यच् (३।१।१३४) वा । **'काचः** शिक्ये मणौ नेत्ररोगभेदे मृदन्तरे' (इति मेदिनी) ॥

विपर्यासे विस्तरे च प्रपञ्चः

प्रपञ्चयते । 'पचि व्यक्तीकरणे' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) । **'प्रपञ्चः** संचयेऽपि स्याद्विस्तरे च प्रतारणे' (इति मेदिनी) ॥

पावके शुचिः ॥ २८ ॥

मास्यमात्ये चात्युपधे पुंसि मेध्ये सिते त्रिषु ।

शोचत्यनेन । 'शुच शोके' (भ्वा० प० से०) । 'इगुपधात् कित्' (उ० ४।१२०) इतीन् । **'शुचिर्ग्रीष्माग्निशुद्धारेष्वाषाढे** शुद्धमन्त्रिणि । ज्येष्ठे च पुंसि धवले शुद्धेऽनुपहते त्रिषु' (इति मेदिनी) । उपधामुत्कोचमतिक्रान्तेऽमात्ये ॥

अभिष्वङ्गे स्पृहायां च गभस्तौ च रुचिः स्त्रियाम् २९

रोचते । 'रुच दीप्तावभिप्रीतौ च' (भ्वा० आ० से०) । 'इगुपधात्कित्' (उ० ४।१२०) इतीन् । **'रुचिः** स्त्री दीप्तिशोभायामभिष्वङ्गाभिलाषयोः' (इति मेदिनी) ॥

इति चान्ताः ॥

केकिताक्ष्यावहिभुजौ

अहिं भुङ्क्ते । 'भुज पालनाभ्यवहारयोः' (रु० उ० अ०) । क्विप् (३।२।७८) ॥

दन्तविप्राण्डजा द्विजाः ।

द्विर्जायते । 'अन्येष्वपि–' (३।२।१०१) इति डः । **'द्विजः** स्याद्ब्राह्मणक्षत्रवैश्यदन्ताण्डजेषु ना । **द्विजा** भार्यां हरेणौ च' (इति मेदिनी) ॥

अजा विष्णुहरच्छागाः

न जायते । पूर्ववत् (३।२।१०२) डः । अजति वा । 'बहुलं तृणि' (वा० २।४।५४) इति जी न । पचाद्यच् । (३।१।१३४) । **'अजो** हरौ हरे कामे विधौ छागे रघोः सुते' इति विश्वः ॥

गोष्ठाध्वनिवहा व्रजाः ॥ ३० ॥

व्रजति । अस्मिन् वा । 'व्रज गतौ (भ्वा० प० से०) । पचाद्यच् । 'गोचरसंचर–' (३।३।११९) इति वा साधुः ॥

धर्मराजौ जिनयमौ

धर्मेण राजति । अच् (३।१।१३४) । धर्मस्य राजा । धर्मश्चासौ राजा च इति वा । 'राजाहःसखिभ्यष्टच्' (५।४।९१) । **'धर्मराजो** यमे बुद्धे युधिष्ठिरनृपे पुमान्' (इति मेदिनी) ॥

कुञ्जो दन्तेऽपि न स्त्रियाम् ।

कौ जायते । 'सप्तम्यां जनेर्डः' (३।२।९७) । पृषोदरादिः (६।३।१०९) । यत्तु—कुञ्जन्त्यत्र । 'कुजि अव्यक्ते शब्दे' । 'हलश्च' (३।३।१२१) । इति घञ्—इत्याह । तन्न । 'कुजि' धातोरप्रसिद्धत्वात् । 'गुजि' धातोर्दर्शनात् । **'कुञ्जोऽस्त्रियां** निकुञ्जेऽपि हनौ दन्तेऽपि दन्तिनाम्' (इति मेदिनी) ॥

बलजे क्षेत्रपूर्द्वारे बलजा वल्गुदर्शना ॥ ३१ ॥

बले जातम् । 'सप्तम्यां जनेर्डः' (३।२।९७) । **'बलजं** गोपुरे क्षेत्रे सस्यसंगरयोरपि । बलजा वरयोषायां यूथ्याम्' (इति मेदिनी) ॥

समक्ष्मांशे रणेऽप्याजिः

अजन्त्यस्याम् । 'अज गतौ' (भ्वा० प० से०) । 'अज्यतिभ्यां च' (उ० ४।१३१) इतीण् । 'अथाजिः स्त्री समभूमौ च सङ्गामे' (इति मेदिनी) ॥

प्रजा स्यात्संततौ जने ।

प्रजायते । 'उपसर्गे च संज्ञायाम्' (३।२।९९) इति जनेर्डः ॥

अब्जौ शङ्खशशाङ्कौ च

अप्सु जायते । 'सप्तम्याम्–' (३।२।९७) इति डः । **'अब्जोऽस्त्री** शङ्खे, ना निचुले धन्वन्तरौ च हिमकिरणे । क्लीबं पद्मे' (इति मेदिनी) ॥

स्वके नित्ये निजं त्रिषु ॥ ३२ ॥

नि जायते । 'उपसर्गे च–' (३।२।९९) इति डः ॥

इति जान्ताः ।

पुंस्यात्मनि प्रवीणे च क्षेत्रज्ञो वाच्यलिङ्गकः ।

क्षेत्रं जानाति । 'ज्ञा अवबोधने' (क्या० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥

संज्ञा स्याच्चेतना नामहस्ताद्यैश्चार्थसूचना ॥ ३३ ॥

संज्ञानम् । 'आतश्चोप–' (३।३।१०६) इत्यङ् । **'संज्ञा** नामनि गायत्र्यां चेतनारवियोषितोः । अर्थस्य सूचनायां च हस्ताद्यैरपि योषिति' (इति मेदिनी) ॥

इति ज्ञान्ताः ॥

काकेभगण्डौ करटौ

'क' इति रटति । 'रट शब्दे' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । **'करटो** गजगण्डे स्यात्कुसुम्भे निन्द्यजीवने । एकादशाहादिश्राद्धे दुर्दुरूढेऽपि वायसे । **करटो** वाद्यभेदे' (इति मेदिनी) ॥

गजगण्डकटी कटौ ।

कटति । 'कटे वर्षावरणयोः' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । **'कटः** श्रोणौ क्रियाकारे कलिञ्जेऽतिशये शवे । समये गजगण्डेऽपि पिप्पल्यां च **कटी** मता' इति विश्वः । **'कटः** श्रोणौ द्वयोः पुंसि कलिञ्जेऽतिशये शवे' (इति मेदिनी) ॥

शिपिविष्टस्तु खलतौ दुश्चर्मणि महेश्वरे ॥ ३४ ॥

शिपिषु रश्मिषु पशुषु वा विष्टः । **'शिपिविष्टः** शिवः शौरिर्दुश्चर्मा खलतिस्तथा' ॥

देवशिल्पिन्यपि त्वष्टा

त्वक्षति । त्वक्ष्यते च । 'त्वक्षू तनूकरणे' (भ्वा० प० से०) । 'नप्तृनेष्टृ–' (उ० २।९५) इति साधुः । **'त्वष्टा** पुमान्देवशिल्पितक्ष्णोरादित्यभिद्यपि' (इति मेदिनी) ॥

दिष्टं दैवेऽपि न द्वयोः ।

दिश्यते स्म । 'दिश अतिसर्जने' (तु० उ० अ०) । क्तः (३।२।१०२) **'दिष्टं** दैवे पुमान्काले' (इति मेदिनी) ॥

रसे कटुः कटुकार्ये त्रिषु मत्सरतीक्ष्णयोः ॥ ३५ ॥

कटति । 'कटे' (भ्वा० प० से०) । मृगय्वादित्वात् (उ० १।३५) उः । **'कटुः** स्त्री कटुरोहिण्यां लताराजिकयोरपि । नपुंसकमकार्ये स्यात्पुंलिङ्गो रसमात्रके । त्रिषु तद्वत्सुगन्ध्योश्च मत्सरेऽपि खरेऽपि च' (इति मेदिनी) ॥

रिष्टं क्षेमाशुभाभावेषु

रेषणम् । रिष्यते स्म, ऋषति इति वा । 'रिष हिंसायाम्' (दि० प० से०) । क्तः (३।३।११४,३।२।१०२) । **'रिष्टं** स्यादशुभैनसोः' इत्यजयः । 'रिष्टं क्षेमाशुभाभावे पुंसि खड्गे च फेनिले' (इति मेदिनी) ॥

अरिष्टे तु शुभाशुभे ।

न रिष्टम् । **'अरिष्टो** लशुने निम्बे फेनिले काककङ्कयोः । **अरिष्टमशुभे** तक्रे सूतिकागार आसवे । शुभे मरणचिह्ने च' (इति मेदिनी) ॥

मायानिश्चलयन्त्रेषु कैतवानृतराशिषु ॥ ३६ ॥

अयोधने शैलशृङ्गे सीराङ्गे कूटमस्त्रियाम् ।

माया विपरीतदर्शनम् । **यन्त्रं** मृगबन्धनविशेषः । सीराङ्गे फालाधारे । कूट्यते । 'कूट आप्रदाने' (चु० आ० से०) । पचाद्यच् (३।१।१३४) ॥

सूक्ष्मैलायां त्रुटिः स्त्री स्यात्कालेल्पे संशयेपि सा ॥ ३७ ॥

त्रुट्यते । अनेन वा । 'त्रुट छेदने' (चु० आ० से०) । **'इगुपधात्–'** (उ० ४।१२०) इतीन् । **'त्रुटिः** स्त्री संशये स्वल्पे सूक्ष्मैलाकालमानयोः' (इति मेदिनी) ॥

अत्युत्कर्षाश्रयः कोट्यः

कोटयते । 'कूट प्रतापने' (चु० आ० से०) । 'अच इः' (उ० ४।१३९) । **'कोटिः** स्त्री धनुषोऽग्रेऽश्रौ संख्याभेदप्रकर्षयोः' (इति मेदिनी) ॥

मूले लमकचे जटा ।

जटति । 'जट संघाते' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । **'जटा** लमकचे मूले मांसां क्षे पुनर्जटी' (इति मेदिनी) ॥

व्युष्टिः फले समृद्धौ च

व्युच्छनम् । व्युच्छयते वा । 'उच्छी विवासे' (भ्वा० प० से०) । क्तिन् (३।३।९४) ॥

दृष्टिर्ज्ञानेऽक्षिणि दर्शने ॥ ३८ ॥

दर्शनम् । 'दृशिर् प्रेक्षणे' (भ्वा० प० अ०) । क्तिन् (३।३।९४) । करणे वा ॥

इष्टिर्यागेच्छयोः

एषणम् । 'इषु इच्छायाम्' (तु० प० से०) । क्तिन् (३।३।९३) इज्यतेऽनया वा, इति वा । यजेः क्तिन् (३।३।९३) ॥ 'इष्टिर्मताभिलाषेऽपि संग्रहश्लोकयागयोः' (इति मेदिनी) ॥

सृष्टिर्निश्चिते बहुनि[1] त्रिषु ।

सर्जनम् । 'सृज विसर्गे' (दि० आ० अ०) । क्तिन् (३।३।९४) । 'अकारान्तपाठे भावे क्तः' (३।३।११४) । 'मुक्तनिर्मितयोः प्राज्ये त्रिषु **सृष्टं** तु निश्चिते' इति रुद्रः ॥

कष्टे तु कृच्छ्रगहने

कष्यते स्म । 'कष हिंसायाम्' (भ्वा० प० से०) । क्तः । (३।२।१०२) । 'कृच्छ्रगहनयोः कषः' (७।२।२२) इति नेट्

दक्षामन्दागदेषु तु ॥ ३९ ॥

पटुः

पाटयति । 'पट गतौ' (भ्वा० प० से०) ण्यन्तः । 'फलिपाटि–' (उ० १।१८) इत्युः पटादेशश्च । **'पटुस्तीक्ष्णे** स्फुटे दक्षे निष्ठुरे निर्दयेऽपि च' इति रुद्रः । **'पटुर्दक्षे** च नीरोगे चतुरेऽप्यभिधेयवत् । पटोले तु पुमान् क्लीबे छत्रालवणयोरपि' (इति मेदिनी) ॥

द्वौ[2] वाच्यलिङ्गौ च

इति टान्ताः ॥

नीलकण्ठः शिवेऽपि च ।

नीलः कण्ठो यस्य । **'कालकण्ठस्तु** दात्यूहे कलविङ्के च खञ्जने । सितापाङ्गे हरे पीतसारके **नीलकण्ठवत्'** इति विश्वः॥

पुंसि कोष्ठोऽन्तर्जठरं कुसूलोऽन्तर्गृहं तथा ॥ ४० ॥

कुष्यते । 'कुष निष्कर्षे' (क्र्या० प० से०) । 'उषिकुषि–' (उ० २।४) इति थन् । **'कोष्ठः** कुसूले चात्मीये मध्ये कुक्षेर्गृहस्य च' (इति मेदिनी) ॥

निष्ठा निष्पत्तिनाशान्ताः

निष्ठानम् । 'ष्ठा गतिनिवृत्तौ' (भ्वा० प० अ०) । 'आतश्चोपसर्गे' (३।३।१०६) इत्यङ् । **'निष्ठा** निष्पत्तिनाशान्तयाच्यानिर्वहणेषु च' (इति मेदिनी) ॥

१—बहुनि प्रचुरे—इति मुकुटः । २—द्वौ कष्टपटू—इति स्वामिपीयूषौ ॥

काष्ठोत्कर्षे स्थितौ दिशि ।

काशते । 'काशृ दीप्तौ' (भ्वा० आ० से०) । 'हनिकुषि–' (उ० २।२) इति क्थन् । '**काष्ठा** दारुहरिद्रायां कालमानप्रकर्षयोः । स्थानमात्रे दिशि च स्त्री दारुणि स्यान्नपुंसकम्' (इति मेदिनी) ॥

त्रिषु ज्येष्ठोऽतिशस्तेऽपि

अतिशयेन प्रशस्तः । 'अतिशायने तमबिष्ठनौ' (५।३।५५) । 'ज्य च्य' (५।३।६१) इति प्रशस्यस्य ज्यादेशः । '**ज्येष्ठः** श्रेष्ठे च वृद्धे च त्रिषु, मासान्तरे पुमान् । **ज्येष्ठा** तु गृहगोधाख्यजन्तुनक्षत्रभेदयोः' (इति मेदिनी) ॥

कनिष्ठोऽतियुवाल्पयोः ॥ ४१ ॥

अतिशयेन युवा, अल्पो वा । इष्ठन् (५।३।५५) । 'युवाल्पयोः कनन्यतरस्याम्' (५।३।६४) । '**कनिष्ठो**ऽतियुवाल्पाल्पानुजे स्त्री दुर्बलाङ्गुलौ' (इति मेदिनी) ॥

इति ठान्ताः ॥

दण्डोऽस्त्री लगुडेऽपि स्यात्

दण्ड्यति । अनेन वा । 'दण्ड निपातने' (चु० उ० से०) । प्रचाद्यच् (३।१।१३४) 'पुंसि–' (३।४।११८) इति घो वा । दमेः (दि० प० से०) डः (उ० १।११४) वा । '**दण्डो** यमे मानभेदे लगुडे दमसैन्ययोः । व्यूहभेदे प्रकाण्डेऽश्वे कोणमन्थानयोरपि । अभिमाने ग्रहे **दण्डश्चण्डांशोः** पारिपार्श्विके' इति विश्वः ॥

गुडो गोलेक्षुपाकयोः ।

गुडति । 'गुड वेष्टने' (तु० व० से०) । 'इगुपध–' (३।१।१३५) इति कः । '**गुडः** स्याद्गोलके हस्तिसंनाहेक्षुविकारयोः । **गुडा** क्षुद्रां च कथिता गुडिकायां च योषिति' (इति मेदिनी) ॥

सर्पमांसात्पशू व्याडौ

व्याडति । 'अड उद्यमे' (भ्वा० प० से०) । पचाद्यच् (३।१।१३५) । '**व्याडो** व्याघ्रे खले सर्पे' इति रभसः ॥

गोभूवाचस्त्विडा इला ॥ ४२ ॥

इलति । इल 'उत्क्षेपे' (तु० प० से०) 'इगुपध–' (३।१।१३५) इति कः । ('**इला** कलत्रे सौम्यस्य धरित्र्यां गवि वाचि च' इति मेदिनी) ॥ (२) ॥*॥ डलयोरेकत्वस्मरणादिडा । '**इडा** तु बुधयोषिति । सौरभेय्यां च वचने वसुमत्यामपि स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥

क्ष्वेडा वंशशलाकापि

क्ष्वेलति । 'क्ष्वेल्ल चलने' (भ्वा० प० से०) । पचाद्यच् (३।१।१३५) । डलयोरेकत्वम् । '**क्ष्वेडो** ध्वनौ कर्णामये विषे । **क्ष्वेडा** वंशशलाकायां सिंहनादे च योषिति । लोहितार्कपर्णफले घोषपुष्पे नपुंसकम् । दुरासदे च कुटिले वाच्यलिङ्गः प्रकीर्तितः' (इति मेदिनी) ॥

नाडी कालेऽपि षट्क्षणे ।

नालयति । 'णल गन्धे' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) डलयोरेकत्वम् । गौरादिः (४।१।१४१) । '**नाडी** नाले व्रणान्तरे । शिरायां गण्डदूर्वायां चर्यायां कुहनस्य च । तथा षट्क्षणकालेऽपि' (इति मेदिनी) ॥

काण्डोस्त्री दण्डबाणार्घवर्गावसरवारिषु ॥ ४३ ॥

कलति । 'कनी दीप्तौ' (भ्वा० प० से०) । अमन्ताड्डः (उ० १।११४) । 'क्रादिभ्यः कित्' (उ० १।११५) । 'अनुनासिकस्य–' (६।४।११५) इति दीर्घः । '**काण्डं** चावसरे बाणे नाले स्कन्धे च शाखिनाम् । स्तम्बे रहसि वर्गे च' इति धरणिः । ('**काण्डः** स्तम्बे तरुस्कन्धे बाणेऽवसरनीरयोः । कुत्सिते वृक्षभिन्नाडीवृन्दे रहसि न स्त्रियाम्' (इति मेदिनी) ॥

स्याद्भाण्डमश्वाभरणेऽमत्रे मूलधनिग्धने ।

भण्यते । 'भण शब्दे' (भ्वा० प० से०) । पूर्ववत् पृषोदरादिः (६।३।१०९) । '**भाण्डं** भूषणमात्रे स्यात्' इति धरणिः । '**भाण्डं** पात्रे धनिग्मूलधने भूषाश्वभूषयोः' (इति मेदिनी) ॥

इति डान्ताः ॥

भृशप्रतिज्ञयोर्वाढम्

उह्यते स्म । 'वह प्रापणे' (भ्वा० उ० अ०) । 'क्तः' (३।१।१०२) । 'श्रुन्धस्वान्त–' (७।२।१८) इति साधुः ॥

प्रगाढं भृशकृच्छ्रयोः ॥ ४४ ॥

प्रगाह्यते स्म । 'गाहू विलोडने' (भ्वा० आ० से०) । क्तः (३।१।१०२) । 'यस्य विभाषा' (७।२।१५) इति नेट् । '**प्रगाढं** स्याद्दृढे कृच्छ्रे' इति धरणिः ॥

शक्तस्थूलौ त्रिषु दृढौ

दर्हति, दृंहति वा स्म । 'दृह दृहि वृद्धौ' (भ्वा० प० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । 'दृढः स्थूलबलयोः' (७।२।२०) इति साधुः । '**दृढः** स्थूले नितान्ते च प्रगाढे बलवत्यपि' (इति मेदिनी) ॥

व्यूढौ विन्यस्तसंहतौ ।

विशेषेणोह्यते स्म । 'वह प्रापणे' (भ्वा० उ० अ०) । क्तः (३।२।१०२) । '**व्यूढः** संहतविन्यस्ते पृथुलेऽप्यभिधेयवत्' (इति मेदिनी) ॥

इति ढान्ताः ॥

भ्रूणोऽर्भके स्त्रैणगर्भे

भ्रूण्यते । 'भ्रूण आशायाम्' (चु० आ० से०) । घञ् (३।३।१८) । '**भ्रूणः** स्त्रीगर्भडिम्भयोः' (इति मेदिनी) । स्त्रिया अयम् । 'स्त्रीपुंसाभ्याम्–' (४।१।८७) इति नञ् । स्त्रैणश्चासौ गर्भश्च । शाल्यादिगर्भव्यावृत्त्यर्थं विशेषणम् ॥

१—अर्वा कुत्सितः— इति मुकुटः ॥

वाणो वलिसुते शरे ॥ ४५ ॥

वाणयति । 'वण शब्दे' (भ्वा० आ० से०) स्वार्थण्यन्तः । अचाद्यच् (३।१।१३४) **'वाणः** स्याद्दोस्तने दैत्यभेदे केवलकाण्डयोः । **वाणा** तु वाणमूले स्त्री नीलझिण्ट्यां पुनर्द्वयोः' (इति मेदिनी) ॥

कणोऽतिसूक्ष्मे धान्यांशे

कणति । 'कण निमीलने' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । **'कणा** जीरककुम्भीरमक्षिकापिप्पलीषु च । **कणोऽ**तिसूक्ष्मे धान्यांशे' (इति मेदिनी) ॥

संघाते प्रमथे गणः ।

गण्यते । 'गण संख्याने' (चु० उ० से०) । घञ् (३।३।१९) । अच् (३।३।५६) वा । **'गणः** स्यात्प्रमथे सङ्घे संख्यासैन्यप्रभेदयोः' (इति मेदिनी) ॥

पणो द्यूतादिषूत्सृष्टे भृतौ मूल्ये धनेऽपि च ॥ ४६ ॥

पणनम् । अनेन वा । 'नित्यं पणः परिमाणे' (३।३।६६) इत्यप् । **'पणो** माने वराटानां मूल्ये कार्षापणे धने । द्यूते विक्रय्यशाकादेर्बद्धमुष्टौ ग्लहे भृतौ' इति धरणिः ॥

मौर्व्यां द्रव्याश्रिते सत्त्वशुक्लसंध्यादिके गुणः ।

गुण्यते । 'गुण आमन्त्रणे' (चु० उ० से०) । घञ् (३।३।१९) **'गुणो** मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये । त्यागशौर्यादिसत्त्वादिसंध्याद्यावृत्तिरज्जुषु । शुक्लादावपि बुध्यां च' (इति मेदिनी) ॥

निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः ॥४७॥

क्षणोति । 'क्षणु हिंसायाम्' (त० उ० से०) । पचाद्यच् (३।१।१३४) । **'क्षणो** व्यापारशून्यत्वमुहूर्तोत्सवपर्वसु' इति रुद्रः ॥

वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु चाक्षरे ।

वर्ण्यते । 'वर्ण प्रेरणे' (चु० उ० से०) । घञ् (३।३।१८) । **'वर्णो** द्विजादिशुक्लादियशोगुणकथासु च । स्तुतौ ना न स्त्रियां भेदरूपाक्षरविलेखने' (इति मेदिनी) ॥

अरुणो भास्करेऽपि स्याद्वर्णभेदेऽपि च त्रिषु ॥४८॥

ऋच्छति । 'ऋ गतौ' (भ्वा० प० से०) । 'अर्तेश्च' (उ० ३।६०) इत्युनन् । **'अरुणो**ऽव्यक्तरागेऽर्के संध्यारागेऽर्कसारथौ । निःशब्दे कपिले कुष्ठभेदे ना गुणिनि त्रिषु । **अरुणा**तिविषाश्यामामञ्जिष्ठात्रिवृतासु च' (इति मेदिनी) ॥

स्थाणुः शर्वेऽपि च

तिष्ठति । 'स्थो णुः' (उ० ३।३७) । **'स्थाणुः** कीले हरे पुमान् । अस्त्री ध्रुवे' (इति मेदिनी) ॥

द्रोणः काकेऽपि च

द्रवति । 'द्रु गतौ' (भ्वा० प० अ०) । 'कृवृजॄसि–' (उ० ३।१०) इति नः । **'द्रोणो**ऽस्त्रियामाढके स्यादाढकादिचतुष्टये । पुमान् कृपीपतौ कृष्णकाके स्त्री नीवृदन्तरे । स्त्रियां काष्ठाम्बुवाहिन्यां गवादन्यामपीष्यते' (इति मेदिनी) ॥

रवे रणः ।

रणति । 'रण शब्दे' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । **'रणः** कोणे क्षणे पुंसि समरे पुंनपुंसकम्' (इति मेदिनी) ॥

ग्रामणीर्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु ॥ ४९ ॥

ग्रामं नयति । 'णीञ्' (भ्वा० उ० अ०) । 'सत्सू–' (३।२।६१) इति क्विप् । 'अग्रग्रामाभ्याम्–' इति णत्वम् । **'ग्रामणी**र्भौगिके पत्यौ प्रधाने नापितेऽपि च । **ग्रामणी**र्नीलिकायां च ग्रामेयीपण्ययोषितोः' इति विश्वः । **'ग्रामीणा** नीलिकायां स्त्री ग्रामोद्भूतेऽभिधेयवत्' (इति मेदिनी) ॥

ऊर्णा मेषादिलोम्नि स्यादावर्ते चान्तरा भ्रुवौ ।

ऊर्णोति । 'ऊर्णुञ् आच्छादने' (अ० उ० से०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । आदिना शशोष्ट्रमृगादिग्रहः ॥

हरिणी स्यान्मृगी हेमप्रतिमा हरिता च या ॥५०॥

हरिणस्य स्त्री । 'पुंयोगाद्–' (४।१।४८) इति ङीष् । (हरितवर्णविशिष्टा वा) । 'वर्णादनुदात्तात्–' (४।१।३९) इति ङीन्नौ । **'हरिणी** हरितायां च नारीभिद्वृत्तभेदयोः । सुवर्णप्रतिमायां च' (इति मेदिनी) ॥

त्रिषु पाण्डौ च हरिणः

हरिति । 'हृञ्श्यास्त्या–' (उ० २।४६) इतीनच् । **'हरिणः** पुंसि सारङ्गे शबले त्वभिधेयवत्' (इति मेदिनी) ॥

स्थूणा स्तम्भेऽपि वेश्मनः ।

तिष्ठति । 'राज्ञासान्ना–' (उ० २।१५) इति साधुः । **'स्थूणा** स्यात् सूर्म्यां स्तम्भेऽपि वेश्मनः' (इति मेदिनी) ॥

तृष्णे स्पृहापिपासे द्वे

तर्षणम् । 'तितृष पिपासायाम्' (दि० प० से०) । 'तृषिशुषिरसिभ्यः कित्' (उ० ३।१२) इति नः ॥

जुगुप्साकरुणे घृणे ॥ ५१ ॥

घर्णनम् । 'घृणु दीप्तौ' (त० उ० से०) । भिदाद्यङ् (३।३।१०४) ॥

---

१ विश्वे मकारात्प्राक् रेफादर्शनेन ग्रामोऽस्त्यस्याः–इत्यनेकार्थकैरवाकरकौमुदीदर्शनेन 'ग्रामिणी' इत्येव पाठोऽनुमीयते ॥ २—'भ्रुवौ' इत्यत्र 'अन्तरान्तरेण युक्ते' (२।३।४) इति द्वितीया इति स्वामी ॥

वणिक्पथे च विपणिः

विपण्यते । अस्यां वा । 'पण व्यवहारे' (भ्वा० प० से०) । 'सर्वधातुभ्य इन्' (उ० ४।११८) । 'आपणे पण्यवीथ्यां च पण्ये च **विपणिः** स्त्रियाम्' इति रुद्रः ॥

सुरा प्रत्यक् च वारुणी ।

वरुणस्येयम् । 'तस्येदम्' (४।३।१२०) इत्यण् । '**वारुणी** गण्डदूर्वायां प्रतीचीसुरयोः स्त्रियाम्' (इति मेदिनी) ॥

करेणुरिभ्यां स्त्री नेभे

करोति । 'कृहृभ्यामेणुः' (उ० २।१) '**करेणु**र्गजयोषायां स्त्रियां पुंसि मतङ्गजे' (इति मेदिनी) । के रेणुरस्येति वा । '**करेणुश्च गरेणुश्च** करिणीकर्णिकारयोः' इति रन्तिदेवः ॥

द्रविणं तु बलं धनम् ॥ ५२ ॥

द्रूयते, द्रवति वा । 'द्रु गतौ' (भ्वा० प० अ०) । 'द्रुदक्षिभ्यामिनन्' (उ० २।५०) । '**द्रविणं** न द्रव्योर्वित्ते काञ्चने च पराक्रमे' (इति मेदिनी) ॥

शरणं गृहरक्षित्रोः

शृणाति । 'शॄ हिंसायाम्' (क्र्या० प० से०) ल्युट् (३।३।११३) । भावे (३।३।१११) वा । '**शरणं** गृहरक्षित्रोर्वैधरक्षणयोरपि' (इति मेदिनी) ॥

श्रीपर्णं कमलेऽपि च ।

श्रीः पर्णेऽस्य । '**श्रीपर्णी** कुम्भीगम्भार्योः क्लीबे पद्माग्निमन्थयोः' इति रभसः ॥

विषाभिमरलोहेषु तीक्ष्णं क्लीबे खरे त्रिषु ॥ ५३ ॥

तेजयति । 'तिज निशाने' (भ्वा० आ० से०) । 'तिजेर्दीर्घश्च' (उ० ३।१८) इति क्सनः । '**तीक्ष्णं** सामुद्रलवणे विषलोहाजिमुष्ककं । क्लीबं य (ज) वाग्रजे पुंसि तिग्मात्मत्यागिनोस्त्रिषु' (इति मेदिनी) । 'भवेद**भिमरो** युद्धे बले स्वबलसाध्वसे' (इति मेदिनी) ॥

प्रमाणं हेतुमर्यादाशास्त्रेयत्ताप्रमातृषु ।

प्रमीयते । प्रमिमीतेऽनेन वा । करणे (३।३।११७) कर्तरि (३।३।१३३) भावे (३।३।११५) च ल्युट् । 'प्रमाणं नित्यमर्यादाशास्त्रेषु सत्यवादिनि । इयत्तायां च हेतौ च क्लीबैकत्वे प्रमातरि' (इति मेदिनी) ॥

करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि ॥ ५४ ॥

'**करणं** कारणे कार्ये साधनेन्द्रियकर्मसु । कायस्थे व्रतबन्धे च नाट्यगीतप्रभेदयोः । पुमान् शूद्राविशोः पुत्रे वानरादौ च कीर्त्यते' इत्यजयः । कर्तृकर्मकरणभावेषु ल्युट् (३।३।११३,११५,११७) ॥

प्राण्युत्पादे संसरणमसंबाधचमूगतौ ।
घण्टापथे

सम्यक्सरन्त्यनेन । 'सृ गतौ' (भ्वा० प० अ०) । करणे ल्युट् (३।३।११७) ॥

अथ वान्तान्ने समुद्धरणमुन्नये ॥ ५५ ॥

सम्यग् उद्धियते । उद्धरतेर्ल्युट् (३।३।११३) । भावे (३।३।११५) वा । 'भुक्तोज्झितोन्मूलितयोः स्यादुद्धरणमुन्नये' इति रभसः ॥

अंतस्त्रिषु

आणान्तम् ॥

विषाणं स्यात्पशुशृङ्गेभदन्तयोः ।

व्यस्ति । 'अस भुवि' (अ० प० से०) चानश् (३।२।१२९) । 'श्नसोरल्लोपः' (६।४।१११) । '**उपसर्ग**प्रादुर्-' (८।३।८७) इति षत्वम् । यत्तु-वेवेष्टि । विषाणम् । विषेः शानच्—इति मुकुटः । तन्न । शपः श्लौ सति 'श्लौ' (६।१।१०) इति प्रसङ्गात् । '**विषाणी** क्षीरकाकोल्यामजशृङ्ग्यां च योषिति । कुष्ठनामौषधौ क्लीबं त्रिषु शृङ्गेभदन्तयोः' (इति मेदिनी) ॥

प्रवणः क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे ॥ ५६ ॥

प्रवन्तेऽनेन । अत्र वा । 'प्रुङ् गतौ' (भ्वा० आ० अ०) । ल्युट् (३।३।११७) । '**प्रवणः** क्रमनिम्नोर्व्यां प्रह्वे च स्याच्चतुष्पथे । आयत्ते च तथा क्षी(क्ष)णे प्रगुणे समुदाहृतः' इति धरणिः । '**प्रवणो** ना चतुष्पथे । क्रमनिम्नभवीभागोदारप्रह्वेषु च त्रिषु' (इति मेदिनी) ॥

संकीर्णौ निचिताशुद्धौ

संकीर्यते स्म । 'कॄ विक्षेपे' (तु० प० से०) । क्तः (३।२।१०२) । '**संकीर्ण** संकटे व्याप्ते कुत्रचिद्वर्णसंकरे' इत्यजयः । '**संकीर्ण** निचितेऽपि स्यादशुद्धे चाभिधेयवत्' (इति मेदिनी)॥

ईरिणं शून्यामूषरम् ।

ऋच्छन्ति यस्मिन् । 'ऋ गतौ' (भ्वा० प० अ०) । 'अर्तेः किदीच्च' (उ० २।५१) इतीनन् । '**ईरिणं** तूषरे शून्ये' (इति मेदिनी) ॥*॥ इदादिरपि । '**ईरिणं** निराश्रये भूभागे कथितमूषरे' इति हस्वादावजयः ॥

इति णान्ताः ॥

देवसूर्यौ विवस्वान्तौ

विवस्तेजोऽस्यास्ति । मतुप् (५।२।९४) । '**विवस्वांस्तु** सुरे सूर्ये तन्नगर्यां **विवस्वती**' (इति मेदिनी) ॥

१—स्वतो नतु वाच्यलिङ्गतया-इति स्वामिग्रन्थावलोकनेन 'स्वतः' इति पाठोऽनुमीयते । तथाच 'त्रिषु' इति विषाणशब्दस्यैव विशेषणम् । अत एव 'प्रवण' शब्दव्याख्यायां-त्रिष्वित्येके संकीर्ण यावत्—इत्युक्तं स्वामिना संगच्छते ॥

सरस्वन्तौ नदार्णवौ ॥ ५७ ॥

सरो गमनमस्यास्ति । मतुप् (५।२।९४) । **'सरस्वांस्तु** नदे चाब्धौ ना, न्यवद्रसिके, स्त्रियाम् । वाणीस्त्रीरत्नवाग्देवी-गोनदीषु नदीभिदि' (इति मेदिनी) ॥

पक्षितार्क्ष्यौ गरुत्मन्तौ

गरुतः सन्त्यस्य । मतुप् (५।२।९४) ॥

शकुन्तौ भासपक्षिणौ ।

शक्नोति । 'शकेरुनोन्तोन्त्युनयः' (उ० ३।४९) इत्युन्तः । **'भासो** भासि समाख्यातो गोष्टकुक्कुटगृध्रयोः' इति विश्वः ।

अभ्युत्पातौ धूमकेतू

धूमः केतुश्चिह्नमस्य । **'धूमकेतुः** स्मृतो वह्नावुत्पातग्रहभेदयोः' इति विश्वः ॥

जीमूतौ मेघपर्वतौ ॥ ५८ ॥

जीवनं मुञ्चति । पृषोदरादिः (६।३।१०९) । **'जीमूतोऽद्रौ** धृतिकरे देवताडे पयोधरे' (इति मेदिनी) ॥

हस्तौ तु पाणिनक्षत्रे

हसति । 'हसे हसने' (भ्वा० प० से०) । 'हसिभृग्रिण्–' (उ० ३।८६) इति तन् । **'हस्तः** करे करिकरे सप्रकोष्ठकरेऽपि च । ऋक्षे केशात्परो व्राते' (इति मेदिनी) ॥

मरुतौ पवनामरौ ।

म्रियतेऽनेन । 'मृङ् प्राणत्यागे' (तु० आ० अ०) । 'मृग्रोरुतिः' (उ० १।९४) । 'मरुद्देवे समीरे ना ग्रन्थिपर्णे नपुंसकम्' इति (मेदिनी) ॥

यन्ता हस्तिपके सूते

यच्छति । 'यमु उपरमे' (भ्वा० प० अ०) । तृच् (३।१।१३३) ॥

भर्ता धातरि पोष्टरि ॥ ५९ ॥

बिभर्ति । 'डुभृञ् धारणपोषणयोः' (जु० उ० अ०) । भरति । 'भृञ् भरणे' (भ्वा० उ० अ०) । तृच् (३।१।१३३) **'भर्ता** स्वामिनि पुंसि स्यात्त्रिषु धातरि पोष्टरि' (इति मेदिनी) ॥

यानपात्रे शिशौ पोतः

पुनाति । पूयते वा । 'पूञ् पवने' (क्रया० उ० से०) । 'हसिमृग्रिण्–' (उ० ३।८६) इनि तन् । **'पोतः** शिशौ वह्नित्रे च गृहस्थाने च वाससि' इति मेदिनी) ॥

प्रेतः प्राप्यन्तरे मृते ।

प्रकर्षेणेतः । **'प्रेतो** भूतान्तरे पुंसि मृते स्याद्वाच्यलिङ्गकः' (इति मेदिनी) ॥

ग्रहभेदे ध्वजे केतुः

चाय्यते । अनेन वा । 'चायृ पूजानिशामनयोः' (भ्वा० उ० से०) 'चायः किः' (उ० १।७४) इति तुः **'केतुर्ना** रुक्पताकारिग्रहोत्पातेषु लक्ष्मणि' (इति मेदिनी) ॥

पार्थिवे तनये सुतः ॥ ६० ॥

सूयते स्म । 'षुञ् अभिषवे' (वा० उ० अ०) । सौति स्म वा । 'षु प्रसवैश्वर्ययोः' (अ० प० से०) । क्तः (३।२।१०२, ४।७२) । **'सुतः** स्यात्पार्थिवे पुत्रे रूप्यपत्ये तु **सुता** स्मृता' (इति मेदिनी) ॥

स्थपतिः कारुभेदेऽपि

तिष्ठन्त्यस्मिन् । 'घञर्थे कः' (वा० ३।३।५८) स्थश्चासौ पतिश्च । **'स्थपतिः** कञ्चुकिन्यपि । जीवेष्टियाजके शिल्पिभेदे ना सत्तमे त्रिषु' (इति मेदिनी) ॥

भूभृद्भूमिधरे नृपे ।

भुवं बिभर्ति । 'डुभृञ्' (जु० उ० अ०) क्विप् (३।२।७६) तुक् (६।१।७१) ॥

मूर्धाभिषिक्तो भूपेऽपि

मूर्धनि अभिषिच्यते स्म । 'सिच क्षरणे' (तु० उ० अ०) । क्तः (३।२।१०२) । **'मूर्धाभिषिक्तो** भूपाले मन्त्रिणि क्षत्रियेऽपि च' (इति मेदिनी) ॥

ऋतुः स्त्रीकुसुमेऽपि च ॥ ६१ ॥

ऋच्छति । 'अर्तेश्च तुः' । (उ० १।७२) किच्च । 'ऋतुर्मासि वसन्तादौ धीरे स्त्रीकुसुमेऽपि च' इति धरणिः ॥

विष्णावप्यजिताव्यक्तौ

न जीयते स्म । 'जि अभिभवे' (भ्वा० प० अ०) । क्तः (३।२।१०२) । **'अजितो** ना हरौ त्रिषु । अनिर्जिते च' इति विश्वः (मेदिनी) । न व्यज्यते स्म । **'अञ्जू** व्यक्त्यादौ' (रु० प० से०) । क्तः (३।२।१०२) । **'अव्यक्तः** शंकरे विष्णावव्यक्तं महदादिके । आत्मन्यपि स्यादव्यक्तमस्फुटे लभिधेयवत्' इति विश्वः ॥

सूतस्त्वष्टरि सारथौ ।

सुवति स्म, सूयते स्म वा 'षू प्रेरणे' (तु० प० से०) । क्तः (३।२।१०२) । **'सूतस्तु** सारथौ तक्षिण क्षत्रियाद्ब्राह्मणीसुते । बन्दिपारदयोः पुंसि प्रसूते प्रेरिते त्रिषु' (इति मेदिनी) ॥

व्यक्तः प्राज्ञेऽपि

व्यज्यते स्म । 'अञ्जू' (रु० प० से०) । क्तः (३।२।१०२) । **'व्यक्तः** स्फुटमनीषिणोः' (इति मेदिनी) ॥

दृष्टान्तावुभे शास्त्रनिदर्शने ॥ ६२ ॥

दृष्टोऽन्तोऽत्र । **'अन्तः** प्रान्तेऽन्तिके नाशे' इति विश्वः । **'दृष्टान्त** उदाहृतौ । शास्त्रे च मरणे' (इति मेदिनी) ॥

क्षत्ता स्यात्सारथौ द्वाःस्थे क्षत्रियायां च शूद्रजे ।

क्षदति । 'क्षद' सौत्रः । 'तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां

चानिटौ' (उ० २।९४) । **'क्षत्ता** शूद्रात्क्षत्रियाजे प्रतीहारे च सारथौ । भुजिष्यातनये क्षत्ता नियुक्ते च प्रजासृजि' इति विश्वः ॥

वृत्तान्तः स्यात्प्रकरणे प्रकारे कात्स्न्र्यवार्तयोः ॥६३॥

वृत्तोऽन्तोऽस्य । वृत्तस्यान्तः, इति वा । **'वृत्तान्तोऽवसरे** भावे कात्स्न्र्यवार्ताविशेषयोः । **वृत्तान्तः** प्रक्रियायां च' इति विश्वः ॥

आनर्तः समरे नृत्यस्थाननीवृद्विशेषयोः ।

आनृत्यन्त्यत्र । 'नृती गात्रविक्षेपे' (दि० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । **'आनर्तो** नृत्यशालायां जने जनपदान्तरे' इत्यजयः । **'आनर्तो** देशभेदेऽपि नृत्यस्थाने जने रणे' (इति मेदिनी) ॥

कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु ॥ ६४ ॥

कृतोऽन्तो येन, यस्य वा ॥

श्लेष्मादि रसरक्तादि महाभूतानि तद्गुणाः ।
इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः ॥ ६५ ॥

आदिना पित्तादिग्रहः । रसः प्रथम आहारस्य विकारः । आदिना वसामज्जशुक्रादिग्रहः । तद्गुणा गन्धादयः । गैरिकादिः । दधाति, दीयते वा 'धाञ्' (जु० उ० अ०) । 'सितनिगमि–' (उ० १।६९) इति तुन् ॥

कक्षान्तरेऽपि शुद्धान्तो नृपस्यासर्वगोचरे ।

शुद्धोऽन्तोऽस्य । 'असर्व–' इति पूर्वविशेषणम् । **'शुद्धान्तोऽन्तःपुरे गुह्यकक्षामेदे च भूपतेः'** इत्यजयः ॥

कासूसामर्थ्ययोः शक्तिः

शक्यतेऽनया । 'शक्लृ शक्तौ' (स्वा० प० अ०) । क्तिन् (३।३।९४) । **'शक्तिरस्त्रान्तरे गौर्यामुत्साहादौ बले स्त्रियाम्'** (इति मेदिनी) ॥*॥ **'कासू**र्विकलवाचि स्यात्**कासूः** शक्त्यायुधेऽपि च' (इति विश्वः) ॥

मूर्तिः काठिन्यकाययोः ॥ ६६ ॥

मूर्च्छ्यते । 'मूर्च्छा मोहादौ' (भ्वा० प० से०) । क्तिन् (३।३।९४) ॥

विस्तारबह्व्योर्व्रततिः

व्रजन्ती ततिरस्याः । पृषोदरादिः (६।३।१०९) । श्रीभोजस्तु 'व्रज' धातुं स्त्रीकृतवान् । ततो बाहुलकादतिः ॥

वसती रात्रिवेश्मनोः ।

वसन्त्यस्याम् । 'वस निवासे' (भ्वा० प० अ०) । 'वहिवसि–' (उ० ४।६०) इत्यतिः । **'वसतिः** स्यात्स्त्रियां वासे यामिन्यां च निकेतने' (इति मेदिनी) ॥

क्षयार्चयोरपचितिः

अपचीयते । क्तिन् (३।३।९४) । अपचाय्यते स्म वा । 'चायृ पूजादौ' (भ्वा० उ० से०) । 'चायः चिः क्तिनि' (वा० ७।२।३०) इति चिः । **'भवेदपचितिः** पूजाव्ययनिष्कृतिहानिषु' (इति मेदिनी) ॥

सातिर्दानावसानयोः ॥ ६७ ॥

सननम् । 'षणु दाने' (त० उ० से०) । सानं वा । 'षोऽन्तकर्मणि' (दि० प० अ०) । क्तिन् (३।३।९४) । 'ऊतियूतिजूति–' (३।३।९७) इति साधुः । यत्तु—'सनः क्तिचि' (६।४।४५) इति नलोपादनयोः सातिः सन्तिश्च—इति मुकुटो व्याख्यत् । **तन्न** । क्तिचः कर्तरि विधानाद्भावकर्मणोरसंभवात् ॥

अर्तिः पीडाधनुष्कोट्योः

अर्दनम् । 'अर्द हिंसायाम्' (चु० उ० से०) । 'क्तिन्नाबादिभ्यः' (वा० ३।३।९४) ॥*॥ आङ ऋच्छतेः क्तिनि 'उपसर्गादृति—' (६।१।९१) इति वृद्धौ **'आर्तिः'** इति कश्चित् ॥

जातिः सामान्यजन्मनोः ।

जननम् । अनया, इति वा । 'जनी' (दि० आ० से०) । क्तिन् (३।३।९४) । 'जनसन–' (६।४।४२) इत्यात्वम् । **'जाति**श्छन्दसि सामान्ये मालत्यां गोत्रजन्मनोः । **जाति**र्जातीफले धान्यां चुल्लीकम्पिल्लयोरपि' इति विश्वः । **'जातिः** स्त्री गोत्रजन्मनोः । अश्मन्तिकामलक्योश्च सामान्यच्छन्दसोरपि । जातीफले च मालत्याम्' (इति मेदिनी) ॥

प्रचारस्यन्दयो रीतिः

रीयते । 'रीङ् स्रवणे' (दि० आ० अ०) । रिणाति । 'री गतिरेषणयोः' (क्र्या० प० से०) । क्तिच् (३।३।१७४) । रयणम् । क्तिन् (३।३।९४) वा । **'रीतिः** प्रचारे स्यन्दे च लोहकिट्टारकूटयोः' इति विश्वः ॥

ईतिर्डिम्बप्रवासयोः ॥ ६८ ॥

ईयतेऽनया । 'ईङ् गतौ' (दि० आ० अ०) । क्तिन् (३।३।९४) । डिम्बो विप्लवः । **'ईतिर्डिम्बे** प्रवासेऽतिवृष्ट्यादिषट्सु च स्त्रियाम्' (इति मेदिनी) ॥

उदयेऽधिगमे प्राप्तिः

प्रापणम् । 'आपॢ व्याप्तौ' (स्वा० प० अ०) । 'क्तिन्नाबादिभ्यः' (वा० ३।३।९४) । **'प्राप्तिर्मोदये** । लाभेऽपि च स्त्रियाम्' (इति मेदिनी) ॥

त्रेता त्वग्नित्रये युगे ।

त्रीन्मेदानिता । पृषोदरादिः (६।३।१०९) ॥

१—अतिवृष्टिरनावृष्टिर्मूषिकाः शलभाः शुकाः । अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः' इति स्वामिमुकुटौ ॥

वीणाभेदेऽपि महती

मह्यते । 'मह पूजायाम्' (भ्वा० प० से०) । 'वर्तमाने पृषत्–' (उ० २।८४) इति साधुः । '**महती** वल्लकीभेदे रा(प्रा)ज्ये तु स्यान्नपुंसकम् । तत्त्वभेदे पुमान् श्रेष्ठे (वृद्धे) वाच्यवत्' (इति मेदिनी) ॥

भूतिर्भस्मनि संपदि ॥ ६९ ॥

भवति । अनया वा । भवनं वा । क्तिच् (३।३।१७४) । '**भूति**र्भस्मनि संपत्तिहस्तिश्रृङ्गारयोः स्त्रियाम्' (इति मेदिनी) ॥

नदीनगर्योर्नागानां भोगवती

भोगोऽस्त्यस्याम् । मतुप् (५।२।९४) । 'अथ **भोगवती** नागपुरीनद्योरहौ पुमान्' (इति मेदिनी) ॥

अथ संगरे ।

सङ्गे सभायां समितिः

समयनम् । समीयते वास्याम् । 'इण् गतौ' (अ० प० अ०) । क्तिन् (३।३।९४) ॥

क्षयवासावपि क्षितिः ॥ ७० ॥

क्षयणम् । क्षीयतेऽस्यां वा । 'क्षि क्षये' (भ्वा० प० अ०) । 'क्षि निवासगत्योः' (तु० प० अ०) । क्तिन् (३।३।९४) । '**क्षिति**र्निवासे मेदिन्यां कालभेदे क्षये स्त्रियाम्' (इति मेदिनी) ॥

रवेरर्चिश्च शस्त्रं च वह्निज्वाला च हेतयः ।

हन्ति हिनोति वा । हन्यतेऽनया वा । क्तिन् (३।३।९४) । 'ऊतियूति–' (३।३।९७) इति साधुः ॥

जगती जगति छन्दोविशेषेऽपि क्षितावपि ॥ ७१ ॥

गच्छति । 'वर्तमाने पृषत्–' (उ० २।८४) इति साधुः । यद्वा 'द्युतिगमिजुहोतीनां द्वे च' (वा० ३।२।१७८) इति क्विप् । 'गमः क्वौ' (६।४।४०) इति मलोपः । तुक् (६।१।७१) '**जगत्**स्याद्विष्टपे क्लीबं ना वायौ जंगमे त्रिषु । **जगती** भुवने क्ष्मायां छन्दोभेदे जनेऽपि च' (इति मेदिनी) । द्वादशाक्षरपादे ॥

पङ्क्तिश्छन्दोऽपि दशमम्

पञ्चनम् । 'पचि व्यक्तीकरणे' (भ्वा० आ० से०) । क्तिन् (३।३।९४) । यद्वा पञ्चकद्वयम् 'पङ्क्तिविंशति–' (४।१।५९) इति साधुः । (दशमं छन्दः) दशाक्षरपादम् । '**पङ्क्ति**र्दशाक्षरच्छन्दोदशसंख्यादिषु स्त्रियाम्' इति (मेदिनी) ॥

स्यात्प्रभावेऽपि चायतिः ।

आयम्यतेऽनया । आयमनं वा । 'यमु उपरमे' (भ्वा० प० अ०) । क्तिन् (३।३।९४) । '**आयतिः** संयमे दैर्घ्ये प्रभावागामिकालयोः' (इति विश्वः) ॥

पत्तिर्गतौ च

पतति । 'पत्लृ गतौ' (भ्वा० प० से०) । क्तिच् (७।३।१७४) । '**पत्ति**र्ना पदगे स्त्रियाम् । गतावेकरथैकेभव्यश्वपञ्चपदातिके' (इति मेदिनी) ॥

मूले तु पक्षितिः पक्षभेदयोः ॥ ७२ ॥

पक्षस्य मूलम् । 'पक्षात्तिः' (५।२।२५) । प्रतिपदि, गरुन्मूले च ॥

प्रकृतिर्योनिलिङ्गे च

प्रकुरुते । क्तिच् (३।३।१७४) । क्तिन् (३।३।९४) । '**प्रकृति**र्गुणसाम्ये स्यादमात्यादिस्वभावयोः । योनौ लिङ्गे पौरवर्गे' (इति मेदिनी) ॥

कैशिक्याद्याश्च वृत्तयः ।

'भारती सात्वती चैव कैशिक्यारभटी तथा । चतस्रो वृत्तयश्चैता यासु नाट्यं प्रतिष्ठितम्' इति भरतः । '**वृत्ति**र्विवरणे जीव्ये कैशिक्यादिषु चेष्यते' इति विश्वः ॥

सिकताः स्युर्वालुकापि

सिच्यते । 'षिच क्षरणे' (तु० उ० अ०) । बाहुलकादतच् । पृषोदरादिः (६।३।१०९) । '**सिकता** स्त्री सिकतिले वालुकायां तु भूमनि' (इति मेदिनी) ॥

वेदे श्रवसि च श्रुतिः ॥ ७३ ॥

श्रूयते । अनया वा । 'श्रु श्रवणे' (भ्वा० प० अ०) । क्तिन् । '**श्रुति**ः श्रोत्रे तथाम्नाये वार्तायां श्रोत्रकर्मणि' इति विश्वः ॥

वनिता जनितात्यर्थानुरागायां च योषिति ।

वन्यते स्म । 'वनु याचने' (त० आ० से०) क्तः (३।२।१०२) । 'यस्य विभाषा' (७।२।१५) इत्यस्यानित्यत्वादिट् । 'वन संभक्तौ' (भ्वा० प० से०) वा । '**वनिता** जातरागस्त्री स्त्रियोः स्त्री त्रिषु याचिते' (इति मेदिनी) ॥

गुप्तिः क्षितिव्युदासेऽपि

गुप्यते । गोपनं वा । 'गुपू रक्षणे' (भ्वा० प० से०) । क्तिन् (३।३।९४) । '**गुप्ति**ः कारा च रक्षा च दीर्णं च विवरं भुवः' इति शाश्वतः । '**गुप्ति**स्त्रयवकरस्थाने कारागारे च रक्षणे' (इति मेदिनी) ॥

धृतिर्धारणधैर्ययोः ॥ ७४ ॥

धरणम् । 'धृञ् धारणे' (भ्वा० उ० अ०) । क्तिन् (३।३।९४) । '**धृति**र्योगान्तरे धैर्ये धारणाध्वरतुष्टिषु' इति विश्वः ॥

१—'उक्तात्युक्ता तथा मध्या प्रतिष्ठान्या सुपूर्विका । गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च' इत्यनुक्रमोक्तेषु दशमं छन्दः पङ्क्तिः । 'पङ्क्तिश्छन्दो दशापि स्यात्' इति क्वचित्पाठः— इति पीयूषव्याख्या ॥

१—पक्षभेदौ द्वौ । एको मासार्धः । अपरः पक्ष्यवयवः । तयोर्मूले पक्षतिः इति पीयूषव्याख्या ॥

बृहती क्षुद्रवार्ताकीछन्दोभेदे महत्यपि ।

वर्हते । 'बृह वृद्धौ' (भ्वा० प० से०) । 'वर्तमाने पृषत्–' (उ० २।८४) इति साधुः । **'बृहती** क्षुद्रवार्ताक्यां कण्टकार्यां च वाचि च । वारिधान्यां महत्यां च छन्दोवसनभेदयोः' इति विश्वः ॥

वासिता स्त्रीकरिण्योश्च

वासयति । 'वस निवासे' (भ्वा० प० अ०) ण्यन्तः 'वास उपसेवायाम्' (चु० उ० से०) वा । क्तः (३।३।१७४) । **'वासिता** करिणीनार्योर्**वासितं** सुरभीकृते । ध्वानमात्रे खगारावे **वासितं** वस्त्रवेष्टिते' इति विश्वः ॥*॥ स्वामी तु (**वाशिता** इति) तालव्यमध्यपाठमाह । तत्र 'वाश्र शब्दे' (दि० आ० से०) ॥

वार्ता वृत्तौ जनश्रुतौ ॥ ७५ ॥

वार्तं फल्गुन्यरोगे च त्रिषु

वृतिरस्त्यस्याम् । 'वृत्तेश्च' (वा० ५।२।१०१) इति णः । **'वार्ता** वार्तिज्ञगे वृत्तौ **वार्ता** कृष्याद्युदन्तयोः । (वृत्तिमन्नीरुजोर्**वार्ता वार्तं**मारोग्यफल्गुनोः)' इति विश्वः । **'वार्तं** फल्गुन्यरोगे स्यादारोग्ये वृत्तिमत्यपि' इति धरणिः ॥

अप्सु च घृतामृते ।

म्रियते । जिघर्ति वा । 'घृ क्षरणदीप्त्योः' (जु० प० अ०) । 'अज्जिघृसिभ्यः क्तः' (उ० ३।८९) । 'घृतमाज्ये जले क्लीबं प्रदीप्ते त्वभिधेयवत्' (इति मेदिनी) ॥ न मृतं मरणमत्र । **'अमृतं** यज्ञशेषे स्यात्पीयूषे सलिले घृते । अयाचिते च मोक्षे च ना धन्वन्तरिदेवयोः' (इति मेदिनी) ॥

कलधौतं रूप्यहेम्नोः

कलो मलो धौतोऽस्य । **'कलधौतं** सुवर्णे स्याद्रजते च नपुंसकम्' (इति मेदिनी) ॥

निमित्तं हेतुलक्ष्मणोः ॥ ७६ ॥

निमेत्यति । 'चि मिदा स्नेहने' (दि० प० से०) । 'क्षीतः क्तः' (३।२।१९७) । संज्ञापूर्वकत्वान्न नत्वम् ।—'अनात्मनेपदनिमित्ते' (७।२।३६) इति निर्देशाद्वा ॥

श्रुतं शास्त्रावधृतयोः

श्रूयते स्म । श्रवणं वा । 'श्रु श्रवणे' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥

युगपर्याप्तयोः कृतम् ।

अकारि । 'डुकृञ्' (त० उ० अ०) । क्तः (३।२।१०२) । 'शक्तौ निवारणे तृप्तौ **पर्याप्तं** स्याद्यथेप्सिते' इति रुद्रः । **'कृतं** युगेऽलमर्थे स्याद्विहिते हिंसिते त्रिषु' (इति मेदिनी) ॥

अत्याहितं महाभीतिः कर्म जीवानपेक्षि च ॥ ७७ ॥

अतीवाधीयते स्म मनसि । 'डुधाञ्' (जु० उ० अ०) । 'दधातेर्हिः' (७।४।४२) ॥

युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु ।

'प्राण्यतीते' इति समाहारद्वन्द्वः । अभवत् । 'भू' । गत्यर्था–' (३।४।७२) । **'भूतं** क्ष्मादौ पिशाचादौ जन्तौ क्लीबं त्रिषूचिते । प्राप्ते वृत्ते समे सत्ये देवयोन्यन्तरे तु ना । कुमारेऽपि' (इति मेदिनी) ॥

वृत्तं पद्ये चरित्रे त्रिष्वतीते दृढनिस्तले ॥ ७८ ॥

वर्तते स्म । वर्तनं वा । 'वृतु वर्तने' (भ्वा० आ० से०) 'वरणे' (दि० आ० से०) वा । 'गत्यर्था–' (३।४।७२) इति क्तः । भावे (३।३।११४) वा । **'वृत्तोऽधीतेप्यतीतेऽपि** वर्तुलेऽपि मृते वृते । वृत्तेऽन्यलिङ्गं वा क्लीबे छन्दश्चारित्रवृत्तिषु' (इति मेदिनी) ॥

महद्राज्यं च

मह्यते । 'मह पूजायाम्' (भ्वा० प० से०) । 'वर्तमाने पृषत्–' (उ० २।८४) इति साधुः । **'महती** वल्लकीभेदे राज्ये तु स्यान्नपुंसकम् । तत्त्वभेदे पुमान्श्रेष्ठे वाच्यवत्' (इति मेदिनी) ॥

अवगीतं जन्ये स्याद्गर्हिते त्रिषु ।

अवगीयते स्म । 'गै शब्दे' (भ्वा० प० से०) । क्तः (३।२।१०२) । **'अवगीतस्तु** निर्वादे दु(द)ष्टगर्हितयोरपि' (इति मेदिनी) । जन्ये जनापवादे ॥

श्वेतं रूप्येऽपि

श्वेतते । 'श्विता वर्णे' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) । **'श्वेतो** द्वीपाद्रिभेदयोः । **श्वेता** वराटिकाकाष्ठपाटलाशङ्खिनीषु च । क्लीबं रूप्येऽन्यवच्छुक्ले' (इति मेदिनी) ॥

रजतं हेम्नि रूप्ये सिते त्रिषु ॥ ७९ ॥

रजति । रज्यतेऽनेन वा । 'रज्ञ रागे' (भ्वा० प० अ०) । 'पृषिरजिभ्यां कित्' (उ० ३।१११) इत्यतच् । **'रजतं** रज्ञने रूप्ये शोणिते हृदहारयोः' इत्यजयः ॥

त्रिष्वितः

आतान्तम् ॥

जगदिङ्गेऽपि

गच्छति । 'द्युतिमभिजुहोतीनां द्वे च' (वा० ३।२।१७८) इति क्विप् । 'गमः क्वौ' (६।४।४०) इति मलोपः । तुक् (६।१।७१) **'जगत्स्या**त्पिष्टपे क्लीबं वायौ ना जंगमे त्रिषु' (इति मेदिनी) ॥

रक्तं नील्यादि रागि च ।

रजति । रज्यते वा । 'रज्ञ रागे' (भ्वा० प० अ०) ।

'गत्यर्था–' (३।४।७२) इति क्तः । कर्मणि (३।२।१०२) वा क्तः । '**रक्तोऽनुरक्ते** नील्यादिरञ्जिते लोहिते त्रिषु । क्लीबं तु कुङ्कुमे ताम्रे प्राचीनामलकेऽसृजि' (इति मेदिनी) ॥

अवदातः सिते पीते शुद्धे

अवदायते स्म । 'दैप् शोधने' (भ्वा० प० अ०) । क्तः (३।२।१०२) ॥

बद्धार्जुनौ सितौ ॥ ८० ॥

सीयते स्म । 'षिञ् बन्धने' (स्वा० उ० अ०) । क्तः (३।२।१०२) । '**सित**मवसिते च बद्धे धवले त्रिषु शर्करायां स्त्री' (इति मेदिनी) ॥

युक्तेऽतिसंस्कृते मर्षिण्यभिनीतः

अभिनीयते स्म । 'णीञ्' (भ्वा० उ० अ०) क्तः (३।२।१०२) । मर्षिणि क्षन्तरि ॥

अथ संस्कृतम् ।

कृत्रिमे लक्षणोपेतेऽपि

संस्क्रियते स्म । '**संस्कृतः** कृत्रिमे शस्ते भूषितेऽप्यन्यलिङ्गकः । क्लीबं तु लक्षणोपेते' (इति मेदिनी) । लक्षणेन उपेते पाणिन्यादिसूत्रव्युत्पादिते ॥

अनन्तोऽनवधावपि ॥ ८१ ॥

न अन्तोऽस्य । '**अनन्तः** केशवे शेषे पुमान्निरवधौ त्रिषु । **अनन्ता** च विशल्यायां शारिवादूर्वयोरपि । कणादुरालभापथ्यापार्वत्यामलकीषु च । विश्वंभरागुडूच्योः स्यादनन्तं सुरवर्त्मनि' (इति मेदिनी) ॥

ख्याते दृष्टे प्रतीतः

प्रतीयते स्म । 'इण् गतौ' (अ० प० अ०) । क्तः (३।२।१०२) । 'प्रज्ञातज्ञातदृष्टेषु **प्रतीतः** सादरे त्रिषु' इति रभसः ॥

अभिजातस्तु कुलजे बुधे ।

अभिजायते स्म । 'गत्यर्था–' (३।४।७२) इति क्तः । '**अभिजातः** कुलीने स्याज्ज्याय्यपण्डितयोस्त्रिषु' इति मेदिनी) । बुधे पण्डिते ॥

विविक्तौ पूतविजनौ

विविज्यते स्म । 'विजिर् पृथग्भावे' (जु० उ० अ०) । क्तः (३।२।१०२) 'विचिर् विरेचने (पृथग्भावे') (रु० उ० अ०) वा । '**विविक्तं** त्रिष्वसंपृक्ते रहःपूतविवेकिषु' (इति मेदिनी) ॥

मूर्च्छितौ मूढसोच्छ्रायौ ॥ ८२ ॥

मूर्च्छति स्म 'मूर्च्छा मोहसमुच्छ्राययोः' (भ्वा० प० से०) । 'गत्यर्था–' (३।४।७१) इति क्तः । '**मूर्त**ं स्यात्रिषु मूर्च्छाले कठिने मूर्तिमत्यपि' (इति मेदिनी) । ('**मूर्च्छित**मपि सोच्छ्राये च मूढे च' (इति मेदिनी) ॥

द्वौ चाम्लपरुषौ शुक्तौ

शुच्यते स्म । 'ईशुचिर् पूतीभावे' (दि० उ० से०) । (क्तः) (३।२।१०२) । 'श्वीदितः–' (७।२।१४) (इतीण्निषेधः) । '**शुक्तं** पूताम्लनिष्ठुरे' (इति मेदिनी) । 'मृन्मयादिशुक्तौ भाण्डे सगुडं क्षौद्रकाञ्जिकम् । धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते' इति वैद्यकम् ॥

शिती धवलमेचकौ ।

शीयते । शिनोति स्म वा । 'शिञ् निशाने' (स्वा० उ० अ०) । क्तिन् (३।३।९४) । क्तिच् (३।३।१७४) वा । '[२]निशितेऽपि, **शिति**र्भूर्जे ना सितामितयोस्त्रिषु' (इति मेदिनी) ॥

सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत् ८३

अस्ति । 'अस भुवि' (अ० प० से०) । 'लटः शतृ–' (३।२।१२४) । 'श्नसोरल्लोपः' (६।४।१११) । 'सन् साधौ धीरशस्तयोः । मान्ये सत्ये विद्यमाने त्रिषु साध्व्युभयोः स्त्रियाम्' (इति मेदिनी) ॥

पुरस्कृतः पूजितेऽग्र्याभियुक्तेऽग्रतः कृते ।

पुरोऽकारि । 'डुकृञ्' (त० उ० अ०) । क्तः (३।२।१०२) । 'पुरोऽव्ययम्' (१।४।६७) इति गतित्वम् । 'नमस्पुरसोः–' (८।३।४०) इति सत्वम् । '**पुरस्कृतो**ऽभिशस्तारिग्रस्ताग्रेकृतपूजिते' (इति मेदिनी) ॥

निवातावाश्रयावातौ शस्त्राभेद्यं च वर्म यत् ॥ ८४ ॥

निरुद्धो निवृत्तो वा वातोऽस्मात् । '**निवातो** दृढसंनाहे निवासे वातवर्जिते' इत्यजयः ॥

जातोन्नद्धप्रवृद्धाः स्युरुच्छ्रिताः

उच्छ्रयति, उच्छ्रीयते स्म वा । 'श्रिञ् सेवायाम्' (भ्वा० उ० से०) । 'गत्यर्था–' (३।४।७२) इति क्तः । कर्मणि (३।२।१०२) वा । '**उच्छ्रितं** त्रिषु संजाते समुन्नद्धप्रवृद्धयोः' (इति मेदिनी) ॥

उत्थितास्त्वमी ।

वृद्धिमत्प्रोद्यतोत्पन्नाः

उत्तिष्ठति स्म । 'गत्यर्था–' (३।४।७२) इति क्तः । '**उत्थितं** स्यात्रिषूत्पन्ने प्रोद्यते वृद्धिमत्यपि' (इति मेदिनी) ॥

आदृतौ सादरार्चितौ ॥ ८५ ॥

आद्रियते स्म । 'दृङ् आदरे' (तु० आ० अ०) । क्तः (३।२।१०२) ॥

इति तान्ताः ॥

१—इदमसंगतम् । 'आदितश्च' (७।२।१६) इतीण्निषेधस्य दुर्वारत्वात् । तस्मात्—मूर्च्छा संजातास्य । 'तदस्य संजातम्–' (५।२।३६) इतीतच्—इत्यनेकार्थकैरवाकरकौमुदीलिखितमेव सम्यक् ॥

१—अस्यात्रोल्लेखः प्रामादिकः । अत्र मूर्तशब्दोपादानाभावात् ॥ २—'निशितेऽपि' इत्युक्तिः शितशब्दार्थत्वात्प्रकृतानुपयुक्ता ॥

अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु ।

अर्यते । ऋच्छति वा । 'ऋ गतौ' (भ्वा० प० अ०) 'उषिकुशिगार्तिभ्यस्थन्' (उ० २।४) । यद्वा अर्थ्यते । 'अर्थ उपयाच्ञायाम्' (चु० आ० से०) । घञ् (३।३।१९) ('**अर्थो** विषयार्थनयोर्धनकारणवस्तुषु । अभिधेये च शब्दानां, निवृत्तौ च प्रयोजने)' (इति मेदिनी) ॥

निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ ॥ ८६ ॥

तीर्यते । अनेन वा । 'तॄ प्लवनतरणयोः' (भ्वा० प० से०) । 'पातॄतुदि–' (उ० २।७) इति थक् । '**तीर्थं** शास्त्राध्वरक्षेत्रोपायनारीरजःसु च । अवतारर्षिजुष्टाम्बुपात्रोपाध्यायमन्त्रिषु' (इति मेदिनी) । निपानं जलावतारः । निदानमुपायः–इति मुकुटः ॥

समर्थस्त्रिषु शक्तिस्थे संबद्धार्थे हितेऽपि च ।

समर्थयते । समर्थ्यते वा । 'अर्थ उपयाच्ञायाम्' (चु० आ० से०) । पचाद्यच् (३।१।१३४) । घञ् (३।३।१९) वा ॥

दशमीस्थौ क्षीणरागवृद्धौ

दशम्यां तिष्ठति । 'सुपि स्थः' (३।२।४) इति कः । '**दशमीस्थो** नष्टबीजे स्थविरेऽप्यन्यलिङ्गकः' (इति मेदिनी) ॥

वीथी पदव्यपि ॥ ८७ ॥

विथ्यतेऽनया । 'विथृ याचने' (भ्वा० आ० से०) । घञ् (३।३।१९) । पृषोदरादिः (६।३।१०९) । गौरादिः (४।१।४१) । '**वीथी** पङ्क्तौ गृहाङ्गे च रूपकान्तरवर्त्मनोः' (इति मेदिनी) ॥

आस्थानीयत्नयोरास्था

आतिष्ठन्त्यस्याम् । आस्थानं वा । 'ष्ठा गतिनिवृत्तौ' (भ्वा० प० अ०) । '**आस्था** त्वालम्बनास्थानयत्नापेक्षासु योषिति' (इति मेदिनी) ॥

प्रस्थोऽस्त्री सानुमानयोः ।

प्रतिष्ठन्तेऽस्मिन् । अनेन वा । 'घञर्थे कः' (वा० ३।३।५८) । '**प्रस्थो**ऽस्त्रियां मानभेदे सानावुन्मितवस्तुनि' (इति मेदिनी) ॥

इति थान्ताः ॥

अभिप्रायवशौ छन्दौ

छन्द्यते । 'छदि संवरणे' (चु० प० से०) । घञ् (३।३।१९) ॥

अब्दौ जीमूतवत्सरौ ॥ ८८ ॥

अपो ददाति । 'आतोऽनुप–' (३।३।३) इति कः । '**अब्दः** संवत्सरे मेघे गिरिभेदे च मुस्तके' इति विश्वः ॥

अपवादौ तु निन्दाज्ञे

अपोद्यते । अपवदनं वा । 'वद व्यक्तायां वाचि' (भ्वा० प० से०) । घञ् (३।३।१९) । '**अपवादस्तु** निन्दायामाज्ञाविश्रम्भयोरपि' (इति मेदिनी) ॥*॥ मुकुटस्तु 'अववादः' इति पठित्वा '**अववादस्तु** निन्दायामाज्ञाविश्रम्भयोरपि' इति विश्वमुदाजहार ॥

दायादौ सुतबान्धवौ ।

दायमत्ति । 'अद भक्षणे' (अ० प० अ०) । 'कर्मण्यण्' (३।२।१) । यद्वा आदत्ते । 'डुदाञ्' । 'आतश्चोप–' (३।१।१३६) इति कः । दायस्य–आदः । '**दायादस्तु** भवेत्पुंसि सपिण्डे तनयेऽपि च' (इति मेदिनी) ॥

पादा रश्म्यङ्घ्रितुर्यांशाः

पद्यते । 'पद गतौ' (दि० आ० अ०) । 'पदरुज–' (३।३।१७) इति घञ् । '**पादो** बुध्ने तुरीयांशे शैले प्रत्यन्तपर्वते । चरणे च मयूखे च' (इति मेदिनी) ॥

चन्द्राश्यर्कास्तमोनुदः ॥ ८९ ॥

तमो नुदति । 'णुद प्रेरणे' (तु० उ० अ०) । क्विप् (वा० ३।३।७६) ॥

निर्वादो जनवादेऽपि

निर्वदनम् । 'वद व्यक्तायां वाचि' (भ्वा० प० से०) । घञ् (३।३।१८) '**निर्वादः** स्याल्लोकवादपरिनिष्ठितवादयोः' (इति मेदिनी) ॥

शादो जम्बालशष्पयोः ।

शद्यते । अनेन वा । 'शदॢ शातने' (भ्वा० प० अ०) । 'हलश्च' (३।३।१२१) इति, भावे (३।३।१८) वा घञ् । जम्बालः पङ्कः शष्पं बालतृणम् ॥

सारावे रुदिते त्रातर्याक्रन्दो दारुणे रणे ॥ ९० ॥

आक्रन्दनम् । आक्रन्दति । आक्रन्द्यतेऽस्मिन् । आक्रन्दयति वा । 'क्रदि आह्वाने रोदने च' (भ्वा० प० से०) । 'आङः क्रन्द शब्दसातत्ये' (चु० उ० से०) । घञ् (३।३।१८,१९) । पचाद्यच् (३।१।१३४) वा । '**आक्रन्दः** क्रन्दने ह्वाने मित्रदारुणयुद्धयोः' (इति मेदिनी) ॥

स्यात्प्रसादोऽनुरोधेऽपि

प्रसदनम् । अनेन वा । 'षदॢ विशरणादौ' (भ्वा० प० अ०) । घञ् (३।३।१८,१९) । '**प्रसादो**ऽनुग्रहे काव्यप्राणस्वास्थ्यप्रसत्तिषु' (इति मेदिनी) ॥

सूदः स्याद्यज्ञने त्रिषु ।

सूद्यते । सूदयति वा । 'षूद क्षरणे' (चु० उ० से०) । 'एरच्' (३।३।५६) । पचाद्यच् । (३।१।१३४) वा । '**सूदस्तु सूप**वत्सूपकारे च व्यञ्जनेऽपि च' इति विश्वः ॥

गोष्ठाध्यक्षेऽपि गोविन्दः

गां विन्दति । 'विदॢ लाभे' (तु० उ० अ०) । 'गवादिषु

१—'सारावे' इति रुदितविशेषणम् । त्रातरि पार्ष्णिग्राहाक्रान्तस्य विजिगीषो रक्षितरि—इति पीयूषव्याख्या ॥

विन्देः संज्ञायाम्' (३।१।१३८) इति शः । **'गोविन्दो** वासुदेवे स्यादृवाध्यक्षे बृहस्पतौ' (इति मेदिनी) ॥

हर्षेऽप्यामोदवन्मदः ॥९१॥

आमोदनम् । आमोदयति वा । 'मुद हर्षे' (भ्वा० आ० से०) स्वार्थण्यन्तः । घञ् (३।३।१८) । पचाद्यच् (३।१।१३४) वा । **'आमोदो** गन्धहर्षयोः' (इति मेदिनी) । मदनम् । अनेन वा । 'मदी हर्षे' (दि० प० से०) । 'मदोऽनुपसर्गे' (३।३।६७) इत्यप् । **'मदो** रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः' (इति विश्वः) ॥

प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियाम् ।

कं सुखं कौति । 'कु शब्दे' (अ० प० अ०) । क्विप् (३।२।७६) । तुक् (६।१।७१) । पृषोदरादिः (६।३।१०९) **'ककुद्वत् ककुदं** श्रेष्ठे वृषाङ्गे राजलक्ष्मणि' इति विश्वः । प्राधान्ये स्वार्थे ष्यञ् (वा० ५।१।१२४) ॥

स्त्री संविज्ज्ञानसंभाषाक्रियाकाराजिनासु ॥९२॥

संवेदनम् । संविद्यतेऽनया वा । 'विद ज्ञाने' (अ० प० से०) । 'विद चेतनादौ च' (चु० आ० से०) । संपदादिक्विप् (वा० ३।३।१०८) । **'संवित्** स्त्रियां प्रतिज्ञायामाचारे ज्ञानसंगरे । संभाषणे क्रियाकारे संकेते नाम्नि तोषणे' (इति मेदिनी) । क्रियायाः कारो नियमः पणबन्धो वा, आजिर्युद्धम् ॥

धर्मे रहस्युपनिषत्

उपनिषदनम् । उपनिषीदति श्रेयोऽस्यां वा । 'षद्लृ विशरणादौ' (भ्वा० प० अ०) । संपदादिः (वा० (३।३।१०८) । 'भवेदुपनिषद्धर्मे वेदान्ते विजने स्त्रियाम्' (इति मेदिनी) ॥

स्यादतौ वत्सरे शरत् ।

शृणाति । 'शॄ हिंसायाम्' (क्या० प० से०) । 'शृदृभसोऽदिः' (उ० १।१३०) **'शरत्** स्त्री वत्सरेऽप्यृतौ' (इति मेदिनी) ॥

पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु ॥९३॥

पदति । पद स्थैर्ये ( ) । पद्यति वा । 'पद गतौ' (दि० आ० अ०) । पचाद्यच् (३।१।१३४) । भावकर्मकरणेषु वा घञ् । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । **'पदं** शब्दे च वाक्ये च व्यवसायापदेशयोः । पादतच्चिह्नयोः स्थानत्राणयोरङ्घ्रिवस्तुनोः' इति विश्वः । 'श्लोकपादेऽपि च क्लीबं पुंलिङ्गः किरणे पुनः' (इति मेदिन्यां विशेषः) ॥

गोष्पदं सेविते माने

गोः पदम् । 'गोष्पदं सेवितासेवित–' (६।१।१४५) इति साधुः । **'गोष्पदं** गोपदे श्वभ्रे गवां च गतिगोचरे' इति विश्वः (मेदिनी) ॥

१—'स्त्री' इति संविदुपनिषच्छरङ्घ्रिः संबध्यते—इति मुकुटः ॥

प्रतिष्ठाकृत्यमास्पदम् ।

आपद्यतेऽस्मिन् । 'आस्पदं प्रतिष्ठायाम्' (६।१।१४६) इति साधुः । **'आस्पदं** पदकृत्ययोः' (इति मेदिनी) ॥

त्रिषु

आदान्तात् ॥

इष्टमधुरौ स्वादू

स्वदते । 'ष्वद आस्वादने' (भ्वा० आ० से०) । 'कृवापा–' (उ० १।१) इत्युण् । **'स्वादु** मिष्टमनोज्ञयोः' (इति मेदिनी) ॥

मृदू चातीक्ष्णकोमलौ ॥ ९४ ॥

म्रद्यते । 'म्रद मर्दने' (भ्वा० आ० से०) । 'प्रथिम्रदि–' (उ० १।२८) इति कुः संप्रसारणं च ॥

मूढाल्पापटुनिर्भाग्या मन्दाः स्युः

मन्दते । 'मदि स्तुत्यादौ' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) । **'मन्दो**ऽतीक्ष्णे च मूर्खे च खैरे चाभाग्यरोगिणोः । अल्पे च त्रिषु पुंसि स्याद्धस्तिजात्यन्तरे शनौ' (इति मेदिनी) ॥

द्वौ तु शारदौ ।

प्रत्यग्रप्रतिभौ

शरदि भवः । 'संधिवेला–' (४।३।१६) इत्यण् । **'शारदो**ऽब्दे स्त्रियां तोयपिप्पलीसप्तपर्णयोः । शस्ये क्लीबं शरज्जातनूतनाप्रतिभे त्रिषु' (इति मेदिनी) ॥

विद्वत्सुप्रगल्भौ विशारदौ ॥ ९५ ॥

विशिष्टो विपरीतो वा शारदः । 'प्रादयो गता–' (वा० २।२।१८) इति समासः । **'विशारदः** पण्डिते च धृष्टे' (इति मेदिनी) ॥

इति दान्ताः ॥

व्यामो वटश्च न्यग्रोधौ

न्यक् रुणद्धि । 'रुधिर् आवरणे' (रु० उ० अ०) 'कर्मण्यण्' (३।२।१) । 'न्यग्रोधो व्यामवटयोर्न्यग्रोधश्च शमीतरौ' (इति विश्वः) ॥

उत्सेधः काय उन्नतिः ।

उत्सेधनम् । अनेन वा । 'षिधु गत्याम्' (भ्वा० प० से०) । घञ् (३।३।१८,१९) ॥

पर्याहारश्च मार्गश्च विवधौ वीवधौ च तौ ॥ ९६ ॥

विविधो वधो हननं गमनं वा । अनेन वा । 'प्रादिभ्यो धातुजस्य–' (वा० २।२।२४) इति समासोत्तरपदलोपौ । 'अन्येषामपि–' (६।३।१३७) इति वा दीर्घः । **'विवधो वीवधश्चापि** पर्याहारेऽध्वभारयोः' इति विश्वः । परित आह्रियतेऽनेन । पर्याहार उभयतोबद्धशिक्यं स्कन्धवाह्यं काष्ठं **'कावडी'** इति ख्यातम् । यत्तु—'उपसर्गस्य–' (६।३।

१२२) इति दीर्घः—इति मुकुट आह । तन्न । वधशब्दस्यान्तत्वेनाघञन्तत्वात् ॥

परिधिर्यञ्चियतरोः शाखायामुपसूर्यके ।

परिधीयते । 'डुधाञ्' (जु० उ० अ०) । 'उपसर्गे घोः किः' (३।३।९२) ॥

बन्धकं व्यसनं चेतःपीडाधिष्ठानमाधयः ॥ ९७ ॥

आधानम् । अनेन, अस्मिन् वा । पूर्ववत् । **'आधिः** पुमांश्चित्तपीडाप्रत्याशाबन्धकेषु च । व्यसने चाप्यधिष्ठाने' (इति मेदिनी) ॥

स्युः समर्थननीवाकनियमाश्च समाधयः ।

नीवाको वचनाभावः, मूलोत्कर्षार्थं धान्यादिसंग्रहो वा । समाधानम् अनेन वा पूर्ववत् । **'समाधिर्ध्याननीवाकनियमेषु समर्थने'** इति विश्वः (रभसः) । **'समाधिर्ना** समर्थने । ध्याने वैरस्य (ध्याननीवाक)नियमे काव्यस्य च गुणान्तरे' । (इति मेदिनी) ॥

दोषोत्पादेऽनुबन्धः स्यात्प्रकृत्यादिविनश्वरे ॥ ९८ ॥

मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने ।

अनुबध्यते । 'बन्ध बन्धने' (क्या० प० अ०) । घञ् (३।३।१९) । **'अनुबन्धस्तु** बन्धे स्याद्दोषोत्पादे विनश्वरे । मुख्यानुयायिबाले च प्रकृतस्यानिवर्तने । **अनुबन्धी** तु हिङ्कायां तृष्णायामपि (इति मेदिनी) । मुख्यं पित्रादिकमनुयाति यः शिशुः । प्रकृतस्य प्रारब्धस्यानुवर्तनेऽनिवर्तने ॥

विधुर्विष्णौ चन्द्रमसि

विध्यति विरहिणम् । 'व्यध ताडने' (दि० प० अ०) । 'पृभिदि–' (उ० १।२३) इति कुः । 'ग्रहिज्या–' (६।१।१६) इति संप्रसारणम् । **'विधुः** शशाङ्के कर्पूरे हृषीकेशे च राक्षसे' इति विश्वः ॥

परिच्छेदे विलेऽवधिः ॥ ९९ ॥

अवधानम् । 'उपसर्गे–' (३।३।९२) इति किः । **'अवधिस्त्ववधाने** स्यात्सीम्नि काले बिले पुमान्' (इति मेदिनी) ॥

विधिर्विधाने दैवेऽपि

विधानम् । अनेन वा पूर्ववत् किः (३।३।९२) । **'विधिर्ना** नियतौ काले विधाने परमेष्ठिनि' (इति मेदिनी) ॥

प्रणिधिः प्रार्थने चरे ।

प्रणिधानम् । प्रणिधीयते वा । किः (३।३।६२) **'प्रणिधिर्याचने चरे'** (इति हैमः) । प्रणिधिरवधानेऽपि' ॥

बुधवृद्धौ पण्डितेऽपि

बुध्यते । 'बुध अवगमने' (दि० आ० अ०) । 'इगुपध–' (३।१।१३५) इति कः । **'बुधः** कवौ रौहिणेये' इति विश्वः ॥ वर्धते स्म । 'वृधु वृद्धौ' (भ्वा० आ० अ०) । 'गत्यर्था–' (३।४।७२) इति क्तः । **'वृद्धो** जीर्णे प्रवृद्धे ज्ञे त्रिषु क्लीबं तु शैलजे' (इति मेदिनी) ॥

स्कन्धः समुदयेऽपि च ॥ १०० ॥

कं शिरो दधाति । 'आतोऽनुप–' (३।२।३) इति कः । पारस्करादित्वात् (६।१।१५७) सुट् । **'स्कन्धः** स्यान्नृपतावंसे संपरायसमूहयोः । काये तरुप्रकाण्डे च भद्रादौ छन्दसो भिदि' (इति मेदिनी) ॥

देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम् ।

स्यन्दते । 'स्यन्दू प्रस्रवणे' (भ्वा० आ० से०) । 'स्यन्देः संप्रसारणं धश्च' (उ० १।११) इत्युः । **'सिन्धुः** समुद्रे नद्यां च नदे देशेभदानयोः' इति विश्वः । **'सिन्धुर्वमधुदेशाब्धिनदे ना सरिति स्त्रियाम्'** (इति मेदिनी) ॥

विधा विधौ प्रकारे च

विधानम् । 'डुधाञ्' (जु० उ० अ०) । 'आतश्चोप–' (३।३।१०६) इत्यङ् । **'विधा** गजाह्वे ऋद्धौ च प्रकारे वेतने विधौ' इति विश्वः । विधौ विधाने ॥

साधू रम्येऽपि च त्रिषु ॥ १०१ ॥

साध्नोति । 'साध संसिद्धौ' (स्वा० प० से०) 'कृवापा–' (उ० १।१) इत्युण् । **'साधुर्वार्धुषिके चारौ सज्जने चाभिधेयवत्'** इति विश्वः ॥

वधूर्जाया स्नुषा स्त्री च

वहति । 'वह प्रापणे' (भ्वा० उ० अ०) । 'वहो धश्च' (उ० १।८३) इत्यूः । 'वधूः स्नुषा नवोढा स्त्री भार्यापृक्काङ्गनासु च । शव्यां च शारिवायां च' इति विश्वः ॥

सुधा लेपोऽमृतं स्नुही ।

सुष्ठु धीयते । 'डुधाञ्' (जु० उ० अ०) । 'धेट्' (भ्वा० प० अ०) । 'आतश्चोप–' (३।३।१०६) इत्यङ् । **'सुधा** गञ्जेष्टकाचूर्णे स्नुही चामृतमूर्वयोः' इत्यजयः ॥

संधा प्रतिज्ञा मर्यादा

संधानम् । अत्र वा । 'डुधाञ्' (जु० उ० अ०) । 'आतश्चोप–' (३।३।१०६) इत्यङ् ॥

श्रद्धा संप्रत्ययः स्पृहा ॥१०२॥

श्रद्धानम् पूर्ववत् । **'श्रद्धादरे** च काङ्क्षायाम्' (इति मेदिनी) । संप्रत्यय आदरः ॥

मधु मद्ये पुष्परसे क्षौद्रेऽपि

मन्यते । 'मन ज्ञाने' (दि० आ० अ०) । 'फलिपाटि–' (उ० १।१८) इत्युः, धश्च । **'मधु** क्षौद्रे जले क्षीरे मद्ये पुष्परसे **मधुः** । दैत्ये चैत्रे वसन्ते च जीवकोशे मधुद्रुमे' इति विश्वः ॥

अन्धं तमस्यपि ।

अन्धयति । 'अन्ध दृष्ट्युपघाते' (चु० उ० से०) । पचाद्यच् (३।१।१३४) । **'अन्धं** तु तिमिरे क्लीबं चक्षुर्हीनेऽभिधेयवत्' (इति मेदिनी) ॥

अतस्त्रिषु

आधान्तात् ॥

समुद्धद्धौ पण्डितंमन्यगर्वितौ ॥१०३॥

समुद्धद्धते स्म । 'णह बन्धने' (दि० उ० अ०) । क्तः (३।२।१०२) । **'समुद्धद्धः** समुद्धूते पण्डितंमन्यदृप्तयोः' इति विश्वः ॥

ब्रह्मबन्धुरधिक्षेपे निर्देशे

ब्रह्मैव ब्राह्मणजातिः बन्धुरस्य । **'ब्रह्मबन्धुरधिक्षेपे** निर्देशे च द्विजन्मनाम्' इति विश्वः ॥

अथावलम्बितः ।

अविदूरोऽप्यवष्टब्धः

अवलम्बित आश्रितः, वस्त्रादिरुद्धो वा । अवष्टभ्यते स्म । 'ष्टभि स्तम्भे' (भ्वा० आ० से०) । 'स्तम्भु रोधने' (सौत्रः) वा । 'स्तम्भेः' (८।३।६७) 'अवाच्चा–' (८।३।६८) इति षः । **'अवष्टब्धोऽविदूरे** स्यादाक्रान्ते चावलम्बिते' (इति मेदिनी) ॥

प्रसिद्धौ ख्यातभूषितौ ॥ १०४ ॥

प्रसिध्यति, प्रसिध्यते स्म वा । 'षिधु संराद्धौ' (दि० प० से०) 'गत्याम्' (भ्वा० प० से०) । कर्तरि (३।४।७२) कर्मणि (३।२।१०२) वा क्तः ॥

॥ इति धान्ताः ॥

सूर्यवह्नौ चित्रभानू

चित्रा भानवो रश्मयोऽस्य ॥

भानू रश्मिदिवाकरौ ।

भाति । 'भा दीप्तौ' (अ० प० अ०) । 'दाभाभ्यां नुः' (उ० ३।३२) ॥

भूतात्मानौ धातृदेहौ

भूतानामात्मा । भूतानि आत्मा स्वभावो यस्य, इति च ॥

मूर्खनीचौ पृथग्जनौ ॥ १०५ ॥

पृथक्कार्यो जनः शाकपार्थिवादिः (वा० २।१।७८) ॥

ग्रावाणौ शैलपाषाणौ

ग्रसते । 'ग्रसु अदने' (भ्वा० आ० से०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । आवनति । 'वन संभक्तौ' (भ्वा० प० से०) 'शब्दे' (भ्वा० प० से०) वा । विच् (३।२।७६) । ग्रश्चासावावा च ॥

पत्रिणौ शरपक्षिणौ ।

पत्राणि सन्त्यस्य । 'अतः–' (५।२।११५) इतीनिः ॥ 'पत्री श्येने रथे काण्डे खगद्वुरथिकाद्रिषु' इति विश्वः ॥

तरुशैलौ शिखरिणौ

शिखरमस्ति ययोः । 'अतः–' (५।२।११५) इतीनिः ॥

शिखिनौ वह्निबर्हिणौ ॥ १०६ ॥

शिखाः सन्त्यस्य । 'द्वन्द्वोपताप–' (५।२।१२८) इतीनिः ॥ व्रीह्यादिः (५।२।११६) वा । **'शिखी** वह्नौ बलीवर्दे शरे केतुग्रहे द्रुमे । मयूरे कुक्कुटे पुंसि शिखावत्यन्यलिङ्गकः' (इति मेदिनी) ॥

प्रतियत्नावुभौ लिप्सोपग्रहौ

प्रतियतनम् । प्रतियत्यते वा । 'यती प्रयत्ने' (भ्वा० आ० से०) । 'यत निकारादौ' (चु० उ० से०) वा । 'यजयाच—' (३।३।९०) इति नङ् । **'प्रतियत्नश्च** संस्कारलिप्सोपग्रहणेषु च' (इति मेदिनी) । उपग्रहो वन्दीग्रहणादिः ॥

अथ सादिनौ ।

द्वौ सारथिहयारोहौ

अवश्यं सीदति । सादयति वा । 'षद्लृ विशरणादौ' (भ्वा० प० अ०) । 'आवश्यका—' (३।३।१७०) इति णिनिः । ग्रह्यादिः (३।१।१३४) वा । **'सादी** सुरंगमातङ्गरथारोहेषु दृश्यते' (इति मेदिनी) ॥

वाजिनोऽश्वेषुपक्षिणः ॥ १०७ ॥

वाजाः पक्षाः सन्त्यस्य । 'अतः—' (५।२।११५) इतीनिः ॥

कुलेऽप्यभिजनो जन्मभूम्यामपि

अभि जायतेऽस्मिन् । 'जनी' (दि० आ० से०) । 'हलश्च' (३।३।१२१) इति घञ् । 'जनिवध्योश्च' (७।३।३३) इति वृद्धिर्न । **'अभिजनः** कुले ख्यातौ जन्मभूम्यां कुलव्रजे' इति विश्वः ॥

अथ हायनाः ।

वर्षार्चिर्व्रीहिभेदाश्च

जहाति, जिहीते, वा । 'ओहाक् त्यागे' (जु० प० अ०) । 'ओहाङ् गतौ' (जु० आ० अ०) वा । 'हश्च व्रीहिकालयोः' (३।१।१४८) इति ण्युट् । **'हायनो** न स्त्रियां वर्षे पुंस्यर्चिर्व्रीहिभेदयोः' (इति मेदिनी) । वर्षोऽब्दम् । अर्ची रश्मिः । 'व्रीहिभेदो नीवारादिः' इति मुकुटः । षष्टिकः, इति स्वामी ॥

चन्द्रार्क्यर्का विरोचनाः ॥ १०८ ॥

विरोचते । 'रुच दीप्तौ' (भ्वा० आ० से०) । 'अनुदात्तेतश्च हलादेः' (३।२।१४९) इति युच् । **'विरोचनः** प्रह्लादस्य तनयेर्केऽग्निचन्द्रयोः' (इति मेदिनी) ॥

केशेऽपि वृजिनः

वृज्यते । 'वृजी वर्जने' (अ० आ० से०) । 'वृजेः किच्च'

(उ० २।४७) इतीनन् । **'वृजिनं** कल्मषे क्लीबं केशे ना कुटिले त्रिषु' इति रभसः ॥

विश्वकर्मार्कसुरशिल्पिनोः ।

विश्वं कर्मास्मात्, अस्य, वा । **'विश्वकर्मा** सहस्रांशौ मुनिभिर्देवशिल्पिनोः' (इति मेदिनी) ॥

आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च १०९

अतति 'अत सातत्यगमने' (भ्वा० प० से०) 'सातिभ्यां मनिन्मनिणौ' (उ० ४।१५३) । **'आत्मा** कलेवरे यत्ने स्वभावे परमात्मनि । चित्ते धृतौ च बुद्धौ च परव्यावर्तनेऽपि च' इति धरणिः ॥

शक्रो घातुकमत्तेभो वर्षुकाब्दो घनाघनः ।

हन्ति । 'हन हिंसागत्योः' (अ० प० अ०) 'हन्तेर्धश्च' (वा० ६।१।१२) इति पचाद्यचि द्वित्वम्, आक् चाभ्यासस्य । 'अन्योन्यघट्टने चैव घातुके च **घनाघनः**' इति धरणिः ॥

अभिमानोऽर्थादिदर्पेऽज्ञाने प्रणयहिंसयोः ॥ ११० ॥

अभिमननम् । 'मन ज्ञाने' (दि० आ० अ०) । घञ् (३।३।१८) । 'मीञ् हिंसायाम्' (क्या० उ० अ०) । भावे ल्युट् (३।३।११५) । 'मीनाति–' (६।१।५०) इत्यात्वम् । आदिना कुलपशुगुणादिग्रहः ॥

घनो मेघे मूर्तिगुणे त्रिषु मूर्ते निरन्तरे ।

हननम् । हन्यते वा । 'मूर्तौ घनः' (३।३।७७) इत्यप् । **'घनं** सान्द्रं **घनं** वाद्यं **घनो** मुस्तो **घनोऽम्बुदः** । **घनः** काठिन्यसंघातो विस्तारो लोहमुद्गरौ' इति धरणिः । मूर्तिगुणे काठिन्ये ॥

इनः सूर्ये प्रभौ

एति । ईयते वा । 'इण्सिजि–' (उ० ३।२) इति नक् ॥

राजा मृगाङ्के क्षत्रिये नृपे ॥ १११ ॥

राजति । 'राजृ दीप्तौ' (भ्वा० उ० से०) 'कनिन् युवृषि–' (उ० १।१५६) इति कनिन् । **'राजा** प्रभौ च नृपतौ क्षत्रिये रजनीपतौ । यक्षे शक्रे च पुंसि स्यात्' (इति मेदिनी)॥

वाणिन्यौ नर्तकीदूत्यौ

अवश्यं वणति । 'वण शब्दे' (भ्वा० प० से०) । 'आवश्यका–' (३।३।१७०) इति, ब्रह्मादित्वात् (३।१।१३४) वा णिनिः । वबयोरैक्यम् । **'वाणिनिर्नर्तकीमत्ताविदग्धवनितासु च'** (इति मेदिनी) ॥

स्रवन्त्यामपि वाहिनी ।

वहति । ब्रह्मादि (३।१।१३४) णिनिः । **'वाहिनी** स्यात्तरङ्गिण्यां सेनासैन्यप्रभेदयोः' इति विश्वः ॥

१—वाणिनीशब्दो मेदिन्यां पवर्गीयादौ पठितः । हैमे तु अन्तस्थादौ पठितः ॥ एवं वाहिनीशब्दोऽपि ॥

ह्लादिन्यौ वज्रतडितौ

ह्लादतेऽवश्यम् । 'ह्लाद अव्यक्ते शब्दे' (भ्वा० आ० से०) 'आवश्यका–' (३।३।१७०) इति णिनिः ॥

वन्द्यायामपि कामिनी ॥ ११२ ॥

अवश्यं काम्यते । 'कमु कान्तौ' (भ्वा० आ० से०) । पूर्ववत् (३।३।१७०) णिनिः । **'कामिनी** भीरुवन्द्ययोः । **कामी** तु कामुके चक्रवाके पारावतेऽपि च' (इति मेदिनी) वन्द्या वृक्षे विजातीयप्ररोहः ॥

त्वग्देहयोरपि तनुः

तनोति, तन्यते वा । 'तनु विस्तारे' (त० उ० से०) । 'भृमृशी–' (उ० १।७) इत्युः । **'तनुः** काये त्वचि स्त्री स्यात्रिष्वल्पे विरले कृशे' (इति मेदिनी) ॥

सूनाधोजिह्विकापि च ।

सवनम् । सूयते वा । 'षूङ् प्राणिगर्भविमोचने' (अ० आ० से०) । भावे (३।३।११४) कर्मणि (३।३।१०२। वा०) क्तः । 'स्वादय ओदितः' (दि० ग०) इति (ओदित्त्वात् 'ओदितश्च' (८।२।४५) इति निष्ठानत्वम्) । **'सूना**ख्या पुष्पिते पुष्पे जिह्वातले वधालये' इत्यजयः । **'(सूनं** प्रसवपुष्पयोः) । **सूना** पुत्र्यां वधस्थानगलशुण्डिकयोरपि' (इति विश्वः) ॥

क्रतुविस्तारयोरस्त्री वितानं त्रिषु तुच्छके ॥ ११३ ॥ मन्दे

वितननम् । वितन्यते वा । घञ् (३।३।१८,१९) । 'वितानो यज्ञविस्तारोल्लोचेषु क्रतुकर्मणि । वृत्तभेदावसरयोर्वितानं तुच्छमन्दयोः' इति विश्वः । **'वितानो** यज्ञ उल्लोचे विस्तारे पुंनपुंसकम् । क्लीबं वृत्तविशेषे स्यात्रिलिङ्गो मन्दतुच्छयोः' (इति मेदिनी) मन्दे मूढे ॥

अथ केतनं कृत्ये केतावुपनिमन्त्रणे ।

'कित निवासादौ' (भ्वा० प० से०) । भावकर्मकरणाधिकरणेषु ल्युट् । **'केतनं** तु ध्वजे कार्ये निमन्त्रणनिवासयोः' इत्यजयः ॥

वेदास्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः ॥ ११४ ॥

बृहति । 'बृहि वृद्धौ' (भ्वा० प० से०) । 'बृंहेर्नोऽच्च' (उ० ४।१४६) इति मनिन् । **'ब्रह्म** तत्त्वतपोवेदे न द्वयोः पुंसि वेधसि । ऋत्विग्यज्ञयोगभिदोर्विप्रे' (इति मेदिनी) ॥

उत्साहने च हिंसायां सूचने चापि गन्धनम् ।

'गन्ध मर्दने' (चु० आ० से०) । भावादौ ल्युट् । **'गन्धनं** सूचनोत्साहहिंसनेषु प्रकाशने' इति विश्वः ॥

आतञ्चनं प्रतीवापजवनाप्यायनाजकम् ॥ ११५ ॥

'तञ्चु गतौ' (भ्वा० प० से०) । ल्युट् (३।३।११४) । प्रतीवापो दुग्धादौ दध्यादिभावार्थं तक्रादिप्रक्षेपः, निक्षेपो वा । जवनं वेगः । आप्यायनं तर्पणम् ॥

व्यञ्जनं लाञ्छनश्मश्रुनिष्ठानावयवेष्यपि ।

व्यज्यते । अनेन वा । ल्युट् (३।३।११३,११७) । '**व्यञ्जनं** तेमने चिह्ने श्मश्रुण्यवयवेऽपि च' (इति मेदिनी) । निष्ठानं तेमनम् ॥

स्यात्कौलीनं लोकवादे युद्धे पश्वहिपक्षिणाम् ११६

कुलीनस्य कर्म भावो वा । युवाद्यण् (५।१।१३०) । '**कौलीनं** पशुभिर्युद्धे कुलीनत्वापवादयोः' इति धरणिः ॥

स्यादुद्यानं निःसरणे वनभेदे प्रयोजने ।

उद्यान्त्यनेन । अस्मिन् वा । 'या प्रापणे' (अ० प० अ०) । 'करणा–' (३।३।११७) इति ल्युट् । '**उद्यानं** वनभेदे स्यान्निःसृतौ च प्रयोजने' इति धरणिः ॥

अवकाशे स्थितौ स्थानम्

स्थीयतेऽत्र । अधिकरणे (३।३।११७) भावे (३।३।११५) च ल्युट् । '**स्थानं** सादृश्येऽवकाशे स्थितौ वृद्धिक्षयेतरे' (इति मेदिनी) ॥

क्रीडादावपि देवनम् ॥ ११७ ॥

दीव्यतेऽनेन । 'दिवु क्रीडादौ' (दि० प० से०) । भावकरणादौ ल्युट् । '**देवनं** व्यवहारे स्याज्जिगीषाक्रीडयोरपि । अक्षेषु **देवनः** प्रोक्तः' इति विश्वः ॥

उत्थानं पौरुषे तन्त्रे संनिविष्टोद्गमेऽपि च ।

'**उत्थान**मुद्यते तन्त्रे पौरुषे पुस्तके रणे ।' ('प्राङ्नणो-द्रुमहर्षेषु मलवेगेऽपि न द्वयोः') (इति मेदिनी) । '**तन्त्रं** कुटुम्बकृत्ये स्यात्सिद्धान्ते चौषधोत्तमे । प्रधाने तन्तुवाने च शास्त्रभेदे परिच्छदे । श्रुतिशाखान्तरे हेतावुभयार्थप्रयोजके' (इति मेदिनी) ॥

व्युत्थानं प्रतिरोधे च विरोधाचरणेऽपि च ॥ ११८ ॥

विरुद्धमुत्थानम् । 'प्रादयो गता–' (वा० २।२।१८) इति समासः । 'स्वतन्त्रता च व्युत्थानम्' इति त्रिकाण्डशेषः ॥

मारणे मृतसंस्कारे गतौ द्रव्योपपादने ।
निर्वर्तनोपकरणानुव्रज्यासु च साधनम् ॥ ११९ ॥

'षाध संसिद्धौ' (स्वा० प० से०) । भावकर्मकरणादौ ल्युट् । '**साधनं** मृतसंस्कारे सैन्ये सिद्धौषधे गतौ । निर्वर्तनोपायमेद्-दापनेऽनुगमे धने' (इति मेदिनी) । उपकरणं साधनसामग्री ॥

निर्यातनं वैरशुद्धौ दाने न्यासार्पणेऽपि च ।

'यत निकारादौ' (चु० उ० से०) स्वार्थण्यन्तः । भावादौ ल्युट् ॥

व्यसनं विपदि भ्रंशे दोषे कामजकोपजे ॥ १२० ॥

व्यस्तिः । 'असु क्षेपणे' (दि० प० से०) । भावादौ ल्युट् । '**व्यसनं** लशुने सक्तौ पानस्त्रीमृगयादिषु । दैवानिष्टफले पापे विपत्तौ निष्फलोद्यमे' इति विश्वः (मेदिनी) । कामजे दोषे मृगयाक्षपानादौ । कोपजे वाक्पारुष्यदण्डपारुष्यार्थ-दूषणादौ ॥

पक्ष्माक्षिलोम्नि किंजल्के तन्त्वाद्यंशेऽप्यणीयसि ।

पक्ष्यते । अनेन वा । 'पक्ष परिग्रहे' (भ्वा० प० से०) कर्मकरणादौ मनिन् (उ० ४।१४५) । '**पक्ष्म** सूत्रादिसूक्ष्मांशे किंजल्के नेत्रलोमनि' इति विश्वः ॥

तिथिभेदे क्षणे पर्व

पर्वति पर्व्यते वा । 'पर्व पूरणे' (भ्वा० प० से०) । बाहुलकात्कनिन् । '**पर्व** स्यादुत्सवे ग्रन्थौ प्रस्तावे विषुवा-दिषु । दर्शप्रतिपदोः संधौ स्यात्तिथेः पञ्चकान्तरे' इति धरणिः ॥

वर्त्म नेत्रच्छदेऽध्वनि ॥ १२१ ॥

वर्तते । अनेन । अस्मिन् वा । 'वृतु वर्तने' (भ्वा० आ० से०) । मनिन् (उ० ४।१४५) ॥

अकार्यगुह्ये कौपीनम्

कूपपतनमर्हति । 'शालीनकौपीने अधृष्टाकार्ययोः' (५।२।२०) इति साधुः । '**कौपीनं** स्यादकार्येऽपि चीरगुह्यप्रदेशयोः' इति विश्वः ॥

मैथुनं संगतौ रते ।

मिथुनमेव । प्रज्ञाद्यण् (५।४।३८) । मिथुनस्येदं वा । 'संबन्धे सुरते युग्मे राशौ **मिथुन**मिष्यते' इति व्याडिः ॥

प्रधानं परमात्मा धीः

प्रधत्ते, धीयतेऽनेन । अस्मिन् वा । 'डुधाञ्' कर्तृकरणादौ ल्युट् (३।३।११३,११७) । '**प्रधानं** स्यान्महामात्रे प्रकृतौ परमात्मनि । प्रज्ञायामपि च क्लीबमेकत्वे तूत्तमे सदा' (इति मेदिनी) ॥

प्रज्ञानं बुद्धिचिह्नयोः ॥ १२२ ॥

प्रज्ञायते । अनेन वादौ ल्युट् (३।३।११३,११५,११७) ॥

प्रसूनं पुष्पफलयोः

प्रसूयते । 'षुञ् अभिषवे' (स्वा० उ० अ०) । 'सुनो दीर्घश्च' (उ० ३।१३) इति नः ॥

निधनं कुलानाशयोः ।

निधानम् । निधीयतेऽत्र वा । 'कृपृवृजि–' (उ० २।८१) इति क्युः ॥

क्रन्दने रोदनाह्वाने

'क्रदि आह्वाने रोदने च' (भ्वा० प० से०) । भावे (३।३।११५) ल्युट् ॥

वर्ष्म देहप्रमाणयोः ॥ १२३ ॥

वर्षति । वृष्यते वा । 'वृषु सेचने' (भ्वा० प० से०) । मनिन् (उ० ४।१४५) । '**वर्ष्म** देहप्रमाणातिसुन्दराकृतिषु स्मृतम्' (इति मेदिनी) ॥

१—भावविग्रहप्रदर्शनमेतत् ॥

गृहदेहत्विट्प्रभावा धामानि

दधाति । धीयते वा । 'डुधाञ्' (जु० उ० अ०) । मनिन् (उ० ४।१४५) । '**धाम** शक्तौ प्रभावे च तेजोमन्दिरजन्मसु' इति विश्वः ॥

अथ चतुष्पथे ।

संनिवेशे च संस्थानम्

संस्थीयतेऽत्र । अनेन वा । संस्थितिर्वा । भावाधिकरणादौ ल्युट् (३।३।११५,११७) । '**संस्थान**माकृतौ मृत्यौ संनिवेशे चतुष्पथे' (इति मेदिनी) ॥

लक्ष्म चिह्नप्रधानयोः ॥ १२४ ॥

लक्ष्यते । अनेन वा । 'लक्ष दर्शने' (चु० आ० से०) । मनिन् (उ० ४।१।४५) ॥

आच्छादनं संपिधानमपवारणमित्युभे ।

आच्छाद्यतेऽनेन । 'छद अपवारणे' चुरादिः । करणे (३।३।११७) भावे (३।३।११५) वा ल्युट् । '**आच्छादनं** संपिधाने वस्त्रेऽपवृतिमात्रके' इति धरणिः ॥

आराधनं साधने स्यादवाप्तौ तोषणेऽपि च ॥१२५॥

आराध्यतेऽनेन । 'राध संसिद्धौ' (स्वा० प० अ०) । भावादौ ल्युट् (३।३।११५,११७)

अधिष्ठानं चक्रपुरप्रभावाध्यासनेष्वपि ।

अधिष्ठीयते । अनेन वा । भावादौ ल्युट् (३।३।११५ ११७) । 'अधिष्ठानं रथस्याङ्गे प्रभावेऽध्यासने पुरे' इत्यजयः ॥

रत्नं स्वजातिश्रेष्ठेऽपि

रमयति । 'रमु क्रीडायाम्' (भ्वा० आ० अ०) ण्यन्तः । अन्तर्भावितण्यर्थो वा, रमन्तेऽस्मिन् वा । 'रमेस्त च' (उ० ३।१४) इति नः । 'नेड् वशि–' (७।२।८) इति नेट् । 'णेरनिटि–' (६।४।५१) । '**रत्नं** स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकम्' (इति मेदिनी) ॥

वने सलिलकानने ॥ १२६ ॥

वन्यते । 'वन संभक्तौ' (भ्वा० प० से०) । 'वनु याचने' (त० उ० से०) वा । 'हलश्च' (३।३।१२१) इति घञ् । संज्ञापूर्वकत्वान्न वृद्धिः । कर्तरि पचाद्यच् (३।१।१३४) वा । 'क्लीबं स्यात् कानने नीरे निवासे निलये **वनम्**' इति रभसः ॥

तलिनं विरले स्तोके

तलति । तल्यते वा । 'तल प्रतिष्ठायाम्' (भ्वा० प० से०) । 'तॅलिपुलिभ्यामिनन्' (उ० २।५३) । '**तलिनं** विरले स्तोके स्वच्छेऽपि वाच्यलिङ्गकम्' (इति मेदिनी) ॥

१—अस्य सूत्रस्य 'करणाधिकरणयोः' इत्यधिकारस्थत्वेनात्रोपन्यासो निष्फलः कर्मणि विगृहीतत्वात् ॥ तस्मात् 'अकर्तरि–' (३।३।१९) इत्येव न्याय्यम् ॥ २—आधुनिकपुस्तकेषु तु 'तलिपुलिभ्यां च' इत्येव पाठ उपलभ्यते ॥

वाच्यलिङ्गास्तथोत्तरे ।

तथा तलिनवत् । उत्तरे आनान्तात् ॥

समानाः सत्समैकेऽयुः

समति । 'षम वैक्लव्ये' (भ्वा० प० से०) । 'ताच्छील्यवयोवचनशक्तिषु चानश्' (३।२।१२९) । 'आगमशासनमनित्यम्' इति मुग् न । सह मानेन वर्तते, इति वा । '**समानं** सत्समैकेषु त्रिषु, ना नाभिमारुते' (इति मेदिनी) ॥

पिशुनौ खलसूचकौ ॥ १२७ ॥

पिंशति । 'पिश अवयवे' (तु० प० से०) । 'क्षुधिपिशिमिथिभ्यः कित्' (उ० ३।५५) इत्युनन् । '**पिशुनं** कुङ्कुमेऽपि च । कपिवक्त्रे च काके ना सूचककूरयोस्त्रिषु । पृक्कायां पिशुना स्त्री स्यात्' (इति मेदिनी) ॥

हीनन्यूनावूनगर्ह्यौ

जहाति । हीयते स्म वा । 'ओहाक् त्यागे' (जु०प०अ०) । 'आदिकर्मणि क्तः' (३।४।७१) । कर्मणि (३।२।१०२) वा । 'ओदितश्च' (८।२।४५) इति नत्वम् । '**हीनं** गर्ह्योनयोस्त्रिषु' (इति मेदिनी) ॥

न्यूनयति । न्यून्यते स्म वा । 'ऊन परिहाणे' (चु० उ० से०) । पचाद्यच् (३।१।१३४) । घञ् (३।३।१९) वा । यत्तु–'इगुपध–' (३।१।१३५) इति कः–इति मुकुटेनोक्तम् । तन्न । चुरादिण्यन्तत्वेन अदन्तत्वेन चेगुपधत्वाभावात् । '**न्यूनं** गर्ह्योनयोः' (इति मेदिनी) ॥

वेगिशूरौ तरस्विनौ ।

तरो बलं जवो वास्यास्ति । 'अस्मायाः–' (५।२।१२१) इति विनिः ॥

अभिपन्नोऽपराद्धोऽभिग्रस्तव्यापद्गता अपि ॥ १२८ ॥

अभिपद्यते स्म । 'गत्यर्था–' (३।४।७२) इति क्तः । कर्मणि (३।२।१०२) वा । '**अभिपन्नो**ऽपराद्धेऽभिद्रुते ग्रस्ते विपद्गते' इति विश्वः ॥

इति नान्ताः ॥

कलापो भूषणे बर्हे तूणीरे संहतेऽपि च ।

कलमाप्नोति । 'आपॢ व्याप्तौ' (स्वा० प० अ०) 'कर्मण्यण्' (३।२।१) कला आप्यतेऽनेन वा । 'हलश्च' (३।३।१२१) इति घञ् । '**कलापः** संहतौ बर्हे काञ्च्यां भूषणतूणयोः' इत्यजयः । ('चन्द्रे विदग्धे व्याकरणभेदेऽपि कथ्यते बुधैः' इति मेदिन्यां विशेषः) ॥

परिच्छदे परीवापः पर्युप्तौ सलिलस्थितौ ॥ १२९ ॥

परिवपनम् । अनेन । अत्र वा 'डुवप् बीजतन्तुसंताने' (भ्वा० उ० अ०) । 'भावे घञ्' (३।३।१८) । 'हलश्च'

१—अत्र 'स्म' इत्युपन्यासोऽसंगतः । घञो भूताधिकारे विधानाभावात् ॥

(३।३।१२१) इति वा । 'उपसर्गस्य–' (६।३।१२२) इति दीर्घः । परिच्छदः परिवारः ॥

गोधुग् गोष्ठपतिर्गोपौ

गां पाति । 'पा रक्षणे' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । **'गोपो** ग्रामौघगोष्ठाधिकृतयोर्बल्लवे' इति विश्वः ॥

हरो विष्णुर्वृषाकपिः ।

वृषं धर्मं न कम्पयति । 'कपि किंचिच्चलने' (भ्वा० आ० से०) । '[1]अंहिकम्प्योर्नलोपश्च' (उ० ४।१४४) इतीः । वृषाद्धर्मादाकम्पयति दुष्टान् इति वा । यद्वा वर्षति कामान् । 'वृषु सेचने' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । आकम्पयति पापानि । पूर्ववदिः (उ० ४।१४४) । वृषश्चासावाकपिश्च । यद्वा वृषा इन्द्रोऽनेन । कम्पते आकम्पते वा अस्मात् । यद्वा वृषो धर्मो वृषा इन्द्रो वा कपिरिव वशे यस्य । यद्वा वृषरक्षकः कपिर्वैराहः । शाकपार्थिवादिः (वा० २।१।७८) । 'अन्येषामपि–' (६।३।१३९) इति दीर्घः । यद्वा वृष्ण इन्द्रस्याकं वृषाकं पियति । 'पि गतौ' (तु० प० अ०) । अन्तर्भावितण्यर्थो वा । इन्द्रदुःखं प्राप्नोति प्रापयति वा दैत्यान् । रक्षकत्वात् । विचि (३।२।७५) संज्ञापूर्वकत्वान्न गुणः । किपि (३।२।७६) तु आगमशास्त्रस्यानित्यत्वान्न तुक् । परशब्दस्येष्टवाच्चिल्लादियङं बाधित्वा पूर्वसवर्णदीर्घः (६।१।१०२) पूर्वरूपे (६।१।१०७) स्तः । **'वृषाकपिः** पुमान्कृष्णे शंकरे जातवेदसि' (इति मेदिनी) ॥

[2]बाष्पमूष्माश्रु

वायति । 'ओवै शोषणे' (भ्वा० प० से०) । वाति । 'वा गत्यादौ' (अ० प० अ०) । 'खष्पशिल्पशष्प' (उ० ३।२८) इति साधुः ॥

कशिपु त्वन्नमाच्छादनं द्वयम् ॥ १३० ॥

कशति दुःखम् । कश्यते वा । 'कश गतिशासनयोः' (अ० आ० अ०) मृगय्वादित्वात् (उ० १।३७) साधुः । 'एकोक्त्या **कशिपु**र्भक्ताच्छादने च द्वयोः पृथक्' इति विश्वः ॥

तल्पं शय्याट्टदारेषु

तल्यतेऽस्मिन् । 'तल प्रतिष्ठायाम्' (भ्वा० प० से०) । 'खष्पशिल्प—' (उ० ३।२८) इति साधुः । वक्ष्यमाणम्, 'अस्त्रियाम्' इति कशिपुतल्पाभ्यामपि संबध्यते । अट्टोऽट्टालिका ॥

स्तम्बेऽपि विटपोऽस्त्रियाम् ।

वेटति । विट्यते वा । 'विट आक्रोशे शब्दे' (भ्वा० प० से०) । 'विटपपिष्टपविशिपोलपाः' (उ० ३।१४५) । **'विटपः** पल्लवे भित्ते विस्तारे स्तम्बशाखयोः' इति विश्वः ॥

प्राप्तरूपस्वरूपाभिरूपा बुधमनोज्ञयोः ॥ १३१ ॥

मेद्यलिङ्गा अमी

प्राप्तो रूपम् । 'प्राप्तापन्ने च–' (२।२।४) इति समासः । प्राप्तं रूपं येन । **'प्राप्तरूपो** ज्ञरम्ययोः' (इति मेदिनी) ॥

स्वमेव रूपं यस्य ॥

अभिलक्ष्यं रूपमस्य । **'अभिरूपो** बुधे रम्ये' (इति मेदिनी) ॥

कूर्मी वीणाभेदश्च कच्छपी ।

कच्छे कच्छं वा पिबति । कच्छेन पाति वा । 'सुपि–' (३।२।४) इति कः । 'गापोष्टक्' (३।२।८) तु न । 'पिबतेः सुरासीध्वोः' (वार्तिक) इति वचनात् । 'गतिकारकोपपदा–' इति सुबुत्पत्तेः प्राक् समासः । 'जातेः–' (४।१।६३) इति ङीष् । **'कच्छपी** वल्लकीभेदे ह्रुलौ क्षुद्रगदान्तरे' इति विश्वः ॥

इति पान्ताः ॥

रवर्णे पुंसि रेफः स्यात्कुत्सिते वाच्यलिङ्गकः ॥ १३२ ॥

'रादिफः' (वा० ३।३।१०८) । रिफ्यते । रिफति वा । 'रिफ हिंसायाम्' (तु० प० से०) । घञ् (३।३।१९) । पचाद्यच् (३।१।१३४) वा ॥

इति फान्ताः ॥

अन्तराभवसत्त्वेऽश्वे गन्धर्वो दिव्यगायने ।

अन्तरा मरणजन्मनोर्मध्ये भवं सत्त्वं यातनाशरीरम् । यदाहुः—'अन्तराभवदेहो हि नेष्यते विन्ध्यवासिनां' । तन्न । लक्ष्यविरोधात् । तस्मादन्तरिक्षवासिनो गन्धर्वाख्या भूताः । यद्व्यासः 'अस्माभिर्यदनुष्ठेयं गन्धर्वैस्तदनुष्ठितम्'—इति स्वामी । तच्चिन्त्यम् । **'गन्धर्वः** पशुमेदे स्यात्पुंस्कोकिलतुरंगयोः । अन्तराभवसत्त्वे च गायने खेचरेऽपि च' (मेदिनी) इत्यादौ द्वयोः पृथक् पाठात् । दृष्टान्तोऽपि विषमः । दिव्यगायनानां विश्वावस्वादीनामेव तत्र ग्रहणात् । गन्धमर्वति । 'अर्व गतौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) शकन्ध्वादिः (वा० ६।१।९४) ॥

कम्बुर्ना वलये शङ्खे

कम्बति । 'कम्ब गतौ' ( ) मृगय्वादिः (उ० १।३७) **'कम्बुः** शङ्खे स्त्रियां पुंसि शम्बूके वलये गजे' (इति मेदिनी) ॥

द्विजिह्वौ सर्पसूचकौ ॥ १३३ ॥

द्वे जिह्वे यस्य ॥

१—आधुनिकपुस्तकेषु तु 'कुण्ठिकम्प्योः' इति पाठ उपलभ्यते ॥ २—बाष्पं मेदिन्यामन्तस्थादौ पठ्यते । अत एव गोवर्धनाचार्यैरपि 'बाष्पाकुलम्' (५२८) इत्यार्याऽन्तस्थादिव्रज्यायां लिखिता । हैमे तु स्पर्शादि पठ्यते ॥ ३—इदं त्वसंगतम् 'कशिपुर्भक्ताच्छादनयोरेकोक्त्या पृथक्तयोः पुंसि' इति मेदिनीतः कशिपोः पुंस्त्वस्य, 'तल्पमट्टे कलत्रे च शयनीये च न द्वयोः' इति मेदिनीतस्तल्पस्य क्लीबतायाः प्रतीतेः ॥

पूर्वोऽन्यलिङ्गः प्रागाह पुंबहुत्वेऽपि पूर्वजान् ।

पूर्वयति । 'पूर्व निकेतने' (चु० प० से०) । पचाद्यच् (३।१।१३४) । '**पूर्वे** तु पूर्वजेषु स्युः **पूर्व**प्रागाद्ययोस्त्रिषु' (इति मेदिनी) । 'प्राक् पूर्वमग्रतः' इति धरणिः ॥

इति वान्ताः ॥

कुम्भौ घटेभमूर्धांशौ

कुं भूमिं कुत्सितं वा उम्भति । 'उम्भ पूरणे' (तु० प० से०) । 'कर्मण्यण्' (३।२।१) । पचाद्यच् (३।१।१३४) वा । शकन्ध्वादिः (वा० ६।१।९४) । '**कुम्भः** स्यात्कुम्भकर्णस्य सुते वेश्यापतौ घटे । राशिभेदे द्विपाङ्गे च **कुम्भं** त्रिवृति गुग्गुले' इति विश्वः ।

डिम्भौ तु शिशुबालिशौ ॥ १३४ ॥

डिम्भयति । 'डिभि संघाते' चुरादिः । पचाद्यच् (३।१।१३४) ॥

स्तम्भौ स्थूणाजडीभावौ

स्तभ्नाति । 'स्तम्भु रोधने' (सौत्रः) पचाद्यच् (३।१।१३४) । भावे घञ् (३।३।१८) वा ॥

शंभू ब्रह्मत्रिलोचनौ ।

शं भवति । 'भू सत्तायाम्' (भ्वा० प० से०) 'प्राप्तौ' (चु०आ० से०) वा । अन्तर्भावितण्यर्थः । मितद्वादिलात् (वा० ३।२।१७८) । डुः । '**शंभुः** पुंसि महादेवे परमेष्ठिनि चार्हति' (इति मेदिनी) विष्णौ च ॥

कुक्षिभ्रूणार्भका गर्भाः

गिरति । 'गॄ निगरणे' (तु० प० से०) । गृणाति । गीर्यते वा । 'गॄ शब्दे' (क्या० प० से०) । 'अतिगॄभ्यां भन्' (उ० ३।१५२) । '**गर्भो** भ्रूणेऽर्भके कुक्षौ संधौ पनसकण्टके' (इति मेदिनी) ॥

विस्रम्भः प्रणयेऽपि च ॥ १३५ ॥

विस्रम्भणम् । विस्रभ्यतेऽनेन वा । 'स्रम्भु विश्वासे' (भ्वा० आ० से०) । घञ् (३।३।१८) । '**विस्रम्भः** केलिकलहे विश्वासे प्रणये वधे' इति विश्वः । 'परिचयप्रार्थनयोः **प्रणयः** परिकीर्तितः' इत्यमरमाला ॥

स्याद्भेर्यां दुन्दुभिः पुंसि स्यादक्षे दुन्दुभिः स्त्रियाम् ।

'दुन्द' इति शब्देन उभति । 'उभ पूरणे' (तु० प० से०) । 'इगुपधात् कित्' (उ० ४।१२०) इतीन् । शकन्ध्वादिः (वा० ६।१।९४) । यद्वा 'दुन्द्' इति हलन्तस्यैवानुकरणम् । '**दुन्दुभिः** पुमान् । वरुणे दैत्यभेर्योश्च क्वयक्षे बिन्दुत्रिकद्वये' (इति मेदिनी) ॥

१—पूर्वगन्धर्वशब्दौ विश्वमेदिन्योरपि स्पर्शान्तेष्वेवोपलभ्येते । हैमे तु दन्तोष्ठयान्तेष्वेव ॥ २—अक्षे बिन्दुत्रिकद्वये यथा 'दुन्दुभ्या किल तत्कृतं पतितया यद्द्रौपदी हारिता' इति स्वामिमुकुटानेकार्थकैरवाकरकौमुद्यः ॥

स्यान्महारजने क्लीबं कुसुम्भं करके पुमान् ॥१३६॥

कुसुम्भयति । अनेन । वा । 'कुसुम्भ क्षेपे' (कण्ड्वादिः) । पचाद्यच् (३।३।१३४) । 'हलश्च' (३।३।१२१) इति घञ् वा । पृषोदरादिः (६।३।१०९) । '**कुसुम्भं** हेमनि महारजने नाकमण्डलौ' (इति मेदिनी) ॥

क्षत्रियेऽपि च नाभिर्नौ

नभ्यते । 'णभ हिंसायाम्' (भ्वा० आ० से०) । 'इसजादिभ्यः' (वा० ३।३।१०८) । यद्वा नाभयति । स्वार्थण्यन्तात् 'अच इः' (उ० ४।१३९) । '**नाभि**र्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् । द्वयोः प्राणिप्रतीके स्यात्स्त्रियां कस्तूरिकामहे' (इति मेदिनी) ॥

सुरभिर्गवि च स्त्रियाम् ।

सुष्ठु रभते, रभ्यते वा । 'रभ राभस्ये' (भ्वा० आ० अ०) । 'सर्वधातुभ्य इन्' (उ० ४।११८) । '**सुरभिः** शल्लकीमातृभित्सुरगोषु योषिति । चम्पके च वसन्ते च तथा जातीफले पुमान् । स्वर्णे गन्धोत्पले क्लीबं सुगन्धिकान्तयोस्त्रिषु । (विख्याते सचिवे धीरे चैत्रेऽपि च पुमानयम्)' (इति मेदिनी) ॥

सभा संसदि सभ्ये च

सह भान्ति ये । यस्यां वा । 'भा दीप्तौ' (अ० प० अ०) । 'सुपि' (३।२।४) इति कः । 'अन्येभ्योऽपि—' (वा० ३।२।१०२) इति ङो वा । 'स्त्रियां सामाजिके गोष्ठ्यां द्यूतमन्दिरयोः **सभा**' इति रभसः ॥

त्रिष्वध्यक्षेऽपि वल्लभः ॥ १३७ ॥

वल्लते । वल्ल्यते वा । 'वल्ल संवरणे संचरणे च' (भ्वा० आ० से०) । 'रासिवल्लिभ्यां च' (उ० ३।१२५) इत्यभच् । '**वल्लभो** दयितेऽध्यक्षे सल्लक्षणतुरंगमे' (इति मेदिनी) ॥

इति भान्ताः ॥

किरणप्रग्रहौ रश्मी

अश्नुते । अनेन वा । 'अशू व्याप्तौ' (स्वा० आ० से०) । 'अश्नोतेर्दश्च' (उ० ४।४।६) इति मिः । '**रश्मिः** पुमान् दीधितौ स्यात्पक्ष्मप्रग्रहयोरपि' (इति मेदिनी) ॥

कपिभेकौ प्लवंगमौ ।

प्लवेन प्लुत्या गच्छति । 'गमश्च' (३।२।४७) इति खच् ॥

इच्छामनोभवौ कामौ

कमनम् । कम्यते वा । 'कमु कान्तौ' (भ्वा० आ० से०) । घञ् (३।३।१८,१९) '**कामः** स्मरेच्छयोः पुमान् । रेतस्यपि निकामे च काम्येऽपि स्यान्नपुंसकम्' (इति मेदिनी) ॥

शौर्योद्योगौ पराक्रमौ ॥ १३८ ॥

पराक्रमणम् । अनेन वा । 'क्रमु पादविक्षेपे' (भ्वा० प० से०) । घञ् (३।३।१८,१२१) । 'नोदात्तोपदेशस्य—' (७।३।३४) इति न वृद्धिः । '**पराक्रमः** स्यात्सामर्थ्ये विक्रमोद्यमयोरपि' (इति मेदिनी) ॥

धर्मः पुण्ययमन्यायस्वभावाचारसोमपाः ।

धरति । ध्रियते वा । 'धृङ् धारणे' (भ्वा० उ० अ०) 'अर्तिस्तुसु–' (उ० १।१४०) इति मन् **'धर्मोऽस्त्री** पुण्य आचारे स्वभावोपमयोः क्रतौ । अहिंसोपनिषद्न्याये ना धनुर्यमसोमपे' (इति मेदिनी) ॥

उपायपूर्व आरम्भ उपधा चाप्युपक्रमः ॥ १३९ ॥

उपधा उत्कोचः । उपक्रमणम् । अनेन वा । पूर्ववत् (३।३।१८,१२१,७।३।१३४) **'उपक्रमः** स्यादुपधाचिकित्सारम्भविक्रमे' इति विश्वः ॥

वणिक्पथः पुरं वेदो निगमाः

निगम्यते । अनेन वा । 'गोचरसंचर–' (३।३।११९) इति साधुः । **'निगमो** वाणिजे पुर्यां कटे वेदे पणिक्पथे' इति विश्वः ॥

नागरो वणिक् ।

नैगमौ द्वौ

निगमे भवः । 'तत्र भवः' (४।३।५३) इत्यण् । **'नैगमः** स्यादुपनिषद्वणिजोर्नागरेऽपि च' इति विश्वः ॥

बले रामो नीलचारुसिते त्रिषु ॥ १४० ॥

रमते । अनेन वा । 'रमु क्रीडायाम्' (भ्वा० आ० अ०) 'ज्वलितिकसन्तेभ्यो णः' (३।१।१४०) 'हलश्च' (३।३।१२१) इति घञ् वा । **'रामः** पशुविशेषे स्याज्जामदग्न्ये हलायुधे । राघवे च सितश्वेतमनोज्ञेषु च वाच्यवत्' इति विश्वः ॥

शब्दादिपूर्वो वृन्देऽपि ग्रामः

ग्रसते । ग्रस्यते वा । 'ग्रसु अदने' (भ्वा० अ० से०) 'ग्रसेरा च' (उ० १।१४३) इति मः । **'ग्रामः** खरे संवसथे वृन्दे शब्दादिपूर्वकः' इति विश्वः ॥

क्रान्तौ च विक्रमः ।

विक्रमणम् । अनेन वा । घञ् (३।३।१८,१२१) । **'विक्रमः** शक्तिसंपत्तिः क्रान्तिमात्रं च **विक्रमः**' इति धरणिः ॥

स्तोमः स्तोत्रेऽध्वरे वृन्दे

स्तूयते । अनेन वा । 'ष्टुञ् स्तुतौ' (अ० उ० अ०) । 'अर्तिस्तुसु–' (उ० १।१४०) इति मन् ॥

जिह्मस्तु कुटिलेऽलसे ॥ १४१ ॥

जहाति । हीयते वा । 'ओहाक् त्यागे' (जु० अ० अ०) । 'जहातेः सन्वदालोपश्च' (उ० १।१४१) इति मन् ॥

गुल्मा रुक्स्तम्बसेनाश्च

गुल्यते । 'गुड वेष्टने' रक्षणे (तु० प० से०) बाहुलकान्मक् । डलयोरेकत्वम् । **'गुल्मः** स्तम्बे स्त्रीह्नि घट्टसैन्ययोः सैन्यरक्षणे' इति विश्वः । रुग् उदररोगः । स्तम्बोऽप्रकाण्डः ॥

जामिः स्वसृकुलस्त्रियोः ।

जायति । जायते वा । 'जै क्षये' (भ्वा० प० अ०) । बाहुलकान्मिः । यद्वा 'जमु अदने' (भ्वा० प० से०) । बाहुलकादिण् दीर्घश्च । कर्मणि 'इजजादिभ्यः' (वा० ३।३।१०८) इतीञ् वा–इति स्वामी । **'जिह्मस्तु** कुटिले मन्दे **जामिः** स्वसृकुलस्त्रियोः' इति चवर्गादावजयः ॥

मुकुटस्तु—'प्रहरे समये **यामो यामिः** स्वसृकुलस्त्रियोः' इति रभसादन्तस्थादितामाह । **'यामिः** कुलस्त्रीस्वस्रोः स्त्री' (इति मेदिनी) । तत्र 'या प्रापणे' (अ० प० अ०) धातुर्बोध्यः ॥

क्षितिक्षान्त्योः क्षमा युक्ते क्षमं शक्ते हिते त्रिषु १४२

क्षमणम् । 'क्षमूष् सहने' (भ्वा० आ० से०) । षित्त्वाद् (३।३।१०४) अङ् । क्षमते । क्षम्यते वा । पचाद्यच् (३।१।१३४) । घञ् (३।३।१९) वा । 'नोदात्तोपदेशस्य–' (७।३।३४) इति न वृद्धिः । **'क्षमा** तितिक्षा पृथ्वी च योग्ये शक्ते हिते **क्षमम्**' इति धरणिः ॥

त्रिषु श्यामौ हरित्कृष्णौ श्यामा स्याच्छारिवानिशा ।

श्यायते । 'श्यैङ् गतौ' (भ्वा० आ० अ०) । 'इषुयुधीन्धि–' (उ० १।१४५) इति मक् । **'श्यामो** वटे प्रयागस्य वारिदे वृद्धदारके । पिके च कृष्णहरिते पुंसि स्यात्तद्वति त्रिषु । मरिचे सिन्धुलवणे क्लीबं स्त्री शारिवौषधौ । अप्रसूताङ्गनायां च प्रियङ्गावपि चोच्यते । यमुनायां त्रियामायां कृष्णत्रिवृतिकौषधौ ।' नीलिकायाम्—'अथ **श्यामो** मासे मण्डपकालयोः' (इति मेदिनी) ॥

ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु ॥ १४३ ॥

लडनम् । 'लड बाल्ये (विलासे)' (भ्वा० प० से०) । संपदादिक्विप् (वा० ३।३।१०८) । डलयोरेकत्वम् । ललमति । 'अमगल्यादौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) ॥*॥ बाहुलकात्कनिनि नैन्तोऽपि । 'प्रधानध्वजशृङ्गेषु पुण्ड्रवालधिलक्ष्मसु । भूषावाजिप्रभावेषु **ललामं स्याल्ललाम** च' इति रुद्रः । पुण्ड्रमश्वादीनां ललाटचित्रम् । अश्वो वाजी । भूषा सामीप्यादश्वस्यैव ॥

सूक्ष्ममध्यात्ममपि

सूच्यते । 'सूच पैशून्ये' (चु० उ० से०) । 'सूचेः स्मन्' (उ० ४।१७७) । **'सूक्ष्मं** स्यात्कैतवेऽध्यात्मे पुंसन्नौ त्रिषु

१—द्वाविति ब्राह्मणस्य नैगमत्वे निषेधः—इति स्वामी ॥—'द्वौ' इत्युक्तेरुपनिषद्ब्राह्मणयोर्नायम्, इत्येके—इति पीयूषव्याख्या ॥

१—युक्ते मान्तमव्ययम् इत्येके शक्तहितयोस्त्रिषु । क्षमः, क्षमा । इति पीयूषव्याख्या ॥ २—इत उत्तरं श्रामशब्दार्थकथनेन प्रकृतानुपयुक्तम् ॥ ३—यथा 'कन्याललाम कमनीयमजस्य लिप्सोः' इति रघुः—इति स्वामिमुकुटौ ॥

चाल्पके' (इति मेदिनी)। यत्तु-सुष्ठु उक्ष्यते इति स्वामी॥ सुष्ठु उष्मयते-इति मुकुटश्च व्याचष्टे। तदुक्तसूत्रादर्शनमूलकम्॥

आदौ प्रधाने प्रथमः

प्रथते। 'प्रथ विस्तारे' (भ्वा० आ० से०)। 'पथेरमच्' (उ० ५।६८)। **'प्रथमस्तु** भवेदादौ प्रधानेऽपि च वाच्यवत्' (इति मेदिनी)॥

त्रिषु।

आमान्तम्॥

वामौ वल्गुप्रतीपौ द्वौ

वमति वम्यते वा। 'टुवम उद्गिरणे' (भ्वा० प० से०)। 'ज्वलिति-' (३।१।१४०) इति णः। घञ् (३।३।१९) वा। **'वामं** सव्ये प्रतीपे च द्रविणे चातिसुन्दरे। पयोधरे हरे कामे विद्याद्वामामपि स्त्रियाम्। **वामी** शृगालीवडवारासभीकरभीषु च' इति विश्वः॥

अधमौ न्यूनकुत्सितौ॥ १४४॥

अमति। 'अव रक्षणादौ' (भ्वा० प० से०)। 'अवद्यावमाधमा-' (उ० ५।५४) इति साधुः। यद्वा न धम्यते, धमति वा। 'धम ध्माने' सौत्रः। घञ् (३।३।१८) पचाद्यच् (३।१।१३४) वा।—अधोभवः। 'अवोधसोः सलोपश्च' ( )-इति स्वामी॥

जीर्णे च परिभुक्तं च यातयाममिदं द्वयम्।

यातो गतो याम उपभोगकालो यस्य। **'यातयामोऽन्यवज्जीर्णे** परिभुक्तोज्झितेऽपि च' (इति मेदिनी)॥

इति मान्ताः

तुरंगगरुडौ तार्क्ष्यौ

तार्क्ष्यस्य कश्यपस्यापत्यम्। 'ऋष्यन्धक-' (४।१।११४) इत्यण्। **'तार्क्ष्योऽश्वसर्पयोः**। गरुडाग्रजे सुपर्णे च पुंसि क्लीबं रसाञ्जने' (इति मेदिनी)॥

निलयापचयौ क्षयौ॥ १४५॥

क्षयणम्, क्षीयतेऽत्र वा। 'क्षि क्षये' (भ्वा० प० अ०)। 'क्षि निवासगत्योः' (तु० प० अ०)। 'एरच्' (३।३।५६)। 'पुंसि-' (३।३।११८) इति घो वा। **'क्षयो** रोगान्तरे वेश्मकल्पान्तापचयेषु च' (इति मेदिनी)॥

श्वशुर्यौ देवरश्यालौ

श्वशुरस्यापत्यम्। 'राजश्वसुराद्यत्' (४।१।१३७)॥

भ्रातृव्यौ भ्रातृजद्विषौ।

भ्रातुरपत्यम्। 'भ्रातुर्व्यच्च' (४।१।१४४)। 'व्यन्सपत्ने'(४।१।१४५)॥

पर्जन्यौ रसदब्देन्द्रौ

षिपर्ति। 'पृ पालनपूरणयोः' (जु० प० से०)। पर्षति। 'पृषु सेचने' (भ्वा० प० से०)। 'पर्जन्यः' (उ० ३।१०३) इति साधुः। **'पर्जन्यो** मेघशब्देऽपि ध्वनदम्बुदशक्रयोः' इति विश्वः॥

स्यादर्यः स्वामिवैश्ययोः॥ १४६॥

अर्यते 'ऋ गतौ' (भ्वा० प० से०)। 'अर्यः स्वामिवैश्ययोः' (३।१।१०३) इति साधुः॥

तिष्यः पुष्ये कलियुगे

त्विषति। 'त्विष दीप्तौ' (भ्वा० उ० अ०)। अङ्यादिः (उ० ४।११२)। **'तिष्यः** कलियुगे ऋक्षे **तिष्या** धात्री च कीर्त्यते' इति धरणिः॥

पर्यायोऽवसरे क्रमे।

पर्ययणम्। 'इण् गतौ' (अ० प० अ०)। 'परावनुपात्यये—' (३।३।३८) इति घञ्। **'पर्यायस्तु** प्रकारे स्यान्निर्माणेऽवसरे क्रमे' इति विश्वः॥

प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु॥ १४७॥

रन्ध्रे शब्दे

प्रत्ययनम्। प्रतीयतेऽनेन वा। प्रत्येति, इति वा। 'एरच्' (३।३।५६)। 'पुंसि—'(३।३।११८) इति घो वा। पचाद्यच् (३।१।१३४) वा। **'प्रत्ययः** शपथे रन्ध्रे विश्वासाचारहेतुषु। प्रथितत्वे च सन्नादावधीनज्ञानयोरपि' इति विश्वः॥

अथानुशयो दीर्घद्वेषानुतापयोः।

अनुशयनम्। अनेन वा। 'शीङ् स्वप्ने' (अ० आ० से०)। 'एरच्' (३।३।५६)। 'पुंसि—' (३।३।११८) इति घो वा। **'भवेदनुशयो** द्वेषे पश्चात्तापानुबन्धयोः' इति विश्वः॥

स्थूलोच्चयस्त्वसाकल्ये गजानां मध्यमे गते॥१४८॥

उच्चयनम्। 'चिञ् चयने' (स्वा० उ० अ०)। 'एरच्' (३।३।५६)। स्थूलस्योच्चयः। **'स्थूलोच्चयस्त्वसाकल्ये** गण्डोपलकरण्डयोः' इति विश्वः॥

समयाः शपथाचारकालसिद्धान्तसंविदः।

समयनम्। समीयतेऽत्र, अनेन वा। समेति वा 'इण् गतौ' (अ० प० अ०)। 'इ गतौ' (भ्वा० प० से०) वा। 'एरच्' (३।३।५६)। 'पुंसि-' (३।३।११८) इति घो वा। पचाद्यच् (३।१।१३४) वा। **'समयः** शपथाचारसिद्धान्तेषु तथा धिषि। क्रियाकारे च निर्देशे संकेते कालभाषयोः' (इति मेदिनी)॥

व्यसनान्यशुभं दैवं विपदित्यनयाश्चयः॥ १४९॥

व्यसनं स्त्रीद्यूतपानादि। अशुभं दैवविशेषणम्। न नयनम्। अनेन वा। अत्र वा। 'णीञ् प्रापणे' (भ्वा० उ० अ०)। 'एरच्' (३।३।५६)। विरोधे नञ्। अयाच्छुभावहविधेरन्यः। **'अनयस्तु** विपद्दैवाशुभयोर्व्यसनेषु च' (इति मेदिनी)॥

अत्ययोऽतिक्रमे कृच्छ्रे दोषे दण्डेऽपि

अत्ययनम् । अनेन वा । 'इण् गतौ' (अ० प० अ०) । 'एरच्' (३।३।५६) । **'अत्ययोऽतिक्रमे** कृच्छ्रेऽत्युत्पाते नाशदण्डयोः' इति धरणिः ॥

अथापदि ।

युद्धायत्योः संपरायः

संपरायणम् । 'इण् गतौ' (अ० प० अ०) । पूर्ववत् (३।३।५६) । **'संपरायः** समीके स्यादापदुत्तरकालयोः' (इति मेदिनी) ॥

पूज्यस्तु श्वशुरेऽपि च ॥ १५० ॥

पूजयितुमर्हः । 'पूज पूजायाम्' (चु० प० से०) । 'अर्हे कृत्यतृचश्च' (३।३।१६९) इति यत् । 'पूज्यौ श्वशुरपूजार्हौ' इति धरणिः ॥

पश्चादवस्थायिबलं समवायश्च संनयौ ।

संनयनम् । संनीयते वा । संनयति वा । 'णीञ् प्रापणे' (भ्वा० उ० अ०) । 'एरच्' (३।३।५६) पचाद्यच् (३।१।१३४) वा ॥

संघाते संनिवेशे च संस्त्यायः

संस्त्यानम् । 'ष्ठ्यै स्त्यै शब्दसंघातयोः' (भ्वा० प० अ०) । घञ् (३।३।१८) । 'आतो युक्–' (७।३।३३) । **'संस्त्यायः** संनिवेशे च संघाते विस्तृतावपि' (इति मेदिनी) ॥

प्रणयास्त्वमी ॥ १५१ ॥

विश्रम्भयाच्ञाप्रेमाणः

प्रणयनम् । 'णीञ्' (भ्वा० उ० अ०) । 'एरच्' (३।३।५६) । **'प्रणयः** प्रसरे प्रेम्णि (याच्ञाविश्रम्भयोरपि । निर्वाणेऽपि' (इति मेदिनी) । **'विश्रम्भः** स्यात्परिचये विश्वासविप्रलम्भयोः' इत्यजयः ॥

विरोधेऽपि समुच्छ्रयः ।

सुष्ठु ऊर्ध्वं श्रयणम् । 'श्रिञ् सेवायाम्' (भ्वा० उ० से०) । 'एरच्' (३।३।५६) । 'वैरोन्नत्योः **समुच्छ्रयः**' इति रभसः ॥

विषयो यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि ॥१५२॥

विसयनम् । अत्र वा । विसिनोति वा । 'षिञ् बन्धने' (स्वा० उ० अ०) । 'एरच्' (३।३।५६) 'पुंसि–' (३।३।११८) इति घो वा । पचाद्यच् (३।१।१३४) वा । 'परिनिविभ्यः सेवसितसय–' (८।३।७०) इति षः । **'विषयो** गोचरे देशे तथा जनपदेऽपि च । प्रबन्धाद्यस्य यो ज्ञातस्तत्र रूपादिके पुमान्' (इति मेदिनी) ॥

निर्यासेऽपि कषायोऽस्त्री

निर्यासः क्वाथः । कषति कण्ठम् । 'कष हिंसायाम्' (भ्वा० प० से०) । बाहुलकादयः । **'कषायो** रसभेदे स्यादङ्गरागे विलेपने । निर्यासे च **कषायोऽथ** सुरभौ लोहितेऽन्यवत्' इति विश्वः ॥

सभायां च प्रतिश्रयः ।

प्रतिश्रयणम् । अत्र वा । 'श्रिञ्' (भ्वा० उ० से०) 'एरच्' (३।३।५६) । घः (३।३।११८) वा । **'प्रतिश्रयः** सभायां चाश्रयेऽभ्युपगमेऽपि च' (इति मेदिनी) ॥

प्रायो भूम्यन्तगमने

प्रायणम् । 'अय गतौ' (भ्वा० आ० से०) । घञ् (३।३।१८) । 'इण् गतौ' (अ० प० से०) । 'एरच्' (३।३।५६) वा । **'प्राय**श्चानशने मृत्यौ **प्रायो** बाहुल्यतुल्ययोः' इति विश्वः ॥

मन्युर्दैन्ये क्रतौ क्रुधि ॥ १५३ ॥

मन्यते । 'मन ज्ञाने' (दि० आ० अ०) । मृगय्वादिः (उ० १।३७) । **'मन्युः** पुमान् क्रुधि । दैन्ये शोके च यज्ञे च' (इति मेदिनी) ॥

रहस्योपस्थयोर्गुह्यम्

गूहनम् । गुह्यते वा । 'गुहू संवरणे' (भ्वा० आ० से०) । 'शंसिदुहि–' इति क्यप् । **'गुह्यं** रहस्युपस्थे च **गुह्यः** कमठदम्भयोः' इति विश्वः ॥

सत्यं शपथतथ्ययोः ।

सति साधुः । 'तत्र साधुः' (४।४।९८) इति यत् । **'सत्यं** कृते च शपथे तथ्ये च त्रिषु तद्वति' (इति मेदिनी) ॥

वीर्यं बले प्रभावे च

वीर्यतेऽनेन । 'वीर विक्रान्तौ' (चु० उ० से०) । 'अचो यत्' (३।१।९७) वीरे साधुर्वा । 'तत्र साधुः' (४।४।९८) इति यत् । **'वीर्यं** प्रभावे शुक्रे च तेजःसामर्थ्ययोरपि' (इति मेदिनी) ॥

द्रव्यं भव्ये गुणाश्रये ॥ १५४ ॥

द्रोरिदम् । 'द्रव्यं च भव्ये' (५।३।१०४) इति साधुः । **'द्रव्यं** स्याद्रविणे भव्ये पृथिव्यादौ च पित्तले । मेषजे च विलेपे च जतुद्रुमविशेषयोः' इति विश्वः ॥

धिष्ण्यं स्थाने गृहे भेऽग्नौ

धिष्यते । 'धिष शब्दे' (जु० प० से०) धृष्णोति वा । 'नि धृषा प्रागल्भ्ये' (स्वा० प० से०) । 'सानसिवर्णसि–' (उ० ४।१०७) इति साधुः । यत्तु–'संध्यादयश्च' इति यः–इत्युक्तं मुकुटेन । तदेतत्सूत्रास्मरणमूलकम्, निर्मूलं च । **'धिष्ण्यं** स्थानाग्निसद्मसु । शक्तावृक्षेपि' (इति मेदिनी) ॥

भाग्यं कर्म शुभाशुभम् ।

भज्यतेऽनेन । 'भज सेवायाम्' (भ्वा० उ० अ०) । **'भ-**

१—'शंसिदुहिगुहिभ्यो वा' इति काशिका । तत्र 'प्रशस्यस्य श्रः' (५।३।६०) 'ईडवन्दवृशंसदुहां ण्यतः' (६।१।२१४) इति सूत्रद्वयबलाच्छसेः सिद्धम् । इतरयोस्तु मूलं मृग्यम्—इति कौमुदी ॥ तस्माण्ण्यति संज्ञापूर्वकत्वाद्गुणाभावः ॥

हलोर्ण्यत्' (३।१।१२४)। 'चजोः–' (७।३।५३) इति कुत्वम्। **'भाग्यं** शुभात्मकविधौ स्याच्छुभाशुभकर्मणि' इति विश्वः ॥

कशेरुहेऽस्रोगाङ्गेयम्

गङ्गाया अपत्यम्। 'शुभ्रादिभ्यश्च' (४।१।१२३) इति ढक्। **'गाङ्गेयः** स्यात्पुमान्भीष्मे क्लीबं स्वर्णकशेरुणोः' (इति मेदिनी) ॥

विशल्या दन्तिकापि च ॥ १५५ ॥

विगता शल्यात्। विगतं शल्यं यस्या वा। **'विशल्या**ग्निशिखादन्तीगुडूचीत्रिपुटासु च' (इति मेदिनी) ॥

वृषाकपायी श्रीगौर्योः

वृषाकपेः स्त्री। 'वृषाकप्यग्नि—' (४।१।३७) इति ङीष्, ऐ च। **'वृषाकपायी** श्रीगौरीवरीजीवन्तिकासु च' (इति मेदिनी) ॥

अभिख्या नामशोभयोः ।

अभिख्यानम्। 'ख्या प्रकथने' (अ० प० अ०)। चक्षिङादेशो वा। 'आतश्चोपसर्गे' (३।३।१०६) इत्यङ्। **'अभिख्या** त्वभिधाने स्याच्छोभायां च यशस्यपि' (इति मेदिनी) ॥

आरम्भो निष्कृतिः शिक्षा पूजनं संप्रधारणम् १५६
उपायः कर्मचेष्टा च चिकित्सा च नव क्रियाः ।

निष्कृतिः प्रायश्चित्तम्। संप्रधारणं विचारः। उपायः सामादिः। चेष्टा परिस्पन्दः करणम्। भावादौ 'कृञः श च' (३।३।१००)। **'क्रिया** कर्मणि चेष्टायां करणे संप्रधारणे। (आरम्भोपायशिक्षार्थचिकित्सानिष्कृतिष्वपि)' इति विश्वः ॥

छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः ॥१५७॥

छ्यति। 'छो छेदने' (दि० प० अ०)। 'ईद्यधा–' (३।१।१४१) इति णः। 'आतो युक्–' (७।३।३३)। यद्वा 'माछाशसिभ्यो यः' (उ० ४।१०९)। **'छाया** स्यादातपाभावे प्रतिबिम्बार्कयोषितोः' (इति मेदिनी) ॥

कक्ष्या प्रकोष्ठे हर्म्यादेः काक्ष्यां मध्येभबन्धने ।

कक्षे भवा। 'शरीरावयवात्–' (४।३।५५) इति यत्। **'कक्ष्या** बृहतिकायां स्यात् (काक्ष्यां मध्येभबन्धने। हर्म्यादीनां प्रकोष्ठे च)' (इति यान्तेषु मेदिनी) ॥

कृत्या क्रियादेवतयोस्त्रिषु भेद्ये धनादिभिः ॥१५८॥

करणम्। 'कृञः श च' (३।३।११०) इति चात् क्यप्। कृत्यते। 'कृती छेदने' (रु० प० से०)। 'ऋदुपधात्–' (३।१।११०) इति क्यप् **'कृत्यो** विद्विषि कार्ये च कृत्या क्रियादिवौकसोः' इति रभसः ॥

जन्यः स्याज्जनवादेऽपि

जनानां वादः। 'मतजनहलात्–' (४।४।९७) इति यत्। यद्वा जायते। जनयति वा। 'ऋहलोर्ण्यत्' (३।१।१२४)। 'जनिवध्योश्च' (७।३।३४) इति न वृद्धिः। 'अचो यत्' (३।१।९७) वा। जनीं वहति। 'संज्ञायां जन्या' (४।४।८२) इति वा साधुः। **'जन्या** मातृवयस्या स्याज्जन्या जनीवरप्रिया। जननीजनयित्रोश्च **जन्यं** निर्वादयुद्धयोः' इति धरणिः॥

जघन्योऽन्तेऽधमेऽपि च ।

जघने भवः। 'शरीरावयवात्–' (४।३।५५) इति यत्। यद्वा कुटिलं हन्यते। हन्तेर्यङन्तात् 'अचो यत्' (३।१।९७)। 'अनित्यमागमशासनम्' इति 'नुगतः–' (७।४।८५) इति न नुक्। **'जघन्यं** चरमे शिश्ने जघन्यं गर्हितेऽन्यवत्' इति विश्वः ॥

गर्ह्याधीनौ च वक्तव्यौ

वचनार्हः। 'वच परिभाषणे' (अ० प० अ०)। ब्रूञ् आदेशो वा। तव्यः (३।१।९६)। **'वक्तव्यं** कुत्सिते हीने वचनार्हे च वाच्यवत्' (इति मेदिनी) ॥

कल्यौ सज्जनिरामयौ ॥ १५९ ॥

कलासु साधुः। 'तत्र साधुः' (४।४।९८) इति यत्। यद्वा कल्यते। 'कल गतौ संख्याने च' चुरादिरदन्तः। 'अचो यत्' (३।१।९७)। **'कल्यं** प्रभाते क्लीबं स्यात्कल्यो वाक्श्रुतिवर्जिते। सज्जनीरोगदक्षेषु कल्याणवचनेऽपि च। उपायवचनेऽपि स्यात् (त्रिषु, मद्ये तु योषिति)' (इति मेदिनी) ॥ सज्जो बद्धसंनाहादिः ॥

आत्मवाननपेतोऽर्थादर्थ्यौ

आत्मवान् ज्ञानी। अर्थे साधुः 'तत्र साधुः'। (४।४।९८) इति यत्। आर्थादनपेतः। 'धर्मपथ्य–' (४।४।९२)। इति यत्। **'अर्थ्यो** विज्ञार्थशालिनोः' इत्यजयः। **'अर्थ्यं** शिलाजतुन्यर्थ्यौ बुधे न्याय्ये च वाच्यवत्' (इति मेदिनी) ॥

पुण्यं तु चार्वपि ।

पुनाति। 'पूञ् पवने' (क्र्या० उ० से०)। 'पूञो यण्णुग् ह्रस्वश्च' (उ० ५।१५)। यद्वा पुणति। 'पुण कर्मणि शुभे' (तु० प० से०)। 'इगुपध–' (३।२।१३५) इति कः। पुणे साधुः। 'तत्र साधुः' (४।४।९८) इति यत्। **'पुण्यस्त्रिषु** मनोज्ञे स्यात्क्लीबं सुकृतधर्मयोः' इति विश्वः ॥

रूप्यं प्रशस्ते रूपेऽपि

आहतं प्रशस्तं वा रूपमस्यास्ति। 'रूपादाहतप्रशंसयोः–' (५।२।१२०) इति यप्। **'रूप्यः** स्यात्सुन्दरे त्रिषु। आयतस्वर्णरजते रजते च नपुंसकम्' (इति मेदिनी) ॥

१–कर्तरि ण्यदादयस्तु 'कृत्यल्युटो बहुलम्' (३।३।११३) इत्युक्तेरुन्नेयाः ॥

वदान्यो वल्गुवागपि ॥ १६० ॥

वदेति । 'वदेरान्यः' (उ० ३।१०४) । **'वदान्यो** दातृवाग्मिनोः' इत्यजयः ॥

न्याय्येऽपि मध्यम्

मां ध्यायति । 'ध्यै चिन्तायाम्' (भ्वा० प० से०) । 'आतोऽनुप–' (३।२।३) इति कः । यद्वा मद्यते । 'मद्द पूजायाम्' (भ्वा० प० से०) । 'अद्यादिः (उ० ४।११२) । 'न्याय्यावलभ्योर्मध्यमन्तरे चाधमे त्रिषु' इति रभसः ॥

सौम्यं तु सुन्दरे सोमदैवते ।

सोमो देवतास्य । 'सोमाट् ष्यण्' (४।२।३०) । यद्वा सोम इव सोमः । ततश्चतुर्वर्णादिखात् (वा० ५।१।१२४) ष्यञ् । यत्तु—शाखादिखात् (५।३।१०३) यः—इति मुकुटः । तन्न । वृद्ध्यप्रसङ्गात् । **'सौम्यो** बुधे मनोज्ञे स्यादनुग्रे सोमदैवते' '(इल्वलासु च सौम्याः स्युः–)' इति विश्वः ॥

इति यान्ताः ॥

निवहावसरौ वारौ

वारयति । व्रियते वा । 'वृञ् वरणे' (स्वा० उ० से०) । पचाद्यच् (३।१।१३४) । घञ् (३।३।१८) वा । **'वारः** सूर्यादिदिवसे वारोऽवसरवृन्दयोः । कुब्जवृक्षे हरे द्वारे, **वारं** मद्यस्य भाजने' इति विश्वः ॥

संस्तरौ प्रस्तराध्वरौ ॥ १६१ ॥

संस्तीर्यते । 'स्तृञ् आच्छादने' (क्रया० उ० से०) । 'ऋदोरप्' (३।३।५७) । **संस्तर-प्रस्तरा**वेतौ प्रस्तराध्वरयोरपि । मणिपाषाणयोश्चापि (यथाक्रममुदीरितौ)' इति विश्वः । प्रस्तरः शय्या ॥

गुरू गीर्पतिपित्राद्यौ

गृणाति । 'गॄ शब्दे' (क्रया० प० से०) । 'कृग्रोरुच' (उ० १।२४) इत्युः । **'गुरु**स्त्रिलिङ्ग्यां महति दुर्जरालघुनोरपि । पुमान्निषेकादिकरे पित्रादौ सुरमन्त्रिणि' (इति मेदिनी) ॥

द्वापरौ युगसंशयौ ।

द्वाभ्यां परः । द्वौ परावत्र वा । पृषोदरादिः (६।३।१०९) ॥

प्रकारौ भेदसादृश्ये

प्रकरणम् । कृञो घञ् (३।३।१८) **'प्रकार**स्तुल्यभेदयोः' (इति मेदिनी) ॥

आकाराविङ्गिताकृती ॥ १६२ ॥

आकरणम् । घञ् (३।३।१८) । इङ्गितं चेष्टा । आकृतिरवयवसंस्थानम् ॥

किंशारू धान्यशूकेषू

किंचित् कुत्सितं वा शृणाति । 'शॄ हिंसायाम्' (क्रया० प० से०) । 'किंजरयोः श्रिणः' (उ० ११४) इति ञुण् । **'किंशा**रुर्ना शस्यशूके विशिखे कङ्कपक्षिणि' (इति मेदिनी) ॥

मरू धन्वधराधरौ ।

म्रियन्तेऽत्र जन्तवः । 'मृङ् प्राणत्यागे' (तु० आ० अ०) । 'भृमृशी–' (उ० १।७) इत्युः । **'मरु**र्ना गिरिधन्वनोः' (इति मेदिनी) ॥

अद्रयो द्रुमशैलार्काः

अत्ति । अद्यते वा । 'अद भक्षणे' (अ० प० अ०) । 'अदिशदि–' (उ० ४।६५) इति क्रिन् ॥

स्त्रीस्तनाब्दौ पयोधरौ ॥१६३॥

धरति । 'धृञ् धारणे' (भ्वा० उ० अ०) । पचाद्यच् (३।१।१३४) । पयसो धरः । **'पयोधर**ः कोषकारे नारिकेले स्तनेऽपि च । कशेरुमेघयोः पुंसि' (इति मेदिनी) ॥

ध्वान्तारिदानवा वृत्राः

वृणोति । 'वृञ् वरणे' (स्वा० उ० से०) । बहुलकात् कः । **'वृत्रो** रिपौ घने ध्वान्ते शैलभेदे च दानवे' (इति मेदिनी) ॥

बलिहस्तांशवः कराः ।

बली राजग्राह्यो भागः । अंशुर्मयूखः कीर्यते । 'कॄ विक्षेपे' (तु० प० से०) । 'ऋदोरप्' (३।३।५७) । करोति वा अच् (३।१।१३४) । **'करो** वर्षोपले रश्मौ पाणौ प्रत्यायशुण्डयोः' (इति मेदिनी) ॥

प्रदरा भङ्गनारीरुग्वाणाः

प्रदीर्यते । प्रदरणम् । अनेन वा । 'दॄ विदारणे' (क्रया० प० से०) । 'ऋदोरप्' (३।३।५७) । **'प्रदरो** रोगभेदे स्याद्विकारे शरभङ्गयोः' (इति मेदिनी) ॥

अस्राः कचा अपि ॥ १६४ ॥

अस्यन्ते । 'असु क्षेपणे' (दि० प० से०) । बाहुलकात् रः । **'अस्रः** कोणे कचे पुंसि क्लीबमश्रुणि शोणिते' (इति मेदिनी) ॥

अजातशृङ्गो गौः कालेऽप्यश्मश्रुर्ना च तूवरौ ।

'काले' इत्युभाभ्यां संबध्यते । तौति । 'तु' सौत्रो गत्यादौ । बाहुलकाद्वरः दीर्घश्च । यद्वा तनोति बाहुलकाङ्डः तूश्चासौ वरश्चाच्छादकः । **'तूवरो**ऽश्मश्रुपुरुषे प्रौढाशृङ्गगवेऽपि च । पुरुषे व्यञ्जनत्यक्ते स्यात्कषायरसेऽपि च' (इति मेदिनी) ॥

स्वर्णेऽपि राः

राति सुखम् । रायते वा 'रातेर्डः' (उ० २।६६) । **'रा**ः पुंसि स्वर्णवित्तयोः' (इति मेदिनी) ॥

परिकरः पर्यङ्कपरिवारयोः ॥ १६५ ॥

परिकीर्यते । 'कॄ विक्षेपे' (तु० प० से०) । 'ऋदोरप्' (३।३।५७) । यद्वा परिकीर्यतेऽनेन । 'पुंसि–' (३।३।११८) इति

१—तूवरो दन्तोष्ठ्यमध्यो ग्रन्थकृता पठितः । वस्तुतस्तु पवर्गाद्यमध्यः । वेदे तथा दर्शनात् 'अश्वस्तूपरो गोमृगः' इति—पीयूषव्याख्या ।

घः । 'भवेत्परिकरो व्राते पर्यङ्कपरिवारयोः । प्रगाढगात्रिकाबन्धे विवेकारम्भयोरपि' इति विश्वः । 'यत्नारम्भौ **परिकरौ**' इति त्रिकाण्डशेषः ॥

मुक्ताशुद्धौ च तारः स्यात्

तारयति । अच् । यद्वा तार्यते । अनेन वा । घञ् (३।३।१९) । घः (३।३।११८) वा । '**तारो** मुक्तादिसंशुद्धौ तरणे शुद्धमौक्तिके । **तारं** च रजतेऽत्युच्चस्वरेऽप्यन्यवदीरितम् । ऋक्षाक्षिमध्ययोस्तारा सुग्रीवगुरुयोषितोः । बुद्धदेव्यां मता **तारा**' इति विश्वः ॥

शारो वायौ स तु त्रिषु ।

कर्बुरे

शृणाति । 'शॄ हिंसायाम्' (क्र्या० प० से०) । 'शृणातेर्वा युवर्णनिवृत्तेषु' (वा० ३।३।२१) इति घञ् । '**शारः** स्याच्छबले वाच्यलिङ्गः पुंसि समीरणे' (इति तालव्यादौ मेदिनी) ॥

अथ प्रतिज्ञाजिसंविदापत्सु संगरः ॥ १६६ ॥

संगरणम् । संगीर्यते वा । अनेन वा । 'गॄ शब्दे' (क्र्या० प० से०) । 'ऋदोरप्' । 'पुंसि–' (३।३।११८) इति घो वा । '**संगरो** युधि चापदि । क्रियाकारे विषे चाङ्गीकारे क्लीबं शमीफले' (इति मेदिनी) ॥

वेदभेदे गुह्यवादे मन्त्रः

मन्त्र्यते । मन्त्रणं वा । 'मन्त्रि गुप्तभाषणे' (चु० प० से०) । घञ् (३।३।१९,१८) । '**मन्त्रो** वेदविशेषे स्याद्देवादीनां च साधने । गुह्यवादेऽपि च पुमान्' (इति मेदिनी) ॥

मित्रो रवावपि ।

मेद्यति । 'ञिमिदा स्नेहने' (दि० प० से०) । 'अमिचिमिदिशसिभ्यः क्रः' (उ० ४।१६४) । '**मित्रं** सुहृदि न द्वयोः । (सूर्ये पुंसि)' (इति मेदिनी) ॥

मखेषुयूपखण्डेऽपि स्वरुः

इषुर्बाणः । स्वरति । स्वर्यते वा । 'स्वृ शब्दोपतापयोः' (भ्वा० प० अ०) । 'शॄस्वृस्निहि–' (उ० १।१०) इत्युः । '**स्वरुः** पुमान्यूपखण्डे भिदुरेऽप्यध्वरे शरे' (इति मेदिनी) । यूपखण्डे यूपे तक्ष्यमाणे प्रथमपतिते शकले ॥

गुह्येऽप्यवस्करः ॥ १६७ ॥

अवोऽधः कीर्यते । 'कॄ विक्षेपे' (तु० प० से०) 'ऋदोरप्' (३।३।५७) । कस्कादिः (८।३।४८) । 'वर्चस्केऽवस्करः' (६।१।४८) इति वा साधुः । '**अवस्कारोऽपि** वर्चस्के गुह्ये' (इति मेदिनी) । गुह्य उपस्थे ॥

आडम्बरस्तूर्यरवे गजेन्द्राणां च गर्जिते ।

आडम्ब्यते । 'डबि क्षेपे' चुरादिः । घञ् (३।३।१९) । भावे (३।३।१८) वा । आडम्बं राति । 'आतोनुप–' (३।२।३) इति कः । आडम्बयति वा । 'बाहुलकादरन्' । '**आडम्बरः** समारम्भे गजगर्जिततूर्ययोः' इति विश्वः ॥

अभिहारोऽभियोगे च चौर्ये संनहनेऽपि च ॥१६८॥

अभिहरणम् । घञ् (३।३।१८) । अभिगम्याक्रमणमभियोगः संनहनं कवचादिधारणम् ॥

स्याज्जंगमे परीवारः खड्गकोशे परिच्छदे ।

जंगमे परिजने । परिवार्यतेऽनेन । 'परिवारणं वा' । घञ् (३।३।१८,१९) । 'उपसर्गस्य–' (६।३।१२३) इति दीर्घः । '**परीवारः** परिजने खड्गकोशे परिच्छदे' (इति मेदिनी) । परिच्छद उपकरणम् ॥

विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनम् ॥ १६९ ॥

विस्तीर्यते । 'स्तृञ् आच्छादने' (क्र्या० उ० से०) । 'वृक्षासनयोर्विष्टरः' इति साधुः ॥

द्वारि द्वाःस्थे प्रतीहारः प्रतीहार्यप्यनन्तरे ।

प्रतिहियतेऽनेन । अत्र । 'हृञ्' (भ्वा० उ० अ०) । घञ् (३।३।१९) 'उपसर्गस्य–' (६।३।१२२) इति दीर्घः । गौरादिङीष् (४।१।४१) । '**प्रतीहारो** द्वारि द्वाःस्थे द्वाःस्थितायां तु योषिति' (इति मेदिनी) । अनन्तरे द्वाःस्थे ॥

विपुले नकुले विष्णौ बभ्रुः स्यात्पिङ्गले त्रिषु ॥१७०॥

बिभर्ति । भरति वा । 'डुभृञ्' (जु० उ० अ०) । 'भृञ्' (भ्वा० उ० अ०) वा । 'कुर्भ्रश्च' (उ० १।२२) इति कुद्वित्वं च । यत्तु—भृञः शङ्कादित्वात् कुर्द्वित्वं चनं च—इति मुकुटः । तदुक्तसूत्रादर्शनमूलकम् । निर्मूलं च । 'बभ्रुर्नो नकुले विष्णौ विपुले पिङ्गले त्रिषु' इति बलशर्मा । 'बभ्रुर्विशाले नकुले कृशानावजे मुनौ शूलिनि पिङ्गले च' इति विश्वः ॥

सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु ।

सरति । 'सॄ स्थिरे' (३।३।१७) इति घञ् । '**सारो** बले स्थिरांशे च मज्ञि पुंसि जले धने । न्याय्ये क्लीबं त्रिषु वरे' (इति मेदिनी) ॥

दुरोदरो द्यूतकारे पणे द्यूते दुरोदरम् ॥ १७१ ॥

दुष्टमासमन्तादुदरमस्य । '**दुरोदरो** द्यूतकारे द्यूताक्षपणः योपुंमान्' । पणो ग्लाहः ॥

महारण्ये दुर्गपथे कान्तारः पुंनपुंसकम् ।

कान्ता अरा अस्य । यद्वा कान्तं मनोज्ञमृच्छति, इयर्ति वा । 'कर्मण्यण्' (३।२।१) । '**कान्तारोऽस्त्री** महारण्ये विले दुर्गमवर्त्मनि । पुंसि स्यादिक्षुभेदे' (इति मेदिनी) ॥

१—भाष्ये तु 'शॄ' इत्यविभक्तिक एव निर्देशः सिद्धान्तकौमुद्यामपि तथैव व्याख्यातम् ।

१—'आश्रित्य दुर्गं गिरिकंदरोदरं क्रीडन्त्यमुष्मिन् सततं दरोदरम्' इति यमकान्विरुकारोऽपि, इति गोवर्धनः—इति मुकुटपीयूषौ । २—आधुनिकमेदिनीपुस्तके तु '**दुरोदरं** द्यूतभेदे द्यूतकृत्पणयोः पुमान्' इति पाठो लभ्यते ।

मत्सरोऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु ॥ १७२ ॥

माद्यति परक्षच्छ्रे । 'मदी हर्षे' (दि० प० से०) । 'कृभू-मदिभ्यः कित्' (उ० ३।७३) इति सरः । **'मत्सरा** मक्षिकायां स्यान्मात्सर्यक्रोधयोः पुमान् । असह्यपरसंपत्तौ कृपणे चाभिधेयवत्' (इति मेदिनी) । तद्वानन्यशुभद्वेषवान् ॥

देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये ।

व्रियते । वरणं वा । 'वृञ् वरणे' (स्वा० उ० से०) । 'ग्रहवृद-' (३।३।५८) इत्यप् । यद्वा वृणोति, वरति वा । पचाद्यच् (३।१।१३४) । **'वरो** जामातरि वृतौ देवतादेरभीप्सिते । षिङ्गे पुंसि त्रिषु श्रेष्ठे कुङ्कुमे तु नपुंसकम् । **वरी** प्रोक्ता शतावर्यां **वरा** च स्यात्फलत्रिके । मनागिष्टे **वरं** क्लीबं केचिदाहुस्तदव्ययम्' (इति मेदिनी) ॥

वंशाङ्कुरे करीरोऽस्त्री तरुभेदे घटे च ना ॥ १७३ ॥

कृणाति । 'कॄ हिंसायाम्' (क्या० प० से०) किरति । कीर्यते वा । 'कॄ विक्षेपे' (तु० प० से०) वा । 'कॄशॄपॄकटि-' (उ० ४।३०) इतीरन् । करिणमीरयति । 'ईर गतौ' (अ० आ० से०) । 'कर्मण्यण्' (३।२।१) । 'वंशाङ्कुरे **करीरोऽस्त्री** वृक्षभिद्घटयोः पुमान् । **करीरा** चीरिकायां च दन्तमूले च दन्तिनाम्' (इति मेदिनी) ॥

ना चमूजघने हस्तसूत्रे प्रतिसरोऽस्त्रियाम् ।

प्रतिसरति । पचाद्यच् (३।१।१३४) । प्रतिस्रियते । अनेन वा । 'पुंसि-' (३।३।११८) इति घः । 'भवेत्प्र**तिसरो** मन्त्रभेदे माल्ये च कङ्कणे । व्रणशुद्धौ चमूपृष्ठे पुंसि न स्त्री तु मण्डले । आरक्षे करसूत्रे च नियोज्ये त्वन्यलिङ्गकः' (इति मेदिनी) ॥

यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु ॥ १७४ ॥

शुकाहिकपिमेकेषु हरिर्ना कपिले त्रिषु ।

हरति । 'हृञ्' (भ्वा० उ० अ०) । 'अच इः' (उ० ४।१३९) । **'हरि**र्वातार्कचन्द्रेन्द्रयमोपेन्द्रमरीचिषु । सिंहाश्वकपिमेकाहिशुकलोकान्तरेषु च । **हरि**र्वाच्यवदाख्यातो हरित्कपिलवर्णयोः' इति विश्वः ॥

शर्करा कर्परांशेऽपि

शृणाति । शीर्यते वा । 'शॄ हिंसायाम्' (क्या० प० से०) । 'शॄः करन्' (उ० ४।३) । **'शर्करा** खण्डविकृतावुपलाकर्परांशयोः । शर्करान्वितदेशेऽपि रुग्भेदे शकलेऽपि च' (इति मेदिनी) ॥

यात्रा स्याद्यापने गतौ ॥ १७५ ॥

यानम् । अनेन वा । 'या प्रापणे' (अ० प० अ०) । 'हुयामा-' (उ० ४।१६८) इति त्रन् । **'यात्रा** तु यापनोपाये गतौ देवार्चनोत्सवे' इति विश्वः ॥

इरा भूवाक्सुराप्सु स्यात्

एति । ईयते वा । 'इण् गतौ' (अ० प० अ०) । 'ऋज्रेन्द्राग्र-' (उ० २।१८) इति साधुः ॥

तन्द्रा निद्राप्रमीलयोः ।

तत् राति । 'आतोऽनुप—' (३।२।३।) इति कः । स्त्रियां टाप् (४।१।४) । केचिद् गौरादित्वात् (४।१।४१) ङीषमाहुः तद् द्राति वा । 'द्रा कुत्सायां गतौ' (अ० प० अ०) । '–निद्रातन्द्रा–' (३।२।१५८) इति तदो नान्तत्वं निपात्यते । प्रमीला अत्यन्तश्रमादिना मोहप्राया ॥

धात्री स्यादुपमातापि क्षितिरप्यामलक्यपि ॥१७६॥

धीयते । 'धेट् पाने' (भ्वा० प० अ०) । 'धः कर्मणि ष्ट्रन्' (३।२।१८१) । पित्त्वात् (४।१।४१) ङीष् । **'धात्री** जनन्यामलकीवसुमत्युपमातृषु' (इति मेदिनी) ॥

क्षुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिका ।

त्रिषु क्रूरेऽधनेऽल्पेऽपि क्षुद्रः

क्षृणत्ति । क्षुद्यते वा । 'क्षुदिर् संचूर्णने' (रु० उ० अ०) । 'स्फायितञ्चि—' (उ० २।१३) इति रक् । **'क्षुद्रः** स्यादधमक्रूरकृपणाल्पेषु वाच्यवत् । **क्षुद्रा** व्यङ्गानटीकण्टकारिकासरघासु च । चाङ्गेरीवेश्ययोर्हिंस्रामक्षिकामात्रयोरपि' इति विश्वः ॥ व्यङ्गाङ्गहीना । सरघा मधुमक्षिका ॥

मात्रा परिच्छदे ॥ १७७ ॥

अल्पे च परिमाणे स्यान्मात्रं कात्स्न्यैऽवधारणे ।

मीयते । अनया वा । माति मिमीते वा । 'मा माने' (अ० प० अ०) । 'माङ् माने' (जु० आ० अ०) वा । 'हुयामा-' (उ० ४।१६८) इति त्रन् । **'मात्रा** कर्णविभूषायां वित्ते माने परिच्छदे । अक्षरावयवे स्वल्पे क्लीबं कात्स्न्येऽवधारणे' (इति मेदिनी) ॥

आलेख्याश्चर्ययोश्चित्रम्

चिनोति । चीयते वा । 'अमिचि-' (उ० ४।१६४) इति क्रः । **'चित्रा**खुपर्णीगोडुम्बासुभद्रादन्तिकासु च । मायायां सर्पनक्षत्रनदीभेदेषु च स्त्रियाम् । तिलकालेख्ययोः क्लीबं कर्बुरान्धुतयोरपि । तद्युक्तयोर्वाच्यलिङ्गं **चित्री** स्त्रियां नपुंसकम् । गोस्तने वस्त्रभेदे च रेखालिखनभेदयोः' (इति मेदिनी) ॥

कलत्रं श्रोणिभार्ययोः ॥ १७८ ॥

गडति । गड्यते वा । 'गड सेचने' (भ्वा० प० से०) । 'गडेरादेश्च कः' (उ० ३।१०६) इत्यत्रन् । डलयोरेकत्वम् । कलं त्रायते वा । 'त्रैङ् पालने' (भ्वा० आ० अ०) । कः (३।२।१) । कडति कड्यते वा । 'कड शासने (मदे)' (भ्वा० प० से०) । बाहुलकादत्रन् । 'दुर्गस्थाने नृपादीनां **कलत्रं** श्रोणिभार्ययोः' इति रभसः ॥

योग्यभाजनयोः पात्रम्

पाति । पायते वा । पीयतेऽनेन वा 'पा रक्षणे' (अ० प० अ०) । 'पा पाने' (भ्वा० प० अ०) वा । ष्ट्रन् (उ० ४।१५९) । **'पात्रं** तु भाजने योग्ये **पात्रं** तीरद्वयान्तरे । **पात्रं** नुवादौ पर्णे च राजमन्त्रिणि चेष्यते' इति विश्वः ॥

पत्रं वाहनपक्षयोः ।

पतन्त्यनेन । 'दात्रौ—' (३।२।१८२) इति ष्ट्रन् । **'पत्रं** तु वाहने पर्णे पक्षे च शरपक्षिणोः' इति विश्वः ॥

निदेशग्रन्थयोः शास्त्रम्

निदेश आज्ञा । शासनम् । निश्यते अनेन, इति वा । 'सर्वधातुभ्यः ष्ट्रन्' (उ० ४।१५९) ॥

शस्त्रमायुधलोहयोः ॥१७९॥

शस्यतेऽनेन । 'शसु हिंसायाम्' (भ्वा० प० से०) । 'दात्रौ–' (३।२।१८२) इति ष्ट्रन् । **'शस्त्रं** लोहास्त्रयोः क्लीबं क्षुरिकायां तु योषिति' (इति मेदिनी) ॥

स्याज्जटांशुकयोर्नेत्रम्

नयति नीयते । अनेन वा । 'णीञ् प्रापणे' (भ्वा० उ० अ०) । 'दात्रौ–' (३।२।१८२) इति ष्ट्रन् । **'नेत्रं** (मथिगुणे वस्त्रे तरुमूले विलोचने । **नेत्रं** रथे च नाड्यां च **नेत्रो**) नेतरि मेदवत्' इति विश्वः । **'नेत्रं** मथिगुणे वस्त्रभेदे मूले द्रुमस्य च । रथे चक्षुषि नद्यां च **नेत्री** नाड्यां च योषिति' (इति मेदिनी) ॥

क्षेत्रं पत्नीशरीरयोः ।

क्षयति । क्षीयते । अनेन वा । 'क्षि क्षये' (भ्वा० प० अ०) । 'क्षि निवासगत्योः' (तु० प० अ०) वा । ष्ट्रन् (उ० ४।१५९) । **'क्षेत्रं** शरीरे केदारे सिद्धस्थानकलत्रयोः' (इति मेदिनी) ॥

मुखाग्रे क्रोडहलयोः पोत्रम्

पूयतेऽनेन । 'पूञ् पवने' (क्र्या० उ० से०) । 'हलसूकरयोः पुवः' (३।२।१८३) इति ष्ट्रन् । **'पौत्रं** वस्त्रे मुखाग्रे च सूकरस्य हलस्य च' इति विश्वः ॥

गोत्रं च नाम्नि च ॥ १८० ॥

गूयतेऽनेन । 'गुङ् शब्दे' (भ्वा० आ० अ०) । ष्ट्रन् (उ० ४।१५९) । गां त्रायते वा । 'त्रैङ्' (भ्वा० आ० अ०) । आतोऽनुप–' (३।२।३) इति कः । **'गोत्रा** भूगव्ययो**र्गोत्रः** शैले **गोत्रं** कुलाख्ययोः । संभावनीयबोधे च काननक्षेत्रवर्त्मसु' (इति मेदिनी) ॥

सत्रमाच्छादने यज्ञे सदादाने वनेऽपि च ।

सीदन्त्यत्र । अनेन वा 'षदॢ विशरणादौ' (भ्वा० प० अ०) । ष्ट्रन् (उ० ४।१५९) । **'सत्रं** यज्ञे सदादानच्छादनाण्यकैतवे' (इति मेदिनी) ॥

अजिरं विषये कायेऽपि

अजन्त्यत्र । अनेन वा । 'अज गतौ' (भ्वा० प० से०) । 'अजिरशिशिर–' (उ० १।५३) इति साधुः । **'अजिरं** प्राङ्गणे वाते विषये दुर्दुरे तनौ । (स्त्री चण्ड्याम्)' (इति मेदिनी)

अम्बरं व्योम्नि वाससि ॥ १८१ ॥

अम्बते । अम्ब्यते वा । 'अबि शब्दे' (भ्वा० आ० से०) । बाहुलकादरः । **'अम्बरं** वाससि व्योम्नि कार्पासे च सुगन्धके' इति विश्वः ॥

चक्रं राष्ट्रेऽपि

क्रीयतेऽनेन । 'घञर्थे कः' (वा० ३।३।५८) 'केकुञादीनाम्' (वा० ६।१।१२) इति द्वित्वम् । **'चक्रः** कोके पुमान् क्लीबं व्रजे सैन्यरथाङ्गयोः । राष्ट्रे दम्भान्तरे कुम्भकारोपकरणास्त्रयोः । जलावर्तेऽपि' (इति मेदिनी) ॥

अक्षरं तु मोक्षेऽपि

न क्षरति । 'क्षर संचलने' (भ्वा० प० से०) । 'पचाद्यच्' (३।१।१३४) । यद्वा अश्नुते । 'अशू व्याप्तौ' (स्वा० आ० से०) । 'अशेः सरः' (उ० ३।७०) । 'मोक्षेऽपवर्गे ओंब्रह्मण्यच्युतेऽक्षरम्' इत्यनेकार्थकोषः ॥

क्षीरमप्सु च ।

घस्यते । 'घसॢ अदने' (भ्वा० प० अ०) । 'घसेः किच्च' (उ० ४।३४) इतीरन् । 'गमहन–' (६।४।९८) इत्यलोपः । ('शासिवसि–)' (८।३।६०) इति (षत्वम्) । **'क्षीरं** दुग्धे जले' (इति मेदिनी) ॥

स्वर्णेऽपि भूरिचन्द्रौ द्वौ

भवति । भूयते वा । 'भू सत्तायाम्' (भ्वा० प० से०) । 'भू प्राप्तौ' (चु० आ० से०) । 'अदिशदि–' (ऊ० ४।६५) इति क्विन् । **'भूरि**र्ना वासुदेवे च हरे च परमेष्ठिनि । नपुंसकं सुवर्णे च प्राज्ये स्याद्वाच्यलिङ्गकः' (इति मेदिनी) ॥

चन्दति । 'चदि आह्लादने' (भ्वा० प० से०) । 'स्फायितञ्चि–' (उ० २।१३) इति रक् । **'चन्द्रः** कर्पूरकाम्पिल्लसुधांशुस्वर्णचारुषु' (इति मेदिनी) ॥

द्वारमात्रे तु गोपुरम् ॥ १८२ ॥

पुरति । 'पुर अग्रगमने' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । गवां पुरम् । **'गोपुरं** द्वारि पूर्द्वारि कैवर्तीमुस्तकेऽपि च' (इति मेदिनी) ॥

गुहादम्भौ गह्वरे द्वे

गाह्यते । 'गाहू विलोडने' (भ्वा० आ० से०) । 'छित्वरच्छत्वर–' (उ० ३।१) इति साधुः । **'गह्वरस्तु** गुहादम्भनिकुञ्जगहनेष्वपि' इति विश्वः ॥

रहोऽन्तिकमुपह्वरे ।

उपह्वरन्त्यत्र । 'ह्वृ कौटिल्ये' (भ्वा० प० अ०) । 'पुंसि–'

(३।३।११८) इति घः। यत्तु—गह्वरवदुपह्वरम्—इति मुकुटेनाभाणि । तन्न । छिल्वरादावस्य पाठाभावात् । **'उपह्वरं** समीपे स्यादेकान्ते च नपुंसकम्' (इति मेदिनी) ॥

पुरोऽधिकमुपर्यग्राणि

अग्यते अगति वा । 'अग कुटिलायां गतौ' (भ्वा० प० से०) । 'ऋज्रेन्द्राग्र–' (उ० २।१८) इति साधुः । **'अग्रं** पुरस्तादुपरि परिमाणे पलस्य च । आलम्बने समूहे च प्रान्ते च स्यान्नपुंसकम् । अधिके च प्रधाने च प्रथमे चाभिधेयवत्' (इति मेदिनी) ॥

अगारे नगरे पुरम् ॥ १८३ ॥

मन्दिरं च

पिपर्ति । 'पॄ पालनपूरणयोः' (जु० प० से०) । मूलविभुजादित्वात् (वा० ३।२।५) कः । यद्वा पुरति 'पुर अग्रगमने' (तु० प० से०) । 'इगुपध–' (३।१।३५) इति कः । **'पुरं** शरीरमित्याहुर्गृहोपरिगृहे **पुरम्** । **पुरो** गुग्गुलुराख्यातो नगरेऽपि **पुरं पुरी'** इति धरणिः ॥

मन्दतेऽत्र । 'मदि स्तुत्यादौ' (भ्वा० आ० से०) । 'इषिमदिमुदि–' (उ० १।५१) इति किरच् । **'मन्दिरं** नगरेऽगारे क्लीबं ना मकरालये' (इति मेदिनी) ॥

अथ राष्ट्रोऽस्त्री विषये स्यादुपद्रवे ।

राजति । 'राजृ दीप्तौ' (भ्वा० उ० से०) । ष्ट्रन् (उ० ४।१५९) । **'राष्ट्रं** स्यादुपवर्तने । उपद्रवे क्लीबपुंसोः' (इति मेदिनी) ॥

दरोऽस्त्रियां भये श्वभ्रे

दरणम् । दीर्यते वा । 'दृ भये' (भ्वा० प० से०) 'दृ विदारणे' (क्र्या० प० से०) वा । 'ऋदोरप्' (३।३।५७) **'दरोऽस्त्री** साध्वसे गर्ते कन्दरे तु **दरी** स्मृता । **दरा**व्ययं मनागर्थे' (इति मेदिनी) ॥

वज्रोऽस्त्री हीरके पवौ ॥ १८४ ॥

वजति । 'वज गतौ' (भ्वा० प० से०) । 'ऋज्रेन्द्र–' (उ० १।१८) इति साधुः । **'वज्रं** स्याद्बाधके धात्र्यां क्लीबं योगान्तरे पुमान् । **वज्रा** स्नुह्यां गुडूच्यां च **वज्री** स्नुह्यन्तरे स्मृता । दम्भोलौ हीरकेऽप्यस्त्री **वज्रं** त्रपुवरत्नयोः' (इति दन्तोष्ठ्यादौ मेदिनी) ॥

तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे ।

तननम् । तन्यते । अनेन वा । 'तनु विस्तारे' (त० उ० से०) । ष्ट्रन् (उ० ४।१५९) । यद्वा तत्रणम् । तत्र्यते वा । 'तत्रि धारणे' (चु० प० से०) । घञ् (३।३।१८) । यत्तु—'स्फायितञ्चि–' (उ० २।१३) इति रक् इति मुकुट आह । तन्न । उक्तधातोस्त्र पाठाभावात् । तनोते रकि नलोपप्रसङ्गात् । तत्र्यतेर्घञ्वा वा सिद्धत्वाच्च । **'तन्त्रं** कुटुम्बकृत्ये स्यात्सिद्धान्ते चौषधोत्तमे । प्रधाने तन्तुवाये च शास्त्रभेदे परिच्छदे । श्रुतिशाखान्तरे हेतावुभयार्थप्रयोजके । इतिकर्तव्यतायां च (**तन्त्री** वीणागुणे मता । अमृतादेहशिरयोः)' (इति मेदिनी) ॥

औशीरं चामरे दण्डेऽप्यौशीरं शयनासने ॥ १८५ ॥

उश्यते 'वश कान्तौ' (अ० प० से०) । 'नशेः कित्' (उ० ४।३१) इतीरन् । प्रज्ञाद्यण् (५।४।३८) । यद्वा उशीरस्येदम् । 'तस्येदम्' (४।३।१२०) इत्यण् । **'औशीरं** चामरे दण्डे **औशीरं** स्यापपीठयोः' इत्यजयः ॥

पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले ।
व्योम्नि खड्गफले पद्मे तीर्थौषधिविशेषयोः ॥१८६॥

पुष्णाति पुष्यते । अनेन वा । 'पुष पुष्टौ' (क्र्या० प० से०) । 'पुषः कित्' (उ० ४।४) इति करन् । **'पुष्करं** पङ्कजे व्योम्नि पयःकरिकराग्रयोः । औषधिद्वीपविहगतीर्थरागोरगान्तरे । **पुष्करं** तूर्यवक्त्रे च काण्डे खड्गफलेऽपि च' (इति विश्वः) ॥

अन्तरमवकाशावधिपरिधानान्तर्धिभेदतार्थ्ये ।
छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च १८७

अन्तं राति । 'रा दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥

मुस्तेऽपि पिठरम्

पेठति । पिठ्यते वा । 'पीठ हिंसासंक्लेशनयोः' (भ्वा० प० से०) बाहुलकादरो गुणाभावश्च । **'पिठरः** स्याल्यां ना क्लीबं मुस्तामन्थानदण्डयोः' (इति मेदिनी) ॥

राजकशेरुण्यपि नागरम् ।

नगरे भवम् । 'तत्र भवः' (४।३।५३) इत्यण् । यद्वा न अगं राति । नकारेण 'सुप्सुपा' इति समासः । **'नागरं** मुस्तके शुण्ठ्यां विदग्धे नगरोद्भवे' (इति मेदिनी) । राजकशेरुः कन्दविशेषः ॥

शार्वरं त्वन्धतमसे धातुके भेद्यलिङ्गकम् ॥ १८८ ॥

शर्वर्यां भवम् । 'तत्र भवः' (४।३।५३) इत्यण् । स्वामी तु 'धातुकेभे नृलिङ्गकम्' इति पठित्वा 'धातुकश्चासाविभश्च । नृलिङ्गं पुंलिङ्गम्' इति व्याख्यत् ॥

गौरोऽरुणे सिते पीते

गौरति । 'गुरी उद्यमने' (तु० आ० से०) । गवते वा मनोऽत्र । 'गुङ् गतौ' (भ्वा० आ० अ०) वा । 'ऋज्रेन्द्र–' (उ० २।१८) इति साधुः । यद्वा गुर्यतेऽनेन । 'गुरी' (तु० आ० से०) । 'हलश्च' (३।३।१२१) इति घञ् । गोर एव ।

१—शयनासनयोः समुदितयोः संज्ञेयम्—इति स्वामी ॥—शयनं चासनं च शयनासनम् । तत्र युगपद्वर्तते । तत्र यथा राजाभिधानाक्षरमुद्रितं तदौशीरमालोक्य न कस्य भीतिः—इत्यनेकार्थकैरवाकरकौमुदी ।—सुभूतिस्तु पृथगेवाह—इति मुकुटः ॥

प्रज्ञाद्यण् (५।४।३८)। **'गौरः** पीतेऽरुणे श्वेते विशुद्धे चाभिधेयवत्। ना श्वेतसर्षपे चन्द्रे न द्वयोः पद्मकेसरे। (गौरी त्वसंजातरजःकन्याशंकरभार्ययोः। रोचनीरजनीपिङ्गाप्रियङ्गुवसुधासु च। आपगाया विशेषे च यादसांपतियोषिति)' (इति मेदिनी)॥

व्रणकार्यप्यरुष्करः।

अरुः करोति। 'दिवाविभा–' (३।२।२१) इति टः। **'अरुष्करो** व्रणकृति त्रिषु भल्लातके पुमान्' (इति मेदिनी)॥

जठरः कठिनेऽपि स्यात्

जायते। अस्मिन् वा। 'जनी' (दि० आ० से०)। 'जनेरठ च' (उ० ५।३८) इत्वरः। **'जठरो** न स्त्रियां कुक्षौ बद्धकक्खटयोस्त्रिषु' (इति मेदिनी)॥

अधस्तादपि चाधरः॥ १८९॥

न धरति। 'धृञ् धारणे' (भ्वा० उ० अ०)। पचाद्यच् (३।१।१३४)। यद्वा धरादुच्चात्कठिनाद्वान्यः। **'अधरस्तु** पुमानोष्ठे हीनेऽनूर्ध्वेऽपि वाच्यवत्' (इति मेदिनी)॥

अनाकुलेऽपि चैकाग्रः

एकमेकत्र वाग्रमस्य। **'एकाग्र**मन्यालिङ्गं स्यादेकतानेऽप्यनाकुले' (इति मेदिनी)॥

व्यग्रो व्यासक्त आकुले।

विविधं विविधे वाग्रमस्य। विरुद्धमगति वा। 'अग कुटिलायां गतौ' (भ्वा० प० से०)। 'ऋज्रेन्द्र–' (उ० २।१८) इति साधुः॥

उपर्युदीच्यश्रेष्ठेष्वप्युत्तरः स्यात्

उत्तरति। 'तॄ प्लवनतरणयोः' (भ्वा० प० से०)। पचाद्यच् (३।१।१३४)। यद्वा अतिशयेनोद्गतः। तरप् (५।३।५७)। द्रव्यप्रकर्षत्वान्नामु (५।४।११)। **'उत्तरं** प्रतिवाक्ये स्यादूर्ध्वोदीच्योत्तमेऽन्यवत्। **उत्तरस्तु** विराटस्य तनये दिशि **चोत्तरा'** इति विश्वः॥

अनुत्तरः॥ १९०॥

एषां विपर्यये श्रेष्ठे

उत्तरस्याभावः। उत्तरस्य विरुद्धो वा। श्रेष्ठे न उत्तरो यस्मात्॥

दूरानात्मोत्तमाः पराः।

पिपर्ति। पूर्यते। अनेन वा। पचाद्यच् (३।१।१३४)। 'ऋदोरप्' (३।३।५७)। 'पुंसि–' (३।३।११८) इति घो वा। **'परः** श्रेष्ठारिदूरान्योत्तरे क्लीबं तु केवले' (इति मेदिनी)॥

स्वादुप्रियौ च मधुरौ

मधु माधुर्यं राति। अस्त्यत्र वा। 'आतोऽनुप–' (३।२।३) इति कः। 'ऊषशुषि–' (५।२।१०७) इति रो वा। **'मधुरौ** स्वादुशोभनौ' इति व्याडिः। **'मधुरस्तु** रसे विषे। **मधुरं** रसवत्स्वादुप्रियेषु **मधुरोऽन्यवत्'** इति जिश्वः॥

क्रूरौ कठिनदयौ॥ १९१॥

कृन्तति। 'कृती छेदने' (तु० प० से०)। 'कृतेश्छः क्रूच' (२।२१) इति रक्। **'क्रूरस्तु** कठिने घोरे नृशंसेऽप्यभिधेयवत्' इति विश्वः॥

उदारो दातृमहतोः

उच्चैरासमन्ताद्दच्छति। पचाद्यच् (३।१।१३४)। **'उदारो** दातृमहतोर्दक्षिणे चाभिधेयवत्' (इति मेदिनी)॥

इतरस्त्वन्यनीचयोः।

इना कामेन तरति। 'तॄ' (भ्वा० प० से०) पचाद्यच् (३।१।१३४)॥

मन्दस्वच्छन्दयोः स्वैरः

स्वेन स्वातन्त्र्येण ईर्ते। ईरति वा। 'ईर गतौ कम्पने च' (अ० आ० से०)। 'ईर प्रेरणे' (चु० उ० से०) वा। पचाद्यच् (३।१।१३४)। 'स्वादीरेरिणोः' (वा० ६।१।९९) इति वृद्धिः। यत्तु मुकुटः—स्वेन स्वयमेव न तत्संगत्यान्य इयर्ति। अच् (३।१।१३४)—इति व्याख्यत्। तन्न। अचि गुणे च 'स्वारः' इति प्रसङ्गात्॥

शुभ्रमुदीप्तशुक्लयोः॥ १९२॥

शोभते। 'शुभ दीप्तौ' (भ्वा० आ० से०) 'स्फायितञ्चि–' (उ० २।१३) इति रक्। **'शुभ्रं** स्यादभ्रके क्लीबमुदीप्तशुक्लयोस्त्रिषु' (इति मेदिनी)॥

इति रान्ताः॥

चूडा किरीटं केशाश्च संयता मौलयस्त्रयः।

मूलस्यादूरे भवः। 'सुतंगमादित्वात्' (४।२।८०) इञ्। यद्वा मूलस्यापत्यम्। 'अत इञ्' (४।१।९५)। 'किरीटे **मौलि**रक्लीबे चूडासंयतकेशयोः' इति रभसः। **'मौलिः** किरीटे धम्मिल्ले चूडायामनपुंसकम्। अशोकपादपे पुंसि' (इति मेदिनी)॥

द्रुमप्रभेदमातङ्गकाण्डपुष्पाणि पीलवः॥ १९३॥

मातङ्गो हस्ती। काण्डो बाणः। पीलति। 'पील प्रतिष्टम्भे' (भ्वा० प० से०)। मृगय्वादित्वात् (उ० १।३७) उः। **'पीलुः** पुमान् प्रसूने स्यात्परमाणौ मतङ्गजे। अस्थिखण्डे च तालस्य काण्डपादपभेदयोः' (इति मेदिनी)॥

कृतान्तानेहसोः कालः

कृतान्तो यमः। कालयति। 'कल शब्दसंख्यानयोः' (भ्वा० प० से०)। 'कल प्रेरणे' (चु० प० से०) वा। ण्यन्तः। पचाद्यच् (३।१।१३४)। यद्वा कल्यते संख्यायते। कर्मणि घञ् (३।३।१९)। यत्तु—कलयति भूतान्यायुर्वा—इति स्वामी व्याख्यत्। तन्न। अदन्तत्वेन वृद्ध्यप्रसङ्गात्। यद्वा

१—आधुनिकमेदिनीपुस्तके तु 'नाऽशोकद्रौ स्त्रियां भूम्नौ' इति पाठ उपलभ्यते॥

कल्यते । 'कल उपदेशे' ( ) । घञ् (३।३।१९) । **'कालो** मृत्यौ महाकाले समये यमकृष्णयोः' (इति मेदिनी) ॥

चतुर्थेऽपि युगे कलिः ।

कलयति । कल्यते वा 'कल गतौ संख्याने च' (चु० उ० से०) अदन्तः । 'अच इः' (उ० ४।१३९) । **'कलिः** स्त्री कलिकायां ना शूराजिकलहे युगे' (इति मेदिनी) ॥

स्यात्कुरङ्गेऽपि कमलः

कामयते । काम्यते वा । 'कमु कान्तौ' (भ्वा० आ० से०) । णिङभावे वृषादित्वात् (उ० १।१०६) कलः । **'कमलं** सलिले ताम्रे जलजे व्योम्नि भेषजे । मृगभेदे तु **कमलः'** (इति मेदिनी) ॥

प्रावारेऽपि च कम्बलः ॥ १९४ ॥

काम्यते । 'कमेर्वुक्च' (उ० १।१०७) इति कलः । कं कुत्सितं शिरोऽम्बु वा वलते वा । 'वल संवरणे संचरणे च' (भ्वा० आ० से०) **'कम्बलो** नागराजे स्यात्साम्राप्रावारयोरपि । कृमावप्युत्तरासङ्गे सलिले तु नपुंसकम्' (इति मेदिनी) ॥

करोपहारयोः पुंसि वलिः प्राण्यङ्गजे स्त्रियाम् ।

करो राजग्राह्यः । उपहारः पूजासामग्री । प्राण्यङ्गजस्त्वक्संकोचः । बलते । वल्यते वा । 'बल प्राणने' (भ्वा० प० से०) । 'वल संवरणे' (भ्वा० आ० से०) । 'सर्वधातुभ्य इन्' (उ० ४।११८) । **'बलिर्दैत्यप्रभेदे** च करचामरदण्डयोः । उपहारे पुमान् स्त्री तु जरया श्लथचर्मणि । गृहदारुप्रभेदे च जठरावयवेऽपि च' (इति मेदिनी) ॥

स्थौल्यसामर्थ्यसैन्येषु बलं ना काकसीरिणोः १९५

वलते । वलति । वल्यते वा । अनेन वा 'बल संचरणे' (भ्वा० आ० से०) । 'बल प्राणने' (भ्वा० प० से०) वा । पचाद्यच् (३।१।१३४) । कर्मणि घञ् (३।३।१९) वा । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । 'पुंसि–' (३।३।११८) इति घो वा । **'बलं** गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः । **बलो** हलायुधे वैल्यभेदे बलिनि वायसे' इति विश्वः ॥

वातूलः पुंसि वात्यायामपि वातासहे त्रिषु ।

वातानां समूहः । वातं न सहते । 'वातात्समूहे च' (वा० ५।२।१२२) इत्यूलः । चात्तदसहने । 'वातूलो **वातुलोऽपि** स्यात्' इति द्विरूपकोषाभ्रस्वमध्योऽपि । 'वात सुखसेवनयोः' (चु० उ० से०) अदन्तः । बाहुलकादुलच् ॥

मेद्यलिङ्गः शठे व्यालः पुंसि श्वापदसर्पयोः ॥१९६॥

विरुद्धमा समन्तादलति । अडति वा । 'अल भूषणादौ' (भ्वा० प० से०) । 'अड उद्यमे' (भ्वा० प० से०) । डलयोरेकत्वम् । पचाद्यच् (३।१।१३४) । **'व्यालो** दुष्टगजे सर्पे शठे श्वापदसिंहयोः' (इति हैमः) ॥

मलोऽस्त्री पापविट्किट्टानि

मलयति । 'मल तत्कृतौ' अदन्तः । मलते वा । 'मल धारणे' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) । **'मलोऽस्त्री** पापविट्किट्टे कृपणे त्वभिधेयवत्' (इति मेदिनी) । विट् विष्ठा । किट्टं तैलाद्यधोभागस्थं शिल्पाणादि च । 'वसा शुक्रमसृग् मज्जा मूत्रं विट्कर्णविण्नखाः । श्लेष्माश्रु दूषिका स्वेदो द्वादशैते मला नृणाम्' ॥

अस्त्री शूलं रुगायुधम् ।

शलति । 'शूल रुजायाम्' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । **'शूलोऽस्त्री** रोग आयुधे । मृत्युकेतनयोगेषु **(शूला** स्यात्पण्ययोषिति)' (इति मेदिनी) ॥

शङ्कावपि द्वयोः कीलः

कीलति । कील्यते । अत्र । अनेन वा । 'कील बन्धे' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । कर्मणि घञ् (३।३।१९) । **'पुंसि–'** (३।३।११८) इति घो वा । **'कीलः** कफोणिकाघाते स्थाणौ च ज्वलनार्चिषि' इति धरणिः । **'कीलो** लेशे द्वयोः स्तम्भज्वालाकफोणिशङ्कुषु' इति विश्वः (मेदिनी) । **'कीलोऽग्नितेजसि** । कफोणिस्तम्भयोः शङ्कौ **कीला** रतहृतावपि' (इति हैमः) ॥

पालिः रुयरुयङ्कपङ्क्तिषु ॥ १९७ ॥

पालयति । पाल्यते वा । अत्र । अनया वा । 'पाल रक्षणे' (चु० प० से०) ण्यन्तः । 'अच इः' (उ० ४।१३९) **'पालिः** कर्णलतायां स्यात्प्रदेशे पङ्क्तिचिह्नयोः' इत्यजयः । 'सश्मश्रुयुवती **पालिः** प्रस्थः (पङ्क्तिः) कर्णलतापि च' इति त्रिकाण्डशेषः । **'पालिः** कर्णलताग्रेऽस्त्री पङ्क्तावङ्कप्रभेदयोः । छात्रादिदेये स्त्री **पाली** यूकासश्मश्रुयोषितोः' (इति मेदिनी) ॥

कला शिल्पे कालभेदेऽपि

कलयति । कल्यते वा 'कल शब्दसंख्यानयोः' (चु० आ० से०) । पचाद्यच् (३।१।१३४) । यद्वा कं लाति । **'कला** स्यान्मूलरैवृद्धौ शिल्पादावंशमात्रके । षोडशांशे च चन्द्रस्य कलनाकालमानयोः' (इति मेदिनी) । तालेषु च गुरुः कला' ॥

आली सख्यावली अपि ।

आ अलति । अल्यते वा । अनया वा 'अल भूषणादौ' (भ्वा० प० से०) । 'सर्वधातुभ्य इन्' (उ० ४।११८) । 'कृदिकारात्' (वा० ४।१।४५) इति वा ङीष् । **'आलिर्विशदाशये** । त्रिषु स्त्रियां वयस्यायां सेतौ पङ्क्तौ च कीर्तिता' (इति मेदिनी) ॥

अब्ध्यम्बुविकृतौ वेला कालमर्यादयोरपि ॥ १९८ ॥

वेलति । 'वेल्ल गतौ' (भ्वा० प० से०) । पचाद्यच् (३।१

१—'आद्य औष्ठ्यादिः, अन्त्यो दन्तोष्ठ्यादिः, इति विशेषो न गणितः'—इति क्षीरस्वामी ॥ २—वातलबातुलौ च दृश्येते—इति क्षीरस्वामी ॥

१३४)। वेल्यते । अनया वा । 'वेल कालोपदेशे' (चु० उ० से०)। 'गुरोश्च हलः' (३।३।१०४) इत्यङ् । **'वेला** काले च सीमायामब्धेः कूलविकारयोः । अक्लिष्टमरणे रोगे ईश्वरस्य च भोजने' (इति मेदिनी) ॥

बहुलाः कृत्तिका गावो बहुलोऽश्नौ शितौ त्रिषु ।

बहति । 'वह प्रापणे' (भ्वा० उ० अ०)। बाहुलकादुलच् । बहु लाति वा । **'बहुला** नीलिकायां स्यादेलायां गवि योषिति । कृत्तिकासु स्त्रियां भूम्नि विहायसि नपुंसकम् । पुंस्यश्नौ कृष्णपक्षे च वाच्यवत्प्राज्यकृष्णयोः' (इति मेदिनी) शितौ कृष्णे ॥

लीला विलासक्रिययोः

लेलायनम् । 'लेला दीप्तौ' कण्ड्वादिः । भिदाद्यङ् (३।३।१०४)। 'अ प्रत्ययात्' (३।३।१०२) इति वा । पृषोदरादिः (६।३।१०९)। यद्वा लयनम् । 'लीङ् श्लेषणे' (दि० आ० अ०)। बाहुलकाल्लो गुणाभावश्च । **'लीलां** विदुः केलिविलासखेलाशृङ्गारभावप्रभवक्रियासु' इति विश्वः ॥

उपला शर्करापि च ॥ १९९ ॥

उप लाति । 'ला दाने' (अ० प० अ०)। 'आतश्चोपसर्गे' (३।१।१३६) इति कः । उं शंभुं पलति । औ शंभौ वा पलति । 'पल गतौ' (भ्वा० प० से०)। पचाद्यच् (३।१।१३६) 'शर्कराशकले ज्ञेया सितोपला रजःखपि' इत्यजयः । (**'उपलः** प्रस्तरे रत्ने शर्करायां तु योषिति') (इति मेदिनी) ॥

शोणितेऽम्भसि कीलालम्

कीलेन प्रतिबन्धेनाल्यते वार्यते । 'अल भूषणादौ' (भ्वा० प० से०) । घञ् (३।३।१९)। कीलं प्रतिबन्धमलति वा । 'कर्मण्यण्' (३।२।१) ॥

मूलमाद्ये शिफाभयोः ।

मूलति । 'मूल प्रतिष्ठायाम्' (भ्वा० प० से०) । 'मूल रोहणे' (चु प० से०) वा । 'इगुपध–' (३।१।१३५) इति कः । आद्ये प्रथमे । शिफा जटा । भं नक्षत्रम् । **'मूलं** शिफाद्ययोः । मूलवित्तेऽन्तिके ना मे' (इति मेदिनी) ॥

जालं समूह आनायो गवाक्षक्षारकावपि ॥ २०० ॥

जलति । 'जल घातने' (भ्वा० प० से०) । ज्वलादिणः (३।१।१४०) । जालयति वा । 'जल संवरणे' चुरादिः । पचाद्यच् (३।१।१३४) । **'जालं** गवाक्ष आनाये क्षारके जम्भवृन्दयोः । **जालो** नीपद्रुमे' (इति मेदिनी) ॥

शीलं स्वभावे सद्वृत्ते

शीलनम् । शील्यतेऽनेन वा । 'शील समाधौ' (भ्वा० प० से०) । घञ् (३।३।१८)। घो (३।३।११८) वा ॥

सस्ये हेतुकृते फलम् ।

फलनम् । 'फल निष्पत्तौ' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । **'फलं** हेतुसमुत्थे स्यात्फलके व्युष्टिलाभयोः । जातीफलेऽपि कक्कोले सस्यबाणाग्रयोरपि' इति विश्वः ॥

छदिर्नेत्ररुजोः क्लीबं समूहे पटलं न ना ॥ २०१ ॥

पटं विस्तारं लाति । 'ला दाने' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । **'अथ पटलं** पिटके च परिच्छदे । छदिर्दृग्रोगतिलके क्लीबं, वृन्दे पुनर्न ना' (इति मेदिनी)। स्त्रियां गौरादिः (४।१।४१) । छदिर्गृहाच्छादनम् । 'छानी' इति ख्यातम् ॥

अधःस्वरूपयोरस्त्री तलम्

तलति । 'तल प्रतिष्ठायाम्' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४)। **'तलं** स्वरूपेऽनूर्ध्वेऽस्त्री क्लीबं ज्याघातवारणे । कानने कार्यबीजे च पुंसि तालमहीरुहे । चपेटे च त्सरौ तन्त्रीघाते सव्येन पाणिना' (इति मेदिनी) ॥

स्याच्चामिषे पलम् ।

पलति । 'पल गतौ' (भ्वा० प० से०)। पचाद्यच् (३।१।१३४)। **'पलमुन्मानमांसयोः'** इति रुद्रः ॥

और्वानलेऽपि पातालम्

पतति, अत्र वा । 'पत्ल गतौ' (भ्वा० प० से०) । 'चडि पतिभ्यामालच्' (उ० १।१७) । पातमलति वा । पातमालाति वा । **'पातालं** नागलोके स्याद्विवरे बडवानले' (इति मेदिनी) ॥

चेलं वस्त्रेऽधमे त्रिषु ॥ २०२ ॥

चिलति । चिल्यते वा । 'चिल वसने' (तु० प० से०) । पचाद्यच् (३।१।१३४) । घञ् (३।३।१९) वा चेलति, चेल्यते वा । 'चेल्ल गतौ' (भ्वा० प० से०) । पूर्ववत् । प्रज्ञाद्यण् (५।४।३८) । गौरादिङीष् (४।१।४१) वा ॥

कुकूलं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले ।

कोर्भूमेः कुलम् । कुत्सितं वा कुलम् ॥

निर्णीते केवलमिति त्रिलिङ्गं त्वेककृत्स्नयोः ॥ २०३ ॥

केवते । 'केवृ सेचने' (भ्वा० आ० से०) । वृषादित्वात् (उ० १।१०६) कलः । के शिरसि वलयति वा । 'बल प्राणने' (भ्वा० प० से०) पचाद्यच् (३।१।१३४) स्त्रियां टाप् । संज्ञाछन्दसोस्तु 'केवलमामक–' (४।१।३०) इति ङीप् ॥

पर्याप्तिक्षेमपुण्येषु कुशलं शिक्षिते त्रिषु ।

पर्याप्तिः सामर्थ्यम् । पुण्यं सुकृतम् । कौ भूमौ शलति । 'शल चलने' (भ्वा० प० से०) पचाद्यच् (३।१।१३४)। यद्वा कुश्यति । 'कुश संश्लेषणे' ( ) । कलः (उ० १।१०६)। कुशांल्लाति वा ॥

प्रवालमङ्कुरेऽप्यस्त्री

अङ्कुरे किसलये । प्रबलति । 'बल प्राणने' (भ्वा० प० से०)। 'ज्वलिति–' (३।१।१४०) इति णः । यद्वा ण्यन्ता-

त्पचाद्यच् (३।१।१३४)। **'प्रवालोऽस्त्री** किसलये वीणादण्डे च विद्रुमे' (इति मेदिनी) ॥

त्रिषु स्थूलं जडेऽपि च ॥ २०४ ॥

स्थूलयति । 'स्थूल परिबृंहणे' चुरादयदन्तः । पचाद्यच् (३।१।१३४) । **'स्थूलं** कूटे च निष्प्रज्ञे पीवरेऽप्यन्यलिङ्गकम्' (इति मेदिनी) ॥

करालो दन्तुरे तुङ्गे

करेणालाति । 'आतश्चोपसर्गे' (३।१।१३६) इति 'सुपि' (३।२।४) इति योगविभागाद्वा कः । यद्वा करमलति । 'अल भूषणादौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) । **'करालं** दन्तुरे तुङ्गे भीषणे चाभिधेयवत् । (स सर्जरसतैले ना क्लीबं कृष्णकुठेरके)' (इति मेदिनी) । **'दन्तुरस्तून्नतरदे** तथोन्नतनते त्रिषु' (इति रान्तेषु मेदिनी) ॥

चारौ दक्षे च पेशलः ।

'पिश अवयवे' (तु० प० से०) । भावे घञ् (३।३।१८) पेशं लाति । बाहुलकात् पिशेरलज्वा ॥

मूर्खेऽर्भकेऽपि बालः स्यात्

बलति । 'बल प्राणने' (भ्वा० प० से०) । 'ज्वलिति–' (३।१।१४०) इति णः । यद्वा वाडते । 'वाडृ आह्वाव्ये' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) । यद्वा वल्यते । 'वल संवरणे' (भ्वा० आ० से०) । कर्मणि घञ् (३।३।१९) । **'बालः** कचे शिशौ मूर्खे ह्रीवेरेऽश्वेभपुच्छयोः' इति विश्वः । **'बालो** ना कुन्तलेऽश्वस्य गजस्यापि च बालधौ । वाच्यलिङ्गोऽर्भके मूर्खे ह्रीवेरे पुंनपुंसकम् । अलंकारान्तरे मेधौ **वाली वाला** त्रुटिस्त्रियोः' (इति मेदिनी) ॥

लोलश्चलसतृष्णयोः ॥ २०५ ॥

लोडति । 'लोडृ उन्मादे' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । **'लोल**श्चले सतृष्णे च **लोला** तु रसनास्त्रियोः' (इति हैमः) ॥

इति लान्ताः ॥

दवदावौ वनारण्यवह्नी

दुनोति, दवति वा । 'टुदु उपतापे' (स्वा० प० अ०) । 'दु गतौ' (भ्वा० प० अ०) । 'दुन्योरनुपसर्गे' (३।१।१४२) इति वा णः । पक्षे अच् । यत्तु—दूयन्तेऽनेनेति । 'दुञो विभाषा' इति घञ्—इत्युक्तं स्वामिना । तन्न । उक्तवचनाभावात् ॥

जन्महरौ भवौ ।

भवति । पचाद्यच् (३।१।१३४) । अन्तर्भावितण्यर्थो वा । जन्मनि तु भावे 'ऋदोरप्' (३।३।५७) । **'भवः** क्षेमेशसंसारे सत्तायां प्राप्तिजन्मनोः' (इति मेदिनी) ॥

मन्त्री सहायः सचिवौ

सह अयते, अयति वा । 'अय गतौ' (भ्वा० आ० से०) । 'ईं गतौ' (भ्वा० प० से०) वा । पचाद्यच् (३।१।१३४) । सचनम् । 'षच समवाये' (भ्वा० उ० से०) । 'सर्वधातुभ्य इन्' (उ० ४।११८) । सचिं वाति । 'वा गत्यादौ' (अ० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥

पतिशाखिनरा धवाः ॥ २०६ ॥

धवति, धुवति, धूनोति, धुनाति वा । 'धूञ् कम्पने' (चु० उ० से०, स्वा० उ० से०, क्र्या० उ० से०) । 'धू विधूनने' (तु० प० से०) । पचाद्यच् (३।१।१३४) । यद्वा धूयते । 'ऋदोरप्' (३।३।५७) । **'धवः** पुमान्नरे धूर्ते पत्यौ वृक्षान्तरेऽपि च' (इति मेदिनी) ।

अवयः शैलमेषार्काः

अवति, अव्यते वा । 'अव रक्षणादौ' (भ्वा० प० से०) । इन् (उ० ४।११८) । **'अविर्नाथे** रवौ मेषे शैले मूषिकक्कम्बले' (इति मेदिनी) । (**'अविर्भूपुष्पवत्योः** स्त्री वायुप्राकारभःसु ना' (इति वैजयन्ती) ॥

आज्ञाह्वानाध्वरा हवाः ।

'ह्वेञ् स्पर्धायां शब्दे च' (भ्वा० उ० अ०) । 'भावेऽनुपसर्गस्य' (३।३।७५) इति ह्वः संप्रसारणमप् च । हूयतेऽत्रेति वा ॥

भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु ॥ २०७ ॥

भावयति । पचाद्यच् (३।१।१३४) । भवनं वा । 'श्रिणीभुवोऽनुपसर्गे' (३।३।२४) इति घञ् । **'भावः** सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु । क्रियालीलापदार्थेषु विभूतिबन्धुजन्तुषु । रत्यादौ च' (इति मेदिनी) ॥

स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने ।

प्रसवनम्, प्रसूयते वा । 'षूङ् प्राणिप्रसवे' (दि० आ० से०) । 'ऋदोरप्' (३।३।५७) । पचाद्यच् (३।१।१३४) वा । **'प्रसवो** गर्भमोचने' । उत्पादे स्यादपत्येऽपि फलेऽपि कुसुमेऽपि च' (इति मेदिनी) ॥

अविश्वासेऽपह्नवेऽपि निकृतावपि निह्नवः ॥ २०८ ॥

निह्नवनम् । 'ह्नुङ् अपनयने' (अ० आ० अ०) । 'ऋदोरप्' (३।३।५७) । **'निह्नवः** [1]पुंसि निकृतावविश्वासापलापयोः' (इति मेदिनी) ॥

उत्सेकामर्षयोरिच्छाप्रसवे मह उत्सवः ।

उत्सेक उद्रेकः । इच्छायाः प्रसव उत्पत्तिः । मह उद्भवः । उत्सवनम् । 'षु प्रसवैश्वर्ययोः' (भ्वा० प० अ०) । 'ऋदोरप्' (३।३।५७) । **'उत्सवो** मह उत्सेक इच्छाप्रसवकोपयोः' (इति मेदिनी) ॥

१—'पुंसि' इति न प्रकृतोपयोगि । अग्रे 'पुमान्' इत्युक्तेः ॥

अनुभावः प्रभावे च सतां च मतिनिश्चये ॥ २०९ ॥

भवनम् । 'श्रिणीभुवो–' (३।३।२४) इति घञ् । अनुगतो भावः । 'प्रादयो गताद्यर्थे–' (वा० २।२।१८) इति समासः । यद्वा अनुभावयति । पचाद्यच् (३।१।१३४) । **'अनुभावः** प्रभावे स्यान्निश्चये भावसूचके' इति विश्वः ॥

स्याज्जन्महेतुः प्रभवः स्थानं चाद्योपलब्धये ।

जन्मनो हेतुः । प्रभवत्यस्मात् । 'ऋदोरप्' (३।३।५७) । **'प्रभवो** जलमूले स्याज्जन्महेतौ पराक्रमे । ज्ञानस्य चादिमस्थाने' (इति मेदिनी) । आद्योपलब्धये प्रथमज्ञानार्थम् ॥

शूद्रायां विप्रतनये शास्त्रे पारशवो मतः ॥ २१० ॥

पराऽशृणाति । 'शॄ हिंसायाम्' (क्र्या० प० से०) । 'आङ्परयोः खनिशॄभ्यां डिच्च' (उ० १।३३) इत्युः । परशुरेव । प्रज्ञाद्यण् (५।४।३८) । परस्त्रिया अपत्यं वा । 'परस्त्री परशुं च' (ग० ४।१।१०४) इत्यञ् । 'पुंसि **पारशवः** पुमान् । परस्त्रीतनये शास्त्रे द्विजाच्छूद्रासुतेऽपि च' (इति मेदिनी) ॥

ध्रुवो भमेदे क्लीबे तु निश्चिते शाश्वते त्रिषु ।

ध्रुवति । 'ध्रुव गतौ' (तु० प० से०) । पचाद्यच् (३।१।१३४) । **'ध्रुवः** कीले शिवे शङ्खौ वसौ योगे वटे मुनौ । **ध्रुवा** मूर्वाशालिपर्ण्यां गीतिस्रुग्भेदयोरपि । **ध्रुवं** तु निश्चिते तर्के निश्चले शाश्वतेऽन्यवत्' इति विश्वः । भमेदे नक्षत्रविशेषे ॥

स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोस्त्रियां धने ॥ २११ ॥

स्वनति । स्वन्यते वा । 'स्वन शब्दे' (भ्वा० प० से०) । 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति ढः । **'स्वो** ज्ञात्यात्मनोः **स्वं** निजे धने' इति हेमचन्द्रः । 'स्वः स्यात्पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीयेऽस्त्रियां धने' (इति मेदिनी) ॥

स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि च ।

स्त्रियाः कट्यां वस्त्रस्य बन्धने । परिपणे राजपुत्रादेर्बन्धके ।—वणिजां मूलधने—इति मुकुटः । तन्न । मेदिन्यां (हैमे) तयोः पृथक्पाठात् । निव्ययति, निवीयते वा । 'व्येञ् संवरणे' (भ्वा० उ० अ०) । 'नौ व्यो यलोपः पूर्वस्य च दीर्घः' (उ० ४।१३६) इतीण् । 'कृदिकारात्–' (ग० ४।१।४५) इति ङीप् । **'नीवी** स्त्रीकटीवस्त्रबन्धने । मूलद्रव्ये परिपणे' (इति हैमः) ॥

शिवा गौरीफेरवयोः

शिवमस्त्यस्याः । अर्शआद्यच् (५।२।१२७) । 'पुण्डरीकद्रुमे चापि **शिवा** झाटामलौषधौ । अभयामलकीगौरीक्रोष्ट्रीसंक्तुफलासु च' इति विश्वः ॥

१—इदं तु पूर्वान्वयि 'पुण्डरीकद्रुमे पुमान्' इति मेदिन्युक्तेः ॥ २—क्रोष्ट्री शृगाली । 'पुंश्शृगालेऽपि शिवा' इति मुकुटः ॥

द्वंद्वं कलहयुग्मयोः ॥२१२॥

द्वौ द्वौ । 'द्वंद्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु' (८।१।१५) इति साधुः । 'चार्थे द्वन्द्वः' (२।२।२९) इति निर्देशात्पुंस्यपि । **'द्वंद्वं रहस्ये** कलहे तथा मिथुनयुग्मयोः' (इति मेदिनी) ॥

द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु ।

द्रव्यं वित्तम् । असुः प्राणः । व्यवसायो निश्चयः । सीदन्त्यस्मिन् गुणाद्याः । 'षदॢ विशरणादौ' (भ्वा० प० अ०) । 'अन्येभ्योऽपि दृश्यन्ते' (उ० ४।१०५) इति क्वन् । **'सत्त्वं** गुणे पिशाचादौ बले द्रव्यस्वभावयोः । आत्मद्रव्यवसायासुवित्तेष्वस्त्री तु जन्तुषु' (इति मेदिनी) ॥

क्लीबं नपुंसके षण्ढे वाच्यलिङ्गमविक्रमे ॥ २१३ ॥

षण्ढे तृतीयाप्रकृतौ । क्लीबते । 'क्लीबृ अधार्ष्ये' (भ्वा० आ० से०) । 'इगुपध–' (३।१।१३५) इति कः । 'अस्त्री नपुंसके **क्लीबं** वाच्यलिङ्गमविक्रमे' इति रुद्रः । अयमोष्ठ्योऽत्र भ्रमात्पठितः । पूर्वगन्धर्वजिह्वस्त्वोष्ठ्येषु ॥

इति वान्ताः ॥

द्वौ विशौ वैश्यमनुजौ

विशति । 'विश प्रवेशने' (तु० प० से०) । क्विप् (३।२।१७८) । **'विट्** स्मृतौ वैश्यमनुजप्रवेशेषु मनीषिभिः' इति विश्वः ॥

द्वौ चराभिमरौ स्पशौ ।

अभिमरो युद्धम् । स्पशति । 'स्पश बाधनस्पर्शनयोः' (भ्वा० उ० से०) पचाद्यच् (३।१।१३४) । **'स्पशः** स्यात्संपराये च प्रणिधावपि पुंस्ययम्' (इति मेदिनी) ॥

द्वौ राशी पुञ्जमेषाद्यौ

रश्यते, रशति वा । 'रश' इति सौत्रो धातुः स्वनार्थः । बाहुलकादिण् । णिजन्तात् । 'अच इः' (उ० ४।१३९) वा ॥

द्वौ वंशौ कुलमस्करौ ॥२१४॥

वमति, वम्यते वा । 'टुवम उद्गिरणे' (भ्वा० प० से०) । 'वृमृवमिभ्यः शक्' । मस्करो वेणुः । **'वंशो** वेणौ कुले वर्गे पृष्ठाद्यवयवेऽपि च' (इति विश्वः) ॥

रहःप्रकाशौ वीकाशौ

विकाशनम् । अस्मिन् वा । 'काशृ दीप्तौ' (भ्वा० आ०

१—विश्वहैममेदिनीष्वपि यणन्तेष्वपि पठितः इति सर्वेषां भ्रमकल्पनं तु न सम्यक् ॥ २—'रश' धातुः कस्मिन् 'अशे रश' सूत्रे पठितोऽस्ति यतः सौत्रत्वं संभाव्यते । किं च 'अशिपणाय्यो रुडायलुकौ च' (उ० ४।१३३) इति 'सूत्रे रुडिधानम् च' (उ० २।७५) इति सूत्रे आदेशविधानं च व्यर्थमेव स्यात् ॥ ३—अस्य सूत्रस्योज्ज्वलदत्तादिग्रन्थेऽनुपलम्भात् 'अनुनासिकस्य क्विझलोः–' (६।४।१५) इति दीर्घापत्तेश्च चिन्त्यमेतत् । तस्मात्प्रागुक्तमेव सम्यक् ॥

से०) । 'भावे' (३।३।१८) 'हलश्च' (३।३।१२०) इत्यधिकरणे वा घञ् । 'इकः काशे' (६।३।१२३) इति दीर्घः । यद्वा विकशनम् । अत्र वा । 'कश शब्दे' (अ० आ० से०) । पूर्ववत् । '**वीकाशो** विजने व्यक्ते' इति विश्वः । '**विकाशः**[1] पुंसि विजने प्रकाशे **सदृशं** समे । उचिते च' (इति मेदिनी) ॥

निर्वेशो भृतिभोगयोः ।

निर्विश्यते । निर्वेशनं च घञ् (३।३।१८,१९) । भृतिर्वेतनम् । 'निर्वेशस्तु पुमान्भोगे वेतने मूर्च्छनेऽपि च' (इति मेदिनी) ॥

कृतान्ते पुंसि कीनाशः क्षुद्रकर्षकयोस्त्रिषु ॥ २१५ ॥

'की' इत्यव्ययं कुत्सायाम् । की कुत्सितं नाशयति । पचाद्यच् (३।३।१३४) । यद्वा क्लिश्नाति । क्लिश्यते वा । 'क्लिशू विबाधने' (क्र्या० प० से०) । 'क्लिश बन्धे (उपतापे)' (दि० आ० से०) वा । 'क्लिशेरीच्चोपधायाः कन् लोपश्च लो नाम् च' (उ० ५।५६) । '**कीनाशः** कर्षकक्षुद्रोपांशुघातिषु वाच्यवत् । (यमे ना)' (इति मेदिनी) ॥

पदे लक्ष्ये निमित्तेऽपदेशः स्यात्

अपदेशनम् । अपदिश्यते वा । 'दिश अतिसर्जने' (तु० उ० अ०) । घञ् (३।३।१८,१९) । पदे स्थाने । '**अपदेशः** पुमाँल्लक्ष्ये निमित्तव्याजयोरपि' इति विश्वः ॥

कुशमप्सु च ।

कौ शेते तिष्ठति । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । कुश्यति । 'कुश श्लेषणे' (दि० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । कु पापं श्यति । 'शो तनूकरणे' (दि० प० अ०) । 'सुपि' (३।३।४) इति योगविभागात्कः । '**कुशो** रामसुते दर्भे योक्रे द्वीपे कुशं जले' इति विश्वः ॥

दशावस्थानेकविधापि

दशति । 'दंश दशने' (भ्वा० प० अ०) । मूलविभुजादिकः (वा० ३।२।५) । यद्वा पचाद्यच् (३।१।१३४) । 'जपजभदहदश–' (७।४।८६) इति निर्देशादङ्भिन्नेऽपि नलोपः । यद्वा दश्यते । 'गुरोश्च–' (३।३।१०४) इत्यङ् । अनेकविधा बाल्यादिरूपा । '**दशा**वस्थादीपवर्त्योर्वस्त्रान्ते भूम्नि योषिति' (इति मेदिनी) ॥

आशा तृष्णापि चायता ॥ २१६ ॥

आ समन्तादश्नुते । 'अशू व्याप्तौ' (स्वा० आ० से०) । पचाद्यच् (३।१।१३४) । '**आशा** ककुभि तृष्णायाम्' (इति हैमः ॥

वशा स्त्री करिणी च स्यात्

वष्टि । 'वश कान्तौ' (अ० प० से०) । पचाद्यच् (३।१।१३४) । स्त्रीयोषिति । '**वशा** वन्ध्यासुता योषास्त्रीगवीकरिणीषु च' इति विश्वः ॥

दृग् ज्ञाने ज्ञातरि त्रिषु ।

पश्यति । 'दृशिर् प्रेक्षणे' (भ्वा० प० अ०) । क्विप् (३।२।१७८) । यद्वा दर्शनम् । अनया वा । संपदादिः (वा० ३।३।१०८) । '**दृक्** स्त्रियां दर्शने नेत्रे बुद्धौ च त्रिषु वीक्षके' (इति मेदिनी) ॥

स्यात्कर्कशः साहसिकः कठोरामसृणावपि ॥ २१७ ॥

कृणाति । 'कॄञ् हिंसायाम्' (क्र्या० उ० से०) । 'अन्येभ्योऽपि–' (३।२।७५) इति विच् । कृश्यते । 'कश शब्दे' (अ० आ० से०) । पचाद्यच् (३।१।१३४) । कर् चासौ कशश्च । '**कर्कशः** परुषे क्रूरे कृपणे निर्दये दृढे । इक्षौ साहसिके कासमर्दकाम्लिकयोरपि' इति विश्वः । अमसृणो दुसर्शः ॥

प्रकाशोऽतिप्रसिद्धेऽपि

प्रकाशते । प्रकाशनं वा । 'काशृ दीप्तौ' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) । घञ् (३।३।१८) वा । '**प्रकाशो**ऽतिप्रसिद्धे स्यात्प्रहासातपयोः स्फुटे' इति विश्वः ।

शिशावज्ञे च बालिशः ।

वाडनम् । 'वाडृ आप्लाव्ये' (भ्वा० आ० से०) । इन् (उ० ४।११८) । वालिं श्यति । 'शो तनूकरणे' (दि० प० अ०) 'आतोऽनुप–' (३।२।३) इति कः ॥

इति शान्ताः ॥

सुरमत्स्यावनिमिषौ

न निमिषिति । 'मिष श्लेषणे' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । नञ्समासः (२।२।६) ॥

पुरुषावात्ममानवौ ॥ २१८ ॥

पुरति । 'पुर अग्रगमने' (तु० प० से०) । 'पुरः कुषन्' (उ० ४।७४) । '**पुरुषः** पूरुषे सांख्यज्ञे च पुंनागपादपे' (इति मेदिनी) ॥

काकमत्स्यात्खगौ ध्वाङ्क्षौ

मत्स्यानत्ति । मत्स्याच्चासौ खगश्च । ध्वाङ्क्षति । 'ध्वाक्षि घोरवाशिते च' (भ्वा० प० से०) । चात्काङ्क्षायाम् । पचाद्यच् (३।१।१३४) '**ध्वाङ्क्षौ** मत्स्यात्खगे काके भिक्षुके तक्षकेऽपि च' (इति मेदिनी) ॥

कक्षौ तु तृणवीरुधौ ।

कष्यते । कष्यते । वा । 'कष हिंसायाम्' (भ्वा० प० से०) । 'वृतृवदिहनिकषिभ्यः सः' (उ० ३।६३) । '**कक्षः**

१—'विकाशो रहसि व्यक्ते' इति हेममूलस्य 'विकाशते विकाशः । एकदेशस्याविकृतत्वाद्वीकाशोऽपि । व्यक्ते वाच्यलिङ्गः द्वयोर्यथा–'उपविश्यविकाशेषु रहस्यानि प्रकाशयेत्' इत्यनेकार्थैकरवाकरकौमुदीव्याख्यायाश्च संवादाद्धस्वेकारवान् ॥ २—इत्यादि मेदिनीवाक्यं तु प्रकृतोपयोगि । अत्रोल्लेखस्तु 'सदृशागमे' इति क्वाचित्कलेखकप्रमादजपाठानुसारेण ॥

स्मृतो भुजामूले **कक्षोऽ**रण्ये च वीरुधि । **कक्षः** शुष्कतृणे प्रोक्तः **कक्षः** कच्छ उदाहृतः । **कक्षा** स्पर्धापदे काञ्च्यां रथ-गेहप्रकोष्ठयोः । गजरज्जौ परीधानपक्ष्वादञ्चलपल्लवे' इति धरणिः । वीरुलता ॥

अभीषुः प्रग्रहे रश्मौ

ईषते । ईष्यते वा । 'ईष गतिहिंसादर्शनेषु' (भ्वा० आ० से०) । 'ईषेः किच्च' (उ० १।१३) इत्युः । आदेरिच्च । अभिगत इषुः । 'प्रादयो गता–' (वा० २।२।१८) इति समासः । प्रग्रहेऽश्वादिरज्जौ । रश्मौ किरणे ॥

प्रैषः प्रेषणमर्दने ॥ २१९ ॥

प्रेषणम् । इषेर्भावे घञ् (३।३।१८) 'प्रादूहो—' (वा० ६।१।८९) इति वृद्धिः । **'प्रैषः** प्रेषणपीडयोः' इत्यजयः । **'प्रेषः** स्यात्प्रेषणे क्लेशे मर्दनोन्मादयोरपि' इति विश्वः ॥

पक्षः सहायेऽपि

पक्षति । पक्ष्यते वा । 'पक्ष परिग्रहे' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । घञ् । (३।३।१९) वा । **'पक्षो** मासार्धके पार्श्वे ग्रहे साध्याविरोधयोः । केशादेः परतो वृन्दे बले सखिसहाययोः । चुल्लीरन्ध्रे पतत्रे च वाजिकुञ्जरपार्श्वयोः' (इति मेदिनी) ॥

उष्णीषं शिरोवेष्टकिरीटयोः ।

उष्णमीषते हिनस्ति । 'ईष गत्यादौ' (भ्वा० आ० से०) । 'इगुपध–' (३।१।१३५) इति कः । शकन्ध्वादिः (वा० ६।१।९४) । **'उष्णीषं** तु शिरोवेष्टे किरीटे लक्षणान्तरे' इति विश्वः । शिरसो वेष्टने वस्त्रादिरूपे । किरीटे मुकुटे ॥

शुक्रले मूषिके श्रेष्ठे सुकृते वृषभे वृषः ॥ २२० ॥

वर्षति । 'वृषु (श्रेष्ठे) सेचने' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३४) इति कः । **'वृषो** धर्मे बलीवर्दे शुक्ल्यां पुंराशिभेदयोः । श्रेष्ठे स्यादुत्तरस्थश्च वासमूषिकशुक्रले' (इति मेदिनी) । शुक्रले बाहुवीर्यवति वृष्यप्रयोगे वा ॥

कोषोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः ।

कुष्यते । 'कुष निष्कर्षे' (क्र्या० प० से०) । घञ् (३।३।१९) । **'कोषोऽस्त्री** कुड्मले पात्रे दिव्ये खड्गपिधानके । जातिकोशेऽर्थसंघाते पेश्यां शब्दादिसंग्रहे' (इति मेदिनी) । दिव्ये शपथे । शब्दादिसंग्रहेऽमरादौ । तालव्यान्तोऽपि । 'विश्वक्सेनोऽश्वेषः कोषविषादौ च' इत्यूष्मविवेकात् । **'कोशो-**ऽस्त्री कुड्मले पात्रे दिव्ये खड्गपिधानके–' इति श्लोकस्य (मेदिन्याम्) तालव्यादौ (न्ते) अपि पाठः ॥

द्यूतेऽक्षे शारिफलकेऽप्याकर्षः

अक्षे पाशके । शारिफलकमक्षपीठिका । आकर्षणम् । आकृष्यते वा आकृषन्त्यस्मिन्वा । 'कृष विलेखने' (तु० उ० अ०) । घञ् (३।३।१८।१९) । **'नाकर्षो** द्यूत इन्द्रिये । पाशके शारिफलके कोदण्डाभ्यासवस्तुनि । आकर्षणेऽपि पुंसि स्यात्' (इति मेदिनी) ॥

अथाक्षमिन्द्रिये ॥ २२१ ॥

ना द्यूताङ्गे कर्षे चक्रे व्यवहारे कलिद्रुमे ।

अक्ष्णोति, अक्ष्यते वा, अनेन, अत्र वा । 'अक्षू व्याप्तौ' (भ्वा० प० से०) । 'पचाद्यच्' (३।१।१३४) । घञ् (३।३।१९) । 'हलश्च' (३।३।१२०) इत्यन्त्ययोर्धञ् । **'अक्षः** कर्षे तुषे चक्रे शकटव्यवहारयोः । आत्मज्ञे पाशके **चाक्षं** तुत्थे सौवर्चलेन्द्रिये' इति विश्वः । व्यवहारे आयव्ययचिन्तायाम् । कर्षे मानभेदे । चक्रे रथावयवे ॥

कर्षूर्वार्ता करीषाग्निः कर्षूः कुल्यामिधायिनी ॥२२२॥

कर्षणम् । कृष्यते । कर्षति वा । 'कृष विलेखने' (भ्वा० प० अ०) । 'कृषिचमितनि–' (उ० १।८०) इत्यूः । 'करीषाग्निः पुमान्कर्षूः कुल्यायामपि च स्त्रियाम्' इति रभसः । वार्ता जीविका ॥

पुंभावे तत्क्रियायां च पौरुषम्

पुरुषस्य कर्म भावो वा । 'प्राणभृज्जाति–' (५।१।१२९) इत्यञ् । **'पौरुषं** पुरुषस्य स्याद्भावे कर्मणि तेजसि । ऊर्ध्वविस्तृतदोःपाणिनृमाने लभिधेयवत्' इति विश्वः ॥

विषमप्सु च ।

वेवेष्टि । 'विष्लृ व्याप्तौ' (जु० उ० अ०) । 'इगुपध–' (३।१।१३२) इति कः । **'विषं** तु गरले तोये' इति विश्वः ॥

उपादानेऽप्यामिषं स्यात्

आमिष्यते भुज्यते । 'मिष श्लेषे' (तु० प० से०) । घञ् । (३।३।१९) संज्ञापूर्वकत्वान्न गुणः ।—'घञर्थे कः' (वा० ३।३।५८)—इति तु परिगणनादयुक्तम् । **'आमिषं** पुंनपुंसकम् । भोग्यवस्तुनि संभोगेऽप्युत्कोचे पललेऽपि च' (इति मेदिनी) । उपादानमुत्कोचः ॥

अपराधेऽपि किल्बिषम् ॥ २२३ ॥

केलनम् । किल्यते वा । 'किल क्षेपे' (तु० प० से०) 'किलेर्वुक्च' (उ० १।५०) इति टिषच् । **'किल्बिषं** पापरोगयोः' (इति मेदिनी) ॥

स्याद्दृष्टौ लोकधात्वंशे वत्सरे वर्षमस्त्रियाम् ।

लोकधातुर्जम्बुद्वीपादिः । तदंशे भारतादौ । वर्षणम् । 'वृषु सेचने' (भ्वा० प० से०) । 'अज्विधौ भयादीनामुपसंख्यानम्' (३।३।५६) इत्यच् । वर्षयति । वर्षति वा पचा-

१—'अभीशुस्तालव्यान्तोऽपि' इति मुकुटपीयूषे ॥ २—'प्रेष पेषादिरपि' इति पीयूषव्याख्या ॥

१—कुल्या नदीमात्रं च । 'कुल्या धुनी द्वीपवती तटिनी ह्रदिनी सरित् । रोधोवक्रापगा कर्षूः स्रवन्ती निम्नगा नदी' इति रत्नकोषः —इति मुकुटः ॥

द्यच् (३।१।१३४)। **'वर्षोऽस्त्री** भारतादौ च जम्बुद्वीपाब्द-वृष्टिषु। प्रावृट्काले स्त्रियां भूम्नि' (इति मेदिनी)॥

प्रेक्षा नृत्येक्षणं प्रज्ञा

प्रेक्षणम्। अनया वा। 'ईक्ष दर्शने' (भ्वा० आ० से०)। 'गुरोश्च–' (३।३।१०३) इत्यः। **'प्रेक्षा** धीनृत्यदर्शयोः' इत्यजयः। **'प्रेक्षा** नृत्येक्षणे बुद्धौ' (इति मेदिनी)॥

भिक्षासेवार्थना भृतिः॥ २२४॥

भिक्षणम्। भिक्ष्यते वा। 'भिक्ष याच्ञादौ (भ्वा० आ० से०)। 'गुरोश्च–' (३।३।१०३) इत्यः। **'भिक्षा** भृतौ च याच्ञायां सेवाभिक्षितवस्तुनोः' इति विश्वः। भृतिर्वेतनम्॥

त्विट् शोभापि

त्वेषणम्। अनया वा। 'त्विष दीप्तौ' (भ्वा० उ० अ०)। संपदादिः (वा० ३।३।१०८)। 'कान्तौ वाचि रुचौ **त्विट्** स्त्री' इति रभसः॥

त्रिषु परे

वक्ष्यमाणास्त्रयो वाच्यलिङ्गाः॥

न्यक्षं कात्स्न्यनिकृष्टयोः।

नियतानि निकृतानि वा अक्षाणि यस्मिन् यस्य वा। **'न्यक्षः** परशुरामे स्याच्यक्षः कात्स्न्यनिकृष्टयोः' इति विश्वः॥

प्रत्यक्षेऽधिकृतेऽध्यक्षः

अधिगतोऽक्षम्। अधिगतोऽक्षेण वा अक्षेषु व्यवहारेषु अधिकृतः। अधिकृतान्यक्षाण्यस्य। अध्यक्ष्णोति वा। 'पचाद्यच्' (३।१।१३४)॥

रूक्षस्त्वप्रेम्ण्यचिक्कणे॥ २२५॥

रूक्षयति। 'रूक्ष पारुष्ये' (चु० उ० से०)। 'पचाद्यच्' (३।१।१३४)। अप्रेम्णि निःस्नेहे। अचिक्कणे मसृणे॥

इति षान्ताः॥

रविश्वेतच्छदौ हंसौ

हन्ति गच्छति। 'हन हिंसागत्योः' (अ० प० अ०)। पचाद्यच् (३।१।१३४)। 'भवेद्वर्णागमाद्धंसः' इति सक्। यद्वा 'वृतृवदिवचिवसिहनिकमिकषिभ्यः' (उ० ३।६२) इति सप्रत्ययः। **'हंसो** विहंगमेदे स्यादर्के विष्णौ हयान्तरे। योगिमन्त्रादिभेदेषु परमात्मन्यमत्सरे। निर्लोभनृपतौ **हंसः** शारीरमरुदन्तरे' इति विश्वः॥

सूर्यवह्नौ विभावसू।

विभा प्रभा वसु धनमस्य। **'विभावसुः** पुमान्सूर्ये हारभेदे च पावके' (इति मेदिनी)॥

वत्सौ तर्णकवर्षौ द्वौ

वसति। अस्मिन्वा। 'वस निवासे' (भ्वा० प० अ०)। 'वृतृवदि–' (उ० ३।६२) इति सः। **'वत्सः** पुत्रादिवर्षयोः। तर्णके नोरसि क्लीबम्' (इति मेदिनी)। तर्णको गोः पुत्रः। वर्षो वत्सरः॥

सारङ्गश्च दिवौकसः॥ २२६॥

सारङ्गमस्य। शकन्ध्वादिः (वा० ६।१।९४)। सारंगायति[1] वा। 'गै शब्दे' (भ्वा० प० अ०)। 'गापोष्टक्' (३।२।८) मृगचातकहरिणाः। द्यौरोको यस्य। **'दिवोकाश्च दिवौकाश्च** पुंसि देवे च चातके' (इति मेदिनी)॥

शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः।

रस्यते। 'रस आस्वादने' अदन्तः। घञ् (३।३।१९)। **'रसो** गन्धरसे स्वादे तिक्तादौ विषरागयोः। शृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपारदे। **रसा** तु शल्लकीपाठाजिह्वाधरणिकङ्कुषु' इति विश्वः॥

पुंस्युत्तंसावतंसौद्वौ कर्णपूरे च शेखरे॥ २२७॥

उत्तंसयति। उत्तंसयते। अनेन वा। तसिः सौत्रो भूषार्थः। 'पचाद्यच्' (३।१।१३४)। 'हलश्च' (३।३।१२०) इति घञ्वा। **'उत्तंसः** कर्णपूरेऽपि शेखरे चावतंसवत्' इति विश्वः। कर्णपूरः कर्णाभरणम्, शेखरः भूषणम्॥

देवभेदेऽनले रश्मौ वसू रत्ने धने वसु।

वसति सर्वत्र। उष्यतेऽनेन वा। 'वस निवासे' (भ्वा० प० अ०)। 'शृस्वृस्निहि–' (उ० १।१०) इत्युः। **'वसुर्नौ** देवभेदाग्निभायोक्तवकराजसु। क्लीबं वृष्यौषधे ख्याते रै रत्ने मधुरे त्रिषु' (इति मेदिनी)॥

विष्णौ च वेधाः

विधति। 'विध विधाने' (तु० प० से०)। असुन् (उ० ४।१८९)। विदधाति वा। 'विधाञो वेध च' (उ० ४।२२५)। इत्यसुन्। **'वेधाः** पुंसि हृषीकेशे बुधे च परमेष्ठिनि' (इति मेदिनी)॥

स्त्री त्वाशीर्हिताशंसाहिदंष्ट्रयोः॥ २२८॥

आशास्ते। 'आङः शासु इच्छायाम्' (अ० आ० से०)। क्विप् (३।२।७६)। यद्वा आशासनम्। अनया वा। संपदादिः (वा० ३।३।१०८)। 'आशासः क्वौ–'(वा० ६।४।३४) इतीत्वम्। 'आशीस्त्वालुगता दंष्ट्रा तया विद्धो न जीवति'। हितस्याशंसा अहेर्दंष्ट्रा॥

लालसे प्रार्थनौत्सुक्ये

लालसनम्। 'लस दीप्तौ' (भ्वा० प० से०) यङन्तः। 'अ प्रत्ययात्' (३।३।१०२)। **'लालसौत्सुक्यतृष्णातिरेकयाच्ञासु** च द्वयोः' (इति मेदिनी)॥

१—एवं 'सारगः' इति रूपापत्त्या चिन्त्यमेतत्। तस्मात् 'सारं गच्छति' इति विग्रहे 'गमेः सुपि–' (वा० ३।२।३८) इति 'खच् डिद्वा' (३।२।३८) इति वार्तिकाभ्यां खचि डिति बोध्यः॥

हिंसा चौर्यादिकर्म च ।

हिंसनम् । 'हिसि हिंसायाम्' (रु० प० से०) । 'गुरोश्च—' (३।३।१०३) इत्यः । '**हिंसा**चौर्यादिघातयोः' (इति मेदिनी) । चोरस्य कर्म । ब्राह्मणादित्वात्ष्यञ् (५।१।१२४) आदिना बन्धनत्रासनताडनादि । चाद्वधोऽपि ॥

प्रसूरश्वापि

प्रसूते । 'षूङ् प्रसवे' (अ० आ० से०) । 'सत्सू—'(३।२।६०) इति क्विप् । '**प्रसूर**श्वाजनन्योश्च कदलीवीरुधोरपि' इति विश्वः ॥

भूद्यावौ रोदस्यौ रोदसी च ते ॥ २२९ ॥

रोदिति सर्वमस्मिन् । 'रुदिर् अश्रुविमोचने' (अ० प० से०) । असुन् (उ० ४।१८९) । पक्षे गौरादित्वात् (४।१।४१) ङीष् । 'रोदसी' इत्यव्ययमप्यस्ति । 'द्यावापृथिव्यौ **रोदस्यौ रोदसौ रोदसी**ति च' । विगृहीतयोरप्येते नामनी । '**रोदश्च रोदसी** चापि दिवि भूमौ पृथक् पृथक् । सहप्रयोगेऽप्यनयो **रोदः** स्यादपि **रोदसी**' इति विश्वः ॥

ज्वालाभासोर्नपुंस्यर्चिः

अर्च्यते । 'अर्च पूजायाम्' (भ्वा० प० से०) । 'अर्चिशुचि—' (उ० २।१०८) इतीसिः । 'अथार्चिर्मयूखशिखयोर्नना' (इति मेदिनी) ॥

ज्योतिर्भद्योतदृष्टिषु ।

द्योतते । द्योतनं वा । अनेन वा 'द्युत दीप्तौ' (भ्वा० आ० से०) । 'द्युतेरिसिन्नादेश्च जः' (वा० २।११०) । '**ज्योति**रग्नौ दिवाकरे । पुमान्, नपुंसकं दृष्टौ स्यान्नक्षत्रप्रकाशयोः' (इति मेदिनी) ॥

पापापराधयोरागः

एति । 'इण् गतौ' (अ० प० अ०) । 'इण् आग् अपराधे च' (उ० ४।२१२) इत्यसुन् ।—आगच्छतीत्यागः—इति स्वाम्युक्तिस्तु चिन्त्या ॥

खगबाल्यादिनोर्वयः ॥ २३० ॥

वयते । 'वय गतौ' (भ्वा० आ० से०) । वेति । 'वी गत्यादौ' (अ० प० अ०) । अजति वा । 'अज गत्यादौ' (भ्वा० प० से०) वा असुन् (उ० ४।१८९) ॥—वाति—इति स्वामिमुकुटोक्तिस्तु चिन्त्या । असुन्युक्तरूपासिद्धेः '**वयः** पक्षिणि बाल्यादौ यौवने च नपुंसकम्' (इति मेदिनी) ॥

तेजःपुरीषयोर्वर्चः

वर्चते । 'वर्च दीप्तौ' (भ्वा० आ० से०) । असुन् (उ० ४।१८९) । '**वर्चो** नपुंसकं रूपे विष्ठायामपि तेजसि । पुंसि द्रुस्र तनये' (इति मेदिनी) ॥

महस्तूत्सवतेजसोः ।

महनम् । मह्यते वा । 'मह पूजायाम्' (भ्वा० प० से०) । असुन् (उ० ४।१८९) ॥

रजो गुणे च स्त्रीपुष्पे

रजनम् । रज्यतेनेन वा । 'रञ्ज रागे' (भ्वा० प० अ०) । असुन् (उ० ४।१८९) । 'अँसि अके—' (वा० ६।४।२४) इति नलोपः । '**रजः** क्लीबं गुणान्तरे । आर्तवे च परागे च रेणुमात्रेऽपि दृश्यते' (इति मेदिनी) ॥*॥ अदन्तोऽपि । '**रजो**ऽयं रजसा सार्धं स्त्रीपुष्पगुणधूलिषु' इत्यजयः ॥

राहौ ध्वान्ते गुणे तमः ॥ २३१ ॥

तम्यतेऽनेन । 'तमु ग्लानौ' (दि० प० से०) । असुन् (उ० ४।१८९) । '**तमो** ध्वान्ते गुणे शोके क्लीबं वा ना विधुंतुदे' (इति मेदिनी) ॥

छन्दः पद्येऽभिलाषे च

चन्दनम् । चन्द्यतेऽनेन वा । 'चदि आह्लादने दीप्तौ च' (भ्वा० प० से०) । 'चन्देरादेश्च छः' (उ० ४।२१९) इत्यसुन् ॥—छन्दति—इति स्वामिमुकुटोक्तो विग्रहश्चिन्त्यः । '**छन्दः** पद्ये च वेदे च स्वैराचाराभिलाषयोः' (इति मेदिनी) । पद्येऽनुष्टुबादौ ॥

तपैः कृच्छ्रादिकर्म च ।

तपनम् । तप्यते । अनेन वा । 'तप संतापे' (भ्वा० प० से०) । असुन् (उ० ४।१८९) । '**तपो** लोकान्तरेऽपि च । चान्द्रायणादौ घने च पुमाञ्छिशिरमाघयोः' (इति मेदिनी) ॥

सहो बलं सहा मार्गः

सहते । सह्यते, अनेन, अत्र वा । 'षह मर्षणे' (भ्वा० आ० अ०) । असुन् (उ० ४।१८९) । '**सहो** बले ज्योतिषि च पुंसि हेमन्तमार्गयोः' (इति मेदिनी) । लिङ्गभेदार्थो द्विःपाठः । एवमग्रेऽपि ॥

नभः खं श्रावणो नभाः ॥ २३२ ॥

नभनम् । नभ्यते, अनेन, अत्र वा । 'णभ हिंसायाम्' (भ्वा० आ० से०) । असुन् (उ० ४।१८९) । '**नभो** व्योम्नि **नभा** मेघे श्रावणे च पतङ्गहे । घ्राणे मृणालसूत्रे च वर्षासु च **नभाः** स्मृतः' इति विश्वः ॥

१—'महः अदन्तोऽपि'—इति मुकुटः । '**मही** नद्यन्तरे भूमौ **मह** उत्सवतेजसोः' इति मेदिनी । २—इत्थं पाठस्तु जनकानुरोधेन । भाष्ये तु 'रजकरजनरजःसु—' इति पाठ उपलभ्यते । ३—अदन्तोऽपि ग्रीष्मार्थः । यथा 'तपेन वर्षाः शरदा हिमागमः'—इति स्वामी । ४—एवं सति 'पयः क्षीरं पयोऽम्बु च' इत्यग्रे समानलिङ्गस्य द्विःपाठो व्यर्थ एव स्यात् । छन्दोऽनुरोधादेवान्यकोशेष्विव बोध्यः ।

ओकः सद्माश्रयश्चौकाः

उच्यति समवैत्यत्र । 'उच समवाये' (दि० प० से०)। असुन् (उ० ४।१८९) । न्यङ्क्वादिः (७।३।५३) । 'ओक उचः के' (७।३।६४) इति निपातनाददन्तोऽपि । **'ओका** आश्रयमात्रे च मन्दिरे च नपुंसकम्' (इति मेदिनी) ॥

पयः क्षीरं पयोऽम्बु च ।

पीयते । 'पीङ् पाने' (दि० आ० अ०) । पयते वा । 'पय गतौ' (भ्वा० आ० से०) । वा असुन् (उ० ४।१८९) ॥

ओजो दीप्तौ बले

उज्जति । अनेन वा । 'उज्ज आर्जवे' (तु० प० से०)। 'उज्जेर्बले बलोपश्च' (उ० ४।१९२) इत्यसुन् । 'ओजोनोजः समः पादो–' **'ओजो** दीप्तावबष्टम्भे प्रकाशबलयोरपि' (इति मेदिनी)। पृषोदरादित्वं मुकुटोक्तं चिन्त्यम् ॥

स्रोत इन्द्रिये निम्नगारये ॥२३३॥

स्रवति । 'स्रु गतौ' (भ्वा० प० अ०) । 'स्रुरीभ्यां तुट् च' (उ० ४।२०२) इत्यसुन् । **'स्रोतोऽम्बुवेग इन्द्रिये'** (इति मेदिनी) ॥

तेजः प्रभावे दीप्तौ च बले शुक्रेऽपि

तेजयति । तेज्यतेऽनेन वा । 'तिज निशाने' (भ्वा० आ० से०) । असुन् (उ० ४।१८९) । **'तेजो** धात्रि पराक्रमे । ('प्रभावरेतसोश्च') इति विश्वः । **'तेजो** दीप्तौ प्रभावे च स्यात्पराक्रमरेतसोः' (इति मेदिनी) । चादसहने । 'अधिक्षेपावमानादेः प्रत्युक्तस्य परेण यत् । प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम्' इति भरतः ॥

अतस्त्रिषु ।

वक्ष्यमाणाः सान्तास्त्रिलिङ्गाः ॥

विद्वान् विदंश्च

वेत्ति । 'विद ज्ञाने' (अ० प० से०) । 'विदेः शतुर्वसुः' (७।१।३६) वा । **'विद्वा**नात्मविदि प्राज्ञे पण्डिते चाभिधेयवत्' इति विश्वः । विदन् पण्डितः ॥

बीभत्सो हिंस्रोऽपि

बीभत्सते । 'बीभत्स्यते', अनेन वा । 'बध बन्धने' (भ्वा० आ० से०) । 'मान्बध–' (३।१।६) इति सन्नभ्यासदीर्घश्च । पचाद्यच् (३।१।१३४) । घञ् (३।३।१९) । घः (३।३।११८) वा । **'बीभत्सो** विकृते पार्थे क्रूरे पापघृणात्मनोः' इत्यजयः ॥

अतिशये त्वमी ॥ २३४ ॥

वक्ष्यमाणाश्चत्वारः ॥

वृद्धप्रशस्ययोर्ज्यायान्

अतिशयेन वृद्धः प्रशस्यो वा । 'द्विवचन–' (५।३।५७) इतीयसुनि 'ज्य च' (५।३।६१) इति 'वृद्धस्य च' (५।३।६२) इति वृद्धप्रशस्ययोर्ज्यादेशः । 'ज्यादादीयसः' (६।४।१६०) इत्यात्त्वम् । **'ज्यायान्**वृद्धे प्रशस्ये च' (इति हैमः) ॥

कनीयांस्तु युवाल्पयोः ।

अतिशयितो युवाल्पो वा । 'युवाल्पयोः कनन्यतरस्याम्' (५।३।६४) इतीयसुनि कन्नादेशः । **'कनीया**नतियूनि स्यादल्पानुजयोस्त्रिषु' (इति मेदिनी) ॥

वरीयांस्तूरुवरयोः

अतिशयित ऊरुर्वरो वा । 'द्विवचन–' (५।३।५७) इतीयसुनि 'प्रियस्थिर–' (६।४।१५७) इत्यूरोर्वरादेशः **'वरीयान्** योगभिच्छेष्ठवरिष्ठेष्वतियूनि च' (इति मेदिनी) ॥

साधीयान्साधुबाढयोः ॥ २३५ ॥

अतिशयितः साधुर्बाढो वा । ईयसुनि 'अन्तिकबाढयोः–' इति बाढशब्दस्य साधादेशः ॥

इति सान्ताः ॥

दलेऽपि बर्हम्

दले पत्रे । बर्हति । 'बृह वृद्धौ' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । वर्द्धते वा । 'बर्ह हिंसायाम्' (भ्वा० आ० से०) । घञ् (३।३।१९) । **'बर्हं** पिच्छे दलेऽस्त्रियाम्' (इति मेदिनी) ॥

निर्बन्धोपरागार्कादयो ग्रहाः ।

ग्रहणम् । गृह्णाति वा । 'ग्रह उपादाने' (क्र्या० प० से०)। 'ग्रहवृद–' (३।३।५८) इत्यप् । 'विभाषा ग्रहः' (३।१।१४३) इति पक्षे अच् । **'ग्रहो**ऽनुग्रहनिर्बन्धग्रहणेषु रणोद्यमे । सूर्यादौ पूतनादौ च सैंहिकेयोपरागयोः–' इति विश्वः ॥

द्वार्यापीडे क्वाथरसे निर्यूहो नागदन्तके ॥ २३६ ॥

आपीडे शिरोभूषणे । क्वाथरसे क्वथितद्रव्यरसे । नागदन्तके भित्तिस्थकीलके । निर्यूहति 'यूहि' लौकिको साधुः । 'इगुपध–' (३।१।१३५) इति कः । निरूहति वा । पृषोदरादित्वात् (६।३।१०९) धातोर्यडागमः । **'निर्यूहः** शेखरे द्वारे निर्यासे नागदन्तके' इति विश्वः ॥

तुलासूत्रेऽश्वादिरश्मौ प्रग्राहः प्रग्रहोऽपि च ।

प्रगृह्यते । 'प्रेवणिजाम्' (३।३।५२) 'रश्मौ च' (३।३।५३) इति वा घञ् । (**'प्रग्राहः** स्यात्तुलासूत्रे वृषादीनां च बन्धने' इति हैमः) । पक्षे 'ग्रहवृद–' (३।३।५८) इत्यप् । **'प्रग्रहस्तु** तुलासूत्रे वन्द्यां नियमने भुजे । हयादिरश्मौ रश्मौ च सुवर्णहलिपादपे' इति विश्वः ॥

पत्नीपरिजनादानमूलशापाः परिग्रहाः ॥ २३७ ॥

परिगृह्यते । परिग्रहणम्, परिगृह्णाति वा । 'ग्रह–' (३।३।५८) इत्यप् । 'विभाषा ग्रहः' (३।१।१४३) इत्यप्

१—विषमसंख्यावाची त्वोजोऽदन्तोऽपि—इति स्वामीमुकुटपीयूषेषु व्यक्तम् । तत्रोदाहरणमिदम् ।

वा । 'परिग्रहः कलत्रे च मूलस्त्रीकारयोरपि । शपथे परिवारे च राहुबक्रस्थभास्करे' इत्यजयः ॥

दारेषु च गृहाः

गृह्णाति धान्यादिकमिति । 'गेहे कः' (३।१।१४४) । यद्वा 'गृहू ग्रहणे' (भ्वा० आ० से०) । गर्हते । 'इगुपध–' (३।१।१३५) इति कः । तात्स्थ्याद्दारेषु । 'गृहं गृहाश्च पुंभूम्नि कलत्रेऽपि च सद्मनि' (इति मेदिनी) ॥

श्रोण्यामप्यारोहो वरस्त्रियाः ।

आरुह्यते । आरोहणम् । आरोहति वा । 'रुह प्रादुर्भावे' (भ्वा० प० से० अ०) । घञ् (३।३।१९,१८) पचाद्यच् (३।१।१३४) । 'आरोहस्त्वरोहे च वरारोहकटावपि । आरोहणे गजारोहे दीर्घत्वे च समुच्छ्रये' (इति मेदिनी) ॥

व्यूहो वृन्देऽपि

व्यूहते । 'ऊह वितर्के' (भ्वा० आ० से०) । 'इगुपध–' (३।१।१३५) इति कः । व्यूह्यते वा । घञ् (३।३।१९) । 'व्यूहः स्याद्बलविन्यासे निर्माणे वृन्दतर्कयोः' इति विश्वः । यत्तु—निर्माणे कायव्यूहे—इति मुकुटेन व्याख्यातम् । तन्न । 'अकृतव्यूहाः' इत्यादावभावात् । 'रचनामात्रे' इति प्रयुक्तत्वात् ॥

अहिर्वृत्रेऽपि

आहन्ति । 'हन हिंसागत्योः' (अ० प० अ०) । 'आङि श्रिहनिभ्यां ह्रस्वश्च' (उ० ४।१३८) इतीण् ङित् आङो ह्रस्वः । यत्तु 'अंहति' इति स्वामिना 'अन्यति' इति मुकुटेनोक्तम् । तन्न । नलोपासंभवात् । 'अहिर्वृत्रासुरे सर्पे' इति विश्वः ॥

अग्नीन्द्रर्कास्तमोपहाः ॥ २३८ ॥

तमोऽपहन्ति । 'अपे क्लेशतमसोः' (३।२।५०) इति डः । 'तमोपहः सहस्रांशुमृगाङ्कजिनवह्निषु' इति विश्वः ॥

परिच्छदे नृपार्हेऽर्थे परिवर्हः

परिवर्हते । परिवर्ह्यते वा । 'वर्ह प्राधान्ये' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) । घञ् (३।३।१९) वा । 'परिवर्हस्तु राजार्हवस्तुन्यपि परिच्छदे' इति विश्वः ॥

इति हान्ताः ॥

अव्ययाः परे ।

इतः परेऽनेकार्था अव्यया उच्यन्ते ॥

आङीषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे ॥२३९॥

अतति । बाहुलकाड् डाङ् प्रत्ययः । तेन सहेत्यभिविधिः । तेन विना सीमा=मर्यादा । धातुना योगे सति थोऽर्थो जायते तस्मिन् ॥

आ प्रगृह्य स्मृतौ वाक्येऽपि

आप्नोति । क्विप् (३।२।१७८) । पृषोदरादित्वात् (६।३।१०९) पलोपः । प्रगृह्यसंज्ञकत्वात् । 'प्लुतप्रगृह्या अचि' (६।१।१२५) इति संधिं न याति । स्मरणे । वाक्यारम्भे च । 'आ प्रगृह्यः स्मृतौ वाक्येऽनुकम्पायां समुच्चये' (इति मेदिनी) ॥

आस्तु स्यात्कोपपीडयोः ।

आस्ते । 'आस उपवेशने' (अ० आ० से०) । क्विप् (३।२।१७८) । आङ्पूर्वादसतेर्वा । 'आः स्मरणेऽप्यकारणे कोपसंतापयोरपि' (इति मेदिनी) ॥

पापकुत्सेषदर्थे कु

कवते । कूयते वा । 'कूङ् शब्दे' (भ्वा० आ० अ०) । मितद्वादित्वात् (वा० ३।२।१८०) ङुः । 'कु (पापे चेषदर्थे च) कुत्सायां च निवारणे' इति विश्वः ॥

धिग्भर्त्सननिन्दयोः ॥ २४० ॥

धक्कयति । 'धक्क नाशने' (चु० प० से०) । बाहुलकाङ्डिक् प्रत्ययः । दधातेर्वा । अपकारशब्दैर्भयोत्पादनं भर्त्सनम् । निन्दा दोषकीर्तनम् ॥

चान्वाचयसमाहारेतरेतरसमुच्चये ।

चन्दति । 'चदि आह्लादे' (भ्वा० प० से०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । 'चः पादपूरणे पक्षान्तरे हेतौ विनिश्चये' इति त्रिकाण्डशेषः ॥

स्वस्त्याशीःक्षेमपुण्यादौ

स्वसति । स्वस्यति वा । 'अस दीप्तौ' (भ्वा० प० से०) । 'असु क्षेपणे' (दि० प० से०) वा । क्तिच् (३।३।१७४) । बाहुलकात्तिर्वा । 'स्वस्ति मङ्गलाशीर्वादपापनिर्णेजनादिषु' इति भागुरिः ॥

प्रकर्षे लङ्घनेऽप्यति ॥ २४१ ॥

अतति । इन् (उ० ४।११८) प्रत्ययः । 'अतिशब्दः प्रशंसायां प्रकर्षे लङ्घनेऽपि च' इति विश्वः (मेदिनी) ॥

स्वित्प्रश्ने च वितर्के च

सुष्ठु एति अयति वा । 'इण् गतौ' (अ० प० अ०) । 'इ गतौ' (भ्वा० प० अ०) वा क्विप् (३।२।७६) । 'स्वित् प्रश्ने च वितर्के च तथैव पादपूरणे' (इति मेदिनी) ॥

तु स्याद्भेदेऽवधारणे ।

तुदति । 'तुद व्यथने' (तु० उ० अ०) । मितद्वादित्वात् (वा० ३।२।१८०) ङुः । 'तु पादपूरणे भेदे समुच्चयेऽवधारणे । पक्षान्तरे वियोगे च प्रशंसायां विनिग्रहे' (इति मेदिनी) ॥

सकृत् सहैकवारे चापि

एकवारम् । 'एकस्य सकृच्च' (५।४।१९) इति सुच् । 'सकृत् सहैकवारयोः' इत्यजयः ॥

आरादूरसमीपयोः ॥ २४२ ॥

आ राति । 'रा दाने' (अ० प० अ०) । बाहुलकादातिप्रत्ययः ॥

प्रतीच्यां चरमे पश्चात्

अवरस्मिन् । 'पश्चात्' (५।३।३२) इत्यनेनावरस्य सप्तमीपञ्चमीप्रथमान्तस्य निपातितः ॥

उताप्यर्थविकल्पयोः ।

ऊयते स्म । 'उङ् शब्दे' (भ्वा० आ० अ०) । क्तः (३।३।१७४) । अप्यर्थः समुच्चयः प्रश्नश्च । '**उतापी** द्वौ च बाढार्थौ' इत्यजयः ॥

पुनःसहार्थयोः शश्वत्

शशति । 'शश प्लुतगतौ' (भ्वा० प० से०) । बाहुलकाद्वत् । '**शश्वत्** सहसहार्थयोः' इत्यजयः ॥

साक्षात् प्रत्यक्षतुल्ययोः ॥ २४३ ॥

सहाक्षेण साक्षः । तमतति । क्विप् (३।२।१७८) । '**साक्षात्**तुल्यसमक्षयोः' इत्यजयः ॥

खेदानुकम्पासंतोषविस्मयामन्त्रणे बत ।

वयते स्म । 'वय गतौ' (भ्वा० आ० से०) 'गत्यर्था–' (३।४।७२) इति क्तः । नेट् ( ) । वन्यते स्म 'वनु याचने' (त० उ० से०) । क्तः (३।२।१०२) । '**बत** खेदेऽनुकम्पायां हर्षे संबोधनेऽद्भुते' इति दन्तोष्ठ्यादावजयः ॥

हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः ॥२४४॥

हन्ति । बाहुलकात्तः । '**हन्त** वाक्यारम्भखेदविषादहर्षसंभ्रमे' (इति मेदिनी) ॥

प्रति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः ।

प्राति । 'प्रा पूरणे' (अ० प० अ०) । प्रथते वा । 'प्रथ प्रख्याने' (भ्वा० आ० से०) । बाहुलकाड्डतिः । इत्थंभूताख्यानः मुख्यसदृशः प्रतिनिधिः । व्याप्तुमिच्छा वीप्सा । आदिना इत्थंभूताख्यानभागप्रतिदानस्तोकेषु ॥

इति हेतुप्रकरणप्रकाशादिसमाप्तिषु ॥ २४५ ॥

एति । अयति वा । क्तिच् (३।३।१७४) । '**इति** प्रकरणे हेतौ प्रकाशादिसमाप्तिषु । निदर्शने प्रकारे स्यादनुकर्षे च संमतम्' इति विश्वः ॥

प्राच्यां पुरस्तात्प्रथमे पुरार्थेऽग्रत इत्यपि ।

पूर्वस्मिन् । '–सप्तमी–' (५।३।२७) इत्यस्तातिः । 'अस्ताति च' (५।३।४०) इति पुरादेशः । 'प्राच्यां **पुरः पुरस्ता**दग्रप्रथमव्यतीतेषु' इति बोपालितः । 'अग्रे' इति अग्रतः । आद्यादितसिः (वा० ५।४।४४) ॥

यावत्तावच्च साकल्येऽवधौ माने ऽवधारणे ॥ २४६ ॥

यत्, तत्, परिमाणमस्य । 'तदितिः' (४।१।७६) इति बहुवचनेनान्येऽनुक्ता अपि तद्धिता ज्ञापिताः । तेन डावतुः । '**यावत्** कात्स्न्र्येऽवधारणे । प्रशंसायां परिच्छेदे मानाधिकारसंभ्रमे । पक्षान्तरे च' (इति मेदिनी) ॥

मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ ।

अर्थयते । 'अर्थ याच्ञायाम्' (चु० आ० से०) । बाहुलकात् डोः । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । पृषोदरादित्वाद्रलोपः । '**अथाथो** संशये स्यातामधिकारे च मङ्गले । विकल्पानन्तरप्रश्नकात्स्न्र्यारम्भसमुच्चये' (इति मेदिनी) ॥

वृथा निरर्थकाविध्योः

वृणोति, वृणीते वा । 'वृञ् वरणे' (स्वा० उ० से०) । '**वृञ्** संभक्तौ' (क्र्या० आ० से०) वा बाहुलकात्थाक् । '**वृथा** निष्कारणे वन्ध्ये **वृथा** स्याद्विधिवर्जिते' इति विश्वः ॥

नानानेकोभयार्थयोः ॥ २४७ ॥

नेति नाना । 'विनञभ्यां नानाजौ न सह' (५।१।२७) इति नञो नाञ् । '**नाना**शब्दो विनार्थेऽपि तथानेकोभयार्थयोः' (इति मेदिनी) ॥

नु पृच्छायां विकल्पे च

नुदति । नौति वा । 'णुद प्रेरणे' (तु० उ० अ०) । 'णु स्तुतौ' (अ० प० से०) वा । मितद्वादित्वात् (वा० ३।२।१८०) डुः । '**नु** स्यात्प्रश्ने विकल्पार्थेऽप्यतीतानुनयार्थयोः' इति विश्वः ॥

पश्चात्सादृश्ययोरनु ।

अनिति । 'अन प्राणने' (अ० प० से०) । बाहुलकादुः । '**अनु** हीने सहार्थे च पश्चात्सादृश्ययोरपि । आयामे च समीपे च लक्षणादावनुक्रमे' इति विश्वः ॥

प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु ॥ २४८ ॥

न नुदति । 'णुद प्रेरणे' (तु० उ० अ०) डुः (वा० ३।२।१८०) । '**ननु** प्रश्नेऽप्यनुनयेऽनुज्ञानेऽप्यवधारणे । आमन्त्रणे (चापि) **ननु**' इति विश्वः ॥

गर्हासमुच्चयप्रश्नशङ्कासंभावनास्वपि ।

न पियति । 'पि गतौ' (तु० प० अ०) । क्विप् (३।२।१७८) । आगमशास्त्रस्यानित्यत्वान्न तुक् । 'अपि संभावनाप्रश्नशङ्कागर्हासमुच्चये । तथा युक्तपदार्थे च कामचारक्रियासु च' इति विश्वः ॥

१–व्यर्थोऽयं प्रयासोऽपाणिनीयः । तथा चोक्तं (५।२।३९) सूत्रे कैयटेन '**इह** तु वतुपं (५।२।३९) विधाय 'आ सर्वनाम्नः' (६।२।९१) इत्यात्वं विहितम् । पूर्वाचार्यास्तु 'डावतुं विदधिरे' इति । अव्ययत्वं तु विभक्तिप्रतिरूपकत्वेनैवोभयत्रापि तुल्यम् ।

उपमायां विकल्पे वा

वाति 'वा गत्यादौ' (अ० प० अ०)। क्विप् (३।२।१७८)। '**वा** स्याद्विकल्पोपमयोर्वितर्के पादपूरणे। समुच्चये च' (इति मेदिनी)। '**वा** स्याद्विकल्पोपमयोरेवार्थे च समुच्चये' इति विश्वः ॥

सामि त्वर्धे जुगुप्सिते ॥ २४९ ॥

सामयति। 'षाम सान्त्वप्रयोगे' (चु० उ० से०)। 'अच इः' (उ० ४।१३८) ॥

अमा सह समीपे च

न माति। 'मा माने' (अ० प० अ०)। क्विप् (३।२।७६) सहार्थे ॥

कं वारिणि च मूर्धनि ।

कम्यते। 'कमु कान्तौ' (भ्वा० आ० से०)। णिङ्भावे विच् (३।३।७५)। '**कम्** शिरःसुखवारिषु' इति विश्वः। '**कम्** पादपूरणे तोये–' (इति मेदिनी) ॥

इवेत्थमर्थयोरेवम्

'ए' एत्थं भवति। 'टु वम उद्गिरणे' (भ्वा० प० से०)। विच् (३।२।७५)। '**एवं** प्रकारोपमयोरङ्गीकारेऽवधारणे' इति धरणिः ॥

नूनं तर्केऽर्थनिश्चये ॥ २५० ॥

नुवा स्तुत्या नमति। विच् (३।२।७५) ॥

तूष्णीमर्थे सुखे जोषम्

जुष्यते। 'जुष तृप्तौ' (चु० उ० से०)। बाहुलकादम्। '**जोषं** सुखे प्रशंसायां तूष्णींलङ्घनयोरपि' (इति मेदिनी) ॥

किं पृच्छायां जुगुप्सने ।

कूयते कवनम्, वा। 'कु शब्दे' (अ० प० अ०)। बाहुलकाड्डिम्। कायतेः (भ्वा० प० अ०) डिमिः (उ० ४।१५८) वा। '**किम्** कुत्सायां वितर्के च निषेधप्रश्नयोरपि' (इति मेदिनी) ॥

नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने ॥ २५१ ॥

नामयति। नाम्यते वा। 'णम् प्रह्वत्वे' (भ्वा० प० अ०)। 'अन्येभ्योऽपि' (वा० ३।२।१०१) इति डः। '**नाम** कामे (कोपे)ऽभ्युपगमे विस्मये स्मरणेऽपि च। संभाव्यकुत्साप्राकाश्यविकल्पेष्वपि दृश्यते' (इति मेदिनी)। संभाव्यं संभावना ॥

अलं भूषणपर्याप्तिशक्तिवारणवाचकम् ।

अलति। 'अल भूषणादौ' (भ्वा० प० से०)। बाहुलकादम्। '**अलं** भूषणपर्याप्तिवारणेषु निरर्थके। **अलं** शक्तौ च निर्दिष्टम्' इति विश्वः ॥

हुं वितर्के परिप्रश्ने

हूयते। 'हु दानादौ' (जु० प० अ०)। 'बाहुलकान्मः' ॥

समयान्तिकमध्ययोः ॥ २५२ ॥

समेति। 'इण् गतौ' (अ० प० अ०)। 'आः समिण्निकषिभ्याम्' (उ० ४।१७५) ॥

पुनरप्रथमे भेदे

पनते। 'पन स्तुतौ' (भ्वा० आ० से०)। बाहुलकादरः, अ(कार)स्योकारः। '**पुनर**प्रथमे मतम्। अधिकारे च भेदे च तथा पक्षान्तरेऽपि च' (इति मेदिनी) ॥

निर्निश्चयनिषेधयोः ।

नृणाति 'नॄ नये' (क्या० प० से०)। क्विप् (३।२।१७८)। 'ऋत इत्–' (७।३।५०)। '**निर्**निश्चये क्रान्ताद्यर्थे **निर्**निःशेषनिषेधयोः' इति विश्वः ॥

स्यात्प्रबन्धे चिरातीते निकटागामिके पुरा ॥२५३॥

प्रबन्धे अविच्छेदने क्रियाकरणे। पुरति। 'पुर अग्रगमने' (तु० प० से०)। बाहुलकात् का। '**पुरा** पुराणे निकटे प्रबन्धातीतभाविषु' (इति मेदिनी) ॥

ऊर्यूरी चोररी च विस्तारेऽङ्गीकृतौ त्रयम् ।

ऊयते। 'ऊयी तन्तुसंताने' (भ्वा० आ० से०)। बाहुलकाद्ररीक्; रीक् च। वयतेः (भ्वा० उ० अ०) ररीक्। संप्रसारणम् (६।४।१५)। '**ऊररी चोररी चोरी**[1] विस्तारेऽङ्गीकृते त्रयम्' इत्यजयः ॥

स्वर्गे परे च लोके स्वर्

'परे' इति लोकविशेषणम्। स्वरति। 'स्वृ शब्दोपतापयोः' (भ्वा० प० अ०)। विच् (३।२।७५) ॥

वार्तासंभाव्ययोः किल ॥ २५४ ॥

किलति। 'कील श्लेषे' (तु० प० से०)। 'इगुपध–' (३।२।१३५) इति कः। '**किल**शब्दस्तु वार्तायां संभाव्यानुनयार्थयोः' इति विश्वः। 'वार्तायामरुचौ **किल**' इति त्रिकाण्डशेषः ॥

निषेधवाक्यालंकारे जिज्ञासानुनये खलु ।

खलति। 'खल संचये' (भ्वा० प० से०)। बाहुलकादुः। '**खलु** स्याद्वाक्यभूषायां जिज्ञासायां च सान्त्वने। वीप्सामाननिषेधेषु पूरणे पादवाक्ययोः' (इति मेदिनी) ॥

समीपोभयतःशीघ्रसाकल्याभिमुखेऽभितः ॥२५५॥

'पर्यभिभ्यां च' (५।३।९) इत्यभिशब्दात्तसिल् ॥

नामप्राकाश्ययोः प्रादुः

प्रान्दति। 'अदि बन्धने' (भ्वा० प० से०)। बाहुलकादुस्। आगमशास्त्रस्यानित्यत्वान्न नुम् प्राप्ति वा। 'अद भक्षणे' (अ० प० अ०)। नामशब्दार्थे ॥

---

१ अत्र ह्रस्वादौ पाठात् 'उरी ह्रस्वादिरपि'—इति मुकुटपीयूषव्याख्ये ॥

मिथोऽन्योन्यं रहस्यपि ।

मेथति । 'मेथृ संगमे' (भ्वा० प० से०) । असुन् (उ० ४।१८९) । पृषोदरादित्वात् (६।३।१०९) ह्रस्वः । बाहुलकादोः । तत्रेणोभयमिह निर्दिष्टम् । अन्योन्यार्थे ॥

तिरोऽन्तर्धौ तिर्यगर्थे

तरति । 'तॄ' (भ्वा० प० से०) । असुन् (उ० ४।१८९) । 'क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते' इति गुणविषये इर् ॥

हा विषादशुगर्तिषु ॥ २५६ ॥

जहाति । 'ओहाक् त्यागे' (जु० प० अ०) । क्विप् (३।२।१७८) । **'हा** विषादे च शोके च कुत्सादुःखार्थयोरपि' (इति मेदिनी) ॥

अहहेत्यद्भुते खेदे

अहं जहाति, जिहीते वा । 'हाक्' (जु० प० अ०) । 'हाङ्' (जु० आ० अ०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । पृषोदरादित्वात् (६।४।१०९) मलोपः । **'—अहहा** दीर्घान्तमपि'—इति मुकुटः । तत्र क्विप् (३।२।७६) बोध्यः । **'अहहेत्यद्भुते** खेदे परिक्लेशप्रहर्षयोः । संबोधनेऽपि' (इति मेदिनी) ॥

हि हेताववधारणे ॥ २५७ ॥

हिनोति । 'हि गतौ' (स्वा० प० अ०) । क्विच् (३।२।७५) संज्ञापूर्वकत्वाद्गुणाभावः । क्विपि (३।२।७८) तुगभावो वा । **'हि** पादपूरणे हेतौ विशेषेऽप्यवधारणे । प्रश्ने हेत्वपदेशे च संभ्रमासूययोरपि । **ही** दुःखहेतावाख्यातो विषादे विस्मयेऽपि च' (इति मेदिनी) । तत्र पृषोदरादित्वात् (६।३।१०९) दीर्घः । एषु सर्वत्र भावे वा प्रत्यया बोध्याः ॥

इत्यनेकार्थवर्गविवरणम् ॥

चिरायचिररात्रायचिरस्याद्याश्चिरार्थकाः ।

चिरमयते । 'अय गतौ' (भ्वा० आ० से०) । 'कर्मण्यण्' (३।२।१) ॥ (१) ॥*॥ चिरा रात्रयः । 'अच्प्रत्यन्वव–' (५।४।७५) इत्यत्र 'अच्' इति योगविभागादच् । चिररात्रानयते । 'कर्मण्यण्' (३।२।१) ॥ (२) ॥*॥ चिरमस्यति । 'असु क्षेपणे' (दि० प० से०) । ण्यत् (३।१।१२४) । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । शकन्ध्वादिः (वा० ६।१।९४) ॥ (३) ॥*॥ आद्यपदेन **'चिरम्' 'चिरेण' 'चिरात्' 'चिरे'** इति गृह्यन्ते । चिरोऽर्थो येषाम् ॥*॥ त्रीणि **'दीर्घकालस्य'** ॥

मुहुः पुनःपुनः शश्वदभीक्ष्णमसकृत्समाः ॥ १ ॥

मोहनम् । 'मुह वैचित्ये' (दि० प० अ०) । बाहुलकादुस् ॥ (१) ॥*॥ 'नित्यवीप्सयोः' (८।१।४) इति पुनःशब्दस्य द्वित्वम् ॥ (२) ॥*॥ शशति । 'शश प्लुतगतौ' (भ्वा० प० से०) बाहुलकाद्वतिः ॥ (३) ॥*॥ अभि क्ष्णौति । 'क्ष्णु तेजने' (अ० प० से०) । बाहुलकाद्ध्मुः । 'अन्येषामपि–' (६।३।१३७) इति दीर्घः ॥ (४) ॥*॥ न सकृत् ॥ (५) ॥*॥ समास्तुल्यार्थाः । अजयस्तु अभीक्ष्णशब्दमनव्ययमप्याह— **'अभीक्ष्णं** तु पौनःपुन्ये सर्वदार्थे च दृश्यते' इत्यनव्ययप्रकरणे पाठात् । 'वारंवारं शश्वदर्थे **वारंवारेण** चेष्यते' इति त्रिकाण्डशेषः । पञ्च **'पौनःपुन्यस्यार्थस्य'** ॥

स्राग्झटित्यञ्जसाह्नायद्राङ्मङ्क्षुसपदि द्रुते ।

'[1]स्रै पाके' (भ्वा० प० अ०) । संपदादिः (वा० ३।३।१०८) । स्रामकति । 'अक कुटिलायां गतौ' (भ्वा० प० से०) क्विप् (३।२।७५) ॥*॥ 'झट संघाते' (भ्वा० प० से०) । संपदादिः (वा० ३।३।१०८) झटमेति । 'इण्' (अ० प० अ०) । क्तिच् (३।२।७५) ॥ (२) ॥*॥ अञ्जनम् **'अञ्जू** व्यक्त्यादौ' (रु० प० से०) । 'कृत्यल्युटो (कृतो) बहुलकम्' (वा० ३।३।११३) इति पचाद्यच् (३।१।१३४) अञ्जं स्यति, सायति वा । 'षोऽन्तकर्मणि' (दि० प० अ०) । 'षै क्षये' (भ्वा० प० अ०) वा । पचाद्यच् (३।१।१३४) । क्विप् (३।२।७६) वा ॥ (३) ॥*॥ ह्वनम् । 'ह्वङ् अपनयने' (अ० आ० अ०) । बाहुलकाद्भावे घञ् (३।३।१८) । 'पृषोदरादित्वाद्वस्य' यः । ततो नञ्समासः । ॥ (४) ॥*॥ संपद्यते । 'पद गतौ' (दि० आ० अ०) । इन् (उ० ४।११८) पृषोदरादित्वात् (६।३।१०९) समोऽन्त्यलोपः ॥ (५) ॥*॥ द्राति । 'द्रा कुत्सायां गतौ' (अ० प० अ०) । 'बाहुलकात् कः' ॥ (६) ॥*॥ मज्जति । 'टु मस्जो शुद्धौ' (तु० प० अ०) । बाहुलकात्सुः । 'मस्जिनशोः–' (७।१।६०) इति नुम् । 'स्कोः–' (८।२।२९) इति सलोपः ॥ (७) ॥*॥ सप्त **'तत्क्षणार्थस्य'** ॥

बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरे ॥ २ ॥

बलमस्यास्ति । मतुप् (५।२।१३६) ॥ (१) ॥*॥ सुतिष्ठति । 'अपदुःसुषु स्थः' (उ० १।२५) इति कुः ॥ (२) *॥ किं च तद् उत च ॥ (३) ॥*॥ सूयते । 'षु गतौ' '(प्रसवैश्वर्ययोः)' (भ्वा० प० अ०) । क्विपि (३।२।१७८) तुगभावः । डुः (वा० ३।२।१८०) वा ॥ (४) ॥*॥ अतति । इन् (उ० ४।११८) ॥ (५) ॥*॥ अति च इव च ॥ (६) ॥*॥ षट् **'अतिशयस्य'** ॥

१—'श्रै पाके' इत्यस्य दन्त्यादेरभावात्तालव्यादित्वापत्तिभिया चिन्त्यमेतत् । तस्मात् 'स्रु गतौ' इत्यस्माद्बाहुलकाड्डाक् । यद्वा 'संपदादिकिबन्तं स्रुतमा समन्तादकति' इति शकन्ध्वादित्वमङ्गीकार्यम् ॥

पृथग्विनान्तरेणतें हिरुङ् नाना च वर्जने ॥ ।

पर्थयति । 'पृथ प्रक्षेपे' (चु० प० से०) । बाहुलकात् कक् ॥ (१) ॥*॥ 'विनञभ्यां नानाञौ न सह' (५।२।२७) इति निषेधार्थाद्विशब्दान्ना ॥ (२) ॥*॥ अन्तरेति । इणो णः ॥ (२) ॥*॥ ऋतीयते । 'ऋतिः' सौत्रः । ततः केप्रत्ययः ॥ (४) ॥*॥ हिनोति । 'हि गतौ' (स्वा० प० अ०) । रुकक् प्रत्ययः ॥ (५) ॥*॥ नञो 'विनञभ्याम्' (५।२।२७) इति नाच् प्रत्ययः ॥ (६) ॥*॥ षट् **'वर्जने'** ॥

यत्तद्यतस्ततो हेतौ

यच्छति । 'यम उपरमे' (भ्वा० प० अ०) । क्विप् (३।२।१७८) । 'गमादीनां क्वौ' (वा० ६।४।४०) इत्यनुनासिकलोपः । तुक् (६।१।७५) ॥ (१) ॥*॥ तनोति । 'तनु विस्तारे' (त० उ० से०) । क्विप् (३।२।१७८) । अनुनासिकलोपः (वा० ६।४।४०) । तुक् (६।१।७५) ॥ (२) ॥*॥ यस्मात् तस्मात् यत्तद्भ्याम् 'पञ्चम्यास्तसिल्' (५।३।७) । त्यदाद्यत्वम् (७।२।१०२) ॥ (३) ॥ (४) ॥*॥ चत्वारि **'हेतौ'** ॥

असाकल्ये तु चिच्चन ॥ ३ ॥

चेतति । 'चिती संज्ञाने' (भ्वा० प० से०) । क्विप् (३।२।१७८) ॥ (१) ॥*॥ चनति 'चन शब्दे' ( ) । पचाद्यच् (३।१।१३४) ॥ (२) ॥*॥ **'असकलार्थस्य'** ॥

कदाचिज्जातु

कदा च चिच्च, अनयोः समाहारः ॥ (१) ॥*॥ जायति । 'जै क्षये' (भ्वा० प० अ०) । बाहुलकात्तुन् ॥ (२) ॥*॥ द्वे **'कस्मिंश्चित्काले'** ॥

सार्धं तु साकं सत्रा समं सह ।

ऋध्यति । 'ऋधु वृद्धौ' (दि० प० से०) । बाहुलकात्कमि[1] । सह ऋधं वर्धनम् । 'सहस्य सः (६।३।१८) इति सः ॥ (१) ॥*॥ सह अकनम् । अम् प्रत्ययः । 'सहस्य–' (६।३।७८) इति सादेशः । 'आभीक्ष्ण्ये णमुल्' (३।४।२२) वा ॥ (२) ॥*॥ सह त्रायते । क्विप् (३।२।७६) ॥ (३) ॥*॥ समति 'षम वैक्लव्ये' (भ्वा० प० से०) अम् ॥ (४) ॥*॥ सहते । पचाद्यच् (३।१।१३४) ॥ (५) ॥*॥ **'सजुर्[2]'** शब्दोऽप्यत्र ॥*॥ पञ्च **'सहेत्यर्थे'** ॥

१—इदं च 'प्रथेः कित्संप्रसारणं च' (उ० १।११७) इति सूत्राज्ञानमूलकम् । तत्राप्ययं विशेषः 'उक्तसूत्रमते जान्तत्वम् । भवन्मते कान्तत्वम् इति ॥ २—'येनतेनादि च । यथा 'वितर गिरमुदारां येन मूकाः पिकाः स्युः'—इति' स्वामी ॥ ३—कमप्रत्ययस्य कित्त्वेन 'ऋधम्' इति प्रयोगस्यैवापाद्यमानत्वेन 'सार्धम्' इति प्रयोगानिष्पत्त्या चिन्त्यमेतत् । तस्मात् 'आभीक्ष्ण्ये णमुल्' इति वक्ष्यमाणस्योभयशेषत्वमेव बोध्यम् ॥ ४—तथा च 'सजूः सहार्थे' इति त्रिकाण्डशेषः ।

आनुकूल्यार्थकं प्राध्वम्

प्राध्वनति । 'ध्वन शब्दे' (भ्वा० प० से०) डमप्रत्ययः । **'प्राध्वं** तु प्रणते चातिदूरे वर्त्मनि बन्धने' ॥ (१) ॥*॥

व्यर्थके तु वृथा मुधा ॥ ४ ॥

व्रियते । 'वृङ्' (क्र्या० आ० से०) । 'वृञ्' (स्वा० उ० से०) । थाक् **'वृथा** वन्ध्ये निष्कारणे' (इति मेदिनी) ॥ (१) ॥*॥ मुह्यति । का प्रत्ययः । 'पृषोदरादित्वात्' (६।३।१०९) ह्रस्य धः ॥ (२) ॥*॥ द्वे **'व्यर्थके'** ॥

आहो उताहो किमुत विकल्पे किं किमूत च ।

आहन्ति । डोप्रत्ययः ॥ (१) ॥*॥ उत च आहो च, अनयोः समाहारः ॥ (२) ॥*॥ किम् च उ तच, अनयोः समाहारः । (**'किमुत**तिशये प्रश्ने विकल्पे च प्रयुज्यते' इति विश्वः) ॥ (३) ॥*॥ कानम् । 'कै शब्दे' (भ्वा० प० अ०) । कायतेर्डिमिः' (उ० ४।२५८) ॥ (४) ॥*॥ किम् च उ च । **'किमु** संभावनायां स्याद्विमर्शे चापि दृश्यते' (इति मेदिनी) ॥ (५) ॥*॥ (**'उत** प्रश्ने वितर्के च **उता**प्यर्थविकल्पयोः' इति विश्वः) ॥ (६) ॥*॥ षट् **'वितर्कनस्य'** ॥

तु हि च स्म ह वै पादपूरणे

तुदति । डुः (वा० ३।२।१८०) ॥ (१) ॥*॥ हिनोति । क्विपि तुगभावः ॥ (२) ॥*॥ चनति । चिनोति वा । 'अन्येभ्योऽपि–' (वा० ३।२।१०२) इति डः ॥ (३) ॥*॥ स्मयते । 'स्मिङ् ईषद्धसने' (भ्वा० आ० से०) । डः (वा० ३।२।१०१) ॥ (४) ॥*॥ हन्ति । डः (वा० ३।२।१०१) । (**'ह** स्यात्संबोधने पादपूरणे च विनिग्रहे । नियोगे च क्षिपायां स्यात्कुत्सायामपि दृश्यते' इति मेदिनी) ॥ (५) ॥*॥ वाति । डैः ॥ (६) ॥*॥ षट् **'श्लोकचरणपूर्णतायाम्'** ॥

पूजने स्वती ॥ ५ ॥

सवति । 'षु गतौ (प्रसवैश्वर्ययोः)' (भ्वा० प० अ०) । डुः (वा० ३।२।१८०) । (**'सु** पूजायां भृशार्थेऽनुमतिकृच्छ्रसमृद्धिषु' इति मेदिनी) ॥ (१) ॥*॥ अतति । इन् (उ० ४।११८) ॥ (२) ॥*॥ द्वे **'पूजने'** ॥

दिवाह्नीति

दीव्यन्त्यत्र । काप्रत्ययः ॥ (१) ॥*॥ अह्नि दिवसे । इति ना अधिकरणार्थप्रधानतां दर्शयति ॥

अथ दोषा च नक्तं चै रजनाविति ।

दुष्यन्त्यत्र । 'दुष वैकृत्ये' (दि० प० अ०) । आ प्रत्ययः ।

१—अह्नो ह्रस्वादिरपि । 'विकल्पे विसयेऽप्यह्नो' इति रुद्रवचनात्—इति मुकुटः ॥ २—चकारादुषापि—इति स्वामिमुकुटौ । 'उषा रात्रौ तदन्ते च' इति मेदिनी ॥

(**दोषा** रात्रिमुखे रात्रावत्रानव्ययमप्यसौ' इति विश्वः ॥) (१) ॥*॥ नज्जति । 'ओ नस्जी व्रीडे' (तु० प० से०) । तमु प्रत्ययः ॥ (२) ॥*॥ रजनौ रात्रौ इत्यर्थे ॥

तिर्यगर्थे साचि तिरोऽपि

सचनम् । 'षच समवाये' (भ्वा० प० से०) । 'इजजादिभ्यः' (वा० ३।३।१०८) ॥ (१) ॥*॥ तरणम् । 'तॄ' (भ्वा० प० से०) । असुन् (उ० ४।१८९) । 'क्वचिदपवादविषयेऽपि–' इतीट् ॥ (२) ॥*॥ द्वे '**तिर्यगर्थे**' ॥

अथ संबोधनार्थकाः ॥ ६ ॥

स्युः पाट् प्याडङ्ग हे है भोः

पाटयति । 'पट गतौ' (भ्वा० प० से०) णिजन्तः । क्विप् (३।२।१७८) ॥ (१) ॥*॥ प्यायते । 'प्यैङ् वृद्धौ' (भ्वा० प० अ०) । ट् प्रत्ययः ॥ (२) ॥*॥ अङ्गति । 'अगि गतौ' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) ॥ (३) ॥*॥ 'हि गतौ' (भ्वा० प० अ०) । विच् (३।३।७५) ॥ (४) ॥*॥ हन्ति । डै प्रत्ययः ॥ (५) ॥*॥ भाति । 'भा दीप्तौ' (अ० प० अ०) । बाहुलकाड्डोस् ॥ (६) ॥*॥ षट् '**संबोधनार्थकाः**' ॥

समया निकषा हिरुक् ।

समयनम् । 'आ समिण् निकषिभ्याम्' (उ० ४।१७५) । '**समयान्तिकमध्ययोः**' (इति मेदिनी) ॥ (१) ॥*॥ निकषणम् । पूर्ववत् । '**निकषान्तिकमध्ययोः**' (इति मेदिनी) ॥ (२) ॥*॥ हिनोति । रुकक् प्रत्ययः । '**हिरुक्** मध्ये विनार्थे च' इति रुद्रः । '**हिरुगुक्तं च सामीप्ये**' इत्यमरमाला ॥ (३) ॥*॥ त्रीणि '**सामीप्ये**' ॥

अतर्किते तु सहसा

सहते । 'सह मर्षणे' (भ्वा० आ० अ०) । असा प्रत्ययः ॥ (१) ॥*॥ अतर्कितेऽविचारिते ॥

स्यात्पुरः पुरतोऽग्रतः ॥ ७ ॥

पूर्वस्मिन् । 'पूर्वाधरावराणामसिपुरधवश्चैषाम्' (५।३।३९) ॥ (१) ॥*॥ पुरति 'पुर अग्रगमने' (तु० प० से०) । बाहुलकादतसुक् ॥ (२) ॥*॥ अग्रे । आद्यादित्वात् (वा० ५।४।४४) तसिः ॥ (३) ॥*॥ त्रयः '**अग्रार्थाः**' ॥

स्वाहा देवहविर्दाने श्रौषड्वौषड्वषट् स्वधा ।

स्वादतेऽनेन । 'स्वाद आस्वादने' (भ्वा० आ० से०) । आ प्रत्ययः । पृषोदरादित्वात् (६।३।१०९) दस्य हः । सुष्ठु आ ह्वयतेऽनेन वा । डा प्रत्ययः ॥ (१) ॥*॥ श्रूयते । अनेन वा 'श्रु श्रवणे' (भ्वा० प० से०) । बाहुलकाड्डौषट् ॥ (२) ॥*॥ उह्यतेऽनेन । 'वह प्रापणे' (भ्वा० उ० अ०) । डौषट् ॥ (३) ॥*॥ डषट् च ॥ (४) ॥*॥ स्वद्यतेऽनेन । 'ष्वद आस्वादने' (भ्वा० प० से०) । आ प्रत्ययः । पृषोदरादित्वात् (६।३।१०९) दस्य धः ॥ (५) ॥*॥ पञ्च '**देवहविर्दाने**' ॥

किंचिदीषन्मनागल्पे

किम् च चित् च अनयोः समाहारः ॥ (१) ॥*॥ ईषणम् । 'ईष गत्यादौ' (भ्वा० प० से०) । अत् प्रत्ययः ॥ (१) ॥*॥ मननम् । 'मन ज्ञाने' (दि० आ० अ०) । आक् प्रत्ययः ॥ (३) ॥*॥ त्रीणि '**अल्पे**' ॥

प्रेत्यामुत्र भवान्तरे ॥ ८ ॥

प्रकर्षेण इत्वा । इण् (अ० प० अ०) । क्त्वा प्रत्ययः (३।४।२२) । 'समासे–' (७।१।३७) इति ल्यबादेशः । तुक् (६।१।७५) ॥ (१) ॥*॥ अमुष्मिन् । अदसः 'सप्तम्यास्त्रल्' (५।३।१०) ॥ (२) ॥*॥ भवान्तरे जन्मान्तरे ॥

व वा यथा तथैवैवं साम्ये

वाति । वानं वा । डः (वा० ३।२।१०१) । क्वचित् 'वत्' इति पाठः । स तु न युक्तः । वति (५।१।११५) प्रत्ययेन गतार्थत्वात् । न च वतिरेवात्र पठितः । सादृश्यपर्याये प्रत्ययपाठस्यायुक्तत्वात् । अपत्यसमूहादिपर्यायेष्वणवुञादीनामपाठात् । '**वं** प्रचेतसि जानीयादिवार्थे तु तदव्ययम्' इति मेदिन्यादिसंमतेश्च ॥ (१) ॥*॥ क्विपि (३।२।१७८) तु वा ॥ (२) ॥*॥ येन तेन प्रकारेण । 'प्रकारवचने थाल्' (५।३।२३) विभक्तित्वात् (५।३।१) त्यदाद्यत्वम् (७।२।१०२) ॥ (३) ॥*॥ (४) ॥*॥ अयनम् । 'इण्शीभ्यां वन्' (उ० १।१५२) । ('**एवौपम्ये परिभवे ईषदर्थेऽवधारणे**' इति हैमः) ॥ (५) ॥*॥ 'इण्' (अ० प० अ०) । बाहुलकाद्वम् ॥ (६) ॥*॥ षट् '**साम्ये**' ॥

अहो [२]ही च विस्मये ।

अहानम् । 'ओ हाङ् गतौ' (जु० आ० अ०) । डो प्रत्ययः ॥ (१) ॥*॥ हननम् । बाहुलकाड्डी ॥ (२) ॥*॥ अद्भुते । द्वे '**विस्मये**' ॥

मौने तु तूष्णीं तूष्णीकाम्

तोषणम् । 'तुष तुष्टौ' (दि० प० अ०) । बाहुलकान्नीम् । उपधाया ऊत् ॥ (१) ॥*॥ 'अकच्प्रकरणे' 'तूष्णीमः काम् वक्तव्यः' (वा० ५।३।७१) । 'मिदचोऽन्त्यात्परः' (१।१।४६) ॥ (२) ॥*॥ द्वे '**मौने**' ॥

१—साचिः स्त्रीलिङ्गापि प्रकृत्यन्तरमस्ति । 'भित्तौ साची परिणतमुखी' इति सप्तकुमारिका ॥ 'तिर्यक् साचिरपि स्त्रियाम्,' इति रत्नकोषः—इति मुकुटः ॥

१—स्वामिमुकुटाभ्यां तु ह्वशब्दो गृहीतः ॥ २—'ही-' शब्दो दीर्घान्तः । 'ही विचित्रो विपाकः' इति माघः—इति स्वामिमुकुटौ ॥

सद्यः सपदि तत्क्षणे ॥ ९ ॥

समानेऽहनि । 'सद्यःपरुत्–' (५।३।२२) इति साधुः ॥ (१) ॥*॥ संपद्यतेऽस्मिन् । इन् (उ० ४।११८) पृषोदरादित्वात् (६।३।१०९) मलोपः ॥ (२) ॥*॥ स चासौ क्षणश्च ॥ **'तत्काले'** द्वे ॥

दिष्ट्या समुपजोषं चेत्यानन्दे

देशनम् । संपदादिः (वा० ३।३।१०८) । दिशं स्त्यायति । 'स्त्यै शब्दादौ' (भ्वा० प० अ०) क्विप् (३।२।१७८) । षत्वम् (८।२।३६) । ष्टुत्वम् (८।४।४१) । संज्ञापूर्वकत्वाज्जश्त्वं न । यद्वा दिशति । अङ्यादिः (उ० ४।११२) ॥ (१) ॥*॥ समुपजोषणम् । 'जुषी प्रीतिसेवनयोः' (तु० आ० से०) । अम्प्रत्ययः ॥*॥ मुकुटस्तु—**'शम्' 'उपजोषं'** च—इति पठति । तत्र 'शम् उपशमे' (दि० प० अ०) धातुर्णिजन्तः । विच् (३।२।७५) । कल्याणार्थे त्रीणि ॥

अथान्तरेऽन्तरा ।

अन्तरेण च मध्ये स्युः

अन्तरेति । 'इण्' (अ० प० अ०) । विच् (३।२।७५) ॥ (१) ॥*॥ डाच् ॥ (२) ॥*॥ णश्च ॥ (३) ॥*॥ त्रीणि **'मध्यस्थ'** ॥

प्रसह्य तु हठार्थकम् ॥ १० ॥

प्रकर्षेण सोढ्वा । 'षह मर्षणे' (भ्वा० आ० अ०) । क्त्वा (३।४।२२) । ल्यप् (७।१।३७) ॥ (१) ॥*॥ हठोऽर्थो यस्य ॥

युक्ते द्वे सांप्रतं स्थाने

संप्रतनम् । 'तनु विस्तारे' (त० उ० से०) । डम् । पृषोदरादित्वात् (६।३।१०९) समो दीर्घः ॥ (१) ॥*॥ स्थानस्य करणम् । स्थानशब्दात् 'तत्करोति–' (वा० ३।१।२६) इति णिजन्तादेप्रत्ययः ॥ (२) ॥*॥ युक्ते उचितार्थे । **'स्थाने** तु कारणार्थे स्याद्युक्तसादृश्ययोरपि' (इति मेदिनी) द्वे **'युक्ते'** ॥

अभीक्ष्णं शश्वदनारते ।

अभिक्ष्णवनम् । 'क्ष्णु तेजने' (अ० प० से०) डम् । पृषोदरादित्वात् (६।३।१०९) अभेर्दीर्घः ॥ (१) ॥*॥ शशनम् । 'शश प्लुतगतौ' (भ्वा० प० से०) । वत् प्रत्ययः ॥ (२) ॥*॥ द्वे **'अनारते निरंतरे'** ॥

अभावे नह्यनो नापि

नह्यति । 'णह बन्धने' (दि० उ० अ०) । इन् (उ० ४।११८) ॥ (१) ॥*॥ नैञोऽयमकारः ॥ (२) ॥*॥ नह्यति । डो ॥ (३) ॥*॥ डश्च ॥ (४) ॥*॥ चत्वारि **'अभावे'** ॥

मास्म मालं च वारणे ॥ ११ ॥

'मा च स्म च' अनयोः समाहारः ॥ (१) ॥*॥ मानम् । संपदादिः (वा० ३।३।१०८) ॥ (२) ॥*॥ अलनम् । 'अल भूषणादौ') (भ्वा० प० से०) । अम् ॥ (३) ॥*॥ त्रीणि **'वारणे'** ॥

पक्षान्तरे चेद्यदि च

चेतति । 'चिती' (भ्वा० प० से०) । विच् (३।२।७५) ॥ (१) ॥*॥ यतनम् । 'यती प्रयत्ने' (भ्वा० आ० से०) । इन् (उ० ४।११८) । पृषोदरादित्वात् (६।३।१०९) तस्य दः । यद्वा 'यद्' शब्दाण्णिजन्तात् 'अच इः' (उ० ४।१३९) । 'प्रकृत्यैकाच्' (६।४।१६३) इति टिलोपो न ॥ (२) ॥*॥ द्वे **'पक्षान्तरे'** ॥

तत्त्वे त्वद्धाञ्जसा द्वयम् ।

'अत सातत्यगमने' (भ्वा० प० से०) । संपदादिः (वा० ३।३।१०८) । अतं सततगमनं धयति, दधाति वा । विच् (३।२।१५) ॥ (१) ॥*॥ अञ्जनम् । 'अञ्जू व्यक्त्यादौ' (रु० प० से०) । 'कृत्यल्युटो बहुलम्' (३।३।११३) इति भावे पचाद्यच् (३।१।१३४) अञ्जं स्यति, सायति वा । 'षोऽन्तकर्मणि' (दि० प० अ०) । 'षै क्षये' (भ्वा० प० अ०) । पचाद्यच् (३।१।१३४) । क्विप् (३।२।७६) वा ॥ (२) ॥*॥ द्वे **'तत्त्वार्थे'** ॥

प्राकाश्ये प्रादुराविः स्यात्

प्राप्ति । 'अद भक्षणे' (अ० प० अ०) । उस् ॥ (१) ॥*॥ अवते । 'उङ् शब्दे' (भ्वा० आ० अ०) । इ (इस्) । (२) ॥*॥ द्वे **'स्फुटार्थे'** ॥

ओमेवं परमं मते ॥ १२ ॥

अवति । 'अव रक्षणादौ' (भ्वा० प० से०) । 'अवतेष्टि-

१—कुत्वस्याप्युपलक्षणम् । पृषोदरादित्वात्सलोपः ॥ २—'उपजोषम् चवर्गतृतीयतृतीयम्' । अन्तस्याद्यतृतीयम् इत्येके—इति मीयूषव्याख्या ॥

१—एवं सति स्थानिनैव सिद्धेऽस्योपादानं व्यर्थं स्यात् । तस्मादकार एवाभावबोधकः । एव अत 'अ स्वल्पार्थेऽप्यभावेऽपि' इति हैमे 'अ शब्दः स्यादभावेऽपि स्वल्पार्थप्रतिषेधयोः । अनुकम्पायां च तथा वासुदेवे त्वनव्ययः' इति मेदिन्यां च पृथगुपादानं संगच्छते । अत एव स्वामिनापि अ विप्र इव भाषसे इति वाक्यस्य 'विप्रवन्न ब्रूषे' इत्यर्थ उक्तः । भवन्मते तु समस्तस्य क्रियायामन्वयायोगात् । समासानुपपत्तेश्च ॥—'अनशब्दोऽपि निषिद्धे । अनोपमा ते बुद्धिः' इति–मुकुटपीयूषव्याख्ये ॥ २—'रवावद्धाः' इति कण्फिणाभ्युदये भाषासमावेशः । तत्र प्रकृतपक्षे 'रवाः शब्दाः बद्धाः संयताः । 'बन्ध बन्धने' क्तः । संस्कृते तु रवौ सूर्ये अद्धा तत्त्वम्' इत्यर्थः—इति मुकुटः ॥

लोपश्च' (उ० १।१४२) इति मन् मन एव टिलोपः । 'ज्वर-त्वर-' (६।४।२०) इत्यूठौ । गुणः (७।३।८४) ॥ (१) ॥*॥ इणो बाहुलकाद्वम् ॥ (२) ॥*॥ परं मिमीते, मिनोति, मीनाति वा । डम् । 'ओमेवं परमं भवेत्' इत्यव्ययकाण्डे व्याडिः ॥ (३) ॥ त्रीणि **'अनुमतौ'** ॥

समन्ततस्तु परितः सर्वतो विष्वगित्यपि ।

समन्तात् । आद्यादित्वात् (वा० ५।४।४४) तसिः ॥ (१) ॥*॥ 'पर्यभिभ्यां च' (५।३।९) इति परिशब्दात्तसिल् ॥ (२) ॥*॥ सर्वस्मात् 'पञ्चम्यास्तसिल्' (५।३।८) ॥ (३) ॥*॥ विषु अञ्चति । क्विन् (३।२।५९) ॥ (४) ॥*॥ **'अभितः' 'विश्वतः' 'समन्तात्'** इत्याद्यपि ॥*॥ चत्वारि **'सर्वत इत्यर्थे'** ॥

अकामानुमतौ कामम्

काम्यते । कमेर्णिङन्तादम् । 'अकामानुमतौ **काम**मसूयोपगमेऽपि च' इति रुद्रः । 'आकामानुमतौ **कामम्**' इति क्वचित्पाठः । तत्राङ् बोध्यः । 'निकामानुमतौ कामम्' इत्यर्थः । **'कामं** कामाभ्यनुज्ञयोः' इति त्रिकाण्डशेषः ॥

असूयोपगमेऽस्तु च ॥ १३ ॥

असति । अस्यति वा । तुन् । **'अस्तु** स्यादभ्यनुज्ञानेऽप्यसूयापीड्योरपि' (इति मेदिनी) ॥ (१) ॥*॥ चान्नामशब्देऽप्यत्र ॥*॥ एकम् ॥

ननु च स्याद्विरोधोक्तौ

'ननु' 'च' निपातद्वयस्य समाहारद्वंद्वः ॥

कच्चित्कामप्रवेदने ।

'कत्' इति कुशब्दादेशः । 'कत्' 'चित्' अनयोरप्येवम् ॥ (१) ॥*॥ इष्टप्रश्ने एकम् ॥

निःषमं दुःषमं गर्ह्ये

निर्गतं सममत्र । 'तिष्ठद्गुप्रभृतीनि च' (२।१।१७) इत्यव्ययीभावत्वम् । 'सुविनिर्दुर्भ्यः-' (८।३।८८) इति षत्वम् ॥ (१) ॥*॥ दुष्टं सममत्र ॥ (२) ॥*॥ द्वे **'निन्दितेऽर्थे'** ॥

यथास्वं तु यथायथम् ॥ १४ ॥

'यथास्वम्' इति वीप्सायामव्ययीभावः (२।१।६) । यो य आत्मा, यद्यच्चात्मीयम्, तद्यथास्वम् । तस्मिन् यथाशब्दस्य द्वे क्लीबत्वं च निपात्यते 'यथास्वे यथायथम्' (८।१।१४) इति सूत्रेण ॥ (१) ॥*॥ द्वे **'यथायोग्ये'** ॥

मृषा मिथ्या च वितथे

मृष्यते । 'मृषु सहने' (भ्वा० प० से०) । का प्रत्ययः ॥ (१) ॥*॥ मथते । 'मथे विलोडने' (भ्वा० प० से०) । अञ्यादित्वात् (उ० ४।११२) साधुः ॥ (२) ॥*॥ विगतं तथा=सत्यमस्मात्तत्र ॥*॥ द्वे **'असत्ये'** ॥

यथार्थं तु यथातथम् ।

अर्थमनतिक्रम्य । पदार्थानतिवृत्तावव्ययीभावः (२।१।६) ॥*॥ (सत्यमनतिक्रम्य) । 'तथा' शब्दः 'तथ' शब्दो वा सत्यार्थः ॥ (१) ॥*॥ एकम् **'सत्ये'** ॥

स्युरेवं तु पुनर्वैवेत्यवधारणवाचकाः ॥ १५ ॥

सुभूतिस्तु 'स्युरेवं तु पुनर्वा च' इति पठति । 'चान्वाचयें समाहारे अन्योन्यार्थे समुच्चये । पक्षान्तरे तथा पादपूरणेऽप्यवधारणे' इति रुद्रः ॥ पञ्च **'निश्चयार्थकाः'** ॥

प्रागतीतार्थकं

प्राचि देशे । प्राचो देशात् । प्राङ् देशो वा । '-सप्तमीपञ्चमी-' (५।३।२७) इत्यस्तातिः 'अञ्चेर्लुक्' (५।३।३०) । एवं दिशि काले च ॥ (१) ॥*॥ एकम् ॥

नूनमवश्यं निश्चये द्वयम् ।

नु ऊनयति । 'ऊन परिहाणे' (चु० प० से०) । अम् ॥ (१) ॥*॥ अव इयायते । 'इयैङ् गतौ' (भ्वा० आ० अ०) ॥ डम् प्रत्ययः ॥ (२) ॥*॥ द्वे **'निश्चिते'** ॥

संवर्द्धे

संवयते । 'वय गतौ' (भ्वा० आ० से०) । क्विप् (३।२।७६) । यलोपः (६।१।६६) । तुक् (६।१।७५) । यद्वा संवदति विच् (३।२।७५) ॥

अवरे त्ववाग्

अवरे अञ्चति । अस्तातिः (५।३।२७) । 'अञ्चेर्लुक्' (५।३।३०) । पृषोदरादिः (६।३।१०९) । अवरे पूर्वकालतः पश्चात् । अर्वन्तमञ्चति वा ॥

आमेवं

आमयति । 'अम गत्यादिषु' (भ्वा० प० से०) ण्यन्तः । क्विप् (३।२।१७८) । **'आम्** ज्ञानविनिश्चये' इति बोपालितः ॥ (१) ॥*॥ (२) ॥*॥ द्वे **'निश्चये'** ॥

स्वयमात्मना ॥ १६ ॥

सुष्ठु अयते । 'अय गतौ' (भ्वा० आ० से०) । अम् ॥ (१) ॥*॥ 'आत्मना' इत्यत्रार्थे ॥

अल्पे नीचैः

नि[1] चीयते । 'चिञ् चयने' (स्वा० उ० अ०) । 'नौ दीर्घश्च' (उ० ५।१३) इति डैसिः ॥ (१) ॥*॥

महत्युच्चैः

उच्चीयते । 'उदि चेर्डैसिः' (उ० ५।१२) ॥ (१) ॥*॥

१—कुत्रचित् 'उच्चीयते' इत्यादिकः पूर्वः पाठः ॥—२ त्रिकाण्डशेषपुस्तके तु 'शब्दौ' इति नास्ति, अत एव न छन्दोभङ्गः कश्मीरलिखितसुधापुस्तके केनचित् 'काल' इति न लिखितम् ॥

प्रायो भूम्नि

प्रायणम् । 'अय गतौ' (भ्वा० आ० से०) । असुन् (उ० ४।१८९) ॥ (१) ॥*॥

अद्रुते शनैः ।

शणति । 'शण दाने' (भ्वा० प० से०) । शानयति वा । 'शान तेजने' (भ्वा० उ० से०) । ऐस् प्रत्ययः । पृषोदरादित्वात् (६।३।१०९) णस्य नः, ह्रस्वो वा ॥ (१) ॥*॥ अद्रुतेऽशीघ्रार्थे ॥

सना नित्ये

सनति । 'षण संभक्तौ' (भ्वा० प० से०) । आ प्रत्ययः ॥ (१) ॥*॥ **'सनात्' 'सनत्'** ॥

बहिर्बाह्ये

वहति 'वह प्रापणे' (भ्वा० उ० अ०) । इस् । बवयोरभेदः ॥

सातीते

स्यति । 'षोऽन्तकर्मणि' (दि० प० अ०) डम् प्रत्ययः । 'स्मिङो डः' (वा० ३।२।१०१) वा ॥ (१) ॥*॥

अस्तमदर्शने ॥ १७ ॥

असनम् । 'अस क्षेपणे' (दि० प० से०) तम् प्रत्ययः ॥ (१) ॥*॥

अस्ति सत्त्वे

असनम् । 'अस दीप्तौ' (भ्वा० प० से०) । क्तिच् (३।३।१७४) । तिर्वा । **'अस्त्याह** (शब्दौ) कालसामान्ये तिङन्तप्रतिरूपकौ' इति त्रिकाण्डशेषः ॥

रुषोक्तावु

रुषा कोपेनोक्तौ वचने ॥*॥ अवनम् । 'उङ् शब्दे' (भ्वा० आ० अ०) क्विप् (३।२।१७८) । तुग् (६।१।७५) न । ङुः (वा० ३।२।१८०) वा ॥

ऊं प्रश्ने

ऊय्यते । 'ऊयी तन्तुसंताने' (भ्वा० आ० से०) । मुक्प्रत्ययः ॥*॥ (**'उम्'** इति) ह्रस्वपाठे डुम् प्रत्ययः ॥ (१) ॥*॥ 'रुषा प्रश्ने' इति स्वामी ॥

अनये त्वयि ।

ईयते । अय्यते वा । इः (उ० ४।१३९) । इनू (उ० ४।११८) वा ॥ (१) ॥*॥ अनुनये सान्त्वने ॥

हुं तर्के स्यात्

हवनम् । 'हु दानादौ' (जु० प० अ०) । डुम् प्रत्ययः ॥ (१) ॥*॥

उषा रात्रेरवसाने

ओषिति । 'उष दाहे' (भ्वा० प० से०) । का प्रत्ययः । 'उषा स्याद्रजनीशेषे **'उषः'** इत्यपि दृश्यते' इति रभसः ॥ (१) ॥*॥

नमो नतौ ॥ १८ ॥

नमनम् । 'णम प्रह्वत्वे' (भ्वा० प० अ०) । असुन् (उ० ४।१८९) ॥ (१) ॥*॥

पुनरर्थेऽङ्ग

अङ्गनम् । 'अगि गतौ' (भ्वा० प० से०) । घञ् (३।३।१८) ॥ (१) ॥*॥

निन्दायां दुष्ठु

दुःस्थानम् । 'अपदुःसुषु स्थः' (उ० १।२५) । इति कुः । सुषामादित्वात् (८।३।९८) षः ॥ (१) ॥*॥

सुष्ठु प्रशंसने ।

सुस्थानम् । पूर्ववत् ॥ (१) ॥*॥

सायं साये

सानम् । 'षोऽन्तकर्मणि' (दि० प० अ०) । णम् । युगागमः (७।३।३३) ॥ (१) ॥*॥ साये दिनान्ते ॥

प्रगे प्रातः प्रभाते

प्रगीयते, अत्र वा । 'गै शब्दे' (भ्वा० प० अ०) । के प्रत्ययः ॥ (१) ॥*॥ प्रातति । 'अत सातत्यगमने' (भ्वा० प० से०) । अरन्प्रत्ययः (उ० ५।५९) ॥ (२) ॥*॥ द्वे प्रभाते । 'सायंचिरम्–' (४।३।२३) इति सूत्रेऽनव्ययस्य प्रगशब्दस्यैत्वं निपात्यते । अव्ययेभ्यः पृथक्करणात् ॥ द्वे **'प्रभाते'** ॥

निकषान्तिके ॥ १९ ॥

(निकषणम्) । 'आसमिण्निकषिभ्याम्' (उ० ४।१७५) ॥ (१) ॥*॥)

परुत्परार्यैषमोऽब्दे पूर्वे पूर्वतरे यति ।

पूर्वे वर्षे परुत् । 'सद्यःपरुत्–' (५।३।२२) इति साधुः ॥ (१) ॥*॥ (एवं) पूर्वतरे वर्षे, यति गच्छति (वर्तमाने) वर्षे **'परारि'** (१) **'ऐषमस्'** (१) शब्दौ (क्रमेण) ॥*॥

अद्यात्राह्नि

अत्रास्मिन् अहनि । 'सद्यःपरुत्–' (५।३।२२) इति 'अद्य' 'अद्य' शब्दः साधुः ॥ (१) ॥*॥

अथ पूर्वेऽह्नीत्यादौ पूर्वोत्तरापरात् ॥ २० ॥

तथाधरान्यान्यतरेतरात्पूर्वेद्युरादयः ।

पूर्वोत्तरापरेभ्योऽधरान्यान्यतरेभ्यश्च 'पूर्वेऽह्नि' इत्यादावर्थे पूर्वेद्युरादयः शब्दा भवन्तीत्यन्वयः । आदिना 'उत्तरेऽह्नि अपरेह्नि, अन्यस्मिन्नह्नि, अन्यतरस्मिन्नह्नि, इतरस्मिन्नह्नि । द्वितीयेनादिशब्देन **'उत्तरेद्युः' 'अपरेद्युः' 'अधरेद्युः' 'अन्येद्युः' 'अन्यतरेद्युः' 'इतरेद्युः'** । 'सद्यःपरुत्–' (५।३।

२२) इत्यादिना निपातितः । **'पूर्वेद्युरिष्यते प्रातः पूर्वेद्युः** पूर्ववासरे' इति रुद्रः । (क्रमेणैकैकम्) ॥

उभयद्युश्चोभयेद्युः

उभयस्मिन्नहनि । 'द्युश्चोभयाद्वक्तव्यः' (वा० ५।३।२२) इति साधुः ॥ (१) ॥*॥ ('सद्यःपरुत्–') (५।३।२२) इति निपातितः ॥ (२) ॥*॥

परे त्वह्नि परेद्यवि ॥ २१ ॥

परस्मिन्नहनि । ('सद्यः परुत्–' (५।३।२२) इति साधुः) ॥ (१) ॥*॥

ह्योऽतीते

यातमहः । पृषोदरादिः (६।३।१०९) । 'एषमो ह्यःश्वसोऽन्यतरस्याम्' (४।२।१०५) इति निर्देशश्चात्रानुकूलः ॥ (१) ॥*॥

अनागतेऽह्नि श्वः

आगामि अहः । पृषोदरादिः (६।३।१०९) ॥ (१) ॥*॥

परश्वश्च परेऽहनि ।

परं च तच् श्वश्च ॥ श्वः परं वा । राजदन्तादिः (२।२।३१) ॥ (१) ॥*॥

तदा तदानीम्

तस्मिन् काले । 'तदो दा च' (५।३।१९) ॥ (१) ॥*॥ (चात्) दानीं च ॥ (२) ॥*॥ द्वे **'तस्मिन्काल इत्यर्थे'** ॥

युगपदेकदा

युवन्त्यस्मिन्काले । 'यु मिश्रणादौ' (अ० प० से०) । गँपतक् प्रत्ययः । युगं पयतेऽस्मिन् । 'पय गतौ' (भ्वा० अ० से०) । डत् प्रत्ययः ॥ (१) ॥*॥ एकस्मिन् काले । 'सर्वैकान्य–' (५।३।१५) इति दा ॥ (२) ॥*॥ द्वे ॥

सर्वदा सदा ॥ २२ ॥

सर्वस्मिन्काले । 'सर्वैका–' (५।३।१५) इति दा ॥ (१) ॥*॥ 'सर्वस्य सोऽन्यतरस्यां दि' (५।३।६) ॥ (२) ॥*॥ द्वे **'सर्वस्मिन्काले'** ॥

एतर्हि संप्रतीदानीमधुना सांप्रतं तथा ।

अस्मिन्काले । 'इदमो र्हिल्' (५।३।१६) । 'एतेतौ रथोः' (५।३।४) ॥ (१) ॥*॥ 'सम्' 'प्रति' एतयोः समाहारद्वन्द्वः ॥ (२) ॥*॥ तस्मात् प्रज्ञाद्यण् (५।४।३८) । गणे पाठान्मान्तत्वम् ॥ (२) ॥*॥ अस्मिन्काले । 'दानीं च' (५।३।१८) ॥ (३) ॥*॥ 'अधुना' (५।३।१७) इति निपातितः ॥ (४) ॥*॥ पञ्च **'अस्मिन्काले'** ॥

दिग्देशकाले पूर्वादौ प्रागुदक्प्रत्यगादयः ॥ २३ ॥

प्राच्यां दिशि, प्राच्या दिशः, प्राची दिग्, वा । प्राचि देशे काले च, प्राचो देशात् कालाच्च, प्राङ् देशः कालो वा । '–सप्तमीपञ्चमीप्रथमाभ्यः–' (५।३।२७) इत्यस्तातिः । 'अञ्चेर्लुक्' (५।३।३०) एवम् अवाच्यां दिशि, अवाचो देशात्, अवाङ् देशः । **अवाक्** । यत्तु मुकुटः—'तस्यास्तातेः' '–लुक्' (५।३।३०) इति लुक् इत्याह । तन्न । उक्तसूत्रादर्शनात् । 'अञ्चेर्लुक्' (५।३।३०) इति दर्शनाच्च । 'पूर्वादौ' इत्यादिपदेनोत्तरदक्षिणाधरादीनां ग्रहः । 'प्रत्यगादयः' इत्यादिशब्देन **'उत्तरात्' 'अधरात्' 'दक्षिणात्'** (इत्यत्र) 'उत्तराधर–' (५।३।३४) इत्यातिः । **'उत्तरेण' 'अधरेण' 'दक्षिणेन'** (इत्यत्र) 'एनबन्यतरस्यां–' (५।३।३५) इत्येनप्, **'दक्षिणा'** (इत्यत्र) 'दक्षिणादाच्' (५।३।३६), **'दक्षिणाहि'** (इत्यत्र) 'आहिच दूरे' (५।३।३७), **'दक्षिणतः' 'उत्तरतः'** (इत्यत्र) 'दक्षिणोत्तराभ्यामतसुच्' (५।३।२८), इत्यादयो बोध्याः ॥

॥ इत्यव्ययवर्गः ॥

सलिङ्गशास्त्रैः सन्नादिकृत्तद्धितसमासजैः ।
अनुक्तैः संग्रहे लिङ्गं संकीर्णवदिहोन्नयेत् ॥ १ ॥

लिङ्गविधानसहितानि यानि सूत्राणि (शास्त्राणि) 'स्त्रियां क्तिन्' (३।३।९४) 'पुंसि संज्ञायां घः प्रायेण' (३।३।११८) 'न पुंसके भावे क्तः'(३।३।११४) 'स नपुंसकम्' (२।४।१७) 'अदन्तोत्तरपदो द्विगुः स्त्रियाम्' (वा० २।४।३०) इत्यादीनि, सन्नादिर्येषां क्यजादीनां ते सन्नादयश्च कृतश्च तद्धिताश्च समासाश्च जायन्ते येभ्यो यैर्वा, तानि शास्त्राणि तैरिहास्मिन्वर्गे 'संगृह्यन्ते लिङ्गान्यस्मिन् ।' बाहुलकात् 'ग्रहवृदृदस्यां–' (३।३।५८) इत्यधिकरणेऽप् । 'तस्मिन्' लिङ्गसंग्रहवर्गे संकीर्णवर्ग इव लिङ्गमुन्नयेदूहेत् । कीदृशैः शास्त्रैः, प्रागनुक्तैः । क्वचित् 'अनुक्तौ' इति पाठः । तत्रेहानुक्तमपि सलिङ्गशास्त्रैरूह्यम् । यद्वा सलिङ्गशास्त्रैः सन्नादिकृत्तद्धितसमासेभ्यो जातैः शब्दैश्चेति प्रत्येकमूहे करणत्वं बोध्यम् । पक्षद्वये 'सन्नादि' इति चिन्त्यम् । कृदादिजभिन्नसन्नादिजानामलाभात् । 'सन्नादिभ्यो विहितकृज्जैः' इति व्या-

---

१—'द्युस्' इति केवलमप्यव्ययम् । अत एव क्षीरस्वामिना —'द्युर्दिनम्' इति श्रीभोजः यथा 'द्युश्चन्द्रो द्योतते कथम्'—इति लिखितम् ॥ अस्याव्ययत्वं च 'द्युरह्नौ दिवसेऽपि स्यात्' इति विश्वाद्युक्तस्य द्युगणद्युपिण्डादिशब्देषु भास्कराङ्गीकृतस्य प्रथमान्तस्य प्रतिरूपकत्वेन ॥ २—इदं तु 'यौगपद्य–' (२।१।६) निर्देशैदकारश्रवणानुपपत्त्या चिन्त्यम् । तस्मात् प्रत्यये तवर्गतृतीयोपान्त्यत्वमङ्गीकरणीयम् ।

१—सूत्रैकदेशलेखनेऽपि सकलसूत्रालेखनेनैव यदि प्रत्याख्येयत्वं तर्हि भवतोऽपि 'दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः' (५।३।२७) इति सूत्रस्थाने केवलं 'सप्तमीपञ्चमीप्रथमाभ्यः' इत्येतावल्लेखेन प्रत्याख्येयत्वं कुतो न स्यात् । सूत्रप्रारम्भांशत्यागोऽप्युभयोः समान एव ॥

ख्यानेऽपि व्यर्थविशेषणत्वात् । संकीर्णवर्गे यथा प्रकृतिप्रत्ययार्थाद्यैर्लिङ्गोहनमनुक्तलिङ्गशब्दविषयम्, तथात्रापि सलिङ्गशास्त्रादिभिर्लिङ्गोहनमनुक्तलिङ्गशब्दविषयं बोध्यम् ॥

लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः ।

लिङ्गस्य शेषोऽवशेषः । तस्य विधिः, व्याप्नोति पूर्वोक्तं काण्डत्रयस्य व्यापकः । उत्सर्गत्वात् । विशेषैरुक्तैः प्रागुक्तैश्च यदि न बाध्यते । 'अपवादविषयं विहाय सर्वत्र प्रवर्तते' इत्यर्थः ॥

स्त्रियामीदूद्विरामैकाच् सयोनिप्राणिनाम च ॥ २ ॥

'स्त्रियाम्' इत्यधिकारः । ईच्च ऊच्च तौ विरामे विरामावन्तौ वा यस्य तच्च तदेकाच्च । श्रीः, धीः, ह्रीः, 'भूः' 'भ्रूः', 'द्यूः'[3], 'जूः'[3], लवनं लूः, भवनं भूः, नयति नीः, । 'छुनाति लूः' इत्यादौ तु परत्वात् 'कृतः कर्तरि' ( ) इति त्रिलिङ्गत्वम् । योनिर्भगम् तत्सहितानां प्राणिनां नाम स्त्रियां स्यात् । माता, दुहिता, याता, स्त्री । 'दाराः पुंभूम्नि' इति विशेषः ॥

नाम विद्युन्निशावल्लीवीणादिग्भूनदीह्रियाम् ।

विद्युदादीनामष्टानां स्त्रियाम् । विद्युत् । तडित् । रात्रिः, रजनिः । वल्लिः, वीरुत् । वीणा, विपञ्ची' इत्यादौ 'ड्याबूडन्तम्' इति सिद्धे वीणाग्रहणं चिन्त्यम् । केचित्तु वीणास्थाने **वार्णी** पठन्ति । वाक्, गौः, गीः । दिक्, हरित् । भूः, भूमिः, क्ष्मा । सरित्, स्रिस्रोताः, विपाट् । ह्रीग्रहणं चिन्त्यम् । 'ईदूद्विरामैकाच्' इति, त्रपादौ 'ड्याबूडन्तम्' इति च, सिद्धत्वात् । केचित्तु '**धियाम्**' इति पठन्ति । संवित्, चित्, प्रतिपत् ॥

अदन्तैर्द्विगुरेकार्थः

अदन्तेनोत्तरपदेन सह यो द्विगुः स स्त्रियाम् । कीदृशः सः । एकोऽर्थो यस्य सः । 'द्विगुरेकवचनम्' (२।४।१) इत्यनेन समाहारे एकत्वविधानात् । दशमूली, त्रिलोकी, पञ्चाक्षरी । अदन्तैः किम् । पञ्चकुमारि, दशधेनु । एकार्थः किम् । पञ्चकपालः, पञ्चकपालौ, पञ्चकपालाः ॥

न स पात्रयुगादिभिः ॥ ३ ॥

पात्रयुगादिभिरदन्तैर्यो द्विगुः स स्त्रियां न स्यात् । पञ्चपात्रम्, चतुर्युगम्, त्रिभुवनम्, त्रिपुरम् । भाष्ये (५।४।६८ सूत्रे) तु 'त्रिपुरि' इति दृश्यते ॥

१—'क्ष्रूः स्त्रियां निर्झरे स्रुवे' इति मेदिनी । स्रुवो यज्ञपात्रम् ॥ २—'क्विब्वचि-' (उ० २।५७) इत्यादिना क्विब्दीर्घौ । 'द्यूर्हिरण्यरक्षसोर्द्यूः कामचारः, जूः पिशाची पिशाचाश्च पुंसि' इतिरूपमञ्जरी—इति मुकुटः ॥ ३—'जूस्त्वरागमने प्रोक्ता सामान्यगमने स्त्रियाम् । जूराकाशसरस्त्वां पिशाच्यां, जवने त्रिषु' इति मेदिनी ॥

तलन्ते येनिकट्यत्रा वैरमैथुनिकादिवुन् ।
स्त्री भावादावनिक्किण्ण्वुल्ण्वुच्क्यङ्युजिञङ्निशाः ॥ ४ ॥

उणादिषु निरूरीश्च ड्याबूडन्तं चलं स्थिरम् ।

तलन्तं स्त्रियाम् । ग्रामता, गोता, ब्राह्मणता । वृन्दे समूहे यश्च इनिकट्यत्राश्च, तदन्तं स्त्रियाम् । पाश्या, खलिनी, शाकिनी, गोत्रा, रथकट्या । वृन्दे किम् । मुखे भवो 'मुख्यः', दण्डोऽस्यास्तीति 'दण्डी' 'द्वन्द्वाद्वुन्वैरमैथुनिकयोः' (४।३।१२५) अश्वमहिषिका, काकोलूकिका, अत्रिभरद्वाजिका, कुत्सकुशिकिका । आदिना 'पादशतस्य' (५।४।१) 'दण्डव्यवसर्गयोश्च' (५।४।२) इति वुनो ग्रहणम् । द्विपदिकां ददाति, द्वौ द्वौ दण्डितो द्विपदिकाम् । वैरेत्यादि किम् । 'वासुदेवार्जुनाभ्यां वुन्' (४।३।९८) । वासुदेवे भक्तिरस्य वासुदेवकः । वुनो ग्रहां वुणं उपलक्षणम् । क्वचित् 'वुः' इति पाठः । 'गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु' (५।१।१३४) वुञ् । गार्गिकया श्लाघते, काठिकया । 'द्वन्द्वमनोज्ञादिभ्यश्च' (५।१।१३३) वुञ् । शैष्योपाध्यायिका । 'स्त्रियाम्' (३।३।९४) इत्यधिकारे भावे, आदिना अकर्तरि कारके च ये अन्यादयः प्रत्ययास्तदन्तं स्त्रियां स्यात् । 'आक्रोशे नञ्यनिः' (३।३।११२) । अकरणिः, अजननिः । 'स्त्रियां क्तिन्' (३।३।९४) । कृतिः, । भूतिः, । 'ण्वु' इति ण्वुल्ण्वुचोः सामान्यग्रहणम् । 'रोगाख्यायां ण्वुल्बहुलम्' (३।३।१०८) । प्रच्छर्दिका, प्रवाहिका । 'धात्वर्थनिर्देशे ण्वुल् वक्तव्यः' (वा० ३।३।१०८) । आसिका, शायिका । 'पर्यायार्हणोत्पत्तिषु ण्वुच्' (३।३।१११) । भवतःशायिका, इक्षुभक्षिका । 'कर्मव्यतिहारे णच् स्त्रियाम्' (३।३।४३) । 'णचः स्त्रियामञ्' (५।४।१४) स्वार्थिकः । व्यावक्रोशी, व्याक्रुक्षी । 'व्रजयजोर्भावे क्यप्' (३।३।९८) । व्रज्या, इज्या । 'समजनिषद०' (३।३।९९) इति क्यप् । समज्या, निषद्या । स्त्रीभावादौ किम् । 'वदः सुपि क्यप्च' (३।१।१०६) । मृषोद्यम् । 'भुवो भावे' (३।१।१०७) ब्रह्मभूयम् । 'ण्यासश्रन्थो युच्' (३।३।१०७) । कारणा, कामना । 'प्रेक्षाख्यानयोरिच्च' (३।३।११०) । कां त्वं कारिं गार्णिं वाकार्षीः । 'षिद्भिदादिभ्योऽङ्' (३।३।१०४) । पचा, क्रपा, भिदा, छिदा, । 'अ प्रत्ययात्' (३।३।१०२) । चिकीर्षा, पुत्रीया । 'गुरोश्च हलः' (३।३।१०३) । ईहा, ऊहा । 'ग्लाम्लाज्याहाभ्यो निः' (वा० ३।३।९५) । ग्लानिः । 'क्नूयः शच' (३।३।१००) । क्रिया । 'इच्छा' (३।३।१०१) । उणादौ न्यन्तम्, ऊदन्तम्, ईदन्तं च । 'वीज्याज्वरिभ्यो निः' (उ० ४।४८) । 'सृवृषिभ्यां कित्' (उ० ४।४९) । श्रेणिः, श्रोणिः, द्रोणिः । 'अनिः' इति पाठान्तरम् । 'अर्तिसृधृधम्यश्यवितॄ-

१—'विभाषाख्यानपरिप्रश्नयोरिच्च' इत्यानुपूर्वीकस्य सूत्रस्यानुपूर्वीव्यत्यासेन लेखः प्रामादिकः' ॥

भ्योऽनिः' (उ० २।१०२) धरणिः, धमनिः, सरणिः । कृवि-चमितनिधनिसर्जिखर्जिभ्य ऊः–' (उ० १।८०) । कर्षूः, चमूः । 'अवितृस्तृतन्त्रिभ्य ईः' (उ० ३।१५८) । अवीः, तरीः । ङी च आप् च ऊङ् च अन्ते यस्य तत् । कदली, कन्दली, रमा, गङ्गा, वामोरूः, करभोरूः, चलं जंगमम् । स्थिरं स्थावरम्–नाडी, खट्वा, अलाबूः । चरस्थिरग्रहणं चिन्त्यप्रयोजनम् । अन्यस्य व्यवच्छेद्यस्याभावात् ॥

तत्क्रीडायां प्रहरणं चेन्मौष्टा पाल्लवाणदिक् ॥ ५ ॥

'तदस्यां प्रहरणमिति क्रीडायां णः' ( ) । मुष्टिः प्रहरणमस्याम् । 'पल्लवाः प्रहरणमस्याम् । णस्य दिगुदाहरणम् । न तु परिगणनम् । तेन 'मौसला, दाण्डा' इत्यादि बोध्यम् ॥

घञो ञः सा क्रियास्यां चेद्दाण्डपाता हि फाल्गुनी । श्येनंपाता च मृगया तैलंपाता स्वधेति दिक् ॥ ६ ॥

'घञः सास्यां क्रियेति ञः' ( ) । घयन्तात् क्रियावाचिनः प्रथमान्तादस्यामित्यर्थे ञः स्यात्, तदन्तं स्त्रियाम् । दण्डपातोऽस्यां तिथौ वर्तते । श्येनपातोऽस्याम् तिलपातोऽस्याम् । 'श्येनतिलस्य पाते ञे' (६।३।७१) इति मुम् । 'पितृदाने स्वधा मतम्' इत्यमरमाला । वररुचिना तु 'स्वधा क्रिया प्रवेणी' इति स्त्रीलिङ्गोक्ता इति दिक् । उदाहरणम्, तेन मौसलपाता भूमिरित्यादि ज्ञेयम् ॥

स्त्री स्यात्काचिन्मृणाल्यादिर्विवक्षापचये यदि ।

अल्पं मृणालम् । गौरादित्वात् (४।१।४१) ङीष् । आदिना कुम्भी, प्रणाली, मुसली, छत्री, पटी, तटी, मठी । काचिदिति किम् । अल्पो वृक्षो वृक्षकः ॥

लङ्का शेफालिका टीका धातकी पञ्जिकाढकी ॥७॥

'ङ्याबूङन्तम्' इति सिद्धे नामानुशासनार्थो लङ्कादीनां पाठः । भङ्ग्यादीनामुभयानुशासनार्थः । शेफालिकादीनां तु व्यर्थः, खपर्यायपठितत्वात् । लाक्ष्यते सुखमस्याम् । 'लक आस्वादने' चुरादिः । 'एरच्' (३।३।५६) । घञ् (३।३।१९) वा । पृषोदरादित्वात् (६।३।१०९) नुम् । नुम्यनुपधात्वान्न वृद्धिः । यद्वा रमन्तेऽस्याम् । बाहुलकात्कः, लत्वं च ॥ (१) ॥*॥ शेफालिका पुष्पविशेषः । 'शेते' इति शे । शीङः (अ० प० अ०) विच् (३।२।७५) । शयं फालयति । 'ञिफला विशरणे' (भ्वा० प० से०) । अण् (३।२।१) । स्वार्थे कन् (५।४।५) । कुन् (उ० २।३२) वा ॥ (१) ॥*॥ टीक्यतेऽर्थो यया । 'टीकृ गतौ' (भ्वा० आ० से०) । 'गुरोश्च हलः' (३।३।१०३) इत्यः । विषमपदव्याख्या ॥ (१) ॥*॥ धातकी 'धव' इति प्रसिद्धो वृक्षभेदः । धातुं करोति । 'तत्करोति–' (वा० ३।३।२६) इति णिच् । टिलोपः (६।४।१५५) कुन् (उ० २।३२) । पिप्पल्यादित्वात् (४।१।४१) ङीष् ॥ (१) ॥*॥ पिञ्जयतेऽर्थोऽस्याम् । 'पिजि भाषार्थः' (चु० उ० से०) । 'गुरोश्च' (३।३।१०३) इत्यः । पृषोदरादित्वादिकारस्याकारः । स्वार्थे कन् (५।४।५) पिञ्जयति वा । कुन् (उ० २।३२) । सकलपदव्याख्या ॥ (१) ॥*॥ आढकी तुवरिका । आ समन्ताड्ढौकते, ढौक्यते, वा । 'ढौकृ गतौ' (भ्वा० आ० से०) । अच् (३।१।१३४) । घञ् (३।३।१९) वा, पृषोदरादिः (६।३।१०९) गौरादिः (४।१।४१) ॥ (१) ॥*॥

सिध्रका सारिका हिक्का प्राचिकोल्का पिपीलिका । तिन्दुकी कणिका भङ्गिः सुरङ्गासूचिमाढयः ॥ ८ ॥

सेधति । सिध्यते वा । 'षिधु गत्याम्' (भ्वा० प० से०) । 'बहुलमन्यत्रापि' इति रक् । ततः स्वार्थे कन् (५।४।५) । क्षिपकादित्वात् (वा० ७।३।५०) इत्वाभावः । 'शूद्रादयः' इति रग् इति मुकुटश्चिन्त्यः । उज्ज्वलदत्तादिवृत्तिषूक्तसूत्रादर्शनात् । 'सीध' इति प्रसिद्धो वृक्षभेदः ॥ (१) ॥*॥ सरति । 'सृ गतौ' (भ्वा० प० अ०) । ण्वुल् (३।१।१३३) ॥*॥ ('शारिका' इति) तालव्यादिपाठे 'शॄ हिंसायाम्' (क्र्या० प० से०) धातुः शृणाति दुःखं विरहिणीनाम् । पक्षिभेदः ॥ (१) ॥*॥ हिक्कनम् । 'हिक्क अव्यक्ते शब्दे' (भ्वा० प० से०) । 'गुरोश्च हलः' (३।३।१०३) इत्यः । यद्वा हिक्कयते । 'हिक हिंसायाम्' (चु० आ० से०) पचाद्यच् (३।१।१३४) । ऊर्ध्वं वातप्रवृत्तौ शब्दविशेषः ॥ (१) ॥*॥ प्राचति । 'अचु गतौ' (भ्वा० उ० से०) ण्वुल् (३।१।१३३) । 'वनमक्षिका' इति मुकुटः । 'पक्षिभेदः' इति स्वामी ॥ (१) ॥*॥ ऋच्छति । अर्यते वा 'ऋ गतौ' (भ्वा० प० अ०) । 'शुकवल्कोल्काः' (उ० ३।४२) इति साधुः । तेजःपुञ्जः । यत्तु—'मूकादयः'—इति सूत्रमुपन्यस्तं मुकुटेन तच्चिन्त्यम् । उज्ज्वलदत्तादिषु तस्यादर्शनात् ॥ (१) ॥*॥ अपि पील्यते 'पील प्रतिष्टम्भे' (भ्वा० प० से०) । घञ् (३।३।१९) । 'वष्टि भागुरिरल्लोपम्–' इत्यपेरल्लोपः । स्वार्थे कन् (५।४।५) । 'शनैर्याति पिपीलकः' इति पुंस्त्वमपि–इति स्वामी ॥ (१) ॥*॥ तिम्यति । 'तिम आर्द्रीभावे' (दि० प० से०) । बाहुलकादुकष् गुणाभावश्च ॥ (१) ॥*॥ कणति । 'कण गतौ' (भ्वा० प० से०) पचाद्यच् (३।१।१३४) । स्वार्थे

१—'लङ्का रक्षःपुरीशाखाशाकिनीकुलटासु च' इति मेदिनी ॥ २—हेमस्तु 'टीका निरन्तरव्याख्या' इति मूलं 'सुगमानां विषमाणां च निरन्तरं व्याख्या यस्यां सा' इत्येवंरीत्या व्याख्यातवान् ॥

१—हेमचन्द्रस्तु 'पञ्जिका पदभञ्जिका' इति मूलं 'पच्यन्ते व्यक्तीक्रियन्ते पदार्था अनया 'पञ्जिका' । पृषोदरादित्वाज्जत्वे 'पञ्जिका' ॥ 'अर्थाद्विषमाण्येव पदानि भनक्ति पदभञ्जिका' इत्येवंरीत्या व्याख्यातवान् । प्रयुज्यते स्म च 'पञ्जिका' शब्दोऽपि वक्रोक्तिपञ्चाशिकाव्याख्यायां वल्लभदेवेन 'वञ्जिका क्रियते लघुः' इति ॥ 'आयव्ययलिखनार्था च' इति मुकुटः ॥ २—इदं च 'स्फायि–' (उ ०२।१३) इति सूत्रस्थसिधिपाठज्ञानमूलकमिति चिन्त्यम् ॥

कन् (५।४।५)। अतिसूक्ष्मम् ॥ (१) ॥*॥ भङ्गस्य करणम्। 'तत्करोति–' (वा० ३।१।२६) इति ण्यन्तात्। 'अच इः' (उ० ४।१३९)। विच्छित्तिः, कौटिल्यभेदो वा 'व्याजच्छलनिभे **भङ्गिर्वैदर्भीतनमीलिका**' इति रभसः ॥ (१) ॥*॥ सु बहु रज्यतेऽस्यां रजसा। 'रञ्ज रागे' (भ्वा० प० अ०)। 'हलश्च' (३।३।१२०) इति घञ् 'चजोः–' (७।३।५२) इति कुत्वम्। तिर्यग्भूखातः ॥ (१) ॥*॥ सूच्यतेऽनया। 'सूच पैशुन्ये' चुरादिः। अच इः (उ० ४।१३९) 'स्त्री **सूचि**र्नृत्यभेदे च व्यधनीशिखयोरपि' इति रत्नकोषः ॥ (१) ॥*॥ महनम्। अनया वा। 'मह पूजायाम्' (भ्वा० प० से०)। क्तिन् (३।३।९१)। ढत्व (८।१।३१) धत्व (८।२।४०) ष्टुत्व (८।४।४२) ढलोप (८।३।१३) दीर्घाः (६।३।१११)। **'माढिः** पत्त्रशिरा' इति रत्नकोषः। **'माढिः** स्त्री पत्त्रभङ्गो च दैन्यस्यापि प्रकाशने' (इति मेदिनी) ॥

पिच्छावितण्डाकाकिण्यश्शूर्णिः शाणी द्रुणी दरत्।
सातिः कन्था तथासन्दी नाभी राजसभापि च ॥९॥

पिच्छ्यते। 'पिच्छ बाधे' (चु० प० से०)। 'गुरोश्च–' (३।३।१०३) इत्यः। शाल्मलिनिर्यासः, भक्तादिमण्डश्च ॥ (१) ॥*॥ वितण्ड्यते परपक्षोऽनया। 'तडि आघाते' (भ्वा० आ० से०) 'गुरोश्च–' (३।३।१०३) इत्यः ॥ (१) ॥*॥ ककनम् 'कक लौल्ये–' (भ्वा० आ० से०)। घञ् (३।३।१९)। काकमणति। 'अण शब्दे' (भ्वा० प० से०)। अण् (३।२।१)। पृषोदरादिः (६।३।१०९)। 'पणगण्डकयोस्तुर्य उदमानस्य **काकिणी**' इति रुद्रः ॥*॥ रभसस्तु नान्तेष्वप्याह–'पणोदमानगण्डानां तुर्यांशेऽपि च काकिनी' इति। तत्र 'अन प्राणने' (अ० प० से०) धातुर्बोध्यः। आढकस्य पञ्चाशत्तमो भाग उदमानः। उक्तं च गणितावल्याम्–'कुल्या स्यादष्टभिर्द्रोणैर्द्रोणपादेन चाढकः। अतोऽर्धशतिको भाग उदमानमुदाहृतम्' इति ॥ (१) ॥*॥ **'चूर्णो** धूलौ क्षारभेदे **चूर्णानि** वासयुक्तिषु' (इति मेदिनी)। चूर्णस्य करणम्। 'तत्करोति–' (वा० ३।१।२६) इति ण्यन्तात् 'अच इः' (उ० ४।१३९)। यद्वा चरणं चोरणं वा। घृणिपृश्निपार्ष्णिचूर्ण्णिभूर्णयः' (उ० ४।५२) इति साधुः ॥ (१) ॥*॥ शाणस्य विकारः 'तस्य विकारः' (४।३।१२०) इत्यण्। 'टिड्ढाण–' (४।१।१५) इति ङीप्। 'शाणः' इत्यन्ये ॥ (१) ॥*॥ द्रुणति। 'द्रुण जैह्म्ये वधे गतौ' (तु० प० से०)। 'इगुपध–' (३।३।१३५) इति कः। 'जातेः–' (४।१।६३) इति ङीष्। **'द्रुण्यम्बुद्रोणीकच्छप्योः'** (इति मेदिनी) ॥ (१) ॥*॥ दरणम्। दीर्यते वा 'दृ विदारणे' (क्रया० प० से०) 'भये' (भ्वा० प० से०)। वा 'शृदृभसोऽदिः' (उ० १।१३०)। **'दरत्** स्त्रियां प्रपातेऽपि भयपर्वतयोरपि' (इति मेदिनी) ॥ (१) ॥*॥ सननम्। सानं वा। 'षणु दाने' (त० उ० से०)। 'षोऽन्तकर्मणि' (दि० प० अ०) इति वा। 'ऋतियूति–' (३।३।९७) इति साधुः। **'सातिर्दानावसानयोः'** (इति हैमः) ॥ (१) ॥*॥ कन्यते। 'कमु कान्तौ' (भ्वा० आ० से०।) बाहुलकात्थन्। **'कन्था** मृन्मयभित्तौ स्यात्तथा प्रावरणान्तरे' (इति मेदिनी) ॥ (१) ॥*॥ आस्यतेऽस्याम् 'आस उपवेशने' (अ० प० से०)। 'श(अ)ब्दादयश्च' (उ० ४।९८) इति साधुः। 'कुन्दादयश्च' इति मुकुटश्चिन्त्यः एतत्पाठादर्शनात्। 'वेत्रासनमासन्दी स्त्री वृषी च व्रतिकासनम्' ॥ (१) ॥*॥ नभ्यतेऽनया। अस्यां वा। 'णभ हिंसायाम्' (भ्वा० आ० से०)। 'इवजादिभ्यः' (वा० ३।३।१०८)। **'नाभि**र्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान्। द्वयोः प्राणिप्रतीके स्यात्स्त्रियां कस्तूरिकामदे' (इति मेदिनी) ॥ (१) ॥*॥ राज्ञः सभा ॥ (१) ॥*॥

झल्लरी चर्चरी पारी होरा लट्वा च सिध्मला।
लाक्षा लिक्षा च गण्डूषा गृध्रसी चमसी मसी ॥१०॥

झर्झ्यते। 'झर्झ भर्त्सोक्त्योः' (तु० प० से०)। बाहुलकादरन् पृषोदरादिः (६।३।१०९) गौरादिः (४।१।४१)। **'झल्लरी झिल्लरी** च द्वे हुडुके बालचक्रके' (इति मेदिनी) ॥ (१) ॥*॥ चर्च्यते। 'चर्च उक्तौ' (भ्वा० प० से०)। बाहुलकादरन्। गौरादिः (४।१।४१)। **'चर्चरी** गीतभेदे च केशभित्करशब्दयोः' ॥ (१) ॥*॥ पारयति। पार्यते वा। 'पॄ पूर्तौ' चुरादिः। पचाद्यच् (३।१।१३४)। घञ् (३।३।१९) वा। गौरादिः (४।१।४१)। 'कर्क(गर्ग)रीपूरयोः **पारी** पादरज्वां च हस्तिनः' (इति विश्वः) ॥ (१) ॥*॥ होलति। हुल्यते वा। 'हुल हिंसासंवरणयोः' (भ्वा०प०से०)। पचाद्यच् (३।१।१३४) घञ् वा। रलयोरेकत्वम्। **'होरा** तु लग्ने राश्यर्धे रेखाशास्त्राभिदोरपि' (इति मेदिनी) ॥ (१) ॥*॥ लटति। 'लट बाल्ये' (भ्वा० प० से०)। 'अशूप्रुषिलटि–' (उ० १।१५१) इति कुन्। **'लट्वा** करञ्जभेदे फलेऽवद्ये खगान्तरे' (इति मेदिनी) ॥ (१) ॥*॥ सिध्ममस्त्यस्याः। 'सिध्मादिभ्यश्च' (५।२।९७) इति लच्। **'सिध्मला** मत्स्यविकृतौ वाच्यवत्तु किलासिनि' (इति मेदिनी) ॥ (१) ॥*॥ लाष्यते। 'लष शिल्पयोगे' चुरादिः। बाहुलकात्सः। यद्वा लक्ष्यते। 'लक्ष आलोचने' (चु० उ० से०) घञ् (३।३।१९)। पृषोदरादित्वात् (६।३।१०९) 'लाक्षारोचना–' (४।२।२) इति निर्देशाद्वा दीर्घः ॥ (१) ॥*॥ लक्ष्यते। 'लक्ष आलोचने' (चु० उ० से०) घञ् (३।३।१९) पृषोदरादित्वात् (६।३।१०९) अस्य इः। **यूकाण्डम्** ॥ (१) ॥*॥ गण्ड्यते। 'गडि वदनैकदेशे' (भ्वा० प० से०)। 'गण्डेश्च' (उ० ४।७८) इत्यूषन्। पुंस्यपि। **'गण्डूषो** मुखपूर्तीभपुष्करप्रसृताञ्जलिः' (इति रुद्रः)। 'उन्नतनाभिस्तु गण्डूषा नापि मुखपूर्तिः' इति बोपालितः ॥ (१) ॥*॥ गृध्रमपि स्यति। 'षोऽन्तकर्मणि' (दि०

१—प्रायेण बहुवचनान्तः—इत्यनेकार्थकैरवाकरकौमुदी ॥

प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः । गौरादिः (४।१।४१) ङीष् । ऊरुसंधौ वातरोगः ॥ (१) ॥*॥ चम्यते । 'चमु अदने' (भ्वा० प० से०) 'अल्पविचमितमि–' (उ० ३।११७) इत्यसच् । गौरादित्वात् (४।१।४१) ङीष् । **'चमसो** यज्ञपात्रस्य भेदेऽस्त्री पिष्टके क्लियाम्' (इति मेदिनी) ॥ (१) ॥*॥ मस्यति । 'मसी परिणामे' (दि० प० से०) । पचाद्यच् (३।१।१३४) । **'मेला मसीजलं पत्राञ्जनं च स्यान्मसिर्द्वयोः'** इति त्रिकाण्डशेषः ॥

इति स्त्रीलिङ्गशेषः ॥

पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।
स्वर्गयागाद्रिमेघाब्धिद्रुकालासिशरारयः ॥ ११ ॥

'पुंस्त्वे' इत्यधिकारः । सह भेदैरनुचरैश्च वर्तमानाः, सह पर्यायैर्वर्तमानाः, सुरासुराश्च देवदैत्याः । अमरा निर्जरा देवाः । सुरभेदाः–तुषिताः, साध्याः, आभास्वराः, इन्द्रः, शक्रः, सूर्य आदित्यः । देवानुचराः—हाहाः, हूहूः, तुम्बुरुः, नारदः, मातलिः । असुरपर्यायाः दैत्याः, दैतेयाः, दानवाः । दैत्यभेदाः—बलिः, नमुचिः, जम्भः । दैत्यानुचराः—कूष्माण्डमुण्डकुम्भाण्डादयः । 'दैवतानि' देवताः इत्यादौ बाधोऽस्य । स्वर्गादय एकोनविंशतिः सभेदाः सपर्यायाश्च पुंसि स्युः । स्वर्गः, नाकः, त्रिदिवः । 'द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम्' इति । विशेषैर्बाधितः । यज्ञः, मखः, क्रतुः । तद्भेदाः–उक्थातिरात्राग्निष्टोमाश्वमेधाः । अद्रिः, गिरिः, पर्वतः । भेदाः–मेरुः, हिमवान्, सह्यः । 'गन्धमादनम्' इति बाधः । मेघः, घनः, जलदः । भेदाः—पुष्करावर्तकादयः । 'अभ्रम्' इति तु बाधः । अब्धिः, समुद्रः सागरः । भेदाः—क्षीरोदः, लवणोदः । द्रुः, वृक्षः, शाखी । भेदाः—प्लक्षः, वटः, आम्रः । पाटलाशिंशपादेर्बाधः । कालः, दिष्टः, समयः, भेदाः—मासः । पक्षः, ऋतुः । दिनतिथ्यादौ बाधः । असिः, खड्गः, मण्डलाग्रः । भेदाः—नन्दकः, चन्द्रहासः । 'कटित्रम्' इत्यादौ बाधः । शरः, बाणः, विशिखः । भेदाः—नाराचः, काण्डः, भल्लः । 'इषुर्द्वयोः' इति बाधः । अरिः, शत्रुः, अरातिः । भेदाः–आततायी ॥

करगण्डौष्ठदोर्दन्तकण्ठकेशनखस्तनाः ।
अह्नाहान्ताः क्ष्वेडभेदा रात्रान्ताः प्रागसंख्यकाः १२

करो राजग्राह्यो भागः रश्मिः, पाणिश्च । मरीच्यादीनां तु बाधः । गण्डः, कपोलः । ओष्ठः, दन्तच्छदः, अधरः, । दोः, प्रवेष्टः । भुजादेः 'द्वयोः' इति बाधः । दन्तः, दशनः, रदः, । भेदः—जम्भः । कण्ठः, गलः । 'समीपगलशब्देषु कण्ठं त्रिषु विदुर्बुधाः' इति शाश्वतः । केशः, कचः । नखः, पुनर्भवः । 'नखरोऽस्त्रियाम्' इति बाधः । स्तनः, कुचः, पयोधरः । अह्नश्च अह्नश्च अन्ते येषां ते पुंसि स्युः । परवल्लिङ्गापवादोऽयम् । अह्नः पूर्वम्—पूर्वाह्णः, अपराह्णः । द्वयोरह्नोः समाहारो द्यहः, त्र्यहः । अत्र 'स नपुंसकम्' (२।४।१) इत्यस्यापवादः । क्ष्वेडो विषम् । तद्भेदाः पुंसि स्युः । सौराष्ट्रिकः, शौक्लिकेयः, ब्रह्मपुत्रः । रात्रोऽन्तो येषां ते । प्राक् पूर्वपदं न संख्या येषां ते पुंसि स्युः । परवल्लिङ्गतापवादोऽयम् । परत्वात्समाहारनपुंसकतामपि बाधते । तेन अहोरात्रः, । सर्वरात्रः, पूर्वरात्रः । 'प्रागसंख्यकाः' इति किम् । पञ्चरात्रम् ॥

श्रीवेष्टाद्याश्च निर्यासा असन्नन्ता अबाधिताः ।
कशेरुजतुवस्तूनि हित्वा तुरुविरामकाः ॥ १३ ॥

श्रीवेष्ट आद्यो येषां ते निर्यासा वृक्षद्रवाः पुंसि स्युः । श्रीवेष्टः, सरलः, द्रवः । **'श्रीपिष्टः'** इति क्वचित्पाठः । आद्येन श्रीवासः, वृकधूपः, गुग्गुलुः, सिल्हकः इत्यादयः पुंसि बोध्याः । असन्ता अन्नन्ताश्च पुंसि स्युः । अङ्गिराः, वेधाः । चन्द्रमाः । कृष्णवर्त्मा, प्रतिदिवा, मघवा, । अबाधिताः किम् । अप्सरसः, जलौकसः, सुमनसः, लोम, साम, वर्म । तुश्च रुश्च तुरू । तौ विरामौ विरामे वा येषां ते पुंसि स्युः । कशेर्वादीनि विहाय । हेतुः, सेतुः, धातुः । कुरुः, मेरुः, त्सरुः । 'कशेरुजतुवस्तूनि हित्वा' इति व्यर्थम् । 'अबाधिताः' इत्यस्यान्वयसंभवात् । वस्तुतस्तु 'अबाधिताः' इत्यपि व्यर्थम् । 'विशेषैर्यदबाधितः' इत्यनेन निर्वाहात् । अत एव दार्वश्वादिषु निर्वाहः ॥

कषणभमरोपान्ता यद्यदन्ता अमी अथ ।
पथनयसटोपान्ता गोत्राख्याश्चरणाह्वयाः ॥ १४ ॥

ककारादिद्वादशवर्णोपधा अदन्ताः पुंसि स्युः । अङ्कः, लोकः, अर्कः । माषः, तुषः, रोषः । पाषाणः, गुणः, घुणः । दर्भसरभगर्दभाः । होमः, ग्रामः, धूमः । झर्झरः, शीकरः, समीरः, यूपः, कूपः, सूपः । कलापः । सार्थः, नाथः, शपथः । इनः, अपघनः, जनः । अपनयविनयप्रणयाः रसहासपनसाः पटस(र)ट-करटाः । मुकुटस्तु—पोपान्तादिषु 'अदन्ताः' इति न संबध्यते, अथादित्वात्—इत्याह । गोमायुपाध्वादीनुदाहरति च । गोत्रं वंशं आख्यायते व्यपदिश्यते यैस्ते । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति ङः । गोत्रस्यादिपुरुषाः प्रवराश्च पुंसि स्युः । स्वामी तु 'अपत्यप्रत्ययान्ताः' इति व्याख्यत् । तदसत् । 'अपत्यप्रत्ययान्तः' इत्यनेन पुनरुक्तिप्रसङ्गात् । गौतमः, भरद्वाजः, वसिष्ठः । चरणानां वेदशाखानामाह्वया नामानि । कठः, कलापः, बह्वृचः ॥

१—एवमिकारान्तत्वानुपपत्त्या चिन्त्यमेतत् । तस्मात् 'सर्वधातुभ्य इन्' (उ० ४।११८) इति बोध्यम् । ततः 'कृदिकारात्' (ग० ४।१।४५) इति वा ङीष् । अत एव 'अथ स्त्रीपुंसयोः केलिमैणिर्योनिर्मैसिर्मुनिः' इति त्रिकाण्डशेषः संगच्छते । २—मूर्धन्योपधोऽपि—। **'मलिनाम्बु मषी**मसी' इति हैमात् । तत्र मूषति हिनस्ति औज्ज्वल्यम् । 'मष हिंसायाम्' (भ्वा० प० से०) इति धातुर्बोध्यः ।

नाम्यकर्तरि भावे च घञजङ्ण्यथुचः।
ल्युः कर्तरीमनिज्भावे को घोः किः प्रादितोऽन्यतः
॥ १५ ॥

घञादयः सप्त प्रत्ययाः संज्ञायां विषये, कर्तृभिन्ने कारके, भावे च ये विहिताः तदन्ताः पुंसि स्युः। प्रसीदन्त्यस्मिन्मनांसि प्रासादः। 'हलश्च' (३।३।१२१) इति घञ्। प्रास्यते प्रासः विदन्त्यनेन वेदः, प्रपतन्त्यस्मात्प्रपातः। भावे पाकः, त्यागः, रोगः। चकारात् 'पदरुज–' (३।३।१६) इति घञ्, दायो घायः, इत्यादयोऽसंज्ञायां विहिता अपि गृह्यन्ते। चयः, जयः। 'एरच्' (३।३।५६)। करः, गरः, लवः, स्तवः 'ऋदोरप्' (३।३।५७)। 'यजयाचयत—' (३।३।९०) इति नङ्। यज्ञः, यत्नः। 'नङ्' इत्युपलक्षणम्। 'स्वपो नन्' (३।३।९१) अपि गृह्यते। 'स्वप्नः संवेश इत्यपि' इति वा पुंस्त्वसिद्धिर्बोध्या। न्यादनम्—न्यादः। 'नौ ण च' (३।३।६०) इति णः। 'पुंसि संज्ञायाम्–' (३।३।११८) इति घः। उरश्छदः, प्रच्छदः। 'ष्ट्रितोऽथुच्' (३।३।८९)। श्वयथुः, वेपथुः। 'पॅचिनन्दि–' (३।१।१३४) इति नन्द्यादिभ्यो विहितो ल्युः पुंसि स्यात्। नन्दनः, रमणः, मधुसूदनः। संज्ञायामिदम्। असंज्ञायां तु 'कृतः कर्तर्यसंज्ञायाम्' इति सिद्धम्। इमनिजन्ताः पुंसि। 'पृथ्वादिभ्य इमनिज्वा' (५।१।१२२)। प्रथिमा, महिमा। इह 'भावे' इति न संबध्यते। कर्मार्थस्येमनिचोऽसंग्रहापत्तेः। चण्डस्य कर्म भावो वा चण्डिमा, महतः कर्म भावो वा महिमा। स्वामिमुकुटौ तु 'वरिमा' 'तरिमा' इत्यावौणादिकेमनिज्वारणाय 'भावे' इति संबबन्धतुः। तन्न। 'कृतः कर्तर्यसंज्ञायाम्' इत्यनेन तत्र सिद्धत्वात्, प्रीधातोरौणादिकमनिनन्तः प्रेमशब्दः। 'सुपि स्थः' (३।२।४) इति योगविभागाद्भावे कः, 'घञर्थे कः' (वा० ३।३।५८) इति च। आखूत्थः, प्रस्थः। उपसर्गादन्यस्माच्च सुबन्तात् परो यो घुस्तस्माद्विहितो यः किंप्रत्ययस्तदन्तः पुंसि स्यात्। 'उपसर्गे घोः किः' (३।३।९२)। 'कर्मण्यधिकरणे च' (३।३।९४)। निधिः, आधिः, विधिः, उदधिः, जलधिः। अत्र 'प्रादितोऽन्यतः' इति व्यर्थम्। 'घोः किः' इत्यनेनैवेष्टसिद्धेः॥

द्वन्द्वेऽश्ववडवावश्ववडवानसमाहृते।
कान्तः सूर्येन्दुपर्यायपूर्वोऽयः पूर्वकोऽपि च ॥ १६ ॥

अश्वश्च वडवा च। 'पूर्ववदश्ववडवौ' (२।४।२७) इति परवल्लिङ्गतापवादः। द्वित्वमविवक्षितम्। तेन 'अश्ववडवान्'। असमाहृते किम्। अश्ववडवम्। 'विभाषा वृक्षमृग–' (२।४।१२) इति चैकवद्भावः। सूर्येन्दुनामपूर्वैः कान्तशब्दः पुंसि। सूर्यकान्तः। चन्द्रकान्तः। अयस्कान्तः॥

वटकश्चानुवाकश्च रलकश्च कुडङ्गकः।
पुङ्खो न्युङ्खः समुद्गश्च विटपट्टघटाः खटः ॥ १७ ॥

वटति। 'वट वेष्टने' (भ्वा० प० से०)। कुन् (उ० २।३२)। माषपिष्टविकारः॥ (१) ॥*॥ अनु उच्यते। 'वच भाषणे' (अ० प० अ०)। घञ् (३।३।१९)। 'चजोः–' (७।३।५३) इति कुत्वम्। ऋग्यजुःसमूहः॥ (१) ॥*॥ लल्यते। 'लल ईप्सायाम्' (भ्वा० प० से०)। संपदादिः (वा० ३।३।१०८)। रलयोरेकत्वम्। लक्ष्यते। 'लक आस्वादने' ( ) 'पुंसि संज्ञायाम्–' (३।३।११८) इति घः। रल् चासौ लकश्च। 'पक्ष्मकम्बलम्–'॥ कुटति। 'कुट कौटिल्ये' (तु० प० से०)। क्विप् (३।२।१७८)। कुट् अङ्गमस्य। 'शेषाद्विभाषा' (५।४।१५४) इति कप्। **कुडङ्गको** ना छदिः **पिटम्**' इति बोपालितः। 'वृक्षलतागृहम्' इति स्वामी। **'कुटङ्गकः'** इति क्वचित् पाठः। तत्र कुटेः 'इगुपध–' (३।१।१३५) इति के शकन्ध्वादित्वं (वा० ६।१।९४) बोध्यम्॥ (१) ॥*॥ पुमांसं खनति। पुंसा खन्यते वा। 'खनु अवदारणे' (भ्वा० प० से०)। 'अन्येभ्योऽपि–' (वा० ३।२।१०१)। पुङ्खः काण्डमूलम्॥ (१) ॥*॥ न्युङ्ख्यते। 'उखि गतौ' (भ्वा०प०से०)। 'पुंसि संज्ञायाम्–'(३।३।११८) इति घः। **'न्युङ्खः** सम्यञ्चनोज्ञे च साम्नः षट्प्रणवेषु च' (इति मेदिनी) ॥*॥ (**'न्यूङ्ख'** इति) दीर्घपाठे तु पृषोदरादित्वात् (६।३।१०९) 'यज्ञकर्मण्यजपन्यूङ्खसामसु' (१।२।३४) इति निर्देशाद्वा, दीर्घः॥ (१) ॥*॥ समुद्गम्यते। 'गम्लृ गतौ' (भ्वा० प० अ०)। 'अन्येष्वपि–' (वा० ३।२।४८) इति डः। संपुटकः॥ (१) ॥*॥ वेटति। 'विट आक्रोशे' (भ्वा० प० से०। 'इगुपध–' (३।१।१३५) इति कः। **'विटोऽद्रौ** धवले षिङ्गे मूषिके खदिरेऽपि च' (इति मेदिनी) ॥ (१) ॥*॥ पटति। पट्यते वा। 'पट गतौ' (भ्वा० प० से०)। बाहुलकात्तः। **'पट्टः** पेषणपाषाणे व्रणादीनां च बन्धने। चतुष्पथे च राजादिशासनान्तरपीठयोः' (इति मेदिनी) ॥ (१) ॥*॥ तट्यते। 'तट उच्छ्राये' (भ्वा० प० से०)। धन्यते वा। 'धन शब्दे' (भ्वा० प० से०)। 'पुंसि–' (३।३।११८) इति घः। तस्य धः। नस्य टो वा। 'परीक्षार्थतुलायां च **धटः** सूरिभिरिष्यते' इति विश्वः। **'धटी** दिव्यतुलायां स्याद् **धटी** चीरे च वाससः' (इति मेदिनी) ॥ (१) ॥*॥ खट्यते। 'खट काङ्क्षायाम्' (भ्वा० प० से०)। 'पुंसि–' (३।३।११८) इति घः। **'खटोऽन्धकूपखपयोः** प्रहारान्तरटङ्कयोः' (इति मेदिनी) ॥

कोट्टारघट्टहट्टाश्च पिण्डगोण्डपिचण्डवत्।
गडुः करण्डो लगुडो वरण्डश्च किणो घुणः ॥ १८ ॥

कुट्टयते। 'कुट्ट छेदने' (चु० प० से०) 'प्रतापने' (चु०

१—'नन्दिग्रहिपचादिभ्यः–' (३।१।१३४) इत्येवं सूत्रसत्त्वेनोक्तोपन्यासो मनःकल्पित एव॥

आ० से०) वा । 'बाहुलकादारन् गुणश्च ।' **'कोट्टारो** नागरे कूपे पुष्करिण्याश्च पाटके' इति रभसः ॥ (१) ॥*॥ घट्टयतेऽस्मिन् । 'घट्ट चलने' (भ्वा० आ० से०) । 'हलश्च' (३।३।१२१) इति 'घञ्' । 'घाट' इति प्रसिद्धः ॥ (१) ॥*॥ केचित्तु **'कोट्ट' 'अरघट्ट'** इति छित्त्वा 'कोट्टो दुर्गपुरम् । अरघट्टः कूपभेदः' इति व्याचख्युः । तत्र कुट्टयातोर्घे बाहुलकाद्गुणः । अरैश्चक्रावयवसदृशैः काष्ठविशेषैर्घट्टयते रच्यते—अरघट्टः कूपाज्जलनिःसारणार्थं घटीयन्त्रमित्यन्ये ॥ (१) ॥*॥ हटन्त्यत्र । 'हट दीप्तौ' (भ्वा० प० से०) । बाहुलकात्तः । हट्ट आपणः ॥ (१) ॥*॥ पिण्ड्यते, पिण्डते वा । 'पिडि संघाते' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) । घञ् (३।३।१९) वा । **'पिण्डो** बोले बले सान्द्रे देहागारैकदेशयोः । देहमात्रे निवापे च गोलसिह्लकयोरपि । ओण्ड्रपुष्पे च पुंसि स्यात्क्लीबमाजीवनायसोः । **पिण्डी** तु पिण्डतगरेऽलाबूखर्जूरभेदयोः' (इति मेदिनी) ॥ (१) ॥*॥ गोरण्ड इव । **'गोण्डः** पामरजातौ च वृद्धनाभौ च तद्वति' (इति मेदिनी) ॥ (१) ॥*॥ अपि चण्डते, अनेन, अत्र वा । 'चडि कोपे' (भ्वा० प० से०) । 'हलश्च' (३।३।१२१) इति घञ् । 'वष्टि भागुरि–' इत्यपेरलोपः । 'शस्ते, **पिचण्ड** उदरे पशोरवयवे पुमान्' (इति मेदिनी) शस्ते देहे ॥ (१) ॥*॥ '–पिचण्डवत् कोट्टारादयः पुंसि' इत्यन्वयः ॥*॥ गडति । गड्यते वा । 'गड सेचने' (भ्वा० प० से०) । बाहुलकादुः । **'गडुः** पृष्ठगुडे कुब्जे' इति विश्वः ॥ (१) ॥*॥ क्रियते । 'डुकृञ्' (त० उ० अ०) 'अण्डन् कृसृभृवृञः' (उ० १।१२९) **'करण्डो** मधुकोषासिकारण्डवदलाढके' (इति मेदिनी) ॥ (१) ॥*॥ लगति । 'लगे सङ्गे' (भ्वा० प० से०) । बाहुलकादुडच् । लगुडो यष्टिः ॥ (१) ॥*॥ वृणोति, व्रियते वा । 'वृञ् वरणे' (स्वा० उ० से०) । अण्डन् (उ– १।१२९) । **'वरण्डोऽप्यन्तरावेदौ** समूहमुखरोगयोः' (इति मेदिनी) ॥ (१) ॥*॥ कणति । 'कण गतौ' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । पृषोदरादित्वात् (६।३।१०९) अत इः । किणो मांसग्रन्थिः व्रणजं चिह्नं च ॥ (१) ॥*॥ घोणते । 'घुण भ्रमणे' । (भ्वा० आ० से०) । 'इगुपध–' (३।१।२।१३५) इति कः । **'घुणः** स्यात्काष्ठवेधके' इति रत्नकोषः ॥

१—'कोट्टः पुंक्लीबलिङ्गः–' इत्यभिधानचिन्तामणौ हैमः । २—**'प्रकाण्डो** विटपे शस्ते मूलस्कधान्तरे तरोः' **'पिचण्डमुदरे** विद्यात्पशोरवयवेऽपि च' इति विश्वस्य, **'प्रकाण्डः** स्तम्बशस्तयोः । स्कन्धमूलान्तरे तरोः' **'पिचण्डोऽवयवे**पशोः । उदरे च' इति हैमस्य च संवादात् 'नानार्थैः प्रथमान्तोऽत्र, सर्वत्रादौ प्रकीर्तितः' इति मेदिनीकारप्रतिज्ञाभङ्गभयाच्च 'शस्ते' इत्यस्य प्रकाण्डशब्दार्थत्वेनात्र तस्य व्याख्यानमज्ञानमूलम् ॥

दृतिसीमन्तहरितो रोमन्थोद्गीथबुद्बुदाः ।
कासमर्दोऽर्बुदः कुन्दः फेनस्तूपौ सपूपकौ ॥ १९ ॥

द्रियते । 'दृङ् आदरे' (तु० आ० अ०) । क्तिच् (३।३।१७४) **'दृतिश्चर्मपुटे** मत्स्ये ना' (इति मेदिनी) ॥ (१) ॥*॥ सीम्नोऽन्तः । शकन्ध्वादिः (वा० ६।१।९४) केशविन्यासः ॥ (१) ॥*॥ हरति, ह्रियते वा । 'हृञ् हरणे' (भ्वा० उ० अ०) 'हृसृरुहि–' (उ० १।९७) इतीतिः **'हरिर्दिशि** स्त्रियां पुंसि हयवर्णविशेषयोः । अस्त्रियां स्यात्तृणे च' (इति मेदिनी) ॥ (१) ॥*॥ रोमस्य मन्थो रोमन्थः । पृषोदरादिः । (६।३।१०९) । पशूनां चर्वितस्य चर्वणम् ॥ (१) ॥*॥ उद्गीयते । 'गै शब्दे' (भ्वा० प० अ०) । 'गश्वोदि' (उ० २।१०) इति थक् । यत्तु-'न्युदोः शीङ्गाभ्याम्' इति सूत्रं मुकुटेनोपन्यस्तम् । तदुज्ज्वलदत्ताद्युणादिवृत्तिषु न पश्यामः । **'उद्गीथः** प्रणवः सामवेदध्वनिः' इत्यरुणः ॥ (१) ॥*॥ 'बुद्' इत्यव्यक्तध्वनिं बुन्दति करोति 'उ बुन्दिर् निशामने' (भ्वा० उ० से०) । मूलविभुजादित्वात् (वा० ३।२।५) कः । बुद्बुदो जलविकारः ॥ (१) ॥*॥ कासं मृद्नाति । 'मृद क्षोदे' (क्या० प० से०) । 'कर्मण्यण्' (३।२।१) वेसवारभेदः ॥ (१) ॥*॥ अरं बुन्दति । 'उबुन्दिर्' (भ्वा० प० से०) मूलविभुजादिः (वा० ३।२।५) । पृषोदरादिः (६।३।१०९) । **'अर्बुदो** मांसकीलेऽस्त्री पुरुषे दशकोटिषु । महीधरविशेषे ना' (इति मेदिनी) ॥*॥ **'अर्दनिः'** इति पठित्वा 'अग्निः' इति व्याख्यत् मुकुटः । तत्र 'अर्द गतौ' (भ्वा० प० से०) । अनिप्रत्ययः ॥ (१) ॥*॥ स्कुन्दते । 'स्कुदि आप्रवणे' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) । पृषोदरादिः (६।३।१०९) । **'कुन्दो** माध्येऽस्त्री, मुकुन्दभ्रमिनिध्यन्तरेषु ना' (इति मेदिनी) ॥ (१) ॥*॥ स्फायते । 'स्फायी वृद्धौ' (भ्वा० आ० से०) । 'फेनमीनौ' (उ० ३।३) इति साधुः ॥ (१) ॥*॥ स्तूयते । 'ष्टुञ् स्तुतौ' (अ० उ० अ०) । 'स्तुवो दीर्घश्च' (उ० ३।२५) इति पः । स्तूप्यते वा । 'ष्टुप समुच्छ्राये' (चु० प० से०) । घञ् ॥—घृतादिकृतकूटः—इति मुकुटः ॥ (१) ॥*॥ पुनाति, पूयते वा । बाहुलकात्पक् ॥*॥ स्वामी तु **'यूप'** शब्दं पठति । यौति, यूयते वा । 'यु मिश्रणे च' (अ० प० से०) 'कुयुभ्यां च' (उ० ३।२७) इति दीर्घः किच्च । स्वार्थे कन् (ज्ञा० ५।४।५) ॥

आतपः क्षत्रिये नाभिः कणपक्षुरकेदराः ।
पूरक्षुरप्रचुक्काश्च गोलहिङ्गुलपुद्गलाः ॥ २० ॥

आतपति । 'तप संतापे' (भ्वा० प० अ०) । पचाद्यच् (३।१।१३४) ॥ (१) ॥*॥ कणं पाति पिबति वा । 'आतोऽनुप–' (३।२।३) इति कः । (प्रासविशेषः) ॥*॥ क्वचित्

१—'अर्बुदो मांसपरुषि दशकोटिषु न स्त्रियाम्' । इति बहुत्र पाठ आसीत् ॥ २—धातुपाठादिषु तु ह्रस्वोपध एवोपलभ्यते ॥

'कुणपः' इति पाठः । '**कुणपः** पूतिगन्धौ शवेऽपि च' (इति मेदिनी) ॥ (१) ॥*॥ क्षुरति । 'क्षुर विलेखने' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । '**क्षुरः** स्याच्छेदनद्रव्ये कोकिलाक्षे च गोक्षुरे' (इति मेदिनी) ॥ (१) ॥*॥ के दृणाति । 'दृ विदारणे' (क्रया० प० से०) । पचाद्यच् (३।१।१३४) । यद्वा के दीर्यते । 'ऋदोरप्' (३।३।५७) । केकरः । संव्यवहारपदार्थश्च । 'तरुभेदः' इत्यन्ये ॥ (१) ॥*॥ पूरयति । 'पूर पूरणे' (चु० उ० से०) । पचाद्यच् (३।१।१३४) 'पूरो जलप्रवाहे स्याद्व्रणसंशुद्धिखाद्ययोः' (इति मेदिनी) ॥ (१) ॥*॥ क्षुरं प्राति । क्षुर इव प्राति वा । 'प्रा पूर्तौ' (अ० प० अ०) 'आतोऽनुप–' (३।२।३) इति 'सुपि' (३।२।४) इति योगविभागाद्वा कः । मुकुटस्तु '**खुरप्रः**' इति कवर्गद्वितीयादि पठति । बाणभेदः ॥ (१) ॥*॥ चक्यतेऽनेन । 'चक तृप्तौ प्रतिघाते च' (भ्वा० प० से०) । 'चकिचम्योरुच्चोपधायाः' (उ० २।१४) इति रक् । '**चुक्रं** वृक्षाम्ले, चाङ्गेर्यां स्त्री, पुंस्यम्लेऽम्लवेतसे' (इति मेदिनी) ॥ (१) ॥*॥ गुज्यते । 'गुड रक्षायाम्' (तु० प० से०) । घञ् (३।३।१९)। रलयोरेकत्वम् । '**गोला** गोदावरीसह्ययोः कुनटीदुर्गयोः स्त्रियाम् । पत्राञ्जने मण्डले चालिञ्जरे बालखेलने । द्वयोर्लक्ष्म्यां, पुमान् कम्पे कम्पयुक्तेऽभिधेयवत्' (इति मेदिनी) ॥ (१)॥*॥ हिङ्कुलाति 'आतोऽनुप–'(३।२।३)इति कः । '**हिङ्कुलो** वर्णकद्रव्ये ना भण्टाक्यां तु **हिङ्कुली**' (इति मेदिनी) ॥*॥ (हिङ्कुल इति) उदन्तपाठे तु मितद्वादिखात् (वा० ३।२।१८०) ङः । 'मुकुटस्तु **हिङ्कुलु** स्यात्तु हिङ्कुलम्' इति पठति ॥ (१) ॥*॥ 'पुत्' इति कुत्सायामव्ययम् । पुद्गिलति गीर्यते वा । 'गृ निगरणे' (तु० प० से०) पचाद्यच् (३।१।१३४) । 'ऋदोरप्' (३।३।५७) वा । 'अचि विभाषा' (८।२।२१) इति वा लः । पुत् गलति वा । 'गल अदने' (भ्वा० प० से०) 'स्रावे' (चु० आ० से०) वा । अच् (३।१।१३४) । '**पुद्गलः** सुन्दराकारे त्रिषु पुंस्यात्मदेहयोः' (इति मेदिनी) ॥

१—यथा 'दशाननक्षिप्तखुरप्रखण्डितः कचिद्गतार्धो हिमदीधितिर्यथा' इति हरविलासः—इति च लिखति ॥ २—'चलः कम्पे **चला** श्रियि' इति विश्वसंवादात्, मेदिनीपुस्तकेऽपि '**चला** लक्ष्म्यां पुमान् कम्पे' इति पाठस्यैवोपलभ्यमानत्वाच्च हैमविश्वयोरपि गोलशब्दस्य कम्पाद्यर्थकताया अनुपलम्भेनात्र 'द्वयोः' इति पाठकल्पनं स्वोत्प्रेक्षितत्वेन हेयमेव । तस्मात् '**गोलः** स्यात्सर्ववर्तुले'—इति हैम एव प्रकृतोपयोगी ॥ ३—'वैश्यवर्गे स्त्रीवलिङ्गमुदन्तमदन्तं च पठ्यते' इत्यादिकम् । हेमचन्द्रोऽपि स्वोपज्ञनाममालाव्याख्यायाम्—वाचस्पतिस्तु 'हिङ्कुलस्त्वस्त्रियाम्' इति स्त्रीत्वेऽप्याह—इत्यभिहितवान् ॥

वेतालमल्लभल्लाश्च पुरोडाशोऽपि पट्टिशः ।
कुल्माषो रभसश्चैव सकटाहः पतद्ग्रहः ॥ २१ ॥

वो वायुरितो गतो यस्मात् स वेतः । वेतमलति । 'अल भूषणादौ' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) यद्वा वे वायौ तालः प्रतिष्ठा यस्य । भूताविष्टः शवः ॥ (१) ॥*॥ मल्लते । 'मल्ल धारणे' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) । मल्यते । घञ् (३।३।१९) '**मल्लः** । पात्रे कपोले च मत्स्यभेदे बलीयसि' (इति मेदिनी) ॥ (१) ॥*॥ भल्लते, भल्यते, वा । 'भल्ल परिभाषणहिंसादानेषु' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३३) । घञ् (३।३।१९) वा । '**भल्लः** स्यात्पुंसि भल्लके शस्त्रभेदे पुनर्द्वयोः । भल्लातक्यां स्त्रियां **भल्ली**' (इति मेदिनी) ॥ (१) ॥*॥ पुरः प्रथमं दाशन्त्येनम् । 'दाशृ दाने' (भ्वा० उ० से०) । कर्मणि घञ् (३।३।१९) । पृषोदरादिखात् (६।३।१०९) । 'व्रीहेश्च पुरोडाशे' (४।३।१४८) इति निर्देशाद्वा दस्य डः । '**पुरोडाशो** हविर्भेदे चरुस्यां पिष्टकस्य च । रसे सोमलतायाश्च हुतशेषे च कीर्तितः' इति विश्वः ॥ (१) ॥*॥ '**पट्टीः** स्त्री पट्टभेदे स्याल्ललाटे कुम्भिकाद्रुमे' (इति मेदिनी) । पट्टिं श्यति । 'शो तनूकरणे' (दि० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥*॥ ('**पट्टिसः**' इति) दन्त्यसान्त इति मुकुटः । अत्र 'षोऽन्तकर्मणि' (दि० प० अ०) धातुर्बोध्यः । शस्त्रभेदः ॥ (१) ॥*॥ कोलनम् । 'कुल संस्त्याने बन्धुषु च' (भ्वा० प० से०) । संपदादिक्विप् (वा० ३।३।१०८) । कुलं मषति । 'मष हिंसायाम्' (भ्वा० प० से०) । 'कर्मण्यण्' (३।२।१) । '**कुल्माषो** यावके प्रोक्तः कुल्माषं काञ्जिकेऽपि च' इति (मूर्धन्यान्ते) विश्वः । '**कुल्माषं** काञ्जिके यावके पुमान्' (इति मूर्धन्यान्ते मेदिनी) ॥*॥—धातुपाराय्णे ('**कुल्मासः**' इति) दन्त्यान्तः । तत्र मसेः (दैवादिकात्) घञ् (३।३।१९) । कुल्मासो माषादिमिश्रमर्धस्विन्नमोदनं 'खिचुडम्' इति ख्यातम्—इति मुकुटः ॥ (१) ॥*॥ रभणम् । रभते अनेन वा । 'रभ राभस्ये' (भ्वा० आ० अ०) । 'अल्यविचमितमि–' (उ० ३।११७) इत्यसच् । '**रभसो** वेगहर्षयोः' इति विश्वः ॥ (१) ॥*॥ कटेनातिशयेनाहन्ते गम्यते । 'हन हिंसागत्योः' (अ०प०अ०) 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । '**कटाहो** घृततैलादिपाकपात्रेऽपि कर्परे । स्तूपे **कटाहः** कूर्मपृष्ठे च महिषीशिशौ' इति विश्वः । '**कटाहः** कूर्मकर्परे । द्वीपस्य च प्रभेदे च तथा स्यान्महिषीशिशौ । तैलादिपाकपात्रे च' ॥ (१) ॥*॥ गृह्णाति । 'ग्रह उपादाने' (क्रया० प० से०) । पचाद्यच् (३।१।१३४) । पततस्ताम्बूलादेर्ग्रहः । '**पीकदान**' इति ख्यातः ॥ (१) ॥*॥

इति पुंलिङ्गसंग्रहः ॥

१—'असितोमरकुन्तमहापट्टिस–' इति भट्टिभाषासमावेशात्—इति च ॥

द्विहीनेऽन्यच्च खारण्यपर्णश्वभ्रहिमोदकम् ।
शीतोष्णमांसरुधिरमुखाक्षिद्रविणं बलम् ॥ २२ ॥

द्वाभ्यां हीने क्लीबे । अधिकारोऽयम् । अन्यदवशिष्टम् । उक्तात्संग्रहाच्छेषः क्लीबे स्यात्, बाधकविषयादन्यः । तत्र कांश्चिद्दर्शयति—खमिति । खनति, खन्यते वा । 'खनु अवदारणे' (भ्वा० प० से०) । 'अन्येभ्योऽपि–' (वा० ३।२।१०१) इति डः । 'खमिन्द्रिये पुरे क्षेत्रे शून्ये विन्दौ विहायसि । संवेदने देवलोके शर्मण्यपि नपुंसकम्' (इति मेदिनी) ॥ (१) ॥*॥ अर्यते । 'ऋ गतौ' (भ्वा० प० अ०) । 'अर्तेर्निच्च' (उ० ३।१०२) इत्यन्यः ॥ (१) ॥*॥ पर्णयति । 'पर्ण हरितभावे' (चु०) । पचाद्यच् (३।१।१३४) । 'पर्ण पत्रे पलाशे ना' ॥ (१) ॥*॥ श्वभ्रयति । 'श्वभ्र विलेपे गतौ तङ्के' (?) । पचाद्यच् (३।१।१३४) ॥ (१) ॥*॥ हन्ति । 'हन्तेर्हिं च' (उ० १।१४७) इति मन् । **'हिमं** तुषारमलयोर्द्वयोः स्यान्नपुंसकम् । शीतले वाच्यलिङ्गः' (इति मेदिनी) ॥ (१) ॥*॥ उनत्ति । 'उन्दी क्लेदने' (रु० प० से०) । कुन् (उ० २।३२) । नलोपः (६।४।२४) ॥ (१) ॥*॥ इयायते स्म । 'इयैङ् गतौ' (भ्वा० आ० अ०) । 'गत्यर्था–' (३।४।८७) । 'द्रवमूर्तिस्पर्शयोः श्यः' (६।१।३३) इति संप्रसारणम् । **'शीतं** हिमगुणे क्लीबं शीतलालसयोस्त्रिषु । वानीरे बहुवारे ना' (इति मेदिनी) ॥ (१) ॥*॥ ओषति । 'उष दाहे' (भ्वा० प० से०) । 'इण्सिञ् जिदीङुष्यविभ्यो नक्' (उ० ३।२) । **'उष्णो** ग्रीष्मे पुमान्दक्षाशीतयोरन्यलिङ्गकः' (इति मेदिनी) ॥ (१) ॥*॥ मन्यते । 'मन ज्ञाने' (दि० आ० अ०) । 'मनेर्दीर्घश्च' (तु० ३।६४) इति सः । **'मांसं** स्यादामिषे क्लीबं कक्कोलीजटयोः स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ रुणद्धि, रुध्यते वा । 'रुधिर् आवरणे' (रु० उ० अ०) । 'इषिमदिमुदि–' (उ० १।५१) इति किरच् । **'रुधिरो**ऽङ्गारके पुंसि क्लीबं तु कुङ्कुमासृजोः' (इति मेदिनी) ॥ (१) ॥*॥ खन्यते, खनति, वा । 'डित्खनेर्मुट् चोदात्तः' (उ० ५।२०) इत्यजौ । **'मुखं** निःकरणे वक्त्रे प्रारम्भोपाययोरपि । संध्यन्तरे नाटकादेः शब्देऽपि च नपुंसकम्' (इति मेदिनी) ॥ (२) ॥*॥ अश्नुते । 'अशूङ् व्याप्तौ, संघाते च' (खा० आ० से०) । 'अशेर्निच्' (उ० ३।१५६) इति क्विः ॥ (१) ॥*॥ 'द्रुदक्षिभ्यामिनन्' (उ० २।५०) **'द्रविणं** न द्वयोर्वृत्ते (वित्ते) काञ्चने च पराक्रमे' इति (मेदिनी) ॥ (१) ॥*॥ वलते । 'वल संवरणे' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) **'बलं** गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः । पुमान् हलायुधे दैत्यप्रभेदे वायसेऽपि च । बलयुक्तेऽन्यलिङ्गः स्याद्बाल्यालके तु योषिति' (इति मेदिनी) ॥ (१) ॥*॥

फलहेमशुल्बलोहं सुखदुःखशुभाशुभम् ।
जलपुष्पाणि लवणं व्यञ्जनान्यनुलेपनम् ॥ २३ ॥

फलति । 'फल निष्पत्तौ' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । **'फलं** हेतुकृते जातीफले फलकसस्ययोः । त्रिफलायां च कक्कोले शस्त्राग्रे व्युष्टिलाभयोः' (इति हैमः) ॥*॥ क्वचित्तु **'हलम्'** इति पाठः । हलति । 'हल विलेखने' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) ॥ (१) ॥ हिनोति । 'हीगतौ' (भ्वा० प० अ०) । 'सर्वधातुभ्यो मनिन्' (उ० ४।१४५) ॥ (१) ॥*॥ शलति, शल्यते वा । 'शल गतौ' (भ्वा० प० से०) । 'उल्वादयश्च' (उ० ४।९५) इति साधुः । **'शुल्वं** ताम्रे यज्ञकर्मण्याधारे जलसंनिधौ' (इति मेदिनी) ॥ (१) ॥*॥ लोहयति, लुह्यते वा । 'लुह गार्ध्ये' ( ) पचाद्यच् (३।१।१३४) । घञ् (३।३।१९) वा । 'लोहोऽस्त्री शस्त्रके लौहे जोङ्गके सर्वतैजसे' (इति मेदिनी) ॥ (१) ॥*॥ सुखयति । दुःखयति 'सुखदुःखतत्किययाम्' (चु० उ० से०) । पचाद्यच् (३।१।१३४) ॥ (१) ॥*॥ शोभते । 'शुभ दीप्तौ' (भ्वा० आ० से०) । 'इगुपध–' (३।१।१३५) इति कः ॥ (१) ॥*॥ न शुभम् ॥ १ ॥*॥ जलभवानि पुष्पाणि कुमुदकमलकल्हारोत्पलानि ॥ (१) ॥*॥ लुनाति । 'लूञ् छेदने' (क्या० प० से०) । नन्द्यादिल्युः (३।१।१३४) । 'लवणाल्लुक्' (४।४।२४) इति निर्देशाण्णत्वम् । **'लवणं** सैन्धवादौ ना सिन्धुरक्षोभिदो रसे । तद्युक्ते वाच्यलिङ्गः स्यान्नदीभेदद्विषोः स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ व्यज्यतेऽनेन **'अञ्जू** व्यक्त्यादौ' (रु० प० से०) । 'करणाधि–' (३।३।११७) इति ल्युट् । **'व्यञ्जनं** तेमने चिह्ने श्मश्रुण्यवयवेऽहनि' (मेदिनी) ॥ (१) ॥*॥ अनुलिप्यते अनेन वा । 'लिप उपदेहे' (तु० प० अ०) कर्मणि (३।३।११३) करणे (३।३।११७) वा ल्युट् ॥ (१) ॥*॥ (दुः)खादि सपर्यायं सविशेषं च क्लीबे भवति, इति मुकुटः ॥

कोट्याः शतादिः संख्यान्या वा लक्षा नियुतं च तत् ।
द्यच्कमसिसुसन्नन्तं यदनान्तमकर्तरि ॥ २४ ॥

कोटेर्भिन्ना शतादिका संख्या क्लीबे । शतम् । सहस्रम् । अयुतम् । अर्बुदम् । लक्ष्यते । 'लक्ष दर्शने' (चु० आ० से०) । 'गुरोश्च–' (३।३।१०३) इत्यः । **'लक्षा** न पुंसि संख्यायां क्लीबे व्याजशरव्ययोः' (इति मेदिनी) ॥ (१) ॥*॥ नियूयते स्म । क्तः (३।२।१०२) ॥ (२) ॥*॥ **'शतं सहस्रमयुतं नियुतं** प्रयुतं मतम् । स्त्री **कोटिरर्बुदमिति** क्रमाद्दशगुणोत्तरम्' इति रत्नकोषः ॥*॥ असन्तमिसन्तमुसन्तमन्नन्तं यद्व्यच्कं तत्क्लीबे । यशः, पयः, तेजः । **'तमो** ध्वान्ते गुणे शोके क्लीबं वा ना विधुंतुदे' (इति मेदिनी) । सर्पिः, हविः,

१—मुकुटस्तु पर्यायपरत्वेन व्याचष्टे । क्षीरस्वाम्यपि—खादिसपर्यायविशेषं तृतीये—इत्येव व्याचष्टे ॥ २—अस्यान्तस्यादित्वात् 'बल प्राणने' इत्यस्योपन्यासो योग्यः ॥

१—'तत् लक्षं नियुतशब्दवाच्यमपि' इति मुकुटः ।

शोचिः । वपुः, यजुः, धनुः । चर्म, वर्म । कर्तृवर्जितेऽर्थे यदनान्तं नाम तत् क्लीबे स्यात् । गमनम्, रमणं दानम् । अकर्तरीति किम् । नन्दनः, रमणः ॥

त्रान्तं सलोपधं शिष्टं, रात्रं प्राक्संख्ययान्वितम् ।
पात्राद्यदन्तैरेकार्थो द्विगुर्लक्ष्यानुसारतः ॥ २५ ॥

त्रशब्दान्तं सकारलकारोपधं च क्लीबं स्यात् । दात्रम्, पात्रम्, वस्त्रम्, विसम्, वुसम्, अन्धतमसम् । कूलम्, मूलम्, शूलम्, तूलम् । शिष्टमवशिष्टम् । 'अबाधितम्' इति यावत् । शिष्टं किम् । पुत्रः, वृत्रः, मन्त्रः । हंसः, कंसः । शालः, कालः, ॥*॥ संख्यापूर्वपदं रात्रान्तं क्लीबम् । त्रिरात्रम्, पञ्चरात्रम् । संख्ययेति किम् । अर्धरात्रः, पूर्वरात्रः ॥*॥ पात्रादिभिरदन्तैरेकार्थो द्विगुः क्लीबे स्यात्, शिष्टप्रयोगात् पञ्चपात्रम्, त्रिभुवनम् । एकार्थः किम् । पञ्चकपालः पुरोडाशः । तद्धितार्थे द्विगुरयम् । लक्ष्यानुसारत इति किम् । त्रिपुरी, पञ्चपूली, त्रिवली ॥

द्वन्द्वैकत्वाव्ययीभावौ पथः संख्याव्ययात्परः ।
षष्ठ्याश्छाया बहूनां चेद्विच्छायं संहतौ सभा ॥२६॥

एकत्वे द्वन्द्वो द्वन्द्वैकम्[1] । राजदन्तादिः (२।२।३१) । षष्ठीतत्पुरुषे तु, एकस्य प्राधान्यात्तस्यैव लिङ्गान्वयः स्यात्, न तु द्वन्द्वस्य । एकार्थको द्वन्द्वः समाहारद्वन्द्वः, अव्ययीभावश्च क्लीबे स्यात् । पाणिपादम् । अधिहरि ॥*॥ कृतसमासान्तः 'पथिन्'शब्दः क्लीबे ॥ द्विपथम्, त्रिपथम्, विपथम्, कापथम् । संख्याव्ययात्परः किम् । धर्मपथः कृतसमासान्तः किम् । अतिपन्थाः, सुपन्थाः ॥*॥ षष्ठ्यन्तात्परा तत्पुरुषे छाया । क्लीबे, सा चेद्बहूनां संबन्धिनी स्यात् । वीनां छाया । 'छाया बाहुल्ये' (२।४।२२) इति क्लीबत्वम् । बहूनां किम् । कुड्यच्छाया, कुड्यच्छायम् । 'विभाषा सेना–' (२।४।२५) इति क्लीबत्वम् ॥*॥ समूहे वर्तमानो यः सभाशब्दस्तदन्तस्तत्पुरुषः क्लीबे षष्ठ्यन्तात्परा चेत् ॥ स्त्रीसभम् । स्त्रीसंघातः 'अशाला च' (२।४।२४) इति क्लीबत्वम् । संहतौ किम् । धर्मसभा धर्मशाला ॥

१—'कृत्यल्युटो बहुलम्' (३।३।११३) इत्यनान्तानां त्रिलिङ्गत्वं स्मरन्ति । राजभोजनी क्षैरेयी, राजभोजनः शालिः, राजभोजनं भक्तम्, इत्यादि—क्षीरस्वामी । २—अव्ययीभावशब्दस्य पुंलिङ्गत्वेन द्वन्द्वैकत्वस्य नपुंसकत्वेऽपि द्वन्द्वे परवल्लिङ्गत्वस्यैव जायमानत्वेन प्रयोगानुपपत्त्यभावस्य, लक्ष्येषु 'स नपुंसकम्' (२।४।१७) इति नपुंसकत्वस्यैवेष्टत्वेन लक्ष्यासिद्धेश्चाभावस्य च सत्वेन को दोषः ॥ ३—अत्र नपुंसकत्वफलस्य स्वरभिन्नस्य वक्तुमशक्यत्वेन स्वरभेदस्य त्वयानङ्गीकृतत्वेन चिन्त्यमेतत् । तसात् 'अधिस्त्रि' इत्यादिष्वपि 'गोस्त्रियोः' (१।२।२४) इत्यनेन ह्रस्वस्य सिद्धौ 'अधिगोपम्' इत्यादेव फलं वक्तव्यम् ॥

शालार्थापि परा राजामनुष्यार्थादराजकात् ।
दासीसभं नृपसभं रक्षःसभमिमा दिशः ॥ २७ ॥

शाला गृहमर्थो यस्याः सा सभा राजशब्दवर्जितराजपर्यायात्, अमनुष्यात्–रक्षःपिशाचादिवाचकाच्च षष्ठ्यन्तात्परा तत्पुरुषे क्लीबे स्यात् । अपिना संहत्यर्था सभा गृह्यते । इनसभम्, प्रभुसभम्, पिशाचसभम् । इमा दिश उदाहरणानि । अराजकात् किम् । राजसभा । राजपर्यायग्रहणान्नेह । चन्द्रगुप्तसभा । राजविशेषोऽयं । षष्ठ्यन्तात् किम् । ईश्वरा सभा=ईश्वरसभा । न सभा–असभा । तत्पुरुषे, इति किम् । ईश्वरस्य सभेव सभा यस्य स ईश्वरसभा । 'सप्तम्युपमानपूर्वसोत्तरपदलोपश्च' (वा० २।२।२४) इति बहुव्रीहिः ॥

उपज्ञोपक्रमान्तश्च तदादित्वप्रकाशने ।
कोपज्ञकोपक्रमादि कन्थोशीनरनामसु ॥ २८ ॥

उपज्ञा, उपक्रमश्चान्ते यस्य स तत्पुरुषः क्लीबे स्यात्, उपज्ञोपक्रमयोः प्राथम्ये द्योत्ये । उपज्ञायते । 'आतश्चोपसर्गे' (३।३।१०६) इति कर्मण्यङ् । उपक्रम्यते, इति । कर्मणि घञ् (३।३।११९) । कस्य प्रजापतेः, उपज्ञा, उपक्रमश्च । सृष्टिस्तेनादौ ज्ञाता प्रक्रान्ता च ॥*॥ षष्ठ्यन्तात्परा या कन्था तदन्तस्तत्पुरुषः क्लीबे स्यात्, उशीनरदेशस्थसंज्ञासु चेद्वर्तते । सौशमीनां कन्था सौशमिकन्थम्, बाह्लिककन्थम् । 'उशीनर–' इति किम् । दाक्षिकन्था । बाह्लिकेष्वियं संज्ञा । नामसु किम् । वीरणकन्था । कुत्रापि नेयं संज्ञा ॥

भावे नणकञ्चिङ्ख्योऽन्ये समूहे भावकर्मणोः ।
अदन्तप्रत्ययाः पुण्यसुदिनाभ्यां त्वहः परः ॥ २९ ॥

नश्च णश्च कश्च चितः (च इत्येषां ते) च । एभ्योऽन्येऽदन्तप्रत्ययाः कृतो ये भावे विहिताः, तथा समूहेऽर्थे भावकर्मणोर्विहिता येऽकारान्तप्रत्ययास्तद्धिताः, तदन्तं नाम क्लीबे स्यात् । भूतम्, 'नपुंसके भावे क्तः' (३।३।११४) । भवितव्यम्, भवनीयम्, (भव्यम्) । 'तयोरेव–' (३।४।७०) इति भावे तव्यादयः । 'भुवो भावे' (३।१।१०७) क्यप्, ब्रह्मभूयम् । 'अभिविधौ भाव इनुण्' (३।३।४४) । 'अणिनुणः' (५।४।१५) । सांराविणम्, सांकूटिनं वर्तते । णकेति किम् । 'यजयाच–' (३।३।९०) इति नङ् । यज्ञः, यज्ञः, । 'स्वपो नन्' (३।३।९१) । स्वप्नः । 'नौ ण च' (३।३।६०) न्यादः । 'सुपि' (३।२।४) इति 'घञर्थे–' (वा० ३।३।५८) इति च कः । आखूत्थः, विघ्नः । चित् 'एरच्' (३।३।५६) । चयः जयः । 'ण्यासश्रन्थो युच्' (३।३।१०७) । कारणा । यत्तु —'द्वितोऽथुच्' (३।३।८९) । श्वयथुः—इति मुकुट उदाहरत् । तन्न । अदन्तलाभावात् ॥*॥ समूहे तद्धिताः । 'भिक्षादिभ्योऽण्' (४।२।३८) । भैक्षम् । 'गोत्रोक्षोष्ट्र–' (४।२।३९) इति वुञ् । औपगवकम् । 'तस्य समूहः' (४।२।३७) ।

काकम् । 'केदाराद्यच्च' (४।२।४०) । कैदार्यम्, कैदारकम् ॥*॥ भावे—गोत्वम् । 'इगन्ताच्च–' (५।१।१३१) । मौनम्, मार्दवम् । मनोज्ञादिवुञ् (५।१।१३३) । मानोज्ञकम् । 'स्तेनाद्यन्नलोपश्च' (५।१।१२५) स्तेयम् । 'गुणवचन–' (५।१।१२४) इति ष्यञ् । शौक्ल्यम् ॥*॥ कृतसमासान्तोऽहश-ब्दः क्लीबे स्यात् । पुण्यं च तदहश्च । 'राजाहःसखिभ्यष्टच्' (५।४।९१) । सुदिनशब्दः प्रशस्तवाची । सुदिनं च तदहश्च । पुण्याहम्, सुदिनाहम् । कृतसमासान्त इति किम् । पुण्यानि अहानि यस्मिन् स पुण्याहा मासः ॥

क्रियाव्ययानां भेदकान्येकत्वेऽप्युक्थतोटके ।
चोचं पिच्छं गृहस्थूलं तिरीटं मर्मयोजने ॥ ३० ॥

अपिशब्दात् क्लीबे । मृदु पचति । प्रातः कमनीयम् ॥*॥ उच्यते । 'वच भाषणे' (अ० प० अ०) । 'पातृतुदि–' (उ० २।७) इति थक् ।–'वसिकाशि–' इत्यादिना थक्—इति मुकुटश्चिन्त्यः । तादृशसूत्राभावात् । उक्थं सामविशेषः ॥*॥ तुटति । 'तुट कलहकर्मणि' (तु० प० से०) । ण्वुल् (३।१।१३३) । यत्तु 'कृत्यादिभ्यो वुन्' (उ० ५।३५) इति मुकुटे-नोक्तम् । तन्न । तुटः कुटादित्वेन 'गाङ्कुटादिभ्यः' (१।२।१) इति ङित्त्वाद्गुणाभावप्रसङ्गात् ॥*॥ चोप्यते 'चुप मन्दा-यां गतौ' (भ्वा० प० से०) ण्यन्तः । घञ् (३।३।१९) यद्वा चञ्चति, चञ्च्यते वा । 'चञ्चु गतौ' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । घञ् (३।३।१९) वा । पृषोदरादिः (६।३।१०९) 'फलावशिष्टं तालफलं च **चोचं** कदल्याः फलं भवेत्' इत्यार्षकोषः ॥*॥ पिच्छयते । 'पिच्छ खण्डने' (चु० प० से०) । घञ् (३।३।१९) । **'पिच्छा** पूगच्छटा-कोषमोचाशाल्मलिवेष्टके । भक्तसंभूतमण्डे च पङ्क्तावश्वपदा-मये । स्त्रियां, पुंसि तु लाङ्गूले न द्वयोर्बर्हचूडयोः' (इति मे-दिनी) ॥*॥ **'मुक्तम्'** इति पाठे 'मुच्लृ मोक्षणे' (तु० उ० अ०) । मुच्यते स्म । क्तः (३।२।१०२) ॥ (१) ॥*॥ गृह-स्य स्थूणां ॥ (१) ॥*॥ तरति, तीर्यते वा । 'कृतृकृषिभ्यः कीटन्' (उ० ४।१८५) । तिरीटं वेष्टनम् । 'शिरोभूषणम्' इत्यन्ये ॥ (१) ॥*॥ म्रियतेऽनेन 'मृङ् प्राणत्यागे' (तु० आ० अ०) । 'सर्वधातुभ्यो मनिन्' (उ० ४।१४५) 'अन्न-न्तत्वादेव सिद्धे पुनर्मर्मग्रहणमन्नन्तस्य क्लीबत्वानित्यत्वज्ञापना-र्थम्' इति मुकुटः ॥ (१) ॥*॥ युज्यते । 'युजिर् योगे' (रु० उ० अ०) । कर्मणि 'कृत्यल्युटो–' (३।३।११३) इति ल्युट् । **'योजनं** परमात्मनि । चतुष्कोश्यां च योगे च' (इति मेदिनी) ॥ (१) ॥*॥

राजसूयं वाजपेयं गद्यपद्ये कृतौ कवेः ।
माणिक्यभाष्यसिन्दूरचीरचीवरपञ्जरम् ॥ ३१ ॥

राज्ञा सोतव्योऽभिषेकद्वारा निष्पादयितव्यः । यद्वा राजा लतात्मकः सोमः सूयतेऽत्र । 'षुञ् अभिषवे' (स्वा० उ० अ०) 'राजसूयसूर्य–' (३।१।११४) इति साधुः ॥ (१) ॥*॥ वाजमन्नं पैष्टी सुरा । पेयमत्र ॥*॥ एतावर्थौ वादी (२।४।३१) ॥ (१) ॥*॥ गद्यते । 'गद व्यक्तायां वाचि' (भ्वा० प० से०) । 'गदमद–' (३।१।१००) इति साधु ॥ (१) ॥*॥ पादाः सन्त्यस्य । 'अन्येभ्योऽपि–' (वा० ५।२।१२०) इति यप् । 'पद्दन्नो–' (६।१।६३) इति पद् । पदः सन्त्यस्येति वा । **'पद्यं** श्लोके पुमाञ्शूद्रे **पद्या** वर्त्मनि कीर्तिता' (इति मेदिनी) । कवेः कृतौ किम् । गद्या वार्ता । पद्यः पङ्कः, पद्यं रजः ॥ (१) ॥*॥ मणिशब्देन कायति जनो यम् । 'कै शब्दे' (भ्वा० प० से०) । 'अन्येभ्योऽपि'–(वा० ३।२।१०१) इति डः । 'मूलविभुजा–' (वा० ३।२।५) इति को वा । मणिके मणिपूराख्ये नगरे भवम् । 'शण्डिका-दिभ्यो ञ्यः' (४।३।९२) । चतुर्वर्णादिष्यञ् (वा० ५।१।१२४) वा ॥ (१) ॥*॥ भाष्यते सूत्रार्थो येन । 'भाष व्य-क्तायां वाचि' (भ्वा० आ० से०) 'कृत्यल्युटो–' (३।३।११३) इति करणे ण्यत् । 'सूत्रार्थो वर्ण्यते यत्र वाक्यैः सू-त्रानुकारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो वि-दुः' ॥ (१) ॥*॥ स्यन्दते । 'स्यन्दू प्रस्रवणे' (भ्वा० आ० से०) । 'स्यन्देः संप्रसारणं च' (उ० १।६८) इत्यूरन् । **'सिन्दूरस्तुरुमेदे** स्यात्सिन्दूरं रक्तवर्णके । **सिन्दूरी** रोच-नीरक्तवेल्लिकाधातकीषु च' (इति मेदिनी) ॥ (१) ॥*॥ चीयते । 'चिञ् चयने' (स्वा० उ० अ०) 'शुसिचिमीनां दी-र्घश्च' (उ० २।२५) इति रक् । **'चीरी** क्षिप्तायां नपुंसकम् । गोस्तने वस्त्रभेदे च रेखालिखनभेदयोः' (इति मेदिनी) ॥ (१) ॥*॥ चीयते । 'छित्वरच्छत्वर–' (उ० ३।१) इति सा-धु । चीवरं मुनिवासः । 'शाक्यभिक्षुप्रावरणम्' इति सुभू-तिः ॥ (१) ॥*॥ पिञ्जयते । 'पिञ्जि संपर्के' (अ० आ० से०) । बाहुलकादरः । पृषोदरादिः (६।३।१०९) ॥*॥ क्व-चित्तु 'पिञ्जरम्' इति पाठः । **'पिञ्जरोऽश्वान्तरे** क्लीबं स्व-र्णे, पीते च वाच्यवत्' (इति मेदिनी) । कायास्थिबन्धनं पक्ष्या-दिबन्धनगृहं च ॥ (१) ॥*॥

लोकायतं हरितालं विदलं स्थालबाह्लवम् ।

लोके आयतन्ते । 'यती प्रयत्ने' (भ्वा० आ० से०) । पचाद्यच् (३।१।१३४) । चार्वाकाः । तेषामिदं शास्त्रम् । 'तस्येदम्' (४।३।१२०) इत्यण् । संज्ञापूर्वकत्वान्न वृद्धिः ॥ (१) ॥*॥ हरितेनालति । 'अल भूषणादौ' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । **'हरितालं** धातुभेदे स्त्री दूर्वाकाशरेखयोः' (इति मेदिनी) ॥ (१) ॥*॥ विदलं वंश-कृतपात्रभेदः । विदलति 'दल विदारणे' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) ॥ (१) ॥*॥ स्थलत्यत्र । 'ष्ठल स्थितौ' (भ्वा० प० से०) । 'हलश्च' (३।३।१२०) इति घ-

१ 'यावन्मध्यं बहुधापाञ्जरन्नावगाहते' इति दमयन्तीश्लेषादकारवान् ॥

ञ् । णिजन्तादच् (३।१।१३४) वा । **'स्थालं** भाजनभेदेऽपि **स्थाली** स्यात्पाटलीखयोः' (इति मेदिनी) ॥ (१) ॥*॥ बह्वदेशे भवम् । 'तत्र भवः' (४।३।५३) इत्यण् ॥ (१) ॥*॥

॥ इति क्लीबसंग्रहः ॥

पुंनपुंसकयोः शेषोऽर्धर्चपिण्याककण्टकाः ॥ ३२ ॥

'पुंनपुंकसयोः' इत्यधिकारः । शेष उक्तादन्यः, ऋचोऽर्धम् । 'अर्धं नपुंसकम्' (२।२।२) इति समासः । 'ऋक्पूर्-' (५।४।७४) इत्यः समासान्तः ॥ (१) ॥*॥ पण्यते । 'पण व्यवहारे' (भ्वा० आ० से०) । 'पिनाकादयश्च' (उ० ४।१५) इति साधुः । **'पिण्याकोऽस्त्री** तिलकल्के हिङ्गुबाह्लीकसिह्लके' (इति मेदिनी) ॥ (१) ॥*॥ कण्टति । 'कटि गतौ' (भ्वा० प० से०) । ण्वुल् (३।१।१३३) । **'कण्टकः** क्षुद्रशत्रौ च कर्मस्थानकदोषयोः । रोमाञ्चे च द्रुमाङ्गे च **कण्टको** मस्करेऽपि च' इति विश्वः । **'कण्टको** न स्त्रियां क्षुद्रशत्रौ मत्स्यादिकीकसे । नैयोगिकादिदोषोक्तौ स्याद्रोमाञ्चद्रुमाङ्गयोः' (इति मेदिनी) ॥ (१) ॥*॥

मोदकस्तण्डैकषष्ठङ्कः शाटकः खर्वटोऽर्बुदः ।
पातकोद्योगचरकतमालामलका नडः ॥ ३३ ॥

मोदयते । 'मुद हर्षे' (भ्वा० आ० से०) । ण्वुल् (३।१।१३३) । **'मोदकः** खाद्यभेदेऽस्त्री हर्षके पुनरन्यवत्' (इति मेदिनी) ॥ (१) ॥*॥ तण्डते । 'तडि आघाते' (भ्वा० आ० से०) । ण्वुल् (३।१।१३३) । **'तण्डकः** खञ्जने फेने समासप्रायवाचि च । गृहदारुतरुस्कन्धमायाबहुलकेष्वपि' (इति मेदिनी) ॥*॥ **'दण्डकः'** इत्यपि । दण्ड एव । स्वार्थे कन् (५।४।५) ॥ (१) ॥*॥ टङ्कयति । 'टकि बन्धे' चुरादिः । अच् (३।१।३४) । **'टङ्को** नीलकपित्थे च खनित्रे टङ्कनेऽस्त्रियाम् । जङ्घायां स्त्री पुमान् कोपे कोषासिप्रावदारणे' (इति मेदिनी) ॥ (१) ॥*॥ शटति 'शट गतौ' (भ्वा० प० से०) । ण्वुल् (३।१।१३३) ॥ (१) ॥*॥ खर्वति । 'खर्व दर्पे' (भ्वा० प० से०) । 'शकादिभ्योऽटन्' (उ० ४।८१) । 'यत्रैकतो भवेद्ग्रामो नगरं चैकतः स्मृतम् । मिश्रं तु खर्वटं नाम नदीगिरिसमाश्रयम्' ॥ (१) ॥*॥ अर्वति । 'अर्व हिंसायाम्' (भ्वा० प० से०) । बाहुलकादुदच् । **'अर्बुदो** मांसकीलेऽस्त्री पुरुषे दशकोटिषु । महीधरविशेषे ना' (इति मेदिनी) ॥ (१) ॥*॥ पातयति 'पत्लृ गतौ' (भ्वा० प० से०) ण्यन्तः । ण्वुल् (३।१।१३३) ॥ (१) ॥*॥ उद्योजनम् 'युजिर् योगे' (रु० उ० अ०) । घञ् (३।३।१९) ॥ (१) ॥*॥ चरति । 'चर गतौ' (भ्वा० प० से०) । कुन् । (उ० २।३२) । चरकं वैद्यकशास्त्रभेदः ॥*॥ **'वरकम्'** इति पाठे स्यूतवस्त्रम् ॥ (१) ॥*॥ ताम्यति । 'तमु ग्लानौ' (दि० प० से०) । 'तमिविशि-' (उ० १।११८) इति कालन् । **'तमाल**स्तिलके खड्गे तापिच्छे वरणद्रुमे' (इति मेदिनी) ॥ (१) ॥*॥ आमलक्याः फलम् । 'नित्यं वृद्ध-' (४।३।१४४) इति मयट् । तस्य 'फले लुक्' (४।३।१६३) ॥ (१) ॥*॥ नडति । 'नड भ्रंशे' 'चुरादीनां वा णिच्' इति पक्षाश्रये पचाद्यच् (३।१।१३४) । नडोऽन्तरविवरं तृणभेदश्च ॥

कुष्ठं मुण्डं शीधु वुस्तं क्ष्वेडितं क्षेमकुट्टिमम् ।
संगमं शतमानार्मशम्बलाव्ययताण्डवम् ॥ ३४ ॥

कुष्णाति । 'कुष निष्कर्षे' (क्या० प० से०) । 'हनिकुषि-' (उ० २।२) इति क्थन् । **'कुष्ठं** रोगे पुष्करेऽस्त्री' (इति मेदिनी) ॥ (१) ॥*॥ मुण्ड्यते 'मुडि खण्डने' (भ्वा० आ० से०) । घञ् (३।३।१९) । मुण्डं शिरः ॥ (१) ॥*॥ शेतेऽनेन । 'शिडो धुग्लक्-' (४।३८) इति धुक् ॥ (१) ॥*॥ 'बुस उत्सर्गे' (दि० प० से०) । बुस्यते स्म । क्तः (३।२।१०२) । बुस्तं मांसशष्कुली, भृष्टमांसम् पनसादिफलासारभागश्च ॥*॥ क्वचित् **'पुस्तम्'** इति पाठः ॥*॥ क्वचित् **'वुस्तम्'** इति पाठः ॥ (१) ॥*॥ क्ष्वेडनम् । क्ष्वेड्यते वा । 'ञिक्ष्वेडा स्नेहनमोक्षणयोः' (दि० प० से०) । 'क्षीतः क्तः' (३।२।१९७) ॥ (१) ॥*॥ क्षियति, क्षयति वा । 'क्षि निवासगत्योः' (तु० प० अ०) । 'क्षि क्षये' (भ्वा० प० अ०) । 'अर्तिस्तुसु-' (उ० १।१४१) इति मन् । 'जानीयान्मङ्गलं **क्षेमं क्षेमं** लब्धार्थरक्षणम्' ॥ (१) ॥*॥ कुट्टनम् । 'कुट्ट छेदने' (चु० प० से०) । घञ् (३।३।१८) कुट्टेन निर्वृत्तम् । 'भावप्रत्ययान्तादिमप्' (वा० ४।४।२०) । **'कुट्टिमोऽस्त्री** निबद्धा भूः' ॥ (१) ॥*॥ संगमनम् । 'ग्रहवृहृ-' (३।३।५८) इत्यप् ॥ (१) ॥*॥ शतं मानमस्य । रूप्यपलम् ॥ (१) ॥*॥ ऋच्छति । 'ऋ गतौ' (भ्वा० प० से०) । 'अर्तिस्तुसु-' (उ० १।१४१) इति मन् । अर्ममक्षिरोगः ॥ (१) ॥*॥ शम्बत्यनेन । 'शम्ब गतौ' (चु० प० से०) । बाहुलकादलच् । शम्बलं पाथेयम् ॥*॥ **('सम्बल'** इति) दन्त्यादिपाठे 'षम्ब सर्पणे' (चु० प० से०) । इति बोध्यः ॥ (१) ॥*॥ न व्येति । 'इण् गतौ' (अ० प० अ०) 'एरच्' (३।३।५६) । **'अव्ययोऽस्त्री** शब्दभेदे ना विष्णौ निर्व्यये त्रिषु' (इति मेदिनी) ॥ (१) ॥*॥ तण्डुना प्रोक्तम् । 'तेन प्रोक्तम्' (४।३।१०१) इत्यण् ॥ (१) ॥*॥

१—'तङ्कः' इत्येके । तङ्को भयम्-इति पीयूषव्याख्या ॥

१—दुर्गोक्तलिङ्गानुशासने त्रयं पठ्यते—'पुस्तं वुस्तं वास्तु चुस्तं व्रतं रजतम्' इति—मुकुटः । पुस्तः पवर्गतृतीयादिः । 'वुस्तं दन्तोष्ठ्यादि' इत्येके । 'चुस्तं चवर्गादि' इत्यपरे 'पुस्तं पवर्गादि' इति केचित्—इति पीयूषव्याख्या ॥

कवियं कन्दकर्पासं पारावारं युगंधरम् ।
यूपं प्रग्रीवपात्रीवे यूषं चमसचिक्कसौ ॥ ३५ ॥

कवते । 'कुङ् शब्दे' (भ्वा० प० अ०) । बाहुलकादियः । 'नार्यां **कवी** खलीनं **कवियं** वा ना तुरंगमुखभाण्डम्' इति बोपालितः ॥ (१) ॥*॥ कन्दिति । 'कदि आह्वाने' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । '**कन्दोऽस्त्री** सूरणे सस्यमूले जलधरे पुमान्' (इति मेदिनी) ॥*॥ क्वचित् '**कर्म**' इति पाठः ॥ (१) ॥*॥ करोति । क्रियते वा । 'कृञः पासः' (उ० ५।४५) ॥ (१) ॥*॥ पारयति । 'पार कर्मसमाप्तौ' (चु० प० से०) । पचाद्यच् (३।१।१३४) । यद्वा पार्यते समाप्यते कर्मानेन । 'पुंसि–' (३।३।११८) इति घः ॥ (१) ॥*॥ न वारयति । वृञ् वरणे' (स्वा० उ० से०) । पचाद्यच् (३।१।१३४) ॥ (१) ॥*॥ युगं धारयति । 'धृञ् धारणे' चुरादिः । 'संज्ञायां भृतृ–' (३।२।४६) इति खच् । 'खचि ह्रस्वः' (६।४।९४) 'अरुर्द्विषत्–' (६।३।६७) इति मुम् । कूबरः ॥ (१) ॥*॥ युवन्त्यस्मिन् । 'यु मिश्रणे' (अ० प० अ०) । 'कुयुभ्यां च' (उ० ३।२७) इति पो दीर्घश्च ॥ (१) ॥*॥ प्रगता ग्रीवा यस्मिन् । वातायनम्, मुखशाला वा, द्रुमशीर्षं वा ॥ (१) ॥*॥ पात्रीं वाति । कः (३।२।३) । यज्ञोपकरणपात्रभेदः ॥ (१) ॥*॥ यूषति । 'यूष बन्धे' (भ्वा० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । 'मुद्गामलकयूषस्तु ग्राही पित्तकफे हितः' ॥ (१) ॥*॥ चमन्त्यनेन । 'चमु अदने' (भ्वा० प० से०) । 'अल्यविचमि–' (उ० ३।११७) इत्यसच् । चमसं सोमपानपात्रम् । यस्तु– 'अतिचमिरभियुभ्योऽसः–' इति पाठो मुकुटोपन्यस्तः । स तूज्ज्वलदत्तादिवृत्तिषु नास्ति ॥ (१) ॥*॥ चेतत्यनेन । 'चिती संज्ञाने' (भ्वा० प० से०) । चितेः कादेशो बाहुलकात्कसप्रत्ययः । चिक्कनम् । चिक्कयति वा । 'चिक्क गतौ' (चुरादि अच्) (३।१।१३४) । चिक्कं स्यति । 'षोऽन्तकर्मणि' (दि० प० अ०) । 'आतोऽनुप–' (३।२।३) इति कः ॥ (१) ॥*॥

अर्धर्चादौ घृतादीनां पुंस्त्वाद्यं वैदिकं ध्रुवम् ।
तन्नोक्तमिह लोकेऽपि तच्चेदस्त्यस्तु शेषवत् ॥ ३६ ॥

अर्धर्चादाविति सुगमम् ॥

इति पुंनपुंसकसंग्रहः ॥

स्त्रीपुंसयोरपत्यान्ता, द्विचतुःषट्पदोरगाः ।
जातिभेदाः, पुमाख्याश्च स्त्रीयोगैः सह मल्लकः ॥३७॥

'स्त्रीपुंसयोः' इत्यधिकारः । अपत्यार्थे विहिता येऽणादयस्तदन्ताः सर्वे स्त्रीपुंसयोः स्युः । औपगवः, औपगवी । गार्ग्यः, गार्गी ॥*॥ द्विपदचतुष्पदषट्पदवाचिनः उरगवाचिनश्च जातिविशेषाः स्त्रीपुंसयोः । मानुषः, मानुषी । विप्रः, विप्रा । शूद्रः, शूद्रा । अजादित्वाट्टाप् (४।१।४) । वकः, वकी । हंसः, हंसी । सिंहः, सिंही । भ्रमरः, भ्रमरी । उरगः, उरगी । 'जातेरस्त्रीविषयात्–' (४।१।६३) इति ङीष् । अबाधिता इत्येव । मक्षिका, शिवा, लूता ॥*॥ जातिवाचिनः स्त्रीपुंसयोः स्युः । द्रुणः, द्रुणी । मत्स्यः, मत्स्री । केचित्तु 'षट्पदादिभिरस्यैकवाक्यतां वदन्ति ॥*॥ पुरुषाख्याः स्त्रीयोगैः सह वर्तमानाः स्त्रीपुंसयोः स्युः । ब्राह्मणः, ब्राह्मणी । शूद्री ॥*॥ मल्लते । 'मल्ल धारणे' (भ्वा० आ० से०) । ण्वुल् (३।१।१३३) । '**मल्लिका** तृणशून्येऽपि मीनमृत्पात्रभेदयोः' (इति मेदिनी) ॥ (१) ॥*॥

मुनिर्वैराटकः स्वातिर्वैर्णको झाटलिर्मनुः ।
मूषा सृपाटी कर्कन्धूर्यष्टिः शाटि कटी कुटी ॥ ३८ ॥

मन्यते । 'मन ज्ञाने' (दि० आ० अ०) । 'मनेरुच्च' (उ० ४।१२३) इतीन् । '**मुनिः** पुंसि वसिष्ठादौ वङ्गसेनतरौ जिने' (इति मेदिनी) ॥ (१) ॥*॥ वरमटति, 'अट गतौ' (भ्वा० प० से०) । कुन् (उ० २।३२) ॥ (१) ॥*॥ शोभनमतति । 'अत सातत्यगमने' (भ्वा० प० से०) । 'अज्यतिभ्यां च' (उ० ४।१३१) इतीण् । नक्षत्रभेदः ॥ (१) ॥*॥ वर्णयति । 'वर्ण वर्णक्रियादौ' (चु० उ० से०) । 'विलेपने चन्दने च **वर्णकं** पुंनपुंसकम्' इति रभसः । '**वर्णक**श्चारणेऽस्त्री तु चन्दने च विलेपने । द्वयोर्नील्यादिषु स्त्री स्यादुत्कर्षे काञ्चनस्य च' (इति मेदिनी) ॥ (१) ॥*॥ झटनम् । 'झट संघाते' (भ्वा० प० से०) । घञ् (३।३।१९) घञ् (३।३।१८) । झाटं लाति । 'ला दाने' (अ० प० अ०) । बाहुलकात् डिः । वृक्षभेदः ॥ (१) ॥*॥ मन्यते । 'मन ज्ञाने' (दि० आ० अ०) । 'शृस्वृस्निहि–' (उ० १।१०) इत्युः ॥ (१) ॥*॥ मूषति । 'मूष क्षुण्ठने' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) स्वर्णादिविलेपनभाण्डम् ॥ (१) ॥*॥ सर्पति । 'सृप्लृ गतौ' (भ्वा० प० से०) । बाहुलकात् पाटः । परिमाणभेदः । जातित्वात् (४।१।६३) गौरादित्वात् (४।१।४१) वा ङीष् ॥ (१) ॥*॥ कर्कं दधाति । 'अन्दूहम्भू–' (उ० १।९३) इति साधुः ॥ (१) ॥*॥ यक्षते । 'यक्ष पूजायाम्' (चु० आ० से०) । क्तिच् (३।३।१७४) । 'स्कोः संयोगाद्योः' (८।२।२९) इति कलोपः । ष्टुत्वम् (८।४।४१) । यद्वा यजतेर्बाहुलकात्तिः । 'त्रश्चभ्रस्ज–' (८।२।३६) इति षः ॥ (१) ॥*॥ शाट्यते । 'शट श्लाघायाम्' चुरादिः । घञ् (३।३।१९) ॥ (१) ॥*॥ कटति । 'कटे वर्षादौ' (भ्वा० प० से०) । पचाद्यच् (३।१।१३४) । जातिलक्षणो (४।१।६३) ङीष् ॥*॥ यद्वा 'सर्वधातुभ्यः–' (उ० ४।११८) इतीन् । 'कृदिकारात्–' (वा० ४।१।४५) ङीष् ॥ (१) ॥*॥ कुटति 'कुट कौटिल्ये' (तु० प० से०) । इन् (उ० ४।११८) । 'कृदिकारात्–' (ग० ४।१।४५) इति

१—'शूद्रा चामहत्पूर्वा जातिः' (वा० ४।१।४) इत्यनेन टाप् बोध्यः ॥

ङीष् ॥*॥ यद्वा 'इगुपध–' (३।१।१३५) इति कः । 'जातेः–' (४।१।६३) इति गौरादित्वात् (४।१।४१) वा ङीष् ॥ (१) ॥*॥

इति स्त्रीपुंससंग्रहः ॥

स्त्रीनपुंसकयोर्भावक्रिययोः ष्यञ् क्वचिच्च वुञ् ।
औचित्यमौचिती मैत्री मैत्र्यं वुञ् प्रागुदाहृतः ॥३९॥

'स्त्रीनपुंसकयोः' इत्यधिकारः । 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (५।१।१२४) इति चकाराद्भावे च विहितः ष्यञ् स्त्रीनपुंसकयोः स्यात् । वुञ् च । 'क्वचित्' इति ष्यञ्वुञ्भ्यां संबध्यते । उचितस्य कर्म भावो, वा । 'षिद्गौरा–' (४।१।४१) इति ङीष् । 'हलस्तद्धितस्य–' (६।४।१५०) इति यलोपः ॥ (१) ॥*॥ एवम्—सामग्र्यम्, सामग्री । आर्हन्त्यम्, आर्हन्ती । 'अर्हतो नुम् च' (ग० ५।१।१२४) इति नुम् ॥*॥ प्राग् द्वितीयकाण्डे । आहोपुरुषिका, शैष्योपाध्यायिका, गार्गिका ॥*॥ क्वचिच्च । मानोज्ञकम्, रामणीयकम् । 'भाव–' इति किम् । चातुर्वर्ण्यम् । स्वार्थे ष्यञ् (वा० ५।१।१२४) न स्त्री ॥

षष्ठ्यन्तप्राक्पदाः सेनाच्छायाशालासुरानिशाः ।
स्याद्वा नृसेनं श्वनिशं गोशालमितरे च दिक् ॥४०॥

षष्ठ्यन्तात्पराः सेनादयस्तत्पुरुषे स्त्रीनपुंसकयोः स्युः । नृणां सेना=नृसेना । शुनां निशा=श्वनिशम् । गवां शाला=गोशालम् । वृक्षस्य छाया–वृक्षच्छाया । यवानां सुरा–यवसुरा । पक्षे—'विभाषा सेनासुराच्छायाशालानिशानाम्' (२।४।२५) इति क्लीबता । एवमितरेऽपि बोध्याः । दिक् उदाहरणमिदम् ॥

आबन्नन्तोत्तरपदो द्विगुश्चापुंसि नश्च लुप् ।
त्रिखट्वं च त्रिखट्वी च त्रितक्षं च त्रितक्ष्यपि ॥ ४१ ॥

आबन्तोत्तरपदोऽन्नन्तोत्तरपदश्च द्विगुरपुंसि स्त्रीनपुंसकयोः स्यात् । अनो नकारस्य च लुप् लोपः । संपदादित्वात् (वा० ३।३।१०८) भावे क्विप् । यत्तु मुकुटः—'लुक्' इति छन्दोनुरोधात् लोपस्यार्थेऽदर्शने वर्तते—इत्याह । तच्चिन्त्यम् 'लुप्' इति पाठात् । यदपि प्रत्ययादर्शनस्यैव लुक्संज्ञाविधानात्—इति । तदपि न । अत्र यौगिकस्य प्रयोगात्, संज्ञायां ग्रहणे प्रमाणाभावात् । 'लुग्' इति पाठेऽपि नात्र संज्ञाग्रहणम् । 'लुञ्च अपनयने' (भ्वा० प० से०) इत्यस्य संपदादि (वा० ३।३।१०८) क्विबन्तस्य ग्रहणात् । तिसृणां खट्वानां समाहारः । 'गोस्त्रियोः' (२।२।४८) इति ह्रस्वे कृते 'द्विगोः' (४।१।२१) इति ङीप् ॥ (१) ॥*॥ त्रयाणां तक्ष्णां समाहारः । 'अनो नलोपश्च' (वा० २।४।३०) इति नलोपः ॥ (१) ॥*॥

इति स्त्रीनपुंसकसंग्रहः ॥

१—एवं च 'उतो वृद्धिर्लुकि–' (७।३।८७) इति सूत्रे ककारश्रवणानुपपत्त्या चिन्त्यमेतत् ॥

त्रिषु पात्री पुटी वाटी पेटी कुवलदाडिमौ ।

'त्रिषु' इत्यधिकारः । पाति । 'पा रक्षणे' (अ० प० अ०) । ष्ट्रन् (उ० ४।१८९) । **'पात्र्यमत्रे** त्रिषु क्लीबं सुवादौ राजमन्त्रिणि । नीरद्वयान्तरे योग्ये' ॥ (१) ॥*॥ पुटति । 'पुट संश्लेषणे' (तु० प० से०) । 'इगुपध–' (३।१।१३५) इति कः । गौरादिः (४।१।४१) ॥ (१) ॥*॥ वाट्यते । 'वट वेष्टने' (भ्वा० प० से०) ण्यन्तः । कर्मणि (३।३।११९) घञ् । **'वाटः** पथि वृतौ **वाटं** वरण्डेऽज्ञानभेदयोः । **वाटी** वास्तौ गृहोद्यानेत्कट्योः' इति हैमः । **'वाटो** मार्गवृतिस्थानेष्वित्कटीवास्तुनोः स्त्रियाम्' (इति मेदिनी) ॥ (१) ॥*॥ पिट्यते । 'पिट शब्दसंघातयोः' (भ्वा० प० से०) । घञ् (३।३।११९) जातित्वात् (४।१।६३) गौरादित्वात् (४।१।४१) वा ङीष् । स्त्रीलिङ्गप्रदर्शनं तु ङ्यन्ततासूचनार्थम् । वेत्रादिरचिता ॥ (१) ॥*॥ कौ वलति । 'वल विस्तृतौ' ( ) । पचाद्यच् (३।१।१३४) । **'कुवलं** चोत्पले मुक्ताफलेऽपि बदरीफले' (इति मेदिनी) । **'कुवलो** मुकुले पुंसि न द्वयोर्नरकान्तरे' (इति मेदिनी) ॥ (१) ॥*॥ दलनम् । 'दल विदारणे' (भ्वा० प० से०) । घञ् (३।३।१८) । दालेन निर्वृत्तः । 'भावप्रत्ययान्तादिमप्' (वा० ४।३।२०) । डलयोरेकत्वम् ॥

इति त्रिलिङ्गसंग्रहः ॥

परलिङ्गं स्वप्रधाने द्वन्द्वे, तत्पुरुषेऽपि तत् ॥ ४२ ॥

स्वे समस्यमानाः पदार्थाः प्रधानं यत्र तस्मिन्नितरेतरयोगद्वन्द्वे परपदस्य लिङ्गम् । कुक्कुटमयूर्यौ, मयूरीकुक्कुटौ ॥*॥ तत् परलिङ्गम् । कुलब्राह्मणः, ब्राह्मणकुलम् । अर्धपिप्पली । 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' (२।४।२६) ॥

अस्यापवादमाह—

अर्थान्ताः प्राद्यलंप्राप्तापन्नपूर्वाः परोपगाः ।
तद्धितार्थे द्विगुः संख्यासर्वनामतदन्तकाः ॥ ४३ ॥

अर्थोऽन्ते येषां ते । प्रादयः पूर्वं येषां ते परं विशेष्यमुपगच्छन्ति विशेष्यलिङ्गाः । द्विजार्था माला, द्विजार्थः सूपः । द्विजार्थं पयः । 'अर्थेन नित्यसमासः सर्वलिङ्गता च' (वा० २।१।३६) ॥*॥ आचार्यं प्रगतः=प्राचार्यः । 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' (वा० २।२।१८) इति समासः । खट्वामतिक्रान्ता । पूर्ववत् । यत्तु मुकुटेन 'प्रगत आचार्योऽस्याः' इति विग्रहप्रदर्शनं कृतम् । यच्च 'अतिखट्वः' इत्यत्र 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' (वा० २।२।२४) इति वार्तिकमुपन्यस्तम् । तच्चिन्त्यम्, उभयोरपि बहुव्रीहिविषयत्वात् । अत्र च तत्पुरुषत्वात् । बहुव्रीहौ तु 'बहुव्रीहिरदिग्नाम्' इत्यनेन गतार्थत्वाच्च ॥*॥ एवम् प्राप्तजीविकः, आपन्नजीविकः । अलं जीविकायै–अलंजीविकः, अस्मादेव ज्ञापकात्समासः ॥*॥ तद्धितार्थे यो द्विगुः स वाच्यलिङ्गः ।

१—इदं च प्रसङ्गत उपात्तं न तु प्रकृतोपयोगि ॥

पञ्चसु कपालेषु संस्कृतः पञ्चकपालः, पञ्चकपाला । 'संख्यापूर्वो द्विगुः' (२।१।५२) । 'संस्कृतं भक्षाः' (४।२।१६) इत्यण् । 'द्विगोर्लुगनपत्ये' (४।१।८८) इत्यणो लुक् ॥*॥ संख्या सर्वनामानि च संख्यासर्वनामान्ताश्च शब्दा वाच्यलिङ्गाः । एकः, एका, एकम् । द्वौ, द्वे २। त्रयः, तिस्रः, त्रीणि । चत्वारः, चतस्रः, चत्वारि । बहवः, बह्व्यः, बह्वनि । सर्वः, सर्वा, सर्वम् इत्यादि । ऊनत्रयः, ऊनतिस्रः, ऊनत्रीणि । परमसर्वः, परमसर्वा, परमसर्वम् ॥*॥

बहुव्रीहिरदिङ्नाम्नामुन्नेयं तदुदाहृतम् ।
गुणद्रव्यक्रियायोगोपाधयः परगामिनः ॥ ४४ ॥

बहुव्रीहिसमासो वाच्यलिङ्गः स्यात् । बहुधनः, बहुधना, बहुधनम् । 'अदिङ्नाम्नाम्' इति किम् । उत्तरपूर्वा । 'दिङ्नामान्यन्तराले' (२।२।२६) इति बहुव्रीहिः ॥*॥ गुणद्रव्यक्रियाणां योग उपाधिर्निमित्तं येषां ते । शुक्ला शाटी, शुक्लः पटः, शुक्लं वस्त्रम् । दण्डी, दण्डिनी, दण्डि । पाचिका, पाचकः, पाचकम् ॥

कृतः कर्तर्यसंज्ञायां कृत्याः कर्तरि कर्मणि ।
अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः ॥ ४५ ॥

'कर्तरि कृत्' (३।४।३७) इत्यादिना विहिताः । असंज्ञायां किम् । 'संज्ञायां भृतृ–' (३।२।४६) इति विहिता वाच्यलिङ्गा न । कर्ता, कर्त्री, कर्तृ । कुम्भकारः, कुम्भकारी, कुम्भकारम् । संज्ञायां धनंजयः ॥*॥ कृत्याः कर्तरि भव्यः, भव्या, भव्यम् । 'भव्यगेय–' (३।४।६८) इति कर्तरि यत् । कर्मणि ण्यत् । कार्यः, कार्या, कार्यम् । कर्तरीत्यादि किम् । भवितव्यम् । असंज्ञायामित्येव । भिद्यो नदः, उद्ध्यः ॥*॥ 'तेन रक्तं रागात्' (४।२।१) इत्याद्यर्थे विहिता ये अणादयस्तदन्ताः शब्दा नानार्थानां भेदका विशेषणानि । नानार्था वा भेदका विशेष्या येषां ते वाच्यलिङ्गाः स्युः । कौङ्कुमं वस्त्रम्, कौङ्कुमी शाटी, कौङ्कुमः पटः । लाक्षिकी शाटी, लाक्षिकं वस्त्रम् । कृत्तिकाभिर्युक्ता कार्तिकी । वसिष्ठेन दृष्टं वासिष्ठं साम, वसिष्ठेन दृष्टो मन्त्रः वासिष्ठः, वासिष्ठी ऋक् । प्रजापतिना प्रोक्तः प्राजापत्यः ॥

षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम् ।
परं विरोधे, शेषं तु ज्ञेयं शिष्टप्रयोगतः ॥ ४६ ॥

'ष्णान्ता षट्' (१।१।२४) 'डति च' (१।१।२५) इति सूत्राभ्यां कृतषट्संज्ञाः, युष्मदस्मदौ, तिङन्तम्, अव्ययानि च त्रिषु लिङ्गेषु समा लिङ्गकृतविशेषाभावात् । 'त्रिषु' इत्यधिकारे 'त्रिषु समाः' इति वचनं लिङ्गसंबन्धाभावेन समानत्वप्रतिपादनार्थम् । पूर्वं हि लिङ्गवत्त्वं प्रतिपादितम् । पञ्च नराः, पञ्च नार्यः, पञ्च फलानि । षट् स्त्रियः, षट् नराः, षट् कुलानि । कति घटाः, कति स्त्रियः, कति गृहाणि । त्वं स्त्री, त्वं पुरुषः, त्वं फलम् । एवम् अहं स्त्री, अहं पुरुषः, अहं फलम् । पुरुषः पचति, स्त्री पचति, कुलं पचति । उच्चैः प्रासादः, उच्चैः शाला, उच्चैर्गृहम् । यत्तु मुकुटः—षट्संज्ञकस्यापि संख्यान्तर्गतत्वादेव त्रिलिङ्गत्वे लब्धे 'संख्यासर्वनामतदन्तकाः' इत्यस्यैवायं प्रपञ्चः–इत्याह । तन्न । डत्यन्तानां संख्यान्तर्गतत्वाभावात् । तेषां संख्याकार्यनिर्वाहाय पाणिनिना स्वशास्त्रे संख्यासंज्ञा विहिता, न तु सकलसाधारण्येन । किं च संख्यासर्वनाम्नां लिङ्गत्रययोगः प्रतिपाद्यते, षट्संज्ञानां तु लिङ्गत्रयराहित्यमतः कथं तेनास्य गतार्थता । 'लिङ्गकृतविशेषरहिताः' इत्यर्थः—इति स्वयमेव व्याख्यातम् । नहीदं संख्यादिषु संभवति, इति कथं गतार्थता ॥*॥ लिङ्गविधायकवचनविरोधे सति परं वचनं ग्राह्यम् । यद्वा 'स्त्रियामीदूद्विरामैकाच्' इत्यस्यावकाशः—धीः, भूः । 'कृतः कर्तर्यसंज्ञायाम्' इत्यस्यावकाशः—कर्ता, पाचकः, । नीः, लूः, इत्यादाद्युभयप्रसङ्गे परत्वात्त्रिलिङ्गता भवति । मुकुटस्तु—'असुरपर्यायाः पुंस्त्वे' इत्यस्य विषयः—नैर्ऋतः, राक्षसः । 'द्व्यचकमसिसुसन्नन्तं क्लीबे' इत्यस्य विषयः—ओजः, यशः । इहोभयं प्राप्नोति—रक्षः । परत्वात्तु क्लीबम्—इत्युदाजहार । तन्न । 'विशेषैर्यद्यबाधितः' इत्यनेन गतार्थत्वात् । 'असुरपर्यायाः पुंस्त्वे' इत्यस्य 'यातुरक्षसी' इति निर्देशस्यैवापवादत्वात् । उत्सर्गापवादभिन्न विरोधप्रदर्शनस्यौचित्यात् ॥*॥ शेषमिहानुक्तं शिष्टानां प्रयोगाज्ज्ञातव्यम् यथा—'चालनी तितउः पुमान्' इत्युक्तम् । इह 'तितउ परिपवनं भवति' इति (पस्पशा) भाष्यप्रयोगान्नपुंसकमपि बोध्यम् । तथा 'ताटङ्कस्ते' इत्याचार्यप्रयोगात्ताटङ्कशब्दस्य पुंस्त्वम् । यथा वा 'कलिका कोरकः पुमान्' इतीहोक्तम् । 'कोरकाणि' इति माघप्रयोगान्नपुंसकत्वमपि । यत्तु 'गोधापोटा' इत्युदाहृतवान्मुकुटः, तन्न । 'ङयाबूङन्तम्' इत्युक्तत्वेन शेषत्वाभावात् ॥

इति लिङ्गादिसंग्रहवर्गविवरणम् ॥

इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
सामान्यकाण्डस्तृतीयः साङ्ग एव समर्थितः ॥

इति श्रीवघेलवंशोद्भवश्रीमहीधरविषयाधिपश्रीकीर्तिसिंहदेवाज्ञया श्रीभट्टोजिदीक्षितात्मजश्रीभानुजीदीक्षितविरचितायाममरटीकायां व्याख्यासुधाख्यायां तृतीयः काण्डः समाप्तिमगात् ॥

॥ समाप्तश्चायममरकोषः ॥

॥ श्रीः ॥

अमरमूलस्थशब्दानामकारादिक्रमेण

शब्दानुक्रमणिका ।

शब्दः	पृष्ठम्	श्लोकः
अ.		
अ	४४६	११
अंश	३३१	८९
अंशु	४२	३३
अंशुक	२४२	११५
अंशुमती	१६७	११५
अंशुमत्फला	१६६	११३
अंस	२२९	७८
अंसल	२१६	४४
अंहति	२५९	३०
अंहस्	५१	२३
	४०१	२७
अंहि	२२६	७१
अकरणि	३९६	३९
अकूपार	९२	१
अकृष्णकर्मन्	३६४	४६
अक्ष	१४७	५८
	३१७	४३
	३३०	८६
	४३६	२२२
	३५२	४५
अक्षत	३१८	४७
अक्षदर्शक	२६८	५
अक्षदेविन्	३५१	४३
अक्षधूर्त	३५१	४३
अक्षर	४२८	१८२
अक्षरचुञ्चु	२७९	१५
अक्षरचण	२७०	१५
अक्षरविन्यास	२७०	१६
अक्षवती	३१२	४४
अक्षाग्रकीलक	२८४	५६
अक्षान्ति	८०	२४
अक्षि	२३५	९३
	४५७	२२
अक्षिकूटक	२७७	३८
अक्षिगत	३६४	४५
अक्षीव	१३८	३१
	३१६	४१
अक्षोट	१३७	२९

शब्दः	पृष्ठम्	श्लोकः
अक्षौहिणी	२९०	८१
अखण्ड	३७१	६५
अखात	१०३	२७
अखिल	३७१	६५
अग	४००	१९
अगद	२१८	५०
अगदंकार	२२१	५७
अगम	१२८	५
अगरु	२४८	१३३
अगस्त्य	३७	२०
अगाध	९८	१५
अगार	११७	५
अगुरु	२४६	१२६
अगुरुशिंशपा	१४९	६२
अग्नायी	२५६	२१
अग्नि	२२	५३
अग्निकण	२४	५७
अग्निचित्	२५४	१२
जग्निज्वाला	१७०	१२४
अग्नित्रय	२५६	२०
अग्निभू	१७	३९
अग्निमन्थ	१५०	६६
अग्निमुखी	१४३	४२
अग्निशिख	२४५	१२४
अग्निशिखा	१६९	११८
	१७४	१३६
अग्न्युत्पात	४६	१०
	४०८	५८
अग्र	१३	१२
	३६८	५८
	४२९	१८३
अग्रज	२१६	४३
अग्रजन्मन्	२५१	४
अग्रतःसर	२८८	१७२
अग्रतस्	४४१	२४६
	४४५	७
अग्रमांस	२२३	६४
अग्रिय	२१६	४३
	३६८	५८

शब्दः	पृष्ठम्	श्लोकः
अग्रीय	३६८	५८
अग्रेदिधिषू	२१०	२३
अग्रेसर	२८८	७२
अग्र्य	३६८	५८
अघ	५१	२३
	४०१	२७
अघमर्षण	२६४	४७
अघ्न्या	३२४	६७
अङ्क	३५	१७
	३९७	४
अङ्कुर	१२८	४
अङ्कुश	२७९	४१
अङ्कोट	१३८	२९
अङ्क्य	७३	५
अङ्ग	२२६	७०
	४४५	७
	४४८	१९
अङ्गद	२३९	१०७
अङ्गन	१२०	१३
अङ्गना	३१	५
	२०४	३
अङ्गविक्षेप	७७	१६
अङ्गसंस्कार	२४४	१२१
अङ्गहार	७७	१६
अङ्गार	३११	३०
अङ्गारक	३९	२५
अङ्गारधानिका	३११	२९
अङ्गारवल्लरी	१४५	४८
अङ्गारवल्ली	१५९	९०
अङ्गारशकटी	३११	२९
अङ्गीकार	५७	५
अङ्गीकृत	३८५	१०८
अङ्गुलिमुद्रा	२४०	१०८
अङ्गुली	२३१	८२
अङ्गुलीयक	२३९	१०७
अङ्गुष्ठ	२३१	८२

शब्दः	पृष्ठम्	श्लोकः
अङ्घ्रिपर्णिका	१६०	९२
अचण्डी	३२५	७०
अचल	१२३	१
अचला	११०	२
अचिक्कण	४३७	२२५
अच्युत	९	१९
अच्युताग्रज	११	२३
अच्छ	९८	१५
अच्छभल्ल	१८७	४
अज	३२७	७६
	४०२	३०
अजगन्धिका	१७५	१३९
अजगर	८८	५
अजगव	१५	३५
अजडा	१५८	८६
अजन्य	२९९	१०९
अजमोदा	१७७	१४५
अजशृङ्गी	१६९	११९
अजस्र	२७	६६
अजा	३२७	७६
अजाजी	३१४	३६
अजाजीव	३४२	११
अजित	४०७	६२
अजिन	२६४	४७
अजिनपत्रा	१९६	२६
अजिनयोनि	१८९	८
अजिर	१२०	१३
	४२८	१८१
अजिह्म	३७३	७२
अजिह्मग	२९२	८६
अज्जुका	७५	११
अज्झटा	१७१	१२७
अञ्च	३६२	३८
	३६५	४८
अज्ञान	५७	७
अञ्चित	३८२	९८
अञ्जन	३१	३

शब्दः	पृष्ठम्	श्लोकः
अञ्जनकेशी	१७२	१३०
अञ्जनावती	३१	५
अञ्जलि	२३२	८५
अञ्जसा	४४६	१२
	४४३	२
अटनी	२९१	८४
अटरूष	१६३	१०३
अटवी	१२७	१
अटा	२६०	३५
अट्ट	१२०	१२
	४१९	१३१
अट्या	२६०	३५
अणक	३६७	५४
अणव्य	३०४	८
अणि	२८४	५६
अणिमन्	१६	३६
अणीयस्	३७०	६२
अणु	३०८	२०
	३६९	६२
अण्ड	२००	३७
अण्डकोश	२२८	७६
अण्डज	९९	१७
	९८	३३
	३६६	५१
अतट	१२५	४
अतर्कित	४४५	७
अतलस्पर्श	९८	१५
अतसी	३०८	२०
अति	४४४	५
	४४०	२४१
अतिक्रम	३९५	३३
	४२३	१५०
अतिचरा	१७७	१४६
अतिच्छत्र	१८५	१६७
अतिच्छत्रा	१७९	१५२
अतिजव	२८८	७३
अतिथि	२६०	३४
अतिनिर्हारिन्	५८	१०
अतिनु	९८	१४
अतिपथिन्	११५	१६
अतिपात	२६१	३७
	३९५	३३
अतिप्रसिद्ध	४३५	२१८
अतिमात्र	२७	६६
अतिमुक्त	१४५	७२
अतिमुक्तक	१३७	२६
अतिरिक्त	३७४	७५
अतिवक्तृ	३६२	३५
अतिवाद	६८	१४
अतिविषा	१६२	९९
अतिवेल	२७	६६
अतिशक्तिता	२९८	१०२
अतिशय	२७	६६
	३९०	११
अतिशस्त	४०४	४१
अतिशोभन	३६९	५८
अतिसंस्कृत	४११	८१
अतिसर्जन	३९४	२८
अतिसारकिन्	२२१	५९
अतिसौरभ	१३९	३३
अतीक्ष्ण	४१३	९४
अतीत	४४८	१७
अतीतनौक	९८	१४
अतीन्द्रिय	३७५	७९
अतीव	४४२	२
अत्तिका	७६	१५
अत्यन्तकोपन	३६१	३२
अत्यन्तीन	२८९	७६
अत्यय	३००	११६
	४२३	१५०
अत्यर्थ	२७	६६
अत्यल्प	३७०	६२
अत्याहित	४१०	७७
अत्रि	४०	२७
अथ	४४१	२४७
अथो	४४१	२४७
अदभ्र	३७०	६३
अदर्शन	३९३	२२
अदितिनन्दन	५	८
अदृश्	२२२	६१
अदृष्ट	२७५	३०
अदृष्टि	८६	३७
अद्धा	४४६	१२
अद्भुत	७८	१७
	७७	१९
अद्मर	३५८	२०
अद्य	४४८	२०
अद्रि	१२३	१
	४२५	१६३
अद्वयवादिन्	७	१४
अधम	४२२	१४४
	३६७	५४
अधमर्ण	३०३	५
अधर	२३३	९०
	४३०	१८९
अधस्	८६	१
अधिकर्धि	३५६	११
अधिकाङ्ग	२८६	६३
अधिकार	२७५	३१
अधिकृत	२६८	६
अधिक्षिप्त	३६३	४२
अधिल्यका	१२७	७
अधिप	३५५	११
अधिभू	३५५	११
अधिरोहिणी	१२३	१८
अधिवासन	२४८	१३४
अधिविन्ना	२०५	७
अधिश्रयणी	३११	२९
अधिष्ठान	४१८	१२६
अधीन	३५७	१६
अधीर	३५९	२६
अधीश्वर	२६७	२
अधुना	४४९	२३
अधृष्ट	३५९	२६
अधोंशुक	२४३	११७
अधोक्षज	९	२१
अधोभुवन	८६	१
अधोमुख	३६१	३३
अध्यक्ष	२६८	६
	४३७	२२५
अध्यवसाय	८२	२९
अध्यात्म	४२१	१४४
अध्यापक	२५२	७
अध्याहार	५६	३
अध्यूढा	२०५	७
अध्येषणा	२६०	३२
अध्वग	२७१	१७
अध्वनीन	२७१	१७
अध्वन्	११४	१६
अध्वन्य	२७१	१७
अध्वर	२५४	१३
अध्वर्यु	२५५	१७
अनक्षर	७०	२१
अनङ्ग	१२	२५
अनच्छ	९८	१४
अनड्वह्	३२२	६०
अनन्त	२९	१
	८८	४
	४११	८१
अनन्ता	११०	२
	१५९	९२
	१६६	११२
	१७४	१३६
	१८२	१५८
अनन्यज	१२	२६
अनन्यवृत्ति	३७५	६९
अनय	४२२	१४९
अनर्थक	६९	२०
अनल	२२	५४
अनवधानता	८२	३०
अनवरत	२७	६६
अनवस्कर	३६८	५६
अनवरार्ध्य	३६८	५७
अनस्	२८३	५२
अनागतार्तवा	२०६	८
अनातप	४२४	१५७
अनादर	७९	२२
अनामय	२१८	५०
अनामिका	२३१	८२
अनायासकृत	३८०	९४
अनारत	२७	६५
अनार्यतिक्त	१७६	१४३
अनाहत	२४१	११२
अनिमिष	४३५	२१८
अनिरुद्ध	१२	२७
अनिल	६	१०
	२५	६२
अनिश	२७	६५
अनीक	२८९	७८
	२९८	१०४

शब्दः	पृष्ठम्	श्लोकः
अनीकस्थ	२६८	६
अनीकिनी	२८९	७८
	२९०	८१
अनु	४४१	२४८
अनुक	३५९	२३
अनुकम्पा	७८	१८
अनुकर्ष	२८४	५७
अनुकल्प	२६२	४०
अनुकामीन	२८९	७६
अनुकार	३९१	१७
अनुक्रम	२६१	३६
अनुक्रोश	७८	१८
अनुग	३७५	७८
अनुग्रह	३९०	१३
अनुचर	२८८	७१
अनुज	२१६	४३
अनुजीविन्	२६९	९
अनुतर्षण	३५१	४३
अनुताप	८०	२५
अनुत्तम	३६८	५७
अनुत्तर	४३०	१९०
अनुनय	४४८	१८
अनुपद	३७५	७८
अनुपदीना	३४७	३०
अनुपमा	३१	४
अनुपल्लव	२८८	७१
अनुबन्ध	४१४	९८
अनुबोध	२४४	१२२
अनुभव	३९४	२७
अनुभाव	७९	२१
	४३४	२०९
अनुमति	४६	८
अनुयोग	६७	१०
अनुरोध	२७०	१२
अनुलाप	६८	१६
अनुलेपन	४५७	२३
अनुवर्तन	२७०	१२
अनुवाक	४५४	१७
अनुशय	४२२	१४८
अनुष्ण	३४४	१८
अनुहार	३९१	१७
अनूक	३९९	१३
अनूचान	२५३	१०
अनूनक	३७१	६५
अनूप	११३	१०
अनूह	४२	३२
अनृजु	३६५	४६
अनृत	७०	२१
	३०३	२
अनेकप	२७६	३४
अनेहस्	४३	१
अनोकह	१२८	५
अन्त	३०१	११६
	३७६	८१
अन्तःपुर	१२०	११
अन्तक	२४	५९
अन्तर	४२९	१८७
अन्तरा	४४६	१०
अन्तराभवसत्व	४१९	१३३
अन्तराय	३९२	१९
अन्तराल	३१	६
अन्तरिक्ष	२९	१
अन्तरीप	९६	८
अन्तरीय	२४३	११७
अन्तरे	४४६	१०
अन्तरेण	४४६	१०
	४४४	३
अन्तर्गत	३७८	८६
अन्तर्धा	३४	१२
अन्तर्धि	३४	१२
अन्तर्द्वार	१२१	१४
अन्तर्मनस्	३५४	८
अन्तर्वत्नी	२१०	२२
अन्तर्वाणि	३५४	६
अन्तर्वेशिक	२६८	८
अन्तावसायिन्	३४०	१०
अन्तिक	३७१	६७
अन्तिकतम	३७२	६८
अन्तिका	३११	२९
अन्तेवासिन्	२५३	११
	३४४	२०
अन्त्य	३७६	८१
अन्त्र	२२४	६६
अन्दुक	२७८	४१
अन्ध	२२२	६१
	४१५	१०३
अन्धकरिपु	१३	३४
अन्धकार	८७	३
अन्धतमस	८७	३
अन्धस्	३१९	४८
अन्धु	१०३	२६
अन्न	३१९	४८
	३८५	१११
अन्य	३७६	८२
अन्यतर	३७६	८२
अन्वक्ष	३७५	७८
अन्वक्	३७५	७८
अन्वय	२५०	१
अन्ववाय	२५०	१
अन्वाहार्य	२५९	३१
अन्विष्ट	३८४	१०५
अन्वेषणा	२६०	३२
अन्वेषित	३८४	१०५
अप् (आप)	९३	३
अपकारगी	६८	१४
अपक्रम	३००	१११
अपघन	२२६	७०
अपचय	३९१	१६
अपचायित	३८३	१०१
अपचित	३८३	१०१
अपचिति	२६०	३५
	४०८	६७
अपटान्तर	३७२	६८
अपटु	२२१	५८
अपत्य	२११	२८
अपत्रपा	७९	२३
अपत्रपिष्णु	३६०	२८
अपथ	११५	१७
अपथिन्	११५	१७
अपदान्तर	३७२	६८
अपदिश	३१	५
अपदेश	८४	३३
	४३५	२१६
अपध्वस्त	३६३	३९
अपभ्रंश	६३	२
अपयान	३००	१११
अपरक्त	३६४	४३
अपरस्पर	३८६	१
अपराजिता	१६३	१०४
	१७८	१४९
अपराद्धपृषत्क	२८७	६८
अपराध	२४०	२६
अपराह्ण	४४	३
अपर्णा	१६	३७
अपलाप	६८	१७
अपवर्ग	५७	७
अपवर्जन	२५९	३०
अपवाद	६७	१३
	४१२	८९
अपवारण	३४	१२
	४१८	१२५
अपशब्द	६३	२
अपष्ठु	३७७	८४
अपसद	३४३	१६
अपसर्प	२७०	१३
अपसव्य	३७७	८४
अपस्कर	२८३	५५
अपस्नात	३५८	१९
अपहार	३९१	१६
अपांपति	९२	२
अपाङ्ग	२३५	९४
	४००	२१
अपाची	३०	१
अपान	२६	६३
	२२७	७३
अपामार्ग	१५८	८८
अपावृत	३५७	१५
अपासन	३००	१११
अपि	४४१	२४९
अपिधान	३४	१३
अपिनद्ध	२८६	६५
अपूप	३१९	४८
अप्पति	२५	६१
अप्पित्त	२२	५६
अप्रकाण्ड	१३०	९
अप्रगुण	३७३	७२
अप्रत्यक्ष	३७५	७९
अप्रधान	३६९	६०
अप्रहत	११२	५

शब्दः	पृष्ठम्	श्लोकः
अप्राप्य	३६९	६०
अप्सरस्	६	११
	२२	५२
अफल	१२९	७
अबद्ध	६९	२०
अबद्धमुख	३६२	३६
अवन्ध्य	१२९	६
अवला	२०३	२
अबाध	३७७	८३
अब्ज	३४	१४
	४०२	३२
अब्जयोनि	८	१७
अब्द	५०	२०
	४१२	८८
	४२२	१४६
अब्धि	९२	१
	४१४	१०१
अब्धिकफ	३३७	१०५
अब्भ्रमु	३१	४
अब्रह्मण्य	७६	१४
अभय	१८४	१६४
अभया	१४८	५९
अभाषण	२६१	३६
अभिक	३५९	२४
अभिक्रम	२९६	९६
अभिख्या	४२४	१५६
अभिग्रह	३९१	१३
अभिग्रहण	३९१	१७
अभिघातिन्	२६९	११
अभिचार	३९२	१९
अभिजन	२५०	१
	४१५	१०८
अभिजात	४११	८२
अभिज्ञ	३५३	४
अभितस्	३७१	६७
	४४२	२५५
अभिधान	६६	८
अभिध्या	८०	२४
अभिनय	७७	१६
अभिनव	३७५	७७
अभिनवोद्भिद	१२८	४
अभिनिर्मुक्त	२६६	५५
अभिनिर्याण	२९६	९५
अभिनीत	२७३	२४
	४११	८१
अभिपन्न	४१८	१२८
अभिप्राय	३९२	२०
अभिभूत	३६३	४०
अभिमर	४३४	२१४
अभिमान	७९	२२
	४१६	११०
अभियोग	३९१	१३
अभिरूप	४१९	१३१
अभिलाव	३९३	२४
अभिलाष	८१	२८
अभिलाषुक	३५८	२२
अभिवादक	३६०	२८
अभिवादन	२६२	४१
अभिव्याप्ति	३८८	६
अभिशस्त	३६४	४३
अभिशस्ति	२६०	३२
अभिशाप	६७	११
अभिषङ्ग	४०१	२४
अभिषव	२६४	४७
	३५१	४२
अभिषेणन	२९५	९५
अभिष्टुत	३८५	११०
अभिसंपात	२९८	१०५
अभिसर	२८८	७१
अभिसारिका	२०५	१०
अभिहार	३९१	१७
	४२६	१६८
अभिहित	३८४	१०७
अभीक	३५९	२४
अभीक्ष्णम्	४४३	१
	४४६	११
अभीप्सित	३६७	५३
	३८५	११२
अभीरु	१६२	१००
अभीरुपत्नी	१६२	१०१
अभीषङ्ग	३८७	६
अभीषु	४३६	२१९
अभीष्ट	३६७	७३
अभ्यग्र	३७१	६७
अभ्यन्तर	३१	६
अभ्यमित	२२१	५८
अभ्यमित्रीण	२८९	७५
अभ्यमित्रीय	२८९	७५
अभ्यमित्र्य	२८९	७५
अभ्यर्ण	३७१	५७
अभ्यर्हित	४११	८३
अभ्यवकर्षण	३९१	१७
अभ्यवस्कन्दन	३००	११०
अभ्यवहृत	३८५	१११
अभ्याख्यान	६७	१०
अभ्यागम	२९८	१०५
अभ्यागारिक	३५६	१२
अभ्यादान	३९४	२६
अभ्यान्त	२२१	५८
अभ्यामर्द	२९८	१०५
अभ्याश	३७१	६७
अभ्यासादन	३००	११०
अभ्युदित	२६६	५५
अभ्युपगम	५७	५
अभ्युपपत्ति	३९०	१३
अभ्यूष	३१८	४७
अभ्र	२९	१
	३२	६
अभ्रक	३३५	१००
अभ्रपुष्प	१३८	३०
अभ्रमातङ्ग	२०	४६
अभ्रमु	३१	४
अभ्रमुवल्लभ	२०	४६
अभ्रि	९७	१३
अभ्रिय	३२	८
अभ्रेष	२७३	२४
अमत्र	३१३	३३
अमर	५	७
अमरावती	१९	४५
अमर्त्य	५	८
अमर्ष	८०	२६
अमर्षण	३६१	३२
अमल	३३५	१००
अमा	४४२	२५०
अमांस	२१६	४४
अमात्य	२६७	४
अमावस्या	४६	८
अमावास्या	४६	८
अमित्र	२६९	११
अमुत्र	४४५	८
अमृणाल	१८४	१६४
अमृत	२१	४८
	५७	६
	९३	३
	२५९	२८
	७०	२२
	३०३	३
	४१०	७६
अमृता	१४७	५८
	१४८	५९
	१५६	८२
अमृतान्धस्	५	८
अमोघा	१४६	५४
	१६४	१०६
अम्बर	२९	१
	४८१	१८१
अम्बरीष	३१२	३०
अम्बष्ठ	३३९	२
अम्बष्ठा	१५२	७१
	१५७	८४
	१७५	१४०
अम्बा	७६	१४
अम्बिका	१६	३७
अम्बु	९३	४
अम्बुकण	३३	११
अम्बुज	१४९	६१
अम्बुभृत्	३२	७
अम्बुवेतस	१३८	३०
अम्बुसरण	९७	११
अम्बूकृत	६९	२०
अम्भस्	९३	४
अम्भोरुह	१०७	४१
अम्मय	९४	५
अम्ल	५८	९
अम्ललोणिका	१७५	१४०
अम्लवेतस	१७६	१४१
अम्लान	१५३	७३
अम्लिलका	१४३	४३
अय	५३	२७
अयन	४८	१३
	११५	१५

शब्दः	पृष्ठम्	श्लोकः
अयस्	३३४	९८
अयःप्रतिमा	३४९	३५
अयि	४४८	१८
अयोग्र	३१०	२५
अयोघन	४०३	३७
अर	२७	६४
अरघट्ट	४५४	१८
अरणि	२५६	१९
अरण्य	१२७	१
	४५७	२२
अरण्यानी	१२७	१
अरत्नि	२३२	८६
अरर	१२२	१७
अरलु	१४७	५७
अरविन्द	१०७	३९
अराति	२६९	११
अराल	३७२	७१
अरि	२६९	१०
अरित्र	९७	१३
अरिभेद	१४५	५०
अरिष्ट	११९	८
	१३८	३१
	१४९	६२
	१७८	१४८
	१९४	२०
	४०३	३६
	३२१	५३
	४०३	३६
अरिष्टदुष्टधी	३६४	४४
अरुण	४०	२९
	४२	३२
	६१	१५
	४०५	४८
अरुणा	१६२	९९
अरुंतुद	३७७	८३
अरुष्कर	१४३	४२
	४३०	१८९
अरुस्	२२०	५४
अरोक	३८२	१००
अर्क	४०	२९
	३९७	४
अर्कपर्ण	१५६	८१
अर्कबन्धु	८	१५
अर्काह्व	१५६	८०

शब्दः	पृष्ठम्	श्लोकः
अर्गल	१२२	१७
अर्घ	४०१	२७
अर्घ्य	२६०	३३
अर्चा	२६०	३४
	३४९	३६
अर्चित	३८३	१०१
	४११	८५
अर्चिस्	२४	५७
	४३८	२३०
अर्जक	१५६	८०
अर्जुन	५९	१३
	१४४	४५
	१८५	१६७
अर्जुनी	३२४	६७
अर्णव	९२	१
	४०७	५७
अर्णस्	९३	४
अर्तन	३९५	३२
अर्ति	४०८	६८
अर्थ	३३१	९०
	४१२	८६
अर्थना	२६०	३२
	३८८	६
अर्थप्रयोग	३०३	४
अर्थशास्त्र	६५	५
अर्थिन्	२६९	९
	३६६	४९
अर्घ्य	३३६	१०४
	४२४	१६१
अर्दना	३८८	६
अर्दित	३८१	९७
अर्ध	३५	१६
	३५	१६
अर्धचन्द्रा	१६५	१०९
अर्धनाव	९८	१४
अर्धरात्र	४५	६
अर्धर्च	४६०	३२
अर्धहार	२३९	१०६
अर्धोरुक	२४३	११९
अर्बुद	४५५	१९
अर्भक	२००	३८
अर्म	४६०	३४

शब्दः	पृष्ठम्	श्लोकः
अर्य	३०२	१
	४२२	१४६
अर्यमन्	४०	२८
अर्या	२०८	१४
अर्याणी	२०८	१४
अर्यी	२०८	१५
अर्व	३६७	५४
अर्वन्	२८०	४१
अर्वाक्	९५	८
	४४७	१६
अर्शस	२२१	५९
अर्शस्	२२०	५४
अर्शोघ्न	१८४	१५७
अर्शोरोगयुत	२२१	५९
अर्हणा	२६०	३४
अर्हित	३८३	१०१
अलम्	४४२	२५२
	४४६	११
अलक	२३६	९६
अलका	२९	७०
अलक्त	२४५	१२५
अलक्ष्मी	९१	२
अलगर्द	८८	५
अलंकरिष्णु	३८	१००
	३६०	२९
अलंकर्तृ	२३८	१००
अलंकर्मीण	३५७	१८
अलंकार	२३८	१०१
अलंकृत	२३८	१००
अलंक्रिया	२३८	१०१
अलर्क	१५६	८१
	३४५	२२
अलस	३४४	१८
अलात	३१२	३
अलाबू	१८०	१५६
अलि	१९२	१४
	१९८	१९
अलिक	२३४	९२
अलिन्	१९८	२९
अलिंजर	३१२	३१
अलिन्द	१२०	१२
अलीक	३९९	१२

शब्दः	पृष्ठम्	श्लोकः
अलु	३१२	३१
अल्प	३६९	६१
अल्पतनु	२१७	४८
अल्पमारिष	१७४	१३१
अल्पसरम्	१०३	२८
अल्पिष्ठ	३७०	६१
अल्पीयस्	३७०	६१
अवकर	१२३	१८
अवकीर्णिन्	२६६	५१
अवकृष्ट	३६३	३१
अवकेशिन्	१२९	१
अवक्रय	३२८	७१
अवगणित	३८४	१०१
अवगत	३८५	१०८
अवगीत	३८०	९१
	४१०	७९
अवग्रह	३३	११
	२७७	३८
अवग्राह	३३	११
अवचूर्णित	३८०	९८
अवज्ञा	७९	२३
अवज्ञात	३८४	१०६
अवट	८७	१
अवटीट	२१६	४५
अवट्ट	२३३	८८
अवतंस	४३०	२२०
अवतमस	८०	३
अवतोका	३२५	६९
अवदंश	३५०	४०
अवदान	५९	१३
	४११	८०
अवदान	३८०	३
अवदाह	१८४	१६५
अवदारण	३०५	१२
अवदीर्ण	३७९	८९
अवद्य	३६७	५४
अवधारण	४२०	१०८
अवधि	४१४	९९
अवध्वस्त	३८०	९४
अवन	३८७	४
अवनत	३७२	७०
अवनाट	२१६	४५

शब्दः	पृष्ठम्	श्लोकः
अवनाय	३९४	२७
अवनि	११०	३
अवन्तिसोम	३१५	३९
अवन्ध्य	१२९	६
अवभृथ	२५८	२७
अवभ्रट् (ट)	२१६	४५
अवम	३६७	५४
अवमत	३८४	१०६
अवमर्द	३००	१०९
अवमानना	७९	२३
अवमानित	३८४	१०६
अवयव	२२६	७०
अवर	२७८	४०
अवरज	२१६	४३
अवरति	३९६	३७
अवरवर्ण	३३९	१
अवरीण	३८०	९४
अवरोध	१२०	१२
अवरोधन	१२०	११
अवरोह	१३१	११
अवर्ण	६७	१३
अवलक्ष	५९	१३
अवलग्न	२३०	७९
अवलम्बित	४१५	१०४
अवल्गुज	१६१	९५
अववाद	२७३	२५
अवश्यम्	४४७	१६
अवश्याय	३६	१८
अवष्टब्ध	४१५	१०४
अवसर	३९३	२४
अवसान	३९६	३८
अवसित	११७	४
	३८२	९८
	३८५	१०८
अवस्कर	२२५	६७
	४२६	१६७
अवस्था	५४	२९
अवहार	१०१	२१
अवहित्था	८४	३४
अवहेलन	७९	२३
अवाक्	३६१	३३
	३५६	१३

शब्दः	पृष्ठम्	श्लोकः
अवाक्पुष्पी	१७९	१५२
अवाग्र	३७२	७०
अवाच्य	७०	२१
अवार	९५	८
अवासस्	३६३	३९
अवि	२०९	२०
	४३३	२०७
अविग्र	१५१	६७
अवित	३८४	१०६
अविद्या	५७	७
अविनीत	३५८	२३
अविरत	२७	६५
अविलम्बित	२७	६५
	३७६	८३
अविस्पष्ट	७०	२१
अवीचि	९१	१
अवीरा	२०७	११
अवेक्षा	३९४	२८
अव्यक्त	४०७	६२
अव्यक्तराग	६१	१५
अव्यण्डा	१५८	८६
अव्यथा	१४८	५९
	१७७	१४६
अव्यय	४६०	३४
अव्यवहित	३७२	६८
अशनाया	३२१	५४
अशनायित	३५८	२०
अशनि	२०	४७
अशित	३८५	१११
अशिश्वी	२०७	११
अशुभ	४५७	२३
अशेष	३७१	६५
अशोक	१५०	६४
अशोकरोहिणी	१५७	८५
अश्मगर्भ	३३२	९२
अश्मज	३३६	१०४
अश्मन्	१२४	४
अश्मन्त	३११	२९
अश्मपुष्प	१७०	११२
अश्मरी	२२०	५६
अश्मसार	३३४	९८
अश्रान्त	२७	६५

शब्दः	पृष्ठम्	श्लोकः
अश्रि	२९५	९३
अश्रु	२३५	९३
अश्लील	६९	१९
अश्व	२८०	४३
अश्वकर्णक	१४३	४४
अश्वत्थ	१३५	२१
अश्वयुज्	३८	२१
अश्ववडव	४५४	१६
अश्वा	२८१	४६
अश्वाभरण	४०४	४४
अश्वारोह	२८५	६०
अश्विन्	२१	५१
अश्विनी	३८	२१
अश्विनीसुत	२१	५१
अश्वीय	२८२	४८
अषडक्षीण	२७३	२२
अष्टापद	३३३	९५
	३५२	४६
अष्ठीवत्	२२७	७२
असंराव	७०	२३
असकृत्	४४३	१
असती	२०७	१
असतीसुत	२११	२६
असन	१४३	४४
असमीक्ष्यकारिन्	३५७	१७
असार	३६८	५६
असि	२९३	८९
असिक्नी	२०९	१८
असित	६०	१४
असिधावक	३४१	७
असिधेनुका	२९५	९२
असिपुत्री	२९५	९२
असिहेति	२८८	७०
असु	३०२	११९
असुधारण	३०२	११९
असुर	७	१२
असूर्क्षण	७९	२३
असूया	८०	२४
असृग्धरा	२२३	६२
असृज्	२२३	६४
असेचनक	३६७	५३
असौम्यखर	३६२	३८

शब्दः	पृष्ठम्	श्लोकः
अस्त	१२४	२
	३७८	८७
अस्तम	४४८	१७
अस्ति	४४८	१८
अस्तु	४४७	१३
अस्त्र	२९१	८२
अस्थि	२२५	६८
अस्थिर	३६४	४३
अस्फुटवाच्	३६२	३७
अस्त्र	२२३	६४
	२३५	९३
	४२५	१६४
अस्त्रप	२५	५९
अस्त्रु	२३५	९३
अस्वच्छन्द	३५७	१६
अस्वप्न	५	८
अस्वर	३६२	३७
अस्वाध्याय	२६६	५४
अहंयु	३६६	५०
अहंकार	७९	२२
अहंकारवान्	३६६	५०
अहन्	४४	२
अहमहमिका	२९७	१०१
अहंपूर्विका	२९७	१००
अहंमति	५७	७
अहर्पति	४०	३०
अहर्मुख	४४	२
अहस्कर	४०	२८
अहह	४४३	२५७
अहार्य	१२३	१
अहि	८९	६
	४४०	२३८
अहित	२६९	११
अहितुण्डिक	९०	११
अहिभय	२७५	३०
अहिभुज्	४०२	३०
अहेरु	१६२	१०१
अहो	४४५	९
अहोरात्र	४७	१२
अह्नाय	४४३	२
आ (आः)	४४०	२४०

शब्दः	पृष्ठम्	श्लोकः
आम्	४४७	१६
आकम्पित	३७८	८७
आकर	१२६	७
आकर्ष	४३६	२२१
आकल्प	२३७	९९
आकार	३९१	१५
	४२५	१६२
आकारगुप्ति	८४	३४
आकारणा	६६	८
आकाश	२९	२
आकीर्ण	३७७	८५
आकुल	३७३	७२
आकृति	४२५	१६२
आक्रन्द	४१२	९०
आक्रीड	१२८	३
आक्रोश	६८	१५
आक्रोशन	३८७	६
आक्षारणा	६८	१५
आक्षारित	३६४	४३
आक्षेप	६७	१३
आखण्डल	१७	४४
आखु	१९१	१२
आखुभुज्	१८८	६
आखेट	३४५	२३
आख्या	६६	८
आख्यात	३८४	१०७
आख्यायिका	६५	५
आगन्तु	२६०	३४
आगस्	२७४	२६
	४३८	२३०
आगार	११७	५
आगू	५७	५
आग्नीध्र	२५५	१७
आग्रहायणिक	४८	१४
आग्रहायणी	३८	२३
आङ	४४०	२३९
आङ्गिक	७७	१६
आङ्गिरस	३९	२४
आचमन	२६१	३६
आचाम	३२०	४९
आचार्य	२५३	७
आचार्या	२०८	१४
आचार्यानी	२०८	१५
आचित	३३१	८७
आच्छादन	३४	१३
	२४२	११५
आच्छुरितक	८५	३४
आच्छोदन	३४५	२३
आजक	३२७	७७
आजानेय	२८०	४४
आजि	२९८	१०६
	४०२	३२
आजीव	३०२	१
आजू	९१	३
आज्ञा	२७३	२६
आज्य	३२०	५२
आटि	१९६	२५
आडम्बर	२९९	१०८
	४२६	१६८
आडि	१९६	२५
आढक	३३१	८८
आढकिक	३०४	१०
आढकी	१७२	१३०
आढ्य	३५५	१०
आणवीनम्	३०४	८
आतङ्क	३९८	१०
आतञ्चन	४१६	११५
आततायिन्	३६४	४४
आतप	४३	३४
	४५५	२०
आतपत्र	२७५	३२
आतर	९७	११
आततायिन्	१९४	२१
आतिथेय	२६०	३३
आतिथ्य	२६०	३३
आतुर	२२१	५८
आतोद्य	७३	५
आत्तगर्व	३६३	४०
आत्मगुप्ता	१५८	८६
आत्मघोष	१९४	२०
आत्मज	२११	२७
आत्मन्	५४	२९
	४१६	१०९
आत्मभू	८	१६
	१२	२६
आत्मंभरि	३५८	२१
आत्रेयी	२०९	२०
आथर्वण	३९७	४३
आदर्श	२५०	४०
आदि	३७५	८०
आदिकारण	५४	२८
आदितेय	५	८
आदित्य	५	८
	६	१०
	४०	२८
आदीनव	३९४	२९
आदृत	४११	८५
आद्य	३७५	८०
आद्यमाषक	३३०	८५
आद्यून	३५८	२१
आधार	१०४	२१
आधि	८१	२८
	४१४	९७
आधूत	३७८	८७
आधोरण	२८५	५९
आध्यान	८१	२९
	७३	६
आनक	७३	६
	३९७	३
आनकदुन्दुभि	११	२२
आनत	३७२	७०
आनद्ध	७२	४
आनन	२३३	८९
आनन्द	५२	२५
आनन्दथु	५२	२५
आनन्दन	३८८	७
आनर्त	४०८	६४
आनाय	९८	१६
आनाय्य	२५६	२१
आनाह	२२०	५५
	२४२	११४
आनुपूर्वी	२६१	३७
आन्धसिक	३११	२८
आन्वीक्षिकी	६५	५
आपक्व	३१८	४७
आपगा	१०४	३०
आपण	११६	२
आपणिक	३२८	५८
आपत्प्राप्त	३६३	४२
आपद्	२९१	८२
आपन्न	३६३	४२
आपन्नसत्त्वा	२१०	२२
आपमित्यक	३०३	४
आपान	३५१	४२
आपीड	२४८	१३६
आपीन	३२६	७३
आपूपिक	३११	२८
	३९६	३७
आप्त	२७०	१३
आप्य	९४	५
आप्यायन	४१६	११५
आप्रच्छन्न	३८८	७
आप्रपद	२४४	११९
आप्रपदीन	२४३	११९
आप्लव	२४४	१२१
आप्लवव्रतिन्	२६३	४३
आप्लाव	२४४	१२१
आबन्ध	३०५	१३
आवुत्त	७५	१२
आभरण	२३८	१०१
आभाषण	६८	१५
आभास्वर	६	१०
आभीर	३२२	५७
आभीरपल्ली	१२३	२०
आभीरी	२०८	१३
आभील	९२	४
आभोग	२४९	१३७
आमगन्धिन्	५९	१२
आमनस्य	९२	३
आमय	२१८	५१
आमयाविन्	२२१	५८
आमलक	४६०	३३
आमलकी	१४७	५७
आमिक्षा	२५७	२३
आमिष	२२३	६३
	४३६	२२३
आमिषाशिन्	३५८	१९
आमुक्त	२८६	६५

शब्दः	पृष्ठम्	श्लोकः
आमोद	५२	२४
	५९	१०
	४१३	९१
आमोदिन्	५९	११
आम्नाय	६४	३
	३८८	७
आम्	४४७	१६
आम्र	१३९	३३
आम्रातक	१३७	२७
आम्रेडित	६७	१२
आयत	३७२	६९
आयतन	११९	७
आयति	२७५	२९
	४०९	७२
आयत्त	३५७	१६
आयाम	२४२	११४
आयुध	२९१	८२
आयुधिक	२८७	६७
आयुधीय	२८७	६७
आयुष्मत्	३५४	६
आयुस्	३०२	१२०
आयोधन	२९८	१०३
आरकूट	३३३	९७
आरग्वध	१३६	२३
आरनालक	३१५	३९
आरति	३९६	३७
आरम्भ	३९४	२६
आरव	७०	२३
आरा	३४९	३४
आरात्	४४२	२४२
आराधन	४१८	१२५
आराम	१२७	२
आरालिक	३११	२८
आराव	७०	२३
आरेवत	१३६	२४
आरोग्य	२१८	५०
आरोह	४४०	२३८
आरोहण	१२२	१८
आर्तगल	१५४	७४
आर्तव	२१०	२१
आर्द्र	३८४	१०५
आर्द्रक	३१५	३७
आर्य	२५१	३
	७६	१४
आर्यावर्त	११३	८
आर्षभ्य	३२३	६२
आल	३३६	१०३
आलम्बि	३४७	३०
आलम्भ	३००	११५
आलय	११७	५
आलवाल	१०४	२९
आलस्य	३४४	१८
आलान	२७८	४१
आलाप	६८	१५
आलि	११४	१४
	४३१	१९८
	१२८	४
	२०७	१२
आलिङ्ग्य	७३	५
आलीढ	२९२	८५
आलु	३१२	३१
आलोक	१२४	३
आलोकन	३९५	३१
आवपन	३१३	३३
आवर्त	९५	६
आवलि	१२८	४
आवसित	३०९	२३
आवाप	१०४	२९
आवापक	२३९	१०७
आवाल	१०४	२९
आविद्ध	३७२	७१
	३७८	८७
आविध	३९५	३६
आविल	९८	१४
आविस्	४४६	१२
आवुक	७५	१२
आवृत्	२६१	३६
आवृत	३७९	९०
आवेगी	१७४	१३७
आवेशन	११९	७
आवेशिक	२६०	३४
आशंसितृ	३६०	२७
आशंसु	३६०	२७
आशय	३९०	२०
आशर	२५	५९
आशा	३०	१
	४३५	२१६
आशितंगवीन	३२८	५९
आशिस्	४३७	२२८
आशीविष	८९	७
आशु	२७	६५
	३०६	१५
आशुग	२५	६२
	२९२	८६
	४००	१९
आशुशुक्षणि	२२	५५
आश्चर्य	७८	२९
आश्रम	२५१	४
आश्रय	२७१	१८
	३९०	११
आश्रयाश	२२	५४
आश्रव	५७	५
	३५९	२४
आश्रुत	३८५	१०८
आश्व	२८२	४८
आश्वत्थ	१३४	१८
आश्वयुज	४९	१७
आश्विन	४९	१७
आश्विनेय	२१	५१
आश्वीन	२८१	४७
आषाढ	४९	१६
	२६३	४५
आसक्त	३५५	९
आसन	२४९	१३८
	२७१	१८
	२७८	३९
आसना	३९२	२१
आसन्दी	४५२	९
आसन्न	३७१	६६
आसव	३५१	४१
आसादित	३८४	१०४
आसार	३३	११
	२९६	९६
आसुरी	३०८	१९
आस्कन्दन	२९८	१०४
आस्कन्दित	२८२	४८
आस्तरण	२७९	४२
आस्था	४१२	८८
आस्थान	२५५	१५
आस्थानी	२५५	१५
आसेचनक	२६७	५३
आस्पद	४१३	९४
आस्फोटनी	३४८	३३
आस्फोटा	१६३	१०४
आस्फोत	१५६	८०
आस्फोता	१५२	७०
आस्य	२३३	८९
आस्या	३९२	२१
आस्रव	३९४	२९
आहत	७०	२१
	३७८	८८
	३३२	८८
आहतलक्षण	३५५	१०
आहव	२९८	१०५
आहवनीय	२५६	१९
आहर	१२२	५६
आहाव	१०३	२६
आहेय	९०	९
आहो	४४४	५
आहोपुरुषिका	२९७	१०१
आह्वय	६६	७
आह्वा	६६	८
आह्वान	६६	८
इक्षु	१८३	१६३
इक्षुगन्धा	१६१	९८
	१६३	१०४
	१६५	११०
	१८३	१६३
इक्षुर	१६३	१०४
इक्ष्वाकु	१८०	१५६
इङ्ग	३७३	७४
	३९१	१५
इङ्गित	३९१	१५
इङ्गुदी	१४४	४६
इच्छा	८१	२७
इच्छावती	२०६	९
इज्याशील	२५३	८
इट्वर	३२३	६२
इडा	४०४	४२
इतर	३४३	१६
	३७६	८२
	४३०	१९२
इति	४४१	२४५

शब्दः	पृष्ठम्	श्लोकः
इतिह	२५४	१२
इतिहास	६५	४
इत्वरी	२०७	१०
इदानीम्	४४९	२३
इध्म	१३२	१३
इन	४१६	१११
इन्वका	३९	२३
इन्दीवर	१०६	३७
इन्दु	३४	१३
इन्दीवरी	१६२	१००
इन्द्र	१७	४१
	३१	२
इन्द्रद्रु	१४४	४५
इन्द्रयव	१५१	६७
इन्द्रवारुणी	१८१	१५६
इन्द्रसुरस	१५१	६८
इन्द्राणिका	१५१	६८
इन्द्राणी	१९	४५
इन्द्रायुध	३३	१०
इन्द्रारि	७	१२
इन्द्रावरज	९	२०
इन्द्रिय	५८	८
	२२२	६२
इन्द्रियार्थ	५७	८
इन्धन	१३२	१३
इभ	२७६	३५
इभ्य	३५५	१०
इरंमद	३३	१०
इरा	३५०	३९
	४२७	१७६
इला	४०४	४२
इव	४४५	९
इष	४९	१७
इषीका	२७७	३८
इषु	२९२	८७
इषुधि	२९३	८८
इष्ट	२५९	२८
	३२२	५७
इष्टकापथ	१८४	१६५
इष्टगन्ध	५९	११
इष्टार्थोद्युक्त	३५५	९
इष्टि	४०३	३९

शब्दः	पृष्ठम्	श्लोकः
इष्वास	२९१	८३
ईक्षण	३९५	३१
	२३५	९३
ईक्षणिका	२०९	२०
ईडित	३८५	११०
ईति	४०८	६८
ईरिण	४०६	५७
ईरित	३७८	८७
ईर्मि	२२०	५४
ईर्वारु	१८०	१५५
ईर्ष्या	८०	२४
ईलित	३८५	१०९
ईली	२९४	९१
ईश	३१	३
	३१	३०
ईशा	३०६	१४
ईशान	१३	३०
ईशितृ	३५५	१०
ईश्वर	१३	३०
	३५५	१०
ईश्वरी	१६	३६
ईषत्	४४५	८
ईषत्पाण्डु	६०	१३
ईहा	८१	२७
ईहामृग	१८९	७

उ.

उ	४४८	१८
उक्त	३८४	१०७
उक्ति	६३	१
उक्थ	४५९	३०
उक्षन्	३२२	५९
उखा	३१२	३१
उख्य	३१८	४५
उग्र	१३	३२
	७८	२०
	३३९	२
उग्रगन्धा	१६२	१०२
	१७७	१४५
उच्च	३७२	७०
उच्चटा	१८२	१६०
उच्चण्ड	३७६	८३
उच्चार	२२५	६७

शब्दः	पृष्ठम्	श्लोकः
उच्चावच	३७६	८३
उच्चैःश्रवस्	१९	४५
उच्चैर्घुष्ट	६७	१२
उच्चैस्	४४७	१७
उच्छ्राय	१३०	१०
उच्छ्राय	१३०	१०
उच्छ्रित	३७२	७०
	४११	८५
उज्जासन	३००	११५
उज्ज्वल	७७	१७
उञ्छ	३०३	२
उञ्छशिल	३०३	२
उटज	११८	६
उडु	३७	२१
उडुप	९७	११
उड्डीन	२००	३७
उत	३८३	१०१
	४४१	२४३
	४४४	५
उताहो	४४४	५
उत्क	३५४	८
उत्कट	१७४	१३४
	३०९	२३
उत्कण्ठा	८१	२९
उत्कर	२०२	४२
उत्कर्ष	३९०	११
उत्कलिका	८१	२९
उत्कार	३९६	३६
उत्कोश	१९५	२३
उत्तंस	४३७	२२७
उत्त	३८४	१०५
उत्तप्त	२२३	६३
उत्तम	३६८	५७
उत्तमर्ण	३०३	५
उत्तमा	२०४	४
उत्तमाङ्ग	२३६	९५
उत्तर	६७	१०
	४३०	१९०
उत्तरा	३०	२
उत्तरासङ्ग	२४३	११७
उत्तरीय	२४३	११८
उत्तान	९८	१५

शब्दः	पृष्ठम्	श्लोकः
उत्तानशया	२१५	४१
उत्थान	४१७	११८
उत्थित	४११	८५
उत्पतितृ	३६०	२९
उत्पत्ति	५४	३०
उत्पतिष्णु	३६०	२९
उत्पत्र	४११	८५
उत्पल	१०६	३७
	१७१	१२६
उत्पलशारिवा	१६६	११२
उत्पात	२९९	१०९
उत्फुल्ल	१२९	७
उत्स	१२६	५
उत्सर्जन	२५९	२९
उत्सव	८६	३८
	४३३	२०९
उत्सादन	२४४	१२१
उत्साह	८२	२९
	२७२	१९
उत्साहन	४१६	११५
उत्साहवर्धन	७७	१८
उत्सुक	३५५	९
उत्सृष्ट	३८४	१०७
उत्सेध	१३०	१०
	४१३	९६
उदक्	४४९	२३
उदक	९३	४
	४५७	२२
उदक्या	२०९	२१
उदग्र	३७२	७०
उदज	३९६	३९
उदधि	९२	१
उदन्त	६६	७
उदन्या	३२१	५५
उदन्वत्	९२	१
उदपान	१०३	२६
उदय	१२४	२
उदर	२२९	७७
उदर्क	२७५	२९
उदवसित	११७	४
उदश्वित्	३२१	५३
उदात्त	६५	४

शब्दः	पृष्ठम्	श्लोकः
उदान	२६	६३
उदार	३५५	८
	४३०	१९२
उदासीन	२६९	१०
उदाहार	६६	९
उदित	३८४	१०७
उदीची	३०	२
उदीच्य	११२	७
	१७०	१२२
उदुम्बर	१३५	२२
	३३४	९७
उदुम्बरपर्णी	१७६	१४४
उदूखल	३१०	२५
उद्गत	३८१	९७
उद्गमनीय	२४१	११२
उद्गाढ	२७	६६
उद्गातृ	२५५	१७
उद्गार	३९६	३७
उद्गीथ	४५५	१९
उद्गूर्ण	३७९	८९
उद्ग्राह	३९६	३७
उद्ध	५३	२७
उद्धन	३९५	३५
उद्घाटन	३४६	२७
उद्घात	३९४	२६
उद्दान	२७४	२६
उद्दाल	१४०	३४
उद्दित	१८०	९५
उद्दाव	३००	१११
उद्धर्ष	८६	३८
उद्धव	८६	३८
उद्धान	३११	२९
उद्धार	३०३	४
उद्धृत	३७९	९०
उद्भव	५४	३०
उद्भिज्ज	३६६	५१
उद्भिद्	३६६	५१
उद्भिद	३६६	५१
उद्भम	३९०	१२
उद्यत	३७९	८९
उद्यम	३९०	११
उद्यान	१२८	३
	४१७	११७

शब्दः	पृष्ठम्	श्लोकः
उद्योग	४६०	३३
उद्र	१००	२०
उद्वर्तन	२४३	१२१
उद्वान्त	२७७	३६
	३८१	९७
उद्वासन	३००	११५
उद्वाह	२६६	५६
उद्वेग	१८६	१६९
	३९१	१२
उन्दुरु	१९१	१२
उन्नत	३७२	७०
उन्नतानत	३७२	६९
उन्नद्ध	४११	८५
उन्नय	३९०	१२
उन्नाय	३९०	१२
उन्मत्त	१५५	७७
	२२२	६०
उन्मद	३५८	२३
उन्मदिष्णु	३५८	२३
उन्मनस्	३५४	८
उन्माथ	३००	११५
	३४६	२६
उन्माद	८०	२६
	३५८	२३
उन्मादवत्	२२२	६०
उपकण्ठ	३७१	६७
उपकारिका	१२०	१०
उपकार्या	१२०	१०
उपकुञ्चिका	१७१	१२५
	३१४	३७
उपकुल्या	१६१	९६
उपक्रम	२५४	१३
	३९४	२६
	४२१	१३९
उपकोश	६७	१३
उपगत	३८५	१०९
उपगूहन	३९५	३०
उपग्रह	३०२	११९
उपग्राह्य	२७४	२८
उपन्न	३९२	१९
उपचरित	३८३	१०२
उपचाय्य	२५६	२०
उपचित	३७८	८९
उपचित्रा	१५८	८७

शब्दः	पृष्ठम्	श्लोकः
उपजाप	२७२	२१
उपज्ञा	२५४	१३
उपतप्त	३९१	१४
उपताप	२१८	५१
उपत्यका	१२७	७
उपदा	२७४	२८
उपधा	२७२	२१
	४२१	१३९
उपधान	२४९	१३७
उपधि	८२	३०
उपनाह	७४	७
उपनिधि	३२९	८१
उपनिषद्	४१३	९३
उपनिष्कर	११६	१८
उपन्यास	६६	९
उपपति	२१४	३५
उपप्लव	४६	१०
उपबर्ह	२४९	१३७
उपभृत्	२५८	२५
उपभोग	३९२	२०
उपमा	३४९	३६
	३५०	३७
उपमातृ	४२७	१७६
उपमान	३४९	३६
उपयम	२६६	५६
उपयाम	२६६	५६
उपरक्त	४६	१०
	३६४	४३
उपरक्षण	२७६	३३
उपराग	४६	९
उपराम	३९६	३७
उपरि	४२९	१८३
उपल	१२४	४
उपलब्धार्थी	६५	५
उपलब्धि	५५	९
उपलम्भ	३९४	२७
उपला	४३२	१९९
उपवन	१२७	२
उपवर्तन	११३	८
उपवर्ह	२४९	१३७
उपवास	२६१	३८
उपविषा	१६२	९९
उपवीत	२६५	४९
उपशल्य	१२३	२०

शब्दः	पृष्ठम्	श्लोकः
उपशाय	३९५	३२
उपश्रुत	३८५	१०९
उपसंख्यान	२४३	११७
उपसंपन्न	२५८	२६
	३१८	४५
उपसर	३९३	२५
उपसर्ग	२९९	१०९
उपसर्जन	३६९	६०
उपसर्या	३२५	७०
उपसूर्यक	४२	३२
उपस्कर	३१४	३५
उपस्थ	२२८	७५
उपस्पर्श	२६१	३६
उपहार	२७४	२८
	४३१	१९५
उपहर	४२८	१८३
उपांशु	२७३	२३
उपाकरण	२६२	४१
उपाकृत	२५८	२५
उपाख्य	२६१	३७
	३९५	३३
उपादान	३९१	१६
उपाधि	८१	२८
	३५६	१२
उपाध्याय	२५२	७
उपाध्याया	२०८	१४
उपाध्यायानी	२०८	१५
उपाध्यायी	२०८	१४
	२०८	१५
उपानह्	३४७	३०
उपाय (चतुष्ट)	२७२	२०
उपायन	२७४	२८
उपालम्भ	६८	१४
उपावृत्त	२८२	५०
उपासङ्ग	२९३	८८
उपासन	२९२	८६
उपासना	२६०	३५
उपासित	३८६	१०२
उपाहित	४६	१०
	३८०	९२
उपेन्द्र	९	२०
उपोदका	१८१	१५७

शब्दः	पृष्ठम्	श्लोकः
उपोद्घात	६६	९
उपकृष्ट	३०४	८
उभयद्युस्	४४९	२१
उभयेद्युस्	४४९	२१
उमा	१६	३६
	३०८	२०
उमापति	१३	३४
उरःसूत्रिका	२३९	१०४
उरग	८९	८
उरण	३२७	७६
उरणाख्य	१७७	१४७
उरभ्र	३२७	७६
उररी	४४२	२५४
उररीकृत	३८५	१०८
उरश्छद	२८६	६४
उरस्	२२९	७८
उरसिल	२८९	७६
उरस्य	२११	२८
उरस्यत्	२८९	७६
उरुबूक	१४५	५१
उर्वरा	१११	४
उर्वशी	२२	५२
उर्वी	११०	३
उलप	१३०	९
उलूक	१८५	१५
उलूखल	३१०	२५
उलूखलक	१४०	३४
उलूपिन्	९९	१८
उल्का	४५१	८
उल्मुक	३१२	३०
उल्लाघ	२२१	५७
उल्लोच	२४३	१२०
उल्लोल	९५	६
उल्व	२१४	३८
उल्वण	३७६	८१
उशनस्	३९	२५
उशीर	१८४	१६४
उषणा	१६१	९७
उषर्बुध	२२	५४
उषस्	४४	२

शब्दः	पृष्ठम्	श्लोकः
उषा	४४८	१८
उषापति	१२	२७
उषित	३८२	९९
उष्ट्र	३२७	७५
उष्ण	५०	१९
	३४४	१९
	४५७	२२
उष्णरश्मि	४०	२९
उष्णिका	३२०	५०
उष्णीष	४३६	२२०
उष्णोपगम	५०	१९
उस्र	४२	३३
उस्रा	३२४	६६

ऊ

शब्दः	पृष्ठम्	श्लोकः
ऊत	३८३	१०१
ऊधस्	३२६	७३
ऊन	४१८	१२८
ऊम्	४४८	१८
ऊररी	४४२	२५४
ऊरव्य	३०२	१
ऊरी	४४२	२५४
ऊरीकृत	३८५	१०८
ऊरु	२२७	७३
ऊरुज	३०२	१
ऊरुपर्वन्	२२७	७२
ऊर्ज	४९	१८
ऊर्जस्वल	२८९	७५
ऊर्जस्विन्	२८९	७५
ऊर्णनाभ	१९१	१३
ऊर्णा	४०५	५०
ऊर्णायु	३२७	७६
	३३७	१०७
ऊर्ध्वक	७३	५
ऊर्ध्वजानु	२१७	४७
ऊर्ध्वज्ञु	२१७	४७
ऊर्मि	९४	५
ऊर्मिका	२३९	१०७
ऊर्मिमत्	३७२	७१
ऊष	१११	४
ऊषण	३१४	३६
ऊषर	१११	५
ऊषवत्	१११	५

शब्दः	पृष्ठम्	श्लोकः
ऊष्मक	५०	१८
ऊष्मागम	५०	१९
ऊह	५६	३

ऋ

शब्दः	पृष्ठम्	श्लोकः
ऋक्थ	३३१	९०
ऋक्ष	३७	२१
	१४७	५७
	१८७	४
ऋक्षगन्धा	१६५	११०
	१७४	१३७
ऋच्	६४	३
ऋजीष	३१३	३२
ऋज्र	३७३	७२
ऋण	३०३	३
ऋत	३०३	२
ऋतीया	३९५	३२
ऋतु	४७	१३
	४०७	६१
ऋतुमती	२०९	२१
ऋते	४४४	३
ऋत्विज्	२५५	१७
ऋध	२९८	१०४
ऋद्ध	३०९	२३
ऋद्धि	१६६	११२
ऋभु	५	८
ऋभुक्षिन्	१७	४४
ऋष्य	९०	१०
ऋषभ	७१	१
	१६८	११६
	३२२	५९
	३६९	५९
ऋषि	२६३	४३
ऋष्यप्रोक्ता	१५८	८७
	१६२	१०१

ए

शब्दः	पृष्ठम्	श्लोकः
एक	३७६	८३
	३९९	१६
एकक	३७६	८२
एकगुरु	२५४	१२
एकतान	३७५	७९
एकताल	३७२	३
एकदन्त	१६	३८
एकदा	४४९	२२
एकधुर	३२४	६५
एकधुरावह	३२४	६५
एकधुरीण	३२४	६५
एकपदी	११४	१५
एकपिङ्ग	२८	६९
एकयष्टिका	२३९	१०६
एकसर्ग	३७५	८०
एकहायनी	३२५	६८
एकाकिन्	३७६	८२
एकाम्र	३७५	७९
	४३०	१९०
एकाम्र्य	३७५	८०
एकान्त	२७	६७
एकाब्दा	३२५	६८
एकायन	३७५	७९
एकायनगत	३७५	८०
एकावली	२३९	१०६
एकाष्ठील	१५६	८१
एकाष्ठीला	१५७	८५
एड	२१७	४८
एडक	३२७	७६
एडगज	१७७	१४७
एडमूक	३६२	३८
एडूक	११७	४
एण	१९०	१०
एत	६२	१५
एतर्हि	४४९	२३
एध	१३२	१३
एधस्	१३२	१३
एधित	३७४	७६
एनस्	५१	२३
एरण्ड	१४५	५१
एला	१६९	१२५
एलापर्णी	१७५	१४०
एकावालुक	१६९	१२१
एवम्	४४२	२५०
	४४५	९
	४४६	१२
	४४७	१५
	४४७	१६
एषणिका	३४८	३२
एषिका	३४८	३२

ऐ

शब्दः	पृष्ठम्	श्लोकः
ऐकागारिक	३४५	२४
ऐङ्गद	१३४	१८
ऐडविड	२८	६९
ऐण	१८९	८

शब्दः	पृष्ठम्	श्लोकः
ऐणेय	१८९	८
ऐतिह्य	२५४	१२
ऐन्द्रियक	३७५	७९
ऐरावण	२०	३६
ऐरावत	२०	४६
	३१	३
	१४१	३८
ऐरावती	३२	९
ऐलेय	१६९	१२१
ऐश्वर्य	१६	३६
ऐषमस्	४४८	२०
ओ		
ओकस्	४३९	२३३
ओघ	७४	९
	२०१	३९
	४०१	२७
ओङ्कार	६५	४
ओजस्	४३९	२३३
ओड्रपुष्प	१५४	७६
ओतु	१८८	६
ओदन	३१९	४८
ओम्	४४६	१२
ओष	३८९	९
ओषधी	१२९	६
ओषधीश	३४	१४
ओष्ठ	२३३	९०
औ		
औक्षक	३२३	६०
औचिती	४६२	३९
औचित्य	४६२	३९
औत्तानपादि	३७	२०
औदनिक	३११	२८
औदरिक	३५८	२१
औपगवक	३९६	३९
औपयिक	२७३	२४
औपवस्त	२६१	३८
औरभ्रक	३२७	७७
औरस	२११	२८
और्ध्वदेहिक	२५९	३०
और्व	२४	५६
औशीर	४२९	१८५
औषध	१७४	१३५
	२१८	५०

शब्दः	पृष्ठम्	श्लोकः
औष्ट्रक	३२७	७७
क		
क	३९७	५
कंस	३१३	३२
कंसारति	९	२१
ककुद	४१३	९२
ककुभ्मती	२२७	७४
ककुभ्	३०	१
ककुभ	७३	७
	१४४	४५
कक्कोलक	२४७	१३०
कक्खट	३७४	७६
कक्ष	२२९	७९
	४३५	२१९
कक्ष्या	२७९	४२
	४२४	१५८
कङ्क	१९२	१६
कङ्कटक	२८६	६४
कङ्कण	२४०	१०८
कङ्कतिका	२४९	१३९
कङ्काल	२२५	६९
कङ्कु	३०८	२०
कच	२३६	९५
कचर	३६८	५५
कचित्	४४७	१४
कच्छ	११३	१०
	१७१	१२८
कच्छप	१००	२१
कच्छपी	४१९	१३३
कच्छु	२१९	५३
कच्छुर	२२१	५८
कच्छुरा	१५९	९२
कञ्चुक	९०	९
	२८५	६३
कञ्चुकिन्	२६८	८
कट	२२७	७४
	२७७	३७
	३१०	२६
	४०८	३४
कटक	१२५	५
	२३९	१०७
कटभी	१७८	१५०
कटंवरा	१५७	८५
कटम्भरा	१७९	१५३

शब्दः	पृष्ठम्	श्लोकः
कटाक्ष	२३५	९४
कटाह	४५६	२१
कटि	२२७	७४
कटिप्रोथ	२२८	७५
कटी	४६१	३८
कटु	५८	९
	१५७	८५
	४०३	३५
कटुतुम्बी	१८०	१५६
कटुरोहिणी	१५७	८५
कट्फल	१४२	४०
कट्वङ्ग	१४७	५६
कठिञ्जर	१५५	७९
कठिन	३७४	७६
कठिल्लक	१८०	१५४
कठोर	३७४	७६
कडङ्गर	३०९	२२
कडम्ब	३१४	३५
कडार	६१	१६
कण	३६९	६२
	४०५	४६
कणप	४५५	२०
कणा	१६१	९६
	३१४	३६
कणिका	१५०	६६
	४५१	८
कणिश	३०८	२१
कण्टक	४६०	३२
कण्टकारिका	१६०	९३
कण्टकिफल	१४८	६१
कण्ठ	२३२	८८
कण्ठभूषा	२३८	१०४
कण्डू	२१९	५३
कण्डूया	२१९	५३
कण्डूरा	१५८	८६
कण्डोल	३१०	२६
कण्डोलवीणा	३४८	३१
कत्तृण	१८४	१६६
कथा	६५	६
कदध्वन्	११५	१६
कदम्ब	१४३	४२
कदम्बक	२०१	४०
	३०७	१७

शब्दः	पृष्ठम्	श्लोकः
कदर	१४५	५०
कदर्य	३६५	४८
कदली	१६६	११३
	१८९	९
कदाचित्	४४४	४
कदुष्ण	४३	३५
कद्रु	६१	१६
कद्रूद	३६२	३७
कनक	३३३	९४
कनकाध्यक्ष	२६८	७
कनकालुका	२७६	३२
कनकाह्वय	१५५	७७
कनिष्ठ	२१६	४३
	४०४	४१
कनिष्ठा	२३१	८२
कनीनिका	२३५	९२
कनीयस्	३७०	६२
	४३९	२३५
कन्था	४५२	९
कन्द	१८१	१५७
	४६१	३५
कन्दर	१२६	६
कन्दराल	१४३	४३
कंदर्प	१२	२५
कन्दली	१८९	९
कन्दु	३१२	३०
कन्दुक	२४९	१३८
कंधरा	२३३	८८
कन्यकाजात	२११	२४
कन्या	२०५	८
कपट	८२	३०
कपर्द	१५	३५
कपर्दिन्	१३	३२
कपाट	१२२	१७
कपाल	२२५	६८
कपालभृत्	१३	३२
कपि	१८७	३
कपिकच्छु	१५८	८७
कपित्थ	१३५	२१
कपिल	६१	१६
कपिला	३१	३
	१४९	६४
	१६९	१२०

शब्दः	पृष्ठम्	श्लोकः
कपिवल्ली	१६१	९७
कपिश	६१	१६
कपीतन	१३७	२७
	१४३	४३
	१४९	६३
कपोत	१९२	१४
कपोतपालिका	१२२	१५
कपोताङ्घ्रि	१७२	१२९
कपोल	२३४	९०
कफ	२२३	६२
कफिन्	२२२	६०
कफोणि	२३०	८०
कबन्ध	९३	४
	३००	११८
कम्	४४२	२५०
कमठ	१००	२१
कमठी	१०२	२४
कमण्डलु	२६४	४६
कमन	३५९	२४
कमल	९३	३
	१०७	४०
	४३१	१९४
कमला	१२	२७
कमलासन	८	१७
कमकोत्तर	३३७	१०६
कमितृ	३५९	२३
कम्प	८६	३८
कम्पन	३७४	७४
कम्प्र	३७४	७४
कम्बल	२४३	११६
	४३१	१९४
कम्बलिवाह्यक	२८३	५२
कम्बि	३१३	३४
कम्बु	१०१	२३
	४१९	१३३
कम्बुग्रीवा	२३३	८८
कम्र	३५९	२४
कर	४२	३३
	२७४	२७
	४२५	१६४
करक	३४	१२
	१५०	६४
	३९८	६

शब्दः	पृष्ठम्	श्लोकः
करज	१४४	४७
	१७२	१२९
करञ्जक	१४४	४७
करट	१९४	२०
	४०२	३४
करण	३३९	२
	४०६	५४
करण्ड	४५४	१८
करतोया	१०५	३३
करपत्र	३४९	३४
करपाल	२९३	८९
करपालिका	२९४	९१
करभ	२३१	८१
	३२७	७५
करभूषण	२४०	१०८
करमर्दक	१५१	६७
करम्भ	३१९	४८
कररुह	२३१	८३
करवालिका	२९४	९१
करवीर	१५४	७७
करशाखा	२३१	८२
करशीकर	२७७	३७
करहाट	१०८	४३
करहाटक	१४६	५२
कराल	४३३	२०५
करिगर्जित	२९९	१०७
करिणी	२७६	३६
करिन्	२७६	३४
करिपिप्पली	१६१	९७
करिशावक	२७६	३५
करीर	१५४	७७
	४२७	१७३
करीष	३२०	५१
करुणा	७७	१७
	७८	१८
करेटु	१९३	१९
करेणु	४०६	५२
करोटि	२२६	६९
कर्क	२८०	४६
कर्कटक	१००	२१
कर्कटी	१८०	१५५
कर्कन्धु	१४०	३६
	४६१	३८
कर्करी	३१२	३१

शब्दः	पृष्ठम्	श्लोकः
कर्करेटु	१९३	१९
कर्कश	१७७	१४६
	४३५	२१७
कर्कारु	१८०	१५५
कर्चूर	१८०	१५४
कर्चूरक	१७४	१३५
कर्ण	२३५	९४
कर्णजलौकस्	१९१	१३
कर्णधार	९७	१२
कर्णवेष्टन	२३८	१०३
कर्णिका	२३८	१०३
	३९९	१५
कर्णिकार	१४८	६०
कर्णीरथ	२८३	५२
कर्णेजप	३६५	४७
कर्तरी	३४९	३३
कर्दम	९६	९
कर्पट	२४२	११५
कर्पर	२२५	६८
कर्पराल	१३७	२९
कर्परी	३३५	१०१
कर्पास	४६१	३५
कर्पूर	२४८	१३०
कर्बुर	२५	६०
	६२	१७
	३३३	९४
कर्म	३८६	१
कर्मकर	३४३	१५
	३५७	१९
कर्मकार	३५७	१९
कर्मक्षम	३५७	१८
कर्मठ	३५७	१८
कर्मण्या	३५०	३८
कर्मन्दिन्	२६२	४१
कर्मवृत्त	३८७	३
कर्मशील	३५७	१८
कर्मशूर	३५७	१८
कर्मसचिव	२६७	४
कर्मार	१८२	१६०
कर्मेन्द्रिय	५८	८
कर्ष	३३०	८६
कर्षक	३०३	६
कर्षफल	१४७	५८

शब्दः	पृष्ठम्	श्लोकः
कर्षू	४३६	२२२
कल	७२	८
कलकल	७१	२५
कलङ्क	३५	१७
	३९७	४
कलत्र	४२७	१७८
कलधौत	४१०	७६
कलम्ब	२९२	८७
	३१४	३५
कलभ	२७६	३५
कलम	३०९	२४
कलम्बी	१८१	१५७
कलरव	१९२	१४
कलल	२१४	३८
कलविङ्क	१९३	१८
कलशि	१६०	९३
कलस	३१२	३१
कलहंस	१९५	२३
कलह	२९८	१०४
कला	३५	१५
	४७	११
	४३१	१९८
कलाद	३४१	८
कलानिधि	३४	१४
कलाप	४१८	१२९
कलाय	३०६	१६
कलि	२९८	१०५
	४३१	१९४
कलिका	१३३	१६
कलिङ्ग	१५१	६७
	१९३	१६
कलिद्रुम	१४७	५८
कलिमारक	१४५	४८
कलिल	३७७	८५
कलुष	५१	२३
	९८	१४
कलेवर	२२६	७०
कल्क	३९९	१४
कल्प	५१	२१
	५१	२२
	२६२	४०
	२७३	२४
कल्पना	२७९	४२

शब्दः	पृष्ठम्	श्लोकः
कल्पवृक्ष	२१	५०
कल्पान्त	५१	२२
कल्मष	५१	२३
कल्माष	६२	१७
कल्य	४४	२
	२२१	५७
	४२४	१५९
कल्या	६९	१८
कल्याण	५२	२५
कल्लोल	९५	६
कवच	२८६	६४
कवरी	१७५	१३९
	२३६	९७
	३१६	४०
कवल	३२१	५४
कवि	३९	२५
	२५०	५
कविका	२८२	४९
कविय	४६१	३५
कवोष्ण	४३	३५
कव्य	२५७	२४
कशा	३४९	३१
कशार्ह	३६४	४४
कशिपु	४१९	१३०
कशेरु	४५३	१३
कशेरुका	२२५	६९
कश्मल	३००	१०९
कश्य	२८१	४७
	३५०	४०
	३६४	४४
कष	३४८	३२
कषाय	५८	९
	४२२	१५३
कष्ट	९२	४
	४०३	३९
कस्तूरी	२४७	१२९
कह्लार	१०६	३६
कह्व	१९५	२२
काङ्क्षा	८१	२७
कांस्यताल	७३	४
काक	१९४	२०
काकचिञ्चा	१६१	९८
काकतिन्दुक	१४१	३९
काकनासिका	१६९	११८
काकपक्ष	२३६	९६
काकपीलुक	१४१	३९
काकमाची	१७९	१५१
काकमुद्गा	१६७	११३
काकली	७२	२
काकाङ्गी	१६९	११८
काकिणी	४५२	९
काकु	६७	१२
काकुद	२३४	९१
काकेन्दु	१४१	३९
काकोदुम्बरिका	१४९	६१
काकोदर	८९	७
काकोल	९०	१०
	१९४	२१
काक्षी	१७२	१३१
काच	३३४	९९
	३४७	३०
	४०१	२८
काचस्थाली	१४६	५४
काचित	३७९	८९
काञ्चन	३३३	९५
काञ्चनी	३१६	४१
काञ्ची	२४०	१०८
काञ्जिक	३१५	३९
काण्ड	४०४	४३
काण्डपृष्ठ	२८७	६७
काण्डवत्	२८७	६९
काण्डीर	२८७	६९
काण्डेक्षु	१६३	१०४
कातर	३५९	३६
कात्यायनी	१६	३६
	२०९	१७
कादम्ब	१९५	२३
कादम्बरी	३५०	३९
कादम्बिनी	३२	८
काद्रवेय	८७	४
कानन	१२७	१
कानीन	२११	२४
कान्त	३६७	५२
कान्तलक	१७१	१२८
कान्ता	२०४	३
कान्तार	११५	१७
	४२६	१७२
कान्तारक	१८३	१६३
कान्ति	३६	१७
कान्दविक	३११	२८
कान्दिशीक	३६३	४२
कापथ	११५	१६
कापोत	२०२	४३
	३३८	१०९
कापोताञ्जन	३३५	१००
काम	१२	५२
	८२	२८
	३२२	५७
	४२०	१३८
कामगामिन्	२८९	७६
कामन	३५९	२४
कामपाल	११	२३
काममू	४४७	१३
कामयितृ	३५९	२४
कामिनी	२०४	३
	४१६	११२
कामुक	३५९	२३
कामुका	२०६	९
कामुकी	२०७	९
काम्पिल्य	१७७	१४६
काम्बल	२८३	५४
काम्बविक	३४१	८
काम्बोज	२८०	४५
काम्बोजी	१७५	१३८
काम्यदान	३८७	३
काय	३२६	७१
काय (तीर्थ)	२६५	५०
कायस्था	१४८	५९
कारण	५४	२८
कारणा	९२	३
कारणिक	३५४	७
कारण्डव	१९९	३४
कारम्भा	१४७	५६
कारवी	१६६	१११
	१७९	१५२
	३१४	३७
	३१६	४०
कारवेल्ल	१८०	१५४
कारा	३०२	११९
कारिका	३९९	१५
कारीष	३९७	४३
कारु	३४०	५
कारुणिक	३५६	१५
कारुण्य	७८	१८
कारोत्तर	३५१	४२
कार्तस्वर	३३३	९५
कार्तान्तिक	२७०	१४
कार्तिक	४९	१७
कार्तिकिक	४९	१८
कार्तिकेय	११	३९
कार्पास	२४१	१११
कार्पासी	१६८	११६
कार्म	३५७	१८
कार्मण	३८७	४
कार्मुक	२९१	८३
कार्षापण	३३१	८८
कार्षिक	३३१	८८
कार्ष्य	१४३	४४
काल	२४	५९
	४३	१
	६०	१४
	४३०	१९४
कालक	२१८	४९
कालकण्ठक	१९४	२१
कालकूट	९०	१०
कालखण्ड	२२४	६६
कालधर्म	३००	११६
कालपृष्ठ	२९१	८३
कालमेण्डिका	१५९	९०
कालमेषिका	१६५	१०९
कालमेषी	१६१	९६
कालशेय	३२१	५३
कालसूत्र	९१	२
कालस्कन्ध	१४१	३८
	१५१	६८
काला	१६०	९४
	१६५	१०९
	३१४	३७
कालागुरु	२४६	१२७
कालानुसार्य	१७०	१२२
	२४५	१२६

शब्दः	पृष्ठम्	श्लोकः
कालायस	३३४	९८
कालिका	३९९	१५
कालिन्दी	१०५	३२
कालिन्दीभेदन	१११	२४
काली	१६	३६
कालीयक	२४५	१२६
कालेयक	१६२	१०१
काल्पक	१७४	१३५
काल्या	३२५	७०
कावचिक	२८७	६६
कावेरी	१०५	३५
काव्य	३९	२५
काश	१८३	१६२
काश्मरी	१४०	३५
काश्मर्य	१४०	३६
काश्मीर	१७७	१४५
काश्मीरजन्मन्	१४५	१२४
काश्यपि	४२	३२
काश्यपी	११०	२
काष्ठ	१३१	१३
काष्ठकुद्दाल	९७	१३
काष्ठतक्ष	३४१	९
काष्ठा	३०	१
	४७	११
	४०४	४१
काष्ठाम्बुवाहिनी	९७	११
काष्ठीला	१६६	११३
कास	२१९	५२
कासमर्द	४५५	१९
कासर	१८८	४
कासार	१०३	२८
किंशारु	३०८	२१
	४२५	१६३
किंशुक	१३८	२९
किकीदिवि	१९२	१६
किंकर	३४३	१७
किंकिणी	२४१	११०
किंचित्	४४५	८
किंचुलक	१०१	२२
किंजल्क	१०८	४३
किटि	१८७	२
किट्ट	२२४	६५

शब्दः	पृष्ठम्	श्लोकः
किण	४५४	१८
किणिही	१५८	८९
किण्व	३५१	४२
कितव	१५५	७७
	३५१	४४
किंनर	६	११
	२९	७१
किंनरेश	२८	६९
किम्	४४२	२५१
	४४४	५
किमु	४४४	५
किमुत	४४३	२
	४४४	५
किंपचान	३६५	४८
किंपुरुष	२९	७१
किंवदन्ती	६६	७
किर	१८७	२
किरण	४२	३३
किरात	३४४	२०
किराततिक्त	१७६	१४३
किरीट	२३८	१०२
किर्मीर	६२	१७
किल	४४२	२५४
किलास	२१९	५३
किलासिन्	२२२	६१
किलिञ्जक	३१०	२६
किल्बिष	५१	२२
	४३६	२२३
किशोर	२८१	४६
किष्कु	३९८	७
किसलय	१३२	१४
कीकस	२२५	६८
कीचक	१८३	१६१
कीनाश	४३५	२१५
कीर	१९५	२१
कीर्ति	६७	११
कील	२४	५७
	४३१	१९७
कीलक	३२६	७३
कीलाल	९३	३
	४३२	२००
कीलित	३६३	४२

शब्दः	पृष्ठम्	श्लोकः
कीश	१८७	३
कीशपर्णी	१५८	८९
कु	११०	३
	४४०	२४०
कुकर	२१७	४८
कुकुन्दर	२२८	७५
कुकूल	४३२	२३०
कुकुट	१९३	१७
कुकुभ	१९९	३५
कुक्कुर	१७३	१३२
	३४५	२१
कुक्षि	२२९	७७
कुक्षिंभरि	३५८	२१
कुङ्कुम	१४५	१२३
कुच	२२९	७७
कुचन्दन	२४७	१३२
कुचर	३६२	३७
कुचाग्र	२२९	७७
कुज	३९	२५
कुञ्चित	३७२	७१
कुञ्ज	१२७	८
	४०२	३१
कुञ्जर	२७६	३४
	३६९	५९
कुञ्जराशन	१३५	२०
कुञ्जल	३१५	३९
कुट	१२८	५
	३१२	३२
कुटंक	३०५	१३
कुटज	१५०	६६
कुटनट	१४७	५७
	१७३	१३१
कुटिल	३७२	७१
कुटी	११८	६
	४६१	३८
कुटुम्बव्याप्रृत	३५६	११
कुटुम्बिनी	२०५	६
कुट्टनी	२०९	१९
कुट्टिम	४६०	३४
कुट्मल	१३४	१६
कुठर	३२६	७४
कुठार	२९४	९२
कुठेरक	१५५	७९
कुडव	३३१	८९

शब्दः	पृष्ठम्	श्लोकः
कुडङ्गक	४५४	१७
कुड्य	११७	४
कुणप	३०१	११८
कुणि	१७१	१२८
	२१७	४८
कुण्ठ	३५७	१७
कुण्ड	२१४	३६
	३१२	३१
कुण्डल	२३८	१०३
कुण्डलिन्	८९	७
कुण्डी	२६४	४६
कुतप	२५९	३१
कुतुक	८२	३१
कुतुप	३१३	३३
कुतू	३१३	३३
कुतूहल	८२	३१
कुत्सा	६७	१३
कुत्सित	३६७	५४
कुथ	१८४	१६६
	२७९	४२
कुद्दाल	९७	२२
	१३५	२२
कुनटी	३३८	१०८
कुनाशक	१५९	११
कुन्त	२९५	९३
कुन्तल	२३६	९५
कुन्द	१५३	७३
	१७०	१२१
	४५५	१९
कुन्दुरु	१७०	१२१
कुन्दुरुकी	१७०	१२४
कुपूय	३६७	५४
कुप्य	३३२	९१
कुबेर	२८	६८
	३१	३
कुबेरक	१७१	१२७
कुबेराक्षी	१४६	५५
कुब्ज	२१७	४८
कुमार	१७	४०
	७५	१२
कुमारक	१३६	२५
कुमारी	१५३	७३
	२०५	८

शब्दः	पृष्ठम्	श्लोकः
कुमुद	३१	३
	१०६	३७
कुमुदबान्धव	३४	१३
कुमुदिका	१४२	४०
कुमुदिनी	१०७	३९
कुमुद्वत्	११३	९
कुमुद्वती	१०७	३८
कुम्बा	२५६	१८
कुम्भ	१४०	३४
	२७७	३७
	४२०	१३४
कुम्भकार	३४०	६
कुम्भसंभव	३७	२०
कुम्भिका	१०७	३८
कुम्भी	१४२	४०
कुम्भीर	१०१	२१
कुरङ्ग	१८९	८
कुरङ्गक	३४५	२४
कुरण्टक	१५४	७५
कुरुबक	१५३	७५
कुरर	१९५	२३
कुरुण्टक	१५४	७४
कुरुवक	१५४	७४
कुरुविन्द	१८२	१५९
कुरुविन्द	३३०	८६
कुल	२०२	४१
	२५०	१
कुलक	१४१	३९
	१८०	१५५
	३४०	५
कुलटा	२०७	१०
कुलत्थिका	३३६	१०२
कुलपालिका	२०५	७
कुलश्रेष्ठिन्	३४०	५
कुलसंभव	२५१	२
कुलस्त्री	२०५	७
कुलाय	२००	३७
कुलाल	३४०	६
कुलाली	३३६	१०२
कुलिश	२०	४७
कुली	१६०	९४
कुलीन	२५१	३
कुलीर	१००	२१
कुल्माष	३०७	१८
	४५६	२१
कुल्माषाभिषुत	३१५	३९
कुल्य	२२५	६८
कुल्या	१०५	३४
कुवल	१४१	३६
	४६२	४२
कुवलय	१०६	३७
कुवाद	३६२	३७
कुविन्द	३४०	६
कुवेणी	९८	१६
कुश	१८४	१६६
	४३५	२१६
कुशल	५२	२६
	३५३	४
	४३२	२०४
कुशी	३३४	९९
कुशीलव	३४२	१२
कुशेशय	१०७	४०
कुष्ठ	१७१	१२६
	२२०	५४
	४६०	३४
कुसीद	३०३	४
कुसीदिक	३०३	५
कुसुम	१३४	१७
कुसुमाजन	३३६	१०३
कुसुमेषु	१२	२६
कुसुम्भ	३३७	१०६
	४२०	१३६
कुसृति	८२	३०
कुस्तुम्बुरु	३१५	३८
कुहना	२६६	५३
कुहर	८६	१
कुहू	४६	९
कूकुद	३५६	१४
कूट	१२५	४
	२०२	४२
	२०२	३७
कूटयन्त्र	३४६	२६
कूटशाल्मलि	१४४	४७
कूटस्थ	३७३	७३
कूप	१०३	२६
कूपक	९६	१०
	९७	१२
	२२८	७५
कूबर	२८४	५७
कूर्च	२३५	९२
कूर्चशीर्ष	१७६	११२
कूर्चिका	३१७	४४
कूर्दन	८४	३३
कूर्पर	२३०	८०
कूर्पासक	२४३	११८
कूर्म	१००	२१
कूल	९५	७
कूष्माण्डक	१८०	१५५
कृकण	१९४	१९
कृकलास	१९१	१२
कृकवाकु	१९३	१७
कृकाटिका	२३३	८८
कृच्छ्र	९२	४
	२६५	५२
कृत	४१०	७७
कृतपुङ्ख	२८७	६८
कृतमाल	१३६	२४
कृतमुख	३५३	४
कृतलक्षण	३५५	१०
कृतसापत्निक	२०५	७
कृतहस्त	२८७	६८
कृतान्त	२४	५८
	४०८	६४
कृताभिषेका	२०४	५
कृतिन्	२५०	६
	३५३	४
कृत्त	३८३	१०३
कृत्ति	२६४	४७
कृत्तिवासस्	१३	३१
कृत्या	४२४	१५८
कृत्रिमधूपक	२४६	१२८
कृत्स्न	३७१	६५
कृपण	३६५	४८
कृपा	७८	१८
कृपाण	२९३	८९
कृपाणी	३४९	३३
कृपालु	३५६	१५
कृपीटयोनि	२२	५३
कृमिकोशोत्थ	२४१	१११
कृमिघ्न	१६४	१०६
कृमिज	२४६	१२६
कृश	३६९	६१
कृशानु	२२	५४
कृशानुरेतस्	१३	३३
कृशाश्विन्	३४२	१२
कृषि	३०३	२
कृषिक	३०३	६
	३०५	१३
कृषीवल	३०३	६
कृष्ट	३०४	८
कृष्टि	२५१	६
कृष्ण	९	१८
	४७	१४
	६०	१४
	३१४	३६
कृष्णपाकफल	१५१	६७
कृष्णफला	१६१	९६
कृष्णभेदी	१५७	८६
कृष्णला	१६१	९८
कृष्णलोहित	६१	१६
कृष्णवर्त्मन्	२२	५४
कृष्णवृन्ता	१४६	५५
कृष्णसार	१९०	१०
कृष्णा	१६१	९६
कृष्णिका	३०७	१९
केकर	२१८	४९
केका	१९८	३१
केकिन्	१९८	३०
केतकी	१८६	१७०
केतन	२९७	९९
	४१६	११४
केतु	४०७	६०
केदर	४५५	२०
केदार	३०४	११
केनिपातक	९७	१३
केयूर	२३९	१०७
केलि	८४	३२
केवल	४३२	२०३
केश	२३६	९५
केशाम्बुनामन्	१७०	१२२

शब्दः	पृष्ठम्	श्लोकः
केशपाशी	२३६	९७
केशव	९	१८
	२१६	४५
केशवेश	२३६	९७
केशिक	२१६	४५
केशिन्	२१६	४५
केशिनी	१७१	१२६
केसर	१०८	४३
	१३६	२५
	१५०	६५
केसरिन्	१८६	१
कैटभजित्	९	२२
कैटर्य	१४२	४०
कैतव	८२	३०
	३५२	४४
कैदारक	३०५	११
कैदारिक	३०५	११
कैदार्य	३०५	११
कैरव	१०६	३७
कैलास	२९	७०
कैवर्त	९८	१५
कैवर्तीमुस्तक	१७३	१३२
कैवल्य	५७	६
कैशिक	२३६	९६
कैश्य	२३६	९६
कोक	१८९	७
	१९५	२२
कोकनद	६१	१२
	१०८	४२
कोकनदच्छवि	६१	१५
कोकिल	१९४	१९
कोकिलाक्ष	१६३	१०४
कोटर	१३२	१३
कोटवी	२०८	१७
कोटि	२९१	८४
	२९५	९३
	४०३	३८
कोटिवर्षा	१७३	१३३
कोटिश	३०५	१२
कोट्टार	४५४	१८
कोठ	२२०	५४
कोण	७३	६
	२९५	९३

शब्दः	पृष्ठम्	श्लोकः
कोदण्ड	२९१	८३
कोद्रव	३०७	१६
कोप	८०	२६
कोपना	२०४	४
कोपिन्	३६१	३२
कोमल	३७५	७८
कोयष्टिक	१९९	३५
कोरक	१३३	१६
कोरङ्गी	१७१	१२५
कोरदूषक	३०७	१६
कोल	९७	११
	१४१	३६
	१८७	२
कोलक	२४७	१२९
	३१४	३६
कोलदल	१७२	१३०
कोलम्बक	७४	७
कोलवल्ली	१६१	९७
कोला	१६१	९७
कोलाहल	७१	२५
कोली	१४०	३६
कोविद	२५१	५
कोविदार	१३५	२२
कोशफल	२४७	१३०
कोशातकी	३९८	८
कोष	२००	३७
	३३२	९१
	४३६	२२१
कोष्ठ	४०३	४०
कोष्ण	४३	३५
कौक्कुटिक	३९९	१७
कौक्षेयक	२९३	८९
कौटतक्ष	३४१	९
कौटिक	३४३	१४
कौणप	२५	५९
कौतुक	८२	३१
कौतूहल	८२	३१
कौद्रवीण	३०४	८
कौन्तिक	२८८	७०
कौन्ती	१६९	१२०
कौपीन	४१७	१२३
कौमुदी	३५	१६

शब्दः	पृष्ठम्	श्लोकः
कौमोदकी	१३	२८
कौलटिनेय	२११	२७
कौलटेय	२११	२६
	२११	२७
कौलटेर	२११	२६
कौलीन	४१७	११६
कौलेयक	३४५	२१
कौशिक	१४०	३४
	३९८	१०
कौशेय	२४१	१११
कौस्तुभ	१३	२८
क्रकच	३४९	३४
क्रकर	१५४	७७
	१९४	१९
क्रतु	२५४	१३
क्रतुध्वंसिन्	१३	३४
क्रतुभुज्	५	९
क्रथन	३००	११५
क्रन्दन	२९९	१०७
	४१७	१२३
क्रन्दित	८५	३५
क्रम	२६२	४०
क्रमुक	१४२	४१
	१४२	४१
	१८५	१६९
क्रमेलक	३२७	७५
क्रयविक्रयिक	३२८	७८
क्रयिक	३२८	७९
क्रव्य	३२९	८१
क्रव्य	२२३	६३
क्रव्याद	२५	५९
क्रव्याद्	२५	५९
क्रायिक	३२८	७९
क्रिमि	१९१	१३
क्रिया	६३	२
	४२४	१५७
क्रियावत्	३५७	१८
क्रीज	८४	३२
	८४	३३
क्रुञ्च	१९५	२२
क्रुध	८०	२६
क्रुष्ट	८५	३५

शब्दः	पृष्ठम्	श्लोकः
क्रूर	३६५	४७
	३७४	७६
	४३०	१९१
क्रेतव्य	३२९	८१
क्रेय	३२९	८१
क्रोड	१८७	२
	२२९	७७
क्रोध	८०	२६
क्रोधन	३६१	३२
क्रोशयुग	११५	१८
क्रोष्टु	१८८	५
क्रोष्टुविन्ना	१६०	९३
क्रोष्ट्री	१६५	११०
क्रौञ्च	१९५	२२
क्रौञ्चदारण	१७	४०
क्लम	३८९	१०
क्लमथ	३८९	१०
क्लिन्न	३८४	१०५
क्लिन्नाक्ष	२२१	६०
क्लिशित	३८२	९८
क्लिष्ट	६९	१९
	३८२	९८
क्लीतक	१६५	१०९
क्लीतकिका	१६०	९४
क्लीव(ब)	२१५	३९
	४३४	२१३
क्लेश	३९४	२९
क्लोम	२१७	६५
क्वण	७१	२४
	३८८	८
क्वणन	७१	२४
क्वथित	३८१	९५
क्वाण	७१	२४
क्षण	४७	११
	८६	३८
	४०५	४७
क्षणदा	४४	४
क्षणन	३००	११४
क्षणप्रभा	३२	९
क्षतज	२२३	६४
क्षतव्रत	२६६	५४
क्षत्तृ	२८५	५९
	३३९	३
	४०७	६३

शब्दः	पृष्ठम्	श्लोकः
क्षत्रिय	२६७	१
क्षत्रिया	२०८	१४
क्षत्रियी	२०८	१५
क्षत्रियाणी	२०८	१४
क्षपा	४४	४
क्षपाकर	३४	१५
क्षम	४२१	१४२
क्षमा	४२१	१४२
क्षमितृ	३६१	३१
क्षमिन्	३६१	३१
क्षन्तृ	३६१	३१
क्षय	५१	२२
	२१९	५१
	३८८	७
	४२२	१४५
क्षव	२१९	५२
	३०७	१९
क्षविथु	२१९	५२
क्षान्त	३८१	९७
क्षान्ति	८०	२४
क्षार	३३४	९९
क्षारक	१३३	१६
क्षारमृत्तिका	१११	४
क्षारित	३६४	४३
क्षिति	११०	२
	४०९	७०
क्षिपणी	९७	१३
क्षिपा	३९०	११
क्षिप्त	३७८	८७
क्षिमु	३६०	३०
क्षिप्र	२७	६४
क्षिया	३८८	७
क्षीर	९३	४
	३२०	५१
	४२८	१८२
क्षीरविकृति	३१७	४४
क्षीरविदारी	१६५	११०
क्षीरशुक्ला	१६५	११०
क्षीरावी	२६२	१००
क्षीरिका	१४४	४५
क्षीरोद	९३	२
क्षीव	३५९	२३
क्षुत्	३२१	५२
क्षुत	२१९	५२
क्षुद्र	३६५	४८
	४२७	१७७
क्षुद्रघण्टिका	२४१	११०
क्षुद्रशङ्ख	१०१	२३
क्षुद्रा	१६०	९४
	४२७	१७७
क्षुद्राण्डमत्स्य-संघात	१००	१९
क्षुध्	३२१	५४
क्षुधाभिजनन	३०७	१९
क्षुधित	३५८	२०
क्षुप	१३०	८
क्षुमा	३०८	२०
क्षुर	१६३	१०४
	४५५	२०
क्षुरक	१४२	४०
क्षुरप्र	४५५	२०
क्षुरिन्	३४१	१०
क्षुल्लक	३४३	१६
	३६९	६१
	३९८	१०
क्षेत्र	३०४	११
	४२८	१८०
क्षेत्रज्ञ	५४	२९
	४०८	३३
क्षेत्राजीव	३०३	६
क्षेपण	३९०	११
क्षेपिष्ठ	३८५	१११
क्षेम	५२	२६
	१७२	१२८
	४६०	३४
क्षैत्र	३०५	११
क्षोणी	११०	२
क्षोद	२९७	९९
क्षोदिष्ठ	३८५	१११
क्षोम	१२०	१२
क्षौद्र	३३८	१०७
क्षौम	२४१	११३
क्षुत	३७९	९१
क्ष्मा	११०	३
क्ष्माभृत्	१२३	१
	२६७	१
क्ष्वेड	९०	९
क्ष्वेडा	२९९	१०७
	४०४	४३
क्ष्वेडित	४६०	३४

ख

शब्दः	पृष्ठम्	श्लोकः
ख	२९	१
	४००	१८
	४५७	२२
खग	१९८	३२
	२९२	८६
	४००	१९
खगेश्वर	१३	२९
खजाका	३१३	३४
खञ्ज	२१८	४९
खञ्जन	१९२	१५
खञ्जरीट	१९२	१५
खट	४५४	१७
खट्वा	२४९	१३८
खड्ग	१८८	४
	२९३	८९
खड्गिन्	१८८	४
खण्ड	३५	१६
खण्डपरशु	१३	३१
खण्डविकार	३१७	४३
खण्डिक	३०६	१६
खदिर	१४५	४९
खदिरा	१७६	१४१
खद्योत	१९७	२८
खनि	१२६	७
खनित्र	३०५	१२
खपुर	१८५	१६९
खर	४३	३५
	३२७	७७
खरणस्	२१७	४६
खरणस	२१७	४६
खरपुष्पा	१७५	१३९
खरमञ्जरी	१५८	८९
खरा	१५१	६९
खराश्वा	१६६	१११
खर्जू	२१९	५३
खर्जूरी	१८६	१७०
खर्जूर	१८६	१७०
	३३३	९६
खर्व	२१७	४६
	३७२	७०
खर्वट	४६०	३३
खल	३६५	४७
खलपू	३५७	१७
खलिनी	३१६	४२
खलीन	२८२	४९
खलु	४४२	२५५
खल्या	३९६	४२
खात	१०३	२७
खादित	३८१	११०
खारी	३३१	८८
खारीक	३०४	१०
खारीवाप	३०४	१०
खिल	११२	५
खुर	१७२	१३०
	२८२	४९
खुरणस्	२१७	४७
खुरणस	२१७	४७
खेट	३६७	५४
खेय	१०४	२९
खेला	८४	३३
खोड	२१८	४९
ख्यात	३८९	९
ख्यातगर्हण	३८०	९३
ख्याति	३८९	९

ग

शब्दः	पृष्ठम्	श्लोकः
गगन	२९	१
गङ्गा	१०४	३१
गङ्गाधर	१३	३४
गज	२७६	३४
गजता	२७६	३६
गजबन्धनी	२७९	४३
गजभक्ष्या	१७०	१२३
गजानन	१६	३८
गञ्जा	११९	८
गडक	९९	१७
गडु	४५४	१८
गडुल	२१७	४८
गण	२०१	४०
	२९०	८१
	४०५	४६
गणक	२७०	१४
गणदेवता	६	१०
गणनीय	३७०	६४

शब्दः	पृष्ठम्	श्लोकः
गणरात्र	४५	६
गणरूप	१५६	८०
गणहासक	१७२	१२८
गणाधिप	१६	३८
गणिका	१५२	७१
	२०९	१९
गणिकारिका	१५०	६६
गणित	३७१	६४
गणेय	३७०	६४
गण्ड	२३४	९०
	२७७	३७
गण्डक	१८८	४
गण्डकारी	१७६	१४१
गण्डशैल	१२६	६
गण्डाली	१८२	१५९
गण्डीर	१८१	१५७
गण्डूपद	१०१	२२
गण्डूपदी	१०२	२४
गण्डूषा	४५२	१०
गतनासिक	२१७	४६
गद	२१८	५१
गद्य	४५९	३१
गन्त्री	२८३	५२
गन्ध	५७	७
गन्धक	३३६	१०२
गन्धकुटी	१७०	१२३
गन्धन	४१६	११५
गन्धनाकुली	१६७	११४
गन्धफली	१४७	५६
	१५०	६४
मन्धमादन	१२४	३
गन्धमूली	१८०	१५४
गन्धरस	३३६	१०४
गन्धर्व	६	११
	२२	५२
	१९०	११
	२८०	४४
	४१९	१३३
गन्धर्वहस्तक	१४५	५०
गन्धवह	२५	६२
गन्धवहा	२३३	८९
गन्धवाह	२५	६२
गन्धसार	२४७	१३१
गन्धाश्मन्	३३६	१०२
गन्धिनी	१०७	१२३
गन्धोत्तमा	३५०	३९
गन्धोली	१९७	२७
गभस्ति	४२	३३
गभीर	९८	१५
गम	२९६	९५
गमन	२९६	९५
गम्भारी	१४०	३५
गम्भीर	९८	१५
गम्य	३८०	९२
गरल	९०	९
गरिष्ठ	३८६	११२
गरी	१५१	६९
गरुड	१३	२९
गरुडध्वज	९	१९
गरुडाग्रज	४२	३२
गरुत्	२००	३६
गरुत्मत्	१३	२९
	१९८	३४
	४०७	५८
गर्गरी	३२७	७४
गर्जित	३२	८
	२७६	३६
गर्त	८७	२
गर्दभ	३२७	७७
गर्दभाण्ड	१४३	४३
गर्धन	३५८	२२
गर्भ	२१४	३९
	४२०	१३५
गर्भक	२४८	१३५
गर्भागार	११९	८
गर्भाशय	२१४	३८
गर्भिणी	२१०	२२
गर्भोपघातिनी	३२५	६९
गर्मुत्	१८४	१६५
गर्व	७९	२२
गर्हण	३८०	१३
गर्ह्य	३६७	५४
गर्ह्यवादिन्	३६२	३७
गल	२३२	८८
गलकम्बल	३२३	६३
गलन्तिका	३१२	३२
गलित	३८३	१०४
गलोद्देश	२८१	४८
गल्या	३९७	४२
गवय	१९०	११
गवल	३३५	१००
गवाक्ष	११९	९
गवाक्षी	१८१	१५६
गवीश्वर	३२२	५८
गवेधु	३९०	२५
गवेधुका	३१०	२५
गवेषणा	२६०	३२
गवेषित	३८४	१०५
गव्य	३२०	५०
गव्या	३२३	६०
गव्यूति	११५	१८
गह्न	१२७	६
	३७७	८५
गह्वर	१२६	६
	४२८	१८३
गाङ्गेय	३३३	९४
	४२४	१५५
गाङ्गेरुकी	१६८	११७
गाढ	२७	६८
गाणिक्य	२१०	२२
गाण्डिव	२९०	८४
गाण्डीव	२९०	८४
गात्र	२२६	७०
	२७८	४०
गात्रानुलेपन	२४८	१३३
गान	७१	२६
गान्धार	७१	१
गायत्री	१४५	४९
	२५६	२२
गारुत्मत	३३२	९२
गार्भिण	२१०	२२
गार्हपत्य	२५९	२९
गालव	१३९	३३
गिर्	३९०	१
गिरि	१२३	१
	३९०	११
गिरिकर्णी	१६३	१०४
गिरिका	१९१	१२
गिरिज	३३५	१००
	३३६	१०४
गिरिमल्लिका	१५०	६५
गिरिश	१३	३१
गिरीश	१३	३१
गिलित	३८५	११०
गीत	७१	२६
गीर्	६२	१
गीर्ण	३८५	११०
गीर्णि	३९०	११
गीर्पति	३९	२४
गीर्वाण	५	९
गुग्गुल	१४०	३४
गुच्छ	३०८	२१
गुञ्जा	१६१	१८
गुड	४०४	४२
गुडपुष्प	१३७	२७
गुडफल	१३७	२८
गुडा	१६४	१०५
गुडूची	१५६	८२
गुण	५४	२९
	२९२	१९
	३११	२८
	३४६	२७
	४०५	४७
गुणवृक्षक	९७	१२
गुणित	३७८	८८
गुण्डित	३७९	८९
गुत्स	२३९	१०५
गुत्सक	१३३	१६
गुत्सार्ध	२३९	१०५
गुद	२२७	७३
गुन्द्र	१८३	१६२
गुन्द्रा	३४७	५५
	१८२	१६०
गुप्त	३७८	८९
	३८४	१०६
गुप्ति	४०९	७४
गुरण	३९०	११
गुरु	३९	२४
	२५२	७
	४२५	१६२
गुर्विणी	२१०	२२

शब्दः	पृष्ठम्	श्लोकः
गुल्फ	२२७	७२
गुल्म	१३०	९
	२२४	६६
	२९०	८१
	४२१	१४२
गुल्मिनी	१३०	९
गुवाक	१८५	१६९
गुह	१७	३९
गुहा	१२६	६
	१६०	९३
गुह्य	४२३	१५४
गुह्यक	६	११
गुह्यकेश्वर	२८	६८
गूढ	३७८	८९
गूढपाद्	८९	७
गूढपुरुष	२७०	१३
गूथ	२२५	६८
गून	३८१	९६
गृञ्जन	१७८	१४८
गृध्नु	३५८	२२
गृध्र	१९५	२१
गृध्रसी	४५२	१०
गृष्टि	१७८	१५१
गृह	११७	४
	११७	५
गृहगोधिका	१९१	१२
गृहपति	२७०	१५
गृहयालु	३६०	२७
गृहस्थूण	४५९	२०
गृहा	४४०	२३८
गृहागम	२६०	३४
गृहाराम	१२७	१
गृहावग्रहणी	१२०	१३
गृहिन्	२५१	३
गृहीतृ	३६०	२७
गृह्यक	२०३	४३
	३५७	१६
गेन्दुक	२४९	१३८
गेह	११७	४
गैरिक	१२७	४
	३९९	१२
गैरेय	३३६	१०४

शब्दः	पृष्ठम्	श्लोकः
गो	३२२	६०
	३२४	६६
	४०१	२५
गोकण्टक	१६१	९९
गोकर्ण	१९०	१०
	२३१	८३
गोकर्णी	१५७	८४
गोकुल	३२२	५८
गोक्षुरक	१६१	९९
गोचर	५७	८
गोजिह्वा	१६९	११९
गोडुम्बा	१८१	१५६
गोण्ड	४५४	१८
गोत्र	१२३	१
	२५०	१
	४२८	१८०
गोत्रभिद्	१७	४२
गोत्रा	११०	३
	३२३	६०
गोदारण	३०५	१४
गोदुह्	३२२	५७
गोधन	३२२	५८
गोधा	२९१	८४
गोधापदी	१६९	११९
गोधि	२३४	९२
गोधिका	१०१	२२
गोधिकात्मज	१८९	६
गोधूम	३०७	१८
गोनर्द	१७३	१३२
गोनस	८८	४
गोप	२६८	७
	३२२	५७
	४१९	१३०
गोपति	३२३	६२
गोपरस	३३६	१०४
गोपानसी	१२१	१५
गोपायित	३८४	१०६
गोपाल	३२२	५७
गोपी	१६६	११२
गोपुर	१२२	१६
	१७३	१३२
	४२८	१८२
गोप्यक	३४३	१७

शब्दः	पृष्ठम्	श्लोकः
गोमत्	३२२	५८
गोमय	२२०	५८
गोमायु	१८८	५
गोमिन्	३२२	५८
गोरस	३२१	८३
गोर्द	२२४	६५
गोल	४२५	२०
गोलक	२१४	३६
गोला	३३८	१०८
गोलीढ	१४२	३९
गोलोमी	१६२	१०२
	१८२	१५९
	३३९	१११
गोवन्दनी	१४७	५५
गोविन्द्	९	१९
	४१२	९१
गोविष्	३२०	५०
गोशाल	४६२	४०
गोशीर्ष	२४७	१३१
गोष्ठ	११४	१३
गोष्ठी	२५५	१५
गोष्पद	४१३	९४
गोसंख्य	३२२	५७
गोस्तन	२३९	१०५
गोस्तनी	१६४	१०७
गोस्थानक	११४	१३
गौतम	८	१५
गौधार	१८९	६
गौधेय	१८९	६
गौधेर	१८९	६
गौर	५९	१३
	६१	१४
	४२९	१८९
गौरी	१६	३६
	२०६	८
गौष्ठीन	११४	१३
ग्रथित	३७७	८६
ग्रन्थि	१८३	१६२
ग्रन्थिक	३३८	११०
ग्रन्थित	३७७	८६
ग्रन्थिपर्ण	१७३	१३२
ग्रन्थिल	१४१	३७
	१५४	७७

शब्दः	पृष्ठम्	श्लोकः
ग्रस्त	६९	२०
	३८५	१११
ग्रह	४६	९
	३८८	८
	४३९	२३६
ग्रहणीरुज्	२२०	५५
ग्रहपति	४०	३०
ग्राम	१२३	१९
	४२१	१४१
ग्रामणी	४०५	४९
ग्रामतक्ष	३४१	९
ग्रामता	३९७	४२
ग्रामाधीन	३४१	९
ग्रामान्त	१२३	२०
ग्रामीणा	१६०	९४
ग्राम्य	६९	१९
ग्राम्यधर्म	२६६	५७
ग्रावन्	१२३	१
	१२४	४
	४१५	१०६
ग्रास	३२१	५४
ग्राह	१०१	२१
	३८८	८
ग्राहिन्	१३५	२१
ग्रीवा	२३३	८८
ग्रीष्म	५०	१८
ग्रैवेयक	२३८	१०४
ग्लस्त	३८५	१११
ग्लह	३५२	४५
ग्लान	२२१	५८
ग्लास्नु	२२१	५८
ग्लौ	३४	१४

घ

घट	३१२	३२
	२९९	३२
घटना	२९९	१०७
घटा	२९९	१०७
घटीयन्त्र	३४६	२८
घट्ट	४५४	१८
घण्टापाटलि	१४२	३९
घण्टापथ	११६	१८
घण्टारवा	१६४	१७७

शब्दः	पृष्ठम्	श्लोकः
घन	३२	७
	७३	४
	७५	९
	२९४	९१
	३७१	६६
	४१६	१११
घनरस	९३	५
घनसार	२४७	१३१
घनाघन	४१६	११०
घर्म	८४	३३
घस्मर	३५८	२०
घस्र	४४	२
घाटा	२३३	८८
घाण्टिक	२९६	९७
घात	३००	११५
घातुक	३६५	४७
	३६०	२८
घास	१८५	१६७
घुटिका	२२७	७२
घुण	४५४	१८
घूर्णित	३६१	३२
घृणा	७८	१८
	३९५	३२
	४०५	५१
घृणि	४२	३३
घृत	३२१	५२
	४१०	७६
घृष्टि	१८७	२
घोटक	२८०	४३
घोणा	२३३	८९
घोणिन्	१८७	२
घोण्टा	१४१	३७
	१८५	१६९
घोर	७८	२०
घोष	१२३	२०
घोषक	१६८	११७
घोषणा	६७	१२
घ्राण	२३३	८९
	३७९	९०
घ्राणतर्पण	५९	११
घ्रात	३७९	९०
च		
च	४४०	२४१
	४४४	५
चकोरक	१९९	३५
चक्र	१९५	२२
	२८४	५६
	२८९	७८
	४२८	१८२
चक्रकारक	१७२	१२९
चक्रपाणि	९	२०
चक्रमर्दक	१७७	१४७
चक्रयान	२८३	५१
चक्रला	१८२	१६०
चक्रवर्तिन्	२६७	२
चक्रवर्तिनी	१७९	१५३
चक्रवाक	१९५	२२
चक्रवाल	३१	६
	१२४	२
चक्राङ्ग	१९६	२३
चक्राङ्गी	१५७	८६
चक्रिन्	८९	७
चक्रीवत्	३२७	७७
चक्षुःश्रवस्	८९	७
चक्षुष्	२३५	९३
चक्षुष्या	३३६	१०२
चञ्चल	३७४	७६
चञ्चला	३२	९
चञ्चु	१४५	५१
	२००	३६
चटक	१९३	१८
चटका	१९३	१८
चटकाशिरस्	३३८	११०
चणक	३०७	१८
चण्ड	३६१	३२
चण्डा	१७२	१२८
चण्डात	१५४	७६
चण्डातक	२४३	११९
चण्डाल	३४०	४
	३४४	१९
चण्डालवल्लकी	३४८	३१
चण्डिका	१६	३७
चतुःशाल	११८	६
चतुर्	३४४	१९
चतुरङ्गुल	१३६	२३
चतुरानन	८	१६
चतुर्भद्र	२६६	५८
चतुर्भुज	९	२०
चतुर्वर्ग	२६६	५७
चतुष्पथ	१५५	१७
चतुर्हायणी	३२५	६८
चत्वर	१२०	१३
	२५६	१८
चन	४४४	३
चन्दन	२४७	१३१
चन्द्र	३४	१३
	१७७	१४६
	४२८	१८२
चन्द्रक	१९८	३१
चन्द्रभागा	१०५	३४
चन्द्रमस्	३४	१३
चन्द्रवाला	१७०	१३५
चन्द्रशेखर	१३	३०
(चन्द्रसंज्ञ–)	२४७	१३०
चन्द्रहास	२९३	८९
चन्द्रिका	३५	१६
चपल	२७	६५
	३३५	९९
	३६४	४६
चपला	३२	९
	१६१	९६
चपेट	२३२	८४
चमर	१९०	१०
चमरिक	१३५	२२
चमस	४६१	३५
चमसी	४५२	१०
चमू	२८९	७८
	२९०	८१
चमूरु	१८९	९
चम्पक	१४९	६३
चय	११७	३
	२०१	४०
चर	२७०	१३
	३७३	७४
चरक	४६०	३३
चरण	२२६	७१
चरणायुध	१९३	१७
चरम	३७६	८१
चरमक्ष्माभृत्	१२४	२
चराचर	३७३	७४
चरिष्णु	३७३	७४
चरु	२५७	२२
चचीरि	४५२	१०
चर्चा	५६	२
	२४४	१२२
चर्मकषा	१७६	१४३
चर्मकार	३४१	७
चर्मन्	२८८	४६
	२९४	९०
चर्मप्रभेदिका	३४९	३४
चर्मप्रसेविका	३४८	३३
चर्मिन्	१४४	४६
	२८८	७१
चर्या	२६०	३५
चर्वित	३८५	११०
चर्षणी	२०७	१०
चल	३७४	७४
चलदल	१३५	२०
चलन	३७४	७४
चलाचल	३७४	७४
चलित	२९६	९६
	३७८	८
चविक	१६१	९
चव्य	१६१	९८
चषक	३५१	५३
चषाल	२५६	१८
चाक्रिक	२९६	९७
चाङ्गेरी	१७५	१४०
चाटकैर	१९३	१८
चाण्डाल	३४४	२०
चाण्डालिका	३४८	३१
चातक	१९३	१७
चातुर्वर्ण्य	२५०	२
चाप	२९१	८३
चामर	२७५	३१
चामीकर	३३३	१५
चाम्पेय	१४९	६३
	१५०	६५
चार	२७०	१३
	३९१	४१

शब्दः	पृष्ठम्	श्लोकः
चारटी	१७७	१४६
चारण	३४२	१२
चारु	३६७	५२
चार्चिक्य	२४३	१२२
चार्मण	३९७	४३
चालनी	३१०	२६
चाष	१९२	१६
चिकित्सक	२२१	५७
चिकित्सा	२१८	५०
चिकुर	२३६	९५
	३६४	४६
चिक्कण	३१८	४६
चिक्कस	४६१	३५
चिच्चा	१४३	४३
चित्	५५	१
	४४४	३
चिता	३०१	११७
चिति	३०१	११७
चित्त	५५	३१
चित्तविभ्रम	८०	२६
चित्तसमुन्नति	७९	२२
चित्ताभोग	५६	२
चित्या	३०१	११७
चित्र	६२	१७
	७८	१९
	१५८	८७
	४२७	१७८
चित्रक	१४५	५१
	१५६	८०
	१४५	१२३
चित्रकर	३४१	७
चित्रकृत्	१३७	२७
चित्रतण्डुल	१६४	१०६
चित्रपर्णी	१६०	९२
चित्रभानु	२२	५६
	४०	३०
	४१५	१०५
चित्रशिखण्डिज	३९	२४
चित्रशिखण्डिन्	४०	२७
चित्रा	१५८	८७
	१८१	१५६
चिन्ता	८१	२९
चिपिटक	३१९	४७
चिक	२३४	९०

शब्दः	पृष्ठम्	श्लोकः
चिरक्रिय	३५७	९७
चिरण्टी	२०६	१
चिरंतन	३७४	७७
चिरप्रसूता	३२५	७१
चिररात्राय	४४३	१
चिरस्य	४४३	१
चिराय	४४३	१
चिरिबिल्व	१४४	४७
चिलिचिम	९९	१८
चिल्ल	१९४	२१
	२२१	६०
चिह्न	३५	१७
चीन	१८९	९
चीर	४५९	३१
चीरी	१९७	२८
चीरुका	१९७	२८
चीवर	४५९	३१
चुक्र	१७६	१४१
	३१४	३५
	४५५	२०
चुक्रिका	१७५	१४०
चुल्ल	२२१	६०
चुल्ली	३११	२९
चूचुक	२२९	७७
चूडा	१९८	३१
	२३६	९७
चूडामणि	२३८	१०२
चूडाला	१८२	१६०
चूत	१३९	३३
चूर्ण	२४८	१३४
	२९७	९९
चूर्णकुन्तल	२३६	९६
चूर्णि	४५२	९
चूलिका	२७७	३८
चेटक	३४३	१७
चेत्	४४६	१२
चेतकी	१४८	५९
चेतन	५५	३०
चेतना	५५	१
चेतस्	५५	३१
चेल	२४२	११५
	४३२	२०२
चैत्य	११९	७

शब्दः	पृष्ठम्	श्लोकः
चैत्र	४८	१५
चैत्ररथ	२८	७०
चैत्रिक	४८	१५
चोच	१७४	१३४
	४५९	३०
चोरपुष्पी	१७१	१२६
चोल	२४३	११८
चौर	३४५	२४
चौरिका	३४६	२४
चौर्य	३४६	२५
च्युत	३८३	१०४
छ		
छगलक	३२७	७६
छगलात्री	१७४	१३७
छत्र	२७५	३२
छत्रा	१६३	१०५
	१८५	१६७
	३१५	३७
छत्राकी	१६७	११५
छद	१३२	१४
	२००	३६
छदन	१३२	१४
छदिस्	१२१	१४
छद्मन्	८२	३०
छन्द	३९२	२०
	४१२	८८
छन्दस्	२५६	२२
	४३८	२३२
छन्न	२३७	२२
	३८१	९७
छल	२९९	१०८
छवि	३६	१७
	४३	३४
छाग	३२७	७६
छागी	३२७	७६
छात	२१६	४४
	३८३	१०३
छात्र	२५३	११
छादित	३८१	९८
छान्दस	२५२	६
छाया	४२४	१५७
छित	३८३	१०३
छिद्र	८६	२

शब्दः	पृष्ठम्	श्लोकः
छिद्रित	३८२	९९
छिन्न	३८३	१०३
छिन्नरुहा	१५६	८२
छुरिका	२९५	९२
छेक	२०३	४३
छेदन	३८८	८
ज		
जगत्	११२	६
	४१०	८०
जगती	११२	६
	४०९	७१
जगत्प्राण	२५	६२
जगर	२८६	६४
जगल	३५१	४१
जग्ध	३८५	१११
जग्धि	३२२	५५
जघन	२२८	७४
जघनेफला	१४९	६१
जघन्य	३७६	८१
	४२४	१५९
जघन्यज	२१६	४३
	३३९	१
जङ्गम	३७३	७४
जङ्गमेतर	३७३	७३
जङ्घा	२२७	७२
जङ्घाकरिक	२८८	७३
जङ्घाल	२८८	७३
जटा	१३१	११
	२३७	९७
	४०३	४८
जटामांसी	१७४	१३४
जटिन्	१३९	३२
जटिला	१७४	१३४
जठर	२२९	७७
	४३०	१८९
जड	३६	१९
	३६२	३८
जडा	१५८	८६
जडुल	२१८	४९
जतु	२४५	१२५
जतुक	३१६	४०
जतुका	१९६	२६
जतुकृत्	१७९	१५३

शब्दः	पृष्ठम्	श्लोकः
जतूका	१७९	१५३
जत्रु	२२९	७८
जनक	२१२	२८
जनंगम	३४४	१९
जनता	३९७	४२
जनन	५४	३०
	२५०	१
जननी	२१२	२९
जनपद	११३	८
जनयित्री	२१२	२९
जनश्रुति	६६	७
जनार्दन	९	१९
जनाश्रय	११९	९
जनि	५४	३०
जनी	१७९	१५२
	२०६	९
जनुस्	५४	३०
जन्तु	५५	३०
जन्तुफल	१३५	२२
जन्मन्	५४	३०
जन्मिन्	५५	३०
जन्य	२६६	५८
	२९८	१०३
	४२४	१५९
जन्यु	५५	३०
जप	२६४	४८
जम्पती	२१४	२८
जम्बाल	९६	९
जम्बीर	१३६	२४
	१५५	७९
जम्बु	१३४	१९
जम्बुक	१८८	५
	३९७	३
जम्बू	१३४	१९
जम्ब्व	१३४	१९
जम्भ	१३६	२४
जम्भभेदिन्	१७	४३
जम्भल	१३६	२४
जम्भीर	१३६	२४
जय	१५०	६६
	३००	११०
	३९०	१२
जयन	३९०	१२
जयन्त	१९	४६
जयन्ती	१५०	६५
जया	१५०	६५
जव्य	२२८	७४
जरठ	३७४	७६
जरण	३१४	३६
जरत्	२१६	४२
जरद्गव	३२३	६१
जरा	२१५	४१
जरायु	२१४	३८
जरायुज	३६६	५०
जल	९३	३
जलजन्तु	१००	२०
जलधर	३२	७
जलनिधि	९२	२
जलनिर्गम	९५	७
जलनीली	१०७	३८
जलप्राय	११३	१०
जलमुच्	३२	७
जलव्याल	८८	५
जलशुक्ति	१०२	२३
जलाधार	१०३	२५
जलाशय	१०३	२५
	१८४	१६४
जलोच्छ्वास	९६	१०
जलौकस्	१०१	२२
जलौका	१०१	२२
जल्पाक	३६२	३६
जल्पित	३८४	१०७
जव	२६	६४
	२८८	७३
जवन	२८१	४५
	२८८	७३
	३९६	३०
जवनिका	२४४	१२०
जवा	१५४	७६
जह्नुतनया	१०४	३१
जागरा	३९२	१९
जागरितृ	३६१	३२
जागरूक	३६१	३२
जागर्या	३९२	१९
जाङ्गलिक	९०	११
जाङ्घिक	२८८	७३
जात	५५	३१
जातरूप	३३३	९५
जातवेदस्	२२	५३
जातापत्या	२०८	१६
जाति	५५	३१
	१५३	७२
	४०८	६८
जातीकोश	२४७	१३२
जातीफल	२४७	१३२
जातु	४४४	४
जातोक्ष	३२३	६१
जानु	२२७	७२
जाबाल	३४२	११
जामातृ	२१३	३२
जामि	४२१	१४२
जाम्बव	१३४	१९
जाम्बूनद	३३३	९५
जायक	२४५	१२५
जाया	२०४	६
जायाजीव	३४२	१२
जायापती	२१४	३८
जायु	२१८	५०
जार	२१४	३५
जाल	९८	१६
	४३२	२००
जालक	१३३	१६
जालिक	३४३	१४
जाली	१६८	११८
जाल्म	३४३	१६
	३५७	१७
जिघत्सु	३५८	२०
जिङ्गी	१५९	९०
जिलर	२८९	७७
जिन	७	१३
जिष्णु	१७	४२
	२८९	७७
जिह्म	३७२	७१
	४२१	१४१
जिह्मग	८९	८
जिह्वा	२३४	९१
जीन	२१६	४२
जीमूत	३२	७
	१५१	६९
	४१७	५८
जीरक	३१४	३६
जीर्ण	३८९	९
	२१६	४२
जीर्णवस्त्र	२४२	११५
जीव	३९	२४
	३०२	११९
जीवक	१४३	४४
	१७६	१४२
जीवंजीव	१९९	३५
जीवन	९३	३
	३०२	१
जीवनी	१७६	१४२
जीवनीया	१७६	१४२
जीवनौषध	३०२	१२०
जीवन्तिका	१५६	८२
	१५६	८३
जीवन्ती	१७६	१४१
जीवा	१७६	१४२
जीवातु	३०२	१२०
जीवान्तक	३४२	१४
जीविका	३०२	१
जीवितकाल	३०२	१२०
जुगुप्सा	६७	१३
जुङ्ग	१७४	१३७
जुह्वू	२५८	२५
जूति	३९६	३८
जूर्ति	३९६	३८
जृम्भ	८५	३५
जृम्भण	८५	३५
जेतृ	२८९	७४
	२८९	७७
जेमन	३२२	५६
जेय	२८८	७४
जैत्र	२८९	७४
जैवातृक	३४	१४
	३५४	६
	३९८	११
जोङ्गक	२४६	१२६
जोषम्	४४२	२५१
ज्ञ	२५१	५
ज्ञपित	३८१	९८
ज्ञप्त	३८१	९८
ज्ञप्ति	५५	१
ज्ञांतसिद्धान्त	२७०	१५
ज्ञाति	२१३	३४

शब्दः	पृष्ठम्	श्लोकः
ज्ञातृ	३६०	३०
ज्ञातेय	२१३	३५
ज्ञान	५७	६
ज्ञानिन्	२७०	१४
ज्या	११०	२
	२९२	८५
ज्याघातवारण	२९१	८४
ज्यानि	३८९	९
ज्यायस्	२१६	४३
	४३९	२३५
ज्येष्ठ	४०४	४१
ज्यैष्ठ	४९	१६
ज्योतिरिङ्गण	१९७	२८
ज्योतिष्मती	१७८	१५०
ज्योतिस्	४३८	२३०
ज्योत्स्ना	३५	१६
ज्यौतिषिक	२७०	१४
ज्यौत्स्नी	४५	५
	१६८	११८
ज्वर	२२०	५६
ज्वलन	२२	५३
ज्वाल	२४	५७

झ

झटामला	१७१	१२७
झटिति	४४३	२
झर	१२६	५
झर्झर	७४	८
झल्लरी	४५२	१०
झष	९९	१७
झषा	१६८	११७
झाटल	१४२	३९
झाठलि	४६१	३८
झावुक	१४२	४०
झिण्टी	१५४	७५
झिल्लिका	१९७	२८

ट

टङ्क	३४९	३४
	४६०	३३
टिट्टिभक	१९९	३५
टीका	४५१	५
टुण्टुक	१४७	५३

ड

डमर	३९१	१४
डमरु	७४	८
डयन	२८३	५२
डहु	१४८	६०
डिण्डिम	७४	८
डिम्ब	३९१	१४
डिम्भ	२००	३८
	४२०	१३४
डिम्भा	२१५	४१
डुण्डुभ	८८	५

ढ

ढक्का	७३	६

त

तक्र	३२१	५३
तक्षक	३९७	४
तक्षन्	३४१	९
तट	९५	७
तटिनी	१०४	३०
तडाग	१०३	२८
तडित्	३२	९
तडित्वत्	३२	७
तण्डक	४६०	३३
तण्डुल	१६४	१०६
तण्डुलीय	१७४	१३६
तत	७२	४
	३७७	८६
ततस्	४४४	३
तत्काल	३७५	२९
तत्त्व	७४	९
तत्पर	३५५	९
तत्र	४४५	९
	४५७	२३
तथागत	७	१३
तथ्य	७०	२२
तद्	४४४	३
तदा	४४९	३२
तदात्व	२७५	२९
तदानीम्	४४९	२२
तनय	२११	२७
तनु	२२६	७१
	३६९	६१
	३७१	६६
	४१६	११३
तनुत्र	२८६	६४
तनू	२२६	७१
तनूकृत	३८२	९९
तनूनपात्	२२	५३
तनूरुह	२००	३६
	२३७	९९
तन्तु	३४७	२८
तन्तुभ	३०७	१७
तन्तुवाय	१९१	१३
	३४०	६
तन्तुसंतत	३८३	१०१
तन्त्र	४२९	१८५
तन्त्रक	२४१	११२
तन्त्रिका	१५६	८२
तन्द्रा	४२७	१७६
तन्द्री	८५	३७
तप	५०	१९
तपःक्लेशसह	२६२	४२
तपन	४०	३१
	९१	१
तपनीय	३३३	९४
तपस्	४८	१५
	४३८	२३२
तपस्य	४८	१५
तपस्विन्	२६२	४२
तपस्विनी	१७४	१३४
तम	४०	२६
तमस्	५४	२९
	८७	३
	४३८	२३१
तमस्विनी	४४	४
तमाल	१५१	६०
	४६०	३३
तमालपत्र	२४५	१२३
तमिस्र	८७	३
तमिस्रा	४५	५
तमी	४४	४
तमोनुद्	४१२	८९
तमोपह	४४०	२२८
तरक्षु	१८६	१
तरङ्ग	९४	५
तरङ्गिणी	१०४	३०
तरणि	४७	३०
	९६	१०
	१५३	७३
तरपण्य	९७	११
तरल	२३८	१०२
	३७४	७५
तरला	३२०	५०
तरस्	२६	४
	२९६	१०२
तरस	२२३	७३
तरस्विन्	२८८	७३
	४१८	१२८
तरि	९६	१०
तरु	१२८	५
तरुण	२१६	४२
तरुणी	२०६	८
तर्क	५६	३
तर्कविद्या	६५	५
तर्कारी	१५०	६५
तर्जनी	२३१	८१
तर्णक	३२३	६१
तर्दू	३१३	३४
तर्पण	२५४	१४
	३२२	५६
	३०७	४
तर्मन्	२५६	१९
तर्षि	८१	२८
	३२१	५५
तल	२९१	८४
	४३२	२०२
तलिन	४१८	१२७
तल्प	४१९	१३१
तल्लज	५३	२७
तष्ट	३८२	९९
तस्कर	३४५	२४
ताण्डव	७५	१०
	४६०	३४
ताल	२१२	२८
तान्त्रिक	२७०	१५
तापस	२६२	४२
तापसतरु	१४४	४६
तापिच्छ	१५१	६८
तामरस	१०७	४०
तामलकी	१७१	१२७
तामसी	४५	५
ताम्बूलवल्ली	१६९	१२०

शब्दः	पृष्ठम्	श्लोकः
ताम्बूली	१६९	१२०
ताम्रक	३३४	९७
ताम्रकर्णी	३१	५
ताम्रकुट्टक	३४१	८
ताम्रचूड	१९३	१७
तार	७२	२
	४२६	१६६
तारकजित्	१७	४०
तारका	३७	२१
तारा	३७	२१
तारुण्य	२१५	४०
तार्क्ष्य	१३	२९
	४२२	१४५
तार्क्ष्यशैल	३३५	१०२
ताल	७४	९
	१८५	१६८
	२३१	८३
	३३६	१०३
तालपत्र	२३८	१०३
तालपर्णी	१७०	१२३
तालमूलिका	१६९	११९
तालवृन्तक	२५०	१४०
तालाङ्क	११	२४
ताली	१७१	१२७
	१८६	१७०
तालु	२३४	९१
तावत्	४४१	२४६
तिक्त	५८	९
तिक्तक	१८०	१५५
तिक्तशाक	१३६	२५
तिग्म	४३	३५
तितउ	३१०	२६
तितिक्षा	८०	२४
तितिक्षु	३६१	३१
तित्तिरि	१९९	३५
तिथि	४३	१
तिनिश	१३७	२६
तिन्तिडी	१४३	४३
तिन्तिडीक	३१४	३५
तिन्दुक	१४१	३८
तिन्दुकी	४५१	८
तिमि	१००	१९
तिमिङ्गिल	१००	२०
तिमित	३८४	१०५
तिमिर	८७	३
तिरस्	४४३	२५६
	४४५	६
तिरस्करिणी	२४४	१२०
तिरस्क्रिया	७९	२२
तिरीट	१३९	३३
	४५९	३०
तिरोधान	३४	१३
तिरोहित	३००	११२
तिर्यच्	३६१	३४
तिलक	१४२	४०
	२१८	४९
	२२४	६५
	२४५	१२३
	३१७	४३
तिलकालक	२१८	४९
तिलपर्णी	२४७	१३२
तिलपिञ्ज	३०७	१९
तिलपेज	३०७	१९
तिलित्स	८८	५
तिल्य	३०४	७
तिल्व	१३९	३३
तिष्य	३८	२२
	४२२	१४७
तिष्यफला	१४७	५७
तीक्ष्ण	४३	३५
	३३४	९८
	४०६	५३
तीक्ष्णगन्धक	१३८	३१
तीर	९५	७
तीर्थ	४१२	८६
तीव्र	२७	६७
तीव्रवेदना	९२	३
तु	४४०	२४२
	४४४	५
	४४७	१५
तुङ्ग	१३६	२५
	३७२	७०
तुङ्गी	१७५	१३९
तुच्छ	३६८	५६
तुण्ड	२३३	८९
तुण्डिकेरी	१६८	११६
	१७५	१३३
तुण्डिभ	२२२	६१
तुण्डिल	२२२	६१
तुत्था	१६०	९५
	१७१	१२५
तुत्थाञ्जन	३३५	१०१
तुन्द	२२९	७७
तुन्दपरिमृज	३४४	१८
तुन्दि	२१६	४४
तुन्दिक	२१६	४४
तुन्दिल	२१६	४४
तुन्न	१७१	१२७
तुन्नवाय	३४०	६
तुवरिका	१७२	१३१
तुमुल	२९९	१०६
तुम्बी	१८०	१५८
तुरग	२८०	४३
तुरङ्ग	२८०	४३
तुरङ्गम	२८०	४३
तुरङ्गवदन	२९	७१
तुरायण	३८६	२
तुरासाह्	१७	४४
तुरीय	२४५	१२३
तुरुष्क	२४६	१२८
तुला	३३०	८७
तुलाकोटि	२४०	१०९
तुल्य	३४९	३६
तुल्यपान	३२१	५५
तुवर	५८	९
तुष	१४७	५८
	३०९	२२
तुषार	३६	१८
	३६	१९
तुषित	६	१०
तुहिन	३६	१८
तूण	२९३	८८
तूणी	२९३	८९
तूणीर	२९३	८८
तूर्ण	२७	६५
तूल	१४२	४२
	३३७	१०६
तूलिका	३४८	३२
तूवर	४२५	१६५
तूष्णींशील	३६२	३९
तूष्णीक	३६२	३९
तूष्णीकाम्	४४५	९
तूष्णीम्	४४५	९
तृण	१८५	१६७
तृणद्रुम	१८६	१७०
तृणधान्य	३१०	२५
तृणध्वज	१८२	१६०
तृणराज	१८५	१६८
तृणशून्य	१५२	६९
तृण्या	१८५	१६८
तृतीयाकृत	३०४	९
तृतीयाप्रकृति	२१५	३९
तृप्त	३८३	१०३
तृप्ति	३२२	५६
तृष्	८१	२७
	३२१	५५
तृष्णक्	३५८	२२
तृष्णा	४०५	५१
तेजन	१८२	१६१
तेजनक	१८३	१६२
तेजनी	१५७	८३
तेजस्	२२२	६२
	४३९	२३४
तेजित	३७९	९१
तेम	३९४	२९
तेमन	३१७	४४
तैजस	३३४	९९
तैजसावर्तिनी	३४८	३३
तैत्तिर	२०२	४३
तैलंपाता	४५१	६
तैलपर्णिक	२४७	१३१
तैलपायिक	१९६	२६
तैलीन	३०४	७
तैष	४८	१५
तोक	२११	२८
तोक्म	३०६	१६
तोटक	४५९	३०
तोत्र	२७८	४१
	३०५	१२
तोदन	३०५	१२
तोमर	२९५	९३
तोय	९३	४
तोयपिप्पली	१६५	१११
तोरण	१२२	१६
तौर्यत्रिक	७५	१०
त्यक्त	३८४	१०७

शब्दः	पृष्ठम्	श्लोकः
त्याग	२५९	२९
त्रपा	७९	२३
त्रपु	३३७	१०५
त्रयी	६४	३
	६४	३
त्रस	३७३	७४
त्रसर	३९३	२४
त्रस्नु	३५९	२६
त्राण	३८४	१०६
	३८८	८
त्रात	३८४	१०६
त्रायन्ती	१७८	१५०
त्रायमाणा	१७८	१५०
त्रास	७९	२१
त्रिक	२२८	७६
त्रिककुद्	१२४	२
त्रिकटु	३३९	१११
त्रिका	१०३	२७
त्रिकूट	१२४	२
त्रिखट्व	४६२	४१
त्रिखट्वी	४६२	४१
त्रिगुणाकृत	३०४	९
त्रितक्ष	४६२	४१
त्रितक्षी	४६२	४१
त्रिदश	५	७
त्रिदशालय	४	६
त्रिदिव	४	६
त्रिदिवेश	५	७
त्रिपथगा	१०४	३१
त्रिपुटा	१६४	१०८
	१७१	१२५
त्रिपुरान्तक	१३	३३
त्रिफला	३३९	१११
त्रिभण्डी	१६४	१०८
त्रियामा	४४	४
त्रिलोचन	१३	३२
त्रिवर्ग	२६४	५८
	२७२	१९
त्रिविक्रम	९	२०
त्रिविष्टप	४	६
त्रिवृत्	१६४	१०८
त्रिवृता	१६४	१०८
त्रिसंध्य	४४	३
त्रिसीत्य	३०४	९
त्रिस्रोतस्	१०४	३१
त्रिहल्य	३०४	९
त्रिहायणी	३२५	६८
त्रुटि	१७१	१२५
	३६९	६२
	४०३	३७
त्रेता	२५६	२०
	४०८	६९
त्रोटि	२००	३६
त्र्यम्बक	१३	३३
त्र्यम्बकसख	२८	६८
त्र्यूषण	३३९	१११
त्वक्क्षीरी	३३८	१०९
त्वक्पत्र	१७४	१३४
त्वक्सार	१८२	१६०
त्व	३७६	८२
त्वच्	१३१	१२
	२२३	६२
त्वच	१७४	१३४
त्वचिसार	१८२	१६०
त्वरा	३९४	२६
त्वरित	२७	६४
	२८८	७३
त्वरितोदित	६९	२०
त्वष्ट	३८२	९९
त्वष्टृ	३४१	९
	४०३	३५
त्विष्	४३	३४
	४३७	२२५
त्विषांपति	४०	३०
त्सरु	२९४	९०

द

शब्दः	पृष्ठम्	श्लोकः
दंश	१९७	२७
दंशन	२८६	६४
दंशित	२८६	६५
दंशी	१९७	२७
दंष्ट्रिन्	१८७	२
दक्ष	३४४	१९
दक्षिण	३५५	८
दक्षिणस्थ	२८५	६०
दक्षिणा	३०	१
दक्षिणाग्नि	२५६	१९
दक्षिणारुस्	३४५	२४
दक्षिणार्ह	३५४	५
दक्षिणेय	३५४	५
दक्षिणेर्मन्	३४५	२४
दक्षिण्य	३५४	५
दग्ध	३८२	९९
दधिका	३१९	४९
दण्ड	४१	३१
	२७२	२१
	४०४	४२
दण्डधर	२४	५९
दण्डनीति	६५	५
दण्डविष्कम्भ	३२६	७४
दण्डाहत	३२१	५३
दधि	३२०	५१
दधित्थ	१३५	२१
दधिफल	१३५	२१
दधिसक्तु	३१९	४८
दनुज	७	१२
दन्त	२३४	९१
दन्तधावन	१४५	४९
दन्तभाग	२७८	४०
दन्तशठ	१३५	२१
	१३६	२४
दन्तशठा	१७५	१४०
दन्तावल	२७६	३४
दन्तिका	१७६	१४४
दन्तिन्	२७६	३४
दन्दशूक	८९	८
दभ्र	३६९	६१
दम	२७२	२१
	३८७	३
दमथ	३८७	३
दमित	३८१	९७
दमुनस्	२२	५६
दम्पती	२१४	३८
दम्भ	८२	३०
दम्भोलि	२०	४७
दम्य	३२३	६२
दया	७८	१८
दयालु	३५६	१५
दयित	३६७	५३
दर	७९	२१
	४२९	१८४
दरत्	४५२	९
दरिद्र	३६६	४९
दरी	१२६	६
दर्दुर	१०२	२४
दर्दुघ्न	१७७	१४७
दर्दुण	२२१	५९
दर्दुरोगिन्	२२१	५९
दर्पक	१२	२५
दर्पण	२५०	१४०
दर्भ	१८४	१६६
दर्वि	३१३	३४
दर्विका	१६९	११९
दर्वीकर	८९	८
दर्श	४६	८
	२६४	४८
दर्शक	२६८	६
दर्शन	३९५	३१
दल	१३२	१४
दव	४३३	२०६
दविष्ठ	३७२	६९
दवीयस्	३७२	६९
दशन	२३४	९१
दशनवासस्	२३३	९०
दशबल	७	१४
दशमिन्	२१६	४३
दशमीस्थ	४१२	८७
दशा	२४२	११४
	४३५	२१६
दस्यु	२६९	११
	३४५	२४
दस्र	२१	५१
दहन	२२	५१
दाक्षायणी	३८	२१
दाक्षाय्य	१९५	२१
दाडिम	१५०	६४
	४६२	४२
दाडिमपुष्पक	१४५	४९
दाण्डपाता	४५१	६
दात	३८३	१०३
दात्यूह	१९४	२०
दात्र	३०५	१३

शब्दः	पृष्ठम्	श्लोकः
दान	२५९	२९
	२७२	२०
	२७७	३७
दानव	७	१२
दानवारि	५	९
दानशौण्ड	३५४	६
दान्त	२६२	४२
	३८१	९७
दान्ति	३८७	३
दापित	३६३	४०
दाम	३२६	७३
दामिनि	३२६	७३
दामोदर	९	१८
दायाद	४१२	८९
दार	२०४	६
दारद	९०	११
दारित	३८२	१००
दारु	१३१	१३
	१४६	५३
दारुण	७८	२०
दारुहरिद्रा	१६२	१०२
दारुहस्तक	३१३	३४
दार्वाघाट	१९३	१७
दार्विका	३३५	१०१
दार्वी	१६२	१०२
दाव	४३३	२०६
दाविक	१०६	३६
दाश	९८	१५
दाशपुर	१७३	१३१
दास	३४३	१७
दासी	१५४	७४
दासीसभ	४५८	२७
दासेय	३४३	१७
दासेर	३४३	१७
दिगम्बर	३६३	३९
दिग्गज	३१	४
दिग्ध	२९३	८८
	३७९	९०
दित	३८३	१०३
दितिसुत	७	१२
दिधिषु	३१०	९३
दिधिषू	३१०	२३
दिन	४४	२
दिनान्त	४४	३
दिव्	४	६
	२९	१
दिवस	४४	२
दिवस्पति	१७	४२
दिवा	४४४	६
दिवाकर	४०	२८
दिवाकीर्ति	३४१	१०
	३४४	१९
दिविषद्	५	८
दिवौकस्	४३७	२६६
	५	७
दिव्योपपादुक	३६६	५०
दिश	३०	१
दिशांपति	३१	३
दिश्य	३१	२
दिष्ट	४३	१
	५३	२८
	४०३	३५
दिष्टान्त	३०१	११६
दिष्ट्या	४४६	१०
दीक्षित	२५३	८
दीदिवि	३१९	४८
दीधिति	४२	३३
दीन	३६६	४९
दीप	२४९	१३८
दीपक	३९८	११
दीप्ति	४३	३४
दीप्य	१६६	१११
दीर्घ	३७२	६९
दीर्घकोशिका	१०२	२५
दीर्घदर्शिन्	२५१	६
दीर्घपृष्ठ	८९	८
दीर्घवृन्त	१४७	५७
दीर्घसूत्र	३५७	१७
दीर्घिका	१०४	२८
दुःख	९२	३
	४५७	२३
दुःषमम्	४४७	१४
दुःस्पर्श	१५९	९१
दुःस्पर्शा	१६०	९४
दुकूल	२४१	११३
दुग्ध	३२०	५१
दुग्धिका	१६२	१००
दुद्रुम	१७८	१४८
दुन्दुभि	७३	६
	४२०	१३६
दुरध्व	११५	१६
दुरालभा	१५९	९२
दुरित	१३	२३
दुरोदर	४२६	१७१
दुर्ग	२७१	१७
दुर्गत	३६६	४९
दुर्गति	९१	१
दुर्गन्ध	५९	१२
दुर्गम	११५	१७
दुर्गसंचर	३९३	२५
दुर्गा	१६	३७
दुर्जन	३६५	४७
दुर्दिन	३४	१२
दुर्नामक	२२०	५४
दुर्नामन्	१०२	२५
दुर्बल	२१६	४४
दुर्मनस्	३५४	८
दुर्मुख	३६२	३६
दुर्वर्ण	३३३	९६
दुर्विध	३६६	४९
दुर्हृद्	२६९	१०
दुलि	१०२	३२
दुश्यवन	१७	४४
दुष्कृत	५१	२३
दुष्ट	४४८	१९
दुष्पत्र	१७२	१२८
दुष्प्रधर्षणी	१६७	११४
दुःषम	४४७	१४
दुहितृ	२११	२८
दूत	२७१	१६
दूती	२०९	१७
दूत्य	२७१	१६
दून	३८३	१०२
दूर	३७२	६८
दूरदर्शिन्	२५१	६
दूर्वा	१८२	१५८
दूषिका	२२५	६७
दूष्य	२४४	१२०
दूष्या	२७९	४२
दृढ	२७	६७
	३७४	७६
	४०४	४६
दृढसंधि	३७४	७५
दृति	४५५	१९
दृब्ध	३७७	८६
दृश्	४३५	२१७
	२३५	९३
दृषद्	१२४	४
दृष्ट	२७५	३०
दृष्टरजस्	२०६	८
दृष्टान्त	४०७	४२
दृष्टि	२३५	९३
	४०३	३८
दृष्टेन्दु	४६	९
देव	५	७
	७६	१३
देवकीनन्दन	९	२१
देवकुसुम	२४५	१२५
देवखातक	१०३	२७
देवखातबिल	१२६	६
देवच्छन्द	२३९	१०५
देवजग्धक	१८४	१६६
देवतरु	२१	५०
देवता	५	९
देवताड	१५१	७९
देवदारु	१४६	५४
देवद्यच्	३६१	३४
देवन	३५२	४५
	४१७	११७
देववल्लभ	१३६	२५
देवभूय	२६५	५२
देवमातृक	११४	१२
देवयोनि	६	११
देवर	२१३	३२
देवल	३४२	११
देवसभा	२१	४८
देवाजीव	३४२	११
देवी	७६	१३
	१५७	८३
	१७३	१३३
देवृ	२१३	३२
देश	११३	७

शब्दः	पृष्ठम्	श्लोकः
देशरूप	२७३	२४
देह	२२६	७१
देहली	१२०	१३
दैतेय	७	१२
दैत्य	७	१२
दैत्यगुरु	३९	२५
दैत्या	१७०	१२३
दैत्यारि	९	१९
दैर्घ्य	२४२	११४
दैव	५३	२८
दैव(तीर्थं)	२६५	५०
दैवज्ञ	२७०	१४
दैवज्ञा	२०९	२०
दैवत	५	९
	५१	२१
दोला	१६०	९५
	२८३	५३
दोषा	४४४	६
दोषज्ञ	२५१	५
दोषैकदृश्	३६५	४६
दोस्	२३०	८०
दोहद	८१	२७
दोहदवती	२२०	२१
द्युति	३६	१७
	४३	३४
द्युमणि	४०	३०
द्युम्न	३३१	९०
द्यूत	३५२	४४
द्यूतकारक	३५२	४४
द्यूतकृत्	३५१	४३
द्यो	४	६
	२९	१
द्योत	४३	३४
द्रप्स	३२०	५१
द्रव	८४	३२
	३००	१११
द्रवन्ती	१५८	८७
द्रविण	२९७	१०२
	३३१	९०
	४०६	५२
	४५७	२२
द्रव्य	३३१	९०
	४२३	१५४

शब्दः	पृष्ठम्	श्लोकः
द्राक्	४४३	२
द्राक्षा	१६४	१०७
द्राघिष्ठ	३८६	११२
द्राविडक	१७४	१३५
द्रु	१२८	५
द्रुकिलिम	१४६	५३
द्रुघण	२९४	९१
द्रुण	१९२	१४
द्रुणी	४५२	९
द्रुत	२७	६४
	१७९	८९
	३८२	१००
	४४३	२
द्रुम	१२८	५
द्रुमामय	२४५	१२५
द्रुमोत्पल	१४८	६०
द्रुवय	३३०	८५
द्रुहिण	८	१७
द्रोण	३३१	८८
	४०५	४९
द्रोणकाक	१९४	२१
द्रोणक्षीरा	३२६	७२
द्रोणदुग्धा	३२६	७२
द्रोणी	९७	११
	१६०	९५
द्रोहचिन्तन	५६	४
द्रौणिक	३०४	१०
द्वन्द्व	२०१	३८
	४३४	२१२
द्वयातिग	२६३	४५
द्वादशाङ्गुल	२३१	८४
द्वादशात्मन्	४०	२८
द्वापर	५६	३
	४२५	१६२
द्वार्	१२२	१६
द्वार	१२२	१६
द्वारपाल	२६८	६
द्वाःस्थ	२६८	६
द्वास्थित	२६८	६
द्विगुणाकृत	३०४	९
द्विज	१९८	३२
	४०२	३०
द्विजराज	३४	१५

शब्दः	पृष्ठम्	श्लोकः
द्विजा	१६९	१२०
द्विजाति	२५१	४
द्विजिह्व	४१९	१३३
द्वितीया	२०४	५
द्विप	२७६	३४
द्विपाद्य	२७४	२७
द्विरद	२७६	३४
द्विरेफ	१९८	२९
द्विष	२६९	११
द्विषत्	२६९	११
द्विहायनी	३२५	६८
द्वीप	९६	८
द्वीपवती	१०४	३०
द्वीपिन्	१८६	१
द्वेषण	२६९	१०
द्वेष्य	३६४	४५
द्वैध	२७१	१८
द्वैप	२८३	५३
द्वैमातुर	१६	३८
द्व्यष्ट	३३४	९७

ध

शब्दः	पृष्ठम्	श्लोकः
धत्तूर	१५५	७७
धन	३३१	९०
धनंजय	२२	५३
धनद	२८	६८
धनहरि	१७२	१२८
धनाधिप	२८	६८
धनिन्	३५५	१०
धनिष्ठा	३८	२२
धनुर्धर	२८७	६९
धनुष्पट	१४०	३५
धनुष्मत्	२८७	६९
धनुस्	२९१	८३
धन्य	३५३	३
धन्वन्	११२	५
	२९१	८३
धन्वयास	१५९	९१
धन्विन्	२८७	६९
धमन	१८३	१६२
धमनि	२२४	६५
धमनी	१७२	१३०

शब्दः	पृष्ठम्	श्लोकः
धम्मिल्ल	२३६	९७
धर	१२३	१
धरणि	११०	२
धरा	११०	२
धरित्री	११०	२
धर्म	५२	२४
	६४	३
	४२१	१३९
धर्मचिन्ता	८१	२८
धर्मध्वजिन्	२६६	५४
धर्मपत्तन	३१४	३६
धर्मराज	७	१३
	२४	५८
	४०२	३१
धर्मसंहिता	६५	६
धव	२१३	१३५
	४३३	२०६
धवल	५९	१३
धवला	३२५	६७
धवित्र	२५७	२३
धातकी	१७०	१२४
	४५१	७
धातु	१२७	८
	४०८	६५
धातुपुष्पिका	१७०	१२४
धातृ	८	१७
धात्री	४२७	१७६
धाना	३१९	४७
धानुष्क	२८७	६९
धान्य	३०८	२१
धान्यत्वच्	३०९	२२
धान्याक	३१५	३८
धान्याम्ल	३१५	३९
धामन्	४१८	१२४
धामार्गव	१५८	८८
	१६८	११७
धाय्या	२५६	२२
धारणा	२७४	२६
धारा	२८२	४९
धाराधर	३२	७
धारासंपात	३३	११
धार्तराष्ट्र	१९६	२४
धावनी	१६०	९३

शब्दः	पृष्ठम्	श्लोकः
धिक्	४४०	२४०
धिक्कृत	३६३	३९
	३८०	९४
धिषण	३९	२४
धिषणा	५५	१
धिष्ण्य	४३२	१५५
धी	५५	१
धी	५६	२
धीन्द्रिय	५८	८
धीमत्	२५१	६
धीमती	२०८	१२
धीर	२४५	१२४
	२५१	५
धीवर	९८	१५
धीशक्ति	३९३	२५
धीसचिव	२६७	४
धुत	३७८	८७
धुनी	१०४	३०
धुर्	२८३	५५
धुरंधर	३२४	६५
धुरीण	३२४	६५
धुर्य	३२४	६५
धूर्वह	३२४	६५
धूत	३८४	१०७
धूपायित	३८३	१०२
धूपित	३८३	१०२
धूमकेतु	४०७	५८
धूमयोनि	३२	७
धूमल	६१	१६
धूम्या	३९७	४२
धूम्याट	१९३	१६
धूम्र	६१	१६
धूर्जटि	१३	३३
धूर्त	१५५	७७
	३५१	४३
	३६५	४७
धूलि	२९६	९८
धूसर	६०	१३
धृति	४०९	७४
धृष्ट	३५९	२५
धृष्णज्	३५९	२५
धृष्णि	४२	३३
धेनु	३२६	७१
धेनुका	२७७	३६
	३९९	१५

शब्दः	पृष्ठम्	श्लोकः
धेनुष्या	३२६	७२
धैनुक	३२३	६०
धैवत	७१	१
धोरण	२८४	५८
धौतकौशेय	२४१	११३
धौरितक	२८२	४८
धौरेय	३२४	६५
ध्याम	१८४	१६६
ध्रुव	३७	२०
	१२९	९
	३७३	७२
	४३४	२११
ध्रुवा	१६७	११५
	२५८	२५
ध्वज	२९७	९९
ध्वजिनी	२८९	७८
ध्वनि	७०	२२
ध्वनित	३८०	९४
ध्वस्त	३८३	१०४
ध्वाङ्क्ष	१९४	२०
	४३५	२१९
ध्वान	७०	२२
ध्वान्त	८७	३

न.

शब्दः	पृष्ठम्	श्लोकः
न	४४६	११
नकुलेष्टा	१६७	११५
नक्तक	२४२	११५
नक्तम्	४४४	६
नक्तमाला	१४४	४७
नक्र	१०१	२१
नक्षत्र	३७	२१
नक्षत्रमाला	२३९	१०६
नक्षत्रेश	३४	१५
नख	१७२	१३०
	२३१	८३
नखर	२३१	८३
नग	४००	१९
नगरी	११६	१
नगौकस्	१९८	३३
नग्न	३६३	३९
नग्नहू	३५१	४२
नग्निका	२०८	१६
	२०६	८
नट	१४७	५६
	३४२	१२

शब्दः	पृष्ठम्	श्लोकः
नटन	७५	१०
नटी	१७२	१२९
नड	१८३	१६२
	४६०	३३
नडप्राय	११३	९
नडसंहति	१८५	१६८
नड्या	१८५	१६८
नड्वत्	११३	९
नड्वल	११३	९
नत	३७२	७१
नतनासिक	२१६	४५
नदी	१०४	२९
नदीमातृक	११४	१२
नदीसर्ज	१४४	४५
नद्री	३४८	३१
ननान्द	२१२	२२
ननु	४४१	२४८
ननुच	४४७	१४
नन्दक	१३	२८
नन्दन	१९	४५
नन्दिवृक्ष	१७१	१२८
नन्द्यावर्त	१२०	१०
नपुंसक	२१५	३९
नप्त्री	२१२	२९
नभस्	२९	१
	४९	१६
	४३८	२३२
नभसंगम	१९८	३४
नभस्य	४९	१७
नभस्वत्	२५	६३
नमस्	४४८	१८
नमसित	३८३	१०१
नमस्कारी	१७६	१४१
नमस्या	२६०	३५
नमस्यित	३८३	१०१
नमुचिसूदन	१७	४३
नय	३८९	९
नयन	२३५	९३
नर	२०३	१
नरक	९१	१
नरवाहन	२८	६९
नर्तक	७५	११
नर्तकी	७४	८

शब्दः	पृष्ठम्	श्लोकः
नर्तन	७५	१०
नर्मदा	१०५	३२
नर्मन्	८४	३२
नलकूबर	२९	७०
नलद	१८४	१६४
नलमीन	९९	१८
नलिन	१०७	३९
नलिनी	१०७	३९
नली	१७२	१२९
नल्व	११६	१८
नव	३७५	७७
नवदल	१०९	४३
नवनीत	३२१	५२
नवमालिका	१५३	७२
नवसूतिका	३२६	७१
नवाम्बर	२४१	११२
नवीन	३७५	७७
नवोद्धृत	३२१	५२
नव्य	३७५	७७
नष्ट	३००	११२
नष्टचेष्टता	८४	३३
नष्टाग्नि	२६६	५३
नष्टेन्दुकला	४६	९
नस्तित	३२४	६३
नस्योत	३२४	६३
नहि	४४६	११
नाक	४	६
	३९७	२
नाकु	११४	१४
नाकुली	१६७	११४
नाग	८७	४
	२७६	३४
	३३७	१०५
	३६९	५९
	४००	२१
नागकेसर	१५०	६५
नागजिह्विका	३३८	१०८
नागबला	१६८	११७
नागर	३१५	३८
	४२९	१८८
नागरङ्ग	१४१	३८
नागलोक	८६	१
नागवल्ली	६९	१२०

शब्दः	पृष्ठम्	श्लोकः
नागसंभव	३३७	१०५
नागान्तक	१३	२९
नाट्य	७५	१०
नाडिन्धम	३४१	८
नाडी	२२४	६५
	३०८	२२
	४०४	४३
नाडीव्रण	२२०	५४
नाथवत्	३५७	१६
नाद	७०	२३
नादेयी	१३८	३०
	१४१	३८
	१५०	६५
	१६८	११८
नाना	४४१	२४७
	४४४	३
नानारूप	३८०	९३
नान्दीकर	३६२	३८
नान्दीवादिन्	३६२	३८
नापित	३४१	१०
नाभि	२८४	५६
	४२०	१३७
	४५२	९
नाम	४४२	२५१
नामधेय	६६	८
नामन्	६६	८
नाय	३८९	९
नायक	३५५	११
नारक	९०	१
नारद	२०	४८
नाराच	२९३	८७
नाराची	३४८	३२
नारायण	९	१८
नारायणी	१६२	१०१
नारी	२०३	२
नाल	१०८	४२
	३०८	२२
नाला	१०८	४२
नालिका	३१४	३४
नालिकेर	१८५	१६८
नाविक	९७	१२
नाव्य	९६	१०
नाश	३०१	११६
नासत्य	२१	५१
नासा	१२१	१३
	२३३	८९
नासिका	२३३	८९
नास्तिकता	५६	४
निःशलाक	२७३	२२
निःशेष	३७१	६५
निःशोध्य	३६८	५६
निश्रेणि	१२३	१८
निःश्रेयस	५७	६
निःषमम्	४४७	१४
निःसरण	१२३	१९
निःस्व	३६६	४९
निकट	३७१	६६
निकर	२०१	३९
निकर्षण	१२३	१९
निकष	३४८	३२
निकषा	४४५	७
	४४८	१९
निकषात्मज	२५	६०
निकाम	३२२	५७
निकाय	२०२	४२
निकाय्य	११७	५
निकार	३९१	१५
	३९६	३६
निकारण	३००	११२
निकुञ्चक	३३१	८८
निकुञ्ज	१२७	८
निकुम्भ	१७६	१४४
निकुरम्ब	२०१	४०
निकृत	३६३	४१
	३६५	४६
निकृति	८२	३०
निकृष्ट	३६७	५४
निकेतन	११७	४
निकोचक	१३८	२९
निक्कण	७१	२४
निक्काण	७१	२४
निखिल	३७१	६५
निगड	२७८	४१
निगद	३९०	१२
निगम	११६	१
	४२१	१४०
निगरण	३९६	३७
निगाद	३९०	१२
निगार	३९६	३७
निगाल	२८१	४८
निग्रह	३९०	१३
निघ	३९६	३६
निघस	३२२	५६
निघ्न	३५७	१६
निचुल	१४९	६१
निचोल	२४३	११६
निज	४०२	३२
नितम्ब	२२८	७४
नितम्बिनी	२०४	३
नितान्त	२७	६७
नित्य	२७	६६
	३७३	७२
निदाघ	५०	१९
	८४	३३
निदान	५४	२८
निदिग्ध	३७८	८९
निदिग्धिका	१६०	९३
निदेश	२७३	२५
निद्रा	८५	३६
निद्राण	३६१	३३
निद्रालु	३६१	३३
निधन	३०१	११६
	४१७	१२३
निधि	२९	७१
निधुवन	२६६	५७
निध्वन	३९५	३१
निनद	७०	२२
निनाद	७०	२२
निन्दा	६७	१३
निप	३१२	३२
निपठ	३९४	२९
निपाठ	३९४	२९
निपातन	३९४	२७
निपान	१०३	२६
निपुण	३५३	४
निबन्धन	७४	७
निभ	३५०	३७
निभृत	३५९	२५
निमय	३२८	८०
निमित्त	४१०	७६
निमेष	४७	११
निम्न	९८	१४
निम्नगा	१०४	३०
निम्ब	१४९	६२
निम्बतरु	१३७	२६
नियति	५३	२८
नियन्तृ	२८५	५९
नियम	५७	५
	२६१	३७
	२६५	४९
नियामक	९७	१२
नियुत	४५७	२४
नियुद्ध	२९९	१०६
नियोज्य	३४३	१७
निर्	४४२	२५३
निरन्तर	३७१	६६
निरय	९१	१
निरर्गल	३७७	८३
निरर्थक	३७६	८१
निरवग्रह	३५७	१५
निरसन	३९५	३१
निरस्त	६९	२०
	२९३	८८
	३६३	४०
निराकरिष्णु	३६०	३०
निराकृत	३६३	४०
निराकृति	२६६	५३
	३९५	३१
निरामय	२२१	५७
निरीश	३०५	१३
निरोध	३९०	१३
निर्ऋति	९१	१२
निर्गुण्डी	१४५	६८
	१५१	७०
निर्ग्रन्थक	३००	११३
निर्घोष	७०	२३
निर्जर	५	७
निर्जितेन्द्रिय-ग्राम	२६३	४३
निर्झर	१२६	५

शब्दः	पृष्ठम्	श्लोकः
निर्णय	५६	३
निर्णिक्त	३६८	५६
निर्णेजक	३४२	१०
निर्देश	२७३	२५
निर्भर	२७	६६
निर्मद	२७७	३६
निर्मुक्त	८९	६
निर्मोक	९०	९
निर्याण	२७७	३८
निर्यातन	४१७	१२०
निर्यूह	४३९	२३६
निर्वपन(ण)	२५९	३०
निर्वर्णन	३९५	३१
निर्वहण	७६	१५
	३००	११२
निर्वाण	५७	६
	३८१	९६
निर्वात	३८१	९६
निर्वाद	६७	१३
	४१२	९०
निर्वापण	३००	११४
निर्वार्य	३५६	१३
निर्वासन	३००	११३
निर्वृत्त	३८२	१००
निर्वेश	३५०	३८
	३९२	२०
	४३५	२१५
निर्व्यथन	८६	२
निर्हार	३९१	१७
निर्हारिन्	५९	११
निर्हाद	७०	२३
निलय	११७	५
निवह	२०१	३९
निवात	४११	८४
निवाप	२५९	३१
निवीत	२४२	११३
	२६५	५०
निवृत	३७८	८८
निवेश	२७६	३३
निशा	४४	४
निशान्त	११७	५
निशापति	३४	१४
निशाह्वा	३१६	४१
निशित	३७९	९१
निशीथ	४५	६
निशीथिनी	४४	४
निश्चय	५६	३
निश्रेणी	१२३	१८
निश्रेयस	५७	६
निषङ्ग	२९३	८८
निषङ्गिन्	२८७	६९
निषद्या	११६	२
निषद्वर	९६	९
निषध	१२४	३
निषाद	७१	१
	३४४	२०
निषादिन्	२८५	५९
निषूदन	३००	११३
निष्क	३९९	१४
निष्कला	२१०	२१
निष्कासित	३६३	३९
निष्कुट	१२७	१
निष्कुटि	१७०	१२५
निष्कुह	१३२	१३
निष्क्रम	३९३	२५
निष्ठा	७६	१५
	४०३	४१
निष्ठान	३१७	४४
निष्ठीवन	३९६	३८
निष्ठुर	६९	१९
	३७४	७६
निष्ठेव	३९६	३८
निष्ठेवन	३९६	३८
निष्ठ्यूत	३७८	८७
निष्ठ्यूति	३९६	३८
निष्णात	३५३	४
निष्पक्व	३८१	९५
निष्पन्न	३८२	१००
निष्पाव	३९३	२४
निष्प्रभ	३८२	१००
निष्प्रवाणि	२४१	११२
निसर्ग	८६	३८
निसृष्ट	३७८	८८
निस्तल	३७२	६९
निस्तर्हण	३००	११४
निस्त्रिंश	२९३	८९
निस्राव	३२०	४९
निखन	७०	२३
निखान	७०	२३
निहनन	३००	११४
निहाका	१०१	२२
निहिंसन	३००	११३
निहीन	३४३	१६
निह्नव	६८	१७
	४३३	२०८
नीकाश	३५०	३७
नीच	३४३	१६
नीचैस्	४४७	१७
नीड	२००	३७
नीडोद्भव	१९८	३४
नीध्र	१२१	१४
नीप	१४३	४२
नीर	९३	४
नील	६०	१४
नीलकण्ठ	१९८	३०
	४०३	४०
नीलङ्कु	१९१	१३
नीललोहित	१३	३३
नीला	१९७	२६
नीलाम्बर	११	२४
नीलाम्बुजन्मन्	१०६	३७
नीलिका	१४५	७०
नीलिनी	१६०	९५
नीली	१६०	९४
नीवाक	३९३	२३
नीवार	३१०	२५
नीवी	३२८	८०
	४३४	२१२
नीवृत्	११३	८
नीशार	२४३	११८
नीहार	३६	१८
नु	४४१	२४८
नुति	६७	११
नुत्त	३७८	८७
नुन्न	३७८	८७
नूतन	३७५	७७
नूल	३७५	७८
नूद	१४२	४१
नूनम्	४४२	२५०
	४४७	१६
नूपुर	२४०	१०९
नृ	२०३	१
नृत्य	७५	१०
नृप	२६७	१
नृपलक्ष्मन्	२७५	३२
नृपसभ	४५८	२७
नृपासन	२७५	३१
नृशंस	३६५	४७
नृसेन	४६२	४०
नेतृ	३५५	११
नेत्र	२३५	९३
	४२८	१८०
नेत्राम्बु	२३५	९३
नेदिष्ठ	३७२	६८
नेपथ्य	२३७	९९
नेमि	१०३	२७
	२८४	५६
नेमी	१३७	२६
नैकमेद	३७६	८३
नैगम	३२८	७८
	४२१	१४०
नैचिकी	३२४	६७
नैपाली	३३८	१०८
नैमेय	३२८	८०
नैयग्रोध	१३४	१८
नैर्ऋत	२५	६०
	३१	५
नैष्किक	२६८	७
नैस्त्रिंशिक	२८८	७०
नो	४४६	११
नौ	९६	१०
नौकादण्ड	९७	१३
नौतार्य	९६	१०
न्यक्ष	४३७	२२५
न्यग्रोध	१३९	३२
	४१३	९६
न्यग्रोधी	१५८	८७
न्यच्	३७२	७०
न्यङ्कु	१९०	१०
न्यस्त	३७८	८८
न्याद	३२२	५६

शब्दः	पृष्ठम्	श्लोकः
न्याय	२७३	२४
न्याय्य	२७३	२५
न्यास	३२९	८१
न्युङ्ख	४५४	१७
न्युब्ज	२२२	६१
न्यून	४१८	१२८
प		
पक्कण	१२३	२०
पक्व	३७९	९१
	३८१	९६
पक्ष	४७	१२
	२००	३६
	२३७	९८
	२९३	८७
	४३६	२२०
पक्षक	१२१	१४
पक्षति	४३	१
	२००	३६
	४०९	७२
पक्षद्वार	१२१	१४
पक्षभाग	२७८	४०
पक्षमूल	२००	३६
पक्षान्त	४६	७
पक्षिन्	१९८	३२
पक्षिणी	४५	५
पक्ष्मन्	४१७	१२१
पङ्क	५१	२३
	९६	९
पङ्किल	११३	१०
पङ्केरुह	१०७	४०
पङ्क्ति	१२८	४
	४०९	७२
पङ्गु	२१८	४८
पचंपचा	१६२	१०२
पचा	३८८	८
पञ्चजन	२०३	१
पञ्चता	३०१	११६
पञ्चदशी	४६	७
पञ्चम	७१	१
पञ्चलक्षण	६५	५
पञ्चशर	१२	२५
पञ्चशाख	२३१	८१
पञ्चाङ्गुल	१४५	५१
पञ्चालिका	३४७	२९
पञ्चास्य	१८६	१
पञ्जर	४५९	३१
पञ्जिका	४५१	७
पट	२४२	११६
पटच्चर	२४२	११५
पटल	१२१	१४
	४३२	२०१
पटलप्रान्त	१२१	१४
पटवासक	२५०	१३९
पटह	७३	६
	२९९	१०८
पटु	१८०	१५५
	३४४	१९
	३६२	३५
	४०३	४०
पटुपर्णी	१७५	१३८
पटोल	१८०	१५५
पटोलिका	१६८	११८
पट्ट	४५४	१७
पट्टिका	१४२	४१
पट्टिन्	१४२	४१
पट्टिश	४५६	२१
पण	३३१	८८
	३५०	३८
	३५२	४४
	३५२	४५
	४०५	४६
पणव	७४	८
पणायित	३८५	१०९
पणित	३८५	१०९
पणितव्य	३२९	८२
पण्ड	२१५	३९
पण्डित	२५१	५
पण्य	३२९	८२
पण्यवीथिका	११७	२
पण्या	१७८	१५०
पण्याजीव	३२८	७८
पतग	१९८	३३
पतङ्ग	१९७	२८
	४००	२०
पतङ्गिका	१९७	२७
पतत्	१९८	३३
पतत्र	२००	३६
पतत्रिन्	१९८	३३
पतद्ग्रह	२४९	१३९
	४५६	२१
पतयालु	३६०	२७
पताका	२९७	९९
पताकिन्	२८८	७१
पति	२१३	३५
	३५५	१०
पतिंवरा	२०५	७
पतिवत्नी	२०७	१२
पतिव्रता	२०५	६
पत्तन	११६	१
पत्ति	२८७	६६
	२९०	८०
	४०९	७२
पत्तिसंहति	२८७	६७
पत्नी	२०४	५
पत्र	१३२	१४
	२००	३६
	२८४	५८
	४२८	१७९
पत्रपरशु	३४८	३२
पत्रपाश्या	२३८	१०३
पत्ररथ	१९८	३३
पत्रलेखा	२४४	१२२
पत्राङ्ग	२४७	१३२
	३३९	१११
पत्राञ्जलि	२४४	१२२
पत्रिन्	१९२	१५
	१९८	३३
	२९२	८७
	४१५	१०६
पत्रोर्ण	१४७	५६
	२४१	११३
पथिक	२७१	१७
पथिन्	११४	१५
पथ्या	१४८	५९
पद्	२२६	७१
पद	४१३	९३
पदग	२८७	६६
पदवी	११४	१५
पदाजि	२८७	६६
पदाति	२८७	६६
पदिक	२८७	६७
पद्म	२८७	६७
पद्धति	११४	१५
पद्म	२९	७१
	१०७	३९
पद्मक	२७८	३९
पद्मचारिणी	१७७	१४६
पद्मनाभ	९	२०
पद्मपत्र	१७७	१४५
पद्मराग	३३२	९२
पद्मा	१२	२७
	१५९	८९
	१७७	१४६
पद्माकर	१०३	२८
पद्माट	१७७	१४७
पद्मालया	१२	२७
पद्मिन्	२७६	३५
पद्मिनी	१०७	३९
पद्य	४५९	३१
पद्या	११४	१५
पनस	१४८	६१
पनायित	३८५	१०९
पनित	३८५	१०९
पन्न	३८३	१०४
पन्नग	८९	८
पन्नगाशन	१३	२९
पयस्	९३	३
	३२०	५१
	४३९	२३३
पयस्य	३२०	५१
पयोधर	४२५	१६३
पर	२६९	११
	४३०	११९
परजात	३४३	१८
परतन्त्र	३५७	१६
परपिण्डाद	३५८	२०
परभृत्	१९४	२०
परभृत	१९४	१९
परमम्	४४६	१२
परमा	३५	१७
परमान्न	२५७	२४
परमेष्ठिन्	८	१६
परम्पराक	२५८	२६
परवत्	३५७	१६
परशु	२९४	९२

शब्दः	पृष्ठम्	श्लोकः
परश्वध	२९४	९२
परश्वस्	४४९	२२
परश्शत	३७०	६४
पराक्रम	२९७	१०२
	४२०	१३८
पराग	१३४	१७
	४००	२१
पराङ्मुख	३६१	३३
पराचित	३४३	१८
पराचीन	३६१	३३
पराजय	३००	१११
पराजित	३००	११२
पराधीन	३५७	१६
पराब्ज	३५८	२०
पराभूत	३००	११२
पराशि	४४८	२०
परार्ध्य	३६८	५८
परासन	३००	११३
परासु	३०१	११७
परास्कन्दिन्	३४५	२५
परिकर	४२५	१६५
परिकर्मन्	२४४	१२१
परिक्रम	३९१	१६
परिक्रिया	३९२	२०
परिक्षिप्त	३७८	८८
परिखा	१०४	२९
परिग्रह	४३९	२३७
परिघ	२९४	९१
	४०१	२७
परिघातित	२९४	९१
परिचय	३९३	२३
परिचर	२८६	६२
परिचर्या	२६०	३५
परिचार्य्य	२५६	२०
परिचारक	३४३	१७
परिणत	३८१	९६
परिणय	२६६	५६
परिणाम	३९१	१५
परिणाय	३५२	४५
परिणाह	२४२	११४
परितस्	४४७	१३
परित्राण	३८७	५
परिदान	३२८	८०
परिदेवन	६८	१६
परिधन	२४३	११७
परिधि	४२	३२
	४१४	९७
परिधिस्थ	२८६	६२
परिपण	३२८	८०
परिपन्थिन्	२६९	११
परिपाटी	२६१	३६
परिपूर्णता	२४९	१३७
परिपेलव	१७३	१३१
परिप्लव	३७४	७५
परिबर्ह	४४०	२३९
परिभव	७९	२२
परिभाषण	६८	१४
परिभूत	३८४	१०६
परिमल	५९	१०
	३९०	१३
परिरम्भ	३९५	३०
परिवर्जन	३००	११४
परिवादिनी	७२	३
परिवापित	३७७	८५
परिवित्ति	२६६	५६
परिवृढ	३५५	११
परिवेत्तृ	२६६	५६
परिवेष	४२	२३
परिव्याध	१३८	३०
	१४८	६०
परिव्राज्	२६२	४१
परिषद्	२५५	१५
परिष्कार	२३८	१०१
परिष्कृत	२३८	१००
परिष्वङ्ग	३९५	३०
परिसर	११४	१४
परिसर्प	३९२	२०
परिसर्या	३९२	२१
परिस्कन्द	३४३	१८
परिस्तोम	२७९	४२
परिस्पन्द	२४९	१३७
परिस्रुत्	३५०	३९
परिस्रुता	३५०	३९
परीक्षक	३५४	७
परीभाव	७९	२२
परीवर्त	३२८	८०
परीवाद	६७	१३
परीवाप	४१८	१२९
परीवार	४२६	१६९
परीवाह	९६	१०
परीष्टि	२६०	३२
परीसार	३९२	२१
परीहार	४२६	१६९
परीहास	८४	३२
परुत्	४४८	२०
परुष	६९	१९
परुस्	१८३	१६२
परेत	३०१	११७
परेतराज्	२४	५८
परेद्यवि	४४९	२१
परेष्टुका	३२५	७०
परैधित	३४३	१८
परोष्णी	१९६	२६
पर्कटी	१३९	३२
पर्जनी	१६२	१०२
पर्जन्य	४२२	१४६
पर्ण	१३२	१४
	१३८	२९
	४५७	२२
पर्णशाला	११८	६
पर्णास	१५५	७९
पर्यङ्क	२४९	१३८
पर्यटन	२६०	३५
पर्यन्तभू	११४	१४
पर्यय	२६१	३७
	३९५	३३
पर्यवस्था	३९२	२१
पर्याप्त	३२२	५७
पर्याप्ति	३८७	५
पर्याय	२६१	३७
	४२२	१४७
पर्युदञ्चन	३०३	३
पर्येषणा	२६०	३२
पर्वत	१२३	१
पर्वन्	१८३	१६२
	४१७	१२१
पर्वसंधि	४५	७
पर्शुका	२२६	६९
पल	३३०	८६
	४३२	२०२
पलगण्ड	३४०	६
पलंकषा	१६१	९८
पलल	२२३	६३
पलाण्डु	१७८	१४७
पलाल	३०९	२२
पलाश	१३२	१४
	१३८	२९
	१८०	१५४
पलाशिन्	१२८	५
पलिक्की	२०७	१२
पलित	२१५	४१
पल्यङ्क	२४९	१३८
पल्लव	१३२	१४
पल्वल	१०३	२८
पव	३९३	२४
पवन	२५	६३
	३९३	२४
पवनाशन	८९	८
पवमान	२५	६३
पवि	२०	४७
पवित्र	१८४	१६५
	२६३	४५
	३६८	५५
पवित्रक	९८	१६
पशुपति	१३	३०
पशुप्रेरण	३९६	३९
पशुरज्जु	३२६	७३
पश्चात्	४४१	२४३
पश्चात्ताप	८०	२५
पश्चिम	३७६	८१
पश्चिमा	३०	१
पश्चिमोत्तर	११२	७
पांशु	२९६	९८
पाशुला	२०७	११
पाक	२००	३८
	३८८	८
पाकल	१७१	१२६
पाकशासन	१७	४१
पाकशासनि	१९	४६
पाकस्थान	३१०	२७
पाक्य	३१७	४२
	३३८	१०९

शब्दः	पृष्ठम्	श्लोकः
पाञ्चजन्य	१३	२८
पाट्ट	४४५	७
पाटच्चर	३४५	२५
पाटल	६१	१५
	३०६	१५
पाटला	१४६	५४
पाटलि	१४२	३९
	१४६	५४
पाठ	२५४	१४
	३९४	२९
पाठा	१५७	८४
पाठिन्	१५६	८०
पाठीन	९९	१८
पाणि	२३१	८१
पाणिगृहीती	२०४	५
पाणिघ	३४२	१३
पाणिपीडन	२६६	५६
पाणिवाद	३४२	१३
पाण्डर	५९	१२
पाण्डु	६०	१३
पाण्डुकम्बलिन्	२८३	५४
पाण्डुर	६०	१३
पातक	४६०	३३
पाताल	८६	१
	४३२	२०२
पातुक	३६०	२७
पात्र	९६	८
	२५७	२४
	३१३	३३
	४२८	१७९
पात्री	४६२	४२
पात्रीव	४६१	३५
पाथस्	९३	४
पाद	१२६	७
	२२६	७१
	३३१	८९
	४१२	८९
पादकटक	२४१	११०
पादग्रहण	२६२	४१
पादप	१२८	५
पादबन्धन	३२२	५८
पादस्फोट	२१९	५२
पादाग्र	२२६	७१

शब्दः	पृष्ठम्	श्लोकः
पादाङ्गद	२४०	१०९
पादात	२८७	६७
पादातिक	२८७	६६
पादुका	३४७	३०
पादू	३४७	३०
पादूकृत्	३४१	७
पाद्य	२६०	३३
पान	३५१	४०
पानगोष्ठिका	३५१	४२
पानपात्र	३५१	४३
पानभाजन	३१३	३२
पानीय	९३	४
पानीयशालिका	११९	७
पान्थ	२७१	१७
पाप	५१	२३
	३६५	४७
पापचेली	१५७	८५
पाप्मन्	५१	२३
पामन्	२१९	५३
पामन	२२१	५८
पामर	३४३	१६
पामा	२१९	५३
पायस	२४६	१२८
	२५७	२४
पायु	२२७	७३
पाय्य	३३०	८५
पार	९५	८
पारद	३३५	९९
पारम्पर्योपदेश	२५४	१२
पारशव	४३४	२१०
पारश्वधिक	२८८	७०
पारसीक	२८०	४५
पारस्त्रैणेय	२११	२४
पारायण	३८६	२
पारावत	१९२	१४
पारावतांघ्रि	१७८	१५०
पारावार	९२	१
	४६१	३५
पाराशरिन्	२६२	४१
पारिकाङ्क्षिन्	२६२	४२
पारिजातक	२१	५०
	१३७	२६
पारितथ्या	२३८	१०३

शब्दः	पृष्ठम्	श्लोकः
पारिप्लव	३७४	७५
पारिभद्र	१३७	२६
पारिभद्रक	१४६	५३
पारिभाव्य	१७१	१२६
पारियात्रक	१२४	३
पारिषद	१५	३५
पारिहार्य	२३९	१०७
पारी	४५२	१०
पारुष्य	६८	१४
पार्थिव	२६७	१
पार्वती	१६	३७
पार्वतीनन्दन	१७	३९
पार्श्व	२३०	७९
	३९६	४१
पार्श्वभाग	२७८	४०
पार्श्वास्थि	२२६	६९
पार्ष्णि	२२७	७२
पार्ष्णिग्राह	२६९	१०
पालङ्क	१८५	१६७
पालङ्की	१७०	१२१
पालाश	६१	१४
पालि	२९५	९३
	४३१	१९७
पालिन्दी	१६५	१०८
पाल्वा	४५१	५
पावक	२२	५४
पाश	२३७	९८
पाशक	३५२	४५
पाशिन्	२५	६१
पाशुपत	१५६	८१
पाशुपाल्य	३०२	२
पाश्या	३९७	४२
पाश्चात्य	३७६	८१
पाषण्ड	२६३	४५
पाषाण	१२४	४
पाषाणदारण	३४९	३४
पिक	१९४	१९
पिङ्ग	६१	१६
पिङ्गल	४१	३१
	६१	१६
पिङ्गला	३१	४
पिचण्ड	२२९	७७
	४५४	१८

शब्दः	पृष्ठम्	श्लोकः
पिचिण्डिल	२१६	४४
पिचु	३३७	१०६
पिचुमन्द	१४९	६२
पिचुल	१४२	४०
पिच्चट	३३७	१०५
पिच्छ	१९८	३१
	४५९	३०
पिच्छा	१४४	४७
	४५२	९
पिच्छिल	३१८	४६
पिच्छिला	१४४	४६
	१४९	६२
पिञ्ज	३००	११५
पिञ्जर	३३६	१०३
पिञ्जल	२९७	९९
पिट	३१०	२६
पिटक	२२०	५३
	३४७	२९
पिठर	३१२	३१
	४२९	१८८
पिण्ड	३३४	९८
	३३६	१०४
	४५४	१८
पिण्डक	२४६	१२८
पिण्डिका	२८४	५६
पिण्डीतक	१४६	५२
पिण्याक	३९८	९
	४६०	३२
पितामह	८	१६
	२१३	३३
पितृ	२१२	२८
	२१४	३७
पितृदान	२५९	६१
पितृपति	२४	५८
	३१	२
पितृपितृ	२१३	३३
पितृप्रसू	४४	३
पितृवन	३०१	११८
पितृव्य	२१२	३१
पितृसंनिभ	३५६	१३
पित्त	२२२	६२
पित्र्य(तीर्थ)	२६५	५१
पित्सत्	१९८	३४

शब्दः	पृष्ठम्	श्लोकः
पिधान	३४	१३
पिनद्ध	२८६	६५
पिनाक	१५	३५
	३९९	१४
पिनाकिन्	१३	३१
पिपासा	३२१	५५
पिपीलिका	४५१	८
पिप्पल	१३५	२०
पिप्पली	१६१	९७
पिप्पलीमूल	३३८	११०
पिप्पु	२१८	४९
पियाल	१४०	३५
पिल्ल	२२१	६०
पिशङ्ग	६१	१६
पिशाच	६	११
पिशित	२२३	६३
पिशुन	२४५	१२४
	३६५	४७
	४१८	१२७
पिशुना	१७३	१३३
पिष्टक	३१९	४८
पिष्टपचन	३१३	३२
पिष्टात	२५०	१३९
पीठ	२४९	१३८
पीडन	३००	१०९
पीडा	९२	३
पीत	६१	१४
पीतदारु	१४६	५३
पीतद्रु	१४८	६०
	१६२	१०१
पीतन	१३७	२७
	२४५	१२४
	३३६	१०३
पीतसालक	१४३	४३
पीता	३१६	४१
पीति	२८०	४३
पीताम्बर	९	१९
पीन	३६९	६१
पीनस	२१९	५१
पीनोन्नी	३२६	७१
पीयूष	२१	४८
	३२१	५४
प्रीलु	१३७	२८
	४३०	१९३
पीलुपर्णी	१५७	८४
	१७५	१३९
पीवन्	३६९	६१
पीवर	३६९	६१
पीवरस्तनी	३२६	७१
पुंश्चली	२०७	१०
पुंस्	२०३	१
पुक्कस	३४४	२०
पुङ्ख	४५४	१७
पुङ्गव	३६९	५९
पुच्छ	२८२	५०
पुञ्ज	२०२	४२
पुटभेद	९५	७
पुटभेदन	११६	१
पुटी	४६२	४२
पुण्डरीक	३१	३
	१०८	४१
	३९८	११
पुण्डरीकाक्ष	९	१९
पुण्डर्य	१७१	१२७
पुण्ड्र	१८३	१६३
पुण्ड्रक	१५२	७२
पुण्य	५२	२४
	४२४	१६०
पुण्यक	२६१	३७
पुण्यजन	२५	६०
पुण्यजनेश्वर	२८	६९
पुण्यभूमि	११३	८
पुण्यवत्	६५३	३
पुत्तिका	१९७	२७
पुत्र	२११	२७
पुत्रिका	३४७	२९
पुत्रौ	२१४	३७
पुद्गल	४५५	२०
पुनःपुनर्	४४३	१
पुनर्	४४२	२५३
	४४७	१५
पुनर्नवा	१७८	१४९
पुनर्भव	२३१	८३
पुनर्भू	२१०	२३
पुन्नाग	१३६	२५
पुर	११६	१
पुर	१४०	३४
	४२९	१८३
पुरःसर	२८८	७२
पुरतस्	४४५	७
पुरद्वार	१२२	१६
पुरंदर	१७	४१
पुरंध्री	२०५	६
पुरस्	४४५	७
पुरस्कृत	४११	८४
पुरस्तात्	४४१	२४६
पुरा	४४२	२५३
पुराण	६५	५
	३७४	७७
पुरातन	३७४	७७
पुरावृत्त	६५	४
पुरी	११६	१
पुरीतत्	२२४	६६
पुरीष	२२५	६८
पुरु	३७०	६३
पुरुष	५४	२९
	१३६	२५
	२०३	१
	४३५	२१८
पुरुषोत्तम	९	२१
पुरुहू	३७०	६३
पुरुहूत	१७	४१
पुरोग	२८८	७२
पुरोगम	२८८	७२
पुरोगामिन्	२८८	७२
पुरोडाश	४५६	२१
पुरोधस्	२६८	५
पुरोभागिन्	३६५	४६
पुरोहित	२६८	५
पुलाक	३९८	५
पुलिन	९६	९
पुलिन्द	३४४	२०
पुलोमजा	२९	४५
पुषित	३८१	९७
पुष्कर	२९	१
	९३	४
	१०७	४१
	१७७	१४५
	४२९	१८६
पुष्कराह्व	१९५	२२
पुष्करिणी	१०३	२७
पुष्कल	३६९	५८
पुष्ट	३८१	९७
पुष्प	१३४	१७
	२१०	२१
पुष्पक	२९	७०
पुष्पकेतु	३३६	१०३
पुष्पदन्त	३१	४
पुष्पधन्वन्	१२	२६
पुष्पफल	१३५	२१
पुष्परस	१३४	१७
पुष्पलिह्	१९८	२९
पुष्पवती	२०९	२०
पुष्पवत्	४७	१०
पुष्पसमय	५०	१८
पुष्य	३८	२२
पुष्यरथ	२८३	५१
पुस्त	३४७	२८
पूः	११६	१
पूग	१८५	१६९
	४००	२०
पूजा	२६०	३४
पूजित	३८२	९८
पूज्य	३५४	५
	४२३	१५०
पूत	२६३	४५
	३०९	२३
	३६८	५५
पूतना	१४८	५९
पूतिकरज	१४५	४८
पूतिकाष्ठ	१४६	५४
	१४८	६०
पूतिगन्धि	५९	१२
पूतिफली	१६१	९६
पूतीक	१४५	४८
पूप	३४९	४८
पूर	४५५	२०
पूरणी	१४४	४६
पूरित	३८२	९८
पूरुष	२०३	१
पूर्ण	३७१	६५
	३८२	९८
पूर्णकुम्भ	२७६	३२

शब्दः	पृष्ठम्	श्लोकः
पूर्णिमा	४६	७
पूर्त	२५९	२८
पूर्व	३७५	८०
	४२०	१३४
पूर्वज	२१६	४३
पूर्वदेव	७	१२
पूर्वपर्वत	१२४	२
पूर्वा	३०	१
पूर्वेद्युस्	४४८	२१
पूषन्	४०	२९
पृक्ति	३८९	९
पृच्छा	६७	१०
पृतना	२८९	७८
	२९०	८१
पृथक्	४४४	३
पृथक्पर्णी	१६०	९२
पृथगात्मता	५५	३१
	२६१	३८
पृथग्जन	३४३	१६
	४१५	१०५
पृथग्विध	३८०	९३
पृथिवी	११०	३
पृथु	३१४	३७
	३१६	४०
	३६९	६०
पृथुक	२००	३८
	३१९	४७
	३९७	३
पृथुरोमन्	९९	१७
पृथुल	३६९	६०
पृश्नी	११०	३
	३१४	३७
	३१६	४०
पृश्निका	१७०	१२५
पृदाकु	८९	६
पृश्नि	२१७	४८
पृश्निपर्णी	१६०	९२
पृषत्	९५	६
पृषत	९५	६
	१९०	१०
पृषत्क	२९२	८६
पृषदश्व	२५	६२
पृषदाज्य	२५७	२४
पृष्ठ	२२९	७८
पृष्ठवंशाधर	२२८	७६
पृष्ठास्थि	२२५	६९
पृष्ठ्य	२८१	४६
	३९६	४१
पेचक	१९२	१५
	३९८	६
पेटक	३४७	३०
पेटा	३४७	३०
पेटी	४६२	४२
पेलव	३७१	६६
पेशल	३४४	१९
	४३३	२०५
पेशी	२००	३७
पैठर	३१८	४५
पैतृष्वसेय	२११	२५
पैतृष्वस्रीय	२११	२५
पैत्र(अहोरात्र)	५१	२१
पोगण्ड	२१७	४६
पोटगल	१८३	१६२
	१८३	१६३
पोटा	२०५	१५
पोत	२००	३८
	४०७	६०
पोतवणिज्	९७	१२
पोतवाह	९७	१२
पोताधान	१००	१९
पोत्र	४२८	१८०
पोत्रिन्	१८७	२
पौत्री	२१६	२९
पौर	१८४	१६६
पौरस्त्य	३७५	८०
पौरुष	२३२	८७
	४३६	२२३
पौरोगव	३११	२७
पौर्णमास	२६४	४८
पौर्णमासी	४६	७
पौलस्त्य	२८	६९
पौलि	३१८	४७
पौष	४८	१५
पौष्पक	३३६	१०३
प्याद्	४४५	७
प्रकाण्ड	५३	२७
	१३०	१०
प्रकाम	३२२	५७
प्रकार	४२५	१६२
प्रकाश	४३	३४
	४३५	२१८
प्रकीर्णक	२७५	३१
प्रकीर्य	१४५	४८
प्रकृति	५४	२९
	८५	३७
	२७१	१८
	४०९	७३
प्रकोष्ठ	२३२	८०
प्रक्रम	३९४	२६
प्रक्रिया	२७५	३१
प्रक्वण	७१	२५
प्रक्वाण	७१	२५
प्रक्ष्वेडन	२९३	८७
प्रगण्ड	२३०	८०
प्रगतजानुक	२१७	४७
प्रगल्भ	३५९	२५
प्रगाढ	४०४	४४
प्रगुण	३७३	७२
प्रगे	४४८	१९
प्रग्रह	३०२	११९
	४३९	२३७
प्रग्राह	४३९	२३७
प्रग्रीव	४६१	३५
प्रघण	१२०	१२
प्रघाण	१२०	१२
प्रचक्र	२९६	९६
प्रचलायित	३६१	३२
प्रचुर	३७०	६३
प्रचेतस्	२५	६१
प्रचोदनी	१६०	९४
प्रच्छदपट	२४३	११६
प्रच्छन्न	१२१	१४
प्रच्छर्दिका	२२०	५५
प्रजन	३९३	२५
प्रजविन्	२८८	७३
प्रजा	४०२	३२
प्रजाता	२०८	१६
प्रजापति	८	१७
प्रजावती	२१२	३०
प्रज्ञा	५५	१
	२०८	१२
प्रज्ञान	४१७	१२२
प्रज्ञ	२१७	४७
प्रडीन	२००	३७
प्रणय	३९३	२५
	४२३	१५१
प्रणव	६५	४
प्रणाद	६७	११
प्रणाली	१०६	३५
प्रणिधि	२७०	१३
	४१४	१००
प्रणिहित	३७८	८६
प्रणीत	२५६	२०
	३१८	४५
प्रणुत	३८५	१०९
प्रणेय	३५९	२५
प्रतन	३७४	७७
प्रतल	२३२	८४
	२३२	८५
प्रतानिनी	१३०	९
प्रताप	२७२	२०
प्रतापस	१५६	८१
प्रति	४४१	२४५
प्रतिकर्मन्	२३७	९९
प्रतिकूल	३७७	८४
प्रतिकृति	३४९	३६
प्रतिकृष्ट	३६७	५४
प्रतिक्षिप्त	३६३	४२
प्रतिग्रह	२९०	७९
प्रतिग्राह	२४९	१३९
प्रतिघा	८०	२६
प्रतिघातन	३००	११४
प्रतिच्छाया	३४९	३५
प्रतिजागर	३९४	२८
प्रतिज्ञात	३८५	१०८
प्रतिज्ञान	५७	५
प्रतिदान	३२९	८१
प्रतिध्वान	७१	२५
प्रतिनिधि	३४९	३६
प्रतिपत्	४३	१
	५५	१
प्रतिपन्न	३८५	१०८
प्रतिपादन	२५९	२९

शब्दः	पृष्ठम्	श्लोकः
प्रतिबद्ध	३६३	४१
प्रतिबन्ध	३९४	२७
प्रतिबिम्ब	३४९	३५
प्रतिभय	७८	२०
प्रतिभान्वित	३५९	२५
प्रतिभू	३५२	४४
प्रतिमा	३४९	३५
प्रतिमान	२७८	३९
	३४९	३५
प्रतिमुक्त	२८६	६५
प्रतियत्न	४१५	१०७
प्रतियातना	३४९	३५
प्रतिरोधिन्	३४५	२५
प्रतिवाक्य	६७	१०
प्रतिविषा	१६२	९९
प्रतिशासन	३९५	३४
प्रतिश्याय	२१९	५१
प्रतिश्रय	४२३	१५३
प्रतिश्रव	५७	५
प्रतिश्रुत्	७१	२५
प्रतिष्टम्भ	३९४	२७
प्रतिसर	४२७	१७४
प्रतिसीरा	२४४	१२०
प्रतिहत	३६३	४१
प्रतिहास	१५४	७६
प्रतीक	२२६	७०
	३९८	७
प्रतीकार	३००	११०
प्रतीकाश	३५०	३७
प्रतीक्ष्य	३५४	५
प्रतीची	३०	१
प्रतीत	३५५	९
	४११	८२
प्रतीपदर्शिनी	२०३	२
प्रतीर	९५	७
प्रतीहार	१२२	१६
	२६८	६
	४२६	१७०
प्रतीहारी	४२६	१७०
प्रतोली	११७	३
प्रत्न	३७४	७७
प्रत्यक्	४४९	२३
प्रत्यक्पर्णी	१५८	८९
प्रत्यक्श्रेणी	१५८	८८
	१७६	१४४
प्रत्यक्ष	३७५	७९
प्रत्यग्र	३७५	७७
प्रत्यन्त	११२	७
प्रत्यन्तपर्वत	१२६	७
प्रत्यय	४२२	१४७
प्रत्ययित	२७०	१३
प्रत्यर्थिन्	२६९	११
प्रत्यवसित	३८५	११०
प्रत्याख्यात	३६३	४०
प्रत्याख्यान	३९५	३१
प्रत्यादिष्ट	३६३	४०
प्रत्यादेश	३९५	३१
प्रत्यालीढ	२९२	८५
प्रत्यासार	२९०	७९
प्रत्याहार	३९१	१६
प्रत्युत्क्रम	३९४	२६
प्रत्युषस्	४४	२
प्रत्यूष	४४	२
प्रत्यूह	३९२	१९
प्रथम	३७५	८०
	४२२	१४४
प्रथा	३८९	९
प्रथित	३५५	९
प्रदर	४२५	१६४
प्रदीप	२४९	१३८
प्रदीपन	९०	१०
प्रदेशन	२७४	२७
प्रदेशिनी	२३१	८१
प्रदोष	४५	६
प्रद्युम्न	१२	२५
प्रद्राव	३००	१११
प्रधन	२९८	१०३
प्रधान	५४	२९
	२६७	५
	३६८	५७
	४१७	१२२
प्रधि	२८४	५६
प्रपञ्च	४०२	२८
प्रपद	२२६	७१
प्रपा	११९	७
प्रपात	१२५	४
प्रपितामह	२१३	३३
प्रपुन्नाड	१७७	१४७
प्रपौण्डरिक	१७१	१२७
प्रफुल्ल	१२९	७
प्रबन्धकल्पना	६५	६
प्रबोधन	२४४	१२२
प्रभञ्जन	२५	६३
प्रभव	४३४	२१०
प्रभा	४३	३४
प्रभाकर	४०	२८
प्रभात	४४	३
प्रभाव	२७२	१९
प्रभिन्न	२७६	३६
प्रभु	२५५	११
प्रभूत	३७०	६३
प्रभ्रष्टक	२४८	१३५
प्रमथ	१५	३५
प्रमथन	३००	११५
प्रमथाधिप	१३	३१
प्रमद	५२	२४
प्रमदवन	१२८	३
प्रमदा	२०४	३
प्रमनस्	३५४	७
प्रमा	३८९	१०
प्रमाण	४०६	५४
प्रमाद	८२	३०
प्रमापण	३००	११२
प्रमिति	३८९	१०
प्रमीत	२५८	२६
	३०१	११७
प्रमीला	८५	३७
प्रमुख	३६८	५७
प्रमुदित	३८३	१०३
प्रमोद	५३	२४
प्रयत	२६३	४५
प्रयस्त	३१८	४५
प्रयाम	३९३	२३
प्रयोगार्थ	३९४	२६
प्रलम्बघ्न	११	२३
प्रलय	५१	२२
	८४	३३
	३०१	११७
प्रलाप	६८	१५
प्रवण	४०६	५६
प्रवयस्	२१६	४२
प्रवर्ह	३६८	५७
प्रवह	३९२	१८
प्रवहण	२८३	५२
प्रवल्हिका	६५	६
प्रवारण	३८७	३
प्रवाल	७३	७
	३३२	९३
	४३२	२०४
प्रवाह	३९२	१८
प्रवासन	३००	११३
प्रवाहिका	२२०	५५
प्रविख्याति	३९४	२८
प्रविदारण	२९८	१०३
प्रविश्लेष	३९२	२०
प्रवीण	३५३	४
प्रवृत्ति	६६	७
	३९२	१८
प्रवृद्ध	३७४	७६
	३७८	८८
प्रवेक	३६८	५७
प्रवेणी	२३७	९८
	२७८	४२
प्रवेष्ट	२३०	८०
प्रव्यक्त	३७३	८१
प्रश्न	६७	१०
प्रश्रय	३९३	२५
प्रश्रित	३५९	२५
प्रष्ठ	२८८	७२
प्रष्ठवाह	३२४	६३
प्रष्ठौही	३२५	७०
प्रसन्न	९८	१४
प्रसन्नता	३५	१६
प्रसन्ना	३५०	३९
प्रसभ	२९९	१०८
प्रसर	३९३	२३
प्रसरण	२९६	९६
प्रसव	३८९	१०
	४३३	२०८
प्रसवबन्धन	१३३	१५
प्रसव्य	३७७	८४
प्रसह्य	४४६	१०

शब्दः	पृष्ठम्	श्लोकः
प्रसाद	३५	१६
	४१२	९१
प्रसाधन	२३७	९९
प्रसाधनी	२४९	१३९
प्रसाधित	२३८	१००
प्रसारिणी	१७९	१५२
प्रसार	३६१	३१
प्रसित	३५५	९
प्रसिति	३९१	१४
प्रसिद्ध	४१५	१०४
प्रसू	२१२	२९
	४३८	२२९
प्रसूता	२०८	१६
प्रसूति	३८९	१०
प्रसूतिका	२०८	१६
प्रसूतिज	९२	३
प्रसून	१०७	१७
	४१७	१२३
प्रसूजनयितारौ	२१४	३७
प्रसृत	३७८	८८
प्रसृता	२२७	७२
प्रसृती	२३२	८५
प्रसेव	३१०	२६
प्रसेवक	७३	७
प्रस्तर	१२४	४
प्रस्ताव	३९३	२४
प्रस्थ	१२५	५
	३२१	८९
	४१२	७८
प्रस्थपुष्प	१५५	७९
प्रस्थान	२९६	९५
प्रस्फोटन	३१०	२६
प्रस्रवण	१२६	५
प्रस्राव	२२५	६७
प्रहर	४५	६
प्रहरण	२९१	८२
प्रहस्त	२३२	८४
प्रहि	१०३	२६
प्रहेलिका	६५	६
प्रह्लन्न	३८३	१०३
प्रांशु	३७२	७०
प्राकार	११७	३
प्राकृत	३४३	१६
प्राग्दक्षिण	११२	७

शब्दः	पृष्ठम्	श्लोकः
प्राग्वंश	२५५	१६
प्राग्हर	३६८	५८
प्राग्य	३६८	५८
प्राघार	३८९	१०
प्राच्	४४७	१६
	४४९	२३
प्राचिका	४५१	८
प्राची	३०	१
प्राचीन	११७	३
प्राचीना	१५७	८५
प्राचीनावीत	२६५	५०
प्राच्य	११२	७
प्राजन	३०५	१२
प्राजितृ	२८५	५९
प्राज्ञ	२५१	५
प्राज्ञा	२०८	१२
प्राज्ञी	२०८	१२
प्राज्य	३७०	६३
प्राड्विवाक	२६८	५
प्राण	२६	६३
	२९७	१०२
	३०२	११९
	३३६	१०४
प्राणिद्यूत	३५२	४६
प्राणिन्	५५	३०
प्रातर्	४४८	१९
प्रातिहारिक	३४२	११
प्राथमकल्पिक	२५३	११
प्रादुस्	४४२	२५६
	४४६	१२
प्रादेश	२३१	८३
प्रादेशन	२५९	३०
प्राध्वम्	४४४	४
प्रान्तर	११५	१७
प्राप्त	३७८	८६
	३८४	१०४
प्राप्तपञ्चत्व	३०१	११७
प्राप्तरूप	४१९	१३१
प्राप्ति	४०८	६९
प्राप्य	३८०	९२
प्राभृत	२७४	२७
प्राय	२६५	५२
	४२३	१५३
प्रायस्	४४८	१७

शब्दः	पृष्ठम्	श्लोकः
प्रार्थित	३८१	९७
प्रालम्ब	२४८	१३६
प्रालम्बिका	२३९	१०४
प्रालेय	३६	१८
प्रावार	२४३	११७
प्रावृत	२४२	११३
प्रावृष्	५०	१९
प्रावृषायणी	१५८	८६
प्रास	२९५	९३
प्रासङ्ग	२८४	५७
प्रासङ्ग्य	३२४	६४
प्रासाद	११९	९
प्रासिक	२८८	७०
प्राह्ण	४४	३
प्रिय	२१३	३५
	३६७	५३
प्रियक	१४३	४२
	१४३	४४
	१४७	५६
	१८९	९
प्रियङ्गु	१४७	५५
	३०८	२०
प्रियता	८०	२७
प्रियंवद	३६२	३६
प्रीणन	३८७	४
प्रीत	३८३	१०३
प्रीति	५२	२४
प्रुष्ट	३८२	९९
प्रेक्षा	५५	१
	४३७	२२४
प्रेङ्खा	२८३	५३
प्रेङ्खित	३७८	८७
प्रेत	३०१	११७
	४०७	६०
प्रेता	९१	२
प्रेत्य	४४५	८
प्रेमन्	८०	२७
	८०	२७
प्रेष्ठ	३८५	१११
प्रेष	४३६	२१९
प्रेषण	३९५	३४
प्रैष्य	३४३	१७
प्रोक्षण	२५८	२६
प्रोक्षित	२५८	२६
प्रोथ	२८१	४९

शब्दः	पृष्ठम्	श्लोकः
प्रोष्ठपदा	३८	२२
प्रोष्ठी	९९	१८
प्रौष्ठपद	४९	१७
प्रौढ	३७४	७६
प्लक्ष	१३९	३२
	१४३	४३
प्लव	९७	११
	१०२	२४
	१७३	१३२
	१९९	३४
	३४४	१९
प्लवग	१८७	३
	४०१	२४
प्लवङ्ग	१८७	३
प्लवङ्गम	४२०	१३८
प्लाक्ष	१३४	१८
प्लीहन्	२२४	६६
प्लीहशत्रु	१४५	४९
प्लुत	२८२	४८
प्लुष्ट	३८२	९९
प्लोष	३८९	९
प्लात	३८५	१११०

फ

शब्दः	पृष्ठम्	श्लोकः
फणा	९०	९
फणिज्जक	१५५	८९
फणिन्	८९	७
फल	२९४	९०
	३०५	१३
	४३२	२०१
	४५७	२३
फलक	२९४	९०
फलकपाणि	२८८	७१
फलत्रिक	३३९	१११
फलपाकान्त	१२९	६
फलपूर	१५५	७८
फलवत्	१२९	७
फलाध्यक्ष	१४४	४५
फलिन्	१२९	७
फलिन	१२९	७
फलिनी	१४७	५५
	१७४	१३६
फली	१४७	५५
फलेग्रहि	१२९	६

शब्दः	पृष्ठम्	श्लोकः
फलेरुहा	१४६	५४
फल्गु	१४९	६१
	३६८	५६
फाणित	३१७	४३
फाण्ट	३८०	९४
फाल	२४१	१११
	३०५	१३
फाल्गुन	४८	१५
फाल्गुनिक	४८	१५
फाल्गुनी	४५	५
फुल्ल	१२९	८
फेन	३३७	१०५
	४५५	१९
फेनिल	१३८	३१
	१४१	३६
फेरव	१८८	५
फेरु	१८८	५
फेला	३२२	५६
ब		
बक	१९५	२२
बडवानल	२४	५६
बत	४४१	२४४
बदर	१४१	३७
बदरा	१६८	११६
	१७८	१५१
बदरी	१४०	३६
बन्दिन्	२९६	९७
बद्ध	३६३	४२
	३८०	९५
बधिर	२१७	४८
बन्धकी	२०७	१०
बन्धन	२७४	२६
	३९१	१४
बन्धनालय	३०२	११९
बन्धस्तम्भ	२७८	४१
बन्धु	२१३	३४
बन्धुजीवक	१५३	७३
बन्धुता	२१३	३५
बन्धुर	३७२	६९
बन्धुल	२११	२६
बन्धूक	१५३	७३
बन्धूकपुष्प	१४३	४४
बन्ध्य	१२९	७
बभ्रु	४२६	१७०
बर्बर	१५९	९०
बर्ह	१९८	३१
	४३९	२३६
बर्हिण	१९८	३०
बर्हिन्	१९८	३०
बर्हिपुष्प	१७३	१३२
बर्हिमुख	५	९
बर्हिस्	२२	५४
बर्हिष्ठ	१७०	१२२
बल	११	२४
	२८९	७८
	२९७	१०२
	४३१	१९५
	४५७	२२
बलदेव	११	२३
बलभद्र	११	२३
बलभद्रिका	१७८	१५०
बलवत्	२१६	४४
	४४३	२
बलविन्यास	२९०	७९
बला	१६४	१०७
बलाका	१९६	२५
बलात्कार	२९९	१०८
बलाराति	१७	४३
बलाहक	३२	६
बलि	२५४	१४
	२७४	२७
	४३१	१९५
बलिध्वंसिन्	९	२१
बलिन	२१६	४५
बलिपुष्ट	१९४	२०
बलिभ	२१६	४५
बलिभुज्	१९४	२०
बलिर	२१८	४९
बलिश	९९	१६
बलिसङ्घन्	८६	१
बलीवर्द	३२२	५९
बल्लव	३११	२७
	३२२	५७
बल्वज	१८३	१६३
बष्कयिणी	३२५	७१
बस्त	३२७	७६
बस्ति	२२७	७३
बहिर्द्वार	१२२	१६
बंहिष्ठ	३८५	१११
बहिस्	४४८	१७
बहु	३००	६३
बहुकर	३५७	१७
बहुगव्यवाच्	३९२	३६
बहुपाद्	१३९	३२
बहुमद	३५४	६
बहुमूल्य	२४१	१११
बहुरूप	२४६	१२८
बहुल	३७०	६३
	४३२	१९९
बहुला	१७०	१२५
	४३२	१९९
बहुलीकृत	३०९	२१
बहुवारक	१४०	३४
बहुविध	३८०	९३
बहुसुता	१६२	१००
बहुस्मृति	३२५	७०
बाकुची	१६१	९६
बाडव	२४	५६
बाढ	२७	६७
	४०४	४४
बाण	२९२	८६
	४०५	३५
बादर	२४१	१११
बाधा	९२	३
बान्धकिनेय	२११	२६
बान्धव	२१३	३४
बार्हत	१३१	१९
बाल	१७०	१२२
	२१५	४२
	४३३	२०५
बालगर्भिणी	३२५	७०
बालतनय	१४५	४९
बालतृण	१८५	१६७
बालमूषिका	१९१	११
बाला	७६	१४
बालिश	३६५	४८
	४३५	२१८
बालेय	३२७	७३
बालेयशाक	१५९	९०
बास्य	२१५	४०
बाष्प	४१९	१३०
बाष्पिका	३१६	४०
बाहु	२३०	८०
बाहुज	२६७	१
बाहुदा	१०५	३३
बाहुमूल	२३०	७९
बाहुयुद्ध	२९९	१०६
बाहुल	४९	१८
बाहुलेय	१७	४०
बाह्लिक	२८०	४५
	१९८	९
बाह्लीक	२४५	१२४
	३९८	९
	३१६	४०
बिन्दु	९५	६
बिन्दुजालक	२७८	३९
बिल	१२१	६
बिम्ब	१५	१५
बिम्बिका	१७५	१३९
बिम्ब	११९	३२
बिम्ब	३१०	८६
बीज	५४	१८
	१२२	६२
बीजकोश	१०९	४३
बीजपूर	१५५	७८
बीजाकृत	३०४	८
बीजय	२५१	२
बीजपूर	७७	१७
	७८	१९
	४३९	२३४
बुद्धा	२२३	६४
बुद्ध	७	१३
	१८५	१०८
बुद्धि	५५	१
बुद्धुर	४५५	१९
बुध	४०	२६
	२५१	५
	४१४	१००
बुधित	१८५	१०८
बुध्न	१३१	१२
बुभुक्षा	१२१	५४
बुभुक्षित	१५८	२०
बुस	१०९	२२
बुस	४६०	३४

शब्दः	पृष्ठम्	श्लोकः
बृहती	१६०	९३
	४१०	७५
बृंहित	२९९	१०७
बृहत्	३६९	६०
बृहतिका	२४३	११७
बृहत्कुक्षि	२१६	४४
बृहद्भानु	२२	५४
बृहस्पति	३९	२४
बोधकर	९६	९७
बोधिद्रुम	१३५	२०
बोल	३३६	१०४
ब्रध्न	४०	२८
ब्रह्मचारिन्	२५१	३
	२६३	४२
ब्रह्मण्य	१४२	४१
ब्रह्मत्व	२६५	५२
ब्रह्मदर्भा	१७७	१४५
ब्रह्मदारु	१४२	४१
ब्रह्मन्	८	१६
	४१६	११४
ब्रह्मपुत्र	९०	१०
ब्रह्मबन्धु	४१५	१०४
ब्रह्मभूय	२६५	५१
ब्रह्मयज्ञ	२५४	१४
ब्रह्मवर्चस	२६१	३८
ब्रह्मबिन्दु	२६२	३९
ब्रह्मसायुज्य	२६५	५१
ब्रह्मसू	१२	२७
ब्रह्माञ्जलि	२६१	३९
ब्रह्मासन	२६२	४०
ब्राह्म	५१	२१
	२६५	५१
ब्राह्मण	२५१	४
ब्राह्मणयष्टिका	१५९	८९
ब्राह्मणी	१५९	८९
ब्राह्मण्य	३९६	४१
ब्राह्मी	१५	३५
	६२	१
	१७५	१३७

भ

भ	३७	२१
भक्त	३१९	४८
भक्षक	३५८	२०
भक्षित	३८५	११०
भक्ष्यकार	३११	२८
भग	४०१	२६
	२२८	७६
भगन्दर	२२०	५६
भगवत्	७	१३
भगिनी	२१२	२९
भङ्ग	९४	५
भङ्गा	३०८	२०
भङ्गि	४५१	८
भजमान	२७३	२४
भट	२८५	६१
भटित्र	३१८	४५
भट्टारक	७६	१३
भट्टिनी	७६	१३
भण्टाकी	१६७	११४
भण्डिल	१४९	६३
भण्डी	१५९	९१
भण्डीरी	१५९	९१
भद्र	५२	२५
	३२२	५९
भद्रकुम्भ	२७६	३२
भद्रदारु	१४६	५३
भद्रपर्णी	१४०	३६
भद्रबला	१७९	१५३
भद्रमुस्तक	१८२	१६०
भद्रयव	१५१	६७
भद्रश्री	२४७	१३१
भद्रासन	२७५	२१
भय	७९	२१
भयंकर	७८	२०
भयद्रुत	३६३	४२
भयानक	७७	१७
	७८	२०
भर	२७	६६
भरण	३५०	३८
भरण्य	३५०	३८
भरण्यभुज्	३५७	१९
भरत	३४२	१२
भरद्वाज	९२	१५
भर्ग	१३	६३
भर्तृ	२१३	३६
	४०७	५९
भर्तृदारक	७५	१२
भर्तृदारका	७६	१३
भर्त्सन	६९	१४
भर्मन्	३३३	९४
	३५०	३८
भल्ल	१८७	३८
	४५६	२१
भल्लातकी	१४३	४२
भल्लुक	१८७	३
भव	१३	३४
	४३३	२०६
भवन	११७	५
भवानी	१६	३७
भविक	५२	२६
भवितृ	३६०	२९
भविष्णु	३६०	२९
भव्य	५२	२६
भषक	३४५	२२
भस्त्रा	३४९	३३
भस्मगन्धिनी	१६९	१२०
भस्मगर्भा	१८९	६३
भा	४३	३४
भाग	३३१	८९
भागधेय	५३	२८
	२७४	२७
भागिनेय	२१३	३२
भागीरथी	१०४	३१
भाग्य	५३	२८
	४२३	१५५
भाजन	३१३	३३
भाण्ड	३१३	३३
	४०४	४४
भाद्र	४९	१७
भाद्रपद	४९	१७
भाद्रपदा	३८	२२
भानु	४०	३१
	४२	३३
	४१५	१०५
भामिनी	२०४	४
भार	३३०	८७
भारत	११२	६
भारती	६३	१
भारद्वाजी	१६८	११६
भारयष्टि	३४७	३०
भारवाह	३४३	१५
भारिक	३४३	१५
भार्गव	३९	२५
भार्गवी	१८२	१५८
भार्गी	१५९	८९
भार्या	२०४	६
भार्यापति	२१४	८३
भाल्लक	१८७	४
भाव	७५	११
	७९	२१
	४३३	२०७
भावबोधक	७९	२१
भावित	२४८	१३४
	३१८	४६
	३८४	१०४
भावुक	५२	२६
भाषा	६२	१
भाषिक	६३	१
	३८४	१०७
भाष्य	४५९	३१
भास	४३	३४
भास्कर	४०	२८
भास्वत्	४०	२९
भास्वर	६	१०
भिक्षा	३८८	६
	४३७	२२४
भिक्षु	२५१	३
	२६२	४१
भित्त	३४	१६
भित्ती	११७	४
भिदा	३८७	५
भिदुर	२०	४७
भिन्दिपाल	२९४	९१
भिन्न	३७६	८२
	३८२	१००
भिषज	२२१	५७
भिस्सटा	३४९	४९
भिस्सा	३४९	४८
भी	७९	२१
भीति	७९	२१
भीम	१३	३४
	७८	२०

शब्दः	पृष्ठम्	श्लोकः
भीरु	२०४	३
	३५९	२६
भीरुक	३५९	२६
भीलुक	३५९	२६
भीषण	७८	२०
भीष्म	७८	२०
भीष्मसू	१०४	३१
भुक्त	३८५	१११
भुक्तसमुज्झित	३२२	५६
भुग्न	३७२	७१
	३७९	९१
भुज	२३०	८०
भुजग	८९	६
भुजङ्ग	८९	६
भुजङ्गभुज्	१९८	३०
भुजङ्गम	८९	६
भुजङ्गाक्षी	१६७	११५
भुजशिरस्	२२९	७८
भुजान्तर	२२९	७७
भुजिष्य	३४३	१७
भुवन	८६	१
	९३	३
	११२	६
भू	११०	२
भूत	६	११
	३८४	१०४
	४१०	७८
भूतकेश	३३९	१११
भूतवेशी	१५२	७१
भूतात्मन्	४१५	१०५
भूतावास	१४७	५८
भूति	१६	३६
	४०९	६९
भूतिक	३९८	८
भूतेश	१३	३१
भूदार	१८७	२
भूदेव	२५१	४
भूनिम्ब	१७६	१४३
भूप	२६७	१
भूपदी	१५२	७०
भूभृत्	४०७	६१
भूमि	११०	२

शब्दः	पृष्ठम्	श्लोकः
भूमिजम्बुक	१४१	३८
	१६८	११८
भूमिस्पृश्	३०२	१
भूयस्	३७०	६३
भूयिष्ठ	३७०	६३
भूरि	३७०	६३
	४२८	१८२
भूरिफेना	१७६	१४३
भूरिमाय	१८८	५
भूरुण्डी	१५२	६९
भूर्ज	१४४	४६
भूषा	२३८	१०१
भूषित	२३८	१००
भूष्णु	३६०	२९
भूस्तृण	१८५	१६७
भृगु	१२५	४
भृङ्ग	१७४	१३४
	१९३	१६
	१९८	२९
भृङ्गराज	१७९	१५१
भृङ्गार	२७६	३२
भृङ्गारी	१९७	२८
भृतक	३४३	१५
भृति	३५०	३८
भृतिभुज्	३४३	१५
भृत्य	३४३	१७
भृत्या	३५०	३८
भृश	२७	६६
भृष्टयव	३१९	४७
भेक	१०३	२४
भेकी	१०३	२४
भेद	२७२	२१
भेदित	३८२	१००
भेरी	७३	६
भेषज	२०८	५०
भैक्ष	२६४	४६
भैरव	७८	१९
भैषज्य	२१८	५०
भोग	४००	२३
भोगवती	४०९	७०
भोगिन्	८९	८
भोगिनी	२०४	५
भोजन	३२२	५५

शब्दः	पृष्ठम्	श्लोकः
भोस्	४४५	७
भौम	३९	२५
भौरिक	२६८	७
भ्रंश	२७३	२३
भ्रकुंस	७५	११
भ्रकुटि	८६	३७
भ्रम	५६	४
	९५	७
	३८९	९
भ्रमर	१९८	२९
भ्रमरक	२३६	९६
भ्रमि	३८९	९
भ्रष्ट	३८३	१०४
भ्राजिष्णु	२३८	१०१
भ्रातृ	२१४	३६
भ्रातृज	२१४	३६
भ्रातृजाया	२१२	३०
भ्रातृभगिनी	२१४	३६
भ्रातृव्य	४२२	१४६
भ्रात्रीय	२१४	३६
भ्रान्ति	५६	४
भ्राष्ट्र	३१२	३०
भ्रुकुंस	७५	११
भ्रुकुटि	८६	३७
भ्रू	२३५	९२
भ्रूकुंस	७५	११
भ्रूकुटि	८६	३७
भ्रूण	२१४	३९
	४०४	४५
भ्रेष	२७३	२३

म

शब्दः	पृष्ठम्	श्लोकः
मकर	१००	२०
मकरध्वज	१२	३६
मकरन्द	१३४	१७
मकुट	२३८	१०२
मकुर	२५०	१४०
मकुष्टक	३०७	१७
मकूलक	१७६	१४४
मक्षिका	१९७	२६
मख	२५४	१३
मगध	२९६	९७
मघवत्	१७	४१

शब्दः	पृष्ठम्	श्लोकः
मङ्कु	४४३	२
मङ्गल	५२	२५
मङ्गल्यक	३०७	१७
मङ्गल्या	२४६	१२७
मचर्चिका	५३	२७
मज्जन्	१३१	१२
मञ्च	२४९	१३८
मञ्जरि	१३२	१३
मञ्जिष्ठा	१५९	९०
मञ्जीर	२४०	१०९
मञ्जु	३६७	५२
मञ्जुल	३६७	५२
मञ्जूषा	३४७	२९
मठ	११९	८
मड्डु	७४	८
मणि	३३२	९३
मणिक	३१२	३१
मणिबन्ध	२३१	८१
मण्ड	१४५	५१
	३१९	४९
मण्डन	२३८	१०२
	३६०	२९
मण्डप	११९	९
मण्डल	३१	६
	३५	१५
	४२	३२
मण्डलक	२२०	५४
मण्डलाग्र	२९३	८९
मण्डलेश्वर	२६७	२
मण्डहारक	३४२	१०
मण्डित	२३८	१००
मण्डूक	१०२	२४
मण्डूकपर्णी	१४७	५६
मण्डूकपर्णी	१५९	९१
मण्डूर	३३४	९८
मतङ्गज	२७६	३४
मतल्लिका	५३	२७
मति	५५	१
मत्त	२७६	३६
	३५९	२३
	३८३	१०३
मत्तकाशिनी	२०४	४
मत्सर	४२७	१७२

शब्दः	पृष्ठम्	श्लोकः
मत्स्य	९९	१७
मत्स्यण्डी	३१७	४३
मत्स्यपित्ता	१५७	८६
मत्स्यवेधन	९९	१६
मत्स्याक्षी	१७५	१३७
मत्स्याधानी	९८	१६
मथित	३२१	५३
मथिन्	३२६	७४
मद	२७७	३७
	३९०	१२
	४१३	९१
मदकल	२७६	३५
मदन	१२	२५
	१४६	५३
	१५५	७८
मदस्थान	३५१	४०
मदिरा	३५०	४०
मदिरागृह	११९	८
मदोत्कट	२७६	३५
मद्गु	१९९	३४
मद्गुर	१००	१९
मद्य	३५०	४०
मधु	४८	१५
	१७६	१४२
	३५१	४१
	३३८	१०७
	४१४	१०३
मधुक	१६५	१०९
मधुकर	१९८	२९
मधुक्रम	३५१	४०
मधुद्रुम	३३७	२७
मधुप	१९८	२९
मधुपर्णिका	१४०	३५
	१६०	९४
मधुपर्णी	१५६	८३
मधुमक्षिका	१९७	२६
मधुयष्टिका	१६५	१०९
मधुर	५८	९
	४३०	१९१
मधुरक	१७६	१४२
मधुरसा	१५७	८३
	१६४	१०७
मधुरा	१७९	१५२
मधुरिका	१६३	१०५
मधुरिपु	९	२०
मधुलिह्	१९८	२९
मधुवार	३५१	४०
मधुव्रत	१९८	२९
मधुशिग्रु	१३८	३१
मधुश्रेणी	१५७	८४
मधुष्ठील	१३७	२८
मधूक	१३७	२७
मधूच्छिष्ट	३३८	१०७
मधूलक	१३७	२८
मधूलिका	१५७	८४
मध्य	२३०	७९
	४२५	१६१
मध्यदेश	११२	७
मध्यम	७१	१
	११२	७
	२३०	७९
मध्यमा	२०६	८
	२३१	८२
मध्याह्न	४४	३
मध्वासव	३५१	४१
मनःशिला	३३८	१०८
मनस्	५५	३१
मनसिज	१२	२६
मनस्कार	५६	२
मनाक्	४४५	८
मनित	३८५	१०८
मनीषा	५५	१
मनीषिन्	२५१	५
मनु	४६१	३८
मनुज	२०३	१
मनुष्य	२०३	१
मनुष्यधर्मन्	२८	६८
मनोगुप्ता	३३८	१०८
मनोजवस	३५६	१३
मनोज्ञ	३६७	५२
मनोरथ	८१	२७
मनोरम	३६७	५२
मनोहत	३६३	४१
मनोहा	३३८	१०८
मन्तु	२७४	२६
मन्त्र	४२६	१६७
मन्त्रव्याख्याकृत्	२५३	७
मन्त्रिन्	२६७	४
मन्थ	३२६	७४
मन्थदण्डक	३२६	७४
मन्थनी	३२७	७४
मन्थर	२८८	७२
मन्थान	३२६	७४
मन्द	३४४	१८
	४१३	९५
मन्दगामिन्	२८८	७२
मन्दाकिनी	२१	४९
मन्दाक्ष	७९	२३
मन्दार	२१	५०
	१३७	२६
	१५६	८१
मन्दिर	११७	५
मन्दुरा	११९	७
मदोष्ण	४३	३५
मन्द्र	७२	२
मन्मथ	१२	२५
	१३५	२१
मन्या	२२४	६५
मन्यु	८०	२५
	४२३	१५३
मन्वन्तर	५१	२२
मय	३२७	७५
मयु	२९	७१
मयुष्टक	३०७	१७
मयूख	४२	३३
	४००	१८
मयूर	१६६	१११
	१९८	३०
मयूरक	१५८	८८
	३३५	१०१
मरकत	३३२	९२
मरण	३०१	११६
मरीच	३१४	३६
मरीचि	४०	२७
	४२	३३
मरीचिका	४३	३५
मरु	११२	५
	४२५	१६३
मरुत्	२५	६२
	३१	२
	४०७	५९
मरुत्वत्	१७	४१
मरुन्माला	१७३	१३३
मरुबक	१४६	५२
	१५५	७९
मर्कट	१८७	३
मर्कटक	१९१	१३
मर्कटी	१४५	४८
	१५८	८७
मर्त्य	२०३	१
मर्दन	३९३	२२
मर्दल	७४	८
मर्मन्	४५९	३०
मर्मर	७०	२३
मर्मस्पृश्	३७७	८३
मर्यादा	२७४	२६
मल	२२४	६५
	४३१	१९७
मलदूषित	३६८	५५
मलपू	१४९	६१
मलयज	२४७	१३१
मलिम	३६८	५५
मलिनी	२०९	२०
मलिम्लुच	३४५	२५
मलीमस	३६८	५५
मल्ल	४५६	२१
मल्लक	४६१	३७
मल्लिका	१५२	६९
मल्लिकाख्य	१९६	२४
मल्लिगन्धिन्	२४६	१२७
मसी	४५२	१०
मसूर	३०७	१७
मसूरविदला	१६५	१०९
मसृण	३१८	४६
मस्कर	१८२	१६१
मस्करिन्	२६२	४१
मस्तक	२३६	९५
मस्तिष्क	२२४	६५
मस्तु	३२१	५४
मह	८६	३८
महत्	३६९	६०
महती	४०९	६९
महस्	४३८	२३१
महाकन्द	१७८	१४८

शब्दः	पृष्ठम्	श्लोकः
महाकुल	२५१	३
महाङ्ग	३२७	७५
महाजाली	१६७	११७
महादेव	१३	३२
महाधन	२४१	११३
महानस	३१०	२७
महामात्र	२६७	५
महायज्ञ	२५४	१४
महारजत	३३३	९५
महारजन	३३७	१०६
महारण्य	१२७	१
महाराजिक	६	१०
महारौरव	९१	१
महाशय	३५३	३
महाशूद्री	२०८	१३
महाश्वेता	१६५	११०
महासहा	१५३	७३
	१७५	१३८
महासेन	१७	३९
महिका	३६	१८
महिला	२०३	२
महिलाह्वया	१४७	५५
महिष	१८८	४
महिषी	२०४	५
मही	११०	३
महीक्षित्	२६७	१
महीध्र	१२३	१
महीरुह	१२८	५
महीलता	१०१	२१
महीसुत	३९	२५
महेच्छ	३५३	३
महेरणा	१७०	१२४
महेश्वर	१३	३०
महोक्ष	३२३	६१
महोत्पल	१०७	३९
महोत्साह	३५३	३
महोद्यम	३५३	३
महौषध	१६२	१००
	१७८	१४८
	३१५	३८
मा	४४६	११
मास	२२३	६३
	४५७	२२

शब्दः	पृष्ठम्	श्लोकः
मांसल	२१६	४४
मांसिक	३४३	१४
माक्षिक	३३८	१०७
मागध	२९६	९७
	३३९	२
मागधी	१५२	७१
	१६१	९६
माघ	४८	१५
माघ्य	१५३	७३
माठर	४१	३१
माढि	४५१	८
माणवक	२१५	४२
	२३९	१०६
माणव्य	३९६	४०
माणिक्य	४५९	३१
माणिमन्थ	३१५	४२
मातङ्ग	४००	१९
	४००	२१
मातरपितृ	२१४	३७
मातरिश्वन्	२५	६१
मातलि	१९	४५
मातापितृ	२१४	३७
मातामह	२१३	३३
मातुल	१५५	७८
	२१२	३१
मातुलपुत्रक	१५५	७८
मातुलानी	२१२	३०
	३०८	२०
मातुलाहि	८९	६
मातुली	२१२	३०
मातुलुङ्गक	१५५	७८
मातृ	१५	३५
	७६	१४
	२१२	२९
	३२४	६६
मात्र	४२७	१७८
मात्रा	३६९	६२
	४२७	१७७
माद	३९०	१२
माधव	९	१८
	४८	१६
माधवक	३५१	४१
माधवी	१५२	७२

शब्दः	पृष्ठम्	श्लोकः
मान	७९	२२
	३३०	८५
मानव	२०३	१
मानस	५५	३१
मानसौकस्	१९६	२३
मानिनी	२०४	३
मानुष	२०३	१
मानुष्यक	३९७	४२
माया	३४२	११
मायाकार	३४२	११
मायादेवीसुत	८	१५
मायु	२२२	६२
मायूर	२०२	४३
मार	१२	२५
मारजित्	७	१३
मारण	३००	११४
मारिष	७६	१४
मारुत	२५	६२
मार्कव	१७९	१५१
मार्ग	४८	१४
	११४	१५
मार्गण	२९२	८७
	३६६	४९
	३९५	३०
मार्गशीर्ष	४८	१४
मार्गित	३८४	१०५
मार्जन	१३९	३३
मार्जना	२४४	१२१
मार्जार	१८८	६
मार्जिता	३१७	४४
मार्तण्ड	४०	२९
मार्दङ्गिक	३४२	१३
मार्द्वीक	३५१	४१
मार्ष्टि	२४४	१२१
मालक	१४९	६२
मालती	१५३	७२
माला	२४८	१३५
मालाकार	३४०	५
मालातृणक	१८५	१६७
मालिक	३४०	५
माल्धान	८९	६
माल्लर	१३९	३२
माल्य	२४८	१३५

शब्दः	पृष्ठम्	श्लोकः
माल्यवत्	१२४	३
माषपर्णी	१७५	१३८
मास	४७	१२
मासर	३२०	४९
मासिक	२५८	३१
मास्म	४४६	११
माहिष्य	३३९	३
माहेयी	३२४	६६
मितंपच	३६५	४८
मित्र	४०	३०
	२६९	९
	२७०	१२
	४२६	१६७
मिथस्	४४३	२५६
मिथुन	२०१	३८
मिथ्या	४४७	१५
मिथ्यादृष्टि	५६	४
मिथ्याभियोग	६७	१०
मिथ्याभिशंसन	६७	१०
मिथ्यामति	५६	४
मिश्रेय	१६३	१०५
मिसि	१६३	१०५
	१७९	१५२
मिसी	१७४	१३४
मिहिका	३६	१८
मिहिर	४०	२९
मीढ	३८१	९६
मीन	९९	१७
मीनकेतन	१२	२५
मुकुट	२३८	१०२
मुकुन्द	१७०	१२१
मुकुर	२५०	१४०
मुकुल	१३४	१६
मुक्तकञ्चुक	८९	६
मुक्ता	३३२	९३
मुक्तावली	२३९	१०५
मुक्तास्फोट	१०१	२३
मुक्ति	५७	६
मुख	१२३	१९
	२३३	८९
	४५७	२२
मुखर	३६२	३६
मुखवासन	५९	११
मुख्य	२६२	४०
	३६८	५७

शब्दः	पृष्ठम्	श्लोकः
मुण्ड	२१८	४८
	४६०	३४
मुण्डित	२१८	४८
	३७७	८५
मुण्डिन्	३४१	१०
मुद्	५२	२४
मुदिर	३२	७
मुद्गपर्णी	१६७	११३
मुद्गर	२९४	९१
मुधा	४४४	४
मुनि	७	१४
	२६२	४२
	४६१	३८
मुनीन्द्र	७	१४
मुरज	७३	५
मुरा	१७०	१२३
मुषित	३७८	८८
मुष्क	२२८	७६
मुष्कक	१४२	३९
मुष्टिबन्ध	३९१	१४
मुसल	३१०	२५
मुसलिन्	११	२४
मुसली	१६९	११९
	१९१	१२
मुसल्य	३६४	४५
मुस्तक	१८२	१५९
मुस्ता	१८२	१५९
मुहुस्	४४३	१
मुहुर्भाषा	६८	१६
मुहूर्त	४७	११
मूक	३५६	१३
मूढ	३६५	४८
मूत	३८०	९५
मूत्र	२२५	६७
मूत्रकृच्छ्र	२२०	५६
मूत्रित	३८१	९६
मूर्ख	३६५	४८
मूर्च्छा	३००	१०९
मूर्च्छाल	२२२	६१
मूर्च्छित	२२२	६१
	४११	८२
मूर्त	२२२	६१
	३७४	७६
मूर्ति	२२६	७१
	४०८	६६
मूर्तिमत्	३७४	७६
मूर्धन्	२३६	९५
मूर्धाभिषिक्त	२६७	१
	४०७	६१
मूर्वा	१५७	८३
मूल	१३१	१२
	४३२	१९९
मूलक	१८१	१५७
मूलकर्मन्	३८७	४
मूलधन	३२८	८०
मूल्य	३२८	७९
	३५०	३८
मूषा	३४८	३३
	४६१	३८
मूषिक	१९१	१२
मूषिकपर्णी	१५८	८८
मूषित	३७८	८८
मृग	१८९	८
	३९५	३०
मृगणा	३९५	३०
मृगतृष्णा	४३	३५
मृगदंशक	३४५	२१
मृगधूर्तक	१८८	५
मृगनाभि	२४७	१२९
मृगवधाजीव	३४५	२१
मृगबन्धिनी	३४६	२६
मृगमद	२४७	१२९
मृगया	३४५	२३
मृगयु	३४५	२१
मृगरोमज	२४१	१११
मृगव्य	३४५	२३
मृगशिरस्	३८	२३
मृगशीर्ष	३८	२३
मृगाङ्क	३४	१४
मृगादन	१८६	१
मृगित	३८४	१०५
मृगेन्द्र	१८६	१
मृजा	२४४	१२१
मृड	१३	३१
मृडानी	१६	३७
मृणाल	१०८	४२
मृत्	१११	४
मृत	३०१	११७
	३०३	३
मृतस्नात	३५८	१९
मृत्तालक	१७२	१३१
मृत्तिका	१११	४
मृत्यु	३०१	११६
मृत्युंजय	१३	३१
मृत्सा	१११	४
मृत्स्ना	१११	४
	१७२	१३१
मृदङ्ग	७३	५
मृदु	३७५	७८
	४१३	९४
मृदुलच्	१४४	४६
मृदुल	३७५	७८
मृद्वीका	१६४	१०७
मृध	२९८	१०४
मृषा	४४७	१५
मृषार्थक	७०	२१
मृष्ट	३६८	५६
मेकलकन्यका	१०५	३२
मेखला	२४०	१०८
	२९४	९०
मेघ	३२	६
मेघज्योतिस्	३३	१०
मेघनादानुलासी	१९८	३०
मेघनामन्	१८२	१५९
मेघनिर्घोष	३२	८
मेघपुष्प	९३	५
मेघमाला	३२	८
मेघवाहन	१७	४४
मेचक	६०	१४
	३१७	३१
मेढ्	२२८	७६
	३२७	७६
मेदक	३५१	४१
मेदस्	२२४	६४
मेदिनी	११०	३
मेदुर	३६०	३०
मेधा	५६	२
मेधि	३०६	१५
मेध्य	३६८	५५
मेरु	२१	४९
मेलक	३९४	२९
मेष	३२७	७६
मेषकम्बल	३३७	१०७
मेह	२२०	५६
मेहन	२२८	७६
मैत्रावरुणि	३७	२०
मैत्री	४६२	३९
मैत्र्य	४६२	३९
मैथुन	२६६	५७
	४१७	१२२
मैरेय	३५१	४१
मोक्ष	५७	७
	१४२	३९
मोघ	३७६	८१
मोघा	१४६	५४
मोचक	१३८	३१
मोचा	१४४	४६
	१६६	११३
मोदक	४६०	३३
मोरट	३३८	११०
मोरटा	१५७	८३
मोषक	३४५	२४
मोह	३००	१०९
मौक्तिक	३३२	९२
मौद्गीन	३०४	८
मौन	२६१	३६
मौरजिक	३४२	१३
मौर्वी	२९२	८५
मौलि	४३०	१९३
मौष्टा	४५१	५
मौहूर्त	२७०	१४
मौहूर्तिक	२७०	१४
म्लिष्ट	७०	२१
म्लेच्छदेश	११२	७
म्लेच्छमुख	३३४	९७

य

शब्दः	पृष्ठम्	श्लोकः
यकृत्	२२४	६६
यक्ष	६	११
	२८	६९
यक्षकर्दम	२४८	१३३
यक्षधूप	२४६	१२७
यक्षराज	२८	६८

शब्दः	पृष्ठम्	श्लोकः
यक्ष्मन्	२१९	५१
यजमान	२५३	८
यजुस्	६४	३
यज्ञ	२५४	१३
यज्ञसूत्र	२६५	४९
यज्ञाङ्ग	१३५	२२
यज्ञिय	२५८	२७
यज्वन्	२५३	८
यत्	४४४	३
यतस्	४४४	३
यति	२६३	४३
यतिन्	२६३	४३
यथा	४४५	९
यथाजात	३६५	४८
यथातथम्	४४७	१५
यथायथम्	४४७	१४
यथार्थम्	४४७	१५
यथार्हवर्ण	२७०	१३
यथास्वम्	४४७	१४
यथेप्सित	३२२	५७
यदि	४४६	१२
यदृच्छा	३८६	२
यन्तृ	२८५	५९
	४०७	५९
यम	२४	५८
	२६४	४८
	३९२	१८
यमराज्	२४	५८
यमुना	१०५	३२
यमुनाभ्रातृ	२४	५८
ययु	२८१	४५
यव	३०६	१५
यवक्य	३०४	७
यवक्षार	३३८	१०८
यवफल	१८२	१६१
यवस	१८५	१६७
यवागू	३२०	५०
यवाग्रज	३३८	१०८
यवानिका	१७७	१४५
यवास	१५९	९१
यवीयस	२१६	४३
यव्य	३०४	७

शब्दः	पृष्ठम्	श्लोकः
यशःपटह	७३	६
यशस्	६७	११
यष्टि	४६१	३८
यष्टीमधुक	१६५	१०९
यष्टृ	२५३	८
याग	२५४	१३
याचक	३६६	४९
याचनक	३६६	४९
याचना	२६०	३२
याचित	३०३	३
याचितक	३०३	४
याज्ञा	२६०	३२
	३८८	६
याजक	२५५	१७
यातना	९२	३
यातयाम	४२२	१४५
यातु	२५	६०
यातुधान	२५	६०
यातृ	२१२	३०
यात्रा	२९६	९५
	४२७	१७५
यादःपति	९१	२
यादस्	१००	२०
यादसांपति	२५	६१
यान	२७१	१८
	२८३	५८
यानमुख	२८३	५५
याप्य	३६७	५४
याप्यमान	२८३	५३
याम	४५	६
	२९२	१८
यामिनी	४४	४
यामुन	३३५	१००
यायजूक	२५३	८
याव	२४५	१२५
यावक	३०७	१८
यावत्	३४१	२४६
यावन	२४६	१२८
याष्टीक	२८८	७०
यास	१५९	९१
यासिता	१६५	११०
युक्त	२७३	२४

शब्दः	पृष्ठम्	श्लोकः
युक्तरसा	१७५	१४०
युग	२०१	३८
	४०१	२४
युगकीलक	३०६	१४
युगन्धर	२८४	५७
	४६१	३५
युगपद्	४४९	२२
युगपत्रक	१३५	२२
युगपार्श्वग	३२४	६३
युगल	२०१	३८
युग्म	२०१	३८
युग्य	२८४	५८
	३२४	६४
युद्ध	२९८	१०३
युध्	२९८	१०६
युवति	२०६	८
युवन्	२१६	४२
युवराज	७५	१२
यूथ	२०२	४१
यूथनाथ	२७६	३५
यूथप	२७६	३५
यूथिका	१५२	७१
यूप	१४२	४१
	४६१	३५
यूपकटक	२५६	१८
यूपाग्र	२५६	१९
यूष	४६१	३५
योक्त्र	३०५	१३
योग	४००	२२
योगेष्ट	३३७	१०५
योग्य	१६६	११२
योजन	४५८	३०
योजनवल्ली	१५९	९१
योत्र	३०५	१३
योद्ध	२८५	६१
योध	२८५	६१
योधसंराव	२९९	१०७
योनि	२२८	७६
योषा	२०३	२
योषित्	२०३	२
यौतक	२७४	२८
यौतव	३३०	८५

शब्दः	पृष्ठम्	श्लोकः
यौवत	२१०	२२
यौवन	२१५	४०
र		
रंहस्	२६	६४
रक्त	६१	१५
	२२३	६४
	२४५	१२४
	४१०	८०
रक्तक	१५३	७३
रक्तचन्दन	२४७	१३२
	३३९	१११
रक्तपा	१०१	२२
रक्तफला	१७५	१३९
रक्तसंध्यक	१०६	३६
रक्तसरोरुह	१०८	४१
रक्ताङ्ग	१७७	१४६
रक्तोत्पल	१०८	४२
रक्षःसभ	४५८	२७
रक्षस्	६	११
	२५	६०
रक्षित	३८४	१०६
रक्षिवर्ग	२६८	६
रक्ष्ण	३८८	८
रङ्कु	१९०	१०
रङ्ग	३३७	१०६
रङ्गाजीव	३४१	७
रचना	२४९	१३७
रजक	३४२	१०
रजत	३३३	९६
	४१०	७९
रजनी	४४	४
	१७९	१५३
रजनीमुख	४५	६
रजस्	५४	२९
	२१०	२१
	२९६	९८
	४३८	२३१
रजखला	२०९	२०
रज्जु	३४६	२७
रञ्जन	२४७	१३२
रञ्जनी	१६०	९५
रण	२९८	१०४
	३८८	८
	४०५	४९

शब्दः	पृष्ठम्	श्लोकः
रण्डा	१५८	८८
रत	२६६	५७
रतिपति	१२	२६
रत्न	३३२	९३
	४१८	१२६
रत्नसानु	२१	४९
रत्नाकर	९२	२
रत्नि	२३२	८६
रथ	१३८	३०
	२८२	५१
रथकट्या	२८३	५५
रथकार	३४१	९
	३४०	४
रथगुप्ति	२८४	५७
रथद्रु	१३७	२६
रथाङ्ग	२८३	५५
	२८४	५६
रथाङ्गाह्वय	१९५	२२
रथिक	२८९	७६
रथिन्	२८५	६०
	२८९	७६
रथिन	२८९	७६
रथ्य	२८१	४६
रथ्या	११७	३
	२८३	५५
रद	२३४	९१
रदन	२३४	९१
रदनच्छद	२३३	९०
रन्ध्र	८६	२
रभस	४५६	२१
रमणी	२०४	४
रम्भा	१६६	११३
रय	२६	६४
रल्लक	२४३	११६
	४५४	१७
रव	७०	२२
रवण	३६२	३८
रवि	४०	३१
रशना	२४०	१०८
रश्मि	४२०	१३८
रस	५७	७
	५९	९
	३३५	९९
	४३७	२२७

शब्दः	पृष्ठम्	श्लोकः
रसगर्भ	३३५	१०२
रसज्ञा	२३४	९१
रसना	२३४	९१
रसा	१७०	१२३
	११०	२
	१५७	८४
रसाग्र	३१९	४९
रसाञ्जन	३३५	१०१
रसातल	८६	१
रसाल	१३९	३३
	१८३	१६३
	३१७	४४
रसित	३२	८
रसोनक	१७८	१४८
रहस्	२७३	२२
	२७३	२३
रहस्य	२७३	२३
राका	४६	८
राक्षस	२५	५९
राक्षसी	१७२	१२८
राक्षा	२४५	१२५
राङ्कव	२४१	१११
राज्	२६७	१
राजक	२६७	३
राजन्	४१६	१११
	२६७	२
राजन्य	२६७	१
राजन्यक	२६७	४
राजन्वत्	११४	१३
राजबला	१७९	१५३
राजबीजिन्	२५१	२
राजराज	२८	६८
राजवंश्य	२५१	२
राजवत्	११४	१३
राजवृक्ष	१३६	२३
राजसदन	११९	१०
राजसभा	४५२	९
राजसूय	४५९	३१
राजहंस	१९६	२४
राजादन	१४०	३५
	१४४	४५
राजार्ह	२४६	१२६
राजि	१२८	४
राजिका	३०७	१९
राजिल	८८	५
राजीव	१००	१९
	१०७	४१
राज्याङ्ग	२७१	१८

शब्दः	पृष्ठम्	श्लोकः
रात्रि	४५	५
रात्रिचर	२५	६०
रात्रिंचर	२५	६०
राद्धान्त	५६	४
राध	४८	१६
राधा	३८	२२
राम	११	२३
	१९०	११
	४४१	१४३
रामठ	३१६	४०
रामा	२०४	४
राम्भ	२६४	४५
राल	२४६	१२७
राशि	२०२	४२
	४३४	२१४
राष्ट्र	४२९	१८४
राष्ट्रिका	१६०	९४
राष्ट्रिय	७६	१४
रासभ	३२७	७७
राज्ञा	१६७	११४
	१७५	१४०
राहु	४०	२६
रिक्तक	३६८	५६
रिक्थ	३३१	९०
रिङ्गण	८५	३६
रिपु	२६९	१०
रिष्ट	४०३	३६
रिष्टि	२९३	८९
रीढा	७९	२३
रीण	३८०	९२
रीति	३३३	९७
	४०८	६८
रीतिपुष्प	३३६	१०३
रुक्प्रतिक्रिया	२१८	५०
रुक्म	३३३	९५
रुक्मकारक	३४१	८
रुग्ण	३७९	९१
रुच्	४३	३४
रुचक	१४५	५१
	१५५	७८
	३३८	१०९
	३१७	४३
रुचि	४३	३४
	४०२	२९

शब्दः	पृष्ठम्	श्लोकः
रुचिर	३६७	५२
रुच्य	२६७	५२
रुज्	२१८	५१
रुजा	२१८	५१
रुत	७१	२५
रुदित	८५	३५
रुद्ध	३७९	९०
रुद्र	६	१०
	१३	३४
रुद्राणी	१६	३७
रुधिर	२२३	६४
	४५७	२२
रुरु	१९०	१०
रुशती	६८	२०
रुष्	८०	२६
रुहा	१८२	१५८
रूक्ष	४३७	२२५
रूप	५७	७
रूपाजीव	२०९	१९
रूप्य	३३२	९१
	३३३	९६
	४२४	१६०
रूप्याध्यक्ष	२६८	७
रूषित	३७९	८९
रेचित	२८२	४८
रेणु	२९६	९८
रेणुका	१६९	१२०
रेतस्	२२२	६२
रेफ	३६७	५४
	४१९	१३२
रेवतीरमण	११	२३
रेवा	१०५	३२
रै	३३१	९०
	४३५	१६५
रोक	८६	२
रोग	२१८	५१
रोगहारिन्	२२१	५७
रोचन	१४४	४७
रोचनी	१६४	१०८
	१७७	१४६
रोचिष्णु	२३८	१०१
रोचिस्	४३	३४
रोदन	२३५	९३

शब्दः	पृष्ठम्	श्लोकः
रोदनी	१५९	९२
रोदस्	४३८	२२९
रोदसी	४३८	२२९
रोधस्	९५	७
रोष	२९२	८७
रोमन्	२३७	९९
रोमन्थ	४५५	१९
रोमहर्षण	८५	३५
रोमाञ्च	८५	३५
रोष	८०	२६
रोहिणी	३२४	६७
रोहित	३३	१०
	६१	१५
	१००	१९
	१९०	१०
रोहितक	१४५	४९
रोहिन्	१४५	४९
रौद्र	७७	१७
	७८	२०
रौमक	३१७	४२
रौरव	९१	१
रौहिणेय	११	२४
	४०	२६
रौहिष	१८४	१६६
	१९०	१०

ल.

शब्दः	पृष्ठम्	श्लोकः
लकुच	१४८	६०
लक्ष	२९२	८६
लक्षण	३४	१७
लक्ष्मण	३५६	१४
लक्ष्मणा	१९६	२५
लक्ष्मन्	३४	१७
	४१८	१२४
लक्ष्मी	१२	२७
	१६६	११२
	२९१	८२
लक्ष्मीवत्	३५६	१४
लक्ष्य	८४	३३
	२९२	८६
लगुड	४३४	१८
लग्न	४०	२७
लग्नक	३५२	४४
लघु	२७	६४
	१७३	१३३
	४०१	२८
लघुलय	१८४	१६५
लङ्का	४५१	७
लङ्कोपिका	१७३	१३३
लज्जा	७९	२३
लज्जाशील	३६०	२८
लज्जित	३७९	९१
लट्वा	४५२	१०
लता	१३०	९
	१३१	११
	१४७	५५
	१५२	७२
	१७३	१३३
	१७८	१५०
लतार्क	१७८	१४८
लपन	२३३	८९
लपित	६३	१
	३८४	१०७
लम्ब	३८४	१०४
लम्बधर्ण	२५१	६
लम्बानुज्ञ	२५३	१०
लभ्य	२७३	२४
लम्बन	२३९	१०४
लम्बोदर	१६	३८
लय	७५	९
ललना	२०४	३
ललन्तिका	२३९	१०४
ललाट	२३४	९२
ललाटिका	२३८	१०३
ललाम	४२१	१४३
ललामक	२४८	१३५
ललित	२२	३१
लव	३६९	६२
	३९३	२४
लवङ्ग	२४५	१२५
लवण	५८	९
	३१६	४१
लवणोद	९३	२
लवन	३९३	२४
लवित्र	३०५	१३
लशुन	१७८	१४८
लस्तक	२९२	८५
लाक्षा	२४५	१२५
	४५२	१०
लाक्षाप्रसादन	१४२	४१
लाङ्गल	३०५	१३
लाङ्गलदण्ड	३०६	१४
लाङ्गलपद्धति	३०६	१४
लाङ्गलिकी	१६९	११८
लाङ्गली	१६५	१११
	१८५	१६९
लाङ्गूल	२८२	५०
लाज	३१८	४७
लाञ्छन	३४	१७
लाभ	३२८	८०
लामज्जक	१८४	१६५
लालसा	८१	२८
	४३७	२२८
लाला	२२५	६७
लालाटिक	४००	१७
लाव	१९९	३५
लासिका	७४	८
लास्य	७५	१०
लिकुच	१४८	६०
लिक्षा	४५२	१०
लिखित	२७०	१६
लिङ्ग	४०१	२५
लिङ्गवृत्ति	२६६	५४
लिपि	२७०	१६
लिपिकर	२७०	१५
लिप्त	३७९	९०
	३८५	११०
लिप्तक	२९३	८८
लिप्सा	८१	२७
लिबि	२७०	१६
लीला	८२	३२
	४३२	१९९
लुटित	२८२	५०
लुब्ध	३५८	२२
लुब्धक	३४५	२१
लुलाय	१८८	४
लूता	१९१	१३
लून	३८३	१०३
लूम	२८२	५०
लेख	५	८
लेखक	२७०	१५
लेखर्षभ	१७	४२
लेखा	१२१	४
लेपक	३४०	६
लेश	३६९	६२
लेष्टु	३०५	१२
लेह	३२२	५६
लोक	११२	६
	३९७	२
	१२४	२
लोकजित्	७	१३
लोकायत	४५९	३२
लोकालोक	१२४	२
लोकेश	८	१६
लोचन	२३५	९३
लोचमस्तक	१६६	१११
लोप्त्र	३४६	२५
लोध्र	१३९	३३
लोपामुद्रा	३७	२०
लोमन्	२३७	९९
लोमशा	१७४	१३४
लोल	३७४	७४
	४३३	२०५
लोलुप	३५८	२२
लोलुभ	३५८	२२
लोष्ट	३०५	१२
लोष्टमेदन	३०५	१२
लोह	२४६	१२६
	३३४	९८
	३३४	९९
	४५७	२३
लोहकारक	३४१	७
लोहपृष्ठ	१९२	१६
लोहल	३६२	३७
लोहाभिसार	२९५	९४
लोहित	६१	१५
	२२३	६४
लोहितक	३३२	९२
लोहितचन्दन	२४५	१२४
लोहिताङ्ग	३९	२५
लोहिताश्व	२२	५५

व.

शब्दः	पृष्ठम्	श्लोकः
व	४४५	९

शब्दः	पृष्ठम्	श्लोकः
वंश	२८२	१६०
	२५०	१
	४३४	२१४
वंशक	२४६	१२६
वंशरोचना	३३८	१०९
वकुल	१५०	६४
वक्तव्य	४२४	१५९
वक्तृ	३६१	३५
वक्र	२३३	८९
वक्र	३७२	७१
वक्षस्	२२९	७८
वक्षिण	२२७	७३
वङ्ग	३३७	१०६
वचन	६३	१
वचनेस्थित	३५९	२४
वचस्	६३	१
वचा	१६२	१०२
वज्र	४२९	४७
वज्रद्रु	१६४	१०५
वज्रनिर्घोष	३३	१०
वज्रपुष्प	१५४	७६
वज्रिन्	१७	४२
वञ्चक	३६५	४७
	१८८	५
वञ्चित	३६३	४१
वञ्जुल	१३७	२७
	१३८	३०
	१५०	६४
वट	१३९	३२
वटक	४५४	१७
वटी	३४६	२७
वडवा	२८१	४६
वड्र	३६९	६१
वणिज्	३२८	७८
वणिज्या	३२८	७९
वण्टक	३३१	८९
वत्स	२२९	७८
	३२३	६२
	४३७	२२६
वत्सक	१५०	६६
वत्सतर	३२३	६२
वत्सनाभ	९०	११
वत्सर	४८	१३
	५०	२०
वत्सल	३५६	१४
वत्सादनी	१५६	८२
वद	३६१	३५
वदन	२३३	८९
वदान्य	३५४	६
	४२५	१६०
वदावद	३६१	३५
वध	३००	११५
वधू	१७३	१३३
	२०३	२
	२०६	९
	४१४	१०२
वध्य	३६४	४५
वन	९३	३
	१२७	१
	४१८	१२६
वनतिक्तका	२३२	८५
वनप्रिय	१९४	१९
वनमक्षिका	१९७	२७
वनमालिन्	९	२१
वनमुद्ग	३०७	१७
वनशृङ्गाट	१६१	९९
वनसमूह	१२८	४
वनस्पति	१२९	६
वनायुज	२८०	४५
वनिता	२०३	२
	४०९	७४
वनीयक	३६६	४९
वनौकस्	१८७	३
वन्दा	१५६	८२
वन्दारु	३६०	२८
वन्ध्य	१२९	७
वन्ध्या	३२५	६९
वन्या	१२१	४
वपा	८६	२
	२२४	६४
वपुस्	२२६	७०
वप्र	११७	३
	३०४	११
	३३७	१०५
वमथु	२२०	५५
	२७७	३७
वमि	२२०	५५
वयस्	४३८	२३०
वयस्थ	२१६	४२
वयस्था	१४७	५८
	१७५	१३७
	१७६	१४४
वयस्य	२७०	१२
वयस्या	२०७	१२
वर	२४५	१२४
	३८९	८
	४२७	१७३
वरटा	१९६	२५
	१९७	२७
वरण	११७	३
	१३६	२५
वरण्ड	४५४	१८
वरत्रा	२७९	४२
	३४८	३१
वरद	३५४	७
वरवर्णिनी	२०४	४
	३१६	४१
वराङ्ग	४०१	२६
वराङ्गक	१७४	१३४
वराटक	१०९	४३
	३४६	२७
	४६१	३८
वरारोह	२०४	४
वराशि	२४३	११६
वराह	१८७	२
वरिवसित	३८३	१०२
वरिवस्या	२६०	३५
वरिवस्यित	३८३	१०२
वरिष्ट	३३४	९७
वरिष्ठ	३८५	१११
वरी	१६२	१००
वरीयस्	४३९	२३५
वरुण	२५	६१
	३१	२
	१३६	२५
वरुणात्मजा	३५०	३९
वरूथ	२८४	५७
वरूथिनी	२८९	७८
वरेण्य	३६८	५७
वर्कर	३४५	२३
वर्ग	२०२	४१
वर्चस्	४३८	२३०
वर्चस्क	२२५	६८
वर्ण	२५०	१
	२७९	४२
	४०५	४८
वर्णक	२४८	१३३
	४६१	३८
वर्णित	३८५	११०
वर्णिन्	२६३	४३
वर्तक	१९९	३५
	३९८	११
वर्तन	३०२	१
	३६०	२९
वर्तनी	११४	१५
वर्ति	२४८	१३३
वर्तिक	१९९	३५
वर्तिष्णु	३६०	२९
वर्तुल	३७२	६९
वर्त्मन्	११४	१५
	४१७	१२१
वर्धक	१५९	९०
वर्धकि	३४१	९
वर्धन	३६०	२८
	३८८	७
वर्धमान	१४५	५१
वर्धमानक	३१३	३२
वर्धिष्णु	३६०	२८
वर्ध्री	३४८	३१
वर्मन्	२८६	६४
वर्मित	२८६	६५
वर्य	३६८	५७
वर्या	२०५	७
वर्वणा	१९७	२६
वर्वर	१५९	९०
वर्वरा	१७५	१३९
वर्ष	३३	११
	११२	६
	४३६	२२४
वर्षवर	२६९	९
वर्षा	५०	१९
वर्षाभू	१०२	२४
वर्षीयस्	२१६	४३

शब्दः	पृष्ठम्	श्लोकः
वर्षोपल	३४	१२
वर्ष्मन्	२२६	७०
	४१७	१२३
वलक्ष	५९	१२
वलज	४०२	३१
वलजा	४०२	३१
वलभी	१२१	१५
वलय	२३९	१०७
वलयित	३७९	९०
वलिर	२१८	४९
वलिक	१२१	१४
वलीमुख	१८७	३
वल्क	१३१	१२
वल्कल	१३१	१२
वल्गित	२८२	४८
वल्मीक	११४	१४
वल्लकी	७२	३
वल्लभ	३६७	५३
	४२०	१३७
वल्लरि	१३२	१३
वल्ली	१३०	९
वल्लूर	२२३	६३
वश	३८८	८
वशक्रिया	३८७	४
वशा	२७७	३६
	३२५	६९
	४३५	२१७
वशिक	३६८	५६
वशिर	१६१	९७
पश्य	३५९	२५
वषट्	४४५	८
वषट्कृत	२५८	२७
वसति	४०८	६७
वसन	२४२	११५
वसन्त	५०	१८
वसा	२२४	६४
वसिर	१६१	९७
	३१६	४१
वसु	६	१०
	१५६	८१
	३३१	९०
	४३७	२२८
वसुक	१५६	८०
	३१७	४२
वसुदेव	११	२२
वसुधा	११०	३
वसुंधरा	११०	३
वसुमती	११०	३
वस्तु	४५३	१३
वस्त्य	११७	५
वस्त्र	२४२	११५
वस्त्रयोनि	२४१	११०
वस्त्रवेश्मन्	२४४	१२०
वस्न	३२८	७९
वस्नसा	२२४	६६
वह	३२३	६३
वह्नि	२२	५३
	३१	२
वह्निशिख	३३७	१०६
वह्निसंज्ञक	१५६	८०
वा	४४२	२४९
	४४५	९
	४४७	१५
वाकुची	१६१	९६
वाक्पति	३६२	३५
वाक्य	६३	२
वागीश	३६२	३५
वागुरा	३४६	२६
वागुरिक	३४३	१४
वाग्मिन्	३६२	३५
वाङ्मुख	६६	९
वाच्	६२	१
वाचंयम	२६२	४२
वाचक	५६	२
वाचस्पति	३९	२४
वाचाट	३६२	३६
वाचाल	३६२	३६
वाचिक	६८	१७
वाचोयुक्तिपटु	३६२	३५
वाज	२९३	८७
वाजपेय	४५९	३१
वाजिदन्तक	१६३	१०३
वाजिन्	१९८	३३
	२८०	४४
	४१५	१०७
वाजिशाला	११९	७
वाञ्छा	८१	२७
वाटी	४६२	४२
वाट्यालका	१६४	१०७
वाडव	२५१	४
	२८१	४६
वाडव्य	३९६	४१
वाणा	१५४	७४
	४०४	४५
वाणि	३४७	२८
वाणिज	३२८	७८
वाणिज्य	३०२	२
	३२८	७९
वाणिनी	४१६	११२
वाणी	६२	१
वात	२५	६३
वातक	१७८	१४९
वातकिन्	२२१	५९
वातपोथ	१३८	२९
वातप्रमी	१८९	७
वातमृग	१८९	७
वातरोगिन्	२२१	५९
वातायन	११९	९
वातायु	१८९	८
वातल	४३१	१९६
वात्सक	३२३	६०
वादित्र	७३	५
वाद्य	७३	५
वान	१३३	१५
वानप्रस्थ	१३७	२८
	२५१	३
वानर	१८७	३
वानस्पत्य	१२९	६
वानीर	१३८	३०
वानेय	१७३	१३१
वापदण्ड	३४६	२८
वापी	१०४	२८
वाम	४२२	१४४
वामदेव	१३	३२
	३१	३
वामन	२१७	४६
	३७२	७०
	३८६	११३
वामलूर	११४	१४
वामलोचना	२०४	३
वामा	२०३	२
वामी	२८१	४६
वायस	१९४	२०
वायसाराति	१०२	१५
वायसी	१७९	१५१
वायसोली	१७६	१४४
वायु	२५	६१
वायुसख	२२	५५
वार	९३	३
वार	२०१	३९
	४२५	१६१
वारण	२७६	३४
वारणबुसा	१६६	११३
वारबाण	२८६	६३
वारमुख्या	२०९	१९
वारस्त्री	२०९	१९
वाराही	१७८	१५१
वारि	९३	३
वारिद	३२	७
वारिपर्णी	१०७	३८
वारिप्रवाह	१२६	५
वारिवाह	३२	६
वारी	२७९	४३
वारुणी	४०६	५२
वार्ता	२२१	५७
	४१०	७६
वार्ता	६६	७
	३०२	१
	४१०	७५
वार्ताकी	१६७	११४
वार्तावह	३४३	१५
वार्धक	२१५	४०
वार्धुषि	३०३	५
वार्धुषिक	३०३	५
वार्षिक	१७८	१५०
वाल	२३६	९५
वालधि	२८२	५०
वालपाश्या	२३८	१०३
वालहस्त	२८२	५०
वाल्लुक	१६९	१२१
वाल्क	२४१	१११
वावदूक	३६२	३५
वावृत्त	३७९	९२
वाशिका	१६३	१०३
वाशित	७१	२५
वास	११८	६

शब्दः	पृष्ठम्	श्लोकः
वासक	१६३	१०३
वासगृह	११९	८
वासन्ती	१५२	७२
वासयोग	२४८	१३४
वासर	४४	२
वासव	१७	४२
वासस्	२४२	११५
वासित	२४८	१३४
	३१८	४६
वासिता	४१०	७५
वासुकि	८८	४
वासुदेव	९	२०
वास्तु	७६	१४
वास्तु	१२३	१९
वास्तुक	१८१	१५८
वास्तोष्पति	१७	४३
वास्त्र	२८३	५४
वाह	२८०	४४
	३३१	८८
वाहद्विषत्	१८८	४
वाहन	२८४	५८
वाहस	८८	५
वाहित्थ	२७८	३९
वाहिनी	२८९	७८
	२९०	८१
	४१६	११२
वाहिनीपति	२८६	६२
वि	१९८	३३
विंशति	३२९	८३
विकङ्कत	१४१	३७
विकच	१२९	७
विकर्तन	४०	२९
विकलाङ्ग	२१७	४६
विकसा	१५९	९०
विकसित	१२९	८
विकस्वर	३६०	३०
विकार	३९१	१५
विकासिन्	३६०	३०
विकिर	१९८	३३
विकिरण	१५६	८०
विकुर्वाण	३५४	७
विकृत	७८	१९
	२२१	५८

शब्दः	पृष्ठम्	श्लोकः
विकृति	३९१	१५
विक्रम	२९८	१०२
	४२१	१४१
विक्रय	३२९	८३
विक्रयिक	३२८	७९
विक्रान्त	२८९	७७
विक्रिया	३९१	१५
विक्रेतृ	३२८	७९
विक्रेय	३२९	८२
विक्लव	३६४	४४
विक्षाव	३९६	३७
विगत	३८२	१००
विगतार्तवा	२१०	२१
विघ्न	२१७	४६
विग्रह	२२६	७०
	२७१	१८
	२९८	१०४
	३९२	२२
विघस	२५९	२८
विघ्न	३९२	१९
विघ्नराज	१६	३८
विचक्षण	२५१	६
विचयन	३९५	३०
विचर्चिका	२१९	५३
विचारणा	५६	२
विचारित	३८२	९९
विचिकित्सा	५६	३
विच्छन्दक	१२०	११
विच्छाय	४५८	२६
विजन	२७३	२२
विजय	३००	११०
विजिल	३१८	४६
विज्ञ	३५३	४
विज्ञात	३५५	९
विज्ञान	५७	६
विट	४५४	१७
विटङ्क	१२२	१५
विटप	१३३	१४
	४१९	१३१
विटपिन्	१२८	५
विट्खदिर	१४५	५०
विट्चर	३४५	२३
विड	३१७	४२

शब्दः	पृष्ठम्	श्लोकः
विडङ्ग	१६४	१०६
विडौजस्	१७	४१
विडाल	१८८	६
वितण्डा	४५२	९
वितथ	७०	२१
वितरण	२५९	२९
वितर्दि	१२२	१६
वितस्ति	२३१	१४
वितान	२४४	१२०
	४१६	११३
वितुन्न	१७८	१४९
वितुन्नक	१७१	१२६
	३१५	३७
	३३५	१०१
वित्त	३३१	९०
	३५५	९
	३८२	९९
विदर	३८७	५
विदल	४५९	३२
विदारक	९६	१०
विदारी	१६५	११०
विदारिगन्धा	१६७	११५
विदित	३८५	१०८
	३८५	१०९
विदिश्	३१	५
विदु	२७७	३७
विदुर	३६०	३०
	१३८	३०
विदुल	१३८	३०
विद्ध	३८२	९९
विद्धकर्णी	१५७	८४
विद्याधर	६	११
विद्युत्	३२	९
विद्रधि	२२०	५६
विद्रव	३००	१११
विद्रुत	३८२	१००
विद्रुम	३३२	९३
विद्रुमलता	१७२	१२९
विद्वस्	२५१	५
	४३९	२३४
विद्वेष	८०	२५
विधवा	२०७	११

शब्दः	पृष्ठम्	श्लोकः
विधा	३५०	३८
	३८९	१०
	४१४	१०१
विधातृ	८	१७
विधि	८	१७
	५३	२८
	२६२	४०
	४१४	१००
विधिदार्शिन्	२५५	१६
विधु	९	२२
	३४	१४
	४१४	९९
विधुत	३८४	१०७
विधुंतुद	४०	२६
विधुर	३९२	२०
विधुवन	३८७	४
विधूनन	३८७	४
विधेय	३५९	२४
विनयग्राहिन्	३५९	२४
विना	४४४	३
विनायक	७	१४
	१६	३८
	३९८	६
विनाश	३९३	२२
विनाशोन्मुख	३७९	९१
विनीत	२८०	४४
	३५९	२५
विन्दु	३६०	३०
विन्ध्य	१२४	३
विघ्न	३८२	९९
	३८४	१०४
विपक्ष	२६९	११
विपञ्ची	७२	३
विपण	३२९	८३
विपणि	११७	२
	४०६	५२
विपत्ति	२९१	८२
विपथ	११५	१६
विपद्	२९१	८२
विपर्यय	३९५	३३
विपर्यास	३९५	३३
विपश्चित्	२५१	५
विपाट	१०५	३३
विपादिका	२१९	५२

शब्दः	पृष्ठम्	श्लोकः
विपाशा	१०५	३३
विपिन	१२७	१
विपुल	३६९	६१
विप्र	२५०	२
	२५१	४
विप्रकार	३९१	१५
विप्रकृत	३६३	४१
विप्रकृष्टक	३७२	६८
विप्रतीसार	८०	२५
विप्रयोग	३९४	२८
विप्रलब्ध	३६३	४१
विप्रलम्भ	८५	३६
	३९४	२८
विप्रलाप	६८	१६
विप्रश्निका	२०९	२०
विप्रुष्	९५	६
विप्लव	३९१	१४
विबन्ध	२२०	५५
विबुध	५	७
विभव	३३१	९०
विभाकर	४०	२८
विभावरी	४४	४
विभावसु	२२	५६
	४०	३०
	४३७	२२६
विभीतक	१४७	५८
विभूति	१६	३६
विभूषण	२३८	१०१
विभ्रम	८२	३१
विभ्राज्	२३८	१०१
विमनस्	३५४	८
विमर्दन	३९०	१३
विमला	१७६	१४३
विमलात्मक	३६८	५५
विमातृज	२११	२५
विमान	२०	४८
वियत्	२९	२
वियद्गङ्गा	२१	४९
वियम	३९२	१८
वियात	३५९	२५
वियाम	३९२	१८
विरजस्तमस्	२६३	४५
विरति	३९६	३७

शब्दः	पृष्ठम्	श्लोकः
विरल	३७१	६६
विराज्	२६७	१
विराव	७०	२३
विरिञ्चि	८	१७
विरूपाक्ष	१३	३२
विरोचन	४०	३०
	४१५	१०८
विरोध	८०	२५
विरोधन	३९२	२१
विरोधोक्ति	६८	१६
विल	८६	१
	१२६	६
विलक्ष	३५९	२६
विलक्षण	३८६	२
विलम्बित	७४	९
विलम्भ	३९४	२८
विलाप	६८	१६
विलास	८२	३१
विलीन	३८२	१००
विलेपन	२४८	१३३
	३९४	२७
विलेपी	३२०	५०
विलेशय	८९	८
विवध	४१३	९६
विवर	८६	१
विवर्ण	३४३	१६
विवश	३६४	४४
विवस्वत्	४०	२९
	४०६	५७
विवाद	६६	९
विवाह	२६६	५६
विविक्त	२७३	२२
	४११	८२
विविध	३८०	९३
विविष्किर	१९८	३३
विवेक	२६१	३८
विव्वोक	८२	३१
विश्	२५०	२
	२३४	१
	४३२	२१४
विशङ्कट	३६९	६०
विशद	५९	१२
विशर	३००	११५

शब्दः	पृष्ठम्	श्लोकः
विशल्या	१५६	८३
	१७४	१३६
	४२४	१५५
विशसन	३००	११४
विशाख	१७	४०
विशाखा	३८	२२
विशाय	३९५	३२
विशारण	३००	११२
विशारद	४१२	९५
विशाल	३६९	६०
विशालता	२४२	११४
विशाललत्च्	१३६	२३
विशाला	१८१	१५६
विशिख	२९२	८६
विशिखा	११७	३
विशेषक	२४५	१२३
विश्राणन	२५९	२९
विश्राव	३९४	२८
विश्रुत	३५५	९
विश्व	६	१०
	३१५	३८
	३७१	६५
विश्वकद्रु	३४५	२२
विश्वकर्मन्	४१६	१०९
विश्वकेतु	१२	२७
विश्वभेषज	३१५	३८
विश्वंभर	९	२२
विश्वंभरा	११०	२
विश्वसृज्	८	१७
विश्वस्ता	२०७	११
विश्वा	१६२	९९
विश्वास	२७३	२३
विष	२२५	६८
विष्	९०	९
	४३६	२२३
विषधर	८९	७
विषमच्छद	१३६	२३
विषय	५७	७
	११३	८
	४२३	१५२
विषयिन्	५८	८
विषवैद्य	९०	११
विषा	१६२	९९
विषाण	४०६	५६

शब्दः	पृष्ठम्	श्लोकः
विषाणी	१६९	११९
विषुव	४८	१४
विषुवत्	४८	१४
विष्कम्भ	१२२	१७
विष्किर	१९८	३३
विष्टप	११२	६
विष्टर	४२६	१६९
विष्टरश्रवस्	९	१८
विष्टि	९१	३
विष्ठा	२३५	६८
विष्णु	९	१८
विष्णुकान्ता	१६३	१०४
विष्णुपद	२९	२
विष्णुपदी	१०४	३१
विष्णुरथ	१३	२९
विष्ठ	३६४	४५
विष्वच्	४४७	१३
विष्वक्सेन	९	१९
विष्वक्सेनप्रिया	१७८	१५१
विष्वक्सेना	१४७	५६
विष्वग्रच्	३६१	३४
विस	१०७	४
	१०८	४२
विसकण्ठिका	१०६	२५
विसप्रसून	१०८	४१
विसर	२०१	३१
विसर्जन	२५९	२५
विसर्पण	३९३	२३
विसंवाद	८५	३६
विसार	९९	१७
विसारिन्	३६१	३१
विसिनी	१०७	३९
विसूत	३७७	८६
विसूवर	३६१	३१
विसूमर	३६१	३१
विस्तर	३९३	२२
विस्तार	१३३	१४
	३९२	२२
विस्तृत	३७७	८६
विस्फार	२९९	१०८
विस्फोट	२२०	५३
विस्मय	७८	१९
विस्मयान्वित	३५९	२६

शब्दः	पृष्ठम्	श्लोकः
विस्मृत	३७८	८६
विस्र	५९	१२
विस्रम्भ	२७३	२३
	४२०	१३५
विस्रसा	२१५	४१
विहग	१९८	३२
विहङ्ग	१९८	३२
विहंगम	१९८	३२
विहंगिका	३४७	२९
विहसित	८५	३५
विहस्त	३६४	४३
विहायस्	२९	२
	१९८	३२
विहायित	२५९	२९
विहार	३९१	१६
विह्वल	३६४	४४
वीकाश	४३४	२१५
वीचि	९४	५
वीणा	७२	३
वीणादण्ड	७३	७
वीणावाद	३४२	१३
वीत	२७९	४३
वीतंस	३४६	२६
वीतिहोत्र	२२	५३
वीथी	१२८	४
	४१२	८७
वीध्र	३६८	५५
वीनाह	१०४	२७
वीर	७७	१७
	७७	१८
	२८९	७७
वीरण	१८४	१६४
वीरतर	१८४	१६४
वीरतरु	१४४	४५
वीरपत्नी	२०८	१६
वीरपान	२९८	१०३
वीरभार्या	२०८	१६
वीरमातृ	२०८	१६
वीरवृक्ष	१४३	४२
वीरसू	२०८	१६
वीरहन्	२६६	५२
वीराशंसन	२९७	१००

शब्दः	पृष्ठम्	श्लोकः
वीरुध्	१३०	९
वीर्य	८२	२९
	२२२	६२
	४२१	१५४
वीवध	४१३	९६
वुक	१५६	८१
वृक	१८९	७
वृकधूप	२४६	१२८
	२४६	१२९
वृक्ण	३८३	१०३
वृक्ष	१२८	५
वृक्षभेदिन्	३४९	३४
वृक्षरुहा	१५६	८२
वृक्षवाटिका	१२७	२
वृक्षादन	३४९	३४
वृक्षादनी	१५६	८२
वृक्षाम्ल	३१४	३५
वृजिन	५१	२३
	३७२	७१
	४१५	१०९
वृत	३८९	८
वृति	३८९	८
वृत्त	३७२	६९
	३७९	९२
	४१०	७८
वृत्तान्त	६६	७
	४०८	६३
वृत्ति	३०२	१
	३०२	२
	४०९	७३
वृत्र	४२५	१६४
वृत्रहन्	१७	४२
वृथा	४४१	२४७
	४४४	४
वृद्ध	१७०	१२२
	२१६	४२
	३८९	९
	४१४	१००
वृद्धत्व	२१५	४०
वृद्धदारक	१७४	१३७
वृद्धनाभि	२२२	६१
वृद्धश्रवस्	१७	४१
वृद्धसंघ	२१५	४०
वृद्धा	२०४	१२
वृद्धि	३८९	९

शब्दः	पृष्ठम्	श्लोकः
वृद्धिजीविका	३०३	४
वृद्धोक्ष	३२३	६१
वृध्याजीव	३०३	५
वृन्त	१३३	१५
वृन्द	२०१	४०
वृन्दारक	५	९
	३९९	१६
वृन्दिष्ठ	३८६	११२
वृश्चन	३४८	३२
वृश्चिक	१९२	१४
	१९१	१४
	३९८	७
वृष	५२	२४
	१६३	१०३
	१६८	११६
	३२२	५९
	४३६	२२०
वृषण	२२८	७६
वृषदंशक	१८८	६
वृषध्वज	१३	३४
वृषन्	१७	४२
	१५८	८७
वृषभ	३२२	५९
वृषल	३३९	१
वृषस्यन्ती	२०७	९
वृषा	१५८	८७
वृषाकपायी	४२४	१५६
वृषाकपि	४१९	१३०
वृषी	२६४	४६
वृष्टि	३३	११
वृष्णि	३२७	७६
वेग	४००	२०
वेगिन्	२८८	७३
वेणि	२३७	९८
वेणी	१५१	६९
वेणू	१८३	१६१
वेणुध्म	३४२	१३
वेतन	३५०	३८
वेतस	१३८	२९
वेतस्वत्	११३	९
वेताल	४५६	२१
वेत्रवती	१०५	३४
वेद	६४	३
वेदना	३८८	६

शब्दः	पृष्ठम्	श्लोकः
वेदि	२५५	१८
वेदिका	१२२	१६
वेध	३८८	८
वेधनिका	३४८	३३
वेधमुख्यक	१७५	१३५
वेधस्	८	१७
	४३७	२२८
वेधित	३८२	९९
वेपथु	८६	३८
वेमन्	३४६	२८
वेला	४३१	१९८
वेल्ल	१६४	१०६
वेल्लज	३१४	३५
वेल्लित	३७२	७१
	३७८	८७
वेश	११६	२
वेशन्त	१०३	२८
वेश्मन्	११७	४
वेश्मभू	१२३	१९
वेश्या	२०९	१९
वेश्याजनस०	११६	२
वेष	२२७	९९
वेष्टित	३७९	९०
वेसवार	३१४	३५
वेहत्	३२५	६९
वै	४४४	५
	४४७	१५
वैकक्षक	२४८	१३६
वैकुण्ठ	९	१८
वैजनन	२१४	३९
वैजयन्त	१९	४६
वैजयन्तिक	२८८	७१
वैजयन्तिका	१५०	६५
वैजयन्ती	२९७	९९
वैज्ञानिक	३५३	४
वैणव	१३४	१८
	२६४	४५
वैणविक	३४२	१३
वैणिक	३४२	१३
वैणुक	२७८	४१
वैतंसिक	३४३	१४
वैतनिक	३४३	१५
वैतरणी	९१	३

शब्दः	पृष्ठम्	श्लोकः
वैतालिक	२९६	९७
वैदेहक	३४०	३
	३२८	७८
वैदेही	१६१	९६
वैद्य	२२१	५७
वैद्यमातृ	१६३	१०३
वैधात्र	२१	५१
वैधेय	३६५	४८
वैतनेय	१३	२९
वैनीतक	२८५	५८
वैमात्रेय	२११	२५
वैयाघ्र	२८३	५३
वैर	८०	२५
वैरनिर्यातन	३००	११०
वैरशुद्धि	३००	११०
वैरिन्	२६९	१०
वैवधिक	३४३	१५
वैवस्वत	२४	५९
वैशाख	४८	१६
	३२६	७४
वैश्य	३०२	१
वैश्रवण	२८	६९
वैश्वानर	२२	५३
वैसारिण	९९	१७
वौषट्	४४५	८
व्यक्त	४०७	६२
व्यक्ति	५५	३१
व्यग्र	४३०	१९०
व्यजन	२५०	१४०
व्यञ्जक	७७	१६
व्यञ्जन	४१७	११६
	४५७	२३
व्यडम्बक	१४५	५१
व्यलय	३९५	३३
व्यलास	३९५	३३
व्यथा	९२	३
व्यध	३८८	८
व्यध्व	११५	१६
व्यय	३९२	१७
व्यलीक	३९९	१२
व्यवधा	३४	१२
व्यवहार	६६	९

शब्दः	पृष्ठम्	श्लोकः
व्यवाय	२६६	५७
व्यसन	४२७	१२०
व्यसनार्त	३६४	४३
व्यस्त	३७३	७२
व्याकुल	३६४	४३
व्याकोश	१२९	७
व्याघ्र	१८६	१
	३६९	५९
व्याघ्रनख	१७२	१२९
व्याघ्रपाद्	१४१	३७
व्याघ्रपुच्छ	१४५	५०
व्याघ्राट	१९२	१५
व्याघ्री	१६०	९३
व्याज	८२	३०
	८४	३३
व्याड	४०४	४२
व्याडायुध	१७२	१२९
व्याध	३४५	१२
व्याधि	१७१	१२६
	२१८	५१
व्याधिघात	१३६	२४
व्याधित	२२१	५८
व्यान	२६	६३
व्यापाद	५६	४
व्याप्य	१७१	१२६
व्याम	२३२	८७
व्याल	८९	७
	४३१	१९६
व्यालग्राहिन्	९०	११
व्यास	३९२	२२
व्याहार	६३	१
व्युत्थान	४१७	११८
व्युष्टि	४०३	३८
व्यूढ	४०४	४५
व्यूढकङ्कट	२८६	६५
व्यूति	३४७	२८
व्यूह	२०१	३९
	२९०	७९
	४४०	२३८
व्यूहपार्ष्णि	२९०	७९
व्योकार	३४१	७
व्योमकेश	१३	३४
व्योमन्	२९	१

शब्दः	पृष्ठम्	श्लोकः
व्योमयान	२०	४८
व्योष	३३९	१११
व्रज	२०१	३९
	४०२	३०
व्रज्या	२६०	३६
	२९६	९५
व्रण	२२०	५४
व्रत	२६१	३८
व्रतति	१३०	९
	४०८	६७
व्रतिन्	२५३	७
व्रात	२०१	३९
व्रात्य	२६६	५३
व्रीडा	७९	२३
व्रीहि	३०६	१५
	३०८	२१
व्रीहिमेद	३०८	२०
व्रैहेय	३०३	६

श.

शब्दः	पृष्ठम्	श्लोकः
शकट	२८३	५२
शकल	३५	१६
शकलिन्	९९	१७
शकुन	१९८	३२
शकुनि	१९८	३२
शकुन्त	१९८	३२
	४०७	५८
शकुन्ति	१९८	३२
शकुल	१००	१९
शकुलाक्षक	१८२	१५९
शकुलादनी	१५७	८६
	१६५	१११
शकुलार्भक	९९	१७
शकृत्	२२५	६७
शकृत्करि	३२३	६२
शक्ति	२७२	१९
	२९७	१०२
	४०८	६६
शक्तिधर	१७	४०
शक्तिहेतिक	२८७	६९
शक्र	१७	४२
	१५०	६६
शक्रधनुस्	३३	१०
शक्रपादप	१४६	५३
शक्रपुष्पी	१७४	१३६
शक्व	३६२	३६
शङ्कर	१३	३०
शङ्कु	१००	२०
	१२९	८
	२९५	९३
शङ्ख	२९	७१
	१०१	२३
	१७२	१३०
	४००	१८
शङ्खनक	१०१	२३
शङ्खिनी	१७१	१२६
शची	१९	४५
शचीपति	१७	४३
शटी	१८०	१५४
शठ	३६५	४६
शणपर्णी	१७८	१४९
शणपुष्पिका	१६४	१०७
शणसूत्र	९८	१६
शण्ढ	२६९	९
शतकोटि	२०	४७
शतह्रु	१०५	३३
शतपत्र	१०७	४०
शतपत्रक	१९३	१६
शतपदी	१९१	१३
शतपर्वन्	१८२	१६१
शतपर्विका	१६२	१०२
	१८२	१५८
शतपुष्पा	१७९	१५२
शतप्राश	१५४	७६
शतमन्यु	१७	४२
शतमान	४६०	३४
शतमूली	१६२	१००
शतवीर्या	१८२	१५९
शतवेधिन्	१७६	१४१
शतह्रदा	२५	९
शताङ्ग	२८२	५१
शतावरी	१६२	१०१
शत्रु	२६९	९
	२६९	११
शनैश्चर	४०	२६
शनैस्	४४८	१७
शपथ	६६	९

शब्दः	पृष्ठम्	श्लोकः
शपन	६६	९
शफ	२८२	४९
शफरी	९९	१८
शबर	३४४	२०
शबरालय	१२३	२०
शबल	६२	१७
शबली	३२५	६७
शब्द	५७	७
	६३	२
	७०	२२
शब्दग्रह	२३५	९४
शब्दन	३६२	३८
शम	३८७	३
शमथ	३८७	३
शमन	२४	५८
	२५८	२६
शमनखसृ	१०५	३२
शमल	२२५	६७
शमित	३८१	९७
शमी	१४६	५२
	३०९	२३
शमीधान्य	३०९	२४
शमीर	१४६	५२
शम्पा	३२	९
शम्ब	२०	४७
शम्बर	९३	४
	१९०	१०
शम्बरी	१५८	८७
शम्बल	४६०	३४
शम्बाकृत	३०४	९
शम्बूक	१०२	२३
शम्भली	२०९	१९
शम्भु	१३	३०
	४२०	१३५
शम्या	३०६	१४
शय	२३१	८१
शयन	८५	३६
	२४९	१३८
शयनीय	२४९	१३७
शयालु	३६१	३३
शयित	३६१	३३
शयु	८८	५
शय्या	२४९	१३७

शब्दः	पृष्ठम्	श्लोकः
शर	१८३	१६२
	२९२	८७
शरजन्मन्	१७	३९
शरण	४०६	५३
शरद्	५०	१९
	५०	२०
	४१३	९३
शरभ	१९०	११
शरव्य	२९२	८६
शराभ्यास	२९२	८६
शरारि	१९६	२५
शरारु	३६०	२८
शराव	३१३	३२
शरावती	१०५	३४
शरासन	२९१	८३
शरीर	२२६	७०
शरीरास्थि	२२५	६९
शरीरिन्	५५	३०
शर्करा	११३	११
	३१७	४३
	४२७	१७५
शर्करावत्	११३	११
शर्करिल	११३	११
शर्मन्	५२	२५
शर्व	१३	३०
शर्वरा	२९५	९३
शर्वरी	४४	३
शर्वाणी	१६	३७
शल	१८९	७
शलभ	१९७	२८
शलल	१८९	७
शलली	१८९	७
शलाटु	१३३	१५
शल्क	३९९	१३
शल्य	१४६	५३
	१८९	७
	२९५	९३
शव	३०१	११८
शश	१९०	११
शशधर	३४	१५
शशलोमन्	३३८	१०७
शशादन	१९२	१४
शशोर्ण	३३८	१०७

शब्दः	पृष्ठम्	श्लोकः
शश्वत्	४४१	२४३
	४४३	१
	४४६	११
शष्प	१८५	१६८
शस्त	५२	२६
	३८५	१०९
शस्त्र	२९१	८२
	४२८	१७९
शस्त्रक	३३४	९८
शस्त्रमार्ज	३४१	७
शस्त्राजीव	२८७	६७
शस्त्री	२९५	९२
शस्यमञ्जरी	३०८	२१
शस्यशूक	३०८	२१
शाक	१७४	१३६
	३१३	३४
शाकट	३३१	६४
शाकुनिक	३४२	१४
शाक्तीक	२८७	६९
शाक्यमुनि	८	१४
शाक्यसिंह	८	१५
शाखा	१३१	११
शाखानगर	११६	२
शाखामृग	१८७	३
शाखिन्	१२८	५
शाङ्किक	३४१	८
शाटक	४६०	३३
शाटी	४६१	३८
शाठ्य	८२	३०
शाण	३४८	३२
शाणी	४५२	९
शाण्डिल्य	१३९	३२
शात	५२	२५
	३७९	९१
शतकुम्भ	३३३	९४
शात्रव	२६९	११
शाद	९६	९
	४१२	९०
शादहरित	११३	१०
शाद्वल	११३	१०
शान्त	३८१	९७
शान्ति	३८७	३
शाबर	१३९	३३

शब्दः	पृष्ठम्	श्लोकः
शाम्बरी	३४२	११
शार	४२६	१६६
शारङ्ग	१९३	१६
शारदा	१३६	२३
	४१३	९५
शारदी	१६५	१११
शारिफल	३५२	४६
शारिवा	१६६	११२
शार्कर	११३	११
शार्ङ्गिन्	९	१९
शार्दूल	१८६	१
	३६९	५९
शार्वर	४२९	१८८
शाल	११०	१९
शाला	११८	६
	१३१	११
शालावृक	३९९	१२
शालि	३०९	२४
शालीन	३५९	२६
शालूक	१०७	३८
शालूर	१०२	२४
शालेय	१६३	१०५
	३०३	६
शाल्मलि	१४४	४६
शाल्मलीवेष्ट	१४४	४७
शावक	२००	३८
शाबर	१३९	३३
शाश्वत	३७३	७२
शाष्कुलिक	३९६	४०
शासन	२७३	२५
शास्तृ	७	१४
शास्त्र	४२८	१७९
शास्त्रविद्	३५४	६
शिक्य	३४७	३०
शिक्यित	३७९	८९
शिक्षा	६४	४
शिक्षित	३५३	४
शिखण्ड	१९८	३१
शिखण्डक	२३६	९६
शिखर	१२५	४
	१३१	१२
शिखरिन्	१२३	१
	४१५	१०६

शब्दः	पृष्ठम्	श्लोकः
शिखा	२४	५७
	१९८	३१
	२३६	९७
	४००	१९
शिखावत्	२२	५५
शिखावल	१९८	३०
शिखिग्रीव	३३५	१०१
शिखिन्	१९८	३०
	४१५	१०६
शिखिवाहन	१७	४०
शिग्रु	१३८	३१
	३१३	३४
शिग्रुज	३३८	११०
शिङ्घाण	३३४	९८
शिञ्जित	७१	२४
शिञ्जिनी	२९२	८५
शिति	४११	८३
शितिकण्ठ	१३	३२
शितिसारक	१४१	३८
शिपिविष्ट	४०२	३४
शिफा	१३१	११
शिफाकन्द	१०८	४३
शिबिका	२८३	५३
शिबिर	२७६	३३
शिरस्	२३६	९५
शिरस्त्र	२८६	६४
शिरस्य	२३७	९८
शिरा	२२४	६५
शिरीष	१४९	६३
शिरोग्र	१३१	१२
शिरोधि	२३३	८८
शिरोरत्न	२३८	१०२
शिरोरुह	२३८	९५
शिरोस्थनि	२२६	६९
शिल	३०३	२
शिला	१२१	१३
	१२४	४
शिलाजतु	३३६	१०४
शिली	१०२	२४
शिलीमुख	४००	१८
शिलोच्चय	१२३	१
शिल्प	३४९	३५
शिल्पिन्	३४०	५
शिल्पिशाला	११९	७
शिव	१३	३०
	५२	२५
शिवक	३२६	७३
शिवमल्ली	१५६	८१
शिवा	१६	३७
	१४६	५२
	१४८	५९
	१७१	१२७
	१८८	५
	४३४	२१२
शिशिर	३६	१९
	५०	१८
शिशु	२००	३८
शिशुक	९९	१८
शिशुत्व	२१५	४०
शिशुमार	१००	२०
शिश्न	२२८	७६
शिश्विदान	३६४	४६
शिष्टि	२७३	२६
शिष्य	२५३	११
शीकर	३३	११
शीघ्र	२७	६४
शीत	३६	१९
	३६	१९
	१३८	३०
	१४०	३४
	४५७	२२
शीतक	३४४	१८
शीतभीरु	१५२	७०
शीतल	३६	१९
	१७८	१४९
शीतशिव	१६३	१०५
	१७०	१२२
	३१६	४२
शीधु	३५१	४१
	४६०	३४
शीर्ष	२३६	९५
शीर्षक	२८६	६३
शीर्षच्छेद्य	३६४	४५
शीर्षण्य	२३७	९८
	२८६	६४
शील	८०	२६
	४३२	२०१
शुक	१७३	१३२
	१९५	२१
शुकनास	१४७	५७
शुक्त	४११	८३
शुक्ति	१०१	२३
	१७२	१३०
शुक्र	२२	५६
	३९	२५
	४९	१६
	२२२	६२
शुक्रशिष्य	७	१२
शुक्ल	५९	१२
शुच्	८०	२५
शुचि	२२	५६
	४९	१६
	५९	१२
	७७	१७
	४०२	२६
शुण्ठी	३१४	३८
शुण्डा	३५१	४०
शुतुद्रि	१०५	३३
शुद्धान्त	१२०	१२
	४०८	६६
शुनक	३४५	२२
शुनी	३४५	२२
शुभ	५२	२५
	४५७	२३
शुभंयु	३६६	५०
शुभान्वित	३६६	५०
शुभ्र	५९	१२
	४३०	१९२
शुभ्रदन्ती	३१	५
शुभ्रांशु	३४	१४
शुल्क	२७४	२७
शुल्ब	३३४	९७
	३४६	२७
	४५७	२३
शुश्रूषा	२६०	३५
शुषि	८६	२
शुषिर	७२	४
	८६	१
	८७	२
शुषिरा	१७२	१२९
शुष्कमांस	२२३	६३
शुष्ण	२९७	१०२
शुष्मम्	२२	५४
शुक	३०९	२३
शुककीट	१९१	१४
शुकधान्य	३०९	२४
शुकशिम्बि	१५८	८७
शूद्र	३३९	१
शूद्रा	२०८	१३
शूद्री	२०८	१३
शून्य	३६८	५६
शूर	२८९	७७
शूरण	१८१	१५७
शूर्प	३१०	२६
शूल	४३१	१९७
शूलाकृत	३१८	४५
शूलिन्	१३	३०
शूल्य	३१८	४५
शृङ्गल	२४०	१०९
शृङ्गलक	३२७	७५
शृङ्खला	२७८	४१
शृङ्ग	१२५	४
	१७६	१४२
	४०१	२६
शृङ्गवेर	३१४	३७
शृङ्गाटक	११५	१७
शृङ्गार	७७	१७
शृङ्गिणी	३२४	६६
शृङ्गी	१०२	२५
	१६२	१००
	१६८	११६
शृङ्गीकनक	३३३	९६
शृत	३८१	९५
शेखर	२४८	१३६
शेफस्	२२८	७६
शेफालिका	१५२	७०
	४५१	७
शेमुषी	५५	१
शेलु	१४०	३४
शेवधि	२९	७१
शेवाल	१०७	३८
शेष	८८	४
शैक्ष	२५३	११
शैखरिक	१५८	८८
शैल	१२३	१

शब्दः	पृष्ठम्	श्लोकः
शैलालिन्	३४२	१२
शैलूष	१३९	३२
	३४२	१२
शैलेय	१७०	१२३
शैवल	१०७	३८
शैवलिनी	१०४	३०
शैशव	२१५	४०
शोक	८०	२५
शोचिष्केश	२२	५४
शोचिस्	४३	३४
शोण	६१	१५
	१०५	३४
शोणक	१४७	५७
शोणरत्न	३३२	९२
शोणित	२२३	६४
शोथ	२१९	५२
शोथघ्नी	१७८	१४९
शोधनी	१२३	१८
शोधित	३१८	४६
	३६८	५६
शोफ	२१९	५२
शोभन	३६७	५२
शोभा	३५	१७
शोभाञ्जन	१३८	३१
शोष	२१९	५१
शौक	२०२	४३
शौक्लिकेय	९०	१०
शौण्ड	३५९	२३
शौण्डिक	३४२	१०
शौण्डी	१६१	९७
शौद्धोदनि	८	१५
शौरि	९	२१
शौर्य	२९७	१०२
शौल्बिक	३४१	८
शौष्कल	३५८	१९
श्योत	३८९	१०
श्मशान	३०१	११८
श्मश्रु	२३७	९९
श्याम	६०	१४
	४२१	१४३
श्यामल	६०	१४

शब्दः	पृष्ठम्	श्लोकः
श्याम	१४७	५५
	१६५	१०८
	१६६	११२
	४२१	१४३
श्यामाक	१८४	१६५
श्याल	२१२	३२
श्याव	६१	१६
श्येत	५९	१२
श्येन	१९२	१५
श्यैनंपाता	४५१	६
श्रद्धा	४१४	१०२
श्रद्धालु	२१०	२१
	३६०	२७
श्रयण	३९०	१२
श्रवण	२३५	९४
श्रवस्	२३५	९४
श्रविष्ठा	३८	२२
श्राणा	३२०	५०
श्राद्ध	२५९	३१
श्राद्धदेव	२४	५९
श्राय	३९०	१२
श्रावण	४९	१६
श्रावणिक	४९	१६
श्री	१२	२७
	२९१	८२
श्रीकण्ठ	१३	३२
श्रीघन	७	१४
श्रीद	२८	६९
श्रीपति	९	२१
श्रीपर्ण	१५०	६६
	४०६	५३
श्रीपर्णिका	१४२	४०
श्रीपर्णी	१४०	३६
श्रीफल	१३९	३२
श्रीफली	१६०	९५
श्रीमत्	१४२	४०
	३५६	१४
श्रील	३५६	१४
श्रीवत्सलाञ्छन	९	२२
श्रीवास	२४६	१२९
श्रीसंज्ञ	२४५	१२५
श्रीहस्तिनी	१५२	६९

शब्दः	पृष्ठम्	श्लोकः
श्रुत	४१०	७७
श्रुति	६४	३
	२३५	९४
	४०९	७३
श्रेणी	१२८	४
	३४०	५
श्रेयस्	५२	२४
	५७	६
	३६९	५८
श्रेयसी	१४८	५९
	१५७	८४
	१६१	९७
श्रेष्ठ	३६९	५८
श्रोण	२१८	४८
श्रोणि	२२७	७४
श्रोणिफलक	२२७	७४
श्रोत्र	२३५	९४
श्रोत्रिय	२५२	६
श्रौषट्	४४५	८
श्लक्ष्ण	३६९	६१
श्लेष	३९०	११
श्लेष्मण	२२२	६०
श्लेष्मन्	२२३	६२
श्लेष्मल	२२२	६०
श्लेष्मातक	१४०	३४
श्लोक	३९७	२
श्वःश्रेयस	५२	२५
श्वदंष्ट्रा	१६१	९८
श्वन्	३४५	२२
श्वनिश	२६२	४०
श्वपच	३४४	२०
श्वभ्र	८६	२
	४५७	२२
श्वयथु	२१९	५२
श्ववृत्ति	३०३	२
श्वशुर	२१२	३१
	२१४	३७
श्वशुर्य	४२२	१४६
श्वश्रू	२१२	३१
श्वश्रूश्वशुर	२१४	३७
श्वस्	४४९	२२
श्वसन	२५	६१
	१४६	५२

शब्दः	पृष्ठम्	श्लोकः
श्वाविध्	१८९	७
श्वित्र	२२०	५४
श्वेत	५९	१२
	३३३	९६
	४१०	७९
श्वेतगरुत्	१९६	२३
श्वेतमरिच	३३८	११०
श्वेतरक्त	६१	१५
श्वेतसुरसा	१५२	७१
ष.		
षट्कर्मन्	२५१	४
षट्पद	१९८	२९
षडभिज्ञ	७	१४
षडानन	१७	३९
षड्ग्रन्थ	१४५	४८
षड्गन्था	१६२	१०२
षड्ग्रन्थिका	१८०	१५४
षड्ज	७१	१
षण्ड	१०८	४२
	३३३	६२
षष्टिक्य	३०४	७
षाण्मातुर	१७	४०
स.		
संयत्	२९८	१०६
संयत	३६३	४२
संयम	३९२	१८
संयाम	३९२	१८
संयुग	२९८	१०५
संयोजित	३८०	९२
संराव	७०	२३
संलाप	६८	१६
संवत्सर	५०	२०
संवत्	४४७	१६
संवनन	३८७	४
संवर्त	५१	२२
संवर्तिका	१०९	४३
संवसथ	१२३	१९
संवहन	३९३	२२
संविद्	५५	१
	५७	५
	४१३	९२
संवीक्षण	३९५	३०

शब्दः	पृष्ठम्	श्लोकः
संवीत	३७९	९०
संवेग	८४	३४
संवेद	३८८	६
संवेश	८५	३६
संव्यान	२४३	११८
संशप्तक	२९६	९८
संशय	५६	३
संशयापन्नमानस	३५४	५
संश्रव	५७	५
संश्रुत	३८५	१०९
संश्लेष	३९५	३०
संसक्त	३७२	६८
संसद्	२५५	१५
संसरण	११६	१८
	४०६	५५
संसिद्धि	८६	३७
संस्कारहीन	२६६	५३
संस्कृत	४११	८१
संस्तर	४२५	१६१
संस्तव	३९३	२३
संस्ताव	३९५	३४
संस्त्याय	४२३	१५१
संस्था	२७४	२६
संस्थान	४१८	१२४
संस्थित	३०१	११७
संस्पर्शा	१७९	१५४
संस्फोट	२९८	१०५
संहत	३७४	७५
संहतजानुक	२१७	४७
संहति	२०१	४०
संहनन	२२६	७०
संहार	९१	२
संहृति	६६	८
सकल	३७१	६५
सकृत्	४४०	२४२
सकृत्प्रज	१९४	२०
सक्तुफला	१४६	५२
सक्थि	२२७	७३
सखि	२७०	१२
सखी	२०७	१२
सख्य	२७०	१२
सगर्भ्य	२१३	३४
सगोत्र	२१३	३४

शब्दः	पृष्ठम्	श्लोकः
सग्धि	३२१	५५
संकट	३७७	८५
संकर	१२३	१८
संकर्षण	११	२४
संकलित	३८०	९३
संकल्प	५६	२
संकसुक	३६४	४३
संकाश	३५०	३७
संकीर्ण	३३९	१
	३७७	८५
	४०६	५७
संकुल	६९	१९
	३७७	८५
संकोच	२४५	१२४
संक्रन्दन	१७	४४
संक्रम	३९३	२५
संक्षेपण	३९२	२१
संख्य	२९८	१०४
संख्या	५६	२
संख्यात	३७१	६४
संख्यावत्	२५१	५
संख्येय	३२९	८३
सङ्ग	३९४	२९
संगत	६९	१८
संगम	३९४	२९
	४६०	३४
संगर	४२६	१६६
संगीर्ण	३८५	१०९
संगूढ	३८०	९३
संग्रह	६६	६
संग्राम	२९८	१०५
संग्राह	२९४	९०
	३९१	१४
संघ	२०२	४१
संघात	२०१	३९
सचिव	४३३	२०६
सजम्बाल	११३	१०
सज्ज	२८६	६५
सज्जन	२५१	३
	२७६	३३
सज्जना	२७९	४२
संचय	२०१	३९
संचारिका	२०९	१७

शब्दः	पृष्ठम्	श्लोकः
संजवन	११८	६
संज्वर	२४	५७
संज्ञपन	३००	११३
संज्ञा	४०२	३३
संज्ञु	२१७	४७
सटा	२३७	९७
संडीन	२००	३७
सत्	२५१	५
	४११	८३
सतत	२७	६५
सती	२०५	६
सतीनक	३०६	१६
सतीर्थ्य	२५४	१२
सत्तम	३६९	५८
सत्त्व	५४	२९
	४३४	२१३
सत्पथ	११५	६६
सत्य	७०	२२
	४२३	१५४
सत्यंकार	३२९	८२
सत्यवचस्	२६३	४३
सत्याकृति	३२९	८२
सत्यानृत	३०३	३
सत्यापन	३२९	८२
सत्र	४२८	१८१
सत्रा	४४४	४
सत्रिन्	२७०	१५
सत्वर	२७	६५
सदन	११७	५
सदस्	२५५	१५
सदस्य	२५५	१६
सदा	४४९	२२
सदागति	२५	६१
सदातन	३७३	७२
सदानीरा	१०५	३३
सदक्ष	३४९	३६
सदृश्	३४९	३६
सदृश	३४९	३६
सदेश	३७१	६७
सद्मन्	११७	४
सद्यस्	४४६	९
सध्र्यच्	३६१	३४

शब्दः	पृष्ठम्	श्लोकः
सनत्कुमार	२१	५१
सना	४४८	१७
सनातन	३७३	७२
सनाभि	२१३	३३
सनि	२६०	३२
सनीड	३७१	६७
संतत	२७	६५
संतति	२५०	१
संतप्त	३८३	१०२
संतमस	८७	४
संतान	२१	५०
	२५०	१
संताप	२४	५७
संतापित	३८३	१०२
संदान	३२६	७३
संदानित	३८०	९५
संदाव	३००	१११
संदित	३७७	८६
	३८०	९५
संदेशवाच्	६८	१७
संदेशहर	२७१	१६
संदेह	५६	३
संदोह	२०१	३९
संद्राव	३००	१११
संधा	४१४	१०२
संधान	३५१	४२
संधि	२७१	१८
	३९०	११
संधिनी	३२५	६९
संध्या	४४	३
सन्नकद्रु	१४०	३५
संनद्ध	२८६	६५
संनय	४२३	१५१
संनिकर्षण	३९३	२३
संनिकृष्ट	३७१	६६
संनिधि	३९३	२३
संनिवेश	१२३	१९
सपत्न	२६९	१०
संपदि	४४३	३
	४४६	९
सपर्या	२५४	१४
	२६०	३४
सपिण्ड	२१३	३३

शब्दः	पृष्ठम्	श्लोकः
सपीति	३२१	५५
सप्तकी	२४०	१०८
सप्ततन्तु	२५४	१३
सप्तपर्ण	१३६	२३
सप्तर्षि	४०	२७
सप्तला	१५३	७२
	१७६	१४३
सप्तार्चिस्	२२	५६
सप्ताश्व	४०	२९
सप्ति	२८०	४४
सब्रह्मचारिन्	२५४	११
सभर्तृका	२०७	१२
सभा	११८	६
	२५५	१५
	४२०	१३७
सभाजन	३८८	७
सभासद्	२५५	१६
सभास्तार	२५५	१६
सभिक	३५२	४४
सभ्य	२५१	३
	२५५	१६
सम	३४९	३६
	३७१	६४
समग्र	३७१	६५
समज्ञा	१५९	९०
	१७६	१४१
समज	२०२	४२
समज्ञा	६७	११
समज्या	२५५	१५
समञ्जस	२७३	२४
समधिक	३७४	७५
समंततस्	४४७	१३
समन्तदुग्धा	१६४	१०६
समन्तभद्र	७	१३
समन्वितलय	७२	३
समम्	४४४	४
समय	४३	१
	४२२	१४९
समया	४४२	२५२
	४४५	७
समर	२९८	१०४
समर्थ	४१२	८७
समर्थन	२७३	२५
समर्धक	३५४	७
समर्याद	३७१	६७
समवर्तिन्	२४	५८
समवाय	२०१	४०
समष्टिला	१८१	१५७
समसन	३९२	२१
समस्त	३७१	६५
समस्या	६६	७
समा	५०	२०
समांसमीना	३२६	७२
समाकर्षिन्	५९	११
समाघात	२९८	१०५
समाज	२०२	४२
समाधि	५७	५
	४१४	९८
समान	२६	६३
	३४९	३७
	४१८	१२७
समानोदर्य	२१३	३४
समालम्भ	३९४	२७
समावृत्त	२५३	१०
समासाद्य	३८०	९२
समासार्था	६६	७
समाहार	३९१	१६
समाहित	३८५	१०९
समाहृति	६६	६
समाह्वय	३५२	४६
समित्	२९८	१०६
समिति	२५५	१५
	२९८	१०६
	४०९	७०
समिध्	१३२	१३
समीक	२९८	१०४
समीप	३७१	६६
समीर	२५	६२
समीरण	२५	६२
	१५५	७९
समुच्चय	३९१	१६
समुच्छ्राय	४२३	१५२
समुज्झित	३८४	१०७
समुत्पिञ्ज	२९७	९९
समुदक्त	३७९	९०
समुदय	२०१	४०
समुदाय	२०१	४०
	२९८	१०६
समुद्र	४५४	१७
समुद्रक	२४९	१३९
समुद्धत	३५८	२३
समुद्धरण	४०६	५५
समुद्र	९२	१
समुद्रान्त	१५९	९२
	१६८	११६
	१७३	१३३
समुन्दन	३९४	२९
समुन्	३८४	१०५
समुन्नद्ध	४१५	१०३
समुपजोषम्	४४६	१०
समूह	१८९	९
समूह	२०१	३९
समूह्य	२५६	२०
समृद्ध	३८९	११
समृद्धि	३८९	१०
संमृष्ट	३१८	४६
संपत्ति	२९१	८२
संपद्	२९१	८१
संपराय	४२१	१५०
संपरायक	२९८	१०४
संपाक	१३६	२३
संपुटक	२४९	१३९
संप्रति	४४९	२३
संप्रदाय	३८८	७
संप्रधारणा	२७३	२५
संप्रहार	२९८	१०५
संफुल्ल	१२९	७
संबरारि	१२	२६
संबाध	३७७	८५
संभेद	१०६	३५
संभ्रम	८४	३४
	३९४	२६
संमद	५२	२४
संमार्जनी	१२३	१८
संमूर्च्छन	३८८	६
सम्यच्	७०	२२
सम्राज्	२६७	३
सरक	३५१	४३
सरघा	१९७	२६
सरठ	१९१	१२
सरणा	१७९	१५२
सरणि	११४	१५
सरमा	३४५	२२
सरल	१४८	६०
	३५५	८
सरलद्रव	२४६	१२९
सरला	१६४	१०८
सरस्	१०३	२८
सरसी	१०३	२८
सरसीरुह	१०७	४०
सरस्वत्	९२	१
	४०७	५७
सरस्वती	६२	१
	१०५	३४
सरित्	१०४	२९
सरित्पति	९२	२
सरीसृप	८९	७
सर्ग	४००	२२
सर्ज	१४३	४४
सर्जक	१४३	४४
सर्जरस	२४६	१२७
सर्प	८९	६
सर्पराज	८८	४
सर्पिस्	३२०	५२
सर्व	३७१	६४
सर्वसहा	११०	३
सर्वज्ञ	७	१३
	१३	३३
सर्वतस्	४४७	१३
सर्वतोभद्र	१२०	१०
	१४९	६२
सर्वतोभद्रा	१४०	३५
सर्वतोमुख	९३	४
सर्वदा	४४९	२२
सर्वधुरावह	३२४	६६
सर्वधुरीण	३२४	६६
सर्वमङ्गला	१६	३७
सर्वरस	२४६	१२७
सर्वलिङ्गिन्	२६३	४५
सर्ववेदस्	२५३	९

शब्दः	पृष्ठम्	श्लोकः
सर्वसंनहन	२९५	९४
सर्वानुभूति	१६४	१०८
सर्वान्नभोजि	३५८	२२
सर्वान्नीन	३५८	२२
सर्वाभिसार	२९५	९४
सर्वार्थसिद्ध	८	१५
सर्वौघ	२९५	९४
सर्षप	३०७	१७
सलिल	९३	३
सल्लकी	१७०	१२४
सव	२५४	१३
सवन	२६४	४७
सवयस्	२७०	१२
सवितृ	४०	३१
सविध	३७१	६७
सवेश	३७१	६७
सव्य	३७७	८४
सव्येष्टृ	२८५	६०
सस्य	१३३	१५
सस्यसंवर	१४३	४४
सह	४४४	४
सहकार	१३९	३३
सहचरी	१५४	७५
सहज	२१३	३४
सहधर्मिणी	२०४	५
सहन	३६१	३१
सहभोजन	३२१	५५
सहस	४८	१४
	२९७	१०२
	४४८	२३२
सहसा	४४५	७
सहस्य	४८	१५
सहस्रदंष्ट्र	९९	१८
सहस्रपत्र	१०७	४०
सहस्रवीर्या	१८२	१५८
सहस्रवेधि	३१६	४०
सहस्रवेधिन्	१७६	१४१
सहस्रांशु	४०	३१
सहस्राक्ष	१७	४४
सहस्रिन्	२८६	६२
सहा	१५३	७३
	१६७	११३
सहाय	२८८	७१
सहायता	३९६	४०
सहिष्णु	३६१	३१
सांयात्रिक	९७	१२
सांयुगीन	२८९	७७
सांवत्सर	२७०	१४
सांशयिक	३५४	५
साकम्	४४४	४
साक्षात्	४४१	२४३
सागर	९२	१
साचि	४४५	६
सातला	१७६	१४३
साति	३९६	३८
	४०८	६७
सातिसार	२२१	५९
सात्त्विक	७७	१६
सादिन्	२८५	६०
	४१५	१०७
साधन	४१७	११९
साधारण	३४९	३७
	३७६	८२
साधित	३६२	४०
साधिष्ट	३८६	११२
साधीयस्	४३९	२३५
साधु	२५१	३
	३६७	५२
	४१४	१०१
साधुवाहिन्	२८०	४४
साध्य	६	१०
साध्वस	७९	२१
साध्वी	२०५	६
सानु	१२५	५
सांतपन	२६५	५२
सान्त्व	६९	१८
	२७२	२१
सांदृष्टिक	२७५	२९
सान्द्र	३७१	६६
सान्द्रस्निग्ध	३६०	३०
सान्नाय्य	२५८	२७
साप्तपदीन	२७०	१२
सामन्	६४	३
	२७२	२१
सामाजिक	२५५	१६
सामान्य	५५	३१
	३७६	८२
सामि	४४२	२४९
सामिधेनी	२५६	२२
सामुद्र	३१७	४१
सांप्रतम्	४४६	११
	४४९	२३
साय	४४	३
सायक	३९७	२
सायम्	४४८	१९
सार	१३१	१२
	४२६	१७१
सारङ्ग	४०१	२३
सारथि	२८५	५९
सारमेय	३४५	२१
सारव	१०६	३६
सारस	१०७	४०
	१९५	२२
सारसन	२४०	१०९
	२८६	६३
सारिका	४५१	८
सार्थ	२०२	४१
सार्थवाह	३२८	७८
सार्धम्	४४४	४
सार्द्र	३८४	१०५
सार्वभौम	३१	४
	२६७	२
साल	१४३	४४
	११७	३
	१२८	५
सालपर्णी	१६७	११५
साला	३२३	६३
साहस	२७२	२१
साहस्र	२८६	६२
	३९७	४३
सिंह	१८६	१
	३६९	५९
सिंहतल	२३२	८५
सिंहनाद	२९९	१०७
सिंहपुच्छी	१५३	९३
सिंहसंहनन	३५६	१२
सिंहासन	२७५	३१
सिंहास्य	१६३	१०३
सिंही	१६३	१०३
	१६७	११४
सिकता	४०९	७३
सिकतामय	९६	९
सिकतावत्	११४	११
सिक्थक	३३८	१०७
सित	५९	१३
	३८०	९५
	३८२	९८
	४११	८०
सितच्छत्रा	१७९	१५२
सितशूक	३०६	१५
सिता	१८२	१५८
	३१७	४३
सिताभ्र	२४७	१३०
सिताम्भोज	१०८	४१
सिद्ध	६	११
	३८२	१००
सिद्धान्त	५६	४
सिद्धार्थ	३०७	१८
सिद्धि	१६६	११२
सिध्म	२१९	५३
सिध्मल	२२२	६१
सिध्मला	४५२	१०
सिध्य	३८	२२
सिध्रका	४५१	८
सिनीवाली	४६	९
सिन्दुक	१५१	६८
सिन्दुवार	१५१	६८
सिन्दूर	३३७	१०५
	४५९	३१
सिन्धु	९१	२
	९२	१
	४१४	१०१
सिन्धुज	३१७	४२
सिम्बा	३०९	२३
सिरा	२२४	६५
सिह्न	२४६	१२८
	३९८	९
सीता	३०६	१४
सीत्य	३०४	८
सीमन्	१२३	२०
सीमन्त	४५५	१९
सीमन्तिनी	२०३	२
सीमा	१२३	२०
सीर	३०५	१४

शब्दः	पृष्ठम्	श्लोकः
सीरपाणि	११	२४
सीवन	३८७	५
सीसक	३३७	१०५
सीहुण्ड	१६४	१०५
सु	४४३	२
	४४४	५
सुकन्दक	१७८	१४७
सुकरा	३२५	७०
सुकल	३५५	८
सुकुमार	३७५	७८
सुकृत	५२	२४
सुकृतिन्	३५३	३
सुख	५२	२५
	४५७	२३
सुखवर्चक	३३८	१०९
सुखसंदोह्या	३२६	७१
सुगत	७	१३
सुगन्धा	१६७	११४
सुगन्धि	५९	११
	१६९	१२१
सुचरित्रा	२०५	६
सुचेलक	२४२	११६
सुत	२११	२७
	४०७	६०
सुतश्रेणी	१५८	८८
सुतात्मजा	२१२	२९
सुत्रामन्	१७	४२
सुत्या	२६४	४७
सुत्वन्	२५३	१०
सुदर्शन	१३	२८
सुदाय	२७४	२८
सुदूर	३७२	६९
सुधर्मन्	२१	४८
सुधा	२१	४८
	४१४	१०२
सुधांशु	३४	१४
सुधी	२५१	५
सुनासीर	१७	४१
सुनिषण्णक	१७८	१४९
सुन्दर	३६७	५२
सुन्दरी	२०४	४
सुपथिन्	११५	१६

शब्दः	पृष्ठम्	श्लोकः
सुपर्ण	१३	२९
सुपर्वन्	५	७
सुपार्श्वक	१४३	४३
सुप्रतीक	३१	४
सुप्रयोगविशिख	२८७	६८
सुप्रलाप	६८	१७
सुभगासुत	२१४	२४
सुभिक्षा	१७०	१२४
सुम	१३४	१७
सुमन	३०७	१८
सुमनस्	५	७
	१३४	१७
	१५३	७२
सुमनोरजस्	१३४	१७
सुमेरु	२१	४९
सुर	५	७
सुरङ्गा	४५१	८
सुरज्येष्ठ	८	१६
सुरदीर्घिका	२१	४९
सुरद्विष्	७	१२
सुरनिम्नगा	१०४	३१
सुरपति	१७	४३
सुरभि	५०	१८
	५३	११
	४२०	१३७
सुरभी	१७०	१२३
सुरर्षि	२०	४८
सुरलोक	४	६
सुरवर्त्मन्	२९	१
सुरसा	१६७	११४
सुरा	३५०	३९
	४०६	५२
सुराचार्य	३९	२४
सुरामण्ड	३५१	४२
सुरालय	२१	४९
सुराष्ट्रज	१७२	१३१
सुवचन	६८	१७
सुवर्ण	३३३	९४
	३३०	८६
सुवर्णक	१३६	२४
सुवल्लि	१६१	९५
सुवहा	१५२	७०
	१६७	११५
	१६९	११९
	१७०	१२३
	१७५	१४०

शब्दः	पृष्ठम्	श्लोकः
सुवासिनी	२०६	९
सुव्रता	३२६	७१
सुषम	३६७	५२
सुषमा	३५	१७
सुषवी	१८०	१५५
	३१४	३७
सुषीम	३६	१९
सुषेण	१५१	६७
सुषेणिका	१६५	१०८
सुष्ठु	४४३	२
	४४८	१९
सुसंस्कृत	३१८	४५
सुहृद्	२७१	१७
सुहृदय	३५३	३
सूकर	१८७	२
सूक्ष्म	३६९	६१
	४२१	१४४
सूचक	३६५	४७
सूचि	४९१	८
सूत	२८५	५९
	३३५	९९
	३४०	३
	४०७	६२
सूतिकागृह	११९	८
सूतिमास	२१४	३९
सूत्थान	३४४	१९
सूत्र	३४७	२८
सूत्रवेष्टन	३९३	२४
सूद	३११	२८
	४१२	९१
सूना	४१६	११३
सूनु	२११	२७
सूनृत	६९	१९
सूपकार	३११	२७
सूर	४०	२८
सूरत	३५६	१५
सूरि	२५१	६
सूर्मी	३४९	३५
सूर्य	४०	२८
सूर्यतनया	१०५	३२
सूर्यसुत	४२	३२
सूर्येन्दुसंगम	४६	८
सृक्कन्	२३४	९१

शब्दः	पृष्ठम्	श्लोकः
सृग	२९४	९१
सृगाल	१८८	५
सृणि	२७९	४१
सृणिका	२२५	६७
सृति	११४	१५
सृपाटी	४६१	३८
सृमर	१९०	११
सृष्टि	४०३	३९
सेकपात्र	९८	१३
सेचन	९८	१३
सेतु	११४	१४
	१३६	२५
सेना	२८९	७८
सेनाङ्ग	२७६	३३
सेनानी	१७	३९
	२८६	६२
सेनामुख	२९०	८१
सेनारक्ष	२८५	६१
सेवक	२६९	९
सेवन	३८७	५
सेवा	३०३	२
सेव्य	१८४	१६४
सैंहिकेय	४०	२६
सैकत	९६	९
सैतवाहिनी	१०५	३३
सैनिक	२८५	६१
सैन्धव	२८०	४४
	३१६	४२
सैन्य	२८५	६१
	२८९	७८
सैरन्ध्री	२०९	१८
सैरिक	३२४	६४
सैरिभ	१८८	४
सैरीयक	१५४	७५
सोढ	३८१	९७
सोत्प्रास	७०	२१
सोदर्य	२१३	३४
सोपल्लव	४७	१०
सोपान	१२२	१८
सोम	३४	१४
सोमप	२५३	९
सोमपीथिन्	२५३	९
सोमराजी	१६१	९५

शब्दः	पृष्ठम्	श्लोकः
सोमवल्क	१४५	५०
	३९८	९
सोमवल्लरी	१७५	१३७
सोमवल्लिका	१६१	९५
सोमवल्ली	१५६	८३
सोमोद्भवा	१०५	३२
सोल्लुण्ठन	७०	२१
सौगन्धिक	१०६	३६
	१८४	१६६
	३३६	१०२
सौचिक	३४०	६
सौदामनी	३२	९
सौध	११९	१०
सौभागिनेय	२११	२४
सौम्य	४०	२६
	४२५	१६१
सौरभेय	३२२	६०
सौरभेयी	३२४	६६
सौराष्ट्रिक	९०	१०
सौरि	४०	२६
सौवर्चल	३१७	४३
	३३८	१०९
सौविद	२६८	८
सौविदल्ल	२६८	८
सौवीर	१४१	९३
	३१५	३७
	३३५	१००
सौहित्य	३२२	५६
स्कन्द	१७	३९
स्कन्ध	१३०	१०
	१४१	३८
	२२९	७८
	४१४	१०३
स्कन्धशाखा	१३१	११
स्कन्न	३८३	१०४
स्खलन	८५	३६
स्खलित	२९९	१०८
स्तन	२२९	७७
स्तनंधयी	२१५	४१
स्तनपा	२१५	४१
स्तनयित्नु	३२	६
स्तनित	३२	८
स्तबक	१३३	१६
स्तब्धरोमन्	१८७	२
स्तभ	३२७	७६

शब्दः	पृष्ठम्	श्लोकः
स्तम्ब	१३०	९
	३०८	२१
	३९५	३६
स्तम्बकरि	३०८	२१
स्तम्बघन	३९५	३५
स्तम्बघ्न	३९५	३४
स्तम्बेरम	२७६	३५
स्तम्भ	४२०	१३५
स्तव	६७	११
स्तिमित	३८४	१०५
स्तुत	३८५	११०
स्तुति	६७	१२
स्तुतिपाठक	२९६	९७
स्तूप	४५५	१९
स्तेन	३४५	२४
स्तेम	३९४	२९
स्तेय	३४६	२५
स्तैन्य	३४६	२५
स्तोक	३६९	६१
स्तोकक	१९३	१७
स्तोत्र	६७	११
स्तोम	२०१	३९
	४२१	१४१
स्त्री	२०३	२
स्त्रीधर्मिणी	२०९	२०
स्त्रीपुंस	२०१	३८
स्थण्डिल	२५६	१८
स्थण्डिलशायी	२६३	४४
स्थपति	२५३	९
	४०७	६१
स्थल	१११	५
स्थली	१११	५
स्थविर	२१६	४२
स्थविष्ठ	३८५	१११
स्थाणु	१३	३४
	४०५	४९
	१२९	८
स्थाण्डिल	२६३	४४
स्थान	४१७	११७
स्थानीय	११६	१
स्थाने	४४६	११
स्थापत्य	२६८	८
स्थापनी	१५७	८४
स्थामन्	२९७	१०२

शब्दः	पृष्ठम्	श्लोकः
स्थायुक	२६८	७
स्थाल	४५९	३२
स्थाली	३१२	३१
स्थावर	३७३	७३
स्थाविर	२१५	४०
स्थासक	२४४	१२२
स्थास्नु	३७३	७३
स्थिति	२७४	२६
	३९२	२१
स्थिरतर	३७३	७३
स्थिरा	११०	२
	१६७	११५
स्थिरायु	१४४	४६
स्थूणा	३४९	३५
	४०५	५१
स्थूल	३६९	६१
	४३३	२०४
स्थूलल६य	३५४	६
स्थूलशाटक	२४३	११६
स्थूलोदय	४२२	१४८
स्थेयस्	३७३	७३
स्थौणेय	१७३	१३२
स्थौरिन्	२८१	४६
स्नव	३८९	९
स्नातक	२६३	४३
स्नान	२४४	१२२
स्नायु	२२४	६६
स्निग्ध	२७०	१२
	३१८	४६
	३५६	१४
स्नु	१२४	५
स्नुषा	३८०	९२
स्नुषा	२०६	९
स्नुही	१६४	१०५
स्नुही	१६४	१०५
स्नेह	८०	२७
स्पर्श	५७	७
	३९१	१४
स्पर्शन	२५	६१
	२५९	२९
स्पश	२७०	१३
	४३४	२१४
स्पष्ट	३७६	८१

शब्दः	पृष्ठम्	श्लोकः
स्पृक्का	१७३	१३३
स्पृशी	१६०	९३
स्पृष्टि	३८९	९
स्पृहा	८१	२७
स्मर्	३९१	१४
स्फटा	९०	९
स्फाति	३८९	९
स्फिच्	२२८	७५
स्फिर	३७०	६३
स्फुट	१२९	७
	२७६	८१
स्फुटन	३८७	५
स्फुरण	३८९	१०
स्फुरणा	३८९	१०
स्फुलिङ्ग	२४	५७
स्फूर्जक	१४१	३८
स्फूर्जथु	३३	१०
स्फेड	३८६	११२
स्म	४४४	५
	४४८	१७
स्मर	१२	२५
स्मरहर	११	३३
स्मित	८५	३४
स्मृति	६५	६
	८१	२९
स्यद	२६	६४
स्यन्दन	१३७	२६
	२८३	५१
स्यन्दनारोह	२८५	६०
स्यन्दिनी	३२५	६७
स्यम	३८०	९२
स्यूत	३१०	२६
	३८३	१०१
स्यूति	३८७	५
स्योनाक	१४७	५७
संसिन्	१३७	२८
सक्त्	२४८	१३५
सक्थ	३९०	९
सक्थ्यूर्मा	३२५	६९
सक्थ्वन्ती	१०४	३०
सक्था	१७६	१४२
	१५७	८३

शब्दः	पृष्ठम्	श्लोकः
स्रष्टृ	८	१७
स्रस्त	३८३	१०४
स्राक्	४४३	२
स्रुत	३८०	९२
स्रुव	२५७	२५
स्रुवावृक्ष	१४१	३७
स्रोतस्	९७	११
	४३९	२३३
स्रोतस्वती	१०४	३०
स्रोतोञ्जन	३३५	१००
स्व	२१३	३४
	४३४	२११
स्वच्छन्द	३५७	१५
	३५७	१६
स्वजन	२१३	३४
स्वतन्त्र	३५७	१५
स्वधा	४४५	८
स्वधिति	२९४	९२
स्वन	७०	२२
स्वनित	३८०	९४
स्वप्न	८५	३६
स्वप्नज्	३६१	३३
स्वभाव	८६	३८
स्वभू	९	१८
स्वयंवरा	२०५	७
स्वयम्	४४७	१६
स्वयंभू	८	१६
स्वर्	४	६
	४४२	२५४
स्वर	६५	४
	७१	१
स्वरु	२०	४७
	४२६	१६७
स्वरूप	८६	३८
	४१९	१३१
स्वर्ग	४	६
स्वर्जिकाक्षार	३३८	१०९
स्वर्ण	३३३	९४
स्वर्णकार	३४१	८
स्वर्णक्षीरी	१७५	१३८
स्वर्णदी	२१	४९
स्वर्भानु	४०	२६
स्वर्वेश्या	२२	५२

शब्दः	पृष्ठम्	श्लोकः
स्वर्वैद्य	२१	५१
स्वसृ	२१२	२९
स्वस्ति	४४०	२४१
स्वस्तिक	१२०	१०
स्वस्त्रीय	२१३	३२
स्वाति	४६१	३८
स्वादु	४१३	९४
स्वादुकण्टक	१४१	३७
	१६१	९८
स्वादुरसा	१७६	१४४
स्वाद्वी	१६४	१०७
स्वाध्याय	२६४	४७
स्वान	७०	२३
स्वान्त	५५	३१
स्वाप	८५	३६
स्वापतेय	३३१	९०
स्वामिन्	२७१	१७
	३५५	१०
स्वाराज्	१७	४३
स्वाहा	२५६	२१
	४४५	८
स्वित्	४४०	२४२
स्वेद	८४	३३
स्वेदज	३६६	५१
स्वैर	४२८	१९२
स्वैरिणी	२०७	११
स्वैरिता	३८६	२
स्वैरिन्	३५७	१५

ह.

शब्दः	पृष्ठम्	श्लोकः
ह	४४४	५
हंस	४०	३१
	१९६	२३
	४३७	२२६
हंसक	२४१	११०
हञ्जिका	१५९	८९
हञ्जे	७७	१५
हट्ट	४५४	१८
हट्टविलासिनी	१७२	१३०
हठ	२९९	१०८
हण्डे	७७	१५
हत	३६३	४१
हनु	१७२	१३०
	२३४	९०

शब्दः	पृष्ठम्	श्लोकः
हन्त	४४१	२४४
हन्न	३८१	९६
हय	२८०	४४
हयपुच्छी	१७५	१३८
हयमारक	१५४	७६
हर	१३	३३
हरण	२७४	२८
हरि	१८६	१
	४२७	१७५
हरिचन्दन	२१	५०
	२४७	१३१
हरिण	६०	१३
	१८९	८
	४०५	५०
हरिणी	४०५	५१
हरित्	३०	१
	६१	१४
	४५५	१९
हरित	६१	१४
हरितक	३१३	३४
हरिताल	४५९	३२
हरितालक	३३६	१०३
हरिदश्व	४०	२९
हरिद्रा	३१६	४१
हरिद्राभ	६१	१४
हरिद्रु	१६२	१०१
हरिन्मणि	२३२	९२
हरिप्रिया	१४२	२७
हरिमन्थक	३०७	१८
हरिवल्लुक	१६९	१२१
हरिहय	१७	४३
हरीतकी	१४८	५९
हरेणु	१६९	१२०
	३०६	१६
हर्म्य	११९	९
हर्यक्ष	१८६	१
हर्ष	५२	२४
हर्षमाण	३५४	७
हल	३०५	१३
हला	७७	१५
हलायुध	११	२३
हलाहल	९०	१०
हलिन्	११	२४

शब्दः	पृष्ठम्	श्लोकः
हलिप्रिय	१४३	४२
हलिप्रिया	३५०	३९
हल्य	३०४	८
हल्या	३९६	४१
हल्लक	१०६	३६
हव	३८९	८
	४३३	२०७
हविस्	२५८	२७
	३२०	५२
हव्य	२५७	२४
हव्यपाक	२५७	२२
हव्यवाहन	२२	५५
हस	७८	१८
हसनी	३११	३०
हसन्ती	३११	२९
हस्त	२३२	८६
	२३७	९८
	४०७	५९
हस्तवारण	३८७	५
हस्तिन्	२७६	३४
हस्तिनख	१२२	१७
हस्तिपक	२८५	५९
हस्त्यारोह	२८५	५९
हा	४४३	२५६
हाटक	३३३	९४
हायन	५०	२०
	४१५	१०८
हार	२३९	१०५
हारीत	१९९	३४
हार्द	८०	२७
हाला	३५०	३९
हालिक	३२४	६४
हाव	८२	३२
हास	७८	१९
हास्तिक	२७७	३६
हास्य	७७	१७
	७८	१९
हाहा	२२	५२
हि	४४३	२५७
	४४४	५
हिंसा	४३८	२२९
हिंसाकर्मन्	३९२	१९
हिंस्र	३६०	२८

शब्दः	पृष्ठम्	श्लोकः
हिक्का	४५१	८
हिङ्ग	३१६	४०
हिङ्गुनिर्यास	१४९	६२
हिङ्गुल	४५५	२०
हिङ्गुली	१६७	११४
हिज्जल	१४९	६१
हिण्डीर	३३७	१०५
हिन्ताल	१८६	१६९
हिम	३६	१८
	३६	१९
	४५७	२२
हिमवत्	१२४	३
हिमवालुका	२४७	१३०
हिमसंहति	३६	१८
हिमांशु	३४	१३
हिमानी	३६	१८
हिमावती	१७५	१३८
हिरण्य	३३२	९१
	३३३	९४
	३३१	९०
हिरण्यगर्भ	८	१६
हिरण्यबाहु	१०५	३४
हिरण्यरेतस्	२२	५५
हिरुक्	४४४	३
	४४५	७
हिलमोचिका	१८१	१५७
ही	४४५	९
हीन	३८४	१०७
	४१८	१२८
हुतभुक्प्रिया	२५६	२१
हुतभुज्	२२	५५
हुम्	४४२	२५२
	४४८	१८
हूति	६६	८
	३८८	८
हूहू	२२	५२
हृणीया	३९५	३२
हृद्	५५	३१
	२२३	६४
हृदय	२२३	६४
हृदयंगम	६९	१८
हृदयालु	३५३	३
हृद्य	३६७	५३
हृषीक	५८	८
हृषीकेश	९	१८
हृष्ट	३८३	१०३
हृष्टमानस	३५४	७
हे	४४५	७
हेति	२४	५७
	४०९	७१
हेमकूट	१२४	३
हेतु	५४	२८
हेमदुग्धक	१३५	२२
हेमन्	३३३	९४
	४५७	२३
हेमन्त	४९	१८
हेमपुष्पक	१४९	६३
हेमपुष्पिका	१५२	७१
हेमाद्रि	२१	४९
हेरम्ब	१६	३८
हेला	८२	३२
हेषा	२८१	४७
हे	४४५	७
हैमवती	१६	३६
	१४८	५९
	१६३	१०३
	१७५	१३८
हैयङ्गवीन	३२१	५२
होतृ	२५५	१७
होम	२५४	१४
होरा	४५२	१०
ह्राद्	४४९	२२
ह्लाद	१०३	२५
ह्लादिनी	१०४	३०
ह्लिष्ट	३८६	११२
ह्लेष	२१७	४६
	३७२	७०
ह्लेषगवेधुक	१६८	११७
ह्लेषाम्र	१७६	१४२
ह्लादिनी	२०	४७
	३२	९
	४१६	११२
ह्री	७९	२३
ह्रीण	३७९	९१
ह्रीत	३७९	९१
ह्रीबेर	१७०	१२२
ह्रेषा	२८१	४७
ह्लादिनी	१७०	१२४

इति मूलशब्दानुक्रमणिका ।

॥ श्रीः ॥

अथ टीकाटिप्पणीस्थशब्दानामकारादिक्रमेण

शब्दानुक्रमणिका ।

शब्दः	पृष्ठम्	श्लोकः
अक्षीव	१३८	३१
अगरु	२४६	१२६
अगस्ति	३७	२०
अगुरार्शीशपा	१४९	६२
अग्निज्वाला	१६९	११८
अग्रिम	२१६	४३
अग्रीय	२१६	४३
अग्रेदिधिषू	२१०	२३
अघ्य	२१६	४३
अच्छ	१८७	४
अच्छा	९८	१४
अजकव	१५	३५
अजकाव	१५	३५
अजननि	३९६	३९
अजस्रम्	२७	६६
अजहा	१५८	८६
अजिता	१७३	१३१
अजीजक	१५	३५
अङ्कुर	१२८	४
अङ्कोल	१३८	२९
अङ्गण	१२०	१३
अङ्गदा	२३९	१०७
अङ्गरागक	२४८	१३३
अङ्गहारि	७७	१६
अङ्गारिका	३९	२५
अङ्गिरस	३९	२४
अङ्गुरि	२३१	८२
अङ्गुरीयक	२३९	१०७
अङ्गुल	२३१	८२
अङ्गुस्	५२	२३
अङ्घ्रिवल्लिका	१६०	९२
अटरूषक	१६३	१०३
अटा	२६०	३५
अडहु	१४८	६०
अणव्य	३०४	७
अणी	२८४	५६
अतिजगती	२५७	२२
अतिरस	१८४	१६३
अतिरुज	१८८	५
अधरात्	४४९	२३
अधरेण	४४९	२३
अधरेद्युस्	४४८	२०
अधस्	८६	१
अधामार्गव	१५८	८८
अधिपाङ्ग	२८६	६३
अधोलोक	८६	१
अध्यण्डा	१५८	८६
अन	४४६	११
अनघ	२	१
अनध्यक्ष	३७५	७९
अनम	२५१	४
अनमितंपच	३६६	४८
अनार्यज	२४६	१२६
अनिमिष	३१२	३०
अनिरुद्धगृहिणी	१२	२७
अनुकर्षन्	२८४	५७
अनुतर्ष	३५१	४३
अनुत्तर	९७	११
अनुदात्त	६५	४
अनुपम	३१८	४
अनुबन्धी	४१४	९८
अनुष्टुभ्	२५७	२२
अनेडमूक	३६२	३८
अन्तरिक्ष	२९	१
अन्तिका	७६	१५
अन्ध	४१५	४
अन्यतरेद्युस्	४४८	२०
अन्येद्युस्	४४८	२०
अन्वीक्षण	३९५	३०
अन्वेषण	३९५	३०
अपगा	१०४	३०
अपतिनी	२०७	११
अपदान	३८७	३
अपध्वस्त	३६३	९४
अपर	२७८	४०
अपरेद्युस्	४४८	२०
अपांपति	२५	६१
अपांपित्त	२३	५६
अपोगण्ड	२१७	४६
अपोदका	१८१	१५७
अपोदिका	१८२	१५८
अभितस्	४४७	१३
अभिपतित	३७१	६७
अभियाति	२६९	११
अभिशस्ति	२६०	३२
अभीक्ष्णम्	४४३	६६
अभीषु	४३६	२१९
अभ्यसूया	८०	२४
अभ्यास	३७१	६७
अभ्यूष	३१८	४७
अभ्योष	३१८	४७
अमण्ड	१४६	५१
अमा अमामसी अमामासी अमावसी अमावासी	४६	८
अमानस्य	९२	३
अमृतासङ्ग	३३५	१०१
अमोघ	१६४	१०६
अमोघा	१४६	५४
अम्बक	१५	३३
अम्बुनामन्(मूले)		१४५
अम्ब्लिका	१४३	४३
अयस्कर अयस्कार	३४१	७
अयुत	४५७	२४
अरघट्ट	४५४	१८
अरम्	२७	६४
अररि	१२२	१७
अरिष्टा	१५८	८५
अर्गवध	१३६	२३
अर्चि	२३	५७
अर्चित	३६३	९८
अर्जुनी	१८५	१६८
अर्तन	७९	२१
अर्थागम	२७४	२७
अर्दनि	४५५	१९
अर्धचोलक	२४४	११८
अर्बुद	४५७	२४
अल	३३६	१०३
अलगर्ध	८८	५
अलवाल	१०४	२९
अलाम्बु	१८१	१५६
अलिन्	१९२	१४
अलिप्रिया	१४६	५४
अलीक	२३४	९२
अवग्राह	३६६	३९
अवटि	८७	२
अवदान	१८४	१६५
अवदाहेष्ट	१८४	१६५
अवरोह	१३१	११
अववाद	६७ ४१३	१४ ८९
अवलम्बन	३७६	८३
अवि	३७७	२०
अविघ्न	१५१	६७
अव्यय	४	६
अशन	१४३	४४
अशनपर्णी	१७८	१४९
अशोक	१५७	८५
अश्र	२९५	९३
अश्रप	२५	५९
अश्रुप्रलय	७७	१६
अश्वत्थ	१३५	२१
अश्वत्था	१३५	२१
अश्वयुज्	४९	१७
अषाढक	४९	१६
अष्टवर्ग	२७२	१९
अष्टापदी	३५२	४६

शब्दः	पृष्ठम्	श्लोकः
असंहत	२९०	७९
असिक्निका	२०९	१८
असुक्षण	७९	२३
असुरा	७	१२
असूक्षण	७९	२३
असृग्धरा	२२३	६२
अस्रकण्टक	२९२	८७
अस्र	२२३	६४
	४२५	१६४
अस्रपा	२५	५९
अस्रन्त	३११	२९
अहहा	४४३	२५७
अहितुण्डिक	९०	११
अहो	४४५	९
आक्रोश	६८	१५
आक्षारण	६८	१५
आखुपर्णिका	१५८	८८
आगार	११८	५
आगुर्	५७	५
आग्निमारुत	३७	२०
आग्रहायण	४८	१४
आघाट	१२३	२०
आजगव	१५	३५
आजूर्	९१	३
आणवीन	३०४	७
आणि	२८४	५६
आणी	२८४	५६
आतङ्क	७९	२१
आतापिन्	१९४	२१
आतार	९७	११
आत्तगन्ध	३६३	४०
आत्रेय	२१०	२०
आदण्ड	१४६	५१
आनुपूर्व्य	२६१	३६
आपत्ति	२९१	८२
आपस्	९३	३
आपीनस	२१९	५१
आप्य	१७१	१२६
आप्लुतव्रतिन्	२६३	४६
आमण्ड	१४६	५१
आमश्रण	३८८	७
आमर्ष	८०	२६

शब्दः	पृष्ठम्	श्लोकः
आय	२७४	२७
आरभटी	४०९	७३
आरोह	२४२	११४
	४४०	१०
आर्ति	४०८	६८
आर्द्रा	३८४	१०५
आलि	१९२	१४
आलिन्द	१२०	१२
आलु	३१२	३१
आवर्तनी	३४८	३३
आवा(वा)धा	९२	३
आवेग	३९४	२६
आशयाश	२३	५४
आशङ्का	७९	२१
आशिर	२५	५९
आशिस्	८९	७
आशी	८९	७
आश्रय	३९०	११
आसन	२७८	४४
आसन्दिन्	१९१	१२
आसुर	७	१२
आसेचनक	३६७	५३
आह	४४८	१८
इक्षुरसोद	९३	२
इज्जल	१४९	६१
इतरेद्युस्	४४८	२१
इत्वर	३२३	६२
इन्दीवार	१०६	३७
इन्द्रगुप्त	१८४	१६५
इन्द्रसरिस	१५१	६८
इभाख्य	१५०	६५
इरिण	४०६	५७
इर्वारु	१८०	१५५
इला	३२४	६६
इलावृत	११२	६
इली	२९४	९०
इल्वल	३९	२३
इल्वला	३९	२३
ईडिता	१६	३६
ईश्वरी	१६	३६
ईषिका	२७७	३८
	३४८	३२
उ	३७	२१

शब्दः	पृष्ठम्	श्लोकः
उट	११८	६
उत्तरातस्	४४९	२३
उत्तरात्	४४९	२३
उत्तरेण	४४९	२३
उत्तरेद्युस्	४४८	२०
उत्तेजित	२८२	४८
उत्तेरित	२८२	४८
उद्भास	७९	२१
उत्पल	१०७	३९
उत्पला	१७१	१२६
उत्पिञ्जल	२९७	९९
उद	९३	४
उदमान	४५२	९
उदात्त	६५	४
उद्धरण	४०६	५५
उद्धर्षण	८५	३५
उद्धान	३८१	९७
उद्धूमा	३११	२९
उद्वान	३८१	९७
उन्दुरु	१९१	१२
उन्मन्थ	३०१	११५
उन्मादन	१२	२५
उपकण्ठ	१२३	२०
	२८२	४८
उपकारी	१२०	१०
उपजोषम्	४४६	१०
उपयोषम्	४४६	१०
उपासन	२६०	३५
उपोषण	२६१	३८
उपोषित	२६१	३८
उम्य	३०४	७
उरणाक्ष	१७७	१४७
उररी	४४२	२५४
उरुबूक	१४५	५१
उर्वारु	१८०	१५५
उलूखल	१४०	३४
उल्लसन	८५	३५
उषण	३१४	३६
उषती	६८	१८
उषा	१२	२७
	३१२	३१
	४४४	६

शब्दः	पृष्ठम्	श्लोकः
उष्णिह	२५७	२२
ऊर्ध्वकर्मन्	९	१८
ऊर्ध्वज्ञु	२१७	४७
ऊर्ध्वलोक	५	६
ऊर्वरा	१११	४
ऊषणा	१६१	९७
ऊषा	१२	२७
ऊषापति	१२	२७
ऊष्म	५०	१८
ऊष्मन्	५०	१८
ऊष्मा	५०	१८
ऋजीष	३१२	३२
ऋति	९१	२
ऋतीया	७९	२१
ऋभुक्ष	१९	४४
ऋश्य	१२	२७
ऋश्यकेतन	१२	२७
ऋश्यकेतु	१२	२७
ऋष्टि	२९३	८९
ऋष्य	१९०	१०
ऋष्यगन्धा	१७५	१३७
एकतर	३७६	८२
एकपद	११५	१५
एकल	३७६	८२
एडुक	११७	४
एडोक	११७	४
एधा	३८९	१०
एर्वारु	१८०	१५५
एलवालुक	१६९	१२१
ऐकाह्य	३७५	८०
ऐन्द्री	१६	३५
ऐलविल	२८	६९
ओघ	२०१	३९
ओदनपाकी	१५४	७५
ओषधि	१२९	६
औदुबर	३३४	९७
औपवस्त	२६१	३८
औभीन	३०४	७
और्वशेय	३७	२०
क	९३	४
ककुद्	४१३	९२
कङ्कट	२८६	५४
कङ्कणी	२४१	११०

शब्दः	पृष्ठम्	श्लोकः
कङ्कत	२५०	१३९
कङ्कती	२५०	१३९
कङ्केरु	१९५	२२
कच(ठ)	१५१	४
कच्छप	२९	७१
कच्छपी	४१९	२१
कच्छा	११३	१०
कज्जलध्वज	२४९	१३८
कट(ण्ट)किनी	१६२	१०१
कटप्र	१३३	१४
कटभरा	१५७	८५
कटि	२२८	७४
कटुस्नेह	३०७	१७
कटौलवीणा	३४८	३१
कठिल्लक	१८०	१५४
कडंकर	३०९	२२
कणिका	३९९	१६
कण्टक	४६०	३५
कण्टकिन्	१४५	४९
कण्डुरा	१५८	८६
कदल	१६६	११३
कदला	१६६	११३
कदम्बक	१४३	४१
कनीयस्	२१६	४३
कन्दराल	१३८	२९
कन्दु	१९१	१२
कंधर	२३३	८८
कन्यका	४०	२७
कपिप्रिया	१४३	४३
कपिल	३४५	२२
कपिला	१४९	६३
कपिलिका	३५६	१४
कफणि	२३०	८०
कपित्थ	१३५	२१
कम्	३९७	४
कमन्ध	९३	४
कमलिनी	१०७	३९
कम्भारी	१४०	३५
करक	३९८	१२
करटु	१९४	१९
करण्डा	२२४	६६
करवाल	२९३	८९

शब्दः	पृष्ठम्	श्लोकः
करम्ब	३१९	४८
करवालिका	२९४	९१
कराली	२३	५६
कर्कट	४०	२७
कर्कटि	१८०	१५५
कर्कारुक	१९४	१९
कर्कोल्य	२८१	४५
कर्ण	९७	१२
कर्णजलौकस्	१९१	१३
कर्मण्यभुज्	३५७	१९
कर्वर	२५	६०
कर्वरी	३१६	४०
कर्वुर	१८०	१५४
कर्वुरा	२५	६०
कर्वूर	३३६	१०३
कल	३५	१५
कलम्बी	१८२, ३१४	१५८, ३५
कलश	३१२	३१
कलशीसुत	३७	२०
कलहनाशन	१४५	४८
कलाकल	९३	३
कलिकारक	१४५	४८
कल्प	६४, २५४	४, ११
कवाट	१२२	१७
कवित्थ	१३५	१२
कविय	४६१	३५
कवी	४६१	३५
कश्मीरज	२४५	१२४
कषाय	१४४, २४८	४७, १३३
काकलि	७२	२
काकिनी	४५२	९
काक्ष	२३५	९४
काक्षीर	१३८	३१
काञ्चिक	३१५	३९
काण्ड	१९१, ४४०	१२, ५
काण्डस्पृष्ट	२८७	६७
कात्यायन	२०९	३६
कादम्बर	३५०	४०
कादम्बरी	६५	६
कान्तिदायक	२४६	१२६
कापथ	१८४	१६५

शब्दः	पृष्ठम्	श्लोकः
कामावशायित	१६	२६
काम्पिल्ल	१७७	१४६
कायस्था	१४७	५८
कार	२७४	२७
कारोत्तम	३५१	४२
कार्षक	३०३	६
कालकण्ठ	४०३	४०
कालकृत	४१	२९
कालमेषी	१५९	९०
कालंजर	१४	३०
कालंजरी	१६	३६
काला	१६, १४६	३६, ५४
कालायनी	३०४	८
काली	१६	३६
कालीयक	१६२	१०१
कालेय	२२४, २४६	६६, १२६
कालेयक	२४६, २९३	१२६, ८९
काल्य	४४	२
काल्यक	१७४	१३५
काव्या	३९	२५
काश	२१९	५२
काशी	२१९	५२
काश्मीर	२४५	१२४
काश्यप	१११	२
काष्ठ	४७	११
काष्ठकुट्ट	१९३	१७
कासू	४०८	६६
काहल	७३	४
किकि	१९३	१६
किन्नर	७२	४
किंपच	३६६	४८
किंपुरुष	११२	६
किरात	३४४	२०
किरि	१८७	२
किलकिञ्चित	८३	३२
किलाटी	३१७	४४
किलिकिञ्चित	८३	३२
कीला	२४	५७
कुकुटी	१९३	१७

शब्दः	पृष्ठम्	श्लोकः
कुचानन	२२९	७७
कुजा	३९	२५
कुञ्जरपिप्पली	१६१	९८
कुञ्जरा	२७६	३४
कुटप	३३१	८९
कुटर	३२६	७४
कुटस्नेह	३०७	१७
कुटङ्कक	४५४	१७
कुटाटङ्क	२९५	९२
कुटिला	१७३	१३३
कुटीर	२४४	१२०
कुट्टिमित	८३	३२
कुड्मल	१३३	१६
कुड्यमत्स्या	१९१	१२
कुणप	४५६	२०
कुणपी	२६०	३१
कुण्डी	२१४	३६
कुद्य	११७	४
कुन्ती	२९५	९३
कुन्द	२९	७१
कुन्दुरु	१९१	१२
कुपथ	११५	१६
कुमुद्	१०६	३७
कुमोदक	१३	२८
कुम्भ	४०, ४२०	२७, ३४
कुम्भकारी	३३६, ३४०	१०२, ६
कुम्भयोनि	३७	२०
कुम्भीरक	१०१	२१
कुम्भोलु	१४०	३४
कुम्भोलूखल	१४०	३४
कुरंगम	१२	१०
कुरु	११२	६
कुरण्टक	१५४	७४
कुरण्टी	१५४	७४
कुरुवक	१५४	७४
कुल	११८	५
कुलक	१४१	३९
कुलि	२०	७
कुलिक	३४०	५
कुल्माष	३०७	१८
कुल्माषाभिषुत	३१५	३९
कुल्मास	४६६	२१
कुल्या	२३३	८९
कुव	१०६	३७

शब्दः	पृष्ठम्	श्लोकः
कुवर	५८	९
कुवल	१०६	३७
कुवली	१४१	३६
कुवेर	१७१	१२७
कुश	९४	५
कुशल	३५४	२६
कुष्ठनाशिनी	१६८	११६
कुष्ठला	१६८	११६
कुहु	४६	९
कूटक	३०५	१३
कूणि	२१७	४८
कूपिका	९६	१०
कूर्पास	२४३	११८
कूल्माष	३१५	३९
कृतसापत्नका	२०५	७
कृतसापत्निका	२०५	७
कृप	७८	१८
कृपी	७८	१८
कृपीट	२३	५३
कृमि	१९१	१३
कृषक	३०५	१३
कृषिका	३०५	१३
कृष्णकर्मन्	३६४	४६
कृष्णभेदा	१५८	८६
कृष्णसार	१९०	१०
केतु	४०	२६
केतुमाल	११२	६
केली	८४	३२
केशपर्णी	१५९	८९
केशर	१०९	४३
केशरिन्	१८६	१
केशिन्	१७१	१२६
केसराम्ल	१५५	७८
केसरिन्	१५५	७८
कैशिकी	१४०	७३
कोटि	४०३	२४
कोटिन्	१५१	६६
कोटीर	२३७	९७
कोटीवर्षा	१७३	१३३
कोट्ट	४५५	१८
कोट्टवी	२०९	१७
कोरक	२४७	१२९
कोला	१६१	९८
कोलि	१४१	३६
कोश	२००	३७
	३३२	९१
	४३६	२२१
कोशशायिका	२९५	९१
कोशातक	३९८	८
कोष	२४८	१३२
कौञ्च	१७	४०
कौञ्चदारण	१७	४०
कौटज	१५१	६६
कौडविक	३०४	१०
कौमारी	१६	३५
कौमुद	३५	१६
कौलत्थीन	३०४	८
कौवेर	१७१	१२६
कौवेरी	१६	३५
कौशिकी	१०६	३५
	३९८	१०
क्रतु	४०	२७
क्रम	१९१	१२
क्रिमिजग्ध	२४६	१२६
क्रुञ्च	१९५	२२
क्रुधा	८०	२६
क्रोधमूर्च्छित	१७२	१२८
क्रोश	११६	१८
क्रौञ्च	१७	४०
क्राथ	१४४	४७
क्षरण	६८	१५
क्षितिक्षम	१४५	४९
क्षिपणु	२६	६३
क्षीर	४२८	१२९
क्षीवन्	३५९	२३
क्षुताभिजनन	३०८	१९
क्षेपण	९७	१३
क्षेपणि	९७	१३
क्षेपणी	९७	१३
क्षौम	१२०	१२
क्ष्माभुज्	२६७	१
ख	४	६
खक्खट	३७४	७६
खञ्जक	२१८	४९
खड्गायुध	१३	२७
खण्डपर्शु	१४	३१
खनी	१२६	७
खरागसी	१५१	६९
खर्व	३७२	७१
खर्वाखु	१९१	१२
खल	३६५	१७
खलक	१४०	३४
खलाधारा	१९७	२६
खलीन	४६१	३५
खानि	१२६	७
खुरप्र	४५३	२०
खुल्लक	३४३	१६
खोर	२१८	४९
गजभक्षा	१७०	१२३
गञ्ज	११९	८
गड	९९	१७
गडु	२१७	४८
गण	४०४	१२८
गण्डकी	१०६	३५
गद	१३	२८
गदा	१३	२८
गदाह्वय	१७१	१२६
गदित	६२	१
गन्ध	३६३	४७
गन्धकान्त	१०६	३७
गन्धिक	३३६	१०२
गरागरी	१५१	६९
गरेणु	४०६	५२
गर्दभ	१०६	३७
	१४३	४३
गर्व	७६	१५
गर्ह्य	७९	२१
गवलध्वज	३३५	१००
गवाक्षी	११९	७०
गवेडु	३१०	२५
गव्यूत	११६	१८
गातु	२२	५२
गान्धर्व	२२	५२
गायत्रिन्	१४५	४९
गिरा	६२	१
गिरिज	३३५	१००
गिरिजाबीज	३३५	१००
गिरिजामल	३३५	१००
गीःपति	३९	२४
गीर्पति	३९	२४
गीथ	१३	२९
गीर्वाण	६	९
गुच्छ	१३४	१६
	२३९	१०५
गुच्छार्ध	२३९	१०५
गुड	१६४	१०५
गुणिन्	२९१	८३
गुण्ठित	३७९	८९
गुत्स	१३४	१६
गुन्धित	३७७	८६
गुप्ता	१५८	८६
गुम्फित	३७७	८६
गुरु	४२५	२२
गुहारूप	१८८	५
गूरण	३९०	११
गूवाक	१८६	१६९
गृहगोधा	१९१	१२
गृहगोलिका	१९१	१२
गृहमणि	२४९	१३८
गृहालिका	१९१	१२
गृह्य	२०३	४३
गो	४	६
गोकर्ण	८९	७
गोकिल	३२२	५७
गोदन्त	३३६	१०३
गोदावरी	१०६	३५
गोदुह्	३२२	५७
गोधा	१०१	२२
गोनसिन्	८८	५
गोनास	८८	४
गोप	३३७	१०४
गोपघोण्टा	१४१	३७
गोपरस	३३७	१०४
गोपवल्ली	१६६	११२
गोपा	१६६	११२
गोपालिका	१६६	११२
गोमत्	११६	१८
गोमुख	७४	८
गोरण	३९०	११
गोरुत	११६	१८

शब्दः	पृष्ठम्	श्लोकः
गोष्ठी	११४	१३
गोस	३३७	१०४
गौधूमीन	३०४	८
गौरा	१६	३६
ग्रथित	३७७	८६
ग्रन्थित	३७७	८६
ग्रामिणी	४०६	४९
ग्रामीणा	४०५	४९
ग्राह्य	१००	२०
ग्रैवेय	२३९	१०४
घटिक	२९६	९७
घण्टा	७३	४
	१४२	३९
घर्घर	७८	१९
	१९२	१५
घुसृण	२४५	१२४
घृत	९४	५
	२४६	१२९
घृताची	२२	५२
घृतोद	९३	२
घृष्टि	१७९	१५१
घोट	२८०	४३
चक्कलक	१४१	३९
चक्र	९५	७
चक्रवाड	१२४	२
चक्रिका	२९६	९७
चञ्चू	२००	३६
चण्डरुहा	१५८	८६
चण्डा	३६१	३२
चण्डांशु	४१	३१
चण्डी	३६१	३२
चन्द	३४	१३
चन्दनवीजिका	१६८	११६
चन्द्रकान्त	१०६	३७
चन्द्रभस्म	२४७	१३०
चन्द्रभागा	१०५	३४
चन्द्रभागी	१०५	३४
चन्द्रविहंगम	१९६	२२
चन्द्रशाला	१२१	१५
चन्द्रिका	१०५	३४
चन्द्रिमन्	३५	१६
चमर	२७५	३१
चमरी	२७५	३१
चमस	२५७	२४
	४५२	१०
चरण्टी	२०६	९
चरिण्टी	२०६	९
चरित	८०	२६
चरित्र	८०	२६
चर्चिका	१६	३५
	२४४	१२२
चर्पट	२३२	८४
चर्मण्वती	१०६	३५
चविका	१६१	९८
चव्या	१६१	९८
चाङ्ग	१७५	१४०
चाङ्गेरी	१८२	१५८
चाणकीन	३०४	८
चान्द्रभागा	१०५	३४
चान्द्रायण	२६५	५२
चामरा	२७५	३१
चामुण्डा	१६	३५
चारित्र	८०	२६
चारु	३६७	१२४
चारुधारा	१९	४५
चारुलोचन	१२	२७
चार्वी	३५	१६
	१७९	१५२
चाल	१२१	१४
चालन	३१०	२६
चास	१९२	१६
चित्रकूट	१२४	३
चित्रपुङ्ख	२९२	८७
चित्ररथ	२२	५२
चिन्तिया	८१	२९
चिरजीवक	१७६	१४२
चिरजीविन्	१२४	३
चिरम्	४४३	१
चिरात्	४४३	१
चिरात्तिक्त	१७६	१४३
चिरिण्टी	२०६	९
चिरिबिल्व	१४४	४७
चिरे	४४३	१
चिरेण	४४३	१
चिलीचिमि	९९	१८
चिल्लिका	१८२	१५८
चिवु	२३४	९०
चिहुर	२३६	९५
चुस्त	४६०	३४
चूर्ण	४५२	९
चूषा	२७९	४२
चोच	२२३	६२
चोदनी	१५९	९२
च्यवना	१६१	९८
छगला	१७४	१३७
छदन	३४	१३
छन्दस्	६५	४
छेद्य	१९२	१४
जगत्	२६	६२
जगती	४०९	२२
जगल	३५१	४१
जघन्य	३७६	१
जङ्गिल	२८८	७३
जटा	१४	३३
जटि	१४	३३
जटुल	२१८	४९
जतुक	१९६	२६
जतुका	१७९	१५३
जतूका	१९६	२६
जनित्री	२१२	२९
जपा	१५४	७६
जम्	२१४	३८
जम्बु	१३४	१९
जम्बूक	१८८	५
जयन्ती	२०	४६
जयवादिनी	१९	४५
जर्तिल	३०७	१९
जलजन्तुका	१०१	२२
जलद	३२	७
जलूका	१०१	२२
जलोका	१०१	२२
जलौरगी	१०१	२२
जलौकस्	१०१	२२
जल्पित	६२	१
जागर्ति	३९२	१९
जाग्रिया	३९२	१९
जाङ्गलिका	१५८	८६
जाति	४०८	१३२
जातुधान	२५	६०
जानपद	११३	८
जारी	२१४	३५
जिह्म	४२१	१४२
जिह्मशल्य	१४५	४९
जीवना	९३	३
	१७६	१४२
जीवनी	९३	३
जीवनीय	९४	५
जीविताह्वय	१७३	१३२
जुगुप्सा	३९५	३२
जू	४५०	२
जोषा	२०३	२
ज्येष्ठ	४०४	१५
ज्येष्ठा	४९	१६
	४०४	१२
ज्योतिस्	६४	४
ज्योत्स्ना	३९८	८
ज्योत्स्नावृक्ष	२४९	१३८
ज्योत्स्नी	१६८	११८
ज्यौत्स्नी	३९८	८
झरा	१२६	५
झरि	१२६	५
झरी	१२६	५
झर्झर(ल)री	७४	८
झल्लरी	७४	८
झषा	९९	१७
झिल्लरी	४५२	१०
झिल्ली	१९७	२८
झीरुका	१९७	२८
टङ्कपति	२६८	७
टेर	२१८	४९
डिण्डीर	३३७	१०५
तक्रकूर्चिका	३१७	४४
तक्रवासना	१४१	३८
तङ्क	४६०	३३
तटाक	१०३	२८
तटाग	१०३	२८
तनूनपाद्	२३	५३
तन्तुल	१६४	१०६

शब्दः	पृष्ठम्	श्लोकः
तन्त्र	४१७	११८
तन्त्रवाप	३४०	६
तन्त्रवाय	१९१	१३
	३४०	६
तन्द्रा	८५	३७
तन्द्रि	८५	३७
तन्द्री	४२७	१७६
तपती	१०५	३४
तम	५४	२९
तमस	८७	३
तमसा	८७	३
तमा	४५	४
तमाल	२४५	१२३
तमि	४४	४
तर	२३८	१०२
तरणी	९६	१०
तरवारी	२९३	८९
तरी	९६	१०
तल	४३२	१६८
	२३२	८४
तलमीन	९९	१८
तलित्	३३	९
तल्लज	२०६	८
तल्लजी	२०६	८
तसर	३९३	२४
ताटङ्क	२३८	१०३
तापन	४१	२५
	४१	३१
तापी	१०५	३४
तामर	१०७	४०
तामस	४५	५
तार	३७	२१
तारक	३७	२१
तारव	१८८	५
तालक	१७२	१३१
तालवर्णक	३३६	१०३
तिक्तकरोहिण	१५७	८५
तित्तिर	१९९	३५
तिन्तिडीका	१४३	४३
तिन्तिला	१४३	४३
तिमिंगिलगिल	१००	२०
तिरस्करणी	२२४	१४०
तिलक	१४२	४०
तिलोत्तमा	२२	५२
तुका	३३८	१०९
तुकाशुभा	३३८	१०९
तुकाक्षीरी	३३८	१०९
तुङ्गी	४४	४
तुणि	१७२	१२८
तुण्डकेरी	१७५	१३९
तुत्थ	३३५	१०१
तुत्थरसाञ्जन	३३५	१०१
तुन्दिभ	२१६	४४
तुन्दिल	२२२	६१
तुन्न	३३५	१०१
तुभ	३२७	७६
तुम्बक	१८१	१५६
तुम्बा	१८१	१५६
तुम्बि	१८१	१५६
तुम्बुरु	२१	४८
	२२	५२
तुरङ्गमुखभाण्ड	४६१	३५
तुला	४०	२७
तुवरी	१७३	१३१
तुषोदक	३१६	३९
तूणा	२९३	८८
तूणी	१६०	९५
	२९३	८८
तूद	१४२	४१
तूपर	४२५	१६५
तूबर	५८	९
	४२५	१६५
तूवरी	१७३	१३१
तृणता	२९१	८३
तृणशून्य	१५२	६९
तृतीयप्रकृति	२१५	३९
तृफला	३३९	१११
तृषा	८१	२७
	३२१	५५
तृष्णक	३५८	२२
तृष्णा	३२१	५५
तेन	४४४	३
तैलाभ्यक्ता	१९७	२६
तोयद	३२	७
तोयधर	३२	७
त्रप्स्य	३२०	५१
त्रिणता	२९१	८३
त्रिपुटी	१६४	१०८
त्रिफला	१६९	११९
त्रिष्टुभ्	२५७	२२
त्वक्पत्री	३१६	४०
त्वक्पुष्प	२१९	५३
त्वक्पुष्पी	२१९	५३
त्वच्	१७४	१३४
त्वच	१७४	१३४
	२२३	६२
	३१६	४०
त्वरि	३९४	२६
दक्ष	९४	५
दक्षिणतस्	४४९	२३
दक्षिणा	४४९	२३
दक्षिणात्	४४९	२३
दक्षिणाहि	४४९	२३
दक्षिणेन	४४९	२३
दग्धकाक	४०४	२१
दण्ड	२९०	७९
दण्डक	४६०	३३
दण्डधार	२५	५९
दण्डुभ	८८	५
दधि	२४६	१२९
दधिकूर्चिका	३१७	४४
दधिमण्डोद	९३	२
दन्तुर	४३३	२०५
दम्	२१४	३८
दमूनस्	२३	५६
दरा	१२६	६
	४२९	१८४
दरोदर	४२६	१७१
दर्दर	१०२	२४
दर्दुर	१२४	३
दर्वी	३१३	३४
दर्शक	२६८	६
दशपुर	१७३	१३१
दशपूर	१७३	१३१
दशेन्धन	२४९	१३८
दान्ती	३०	१
दायित	३६३	४०
दारा	२०४	६
दारुनिशा	१६२	१०१
दारुवलिभुज्	१९५	२२
दार्विका	१६९	११९
दार्वी	१६९	११९
दाश	३४३	१७
दाशपूर	१७३	१३१
दास	९८	१५
दिधिषु	२१०	२३
दिव	४	६
दिवान्ध	१९२	१५
दिवाभीत	१९२	१५
दिवि	१९१	१५
दिवोकस्	५	७
	४३७	२२६
दिव्यगायन	२२	५१
दिशा	३०	१
दीपक	१६६	१११
दीपवृक्ष	२४९	१३८
दीर्घकोषिका	१०२	२५
दीर्घजङ्घ	१९५	२१
दुण्डुभ	८८	५
दुर्जय	२९०	७९
दुष्कुलीना	१७२	१२८
दुष्प्रधर्षिणी	१६७	११४
दूरदर्शिन्	२५२	६
दूषी	२२५	६७
दृष्टिकृत्	१७१	१२७
देवकी	१०	२१
देवखात	१२६	६
देवत्व	२६५	५२
देवन्	२१३	३२
देवभूय	२६५	५२
देवल	२१	४८
देववधू	३०	१
देवाजीव	३४२	११
देवितृ	१५५	७७
दैवकी	१०	२१
दोषा	४५	६
	४४५	२०
दोषातिलक	२४९	१३८
दौल्य	२७१	१६
द्युति	३६	१७
द्युत्ति	३६	१७

शब्दः	पृष्ठम्	श्लोकः
द्रुघण	८	१७
द्रुघन	२९४	९१
द्रुणि	९७	११
द्रुणी	९७	११
द्रुत	३८२	९
द्रू	४५०	२
द्रोण	१९२	१४
द्रोणि	९७	११
द्वाःस्थित	२६८	६
द्वाःस्थितदर्शिक	२६८	६
द्वाःस्थितदर्शिन्	२६८	६
द्वारप	२६८	६
द्विज	४०२	४
द्वितीयाकृत	३०४	९
द्विसम्बाकृत	३०४	९
द्विसीत्य	३०४	९
द्विहल्य	३०४	९
द्वेष्य	२६९	११
धटी	४५४	१७
धनदावास	१७	४०
धनीयक	३१५	३८
धनु	१४०	३५
	२९१	८३
धनुस्	११६	१८
	१४०	३५
धनू	२९१	९३
धन्याक	३१५	३८
धन्विन्	४०	२७
धमन	१७२	१३०
धरण	११०	२
धरा	११०	१
धर्षण	२०७	११
धर्षणी	२०७	११
धर्षिणी	२०७	११
धानाचूर्ण	३१९	४८
धान्य	३१५	३८
धान्यक	३१५	३८
धार्त	३५१	४३
धिषाङ्ग	२८६	६३
धुवित्र	२५७	२३
धुस्तुर	१५५	७७
	१८०	१५५

शब्दः	पृष्ठम्	श्लोकः
धूपक	२४६	१२७
धूममहिषी	३६	१८
धूमिका	३६	१८
धूसरी	६०	१३
धूस्तूर	१५५	७७
धृतराष्ट्र	१९६	२४
धृतराष्ट्री	१९६	२४
धृष्णु	३५९	२५
धोरण	२८२	४८
धोरित	२८२	४८
धौरित	२८२	४८
धौरितक	२८२	४८
धौर्य	२८२	४८
ध्वनित	३२	८
न	२६	६३
नक्तचारिन्	१९२	१५
नखाशिन्	१९२	१५
नगौका	१९९	३३
नघट	२६	६३
नटभूषण	३३६	१०३
नटसंज्ञक	३३६	१०३
नत	२४६	१२६
ननान्द	२१२	२९
नन्दक	२९३	८९
नन्दिनी	२१२	२९
नन्दीवर्त	१००	२०
नभस्	४	६
नभस	१९९	३४
नरायण	९	१८
नर्तक	७४	८
नर्मद	१०५	३२
नल	१०७	३९
नवपत्रिका	१०९	४३
नसा	२३३	८९
नस्तोत	३२४	६३
नस्या	२३३	८९
नागसुगन्धा	१६७	११४
नाभि	४२०	१२९
नाम	४४२	१३
नार	९३	४
नारङ्ग	१४१	३८
नारिकेल	१८५	१६८
नार्यङ्ग	१४१	३८
नाली	१०८	४३

शब्दः	पृष्ठम्	श्लोकः
निकषा	३४८	३२
निकाय	११८	५
निग्राह	३९६	३९
निचुल	२४३	११६
नित्यम्	२७	६५
निमेष	४७	११
नियातन	३९४	२७
नियुत	४५७	२४
निरीष	३०५	१३
निरुक्त	६४	४
निर्गन्धन	३०१	११३
निर्धार्य	३५६	१३
निर्यास	१४४	४७
निर्यूष	१४४	४७
निर्वहण	७७	१५
निवृत्त	२४२	११३
निश्	४४	४
निशाव(च)र्मन्	८७	३
निशैड(त)	१९५	२१
निषद्वरी	९६	९
निष्कुटी	१७१	१२५
निष्ठा	२०३	२६
नीचिकी	३२५	६७
नील	२९	७१
नीलकण्ठ	४०३	२१
नीलाङ्गु	१९१	१३
नृत्त	७५	१०
नेत्रमल	२२५	६७
न्यूङ्ख	४५४	१७
पक्षती	४३	१
पक्षस्	२००	३६
पङ्क्ति	२५७	२२
पञ्चमी	७२	१
पट	१२१	१४
पटकुटी	२४४	१२०
पटच्चर	३४६	२५
पटवास	२४४	१२०
पटह	७२	४
पट्टन	११६	१
पट्टिस	४५६	२१
पणस	१४८	६१
पण्ड	२५२	५

शब्दः	पृष्ठम्	श्लोकः
पण्डा	५५	१
	२५२	५
पताका	२९०	७९
पत्रवाह	२९२	८७
पत्रशवर	३४५	२०
पथ	११५	१५
पद	४२	३३
पद्मपाणि	४१	२९
पद्मवर्ण	१७७	१४५
परमद	२४६	१२६
परस्वध	२९५	९२
पराक	२६५	५२
पराजित	३४४	१८
पराभव	७९	२२
परायण	३८६	२
परिदेवना	६८	१६
परिभाषा	६८	१४
परिवेश	४२	३२
परिस्यन्द	२४९	१३७
परु	१८३	१६२
पर्वत	२१	४८
पर्वन्	४५	७
पर्शु	२२६	७०
	२९४	९२
पर्श्वध	२९४	९२
पर्षद्	२५५	१५
पल	४३२	८९
पलंकष	१६१	९८
पलाशिन्	९	१८
पलिघ	४०१	२७
पल्लि	१२३	२०
पवन	१३५	२०
पवि	३०	१
पशु	१४	३०
पशुहरीतकी	१३७	२७
पष्ठवाह्	३२४	६३
पष्ठौही	३२५	७०
पस्त्य	११८	५
पांसु	२९६	९८
पाखण्ड	२६३	४५
पाञ्चालिका	३४७	२९
पाटली	१४२	३९

शब्दः	पृष्ठम्	श्लोकः
पाणिमूल	२३१	८१
पादपा	१२८	५
पादात	२८७	६७
पादातिक	२८७	६७
पारत	३३५	९९
पारापत	१९२	१४
पारापार	९२	१
पारिषद्य	१५	३५
पार्थ	१४४	४५
पार्षद	१५	३५
पार्षद्य	१५	३५
पार्ष्णि	२६९	१०
	२९०	७९
पालङ्क्या	१८२	१५८
पिचिण्ड	४६६	७७
पिचु	१४२	४०
पिचुतूल	३३७	१०६
पिचुमन्द	१४९	६२
पिच्चोण्डक	२२५	६७
पिञ्जर	४५९	३१
पिट	४५५	१७
पिटक	३१०	२६
पिण्ड	३१०	२६
	३५८	२६
पिण्डफला	१८१	१५६
पिण्डीर	१५०	६४
पितृसधर्मन्	३५६	१३
पिप्पल	१६१	५
पिप्पलिका	१९७	२६
पियालक	१४०	३५
पिशिता	२२३	६३
पिशुना	३६५	४०
पिष्ट	५	६
	११२	६
पीडा	३४७	२९
पीतचन्दन	१६२	१०१
पीतदारु	१६२	१०२
पीयु	१९२	१५
पुञ्ज	२०२	४१
पुटकिनी	१०७	३९
पुण्डरीकक	१७१	१२७
पुण्डरीश	१५५	७७
पुण्ड्रक	१८४	१६३
पुण्ड्रेक्षु	१८४	१६३
पुत्रश्रेणी	१५८	८८
पुत्री	२११	२८
पुनर्जन्मन्	२५१	४
पुनर्नव	२३१	८३
पुनर्भू	२१०	२३
पुनर्वसु	९	१८
पुर	४४१	५
पुरंध्रि	२०५	६
पुलक	८५	३५
पुलस्त्य	४०	२७
पुलह	४०	२७
पुष्कर	३४४	२०
पुष्करी	३४४	२०
पुष्पदन्त	४७	१०
पुष्पधनुस्	१२	२६
पुष्परथ	२८३	५१
पुष्पवन्त	४७	१०
पुस्त	४६०	३४
पूतिक	१४५	४८
पूतीकरञ्ज	१४५	४८
पूरुष	५४	२९
पूर्वा	३७१	६५
पूलक	२२८	७५
पूष	१४२	४१
पृक्का	१७३	१३३
पृथज्	४४४	३
पृथवी	१११	३
पृश्नि	५	६
	४२	३३
पृषत्	९५	६
	१९०	१०
पृषत	१९०	६
पृषन्ति	१९०	६
पृषातक	२५७	२३
पृष्ठवह	२८१	४६
पेडा	३४७	२९
पेयूष	२१	४८
	३२१	५४
पेशीकोष(श)	२००	३७
पौण्ड्र	१८४	१६३
पौण्ड्रक	१८४	१६३
पौर्णमास	४६	७
पौलोमी	१९	४५
प्सा	२३७	९७
प्रकुञ्चक	३३१	८९
प्रचारण	३८७	३
प्रचित	६५	४
प्रजाहित	३३२	२७
प्रज्ञ	२१७	४७
प्रणय	४२०	१३५
प्रतति	१३०	९
प्रतिकर्मन्	२४४	१२१
प्रतिग्रह	२४९	१३९
प्रतिदान	३२८	८०
प्रतिमा	३४९	२५
प्रतिमुख	७६	१५
प्रतिश्या	२१९	५१
प्रतिसर	२४०	१०८
प्रत्यय	२७०	१३
प्रथम	३७५	२२
प्रदिश	३१	५
प्रदेशिनी	२३१	८१
प्रभा	२९	७०
प्रमदावन	१२८	३
प्रमातामह	२१३	३३
प्रमुख	३६८	२२
प्रमृत	३०३	२
प्रयुत	४५७	२४
प्रयुद्धार्थ	३९४	२६
प्रवर	२४६	१२६
प्रवर्त	३३१	८९
प्रवर्हण	३६९	५८
प्रवल्ही	६५	६
प्रश्नदूती	६५	६
प्रसन्ना	३५०	१४
प्रसर	३९३	२५
प्रसरक	१४०	३५
प्रसरणी	२९६	९६
प्रसार	३८९	९
प्रसृत	३७८	८५
प्रसृता	३७८	८५
प्रसेव	७३	७
प्रस्ता	४२५	१६१
प्राकाम्य	१६	३६
प्राघुण	२६०	३४
प्राचीनबर्हिस्	२३	५६
प्राचीर	११७	३
प्राजापत्य	२६५	५२
प्राज्ञ	२५२	५
प्राण	२६	६२
प्राप्ति	१६	३६
प्राबृषा	५०	१९
	१५८	८६
प्रास्थिक	३०४	१०
प्रिया	३२४	६६
प्रियाल	१४०	३५
प्रेष	४३६	२१९
प्रैयङ्गवीण	३०४	८
प्रोत	२४२	११५
प्रोथ	२२८	७५
प्रोप्त	३७८	८६
प्लवंगम	१८७	३
प्लवन	१७३	१३१
प्लीहा	२२४	६६
फञ्जिका	१५९	८९
फटा	९०	९
फणिभुवन	८६	१
फल	२४८	१३२
फलोदय	५	६
फल्गुन	४८	१५
फल्गुनी	४८	१५
फालवह	३०५	१४
फाल्गुनी	४८	१५
बडिश	९९	१६
बन्ध	३९१	७
बन्धनी	३२६	७३
बन्धूर	३७२	६९
बर्ह	१७३	१३२
बर्हि	२३	५४
बर्हिरुक्त	२३	५४
बर्हिःशुष्मन्	२३	५४
बलज	४०२	३१
बहुकरी	१२३	१८
बाणपुत्री	१२	२७
बाणाख्य	१८३	१६२
बादल	३४	१२
बालपत्र	१४५	४९
बालुका	१६९	१२१
बाली	२३६	९५
बिल	१२६	६
बाल्हिक	३१६	४०
बुध	४१४	१३

शब्दः	पृष्ठम्	श्लोकः
बृहती	२४३	११७
	४१०	२२
बृहतांपति	३९	२४
बोधि	१३५	२०
ब्रह्माणी	१६	३५
	६२	१
ब्राह्मणी	१७३	१३३
ब्राह्मी	१६	३५
भगवत्	१४	३०
भक्ष्य	३०४	७
भण्डिर	१४९	६३
भद्र	१८२	१६०
	२६६	५८
भद्रमल्लिका	१५२	७०
भद्रमूषिक	१९१	१२
भद्राश्व	११२	६
भन्द	५३	२५
भर	३३०	८७
भरत	२१	४८
भर्म्य	१५	३३
भल्ल	१८७	४
भल्लूक	१८७	४
भविका	३३१	८९
भाग	५३	२८
भाङ्गीन	३०४	७
भाण्डीरी	१५९	९१
भानुफला	१६७	११३
भाम	८०	२६
भारत	३४२	१२
भारती	४०९	७३
भाल	२३५	९२
भालुक	१८७	३
भालूक	१८७	३
भास्वर	१७१	१२६
भिदिर	२०	४७
भिया	७९	२१
भुजादय	२०	४७
भूतनाशन	३०७	१८
भृकुटि	८६	३७
भृकुंस	७५	११
भृङ्गरज	१७९	१५१
भृङ्गरजस्	१७९	१५१

शब्दः	पृष्ठम्	श्लोकः
भृत्या	३४२	१७
भेरि	७३	६
भोग	२९०	७९
भ्रम	२६०	३५
भ्रातृ	२१३	३४
म	५३	२७
मकर	२९	७१
	४०	२७
	२९०	७९
मकुष्ठ	३०७	१७
मङ्कुर	२५०	१४०
मङ्गला	१६	३७
मज्जा	१३१	१२
मणि	२३१	८१
मणिबन्ध	२३१	८१
मण्डल	२९०	७९
	२९२	८५
	३४५	२२
मण्डलाहित	१८८	५
मण्डलिन्	८८	५
मण्डूकपर्णी	१५९	१५८
मत्तकासिनी	२०४	४
मद	३६८	१२९
मदायन्ती	१५२	७०
मद्र	७२	२
मधु	४१४	१६३
मधुक	२९६	९७
मधुयष्टि	१६५	१०९
मधुर	१७६	१४२
मधुस्रवा	१७६	१४२
मध्य	७४	९
मनोज	१२	२६
मनोजवस्	३५६	१३
मनोजवस	३५६	१३
मनोजवा	३५६	१६
मन्द	४०	२६
मन्दर	४	६
मयष्टक	३०७	१७
मरिच	३१४	३५
मरुत्	१७३	१३२
मरुत	२५	६२
मर्दित	३७७	८६

शब्दः	पृष्ठम्	श्लोकः
मर्मरी	७०	२३
मर्या	२७४	२६
मलय	१२४	३
मलयू	१४९	६१
मलिनाम्बु	४५३	१०
मवित	३७७	८६
मषी	४५३	१०
मसि	४५३	१०
मसी	४५३	१०
मसीजल	४५३	१०
मसुर	३०७	१७
मसुरा	३०७	१७
मसूरा	३०७	१७
महती	४०९	१०८
महाकुल	२५१	३
महाकुलक	१४१	३९
महादान	३८७	३
महापद्म	२९	७१
महाबला	१७९	१५२
महारस	३१५	३९
महावीर्या	१६८	११६
महाशङ्ख	२३५	९२
महाशूद्रा	२०८	१३
महास्नायु	२२५	६६
महिमन्	१६	३६
महिर	४१	२९
महिला	१७३	१३३
मही	४३८	६६
महेन्द्राणी	१९	४५
महेला	२०४	२
माणिबन्ध	३१६	४२
मातृष्वसेय	२११	२५
मातृष्वस्रीय	२११	२५
मात्रा	३७०	५
माध्वीक	३५१	४१
मान	२०४	३
माय	३४२	११
मारिष	१७४	१३६
मारी	१२	२५
मार्ताण्ड	४०	२९
मार्ष	७६	१४
मार्षक	७६	१४

शब्दः	पृष्ठम्	श्लोकः
मालय	२४७	१३१
माला	१७३	१३३
मालुधानी	८९	६
मावती	१७३	१३३
माष्य	३०४	७
माषीण	३०४	७
मास्	३४	१३
माहाराजिक	६	१०
माहेश्वरी	१६	३५
मिथुन	४१७	२७
मिश्रि	१६३	१०५
मिशी	१६३	१०५
मिहिका	३६	१८
मीन	४०	२७
मुकुट	२३८	१०२
मुकुन्द	२९	७१
मुकुर	२५०	१४०
मुकुष्टक	३०७	१७
मुकूलक	१७७	१४४
मुक्त	४५९	३०
मुक्तक	१४१	३९
मुख	७६	१५
मुञ्ज	१८३	१६२
मुनि	४६१	१३३
मुशली	१९१	१२
मुषलिन्	११	२४
मुषली	१९१	१२
मुषा	३४८	३३
मुष्टि	२३२	८६
	३३१	८९
मूत्रपुट	२२७	७३
मूत्राशय	२२७	७३
मूर्ण	३८१	९५
मूर्त	३७४	८२
मूर्धज	२३६	९५
मूषक	१९१	१२
मूषी	१९१	१२
	३४८	३३
मृग	२९६	९८
	४१०	
मृगया	३९५	३०
मृणाल	१८४	१६४